No-106
1

श्रीमद्भागवत पुराणम्

प्रथम
प्रारम्भ

१

भा०श्री०
१

॥श्रीमतेरामानुजायनमः॥ वंदेवात्स्यमहोवलार्यतनयंवात्सल्यवारांनिधिंश्रीशैलेशगुरुंश्रियःपतिमपिप्राचार्यपारंपरीम्॥ तुर्यंव्यू
हमशेषहेतुमजितस्याजंतदुत्संगजंदेवर्षिप्रवरंपराशरसुतंव्यासंचवैयासकिं॥१॥ श्रीशैलपूर्णादखिलेतिहासपुराणजालंसमवाप्ययेन
प्रावर्तिसंदर्शयितेवशिष्यभावंमुनिंलक्ष्मणमाश्रयेहं॥२॥ श्रीरामानुजयोगिपूर्णकरुणापात्रंमहांतंततः॥ संप्राप्ताखिलवेद्यविद्यमखि
लान्वयोद्रविडान्व्याकरोत्॥ वेदांतान्कुरुकेश्वरंगुणनिधिंश्रीविष्णुचित्तंगुरुंवात्स्यंतंवरदंचवाग्विजयजंवासार्यमीडीमहि॥३॥ श्रीम
द्भागवतंपुराणमखिलंव्याख्यातमेभिर्व्याहृतम्॥ व्यासार्यैर्यतिराजभाष्यवचसामर्हंबुधानांमुदे॥ मंदानामपिमादृशामवगमायाहंतयादर्
शितंपंथानंसमुपाश्रितोविरचयेयामल्पसारंस्फुटाम्॥४॥ तत्रभगवान्पाराशर्यःसत्यवत्यांभगवदंशेनावतीर्णोबादरायणोऽखिलहेय
प्रत्यनीककल्याणगुणगणेनपरेणब्रह्मणाविरचितेऽस्मिन्ब्रह्मादिस्तंबपर्यंतेदेवमनुष्यपशुपादपस्त्रीपुंसचातुर्वर्ण्यचातुराश्रम्यादि
भेदभिन्नेजगतितदुपकल्पिततदाराधनोपयुक्तकरणकलेवरान्चतुर्मुखादिपरंपरावर्तिततन्निःश्वसितरूपधर्मार्थकाममोक्षपुरुषा
र्थचतुष्टयतत्साधनावबोधप्रधानवेदानपिस्वस्वकर्मवासनानुवर्तिबुद्ध्यनुगुणप्रवृत्तकर्मानुगुणगर्भजन्मजरामरणादिसांसारिकदुःखो
पहताननवगतवेदार्थानूज्ञानानवलोक्यानुकंपितमनाःस्वदुर्जिज्ञापयिषयातेषांदुर्बोधंप्रतिजन्महितोपदेशेन। मातापितृसहस्रेभ्यो
प्यतिवत्सलतमंभागवत्यात्मकंवेदव्याचिख्यासुस्तावत्स्वशिष्येणभगवताजैमिनिनामहर्षिणापूर्वभागंव्याख्याप्यस्वयमुत्तरभागंस
मीचीनैःशारीरकनयैर्व्याख्यायप्रायशःपूर्वभागोपबृंहणात्मकंपंचमवेदत्वेनप्रसिद्धंश्रीमहाभारताख्यमितिहासंनिर्मायप्राधान्येन
वेदांतार्थोपबृंहणात्मकंश्रीमद्भागवताख्यंपुराणरत्नंचिकीर्षुस्तावदिष्टदेवतोपासनात्मकंमंगलमाचरति। प्रथमश्लोकेजन्माद्यादिना १

भा० प्र०
८९

द्वितीयांतानां वर्णयामासेत्युत्तरत्रान्वयः। हे मुने महोपायाः। ससाधनाः। धर्मार्थकाममोक्षानपि यथावन्नानाविधेष्वाख्यानेष्वितिहासेषु च यत्तत्तं त
द्वीक्षो वर्णयामास। एवं प्रश्नान् धर्मान् प्रवदतः योगिनः। छंदमृत्योः स्वछंदानुसारिमृत्युर्यस्य तस्य भीष्मस्य यो वांछित उत्तरायणः स कालः प्रत्यु
पस्थितः। यदा तस्य स कालः प्रत्युपस्थितः। यश्छंदमृत्योर्योगिनः। वांछितः। स चापि क उत्तरायण इति वान्वयः। २८। २९। तदेति। यदा स का
लः प्रत्युपस्थितः। तदा सहस्रणीः सहस्राणां कुरुपांडवादिरूपाणां नायकः। सहस्रं स्ववशत्वानां नयति। सद्गतिं प्रापयतीति वा। स भीष्मः

धर्मार्थकाममोक्षांश्च सहोपायान्यथा मुने। नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित्। २८। धर्मं प्रवद
तस्तस्य स कालः प्रत्युपस्थितः। यो योगिनश्छंदमृत्योर्वांछितस्तूत्तरायणः। २९। तदोपसंहृत्य गिरः सहस्रणी
र्विमुक्तसंगं मन आदिपूरुषे। कृष्णे लसत्पीतपटे चतुर्भुजे पुरःस्थिते मीलितदृग्व्यधारयत्। ३०। विशुद्धया धा
रणया हताशुभस्तदीक्षयैवाशुगतायुधश्रमः। निवृत्तसर्वेंद्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजञ्जनार्दनं
॥ ३१ ॥

गिर उपसंहृत्य विरम्य मुक्तः संगो देहतदनुबंध्यादिसंगो यस्य तन्मनः पुरःस्थिते लसंतौ पिशंगौ पीतौ पटौ यस्य तस्मिन् कृष्णे व्यधारयत्। क
थंभूतः। आ निमीलिते दृशौ दृष्टी येन सः। निमेषणमप्यकुर्वन् कृष्णमेव पश्यन्। तद्विग्रहध्यानैकप्रवणं चित्तमकरोदित्यर्थः। ३०। विशुद्ध
या धारणया भगवद्विग्रहानुध्यानात्मिकया हतं निरस्तमशुभं भगवत्प्राप्तिविलंबावहं प्रारब्धं यस्य। तदीक्षयैव भगवद्दर्शनेनैवाशुगता निरस्ता
आयुधश्रमात् जा व्यथा यस्य। निवृत्ताः सर्वेषामिंद्रियाणां वृत्तयो विभ्रमः। देहात्मादिभ्रमश्च यस्य सः भीष्मः। जन्यं जननयोग्यं देहं विसृजन् स्तु

न्नन् जनार्दनं सर्वदृक् स्वहरं श्रीकृष्णं तुष्टाव ॥ ३१ ॥

८९

धर्मान् विशिनष्टि । पुरुषस्वभावः । ज्ञत्वाज्ञत्वशक्तत्वाशक्तत्वादिरूपेण विहितान् कर्त्तव्यतया विधिबोधितान् यथावर्णं यथाश्रमं ब्राह्मणादिवर्णा
नां ब्रह्मचर्याद्याश्रमाणां च योग्यात् योग्यार्थं यथाशक्त्या व्यवस्थाभावः । वैराग्यरागाववकाशकामौ तावेवोपाधी ताभ्यां माम्नातान् उभयलक्षणान् उ
भयविधान् प्रवृत्तिनिवृत्तिभेदभिन्नान् यथैकस्यैवाग्निहोत्रादिकर्मणोऽग्निहोत्रं जुहोति । जुहुयात्स्वर्गकामः । यावज्जीवेत्तावत्समग्निहोत्रं जुहुया
दिति स्वर्गाधिकारजीवनाधिकाररूपाभ्यामुपाधिभ्यामेव भेदः । एवं वैराग्यरागोपाधिभ्यां प्रवृत्तिधर्मत्वेन निवृत्तिधर्मत्वेन चाम्नातान् वस्तुत एक

पुरुषस्वभावविहितान् यथावर्णं यथाश्रमं । वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ॥ २६ ॥
दानधर्मान् राजधर्मान् मोक्षधर्मान् विभागशः । स्त्रीधर्मान् भगवद्धर्मान् समासव्यासयोगतः ॥ २७ ॥

रूपान् वर्णाश्रमादिधर्मान् इत्यर्थः ॥ २६ ॥ आम्नातानीत्यनेन वैदिकधर्मानेवापृच्छदिति सूचितं । तथा स्मार्तधर्मान् पृच्छदित्यभिप्रायेणाह । दा
नधर्मानिति । राजधर्मानिति शास्त्रोक्तान् मोक्षधर्मान् । पंचरात्रादितंत्रोक्तान् ॥ तत्राप्यवांतरभेदाभिप्रायेण पुरुषस्वभावभेदाभिप्रायेण विभागशः
यदुक्तं । भागवद्धर्मान् स्वस्त्रच्छ्रवणकीर्तनादयः ॥ समासव्यासयोगतः ॥ संक्षेपविस्ताराभ्यां युक्तान् । शास्त्रेषु प्रतिपाद्यत्वेनेति समासव्यासयोगाः
सार्वविभक्तिकस्तसिः । समासव्यासयोगात् ॥ यद्वा समासं व्यासयोगान् संक्षेपयोगान् विस्तरयोगांश्चापृच्छत् । संक्षिप्तत्वेन विस्तृतत्वेन चापृच्छदि २ श्रीः २

भा॰ प्र॰ एवंसामान्यतः पृष्ट्वा विशेषतः पृच्छति । कस्मिन्निति । इयंभागवती कथाः कस्मिन्युगे प्रवृत्ता इत्येकः सकृतत्त्वकथनेनैव सर्वं मृतकपरः के
४५ न हेतुना निमित्तेनायं ॥ कुतः कस्माद्धेतोः केन पुंसा संचोदितः । कृष्णो मुनिर्द्वैपायनः । इमां संहितां भागवतरूपां कृतवानिति चतुर्थः
३ ॥ पद्यत्रं ॥ स तु संश्रावयामास महाराजं परीक्षितमिति तदयं परमानंदस्वामि प्रेत्य तद्धेतुभूते शोषयेतः शुकं विशिनष्टि । तस्येत्यादि
निर्विशेषणैः ॥ तस्य कृष्णस्य मुनेः पुत्रः शुको महायोगी यो गिरिश्रेष्ठः श्रेष्ठतमेवाह ॥ समदृक् स ॥ देवमनुष्यादिशरीरजातं प्रधानपरि
णामरूपत्वेन पराकेन च जीववर्गं ज्ञानैकाकारत्वेन सर्वत्रानुस्यूतं परमात्मानं सत्यज्ञाना ... न्त्यालगुणाकारत्वेन चैते त्वेवं रूपस

कस्मिन्युगे प्रवृत्तेयं स्थाने वा केन हेतुना ॥ कुतः संचोदितः कृष्णः कृतवान्संहितां मुनिः ३ ॥ तस्य पुत्रो
महायोगी समदृङ् निर्विकल्पकः ॥ एकांतमतिरुन्निद्रो गूढो मूढ इवेयते ॥ ४ ॥ ॥ ॥ ॥

संपश्यतीति समदृक् । एवंविधमेव समदर्शित्वं विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पंडिताः समदर्शिनः ॥ ॥ श्री ॥
त्यादावप्यधीयते ॥ निर्विकल्पः ॥ भेदानुसंधानरहितः देहगतविकल्पानां देवमनुष्यादीनामात्मनि नारोपयिता । यद्वा ॥ अत्रात्मा हरि
त्मकत्वतंत्रवस्तुरहितः ॥ एकांतमति । एकांताऽव्यभिचारिणी निश्चितेति यावत् । मतिर्भगवति यस्य तथाभूतः उन्निद्रः जागरूकः ४५
या निशा सर्वभूतानां तस्यां जागर्ति संयमी सुतरां विधजागरूक इत्यर्थः । गूढस्वमहात्म्यानाविहारशीलः । मूढोऽज्ञ इवेयते दृश्य

इत्थं लब्धावसरः शौनकः पृच्छतीत्याह । व्यास इतीति । अत्र व्यास उवाचेति पद्यते युक्तं चैतत्कृत्स्नप्रबंधस्य व्यासोक्तिरूपत्वेऽपि परी
क्षिच्छुकशौनकसूतप्रश्नोत्तररूपेण प्रणीतत्वात्तत्र तत्र परीक्षिदादिप्रश्नोत्तरत्वज्ञापनाय राजोवाच शुक उवाचेत्यादीनां पाठेऽपि यत्र शौ
नकसूतप्रश्नोत्तरप्रकारानुकाररूपाः श्लोकाः दृश्यंते ॥ तेषां सर्वेषामादौ शौनकसूतप्रश्नोत्तरत्वज्ञापनाय तेषां व्यासोक्तित्वज्ञापनाय
तदादौ व्यास उवाचेत्यस्य पाठावश्यंभावात्क्वचित्तदभावेप्यर्थतस्तस्य विवक्षितत्वाच्छौनकादेर्हुं नियतप्रश्नृत्वादेरभावाद्देवामुक उ
वाचेति पाठायोगात् ॥ एतेनात्रैव व्यास उवाचेति पद्यते न क्वाप्यन्यत्रास्मिन्पुराणे । तत्र मूलं मृग्यमिति केषांचिदाशंका प्रशस्ता ॥ ६

व्यास उवाच ॥ इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्त्रिणः ॥ वृद्धः कुलपतिः सूतं बह्वृचः शौनकोऽब्रवीत् १ ॥
शौनक उवाच ॥ सूत सूत महाभाग वद नो वदतां वर ॥ कथां भागवतीं पुण्यां यदाह भगवाञ्छुकः ॥ २

इतीत्थं ब्रुवाणं सूतं संस्तूय दीर्घसत्रिणो ब्रह्मसत्रे एव दीक्षितानां मुनीनां कुलस्य समूहस्य पः ॥ कुलशब्दस्य नित्यसापेक्षत्वादेव तस्य
गुरुकुलमित्यादाविव समासः ॥ वृद्धः ज्ञानेन वयसा च वृद्धः ॥ बह्वृचः ऋग्वेदी शौनकोऽब्रवीत् ॥ १ ॥ तदेवाह । सूत सूतेत्यादिभिर्द्वाद
शभिः ॥ हे सूत सूत । आदरात्संभ्रमाद्वा द्विरुक्तिः । हे महाभाग भाग्यवन् । भाग्यमत्र निखिलतत्त्वज्ञानित्वरूपं । हे वदतां वर भागवतीं
श्रीमद्भागवतपुराणप्रतिपाद्यां कथां नोऽस्मभ्यं वद ॥ भागवतं विशिनष्टि । यद्भागवतं भगवाञ्छुकश्चाह परीक्षित इति शेषः । इत
स्यापि भागवतस्य बहुत्वानिष्टेरेतस्य यदित्यनेन परामर्शः ॥ २ ॥

भा.पु. ८३ यादेवद्यांतर्गतेनारदांगिरसोमेकारीरकत्वं सर्वंवृत्यांतर्गततद्वचमोपि मङ्कृतत्वमित्यर्थः॥ यद्यपिस्वस्य सर्वभूतात्मकत्वकथनेनैव सर्वभूतवचसांस्ववचनत्व
मपिकथितप्रायं तथापिनामरूपयोरपि स्वशारीरकत्वज्ञापनाय पृथगुक्तमित्यवगंतव्यं शास्त्रतोशास्त्रयोनित्वोरातेनसोपाधिकशब्दार्थयोरुक्ते दत्त॥५१॥ न
नुमेवं यो मतपा हवा चानां देवादिशरीराणामात्माजीवः स्मरत्कं भवान्नेत्याह॥ लोकमिति॥ लोके परिदृश्यमानाचित्प्रपंचे देवादिशरीररूपे विततं व्याप्तं स्वंतः
प्रविश्य धारकतयाव्याप्तं प्रत्यगात्मानं॥ वितीयं तानापृथक्पृथग्व्योऽहते नान्वयः॥ तथा त्वात्मनि प्रत्यगात्मनि मतत्तं पोतं धार्यत्वेनावस्थितं लोकं चेत्येवमुभ
यं मया त्मनां तः प्रविश्य भर्त्रा व्याप्तं॥ उक्तमुभयमपिहि तं चेमदाधेयं कृतमित्यर्थः॥ लोके विततमात्मानमित्यनेन चेतनेजीवस्य व्याप्तिरुक्ता॥ लोकं चात्मनि॥
त्यनेनाचेतनस्यजीवधार्यत्वमुक्तं उभयमित्यनेन चेतनाचेतनयोरीश्वरधार्यत्वं व्याप्यत्वं ईश्वरस्य स्वस्य धारकत्वं व्यापकत्वं चोक्तं अतो नाहं जीवभूता॥
लोके विततमात्मानं लोकं चात्मनि संततं॥ उभयं च मया व्याप्तं मयि चोभयं कृतं॥५२॥ यथा सुषुप्तः पुरुषो विश्वं
पश्यति चात्मनि॥ आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः॥५३॥ स्मेत्यत्र भूतशब्दो चेतनविशिष्टचेतनपरः इति भावः॥ आ
त्मानमित्येकवचनं जात्यभिप्रायकं॥ यद्वा एकामेव जीवव्यक्तिमुपादायकमत्रात्मेस्थदेवादिशरीरेषु व्याप्तिरुच्यते ततोत्रजीवैक्यवादभ्रमो न कर्त्तव्यः॥
५२॥ ननु कथमेतद्विमर्शनीयं सर्वोपि चेतनानि प्रत्यगात्मनि व्याप्तानि उभयत्तु तयाप्तं इत्यपेक्षायां बुद्धिं नेपणाय दृष्टांतमाह॥ यथेत्यादिचतुर्भिः॥ तावज्जीवः
स्वरूपविमर्शनाय दृष्टांतशिक्षयति यथा सुषुप्तः॥ स्वप्नदृष्टांत पुरुषः सुषुप्त इति न सुषुप्त्यवस्थ जीव उच्यते॥ स्वप्न उत्थित इत्यनंतरोक्तत्वात् सुषुप्तो वि
श्वदर्शनानुपपत्तेश्च स्वप्नेस्वप्नावस्थायां कस्मिंश्चित्स्वप्नदृष्टयोत्मनि विश्वं पश्यति॥ गजस्कंधारोहणादेशांतरगमनराज्याभिषेकशिरश्छेदादिस
र्वं स्वशरीरजातं पश्यति स्वकृतिउपाधिकं पश्यतीत्यर्थः॥ दृष्टतोमयामात्रात॥ उत्थितो जागरदवस्थायां प्राप्तः स्वात्मानमेकदेशस्थं क्वचिदपवस्का॥
दिप्रधानशरीरमात्रवर्त्तिनं मन्यते स्वप्नावस्थानप्रक्षस्वरूपव्यक्ता अपितु स्वप्नजागरदवस्थाद्वयान्वितन्त्र कृत्स्नोपाधिकस्वप्नदृष्टैकजीवकर्मा॥ रामः ८२
नुगुणमीश्वरस्य गजादिप्रदायांनुप्रवेशपूर्वकं ततद्दर्शनरूपेतिदृष्टांतेविवक्षितोर्थः॥ ५३

ननु मह्यमुपदिष्टमिति तन्नेत्यो न तोषवति च मुक्तवानतः कथं तद्व्याहृतं त्वदनुशासनमेवेति जानीयां किं च तयोरेव वचोहमस्मरावं न तु तवेत्यत्राह अहं ही
ति॥ तावत्सर्वाणि भूतान्यहमेव सर्वाण्यपि भूतानि मदभिन्नान्येव किं तु तत्रापि ये मां विजानीयाज्ज्ञानी तावत्मैव मे मनमित्युक्ताभिमानविषयावंगिरो
नारदौ मदभिन्नाविति भावः॥ अतस्तद्व्याहृतं मदनुशासनमेवेति तात्पर्यं॥ ननु सर्वभूतान्यहमेवेत्युक्तो भेदः किं मदात्मको घट इति वस्तुस्वरूपाभेदल
पत्यान्वैस्मवे विकाराश्रयतापतिस्तत्राह भूतात्मा सर्वभूतानामन्तरात्मा देवो जातस्त्यादिवच्छरीरात्मकभावत्रयुक्तः सर्वभूतैः सह मम नाभेदः वि
काराांशाश्शरीरगतानां जीवे वात्स्यादीनामिव न मयीव मत्किंशितितात्पर्यं॥ ननु सर्वभूतान्यहमेवेत्युक्तो भेदः वकुशोद्दृष्टः ब्राह्मणोऽहं कृशोऽहं स्थूलोह
मित्यादि॥ न चेदं रजतमितिवद्बाधितो व्यपदेशः नीलोत्पलमित्यादावभेदव्यपदेशस्यापि वाध्यत्वापत्तेः॥ अपजातिगुणादीनां व्यक्तिगुण्यपेक्ष्य कल्पितव्य
कारतयातद्वपितच्छद्वयोर्व्यक्तिगुणिपर्यंततत्वान्नवाधस्तर्हि शरीरस्यात्माप्यपकल्पितव्यकारत्वेनतद्वपितच्छद्वयोरपितात्पर्यं तत्वादयमप्यवाधित

अहं वै सर्वभूतानि भूतात्मा भूतभावनः॥ शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू॥५२॥

वन्नतुजात्यादेर्व्यक्त्यादावपृथक्कल्पितप्रकारत्वं प्रत्यक्षगम्यं॥ जातिव्यक्त्योरुभयोरपि प्रत्यक्षविषयत्वदात्मनस्तु तदविषयत्वात्कथं शरीरस्यात्मा
प्यपृथक्कल्पितविशेषणत्वमिति चेन्नात्र जातिव्यक्त्योरिव शरीरात्मनोरेकप्रमाणविषयत्वमप्याप्यात्मापृथक्कल्पितप्रकारत्वं शरीरस्यात्तमेव नः
हि भिन्नसामग्री वेद्यत्वमात्रेणात व्याहतं तु शाकयमन्यथा चक्षुर्घ्राणेंद्रियवेद्ययोः पृथिवीगंधयोरपि नियतप्रकारप्रकारिभावानुपपत्तेरित्यन्यत्र
विस्तरः॥ न केवलं शरीरात्मभावनिबंधन एवायं भूतैर्ममाभेदः॥ अपितु कार्यकारणभावनिबंधनश्चेत्याह॥ भूतानि चिदचिदात्मकानि देवमनुष्यादीनि भा
वयतस्तस्मादयति स्वस्मादेवोपादानभूतादिति भूतभावनः कार्यकारणयोरभेदस्त्वारंभणाधिकरणादिभाष्येवक्तृ पपत्तिभिर्निरूपितः यदाशंकितं तयोर
वचोऽस्मरावं तत्तदेतित्राह शाद्वेति शब्दात्मकं यद्ब्रह्म परं यच्छद्वेन वाच्यमर्थात्मकं तच्च यद्ब्रह्मद्वयमेव ब्रह्मणी मम शाश्वती तनू यावत्सत्तमपृथक्सिद्धेम
न प्रमाणान्तरं तत्पर्यः स्वस्मिंस्तुल्ये हेतोर्ब्रह्मशब्दः शब्दार्थात्मकयोः प्रपंचदलयोः स्वशरीरत्वाद्पचरितः परब्रह्मणः स्वतनुकत्वकथनं दृष्टान्तार्थमेय

भा॰ष॰ त्पत्तिस्थितिलयानामीशाय कर्त्रे कुयोगिनां कर्त्रे इति षष्ठी ॥ कुयोगिभिर्भेदावब्रह्मात्मकस्वतंत्रवस्तु दृष्टा दूरवर्त्तितात्तु मदशक्या आत्मनो गतिः स्व
८१ रूपस्वभावश्च यस्य तां तु मदशक्यस्वरूपस्वभावायेत्यर्थः ॥ परमहंसमायात्यंतश्चायतुभ्यं नमः ॥ ४७ ॥ अनंतगुणमहात्म्यं कथयन्नमस्करोति ॥ यमिति
श्वसंतं वकुस्यामिति संकल्पतो भ्राम्रियमाणं यं त्वामनु विश्वविश्वसृजः ब्रह्मादयः श्वसंति आरांगंति त्वदायत्तस्वसत्तालाभेन व्याप्रियंत इत्यर्थः ॥ के
चितानं सर्वे प्रपंते यं चित्तवृत्तयः ॥ अनंतच्चकंति अनुचरं अनुसरंति ज्ञानमपि त्वदधीनमित्यर्थः ॥ यस्य तव मूर्ध्नि कृतत्तं भूमंडलं सर्षपायति सर्षपवदा
चरति यत्कृतत्तं भूमंडलभारमपि सर्षपवन्मन्यत इत्यर्थः तस्मै सहस्रशिरसे भगवते तुभ्यं नमो अनेन मननं भवानंगीकरोत्वित्यर्थः ॥ ४८ ॥ चित्रकेतुने

यं वै श्वसंतमनु विश्वसृजः श्वसंति यं चेकितानमनु चित्तय उच्चकंति ॥ भूमंडलं सर्षपायति यस्य मूर्द्ध्नि
तस्मै नमो भगवतेस्तु सहस्रमूर्द्ध्ने ॥ ४८ ॥ श्रीशुक उवाच ॥ संस्तुतो भगवानेवमनंतस्तमभाषत ॥ विद्याध
रपतिं प्रीतश्चित्रकेतुं कुरूद्वह ॥ ४९ ॥ श्रीभगवानुवाच ॥ यन्नारदांगिरोभ्यां ते व्याहृतं मेनुशासनं ॥ संसि
द्धोसि तया राजन् विद्यया दर्शनाच्च मे ॥ ५० ॥

संस्तुतो भगवाननंतस्तमभाषते त्याह मुनिः ॥ संस्तुत इति ॥ इत्थं मननगुणमहात्म्येन स्तुतो भगवाननंतः ॥ प्रीतः सन् हे कुरूद्वह तं विद्याधराणां पतिं
चित्रकेतुमभाषत ॥ ४९ ॥ तदेवाह यदित्यादिना सिध्यसीत्यंतेन ॥ नारदांगिरोभ्यां तुभ्यं यद्व्याहृतमुक्तं तदनुशासनं चक्रातिपुरुषेश्वरस्वरूपविष
यकं विविच्य ज्ञापनरूपं वचः ममैव मत्संबंधे वांतरात्मरूपमत्संकल्पादेवताभ्यां ते व्याहृतं ईश्वरस्य च सोढा हेयहृच्छासु कृततत्पावित्सोः कारा
वतश्चेवपश्चात्तु हृल्यं सात्त्विकैः संभाषणीय डेतानि द्याचार्यप्राप्तिहेतवः इत्युक्तरीत्या तदनुग्रहमंतरेण सदाचार्यप्राप्तेर्दुर्लभत्वादिति भावः ॥ अतो ८१
हे राजन् तया नारदोपदिष्टया मंत्रविद्यया मम दर्शनाच्च संसिद्धोसि ॥ ५० ॥

अथापि वार्यकृतं महोकारं स्मरत्त्वमस्मत्कृतार्थतामाह ॥ अथेति ॥ हे भगवन्नयातोधुनानवावलोकनेन परिमृष्टा निरस्ता आशयोविस्तमला येषांतादृशावयंकृ
तार्थाः जाता इत्यर्थः ॥ यस्मात्तावकेन प्रियोद्विजातिनिनोस्यर्थं महं मचममविप्रियः अस्मत्करीत्यानतवनिरतिशयप्रियेणसुरर्षिणा श्रीनारदेनोदितं त्वद्दर्शनेनअस्म
त्कृतार्थत्वेनिमित्तं मंत्ररूपं वचोगदितं तत्तथैवमधुनाजातं ॥ अन्यथामद्रोपकर्तस्मदाचार्यानन्नुमहेकथंभवत्येवं विधःपरमोभ्युदयास्तदनन्हेयन्म
कथंभवेदित्यर्थः ॥ ४४ ॥ कथंभवेदित्यनेनेदृशाभ्युदयानर्हत्वं स्वस्यसूचितं तच्चभवतासर्वज्ञेनसर्वं विदितमेव किंमयाविज्ञाप्यमतधुनाविज्ञिप्यत
इत्याह ॥ विदितमिति ॥ हे अनंत ऽहलोकेजनैर्यद्यदाचरितं तत्समस्तं जगदात्मनः कृत्स्नजगदंतर्यामितयासर्वैषां बुद्धीदृत्तीद्रष्टुस्तवाज्ञातं केवलंतत्त
वविदितमेवततोमादृशोविज्ञाप्यंपरमगुरोस्तवकियत्तथापासवितुरिवखद्योतैः ॥ यथानंतकल्याणगुणाकरस्यतवगुणैकदेशमपिस्तोतुमसमर्थःऽ

अथ भगवन्वयमधुना त्वदवलोकपरिमृष्टाशयमलाः सुरऋषिणा यदुदितं तावकेन कथमन्यथा भवति ॥ ४५ ॥
विदितमनंतसमस्तं तव जगदात्मनो जनैरिहाचरितं विज्ञाप्यं परमगुरोः कियदिव सवितुरिव खद्योतैः ॥ ४६ ॥
नमस्तुभ्यं भगवते सकलजगत्स्थितिलयोदयेशाय दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ॥ ४७ ॥ इत्युपावि
दितमेवेत्याह विदितमिति ॥ हे अनंत त्रिविधपरिच्छेदरहित इहलोके जनैर्जननमरणाभ्यामनिरत्वदाहितज्ञानभक्तिभिर्मोहशेषैर्यद्यदाचरितमंतर्बहिरिंद्रियैर्क्री
डितं तत्सर्वं जगदंतरात्मनः सर्वज्ञस्यतवविदितमेव ॥ परिच्छिन्नमतेर्ममवाङ्मनसाभ्यामनंतस्यसर्वज्ञस्यतवगुणावर्णनेयावन्नगच्छतितत्त्वयाविदितमेवेत्य
र्थः ॥ अतः परमगुरोर्ज्ञानप्रदातानांनारदादीनामपिज्ञानहेतुपितवेदमयाविज्ञाप्यं विज्ञापनीयं किंयत् मयाकृतेषुगुणस्तवनंतवकियदल्पमित्यर्थः
यथासवितुर्लोकत्रयप्रकाशकस्यखद्योतैः कीटविशेषैः कृतं द्योतनं किंयदत्यल्पमितिवदित्यर्थः ॥ ४६ ॥ एवंसर्वस्यतस्तुतावनधिकारमाविष्कृत्यकेवलंत्व
गुणाननुस्मरन्केवलंनमस्करोतिनम इतिद्वाभ्यां ॥ भगवते षाड्गुण्यपरिपूर्णायनिरस्तदोषायसकलस्यजगतःस्थितिलययोरिदमुत्पत्तेरप्युपलक्षणंच

एवं धर्मो तस्य न पुरुषार्थहेतुत्वं प्रत्युतानर्थहेतुत्वं चोक्तं त्वदाराधनरूपधर्मस्य त्वनिष्टपरिहारेष्टप्राप्तिहेतुत्वमव्यभिचरितं इत्याह ॥ नेति ॥ सत्यः का
मः सत्यसंकल्पः इति श्रुत्युक्तः संकल्पस्य पतवेक्षायेन सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ॥ अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ तेषामहं समु
द्धर्ता मृत्युसंसारसागरात् । भवामि नचिरात्पार्थ मय्यावेशितचेतसां इति कृतः संकल्प इत्यर्थः ॥ न व्यभिचरत्यस्य प्राप्त्यो न भवति यया हेतुभूतया ईक्षया
यो भागवतः भागवततत्त्वसंबंधी त्वदाराधनरूपो धर्मोभिहितः प्रोक्तः पंचरात्रादिनेति शेषः भागवतधर्माभिधाने उक्तविधेः दैवहेतुरस्य पात्वधर्मो न भिन्न
याकेवलविषयात्मके मतिसर्वेस्मिन् लोके समुद्वर्त्तेव्याभावादीक्षानिर्विषयास्यादिति भावः ॥ एवं चेक्षायाः सत्यत्वान्नद्विषयत्वापादकभागवतधर्मोप्यनि
ष्टपरिहारेष्टप्राप्तिहेतुत्वेन व्यभिचरति इति तात्पर्यं ॥ यत एवमत एव त्वदीक्षाभिज्ञास्तद्विषयापादिकया चराचरात्मकमनुतमस्य हेयाहयष्विया त्व

न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः ॥ स्थिरचरसत्त्वकदंबेष्वपृथग्धियो यमुपासते त्वार्याः ॥ ४३
न हि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः ॥ यन्नाम सकृच्छ्रवणात्पुक्कसकोपि विमुच्यते संसारा

दात्मकं त्वद्ध्यानमस्यत्वायमुक्तपेउपासते धर्ममिति विभक्तिविपरिणामेनानुषंगः ॥ अनुतिष्ठंतीत्यर्थः ॥ त्वामिति च शेषः ॥ ४३ ॥ एवं समाप्य ॥ त् ४४
प्रकोपप्रक्रमसमाश्रितकार्यापादकगुणपर्विकथनमुखेन तदाराधनरूपधर्मस्यैव निरतिशयश्रेयःसाधनत्वमुक्तं ॥ इदानीं स्वस्य कृतार्थतामभिव्यंकु
वंस्त्वद्दर्शनस्य कृतार्थतापादकत्वं कैमुत्यन्यायेनाह ॥ नहीति ॥ हे भगवन् नृणां भवद्दर्शनेनादखिलपापक्षयो भवतीति इदमघटितं न हि किंतु घटितमेव
कुतः यस्मान्नाम्नस्तव नाम्नः सकृदेव श्रवणाद्देवप्रुक्कसकोपि हीनजातिरपि संसारबंधाद्विमुच्यते ॥ नामश्रवणस्यैव ईदृशं माहात्म्यं किं पुनः
साक्षात्त्वद्दर्शनस्येति भावः ॥ ४४ ॥

यत्र धर्मे त्वमहं तव ममेति च यान्नृणां मत्यत्रान्यस्मिन् अधर्मे विषमा मतिरहंकारममकाररूपा नास्तिस इत्यर्थः ॥ सर्वज्ञेन भ्रमविप्रलिप्सादिदोषरहितेन प
रमकारुणिकेन भवता निहितत्वादहंकारममकाररहितहिंसादिगर्भत्वाभावात्सर्वस्यापि सुखात्मकत्वानुसंधानगर्भत्वान्निरतिशयानंदहेतुत्वाच्च त्वदाराधनरू
पो धर्मः सर्वोत्कृष्टः ॥ तथा तद्व्यतिरेकेषु भाताश्रोषिशवादिविषयसुखार्थं दंभमात्सर्यैर्हिंसादिस्वभावत्वाभावात्सर्वेऽनंतसुखदत्वादिगुणयुक्तत्वाच्चोत्कृष्टाः इतरध
र्मास्तु घातारस्तत्र विपरीता इति भावः ॥ तदेवाह विषमधियेति ॥ अहं ममेत्याद्यहंममाभिमानेन रचितो यो देवतांतराराधनरूपः स च न विशुद्धः रागद्वेषा
दिगर्भत्वाद् अधर्मप्रचुरः शत्रुमरणादिकामनागर्भत्वात् क्षयिष्णुरस्थिरफलश्च विषमधिया रचितमाह ॥ कइति ॥ स्वं कर्तारं परं च द्रुह्यतीति स्वपरद्रुक् तस्य तत्र शरी
रायासकारित्वाद् अतः संसृतिरूपानर्थहेतुत्वाच्च स्वद्रुक् परत्र हिंसादिकामनागर्भत्वात् परद्रुक् तेन धर्मेण देवतांतराराधनरूपेण निजपरयोः कः क्षेमः किं चि

विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्र ॥ विषमधिया रचितो यः स ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः ॥ ४१
कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा धर्मेण स्वद्रोहात्तव कोपः परसंपीडया च तथाधर्मः ॥ ४२ ॥

द्रपीत्यर्थः परस्य हृतां
दृष्टांतादपि चाराधिकर्मणा मुमूर्षोर्न दोभमस्तथा तत्कर्तुरपीत्यर्थः ॥ अस्तु वा कर्तुस्तादात्विकः कश्चित् क्षेमस्तथापि स कियानर्थः पुरुषार्थः अतितुच्छ इत्यर्थः
क्षयिष्णुत्वादिति भावः ॥ एवं पुरुषार्थहेतुर्न भवतीत्युक्त्वा अनर्थहेतुश्चेत्याह स्वद्रोहात्तस्यैवाहितकरणाद्धेतोस्तवेश्वरस्य कोपः निग्रहः स्यादयं स्वस्यैवाहितमा
चरति किमुत परस्येत्यतोऽधर्मतीव निग्राह्यः स्यादेवं तव कोपः स्यात् ॥ आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ॥ यजंते नामयज्ञैस्ते दंभेनाविधिपूर्वकं ॥ अ
हंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ॥ मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः ॥ तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ॥ क्षिपाम्यजस्रमशुभानासुरीष्वे
व योनिषु ॥ इत्यादिना प्रतिज्ञातोऽतिनिग्रहः स्यादिति भावः ॥ तव कोपः स्यात्तावन्मात्रं ॥ परसंपीडया परस्य द्रोहाद्धेतोरधर्मस्तथा स्यादेवं स्वकृतेन ध
र्मेणापरस्य यथा दृशी पीडा भवेत्तादृशी पीडाहेतुरधर्मोऽस्यानुष्ठित धर्मेणानुस्यादित्यर्थः ॥ ४२

नाः हे परम पुनर्न रोहंति न बंधाय भवंति नित्यनिरतिशयसुखानुभवरूपानंदापादका एव भवंति न पुनर्जन्ममरणादिरूपबंधाय भवंतीत्यर्थः पुन
र्न रोहे दृष्टांतः यथा करंभबीजानि भर्जितबीजानि पुनर्न रोहंति नांकुरी भवंति तद्वत्॥ पुनररोहे हेतुं वदंस्तं विशिनष्टि॥ ज्ञानात्मनीति॥ गुणमयः सत्वादि
प्रकृतिगुणविकारः स न विद्यते यस्मिन्सोऽगुणमयस्तस्मिन् ते नित्यासंकुचितापरिच्छिन्नज्ञानस्वरूपे त्वयि गुणात्मककर्मवश्यत्वात्तन्मूलकसं
कुचितज्ञानवान्कर्मसाध्यमोक्षाभिप्रायप्रवणतज्ज्ञानानिष्टपरिहारकत्वतदिष्टप्रापणसमर्थत्वादिगुणयुक्तत्वाच्च परिचिताः॥ कामधियो न पुनरर्थ
रूपबंधाय भवंति॥ देवतांतरभंगात्तद्विपरीतगुणत्वात्तेषु रचिताः स्वर्गादिकामधियो न प्रपंतीति भावः॥ तदेवाह गुणगणत इति॥ अस्य विरिंचिप्रभृतेः
किंचनपर्यंतस्य जीववर्गस्य गुणानां सत्वादिप्रकृतिगुणानां ये गुणविकाररूपाः संघाः तेभ्यः गुणगणतः द्वंद्वजालानि सुखदुःखादीनि बंधकसमूहा भव

कामधियस्त्वयि रचिता न परम रोहंति यथा करंभबीजानि॥ ज्ञानात्मन्यगुणमये गुणगणतोस्य द्वंद्वजालानि॥
जितमजित तदा भवता यदाह भागवतं धर्ममनवद्यं॥ निःकिंचना ये मुनय आत्मारामा यमुपासतेपवर्गाय॥ ४०॥

ति॥ उपास्यदेवतांतरस्यापि उपासकतत्कर्मवश्यत्वादियुक्तत्वात्तत्सेवाप्रस्खलितस्य पुंसस्तादृशसेवा तदनिष्टपरिहारेष्टप्रापणमनभ
वंतीति भावः॥ एवं ज्ञानशक्त्याद्याश्रितकार्यपादकगुणपूर्त्तिरप्युक्ता एवं समाश्रयणीयत्वोपयुक्तपरत्वादिगुणपूर्णत्वेन देवतांतरेभ्यो वैलक्ष
ण्यं तस्यैव समाश्रयत्वं चोक्तं भवति॥ एवं देवतांतराद्भवानितरेभ्यः परः॥ अतएव त्वदाराधनात्मकस्त्वदभिहितो धर्मः तदनुष्ठातारश्च ततस्त्वेदेवताराधनरू
प धर्मेतरनुष्ठातृभ्यो विलक्षणा इत्याह जितमिति द्वाभ्यां॥ अजिताजितशब्दप्रवृत्तिनिमित्ताश्रय भवता यथा जितं सर्वं स्ववशीकृत्य तस्मात्परत्वेनावस्थितं एत
देवाजितशब्दप्रवृत्तिनिमित्तमित्यपि सूचितं तया धर्मेणाजितोपि त्वदाराधनरूपधर्मेणापि जितमित्यर्थः सोपि सर्वोत्कृष्ट इत्यर्थः कोसौ धर्मस्तत्राह॥ यं भागवतं
भागवतस्त्वदाराधनरूपमनवद्यं निर्दुष्टं धर्मं भवानाह पंचरात्रगीतादिमुखेनोक्तवान् पंच धर्मे निष्किंचनाः अनन्यप्रयोजनाः आत्मारामाः त्वद्गुणानुभ
वपरा ये मुनयः अपवर्गाय मुक्तये उपासते अनुतिष्ठंति॥ ४०॥

मात्वापेक्षयोत्कृष्टगुणवत्त्वं तेन रहितत्वं वस्तुपरिच्छेदः स हि जगत्कारणत्वात्तदुपपत्तिक्रमाद्वेश्यमस्य संकल्पत्वाख्याद्दित्तगुणजातस्य कथनेनाभिहितस्तथापर
व॥३६॥एवंद्विविधपरिच्छेदराहित्यमुक्त्वा देशपरिच्छेदराहित्यं तेनैव दर्शयन्नेवं त्रिविधपरिच्छेदराहित्यमेव त्वमनंतशब्दस्य प्रवृत्तिनिमित्तमित्याह॥क्षित्या
दिभिरिति॥एवंभूतस्य दशगुणोत्तरैरविवेकैः क्षित्यादिभिः पृथिव्यबवनिवाय्वाकाशाहंकारमहद्भिः॥सप्तभिरावृतः एष परिदृश्यमानोंडकोशः ईदृशीभि
रंडकोटिभिः सह सप्तद्वितीयत्वे तत्त्वं ततोनंतः विभुत्वादनंतत्वादनंतशब्दवाच्यस्यार्थः॥एतमंडकोशं विशिनष्टि॥यत्र एतस्मिन्नंडकोशेणुकल्पः जीवः पत
ति संसरति॥यद्वा यस्मादीदृशीभिरंडकोटिभिः सह एषोंडकोशः यत्र यस्मिन् त्वयि अणुकल्पः पतति परिभ्रमति वर्त्तमनंतः सर्वस्य चेतनाचेतनात्मा
कांडशोऽस्य व्याप्यत्वादिदमत्र नास्तीत्येवंरूपदेशपरिच्छेदराहित्यमपि परत्वापादकं भवतीत्यर्थः॥३७॥एवं तस्य समाश्रयणीयत्वोपयुक्तगुणव

क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैरंडकोशः॥यत्र पतत्यणुकल्पः सहांडकोटिकोटिभिस्त
दनंतः॥३७॥विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वां॥तेषामाशिष ईश तदनु विनश्यंति यथा
राजकुलं॥३८॥

त्त्वादेवतांतरस्य तद्भावं वदन् तमेव स्तौति
विषयतृष इति॥ये विषयेषु शब्दादिषु तृट् तृष्णा अभिलाषो येषां ते
फलकामा नरा एव पशवः ते विभूतीः तद्विभूतीभक्तान् रुद्रादीनुपासते न तु परं सर्वोत्कृष्टं विभूतिपतिं उपासते हे ईश तेषां विषयतृषां विभू
तिदत्ताश्च वा आशिषो नानास्वर्गादिफलरूपाः पुरुषार्थाः॥तदनु विभूतिविनाशमनु नश्यंति॥यथा राजकुलं यथा राजकुलविनाशमनु तत्सेवकाना
माशिषो नश्यंति तद्वत्॥उक्तं च त्वयैव॥यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति लभते च ततः कामान्मयैव विहितान्हितान्॥अंतवत्तु फलं तेषां त
द्भवत्यल्पमेधसामित्यत्रेति भावः॥तद्विभूतीनां परत्वादिगुणराहित्याभावादिति तात्पर्यं॥३८॥तदेकप्रयोजनत्वेन कृता त्वत्सेवा स्वनिरतिश
यनित्यफलजनकत्वान्न नश्यंतीत्याह॥त्व॥कामधियस्त्वयि विषयन्ते रचिताः कृताः याः कामधियः त्वदेकप्रयोजनात्त्वद्विषया उपास

भा॰ष॰
७२

तवात्मन्यविवशः॥ अत्यंतवात्सल्येन त्वया साधवोपि वशीकृता इत्यर्थः॥ ३४॥ ननु परत्वे सत्यकंगुणात्रयमाश्रयणासौ कथं पादकमन्यथा त्वणस्येव सोखम्य वह
रिदृस्येवोदार्यवत्मित्रादेरिव कारुण्यवद्वा किंचित्करं स्यादित्यत्र परत्व विशिष्टं स्तौति॥ तवेति॥ हे भगवन् जगतः उत्पत्तिस्थितिलयादीनि॥ आदिशब्देन म
वामंवरूपमोक्षांत नियमनादिर्विवक्षितः॥ तवाविभवः ऐश्वर्यमेव अतस्त्वत्तः परो नास्तीत्यर्थः॥ एवं परत्वं तत्तदवनिरूपाधिक स्वामित्वं चोक्तं ननु जगदुत्पत्त्या
दीनि ब्रह्मरुद्रादीनां विभवो न मम नेत्यत्राह॥ विश्वसृज इति विश्वसृजो ब्रह्मादयः तेत्वांशांशाः॥ अग्नेर्विस्फुलिंगा इव त्वदंशांशभूतत्वात्तेषां विभवो
न मम नेत्यत्राह॥ विश्वसृज इति विश्वसृजो ब्रह्मादयः तेत्वांशांशाः जगदुत्पत्त्यादिरित्यर्थः॥ त्वन्नियोगेन ते जगदुत्पत्त्यादिकर्त्तार इति भावः॥ ननु तेपि वयं विश्वस्य
स्वाधिकर्त्तार इति स्पर्धंतेनत्राह॥ तत्रेति॥ तत्र तेषां त्वदंशांशत्वे सत्यन्मात्रेणैव वयमपि पृथगीश्वरा इत्यभिमानेन मम मतमीश्वरत्वपरमपुरुषायते इत्यज्ञाना

तव विभवः खलु भगवन् जगदुदयस्थितिलयादीनि॥ विश्वसृजस्तेंशांशास्तत्र मृषास्पर्द्धंति पृथगभि
मत्या॥ ३५॥ परमाणुपरममहतोस्त्वमाद्यंतांतरवर्ती त्रयविधुरः आदावंतेपि सत्वानां यद्ध्रुवं तदेवांतरालेपि॥ ३६॥

मृषा स्पर्धंते तेषां स्पर्द्धामात्रमेव शिष्यते न त्वीशत्वं सिध्यतीति भावः॥ ३५॥ जगदुत्पत्त्यादिकविभवत्वं दृष्टांतमुखेन विशदयन् स्तौति॥ परमाणिव
ति॥ परमाणुपरममहतोरल्पीयसो विपुलस्य च वस्तुनोपान्याद्यंतांतराणि सृष्टिसंहारस्थितयस्तद्वस्थाइत्यर्थः॥ तेषु वर्तते इति वर्ती॥ अंतरात्मतयान्याप्य
स्थितः॥ त्रयविधुरः आद्यंतमध्यरहितः त्वमेव कार्यस्य वस्तुनः कारणात्मतया यदा वतिष्ठते वस्तु पदवशिष्यते तद्विभवत्वमेव हि कार्यस्य वस्तुनो
दृष्टं यथा सुवर्णात्मकस्य कुंडलस्य कार्यजातस्यादौ कारणत्वेनावस्थानादंते चावशेषात् तद्वीभवत्वेव जगदुत्पत्त्यादिर्न तु मध्यस्य चतुर्मुखादेरिति भा
वः कार्ये वस्तु मध्यस्यस्य विभवोनेति किं वस्तुत्वं स्याह॥ आदाविति॥ सत्वानां कार्यत्वेनावस्थितानां पदार्थानामादावंते च यत् ध्रुवं स्थिरमादौ कारण
त्वेनावस्थितमंते चावस्थितमित्यर्थः॥ अंतरालेपि तदेव अंतराला वस्था वद्विभवत्वा एवाद्यंतयोर्यदस्ति तस्य मध्यस्थविभवकर्तृत्वं किंतु तन्मायमिद्धमिति॥ एवं का
लत्रयवर्तित्व भावः॥ अनेन कालतोप्यपरिच्छिन्नत्वमुक्तम् एवं सर्वदा सर्वत्रांतरात्मतया व्याप्य स्थितिकथनेन सर्ववस्तुसामानाधिकरणरूपवस्तुपरिच्छे
७२

ततस्तस्य संकर्षणस्य दर्शनेन ध्वस्तं किल्बिषं यस्य अत एव स्वच्छं अंतःकरणं यस्यातत्तएव प्रवृद्धया भक्त्या प्रणयाश्रुआनंदवाष्पं लोचनयोर्यस्य प्रहृ
ष्टान्युद्धतानि रोमाणि च यस्य तादृश आदिपुरुषमभ्ययात् अभिमुखं जगाम आनमत् प्रणतवान् ॥३१॥ ततः स चित्रकेतुरुत्तमश्लोकस्य संकर्षणस्य पदा
ब्जविष्टरं पादपीठं प्रेमाश्रुलेशैरानंदकणैर्मुहुरुपसेचयन् प्रमादेन प्रेम्णोपरुद्धः ॥ अखिलानां वर्णानामक्षराणां निर्गम उच्चारणं यस्य तथाभूत एव
भगवंतं तं प्रसमीडितुं चिरं नैवाशकत् नाशक्नोत् ॥३२॥ ततो मनीषया बुद्ध्या मनः समाधाय स्ववशीकृत्य प्रतिलब्धा वाग्येनासौ चित्रकेतुः प्रतिलब्धवा
गसौ इति पाठांतरं तत्र प्रतिलब्धवागतः सर्वेंद्रियाणां बाह्यवर्तनं आपारं नियम्य उपोद्घोस्यर्थः ॥ सात्वतशास्त्रं पंचरात्रशास्त्रं तत्प्रतिपाद्यो वि

तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वस्थामलांतःकरणोभ्ययान्मुनिः ॥ प्रवृद्धभक्त्याप्रणयाश्रुलोचनः प्रहृष्ट
रोमानमदादिपूरुषं ॥३१॥ स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपमेहयन्मुहुः ॥ प्रेमोपरुद्धाखिल
वर्णनिर्गमो नैवाशकत्तं प्रसमीडितुं चिरं ॥३२॥ ततः समाधाय मनो मनीषया बभाष एतत्प्रतिलब्धवागसौ नियम्य
सर्वेंद्रियबाह्यवर्तनं जगद्गुरुं सात्वतशास्त्रविग्रहं ॥३३॥ चित्रकेतुरुवाच ॥ अजित जितः सममतिभिः साधु
भिर्भवान् जितात्मभिर्भवता विजितास्तेपि च भजतामकामात्मनां य आत्मदोतिकरुणः ३४

मदोयस्तं जगद्गुरुं सात्वततंत्रोपदेष्टारं संकर्षणं प्रत्येतद्वक्ष्यमाणं बभाषे वक्ष्यमाणां स्तुतिमकरोदित्यर्थः ॥३३॥ तामेवाह ॥ अजितेत्यादिना सहस्रमूर्द्धस्त्वं
तेन तावद्दास्यशरणसौलभ्यपादकमौलभ्यवात्सल्यमहौदार्यगुणविशिष्टं स्तौति ॥ हे अजित त्वं तैरैः स्वाधीनं कर्तुमशक्य हेडुर्लभ इत्यर्थः ॥ तथापि साधुभिः
तैर्भवान् सुलभ इत्यर्थः ॥ कथंभूतैः साधुभिर्जितः आत्मा मनो यैः सममतिभिः कृतं जगद्व्यात्मकत्वेन पश्यद्भिः कथमेतत्साधुभिर्विजितोऽहमिति तत्राह यो
भवान् भजतामकामात्मनां मनस्य प्रयोजनेन भजतामात्मानं स्वरूपं ददातीत्यात्मदः एवं सौलभ्यमुक्तमात्मद इत्यनेन महौदार्यं च ॥ अपवात्सल्यमाह ॥ भवताभ

यातेसाधवोपिजिताःकृतःयतस्त्वमतिकरुणात्वापि

भा·प·
७७

नित्यलीलाविलासप्रविष्टयोरधिपतये तुभ्यं नमः सकलायेमा तत्र परिस्फुटभागवतश्रेष्ठास्तेषां समूहास्तेषां करकमलानां कुड्मलैर्मुकुलैरुपलालितं चरणारविंद
युगलं यस्य तस्य संबोधनं परमर्षिः समाप्य विकल्पं परमेष्ठिन्यपरमेष्ठ्याने स्थिते तुभ्यं नमः ॥ २५ ॥ हे राजन् उपपन्नाय चित्रकेतवे राज्ञे मत्तां विद्यामुपदिश्यांगिरसा सह ना
रदः ॥ स्वायंभुवं धाम सत्यलोकं ययौ पूर्वं नारदेन सहांगिरा आजगामेति प्राधान्येनोक्तोंगिराः चित्रकेतोः पुत्रदत्त्वेन तस्य प्रथमं वैराग्यजननद्वारोपकार
कत्वादिह तु दांगिरसा साकं ययौ इति नारदः प्राधान्येन निर्दिष्टः विद्योपदेशेन तस्य महोपकारत्वात् ॥ २६ ॥ एवमुपदिष्टश्चित्रकेतुस्तां नारदेन भाषितां उ
पदिष्टां विद्यां यथा विधि सुसमाहितः चित्तोपरावभक्षः यन् सप्तदिवसान् धारयामास संजजाप ॥ ततः सप्तरात्रांते धार्यमाणया विद्यया तत्प्रभावेनेत्यर्थः ॥ नृप

श्रीशुक उवाच ॥ भक्तायैतां प्रपन्नाय विद्यामादिश्य नारदः ॥ ययावंगिरसा साकं धाम स्वायंभुवं प्रभो ॥ २६ ॥ चि
त्रकेतुस्तु विद्यां तां यथा नारदभाषितां ॥ धारयामास सप्ताहमब्भक्षः सुसमाहितः ॥ २७ ॥ ततश्च सप्तरात्रांते वि
द्यया धार्यमाणया ॥ विद्याधराधिपत्यं स लेभेऽप्रतिहतं नृप ॥ २८ ॥ ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः ॥ जगा
म देवदेवस्य शेषस्य चरणांतिकं ॥ २९ ॥ मृणालगौरं शितिवाससं स्फुरत्किरीटकटित्रकंकणं ॥ प्रसन्नवक्त्रारुण
लोचनं वृतं ददर्श सिद्धेश्वरमंडलैः प्रभुं ॥ ३० ॥

चित्रकेतुश्च विभक्तिक पाठे हे नृप विद्याधराणामधिपत्यं च लेभे च शब्दोऽन्वयपरः आनुषंगिकं विद्याधराधिपत्यं लब्धवानित्यर्थः ॥ २८ ॥ प्रधानं फलमाह त
तः कतिपयैरहोभिर्विद्ययाऽऽद्धेनदीप्तेन मनसा गतिर्यस्य विद्याप्रभावेन यथेष्टगतिरित्यर्थः ॥ देवदेवस्य शेषस्य संकर्षणस्य चरणसमीपं जगाम पाताललोक
दधः स्थित संकर्षणसमीपं गतवानित्यर्थः ॥ २९ ॥ संकर्षणं वर्णयन् तं ददर्शेत्याह ॥ मृणालेति ॥ मृणालवत्स्वच्छं तुषगौरं शुभ्रं शितिवाससं नीलांबरं स्फुरंति
किरीटादीनि यस्य कटित्रं कटिसूत्रं प्रसन्नानि वक्त्राणि यस्य अरुणानि लोचनानि यस्य तं च सिद्धेश्वराणां समूहैर्वृतं परिवेष्टितं विभुं संकर्षणं ददर्श ॥ ३० ॥ ७७

स्वचितं तदेव हृदि कर्तुं तदितरत्प्रमाणाविषयत्वं वदन्स्तुवन्नमति यमिति ॥ अंतर्बहिश्चेति सर्वव्यापकनारायणः स्थितः स्थितिकर्तृत्वेन तु करोत्साक्षात्त्वं जगदंतर्बहिश्च विततं
व्याप्य स्थितमपि व्योमवद्व्योमशरीरकं आकाशशरीरं ब्रह्मेति श्रुतेः ॥ यं मनोबुद्धींद्रियासवो न स्पृशंति न विदुः ॥ तत्र कर्मेंद्रियाणां प्राणाश्च क्रिया
शक्तिप्रधाना न स्पृशंति न विषयीकुर्वंति मनश्च बुद्धिश्च चक्षुरादीनींद्रियाणि च यं न विदुरित्यन्वयः ॥ बुद्धींद्रियाद्यविषयत्वे न तन्मूलकत्वमस्त्वप्रमा
णाविषयमिति भावः ॥ अतींद्रियत्वे हेतुः व्योमेति ॥ व्योमशरीरकत्वेन तदंतःप्रवेशयोग्यतया ततोपि सूक्ष्मत्वादिंद्रियाविषयमिति भावः ॥ तद्ब्रह्म त्वामहं
नतोस्मि ॥ २३ ॥ किं च मनआदीनां तदाहितज्ञानक्रियादिशक्तिमत्त्वेन तं न विषयीकुर्वंतीति सदृष्टांतमाह ॥ देहेति ॥ अमी देहेंद्रियादयः यदंशविद्धा
यदंशशक्तिविविधे वस्तुतस्त्वाभाविकी ज्ञानबलक्रिया चेत्युक्तज्ञानक्रियादिशक्तिमत्तो ब्रह्मणोंशेन क्रियाशक्तिविषयानुविद्धाः प्राणाः कर्मसु स्व

न स्पृशंति न विदुर्मनोबुद्धींद्रियासवः ॥ अंतर्बहिश्च विततं व्योमवत्तं नतोस्म्यहं ॥ २३ ॥ देहेंद्रियप्राणमनोधियोमी यदंश
विद्धाः प्रचरंति कर्मसु नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद्द्रष्टुपदेशमेति ॥ २४ ॥ ॐ नमो भगवते महापुरुषाय महा
नुभावाय महाविभूतिपतये सकलसात्वतपरिवृढनिकरकरकमलकुड्मलोपलालितचरणारविंदयुगलपरम
परमेष्ठिन्नमस्ते ॥ २५ ॥

स्वकार्येषु प्रवर्तंते । अन्यदा प्राप्तदंशाननुविद्धाः न प्रचरंतीत्येषामचेतनपरिणामरूपत्वेन स्वतो ज्ञानशक्तिविरहादिति भावः ॥ तत्र
दृष्टांतः लोहमिति यथा प्रतप्तं लोहं दहति दाहकशक्तिनाग्निनानुविद्धमेव लोहमितरं दहति अप्रतप्तं तु न दहत्यग्निनाननुविद्धं तु तत्तदपि न दहतीति तद्वत्परमात्माहि
तज्ञानक्रियाशक्तयो देहेंद्रियादयो स्वस्वविषयेषु प्रचरंति न परमात्मन्यनाहितशक्तयस्ते स्वस्वकर्मस्वपि न प्रचरंतीत्यर्थः ॥ नन्विंद्रियाणां स्वतो ज्ञानशक्तिविरहात्तं
न विषयीकुर्वंतु जीवस्तु स्वभावतो ज्ञानशक्तिमत्त्वात्तं विंद्यात्तत्राह ॥ स्थानेष्विति ॥ तत्र ततो जीवोपि स्थानेषु द्रष्टुपदेशं द्रष्टृत्वव्यपदेशमेति गच्छति ईश्वरसंक
ल्पादेव जीवस्य ज्ञानविकाश इत्यर्थः ॥ २४ ॥ भगवते पूर्णषाड्गुण्याय पुरुषाय पुरुषसूक्तप्रतिपाद्यमहापुरुषायातएव महानुभावाय महाविभूतये ।

ना·प
३६

वैश्वर्यसंपन्नः शंभुराकाशमध्यग इति निरुक्तेत हृष्टपेऽत्यनेन श्यामरूपश्चेत्यनेन अस्य लमनशिवति ॥ आत्मानं देत्यादि गापो शनापिपासोपो कर्मो
दीजरामस्य अस्पेति ॥ हृषीकेशायेत्यनेन सत्यं ज्ञानमनंतं ब्रह्मेति ॥ अनंतशक्तय इत्यनेन परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति व
चस्य परते इत्यादिना यतो वा चो निवर्तंते अप्राप्य मनसा सह आनंदं ब्रह्मण इति एक इत्यनेन तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यत
इति ॥ सदसत्त्वमनेन भोक्ताभोग्यं प्रेरितारं च मत्वा नरा नरात्माना विशंते देव एकः यो अक्रमंतरे संचरन्यस्याव्यक्तं शरीरं साक्षरमंतरे संचरन्यस्याक्षरं
शरीरं इति श्रुत्यपि अभिप्रेताः ॥ २१ ॥ एवं सकलेतरविलक्षणमौपनिषदं ब्रह्म विशेष्य प्रणम्य ततः स्वाभिष्टमिति त्रिं प्राप्योपतदेव ब्रह्म जगज्जन्मादि
कारणत्वेनोपलक्ष्य प्रणमति यस्मिन्निति ॥ सदसत्त्व रहस्यस्योदाहृत श्रुत्यपि प्रत्यभिज्ञापकतया उक्तविधस्वरूपस्य ब्रह्मणश्चिदचिच्छरीरकत्वं प्रत्यभिज्ञ ।
पितोपनिषद्भिरेव प्रतिपन्नमित्यभिप्रेत्य चिदचिद्विशिष्टस्य जगत्कारणत्वं लक्षणमत्रोच्यते ॥ इदं स्थूलचिदचिदात्मकं जगत् कुतः सूक्ष्मचिदचिद्विशिष्टाद्

यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते ॥ मृन्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः ॥ २२ ॥

ब्रह्मणो जायते यस्मिन्नप्येति लीयते यस्मिन्नुक्तविधे ब्रह्मस्वरूपे तिष्ठत्या च यथा वर्तते ब्रह्म यतं ब्रह्म सन्द्व तत्रासीद्यतो द्यावापृथिवी निष्टतक्षुरिति श्रुतेः स्वशरीरात्मा
धारापि ब्रह्मैवेति भावः तत्र दृष्टांतः मृन्मयेष्विति मृज्जातिरिति मृन्मयजातीयपरः यथा मृन्मयेषु मृज्जातीयघटशरावादिकारणभूतेषु मृद्विकाररूपमृ
त्पिंडेषु मृज्जातीयो घटादिर्जायते ॥ अपादानस्याधिकरणत्वविवक्षया सप्तमी ॥ मृन्मयेभ्यो यथा मृज्जातिर्जायत इत्यर्थः ॥ यद्वा मृन्मयेष्विति निमित्तसप्त
मी निमित्तमत्रोपादानकारणं ॥ तथा च मृन्मयेभ्यो मृत्पिंडेभ्य उपादानकारणभूतेभ्यो मृज्जातीयो घटादिर्जायत इत्यर्थः ॥ अथवा मृन्मयेष्विति पदमेव ॐ
मृद्विकारघटादिपरं मृज्जातिर्मृत्पिंडः मृन्मयेषु घटादिषु कारणतयानुस्यूतः अथवा यस्मिन्निति षष्ठीत्यत्र दृष्टांतः मृन्मयेषु घटादिषु मृज्जातिमिव हरिः
मध्यतिष्ठति ॥ अत्र एकितत्प्रकारतया वर्तते तदिदं विश्वं चिदात्मकं यत्प्रकाशिवद्प्रकारतया यस्मिन् वर्तते तस्मै ब्रह्मणे नमः । अत्रापि यतो वा इमानि भू
तानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीत्यादि श्रुत्यर्थोऽनुसंधेयः ॥ २२ ॥ एवं प्रतिपदमौपनिषदं प्रत्यभिज्ञायते तेनोपनिषदेकगम्यं परं ब्र ७६

नारदेनोपदिष्टां विद्यामेवाह ॥ नमस्तुभ्यादिना परमेष्ठिन्ब्रह्मन्स्मदस्यं तेन तावत्सकलेतरविलक्षणपरमात्मानं विशेष्यज्ञानमिति ॥ वासुदेवादिचतुर्व्यू-
हात्मनावस्थिताय तस्मै तुभ्यं भगवते नमः एवंभूतं त्वां धीमहि ध्यायेम ॥ १८ ॥ विज्ञानमात्राय कचिदपिरहिताय निरतिशयानंदस्वरूपाय आत्मारामायात्म-
न्येव रममाणाय सुखांतरनिरपेक्षायेत्यर्थः ॥ शांताय रागादिरहिताय निवृत्तद्वैतसदृष्टये स्वदृष्टिरूदयः निवृत्ता द्वैतसृष्टिर्जीवत्वादिकल्पना यस्य तस्मै जीवा-
दिकल्पनारहितायेत्यर्थः ॥ निवृत्तद्वैतदृष्टये इति पाठे निवृत्ता द्वैतदृष्टिः स्थूलतत्त्वा गुणत्वादिभेददर्शनं यस्मिन् तथा च श्रूयते ॥ अस्थूलमनण्वह्रस्वम-
गोत्रमवर्णः अचक्षुःश्रोत्रं तदपाणिपाद इत्यादि ॥ एवंभूताय भगवते षड्गुणपूर्णाय नमस्कुर्म इत्यर्थः ॥ १९ ॥ स्वात्मानंदानुभवेनैव न्यस्ता निरस्ताः शक्त्यास्वबलेनो-

ॐ नमस्तुभ्यं भगवते वासुदेवाय धीमहि प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ॥ १८ ॥ नमो विज्ञानमात्राय
परमानंदमूर्तये ॥ आत्मारामाय शांताय निवृत्तद्वैतदृष्टये ॥ १९ ॥ आत्मानंदानुभूत्यैव न्यस्तशक्त्यूर्मये नमः
हृषीकेशाय महते नमस्तेऽनंतमूर्तये ॥ २० ॥ वचस्युपरतेऽप्राप्य य एको मनसा सह अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः

र्मयः ॥ अशनापिपासाशोकमोहजरामरणरूपाः ॥ षडूर्मयो यस्य तस्मै हृषीकाणामिंद्रियाणां तदधिपतेः प्रेरणाय नियंत्रे करणाधिपायेत्यर्थः महते ॥ २१
स्वरूपेण गुणैश्च निरतिशयमहते विविधचित्रानंतशक्तये तुभ्यं नमः ॥ २० ॥ एवं नमनं विधायाथ यत्तस्मात्स्वरदाप्राप्यं यते ॥ वचसीति मनसा सह वचसि उ-
परते निवृत्ते सति सर्ववेदैरभावा वाङ्मनसयोर्निवृत्तयोः ॥ अप्राप्य अपरिच्छिन्नतया अनुसंधेयः ॥ अत एवैकः निःसमाभ्यधिकः क्वाप्येतस्य विभक्तिक-
पाठे अप्राप्येति छेदः तदा मनसा सह अप्राप्य वचसि उपरते सतीयः अपरिच्छिन्नानंदरूप इति शेषः ॥ वाङ्मनसापरिच्छेद्यापरिच्छिन्नानंदरूप- :
इत्यर्थः ॥ चिन्मात्रः ज्ञानैकाकारः अत एवैको निःसमाभ्यधिकः अनेकतत्तानामरूपरहितः सदसत्परः चेतनाचेतनाभ्यां विलक्षणः सः प्रसिद्धः भगवान्नो-
ऽस्मान्रक्षतु ॥ अत्र त्रितिपदमुपनिषदर्थोऽभिप्रेतः ॥ विज्ञानमात्राय परमानंदमूर्तये इत्यनेन विज्ञानमानंदं ब्रह्मेति श्रुत्यर्थः ॥ आत्मारामायेत्यनेन स-

भा॰ष॰ तदुपश्रुत्य तं तमाह मुनिः इतीति ॥ इतीत्थं उदीर्योक्त्वा पुनर्जीवः कलेवराद्विनिष्क्रम्य गतः ततस्तस्य मृतस्य ये ज्ञातयः ते तया विस्मिताः संतः ॥ आत्मनां स्वेषां यः
७५ पुत्रादिविषयकः स्नेहः स एव शृंखला निगडस्तं छित्त्वा पोष्यशोकमुमुचुः ॥१२॥ ततो ज्ञातयः तं शवभूतं निर्हृत्य दग्ध्वा ज्ञातेः उचिताः मृतान्देशेन कृते
त्याः क्रियाः कृत्वा शोकमोहादिप्रदं दुस्त्यजं स्नेहमनुरागं तत्यजुः ॥१३॥ ततो बालघ्न्यः यागरदानेन बालं हतवत्यः ताः सर्वा द्विजेनांगिरसा भाषितं स्मरंत्यो
व्रीडिता लज्जिता बालहत्यया हताः प्रभाः यासां ताः ॥ यद्बालहत्याव्रतं बालहत्यापनोदकं व्रतं ब्राह्मणैर्यन्निरूपितं कर्तव्यत्वेन बोधितं तच्च यमुना
यां हे महाराज चेरुः अनुष्ठितवत्यः ॥१४॥ ततः स चित्रकेतुः इत्थं द्विजोक्तिभिः अंगिरस उक्तिभिः जीवेन संवादिताभिः नारदोक्तिभिः प्रबुद्धः उदितः आ

श्रीशुक उवाच ॥ इत्युदीर्य गतो जीवो ज्ञातयस्तस्य ते तदा ॥ विस्मिता मुमुचुः शोकं छित्त्वात्मस्नेहशृंखलां ॥१२॥
निर्हृत्य ज्ञातयो ज्ञातेर्देहं कृत्वोचिताः क्रियाः ॥ तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्तिदं ॥१३॥ बालघ्न्यो व्रीडि
तास्तत्र बालहत्याहतप्रभाः ॥ बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितं ॥ यमुनायां महाराज स्मरंत्यो द्विजभाषि
तं ॥१४॥ स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः ॥ गृहांधकूपान्निष्क्रांतः सरःपंकादिव द्विपः ॥१५॥ कालिंद्यां विधि
वत्स्नात्वा कृतपुण्यजलक्रियः ॥ मौनेन संयतप्राणो ब्रह्मपुत्राववंदत ॥१६॥ अथ तस्मै प्रपन्नाय भक्ताय प्रयता
त्मने ॥ भगवान्नारदः प्रीतो विद्यामेतामुवाच ह ॥१७॥

स विवेको यस्य तादृशः सरसः पंकात् गज इव गृहरूपांधकूपस्तस्माद्विनिः
क्रांतः निर्गतः ॥१५॥ कालिंद्यां यमुनायां विधियुक्तप्रकारेण स्नात्वा कृताः पुण्यजलक्रियाः पितृतर्पणादयो येन तादृशः मौनेन परमात्मस्वरूपसंशीलनेन हेतुवे
तीयामौनार्थे संयतेंद्रियः नियमितांतर्बाह्येंद्रियः इतरैः संभाषणराहित्यरूपेण मौनेन वा ब्रह्मपुत्रौ नारदांगिरसौ अवंदत दंडवन्ननाम ॥१६॥ ततस्तस्मै प्रपन्नाय
यथाविधि गुरूपसत्तिं कृत्वा स्थिताय भक्ताय गुरुभक्तियुक्ताय प्रयतात्मने गृहवासादिप्रयतमनस्काय भगवान्नारदः शिष्यलक्षणैः हर्षितः एतां वक्ष्यमाणां विद्यां

याद्रष्टेत्यनेनतस्य॥ सर्वज्ञत्वं पुण्यपापकर्तृत्वं तत्फलभोक्तृत्वं चाभिप्रेतं तद्देवाह ॥ नादत्त इति ॥ आत्मापरमपुरुषो गुणदोषौ नादत्ते
नस्वीकरोति ॥ गुणदोषकर्तृत्वमात्मनिनमन्यते अंतरावक्रियाफलंसुखदुःखादिकं चनादत्ते किं तदासीनः उदासीनवज्जीवांतरात्मतया
स्थितः तत्करणे नात्यंतोदासीनस्तत्वमपिनात्रीत्यावेदितं गुणदोषयोः तस्य प्रयोजककर्तृत्वात्साक्षात्कर्तृत्वाभावादुदासीनत्वंतत्तस्यवक
र्मवासनानुसारेण प्रयोजयितृत्वाच्चानुदासीनत्वाच्चानुदासीनत्वमपि विषयभेदादुभयोरेकस्मिन्नविरोध इति भावः ॥ ननु जीवस्यापि न गुण
दोषयोः साक्षात्कर्तृत्वं तस्य निष्क्रियत्वाद्देहस्यैव साक्षात्कर्तृत्वात्किंतु देहेंद्रियादिनियमनरूपमेव तस्य कर्तृत्वं ॥ एवं च प्रयोजयितृत्वं
जीवपरयोरुभयोरप्यविशिष्टमितिकथमन्यतरस्य क्रियाफलोपादानमन्यतरस्य नेति विभाव्यत्राह ॥ परावरदृगीश्वर इति स्वयमीश्वरो देहें
द्रियमनःप्राणपर्यंतानां नियंतासन्परावरदृक् सन् परं प्रकृतिपुरुषाभ्यां विलक्षणं स्वस्वरूपमपरं जीवस्वरूपं पश्यन्स्थितस्तत्पश्यावत्स्व
रूपमतीतिपरावरदृगजीवस्तु कर्मणा तिरोहितस्वभावः प्रकृतिमेवात्मानं तन्मतं कर्तृत्वं साक्षात्त्वस्मिन्मनुत इति स क्रियाफलभोक्ता
भवतिपरमात्मातु नित्यासंकुचितापरिच्छिन्नानुभूतास्वपरयाथात्म्यत्वाद्देहात्मभ्रमाभावेन न क्रियाफलभोक्तेति भावः ॥ नहीत्यादिश्लो
कद्वयं जीवपरतयाविपर्ययेणापि तु प्रकाश्यं ॥ तत्राहि पूर्वं प्रकृतं जीवस्वरूपमेवातिरोधीयते ॥ नहीति ॥ अस्य जीवस्य प्रियाप्रियो न भवतः अ
पितु कर्मकृतादित्यर्थः ॥ तयोःस्वपरविभागोपि न एकः एकरूपज्ञानैकाकारः देहगतविकारैरस्पृष्टत्वेनसदैकरूप इति वा ॥ गुणदोषयोःक
र्तृणां देहतन्मतानां सर्वेषां धियां द्रष्टा आश्रयः नादत्त इति ॥ विवेकी आत्मा गुणदोषाव्वयं नाभिमन्यत इत्यर्थः ॥ ईश्वरः देहादिनियमनपरः प
रावरदृक्स्वस्वरूपप्रकृतिस्वरूपयोर्द्रष्टा तु कर्मवान्नात्रिष्ठो जीवः ॥ ११ ॥

श्रीश्रीरामचंद्रायनमः
श्रीकृष्णचंद्रायनमः
श्रीगोपालचंद्रायनमः

भा.८
७४

तर्हि कीदृशं तस्य ॥ एषजीवो नित्यः आद्यंतरहितः कुतः अव्ययः नाशरहितः ॥ तत्कुतः सूक्ष्मः विनाशकैरप्राप्यः निरतिशयसूक्ष्मत्वात् विना
श्याहि जलाग्निविषशस्त्रादयो विनाश्यं प्राप्य विनाशयंति अस्य तु निरतिशयसूक्ष्मतया सर्वातः प्रवेशनस्वभावत्वेनाप्राप्तत्वादव्ययत्वं एकः कथमे
कः कारणको व्रीहिः सुसंपन्न इतिवज्जात्यभिप्रायमेकत्वकथनं न तु जीवस्वरूपैकत्वाभिप्रायकं तत्स्वरूपनानात्वस्य च श्रुतिप्रमाणप्रतिपन्न
त्वात् ॥ सर्वाश्रयः सर्वेषां देहेंद्रियमनःप्राणादीनामाश्रयो धारकः स्वमात्मानं प्रपश्यतीति स्वदृक् ॥ यद्वा स्वेनैव दृश्यत इति स्वदृक् स्वयंप्र
काशः आत्मा ईदृशं तस्य स्वरूपं किमयं स्वानर्थावहं देवमनुष्यादिशरीरं स्वयमेव सृष्ट्वा तत्र प्रविष्टोनर्थमनुभवति उत स्वकीयकर्मणा स्वे
च्छाविशेषेणु भवति तत्राह आत्मेति ॥ न स्वानर्थावहं शरीरं स्वयं सृजति नापि केवलं कर्म ॥ अपि तु परः परमपुरुषः आत्मनः स्वस्य मा

एष नित्योऽव्ययः सूक्ष्म एष सर्वाश्रयः स्वदृक् ॥ आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः ॥९॥
न यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वपरोऽपि वा ॥ एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः ॥१०॥
न दत्त आत्मा हि गुणं न दोषं न क्रियाफलं उदासीनवदासीनः परावरदृगीश्वरः ॥११॥ १ ११

यया तत्स्वगुणैः सत्वादिरात्मानं प्रत्यगात्मानं विश्वं देवमनुष्यादिविश्वाकारं सृजति ॥९॥ ननु कोसौ परः पुरुषः यदि कश्चित्सिद्ध्यति त
र्हि सोपि वेशादेवादिविषमसृष्टिं सृजन् जन्मजरामरणाद्यनंतदुःखगर्भं कुर्वन्वैषम्यनैर्घृण्ययुक्तः संसारिजीवान्नातिरिच्येत तत्राह
नह्योति ॥ अस्य परमपुरुषस्य कश्चिदतीवप्रीतिविषयः ॥ कश्चिच्चाप्रियः स्वीयः परकीयो वा नास्ति किंतु सर्वेषु समदृष्टिरिति भा
वः ॥ तर्हि कथं विषमं सृजतीत्यत्राह ॥ एक इति गुणदोषयोः पुण्यपापयोः कर्तॄणां जीवानां सर्वबुद्धिवृत्तीनां एक एव सन् द्रष्टा भवति
तस्मात्नामयन्तत्र देवादिवैषम्यं तत्तज्जीवसंबंधिपुण्यपापमूलकत्वान्न तस्य वैषम्यादिदोषप्रसक्तिरिति भावः ॥१०॥ सर्वधि ७४

ननु सर्वेषामपि जन्मस्वभवन्नित्यत्राह वंधेति ॥ सर्वे जीवाः सर्वेषां जीवानां क्रमशः जन्मपरंपराभिः मिथः अन्योन्यं वंधवादयो भवंतीत्यन्वयः ॥ तत्र वंधवे
विवाहादिभिः संबंधिनः ज्ञातयः सपिंडाश्चरयोघातुकाः मित्राणि रक्तकामधस्याउभयव्यतिरिक्ता विद्विषोद्रष्टव्यादिनिमित्तेन द्वेषिणः उदासीनाः
तद्व्यतिरिक्ता इतिभेदः ॥ ५ ॥ क्रमेणभिन्नत्वोम्यमाण त्वदृष्टांतमाह यथेति ॥ यथापण्यानि क्रयपादहोणिहेमादीनि हेमविकाररूपादीनि कटकांगुलीयकादीनि
वस्तूनि तु षव्यहृत्सुनरेषितत्ततः पर्यटंति एवं जीवा अपि देवतिर्यङ् मनुष्ययोनिषु भ्रमंति संसरंति ॥ ६ ॥ एकस्मिन्नपिजन्मनि संबंधस्यानियतत्वं सदृ
ष्टांतमाह ॥ नित्यस्येति द्वाभ्यां नित्यस्याविकृतस्य जीवस्य इतियावत् तस्यपश्वादेरर्थस्यानित्यः संबंधोननियत इतिभावः ॥ तदेवोपपादयति यावदिति ॥ य

वंधुज्ञातरिभस्य मित्रोदासीनविद्विषः ॥ सर्व एव हि सर्वेषां भवंति क्रमशो मिथः ॥ ५ ॥ यथा वस्तूनि पण्या
नि हेमादीनि ततस्ततः ॥ पर्यटंति नरेष्वेवं जीवो योनिषु कर्तृषु ॥ ६ ॥ नित्यस्यार्थस्य संबंधो ह्यनित्यो दृश्यते
नृषु यावद्यस्य हि संबंधो ममत्वं तावदेव हि ॥ ७ ॥ एवं योनिगतो जीवः स नित्यो निरहंकृतः ॥ यावद्यत्रोपल
भ्यते तावत्स्वत्वं हि तस्य तत् ॥ ८ ॥ स्यपुंसोयेनपश्वादिना यावत्संवंधः क्रयादिनिमित्तः संबंधोस्ति ॥ तस्यममत्वस्वामित्वादिसंबंधोनतावदेवहि

तत्स्वनेननलोकप्रसिद्धिंद्योतयति ॥ ७ ॥ एवं दृष्टांतेउपपादितमर्थं दार्ष्टांतिके दर्शयति एवमिति सप्रसिद्धो निरहंकृतिः वस्तुतो देहात्माभिमानरहितो
पि जीवः कर्मणा योनिगतो देवादिशरीरेष्वनुप्रविष्टः सन्यत्र देवादिशरीरे नित्योपरित्यक्तदेहो यावदुपलभ्यते तावदेव तस्य स्वत्वं स्वीयत्वं हि तस्य
पित्रादयः स्वीया भवंति तावदेव तस्येतरैः पितृपुत्रत्वादिसंबंध इति यावत् तस्मात्तत्रोपलभ्यमानत्वादित्यर्थः ॥ यद्वा यत्रशरीरे यावदुपलभ्यते तत्तस्य
शरीरस्य तावंतं कालं जीवात्मा नप्रतिस्वत्वं तत्तस्मात्ततोपलभ्यमानत्वादित्यर्थोनुपपन्नं मे तु आत्मनिरूपितस्वत्वस्यैव शरीरे भावाच्छरीरनिरूपितस्वा
दिसंबंधोदूरादपेत इतिभावः ॥ ८ ॥ तर्हि किं दर्शनं तस्य स्वरूपं स्वरूपगतो न भवत्यनियतः पितृपुत्रत्वादिसंबंधस्तत्राह ॥ १० ॥

भा॰ष॰ येणामेवं विमृहत्वं महात्म्यं प्राप्नुः तपानेवानपि चिरादाशु परं महात्म्यमुपेति ॥२८॥ इति षष्ठे पंचदशः ॥१५॥ एवमुपदेक्ष्यमाणमंत्रोपनिषन्महत्त्वं तस्य
७३ सुचिसुतमाध्यांगिरसोपदिष्टेषु वैराग्यापादकेष्वाप्येषु चित्रकेतुर्भर्तानाविस्त्वं भ्योतनायमतः केपुनर्जीवं स्वयोगमहिम्नावेप्रत्तन्मुखेनांगिरसोपदिष्टान
योनवीवदस्मावाननारदस्तुत्याहमुनिः ॥ अथेति हे राजन्स देवर्षिर्नारदः संपरेतं मृतं तं नृपात्मजं शोचतां ज्ञातीनां चित्रकेत्वादीनां दृष्टोपि तायोगप्रभावेनावि
ष्टजीवं प्रदर्श्येति वक्ष्यमाणं उवाच हे सौम्य येहोनारदप्रभावो यन्मृतमपि पुनर्जीवयदिति ॥१॥ अतमे वाचभ्यां देहात्मनातेभद्रं प्रविष्टशरीरतेत्तव
मातरं पितरं सुहृदादीनत्वन्निमित्तया शुचा मर्शंतस्त्वामयश्य वांधवास्तत्राशति प्रथमांतपाठे मातरं पितरं च पश्य वांधवाः सुहृदश्च त्वत्कृतयाशुचा त
इति श्रीभागवते महापुराणे षष्ठस्कंधे पंचदशोध्यायः ॥१५॥ श्रीशुक उवाच ॥ अथ देवऋषी राजन्संपरेतं नृपात्म
जं ॥ दर्शयित्वेति होवाच ज्ञातीनामनुशोचतां ॥ श्रीनारद उवाच ॥ जीवात्मन्पश्य भद्रं ते मातरं पितरं च ते ॥ सुहृदो
बांधवास्तप्ताः शुचा त्वत्कृतया भृशं ॥१॥ कलेवरं स्वमाविश्य शेषमायुः सुहृद्वृतः ॥ भुंक्ष्व भोगान्पितृप्रत्तानधि
तिष्ठ नृपासनं ॥२॥ जीव उवाच ॥ कस्मिन् जन्मन्यमी मह्यं पितरो मातरोभवन् ॥ कर्मभिर्भ्राम्यमाणस्य देवति
र्यङ्नृयोनिषु ॥३॥ त्राश्वत स्वाम्यशपेत्यन्वयः ॥२॥ शेषमवशिष्टमायुर्जीवनं यस्य तत्कलेवरं समाविश्य अपमृतनामस्तत्वाच्छेषमायुरित्युक्तं सु
हृद्भिः परिवृतस्त्वं नृपासनमधितिष्ठन् पित्रा प्रत्तान् दत्तान्भोगान्भुंक्ष्व ॥३॥ इत्युक्तो जीवस्तत्कालेवरमाविश्य एवं वददित्याह ॥ कस्मिन्नित्यादिना ह
गोचरस्यैतेन तावत्पितृपुत्रत्वादिसंबंधस्यानियतत्वमाह द्वाभ्यां देवतिर्यङ्मनुष्यादयोनिषु कर्मपुण्यपापरूपैः भ्राम्यमाणस्य जायमान
स्यांतरावर्तत्र तत्रतस्तु रूपविशेषाध्याप्तितत्तन्निरूपितं वै ब्यादिभावं प्राप्तस्य मम ह्यं मम विभक्तिव्यत्यय आर्षः अमी चित्रकेत्वादयः कस्मिन्
जन्मनि पितरो मातरश्चाभवन्न सर्वेषु जन्मसु भवन्किं त्वेतस्मिन्नेवातः पितृपुत्रत्वादिसंबंधो न नियत इति भावः यद्वा कस्मिन् जन्मन्यमी पितरो ७३

तत्तत्कर्मफलानुभवायास्यदेहिनःद्रव्यज्ञानक्रियात्मकःद्रव्यंभूतपंचकंज्ञानानिज्ञानेंद्रियाणिक्रियाःकर्मेंद्रियाणितदात्मकःएतत्संघातरूपःअ
यंदेहोस्यदेहिनःविविधक्लेशरूपसंतापंक्लेशसंतापशब्दौवैषयिकसुखदुःखपरौवावैषयिकसुखस्यांततःक्लेशात्मकत्वात्करोतीतितथोदाहृतः
प्रोक्तःकथितः तस्यार्थः ॥ पुंसामनादिवासनावासितेनमनसाविषयाश्चिंतनतयाविषयालोपप्रयुक्तानिपुण्यपापानिकर्माणिकर्मभ्यःक्लेशसंतापकृद्दे
हः तेनपूर्वजन्मकृतकर्मफलप्राप्त्यादिविषयमनुभवतःपुनर्विषयचिंतनापुनस्तयाकर्मणास्येवमियंपरिवृत्तिःवासनावासितमनोमूलिकेतिसर्वेमनः
प्रभवाइतिभावः ॥२५॥ तस्मात्तुत्वदारादीनांसर्वेषांस्वप्नकल्पत्वात्स्वस्थेनविक्षेपरहितेनमनसाआत्मनःप्रत्यगात्मनोगतिंस्वरूपंविमृश्यद्वंद्वीद्वियमनः

अयंहिदेहिनोदेहोद्रव्यज्ञानक्रियात्मकः ॥ देहिनोविविधक्लेशसंतापकृदुदाहृतः ॥२५॥ तस्मात्स्वस्थेनमनसावि
मृश्यगतिमात्मनः ॥ द्वैतेध्रुवार्थेविश्रंभंत्यजोपशममाविश ॥२६॥ श्रीनारदउवाच ॥ एतांमंत्रोपनिषदंप्रतीच्छप्रय
तोमम ॥ यांधारयन्सप्तरात्राद्द्रष्टासंकर्षणंविभुं ॥२७॥ यत्पादमूलमुपसृत्यनरेंद्रपूर्वेशर्वादयोभ्रममिमंद्वि
तयंविसृज्यसद्यस्तदीयमतुलानधिकंमहित्वंप्रापुर्भवानपिपरंनचिरादुपैति ॥२८॥ प्राणादिभिन्नभिन्नत्वेनज्ञानानंदादिस्व
रूपस्वभावत्वेनपरमात्मशरीरत्वेनचविमृश्यद्वैतेउक्तविधप्रत्यगात्मगतदेवमनुष्यादिभेदभिन्नेस्थिरेशरीरध्रुवार्थेविस्रंभमात्माभिमानंत्यजउपशममेवै
राग्यमाविशविरक्तोभवेत्यर्थः ॥२६॥ एवंगिरसोत्पादितविवेकायचित्रकेतवेभगवान्नारदोमंत्रविद्यामुपदिदिक्षुस्तावत्प्रभावमाह ॥ एतामिति ॥ ए
तामुपदेक्ष्यमाणांमंत्रोपनिषदंप्रयतःसमाहितचित्तःममउपदेष्टुर्मत्तःप्रतीच्छस्वीकुरु ॥ यांमंत्रोपनिषदंधारयमाणोभवान्सप्तरात्रादूर्ध्वंभगवंतं
संकर्षणंद्रष्टाद्रक्ष्यसि ॥२७॥ संकर्षणंविशिनष्टिस्वनसाक्षात्कारफलमाह ॥ यदिति ॥ हेनरेंद्रयस्यभगवतःसंकर्षणस्यपादमूलमुपसृत्याश्रित्यपूर्वेरुद्रा
दयः द्वितयंद्वावयवौयस्यद्वितयंद्विदलात्मकंभ्रममंब्रह्मात्मकस्वतंत्रात्मकत्वरूपदलद्वयात्मकंभ्रमंविसृज्यातुलानधिकंनिःसमाभ्यधिकंतदीयंसंक

तेमवतैव॥ भवतेवेतिपाठेस्त्वधुनाभवतेवत्वयैव सर्वेषामेवपुत्रिणांतापोनुभूयतेसर्वैरपिपुत्रिभिस्तापोनुभूयतेइत्यर्थः॥ यथापुत्रशोकमोहादिवद्दःतथादा
रद्वयोपीत्यन्वयः तत्रारामाविहारवनानिविविधाऐश्वर्य्यसंपदः प्रशास्तत्वप्रयुक्ताभोगोपकरणादिसमृद्धयः॥२१॥ तथाहेराजन्भोगाःशब्दादयोविषयाः
विभूतयोणिमादयः महीराज्यंराज्ञांकर्मभावोराज्यंस्वामित्वंमहाराज्यंसार्वभौमत्वंइत्यर्थः॥ बलंचतुरंगयुक्तंकोशोधनसंचयः॥२२॥ सर्वेचैतेगंधर्वनगरस्व
रूपागंधर्वनगरेपात्तुल्यप्रख्यायंतेप्रसिध्यंतेतत्पागंधर्वनगरत्वेनप्रसिद्धाःगंधर्वाणांहिनगरमवासस्थानंननियतंतावदेतेप्यनियताश्चंचलाः स्व
नित्याइतियावत्॥ प्रसिद्धंदृष्टांतरमाह स्वप्नमायामनोरथाइति॥ स्वप्नेयेमायामनोरथास्तेमायाप्राद्वस्त्राप्सर्यैवाच्याश्चर्यरूपामनोरथाःसंकल्पविकल्प
विकल्पात्मकमनोविषयादेशांतरगमनराज्याभिषेकपरिरम्भादादयः तेचार्यभत्ताएवततत्स्वरूपानुभाव्यत्वेनचाल्पकालानुभाव्यपुण्यपापात्मक

शब्दादयश्चविषयाश्चबलाराज्यविभूतयः॥ महीराज्यंबलंकोशोभृत्यामात्यासुहृज्जनाः॥२२॥ सर्वेपिशूरसे
नेमेशोकमोहभयार्तिदाः॥ गंधर्वनगरप्रख्याःस्वप्नमायामनोरथाः॥२३॥ दृश्यमानाविनार्थेननदृश्यंतेमनो
भवाः॥ कर्मभिर्ध्यायतोनानाकर्माणिमनसोभवन्॥२४॥ कर्मफलत्वेनचेश्वरसृष्टानांजागरदवस्थानुभाव्यपदार्थेस्वपि ल

क्षणत्वात्स्वप्नमायामनोरथवदनित्याइत्यर्थः श्यांतक्तविशेषः स्वप्नमायामनोरथाःतत्कालमात्रावस्थायिनःएतेतुतदपेक्षयाकिंचिच्चिरकालस्थाव
स्थायिनःइत्यनित्यत्वेनतत्तज्जीवकर्मानुसारेणसृष्टत्वंमनःप्रभवत्वंसुखमात्राहेतुत्वंचोभयत्राप्यविशिष्टं॥२३॥ नदेवाहदृश्यमानाइति॥ अर्थेनपरम
पुरुषार्थेनविरतिप्रायानंदेनविनादृश्यमानाः नदृश्यंतेकालांतरेपिनदृश्यंतेजगत्स्वप्नावस्थाद्वयानुभाव्यापदार्थामनोभवाश्च ननुस्वाप्नपदार्थामि
नोभवाइतितुप्रयुक्तंतेषांयथास्वप्नद्रष्टुःकर्मानुसारेणमनःसंकल्पविकल्पौकरोतितदनुसारेणेश्वरसृष्टत्वेनमनोनिमित्तकत्वाज्जाग्रतवस्थानुभा
व्यानांपुत्रदारादीनांकथंमनःप्रभवत्वंतत्राहकर्मभिरनादिवासनानारूपैरर्पितान्विषयान्मनसाध्यायतःपुंसःतावत्कर्माणिमनसाभवंतअनादिकर्मवासनावासितम
नःसंयुक्तैरिंद्रियैर्विषयांध्यायंस्तावत्कर्माणिकरोतीत्यर्थः २४

गवत्तुर्भवपिपृष्ठोतत्र तावदंगिरा आत्मनोस्तागमनप्रयोजनं च वदं श्चित्रकेतोर्वैराग्यमुत्पादयति ॥ अहमित्यादिना प्रथमममाविशेषत्यंतेन ॥ हे नृप पूर्वं
पुत्रकामस्य मानस्य तव पुत्रदो ऽस्म्यंगिराः सो ऽहमस्मि एष द्वितीयस्तु यस्मात् साक्षाद्ब्रह्मणः सुतो भगवान् नारद ऋषिः ॥ १७ ॥ किमर्थमागताविति तत्राह इत्थमि
ति पुत्रशोकेनेत्थं दुस्तरे तमसि ज्ञाने मग्नमतदर्हं शोकानर्हं महापुरुषगोचरं तत्कृष्णपुरुषैरनुगम्यं त्वामनुस्मृत्य स्मृत्वाभिज्ञाय भवतो ऽनुग्रहाय भवं
तमनुगृहीतुमावां प्राप्तौ हे प्रभो ब्रह्मण्यो ब्रह्मकुलेषु धुर्यो ब्रह्मण्यः तत्रापि भगवद्भक्तः त्वादृशो वसीदितुं दुःखितुं नार्हसि यद्यपूर्वमागतस्तदा त्व
दर्थमागतो ऽहं ते तुभ्यं परं ज्ञानं ददामि ॥ भगवद्भक्त इत्यत्रादिकमेणोक्तः ॥ आरब्धभगवद्भक्तियोगः भक्तियोगारंभमात्रतायाः सत्संगतेः कृतत्वा

त् अंगिरा उवाच ॥ अहं ते पुत्रकामस्य पुत्रदो ऽस्म्यंगिरा नृप ॥ एष ब्रह्मसुतः साक्षान्नारदो भगवानृषिः ॥ १७ ॥
इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे ॥ अतदर्हमनुस्मृत्य महापुरुषगोचरं ॥ १८ ॥ अनुग्रहाय भवतः प्राप्ता
वावामिह प्रभो ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हति ॥ १९ ॥ तदैव ते परं ज्ञानं ददामि गृहमागतः ॥ ज्ञात्वा
न्याभिनिवेशं ते पुत्रमेव ददाम्यहं ॥ २० ॥ अधुना पुत्रिणां तापो भवतैवानुभूयते ॥ एवं दारा गृहा रायो विविधैश्व
र्यसंपदः ॥ २१ ॥ इति भावः ॥ १९ ॥ नहि पूर्वमेव ज्ञानं किं न दत्तवानत्राह ॥ तदैवेति ॥ पूर्वमेव ते तुभ्यं परं ज्ञानं गृहमागतो ऽहं ददामि परं तु ते तव अन्याभिनिवेशं पुत्राभि
लाषं ज्ञात्वा ते तुभ्यं पुत्रमेवाहं दत्तवान् ॥ २० ॥ नहि पूर्वमेव ज्ञानं न तु ममान्याभिनिवेशो सत्यपि तत्स्य दुःखोदर्कं तं ज्ञापयित्वा ज्ञानमेव किं न दत्तवानित्यपेक्षायाम
भिलषितपुत्रप्रदानमंतरेण दत्तमपि ज्ञानं न सुप्रतिष्ठितं भवति पुत्रोत्पत्तिविपत्तिभ्यामनुभूतसुखदुःखस्य तद्दृष्टांतेनेतरेषामपि वैषयिकसुखानां सुखो
दर्कं तामनुमन्यमानस्य संजातवैराग्यस्यानुदत्तं ज्ञानं सुप्रतितिष्ठि भवतीत्यालोच्य न दत्तवानस्मीत्यभिप्रायः ततः पुत्रदृष्टांतेनेतरेषामप्यं ततो दुःखहेतु
तां निदर्शयति ॥ अधुनेति यथैव भवता पुत्रिणां तापो ऽधुनानुभूयते ज्ञायते एवं दारा रायो ऽपि सर्वे ऽप्यरसेनेशाश्शोकमोहभयार्तिदाः संतरणानुभविष्यं

भा·मा·
७१

पुत्रशोकेन म्लानं म्लानं वक्त्रं पाणिना प्रमृज्य विशोध्य भाषनोवाच ॥ ९ ॥ तदेवाह ॥ कोऽस्मादिना ज्ञानदीपः उदीर्यतामस्तु तेन तावदस्य एवं वेषो तो एवं वा कोऽमति
इच्छति ॥ कोऽतिज्ञानसंपन्नो अतएव प्रज्ञानामपि श्रेष्ठः एवं वा तावत्कोऽपीच्छन्न पि किं इच्छसीत्यत्राह ॥ अवधूतेन क्रूरेण वेषेण गूढो तिरोधापितस्ववेषो
इह समागतो एवामनस्य पादः क्व त्वस्येताह शज्ञानसंपत्तिर्दुर्लभेतिभावः ॥ १० ॥ विष्णोर्नेता निलोकानां पावनाय चरंति हि ॥ त्र्यक्षरीत्या लोकाननुग्रहायैवाव
धूतवेषा ज्ञानिन ऋषयश्चरंतीत्याह चरंतीति ॥ ब्राह्मणा भगवन्नक्ता उन्मत्तस्येव लिंगं येषां ता दृशाः संतो ग्राम्यबुद्धीनां विषयासक्तानां संसारिणां मादृशानां
बोधाय ज्ञानोत्पादनाय पावनो भवेत् मोक्षकामं यपेक्ष्य चरंति हि यस्मात् भगवत्प्रियाः उन्मत्तलिंगिनः एवमादृशां बोधाय चरंत्यतो एवं वा कोऽपीति वान्वयः ॥ ११ ॥
कोऽप्येवं ज्ञानसंपन्नो महिष्ठो वमहीयसां ॥ अवधूतेन वेषेण गूढाविह समागतो ॥ चरंति ह्यवनौ कामं ब्राह्मणा भ
गवत्प्रियाः ॥ मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिंगिनः ॥ ११ ॥ कुमारो नारद ऋभुरंगिरा देवलोऽसितः ॥ अपांतर
तमा व्यासो मार्कंडेयोऽथ गौतमः ॥ १२ ॥ वसिष्ठो भगवान् रामः कपिलो बादरायणिः ॥ दुर्वासा याज्ञवल्क्यश्च जातू
कर्णस्तथारुणिः ॥ १३ ॥ लोमशश्च्यवनो दत्तः आसुरिः सपतंजलिः ॥ ऋषिर्वेदशिरा धौम्यो मुनिः पंचशिखस्तथा
१४ ॥ हिरण्यनाभः कौशल्यः क्रतुदेव ऋतध्वजः ॥ एते परे च सिद्धेशाश्चरंति ज्ञानहेतवः ॥ १५ ॥ तस्मात्त्वं ग्राम्य
णो मेमम मूढ धियः प्रभो ॥ अंधे तमसि मग्नस्य ज्ञानदीप उदीर्यतां ॥ १६ ॥ ब्राह्मणा भगवत्प्रियाः तु मत्तन्मत्तलिंगेन चरतः एव
दर्शयति कुमार इति चतुर्भिः सनत्कुमारः ॥ १२ ॥ रामो भार्गवः ॥ १३ ॥ दत्तो दत्तात्रेयः सपतंजलिः पतंजलिना सहासुरिः अरण्यजमुनिकृतः एषः वेदशिरा तथ्य इति संधिरार्षः
वेदशिरा वा अयमिति पाठे वा अस्य गोत्रापत्यं वा धौम्यः आंगिरसः कपिवो वा वांगिरस इति यद्वा ॥ १४ ॥ एते कुमारादयः त पापरे च ज्ञानमेव संपन्नेषां ते सिद्धेशाश्च
रंति ॥ १५ ॥ एवं यो कोऽपि त्वावद्यस्मात्त्वं तस्मात् दृशा बोधनेदतो तस्मात्त्वं मां मम ज्ञानमेव दीपं प्रवर्त्यतां दीपतां तस्य पर्यंकपर्यस्त्संसारांधे तमसि ज्ञानरूपे मग्नस्यातएव

श्रीमद्भागवतमाहात्म्ये ७१

देहिनो देहो जायते देहार्थं स्वप्रावृत्त इति नित्यसंबंधार्थकमत्वर्थेनि प्रत्ययांतेन जीवो निर्दिष्टः ॥ तत्रायं नन्वनादिः स्वाकरदेहसंबंधो जीवस्य नित्यस्त्वेदप्रस्य
थेनित्यसंबंधिनोप्यपुरुषार्थरूपत्वे वस्मात्तु पुरुषार्थरूपत्वमिति शंकां निराकुर्वेत्ता वाहतुः ॥ देही हि परायोयमविवेकः ॥ अनादिदेहात्मभ्र
मस्वतंत्रात्मभ्रमरूपपरमार्थकमेमलकस्तेन कृतो देहदेही विभागः स्वरूपतः अयं देहोयं देहीति विभागस्थितेप्यात्मनि देवमनुष्यादिदेहप्रति
बंधस्य यत्नात्मात तदात्मप्रतिबंध्यथं देह इति विभागः केवलदेहात्मादिभ्रममूलकः संजातस्तस्यर्थः ॥ अयं यथा शुक्तरजतत्वजात्यापरस्रजतव्यक्ति
भिन्नेषु शुक्त्यादिवस्तुनीदं रजतमिति रजतत्वतदाश्रयव्यक्तो विभागः परमार्थसादृश्यादिदोषमूलकेन भ्रमेणाकल्पितवत् ॥ यद्यपि दृष्टांते रजतत्वेनत
दाश्रयरूपजातिव्यक्त्युभयभिन्नेषु शुक्त्यादौ जातिव्यक्तिविभागः कल्पितः स च विभागः प्रतीतिमात्रविषयो न तु प्रतीतिविषयः ॥ अत एवानेदं रजतमिति

देहदेहिविभागोयमविवेककृतः पुरः ॥ जातिव्यक्तिविभागोयं यथा वस्तुनि कल्पितः ॥ ५ ॥ श्रीशुक उवाच ॥
एवमाश्वासितो राजा चित्रकेतुर्द्विजोक्तिभिः ॥ प्रमृज्य पाणिना वक्त्रमाधिम्लानमभाषत ॥ ६ ॥

तत्र बाधव इति दार्ष्टां
तिके तु देहप्रत्याश्रयभ्रांतरावात्मरूपे वस्तुनि देहदेहिविभागः स च प्रमितिविषयश्च ॥ अत एव हितत्र नायं देहः नायं देहीति पाश्चात्या बाधना दर्शनं चेति दृष्टांतदार्ष्टां
तिकयोर्वैषम्यं तथाप्युभयत्र जातिव्यक्तिविभाग देहदेहिविभागयोर्भ्रममूलकत्वस्य भ्रमकारणयोः सादृश्यकर्मणोः प्रामाण्यिकत्वस्य साम्याद् दृष्टांतिकभावः उप
पन्नः न हि दृष्टांतदार्ष्टांतिकभावे सर्वसाधर्म्यमपेक्षितं अन्यथा तयोस्तादात्म्यापत्त्या दृष्टांतदार्ष्टांतिकभावस्यैव व्याप्यसंगतत्वापत्तेः ॥ अविवेककृतत्वस्यैनेन
विवेकं प्रति निमित्तमतेपुण्यपापात्मके कर्मणि परमात्मोपासनेन निःशेषं निरस्ते सति तन्निमित्तदेहात्मभ्रमादेरपि निवृत्ता वपुरुषार्थसंबंधात्मस्वरूप
मनुभवंतं भवतीति सूचितं यथा दृष्टांते सादृश्यप्रत्यदोषत्व निवृत्त्यनेन निवृत्ते भ्रमे जातिव्यक्तिविभागानवेक्षतया दियापात्म्यमनुभवतं भवति तद्वत् ॥ देहीति
मतिज्ञस्य योनित्ययोगोपि तु संबंधमात्र इति भावः ॥ ५ ॥ एवमपि स्म्यां बोधितश्चित्रकेतुर्जातविवेकस्तावद्वा चेत्याह मुनिः एवमिति द्विजयोरंगिरोनारदयो

भा॰ष॰ मितिशंकमानं प्रपृच्छंतं ते प्राह इति ॥ अयं भावः एवं स्वष्टुरपि न वैषम्यादिदोषप्रसक्तिः सर्वेषां जंतूनां तत्कर्मानुसारेण नियंतृत्वाद्विषमसृष्टेः सुखदुःखादेश्च देव
१० दिदेहत्वलक्षकर्मसापेक्षत्वादिति भावः ॥ तथा च श्रुतिः ॥ साधुकारी साधुर्भवति पापकारी पापो भवति पुण्येन कर्मणा भवति पापः पापेन कर्मणेति ॥ तथा चोक्तं
भगवता पराशरेणापि देवादिवैचित्र्ये हेतुः देवादीनां प्राचीनशक्तिरेवेति निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि प्रधानकारणीभूता यतो वै सृज्यशक्तयः ॥ नि
मित्तमात्रं मुक्त्वैवानान्यत्किंचिदपेक्षते ॥ नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तुवस्तुतां इति स्वकर्मणैव वस्तु देवत्वं वस्तुतां देवादिप्राप्यत इत्यर्थः ॥६॥
किंच देहस्य जन्ममरणादिस्वभाववत्त्वादपुरुषार्थस्वरूपत्वादात्मनस्तु तद्विपरीतस्वभाववत्त्वाच्च न देहसंबंधः प्रयुक्तः शोक कार्ये स्यादहं देहेनेति ॥ हे राज
न्देहिनो जीवस्य देहेनापि तत्प्रारीरेण देहात्मात्प्रारीरादभिजायते यथात्मि जायते यथा बीजादेवस्मेनो निहिताद्बीजांतरं जायते ॥ दिह उपचये इति धा

देहेन देहिनो राजन् देहाद्देहोऽभिजायते ॥ बीजादेव यथा बीजं देह्यर्थेऽवशाश्वतः ॥७॥

तु प्रागाद्यस्यार्थकाद्दिह धातोर्निष्पन्नो देहशब्द उपचयापचयादिषड्भावविकारवत्वाचकः प्रयुक्तः ॥ तस्य तत्स्वभाव्यस्य स्वनापरत्वं चाग्नेरौष्ण्यं
प्रतीवज्जानस्य प्रैत्यप्रतीव देहस्यासक्तिं प्रतिशोकासुखेति भावः ॥ आत्मनो देहविपरीताकारत्वमुक्तं ॥ देह्यर्थेऽवशाश्वतः इति देही जीवः शाश्व
तः नित्यः सततैकरूपश्चात्र वाचार्थः पुरुषार्थरूपः आनंदो हि पुरुषार्थेऽवशब्द एवकारार्थकः निपातानामनेकार्थत्वात् पुरुषार्थरूप एवे
त्यर्थः ॥ नित्यत्वसततैकरूपत्वादिस्वभावात्मानुदर्शनं विहाय तद्विपरीतं देहे प्रत्यनुशोकोऽनर्थ इति भावः ॥७॥ ७०

नन्वभ्युपेतविशेषांशो जीवः सावज्ञात्संबंधापादकमवस्थितं तदेहं प्रत्यनुशास्या मीत्यत्राह ॥ वयं चेति ॥ वयं त्वं चान्ये इमे चराचरास्सर्वे तुल्यकालाः वर्तमान
कालीना यथा जन्ममरणयोः प्राक् पश्चाच्च न संति जन्मतः प्राक् नासन्मरणात्पश्चाच्च न भविष्यति भो राजन् त्वमधुनाद्य मध्येव नास्ति विशरणमारब्धमिमं दे
हमप्यसंतमपश्येत्यर्थः ॥ ५ ॥ यदीशानाय याभूतेभ्यो भूतानि भवंति न भवंति तु हितस्य स्वातंत्र्यरूपमीश्वरत्वमेव न स्यात्तत जीवविशेषापेक्षया सुखदुःख
प्रदत्वेन वैषम्यनैर्घृण्यप्रसंगात पोष्यकर्मेव यथा जीवधर्मत्वाज्जीववत्कर्मानुवश्यताप्रसंगादित्यत्रोच्यते भूतैरिति भूतैः प्राकृतसमष्टिव्यष्टात्मनाव
स्थितानां सर्वेषां भूतानामीशः अंतः विषयत तत जीवकर्मानुसारेणशास्ता आत्मनात्वेन स्वेच्छेरतरणवा स्वतंत्रैः सृजतीत्यनेन तस्य स्वैष्टुः सकलेतर
विलक्षणत्वसर्वोपेक्षाशक्तित्वयुक्तत्वं चोक्तं अजः स्यानेन कर्मफलानुभवायतदायत्तोत्पत्त्यादिराहित्योक्त्या वाप्तसमस्तकामत्वमप्युक्तं भवति नन्वे

वयं चत्वं च ये चेमे तुल्यकालाश्चराचराः ॥ जन्ममृत्योर्यथा पश्चात्प्राङ्नैवमधुनापि भो ॥ ५ ॥ भूतैर्भूतानि भूतेश
सृजत्यवति हंत्यजः ॥ आत्मसृष्टैरस्वतंत्रैरनपेक्षोपि बालवत् ॥ ६ ॥ भूतः सृजतः पि जगत्सृष्ट्यादिकः केनचित्प्रयोजनेन भ

वितव्यं निःप्रयोजनस्य प्रवृत्त्यसंभवात् तत्र बुद्धिपूर्वकारिणामारंभे द्विविधं हि प्रयोजनं स्वार्थिकः परार्थो वा न हि परस्य ब्रह्मणः स्वभावत
एवाप्तः समस्तकामस्य जगत्सर्गेण किंचनः प्रयोजनमनवाप्तमवाप्यते ॥ नापि परार्थः ॥ अवाप्तसमस्तकामस्य परार्थता परानुग्रहेण भवति न च
दृशाजन्मगर्भजन्मजरामरणनरकादिनानाविधानंदुःखबहुलं जगत्करुणावान् सृजतीत्याशंकमानं प्रत्याह ॥ निरपेक्षो बालवदिति प्रयोजननिर
पेक्षोपि बालवत्सृजतीत्यर्थः दृष्टांततारतम्येन जगत्सृष्ट्यादेस्तल्लीलैकप्रयोजनत्वमुक्तं निरपेक्षोपीत्यनेन लीलातिरिक्तप्रयोजनांतरनिरपेक्ष
त्वेचोक्तं अतो नासकामत्वभंगः नापि प्रवृत्त्यसंभवः केवललीलैकप्रयोजनानां कंदुकाद्यारंभाणां बालमहाराजादिषु दर्शनात् ॥ न त्वेवमपी
श्वरस्य देवतिर्यङ्मनुष्यस्थावरात्मनोत्कृष्टमध्यमापकृष्टसृष्ट्यापत्तमातः प्रसज्येत अतिघोरदुःखयोगकरणान्नैर्घृण्यं चावर्जनीय

भा॰प
६५

एवं गतांवैगिरो नारदौ शोकापनयाय तत्र ऋचतुरित्याह मुनिः ऋचतुरिति ॥ मृतकोपांते शिशवसमीपे पतितं मृतकोपमं शवसदृशं । तत्र हेतुः शोकेनाभिभूतं ति
रस्कृतविवेकं राजानं चित्रकेतुं सद्युक्तिभिः प्रकृतिपुरुषेश्वरयाथात्म्यवेदिनीभिरुक्तिभिर्बोधयंतौ विवेकमुत्पादयंतौ ब्रूचतुः ॥१॥ सद्युक्तिभिर्बोधन
प्रकारमेवाह क इत्यादिना वक्ष्यमाणनिकल्पितः स्यं तेन तावज्जीवानां परस्परं निरुपाधिकसंबंधाभावादौपाधिकसंबंधप्रयुक्तशोकमोहभयादिनि
मित्तसंबंधस्यैव निवृत्तेनेशोकहेतुरस्तीत्याचतुः क इति हे राजेंद्र यं त्वं भवाननुशोचति सोयं प्रवाहरूपायां सृष्टौ पुराभूतकाले इदानीं वर्तमानकाले
मृतः परं भविष्यत्काले वा तव कः स्यात्त्वमप्यस्य शोचमानस्य कतमः यदि जीवात्मानं प्रति शोचसि तर्हि शोच्यस्य जीवस्य तव च कः संबंधः कालत्रयेप्य

श्रीशुक उवाच ऋचतुर्मृतकोपांते पतितं मृतकोपमं शोकाभिभूतं राजानं बोधयंतौ सद्युक्तिभिः ॥१॥ कोयं स्यात्तव राजेंद्र
भवान्यमनुशोचति ॥ त्वं चास्य कतमः सृष्टौ पुरेदानीमतः परं ॥२॥ यथा प्रयांति संयांति स्रोतोवेगेन वालुकाः ॥ संयुज्यंते वि
युज्यंते तथा कालेन देहिनः ॥३॥ यथा धानासु वै धाना भवंति न भवंति च ॥ एवं भूतेषु भूतानि चोदितानीशमायया ॥४॥

नैनत्तव कः संबंधस्त्वयीत्यर्थः ॥२॥ देहद्वारकपितृपुत्रसंबंधेनानुशोचामि इत्यत्राचतुः यथेति स्रोतोवेगेन प्रवाहवेगेन यथा वालुकाः सिकताः कदाचित्संयांति संयुक्ता भवं
ति कदाचित्प्रयांति वियुक्ताश्च भवंति तथा कालेन निमित्तेन देहिनोप्यन्यैर्देहिभिः सह संयुज्यंते वियुज्यंते च देहिनां परस्परं कालकर्मायत्तदे
हद्वारकसंबंधस्यौपाधिकत्वादुपाधिविलये तत्प्रयुक्तसंबंधस्यापि विलयादिहि लीनसंबंधप्रयुक्तः शोको न कार्य इति भावः ॥३॥ ननु पितृपुत्रादिसंबंधो न के
वलमात्मगतो नापि देहमात्रगतस्तथापि तु विशिष्टगततो विशिष्टप्रत्येवाहं विशिष्टरूपः शोचामीति चेदेवमपि न शोकः कार्य इत्याहतुर्यथेति । यथा धानासु बीजेषु
जातिगुणादि विशेषणविशिष्टेषु तादृशा धाना बीजांतराणि ईश्वरसंकल्पेन भवंत्युत्पद्यंते ॥ अपादानस्यैवाधिकरणत्वविवक्षया सप्तमी न भवंति न स्पंदंति च । य
था भूतेभ्यः भूतानि तन्नाशपी ईश्वरमायया उत्पद्यंते नश्यंति च ॥ अप्राणिभ्यो प्राणिनामिव प्राणिभ्यः प्राणिनामप्युत्पत्ते ईश्वरसंकल्पायत्तत्वात् तत्प्राणिभिरपी
श्वरमायावैभवमनुसंदधद्भिर्निस्तूष्णीमेव स्थेयं न तु शोकः कार्यः किंच विशिष्टविशेष्यांशस्य जीवस्य गतत्वाच्च न शोकः कार्य इति भावः ॥४॥ ४ ४ ६५

हेतातपुत्रत्वंतुतिष्ठस्मेवयस्मात्त्वत्तसमानावयसः शिशवोबालाः नृपनंदनत्वयासमंसंविहर्तुंत्वामाकर्षयंतिकिंचत्वंचिरंसुप्तः स्वपानयाक्रथावप
रितोसापत्नः ॥ अतः किंचिद्धृतशर्करादिमुलत्तस्तन्यंदुग्धंपिबस्वकानांनोस्माकंशुचोहरापनुद ॥५७॥ हेतनूजपुत्रकतेतवाननाज्जंमुखकमलमहंमंद
दृशोनदृष्टवतीकथंभूतंमुग्धंसुंदरंस्मितंयस्मिन् मुदितेचलत्सलक्ष्मणीनेत्रेयस्मिन्ताहृशं ॥ अतएवमहतंमंगलंयस्याःसाहमिदानीमपितवकलाम
धुरांगिरांनशृणोमिनाश्रोषंतर्हिकिमपुनरत्वयंपुनरागमनरहितमन्यलोकंलोकांतरंप्रत्यघृणेनदैवेननीतःप्रापितःगतोसिकिंवेत्यर्थः ॥५८॥ ए
वंदंपत्योरन्योन्यचमत्कारशोकाविष्टयोरेवनारदःपुनरंगिरासहात्रायोयोऽस्याहमुनिः प्रलपंत्यामिति ॥ मृतंपुत्रंप्रतिचित्रविलापनैरितिप्रलपंत्याःसत्याः

उत्तिष्ठतातस्मेशिशवोवयस्यास्त्वामाकर्षयंतिनृपनंदनसंविहर्तुं सुप्तश्चिरंस्वशनयाचभवान् परीतोभुंक्ष्वस्तनं
पिबशुचोहरनःस्वकानां ॥५७॥ नाहंतनूजददृशेहतमंगलाते मुग्धस्मितंमुदितवीक्षणमाननाब्जं ॥ किंवागतोस्य
पुनरन्वयमन्यलोकंनीतोघृणेननशृणोमिकलागिरस्ते ॥५८॥ श्रीशुकउवाच ॥ विलपंत्यामृतंपुत्रमितिचित्रविला
पनैः ॥ चित्रकेतुर्भृशंतप्तोमुक्तकंठोरुरोदह ॥५९॥ तयोर्विलपतोःसर्वेदंपत्योस्तदनुव्रताः रुरुदुःस्मनरानार्यःस
र्वमासीदचेतनं ॥६०॥ एवंकश्मलमापन्नंनष्टसंज्ञमनायकं ज्ञात्वांगिरानाममुनिराजगामसनारदः ॥६१॥ इति श्री
भागवतेमहापुराणेषष्ठस्कंधेचतुर्दशोध्यायः ॥१४॥ चित्रकेतुरपिनितरांशोकेनतप्तोतएवमुक्तकंठैःस्वरयुक्तःकंठोयस्यता
दृशःरुरोदहेति ॥५९॥ तयोर्दंपत्योरेवंविलपतोःसतोस्तदनुव्रताः ॥ सर्वेनरानार्यश्चरुरुदुःइतरत्सर्वंजनजातमचेतनंप्रापमासीच्चित्रितप्रति
माऽचेत्यर्थः ॥६०॥ एवंकश्मलंमहद्दुःखमापन्नमतएवनष्टसंज्ञंविवेकरहितमनायकंतत्त्वोपदेष्टाररहितंसमुदायंज्ञात्वाश्रीनारदेनदे
वर्षिणासहितोंगिरानाममुनिराजगामागतवान्निष्कपेण ॥६१॥

भा॰प॰
६२

तिरूपं ईहसे चेष्टसे एतदेवाह परे स्वाकालजाते पित्रादौ अनुजीवति सत्यपरस्य पश्चात्कालजातस्य पुत्रादेर्या मृतिर्मरणमिति तदेतदप्रतिरूपमित्यर्थः॥ विपर्यय
श्चेद्यद्युक्तविपर्यय एव स्यात्तत्र पुत्रादौ जीवति पित्रादेरेव मृतिः स्यादित्यर्थः॥ तर्हि त्वं ध्रुवं नूनं परः सर्वोत्कृष्टोऽसुवेः नियमे न तत्र भावत्वं बालिशता वेति भा
वः यद्वा न तु सृष्टिक्रमपित्रादिक्रमेणैव मृतिः स्वनियतेति चेत्तर्हि ध्रुवं नूनं त्वं परः सर्वोत्कृष्टो मात्सर्यविक्षेपः॥ ध्रुव इति प्रथमं तपा वेत्त्वं नित्यः शत्रुरसीत्या
र्थः॥५४॥ ननु तत्कर्मानुसारेण उत्पत्तिमरणोस्तः॥ न चात्र क्रमोऽस्ति न वा ममात्रापराधोऽस्तीत्यत्राह॥ न हीति॥ इह प्रकृतिमंडले शरीरिणां मृत्युजन्मनोः
क्रमो नास्ति चेत्पश्चाज्जातपुत्रे जीवत्येव पिता पूर्वं जातो म्रियत इत्येवंविधः क्रमो नास्ति चेदित्यर्थः॥ उत्पत्तिक्रमेणैव मृतिक्रमो नास्ति इति चेदित्यर्थः

अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे॥ परे नु जीवत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वम
सि ध्रुवः परः॥५४॥ न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः॥ यः स्नेहपाशो निजसर्गवृ
द्धये स्वयं कृतस्ते तमिमं विवृश्चसि॥५५॥ त्वं तात नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तं।
अञ्जस्तरेम भवताप्रजदुस्तरं यद्ध्वांतं न याह्यकरुणेन यमेन दूरं॥५६॥ जन्ममरणं दृष्टान्तयति यथा जन्मनि क्रमोऽस्ति तथा मृ
तौ क्रमो नास्तीति चेत्तर्ह्यात्मकर्मभिरेव मृत्यादिकं सर्वमस्तु किमीश्वरेण त्वया कृत्यमस्ति कर्मानुसारेण फलप्रापकोऽहमिति चेत्तत्राह य इति॥ निजस
र्गवृद्धये त्वया स्नेहपाशः पुत्रादिषु स्नेहरूपः पाशः कृतस्तमिमं स्वयमेव विवृश्चसि॥ आर्षत्वात्स्वार्थेनायां लट् छिनत्सीत्यर्थः॥५५॥ एवं दैवं प्रत्याक्रु
श्यापमृतं बालकं प्रति विललाप॥ त्वमिति॥ हे तात पुत्र मामनाथामेततदुःखसागरादुत्तरकरहितां दीनां त्यक्तुं त्वं नार्हसि तव शोकेन तप्तं पितरं चित्रके
तुं विचक्ष्व पश्य॥ यद्यस्मात्त्वत्कर्तृकादवलोकनादप्रजदुस्तरमनपत्यत्वप्रयुक्तादपि क्लेशात् दुस्तरं अप्रजत्वक्लेशात्कष्टं यथा वित्सोढुं शक्यः अ
पतुं निस्तरामो दुस्तरकमपि इति भावः तं ध्वान्तं शोकं तरेम याथ त्रिप्रपसि तद्यकरुणेन निर्घृणेन यमेन करणभूतेन मामपि दूरं नय यमसमीपं नयेत्यर्थः ५६
१६२

ऽन्वविततः मत्सहेतुर्यस्मिंस्तं मृतं सुतं श्रुत्वा स चित्रकेतुः ॥ रूः खिन्नोऽभूदिति शेषः ॥ तदेवाह नष्टदृष्टिरिति ॥ पुत्रे स्नेहानुबंधः तेनानुबद्धस्तेन हेतुनाऽधि
तया वर्द्धितया शुचा शोकेनातीव पीडितः स्वत एव विनष्टा दृष्टिर्यस्मात्तथाभूत एव पपात क्वचित्स्खलन्नक्वचित्स्खलन क्वचिद्विमूर्छितः स राजा चित्रकेतुः
तु स स्वरात्रुद्धिः प्राकृतैर्भिरमात्यादिभिर्द्विजैश्च परिवृतः ॥ ५० ॥ मृतस्य बालस्य पादमूले पपात कथंभूतः विप्रकीर्णाः शिरोरुहा अंबरो यस्य च दीर्घेय॰
यात्तयाऽश्वसनश्वासं संमुंचन् वाष्पकलाभिरश्रुबिंदुभिरुपरोधतः संगतत्वेन निरुद्धः कंठो यस्य तादृशः भाषितुं किंचिदपि वक्तुं न शशाक नाश

श्रुत्वा मृतं पुत्रमलक्षितांतकं विनष्टदृष्टिः प्रपतन् स्खलन्पथि ॥ स्नेहानुबंधैधितया शुचा भृशं विमूर्छितोऽनुप्रकृ
तिर्द्विजैर्वृतः ॥ ५० ॥ पपात बालस्य सपादमूले मृतस्य विस्रस्तशिरोरुहांवरः ॥ दीर्घं श्वसन् वाष्पकलोपरोधतो
निरुद्धकंठो न शशाक भाषितुं ॥ ५१ ॥ पतिं निरीक्ष्योरुशुचार्पितं तदा मृतं च बालं सुतमेकसंततिं ॥ जनस्य रा॰
ज्ञी प्रकृतेश्च हृद्रुजं सती दधाना विललाप चित्रधा ॥ ५२ ॥ स्तनद्वयं कुंकुमपंकमंडितं निःषिंचती सांजनवाष्पबिंदु
भिः ॥ विकीर्य केशान् विगलत्स्रजः सुतं शुशोच चित्रं कुररीव सुस्वरं ॥ ५३ ॥

क्रोत ॥ ११ ॥ तथोरुशुचा महता शोकेनार्पितं व्याप्तं पति
तथैकमेव संततिरूपं मृतं बालं पुत्रं च निरीक्ष्य जनस्य राज्ञः प्रकृतेरमात्यादेश्च हृद्रुजं मनःपीडां यथा भवति तथा सती ह्यतस्त्वकृतिः राज्ञीति पाठे सती राज्ञी
जनस्य प्रकृतेश्च हृद्रुजं यथा तथा चित्रधा अनेकप्रकारं विललाप ॥ ५२ ॥ विललापमेव प्रपंचयति स्तनद्वयमित्यादिना ॥ कलागिरः इत्यंतेन ता वत्कुं
कुमपंकेन कुंकुमामिश्रहरिचंदनेन मंडितं भूषितं स्तनद्वयमंजनयुक्तैर्वाष्पबिंदुभिर्निषिंचती विगलंति स्रजः पुष्पमाला केशान् विकीर्य कुररीव सुंदरस्व
रं सुस्वरं यथा तथा शुशोच ॥ ५३ ॥ हे विधातः त्वमहो वालिशः मूर्खः स्वेच्छया निरूपेण आकृतः यतस्त्वमात्मसृष्टेः त्वत्कर्तृकसृष्टपित्रादिक्रमनिबद्धाया स्रु

का.व.
६०

ततो नृपतिं चित्रकेतुं नर्मषो भ्रमदमानास्तद्विद्वेषेणात्र नष्टविवेकः क्रूरचित्तास्त्वयः कुमाराय गरं विषं ददुः ॥ ४३ ॥ सपत्नी नाम दृश्यं गरदानरूपमजा
नती कृतद्युतिः केवलं कुमारं वीक्ष्य सुप्त एवेति मत्वा गृहे शयनं चचार ॥ ४४ ॥ कुमारं सुचिरं तरं सुप्तमुपधार्य विज्ञाय मनीषिणी प्रक्षालन
विषयकबुद्धिमती कृतद्युतिः हे भद्रे पुत्रमानयेति धात्रीं स्तन्यदायिनीं प्रेरयामास ॥ ४५ ॥ सा धात्री शयानं सुप्तं तं उपव्रज्य कुमारसमीपं गत
उत्तारे उत्तानं तेनैकनीनिकेन यो लोचने यस्य तं दृष्ट्वा प्राणैः रहितेऽयं राजात्मजस्तानुजीवेन चरमकं दृष्ट्वा हा हतास्मीति क्रोशंती भुवि पपात ॥ ४६ ॥ करुण
विदधुर्नृपतेः पापाः स्त्रियो दारुणचेतसः ॥ गरं ददुः कुमाराय ते नृपतेः प्रिये ॥ ४३ ॥ कृतद्युतिरजानंती सपत्नी
नामघं महत् ॥ सुप्त एवेति संचिंत्य निरीक्ष्य चरन् गृहे ॥ ४४ ॥ शयानं सुचिरं बालमुपधार्य मनीषिणी ॥ पुत्रमा
नय भद्रेति धात्रीमिचोदयत् ॥ ४५ ॥ सा शयानमुपव्रज्य दृष्ट्वा चोत्तरलोचनं ॥ प्राणैर्वियात्ममित्यस्यैतं हता
स्मीति पपात भुवि ॥ ४६ ॥ तस्मात्तदा करुणं भृशमातुरं स्वनं घ्नन्त्या कराभ्यामुरउच्चकैरपि ॥ प्रविश्य राज्ञी त्वरया
त्मजान्तिके ददर्श बालं सहसा मृतं सुतं ॥ ४७ ॥ पपात भूमौ परिवृद्धवेपथुश्चामुमोह विभ्रष्टशिरोरुहांबरा
४ ॥ ततो नृपान्तःपुरवासिनो जना नराश्च नार्यश्च निशम्य रोदनं ॥ आगत्य तुल्यव्यसनाः सुदुःखिता ताश्चालीकं
मुच्चैः रुदितं तरां उरो घ्नन्त्या ताडयन्त्यास्तस्या धात्र्या ध्वानितरामातुरं दुःखयुक्तं दीनं स्वरमाकर्ण्य राज्ञी कृतद्युतिः त्वरयात्मजस्यान्तिकं प्रविश्य सहसा सर्वेषामग्रे तेनैव
बालं सुतं ददर्श ॥ ४७ ॥ ततः भूमौ पपात परिवृद्धमानपापिवाणकेन मुमोह विचित्ता ततमोहमेव दर्शयितुं तत्र विशिनष्टि विभ्रष्टशिरोरुहांबरा विभ्रष्टाः विलुलिताः शिरो
रुहाः केशाः अंबरं वस्त्रं यस्याः सा ॥ ४८ ॥ ततः नृपस्यान्तःपुरवासिनो जनाः प्रहृष्यतीति बोधनं वा जनानां वाहनराश्च नराश्च नार्यश्च सर्वे जनाः रोदनमाकर्ण्य कुमारसमी
पमागत्य सम्यक् तुल्यदुःखाः सुदुःखिता नाबभवुः तदा कृतागसं गरदानेन कृतापराधास्ताः सपत्न्यः समागत्यालीकं निष्कपटमिवापहास कपटं यथा मिथ्या वा रुरुदुः

रुरुदुः कृतागसं ४९
दुः स्वापराधं प्रत्यादयितुमिति भावः ४९
७

मातुरपि कृतेस्तनयो नितरां॥नितरां मोहसमुद्भवस्नेहस्त्वत्वर्द्धत मोहो हा मोहस्य समुद्भवो यस्य यस्माद्वेति वा ॥ तदा कृतद्युतेः सपत्नीनां प्रजाका-
मज्वरः पुत्राभिलाषरूपः संतापो भवत् ॥ ३७ ॥ तदानुदिनं पुत्रं लालयतश्चित्रकेतोः प्रजावति पुत्रवत्यां दारे भार्यायां कृतद्युतौ यथातिप्रीतिस्तथे-
तरेष्वपि प्रीतिर्नाभूत ॥ ३८ ॥ ततस्ताः सपत्न्यः आत्मसु राज्ञोऽनादरेणानपत्यत्वेन अपुत्रत्वनिमित्तेन दुःखेन च पुत्रवत्यां सपत्न्यां कृतद्युतावभ्यसूयया
आत्मानं निंदयंत्यः पर्यतप्यन्परितप्ता बभूवुः ॥ ३९ ॥ गर्हापूर्वकं परितापं तामादर्शयति ॥ धिगिति द्वाभ्यां ॥ अप्रजामपुत्रवतीमत एव पापांमाह
ग्रां स्त्रियं धिक् कुमाहृषी निंद्येत्यर्थः ॥ निंद्यत्वे हेतुत्वं दत्तयः स्त्रियं विशिनष्टि ॥ पत्युश्चागृहसंमतां गृहे संमते यागृहसंमता तत्या न भवतीत्यगृ-

मातुस्त्वतितरां पुत्रे स्नेहो मोहसमुद्भवः ॥ कृतद्युतेः सपत्नीनां प्रजाकामज्वरोऽभवत् ॥ ३७ ॥ चित्रकेतोरति-
प्रीतिर्यथा दारे प्रजावति ॥ न तथान्येषु संजज्ञे बालं लालयतोऽन्वहं ॥ ३८ ॥ ताः पर्यतप्यन्नात्मानं गर्हयंत्यो-
ऽभ्यसूयया ॥ आनपत्येन दुःखेन राज्ञोऽनादरेणन च ॥ ३९ ॥ धिगप्रजां स्त्रियं पापां पत्युश्चागृहसंमतां ॥ सुप्र-
जाभिः सपत्नीभिर्दासीमिव तिरस्कृतां ४० दासीनां को नु संतापः स्वामिनः परिचर्यया अभीक्ष्णं लब्धमा-
नानां दास्या दासीव दुर्भगाः ॥ ४१ ॥ एवं संदह्यमानानां सपत्न्याः पुत्रसंपदा राज्ञोऽसंमतवृत्तीनां विद्वेषो बलवानभूत् ॥ ४२

हसंमता पत्युर्गृहे संमतां स्यर्थः ॥ किंच प्रजाभिः शोभना पुत्रवतीभिः सपत्नीभिर्दासीमिव तिरस्कृतां तुच्छीकृतां ॥ ४० ॥ किंच दास्यपेक्षयाप्यपुत्रा
नारी निंद्येत्यात्मानं गर्हयंते दासीनामिति ॥ दासीनां को नु संतापः न कोपि तत्र हेतुः परिचर्यया सेवया स्वामिनः सकाशादभीक्ष्णं पुनः पुनः लब्धः का-
मः इष्टार्थो याभिस्तासां स्वामिनः परिचर्यालब्धाकामानां इति वान्वयः ॥ अतो वयं दास्याः दासीवद्दुर्भगा इति तुच्छाः ॥ ४१ ॥ एवं सपत्न्याः कृतद्युतेः पुत्रसं-
पदा नितरां दह्यमानचित्तानां राज्ञश्चित्रकेतोर्न संमता वृत्तिर्जीवनं यासां बलवान् विद्वेषोऽभूत ॥ ४२ ॥ ४२ ४२ छ श्री ग णप

मा.पु.
६६

वनुस्कावुस्तलः सुतोगिराः पयोगतः ॥२९॥ ततः कृतस्कतिश्चित्रकेतोर्भार्यातस्य यज्ञावशिष्टस्य प्राशनान्तरमेव तेजो श्चित्रकेतोः सकाशात्तत्र
रूपंगर्भमधारयत्पतिव्रता ॥ यथा कृत्तिकाग्नेः सकाशाद्गर्भं कुमाररूपं दधार तद्वत् ॥३०॥ तस्यां कृतस्कताववनुदिनं शुक्लपक्षे उडुपश्चंद्र इव स्मरसेना
नाशस्य चित्रकेतोस्तेजसा वीर्येण गर्भः शनैर्ववृधे रामास ॥ अथ काले दशमासात्मके काले उपाहृते गते सति कुमारः पुत्रः समजायत कंदर्पभू
तः स नरराजः पुत्रोऽस्मिति स्मरवत् तां स्मरसेन देशस्थानां जनानां परमां मुदं हर्षं जनयन्नुत्पादयन्नासन् ॥३२॥ ततः कृष्टो हर्षयुक्तो राजा चित्रके
तुः सद्यः शवस्नात्वा शुचिरुदारमनाः वस्त्रादिभिरलंकृतास्त कुमारस्य विप्रैराशिषो वाचयित्वा जातकं जातकर्म कारयामास ॥३३॥ ततस्ते

तस्यानुदिनं गर्भः शुक्लपक्ष इवोडुपः ॥ ववृधे श्रूरसेनेशतेजसा स्तनकेन च ॥ ३१ ॥ अथ कालेऽनुपाहृते कुमारः स
मजायत ॥ जनयन् स्मरसेनानां प्रशवतां परमां मुदं ॥३२॥ कृष्टो राजा कुमारस्य स्नातः शुचिरलंकृतः ॥ वाचयित्वा
शिषो विप्रैः कारयामास जातकं ॥३३॥ तेभ्यो हिरण्यरजतं वासांस्याभरणानि च ॥ ग्रामान् हयान् गजानन्त्रा
दात् धेनूनामर्बुदानि षट् ॥३४॥ ववर्ष कामममन्येषां पर्जन्य इव देहिनां ॥ धन्यं यशस्यमायुष्यं कुमारस्य म
हामनाः ॥३५॥ कृच्छ्रलब्धेऽथ राजर्षेस्तनयेऽनुदिनं पितुः ॥ यथा निःस्वस्य कृच्छ्राप्ते धने स्नेहोऽन्ववर्तत ॥३६॥

स्यो विप्रेभ्यो हिरण्यादीन् धेनूनां षडर्बुदानि च प्रादात् ॥ तत्र हयाश्वश्वाश्वर्बुदं दशकोटयः शतकोटिर्वार्बुदं चेति पश्यतानंतरं निर्देशात् ॥ तथान्येभ्या
पि वंधुमन्त्र्यादिभ्यः कामान् निधान पर्जन्य इव वर्षयन् धनकरं यशस्करं पुत्रस्यायुः करं यथा स्यात्तथा ववर्षेति क्रियाविशेषणान्येतानि ॥३५॥
अथ कृच्छ्रलब्धे वकृच्छ्रयासलब्धे तनये पितुराजर्षेश्चित्रकेतोः स्नेहोऽन्ववर्धत यथा निःस्वस्य निर्धनस्य पुंसः कृच्छ्रात्कष्टलब्धे धने स्नेहोऽन्व

६६

तावत्स्वस्य पुत्रलाभप्रयुक्ता या प्रवृत्तिं तया नितरामनिर्वृतिहेतु त्वं वदं प्रविंतेतमाह ॥ लोकपालैरिति ॥ लोकपालैरपि प्रार्थ्यास्तेषामपि दुर्लभा इति भा-
वः साम्राज्यं सार्वभौमत्वं तद्रूपं यदैश्वर्यं तेन युक्ताः संपदः भोगसंभोगोपकरणादिसमृद्धयः अप्रजं मां न नंदयंति न सुखयंति । यथा क्षुत्तृड्-
भ्यांमन्नपानादिकं कामयमानमितरे स्रक्चंदनवनितादयो न सुखयंति तद्वत् ॥ २५ ॥ तत्तस्माद्धे महाभाग पूर्वैरस्मत्पित्रादिभिः सह मया गतं प्राप्त
दुस्तरं तुमो नरकं यथा प्रजया पुत्रेण हेतुना यथा तरेम तथा विदेहि तथानुगृहाणेत्यर्थः ॥ अपुत्रस्य गतिर्नास्तीति किंवदंतीमनुसृत्यैव पूर्वैः सह गतं तम

लोकपालैरपिप्रार्थ्याः साम्राज्यैश्वर्यसंपदः नंनंदयंत्यप्रजंमां क्षुत्तृड्काममिवापरे ततः पाहि महाभागपू-
र्वैः सहगतं तमः ॥ यथा तरेम दुस्तारं प्रजया तद्विधेहि नः ॥ २६ श्रीशुक उवाच इत्यर्थितः स भगवान् कृपालुर्ब्रह्म-
णः सुतः श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजत्प्रभुः ॥ २७ ॥ ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणां च भारत ॥ नाम्ना कृतद्यु-
तिस्तस्यै यज्ञोच्छिष्टमदाद्द्विजः ॥ २८ ॥ अथाह नृपतिं राजन् भवितैकस्तवात्मजः ॥ हर्षशोकप्रदस्तुभ्यमिति
ब्रह्मसुतो ययौ ॥ २९ ॥ सापि तत्प्राशनादेव चित्रकेतोरधारयत् ॥ गर्भं कृतद्युतिर्देवी कृत्तिकाग्नेरिवात्मजं ॥

स्तं प्रजया पितरश्चातिश्रुत्युक्तरीत्या प्रजाया अभावे पितृऋणानिवृत्तेरप्रजस्य तमःप्राप्तिं सिद्धवत्कृत्वा गतमित्युक्तं ॥ २६ ॥ एवमुक्तो गिरा सत्तमनुग्र-
हीत्वा पुत्रकामेष्ट्याया जयित्वा यज्ञोच्छिष्टं हविर्भार्यायै प्रदास्यन् स्वयमार्त्विज्यकरणेनेष्टवान् ॥ २७ ॥ ततो हे भारत राज्ञश्चित्रकेतोर्भार्याणां मध्ये
या ज्येष्ठा श्रेष्ठा च नाम्ना कृतद्युतिरिति प्रसिद्धा भार्या यायज्ञोच्छिष्टं यज्ञशिष्टं हविः विप्रो गिराः अदाद्दत्तवान् ॥ २८ ॥ अथांगिरा नृपतिं चित्रकेतुमा-
ह उवाच ॥ तदेवाह हे राजन् चित्रकेतो तव पुत्रो भविता जनिष्यते ॥ कथंभूतः हर्षशोकप्रदः जन्मना हर्षं मरणेन शोकं च प्रददातीति तथा इत्येव

भाग॰ ६१

महादयो वशं यतास्तस्यैव सर्वे लोकाः सपाला बलिं हरंतीत्यन्वयः ॥ उपायनसमर्पणद्वारा सेवंते इत्यर्थः ॥ २० ॥ त्वदुक्तरीत्या जितेंद्रियस्य मम सर्वे
वशवर्तिनः संति चेत्तर्हि संतोषस्तव कुतः स्यादित्यत आह ॥ आत्मनः स्वस्य तव आत्मा मनः न प्रीयते न तुष्यतीति किं परतो वा स्वतो वा हेतोः ॥ कथमसंतोषो ज्ञायते
मम तत्राह ॥ अलब्धकामप्राप्त्याभिलषितं त्वां लक्षये तु पश्यामीति कुतः यतश्चिंतया तव मुखं शबलं विच्छायमनाह्लादमुपलक्षये ॥ २१ ॥ एवमं
गिरसा पृष्टश्चित्रकेतुः स्वमनीषितं ज्ञातवानित्याह मुनिः एवमिति ॥ विदुषा चित्रकेतोरभिप्रेतं जानतापि मुनिना एवं विकल्पितः स्वतः परतो
वासंतोषस्तवेत्येवं विकल्पपूर्वकं पृष्टः सन्नृपश्चित्रकेतुः प्रजाकामः पुत्रं कामयमानोऽतावत्प्रश्रयेण विनयेन नम्रः सन्मुनिमंगिरसमाह ॥ २२ ॥ तदे

आत्मनः प्रीयते नात्मा परतः स्वत एव वा ॥ लक्षये लब्धकामं त्वां चिंतया शबलं मुखं ॥ २१ ॥ श्रीशुक उवाच
एवं विकल्पितो राजन्विदुषा मुनिनापि सः ॥ प्रश्रयावनतोऽभ्याह प्रजाकामस्ततो मुनिं ॥ २२ ॥ चित्रके
तुरुवाच ॥ भगवन्किं न विदितं तपोज्ञानसमाधिभिः ॥ योगिनां ध्वस्तपापानां बहिरंतः शरीरिषु ॥ २३ ॥ त
थापि पृच्छतो ब्रूयां ब्रह्मन्नात्मनि चिंतितं ॥ भवतो विदुषश्चापि चोदितस्त्वदनुज्ञया ॥ २४ ॥ ८

वाह ॥ भगवन्नित्यादिना ॥ तद्विधेहि नः स्वंतेन ॥ हे भगवन् तपोज्ञानसमाधिभिः कर्मयोगज्ञानयोगभगवद्भक्तियोगैः ध्वस्तं पापं ज्ञानावारकं प्रारब्ध
पापात्मकं कर्म येषां तेषां भवादृशानां योगिनां देहिनां बहिर्गतं किंचित्ति शरीरिणामंतर्हृद्गतं च भवद्भिः सर्वं विदितमेवेत्यर्थः ॥ २३ ॥ तथा
सर्वस्य ज्ञातत्वेपि हे ब्रह्मन् ॥ आत्मनि अंतःकरणे चिंतितमर्थं पृच्छतस्तव ब्रूयां कथयामि ॥ कथंभूतः विदुषश्चापि भवदभिप्रेतं जानतोपि भव
चोदितोऽभिप्रेतकथनाय प्रेरितः त्वदनुज्ञया त्वदाज्ञया अनुज्ञापयामीति हि वैयात्यं तु स्वस्य विनयादिसंपत्तिः सूचिता ॥ २४ ॥ एकः ६५

तदेवाह अपिशब्दः॥ कुशलप्रश्नद्योतकः तेतवानामयमारोग्यमप्यस्तिकिलेतिप्रश्नः॥ आत्मनोस्वसंबंधिनांप्रकृतीनांस्वाम्यमात्यसुहृत्कोश
राष्ट्रदुर्गबलात्मिकानांसप्तानामपिस्वस्ति॥ ननुसर्वस्मिन्सतिविशेषेणप्रकृतीनांस्वस्तिकथंपृच्छसीत्यत्राह॥ यथेतिसप्तभिःप्रकृतिभिर्महदहंकार
तन्मात्रैर्यथापुमान्गुप्तःरक्षितोभवतिप्रकृत्यायत्तःसुखीभवति॥१७॥ तथाराजापिस्वाम्यादिषुसप्तसुप्रकृतिष्वात्मानंसान्निधायात्मानंप्र
कृत्यधीनंकृत्वेत्यर्थः॥ श्रेयःसुखंप्राप्नुयात्राज्यंप्रकृतिषुनिधायनिर्भरःसुखान्यनुभूयादित्यर्थः॥ अतःप्रकृतीनामेवतावत्स्वस्तिपृच्छामीतिभावः
राज्ञःश्रेयःप्रकृत्यधीनमित्युक्तमथप्रकृतीनांश्रेयोराजाधीनमित्याहराज्ञेतिहेनरदेवतथाप्रकृतयोपिराजाहेतुनाहितादयःहितमिष्टमा॥

श्री॥रा॥उ॥वा॥ पि॥ अपितेनामयंस्वस्तिप्रकृतीनांतथात्मनः॥ यथाप्रकृतिभिर्गुप्तःपुमान्राजाचसप्तभिः॥१७॥
आत्मानंप्रकृतिषुवानिधायश्रेयआप्नुयात्॥ राज्ञातथाप्रकृतयोनरदेवाहिताधयः॥१८॥ अपिदाराःप्रजा
मात्याभृत्याःश्रेणयोमन्त्रिणः॥ पौराजानपदाभूपाआत्मजावशवर्तिनः॥१९॥ यस्यात्मानुवशश्चेत्स्यात्सर्वेत
द्वशगाइमे॥ लोकाःसपालायच्छन्तिसर्वेबलिमतंद्रिताः॥२०॥

दिशाह्यादनिष्टपरिहारस्ययासांताहृष्टाभवंति॥ आहिताधयइतिपाठेत्व
नर्थैताधनाआध्योयासांनिरस्तमनोदुःखाभवंतीत्यर्थः॥१८॥ एवंराज्ञःप्रकृतीनांचान्योन्यंश्रेयःप्रापकत्वमुक्तं॥ ननुयदिराज्ञःश्रेयःप्रकृत्यधीनंतर्हि
राज्ञःस्वातंत्र्यभंगःस्यादित्यत्राह॥ अपीति॥ यस्यराज्ञोदाराःभार्याःप्रजाःअमात्याःकर्मसहायाःश्रेणयःतांबूलिकादयःमंत्रिणःमंत्रेषुसहायभूताःमित्रा
णिपौराःपुरवासिनःजानपदादेशांतराधिपतयोभूपाआत्मजपुत्रवशवर्तिनःवशंगताःसएवप्रकृतिष्वात्मानंनिधायश्रेयःप्राप्नुयादित्यर्थः॥१
९॥ कस्यैतेवशवर्तिनःस्युरित्यत्राह॥ यस्यराज्ञआत्मामनोअनुवशःवशंगतःनतुविषयपरःस्याज्जितेंद्रियस्येतिभावः॥ तस्यैववशंगताःसर्वेइमेपूर्वोक्ता
दारादयःपालकैःसहिताःसर्वेलोकाःप्रजाःअतंद्रितानागरूकाःसन्तोबलिंहरंतिसंतोषयंतियस्मात्आत्मानुवशःतस्यैवइमेसर्वेदारादयोवशंगताः॥ यस्य

भा॰ष॰
६४

एवदैवयोगेनोवाहिताऽस्तीतिभावः ॥११॥ रूपादिभिः सर्वैर्गुणोत्कर्षैः संपन्नस्य युक्तस्यापि तस्य वंध्यानां संतानरहितानां भार्याणां पत्युरतएव चिंता पुत्रला
भस्य युक्ता स्वभर्तुस्तत्र रूपं लावण्यमौदार्यं सत्पात्रे द्रव्यविनियोगशीलत्वं वयो यौवनं जन्म सत्कुलप्रसूतत्वं विद्या शास्त्रजमं ज्ञानं ऐश्वर्यं सार्वभौमत्वं ।
श्रीभोग्यभोगोपकरणादिसंपत्त एते चिंतासहिता इतिहेतवः ॥ अथाप्यपुत्रत्वमेकं सदा चिंताहेतुरासीदितिभावः ॥१२॥ तदेवाह नेति ॥ तस्यापुत्र
प्रयुक्तचिंताक्रांतस्य सार्वभौमस्य चित्रकेतोः सर्वाः संपदः वामलोचनाः महत्यो नान्यपामवयवाना मप्युपलक्षणं ॥ महिष्यश्चेयं कृत्स्ना भूमिश्च श्री

रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः ॥ संपन्नस्य गुणैः सर्वैश्चिंता वंध्यापतेरभूत् ॥१२॥ न तस्य संपदः सर्वा
महिष्यो वामलोचनाः ॥ सार्वभौमस्य भूश्चेयमभवन्प्रीतिहेतवः ॥१३॥ तस्यैकदा तु भवनमंगिरा भगवानृषिः
लोकाननुचरन्नेतानुपागच्छद्यदृच्छया ॥१४॥ तं पूजयित्वा विधिवत्प्रत्युत्थानार्हणादिभिः ॥ कृतातिथ्यमु
पासीदत्सुखासीनं समाहितः ॥१५॥ महर्षिस्तमुपासीनं प्रश्रयावनतं क्षितौ ॥ प्रतिपूज्य महाराज समाभाष्येदम
ब्रवीत् ॥१६॥

तिहेतवो नाभवन् ॥१३॥ एवं सर्वसंपत्सु प्रीतिरहितस्य केवलं पुत्रार्थमेव चिंतयतस्तस्य चित्रकेतोर्भवनं स्वगृहं प्रति
भगवानषड्गुणसहितोंगिरा ऋषिः सिद्धज्ञानकाष्ठाप्राप्तः ॥ अतएव यदृच्छया लोकाननुचरन् कदाचिदुपागतः प्राप्तः ॥१४॥ तमागतमंगिरसं यथा
विधि प्रत्युत्थानार्घ्यपाद्यादिभिः संपूज्यातिथ्यं कृत्वा भोजनादिभिः सत्कृत्येत्यर्थः ॥ सुखासनोपविष्टमंगिरसमुपाविशत्तस्य समीपउपविष्टः
वानकथंभूतः सन्समाहितः संपन्नचित्तः सन् ॥१५॥ उपासीनमुपविष्टं क्षितौ प्रश्रयेणावनतं नम्रं तं चित्रकेतुं प्रतिपूज्याहो तव विनयादिसंपत्ति
रिति वक्तुं संमान्य समाभाष्य संभाषणाभिमुखं कृत्वा महर्षिरंगिराऽइदं वक्ष्यमाणमब्रवीत् ॥१६॥ ६४

रवंनृपवप्रोतरंमुनिरित्याहसूतः॥ परीक्षितइतिअथराज्ञःप्रश्नांतरं॥ अथ ननुदेशौनकादयः इति वाप्यर्थः॥ परीक्षितःसमीचीनप्रश्नमाक
र्ण्यप्रतिनंद्याहोसाधुपृष्टमित्यभिनंद्य॥ कथंभूतस्यपरीक्षितःश्रद्दधानस्यउत्तरश्रवणविषयकत्वरायुक्तस्यउत्तरेविश्वंभयुक्तस्यवाइदंवस
नाराममब्रवीत्॥ ८॥ तदेवाहमुनिः शृणुष्वेत्यादिनाध्यायत्रयेणतावद्वृत्रस्यभगवद्भक्तिर्नेतज्जन्मनालब्धाकिंतुपूर्वजन्मनैवेतिवक्तुंतस्यपू
र्वजन्मवृत्तांतंवक्तुमनंतश्रवणाय राजानमज्ञापयति हेराजन्इमंवक्ष्यमाणमितिहासंअवहितचित्तोयथाचशृणु॥ कथंभूतमितिहासंद्वैपायन
मुखाद्व्यासात्तथानारदादेवलाच्चश्रुतंमयेतिशेषः यथाद्वैपायनादिभ्यःश्रुतंतथाकथयतोममतःशृणु इतिवान्वयः॥ श्रुतंद्वैपायनादि

सूतउवाच॥ परीक्षितोथसंप्रश्नंभगवान्बादरायणिः॥ निशम्यश्रद्दधानस्यप्रतिनंद्यवचोब्रवीत्॥ ८॥ श्रीशु
कउवाच शृणुष्वावहितोराजन्नितिहासमिमंयथा॥ श्रुतंद्वैपायनमुखान्नारदाद्देवलादपि॥ ९॥ आसीद्राजा
सार्वभौमःशूरसेनेषुवैनृप॥ चित्रकेतुरितिख्यातोयस्यासीत्कामधुङ्मही॥ १०॥ तस्यभार्यासहस्राणांस
हस्राणिदशाभवन्॥ सांतानिकश्चापिनृपोनलेभेतासुसंततिं॥ ११॥

त्यस्येतिहासस्याप्रत्वगीतत्वसूचनात्केवलाम्रतद्विप
रिकरिकल्पितत्वशंकामूलकोस्मिन्नतादरोनकार्यइत्युक्तंभवति॥ ९॥ तदेवेतिहासमाह आसीदित्यादिना हेनृप इदेणाहतोयोहतःसपूर्वे
स्मिन्जन्मनिचित्रकेतुरितिप्रसिद्धःसार्वभौमः कृत्स्नभूमेरधिपतिःशूरसेनेषुजनपदेष्वासीत्॥ तंविशिनष्टि यस्यचित्रकेतोरियंमहीकामधुक्
कामधुक्कामानित्यंतिकामादृष्टायोत्पानदोग्धिप्रस्रवयति इतितथासीत्॥ १०॥ तस्यचित्रकेतोर्भार्याःसहस्राणांदशसहस्राणिअभवन् कोटि
संख्याकाभार्याअभवन्नित्यर्थः सचनृपश्चित्रकेतुःसांतानिकःसंतानयोग्योपितासुभार्यासुसंततिंप्रजांनलेभेनप्राप्तवान् यद्वासांतानिकःस्वयंसंताना

भा॰ ष॰ भक्तेर्दौर्लभ्यं प्रपंचयति शुद्धसत्त्वानां केवलसत्त्वप्रचुराणां देवानां तावद् अमलचित्तानामृषीणामेव प्रायशो मुकुंदचरणे भक्तिर्जायते ते-
०६२ षामपि दुर्लभा का पुनरस्मदादीनामिति भावः ॥२॥ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः इत्युक्तरीत्यान्ना-
वत्पार्थिवा रजोनिरेणुभिः सह समसंख्याता जंतवः ॥ तेषां जंतूनां ये केच मनुष्यादयस्त एव श्रेयोऽधिकारिणः तावन्मनुष्यादिजन्म दुर्लभमि-
ति भावः ॥ तेषामपि केचित्स्वापयाप्त्रिवर्गरूपश्रेयःप्रवणा मुक्तये न प्रवर्तंते तावन्मुमुक्षा तेव दुर्लभेति भावः ॥ देवान्मुमुक्षूणां केषांचित्सहस्रेषु क-
श्चिन्तु यतमानो ज्ञानादिदोषैर्मुच्यते सिध्यति लब्धयोगो भवति ॥४॥ मुक्तानामसिद्धानां कोटिष्वपि हे महामुने नारायणपरायणः प्रशांतात्मा रागाद्यकलुषि-

देवानां शुद्धसत्त्वानामृषीणां चामलात्मनां ॥ भक्तिर्मुकुंदचरणे न प्रायेणोपजायते ॥२॥ रजोभिः समसंख्याताः पार्थि-
वैरिह जंतवः ॥ तेषां ये केचनेहंते श्रेयो वै मनुजादयः ॥३॥ प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तम ॥ मुमुक्षूणां
सहस्रेषु कश्चिन्मुच्येत सिध्यति ॥४॥ मुक्तानामपि सिद्धानां नारायणपरायणः ॥ सुदुर्लभः प्रशांतात्मा कोटिष्व-
पि महामुने ॥५॥ वृत्रस्तु स कथं पापः सर्वलोकोपतापनः ॥ इत्थं दृढमतिः कृष्ण आसीत्संग्राम उल्बणे ॥६॥ अ-
त्र नः संशयो भूयाञ्छ्रोतुं कौतूहलं प्रभो ॥ यः पौरुषेण समरे सहस्राक्षमतोषयत् ॥७॥

तचित्तः सुतरां दुर्लभः ॥५॥ प्रश्नार्थमुपसंहरन् तस्योत्तरदानाय मुनिं प्रेरयति वृत्रस्त्विति द्वाभ्यां ॥ तुशब्देनोक्तविपरीतं सत्त्वप्रधानं द्योत्यते रजस्तमःप्रचु-
रो वृत्रः सर्वलोकोपतापनः सर्वलोकदुःखकारी अतएव पापः इत्थमुक्तप्रकारेण कृष्णे भगवति दृढा मतिर्यस्य ताहशः कथमासीत् कर्मणि वा उल्बणे
दुःसहे नास्पणद्वादिविषयु दृढा मतिर्नासीदितीयत् ॥६॥ अस्मिन्नर्थे नोऽस्माकं भूयान्संशयो वर्तते भो मुने संशयं विशिनष्टि ॥ हि यस्माच्छ्रायाश्रो-
तुं तत्र श्रोतुं कौतूहलं चास्माकं मलिनान्विजभयादत्र कृष्णे शरणंगतः स्यपत्राहयः वृत्रः पौरुषेण सहस्राक्षमिंद्रमतोषयत् न तु स्वं द्वावयमत्तोतिभावः १ ६२

तदेवाह अशेषाणां पापानां प्रक्षालनं शोधकं निवर्तकं तत्र हेतुः तीर्थपदस्यानुकीर्तनं यस्मिंस्तादृशम् ॥ किंच भक्त्युच्छ्रयं भगवद्भक्तेरुच्छ्रयो निर्वृद्धिर्य
स्मात् यद्वा तत्र भक्तजनानां भगवद्भक्तजनानामनुवर्णनं यस्मिंस्तत् ॥ २२ ॥ किंचेंद्रियं इंद्रस्य लिंगं इंद्रः ॥ प्रत्यगात्मानमलिंगं ज्ञापकोऽतस्तद्यथात्म्यप्रतिपा
दनपरत्वादस्येति भावः ॥ यद्वा इंद्रस्येदमिंद्रियं इंद्रलिंगमिति सूत्रे ॥ इतिकरणादर्थांतरेपि तन्निपातनाभ्युपगमात् ॥ यद्वा इंद्रियपशब्दस्तद्वलं सपा
दके उपचारात् तत्तेः इंद्रियवद्धिकरमित्यर्थः ॥ यद्वा इंद्रः परमेश्वरः ॥ इदि परमैश्वर्ये इति धातुः ॥ यावत्तत्तेन जुष्टं प्रीतिविषयत्वेन परिगृहीतं श्र
वणादिद्वारा भगवत्प्रीत्यापादकमित्यर्थः ॥ धन्यं धनप्राप्तिसाधनं यशस्करं निखिलानामघानां मोचकं यस्मात्तथा ॥ पापपाप्मनां प्रक्षालनं

भक्त्युच्छ्रयं भक्तजनानुवर्णनं महेंद्रमोक्षं विजयं मरुत्वतः ॥ २२ ॥ पठेयुराख्यानमिदं सदा बुधाः शृण्वंत्यथो प
र्वणि पर्वणींद्रियं ॥ धन्यं यशस्यं निखिलाघमोचनं रिपुंजयं स्वस्त्ययनं तथायुषं ॥ २३ ॥ इति श्रीभागवते महा
पुराणे षष्ठस्कंधे त्रयोदशोऽध्यायः ॥ १३ ॥ राजोवाच ॥ रजस्तमःस्वभावस्य ब्रह्मन्वृत्रस्य पाप्मनः ॥ नारायणे
भगवति कथमासीद्दृढा मतिः ॥ १ ॥

इत्यनेन पापविनाशकत्वमुक्तं ॥ अखिलाघमोचनमित्यनेन तु पापाश्लेषकरत्वमुक्तं भवत्यतो न पौन
रुक्त्यं स्वस्त्ययनं मंगलावहं तथा आयुष्करं सर्वाण्येतानि फलानि तस्याख्यानस्य श्रवणपठनादिना भवंति न स्वरूपेणेत्यतो वस्तुतं मुक्तिफलाप्यभिरे
तदाख्यानपठनादिकं कार्यमित्युक्तं पठेयुरित्यर्धेन यतः इदमुक्तफलमथो तो बुधाः सदा पठेयुः ॥ पर्वणि पर्वणि प्रतिपर्व शृण्वंतु इत्यर्थः ॥ २३ ॥ इतिश्री
षे त्रयोदशः ॥ १३ ॥ अहं समाधाय मतो यथाहं संकर्षणस्तच्चरणारविंदे इत्यनेन वृत्रत्वात्क्वेनतस्य संकर्षणोपदेशावगतत्वात्परमात्मादि याथात्म्य
वेत्तमुक्तं तदेव विस्तरेण प्रष्टुं पृच्छति राजा रजइत्यादिना महत्सादमतोपयदित्यंतेन ॥ हे ब्रह्मन् रजस्तमश्च स्वभावो यस्यातएव पाप्मनः पापकारि
णः ॥ असुरत्वादिति भावः ॥ भगवति नारायणे दृढा निश्चला सिद्धिपर्यंता मतिर्भक्तिः हे महामुने कथमासीत्तस्य इपदेशे ह्यासुरस्वभावस्य सिद्धिपर्यंताभ

टी॰ ष॰ स्कं॰ भा॰ ९

भाष॰ ६१

यस्य तादृशपापो ब्रह्मवधः नाम्यन्तस्यास्यालक्ष्मीर्भगवद्ध्यानपरत्वादित्रिपापाद्दूरदेशस्पर्शः ॥ तमागच्छन्तं दिग्देवतया प्रागुदग्दिक्स्थितमानसरोवर॰
स्यया विसृष्टमाश्रीमहालक्ष्म्यावितप्रसंततुष्कवसंतं इन्द्रमत एव हतमोजोवलं यस्य तादृशः पापो ब्रह्मवधः नाम्यन्तस्यास्यालक्ष्मीर्भगवद्ध्या
नपरत्वादित्रिपापाद्दूरदेशस्पर्शः ॥ १७ ॥ अथ हत्यानिस्तारप्रकारमाह ॥ तमित्यादिना विधूतपापस्तस्य तेन ॥ तमागतं इन्द्रं ब्रह्मर्षयोऽभ्येत्यागस्य हेमार
तप्रकर्षाराधनेन परमपुरुषाराधनरूपेणाद्धयमेधेन यथाविधि दीक्षयाचक्रुः हयमेधं कर्तुं दीक्षितं कृतवंत इत्यर्थः ॥ हेति हर्षे खेदे वा हो इन्द्रस्ये
राद्धविधानं स्यादिति ॥ १८ ॥ अथ ब्रह्मवादिभिर्वेदवादिभिः ऋत्विग्भिरारब्धे जाते वितते विस्तृते क्रियमाणेऽश्वमेधे इन्द्रेण यजमानेन सर्वदेवतानामन्तरात्म

तं च ब्रह्मर्षयोऽभ्येत्य हयमेधेन भारत यथावद्दीक्षयांचक्रुः पुरुषाराधनेन ह ॥ १८ ॥ अथेज्यमाने पुरुषे सर्वदेव
मयात्मनि ॥ अश्वमेधे महेन्द्रेण वितते ब्रह्मवादिभिः ॥ १९ ॥ स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप ॥ नीतस्तेनैव शून्
न्याय नीहार इव भानुना ॥ २० ॥ स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः ॥ इष्ट्वाधियज्ञं पुरुषं पुराणमि
न्द्रो महानास विधूतपापः ॥ २१ ॥ इदं महाख्यानमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्तनं ॥ ०

वितते सर्वस्य यथाविधि परमपुरुषे इज्यमाने आराध्यमाने सति ॥ १९ ॥ भूयानपि स त्वाष्ट्रवधः ब्रह्मवधनिमित्तः पापापसमूहः हे परंतप तेनैवाश्वमेधेन शू
न्यायनीतः प्रापितः शून्यतां प्राप्त इत्यर्थः ॥ यथा भानुना सूर्येण नीहारः शून्यतां प्राप्यते तद्वत् ॥ २० ॥ मरीचिमिश्रैः मरीचिसहितैः तत्प्रभृतिभिरित्यर्थः
वितायमानेन अनुष्ठीयमानेन यथोक्तेन हयमेधेन अधियज्ञं यज्ञेषु प्रधानतया वर्तमानं पुराणं पुरुषं इष्ट्वाराध्य स वै इन्द्रः विधूतं निरस्तं वृत्रहत्यारूपं
पापं येन तादृशः महान्लिःप्रतियत्तः ॥ अथवा महानास संपन्न आसीत् तदुक्तं वृत्रवधाख्यानं पावनं अश्रवणादिफलं वदन् तद्विशिनष्टि द्वाभ्यां ॥ २१ ॥ इदमिति ॥ म
हेन्द्रस्य मोक्षः ब्रह्मवधनिमित्तात् पापान्मोक्षप्रतिपादनमस्मिन् मरुत्वतः इन्द्रस्य विशेषेण जयः तस्य प्रतिपादनं यस्मिन् तादृशं तदिदं महाख्यानं गुणावत्तरं ६म: ६१

पुष्करनालतंतून्मानसरोवरस्य कमलनालतंतून्तत्रावसत्सूक्ष्मरूपेणाप्रविष्टो वा मेत्यर्थः ॥ कथंतत्रतः नलब्धो यज्ञियभागो येन तादृशः कुतः यस्मात्त्वयम-
ग्निदूतः अग्निरेव दूतः हविर्भोगप्रापको यस्य तादृशः स्वदूतस्याग्नेर्हविर्भोगप्रापकस्य जले प्रवेशाभावादलब्धभाग इत्यर्थः ॥ अंतः पद्मनालस्यांतः
अवलीनोतः ब्रह्महत्यया दृष्टः ब्रह्मवधनिमित्तात्पापान्मोक्षं मोक्षोपायं चिंतयन्सहस्रं वर्षाण्यवसदित्यन्वयः ॥ १५ ॥ यावदिंद्रः पद्मनालतंतून्तत्रावसत्
तावन्नहुषो राजा विद्यातपोयोगमहानुभावः ॥ इंद्राधिपत्यप्रापकं सामर्थ्यं यस्य तादृशः त्रिनाकं स्वर्गं शशासेंद्रलोकाधिपत्यं कृतवानित्यर्थः
अकं दुःखं न विद्यते यस्मिन् स नाकः भोगदेशः भौमपातालांतरिक्षभेदेन त्रिविधाः सुखानुभवदेशाः तत्र तृतीयो नाकः स्वर्लोकः तर्हि तस्मिन्नसति

स आवसत्पुष्करनालतंतूनलब्धभोगो यदिहाग्निदूतः ॥ वर्षाणि साहस्रमलक्षितोंतः संचिंतयन्ब्रह्मवधा-
द्विमोक्षं ॥ १५ ॥ तावत्त्रिनाकं नहुषः शशास विद्यातपोयोगबलानुभावः ॥ स संपदैश्वर्यमदांधबुद्धिर्नीतस्तिरश्चां
गतिमिंद्रपत्न्या ॥ १६ ॥ ततो गतो ब्रह्मगिरोपहूत ऋतंभरध्याननिवारिताघः ॥ पापस्तु दिग्देवतया हतौजास्तं
नाभ्यभूदवितं विष्णुपत्न्या ॥ १७ ॥ कथं इंद्रस्य पुनः स्वर्गप्राप्तिस्तत्राह ॥ स नहुषः संपदैश्वर्याभ्यां भोगोपकरणादिसमृद्धिः इंद्राधिपत्याभ्यां
यो मदस्तेनांधा अविवेका बुद्धिर्यस्य तादृशः इंद्रपत्न्या शच्या हेतुभूतया तिरश्चां गतिं सर्पयोनिं नीतः प्रापितः ॥ अत्रेदमाख्यानमवगंतव्यं स्व-
र्गाधिपत्यं कुर्वन्नहुषः कदाचिदिंद्राणीमुवाच इंद्रस्त्वावदहमतस्त्वं मां भजेति तत्तया वेदितवृत्तांतो बृहस्पतिस्तामुवाच ॥ इंद्रवदृषिवाह्यशिबि-
कामारूढमहृदानागच्छसि चेत्तर्हि त्वां भजिष्यामीति ब्रूहि इति ततो सो ब्रह्मशापात्पतिष्यतीति ॥ ततः सा तं तथैवोवाच ततः स नहुषोगस्त्यादिऋषीन्
वाहनीयस्थाने रूढां शिबिकां तैर्वाहयामास तदा स शीघ्रं सर्प सर्पेत्यगस्त्यपदाघातस्पर्शात् तेन च सर्पो भवेति शप्तो नहुषो महासर्पोऽजगरोऽभूदिति ॥ १६ ॥
ततः इंद्रः स्वर्गं गतः प्राप्तः कथंभूतः ब्रह्मगिरा ब्राह्मणवाक्येनोपहूतः ऋतंभरः सत्यस्य भर्ता पोष्टा श्रीमन्नारायणः तस्य ध्याननिवारितमघं हत्यारूप-

भा.६
६१

लिप्यसे किं खलस्य दुरात्मनो वृत्रस्य निग्रहेण वधप्रयुक्तेन पाप्मना न लिप्यसे किं न लिप्यस एवेत्यर्थः॥९॥ एवं विप्रैः संचोदितः शक्रस्ततो वृत्रं जघान
स च तद्वधनिमित्तेन पापेन दुःखितस्तथाप्यदितिसाद्दमुनिः एवमिति एवं विप्रैः ऋषिभिः संबोधितः अतिपापे सम्यग्बोधितः मरुत्वानिंद्रो रिपुं वृत्रमहनद्धत
वान् तस्मिन्वृत्रे हते सति ब्रह्महत्या वृत्रस्य ब्राह्मणत्वाद्ब्रह्महत्येत्युक्तं वृषाकपिमिंद्रमाससाद आक्रांतवती॥१०॥ तया देवादिभिः कारितया ब्रह्महत्यया
स्मासहधारणोऽसहत् इंद्रस्तापमसहदसहत नान्यस्सोढुं॥ अमुमिंद्रं निर्वृतिः सुखं नाविशदिंद्रः सुखी नाभूत् किंतु दुःखमेव प्राप्तेत्यर्थः॥ ननु धैर्यादिगुणै
राधकस्य कुतो न निर्वृतिस्तत्राह ह्रीमंतं लज्जावंतं वाच्यतां निंद्यतां प्राप्तं गुणा धैर्यादयो न सुखयंति हि हिशब्देन लोकपरिपाटिः प्रदर्श्यते॥११॥

श्रीशुक उवाच॥ एवं संचोदितो विप्रैर्मरुत्वानहनद्रिपुं॥ ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिं॥१०॥ तयेंद्रः स्मास
हत्तापं निर्वृतिर्नामुमाविशत॥ ह्रीमंतं वाच्यतां प्राप्तं सुखयंत्यपि नो गुणाः॥११॥ तां ददर्शानुधावंतीं चांडालीमिव
रूपिणीं॥ जरया वेपमानांगीं यक्ष्मग्रस्तामसृक्पटां॥१२॥ विकीर्य पलितान्केशांस्तिष्ठ तिष्ठेति भाषिणीं॥ नभो ग
तो दिशः सर्वाः सहस्राक्षो विशांपते॥ प्रागुदीचीं दिशं तूर्णं प्रविष्टो नृप मानसं॥१४॥ मीनगंध्यसुगंधेन कुर्वंतीं मार्गदूषणं १३॥

एवमिंद्रस्यानिर्वृतिकारणमभिधायाथ तत्पापनिमित्तस्वप्रकारं वृसमाणस्तस्यापनिमित्तदुःखानुभवप्रकारमाह तामिति ततस्तां ह स्म इंद्रो ददर्श॥ कथं
भूतामनुसरत्पृष्ठतो धावंतीं चांडालीमिव तद्वदवस्थितां रूपिणीं मूर्तिमतीं जरया वेपमानानि कंपमानानि शिरःपाणिपादांगानि यस्यास्तां यक्ष्मग्रस्तां
यक्ष्मरोगग्रस्तामसृक्पटां तरजोरक्तवस्त्रां॥१२॥ पलितान्केशान्विकीर्य क्वगच्छसि तिष्ठ तिष्ठेति भाषमाणां मीनस्येव गंधो यस्य स मीनगंधिः स चा
सावसुश्च प्राणवायुः गतस्य गंधेन मार्गदूषणं कुर्वंतीं॥१३॥ ततः सहस्राक्षः इंद्रः नभः सर्वा दिशश्च गतः भ्रामयन् क्वापि विश्रांतिमलभमानः इत्यर्थः
प्रागुदीचीं ऐशानीं दिशं तत्रापि मानसं सरः प्रविष्टः स इंद्रः॥१४॥

६१

गतहिंदोषोक्तिमुखेन विशदयति स्त्रीति ॥ विश्वरूपवधोद्भवमेनः पापं मामनुगृह्णद्भिः स्त्रीभूमिजलद्रुमैश्चतुर्भिर्विभक्तं विभज्य गृहीतं अधुना वृत्रहत्यां
केकुत्र माज्मि संशोधयेयं वृत्रहत्योद्भवं पापं कावस्थाप्याह ॥ शुद्धोभवेयं न ह्यापतत्तेन हन्यामीत्यर्थः ॥ ५ ॥ एवमिंद्रेणोक्ता ऋषयस्तं प्रत्यूचुरित्याह मु
निः ॥ तदिंद्रवचउपाकर्ण्य ऋषयो महेंद्रं श्रुतीदं वक्ष्यमाणं वाक्यमब्रुवन् ॥ ऋषीणामुक्तिमेवाह याजयिष्याम इत्यादिना खलनिग्रहेणेत्यंतेन ॥ हयमेधे।
नाश्वमेधेन प्रयोगेन करणेन त्वया कर्त्रा वयं याजयिष्यामः भगवंतमिति शेषः तेन मा स्म भैः भयं मा कार्षीः ॥ तेन तव भद्रमेव भविष्यति ॥ ६ ॥ तन्नाश्वमेधमात्रे
णामत्पापकर्षं निवर्तिष्यत इति शंकमानं प्रत्याह ॥ हयमेधेनेति परमात्मानं लोकत्रयमंतः प्रविश्य प्रमंत्तारं ईश्वरं सर्वस्य प्रशासितारं स्वतेजसा दीप्य।

इंद्र उवाच ॥ स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवं ॥ विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व मार्ज्म्यहं ॥ ५ ॥ श्रीशुक उवाच ॥ ऋ
षयस्तदुपाकर्ण्य महेंद्रमिदमब्रुवन् ॥ याजयिष्याम भद्रं ते हयमेधेन मा स्म भैः ॥ ६ ॥ हयमेधेन पुरुषं परमात्मानमीश्व
रं ॥ इष्ट्वा नारायणं देवं मोक्ष्यसेपि जगद्वधात् ॥ ७ ॥ ब्रह्महा पितृहा गोघ्नो मातृहाचार्यहाघवान् ॥ श्वादः पुक्कसको वा
पि शुध्येरन् यस्य कीर्तनात् ॥ ८ ॥ तमश्वमेधेन महामखेन श्रद्धान्वितोस्माभिरनुष्ठितेन ॥ हत्वापि सब्रह्मचराचरं त्वं न लिप्य
से किं खलनिग्रहेण ॥ ९ ॥ त्मानं परमपुरुषं नारायणं हयमेधेनेष्ट्वाराध्य हे शक्र त्वं जगद्वधनिमित्तादपि पापान्मोक्ष्यसे किमुत वधनिमित्तात्पापान्मोक्ष्यसे
इत्यर्थः ॥ ७ ॥ नाम्नोस्य यावती शक्तिः पापनिर्हरणे हरेः तावत्कर्तुं न शक्नोति पातकं पातकी नरः ॥ इत्युक्तरीत्या स्मरणमात्रमहापातकनिवर्तनशीलत्वादिरूपमह
हिमशालिनं तं नाम्नो भगवतः साक्षादाराधनेन धर्मे प्रतिपत्ते वृत्रवधमात्रनिमित्तं पापं न निवर्तते किमिति अभिप्रायेण पुरुषं परमात्मानं इत्यादिनेकत्वान्ना
मुपादानं तद्विशदयति ॥ ब्रह्महेति द्वाभ्यां ॥ यस्य भगवतो नाम्नः कीर्तनादेव ब्रह्महत्यादयः शुध्येरन् श्वादः श्वपाकः पुक्कसः पापजातिः ॥ ८ ॥ तमश्वमहामहिम स
शालिनं परमात्मानं भगवंतमस्माभिरनुष्ठितेनानुष्ठापितेन महायागेन रस्य वाक्यमात्रविस्रंभयुक्तस्त्वं ब्रह्मणः शरीरभूतं चराचरात्मकं जगद्धत्वापि पापेन न

भा॰पु॰
६०

शक्रवात्रेघ्नलिंगैर्वृत्तहंतुरिंद्रस्यप्रकाशकैर्मंत्रैःसंइंद्रमभिष्टुवतःमुदाहर्षेणकुसुमैरभ्यवर्षन् ॥३४॥ हेरिंदमवृत्रस्यदेहान्निर्गतमात्मज्योतिः स्व
प्रकाशरूपआत्मासर्वलोकानांपश्यतांमध्येलोकंप्राकृतलोकविलक्षणं ॥ श्रीवैकुंठंसमपद्यत स्वंलोकंइतिपाठेमुक्तानांस्वतःप्राप्तस्थानमित्य
र्थः ॥३५॥ इतिषष्ठेद्वादशः ॥१२॥ एवंवृत्रवधेनसर्वेनिर्वृत्तास्वस्वलोकानजग्मुरित्याहमुनिः ॥ वृत्रेहतेतिद्वाभ्यांभूरिदएवंवृत्रेहतेसतिशक्रंविनास
र्वैःसलोकपालैःसहिताःलोकाःसद्यएवविज्वराःदुःखरहिताःसुखितेंद्रियाश्चाभवन् ॥१॥ देवर्ष्यादयःस्वयंस्वस्वस्थानानिप्रतिययुः ॥२॥ यदुक्तंश
क्रेणविनासर्वेलोकाविज्वरानिर्वृतेंद्रियाःअभवन्निति तत्रेंद्रस्यानिर्वृतौचकारणंपृच्छतिराजा ॥ इंद्रस्येति ॥ हेमहामुनेइंद्रस्यानिर्वृतौकारणंश्रो

वार्त्रघ्नलिंगैस्तमभिष्टुवानामंत्रैर्मुदाकुसुमैरभ्यवर्षन् ॥३४॥ वृत्रस्यदेहान्निःक्रांतमात्मज्योतिररिंदम ॥ पश्य
तांसर्वलोकानांलोकंसमपद्यत ॥३५॥ इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेवृत्रवधोद्वादशोध्यायः ॥१२॥
श्रीशुकउवाच ॥ वृत्रेहतेत्रयोलोकाविनाशक्रेणभूरिद ॥ सपालाह्यभवन्सद्योविज्वरानिर्वृतेंद्रियाः ॥१॥ देवर्षिपितृभू
तानिदैत्यादेवानुगाःस्वयं ॥ प्रतिजग्मुःस्वधिष्ण्यानिब्रह्मेशेंद्रादयस्ततः ॥२॥ राजोवाच ॥ इंद्रस्यानिर्वृतेर्हेतुंश्रोतुमिच्छ
भोमुने ॥ येनासन्सुखिनोदेवाहरेर्दुःखंकुतोभवत् ॥ वृत्रविक्रमसंविग्नाःसर्वेदेवाःसहर्षिभिः ॥ तद्वधायार्थयन्निंद्रंनैच्छद्भीतोवृहद्वधात्

तुमिच्छामिवृत्रवधरूपेणवतिचेत्तर्हितेनैवदेवानामप्यनिर्वृत्तिर्भवेदिदंतुकुतः ॥ देवानांनिर्वृतिरिंद्रस्यचदुःखमितिपृच्छति येनवृत्रवधलक्षणेनहेतुनादेवाः ॥
सुखिनः ॥ आसन्तस्मादेवहेतोरिंद्रेणापिसुखिनाभवितव्यंकुतःकस्माद्धेतोर्हरेरिंद्रस्यदुःखमभूदित्यर्थः ॥३॥ एवंपृष्टोमुनिरिंद्रस्यानिर्वृतौदेवानांनिर्वृ
तौचहेतुंवक्तुंतावद्वृत्तस्यवधाद्योगकालिकंदेवानांवृत्तांतमाहमुनिः ॥ वृत्रेत्यादिनायावदध्यायसमाप्तिः ॥ वृत्रस्यपराक्रमेणभीताःसर्वेदेवाऋषिभिःस
हवृत्रवधार्थंइंद्रंप्रार्थयन्प्रार्थयंतपरस्मैपदमार्षं ॥ एवंप्रार्थितोपींद्रोवृहद्वधाद्ब्रह्मवधात्सर्वंकृत्ताद्विश्वरूपवधात्करिष्यमाणवृत्रवधाद्वाभीतःसन्नैच्छ

श्रि

६० षष

मन्निश्रीरोवानकयंस्ततःसकालकल्पयाभिर्दंष्ट्रतुल्याभिर्दंष्ट्राभिर्जगत्त्रयंग्रसन्निवतिमात्रोच्छ्रितोमाहान्देहोयस्यातएवतरसावलेनाक्षिपन्उत्तमांतमवाल
न्यादचारीपर्वतराडिवपद्भ्यांमहीं निर्जरयंश्चूर्णयन्उल्वणानपद्भ्यांगिरीनाक्षिपन्महीं निर्जरयंश्चेति वान्वयः महाप्राणोतिबलः महावीर्योतिप्रभावः सर्पो ।
द्विपमजं अजगरमिवेति दृष्टांतोभ्यस्त ॥२९॥ वृत्रेणग्रस्तंतमिंद्रमालक्ष्य हा ब्रह्मादिभिर्महर्षिभिश्च सहिताः सर्वे सुराः हाहाद्येनंकस्य कष्टं प्राप्तमिति नि
र्विण्णाश्चिंताकांताश्चुक्रुशुः ॥३०॥ असुरेंद्रेण वृत्रेण निगीर्णोपींद्रोनममार नमृतः ॥ किंतूदरं प्रविष्टो महापुरुषेण भगवता सन्नद्धो रक्षितः महापुरु
षेण नारायणकवचात्मके न सन्नद्धो दंशितो वा भगवन्मायाबलेन योगमायाबलोव वृंहितेनेत्यर्थः ॥३१॥ वज्रेण तस्य वृत्रस्य कुक्षिं भित्वा विभुः

गिरिराट्पादचारीव पद्भ्यां निर्जरयन्महीं॥ जग्रास स समासाद्य वज्रिणं सहवाहनं॥ महाप्राणो महावीर्यो म
हासर्प इव द्विपं॥२९॥ वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः॥ हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः॥
निगीर्णोप्यसुरेंद्रेण नममारोदरं गतः॥ महापुरुषसन्नद्धो योगमायाबलेन च॥३१॥ भित्वा वज्रेण तत्कुक्षिं निःक्र
म्य बलभिद्विभुः॥ उच्चकर्त शिरः शत्रोर्गिरिशृंगमिवौजसा॥३२॥ वज्रस्तु तत्कंधरमाशुवेगः कृंतन्समंतात्परिवर्तमा
नः॥ न्यपातयत्तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये॥३३॥ तदा च खे दुंदुभयो विनेदुर्गंधर्वसिद्धाः समहर्षिसंघाः॰

निःक्रम्य बलभिन्निर्गत्य शत्रोर्वृत्रस्य शिरः पर्वतस्य शृंगमिव चकर्त चिच्छेद॥३२॥ कियता कालेन विच्छेदेत्यत्राह वज्रस्त्विति। आशुवेगस्तीक्ष्णधारोपि वज्रो वज्रा
सुरस्य तस्य कंधरं कंठं पुरस्तन्नार्थे। समंतात्कंधरायाः सर्वतः परिवर्तमानः कृंतन्निछेदनवार्त्रहत्ये वृत्रहत्यासंबंधिनि ज्योतिषामयने संवत्सरे योक्त्रोपद्युतर त्रि
प्रातःसंख्याकानांगणाः तेन तावता कालेनेत्यर्थः। न्यपातयच्छिरोभूमौ पातितवानित्यर्थः॥ ज्योतिषां सूर्यादीनामयनं दक्षिणोत्तरगतिः तदात्मके संवत्सरे वृत्र
वधोवार्त्रहत्ये इत्यनेन संवत्सरसंबंधिनिवृत्रहत्यायाः सूचितं॥३३॥ तदा वृत्रशिरश्छेदनानंतरं खे दिवि दुंदुभयो दध्वनुः॥ महर्षीणां संघैः सहिता गंधर्वासि

भा.ष.
५५

अतएवनंतवैश्वर्य्यकेवल्यादिषुमतिरित्याह॥ यस्येतिनिःश्रेयसेश्वरेमोक्षाधिपतौआश्रितानांसंसृतिबंधहारिणिभगवतियस्यपुंसोभक्तिस्तस्याम्
तांभोधौब्रह्मानंदसमुद्रेविक्रीडितःविहरतःपुंसःक्षुद्रैस्तुच्छैःखातकोदकैर्गर्तोदकतुल्यैरैश्वर्य्यकेवल्यादिसुखैःकिंतानितस्यतुच्छानीतिभावः॥२२॥ ए
वंपरस्परंब्रुवाणौअन्योन्यंइंद्रवृत्रौयुयुधातेइत्याहमुनिः॥ धर्मस्यधर्मजिज्ञासयाभगवद्धर्मविचारेणतत्सुखैककमित्यर्थः॥ एवंभाषमाणौयुद्धेयोद्धृणांपतीमुख्यौ
अपारवीर्यौइंद्रवृत्रौहेनृपयुयुधातेद्वंद्वंकृतवंतौ॥२३॥ तंदेवाहत्र्याविध्येति॥ अरिंदमोवृत्रःकार्ष्णायसंकृष्णलोहमयंघोरंपरिघंवामहस्तेनाविध्यभ्रा

यस्यभक्तिर्भगवतिहरौनिःश्रेयसेश्वरे॥ विक्रीडतोमृतांभोधौकिंक्षुद्रैःखातकोदकैः॥२२॥ श्रीशुकउवाच॥ इति
ब्रुवाणावन्योन्यंधर्मजिज्ञासयानृप॥ युयुधातेमहावीर्याविंद्रवृत्रौयुधांपती॥२३॥ आविध्यपरिघंवृत्रःका
र्ष्णायसमरिंदम॥ इंद्रायप्राहिणोद्घोरंवामहस्तेनमारिष॥२४॥ सतुवृत्रस्यपरिघंकरंचकरभोपमं॥ चिच्छेदयु
गपद्देवोवज्रेणशतपर्वणा॥२५॥ दोर्भ्यामुत्कृत्तमूलाभ्यांबभौरक्तस्रवोसुरः॥ छिन्नपक्षोयथागोत्रःखाद्भ्रष्टो
वज्रिणाहतः॥ कृत्वाधरांहनुंभूमौदैत्योदिव्युत्तरांहनुं॥ नभोगंभीरवक्त्रेणलेलिहोल्बणजिह्वया॥२७॥
दंष्ट्राभिःकालकल्पाभिर्ग्रसन्निवजगत्त्रयं॥ अतिमात्रमहाकायआक्षिपंस्तरसागिरीन्॥२८॥

मयित्वाइंद्रायप्राहिणोत्प्रक्षिप्तवान्हेमारिषश्रेष्ठराजन्॥२४॥ सइंद्रःकनदेववृत्रस्यपरिघंकरभोपमंदिग्गजतुंडतुल्यंकरंवामहस्तंचयुगपदेववज्रेणशतपर्वणा
वज्रेणाचिच्छेदछिन्नवान्॥२५॥ उत्कृत्तंछिन्नंमूलंययोस्ताभ्यांबाहुभ्यांरक्तंस्रवतीतिरक्तस्रवोवृत्रःबभौरराजयथागोत्रोगिरिर्वज्रिणाइंद्रेणछिन्नो
पक्षौयस्यतथाहतःखादाकाशाद्भ्रष्टोगलितोहतःसन्भातितद्वत्॥२६॥ सदैत्योवृत्रःअधरांहनुंभूमौउत्तरांहनुंदिविकृत्वानिवायेघनवत्गंभीरेणम
वक्त्रेणलिलिहसमर्पैःपुनःपुनरतिशयेनवालेढिलिलेहम्भ्यःदुर्गंतात्यक्तवचतयाक्रूरयाजिह्वयासवाहनमैरावतसहितंइंद्रमासाद्यतंप्राप्यजग्रा ५५

यदिह्यनेनममजयोभवेत्तर्हियोत्स्यामीत्याशंकमानंप्रवदन्तमभरंदृष्ट्वातत्तेनरूपयति॥प्राणग्लहोऽयमिति॥ग्लह्यतेगृह्यतेजितेनगृह्यमाणाःपणाःप्राणाश्च
ग्लहोयस्मिन्नितिवाहनानिहस्त्यश्वरथादीन्येवासनानिअत्रास्यंतेदीप्यंतेदीप्यंतेऽत्रतत्तत्पश्चाल्लभ्यंतत्स्थानमनानिफलकायस्मिन्नेषवःपाशाः
वाहनानिदेवानांतायस्मिन्सोऽयंद्यूतसदृशःसंग्रामः॥अत्रद्यूततुल्येसंग्रामेकस्यजयःकस्यपराजयःइतिनज्ञायतेद्यूतवज्जयपराजययोस्तावत्तुर्ज्ञेयो
ऽत्यर्थःइदंतुलोकदृष्ट्योक्तंमयानतुभगवत्सहायस्यतवजयएवनिश्चितइतिभावः॥१७॥एवंतत्त्वकथनेनप्रबुद्धायप्रबोधितःउपात्तवज्रःशक्रःता-
मित्याहतुभिः॥इंद्रइति॥गतालीकंनिष्कपटंवृत्रस्यवचःश्रुत्वापूजयद्बहुमन्यतवज्रायुधःशक्रोविगतस्मयःज्ञानिनामपियंदृशीतिविस्मापश्चर्यः॥

प्राणग्लहोऽयंसमरइष्वक्षोवाहनासनः॥अत्रनज्ञायतेमुष्यजयोमुष्यपराजयः॥१७॥श्रीशुकउवाच॥इंद्रोवृ-
त्रवचःश्रुत्वागतालीकमपूजयत्॥गृहीतवज्रःप्रहसंस्तमाहगतविस्मयः॥१८॥अहोदानवसिद्धोसियस्य
तेमतिरीदृशी॥भक्तःसर्वात्मनात्मानंसुहृदंजगदीश्वरं॥१९॥भगवानतार्षीन्मायांवैवैष्णवींजनमोहिनीं॥यद्विहाया-
सुरंभावंमहापुरुषतांगतः॥२०॥खल्विदंमहदाश्चर्यंयद्रजःप्रकृतेस्तव॥वासुदेवेभगवतिसत्वात्मनिदृढामतिः॥२१॥

स्थितःप्रहसन्सावधानेनस्ववचःसमाकर्णनायप्रहसंस्तंवृत्रमुवाच॥१८॥उक्तमेवाह॥अहोइत्यादिनाख्यातकोदकैरित्यंतेन॥हेदानवत्वंसिद्धोसिसिद्धे ।
सिद्धत्वंकुतःसिद्धोहमितिकथंत्वयाज्ञातंतत्राह॥यस्यतेतवईदृशीमतिर्वर्ततेकिंचसिद्धत्वापादकानन्याभगवद्भक्तिरेवसाचत्वयास्तीत्याहभक्त
इति॥त्वंसर्वात्मनाप्रायोपेयादिभावेनजगदीश्वरमंतरात्मानमंतरएवसुहृदंनिरतिप्रायंभैवंतंभक्तश्चापित्वाक्तैरिक्तैःसेवितवान्॥१९॥किंचजगन्मो ग
हयतीतितांवैष्णवींमायांभवाननतार्षीत्कुतःयद्यस्माद्दानवानामासुरंभावंतामसत्वंविहायमहापुरुषतांइतियावत्गतःप्राप्तवानसि॥२०॥किंचेदंम
हदाश्चर्यंखलुकिंतत्यद्रजःप्रकृतेःराजसस्वभावस्यतवसर्वात्मनियादृशपूर्णवासुदेवेनिश्चयमतिरवस्थितेतियत्॥२१॥

ऽसत्त्वेवंतथापिपराजितोपिहंपुनरात्मनेोनजयंसंभावयामीत्यत्राह॥ आयुरितिहियस्मादीश्वराधीनात्स्वस्वकर्मानुगुणादेवमनुष्यादिस्टष्टिस्तस्मादायुराद
योपिनदायत्तानिपतदेशकालपरिणामकर्मानुगुणाः पुरुषस्ययाआशिषस्ताःसर्वोत्तकालेउचितकालेतत्तत्कर्मफलानुभवदशायामित्यर्थः॥ भवंत्येवतत्र
दृष्टांतःयथानिच्छोर्मरणादारिद्यादिकमनिच्छतोपिपुंसस्तद्विपर्ययाः आयुरादिविपर्ययाःमरणदारिद्यापकीर्तिप्रभृतयोपिभवंतितथाआयुरादयो
पीत्यर्थः॥ तत्रायुर्जीवनंश्रीःसंपदैश्वर्यंप्रभुत्वं॥ यद्वैश्वर्यंसंपत्तच्छ्रीस्तेजः भगवत्सहायस्यतेभुनाआयुरादयोभवेयुरेवेतिभावः॥१३॥ यतएवसर्वमीश्व
राधीनंकर्मानुगुणंचातएवनविक्रियेतविवेकीत्याह॥ तस्मादिति॥ यस्मात्सर्वमायुरादिकंईश्वराधीनंकर्मानुगुणंविपर्ययंचवर्त्तनवत्तितस्माद्विवेकीकीर्त्ये

आयुःश्रीःकीर्त्तिरैश्वर्यमाशिषःपुरुषस्ययाः भवंत्येवहितत्कालेयथानिच्छोर्विपर्ययाः॥१३॥तस्मादकी
र्तियशसोर्जयापजययोरपि॥समःस्यात्सुखदुःखाभ्यांमृत्युजीवितयोस्तथा॥१४॥सत्वंरजस्तमइतिप्रकृतेर्ना
त्मनोगुणाः॥तत्रसाक्षिणमात्मानंयोवेदसनबध्यते॥१५॥पश्यमांनिर्जितंशत्रुवृक्णायुधभुजंमृधे॥घटमा
नोप्ययाशक्तितवप्राणजिहीर्षया॥१६॥ कीर्त्येजयपराजययोस्तथामरणजीवनयोश्चनिमित्तयोर्यैसुखदुःखेताभ्यांकीर्त्यादिनिमित्तसु
खादिनाविकारंनप्राप्नुयादित्यर्थः॥१४॥ किंचभगवद्भक्तरीत्यामद्भक्तरीत्याचमुक्तेरेवनिरतिशयपुरुषार्थत्वादनभिसंहितफलसंगकर्त्तकस्यमुक्तस्यहादिक
मेयः आयुराद्यानुषंगिकफलप्राप्त्यवानांतत्साधनत्वाच्चोक्तविधंसुखकर्मकुर्वन्देहावसानेमुक्तोपिभवतीत्याह॥ सत्वमितिसत्वादयोगुणाःनात्मनः
जीवस्यकिंतुप्रकृतेरेवगुणाइतिनिर्विवादंतत्रसत्वादिगुणपरिणामरूपदेहेस्थितमात्मानंयःपुमान्साक्षिणंद्रष्टारंमन्यतेकर्त्तृत्वंदेहगतंमत्वाआत्मा
नमकर्त्तारंमन्यतइत्यर्थःसतुनबध्यतेकिंतुसंसारबंधान्मुच्यतइतिभावः॥१५॥ अस्मिन्नर्थेतामेवदृष्टांतमत्वंतंपश्येत्याह॥ पश्यपश्येति॥ हेप्राक्रमस्वेयुधे
हवृक्णाछिन्नमायुधंत्रिशूलंभुजश्चयस्यतंनिर्जितंपराजितमपिपुनस्तवप्राणानहर्तुमिच्छयायथाशक्तिघटमानंयतमानयुध्यंतुंमांपश्य॥१६॥ ५८

एवं परमात्मनः जयाजयादयो भावे हेतुतया सर्वस्य वशित्वं चोक्तं मय जीवस्य तद्विपर्ययमाह ॥ यथेति सार्द्धद्वयेन हे मघवन् भो इ प्रविभो परमात्मदृष्ट्येदं संबोध
नं दारुमयी दारुणो विकारभूता नारी यंत्रमयः पत्रबलाद्वा गतः मंत्रेण गृहीतो मृग इत्यर्थः यथा पुरुषतंत्रस्त्राद्यम प्राणिदृष्टांताभिप्रायकं द्वितीयं तु प्रा
णिदृष्टांताभिप्रायकं इति वेदितव्यं ॥ एवं तथा सर्वाणि भूतानीश्वरतंत्राणीश्वरतंत्राण्येवेत्यर्थः ॥ वदिति व्ययमिवकारार्थकं ॥ चादेराकृतिगणत्वात् ॥ एवं
जीवस्य पारतंत्र्यमुक्तं ॥१०॥ पुरुषः जीवः प्रकृतिः प्रधानं चित्समष्टिः सूक्ष्मचेतनं व्यक्तं महत्तत्वमात्माहंकारः भूतान्याकाशादीनि इंद्रियाणि ज्ञानकर्मेभ
यात्मकानि दशेंद्रियाणि आशयो अंतःकरणं एते यस्य भगवतोनुग्रहाद्विना तदनुप्रवेशरूपानुग्रहमंतरेणास्य विश्वस्य सर्गादौ उत्पत्तिस्थितिलयेषु न श
क्नुवंति प्रभवंति एषां परमपुरुषकार्येवादितिभावः ॥ प्रकृत्यादिग्रहणं दृष्टांतार्थं ॥ यथा प्रकृत्यादयोस्य सर्गादौ न शक्नुवंति तथा पुरुषः स्वतनुसृष्ट्यादौ जी॥

यथा दारुमयी नारी यथा यंत्रमयो मृगः ॥ एवं भूतानि मघवन्नीशतंत्राणि विद्धि भो ॥१०॥ पुरुषः प्रकृति
र्व्यक्तमात्मभूतेंद्रियाशयाः ॥ शक्नुवंत्यस्य सर्गादौ न विना यदनुग्रहात् ॥११॥ अविद्वानेवमात्मानं मन्यते
नीशमीश्वरं ॥ भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयं ॥१२॥

वोपि तदनुग्रहं विना स्वसर्गादौ न शक्नोतीति का
र्येवादित्यर्थः ॥११॥ एवं कार्यत्वमुक्त्वा मघवानीशत्वमाह ॥ अविद्वानिति ॥ इमं यमपुरुषायतोत्पात्यादिकमंतं तत्परतंत्रमत एवानीश्वरमात्मानमविद्वानजा
नन्नीश्वरं मन्यते स्वात्मानं ईश्वरं मन्यते जनः इति शेषः पुरुषः प्रकृतिर्व्यक्तमिति व्यष्टिसृष्ट्यादौ परमपुरुषस्य प्रयोजकत्वं प्रकृत्यादीनां तत्कार्याणां प्रयो
ज्यकारित्वं चोक्तं तदेव प्रपंचयति भूतैरित्यर्धेन स्वयमात्मना प्रयोजककर्त्रा स्वेनेत्यर्थः ॥ भूतैः पृथिव्यादिभिः स्वानुगृहीतैः भूतग्रहणं प्रकृत्यादीनामुपलक्ष
णं ॥ प्रकृत्यादिभिः स्वानुप्रवेशादिशक्तिभिः तानि देवमनुष्यादिव्यष्टिभूतानि सृजति ॥ तथा तैरेव भूतैर्भूतानि ग्रसते च व्यष्टिसृष्टे संहारकपनेन समष्टिसृ
ष्टेरधारकत्वेतितमुक्तं चितं अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोदिति श्रुत्यर्थोत्रानुसंधेयः ॥१२॥

ना.ध त्याहमेति ॥ एकं परमपुरुषं विनान्येषां पुंसां सर्वदा सर्वत्र जय एव न भवति परमपुरुषस्य तु भवतीत्यन्वयः तत्र हेतुं वदन् तं विशिनष्टि जगदुत्पत्तिस्थितिलयानामीश्व
५७ रं कर्त्तारं तदुपक्रमो गुणा उच्यते ॥ सर्वज्ञमिति ॥ अनेन कर्मसंकुचितजीवज्ञानमात्रवृत्तिः अनेनाकर्मवश्यत्वमप्युक्तं भवति ॥ तत्र जीवकर्मानुसारेण उत्पत्त्या
दिकर्तृत्वादीश्वरोऽस्मादकर्त्रान्तरविरहादकर्मवश्यत्वाच्च तस्य देशकालनिमित्तकर्मायत्तकर्त्रन्तरप्रयुक्तजयाजययोरनत्तः ॥ किंतु सर्वदा सर्वत्र जय एवेति
भावः ॥ यदि जगदुत्पत्त्यादिकर्त्तारं परमपुरुषस्तर्हि किमुपादानकारणं जगतस्तत्राह आद्यमिति ॥ आदौ भवमाद्यं कारणत्वेनावस्थितं उपादानकार
णमपि स एवेति भावः ॥ लोको परा ह्युपादानकारणस्य तत्त्वादेरपि कारणान्तरदर्शनात्कारणस्यापि कारणान्तरं संभाव्यते तत्राशंकां निराकुर्वन् विशिनष्टि
सनातनमिति ॥ नित्यमित्यर्थः का ध्येयं सत्यं स तु नित्यः कारणान्तररहित इत्यर्थः ॥ ६७ ॥ तस्य कर्मवश्यत्वेन यत्त्वात्तं अमुक्तं तदेवोदाहरणमुखेन प्रपंच

यत्नो हरस्यातवन्तो न हि स्वपक्षं न विषादकालः ॥ ६ ॥ ययुस्ततो कुत्रचिदाततायिनो जयः सदेकत्र न वैपरीत्य
ना ॥ विनेकमुत्पत्तिलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं पुरातनं ॥ ७ ॥ लोकाः सपालाः यस्येमे श्वसंति विवशा वशे द्वि
जाः स्वपिचावबद्धाः स कालसंज्ञः कमरो ॥ ८ ॥ अजः महाबलं प्राणमममृतं मृत्युरेव च । तमज्ञाय जना हेतुमात्मानं मन्यते जडं

यति लोका इति सपालाः पालकैर्ब्रह्मादिभिः सहिताः सर्वे लोकाः विविवशाः परमपुरुषवशंगताः ॥ यस्य परमपुरुषस्य वपो वश इच्छायां कांतो चेद्दिधातुपावास
कायां निमित्तभूतायां श्वसंति स तत्रतदिच्छानिमित्तजीवना इत्यर्थः ॥ तथा च श्रुतिः कोह्येवान्यात्कः प्राण्याद्यदेष आकाश आनंदो न स्यादिति ॥ यथा शिचापाशेन बद्धाद्वि
जाः पक्षिणः वेधयितुर्वशे श्वसंति तद्वत् स एव कालः कालरूपईश्वरः इह जयाजयादिषु कारणं हेतुभूतः ॥ ५ ॥ न केवलं जयाजययोरेव हेतुरपि तु जन्मादीनामपि निर्वा
हक इत्याह ॥ अजः प्रवर्तितसामर्थ्यं महावेगः बलं धारणसामर्थ्यं प्राणो जीवनं अमृतं मोक्षः मृत्युः संसार इत्यादीन प्रतितं परमात्मानं हेतुमज्ञाया विज्ञाय आत्मवत्मा
स्वयागमनम्यानस्त्रूवें इति न प्रतिषेधः अतोऽस्य परमात्मानमेवमजन्मादीनां कारणमज्ञात्वा परं जनः केवलमात्मानं स्वात्मानमेव कारणं मन्यते तो जडो ज्ञः जन इ ५७
त्यर्थः जडः इति पाठे त्वज्ञः स्वात्मानमेव कारणं मन्यते यं जन इत्यर्थः ॥ ९ ॥

ततोवृत्रोसुरेंद्रःस्वेस्वाकाशेस्वापतदागछद्विचलत्परिभ्रमच्चग्रहोल्कवत्दुःप्रेक्षंदुर्निरीक्षंचयच्छूलंग्रहस्वतलकाम्बेतिवंदाहनिःवत्सपक्षःग्रहःस्वर्ग्यः
उल्काश्चांगाराःतच्छूलंतथातस्यवृत्रस्यउरगराजभोगंवासुकिदेहाकारंभुजंचाजातविक्लवः अनुद्विग्नाधैर्येःमनःशांतपर्वाणियस्यतेनवज्रे
णाछिनत् ॥ अद्भुतंयथाभवतितथेतिक्रियाविशेषणंस्थूलविशेषणंभुजविशेषणंवा ॥२॥ ततोवृत्रःछिन्नःएकःबाहुर्यस्यसन्नततएवसंरब्ध
नितरांक्रुद्धःगृहीतवज्रमिंद्रमासाद्यसमीपमागत्यपरिघेणायुधविशेषेणहनौताडि ॥ अथामरेभंऐरावतंचताडि तस्यमघोनःइंद्रस्यहस्ताद्वज्र
मायुधंन्यपतत्अधिगलितमभवत् ॥३॥ तद्वृत्रस्यमहदद्भुतंचकर्मनिरीक्ष्यसर्वेसुरादयः ॥ अपूजयन्महोरात्रस्यपराक्रममितिवत्कमन्यंत ॥ तथापुरुहूतस्य

तंस्वमापतत्तद्विचलद्ग्रहोल्कवन्निरीक्ष्यदुःप्रेक्ष्यमजातविक्लवः ॥ वज्रेणवज्रीशतपर्वणाछिनद्भुजंचतस्यो
रगराजभोगं ॥३॥ छिन्नैकबाहुःपरिघेणवृत्रःसंरब्धआसाद्यगृहीतवज्रं हनौतताडेंद्रमथामरेभंवज्रं
चहस्तादपतन्मघोनः ॥४॥ वृत्रस्यकर्मातिमहाद्भुतंतत्सुरासुराश्चारणसिद्धसंघाः ॥ अपूजयंस्तत्पुरुहूत
संकटंनिरीक्ष्यहाहेतिविचुक्रुशुर्भृशं ॥५॥ इंद्रोनवज्रंजगृहेविलज्जितश्च्युतंस्वहस्तादरिसंनिधौपुनः तमाह

वृत्रस्यसंकटंनिरीक्ष्यहाहेतिविचुक्रुशुःभृशमितिसंकटविशेषणंवा ॥५॥ ततइंद्रःस्वहस्तादरिसन्निधौच्युतंवज्रमायुधमतएवलज्जितोवज्रंपुनर्नजग्रा
हेनगृहीतवज्रंइंद्रंवृत्रआह हवभावहरइत्यादिनासुष्ठुपराजयइत्यंतेन हेहरेइंद्रपुनर्गृहीतवज्रस्त्वंस्वशत्रुंमांजहि ॥ अयंविषादकालःशोक
कालोनभवतीतिकिंतुकुत्रचिदेवकस्मिंश्चिद्देशेकालेजयोभवतास्यर्थः ॥ तत्रहेतुवदन्विप्रानुष्टिपरात्मनामिति ॥ परःपरमपुरुषःआत्माऽतःप्रवि
श्यतत्तत्कर्मानुसारेणनियंतायेषांकर्मवश्यत्वात्परमपुरुषनियम्यत्वाच्चततद्देशकालकर्मानुरूपसुखदुःखादिफलानुभवायजयापजया
याविपद्वकारितावितिनतत्रतत्त्वज्ञानांशोकोकर्तव्योऽतिभावः ॥ सर्वस्यनियंतुःकर्मैवयस्यपरमपुरुषस्यतुसर्वत्रसर्वदाजयएवभवती

तंनरसाधिपत्यंरसातलादिलोकाधिपत्यंयोगसिद्धीरणिमादीनपुनर्भवंकैवल्यंचनहिहेसमंजससकलसौभाग्यनिधेत्वांविरहय्यदृष्पकृत्सविनेसयर्थः
नकांक्षेनवांछामि॥२५॥किंतुहेअरविंदाक्षअजातपक्षाःखगाःपक्षिशावकाःमातरमिवक्षुधिताःपीडितावत्सतरास्तन्यंदुग्धमिवव्युषितंप्रोषितं
दूरदेशंगतंप्रियंविषण्णाङ्गःखिन्नाप्रियमिवतुमनस्त्वांदिदृक्षतेद्रष्टुमिच्छति॥२६॥अतएवमामनुगृहाणेत्याह॥ममेति॥उत्तमश्लोकस्यतवजनेषु
दासेषुसख्यंममभूयान्नत्वन्माययाआत्मात्मादिष्वासक्तचित्तस्यस्वकर्मभिःसंसारचक्रेभ्रमतोममपुनःतेष्वात्मादिष्वासक्तिर्नभूयादेवमनुगृहाण
इतिभावःतत्रात्मादेहः॥२७॥इति षष्ठे एकादशः॥११॥एवमभिलषितभगवद्देवदास्योनिरयोपरमाभिमानविषयैश्वर्यकैवल्योजिहासितः

अजातपक्षाइवमातरंखगाःस्तन्यंयथावत्सतराःक्षुधार्ताः॥प्रियंप्रियेवव्युषितंविषण्णामनोरविंदाक्षदिदृ-
क्षतेत्वां॥ममोत्तमश्लोकजनेषुसख्यंसंसारचक्रेभ्रमतःस्वकर्मभिः॥त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्त
स्यननाथभूयात्॥२७॥इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेएकादशोऽध्यायः॥११॥ऋषिरुवाच॥एवंजिहा-
सुर्नृपदेहमाजौमृत्युंवरंविजयान्मन्यमानः॥शूलंप्रगृह्याभ्यपतत्सुरेंद्रंयथामहापुरुषंकैटभोऽप्सु॥१॥ततोयुगां
तानिकठोरजिह्वमाविध्यशूलंतरसासुरेंद्रः॥क्षिप्त्वामहेंद्रायविनद्यवीरोहतोसिपापेतिरुषाजगाद॥२॥

स्वकलेवरोहत्रोऽध्युपपेदइत्याहमुनिः॥एवमिति॥हेनृपस्वकलेवरंहातुमिच्छुरतएवाजौयुद्धेविजयान्मृत्युमेववरंश्रेष्ठंमन्यमानः॥शूलंगृहीत्वासुरें
द्रमभ्यपतत्प्रत्यपद्यत्प्रलयोदकेकैटभाख्योऽसुरइवहत॥१॥ततोऽसुरेन्द्रोवीरोवृत्रःप्रलयकालवह्निवत्कठोराङ्गःमहाजिह्वाशिखायस्यतत्शूलमा
विध्यभ्रामयित्वाक्रोधेनमहेंद्रायक्षिप्त्वाविनद्यसिंहनादंकृत्वाहेपापहतोसीतिजगाद॥२॥ रामः
५६

यस्मादिष्टत्वेभोगविरोधिभिः सह कलहः व्यसनमभिमतविषयालाभनिमित्तं दुःखं प्रयासः कष्टसुखाय प्रवृत्तस्य यत्न चैवं भवंति यतः परमकृपा
लुर्भगवाननन्यभक्तानां मुक्तिमेव दास्यतीत्यर्थः ॥२२॥ तर्हि स्वकानां किं विधत्ते तत्राह ॥ त्रैवर्गिकेति ॥ हे शक्र त्रैवर्गिको धर्मार्थकामविषयो य आया
सस्तस्य विघातं विधत्ते अस्मत्पतिः त्रिवर्गककर्मायासपरिहारेणानंतस्थिरफलरूपां मुक्तिं दास्यतीत्यर्थः ॥ ननु प्रसन्नो भगवानस्माकमपि स्वका
नां त्रैवर्गिकायासविघातमेव विधत्ते वेत्याह ॥ तत इति यो भगवत्प्रसादोऽपतः अकिंचनगोचरः निष्कामस्वभक्तविषयः अकिंचनानामेव नितरां भ
गवान्प्रसन्नो भवतीत्यर्थः ॥ ततोऽन्यैर्विषयभोगपरायणैर्दुर्लभ एव भजद्भिरन्यैर्वा दुष्प्रापः स भगवत्प्रसादोऽनुमेयः अभिलषितार्थविषयकत्वेनानुमेयः
यद्वा योऽकिंचनगोचरो भगवत्प्रसादः सोऽन्यैर्भवादृशैस्ततोऽस्मत्प्रयोजनादनुमेयः वयमप्यनन्यप्रयोजना यदि भजेम तर्ह्यकिंचनगोचरो भगवत्प्रसादो

त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र ततोऽनुमेयो भगवत्प्रसादो यो दुर्लभोऽकिंचनगोच
रोऽन्यैः ॥२३॥ अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः ॥ मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक्
कर्म करोतु कायः ॥२४॥ न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यं ॥ न योगसिद्धीरपुनर्भवं वा समंजस त्वा
विरहय्य कांक्षे ॥२५॥

स्माद्विषयको भविष्यतीत्येवं भवादृशैरनुमेय एव ननु सिद्ध इदानीं विषयभोगपरायणत्वादिति भावः ॥ तथैवोक्तं भगवता
मय्येकांतभक्तिर्नान्यत्मतो वांछति तत्त्वविदित्यादिनेति ॥२३॥ अथ मनसानुसंहितं वृत्रोऽग्रे दृष्टं तदनु प्रविष्टं भगवंतमभिमुखीकृत्याह ॥ अहमिति ॥ हे
हरे भगवन् तव पादावेवैकं मूलमाश्रयो येषां तेषां दासानामनुदासो दासदासोऽहं भूयो भवितास्मि मदीयं मनो असुपतेर्भर्तुस्त्राणनाथस्य तव गुणानेवानु
स्मरतु वागपि तानेव गुणान् गृणातु तत्रत्वात्तु कीर्तयतु कायो देहस्त्वाराधनरूपं कर्मैव करोतु ॥२४॥ ननु किं दास्येन तुभ्यं महदैश्वर्यमैहिकमामुष्मि
कं च दास्यामीत्यत्र तद्दास्यं विनाऽन्यन्न कांक्षेऽहमित्याह नेति द्वाभ्यां ॥ नाकपृष्ठं वैकुंठं न कांक्षे तत्र पारमेष्ठ्यं चतुर्मुखैश्वर्यं न सार्वभौमं कृत्स्नभूम्याधिप

यथा दर्पः प्रयोजनं यस्याः सा याचेव वज्रो न निष्फलः स्यात् ततो मा संशयिष्ठाः संशयं मा कुरु किंतुप्रहिणिवस्यर्थः वज्रमिति नपुंसकनिर्देशस्त्वार्षो वा ज्ञेयः
॥१९॥ अनिष्फलत्वे हेतुं वदन् तं प्रोत्साहयति ॥ नन्विति ॥ हे शक्र एष तव वज्रः हरेर्भगवतस्तेजसा दधीचो मुनेस्तपसा च तेजितस्तीक्ष्णीकृतः ॥ ततः कारणात्तेनैव
वज्रेण विष्णुना यंत्रितः आदिष्टो मां शत्रुं जहि मारय यतो मम हननाच्छ्रीः राज्यसंपद्विजयः गुणाः प्रभुत्वादयो गुणाश्च भवंति ॥२०॥ नन्वासुरीं योनिमापन्ना
स्त्वं जन्मनि मामप्राप्यैव कौंतेय ततो यांत्यधमां गतिमित्युक्तरीत्या नरकोदर्कं स्वमरणमेव किं मां प्रार्थयसे तत्राह ॥ अहमिति ॥ अहमासुरोपि नरकं न
यास्यामि किंतु समदेवतं गुरुः संकर्षणो भगवान् यथा आउपदिदेश अमच्चरणारविंदे मनो निश्चलं निधेयमिति तथा तच्चरणारविंदे मनो निधाय तव

न्वेष वज्रस्तव शक्र तेजसा हरेर्दधीचस्तपसा च तेजितः ॥ तेनैव शत्रुं जहि विष्णुयंत्रितो यतो हरिर्विजयः श्री
गुणास्ततः ॥२०॥ अहं समाधाय मनो यथाह सं कर्षणस्तच्चरणारविंदे ॥ त्वद्वज्ररंहोलुलितग्राम्यपाशो गतिं
मुनेर्याम्यपविद्धलोकः ॥२१॥ पुंसां किलैकांतधियां स्वकानां याः संपदो दिवि भूमौ रसायां ॥ नराति यद्द्वेष उद्वे
गआधिर्मदः कलिर्व्यसनं संप्रयासः ॥२२॥

वज्रस्य वेगेन लुलितः छिन्नः ग्राम्येषु विषयेषु रागरूपः पाशो यस्य देहलक्षणश्च ग्राम्यपाशः
सोपि लुलितो भवतीति भावः अपविद्धः त्यक्तः लोकः स्वर्गादिलोको येन तथाभूतः मुनेर्गतिं सात्विकभगवद्गुणमननशीलस्य गतिं मोक्षं यास्यामि असुरोप्यहं
भगवत्संकर्षणोपदिष्टतत्त्वो मुक्तिमेव यास्यामि न तु वो वाचा न लोकानिति भावः ॥ यथाह संकर्षण इत्यनेन वृत्रः संकर्षणोपदिष्टतत्त्व इत्यवगम्यते ॥२१॥
किंच भगवाननन्यभावेनात्मानं भजतां स्वीयानामेवार्त्तिं दास्यति न तु वो वाचानमित्याह ॥ पुंसामिति सार्द्धेन ॥ एकांतधियां प्रयोजनांतररहितमतीनामनन्य
प्रयोजनानामित्यर्थः ॥ स्वकानां स्वभक्तानां पुंसामसत्त्यति भगवान् संकर्षणः दिवि स्वर्गादौ भूमौ रसायामतलादिलोके च याः संपदो विभवाः ताः न ददाति
कुतः यतः तासु संपत्सु उद्वेगो विनाशभयं ततस्तत्प्रयुक्त आधिर्मनःपीडा मदः विषयभोगनिमित्तो मदः तत्त्वज्ञानोदयप्रतिबंधकः कलिः विषयद्वेषः परस्पर ५५

करुणारहितोऽमेवान्सस्माकमग्रजस्य द्विजातेस्तत्रापि वृद्धस्य विदुः गुरोरपापस्य पुनर्दीक्षितस्य यज्ञीयदीक्षामवस्थितस्य विश्वासस्य शिरांसि खड्गेनाहृ
त्याचिच्छेद यथा स्वर्गकामो याज्ञिकः पशोः शिरश्छिनत्ति तद्वत् द्विजातित्वादीनि विशेषणान्यवध्यत्वसूचकानि ॥१५॥ अतो ह्रियालज्जया श्रियापासंप
दा दयया कीर्त्या मिथ्या शोभया उज्झितं परित्यक्तं निकृष्टेन स्वकर्मणा पुरुषादैः ॥ पिशाचैरपि गर्हितं निंद्यं त्वामद्य मच्छूलेन विभिन्नः देहो यस्य अस्य ॥ वह्नि
यैनं तमदग्धदेहमिमं स्पर्धेः सद्धाः सम्यग् दंतस्तस्मात् अतिवर्तमान सामीप्ये वर्तमाने लट् ॥१६॥ अपि च नरशंसं त्वामनु सत्यपे देवा अज्ञाः सद्धाः संतः इह युद्धे उपेता
स्त्वाः महद्यदि प्रहरंति तर्हि तैर्निशितेन तीक्ष्णेन त्रिशूलेन निर्भिन्ना गलाः कंठा येषां तैः सगणान् भूतनाथान्यजामि यक्ष्यामि ॥१७॥ एवं स्वपौरुषानुरू

पो मेऽग्रजस्यात्मविदो द्विजातेर्गुरोरपापस्य च दीक्षितस्य ॥ विश्रम्भस्वड्गेन शिरांस्यवृश्चत्पशोरिवाकरुणः
स्वर्गकामः ॥१५॥ ह्रीश्रीदयाकीर्तिभिरुज्झितं त्वां स्वकर्मणा पुरुषादैश्च गर्ह्यं ॥ कृच्छ्रेण मच्छूलविभिन्नदेह
मस्पृष्टवह्निं समदंति गृध्राः ॥१६॥ अन्ये त्वनुप्रेते ह नृशंसमज्ञा यदुद्यतास्त्राः प्रहरंति मह्यं ॥ तेभ्यस्त नाथान्सगणान्
निशातत्रिशूलनिर्भिन्नगलैर्यजामि ॥१७॥ अथो हरे मे कुलिशेन वीर हर्ता प्रमथ्यैव शिरो यदीह ॥ तत्रानृणो
भूतबलिं विधाय मनस्विनां पादरजः प्रपत्स्ये ॥१८॥ सुरेश कस्मान्न हिनोषि वज्रं पुरःस्थिते वैरिणि मय्यमोघं ॥ मा
संशयिष्ठा न गदेव वज्रं स्यान्निष्फलं कृपणार्थेव याञ्चा ॥१९॥ पमुक्त्वा प्रयुद्धे स्वदेहं जिहासुर्मां जहीति शक्रं प्रार्थयते अथे

नेति ॥ अथवा हे हरे इन्द्र हे वीर भवानेव सद्यः युद्धे कुलिशेन वज्रेण यदि मम शिरो हर्ता हरिष्यति तत्र तथा सति मे देहेन भूतेभ्यो बलिं विधाय अनृणः विमु
क्तकर्मबंधः मनस्विनां पादरजः प्रपत्स्ये पादरजः सहचरितं मार्गं प्रपत्स्ये ज्ञानिनां गतिं प्राप्स्यामीत्यर्थः ॥१८॥ हे सुरेश इन्द्र यतः स्थिते वैरिणि शत्रौ मय्यप्य
मोघमप्रतिहतं वज्रं कस्माद्धेतोर्न हिनोषि न मुंचसि न प्रेरयसीत्यर्थः ॥ गदावन्निष्फलो भविष्यतीति संशयं कथा न कुर्वित्यत्राह ॥ गदेव गदावत्

यागदाघातमृशं नितरां क्रुद्धं इंद्रशत्रुर्वृत्रः उल्लदन्तीव नदन्नुरवो विक्रमः पादविन्यासायस्य तत्ताद्दृशो महेंद्रवाहमैरावतं जघान कमिव यथा वंततत्राद्द कुंभ
स्थले मध्येप्रदेशे तस्य वृत्रस्य कर्म तत्कृत्यातताह न ताडनरूपं कर्म सर्वे वृत्रस्य भारः समपूजयन्नवक्षमन्यत ।।१०।। एवमैरावतो वृत्रस्य गदयातीव विघूर्णितादि
तो वज्राद्युद्धाहतो द्रिरिव विघूर्णितो भ्राम्यमाणः भिन्नं मुखं यस्य सः नितरामार्तः ।। असृक् रक्तं मुंचन् सैंद्रः सप्तधनुष्प्रमाणमयासरत्सप्तधनुःपर्यंतमगच्छ
त् ।।११।। सद्वृत्रो महात्मा पुरुद्धधर्मो भिज्ञः ।। अत एव सन्नस्य अवसन्नस्य दुःखितो वाहो यस्य तस्मै दुःखितचित्ताय पुनर्गदां न प्रायुंक्त ।। ततः इंद्रः अमृतस्र
वि स्वकराभिमर्शेन विगतः व्यथा यस्य तथाभूतेन कृतो वाहो यस्य तथाभूतोभितस्थौ तत वाहं गजं पाणे पूर्वं वृत्तो वृत्रेण ताडितो यो वाहो ग

ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितोद्रिः कुलिशाहतो यथा ।। अपासरद्भिन्नमुखः सहेंद्रो मुंचन्नसृक्स
प्तधनुर्भृशार्तः ।।११।। न सन्नवाहाय विषण्णचेतसे प्रायुंक्त भूयः स गदां महात्मा ।। इंद्रोमृतस्यंदिकराभिमर्श
वीतव्यथक्षतवाहोभितस्थे ।।१२।। स तं नृपेंद्राहवकाम्यया रिपुं वज्रायुधं भ्रातृहणं विलोक्य स्मरंश्च तत्
कर्म नृशंसमंहः शोकेन मोहेन हसन् जगाद ।।१३।। वृत्र उवाच दिष्ट्या भवान्मे समवस्थितो रिपुर्यो ब्रह्महा गु
रुहा भ्रातृहा च । दिष्ट्यानृणोद्याहमसत्तम त्वया मच्छूलनिर्भिन्नदृषद्धृदाचिरात् ।।१४।। जः येनेंद्रेणामृतस्यंदिकराभि

मर्शेन वीतव्यथः गतव्यथः अमृतस्यंदिकराभिमर्शे वीतव्यथः क्षतवाहो यस्य सः तस्य सर्पः ।। अभितस्थौ अभिमुखं स्थितः ।।१२।। हे नृपेंद्र स वृत्रः आहव
काम्यया युद्धेच्छया अवस्थितः वज्र आयुधं यस्य तं भ्रातृहणं भ्रातरं विश्वरूपं हतवंतं रिपुं इंद्रं विलोक्य तस्य इंद्रस्य कर्म भ्रातृहननरूपं क्रूरमंहः
पापं शोकेन हेतुना स्मरन्मोहेन हसन् जगाद इंद्रं प्रत्युवाच ।।१३।। गदितमेवाह ।। दिष्ट्येत्यादिना यावदध्यायसमाप्ति यो भवान्मे रिपुः दिष्ट्या
३ दैववशात्मे पुरतः समवस्थितः प्राप्तः कथंभूतः यस्त्वं ब्रह्महा ब्राह्मणहतवानत एव गुरुहा अपि विश्वरूपं मम च भ्रातरं हे असत्तम मम शूलेन निर्भिन्नं भुजं हृदयं यस्य ते

नत्वया निर्मितमतेनाद्याचिरान्मम भ्रातुर्विश्वरूपस्यानृणोहं १४
दिष्ट्या भविष्यामि

तस्येत्याह किमिति वाक्याभ्यां ॥ मातुः स्वस्य जनन्या उच्चरितैः पुरीषप्रायैः सुरैः प्रथमं तावद्देवसंबोधनं धावद्भिः पलायमानैः अपि पृष्ठतो हतैः हतमानैः सुरैः
किं प्रयोजनं तद्वधेन यशो न स्वर्गोपीति भावः तदेवाह न हीति भीतस्य वधः शूरमात्मानं मन्यमानानां न हि श्लाघ्यः नापि स्वर्गहेतुः अतो हे क्षुल्लकाः
स्वल्पा वो युष्माकं क्वचित्प्रधने युद्धे श्रद्धा सारं बलं वा यद्यस्ति विषयभोगेच्छा न चेत्तर्हि मात्रं क्षणमात्रमग्रे तिष्ठत ॥५॥ एवं क्रुद्धो वृत्रः सुरगणान् रिपून् वपुषा देहेन
भीषयन् महाप्राणो महाबलो यस्य तादृशो व्यनदत् ॥ नादं विहितवान् येन नादेन लोका जना विचेतसः मूर्छिता बभूवुः ॥६॥ तेन वृत्रस्य विस्फोटनेन नादेन सर्वे

किं व उच्चरितैर्मातुर्धावद्भिः पृष्ठतो हतैः ॥ न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनां ॥४॥ यदि वः प्रधने श्रद्धा
सारं वा क्षुल्लका हृदि ॥ अग्रे तिष्ठत मात्रं मे न चेद्ग्राम्यसुखे स्पृहा ॥५॥ एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् ॥ व्यन
दत्सुमहाप्राणो येन लोका विचेतसः ॥६॥ तेन देवगणाः सर्वे वृत्रविस्फोटनेन वै ॥ निपेतुर्मूर्छिता भूमौ यथैवाशनिना
हताः ॥७॥ ममर्द पद्भ्यां सुरसैन्यमातुरं निमीलिताक्षं रणरंगदुर्मदः ॥ गां कंपयन्नुद्यतशूल ओजसा नालं वनं यू
थपतिर्यथोन्मदः ॥८॥ विलोक्य तं वज्रधरोत्यमर्षितः स्वशत्रवेभिद्रवते महागदां ॥ चिक्षेप तामापततीं सुदुःस
हां जग्राह वामेन करेण लीलया ॥९॥ स इंद्रशत्रुः कुपितो भृशं तया महेंद्रवाहं गदयोरुविक्रमः ॥ जघान कुंभस्थल उन्नद
न्मृधे तत्कर्म सर्वे समपूजयन्नृप ॥१०॥

देवगणाः मूर्छिताः संतो भूमौ निपेतुः पतितवंतः यथा अशनिना हता जनाः पतंति तद्वत् ॥७॥ आतुरं मूर्छि
तमत एव निमीलिताक्षं सुरसैन्यं तेन यथा ममर्द मर्दितवान् यथोन्मदो यूथपतिर्गजः नालं नलिनीनां संबंधि वनं मर्द्दयति ॥ कथंभूतो ममर्द रणरंगे दु
र्मदो यस्य उद्यतं शूलं येन स गां पृथिवीं कंपयन् ॥८॥ एवं स्वसैन्यं मर्दयंतं वृत्रं विलोक्य वज्रधर इंद्रो अत्यमर्षितो अभिमुखं अभिद्रवते आगच्छते एतस्मै म
हतीं गदां चिक्षेप प्रयुक्तवान् स च वृत्रस्तामापततीं दुःसहां सोढुमशक्यां गदां वामेन करेण लीलया सुखेन जग्राह गृहीतवान् ॥९॥ तया च गृहीत

भा॰ष॰ निमित्तात्पलायनादपस्कारात्परलोकहानिकरात्तेभ्यो मृत्युरेव स्वर्गसंपादककीर्त्तिकरश्च श्रेयानतः संग्रामे प्राप्तं मृत्युमस्मदर्थं ईदृशमेव मृत्युं तस्मादेव वृणीतेत्य ।
१५३ ह्लोकमतिमाहेन ॥ अयहे दानवाः जातः संग्रामे मृत्योर्ये द्विलोकः स्वर्गः यशश्च स्यात्तर्ह्यमुं मृत्युं यत्कं प्राप्तं को नाम न वृणीत किंतु वृणुयादेव २
२ ॥ द्वौ सम्मतौ मृत्यू इह लोके शास्त्रसंमतौ तावज्जितासुर्जितान्तर्वायुर्द्विविधप्राणायामयोगात्ततः ब्रह्मसंधारणया ब्रह्मविषयकधारणया योगे
न कलेवरं त्यजेदिति यत्स एकः तथा वीरशय्यायां रणाग्रगामी निवृत्तोऽपरांमुखः कलेवरं जह्यादिति यत्सोऽपरो मृत्युः तथा चोक्तं ॥ द्वाविमौ पुरुषौ लो

जातस्य मृत्युर्ध्रुव एव सर्वतः प्रतिक्रिया यस्य न चेह कॢप्ता ॥ लोको यशश्चाथ ततो यदि ह्यमुं को नाम मृत्युं न
वृणीत युक्तं ॥ ३२ ॥ द्वौ संमताविह मृत्यू दुरापौ यद्ब्रह्मसंधारणया जितासुः कलेवरं योगरतो विजह्याद्यदग्र
णीर्वीरशये निवृत्तः ॥ ३३ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे दशमोऽध्यायः ॥ १० ॥ श्रीशुक उवाच ॥ त ए
वं शंसतो धर्मं वचः पत्युरचेतसः ॥ नैवागृह्णन्त संभ्रान्ताः पलायनपरा नृप ॥ १ ॥ विशीर्यमाणां पृतनामासुरीम
सुरर्षभः ॥ कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत् ॥ २ ॥ दृष्ट्वातप्यत संक्रुद्ध इंद्रशत्रुरमर्षितः ॥ तान्निवा
र्यौजसा राजन्निर्भर्त्स्येदमुवाच ह ॥ ३ ॥ के सूर्यमंडलभेदकौ परिव्राड्योगयुक्तश्च रणे चाभिमुखो हत इति ॥ ३३ ॥ इति षष्ठे दशमः ॥ १०

एवं वृत्रेणाप्रतिबोधितानपि पलायमानानसुरान्वीक्ष्य वृत्रस्तान्निवार्य युयुत्सुरिंद्रं प्रत्युवाचेत्याह मुनिः ॥ त इति ॥ १ ॥ एवं हे नृप पत्युर्वृत्रस्य धर्मं धर्मा
दनपेतं वचः शंसतः कथयतः सतोऽपि भीता अतएव पलायनासक्ताः ॥ अतएवाचेतसो निर्भयेन युद्धानासक्तचित्ता असुराः नैवागृह्णन्त स्वीकृतवंतो ना श्री
मन्यंत ॥ १ ॥ ततोऽसुरर्षभो वृत्रः कालानुकूलैरनुकूलकालैस्त्रिदशैर्देवैर्विशीर्यमाणां विशीर्यमाणामपि अनाथवत्काल्यमानां विद्राव्यमाणा रामः
मासुरीं सेनां दृष्ट्वा मर्षितोऽसहमानः संक्रुद्धः हे राजन् तान् पृतनाभोजसा स्वबलेन निवार्य निर्भर्त्स्य चेदं वक्ष्यमाणं देवान्प्रत्युवाच ३ ॥ ५२

अथ वृत्तो नाथो येषां ते सुराः सर्वैः स्वशस्त्रास्त्राणां पूगैर्वृंदैरहताननताडितान् ततएव स्वस्तिमतः सुखिनः तथा द्रुमैर्दृषद्भिः पाषाणैर्विविधैरद्रीणां
शृंगैश्चाहतान् तानिंद्रसैनिकान्निशाम्य दृष्ट्वा सर्वे सुरास्त्रस्तसुभीता ॥२७॥ देवगणेषु दैत्यैर्ये ये कृताः प्रयासास्ते सर्वेऽपि मोघा व्यर्था अभवन् तत्र
हेतुर्वरं देवगणान्विशिनष्टि कृष्णानुकूलेषु विमोघा महत्त्वे भक्तानभवंतीति तथेति ॥२८॥ हरावभक्ताः ॥ अतएवान्तःसुसंदेहास्ततः सारोव
लं येषां मतराव हतं युद्धदर्पो येषां ते सुरा वितथं व्यर्थं स्वप्रयासं निरीक्ष्य नाथ धानास्माकं सर्वे प्रयासाः व्यर्था एवेत्यालोच्य तेति त्रासिता अपि दैत्या एवं
ते स्वस्यापि नेतारं त्वाजिमुखे युद्धारंभे पतिं वृत्रं विसृज्य पलायनाय मनो दधुः चक्रुः ॥२९॥ अथ धीरो वृत्रः प्रधावतः तीव्रेण भयेन पलायमानं

तानहत्वा स्वशक्तिमतो निशाम्य शस्त्रास्त्रपूगैरथ वृत्रनाथाः । द्रुमैर्दृषद्भिर्विविधाद्रिशृंगैरविद्धतांस्तत्रसुरिं
द्रसैनिकान् ॥२७॥ सर्वे प्रयासास्त्वभवन्विमोघाः कृताः कृता देवगणेषु दैत्यैः । कृष्णानुकूलेषु यथा महत्सु
क्षुद्रैः प्रयुक्ता रुषती रुक्षवाचः ॥२८॥ ते स्वप्रयासं वितथं निरीक्ष्य हरावभक्ता हतयुद्धदर्पाः । पलायनायाजि
मुखे विसृज्य पतिं मनस्ते दधुरात्तसाराः ॥२९॥ वृत्रोऽसुरांस्ताननुगान्मनस्वी प्रधावतः प्रेक्ष्य बभाष एतत् । पलायि
तं प्रेक्ष्य बलं च भग्नं भयेन तीव्रेण विहस्य वीरः ॥३०॥ कालोपपन्नां रुचिरां मनस्विनामुवाच वाचं पुरुषप्रवीरः ।
हे विप्रचित्ते नमुचे पुलोमन् मयानर्वन् शंबर मे शृणुध्वं ॥३१॥

तानसुरान्प्रेक्ष्य तथा किंचिन्मनस्यप्रविश्य पलायितुं बलं च वृत्रे सविहस्य देवसमाजं बभाषे ॥३०॥ एतदेव प्रपंचयति पुरुषश्रेष्ठः मनस्वी कृपालुः
मनस्वी वृत्रः कालोचितां मनस्विनां रुचिरां च वाचमुवाच ॥ उक्तमेवाह हे विप्रचित्ते इत्यादिना याचत्समाप्ति हे मय हे नर्वन् मम वाचं शृणुध्वं ॥३१॥ सर्वेषां
सर्वेषां जातस्य जंतोरेष प्रसह्य ध्रुवः निश्चितः मृत्युर्विहितः न विधिर्यस्य यस्मात् इह लोके प्रतिक्रिया प्रतीकारः न कृतो नास्ति किंच शास्त्रेभ्यो मृत्युभयात्

नत्यादयः ॥ १९ २० ॥ तथा सुमालिप्रमुखेषु सर्वे कान्तस्वरपरिच्छदाः ॥ सुवर्णमयाः परिच्छदाः परिकरा येषां ते मत्स्योरपि तुरासदं दुःप्राप्यं इन्द्रसेना
यैर्दंडसेनाया अग्रे पुरोभागे प्रतिषिध्या वरुध्य ॥ २१ ॥ असंभ्रान्ता अपरवशाः मत्तः द्रुमदाः सिंहनादेनाभ्यद्रवन् ॥ गदाद्यादिभिः प्रास्त्रैः अविद्ध
धीमान्सर्वतो वाकिरन् तत्र प्रातघ्नी चतुर्हस्ता लोहकंटकसंयुक्ता ॥ २२ ॥ पुंखो मल्लदेशाः कस्यपुंखमनु तत्संलग्ना परस्य पुंखो यथा भवति तथा
समंतात्पतितैः शरजालैः संछन्नान्देवान् दृष्ट्वा तथा नभो घनैर्नभस्थैर्मेघैराच्छन्नानि ज्योतींषीत्यनेन तेषां तद्व्याप्तिः सूचिता ः ॥ २४ ॥ ता

नमुचिः शंबरोऽनर्वा द्विमूर्धा ऋषभोऽवरः ॥ हयग्रीवः शंकुशिरा विप्रचित्तिरयोमुखः ॥ पुलोमा वृषपर्वा च प्र
हेतिर्हेतिरुत्कटः ॥ १९ ॥ दैतेया दानवा यक्षा रक्षांसि च सहस्रशः ॥ सुमालिमालिप्रमुखाः कार्तस्वरपरिच्छदाः
२० ॥ प्रतिषिध्येंद्रसेनाग्रं मृत्योरपि दुरासदं ॥ अभ्यर्दयन्नसंभ्रान्ताः सिंहनादेन दुर्मदाः ॥ २१ ॥ गदाभिः परि
घैर्बाणैः प्रासमुद्गरतोमरैः ॥ २२ ॥ शूलैः परश्वधैः खड्गैः शतघ्नीभिर्भुशुंडिभिः ॥ सर्वतोऽवाकिरन्शस्त्रैरस्त्रैश्च विबु
धर्षभान् ॥ २३ ॥ न तेऽदृश्यंत संछन्नाः शरजालैः समंततः ॥ पुंखानुपुंखपतितैर्ज्योतींषीव नभोघनैः २४ न
ते शस्त्रास्त्रवर्षौघा ह्यासेदुः सुरसैनिकान् ॥ छिन्नाः सिद्धपथे देवैर्लघुहस्तैः सहस्रधा ॥ २५ ॥ अथ क्षीणा
स्त्रशस्त्रौघा गिरिशृंगद्रुमोपलैः ॥ अभ्यवर्षन्सुरबलं चिच्छिदुस्तांश्च पूर्ववत् ॥ २६ ॥

मेवाहनन् इति तेषां शस्त्रास्त्रवर्षा
णां च यानि वर्षौघाणि तेषां मोघाः सुरसैनिकान्नासेदुर्न प्रापुः किंतु लघुहस्तैर्हस्तलाघववद्भिस्तैर्देवैः सहस्रधा सिद्धपथ आकाशे छिन्ना
बभूवुः ॥ २५ ॥ अथ क्षीणास्त्रिन्ना अस्त्रशस्त्राणामोघा येषां ते दानवा गिरिशृंगै द्रुमैरुपलैः पाषाणैश्च सुराणां बलमभ्यवर्षन् तान् गिरिशृंगं

पौ
५२

३ कथंभूतस्तत्याज यतात्मा नियमितात्मा अदाः अंद्रियाणि येन शोषितं विषयेभ्यः प्रत्याहृतं मनो बुद्धिश्च यस्य तं देहं सशरीरस्क पर ब्रह्मयापात्मं परम प्राप्स्य
तीति तत्त्वं हृक अयतानि वयनानि पुण्यपापात्मकानि यस्मात परमं स्वपार्ष्णिनापीड्य गुदादिनाद्वितीयस्कंधोक्तं देहो क्रमेण योगमाश्रितः ॥ अ
थेहाविति द्वैणान्वयः ततो गतं देहं न बुबुधे ॥ १२ ॥ अथ मुनेर्देधीचोस्थिभिः पाल्यैः विश्वकर्मणा विनिर्मितं वज्रमायुधं मुद्यम्य उद्धृत्य भगवत
तेजसान्वितः अतएव उत्सिक्त ऊर्जित इंद्रः ॥ १३ ॥ सर्वैर्देवगणैः परिवृतो गजेंद्रे ऐरावतस्योपरि पर्यशोभत ततो मुनिगणैः स्तूयमानो लोकत्रयं

यतात्मा मुमनोबुद्धि तत्त्वदृग्ध्वस्तबंधनः ॥ आस्थितः परमं योगं न देहं बुबुधे गतं ॥ १२ ॥ अथेंद्रो वज्रमुद्य
म्य निर्मितं विश्वकर्मणा ॥ मुनेः शक्तिभिरुत्सिक्तो भगवत्तेजसान्वितः ॥ १३ ॥ वृतो देवगणैः सर्वैर्गजेंद्रोपर्यशो
भत ॥ स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥ १४ ॥ वृत्रमभ्यद्रवच्छत्रुमसुरानीकयूथपैः ॥ पर्यस्तमोजसा
राजन् क्रुद्धो रुद्र इवांतकं ॥ १५ ॥ ततः सुराणामसुरै रणः परमदारुणः ॥ त्रेतामुखे नर्मदायामभवत्प्रथमे युगे ॥
१६ ॥ रुद्रैर्वसुभिरादित्यैरश्विभ्यां पितृवह्निभिः ॥ मरुद्भिः ऋभुभिः साध्यैर्विश्वेदेवैर्मरुत्पतिं ॥ १७ ॥ दृष्ट्वा वज्रधरं
शक्रं रोचमानं स्वया श्रिया ॥ नामृष्यन्नसुरा राजन्मृधे वृत्रपुरःसराः ॥ १८ ॥ हर्षयन्निव शत्रोरहितत्वाद्धर्षयन्निवेति स्वा
शद्धः प्रयतः ॥ १४ ॥ असुरसैन्यानां नायकैः परिवेष्टितं प्रातुं वृत्रमभ्युद्रवदभिमुखमगात् यथा प्रलयकाले क्रुद्धो रुद्रः ॥ अमंगं प्रसंतमवसायनं
गच्छतीति तं तथेति ॥ अंतमंतिपाठे अंतं करोतीत्यंतकः अन्येभ्यो पिदृष्यत इति उग्रत्यत्यः जगद्विनाशकृदित्यर्थः ॥ अंतकं मिति द्वितीयांतपाठे त्वंतकं
मृत्युं स्वेदमयमेतोपमेयं ॥ १५ ॥ ततो सुरैः सह सुराणां परमदारुणो रणः संग्रामोभूत् तत्राह ऋषयमे चतुर्युगे त्रेतामुखे त्रेतायुगारंभे प्रथमेंतरे पाठे ।
कृततेत्रेतयोरंतकालकाले प्रथममन्वंतरे वा नर्मदायां ॥ १६ ॥ हे राजन्मृधे युद्धे रुद्रादिभिः परिवृतं वज्रायुधं धरं स्वया प्रभया रोचमानं मरुत्वंतं इंद्रं ह
नद्यो

४८

भा॰ष॰ अतएवमहतांभूतान्यनुकंपयतीतितथातेषांभूतानुकंपाशीलत्वंअवाहप्रांपुंसांकिंनुतउत्सृज्यमात्मपर्यंतदातृणांनकिमपिदुस्त्यजमस्तीतिभावः

५२ ॥५॥ यद्युक्तमभिप्रेतंहिकिंनजानीथइतितत्राह जानामितिः॥ स्वार्थपरःस्वश्रेयोजनोसक्तःपुमान्परस्यसंकटंस्वं नवेदयदिपरसंकटंवेदतर्हिनयाचेतएव

यदियाचमानंदेहीतिवदतियदानममलार्हिंनेतिनदास्यामीतिनाहनब्रूते॥ अतोयथातवसंकटंवयंस्वार्थपरानजानीमस्तथाचस्याचदात्रानत्वमप्यसम

संकटंनजानासीतिभावः॥६॥ एवमुक्तोदध्यङ्स्वाभिप्रायमाहधर्ममितिचतुर्भिः॥ वोयुष्माकंधर्मंश्रोतुकामेनमयायूयंप्रत्युदाहृताः आत्मा

त्वंस्वार्थपरोनलोकोनवेदपरसंकटं॥ यदिवेदनयाचेतनेतिनाहयदीश्वरः॥६॥ ऋषिरुवाच॥ धर्मंवःश्रोतुकामे

नयूयंमेप्रत्युदाहृताः॥ एषवःप्रियमात्मानंत्यजंतंसंत्यजाम्यहं॥७॥ योध्रुवेणात्मनानाथानधर्मंनयशःपुमा

न्‌ ईहेतभूतदययासशोच्यःस्थावरैरपि॥ एतावानव्ययोधर्मःपुण्यश्लोकैरुपासितः योभूतशोकहर्षाभ्या

मात्माशोचतिहृष्यति॥९॥ अहोदैन्यमहोकष्टंपारक्यैःक्षणभंगुरैः॥ यन्नोपकुर्यादस्वार्थैर्मर्त्यःस्वज्ञातिविग्रहैः॥१०॥

श्रीशुक उवाच॥ एवंकृतव्यवसितोदध्यङ्ङाथर्वणस्तनुं॥ परेभगवतिब्रह्मण्यात्मानंसंनयन्‌जहौ॥११॥

त्वंमांत्यजंतंत्वाएवध्रुवंमांत्वयमेवत्यजंतंतमेनंवपुः॥ युष्माकंप्रियंदेहमहंसंत्यजामिसम्यगहंकारायोहेनत्यजामीतिहेनाथाःयःपुमानध्रुवे

णात्मनादेहेनधर्मंयशोवाभूतदययानसाधयेत्सपुमान्स्थावरैरपिशोच्यःस्थावरान्अपिहिसविनाशेनापिपरेरुपयुज्यंतेअतोनुपकारकस्तेभ्योपि

निकृष्टइत्यभिप्रायअव्ययोनश्यति धर्मःपुण्यश्लोकैरेतावानेवउपासितःउपार्जितःकियान्भूतानांशोकेनशोचतिहर्षेणहृष्यतिआत्माअयंपुमे

तियत्एतावानेव॥९॥ मर्त्यैःकरैर्भिःपारक्यैःश्वसृगालादिभक्ष्यैःक्षणभंगुरैरस्थिरैरस्वार्थैरात्मोपयोगरहितैःस्वज्ञातिभिर्विग्रहैर्देहैर्मर्त्योधनैर्नोपकु

र्यादितियत्तदहोकष्टंदैन्यंच॥१०॥ एवंकृतनिश्चयोदेहंतत्याजेत्याहमुनिः॥ एवंकृतव्यवसायः आथर्वणोदध्यङ्‌परब्रह्मण्यात्मानंसमर्प्य ५२

तस्मिन्नवेत्येको सति यूयं तेजोऽस्त्राणि चायुधानि च पूर्ववद्भूयः प्राप्स्यथ त्रिभुवनमाप्स्यसे मन्वा वास्मान् हन्यादिति शंकां कुर्वाणं चिंतयन्त्वा हमत्परांश्च न
केऽपि बाधितुं क्षमंते लोऽयुष्माकं भद्रमेव भविष्यति ॥५३॥ इति षष्ठे नवमः ॥९॥ हरिरेवमादिश्यांतर्दधे यस्मात्तु मुनिः ॥ इंद्रमिति ॥ एवमिंद्रं समादिश्य
इति विश्वस्य सुखकरो भगवाननिमेषाणां देवानां पश्यतां सतां तत्रैवांतरधीयत अंतर्हितवान् ॥१॥ हे भारत भगवदुक्तप्रकारेण देवैरभियाचितो दध्यङ् ॥
प्रवेशः प्रत्यक्षुनि परब्रह्म मननशीलः महान् ... तत्तस्याः वृती ततेम त्वं प्रियमिवात्मनि प्रियमित्युक्तं विचारणासंपन्नः अतएव मोदमानः कृष्णचितः प्रहस्

तस्मिन्विनिहते यूयं तेजोस्त्रायुधसंपदः ॥ भूयः प्राप्स्यथ भद्रं वो न हिंसंति च मत्परान् ॥५३॥ इति श्रीभागवते महापु
राणे षष्ठस्कंधे नवमोऽध्यायः ॥ ॥९॥ श्रीशुक उवाच ॥ इंद्रमेवं समादिश्य भगवान्विश्वभावनः ॥ पश्यतामनिमेषा
णां तत्रैवांतर्दधे हरिः ॥१॥ तथाभियाचितो देवैरृषिराथर्वणो महान् ॥ मोदमान उवाचेदं प्रहसन्निव भारत ॥२॥
अपि वृंदारका यूयं न जानीथ शरीरिणां ॥ संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः ॥३॥ जिजीविषूणां जीवा
नामात्मा प्रेष्ठ इहेप्सितः ॥ क उत्सहेत तं दातुं भिक्षमाणाय विष्णवे ॥४॥ देवा ऊचुः ॥ किं नु तद्दुस्त्यजं ब्रह्मन्पुंसां भूता
नुकंपिनां ॥ भवद्विधानां महतां पुण्यश्लोकेड्यकर्मणां ॥५॥ न्निवप्रहासं कुर्वन्निवेदं वचनमाह उवाच ॥२॥ उक्तमेवाह ॥ अपीत्यादि त्रि
भिः ... ताव तेषां विवक्षितं श्रोतुकामः प्रत्याचष्टे सुरिवाह दध्यङ् ॥ अपीति ॥ हे वृंदारकाः शरीरिणां संस्थायां मरणकाले यः दुःसहः सोढुमशक्यः चेत
नापहः चेतनाहरः अभिद्रोहः क्लेशस्तमपि किं न जानीथ ॥३॥ इह लोके जीवितुमिच्छूनां जीवानामात्मा देहः प्रेष्ठः प्रियतमः ॥ अतएव ईहेप्सितः इष्टः तं
देहं भिक्षमाणाय विष्णवेऽपि दातुं को वा उत्सहेत तस्मादहं कुर्यां न कोऽप्युत्सहेतेत्यर्थः विष्णवे दानेनाभ्यागतः स्वयं विष्णुरिति प्रकारेण विष्णुरूपाय
याचमानायेत्यर्थः ॥४॥ एवमुक्ता देवा आहुः ॥ किं न्विति हे ब्रह्मन्पुण्यश्लोकैरीड्यानि कर्माणि चरित्राणि येषां पुण्यश्लोकेति संबंध्यतं वा

भा.ष.
५०

सविद्ययोः ॥ तिमतावश्विनौ दैवो गत्वा तमिदमूचतुः ब्रह्मविद्यां प्रवर्ग्यं च वेदत्वं मां प्रति द्विज ॥ तदा वाम्यां प्रवक्ष्यामागतौ त्वां तदर्थिनौ दध्यङ्ङपि
तदा प्राह ह तौ पश्चात्तद्ब्रवीम्यहं ॥ कर्मरूपवस्थितो ह्याहमद्य नानन्तु मां प्रति ॥ तत्कृत्वा तौ तपोऽस्त्व काजग्मतुःस्वालयं किल ॥ एतस्मिन्नन्तरे शक्रो विद्याति
शापमात्मनः ॥ ब्रह्महन्त्वरितो गत्वा दध्यंचं दमब्रवीत ॥ प्रवर्ग्यं ब्रह्मविद्यां न कस्मैचिद्वक्तुमर्हसि ॥ शिरश्छिन्द्यां हि पाद्राग लोभादिना ततः तदा
वक्तु तेषे काले तावस्यानुपजग्मतुः ऊचतुश्चाप्य प्रवर्ग्यं ब्रूहि पूर्वोक्तमावयोः ॥ इन्द्रेणाहं निषिद्धोऽस्मीत्याह नौ द्विजसत्तमः ॥ यदि वक्ष्ये शिरश्छिंद्या
दिन्द्रो मे नात्र संशयः पूर्वमेव शिरश्छित्वा तत्रैव शिरः संततः संधास्याव स्त्वमश्वतो ब्रूहि तेन प्रवर्ग्यकं ॥ तच्चेदिंद्रश्छिनत्याशु स्वकीयं शिरः संततः
संधास्यवस्ते शिरो वैद्यास्याव इति होचतुः ॥ एवमुक्तो ऽथ दध्यङ्‌ तु तयोस्तदुभयं जगौ प्रवर्ग्यं ब्रह्मविद्यां यां स दावीये वानपत इति ॥ सवा अधिगत
नत्याश्विनाऽप्याक पात्र वितात त्रायणयः ॥ सदध्यङ्‌ कृपिमत्तमः ॥ निष्कलं विशुद्धं ब्रह्म अधिगतः यया वज्ञात्वान् ॥ निष्कृतमिति पावे तु नित्यतां हत
मनुश्रितं प्र दध्यङ्ङाथर्वणस्त्वष्ट्रे वर्माभेद्यं महात्मकं ॥ विश्वरूपाय यत्प्रादात्त्वष्टा यत्त्वमधास्ततः ॥ ५१ ॥ युष्म
भ्यं याचितोऽश्विभ्यां धर्मज्ञोऽङ्गानि दास्यति ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः येन वृत्रशिरो हर्ता मत्तेज उपबृंहितः ॥ ५२ ॥
मनुश्रितं प्रवर्ग्यं चाधिगतः यद्वा वर्ग्यं ब्रह्म मे त्यश्विभ्यां प्रतिज्ञातमिति सर्पः ॥ तदेव निष्कृतं ब्रह्मविशिनष्टि ॥ यद्वा अश्वशिरो नामेति ॥ अश्वशिरसा प्रोक्तत्वा
दश्वशिरस्तिष्ठ मिदं ब्रह्मेत्यर्थः ॥ अश्विभ्यामित्यत्र ततो दाधिदित्यस्यानुषंगः ॥ ततोऽश्विभ्यामश्वशिरो ब्रह्म प्रवर्ग्यं चाथ्यङ्ङुपदिदेशाङ्ग प्रदिश्य तत्पयोरमरत्वं
मत्त्वा राद्धिं त्वयं यथा दकरोदित्यर्थः ॥ ५० ॥ तथाथर्वणो दध्यङ्‌ महात्मकं महदेवताकमत एवाभेद्यं वर्म नारायणवर्माख्यं नाधिगततत्वष्टे दादनेन चत्वद
गात्रस्यापेक्षित प्रदत्तं च दर्शितं ॥ यद्वर्मत्वष्टा स्वपुत्राय विश्वरूपायादात् यत्त्वं ततः विश्वरूपाद्धृतवानसि ॥ ५२ ॥ एवं दधीचो गात्रस्य स्वत्वं मभिधा
याथ प्रयुक्ता याचितो गात्राण्यस्यैव दध्यङ्‌ दास्यतीत्याह युष्मभ्यमिति ॥ धर्मज्ञोऽदित्यादि देवतारक्षणरूपधर्मज्ञः दध्यङ्ङ्याचितः सन्युष्मभ्यमवयवांगानि
दास्यति ददातु किं तैरस्माभिः कार्यं तत्राह ॥ ततस्तैरिति ॥ तैर्दधीचांगैर्विश्वकर्मणा विनिर्मितास्त्राय धश्रेष्ठो विधास्यति येनायुधश्रेष्ठेन मत्तेजसोपबृंहितः ॥

भ

एतदेवोपपादयति नेति गुणे शब्दादिविषयेषु वस्तुत्वेहक पुरुषार्थदृष्टिरत एव तद्रूपपराः अद्विपवशपः पुनात्मनः स्वस्य श्रेयो निरतिशयपुरुषार्थरूपं तदे
वं एवं तानशब्दादीनिच्छतः तस्य पुंसः तान् शब्दादीनीशोपि पुरुषार्थप्रदानसमर्थोपि यः पुमानयच्छेद् दद्यात् सोपि तादृश एव कृपणः कृपणेन श्रे
न योऽभिज्ञेनैकात्मपुरुषार्थेष्वार्थितोपि स्वयं पुरुषार्थप्रदानसमर्थोपि कृत्रफलं प्रयच्छन् कृपणा एवेति भावः ॥४७॥ एतदेव दृष्टांतमुखेन विप्रादयति
स्वयमिति निःश्रेयसमविरलिपरमपुरुषार्थं तत्साधनं च विद्वान्स्वयमविज्ञायपरमपुरुषार्थं तत्साधनज्ञानरहिताय केवलकर्मासक्तिदुःखिताय कर्मैव कुर्विति
न वक्ति न बोधयति तथा हि भिषक्श्रेष्ठो रोगिणः कामयमानस्यापि रोगिणः अपथ्यं न राति न ददाति ॥४८॥ प्रवृत्ते एवं परिपाटीतयापि हे मघवन् किं तं दध्यञ्चं ऋषिसत्त

न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक् ॥ तस्मात्तानिच्छतो यच्छेद्यदि सोपि तथाविधः ॥४७॥ स्वयं निःश्रेयसं वि
द्वान्न वक्त्यज्ञाय कर्म हि ॥ न राति रोगिणोऽपथ्यं वांछितोपि भिषक्तमः ॥४८॥ मघवन्यात भद्रं वो दध्यंचमृषिस
त्तमं ॥ विद्याव्रततपःसारं गात्रं याचित मा चिरं ॥४९॥ स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलं ॥ यद्वा अश्वशि
रो नाम तयोरमरतां व्यधात ॥५०॥ मं दध्यंचं प्रति यात गच्छत वो युष्माकं भद्रमभिलषितं भविष्यति कथमित्यत्राह विद्यादिप्रभावेन प्रव
र्धितं कर्मणा तदर्पेक्षितार्थदानशीलं गात्रं शरीरं याचत याचध्वं विलंबं मा कुरुत ॥४९॥ दधीचो गात्रस्य सारवत्वमेवाह स वा इति अत्रैषाख्यायिका कथाव
म र्त्तते यथा अथर्वणो दध्यंगा नाम ऋषिः कश्चित्प्रवर्ग्यारव्यकर्मविद्याभ्यां सम्पन्नः तं च विद्याद्वयमश्विनौ याचितवंतौ तौ निशाम्याश्विनौ विद्यार्जिघृक्षयागतमु
पेत्याश्चतुर्नो विद्यामुपदिशेतिति तेन दधिचा अधुना कर्मण्यासक्तोऽहं पश्चादुपदेक्ष्यामि इत्युक्तावश्विनौ प्रययतुः ॥ ततः इंद्र आगत्य कस्मैचिदपीमां विद्यां
यद्युपदेक्ष्यसि तव शिरश्छिद्यामि इत्युक्त्वा ययौ ततः पुनरश्विनावागत्योचतुः उपदिशेति स च ताभ्यामिंद्रोक्तमुक्तवान् ततोऽश्विनौ पूर्वमेव तव शिरश्छि
त्वा अश्वशिरः संधास्यामस्तेन त्वा नावुपदिशेति स च ताभ्यामश्वशिरः संधितेनाश्वशिरसा विद्यामुपदिदेशेति ॥ तथा चोक्तं दध्यङ्ङाथर्वणो दत्तःप्रवर्ग्यं च

भा० ष०
७६

तद्वाप्यपुनर्भवागामंति ॥ हंसायनिरस्तनिखिलदोषाय त्रयाणतातिहंतेवा दहरंहृदयपुंडरीकं तदेवनिलयंयस्य तस्मै अस्मदीयदुःखाभिज्ञायेतिभावः ॥ निरीक्ष
कायचित्तवृत्तिसाक्षित्वेन कृष्णाय तेनास्माभिर्विज्ञापितमितिभावः कृष्णाय भारापहरणेन अस्मैः सुखकराय मृष्टयशसे विशुद्धकीर्तये प्रपन्नार्तिहरणेन
तवाप्यकीर्तिरपि तु निष्कलंका कीर्तिरेवेतिभावः निरुपक्रमाय निर्गतउपक्रमः आरंभउद्योगो यस्मात्तस्मै तस्यातिपतिरेकेनास्माकमुद्योगोस्तीतिभावः
सतांसंग्रहःसंग्रहः अनुवर्तिनां संग्रहायस्वीयत्वेनानुग्राहकाय भवपांथाः संसाराध्वगास्तेषां निजाश्रमाय स्वगेहमेताय पथ्यापांथः स्वशरणागतेभ्यः
फलदायकाय स्वगेहमेव प्राप्य सुखयतीति ते भवपांथानां निजाश्रमाय नकेवलमैहिकसुखदाया पितुमुष्मिकसुखस्यापिप्रदात्रे चेतिभावः ॥ शेषं स्पष्टम्

हंसायदह्रनिलयायनिरीक्षकाय कृष्णायमृष्टयशसेनिरुपक्रमाय ॥ सत्संग्रहायभवपांथनिजाश्रमाप्तावंते प
रीष्टगतयेहरयेनमस्ते ॥४५॥ श्रीशुकउवाच अथैवमीडितोराजन्सादरंत्रिदशैर्हरिः ॥ स्वमुपस्थानमाकर्ण्य
प्राहतानभिनंदितः ॥४६॥ श्रीभगवानुवाच प्रीतोहंवःसुरश्रेष्ठामदुपस्थानविद्यया ॥ आत्मैश्वर्यस्मृतिःपुंसां
भक्तिश्चैवयथामयि ॥४७॥ किंदुरापंमयिप्रीतेतथापिविबुधर्षभाः ॥ मय्येकांतमतिर्नान्यन्मत्तोवांछतितत्त्ववित् ४

परिष्टागतिः फलं तद्रूपाय निरतिशयफलरूपायेत्यर्थः प्रपन्नानामनेकाधिदैविकाधिभौतिकादिदुःखहरणशीलायएवं देवैः संस्तुतो भगवानुवाचेत्याह अथेति हेराजन्त्रिदशैर्देवैः सादरं सादरं समीडितं यथा तथा एवमीडितः स्तुतो भगवान्हरिः स्वकीयमुपस्थानं स्तोत्रं कर्णाभिनंदितः तान्प्रत्याह ॥४६॥
उक्तमेवाह प्रीत इत्यादिना यावदध्यायसमाप्ति हे सुरश्रेष्ठा मदुपस्थानविद्यया मत्स्तुत्यात्मकया विद्यया अहं वो युष्माकं प्रीतः ॥ विद्यां विशिनष्टि
ययानयाविद्यया पुंसां तावन्मयि भक्तिः ततश्चात्मैश्वर्यस्मृतिर्देहातिरिक्तात्मनोपहतपाप्मत्वादिगुणाष्टकरूपैश्वर्यस्मृतिश्च भवति ॥४७॥ यद्यपि मयि
प्रीते सति हे विबुधर्षभाः किं दुरापं दुर्लभं किमपि नास्ति सर्वमपि वांछितं सुलभमेवेति भावः तथापि मय्येकांतमतिरनन्यप्रयोजनविषयामतिर्यस्य सः तत्त्वविदेव

७६

प्रतिपत्तेः॥देशकालदेहावस्थानविशेषाननुसृत्यध्यानतिक्रम्यानुभवनःव्याप्तस्यापिवातेषामुपादानोपलंभकतयानुद्गानेनसहसमस्तंज्ञानभव
तेऽस्यान्वयः॥तेषांदेशकालदेहादीनांउपादानंस्वीकारःएतस्मिन्देशेकालेदेहेतत्सुखदुःखादिकमुपादेयमित्येवंरूपमुपादानंतस्योपलंभ
कतयातिदानेनसहसमस्तवैज्ञानजनकतयानुभवतःव्याप्तवतइत्यर्थः॥सर्वप्रत्ययसाक्षिणःसर्वजीवानांचित्तवृत्तिसाक्षिणः॥आकाशशरीर
स्याकाशोदहराकाशःसएवशरीरंस्थितिर्यस्य॥आसमंतात्स्वकाशते॥आकाशयतिवाकाशःस्वप्रकाशमपरिच्छिन्नंज्ञानंतदेवशरीरमाकं
शायस्येतिवासाक्षात्परब्रह्मणःमुख्यवृत्त्यापरब्रह्मशब्दवाच्यस्यपरमात्मनःलोकत्रयमंतःप्रविश्यधारकस्य॥४०॥यतएवमस्मेविस्फुलिं

तदेहेषुबहिरपिचब्रह्मण्यात्मस्वरूपेणप्रधानरूपेणचयथादेशकालदेहावस्थानविशेषंतदुपादा
नोपलंभकतयानुभवतःसर्वप्रत्ययसाक्षिणआकाशशरीरस्यसाक्षात्परब्रह्मणःपरमात्मनः॥कियानिह
वार्थविशेषोविज्ञापनीयःस्यात्॥विस्फुलिंगादिभिरिवहिरण्यरेतसः॥४०॥अतएवस्वयंतदुपकल्पया
स्माकंभगवतःपरमगुरोस्तवचरणशतपलाशच्छायांविविधवृजिनसंसारपरिश्रमोपशमनीमुपसृतानां
वयंयत्कामेनोपसादिताः॥४१॥अथोईशजहितात्वाष्ट्रंग्रसंतंभुवनत्रयं॥ग्रस्तानियेननःकृष्णतेजांस्यस्त्रायुधानिच

गम्यतेत्वदायत्तसत्तादिमंतत्रतएवास्माकंतदुपकल्प्यतत्कार्यंसंपादय॥किंतद्यत्कामेनयत्प्रयोजननिमित्तेनवयमुपसादिताः॥ननुदिति॥
जेदनुजानामपिमदायत्तसत्तादिमत्त्वात्किंविशेषेणस्वकार्यंसाधयंत्युच्यतेऽस्मादिष्टंकांनिराकुर्वंतःस्वात्मनोविशिंषंतिपरमगुरोर्भगवतस्तवचर
णावेवपलाशोकुशोषयेतयोश्छायायामुपसृष्टानामाश्रितानांप्रपन्नानामितिभावः॥कथंभूतांछायांविविधैर्वृजिनैःपापैर्यःसंसारस्यपरिश्रमःतस्य
उपशममयंस्मनपेस्वपशमीनीतां॥४१॥उपकल्पयेत्स्मतदेवविशदयंति॥अथोइतिअथतहेईशभुवनत्रयंग्रसंतंत्वाष्ट्रंवृत्रंजहियेनत्वाष्ट्रेणहेकृष्णनो

सुराद्यवतारैर्मत्स्यकूर्माद्यवतारैश्चेत्यर्थः ॥ तत्र सुराकृतिरुपेंद्राद्यवताराः नराकृतिः रामकृष्णादिः मृगाकृतिर्वराहादिर्मिश्राकृतिर्नृसिंहादिर्जलचराकृति
र्मत्स्यकूर्मादिः यथापराधमपराधानुसारेणादंडं विरोधिनिरसनरूपं दधर्षि कृतवानसि ॥ एवं हे भगवन्नेनं त्वादृक्त्वमपि जहाहीयत्युपक्रमस्य सेहं तु यदीछ
सि ॥ २४ ॥ एवं प्रत्तं विज्ञाप्य स्वानुग्रहकं तद्वाक्यं योतु कामास्तं प्रार्थयंते अस्माकमिति ॥ अनुवद्धं वशात्कृतं कदयंत देवनिगडोयेषां तेषां नः ॥ अनुकंपा
सच्चिषया कृपा तया अनुरंजितं सानुसमंगं च तद्विशादं चारु चिरं च स्मितं तत्सहितेनावलोकेन तया अनुकंपयैव विगलितो मधुरो मुखरस द्रिपवाक्ते वामृत
कलात्तया वांतस्तापं प्रशमयितुमर्हसि ॥ २४ ॥ अपारमहिमशालिनस्तवास्माभिर्विज्ञाप्यमेतत्कियदित्याहुः ॥ अपेत्यादिना हिरण्यपरेत्त संस्तेन अथ

एवमेतनपि भगवन जडेहित्वाघुमतयाहिमन्यसे ॥ २८ ॥ अस्माकं तावकानां भवनतानां पितुः पितामह तव चरणन
लिनयुगलध्यानानुबद्धहृदयनिगडानां स्वलिंगविवरणेनात्मसात्कृतानामनुकंपानुरंजितविशदरुचिर
शिशिरस्मितावलोकेन विगलितमधुरमुखरसामृतकलया चांतस्तापमनघाहेसि समयितुं ॥ २९ ॥ अथ भग
वंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य सकलजीवनिकायानामं

तर्हृदयेषु भगवन्नस्माभिर्विज्ञापनीयस्तव किंयानर्थः ॥ कार्यकारणभावमात्रपरोयं दृष्टांतः उभयोरप्यचेतनत्वेपि ज्ञापितद्वयदृष्टत्योरसंभवात् ॥ यद्वा अ
येविस्फुलिंगादिभिः क्रियमाणाः प्रकाशाः कियानतथास्माभिर्विज्ञाप्यार्थस्तव कियानित्यर्थः ॥ यस्माद्यस्माभिः कथंभूतैरित्यत्र दृष्टांताः यथाविस्फु
लिंगाग्नायत्तसमाप्युत्पाद्विसमंतत्स्थाप्यात्वदायत्तसत्तादिमद्भिरिति ॥ कथंभूतस्य तवाखिलजगतामुत्पत्तिलयेषु निमित्तायमानाविक्रयमाण
यादिव्यामायासेवविनोदः परिकरो यस्य सकलजीवसमूहानामंतर्हृदयेषु ब्रह्मत्यागात्मस्वरूपेणप्रत्यग्जीवरूपात्माशरीरं यस्य तव स्वरूपेण
अप्राद्भवाच्येन जीवशरीरकत्वेन स्वरूपेणेत्यर्थः ॥ बहिः प्रधानं प्रकृतिः रूपं रूपं यस्य प्रधानशरीरकत्वेन यस्यात्माशरीरं यस्य दृष्टपिवीशरीरं

स्रजंति न विसृजंति ये वेत्यन्वयः ॥ हि यस्मात्ते स्वार्थे कुशलाः पुरुषार्थनिष्कर्षे कुशलाः ॥ अतः कथंभूताः आत्मा त्वमेव प्रियः सुहृच्च येषां साधवः साधयंति
परेषामिष्टमिति साधवः रागादिरहिता अत्र तत्र हेतुः ॥ तव महिमैवामृतरससमुद्रः तस्य विप्रुषा बिंदुमात्रेण ॥ कथंभूतया सकृदवलीढया आस्वादितया ॥
स्वमनसि निष्यंदमानमतिशयेन स्रवन्निरंतरं संततं सुखं तेन विस्मारिताः ॥ ऐहिकाः दृष्टाः आमुष्मिकाः श्रुता विषयाः सुखलेशाभासा येषां ते सर्वभूता
नापि प्रियसुहृदि च सर्वांतरात्मनि भगवति त्वयि निर्वृतं सुखितं मनो येषां ते चरणांबुजसेवां विसृजंति यत्र चरणांबुजसेवायां मुक्तिपर्यंतायां सत्यां पु
नरयं संसारो न पर्यावर्तते न परिवर्तते प्राप्नोत्यंतं निवर्तते इत्यर्थः ॥ ३७ ॥ एवमभिप्रश्रयपरस्कृतं विज्ञापयंति ॥ त्रिभुवनेत्यादिना हे त्रिभुवनात्मभवन त्रिभुव
त्रुषा सकृदवलीढया स्वमनसि निष्यंदमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभा
गवता एकांतिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निर्वृतमनसः ॥ कथमु ह वा एते मधुमथन पु
नः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणांबुजानुसेवां विसृजंति न यत्र पुनरयं संसारपर्यावर्तः
॥ ३७ ॥ त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव तवैव विभूतयो दितिदनुजादयश्चा
पि तेषामनुपक्रमसमयोऽयमिति स्वात्ममायया सुरनरमृगमिश्रितजलचराकृतिभिर्यथापराधं दंडं दंडधर दध
तस्मात्मांतः प्रविश्य पालयिता भवनमाश्रयश्चेति तस्य संबोधनं एवमग्रेपि त्रयो विक्रमा यस्य सर्वांतरात्मा न त्वया विदितमंतरं नास्ति त्रिविक्रमस्य तवास्मा
कमपि नास्तीति भावः ॥ हे त्रिनयन त्रयश्चंद्रसूर्याग्नयो नयनानि यस्य तवास्माकमप्यविदितं नास्तीति भावः ॥ त्रयाणां लोकानां मनोहरोनुभावो यस्य तवास्म
दभिलषितमपि त्वया कर्तव्यमेवेति भावः ॥ एवं संबोध्य विज्ञापयंति ॥ यद्यपि दितिजा दनुजाश्च तवैव विभूतयो न तस्तेषां वधोपायचिंतनमनुचितं तथा
पि तेषामनुपक्रमसमयोऽयमभ्युदयकालोऽयं न भवतीति मत्वा पूर्वं यथा स्वात्ममायया आत्मसंकल्पेनैव उपात्ताभिः सुरादिसंमिश्रिताभिः जलचराकृतिभिः

भा.ष. ४० वस्तुषु देवादिपदार्थेषु स्थितोपि वस्तुस्वरूपं पयोकं यत्तु कालांतरेणापि नामसंज्ञामुपैति वेषशिरणामादिसंभूतं तं तत्र वस्तुनयतत्त्व किमिति कु
तः सर्वप्रत्यगात्मत्वात् सर्वप्रत्यगात्मनः शरीरयस्य तस्य भावस्तत्त्वं तस्मादचेतनविशिष्टसर्वजीवशरीरकत्वाच्छरीरभूतचिदचिद्गतत्वादि
कारणानि स्वरूपे प्रसंगादिति भावः ।। अतएव सर्वगुणाभासः सर्वैश्चिदचित्कालादिभिरपृथक्सिद्धविशेषणैरवभासत इति तथा सन्नास्व
स्याश्रयचेतनाचेतनविशिष्टत्वेनउपलक्षित इति भावः समस्तपावेगुणैः सत्वादिभिरवभासंते इति गुणावभासाः ।। गुणकार्यदेहेंद्रियादयः
तैरुपलक्षितः तद्विशिष्टत्वेनोपलक्षितः इत्यर्थः ।। अतस्त्वनेकएवावयेवशेषितः ।। एकएवसमाभ्यधिकरहितः पर्यवशेषितः ।। एवंविधोनास्य
नितगुणगणईश्वरेऽनवगाह्यमहात्म्येऽर्वाचीनविकल्पविचारप्रमाणाभासकुतर्कशास्त्रकलिलं
तः करणाशयदुरवग्रहवादिनां विवादानवसरेउपरतसमस्तमायामये केवलएवात्ममायामंतर्धाय ।
३४ कोन्वर्थो दुर्घट इव भवति स्वरूपद्वयाभावात् ।। समविषममतीनांमतमनुसरसि यथा रज्जुखंडः सर्पादिधि
यां ।। ३५ ।। सएवहिपुनः सर्ववस्तुनि वस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणकारणभूतः सर्वप्रत्यगा
त्मत्वात्सर्वगुणाभासोपलक्षित एकएव पर्यवशेषितः ।। ३६ ।। अथ ह वाव तव महिमामृतरससमुद्रवि
इति निर्गलित इति भावः ।। ३६ ।। यत्तु भवाननितरसाधारणोदारकृतः योगपरिशुद्धमनोभ्रात्राद्यो नित्यनिरुपाधिकापरिच्छिन्ननिजानंदानुभवरूपो
जगत्सर्गस्थितिसंहृतिलीलः सार्वज्ञ्यसत्यसंकल्पत्वाद्यपरिमितगुणसागरो नितरसाधारणविविधविचित्रशक्तिरशेषचिदचिच्छरीरकः स सर्वेश्वरः
र्वेश्वरः तएव त्वच्चरणारविंदमधुरसास्वादनलीलात्वामविस्मरतोनंतस्थिरफलरूपमुक्तं प्राप्नुवंतीत्याह ।। अथेत्यादिना पर्यावर्तित इत्यं
तगदेन ।। अथ ह वाव न नु भगवानंत एव हीति वार्थः ।। हे मधुमथन परमभागवताराकांतिनो नमप्रयोजनाः त्वत्पदाब्जसेवा कथमहाभावि। ४०

साधकाः येऽप्रमाणाभासाः प्रमाणवदवभासमानाः तन्मूलकं यद्बाधितं तर्कात्मकं शास्त्रं तदभ्यासेन कलिलं दूषितमंतःकरणं तेनाधिकरोतीत्यधिक
रणाः नैयायिकादित्वात्कर्तेरित्युः प्रारंभमाणमस्मत्र इतियावत् ॥ समवयन्ह्योयेषां वादिनां विवादानवसरे विवादविषयभूते उपरता निरस्ताः समस्ता मा
यामयाः प्राकृतदोषा यस्मिन् प्रबलयदशायां उपसंहृतकार्यवर्गः तदा एवकेवलैकरूपमापां प्रतिस्वयमंतर्वायतिरोभूय स्थितेकोन्वयौ दुर्घटः स्वभा
वेति कर्तृत्वकारयितृत्वकारमादित्वानुमंतृत्वफलिकफलप्रदत्वोदासितत्वादि रूपः कोप्यपर्यानुद्घटः इत्यर्थः कुतः स्वरूपद्वयाभावात् स्वरूपद्वयस्य
स्य विरुद्धाकारद्वयस्याभावात् कर्तृत्वोदासितत्वयोः परमात्मस्वरूपे विरोधाभावादित्यर्थः ॥ अयं भावः तावत् जगत्सृष्ट्यादिव्यापारे शुभत्वात् तत्र रूपंक
र्तृत्वं प्रयोज्यकर्तुर्जीवस्य कारयितृत्वात् प्रेरकत्वरूपं प्रयोजककर्तृत्वं च प्रवरस्योपपन्नं न च कर्तृत्वनियतमोक्तृत्वापत्तिः ताइशकर्तृत्वस्याकर्मोय
त्वात्स्य प्रशासितृत्वं तदभावात् सर्वस्य प्रशासितुरीश्वरस्य प्रेरकत्वं तदभावे भानिष्टकर्तुरभावात् च त्वानिष्टापादकं कर्म स्वयमेव करोतीति वक्तुं युक्तं उद
दासीनत्वापातात् तथा लोके यथा सर्वांकुरगणसाधारणं सलिलं विशेषकारणं जलं दृष्टमेवं सर्वेष्वपि कार्येषु समानत्वादुदासीनः ॥ ननूदासित्वना
स्य साधारणत्वमपि तु कर्तृत्वाकर्तृत्वोभयपरिहारेणावस्थानत्वमिति चेन्न सा तत्सुखदुःखादिसाधनभूतपुण्यपकर्मत्वकर्तृत्वेन तत्कर्तृत्वपरि
हारात् तेष्वेव कर्मसु प्राचीनवासनानुसारेण जीवप्रेरकत्वेनाकर्तृत्वपरिहाराच्च तद्विषयमुदासीनत्वमिति ॥ एवं सर्वेष्वप्यायां सर्वस्य द्रष्टृत्वात् सर्वदी
कर्मसु प्रवृत्तस्य जीवस्योत्तरोत्तरं प्रवर्तकत्वादनुमंता सर्वेश्वरा मितेन समाश्रित संरक्षणरूपफलस्यापि स्वफलस्यापि स्वफलत्वात्फलं फलमतउ
पपत्तेरिति न्यायेन फलप्रदः इति जीवकृतकर्मपाकमोदिहेयाकरत्वात्कर्मवश्यत्वान्मायामोहितत्वादविद्यया तिरोहितस्वभावत्वात् कुशलाकुशल
फलमुपादत्ते इति ॥ १४ ॥ ननु विवादानवसरश्चेत् तर्हि कथं विवादानामुदयस्तत्राह ॥ समेति समा अविषमा च मतिर्येषां तेषां मतमभिप्रायमनुसर
सिवादिविप्रतिपत्तीः प्रवृत्ति विधाय तूष्णीमवस्थित इत्यर्थः ॥ अप्रतिषेधे दृष्टांतमाह ॥ यथा सर्पादिविषयां सर्पादिभ्रांतिमतां मतं रज्जुखंडोनुसरति न प्र
तिषेधति एवं त्वं चापि नानाविधवादिविप्रतिपत्तिमतां तूष्णीमास्स इत्यर्थः ॥ १५ ॥ एवं जगत्स्रष्टृत्वरूपनिमित्तकारणत्वे जीववत्संकापरिहृता ॥ अ
थोपादानकारणत्वे स्वरूपविकाराश्रयत्वशंकापरिजिहीर्षुः ॥ सर्वेति योऽयं निमित्तकारणभूतः सर्ववित् स कलजगदुपादानकारणभूतोऽपि सर्वेव

नरष्यादिकर्तृत्वसत्कं सर्वं कर्मनिष्ठचेतनोपृथाकुशलाकुशलनिष्पादककर्मणि कृत्वा तत्फलानि सुखदुःखमोहात्मकानि भुंक्ते न तथा स्रष्टादिकर्मणि
गुणत्रयप्रयुक्तानि हि कृत्वा तत्फलानि भुंक्ते किं वा ज्ञाननिष्ठचेतनवदुदासीन एवास्ते नाद्यः भोक्तृत्वेन संसारिणामन्तर्गतत्वात् द्वितीयः ॥ उदासीनस्य कर्तृत्वा
नुपपत्तेः ॥ अपोदासीनत्वं कर्तृत्वं चोच्यते इति चेन्न परस्परविरोधत्वात्तयोरित्याशंकते ॥ अपेत्यादिना उदासीनस्त्वमुच्यते नगद्येन ॥ अपश्चनन्तत्र जगत्
स्रष्टादिकर्तृत्वे समपि हे भगवन् किं प्राकृत आत्मेप्य द्योतकः ॥ आहोस्विच्छुद्धब्रह्मस्वरूपमपि वाक्यद्वयमादेपगर्भे किं भवान् देवदत्तवत्कर्मनिष्ठ
संसारिजीववद्देहगुणविसर्गे कार्यरूपेण प्रपंचे पतितः स्यात् तं त्रेणकर्तृत्वेन हेतुना स्वेन कृतानि कुशलाकुशलानि सात्विकराजसादीनि कर्मा॰
णि तेषां फलमनुपादत्ताति त्वीकरोति भुंक्ते इति यावत् ॥ अहोस्वित् किं वा आत्मारामः स्वात्मयाथात्म्यानुभवनिष्ठ एव उपशमस्वभावः निवृत्तांतर्बाह्येंद्रिय
व्यापारः ॥ अत एव समंजसदर्शनेन अवाधितं तत्त्वं कृपायाथात्म्यज्ञानमुदास्त इति ॥ २ ॥ परिहारं प्रतिजानीते इति ॥ इतीत्यप्रकहत्वपीत्परेन विदामः नञ्ज

अपतत्त्वं भवान् किं देववदत्तवद्देहगुणविसर्गपतितः ॥ पारतंत्र्येण स्वकृतकुशलाकुशलफलमुपाददाति
आहोस्विदात्मारामउपशमशीलः ॥ समंजसदर्शन उदास्त इति ह वाव न विदामः न हि विरोध उभयं भगवत्परि

णाम ॥ कर्मनिष्ठचेतनतुल्यतां ज्ञाननिष्ठचेतनतुल्यतां च न विदामः इत्यर्थः ॥ किं तदासीनत्वं कर्तृत्वं चोभयमपि त्वयि विदाम इति भावः ॥ ननु परस्परविरुद्ध
मुभयमेकस्मिन्कथमुपपद्यते इत्यत आह न हि विरोधः ॥ अपि तूभयं संभवति कर्मभावनया ब्रह्मभावनया चान्वितानां सर्वेषां चेतनानामंतरात्मभूते
त्वयि लक्षणविविधविचित्रगुणके मति त्वयि सर्वमविरुद्धमित्यभिप्रायः ॥ अविरोधापादकगुणजातेनंतं विशिंषंतो वादिविप्रत्यविषयत्तं च वदंतो वि
रोधमनुपपादयंति भगवतीत्यादिना ॥ भगवतीत्यादिभिः सप्तम्यंतैः पदैः कर्मब्रह्मोभयभावनान्वितचेतनेभ्यो वैलक्षण्यमुच्यते भगवती पूर्णषाड्गुण्ये
परिगणितानामसंख्यातागुणानां कल्याणगुणानां गणा यस्य ईश्वरे भावनाद्वयान्वितचेतनानामंतरात्मन्यनवगाह्य कर्मान्वितचेतनसजातीयत्वेन
दुर्बोधमहात्म्यस्य ॥ अर्वाचीनाः इदानींतनाः विकल्पसंप्रायः तन्मूलकः वितर्कः एवं वा एवं वेति वितर्कः ॥ तत्र किं युक्तं इति विचारः तदन्यतरपक्ष

तरामयुक्तं ॥ अथ भरदाद्युपादानवैलक्षण्यमाह ॥ आत्मनैवाविक्रियमाणेन सगुणमितितदात्मानं स्वयमकुरुतेतिश्रुत्यर्थोत्राभिप्रेतः आत्मनेत्य
नेनस्वयमशब्दार्थउक्तः सगुणमित्यनेनात्मानमित्यस्यार्थः गुणशब्देनात्र एव कस्मिद्धविशेषणवाचीन तथा चाशब्दपक्तिसिद्धविशेषणभूतं चिदचि
द्विशिष्टमात्मानं स्वेनैव सृजामि रक्षामि च हरामि च सूक्ष्मचिदचिद्विशिष्टमात्मानमेव स्थूलचिदचिद्विशिष्टावस्थाविस्थाकारेण परिणमयामीत्यर्थः
निर्विकारश्रुतिविरोधपरिहारायात्मकं विशिनष्टि ॥ अविक्रियमाणेनेति ॥ विकाराणां विशेषणभूतचिदचिद्गतत्वादविक्रियमाणेनैवात्मना
सृजामीत्यर्थः ॥ मृत्पिंडादिकं तु स्वभिन्नेन कुलालादिना घटादिरूपेण सृज्यत इति ततोस्य वैलक्षण्यसिद्धिः ॥ आत्मनैवात्मानं सृजामीति तत्तेन विशेष
विकाराभ्यामुपादानत्वं निमित्तत्वं चैतस्मात्कं भवति ॥ अविक्रियमाण इति सन्तस्यं तथावस्थस्मिन्विशेष्यभूते विक्रियमाणस्वरूपस्वभावाभ्यामवि
क्रियमाणेस्त्वेवविशिष्टमात्मानं स्वेनैव सृजामीत्यर्थः ॥ नन्वेकस्यैव पदार्थस्य निमित्तत्वमुपादानत्वं च परस्परविरुद्धमिति चेन्नैकस्योभयविधक

ऊरवबोधःस्वततवायं विहारयोगो यदशरणोऽशरीरः इदमनपेक्षितास्मत्समवाय आत्मनैवाविक्रियमाणेन
सगुणमगुणः सृजसि पासि हरसि ॥२॥

रणात्वप्रतिक्षेपकेरपिक्वचिदेकस्मिन्नेवतदुभयविधं कारणं भवति तथापि स्वयमेव समवायिकारणं भवति ॥ स्वज्ञानादीन्प्रतिकार्य्यं यत्र सर्वैर्वेतितत्स
मवायिकारणमिति समवायिकारणत्वं तदणस्य स्फुटोपलंभात ॥ किं चेश्वरोपि सर्वव्यापकस्य सर्वैरपि परिमाणवादिभिः ॥ संयोगस्वयमेव सृज ति
सर्वकार्यहेतुत्वात्तथा च तत्र कर्तृत्वेन निमित्तकारणं भवति समवायिकारणत्वमपि तस्येति तस्यवृपपत्ते परमाणवादिभिः संयोगस्येश्वरसंयोगापे
क्षत्वात्तेन यथा कर्तृत्वं समवायिकारणत्वं चेश्वरनिष्ठमेव भवन्मते भवति ॥ तथास्मत्सिद्धांतेनिमित्तत्वमुपादानत्वं चैकवस्तुनिष्ठमिति ॥ नन्वेवमपि नवि
शिष्टस्योपादानत्वं क्वापि दृष्टमिति चेल्लोकेनाभिज्ञमतीनां दृष्टांततान्त्स्थूलेनाभेदेहस्यैवावस्थाद्यापत्तिर्नोपि केवलात्मन्यपि तु देहविशिष्टात्मन
नीतिलोकोपलंभः ॥ श्रुतिस्वयपयोर्णनाभिमवशेसृजतेगृह्णतेचेत्यूर्णनाभिदृष्टांतं तेन दर्शयति ॥२॥

भा॰ ४ भोक्तृत्संज्ञायामिति सूत्रभाष्ये पदे तत्संज्ञाविधीयते तत्र न संज्ञायामित्यर्थः ॥ किं तर्हि तत्तत्कार्यविशिष्टेन स्वे तत्संज्ञागमस्ततस्त्यर्थः इत्युक्तं ॥ अतएव रघुनाथ
४५ रामानुजादिप्राद्वेषुतरातं ॥ नहि तत्र कृततया तेन संज्ञावगतिः ॥ किं तर्हि कृततएणत्वेन ॥ किंचानादिव निप्रकृतसंज्ञास्य तेतुयपा विनियुक्तानामेव साधुत्वमि-
ति रघुनाथादीनां वाभावो ध्वपरिमाणसंज्ञातगच्छति शाद्वेनन लोपः ॥ अन्यथा संज्ञात्वं गापतेरित्यस्य त्र विस्तरः वासुदेव सर्वभूताधार इत राम पेत्तजगदा
धारस्व समानरहितलोकनाथ सर्वेषां ब्रह्मादीनाथ सर्वेषां ब्रह्मादीनामपीशानियंतः ॥ लक्ष्मीनाथ श्रियः पतेः परमहंसाः ज्ञानिनः परिव्राजकाः संन्यास
धर्मनिष्ठा ज्ञानयोगकर्मयोगनिष्ठा इत्यर्थः ॥ तैः परमेणोत्कृष्टेनात्मसमाधियोगेन परमात्मविषयकध्यानयोगेन परिभावितः संदीपितः अतएव परिस्फु
टः प्रसन्नतापत्रोयः परमहंसधर्मो भगवद्भक्तियोगरूपो धर्मः तेन छादितं निर्मलितं तमः कपाटं तमः अनाद्यविद्यात्मकमज्ञानं तदेव कपाटं परमात्म
दर्शनविरोधि यस्य तद्द्वारं परमात्मदर्शनसाधनं चितं यस्मिन्नात्मलोके आत्मैव लोकः लोकनीयः इति लोकः परमात्मा द्रष्टव्यकृमित्वत्वेन जीवस्यापि लो
कनीयत्वात् तस्मिन्नात्मलोके पावृत आवरणरहितः उपलब्ध इत्यर्थः ॥ कथमावृतः ॥ स्वयमुपेत्य स्वयमात्मनैव कृत्स्नः नित्योदितो यो निःसुखानुभवः निज ।
नंदरूपो नुभवो ज्ञानतद्रूपः नित्यनिरुपाधिकाविर्भूतो परिच्छिन्नज्ञानानंदानुभवरूपत्वेनापावृत इत्यर्थः ॥ एवंभूतोपि तवात्मत्व विहारयोगः लीलारूपो
योगः जगद्व्यापाररूपो योगः जगदनंतं संकल्पमात्रं निष्पाद्य तत्स्थापनाय समाधिनरूपसंकल्पापरपर्याययोगपदं प्रयुक्तं ॥ जगद्व्यापारस्य कर्मापत्त के व
लं लीलारूपत्वख्यापनाय विहारपदं सपणविहारयोगाद्दुरवबोधत्व हेतु योगदृष्टेमृत्कुलालादिव्यापारजातीयत्वेन वाङ्मणाक्य इव वर्तते एवण हे
नसर्वज्ञस्य सर्वशक्तेस्तव उपपन्न एवेति स्यात् दुरवबोधकत्वमेव विशदयति यत्त्वमिदं विश्वमणारणं मनपेक्षितत्वयतिरिक्ताश्रयं सृजसि कुलालादे: ला
र्घटादीन्सृजतः तु स्वतलादिरूपः कश्चिदाधारोपेक्षित इति भावः ॥ त्वं तु स्वस्मिन्नेवाधारभूते सृजसीति भावः ॥ किंच सहायमनपेक्ष्य समवायसहायः अ
सदादिसहकारिसमुदायनिरपेक्षः कुलालादिस्तु सहकारिसमवायसापेक्ष इति भावः किंचात्मगुणः गुणत्रयरहितः कुलालादिस्तु सत्वादिगुणयुक्त इति भावः
ननु विशिष्टस्य कारणत्वांगीकारात् कथं कुलालादिवैलक्षण्यापादकमगुणत्वमत इति चेन्न विशिष्टस्योपादानत्वाभ्युपगमेपि प्रकृतिपुरुषाभ्यामुत्कृष्टस्य रामः
विशेष्यब्रह्मणो निमित्तत्वाभ्युपगमेपि द्विपोष्यांशे च सत्वादिगुणत्रयाभावान्नैर्गुण्यं कुलालादिवैलक्षण्यापादकमेव एवं कुलालादिनिमित्तकारणवैल ४५

ततः यज्ञो दीयेवाव यस्मात् यदाराधनरूपत्वेन यज्ञस्य सार्वात्म्यं तत्स्थिरफलसाधनता भवतीत्यर्थः ॥ अन्यथा त्वस्थिरफलसाधनतेति भावः वयसे
स्वराधनस्य तद्यज्ञावयवस्थानोपयुक्ताः पुः पदाय उत्तरेषु यज्ञादिफलदानेनानिष्ठनिवारणेन च रत्नाकरायमात चक्रायपणतरत्ना विलंवासह्यनेनसद
वतसु दर्पोनापत्पुप्रकल्पतयेस्मरणामात्रनिरस्तमहाभयो दारनाम्नेनमः पदाहृतिर्हिरणमेदाभिप्रायाः ॥ ३० ॥ तिस्टणां स्वर्गाय वर्गनरकाणां ईशितुः निर्वाह
कास्यदातुस्तेनैवपरमं पदक्रांतिपुरुषदिलक्षणात्वुपक्रष्टपदस्वरूपं विसर्गस्यावोचिनः स्पष्टः पाप्यात्स्यः ॥ कार्यमतः ॥ वत्सष्टः तदाहित ज्ञानशक्तिर्महेश
प्रधान हेधातः वेदितुं नार्हति ॥ ३१ ॥ अपव्रतकृतये अस्य नेनामि वेते जैमिव दसाधारणैर्नामभिस्तंसं वोधयंतो नार्वाचीनो हेति वेदितुमित्युक्तं दुर्ज्ञेयत्व

यतो गतिं नोति स्टणामीशितुः परमं पदं नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति ॥ ३१ ॥ ॐ नमस्ते भगवन्नाराय
णवासुदेवादिपुरुषमहापुरुषमहानुभावपरममंगलपरमकल्याणपरमकारुणिककेवलजगदाधार
लोकैकनाथसर्वेश्वरलक्ष्मीनाथपरमहंसपरिव्राजकैः परमेणात्मयोगसमाधिनापरिभावितपरिस्फुट
पारमहंस्यधर्मेणोद्घाटिततमःकपाटद्वारे चित्ते अपावृते आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान्

निमित्तामाश्रयणीयत्वमुक्त्वा कांयोगपरिशुद्धमनो आद्यत्वकल्पनेन निराकुर्वंतो यज्ञवीर्याये त्यनेन उक्तजगद्व्यापारस्मरत्कुलालादिव्यापारवैजात्यं स्त्वा
त्मरूपतामि दर्शयंतः कारणांतरानपेक्षस्वेष्ठात्वकपयुक्तगुणायोगित्वं च वदंतस्तु वंति ॥ ॐ नम इत्यादिना पापामिहरसि चेत्यंतेन गद्येन ॥ ॐ मित्यसाधारणा
भगवतो लक्षणेनामर्वे तत्स दितिनिर्देशो ब्रह्मणस्त्रिविधः स्मृतः इति भगवद्गीते ॥ तथा भगवन्नारायणादिशद्वा अपि ॥ भगवन्षाड्गुण्यपूर्णेनिनारायण
नारं जीवसमूहस्तस्याश्रयनमाप्यः व्यापक आधारस्वरूपस्य संवोधनं नारायणप्रावृण्ययोगरूढिभ्यांचित्त्वसाधारणः तव केवलयोगेन रूढ्र परत्वम
पि प्राक्तिरुपेक्त रूढ्यभावेन सर्वे पदात्संज्ञायामगइतिणत्वाभावप्रसंगात ॥ न च विद्रुपरत्वं गीकारेण संज्ञापरत्वाभावान्मतेपि नणत्वमितिवाच्यं श

भा.पु.
४४

त्वमनेनैव चराचराणां भूतानि सर्वाणि भगवद्वपुरतस्तदानुकूल्यं स्वंसंस्तु करीत्या भगवच्छरीरभूतानुकूल्यमयत्नात्मनोऽप्रदर्शितं॥ न च सर्वभूतानुकूल्यस्याभि
प्रेतत्वे शत्रुनिरसनतत्पार्थनानुपपत्तिः॥ नैवमस्याः प्रपत्तेर्मोघत्वाभावात्॥ तस्मादेव हि सर्वभूतानुकूल्यरूपमंगमपेक्षितं॥ अस्मात्कृपा शत्रुनिरसनार्थे वा॥
व्यतिरिक्तभूतानुकूल्यसंकल्पमात्रमेवापेक्षितमित्यस्य प्रपत्तुर्विचक्षणात्॥ २६॥ एवं सुरैः प्रपद्यमानो भगवानाविरभूदित्याह मुनिः॥ इतीति हे महाराज इ
तीत्थं सुरगणां देवानामुपतिष्ठतां प्रपद्यमानानां कृतां सर्वां शंखचक्रगदाधरो भगवान्प्रतीच्यं प्रत्यगात्मसंवेधिस्यांहृत्पिक्रदयेकच्छयात्माप्रतितिष्ठि
तस्तितिष्कृते॥ प्रथमं क्ष्याविरभूत्ततः पुरतश्चाविरभूदित्यर्थः॥ यद्वा प्रतीच्यां पश्चिमायां दिशि तस्यार्थः॥ देवानामप्यक्षत मतियावत्॥ २७॥ तमाविर्भूतं भगवं

श्रीशुक उवाच॥ इति तेषां महाराज सुराणामुपतिष्ठतां॥ प्रतीच्यां दिश्यभूदाविः शंखचक्रगदाधरः॥ २७॥
आत्मतुल्यैः षोडशभिर्विनाश्रीवत्सकौस्तुभौ॥ पर्युपासितमुन्निद्रशरदंबुरुहेक्षणं॥ २८॥ दृष्ट्वातमवनौ स
र्वे ईक्षणाह्लादविक्लवाः॥ दंडवत्पतिता राजञ्छनैरुत्थाय तुष्टुवुः॥ २९॥ देवा ऊचुः॥ नमस्ते यज्ञवीर्याय वयसे उत
ते नमः॥ नमस्ते ह्यस्तचक्राय नमः सुपुरुहूतये॥ ३०॥ तं विशिनष्टि आत्मेभ्यां श्रीवत्सकौस्तुभौ विना आत्मना सदृक्तुल्यैः श्रीवत्सकौस्तुभमा
त्ररहितैरित्यर्थः॥ तयोः प्रधानपुरुषत्वाभिमानित्वात्तज्जीवेनाधार्यत्वादिति भावः॥ षोडशभिः सुनंदादिभिः पर्युपासितं यद्वा भगवानाविरभूच्छंखचक्रगदाधर
तमाविर्भूतं प्रतीच्यां दिशि दृष्ट्वा तं श्रीवत्सकौस्तुभमात्ररहितैरात्मतुल्यैः षोडशभिः पर्युपासितमिति वान्वयः॥ उन्निद्रो विकसितेशरदंबुरुहे इव रक्षणे नेत्रे य
स्य॥ २८॥ तं दृष्ट्वा ईक्षणेन यनाह्लादस्तेन विक्लवाः ईषत्परवशाः सर्वे देवा भूमौ दंडवत्पतिताः॥ प्रणेमुः॥ हे राजञ्छनैरुत्थाय तुष्टुवुः॥ २९॥ स्तुतमेवाह नमस्ता
दिना॥ तावत्सर्वस्य स्वस्वाराध्याय प्रदं ज्ञाता रं प्रणतरक्षा विलंबास हिष्णुनाममात्रस्मरणनिरस्तमहाभयं स्वर्गादिप्रदं प्राङ् मनसापरिच्छेद्यस्वभावं नम
स्कुर्वंतः स्तुवंति नमस्ते इति द्वाभ्यां॥ यज्ञः वीर्यं सृष्टिहेतुः सामर्थ्यं यस्य यज्ञाद्भवति पर्जन्यस्तस्मात्प्रकारेणायज्ञमुखेन प्रजाः सृजतेत्यर्थः॥ यद्वा वीर्यप्रकाशशीर्याघ

एम:
४५

किंचवयंमायावतारस्थैःपालितास्च इदानीमप्यस्मान्नोपेक्षिष्यत एतमेव शरणं व्रजाम इत्याह ॥ यएकइति त्रिभिः ॥ एको द्वितीयः स्वसमानाधिकरणं तत्रापे
तोतिक्रमायया ॥ आत्मीयसंकल्परूपज्ञानेन यः परमपुरुषो नोस्मान् ससृजे येन भगवतानुगृहीताः संतो वयं विश्वं व्यष्टिसर्गं सृजामः करवामः यद्व्यष्टीनां
तमेवेतिरतीयेनान्वयः यस्य च परः कृदयकुहरे समीहतः ॥ त्वंतरामतयानियमतो लिंगं दिव्यविग्रहं न पश्यामः तत्र पश्यामः ॥ तत्र हेतुः ॥ पृथगीशमानिन
यतः पृथगीश्वराः स्वाभिमानिनो वयं ॥ २४ ॥ यो नः सपत्नैः प्राकृतैः भृशं नितरामभ्यर्द्यमानान् पीडितान् अस्मान् पातिरक्षति तु ॥ कथंभूतः नित्यं सदा एवास्माका
स्माकं वा स्वकीयत्वेन मन्यमानोस्मद्रक्षणाय युगे युगे प्रतियुगं स्वकीयसंकल्परूपज्ञानेनैव न तु कर्मणेति भावः ॥ तनुरूपैंश्च परशुराममत्स्यकूर्मवराहरामकृ
ष्णादिभिर्देवादिषु कृतावतारः कृतावतारः सन् ॥ २५ ॥ तमेव भक्तवत्सलमात्मनामस्माकं दैवतं प्रधानं पुरुषं कारणावस्थचिदचिच्छरीरकमन्यं चिदचिद्विलक्ष

णं हृदयं यस्यापि परः समीहतः पश्याम लिंगं पृथगीशमानिनः ॥ २४ ॥ यो नः सपत्नैर्भृशमर्द्यमानान् देवर्षितिर्यङ्नृ
षु नित्य एव ॥ कृतावतारस्तनुभिः स्वमायया कृत्वात्मसात्पाति युगे युगे च ॥ २५ ॥ तमेव देवं वयमात्मदैवतं परं प्रधानं
पुरुषं विश्वमन्यं ॥ व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्यति शं महात्मा ॥ २६ ॥

णं परमुत्कृष्टमतएव शरण्यस्य शरणमर्हतीति
तितं सर्वे वयं देवाः शरणं व्रजाम रक्षकत्वेनाध्यवस्यामः ॥ एतावदेवास्माकं कृत्यमिति भावः ॥ तत्र शरण्यत्वं कृतं पंचकार्यं यतः प्रारणागतस्यात्मनां महाविश्वा
सं च दर्शयति ॥ स्वानामिति स्वीयत्वेन परिगृहीतानां नोस्माकं शं सुखं शत्रुनिरसनद्वारकं दत्तं धास्यति स तु महात्मा कृतस्वभक्तरक्षणादीक्षः ॥ एवं रक्षिष्यती
ति विश्वासः प्रपत्त्यंगमुक्तो दर्शितः मनोक्तपारत्वेन गोप्तृत्ववरणं आत्मदेवतं प्रधानं पुरुषं विश्वं शरणं व्रजाम ॥ इत्यनेन चिदचिच्छरीरकत्वकथनाच्छरीरस्य
शरीरिशेषत्वैकस्वरूपत्वादात्मनः परमात्मैकशेषत्वानुसंधानरूपात्मनिक्षेपः न पश्याम लिंगं ॥ सपत्नैर्भृशमर्द्यमानानित्यनेन च ज्ञानशक्त्यभावाद्यभाव
रूपमात्मनां कार्पण्यमपि प्रदर्शितं ॥ तद्विनोपसर्पसपरं हित्वान्यविषयस्यनेनोपायांतरनिवृत्त्यादिरूपप्रातिकूल्यवर्जनं प्रदर्शितं ॥ कृत्स्नचिदचिच्छरीरका

भा॰ष॰ ४३

अथयमारण्यपत्वोपायकथनापूर्वकंतान्निंदंतिद्वाभ्यां तस्यैवशरणत्वंतदेतस्याशरणपत्वंचवदंतः शरणंयध्युः ॥ अविस्मितंस्वमहिम्नः स्वाभाविकत्वाद्विस्मयरहितंपरि
पूर्णकामंलब्धतेप्सितिलाभःस्वाभाविकेनैवलाभेनस्वानुभवानंदेनउपलक्षितंसमंरागादिराहितंप्रशांतंतस्मात्विषयरहितंयत्तेहिशरणपायुक्ताः गुणाः श्रोप्
याधिकमहिम्नोपरिपूर्णकामस्योपाधिकानंदयुक्तस्यरागाद्वेषादिव्याकुलस्यायुक्तस्यार्मिषहृपीडितस्यशरणागतिजुल्यत्वेनाशरणत्वान्नहिश्रे
यस्कित्वसतातहयामस्पशरणात्वजतिरवमीश्वरंशरणंपतंविनापरमन्यंकंचिद्देवंयोबालिशोज्ञःसउपसर्पत्यनुवर्तनेतेसःश्वलांगुलेनतत्तुल्यस्वमानस्पृस्नतः पुच्छेन
साधनेनसिंधुंसमुद्रमतिमतितितर्तिमिच्छतिश्वलांगूलेनसिंधुंतितीर्षुरिवनैवंप्राप्नोतिप्रत्युतविहतोभवतितिनचदिस्मर्थः ॥२२॥ यस्य

अविस्मितंतंपरिपूर्णकामंस्वेनैवलाभेनसमंप्रशांतं ॥ विनोपसर्पत्यपरंहिबालिशः श्वलांगुलेनातितितर्ति
सिंधुं ॥२२॥ यस्योरुश्रृंगेजगतींस्वनावंमनुर्यथाबध्यततारदुर्गं सएवनस्त्वाष्ट्रभयाद्दुरंतात्त्राताश्रितान्वा
रिचरोपिनूनं ॥२३॥ पुरास्वयंभूरपिसंयमांभस्युदीर्णवातोर्मिरवैःकराले ॥ एकोरविंदात्पतितस्ततारतस्माद्भया
द्येनसनोस्तुपारः ॥२४॥ यएक ईशोनिजमाययानः ससर्जयेनानुसृजामविश्वं ॥ यथामनुश्चतुर्मुखादयःशरणमाप

न्नाः त्रातारंभक्तवत्सलंमत्स्यावतारमाश्रित्यविपदस्त्रस्यवर्तततथावयमपितमेवापन्निवृत्तयेशरणंव्रजामइत्याहुः ॥ यस्येतिद्वाभ्यां ॥ यस्यमहामत्स्यस्य
उरुश्रृंगेजगतींपृथ्वीमेवस्वांनावंमनुःसत्यव्रताख्योदुर्गंसंकटंततार ॥ अत्रपमस्कंधेयमितिहासःस्फुटीभविष्यति सएवचाश्रितरोमत्स्यस्त
न्नोभगवानाश्रितानस्मानशरणागतानस्मान्नूनंदुरंतात्दुरंतात्त्वाष्ट्रस्यवृत्रस्यभयात्त्राताभविष्यत्यतः ॥ तमेवशरणंव्रजामइतिभावः ॥२३॥ त
थापुराजगदादौस्वयंभूर्ब्रह्मापिसंयमांभसिप्रलयसंबंधिनिजलेकंपमानस्तेउदीर्णोयोवातःपवनस्तेनयेऊर्मयस्तरंगास्तेषांरवैःध्वनिभिःकरा
लेभयंकरेसंयमांभसिअरविंदान्नाभिकमलात्पतितःपतितप्रायःएकःअसहायोयेनभगवताशाधनतततस्माद्भयात्ततारसएवनोस्माकंपारःपालः

ष॰ टी॰ ४३

वायुभिर्द्दैर्यस्यते न वायुवर्द्धितं निर्मितेन तपसा त्वष्टुस्तपसा येनेमे लोकास्त्रावृतास्तेन लोकावरणरूपवृत्तिनिमित्तेन वृत्त इति प्रोक्तः ॥ वृत्रशब्दवाच्यः सोऽसुरि
त्यर्थः ॥ तथा च श्रुतिः स इमांल्लोकानावृणोत्तद्वृत्रस्य वृत्रत्वमिति ॥ वृत्रस्य वृत्रशब्दप्रवृत्तिनिमित्तं तल्लोकावरणमेवेत्यर्थः ॥ स च पापः धर्मवृत्तिप्रत्तः लो॰
कपालविरोधित्वादिति भावः परमदारुणः दुःसहः ॥१७॥ तं वृत्रमभिद्रुत्याभिमुखमागत्य सगणाः ॥ ससैन्या विबुधर्षभा इन्द्रादयः स्वैः स्वैर्दिव्यानामस्त्राणां
शस्त्राणां चौघैर्निजघ्नुः प्रजह्रुः तानि दिव्यान्यस्त्रादीनि सर्वाणि वृत्रोऽग्रासीत् ॥१८॥ ततस्ते देवा विस्मिताः ॥ अहो एतस्य दुर्ज्ञेयत्वमिति विस्मिताः ॥ अ
होऽतस्मान्न तं वृत्रेणापहृतं तेजो येषां ते तत एव विषण्णाः खिन्नाः प्रत्यंचं प्रत्यगात्मशरीरकं प्रत्यग्दिग्गतं वा प्रतीच्यां दिशि प्राविर्भूतमिति तत्रैवाविर्भावस्य

येनावृता इमे लोकास्तपसा त्वाष्ट्रमूर्त्तिना ॥ स वै वृत्र इति प्रोक्तः पापः परमदारुणः ॥१७॥ तं निजघ्नुरभिद्रुत्य स
गणा विबुधर्षभाः ॥ स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोऽग्रसत्तानि कृत्स्नशः ॥१८॥ ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्त
तेजसः ॥ प्रत्यंचमादिपुरुषमुपतस्थुः समाहिताः ॥१९॥ देवा ऊचुः ॥ वाय्वंबराग्न्यप्क्षितयस्त्रिलोका ब्रह्माद
यो ये वयमुद्विजंतः ॥ हराम यस्मै बलिमंतकोऽसौ बिभेति यस्मादरणं ततो नः ॥२०॥

वक्ष्यमाणत्वात् ॥ आदिपुरुषं जग
त्कारणभूतं तं परमात्मानं समाहितचित्ताः संतः उपतस्थुः स्तुतुः त्रिभुवनस्य तेन व्याप्तत्वादन्यत्र गमनाभावात्तत्रैवास्थितत्वात्त्वांतरात्मानमुपतस्थुरिति भावः
१९ ॥ उपस्थितमेवाह ॥ वाय्वित्यादिना तावद्भीषास्माद्वातः पवते ॥ एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः ॥ एतस्य वा अक्षरस्य प्रशा
सने गार्गि प्राच्योऽन्या नद्यः स्यंदते इत्यादिश्रुत्युक्तरीत्या सर्वस्य प्रशास्ता तु ॥ परमात्मनः शासनानुवर्त्तिनामात्मनां तदनन्यशरणत्वं वदंतः स्तुवंति
अ वाय्वंबराग्न्यप्क्षितयस्त्रिलोकाः लोकत्रयांतर्गता ब्रह्मादयश्चतुर्मुखः प्रवृत्तयो ये च ते सर्वे वयं उद्विजंतः विभ्यतः संतो यस्मै
परमपुरुषाय बलिं तदाज्ञानुरूपमाराधनं वहामः आपर्यमः कुर्मः असौ प्रसिद्धोऽन्तकोऽपि मृत्युरपि यस्माद्बिभेति तस्मात्परमपुरुषादन्यः कोऽरणं शरणं
अ

[illegible] स्कं ४०

ततः त्वष्टा इंद्रेण हतपुत्रो यस्य तादृशः इंद्राय शत्रवे जुहाव इंद्रो येन जिता दर्थे चतुर्थी तदर्थं मन्त्रतन्त्रविपर्यासस्य निवृत्ते रपि वाचकत्वात् यथा मध्या
कार्ष्णो धूम्रः स पाको भो धम मतिच इंद्रशत्रुविनाशाय मज्जुहोदित्यर्थः ॥ कृ तैवं प्रार्थितवानित्याह इंद्रशत्रो इति हे इंद्रस्य शत्रो माचिरं मा विलंबं विवर्धस्व विद्वि
षमिंद्रं जहि हे विनाशयेति ॥११॥ अथ होमांतरं अन्वाहार्यपचनात् दक्षिणाग्नेर्घोरदर्शनो असुरः उत्थितः उदितः तं विशिनष्टि यः लोकानां युगांतसमये कृत
पेकृतांत इव स्थितः ॥१२॥ तमसुरं दिने प्रति दिनं इषुमात्रं विष्वक् सर्वतो विवर्धमानं दग्धः संगारो यः शैलः सर्वतः तत्प्रतीकाशं तद्रूपं संध्या
भ्राणामनीकं समूहस्तद्वद्वर्चो यस्य ॥१३॥ तप्तताम्रवच्छिखा पनाणोपेयानि तादृशानि श्मश्रूणि यस्य मध्याह्नके यो र्कः सूर्यः तद्वदुग्रे लोचने य

हतपुत्रस्ततस्त्वष्टा जुहावेंद्राय शत्रवे ॥ इंद्रशत्रो विवर्धस्व माचिरं जहि विद्विषं ॥११॥ अथान्वाहार्यपचनाद्
उत्थितो घोरदर्शनः ॥ कृतांत इव लोकानां युगांतसमये यथा ॥१२॥ विष्वग्विवर्धमानं तमिषुमात्रं दिने दिने द
ग्धशैलप्रतीकाशं संध्याभ्रानीकवर्चसं ॥१३॥ तप्तताम्रशिखाश्मश्रुं मध्याह्नार्कोग्रलोचनं देदीप्यमाने
त्रिशिखे शूल आरोप्य रोदसी ॥ नृत्यंतमुन्नदंतं च चालयंतं पदा महीं ॥१४॥ दरीगंभीरवक्त्रेण पिबता च नभस्त
लं लिहता जिह्वयर्क्षाणि ग्रसता भुवनत्रयं ॥१५॥ महता रौद्रदंष्ट्रेण जृंभमाणं मुहुर्मुहुः ॥ वित्रस्ता दुद्रुवु
र्लोका वीक्ष्य सर्वे दिशो दश ॥१६॥

स देदीप्यमाने त्रिशिखं शिखा यस्मिन् तस्मिन् शूले रोदसी द्यावापृथिव्यौ तदंतर्वर्ति प्रपदार्थजात
मित्यर्थः ॥ आरोप्य नृत्यंतं उन्नदंतं उच्चैर्ध्वनंतं पदा पादेन महीं चालयंतं कंपयंतं ॥१४॥ दरीवत्पर्वतगह्वरमिव गंभीरवक्त्रेण किंभूतेन नभस्तलं
पिबता आस्येन किं च जिह्वया ऋक्षाणि नक्षत्राणि लिहता आस्वादयता कुर्वता भुवनत्रयं ग्रसता ॥१५॥ रौद्रा भयंकरा दंष्ट्रा यस्मिन् महता विपुलं
नैव कृतेन वक्त्रेण मुहुर्जृंभमाणं वीक्ष्य वित्रस्ता भीताः सर्वे लोका दश दिशः प्रति दुद्रुवुः ॥१६॥

तस्य यत्सोमपीथाख्यं शिरस्तत् कपिंजलः पक्षिविशेषः आसीत् सुरापीथाख्यं कलविंकाख्यः पक्षी आसीत् यदन्नाद्यं तत्तित्तिरिः ॥ पक्षी आसीत् यदपि
यद्यपीश्वरः ब्रह्महत्यां वारयितुं समर्थोपि ब्रह्महत्यां तन्मूर्तिमंतं पापमंजलिना जग्राह ॥ ५ ॥ संवत्सरपर्यंतं हे ब्रह्महन्निति संबोधयतां भूतानां भूता
नामा विशुद्धये तीर्थपादोत्तरं तत्राप्ययमेवार्थः मध्ये आत्मनो विशुद्धये स्वतः क्रोशनिवृत्तये भूम्यादिभ्यस्तत्पापं चतुर्धा व्यभजद्धरिरिंद्रः चतुर्धा विभज्य
भूम्यादिषु चतसृषु एकैकं भागं निहितवानित्यर्थः ॥ ६ ॥ तत्र ब्रह्महत्यायास्तुरीयं चतुर्थं भागं भूमिः खातपूररूपेण जग्राह ॥ खातस्य गर्तस्य पूरणं त्र्यथा
संवत्सरेण पूरणं तेन वरेण यदि मे खातः स्यात्तर्हि तस्य पूरणं भवति इति एवं रूपेण वरस्य ग्रहणपूर्वकं जग्राहेत्यर्थः ॥ भूम्याय ब्रह्महत्याया रूपं तदीरिण

सोमपीथं तु यत्तस्य शिर आसीत्कपिंजलः ॥ कलविंकः सुरापीथमन्नादं यत्स तित्तिरिः ॥ ५ ॥ ब्रह्महत्या-
मंजलिना जग्राह यदपीश्वरः ॥ ५ ॥ संवत्सरांते तदघं भूतानां स विशुद्धये ॥ भूम्यंबुद्रुमयोषिद्भ्यश्चतुर्धा व्य-
भजद्धरिः ॥ ६ ॥ भूमिस्तुरीयं जग्राह खातपूरवरेण वै ॥ ईरिणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते ॥ ७ ॥ तुर्यं छेद-
विरोहेण वरेण जगृहुर्द्रुमाः ॥ तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते ॥ ८ ॥ शश्वत्कामवरेणांहस्तुरीयं ज-
गृहुः स्त्रियः ॥ रजोरूपेण तास्वंहो मासि मासि प्रदृश्यते ॥ ९ ॥ द्रव्यभूयोवरेणापस्तुरीयं जगृहुर्मलं ॥ ता-
सु बुद्बुदफेनाभ्यां दृष्टं तद्धरति क्षिपन् ॥ १० ॥ हतपुत्रस्ततस्त्वष्टा जुहावेंद्राय शत्रवे ॥ इंद्रशत्रो विवर्ध-

स्वमानाविंज दिवि द्विषां ॥ भस्मरूपेण दृश्यत इत्यर्थः ॥ ७ ॥ तथा ब्रह्महत्यायास्तुरीयं भागं द्रुमाः छेदरोहेण वरेण जगृहुः छिन्नस्य देशस्य पुनः प्ररो-
हणरूपेणेत्यर्थः तेषु द्रुमेषु निर्यासरूपेणाद्यापि ब्रह्महत्या प्रदृश्यते ॥ ८ ॥ स्त्रियो योषितः शश्वत्कामवरेण सर्वदा संगमयोग्यवरेणांहसः ब्रह्महत्या-
याः तुरीयं चतुर्थं भागं जगृहुः तासु स्त्रीषु रजोरूपेणांहः पापं मासि मासि प्रदृश्यते ॥ ९ ॥ आपस्तु द्रव्यभूयोवरेण द्रवाधिक्यरूपेण हत्यायास्तुरीयं मलं पापं जगृ-

भा.ष.
४२

काले नयागमनकाले शृणुयाद्य आदृत कर्तरि क्तः ॥ आदरयुक्तः धारयति वा तं सर्वाणि भूतानि कुष्मांडादीनि नमस्यंति सर्वतो भयात् मुच्यते ॥ ४१ ॥ एतत्क-
तुमिंद्रो विश्वरूपादेतां विद्यामधिगतः प्राप्तः सन्मृधे युद्धे असुरान्दानवान्विनिर्जित्य त्रैलोक्यलक्ष्मीं बुभुजे बभूव ॥ ४२ ॥ इति षष्ठे ८मः ॥ ८ ॥ एवं देवैः
पुरोहितत्वेन वृतः ॥ तत्प्रियं कुर्वन्नपि विश्वरूपोऽसुरपक्षपातं यद्दिनमिष्यध्वमुतास्य कर्मेति ब्रह्मणा सूचितमकरोदिति वक्तुमुपक्रमते त्रिभिः ॥ तस्य वि-
श्वरूपस्य देहे भारस्य त्रीणि शिरांस्यासन्बभूवुः ॥ तत्रैकं शिरः सोमपीथं सोमस्य पीथः पानं यस्य सोमं पिबतीति सोमपीथमित्यन्वर्थं नाम ॥ तथा सुरापीथमन्य-

ष्ठास्य प्राचीमरक्षत्सांख्यात्माधामसत्वमन्ववगात् ॥ ४० ॥ य इदं शृणुयात्काले यो धारयति चादृतः ॥ तं नमस्यंति भू-
तानि मुच्यते सर्वतो भयात् ॥ ४१ ॥ एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ॥ त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य
मृधेऽसुरान् ॥ ४२ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे वैराम्याराधर्मोपदेशोऽष्टमोऽध्यायः ॥ ८ ॥ श्रीशुक उवाच ॥
तस्यासन्विश्वरूपस्य शिरांसि त्रीणि भारत ॥ सोमपीथं सुरापीथमन्नादमिति शुश्रुम ॥ १ ॥ स वै बर्हिषि देवे-
भ्यो भागं प्रत्यक्षमुच्चकैः ॥ अददद्यस्य पितरो देवाः सप्रश्रयं नृप ॥ २ ॥ स एव हि ददौ भागं परोक्षमसुरान्प्रति ॥ य- श्री
जमानोऽवहद्भागं मातृस्नेहवशानुगः ॥ ३ ॥ तद्देवहेलनं तस्य धर्मालीकं सुरेश्वरः ॥ आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रु-

च्छिरः अन्नमत्ति अन्नादमिति तत्तृतीयं शिर इति शुश्रुम वयमिति शेषः ॥ तथा च श्रुतिः विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीत्स्वस्रीयोऽसुराणां तस्य त्रीणि शीर्षाण्य-
सन्सोमपानं सुरापानमन्नादनमिति ॥ स विश्वरूपो वै बर्हिषि यज्ञे प्रत्यक्षं प्रकटं यथा तथा सविनयं देवेभ्योऽहविर्भागमिंद्रायेदमग्नय इदमित्युच्चैर्ददत् तस्य हेतु-
र्यस्य पितरो देवाः ॥ स विश्वरूप एवासुरान्प्रति परोक्षं यथा भागं ददौ तदेवाह देवान्यजमानोऽसौ विश्वरूपः मातृपक्षीयस्नेहो मातुलेषु तद्वशं गतः ॥ अ-
सुरान्प्रति भागमवहत्प्रापयत् ॥ ३ ॥ तद्विश्वरूपस्य शीर्षाणि शिरांसि क्रोधेनाच्छिनच्चिच्छेद ॥ ४ ॥ ४२

क्ष्यवन्निति ॥ हे मघवन्निदं नारायणात्मकं वर्म तुभ्यमाख्यातं मयेति शेषः कथंभूतं येन कर्मणा दंशितः ॥ कवचितः अंजसा सुखेनैवासुरयूथपा
न्संग्रामे विजेष्यसि ॥३४॥ एतद्वर्म धारयमाणश्चानुसंदधत्सन्मानवः यं यं पुरुषं चक्षुषा पश्यति तथा वा पदा पादेनाप्यवज्ञयापि संस्पृशेत्स भीतः सा स
ध्वसाद्भयाद्विमुच्यते ॥३५॥ इमां तु मंत्रविधां नारायणवर्मरूपमंत्रविद्यां धारयतः पुंसः कुतश्चिदपि कर्हिचित्परराजादिभ्यो व्याघ्रादिभ्यश्च भयं न भवे
न्न विद्यते निर्भयो जायते इत्यर्थः ॥३६॥ एतद्विद्याप्रभावसत्त्वकं कंचिदितिहासमाह ॥ इमामिति सार्द्धैस्त्रिभिः ॥ पूर्वस्मिन्काले कश्चित्कौशिकः कौशि
कगोत्रजो द्विजः ॥ इमां विद्यामधारयत् ॥ सच योगधारणया स्वपार्ष्णिना पीड्य गुदमित्यादिना द्वितीयस्कंधोक्तया स्वशरीरं मरुधन्वनि निरुदकदेशे

मघविन्नदमाख्यातं वर्म नारायणात्मकं ॥ विजेष्यस्यंजसा येन दंशितोसुरयूथपान् ॥३४॥ एतद्धारयमाणस्तु यं यं
पश्यति चक्षुषा ॥ पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते ॥३५॥ न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् ॥ रा
जदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ॥३६॥ इमां विद्यां पुरा कश्चित्कौशिको धारयन्द्विजः ॥ योगधारण
या स्वांगं जहौ स मरुधन्वनि ॥३७॥ तस्योपरि विमानेन गंधर्वपतिरेकदा ॥ ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्ष
यः ॥३८॥ गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शिराः ॥ स वालखिल्यवचनादस्थीन्यादाय विस्मितः ॥३९॥

जहौ तत्याज ॥३७॥ तत्र तस्य कौशिकस्य देहस्योपरिष्टाच्चित्ररथाख्यः कश्चिद्गंधर्वाणां पतिः स्त्रीभिः परिवृतः विमानेन कदाचिद्ययौ ॥ यत्र द्विजस्य तयोदे
हस्त्यागः तत्र चित्ररथो विमानसहितो गगनादवाक्शिरा अधोमुखः सद्यो न्यपतत् पुनरस्यापवालखिल्यऋषेः वचनात्कौशिकस्यास्थीनि
आदाय पात्यानिमत्वा प्राचीसरस्वत्यां नद्यां प्रास्य प्रक्षिप्य स्नात्वा विस्मितश्च अहो एतद्विद्याप्रभाव ईदृश इति विस्मितः स्वंधामन्वगादिति ३९
एवं विधानेकप्रभावशालिनो वर्मणः श्रवणधारणाभ्यां न कुतश्चिद्भयं भवती इष्टसिद्धिश्च भवतीत्याह ॥ मुनिः ॥ य इति द्वाभ्यां यः पुमानिदं वर्मका

भा॰ष॰
६

यदेतित्रिभिः यथाचायंतत्सदसच्चिदचिदात्मकंजगद्वस्तुतोभगवानेवभगवतोत्मकमेवात्रतुनविप्रतिपत्तिः यस्यपृथिवीशरीरंयस्यात्माशरीरंतत्र
तुप्रविश्यसच्चत्यच्चाभवदित्यादिश्रुतेरितिभावः॥ तथानेनसत्येनसत्यत्वेनाबाधितेनदृष्टांतेनतद्विषयप्रार्थनयानोस्माकंउपद्रवाः आपदःनाशंयांतु॥
स्मजगदात्मकत्ववत्तद्विषयप्रार्थनापिमिथ्याभवितुमर्हतीतिभावः॥३०॥यथाभगवानैकात्म्यानुभावेन कृत्स्नचिदचिदात्मकजगदेकांतरात्मत्व
कत्वभावेनविकल्परहितप्राकृतदेवमनुष्यादिनामरूपात्मकभेदरहितः॥स्वमाययास्वसंकल्पज्ञानेनस्वयमात्मनैवस्वेच्छयाननुजीववत्कर्मणे
त्यर्थः॥भूषणादीनवत्तेविभर्त्तिः॥ अत्रलिंगानिदिव्यविग्रहाआख्यारामकृष्णादीनिनामानियथाभूषणादीनिसत्यान्येवविभर्त्ति तथास्वविषयप्राम
पिप्रार्थनासत्यास्मसत्येत्यर्थः॥३१॥तेनैवसत्यमानेनसत्यत्वेनमीयतेप्रमीयतेनेनेतिमानंदृष्टांततेनसर्वैस्वरूपेणप्रपार्षदादिस्वरूपेणसर्वदा

यथैकात्म्यानुभावानांविकल्परहितःस्वयं॥भूषणायुधलिंगाख्याधत्तेशक्तीःस्वमायया॥३१॥तेनैवसत्यमाने
नसर्वज्ञोभगवान्हरिः॥पातुसर्वैःस्वरूपैर्नःसदासर्वत्रसर्वगः॥३२॥विदिक्षुदिक्षूर्ध्वमधःसमंतादंतर्बहिर्भ
गवान्नारसिंहः॥प्रहापयंल्लोकभयंस्वनेनस्वतेजसाग्रस्तसमस्ततेजाः॥३३॥

सर्वकालेषुसर्वत्रसर्वेषुदेशेषुसदा
सर्वावस्थासुचपातु॥३२॥एवंप्रार्थनायाःसत्यतांप्रतिज्ञायपुनःसिंहावलोकनन्यायेनश्रीनृसिंहंत्रातारंप्रार्थयंतेविदिक्ष्वितिविदिक्षुअग्न्यादिषुदिक्षु
प्राच्यादिषूर्ध्वायामधश्चदिशिशरीरस्यांतर्बहिश्चभगवान्नारसिंहः॥पात्वित्यनुषंगः॥तंविशिनष्टिस्वनेनमहाट्टहासेनध्वनिनालोकस्यभयंप्रहा
पयंप्रहापयन्नाशयन्स्वतेजसाग्रस्तान्याच्छादितानिसमस्तानितेजांसियस्ययोतेजांसियेनसः नतत्रसूर्योभातिनचंद्रतारकमितिश्रुत्यर्थोनेनाभिप्रेतः
॥३३॥एवमिंद्रायैदंनारायणवर्मोपदिश्यैतन्मंत्रप्रभावेनप्राकृतनविजेष्यसीतितदनन्यमपिसत्यभावमाहविश्वरूपइत्याह॥ रामः
६०

तीक्ष्णा धारा यस्य हे तीक्ष्णधार हे असिवर खड्गश्रेष्ठ त्वमीरितो भगवता प्रयुक्तः सन् मम रिपून् छिंधि छिंधि विशतं चंद्राः चंद्राकारा मंडला यस्मिन् हे शत
चंद्र चर्मन् खेटक अघवतां द्विषां वृद छादय पापचक्षुषां ग्रहदृष्टीनां च दृष्टिं हर ॥२५॥ महादिभ्यो यच्च भयं नोऽस्माकं भूतानि सर्वाणि भ
यानि भगवतो नामरूपाण्येवास्त्राणि तेषां कीर्तनात् ॥ यद्वा कीर्तनं स्मरणस्याप्युपलक्षणं भगवतो नाम्नां कीर्तनाद्रूपाणां दिव्यमूर्तीनामस्त्रा
णां च संदर्शनात् नाशं सद्यः प्रयांतु प्राप्नुवंतु ॥ तत्र केतवो धूमकेत्वादयः नरेभ्यो राक्षसः सरीसृपाः सर्पाणां स्वभावाः दंष्ट्रिणः सर्पादयः अत्र व्याघ्रनिपाय स्व
भावानि भूतानि तथा येऽन्ये श्रेयः प्रत्यूह प्रतीयका विघातकाः तेऽपि संक्षयं यांतु ॥२६ २७॥ स्तोत्राणि बृहद्रथंतरसामादीनि तेनु स्तूयंते स्तोत्राणि

वंति मम धारासिवरारिसैन्यमीशप्रयुक्तो मम छिंधि छिंधि ॥ चर्मं शतचंद्र छादय द्विषामघोनां हर
पापचक्षुषां ॥२५॥ यन्नो भयं ग्रहेभ्योऽभूत्केतुभ्यो नृभ्य एव च ॥ सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव वा ॥२६॥ स
र्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ॥ प्रयांतु संक्षयं सद्यो ये नः श्रेयः प्रतीपकाः ॥२७॥ गरुडो भगवान्
स्तोत्रस्तोभः छंदोमयः प्रभुः ॥ रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥२८॥ सर्वापद्भ्यो हरेर्नामरूपयानायु
धानि नः ॥ बुद्धींद्रियमनःप्राणान् पांतु पार्षदभूषणाः ॥२९॥ यथा हि भगवानेव वस्तुतः सदसच्च यत् ॥ सत्येनानेन
नः सर्वे यांतु नाशमुपद्रवाः ॥३०॥ एवं तेन स्तूयत इति तथा छंदोमयः छंदःप्रचुरः प्रभुः समर्थो भगवान् गरुडः स्तोत्रं छंदोमयः इति पाठे
स्तोभानि गीतपूरकाक्षराणि तद्युक्तानि स्तोत्राणि छंदांसि बृहद्रथंतरादीनि गीतानि स्वरभूतानि तत्स्वरूपः तदवयवत्वप्राचुर्येणानुसंधेय इत्यर्थः ॥ अशे
षापत्कृच्छ्रेभ्यो रक्षतु स्वनामभिर्विष्वक्सेनो रक्षतु ॥२८॥ तथा हरेर्नामादीनि च तथा पार्षदप्रवरा भूषणानि च मम बुद्ध्यादीन् पांतु ॥२९॥ एवं भगवन्नामरूप
त्वभूषणपार्षदादीनां रक्षकत्वेनानिष्टनिवर्तकत्वेन च संप्रार्थ्य तन्नामरूपादीनां तद्भिन्नत्वादिवचनं तद्विषयकशंकापनोदनाय सत्यत्वं प्रतिजानीते

भा॰ष॰ अपराह्ने श्रीवत्सचिह्न ईष्टे लक्ष्म्याः ईशः श्रीधरः पातु प्रत्यूषे असिधरः खड्गधरो जनार्दनः पातु अनुसंध्यं दामोदरः प्रपातु प्रभाते भगवान् कालशरीरको
३५ विश्वनियंता पातु अत्र केशवादिद्वादशमूर्तीनां मध्ये वामनत्रिविक्रमयोः मायावटुर्वामनोऽस्मात् त्रिविक्रमः स्वेव विजितरक्तकत्वेन प्रापितत्वात् तत्पौन
रुक्त्यं ॥ नारायणस्तैलतत्त्वे प्राप्य पृथग्विशेषविधिः स्यात् अत्र रवितत्त्वं प्राप्यते इति न पौनरुक्त्यं क्रमस्त्वविवक्षितः ॥ प्रातः प्रत्यूषप्रभातयोः द्वा मुहूर्तमधि
एव तन्मानादिनावयवप्रातःकालपराः ॥२१॥ अथ भगवतोऽस्त्राणि प्रविष्टनिरासकत्वेन प्रार्थयते ॥ चक्रमित्यादिना युगांतराग्निवत् तिग्मा तीक्ष्णा नेमि
र्यस्य तं च चक्रं भगवता प्रयुक्तं सत् दशरीरां संमेस्यं दंदग्धि अतिशयेन दहति अरिसैन्यदाहकत्वं तस्य स्वभाव एवेति तत्तत्स्थापनीयमिति प्रथमपुरुषनि

श्रीवत्सधामापरात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः ॥ दामोदरोऽव्यादनुसंध्यं प्रभाते विश्वेश्वरो भगवान्काल
मूर्त्तिः ॥२१॥ चक्रं युगांतानलतिग्मनेमि भ्रमत्समंतात् भगवत्प्रयुक्तं ॥ दंदग्धि दंदग्ध्यरिसैन्यमाशु कक्षं यथा वात
सखो हुताशः ॥२२॥ गदेऽशनिस्पर्शनविस्फुलिंगे निष्पिंढि निष्पिंढ्यजितप्रियासि ॥ कुष्मांडवैनायकयक्षर
क्षोभूतग्रहांश्चूर्णय चूर्णयारीन् ॥२३॥ त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् ॥ दरेंद्र
विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कंपयन् ॥२४॥

दंदग्धि दह दह वातसखो वायुसखो हुताशनोऽग्निः कक्षं शुष्कतृणं यथेति अशनिवत् स्पर्शो येषां ते विस्फुलिंगा यस्यास्तस्याः संबोधनं हे गदे त्वं अजित
स्य भगवतः प्रियासि अतः त्वं च तस्य दासः अतः कुष्मांडादीन् निष्पिंढि निष्पिंढि आभीक्ष्ण्ये द्विर्वचनं अतिशयत्वद्योतनाय वीप्सायां वा पुनः पुनः
नितरां पेषय पेषयेत्यर्थः तथारीन् शत्रून् पुनः पुनश्चूर्णय हे दरेंद्र शंखवर त्वं पांचजन्य त्वं कृष्णेन भगवता पूर ॥२३॥ रितः भीमः भयंकरः स्वनो ध्वनि
र्यस्य तादृशः हृदयानि कंपय यातुधानादीनां ग्रहविशेषाः ये अन्ये च घोरदर्शनाः तान् विद्रावय पलायितान् कुरु ॥२४॥ ३५
प

तोऽन्तरात्मा येन येन जितं तद्वर्षीयो द्विपः प्रीतो ऽदिवनाहततोऽस्मद्विष्णुः पातु लोकाज्जनापवादाभयज्ञः विष्णुः यज्ञो वै विष्णुरिति श्रुतेः सर्वजनांतरा
त्मा पातु उत तत्र्यपि तत्कृतांतातेन जवनोहतोंन कूपघातत्स्माद्बलो वलमद्वः ३ जेन कृतोपघातस्तस्मात्पातु रुजंतादिति पाठे तु कृतान्तस्मो कलभद्रे
स्तु सहायान्वितसर्पः॥ क्रोधवशास्तप्यौत्वांगणादहीन्द्रः शेषः पातु॥१७॥ अप्रबोधादज्ञानाद्भगवान्द्वैपायनो ज्ञानदः पातु॥ अत्र नरदत्तसनत्कुमा
रदेवर्षिवलाहोद्वैपायनोऽत्रयावतारः जामदग्न्यकपिलधन्वंतरिऋषभास्त्वावेशावताराः इतरे पूर्णाः जीवविशेषत्वाविर्भावित्वावेशः॥ केचिद्व
द्धेः तदाश्याविभावित्वप्रशः प्रमादानोहजनकात्पाषंडानां गणात्तद्बुद्धः जगन्मोहपाषंडगणहाः कालमलभृतात्कलेः कलिकालमलहा प्रपातु

धन्वंतरिर्भगवान्पात्वपथ्यात्द्वंद्वाद्भयादृषभो निर्जितात्मा॥ यज्ञश्च लोकादवताज्जनांताद्बलो गणात्क्रोध
वशादहींद्रः॥१८॥ द्वैपायनो भगवानप्रबोधाद्बुद्धस्तु पाषंडगणात्प्रमादात्॥ कल्किः कलेः कालमलात्प्रपा
तु धर्मावनायोरुकृतावतारः॥१५॥ मां केशवो गदया प्रातरव्याद्गोविंद आसंगवमात्तवेणुः नारायणः प्रा
ह्ण उदात्तशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः॥१९॥ देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो मां दोषे
हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः॥२०॥ कल्किं विशिनष्टि धर्मावनाय धर्मरक्षणाय उरु महान्कृतः॥ अवतारो येन १८
अपथ्यात्काला दिकालेषु केशवादिमूर्तिभ्योऽरक्षाः प्रार्थमानेयामिति॥ केशवः गदयायुक्तः प्रातरव्यात् आत्तः धृतः वेणुर्येन सः गोविंदः आसंगवं संग
वकालमभिव्याप्य संगवउदयानंतरकालः उदात्ता उद्धृता शक्तिरायुधविशेषो येन सः नारायणः प्राह्णे पूर्वाह्णे अरींद्रश्चक्रराजः स पाणौ यस्य स वि
ष्णुर्मध्यंदिने पातु॥१९॥ उग्रं धनुर्यस्य स मधुहा मधुसूदनः स्वतेजसा दीप्यमानः अपराह्णः त्रीणि धामानि तेजांसि अभिव्यक्तिस्थानानि यस्य गामगिनं
वा सूर्याचैव [illegible] त्रीणि तेजांसि अत्र विवक्षितानि यद्वा त्रियोगिकादयती राधिरूपाणि त्रीणि धामानि स्थानानि यस्य स माधवः सायंकाले मां अवतु दो

[illegible] ८६
[illegible] २०

भा॰ ष
३८

अटव्यरण्यमाजिमुखं युद्धोपक्रमस्तदादिर्येषां तेषु दुर्गेषु संकटस्थानेषु प्रभुः समर्थोऽसुरसेनानायकानामरिर्नृसिंहः स्वभर इति भटविरसमनःशीलःपा
पातन्नसिंहरविशिनष्टि यस्य नरसिंहस्य महाट्टहासं विमुंचकः सतः दिशो विनेदुः प्रतिदध्वनुर्गर्भाश्च न्यपतंस्तद्भवंतु ॥१३॥ असोऽड्समिष्टो वराहमूर्त्तिः
मार्गेभिमुखमागतड्डक्कादिररणपालतस्य हंता मामध्वनि रक्षतु कथंभूतः यज्ञकल्पः यज्ञैः कल्प्यत इति तथा यज्ञावयवकल्पेनोपास्यत्वं दंष्ट्राकरणेन
उन्नीतोत्क्षिप्ता धरा भूमिर्येन ॥ अद्रिकूटेषु पर्वतशिखरेषु रामो जमदग्न्योऽद्रिकूटस्य दुष्कृतां हंता रक्षतु विप्रवासे परदेशगमनदशायां सल
क्ष्मणो भरताग्रजो दाशरथी रामः ॥ देशांतरस्थरावणादीनां हंता भिचारादिति रसनदमनामामव्यादक्षतु ॥१४॥ उग्रधर्मादभिचारादेरखिलात्प्रमादा
न्नारायणः अभिचारादिनिरसनदमनान्नृर्षिपुत्रः पातु ॥ हासात्कुर्वोन्नरः गर्वे इति नटः पातु दत्तो दत्तात्रेयः योगविरोधिनिरसनदमो योगमाद्यो
दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ॥ विमुंचतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च ग
र्भाः ॥१३॥ रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ॥ रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भर
ताग्रजोऽस्मान् ॥१४॥ मामुग्रधर्मादखिलात्प्रमादान्नारायणः पातु नरश्च हासात् ॥ दत्तस्त्वयोगादथ योगनाथः पाया
द्गुणेशः कपिलः कर्मबंधात् ॥१५॥ सनत्कुमारोऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात् ॥ देवर्षिवर्यः पुरुषार्चे
गविरोधिवर्गात्पातु ॥ अपेति पार्थेनांतरसंभाव्योरकमव्ययं ॥ योगनाथः योगेश्वराणां सिद्धगणानांईशः कपिलः ज्ञानप्रदानेन कर्मबंधनिरा
सकः कर्मबंधात्पापाद्व्यात् गुणायंतीति गुणाः प्रकृतिमहदादितत्त्वानां याथात्म्यविवेचनेन गणयिता रसेसांख्यास्तेईशः इतिवार्थः ॥१५॥ का
मदेवान्मदनात्सनत्कुमारोऽस्पृष्टकामः ॥ अवतु पथि देवहेलनं देवानांहेलनं परिहास तस्माद्धयशिराः वेदापहरणादिना चतुर्मुखादिदेवहेलनं कु
र्वतां मधुकैटभादीनां हंता मामवतु पुरुषस्य भगवतोऽर्चनमाराधनं तस्यांतराद्विच्छेदाद्देवर्षिवर्यः नारदः ॥ अविच्छिन्नभगवदाराधनपरैः पातु अ
शेषान्निरयान्नरकात्कूर्मो हरिः मित्ता त्रिविधान्नश्वन्नात्मव्यतानामुद्धारकः ॥१६॥ अपथ्यानान्नधन्वंतरिः भिषक्श्रेष्ठः पातु द्वंद्वाद्भीतोष्णादेः ऋषभः निर्जि ३८

एवं कृतेऽपि कस्मात्परमात्मानं ध्यायन्मंत्रमावर्तयेदित्याह ॥ आत्मानमिति ॥ परमात्मानं ध्यायेत् ॥ कथंभूतं ध्येयं ध्यातुं योग्यं प्याद्दशविग्रहविशिष्टस्य
ध्यानेन प्रसन्नो भवेत्तादृशमित्यर्थः ॥ षट्शक्तिभिर्ज्ञानशक्तिभिर्ज्ञानशक्तिबलैश्वर्यवीर्यतेजश्चाल्मकादिभिः शक्तिभिर्युक्तं कश्चिद्द्रकारभूताभिः का
वीर्यान्योगिनीभिर्युक्तं तथाष्टदलपद्मस्थितं युक्तं एवं विधं परमात्मानं ध्यात्वा ऽस्य वदनमारायणवर्मणिमं मंत्रमुदाहरेत् ॥ मंत्रविशिनष्टि विद्याज्ञानं तेजः
ताल्यतपसात्मकं विद्यादीनां मूर्तिरूपस्थितं विद्यादयो मूर्तिः शरीरं यस्येति वाक्यः ॥ सर्वज्ञानानां तेजसां तपसां चेतन्मंत्रापत्त्वात् वृज्ञानादिसनीति
रूपाणि मंत्रस्यर्थः ॥ १० ॥ ॐ नमो हरेभिति ॥ अवस्य नमः कुलं पूर्वमितस्याये न मंत्रा दवोंकारः ॥ अथ मंत्रार्थः गजेंद्ररक्षणाय प्रादुर्भूतं हयेवतार रूप
धीनारायणं गजेंद्रवद्विदितस्य रक्षणाय प्रार्थयते ॥ हरिशिति हरस्य प्रथितनामानीमिति हरिः ॥ मम सर्वतोऽरक्षां विदध्यात् कुर्यात् मंत्रएव स्वजाप
कोऽपि मुखेन महंति ॥ आत्मानं परमं ध्याये ध्येयं षट्शक्तिभिर्युतं ॥ विद्यातेजस्तपोमूर्त्तिमिमं मंत्रमुदाहरेत् ॥
ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे ॥ दरारिचर्मासिगदेषुचापपाशान् ॥ दधानोऽष्टगुणोऽष्ट
बाहुः ॥ ११ ॥ जलेषुमां रक्षतु मत्स्यमूर्त्तिर्यादोगणेभ्यो वरुणस्य पाशात् ॥ स्थलेषु मायावटुवामनोऽव्यात्त्रिविक्रम
खेऽवतु विश्वरूपः ॥ १२ ॥ कपृष्ठगतं प्रार्थयितव्यं स्वस्मिन् रोम प्रार्थयते ॥ कथंभूतः पतगेंद्रस्य गरुत्मतः ॥ पृष्ठे न्यस्तेऽंघ्रि
क्रिपद्मे ऽघ्रिपद्मे यस्य स तथा ॥ दरः शंखः अरिश्चक्रं चर्म खेटः असिः खड्गः दरादीन् दधानः बिभ्रत् अष्टौ गुणा अणिमादयो यस्य नित्यसिद्धेर्भृत
नित्यसिद्धिकारहृतपापत्वाद्यष्टगुणकोऽको वा ॥ अष्टौ बाहवो यस्य सः ॥ ११ ॥ एवं सामान्यतो रक्षाविधानं प्रार्थ्यायं जलस्थलादिप्रदेशभेदे
न रक्षणं प्रार्थ्यते ॥ मत्स्यादिमूर्तिधरं श्रीमन्नारायणं प्रार्थयते जले ॥ घातियादसां जलजंतूनां गणेभ्यः एवं वरुणस्य पाशात्तस्माज्जलचरजलक्षत
प्रतिभटः मत्स्यमूर्तिर्मांवा न जले प्रमारं रक्षतु स्थलेषु निर्जलप्रदेशे षु मायावटुर्वामनः स्वसंकल्पोपात्तवटुवामनरूपः ॥ स्थलजंतुकृतांशस्ता
मामव्यादक्षतु खेऽंतरिक्षे त्रिविक्रमः त्रयो विक्रमाः पदविक्षेपा लोकत्रयसमाहकाय यस्य तत एवं विश्वरूपः कृत्स्नविश्वव्याप्तरूपकं प्रांचरिष्ठ

[illegible] ९८

भी॰ध॰
३७

केशवसंबंधिकरन्यासमस्तकांगन्यासकरन्यासावाह पादयोरिति ॥ यद्यप्यत्र ऋषिछंदोदेवताबीजानि नोक्तानि तथाप्यस्य वसिष्ठो नारायणमंत्रत्वादस्याव
रसंबंधीन्यवतान्यस्थानीति संप्रदायः ॥ ॐमित्यादि योयं नारायणाष्टाक्षरो मंत्रस्तस्यौंकारादीन्यष्टाक्षराणि क्रमेण पादद्वयजानुद्वयोरुद्वयोदरस्थ
दयोरोभुजद्वयशिरःस्वष्टसु स्थानेषु सविंदुकानि प्रणवसंपुटितानि नमोंतानि विन्यसेत् ॥ ६ ॥ अथवापि व्यापकत्वाद्विपर्ययं न्यसेच्छिरःप्रभृति पाद
तिष्वष्टसु स्थानेषु क्रमेणौंकारादीन्यष्टौ न्यसेत् अस्यार्थः ॥ यद्वान्यद्वापि वेति भिन्नपाठसमुदायः पुनरप्येकः प्रथमं चतुष्पल्लवे तु क्ताद्धरात्तरसान्तत
स्वरूपानुष्ठानेन कथं कपोलकरन्यासमित्यत्राह प्रणवादीति ॥ प्रणवादिपकारांतानि पादप्राक्तराणि हस्तयोरंगुलिषु तर्जन्यादिषु चतुर्ष्वंगु
ष्ठयोर्द्वयोः पर्वणोश्च न्यसेदित्यर्थः तदित्थं ॐ नमः तर्जन्या दक्षिणांगुष्ठप्रथमपर्वणि न्यसेदिति ॥ ॐ नमो नमः ॥ तदंगुष्ठेन तर्जनी मध्यमपर्वणि मंत्रांतर

ॐ नमो नारायणायेति विपर्ययमथापि वा ॥ करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ॥ प्रणवादियकारांतमंगु
ष्ठपर्वसु ॥ ७ ॥ न्यसेद्धृदय ॐकारं विकासमनुमस्तके ॥ षकारं तु कवोमध्ये णकारं शिखया दिशेत् ॥ ८ ॥ वे
कारं नेत्रयोर्न्यस्य नकारं सर्वसंधिषु मकारमस्त्रमुद्दिश्य मंत्रमातिभवेद्बुधः सविसर्गं फडंतं तत्सर्वोद्देशाद्विनिर्दिशेत् ॥ ९ ॥

मध्यमांतयोः पर्वणोः क्रमेण वनमः परिवृढे तु तत्रापि द्वयं ॥ ॐ अं नमः ॥ मध्यमांगुलौ ॐ गं नमः ॥ अनामिकांगुलौ ॐ वं नमः कनिष्ठिकांगुलौ ॐ तें नमः ॥ वामांगुष्ठा
द्यपर्वणि तर्जन्या ॐ वां नमः ॥ तदंत्यपर्वणि ॐ सुं नमः तर्जन्यां तदंगुष्ठेन ॐ नमस्तन्मध्यमायां ॐ वां नमः ॥ तदनामिकायां ॐ यें नमः तत्कनिष्ठिकायामिति यथा
ययमर्थः ॥ ७ ॥ अथ विसृष्टस्वरन्यासमाह ॥ न्यसेदिति ॥ अस्य कंवर्णन्यासकल्पनेनैव मंत्रस्वरूपमप्युक्तप्रायमिति ह्यप्यक्तदत्तकं षकारणकारयोर्वि
श्लेषाद्धृदयस्तराणि प्रणवादीनि नकारांतानि क्रमेण धृदयमध्यगि स्थाने च सर्वसंधिस्थानेषु यस्तु विन्यसेत्ततो वशिष्टं मकारं सविसर्गं फडंतं ॐ मः फडि
ति कृत्वा सर्वदिक्षु प्रागाद्यासु छोटिकया छोटिकया प्रविनिर्दिशेत् ॥ तर्जन्यंगुष्ठयोः छोटिकया दिक्षु न्यसेदित्यर्थः ॥ एवं विधेन्यासे कृते सति श्रीमंत्रजा
पकः ॥ मंत्रमूर्तिर्मंत्रात्मा इति योस्पदेहाभवतीत्यर्थः ॥ यद्वा मंत्रास्मयमूर्तिर्भवेदुत मंत्रमयभावितात्मा स्वदेहमूर्तिर्भवेदित्यर्थः ॥ ८९ ॥ राम:
३७

विधेश्रंवीविद्यांजिघृक्षः प्रष्ठतिराजा ॥ यथेतिद्वाभ्यां ॥ सहस्राक्षोययावैस्त्रमाविद्ययागुप्तः वाहनैः सहितान्रिपून्सैनिकान् ॥ क्रीडन्निव विनिर्जित्य त्रि
लोक्याःसंपदंश्रियं बुभुजे तु वभुजे ॥ २ ॥ तन्नारायणात्मकं नारायणरूपं मंत्रं देवं तयोरभेदाध्यवसायेन नारायणात्मकमित्युक्तं यद्वा नारायणः त्रा
णताइतिपादोयस्यस त्त्वष्टा पौरोहित्यं त्रस्याता माममद्यहेभगवन्ब्रूहि उपदिश यये नदर्मेजायेन यया नदात ततायिनो जिघांसन्शत्रून्मृधे युद्धे जयदिंद्र
इतिशेषः ॥ २ ॥ एवमुक्तो मुनिर्वर्मोपदेशमुपक्रमते ॥ वृत इत्यादिनायावदध्यायसमाप्ति ॥ त्वाष्ट्रो विश्वरूपः पुरोहितत्वेन देवैर्वृतोनुपृच्छते इन्द्रायनारा
यणाख्यं वर्म इत्थं मंत्रमाह ॥ उपदिदेश तद्वर्मैकमनाः सन्निहितचित्तः त्वं शृणु उपदिशाम्यहमितिशेषः ॥ ३ ॥ उपदेशमाणमंत्रजपस्यांगस्तत्रशौचमा

राजोवाच ॥ यया गुप्तः सहस्राक्षः सवाहान्रिपुसैनिकान् ॥ क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियं ॥ १ ॥
भगवंस्तन्ममाख्याहि वर्म नारायणात्मकं ॥ यथाततायिनः शत्रून्येन गुप्तोजयन्मृधे ॥ २ ॥ श्रीशुक उवाच ॥ वृ
तः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ॥ नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥ विश्वरूप उवाच ॥ धौतांघ्रि
पाणिराचम्य सपवित्र उदङ्मुखः ॥ कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः ॥ नारायणपरं वर्म संनह्येद्भय आ
गते पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत् ५ ॥ सकथयन्नेवैकविश्वरूपो

पदिष्टक्रमेणमंत्रमुपदिशति ॥ धौतेति ॥ शुचिः ॥ कृतस्नानादिः धौतांघ्रिपाणिः पवित्रासितपादपाणिः पुमान्सदर्भपवित्रकरउदङ्मुखमुपविष्टः वा
ग्यवाग्यतः नियमितवाग्मंत्राभ्यां नारायणाष्टाक्षरद्वादशाक्षराभ्यां कृतः स्वस्यांगन्यासः करन्यासश्चयेनतादृशः मंत्राभ्यामिति विष्णुषडक्षर
व्याप्युपलक्षणं तस्यापिपूर्वसमानत्वात् ॥ ४ ॥ देवमतात्मनां कर्मभ्यस्त्राधिदैविकाध्यात्मिकेभ्यो भये आगते सति नारायणध्यानपूर्वकः नारायण
रूपनारायणप्रतिपादकं कवचं यद्वा नारायणउपदेशक्रमेणागतं नारायणमयं ततत्रागतस्त्याधिकारेमयट् चेतिमयट् ॥ वर्मेकवचवद्रक्षकत्वाद्व

र्मसंकंसन्नह्येच्छ्रीयाज्ञयेदित्यर्थः ५

भा॰ष॰
३६

निष्कान्तानां

अकिंचनानां शिलोञ्छं तु उञ्छः कणश आदानं कणशार्जनं शिलं इत्यमरः तत्र वर्त्तिसंपाद्यमेव हि धनं तेनैव तु कान्या तरे रौरवनिवर्त्तितानि स्याद्दिताश

क्रियापंचमहायज्ञादिरूपाः क्रियायेनान्वहशः भवंति ॥ अतो हे धीश्वरा विगर्हितं पौरोहित्यं पुरोहितकर्माहं कथं नु करोमि ॥ येन पौरोहित्येन जन्मेति मुखैः

काप्यति तुष्यति पौरोहित्यं इडमेतेनलोकहेतुरकिंचनस्य तु शिलोञ्छमेवेति भावः ॥ ३७ ॥ तथापि पौरोहित्यस्य गर्हितत्वेपि न प्रत्याचक्षे यद्यस्माद्गुरुभिः पितृ

भिर्युस्माभिः नार्थितं प्रार्थितं किंचिदपि इति पाठे किंचिद्देतत्प्राप्तितं रत्नोधिकमपि करिष्यामीति भावः ॥ अतो भवतां सर्वं प्रार्थितं धर्मेत्तपश्चादिभिः अ

शेषं साधये प्राणापणैतं ॥ यथा सामर्थ्यं साधयत इत्यर्थः ॥ ३७ ॥ एवमुक्ते देवैर्वृतः पौरोहित्ये समकरोद्विश्वरूप इत्याह मुनिः ॥ तेभ्य इति ॥ उक्तीत्यं तेभ्यो

कथं विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः ॥ ३७ ॥ तथापि न ब्रूयां गुरुभिः प्रार्थितं कियत् ॥ भ प्रति

वतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ॥ ३८ ॥ श्रीशुक उवाच ॥ तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः ॥ पौरो

हित्यं वृतश्चक्रे परमेण समाधिना ॥ ३९ ॥ सुरद्विषां श्रियं गुप्तामौशनस्यापि विद्यया ॥ आच्छिद्यादान्महेन्द्रा

य वैष्णव्या विद्यया विभुः ॥ ४० ॥ यया गुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः ॥ तां प्राह स महेन्द्राय विश्वरूप उदारधीः

॥ ४१ ॥ इति श्रीभागवते महापुराणे षष्ठस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥ देवेभ्यः प्रतिश्रुत्य प्रतिज्ञाय महातपा विश्वरूपः देवैर्वृतः पौरोहित्यं

समाधानचित्तेन कृतवान् ॥ ३९ ॥ पौरोहित्यकरणमेवाह सुरद्विषां इति उशनसः अपत्यं औशनसः संवंधिन्या विद्यया गुप्तां रक्षितामपि सुरद्विषां श्रियं वैष्णव्या

नारायणपरात्मिकया मंत्रविद्यया आच्छिद्य हृत्वा आहृत्य विश्वरूपः महेन्द्राय प्रादात् ॥ ४० ॥ तदेव विशदयति ययेति ॥ सहस्राक्ष इन्द्रो यया वैष्णव्या वि

द्यया गुप्तो रक्षितः अत एव विभुः समर्थो भवन् असुरसेना अमेदृतवान् ॥ तां विद्यामुदारधीर्विपुलमतिर्विश्वरूपो महेन्द्राय प्राह ॥ विश्वरूपो यदि एवं राम:

लब्धविद्याविरहिततया कः शत्रून् नितरां स्वश्रियं लब्धवानित्यर्थः ॥ ४१ ॥ इति श्रीषष्ठे सप्तमः ॥ ७ ॥ ३६

स्तस्य पाठ्यायत्वेकनिष्ठस्य मम प्रतिवादनं करिष्यथ तत्तु गर्हितं तत्राहुः ॥ न गर्हयंतीति ॥ स्वार्थेषु प्रयोजननिमित्तं कनिष्ठं अभिवादनं न गर्हयंति हि हे ब्र
ह्मन् छंदोभ्योन्यत्र वेदाध्ययनादन्यदैवकर्मणि न यः ज्येष्ठत्वकारणं छंदोभ्यो मंत्रेभ्योन्यत्र वयो ज्येष्ठत्वकारणं न तु मंत्रेषु स्वस्य मंत्रदातृत्वे मन्व
यवस्येष्टमेव ममतित्यर्थः ॥ यद्वा छंदोभ्योन्यत्र वेदान्विहाय वयः ज्येष्ठस्य कारणं न भवति किंतु वेदा एव मुख्यं कारणं तत्साम्येत वयः ॥ अतो वेदज्ञत्वा
त्त्वमेव ज्येष्ठ इत्यर्थः ॥ ३३ ॥ एवमुक्तो विश्वरूपो देवानाहेत्याह मुनिः ॥ अभ्यर्थित इति एवं सुरगणैः पौरोहित्यकर्मणि प्रार्थितः स महातपाः विश्वरू
पः प्रहसन् श्लक्ष्णया मधुरया गिरा तान्देवानाह ॥ ३४ ॥ उक्तमेवाह स्माद्वैस्त्रिभिः विगर्हितमिति धर्मशीलैर्विगर्हितं तावद्धर्मशीलाः पौरोहित्यं विगर्हयं

न गर्हयंति ह्यर्थेषु यविष्ठांघ्र्यभिवादनं ॥ छंदोभ्योन्यत्र न ब्रह्मन्वयो ज्येष्ठस्य कारणं ॥ ३३ ॥ श्रीशुक उवाच
अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः ॥ स विश्वरूपस्तानाह प्रहसन् श्लक्ष्णया गिरा ॥ ३४ ॥ विश्वरूप उ-
वाच ॥ विगर्हितं धर्मशीलैर्ब्रह्मवर्च उपव्ययं ॥ कथं तु मद्विधो नाथा लोकेशैरभियाचितं ॥ प्रत्याख्यास्यति त-
च्छिष्यः स एव स्वार्थ उच्यते ॥ ३५ ॥ अकिंचनानां हि धनं शिलोंछनं तेनेह निर्वर्तितसाधुसत्क्रियः ॥ ० ॥

तीत्यर्थः ॥ किं च तत्पौरोहित्यं ब्रह्मवर्चसस्य उपव्ययकरं आर्षत्वाद्ब्रह्महस्तिभ्यां वर्चस इति समासांतत्याभावः ॥ एवं पौरोहित्यस्य विगर्हितत्वं स्वधर्मेना
शकत्वं चाभिधाय प्रत्याख्याने तदप्रत्याख्येयं चेत्याह कथमिति ॥ लोकेशैर्युष्माभिरभियाचितो मद्विधः पितृसेवकः ॥ कथं तु तत्प्रत्याख्यास्यति नाम न प्रत्या
ख्यास्यत्येवेत्यर्थः ॥ मद्विध इत्यनेनाभिप्रेतं विशदयति तच्छिष्य इति तेषां शिष्यत्वेनाहं ॥ शिष्यापि प्रत्याख्यातव्यं तत्राह स एव प्रत्याख्यानाभाव एव
हि शिष्यस्य स्वार्थ उच्यते नाथा इत्येकवचनपाठेनाभियाचितं नाथत्वेन रक्षकत्वेन रक्षकत्वेन याचितः ॥ स एव स्वार्थः इति लोकेशैः शिष्ये नियुज्यमाने
यत्तत्स एव स्वार्थः परमो लाभ इत्यर्थः ॥ ३५ ॥ ननु पौरोहित्ये धनलाभात्स्वधर्मः सिध्येदन्यथा निर्धनस्य कुतो धर्मः ॥ अत एवैतेन लोकोकष्यता तत्राह

मूर्तिरात्मा स्वयं तु धर्मस्य मूर्तिरिति तिथिस्तु स्वयमेव स्वात्मनो ५

भा॰ ष॰ ऊचुर्देवाः ॥ वयमिति ॥ वयं ते तवातिथयः प्राप्ताः ते तवाश्रमं भद्रमस्तु ॥ आतिथ्याभावे आश्रमः श्मशानमिति व्यपदिश्यत इति भावः ॥ तथा त्वं पितॄणामस्मा
३५ कं समयोचितः तत्र कालोचितः कामः इच्छाविषयोर्थः संपद्यतां त्वत्तः संपन्नो भवतु ॥ २८ ॥ हे ब्रह्मन् पुत्रवतामपि सतां पुत्राणां पितृशुश्रूषणं परो धर्मः शु
श्रूषणमिति सतां पुत्राणां पितृशुश्रूषणं परो धर्म इति किमुत त्वत्कल्पानां त्वं तु ब्रह्मचारी पुत्रवत्प्रीति अस्मच्छुश्रूषणमस्य तवोचितमिति भावः ॥ २९ ॥ किं चाचार्यो
ब्रह्मणो मूर्तिरीश्वरस्य आचार्यो आराधन इति भावः पिता तु प्रजापतेर्विरिंचस्य मूर्तिः भ्राता मरुत्पतेरिंद्रस्य मूर्तिः माता तु साक्षात् क्षितेर्भूमेस्तनुर्मू
र्तिः ॥ ३० ॥ भगिनी तु दयाया मूर्तिस्ते न द्वेष्टव्याः स शरीरत्वेन द्वेष्टव्य इति यावत् ॥ अभ्यागतस्त्वमेराहवनीयादेर्मूर्तिः सर्वभूतानि चात्मनो मूर्तिरात्मतुल्य

देवा ऊचुः ॥ वयं तेतिथयः प्राप्ता आश्रमं भद्रमस्तु ते ॥ कामः संपाद्यतां तात पितॄणां समयोचितः ॥ २८ ॥ पुत्राणां हि प
रो धर्मः पितृशुश्रूषणं सतां ॥ अपि पुत्रवतां ब्रह्मन् किमुत ब्रह्मचारिणां ॥ २९ ॥ आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः
प्रजापतेः ॥ भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात्क्षितेस्तनुः ॥ ३० ॥ दयाया भगिनी मूर्तिर्धर्मस्यात्मातिथिः स्वयं ॥ अ
ग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः ॥ ३१ ॥ तस्मात्पितॄणामार्तानामार्तिं परपराभवं ॥ तपसापनयंस्तात संदेशं क
र्तुमर्हसि ॥ ३२ ॥ वृणीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्राह्मणं गुरुं ॥ यथांजसा विजेष्यामः सपत्नांस्तव तेजसा ॥ ३३ ॥

त्वेन द्वेष्टव्यानीत्यर्थः ॥ यद्वा अग्नेर्मूर्तिः ॥ ३१ ॥ तत्तस्माद्धे तात त्वत्पितॄणामस्माकमार्तानां पीडितानामस्माकं शत्रुभ्यः पराभवरूपामार्तिं तपसा तपःप्रभावे
णापनयन्नस्माकं संदेशं कर्तुमर्हसि ॥ ३२ ॥ संदेशमेवाहुः ॥ वृणीमह इति ॥ ब्रह्मिष्ठं ज्ञानिनं तत्रापि ब्राह्मणं ब्रह्मनिष्ठमतः सर्ववर्णानां गुरुं त्वां उपा
ध्यायं वृणीमहे वयमिति शेषः ॥ ननु कथं वृणीध्वमत आहुः ॥ यथा येन प्रकारेणांजसा सुखेनैव तव तेजसा ब्रह्मतेजसा सपत्नान्नृणान्दैत्यान्विजेष्यामः
तथानुग्रहाणेति शेषः ॥ ३३ ॥ राम: ३५

गुरुतिरस्कारसत्कारावेवापचयोपचयाकारणं ८स्य गुरुरहं स्वांतेनाह ॥ मघवन्निति ॥ हे मघवन् द्विषतः शत्रून् असुरान् पश्येति क्रमादेतेतोः प्रक्षीणान् तांश्च तं गुरु
व्यतिक्रमकृतः काव्यमाराध्य उपचितान् समृद्धान् पश्य ॥२३॥ पूर्वोक्तां धनाद्युष्माकं बाधंते ८ तिकिं वक्तव्यं यतो मम स्थानमपि ग्रहीष्यंतीति संभावयति ॥ आददी
ति ॥ आददीरन्नित्यादि निलयं परस्मिन्नहनि परश्वः ततः परस्मिन्नहनि वा बलप्रालिनोऽतएव हृताः गर्विताः ते मम निलयनं मम स्थानमपि आददीरन्नेते दान
वाः भृगुः शुक्रः काव्य एव देवता येषां ते तादृशाः ॥२४॥ अभेद्यो मंत्रो येषां ते भृगूणां भृगुकुलजानाम् अनुशिक्षिताः शिष्याः त्रिविष्टपमपि किं
गणयंति न गणयंतीत्यर्थः ॥ विप्रा गोविंदो भगवान् गावश्च ईश्वरा अनुग्राहकाः पूज्या येषां तेषामेवाभद्राणि न भवंति इतरेषां ईश्वराणामपि न भ

मघवन् द्विषतः पश्य प्रक्षीणान् गुर्वतिक्रमात् संप्रत्युपचितान् भूयः काव्यमाराध्य भक्तितः ॥२३॥ आददीरन्नि
लयनं ममापि भृगुदेवताः ॥२४॥ त्रिविष्टपं किं गणयंत्यभेद्यमंत्रा भृगूणामनुशिक्षितार्थाः ॥ न विप्रगोविंदगवीश्व
राणां भवंत्यभद्राणि नरेश्वराणां ॥२५॥ तद्विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रमथात्मवंतं ॥ सभाजितोऽर्थान्स
विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म ॥२६॥ श्रीशुक उवाच ॥ त एवमुदिता राजन् ब्रह्मणा विगतज्वराः ॥ ऋ
षिं त्वाष्ट्रमुपव्रज्य परिष्वज्येदमब्रुवन् ॥२७॥ वंतीति न किं तु भद्राण्येव भवंतीत्यर्थः ॥२५॥ तत्तस्मादधुनानंतरमेवाशु त्वष्टुः पुत्रमात्म
वंतं जितेंद्रियं तपस्विनं विश्वरूपाख्यं द्विजं भजत स्वयमनुवर्तितं तत्पौरोहित्ये वृणुध्वमित्यर्थः ॥ स विश्वरूपो वः युष्माभिः संभावितः निष्पादितः ॥ अर्थान्
अभिलषितप्रयोजनं येषां तादृशान् विधास्यते करिष्यति ॥ अस्य विश्वरूपस्य कर्म असुरपक्षपातादिरूपं स्वयं तत्तपोदत्तं क्षमिष्यध्वं तर्हि विधास्यतीत्यर्थः
यद्वा ॥ उत अपितु तस्य क्षमिष्यध्वं यदि सर्वे पातस्य कर्म युष्माभिः क्षंतव्यमित्यर्थः ॥२६॥ एवमुक्ता विश्वरूपं प्रार्थयितुं देवा यदगुरिस्ताह मुनिः ॥ त उक्ता
दिना ॥ हे राजन् ते देवा ब्रह्मणा एवं इत्थं उदिता उक्ता विगतः ज्वरः आधिर्येषां ते त्वाष्ट्रं ऋषिं विश्वरूपमुपव्रज्य उपेत्य परिष्वज्य आलिंग्य प्रवत्वात्परिष्वजोऽत्र

भा.६ एवंतस्यमघोनइत्थंचिंतयंतःसतःभगवान्बृहस्पतिरध्यात्ममयया योगप्रभावेनगृहाददृष्टांगतिंगतःअदृश्यरूपोभूदित्यर्थः ॥१६॥ ततोभगवानपिस्वराडिंद्रः

३४ गुरोःसंज्ञांदर्शनोपायंपरीक्षन्विचार्यापिनाधिगतःनप्राप्तःधियाध्यायन्दर्शनोपायंचिंतयन् ॥ सुचाप्तोकेनयुक्तःआत्मनःस्वस्यशर्मसुखंनालभतना

प्राप्तः ॥१७॥ तदिंद्रस्यगुर्वपराधप्रयुक्तंक्लेशंचिंतादिकंश्रुत्वातेभार्गवसंमतंउशनसामंत्रितंमतमाश्रित्यसर्वेसुराःदुर्मदाअनिवार्यमदाः ॥ आततायि

म नःजिघांसंतःदेवान्प्रत्युद्यमंयुद्धोद्योगंचक्रुः ॥१८॥ तैरसुरैःप्रयुक्तैस्तीक्ष्णैरिषुभिर्निर्भिन्नानिभिन्नान्यंगान्यूरवोबाहवश्चयेषांतेइंद्रसहि

एवंचिंतयतस्तस्यमघोनोभगवान्गृहात् ॥ बृहस्पतिर्गतोदृष्टांगतिमध्यात्ममायया ॥१६॥ गुरोर्नाधिगतः

संज्ञांपरीक्षन्भगवान्स्वराट् ॥ ध्यायन्धियासुरैर्युक्तःशर्मनालभतात्मनः ॥१७॥ तच्छ्रुत्वैवासुराःसर्वेआश्रि

त्यौशनसंमतं ॥ देवान्प्रत्युद्यमंचक्रुर्दुर्मदाआततायिनः ॥१८॥ तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नांगोरुबाहवः

ब्रह्माणंशरणंजग्मुःसहेंद्रानतकंधराः ॥१९॥ तांस्तथाभ्यर्दितान्वीक्ष्यभगवानात्मभूरजः ॥ कृपयापरयादेवउवा

चपरिसांत्वयन् ॥२०॥ ब्रह्मोवाच ॥ अहोबतसुरश्रेष्ठाह्यभद्रंवःकृतंमहत् ॥ ब्रह्मिष्ठंब्राह्मणंदांतमैश्वर्यान्नाभ्य

नंदत ॥२१॥ तस्यायमनयस्यासीत्परेभ्योवःपराभवः ॥ प्रक्षीणेभ्यःस्ववैरिभ्यःसमृद्धानांचयत्सुराः ॥२२॥

शरणं २

तादेवाःसर्वेशिरसाब्रह्माणंशरणंययुः ॥ अभ्यर्दितान्ततपापीडितांस्तान्देवान्वीक्ष्यसभगवानात्मभूःपरमात्मजोजोब्रह्मापरयाधिकयाकृपयायुक्तस्त ।

त्सांत्वयन्नुवाच ॥२०॥ उक्तमेवाह ॥ अहोइत्यादिना ॥ उतास्यकर्मेत्यंतेन हेसुरश्रेष्ठाः ॥ अहोबतमहत्कष्टंवःप्राप्तंमहदभद्रमसाधुयुष्माभिःकृतं

किंतद्ब्रह्मिष्ठमतिप्रायेणब्रह्मज्ञानसंपन्नंब्राह्मणंदांतंजितेंद्रियमैश्वर्यान्मदात्वंनाभ्यनंदतनाभिनंदितवंतः ॥२१॥ हेसुराःपरेभ्यःशत्रुभ्यःवःपरा रामः

भवइतियदयंतस्यानयस्यसंबंधीफलरूपः ॥ आसीत्कथंभूतानांवःप्रक्षीणेभ्यःऐश्वर्यरहितेभ्यःसपत्नेभ्यःसमृद्धानांसंपन्नानां ॥२२॥ ३४

तूष्णीं तदा कविर्विद्वान् प्रभुः समर्थः आंगिरसो बृहस्पतिः श्रीमदेन या विक्रिया तां विद्वान् जानन् तूष्णीं स्वगृहं प्रतियया ॥९॥ तर्ह्येव इंद्र आत्मनः स्वस्य गुरुहेलनं
प्रतिबुध्य अनुस्मृत्य आत्मना स्वेन वा आत्मानं स्वात्मानं सदसि सभायां गर्हयामास निंदितवान् ॥१०॥ गर्ह्यप्रकारमाह ॥ अहो इति पंचभिः ॥ अहो बत हा मम क
र्म प्राप्तं असाधु असाधु कुत्सितं मया कृतं वै यद्यस्मात् अत्र बुद्धिना अल्पमतिना ऐश्वर्यमत्तेन मया सदसि गुरुः कात्कृतः तिरस्कृतः ॥११॥ पंडितो विद्वान् लिप्सानि
ल्लिविवेकसंपन्नस्सन् गृध्येत् ॥ को वा प्रमान् त्रिविष्टपपतेः त्रिलोकान्यातीति त्रिविष्टपं तस्य पतेः सत्यलोकाधिपतेरपि लक्ष्मीं गृध्येदभिकांक्षेत् किं पुनरुक्तं मम

ततो निर्गत्य सहसा कविरांगिरसः प्रभुः ॥ आययौ स्वगृहं तूष्णीं विद्वान् श्रीमदविक्रियां ॥९॥ तर्ह्येव प्रतिबु
ध्येंद्रो गुरुहेलनमात्मनः ॥ गर्हयामास सदसि स्वयमात्मानमात्मना ॥१०॥ अहो बत ममासाधु कृतं वै दभ्रबु
द्धिना ॥ यन्मयैश्वर्यमत्तेन गुरुः सदसि कात्कृतः ॥११॥ को गृध्येत्पंडितो लक्ष्मीं त्रिविष्टपपतेरपि ययाहमासु
रं भावं नीतोद्य विबुधेश्वरः ॥१२॥ ये पारमेष्ठ्यं धिषणमधितिष्ठन्न कंचन ॥ प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं
विदुः ॥१३॥ तेषां कुपथदेष्टॄणां पततां तमसि ह्यधः ॥ ये श्रद्दध्युर्वचस्ते वै मज्जंत्यश्मप्लवा इव ॥१४॥ अथाहममराचा
र्यमगाधधिषणं द्विजं ॥ प्रसादयिष्ये निशठः शीर्ष्णा तच्चरणं स्पृशन् ॥१५॥

त्यर्थः ॥ विबुधानां मातो ईकानामीश्वरोऽप्यहमासुरं भावं मोहमिति यावत् ॥ नीतः प्राप्तः ॥१२॥ ननु सिंहासनस्थो राजा प्रत्युत्थानादिकं न कुर्यादित्याकुर्वन्ति तत्राह य
स्तिष्ठाम्यां पारमेष्ठ्यं धिषणं पारमेष्ठी महाराजस्तत्संबंधासनं तदधिष्ठितस्सन् कंचन प्रतिनोदतिष्ठेदिति ये ब्रूयुस्ते परं केवलं धर्मं न विदुः ॥१३॥ किंच तेतेषां कुपथ
देष्टॄणां कुमार्गोपदेष्टॄणामत एवाधस्तमसि नरके पततां च ये जनाः श्रद्दधुस्ते अश्मप्लवाः पाषाणयुक्तप्लवा उडुपा इव मज्जंति अधोयांति ॥१४॥ अथातः ॥ अ
हममराणामाचार्यमगाधधिषणमगाधबुद्धिं यस्य तं मत्कृतापराधमगणयंतं द्विजं वाक्चातिप्रसादयिष्ये प्रार्थये ॥ कथंभूतः निर्गतशाठ्यः सन् तस्य गुरोश्चरणौ ।

[redacted]ः परित्यक्ताः विश्वरूपं । वव्रिरे इत्युक्तं तदेव सप्रपंचं ब्रुवन्नुत्तुः पृच्छति राजा कस्येति कस्माद्धेतोराचार्येणगु
रुणा १

ना० ब० देवा विमते नगुरुणात्मनाशिष्याः सुराः परित्यक्ताः हे भगवन्नेतदाचक्ष्व कथय तथा शिष्याणां गुरौ विषयेवक्रमनमपराधं वा चक्ष्व १ एवमपष्टो मुनि
२२ दैवानां गुरौ कृतमपराधं वक्तुमुपक्रमते इंद्रस्यादिना इंद्रो यदा संघातं वाचस्पतिं नाभ्यनंदत् आमवान्तरं गिरसः ततो निर्गतो भ्रंश्री स्वगमदमाययेभ्यस्
त्थानामन्वयः अनादरहितुमदंदर्पोपितुं इंद्रं विशिनष्टि त्रिभुवनैश्वर्यमदेनोत्त्वं घितसतां पंपायेन हेत्यमरुन्गणादिभिः परिश्रितः परिवृतः वसुवादि
भिर्वैदान्यवक्ति निर्भिः सिद्धादिभिश्च यथायथं निषेव्यमाणः स्तूयमानश्च २ ३ ४ ललितं यथा तथोपगीयमानश्च भगवीनिंद्रः आस्थानं सभा तस्मिन्नध्यायन्ने
कस्माद्धेतोः परित्यक्ताश्चाचार्येणात्मनः सुराः एतदाचक्ष्व भगवान्शिष्याणामक्रमं गुरौ १ श्री शुक उवाच
इंद्रस्त्रिभुवनैश्वर्यमदोल्लंघितसत्पथः मरुद्भिर्वसुभी रुद्रैरादित्यैर्ऋभुभिर्नृप २ विश्वेदेवैश्च साध्यैश्च
नासत्याभ्यां परिश्रितः सिद्धचारणगंधर्वैर्मुनिभिर्ब्रह्मवादिभिः ३ विद्याधराप्सरोभिश्च किन्नरैः पतगोर
गैः निषेव्यमाणो मघवान्स्तूयमानश्च भारत ४ उपगीयमानो ललितमास्थानाध्यासनाश्रितः पांडु
रेणातपत्रेण चंद्रमंडलचारुणा ५ युक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः विराजमानः पौलोम्या सहार्द्धा
सनया भृशं ६ स यदा परमाचार्यं देवानामात्मनश्च ह नाभ्यनंदत संप्राप्तं प्रत्युत्थानासनादिभिः ७ वा
चस्पतिं मुनिवरं सुरासुरनमस्कृतं नोच्चचालासनादिंद्रः पश्यन्नपि सभागतं ८
सिंहासनं तदास्थितः आश्रितः देवैः हे भारत चंद्रमंडलवच्चारुणा सुंदरेण पांडुरेण श्वेतेनातपत्रेण छत्रेण ५ तथा पारमेष्ठ्यैर्महाराजलिंगैश्चामरादिभिर्युक्तः अर्द्धा
सनया आसनस्यार्द्धे स्थितया पौलोम्या सह भृशमतितरां विराजमानः ६ स इंद्रो यदा देवानामात्मनश्च स्वस्य च परमं गुरुमाचार्यं सुरवंदितं मुनिश्रे
ष्ठं बृहस्पतिं प्रत्युत्थानासनादिभिर्नाभ्यनंदत वा न न चचाल किं तु सभागतं पश्यन्नप्यासनस्थ एवास्थितमित्यर्थः ८ रा० म०
२२

तत्र विवस्वतः भार्या संज्ञा सा श्राद्धदेवं यमं यमीं चेति मिथुनं मनुं यम यमी रूपं च मिथुनमसूयत॥ हे महाभागा सैव संज्ञैव वडवाश्विनीभूत्वा भुवि वर्तमाना सा
नासत्यावश्विनौ सुषुवे॥३९॥ तथा छाया सवर्णा शनैश्चरं सावर्णिं मनुं च लेभे सुषुवे। तथा तपतीं तपस्या रूपां कन्यां च लेभे या कन्या संवरणाख्यं पतिं वव्रे॥४०॥ अ
र्यम्णो मातृका पत्नी मातृकाख्या तयोरर्यम मातृकयोः कर्त्तृशिष्टौ ताभ्यामित्यर्थः चर्षणयः कर्मशीलाः जनाः कृतानुत्पादिताः के ते
यत्र येषु ब्रह्मणा मानुषी जातिर्ब्रह्मणोपकल्पिता मानुषजात्याश्रय हि सदा ब्राह्मणाः शिरोभवं त्यत ते चर्षणयः कृषेरौणादिक इति प्रत्ययः॥४१॥
विवस्वतः श्राद्धदेवं संज्ञासूयत वै मनुं॥ मिथुनं च महाभागा यमं देवं यमीं तथा॥३९॥ सैव भूत्वाथ वडवा नासत्यौ
सुषुवे भुवि॥ छायाशनैश्चरं लेभे सावर्णिं च मनुं ततः॥ कन्यां च तपतीं या वै वव्रे संवरणं पतिं॥४०॥ अर्यम्णो मातृका
पत्नी तयोश्चर्षणयः सुताः॥ यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता॥४१॥ पूषानपत्यः पिष्टादो भग्नदंतोऽभव
त्पुरा योऽसौ दक्षाय कुपितं जहास विवृतद्विजः॥४२॥ त्वष्टुर्दैत्यात्मजा भार्या रचना नाम कन्यका॥ संनिवेशस्तयोर्जज्ञे
विश्वरूपश्च वीर्यवान्॥४३॥ तं वव्रिरे सुरगणा स्वस्रीयं द्विषतामपि॥ विमतेन परित्यक्ता गुरुणांगिरसेन यत्॥४४॥
॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे षष्ठोऽध्यायः॥ श्रीशुक उवाच॥ पूषा त्वनपत्यः अपुत्रः पूर्वं भग्नदंतः पिष्टा
दः॥ पिष्टभुग्भवत्॥ भग्नदंतत्वे हेतुं वदंस्तं विशिनष्टि योऽसौ पूषा दक्षाय कुपितं रुद्रं विवृतद्विजः प्रकाशितदंतः सन् जहास प्रहसितवान् चतुर्थ्यैवेत्तत्तत्तम
भिप्रेतं॥४२॥ त्वष्टुर्दैत्यानामनुजा रचना नाम कन्यका भार्या तयोस्त्वष्टृरचनयोः संनिवेशाद्विश्वरूपो वीर्यवान् विश्वरूपो जज्ञे जातः॥४३॥ तं विश्वरूपं द्विषतां
दैत्यानां स्वस्रीयं भागिनेयमपि देवा यत् यदा विमानेनावज्ञातेनांगिरसः प्रत्तेन गुरुणा बृहस्पतिना परित्यक्तास्तदा वव्रिरे वृतवंतः स्वपत्यै॥४४॥
इति टीकायां षष्ठो ६॥

श्री.ह. वृषपर्वणस्तु कन्या शर्मिष्ठा नाहुषो नहुषात्मजो बलवान्ययातिः राजो वा ह वैश्वानरो वसोः पुत्रः तस्य सुताः चतस्रः चारुदर्शनाः सौंदर्यदर्शिन्यः उ
३२ तानि हिंस्याति उपादानवीति ॥ तां संमध्ये उपादानवी हिरण्याक्ष उद्वहत हयशिरां तु क्रतुः प्रजापति ॥ २३ ॥ हे वैश्वानरसुते पुलोमकालकाख्ये तु कः ॥
कश्यपः उपयेमे दानवी परिणयने हेतुः ब्रह्मणा चोदित इति ॥ २४ ॥ तयोः पुलोमाकालकयोः षष्टिसहस्राणि पौलोमास्तेषां रवनि वातकवचा इति नामात
र तयोः का कालकेयाश्च पुत्रशालिनो दानवा जाताः तां षष्टिं यज्ञघ्नान् तेतवा पितुः पिता अर्जुनः कदाचिदेकः स्वर्लोकं गतः एकः सन् किं करोमि त्वा जघान हतवा

वृषपर्वणस्तु शर्मिष्ठायां ययातिर्नहुषो बली ॥ वैश्वानरसुताश्चास्य चत्वारश्चारुदर्शनाः ॥ २२ ॥ उपदानवी हयशिराप
लोमकालिका तथा ॥ उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां तथा ॥ २३ ॥ पुलोमां कालिकां चैव वैश्वानरसुते तु कः ॥
उपयेमे महाभागवान् कश्यपो ब्रह्मचोदितः ॥ २४ ॥ पौलोमाः कालिकेयाश्च दानवाः पुत्रशालिनः ॥ तयोः षष्टिसहस्त्रा
णि ॥ यज्ञघ्नास्ते पितुः पिता जघान स्वर्गतो राजन्नेकं द्विषं करः ॥ २५ ॥ विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत्
राहुज्येष्ठं केतुशतं सर्वं हतं च उपागताः ॥ २६ ॥ अथ धातः श्रूयतां वंशो योऽदितेरनुपूर्वशः ॥ यत्र नारायणो देवः स्वां
शेनावततार विभुः ॥ विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः ॥ धाता विधाता वरुणो मित्रः शक्र उरुक्रमः ॥ २८ ॥

न् ॥ २५ ॥ विप्रचित्तिः सिंहिकायां शतं चैकमेकशतं दानवमजीजनत् चैकशतमध्ये राहुज्येष्ठः इतरेषां तं तु केतवः ॥ राहुज्येष्ठमिति पाठे राहुज्येष्ठो यस्य तत्तेषु
सर्वमित्यस्य पेः कोसौ राहुः ज्येष्ठमजीजनत्तत्राह ॥ ये मन्वहतत्वमुपागताः पाप्तः स्वयं दानवा धर्मोपि भगवद्दनुग्रह वशाद्धतत्वमुपागतः स्वर्गतं पंचमे ॥ २६ ॥ अ
थ तिम्पादीनां वृषाश्च वर्णानंतरम् न तावत् सांवं शाप्यक्रत्वात् अदितिवंशः श्रूयतां मया कथ्यमान इति प्रोक्षः ॥ दितिवंशस्तु त्वत्प्रसाद ध्यायेवसत्ते ॥ अदितेर्वंशं वि रा.म.
स्तानश्च यत्र वंशो विभुर्नारायणो देवः स्वांशेनावतार ॥ २७ ॥ विवस्वानादयो द्वादशादितेः पुत्राः तत्रोरुक्रमो भगवान्साक्षाद्वतीर्णो ॥ २८ ॥ ३२

श्री

प

स्थिताः स्वंडिताः तयैव स्थितास्तिपा वेलये सतिपुनर्वर्द्धिताः ॥ २३ ॥ अथ लोकमाहरणां कश्यपपत्नीनां लोकस्य पंसुत्वं कुर्वन्तीति तथा तानि नामानि श‍ृणु लोका-
नामात्त्वे हेतुः इदं जगद्यास्त्र सूतं याभिः कश्यपपत्नीभिः प्रसूतं ॥ २४ ॥ तानि निर्दिशति ॥ अदितिरिति ॥ अन्यत्त्वे सुगमं त्वाद्यैः क्रमेणाता सां वंशानाहतिस्रेः कै प
कश्यपस्य भार्यायां देवगणाः आसन् स्वरमायाः सुताः श्वापदश्वानः आघ्रमाजीरादयश्वासन् सुरभेः पुत्राः त्क महिष्याणगावश्वान्ये द्विशफाश्वासन् हेन्त्प
२६ ॥ ताम्रायाश्च पुत्राः श्येनाः गृध्राः आदिशब्देन श्येनादि महद्बलिनः पतिताः मुनेः सुता त्व सरसां गणाः हेराजक्रोधवशाया आत्मजा स्त्रदंदशूका

स्तश्रुतानानि लोकानां माहरणां शंकराणि च ॥ अथ कश्यपपत्नीनां यस्त्र सूतमिदं जगत् ॥ २४ ॥ अदितिर्दितिर्दनुः
काष्ठा अरिष्टा सुरसा इला ॥ मुनिः क्रोधवशा ताम्रा सुरभिः शरमा तिमिः ॥ २५ ॥ तिमेर्यादोगणा आसन् श्वापदाः शरमा
सुताः सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप ॥ २६ ॥ ताम्रायाः श्येनगृध्राद्या मुनेरप्सरसां गणाः दंदशूकादयः स-
र्पा राजन् क्रोधवशात्मजाः ॥ २७ ॥ इलाया भूरुहाः सर्वे यातुधानाश्च सौरसाः ॥ अरिष्टायास्तु गंधर्वाः काष्ठाया द्विश-
फेतराः सुता दनोरेकषष्टिस्तेषां प्राधानिकान् श‍ृणु द्विमूर्द्धा शंबरोरिष्टो हयग्रीवो विभावसुः ॥ २९ ॥ अयो-
मुखः शंकुशिराः स्वर्भानुः कपिलोरुणाः ॥ पुलोमा वृषपर्वा च एकचक्रोनुतापनः ॥ ३० ॥ धूम्रकेशो विरूपाक्षो वि-
६ प्रचित्तिश्च दुर्जयः ॥ स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल ॥ ३१ ॥
दयः दंशनस्वभावाः सर्पा आसन् ॥ २७ ॥ इलाया स्त्र सर्वे
वृक्षाः ॥ आत्मजाः सौरसाः सुरसायाः अपत्यानि सर्वे यातुधानाः अरिष्टायास्त्वात्मजा गंधर्वाः ॥ काष्ठायास्त्र द्विशफेतराः ॥ एकशफा अश्वगर्दभादयो व ट
भूवुः ॥ २७ ॥ दनोः सुतास्त्वेकषष्टिस्तेषां मध्ये प्राधानिकान् श्रेष्ठान् प्रमुखान् श‍ृणु ॥ तानाह द्विमूर्द्धेति येषां ताभ्यां दशोत्पत्तेः ॥ २९ ॥ ३० ॥ येषां मध्ये स्व-
र्भानोः नमुचेः कन्या इति स्वर्भानुः सुता इत्यर्थः भानुरव्ययो दनुजः नत्तु राहुः तस्योत्पत्तेर्वक्ष्यमाणत्वात् ॥ ३१ ॥

भा॰ष॰ ३९

तुर्भिः । अजस्य शंभोर्भार्या सरूपा सा च रुद्राणां कोटिशः प्रसूतवती तत्र प्रधानानेकादश रुद्रगणनायकानाह ॥ रैवत इति सार्द्धेन पद्येन । रैवतादिरूपेणैकादशधा भि
न्नस्य रुद्रस्य पार्षदा घोररूपाः प्रेतादिरूपेणानेकविधाः । अथ [illegible] इत्यन्वयः ॥ १७ ॥ १८ ॥ अथांगिरसः संतानमाह प्रजापतेरिति ॥ अंगिरसः प्र
जापतेः पत्नी स्वधा सती च तत्र स्वधा पितॄनसूत । सती त्वथर्वांगिरसं नाम वेदाभिमानं [illegible] पुरुषं पुत्रत्वेनाकरोत ॥ १९ ॥ अथ कृशाश्वसंतानमाह ॥ कृशाश्व
स्यार्चिर्नाम्न्यां भार्यायां धूम्रकेशं पुत्रमजीजनत् धिषणायां पत्न्यां तु वेदशिरसं देवलं वयुनं मनुं चेति पुत्रानजीजनत ॥ २० ॥ अथ तार्क्ष्यस्य संतानमाह ॥ तार्क्ष्यस्य

सरूपासूत भूतस्य भार्या रुद्रांश्च कोटिशः ॥ रैवतोऽजो भवो भीमो वाम उग्रो वृषाकपिः ॥ १७ ॥ अजैकपादहिर्बुध्न्यो ब
हुरूपो महानिति ॥ रुद्रस्य पार्षदाश्चान्ये घोराः प्रेतविनायकाः ॥ १८ ॥ प्रजापतेरंगिरसः स्वधा पत्नी पितॄनथ ॥ अ
थर्वांगिरसं वेदं पुत्रत्वे चाकरोत्सती ॥ १९ ॥ कृशाश्वोऽर्चिषि भार्यायां धूम्रकेशमजीजनत् ॥ धिषणायां वेदशिरो देव
लं वयुनं मनुं ॥ २० ॥ तार्क्ष्यस्य विनता कद्रूः पतंगी यामिनी इति ॥ पतंगप्रसूत पतगान्यामिनी शलभानथ ॥ २१ ॥ सुपर्णा
सूत गरुडं साक्षाद्यज्ञेशवाहनं ॥ सूर्यसूतमनूरुं च कद्रूर्नागाननेकशः ॥ २२ ॥ कृत्तिकादीनि नक्षत्राणींदोः पत्न्यस्तु
भारत ॥ दक्षशापात्सोऽनपत्यस्तासु यक्ष्मग्रहार्दितः ॥ पुनः प्रसाद्य तं सोमः कला लेभे क्षयेऽर्दिताः ॥ २३ ॥

विनताद्याश्चतस्रो भार्याः तत्र पतंगी पतगान्पक्षिणः असूत यामिनी तु शलभानसूत ॥ २१ ॥ सुपर्णा विनता [illegible] साक्षाद्यज्ञेशस्य विष्णोर्वाहनं तं गरुडं
सूर्यसूतं [illegible] अनूरुं चासूत ॥ कद्रूस्त्वनेकशो नागान्सर्पानसूत ॥ २२ ॥ अथ सोमस्य पत्नीराह इंदोः सोमस्य पत्न्यस्तु कृत्तिकादीनि नक्षत्राणि सप्तविंशतिः ॥ हे भारत
स चंद्रो दक्षशापात्तरोहिण्यामेव प्रेमातिशयेनान्यासु तत्पत्नीषु [illegible] दक्षस्य शापात् [illegible] यक्ष्मग्रहेण राजयक्ष्मरोगेण पीडितः सन् तासु कृत्तिकादिष्वनपत्यो
ऽभवत ॥ २३ ॥ ततस्तं पुनः प्रसाद्य [illegible] कलाः लेभे कृत्तिकादीनि नक्षत्राणि सप्तविंशति हे भारत स चंद्रः दक्षशापात् रोहिण्यामेव प्रेमातिशयेना ३९

संकल्पायाः संकल्पः तनयो भवत् कामस्तु संकल्पाज्जात इति स्मृतः वसोः पुत्रास्त्वष्टौ वसवः तेषां नामानि मे मत्तः शृणु ॥१०॥ द्रोणादयो विभावस्वंता अष्टौ
वसवः तत्र द्रोणादीनां संतानमाह क्रमेण ॥ द्रोणस्येति द्रोणस्याभिमतिः पत्नी तस्यां हर्षशोकभयादयस्तनया बभूवुः ॥ प्राणस्यात्तूर्जस्वती भार्या तस्याः पुत्रास्त्रय आयुः
पुरोजवाः ध्रुवस्य धरणी भार्या सा च विविधाः पुरः पुराणि पुराभिमानिनो देवानसूत ॥१२॥ अर्कस्य तु भार्या वासना तस्यास्तर्षादयः पुत्राः अग्नेस्तु भार्या वसोर्धा
रा तस्यास्तनयास्तु द्रविणकादयः ॥१३॥ स्कंदः कुमारस्त्वग्नेरेव कृत्तिकासु जातः षाण्मातुरस्त्वग्निभूरिति च प्रसिद्धः ॥ ये विशाखादयस्ते ततः स्कंदाज्जाताः दोषस्य

संकल्पायास्तु संकल्पः कामः संकल्पजः स्मृतः ॥ वसवोऽष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु ॥१०॥ द्रोणः प्राणो ध्रुवो
ऽर्कोऽग्निर्दोषो वसुर्विभावसुः द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥११॥ प्राणस्योर्जस्वती भार्या सह आयुः पुरो-
जवाः ॥ ध्रुवस्य भार्या धरणिरसूत विविधाः पुराः ॥१२॥ अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः अग्नेर्भार्या
वसोर्धारा पुत्रा द्रविणकादयः ॥१३॥ स्कंदश्च कृत्तिकापुत्रो ये विशाखादयस्ततः ॥ दोषस्य शर्वरी पुत्रः शिशुमारो हरेः
कला ॥१४॥ वसोराङ्गिरसी पुत्रो विश्वकर्मा कृतीपतिः ॥ ततो मनुश्चाक्षुषोऽभूद्विश्वे साध्या मनोः सुताः ॥१५॥ विभा
वसोरसूतोषा व्युष्टं रोचिषमातपं ॥ पंचयामोऽथ भूतानि येन जाग्रति कर्मसु ॥१६॥

तु भार्या शर्वरी तस्याः पुत्रः शिशुमारः स च हरेः ॥ वसोराङ्गिरसी भार्या तस्याः पुत्रो विश्वकर्मा स च कृती पतिः शिल्पाचार्यः ततो विश्वकर्मणः चाक्षुषाख्यो मनुरभूत् म
नोश्चाक्षुषस्य विश्वे साध्याः सुता बभूवुः ॥१५॥ विभावसोर्भार्या उषा सा च व्युष्टं रोचिषं चातपं च पुत्रानसूत ॥ अथ आतपात्पंचयामः दिवसः अत एव रात्रिस्त्रियामा
प्रदोषप्रत्यूषयोः पूर्वोत्तरदिवसावयवत्वात् पंचयामशब्दः तदभिमानि देवपरः ॥ तं विशिनष्टि येन पंचयामेन भूतानि प्राणिनः कर्मसु स्वस्वव्यापारेषु जाग्रति जाग
रूका भवंतीत्यर्थः ॥१६॥ एवं धर्मभार्याणां संतानमभिधायाथ कश्यपयोषासंतानं भूयस्त्वात्पश्चाद्वक्ष्यमाणोऽभूतांगिरःकृशाश्वानां तावत्संतानमाह ॥ सुरूपेति च

भा.ष. स्विष्टकृतमेध्वरादिसर्ग्यः ॥२॥ अथामीषां दत्तमरुदादिस्त्रीणां सापत्यानां पुत्रपौत्रादिसहितानां नामधेयानि मे मत्तः शृणु तां विशिनष्टि यासां दक्षकन्यानां
२० प्रसूतिप्रसवैः पुत्रपौत्रादिभिस्त्रयो लोका आपूरिताः ॥३॥ तावदर्मस्य दश भार्या निर्दिशति ॥ भानुरिति ॥ भान्वादयः संकल्पांता दश धर्मस्य भार्याः ता
साम् सुतान् क्रमेणाह शिवत्यर्थः ॥४॥ तत्रैकैकस्याः संतानं क्रमेणाह ॥ भानोस्त्विति ॥ भानोर्देवऋषभाख्यः पुत्रः तस्माद्देवऋषभादिंद्रसेनः इ
त्य लंबायाश्च विद्योतः पुत्र आसीत्ततो विद्योतात् स्तनयित्नवः विद्युतस्तनयित्नुपरा द्योतदभिमानिदेवता परा ॥५॥ ककुद्भार्यायाः कीकटस्तनयः
नामधेयान्यमूषां त्वं सापत्यानां च मे शृणु ॥ यासां प्रसूतिप्रसवैर्लोका आपूरितास्त्रयः ॥३॥ भानुर्लंबा ककुद्यामिर्वि
श्वा साध्या मरुत्वती ॥ वसुर्मुहूर्ता संकल्पा धर्मपत्न्यः सुतान् शृणु ॥४॥ भानोस्तु वेदऋषभ इंद्रसेनस्ततो नृप विद्यो
त आसील्लंबायास्ततश्च स्तनयित्नवः ॥ ककुभः संकटस्तस्य कीकटस्तनयो यतः ॥ भुवो दुर्गाणि जामेयः स्वर्गो नं
दिस्ततोऽभवत् ॥६॥ विश्वेदेवास्तु विश्वाया अप्रजांस्तान् प्रचक्षते ॥ साध्योगणस्तु साध्याया अर्थसिद्धिस्तु तत्सु
तस्तुतः ॥७॥ मरुत्वांश्च जयंतश्च मरुत्वत्या बभूवतुः ॥ जयंतो वासुदेवांश उपेंद्र इति यं विदुः ॥८॥ मौहूर्तिका देव
गणा मुहूर्तायाश्च जज्ञिरे ॥ ये वै फलं प्रयच्छंति भूतानां स्वस्वकालजं ॥९॥ यतः कीकटात्संकटः तनयोऽभवदित्यन्वयः जामेयाः
जाम्याः पुत्राः भूमेर्दुर्गाणि दुर्गाभिमानिनो देवाः ततः जामेयेभ्यः स्वर्गो नंदिश्चाभवत् ॥६॥ विश्वाभार्यायां धर्मस्य भार्यायां विश्वदेवाख्याः पुत्रास्तुतः अप्र
जाः विश्वेदेवाः ॥७॥ मरुत्वत्यां तु मरुत्वान् जयंतश्च द्वौ पुत्रौ बभूवतुः तत्र जयंतो वासुदेवस्य भगवतोंऽशभूतः यं जयंतं उपेंद्र इति विदुः ॥ वसोर्वैसप्य
विस्तारादते निर्दिश्य ॥८॥ मुहूर्ताख्यायां भार्यायां मौहूर्तिकाः मुहूर्ताभिमानिनो देवगणा बभूवुः ॥ तान् विशिनष्टि ये वै मौहूर्तिकाः स्वस्य मुहूर्ते का रामः
ले जंतुभ्यः स्वस्वफलं भूतानां देहिनां वपुष्यं यच्छंति ॥९॥ २०

यद्वैकर्मसंधानां कर्मणा मत्तविताम्नां कर्तुं मंदानां इति पाठे प्रतिविप्रियं कर्तुमजानतां गृहस्थानामस्माकं दुर्मर्षमोढुमशक्यं विप्रियं कृतवानसि तद
प्रियमस्माभिर्मर्षितं मस्माभिः सितिरोषः न मयप्रयुक्तमस्माभिरिमर्षितः॥४२॥ हे तंतुकृंतन संतानच्छेदक यस्मात्त्वमभद्रं पुत्रविनाशमचरः कृतवानसि॥ चरतेर्लु
ङि मध्यमैकवचनं हे मूढ तस्मात्सर्वेषु लोकेषु भ्रमतस्तव पदं स्थानं न भवेत् कचिदपि भवान्न चिरमवतिष्ठेत् किंतु भ्राम्यन्निति शापः॥४३॥ तं च शापं साधु
नां संमतो नारदो बाढं तथैवास्त्विति प्रतिजग्राह स्वीकृतवान् पुनः कुतः हि यस्मादीश्वरोऽपि स्वयं प्रतिशप्तुं समर्थोऽपि तितिक्षेत सहेतेति यदेतावानेव
साधूनां वादः॥ ननु प्रतिशापप्रदानं वाद इति भावः॥४४॥ इति षष्ठे पंचमः॥५॥ नारदात्पुत्रनाशमाशंकमानो दक्षः पुत्रोत्पादनयत्नाद्विरम्यत् सुतसोम

यन्नस्त्वं कर्मसंधानां साधूनां गृहमेधिनां॥ कृतवानसि दुर्मर्षं विप्रियं तव मर्षितं॥४२॥ तंतुकृंतन यन्नस्त्व
मभद्रमचरः पुनः॥ तस्माल्लोकेषु ते मूढ न भवेद्भ्रमतः पदं॥४३॥ श्रीशुक उवाच॥ प्रतिजग्राह तद्बाढं नारदः सा
धुसंमतः॥ एतावान्साधुवादो हि तितिक्षेतेश्वरः स्वयं॥४४॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे पंचमोऽध्या
यः॥५॥ श्रीशुक उवाच॥ ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयंभुवा॥ षष्टिं संजनयामास दुहितॄः पितृवत्सलाः॥ १
दश धर्माय कायेंदोर्द्विषट् त्रिणव दत्तवान्॥ भूतांगिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः॥२॥ वस्थितो बहुलसंख्या परिसं।

चितततो दुहितॄर्जनयदित्याह मुनिः॥ तत इति॥ प्राचेतसो दक्षः स्वयंभुवानुनीतः सांत्वितोऽसिक्न्यां भार्यायां दुहितॄः पितृवत्सलाः षष्टिसंख्याकाः संजनय
मास॥१॥ तासां मध्ये दश कन्यकाः धर्माय ददौ कायकश्यपाय द्विषडेका त्रयोदश कश्यपे॥ अदितिर्दितिर्दनुः काष्ठेत्याद्याः वक्ष्यमाणाः।
ख्या अदात्॥ इंदवे सोमाय त्रिणव त्रयाणां नवानां समाहारस्त्रिनवं सप्तविंशतिसंख्याकाः कृत्तिकारोहिण्याद्यास्ता नक्षत्ररूपा अदात्॥ भूतांगिरःकृशा
गिरःकृशाश्वेभ्यः त्रिभ्यः द्वे द्वे कन्यके दात् भूतस्य सरूपा भूता च इति द्वे भार्ये॥ अंगिरसः स्वधा सती चेति द्वे कृशाश्वस्य अर्चिर्धिषणा चेति द्वे इति विवे

भा॰ष॰ ननु संसारिणां मार्गः साधुरेव मोक्षहेतुत्वात्समं क्रमणत्रयापनयनो दनं पितुर्मे हद नपीरा वेत्याह ॥ क्रुद्धो रस्तुक्तानां नमीमांसितान्यविचारितानि कर्माणि
२५ येतेषां ऋणत्रयविमोचनं नास्ति तत्र ऋणत्रयकालभाविना च वेदाध्ययनोत्पादन यज्ञानुष्ठानयोरभावेन पितृदेवऋणानुक्तेर्यज्ञनास्त्यतः हे पाप विषयभोगस्याभावाद
इहलोके श्रेयसो विघातः ॥ विषयभोगपूर्वकस्य भोगस्याभावात्मोक्षानधिकारित्वात्परलोकेपि श्रेयसो विघातः कृतः ॥३७॥ बालानां मतिभिद्भ्रवि
चालकः ॥ एवं निरनुक्रोशो निर्घृणः ॥ हरेर्यशोनाशकः सन् तत्पार्षदानां मध्ये निर्लज्जः कथं चरसि ॥३८॥ निर्लज्जत्वमाह ॥ न त्वहं नारदवच्छिष्यो वैरंकरं
मोक्षदं घ्नं वा विना भागवताः सर्वे भूतानुग्रहपरवशाः त्वं तु भक्तविशिष्यं कुर्वन्कथं न लज्जसे इति भावः ॥३९॥ ननु विषयभोगाद्विरागस्तत्त्वद्यते किंतु वि

क्रुद्धोपि निरस्तानाममीमांसितकर्मणां ॥ विघातः श्रेयसः पाप लोकयोरुभयोः कृतः ॥३७॥ एवं त्वं निरनु
क्रोशो बालानां मतिभिद्धरेः ॥ पार्षदमध्ये चरसि यशोहा निरपत्रपः ॥३८॥ ननु भागवता नित्यं भूतानुग्रहकाः
तराः ऋते त्वां मोक्षदघ्नं वै वैरंकरमवैरिणां नेयं पुंसां विरागः स्यात् त्वया केवलिना मृषा ॥ मन्यसे यद्युपशमं
स्नेहपाशनिकृंतनं ॥४०॥ नानुभूय न जानाति पुमान्विषयतीक्ष्णतां ॥ निर्विद्येत स्वयं तस्मान्न तथा भिन्नधीः प
रैः ॥४१॥

विषयभोगस्य हेयत्वोपदेशेनैवेत्यतस्त्वाह नेयमिति ॥ यद्यपि त्वं विषयभोगस्य हेयत्वोपदेशेन स्नेहपाशनिकृंतनं विषयासक्तिरूपस्नेहरूपपाशः
तस्य निकृंतनं छेदकं उपशमं विरागं मन्यसे तथापि शुष्कस्त्वया केवलेन ज्ञानं विना मृषा बुद्धिभेदेन त्वयेत्यं मति चालने कृतेपि पुंसां विरागो नैव स्यादित्यर्थः
॥४०॥ कुतः यतः पुमान्नानुभूय विषयाणां तीक्ष्णतामततो दुःखरूपतां न जानाति यथा विषयाननुभूय स्वयमेव तस्माद्विषयान्निर्विद्येत विरज्येत न तु
था परैर्भिन्ना चालिता धीर्यस्य स न निर्विद्यत ॥४१॥ २५

भ्रातॄणां प्रायणं ज्ञात्वा अनुवर्तनं भ्राता धर्मविदनुतिष्ठति करोति स पुण्यमेव बंधुर्यस्य तादृशो मरुद्भिर्वैदेवैः सह मोदते ॥२१॥ अमोघं दर्शनं यस्य स परमार्थदर्शन
नारदः एतावदिति उक्त्वा प्रययौ तेमारिषा वाला: ॥ मारिषेति पाठे राज्ञः संबोधनं मारिषा इति तस्य नामांतरं ॥ भ्रातॄणां मनजानामेव मार्गं परब्रह्मोपासनरूपम
न्वगमन्ननुकृतवंतः ॥२२॥ ततस्तेषां सहांगवतिगच्छतीति सध्यङ् ॥ आतिवाहिकैः सहगंता जीवः ॥ तेन गम्यं सध्रीचीनं प्रतीचाम्बुसैभासमानेन ब्रह्मात्मकस्वात्म
याथात्म्यमात्राकारवृत्तामम्प्रातिचीनं परस्य परमपुरुषस्यानुवेधमनुकूलमविराद्धिमार्गं गतास्ते अद्यापि न वर्तंते न पुनरावर्तंते रात्रिदेवयामंप्पानमापद्यन

भ्रातॄणां प्रायणं भ्राता योऽनुतिष्ठति धर्मवित् सपुण्यबंधुः पुरुषो मरुद्भिः सह मोदते ॥२१॥ एतावदुक्त्वा प्रययौ ना-
रदोऽमोघदर्शनः ॥ तेपि चान्वगमन्मार्गं भ्रातॄणामेव मारिष ॥२२॥ सध्रीचीनं प्रतीचीनं परस्यानुपथं गताः ॥ नाद्या-
पि ते निवर्तंते पश्चिमा यामिनीरिव ॥२३॥ एतस्मिन्काल उत्पातान्बहून्पश्यन्प्रजापतिः ॥ पूर्ववन्नारदकृतं पुत्रनाश- प१५न
मुपाशृणोत ॥२४॥ चुक्रोध नारदायासौ पुत्रशोकविमूर्छितः ॥ देवर्षिमुपलभ्याह रोषाद्विस्फुरिताधरः ॥२५॥
दक्ष उवाच ॥ अहो असाधो साधूनां साधुलिंगेन नस्त्वया ॥ असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः ॥२६॥

पुनरावर्तंते निष्क्रान्तपर्याप्त विवर्तितः ॥ पुनररनाहतौ हृष्टांतः पश्चिमा अतीता यामिनीर्यथा नाभिमोरात्रयः यथा पुनर्नावर्तंते तथैते इत्यर्थः ॥२३॥ एतस्मिन्काले
नारदोपदेशमकलात्स्वानां प्रतिक्रियाणि कालेप्रजापतिर्दक्षः बहूनुत्पातान्भुवनाशप्रयुक्तान् पश्यन्ततः ॥ पूर्ववमेव नारदोपदेशकृतं पुत्राणां नाशमुपा-
श्रृणोत ॥२४॥ पुत्राणां निवृत्तिधर्मनिष्ठया मुक्तिम पश्यन्सदक्षो पितृत्रायणो विरतः स्यादिति तदनु महार्षं देवर्षिं तत्पार्श्वं गतः ॥ तदा सो दक्षो देवर्षिमुपल
भ्य पुत्रनाशान्निमित्ताद्विमूर्छितः ॥ उत्पाय नारदाय चुक्रोध क्रुद्धवान् ॥२५॥ क्रोधमेवाह अहो असाधो साधोरिव लिंगं वेषो यस्य तेन त्वया नोस्मदीया
नामर्भकाणाममसाध्वकारि कृतं ॥ तदेवाह ॥ स्वधर्मप्रवृत्तानां यः संन्यासिनां मार्गः दर्शितः ॥२६॥

भा॰ ष॰ तेपिसवलाश्वाः पित्रादक्षेण प्रजासर्गे निमित्ते सम्यगादिष्टाः धृतं व्रतं पित्रादेशकरणरूपं यैस्ते नारायणसरस्तीर्थस्योपस्पर्शनादेर्विनिर्धूतं निरस्तं मनसो म
२८ लं वासनारूपं येषां तादृशाः परमं ब्रह्म प्रणवं जपंतस्तत्र महत्तपस्तेपुश्चक्रुः ॥ अब्भक्षा अब्भक्षा अप्पानं येषां ते अप्भक्षाः उदकमात्रभक्षाः अप उपलक्षकः ॥ तस्य प्रणवस्य घटितत्वादिति
भावः ॥ २६ ॥ मदनपराणं प्रपंचयति ॥ अब्भक्षा इति ॥ अब्भक्षा एव केवलं तपं तेनिरे ताहशाः कतिचिन्मासान्कतिचिद्वा मासान्वायुभुजंतीति वायुभोजनाः कतीरिल्सुः ॥ इमं व
क्ष्यमाणं मंत्रमभ्यसंतः इडस्पतिं ईडपतिं तमेनेत्ती डोमंत्रः ॥ आर्धेत्वाहुत्वः पारस्वपदित्वात्सुट ॥ तस्यपतिमधिदेवं तं भगवंतमाराधयन्नाराधयामासुः ॥ आड
भावोप्रार्थयतेलङ् ॥ २७ ॥ मंत्रमाह ॥ ॐ इति नारस्य जीवसमूहस्यायनाय आप्यायप्राप्तकायाधाराय च पुरुषाय कृत्स्नपकमलस्यायपरमात्मने अंतः प्रविष्टपति

तेपि पित्रा समादिष्टाः प्रजासर्गे धृतव्रताः ॥ नारायणसरो जग्मुर्यत्र सिद्धाः स्वपूर्वजाः ॥ २५ ॥ तदुपस्पर्शनादेव विनि
र्धूतमलाशयाः ॥ जपंतो ब्रह्म परमं तेपुस्तत्र महत्तपः ॥ २६ ॥ अब्भक्षाः कतिचिन्मासान्कतिचिद्वायुभोजनाः ॥
आराधयन्मंत्रमिममभ्यसंत इडस्पतिं ॥ २७ ॥ ॐ नमो नारायणाय पुरुषाय महात्मने ॥ विशुद्धसत्वधिष्ण्याय म
हाहंसाय धीमहि ॥ २८ ॥ इति तानपि राजेंद्र प्रजासर्गधियो मुनिः ॥ उपेत्य नारदः प्राह वाचः कूटानि पूर्ववत् ॥ २९ ॥
दाक्षायणाः संशृणुत गदतो निगमं मम ॥ अन्विच्छतानुपदवीं भ्रातॄणां भ्रातृवत्सलाः ॥ ३० ॥

यत्र विशुद्धसत्वोपासनेन निर्मलं सत्वं मंतःकरणं धिष्ण्यमभिव्यक्तिस्थानं यस्य अशुद्धं रजस्तमोभ्यामननुविद्धं सत्वं धिष्ण्यं स्थानं यस्य तस्मै परमव्योमनिलयायेति
भावः ॥ महाहंसाय महांश्चासौ हंसश्च तस्मै महाहंसाय कल्याणगुणैर्महान्हंसो निरस्तनिखिलदोषः शुद्धस्वरूपस्तस्मै नमः ॥ उक्तविशेषणं धीमहि ध्यायेमहि ॥ २८ ॥ इतीत्थं मंत्रं जपंतः प्रज
सर्गे धीर्येषां तानपि शवलाश्वानपि राजेंद्र मुनिर्नारद उपेत्य पूर्ववद्वाचः कूटान्यहर्यश्वान्प्रति यथोक्तानि प्राह उक्तवान् ॥ २९ ॥ पूर्वोक्तात्किंचिद्विशेषमाह हे दा
क्षायणाः गदतो वदतो मम निगमं उपदेशं संशृणुत भ्रातृणां पूर्वजानामनुपदवीं मार्गानुसरणमन्विच्छत ॥ अनुगता पदवी कुगतिर्गारदयती समासः यतो यूयं भ्रातृ

श्रीभाग॰ ष॰ ३० २८

तेषां नैस्वतंत्र्यमपरवशं कालचक्रं तदबुधस्याविचारयतः असत्कर्मभिः कालवशपतितापादकैः किं नीकर्माय प्रत्युत तत्तापत्रयाभिहनिरेवेति भावः ॥१९॥ स्वपितुरादे-
शं विदन्नोति शास्त्रस्य पितुः शास्त्रमेव हि सर्वस्य पिता हितोपदेष्टत्वात् तस्यादेशं विविधज्ञापनरूपमनुशासनं निवर्त्तकं प्रवृत्तिधर्मानुष्ठाननिवृत्तिज्ञापकं यः पुमान्न
वेद स गुणविस्रंभी गुणा यशश्चादिविषया विश्वासवान् तदनुरूपाय तत्कादेशादेशानुरूपाय कथं सृष्ट्यादावनुक्रमेत सृष्ट्याद्यनुक्रमस्य पित्रादेशप्रवृत्तिकृतता
त्तदपरमाएव तदादेशानुकूलः पित्रादेशानुवर्त्ती तत्सृष्ट्यादौ मत्तेति भावः ॥२०॥ एवं वाचः कूटं विमृश्य किमकुर्वन्नित्यत्राह मुनिः ॥ इतीति ॥ हे राजन्निति तीर्थं व्यवसि-
ताः निश्चयवंतः ॥ व्यवसायो व्यवसितं भावे क्तः ॥ सोऽस्त्येषामिति व्यवसिताः ॥ अर्शआदित्वान्मत्वर्थीये च ॥ हर्यश्वाः ॥ सर्वे एकचेतसः एकमतयः तं नारदं परिक्रम्यानि-

स्वतंत्रमबुधस्येह किमसत्कर्मभिर्भवेत् ॥१९॥ शास्त्रस्य पितुरादेशं यो न वेद निवर्त्तकं ॥ कथं तदनुरूपाय गुण-
विस्रंभ्युपक्रमेत् ॥२०॥ इति व्यवसिता राजन् हर्यश्वा एकचेतसः ॥ प्रययुस्तं परिक्रम्य पंथानमनिवर्त्तनं ॥२१॥
स्वरब्रह्मणि निर्भातहृषीकेशपदांबुजे ॥ अखंडं चित्तमावेश्य लोकाननुचरन्मुनिः ॥२२॥ नाशं निशम्य पुत्राणां
नारदाच्छीलशालिनां ॥ अन्वतप्यत कः शोचन् सुप्रजस्त्वं शुचां पदं ॥२३॥ स भूयः पांचजन्यायामजेन परिसांत्वितः ॥
पुत्रानजनयद्दक्षः सवलाश्वान् सहस्रिणः ॥२४॥

वर्तनं न विद्यते निवर्त्तनं निवृत्तिर्यस्मात् तं पंथानं प्रययुः ॥२१॥ स्वरब्रह्मणि ब्रह्मतालिध्यापादकवर्णकोस्वरे परब्रह्मोपासनेन मुक्तिं गतवंतः प्रापुरित्यर्थः मु-
निर्नारदस्तु निर्भातः आविर्भूतो हृषीकेशः तस्य पदांबुजे चित्तमखंडमविच्छिन्नं यथा भवेत्तथावेश्य लोकाननुचरन्नन्वचरत् अड्भाव आर्षः ॥२२॥ ततः कोदक्षः शीलशा-
लिनां सुशीलानां पुत्राणां नारदान्नाशं निशम्य सृष्ट्युद्योगनिवृत्तिपूर्वकमुक्तिं निशम्याकर्णय शोचन्नन्वतप्यत हाः खतः सुप्रजस्त्वं शुचां पदमिति लोको किंप्र-
कारः सुप्रजनतः स्वं सुष्ठु वत्वं शोकानां स्थानमिति हि किं वदंतीत्यर्थः ॥ अत्र प्रजाप्राप्त्येन प्रजादिपत्तिरुपलक्ष्यते ॥२३॥ सदक्षोऽजेन ब्रह्मणा परिसांत्वितः समाहि-

शी॰ ष॰ २७ नदीतुभयतोवाहामित्येतद्विवृणोति ॥ संसृत्युभयकरीमिति जन्ममरणाकरीमनेनोभयतः प्रवाहो दर्शितः वेलाकूलग्राह्यौ तीरद्वयपरौ तयोरन्तर्वर्तमानेवेगितांसं
जातवेगां महतोलोकौ वेलाकूलत्वेन रूपितौ वेगेनेहलोकपरलोकप्राप्तिकरीमित्यर्थः ॥ एवं विधां मायां तदविज्ञस्य तत्तेनाविज्ञस्य तथाभूतामदृष्टस्य विचारयतः
तत्रहेतुः प्रभृतत्वस्य मायापरस्यात् कर्मभिरिहलोकप्राप्तिहेतुभिः कर्मभिः किंभवेन्न किमपि वस्तुतो तत्तस्यावरत्वादिप्राप्तिरूपोनर्थोभवेदिति भावः ॥ २६ ॥ पञ्च
विंशतितत्त्वेत्यादितत्त्वरूपाद्भुतमित्येतद्विवृणोति ॥ पञ्चविंशतितत्त्वानां जीवपर्यन्तानां संघातरूपं यत्स्वरूपं स्वपरमपुरुषस्याद्भुतं वपुर्येणं शरीरमात्मनश्चाध्यात्मं परमपुरुषेध्यायेत्
नावस्थितमसंबद्धस्य विचारयतः ॥ असत्कर्मभिर्देहात्मत्वमस्यान्तं तमात्मत्वमापादकैः कर्मभिः किंभवेन्न किमपि वस्तुतदेहात्मादिभ्रमप्रयुक्तोनर्थोभवेदिति
भावः ॥ कविवंसंविवेकपमित्येतद्व्याचष्टे ॥ ईश्वरमिति ॥ अनेन नहंसषष्ठाद्यापेउक्तः हन्तिदोषानितिहंसः निरस्ताखिलदोषः ॥ तमीश्वरं शास्त्रशास्त्रैकवेद्यं बंध

संसृत्युभयकरीं मायां वेलां कूलान्तवेगितां ॥ मनस्यतामविज्ञस्य किं मया सत्कर्मभिर्भवेत् ॥ २६ ॥ पञ्चविंशतितत्त्वा
नां रूपाद्भुतदर्पणः ॥ आत्मनश्चाप्यसम्बद्धस्य किं मया सत्कर्मभिर्भवेत् ॥ २७ ॥ ऐश्वरशास्त्रमुत्सृज्य बंधमोक्षानु
दर्शनं ॥ विविक्तपदमज्ञाय किं मया सत्कर्मभिर्भवेत् ॥ २८ ॥ कालचक्रमितिं दृष्ट्वा सर्वं निष्कम्पं जगत्

मोक्षानुदर्शनं बंधमोक्षानुदर्शयतीति बंधमोक्षहेतुप्रवृत्तिनिवृत्तिधर्मानुज्ञापनेन तौ दर्शयतीति तथा कर्तृरित्यर्थः ॥ अनेन चित्रकपषष्ठाद्यापेउक्तः विविक्तं प
क्वचित् दं यस्य तं विविक्तस्थानवर्तिनं कदयकुहरेस्थितमित्यर्थः ॥ अनेनेयाद्यापेउक्तः उत्सृज्य त्यक्त्वा अज्ञाय उक्तविधनाममलोभ्य ऐश्वर्यं शास्त्रमिति तत्रैश्वरं ई
श्वरप्रतिपादकमध्यात्मशास्त्रमुत्सृज्यानधीत्यबंधमोक्षानुदर्शनविविक्तपदमीश्वरमविज्ञायानुपास्येत्यर्थः ॥ ऐश्वर्यमिति पाठे तु ईश्वरस्य संबंधि
ऐश्वर्यं ईश्वराववेदकं तदवे श्वर्यं स्वापेक्ष्य ॥ ईश्वरस्वरूपप्रतिपादकमित्यर्थः ॥ अत्रापि पदषष्ठेनहंसषष्ठाद्यापेउक्तः ॥ असत्कर्मभिरीश्वरवे
मुख्यापादकैः कर्मभिः किमपि नामितात्मनाशरूपानर्थो भवेदिति भावः ॥ २८ ॥ रवौरत्ययमित्येतद्व्याचष्टे कालचक्रमिति ॥ यत्सर्वमाब्रह्मस्तंबपर्यन्तं जग एमः
निष्कम्पं निश्चलाप्यत्रोटयतीत्यर्थः ॥ अनेनपद्मषष्ठाद्यापेउक्तः ॥ तौ दानान्भजन्मजरामरणादिनिमित्तत्वेन ङःसहं अनेनदौरषष्ठाद्यापेउक्तः ॥ अमत्यस्य शिव २७

तयैक एव रूपेणेश्वरत्वमित्यस्यैतोर्निर्दिष्टितमर्थमाह ॥ एक इति ॥ तुर्यः जागराद्यवस्थात्रयातीतः स्वाश्रयः ॥ अनन्याधारः परः प्रकृतिपुरुषविलक्षणः भगवान् षाड्गु
ण्यपूर्णो निरस्तनिखिलदोषः एक एवेश्वरः ॥ अतः सर्वविषयधारणेन नियन्तृत्वात्तमेवं भूतमभवं भवेन वृतिभिः सम्यग्विदित्वानुपास्य एक एवेश्वर इत्यनेन पुरुषश्रेष्ठ।
शापर्यन्तकः ॥ अनेनैवेश्वरप्रतिबंधीपितकं जगत्राद्भुमितिफलितं ईशितव्यानां ईश्वरानुवर्तनमेवोचितं तादाराधेश्वराननुरूपेशास्वरवैमुख्यपादकैः क
र्मभिः किमित्यर्थः ॥ १२ ॥ विलंबाद्दृष्टनिर्गममित्यस्यार्थमाह ॥ पुमानिति ॥ विलस्वर्गं पातालं गतस्व पुमान् जीवः यत्ताय हृदयविलं ज्ञाप्यकद यमात्मा
प्रतिष्ठित इति वचनाल्लेवेति नावगच्छति यथा विलस्वर्गगतो नितरां भोगासक्तो मदांधः स्वस्वरूपादिकं न विविनक्ति ततो न निर्गच्छति च तथा प्रत्यगात्मस्व
रूपप्रकृतिविश्रकं यत्र हृदयदेशे स्थितं नावगच्छति जीवस्वरूपस्याधिष्ठानं हृदयं विलंबाद्द्वार निर्गमं स्यनेन विवक्षितमित्यर्थः ॥ समुदायाभिप्रायमाह

एक एवेश्वरस्तुर्यो भगवान् स्वाश्रयः परः ॥ तमदृष्ट्वाभवं पुंसः किमसत्कर्मभिर्भवेत् ॥ १२ ॥ पुमान्नैवैति यद्गत्वा
बिलस्वर्गं गतो यथा ॥ प्रत्यग्धामाविद इह किमसत्कर्मभिर्भवेत् ॥ १३ ॥ नानारूपात्मनो बुद्धिः स्वैरिणीव गुणान्वि
ता ॥ तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत् ॥ १४ ॥ तत्संगभ्रंशितैश्वर्यं संसरंतं कुभार्यवत् ॥ तद्गतीरबुधस्येह
किमसत्कर्मभिर्भवेत् ॥ १५ ॥

प्रत्यग्धाम हृदयं विलस्वर्गं प्रत्यक्प्रकाशं धाम ज्योतिः ॥ जीवात्मस्वरूपमविदुषः ॥ अजानतः पुंसः असत्कर्मभिः
देवमनुष्यादिशरीरबिलावस्थापादकैः कर्मभिः किं भवेत् किमपि श्रेयो नास्ति प्रत्युतानर्थ एवेति भावः ॥ १३ ॥ बहुरूपामित्यस्यार्थमाह नानेति ॥ आत्मनो जी
वस्य या नानारूपा बहुरूपा इति मती स्वैरिणीव पुंश्चलीव रागादिभिर्गुणैरन्विता बुद्धिरेव ॥ बहुरूपां स्त्रियमित्यनेनाभिप्रेतेत्यर्थः ॥ तस्या निष्ठामवसानं विवेकम
गतस्याप्राप्तस्येह लोके असत्कर्मभिः किं भवेत् प्रत्युत संसाररूपानर्थ एवेति भावः ॥ १४ ॥ पुमांसं पुंश्चलीपतिमित्यस्यार्थमाह ॥ तत्संगेति ॥ तस्याः संगेन पारवश्ये
न भ्रंशितं तिरस्कृतमैश्वर्यं यस्य मनःकर्मवृष्यपतत्वं यस्य तं कुभार्यवत् कुत्सिता भार्या यस्य तेन तुल्यं कुभार्यो निजयिनवस्त्राभरणाद्यर्जनायासदुःखीव संसरंतं जन्मज
रामरणादि प्राप्नुवंतं संसारमनुभवंतं संसरंतं जीवस्वरूपं तद्गतीः बुद्धायनस्वर्गनरकादिगतीः स्वभावबुधस्याजानतः ॥ असत्कर्मभिः स्वर्गनरकादिगत्यापादकैः

ना.७ नांदितीयांतानामविज्ञायेत्यनेनान्वयः ॥ अदृष्ट निर्गमम विज्ञाय निर्गमोपायं जीवात्मस्वरूपमाधिष्ठानं हरविलं वकुरूपामनेकरूपां स्वैरिणीं बुद्धिरूपां पुंश्च
२६ ल्यामाश्चभिचारिण्याः स्वरूपलाया बुद्धेः पतिं संसरतं जीवं नस्वरूपं ॥ ७ ॥ उभयतोवाहां सृष्ट्यप्ययकरीं नदीं मायारूपां पंचपंचाद्भुतं पंचविंशतितत्वात्मकं गृहं हंसं
जीवप्रकाशरूपं चित्रकथं चित्रपदं तं दंसंबंधमोक्षहेतवो याः कथानात्मक कथारूपाभ्यां विचित्रपदाभ्यां पृक्तमीश्वरमिति भावः ॥ क्षौरपव्यं क्षुरैः पविभिर्वज्रैश्च नि
र्मितं तीक्ष्णहेतेर्देहस्यपर्वः ॥ एवंविधं स्वयंभ्रमणशीलं कालचक्रमिति भावः ॥ ८ ॥ विपश्चितः सर्वज्ञस्य स्वपितुरनंतजन्मसुहृत्तोपदेशेन दक्षस्य शास्त्रस्यादेशमनुशासन
मनुकूलमविज्ञायाविद्वांसोऽनुरूपं कार्यं विसर्गं करिष्यथ विज्ञाय तु न करिष्यथेति भावः ॥ ९ ॥ एवमस्यापदेशरूपा गिरो देवर्षेर्वचांस्याकर्ण्य तान्निर्णेष्यंत्यः स्वयंवि
ममृशुरित्याहद्वयेन तदिति ॥ तद्देवर्षेर्वचो निशम्याकर्ण्य हर्यश्वा औत्पत्तिका मनीषया स्वभावसिद्धया मनीषया विचारशक्त्या यस्यास्तया बुद्ध्या देवर्षेर्वाचः
कृ०ट कूटमयोघनवत्कूटं दुर्भेद्यं वाचः ॥ कूटं गूढत्वमभिप्रायं वा कंचनस्यार्थः विममृशुः विचारपूर्वकमभिप्रायं निश्चितवंतः ॥ १० ॥ कथं विममृशुरित्यपेक्षा
नदीमुभयतोवाहां पंचपंचाद्भुतं गृहं ॥ क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयं भ्रमि ॥ कथं स्वपितुरादेशमविद्वांसो
विपश्चितः ॥ अनुरूपमविज्ञाय अहो सर्गं करिष्यथ ॥ ९ ॥ श्रीशुक उ० ॥ तन्निशम्याथ हर्यश्वा औत्पत्तिकमनीषया
वाचः कूटं तु देवर्षेः स्वयं विममृशुर्धिया ॥ १० ॥ हर्यश्वा ऊचुः ॥ भूः क्षेत्रं जीवसंज्ञं यदनादि निजबंधनं ॥ अदृष्ट्वा तस्य नि
र्वाणं किमसत्कर्मभिर्भवेत् ॥ ११ ॥ यां तैर्विमर्शपनिर्णीतार्थानाहदशभिः श्लोकैरिति ॥ तावच्छब्दार्थमाह भूः क्षेत्रमिति ॥ जीवति प्राणान्धारयतीति जी
वः सप्राणः सर्वसंज्ञाय स्मृतत्स्य शब्दवाच्यं ऽस्यार्थः ॥ यद्वा जीवः प्रत्यगात्मैव तेन सम्यग्ज्ञायते इति तज्जीवसंज्ञं वा कुलकात्कर्मेणि कः ॥ जीवेन ज्ञेयमित्यर्थः
अतएवोक्तं तिर्यग्मिति शरीरस्य जीवेन ज्ञेयत्वमानात ॥ अनादि निजबंधनमनादि परंपरापरूपकर्मनिबंधनं यत्तत्क्षेत्रं तत्र शब्दार्थः इति विममृशुरित्यर्थः ॥ अत्र त
दाशयं तन्निर्णीतं वदन्समुदायाभिप्रायमाह ॥ अदृष्ट्वेति ॥ तस्य क्षेत्रस्य विवक्षितस्य देहस्य निर्वाणं अंतमपदृष्ट्वा विवक्षितं ॥ प्रकृतो देहस्य प्रलयमदृष्ट्वा
ऽनात्मव्यासक्तैर्भिः किं भवेत् ॥ जन्मजरामरणादिदेहापादकानादिकर्मनिबंधमनिवर्तयद्भिः पश्चात्तमसत्याप्रादकैः कर्मभिः न कोऽपि पुरुषार्थो इत्यर्थः ॥ अत्र

[illegible] २९
२६

अपृथक्स्वधर्मशीलाः समानधर्माचरणशीलाः प्रजासर्गनिमित्ते पित्रार्द्धचेतसमेन प्रोक्ताः आदिष्टा प्रतीचीं दिशं प्रययुः ॥२॥ क सिंधुसमुद्रयोर्यत्र संगमः तत्र नारायणसर ॥ आरभ्य सु
महत्सुमहत्तरं मुनिभिः सिद्धैश्च निषेवितं तीर्थं वर्तते तत्र प्रययुरित्यर्थः ॥३॥ तस्य तीर्थस्योपस्पर्शनादेव विनिर्धूतमलः निरस्तमलस्त्वाशयोंतःकरणं येषां तादृशास्ते पर
महंसे धर्मे परमहंसानां ज्ञानिनां कर्मपारमहंस्यं तस्मिन्विहिते धर्मे प्रोत्पन्ना मतिर्येषां तादृशा अपि भवन ॥४॥ एवंभूता अपि पित्रादेशेन प्राचेतसाज्ञया यंत्रितास्त्वपी
कृताः उग्रं तप एव तेपिरे चक्रुः ॥ पारमहंस्यधर्मे परा अपि पित्रादिष्टप्रजावृद्धिविधानोपयुक्तं तप एव चक्रुरित्यर्थः ॥ एवं प्रजाभिवृद्धये यतमानान्प्रजाभिवृद्ध्युप
कयत्नं कुर्वाणांस्तान्हर्यश्वान् देवर्षिः श्रीनारदो ददर्श देवेति देवर्षेर्दर्शनस्य दौर्लभ्यं द्योतयति ॥५॥ हर्यश्वानस्तानुवाच ॥ उक्तमेवाह ॥ कथमित्यादिना सर्गं करि

अपृथग्धर्मशीलास्ते सर्वे दाक्षायणा नृप ॥ पित्रा प्रोक्ताः प्रजासर्गे प्रतीचीं प्रययुर्दिशं ॥२॥ तत्र नारायणस
सिंधु रस्तीर्थं सिंधुसमुद्रयोः ॥ संगमो यत्र सुमहन्मुनिसिद्धनिषेवितं ॥३॥ तदुपस्पर्शनादेव विनिर्धूतमलाशयाः ॥ ध
र्मे पारमहंस्ये च प्रोत्पन्नमतयोप्युत ॥ तेपिरे तप एवोग्रं पित्रादेशेन यंत्रिताः ॥ प्रजाविवृद्धये यत्तान्देवर्षिस्ता
उवा न्ददर्श ह ॥५॥ नारद उवाच ॥ उवाच चाथ हर्यश्वाः कथं स्रक्ष्यथ वै प्रजाः ॥ अदृष्ट्वांतं भुवो यूयं बालिशा बत पालकाः ॥ त
थैकपुरुषं राष्ट्रं बिलं चादृष्टनिर्गमं ॥ बहुरूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिं ॥७॥ ध्युपेत्यंतेन ॥ हे बालका यूयं बालिशा

अज्ञाः संतः प्रजाः कथं स्रक्ष्यथ तामेवाह ॥ अदृष्ट्वेति भुवोंतमदृष्ट्वा कथं स्रक्ष्यथेत्यन्वयः ॥ यद्यपि भुवोंतज्ञानादिकं सृष्ट्युपयोगी न भवतीति भाति तथापि न तत्सृ
तजमथ ष्ट्युपयोगि विनोच्यते तस्य भुवः देहत्वमित्यादिभिः स्पष्टीभवति देपकत्वावगमात् किं त्वदृष्ट्वा सर्गं कर्तुमुद्यताः ॥ दृष्ट्वा तु भवंतः सर्गोद्योगान्निवृत्ता एव भवेयु
रित्यत्रोच्यते ॥ कथंशब्देन भुवोंतज्ञानाभावे सर्गोद्योगस्य संभावना द्योत्यते ॥ अविज्ञाताय कथंचित्सर्गं कर्तुमुद्यता विज्ञाय तु सुतरां तद्योगान्निवृ
त्ता भवेयुरित्यर्थः ॥ भुवः पार्थिवस्य देहस्यांतमवसानमदृष्ट्वा अनालोच्येत्यर्थः ॥६॥ एकः पुरुषः ईश्वरो यस्मिंस्तज्जीवोपाधिः ईश्वरनियाम्यं जगत्तत्र राष्ट्रादि॥

अथ ममर्थे येनात्मनो मननानंतरं ते मयाभिहितः ॥ तपतपेत्यभिहितः ॥ दारुणं दुष्करं तपो तप्यताकरोत् मचतत्तत्तपः विभुर्वृंहणायेन तपोबलेन विश्वसृजः प्रजाप
तीन् पुरा नदत्तादीनसृजत् तत्तपएव विश्वस्योपबृंहणमित्यभिप्राय ॥५०॥ संततिहेतुमुपायमाह एषेति ॥ अंगहे दक्ष पंचजनस्य प्रजापतेर्या असिक्नी नाम दुहिता
सैषा हे प्रजेश पत्नीत्वे भार्यात्वेन त्वया ग्राह्या ॥५१॥ मिथुनस्य योर्व्यवायो रतिः स एव धर्मो यस्य स त्वं मिथुनव्यवायधर्मिण्यामस्यामसिक्न्यां इमं प्रजासर्गं भूरिशो भावयिष्यसि
वर्द्धयिष्यसीत्यर्थः उभयोरपि मिथुनव्यवायधर्मविशेषणं परस्परानुकूलत्वसूचनार्थं ॥५२॥ ततोऽधस्तादर्वाचीनाः प्रजाः सर्वाः मदीयया मायया मत्संकल्पेन मिथु
नीभूय भविष्यंति मिथुनीभूता भविष्यंति मिथुनकर्मणोत्पत्स्यंत इत्यर्थः ततोऽधस्तात्प्रजा इत्यनेन प्राचेतसात्पूर्वं केवलसंकल्पादिभिरपि प्रजा नासृजन्निति

अथ दितितो देवसुतपोऽतप्यत दारुणं ॥ न ददृशे विश्वसृजो गुप्मान् येनादाव सृजद्विभुः ॥५०॥ एषा पंचजनस्यांग
दुहिता वै प्रजापतेः ॥ असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यतां ॥५१॥ मिथुनव्यवायधर्मस्त्वं प्रजासर्गमिमं पुनः
मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि ॥५२॥ ततोऽधस्तात्प्रजाः सर्वा मिथुनीभूय मायया ॥ मदीयया भविष्यंति
च मे बलिं ॥५३॥ श्रीशुक उवाच ॥ इत्युक्त्वा मिषतस्तस्य भगवान् विश्वभावनः ॥ स्वप्नोपलब्धार्थ इव तत्रैवांतर्दधे ह हरिष्यंति
रिः ॥५४॥ इति श्रीभागवते षष्ठस्कंधे हंसगुह्यस्तवं नाम चतुर्थोऽध्यायः ॥४॥ श्रीशुक उवाच ॥ तस्यां स पांचजन्यां
वै विष्णुमायोपबृंहितः ॥ हर्यश्वसंज्ञानयुतं पुत्रानजनयद्विभुः ॥१॥

भविष्यंतीत्यर्थः ॥ तथा मे मह्यं च बलिं हरिष्यंति महदाराधनरूपयज्ञादिकर्म करिष्यंतीत्यर्थः ॥५३॥ इतीत्यमुक्त्वा विश्वस्य भावन उत्पादको भगवान् हरिस्तस्य प्राचेतस
स्य मिषतः पश्यतः स्वप्नोपलब्धार्थ इवेति विस्मयनीयत्वे विषददृष्टत्वे च दृष्टांतः ॥ यथाऽऽकस्माभंस्वप्नधीगम्यं विधानुपरूपं परमिति ॥५४॥ इति षष्ठे चतुर्थः ॥४॥
ततः प्राचेतसः किमकरोदित्यपेक्षायामाह मुनिः ॥ सइति विष्णुमायोपबृंहितः भगवत्संकल्पेन व्याप्तः स विभुर्दक्षः तस्यां पांचजन्यां पंचजनस्य दुहितरि हर्यश्व नाम
संज्ञानयुतं पुत्रानजनयत् ॥१॥ तान्विविधिनष्ठिहे नृपसर्वे दानापणाः दक्षस्य पुत्राः अनंतरायत्येषगा षष्ठिः ॥
ने

विश्ववृद्धिकरत्वात्तपसस्तंतत्रसृष्टंतदेवंतत्कवत्स्वसंगादस्मात्पिलोकवृद्धिकराणिस्तौति ॥ तपइतिहेब्रह्मन्तपःध्यानंममहृदयंविद्यामंत्रजयःतनुःशरीरं
क्रियाः ॥ स्मार्तक्रियाख्याकृतिःसंस्थानंक्रतवोयज्ञाश्चममांगान्यवयवाःसोमसाध्यायज्ञाःक्रतवश्चपुरोडाशादिसाध्याःयज्ञाइतिभेदः ॥ क्रतवोजाताइतिभेदे
कृतवोज्ञाताइतिपाठेकृतवोममांगानिज्ञाताइत्यर्थः धर्मःस्मार्तोदानादिरूपःआत्मामनः ॥ असवःप्राणाःतपआदीनांस्वहृदयत्वेनरूपणंततस्तत्स्वरूपे
णस्वस्यजगदुत्पत्तिस्थितिलयहेतुत्वात्जगत्कारणस्यावयवत्वेनरूपणोहितपरोहितयःआदिमांक्रतिःसंपन्नाभवतियद्वाहृदयतत्वाहृत्संगात्मास्तनालोकेष्वीति
विषयत्वदर्शनात्स्वस्यतपआदयोनितरांप्रीतिविषयाइतिज्ञापनायहृदयादिभावेनरूप्यंते ॥ ४६ ॥ भगवतस्तपोपबृंहितत्वमेववक्तुंतावज्जगदुत्पत्तेःप्राक्कार
णस्यवस्तुनोवस्थानप्रकारमाह ॥ अहमेवेति ॥ अग्रेसृष्टेः ॥ प्रागहमेवासमहमेकएवाविभक्तनामरूपविच्छरीरकोवस्थितइत्यर्थः ॥ तदेवोपपादयति ॥ अ

तपोमेहृदयंब्रह्मंस्तनुर्विद्याक्रियाकृतिः ॥ अंगानिक्रतवोजाताधर्मआत्मासवःसुराः ॥ ४६ ॥ अहमेवासमेवा
ग्रेनान्यत्किंचांतरंबहिः ॥ संज्ञानमात्रमव्यक्तंप्रसुप्तमिवविश्वतः ॥ ४७ ॥ मय्यनंतगुणेनंतेगुणतोगुणविग्रहः ॥ यदा
सीत्ततएवाद्यःस्वयंभूःसमभूदजः ॥ ४८ ॥ सवैयदामहादेवोममवीर्योपबृंहितः ॥ मेनेखिलमिवात्मानमुद्यतःसर्गकर्मणि ॥ अ

स्यहंतांतरंबहिर्वाकिंचिन्नासीत्कार्यमन्यत्चिदचिद्वाकिंचिन्नासीदित्यर्थः ॥ तदाजीवप्रकृतिस्वरूपनाशशंकांव्यावृत्त्यर्थमाह संज्ञानमात्रमिति ॥ संज्ञातीतिसंज्ञानंन
द्यादिवाकर्तेसिल्यः तदेवतन्मात्रंमात्रशब्देनदेवमनुष्यादिनामरूपविभागव्यावृत्तिः नामरूपविभागरहितंज्ञानत्ज्ञानंतथाविश्वतःकार्त्स्न्येनप्रसुप्तंप्रलीनंसूक्ष्म
मव्यक्तंप्रधानंचप्रसुप्तमिवेतिवशब्देनतस्यलीनत्वेपिजगदात्मनापरिणामशक्तिमत्स्यानयगतेतिसूच्यते ॥ ४७ ॥ अनंतकल्याणगुणाकरेस्वरूपतोप्यनंतेमयिअ
सीदितिक्रियापदपरिणामेनान्वयःमयिशरीरत्वेनावस्थितमासीदित्यर्थः एवंसूक्ष्मचिदचिच्छरीरकत्वेनावस्थितस्यममशरीरभूतात्गुणत्रयात्मकप्रधानामह
दादिक्रमेणगुणविग्रहः त्रिगुणपरिणामरूपोब्रह्मांडात्मकोविग्रहोममदेहःयदासीत्तदानतोगुणविग्रहाद्देवाद्यःसमष्टिपुरुषःस्वयंभूःयोनिजःअजो
ब्रह्माआसीत् ॥ ४८ ॥ सवैमहादेवोब्रह्माममवीर्येणसंकल्परूपज्ञानेनउपबृंहितःव्याप्तः ॥ अनेनजीवेनात्मनानुप्रविश्यपोषकोरीत्यसंकल्परूपज्ञानेनआप्तइत्यर्थः

सदासर्गकर्मणिजगत्सृष्टिकर्मणिउद्युक्तोपिखिलमसमर्थमिवात्मानं
स्वात्मानंमेनेअमन्यत ॥ ४९ ॥

ना॰प्र॰
२४

वीतमंगयस्य सः॥ तस्य श्रीवत्सः कौस्तुभश्च यस्य सः॥ ३७॥ महाकिरीटं कटके च यस्य सः स्फुरन्ति मकराकारे कुंडले यस्य॥ कांच्यादिभिर्भूषितः॥ तत्र कांची कटिमेखला क्व यमन्त्र पादनूपुराणि कटकस्तोकं तावत्॥ ३८॥ त्रैलोक्यं मोहयतीति त्रैलोक्यमोहनं तत्याद्रितां घ्रिः श्रीपुरुषोत्तममंत्रोपास्यं श्रीपुरुषोत्तमाख्यं तद्रूपं बिभ्रत्॥ त्रिभुवनेश्व रः॥ नारदादिभिः पार्षदैः सुरश्रेष्ठैश्च परिवृतः॥ अनुष्टुप्तो गायद्भिः सिद्धादिभिरनुष्टुतः अनुस्रुतः एवंविधः प्रादुरासीदिति॥ ३९॥ तन्महदाश्चर्यं भगवतो रूपं विलोक्य गतसाध्वसः॥ वीतभयः प्रजापतिः प्राचेतसः प्रहृष्टः चित्तो भूमौ दंडवन्नमस्कृतवान्॥ ४०॥ तीव्रयानिरतिशयया मुदा आपूरितानि मनो धाराणीन्द्रियाणि तैर्यथा ह्रदिन्योऽर्केरैः संपूर्यन्ते तथा महानंदापूर्णत्वान्मनोधाराणां नैर्यत्कोन किंचिदपि मनिषितं वकुं शक्तो भूदित्यर्थः॥ ४१॥ तथ्यानिरति

न किंचनोदीरयितुमशकत्तीव्रया मुदा॥ आपूरितमनोद्वारैर्ह्रदिन्य इव निर्झरैः॥ ४१॥ तं तथावनतं भक्तं प्रजाकामं प्रजा
पतिं चित्तज्ञः सर्वभूतानामिदमाह जनार्दनः॥ ४२॥ श्रीभगवानुवाच॥ प्राचेतस महाभाग संसिद्धस्तपसा भवान्॥ यत श्रद
४३ धयामत्परया मयि भावं परं गतः॥ प्रीतोहं ते प्रजानाथ यत्तेस्योद्बृंहणं तपः॥ ममैष कामो भूतानां यद्भूयासुर्विभूतयः॥ ब्र
ह्मा भवो भवंतश्च मनवो विबुधेश्वराः॥ विभूतयो मम ह्येता भूतानां भूतिहेतवः॥ ४५॥

शयया मुदा स्वमनिषितं विज्ञापयितुमशक्तम

वनतं नम्रीभूतं प्रजाः कामयमानं भक्तं प्रजापतिं दक्षं प्रति सर्वेषां सत्वानां भूतानां चित्तज्ञः अभिप्रायज्ञो भगवान् जनार्दनः॥ इदं वक्ष्यमाणमुवाच॥ ४२॥ उक्तमेवाह प्राचेतस इति॥ हे महाबुद्धिमन् प्राचेतस भवान् तपसा संसिद्धः यत यस्मात्परया श्रद्धया मयि परमुत्कृष्टं भावं भक्तिं गतः प्राप्तवान्॥ ४३॥ हे प्रजानाथ ते तुभ्यमहं प्रीतः कुतः यस्मात्तेतवास्य जगत उद्बृंहणं वृद्धिकं जगद्वृद्धिकत्वात्तपसस्तेनाहं प्रीत इति भावः एतदेवोपपादयति ममेत्यर्द्धेन ममायमेव कामः॥ तत्राह यद्भूतानां भूतयः समृद्धयो भूयासु भवेयुरिति यत तेन मम मनीषितं जगद्वृद्धिकरत्वात्तत्तपसस्तेनाहं प्रीत इत्यर्थः॥ ४४॥ ब्रह्माद्यनुभवेन भूतविस्तारप्रयत्नस्तत्वाभि तराचेत्याह ब्रह्मेत्येकेन श्लोकेन ब्रह्मा चतुर्मुखः भवो रुद्रः भवंतः प्रजापतयः मनवः स्वायंभुवादयः विबुधेश्वराः इंद्रादयश्चैते सर्वे मम विभूतयः अंशाः भूतानां भूतिहे

कोसौ कामः

२४

गंधस्वेद्रोपाताघ्राकृतदिव्यमंगलविशिष्टोभक्तानुग्रहार्थंभवतीर्णस्तैरुपलभ्यतइत्युक्तेविश्वरूपेणापितैरुपलभ्यतइत्याह ॥ यःप्राकृतैरितिप्राकृतार्थगोच
रैर्ज्ञानपथैरिंद्रियैर्यथाशयंमनोवृत्त्यनुकूलंइंद्रियाणांमनोनुवृत्त्यनुगुणप्रवृत्तेःदेहगतःस्वदेहमूर्तश्चिदचिद्वस्तुगतोविभातिप्रकाशते ॥ अयमर्थःयथा
राजशरीरेदृष्टोराजाइष्टोभवतिएवंजगतःपरमात्मशरीरत्वाज्जगद्दर्शनात्स्वविशिजगद्दर्शनेसतिपरमात्मादृष्टोभवतीति ॥ जगद्विलक्षणस्याप्यस्यविशिष्ट
तयाप्रकाशदृष्टांतमाहयथानिलइति ॥ स्वयंपृथिवीविलक्षणोवायुःपार्थिवंगुणमाश्रितःपार्थिवपुष्पपरागसंसृष्टोगंधवहइतिप्रकाशतेतद्वज्जगद्विलक्ष
यःप्राकृतैर्ज्ञानपथैर्जनानांयथाशयंदेहगतोविभाति ॥ यथानिलःपार्थिवमाश्रितोगुणंसईश्वरोमेकुरुतान्मनोर
थं ॥ ३४ ॥ श्रीशुकउवाच ॥ इतिस्तुतःसंस्तुवतःसतस्मिन्नघमर्षणे ॥ आविरासीत्कुरुश्रेष्ठभगवान्भक्तवत्सलः
३५ कृतपादःसुपर्णांसेप्रलंबाष्टमहाभुजः ॥ चक्रशंखासिचर्मेषुधनुःपाशगदाधरः ॥ ३६ ॥ पीतवासाघनश्याम
प्रसन्नवदनेक्षणः ॥ वनमालानिवीतांगोलसच्छ्रीवत्सकौस्तुभः ॥ ३७ ॥ महाकिरीटकटकःस्फुरन्मकरकुंडलः ॥
कांच्यंगुलीयवलयनूपुरांगदभूषितः ॥ ३८ ॥ त्रैलोक्यमोहनंरूपंबिभ्रत्त्रिभुवनेश्वरः ॥ वृतोनारदनंदाद्यैःपार्षदैःसुर
यूथपैः ॥ ३९ ॥ स्तूयमानोनुगायद्भिःसिद्धगंधर्वचारणैः ॥ रूपंतन्महदाश्चर्यंविचक्ष्यागतसाध्वसः ॥ ननामदंडवद्भूमौप्र
हृष्टात्माप्रजापतिः ॥ ४० ॥ ॥ गोपिजगद्वैरीरकत्वात्तन्मात्ररूपभक्तयापरमात्माविभासतइत्यर्थः ॥ काठिन्यवान्योविभर्तितस्मैभूम्यात्मनेनमःइत्युक्तेः ॥ ३४
एवंतुभ्यमुपदिष्टेनानेनस्तोत्रेणाभिष्टुतोभगवान्प्राचेतसस्यप्रसन्नोभूदित्याहमुनिः ॥ इतीति ॥ हेकुरुश्रेष्ठइत्थंस्तुतोभगवांस्तस्मिन्नघमर्षणेतीर्थेसंस्तुवतोदक्ष
स्यप्रादुरासीत्पुरस्तादिशेषः ॥ तत्रहेतुःभक्तवत्सलः ॥ ३५ ॥ प्रादुर्भूतंभगवंतंवर्णयति ॥ कृतपादइति सुपर्णस्यगरुत्मतोंसेस्कंधेपाःकृतौविन्यस्तौपादौयेन ॥ प्रलंबाआ
जानुलंबिनःअष्टौमहाभुजायस्यसः ॥ चक्रादीन्धारयतीतिधरः ॥ तत्रासिःखड्गःचर्मखेटः ॥ ३६ ॥ पीतेवाससीयस्यसः ॥ घनवच्छ्यामःप्रसन्नेवदनेईक्षणेचयस्यसः ॥ वनमालयानि
न

गी॰ व॰
२३

योर्मतयोः तावेकस्यावीश्वरविषयौ चेद्विरुद्धौ स्यातां । एवमस्तित्वनास्तित्वयोर्भिन्नाभिन्नयोर्विरुद्धधर्मयोर्वैदिकयमारणयोः सतोरप्यकिंचनापेक्षितं वेदांतवाक्यम
पेक्षित ॥ अतीन्द्रियेश्वरविषयकास्तित्वनास्तित्वयोः प्रमाणजिज्ञासायामनादिनिधनाविच्छिन्नसंप्रदायासंभाव्यमानदोषगंधं वेदांतवाक्यमेव प्रमाणमपेक्षि
तमित्यर्थः ॥ तच्च वेदांतवाक्यं सत्यं ज्ञानमित्यादि तत्कम्पं च सममेकरूपमनुकूलमानंदरूपं परं सर्वविलक्षणं बृहदपरिच्छिन्नमतो वेदांतवाक्यरूपं प्र
माणं विहायकेवलास्तित्व नास्तित्व विवादो भ्रममूलो व्यर्थ इति भावः ॥ यद्वा अनंतगुणानसंतो निर्वादो भ्रममूल इति सूचितं तदेवोपपादयति ॥ अस्तीति ॥ य
च्चेदं सत्यादिभिर्गुणैर्जातमस्तीत्यवगम्यते ॥ निष्क्रियं निष्कलमित्यादिभिर्निर्गुणत्वं प्रतीतौ चास्तित्वनास्तित्वधर्मौ तु भावैकवस्तुनिष्ठौ चेद्विरुद्धौ तयोश्चाभि
न्नाधिकरणयोर्द्वयोर्वस्तुनिष्ठयोरेकस्थयोः सतोरेकस्मिन्नेकनितयोर्विरोधे सतीत्यर्थः ॥ तत्रान्यतरव्यवस्थापकं किंचिद्ब्रह्मस्वरूपबोधकं वेदांतवा
क्यप्रमाणमपेक्षितं ॥ एवं सांख्ययोगयोरपि समन्तुल्यं तयोरपीश्वरस्वरूपसत्त्वाभावादयोर्विरोधे सत्यन्यतरव्यवस्थापकं किंचित्प्रमाणमपेक्षितमि

अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः । अवेक्षितं किंचन योगसांख्ययोः समं परंह्य
नुकूलं बृहत्तत् ॥ २२ ॥ योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननंतः ॥ नामानि रूपाणि च जन्मकर्म
भिर्भेजे स मह्यं परमः प्रसीदतु ॥ २३ ॥

त्यर्थः ॥ तच्च वाक्यं सत्यं ज्ञानमनंतं ब्रह्मेत्यादिकं तद्वाक्यप्रतिपन्नं च वस्तु परमनुकूलं बृहच्च परत्वादनुकूलत्वाद्बृहत्त्वादिगुणयुक्तमिति निर्गुणवादो निरीश्वर
वादश्च भ्रममूलक इति भावः ॥ योगसांख्ययोरिति दृष्टांततया योगे ध्येयत्वेन निरीश्वरवादसांख्यगुणः सत्ववादोपीति ॥ अत्र परत्वेन प्रकृतिपुरुषविलक्षण
त्वाद्विनाशस्य प्राकृतत्वं विवक्षितः ॥ अनुकूलत्वेन ज्ञानशब्दार्थो व्याख्यातः ॥ आनंदरूपज्ञानस्यैवानुकूलत्वात् बृहत्पदेनानंतशब्दार्थः स्वरूपेण गुणैश्चाप
रिच्छिन्नत्वं बृहच्छब्दार्थः ॥ एकोचेक प्रमाणाभावात् २२ एवं वादिनां विप्रतिपत्तिविषयत्वेन ब्रह्मस्वरूपतद्गुणतच्छक्तीनां दुर्ज्ञेयत्वमुक्तं ॥ अथैवं दुर्विज्ञेयस्वरू
पगुणशक्तिरप्याश्रितसुलभत्वं निवदन्नतदनुग्रहं प्रार्थयते योऽनुग्रहार्थं भजतां पादमूलं भजतामनुग्रहणार्थं स्वयमनामरूपः कर्मकृतनामरूपरहितोपि जन्मकर्म
भिरवतारचेष्टितैः सह नामानि कृष्णेति दमासिराम कृष्णादि रूपाणि खेच्छोपात्तान्यप्राकृतशरीराणि च भेजे ॥ आत्मानं दर्शयितुं परिगृहीतवान् स परः

२३

ननु विश्वं परमाणुकारणं ईश्वरस्तु निमित्तमिति वैशेषिकादयः प्रधानकारणकं पुरुषातिरेकेणेश्वरः स्यान्नवा पुरुषस्तु निमित्तमात्रं इति सांख्यादयो वदंति किंच
सर्वमपि वस्तु नित्यमनित्यं च भिन्नमभिन्नं चेति तथा सदसदात्मकं चेति ॥ अतः कथं तत्त्वमस्य जगतः ब्रह्मैककारणत्वं तदनन्यत्वं चोच्यते इतीमांशंकांप
रिहरन्नमस्करोति ॥ यच्छक्तय इति वदतां स्वपक्षनिर्बंधनेन स्वशास्त्रमुपदिशतां स्पर्धया ॥ वादिनां वादं कुर्वतां वैशेषिकादीनां यस्य परमात्मनः शक्तयः पृथिव्यादयः विव
दमानयोः परस्परविरुद्धाविरुद्धयोः वादयोर्भुवो भवंति शक्तिशब्देन पृथिव्यादय उच्यंते तेषां भगवतः कार्य्योपयोगपृष्टपकमिद्धविशेषणत्वात् ॥ तथा च प
राशरः एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा ॥ परस्य ब्रह्मणस्तस्य तथेदमखिलं जगदात्मकान्पृथिव्यादीन्शक्तिशब्देन व्यपदिष्टवान् ननु सर्वैरपि
पृथिव्यादिस्वरूपाभ्युपगमान्न ते विवादभुवस्तत्राह ॥ कुर्वंतीति ॥ यस्य शक्तयः पृथिव्यादयः आत्ममोहं स्वविषयकमोहं तेषां वादीनां कुर्वंति ॥ पृथिव्यादिस्वरूपा
भ्युपगमेपि परमाणुकारणकत्व नित्यानित्यत्व भिन्नाभिन्नत्व सदसत्त्वादिप्रकारविप्रतिपत्तिं कुर्वंतीति प्रतिपत्तिविषयप्रकारवत्यः शक्तयो भवंति इत्यर्थः

यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवंति ॥ कुर्वंति चैषां मुहुरात्ममोहं तस्मै नमोऽनंतगुणाय भूम्ने ॥ ३१ ॥

तस्मै अनंतगुणाय असंख्येयकल्याणगुणगणाय भूम्ने स्वरूपतोपि बृहते नमः यद्यप्येवं वादीनां विवादास्तथापि पृथिव्यादीनां परमात्मशरीरत्वतत्कारण
कत्वयोः पृथिव्याद्यवस्थाया नित्यत्वेपि द्रव्यस्य नित्यतायाः तस्य तत्परिणामत्वेनासदात्मकत्वानादेष्वश्रुतिस्मृत्यादिबहुप्रमाणप्रतिपन्नत्वेनावैदिका
नां केवलं विप्रतिपत्तिरेवेति भावः श्रुतयस्तु यस्यात्मा शरीरं यस्य पृथिवी शरीरं यस्यापः शरीरं यस्याव्यक्तं शरीरमात्मन आकाशः संभूतः तोयेन जीवान्व्यससर्ज
भूम्यां नासदासीन्नो सदासीत्तदानीं तम आसीदित्यादयः स्मृतयश्च विष्णोः सकाशादुद्भूतं अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ यदंबु वैष्णवः कायस्ततो
विप्र वसुंधरा ॥ पद्माकारा समुद्भूता पर्वताब्ध्यादिसंयुता ॥ तदेतदक्षयं नित्यं जगत्स्थावरजंगमं ॥ प्रकृतिं पुरुषं चैव विद्ध्यनादी ॥ सद्भाव एवं भवतो मयोक्तो ज्ञानं य
था सत्यमसत्यमन्यदित्यादयोनुसंधेयाः ॥ अनंतगुणायेत्यनेन निर्गुणत्ववादो भ्रममूलक इति सूचितं ॥ यः सर्वज्ञः सर्वविदित्यादिभिर्बहुश्रुतिभिः कल्या
णगुणाकरत्वस्य प्रतिपन्नत्वात् ॥ भूम्न इत्यनेन जीवानामभूमत्वं ज्ञापितं ॥ एवं पृथिव्यादिस्वरूपाभ्युपगमेपि तत्प्रकारविप्रतिपत्तिप्रयोजकेति ॥ श
क्तीनां परमात्मस्वरूपप्रतिपत्तिं वदन्वादिविप्रतिपत्तीनां शास्त्रानुसारेण परिहारार्थं तमाह ॥ अस्तीति ॥ घटपटादिवस्तुनिष्ठावस्तित्वनास्तित्वधर्मौद्दिश्य प्रयोगसांख्य

गी॰भा॰
२२

त्वाच्चकारणावस्थत्वरपितत्त्वयात्मकपुक्तिकं बलात् ॥ सदेव सोम्येदमग्र आसीत् ॥ प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपीत्यादिप्रमाणबलात्तत्वासूपपन्नं तत्रक
र्यावस्थायां च यत्रात्मनि निविष्टस्यः पृथिव्यादितः सोत्तरमंतरे मंचरन्यस्यात्तरशरीरंयोऽव्यक्तमंतरे संचरन्यस्याव्यक्तं शरीरं इत्यादिप्रमाणबलादात्मत्वेन परम
त्मनो विशेषणत्वं चिदचितोः शरीरत्वेन विशेषणत्वे चेष्यते ॥ एवं च कारणत्वेनावस्थितं ब्रह्म सूक्ष्मचिदचिद्विशिष्टं कार्यावस्थायां स्थूलचिदचिद्विशिष्टं तेनावस्थितमि
ति कारकप्रक्रियात्मकस्य तत्मिन्शरीरभूतचिदचिदात्मकत्वात्तत्त्वयुक्तं मकथत्वादिकमपि मद्धारकमेवेति विशेष्यवतेतत्मिन्नतस्य सत्ताप्रसंगः ॥ निष्क्रिय
त्वादिश्रवणांतु विशेष्यमतत्त्वस्वरूपाभिप्रायमिति न तद्विरोधः कार्यावस्थकारणावस्थयोस्तस्य चिदचिच्छरीरकत्वादेव विश्वरूपमप्युपपन्नं योगशास्त्रेत्यादि
श्रुतिवशात् जीवस्याणुपरिमाणत्वावगमात्तस्यैकदानेकशरीरांतःप्रविशासंभवेपि मत्संज्ञानमनंतं ब्रह्म तरोत्यादिश्रुत्या तत्स्वरूपस्यापरिच्छिन्नत्वावगमात्तस्य
नेकशरीरेषु जीवांतः प्रवेशानियमनं संभवतीत्यनेकशरीरकत्वोपपत्तिः ॥ कार्यावस्थायां कारणावस्थायां च चिदचिच्छरीरकत्वाद्विश्वरूपत्वमपि तस्योपपन्नं
ननु विश्वरूपत्वं नाम विश्वरूपं शरीरं यस्य तस्य भावस्तत्त्वमिति न विवदितं ॥ तथा सति सर्वं खल्विदं ब्रह्म तत्तादात्म्यमिदं सर्वं ॥ अयमात्मा ब्रह्म तत्त्वमसीत्यादि
जगद्ब्रह्मतादात्म्यश्रवणाविरोधापत्तेः ॥ किं तु विश्वरूपत्वं नाम विश्वात्मकत्वेदं चनमः प्रायेत्युपक्रांतपरत्वविरोधस्तत्राह ॥ अनन्यादिति विश्वा नन्या
दित्यर्थः विश्वरूपत्वस्य विश्वानन्यात्मकत्वेपि न विरोधः ॥ यत्साकप्रसिद्धं कारणं सूक्ष्मचिदचिद्विशिष्टं तदेव कार्यावस्थायां स्थूलचिदचिद्विशिष्टमित्येक
स्यैवावस्थाद्वययोगित्वेन कार्यावस्था कारणावस्थयोरेकद्रव्यगतत्वेन विश्वानन्यत्वोपपत्तेः ॥ अनेनासत्कार्यवादव्युदासः ॥ तस्माच्च शरीरकं स ते गद
नन्यत्वमारंभणशब्दादिभ्यः इत्युपक्रांतं परत्वं तत्र युक्तं निःसमाभ्यधिकत्वं च विशेष्यनिष्ठं नित्यमित्रायेणापरमं पराख्यरेषामिति चोक्तं ॥ परावरेषां ब्रह्मा
दिजीवानां परं कारणमात्रस्याधिष्ठात्रपेत्तत्त्वप्रांकांवारयति ॥ एकमिति ॥ निस्समाधिकमेव प्राक् प्रसिद्धं इत्यर्थः ॥ इदं चैकत्वं स्वरूपनिष्ठत्वमिति विशेष्या
कारेण निमित्तत्वं विशिष्टाकारेण उपादानमिति युक्तं भवति लोके मृत्कुलालयोर्जडत्वाद सर्वशक्तित्वाच्च तयोर्निमित्तोपादानयोर्भेदः ॥ परमात्मनस्तु चिद
चिद्विशिष्टस्य सर्वशक्तित्वाज्जगदाकारेण परिणामस्य संभवेऽन्यान्निमित्तत्वस्य चोपपत्तिरित्यादिभिप्रायः ॥ यद्वात हेतुरित्यनेन निमित्तकारणत्वमुच्यते ए
कमित्यनेनैकमेवाद्वितीयमित्यादावविभक्तनामरूपसूक्ष्मचिदचिद्विशिष्टत्वमुच्यते ॥ प्रपंचस्यानेककारकात्मत्वेन वक्तव्यस्य स्वयं युक्तत्वात्तस्य तस्य चनामरूप
विभिनामाविर्भूतत्वात्तस्यतिसर्व भिन्नामरूपविभागामवमिति वचनैकत्वस्यैकपदगम्यत्वोचित्यात्तत्पाचे कस्य विभक्तनामरूपत्वेन स्थूलचिदचिद्विशिष्ट

ब्रह्मणा कं प्रसिद्धमित्यर्थः ब्रह्मैवानेन निमित्तत्वोपादानत्वोपयुक्तं सा
र्वज्ञ्यसत्यसंकल्पत्वादिगुणानंत्यरूपनिरतिशयबृहत्त्वमुच्यते २०

स्तु देवमनुष्यादिशरीरनिवर्त्स्यैकमेतदात्मभूतजीवकर्तृकं तद्बंधकं चवदृष्टं ॥ यत्तस्य सुखदुःखादिवच्चेतनधर्मत्वादेवं कृत्स्नं चिदचिदात्मकं जगत्परमात्मनः श-
रीरं चेत्तद्व्यापारोऽप्यनेककारकनिवर्त्यः परमात्मा त्वयमेवस्यादिति मतिसंबध्येत तथा च निष्क्रियं निष्कलमित्यादिश्रुतिविरोधः ॥ किंचैकस्य चेतनस्यैकदेवम-
कशरीरं दृष्टमतः कथमनेकस्य परमात्मनो देवमनुष्यादिव्यनेकानि शरीराणि इति न विश्वरूपत्वं परमात्मनः संभवति यद्यसौ कारणत्वात्कार्य्येभ्यस्तद्विश्वरू-
पः कार्य्यकारणयोरभेदादिति स्यु चेत्तर्हि वचश्चादिभिर्निरुक्तादिकं तस्य स्वरूपमेवस्यात्परिणामिकारणस्याधिष्ठात्रये तत्त्वदर्शनात्तस्याप्यधिष्ठात्रये त्तेति पू-
र्वोक्तपरत्वविरोधस्त्याशंकां निराकरोति ॥ तावदनेककारकनिवर्त्यस्य व्यापारस्य परमात्मात्मत्वमभ्युपगम्यत एवेति नतच्चोदनीयमित्याह ॥ यस्मिन्निति
पूर्वोर्द्धेन तत्र यस्मिन्नित्यादिभिर्विभक्तिभिरधिकरणोपादानकरणसंप्रदानकर्मकर्तृशक्तयो विवक्षिताः यस्येति षष्ठ्या तु संबंधसामान्यं कुरुते प्रयोज-
कः ॥ कार्य्यते इति प्रयोजककर्तृशक्तिः यथेत्यनेन करणं ॥ शक्तीनां कालोप्यधिकत्वात् ॥ यथेति पाठे तत्तत्कारकशक्तिगताः प्रकारविशेषा विवक्षिताः
क्रियते कार्य्यते चेति कृतधातुना तत्कारनिष्पाद्यक्रियाविवक्षितेति ॥ तत्तत्कारकाश्रयत्वकृताः क्रियागतविशेषा वा निर्दिश्यन्ते यस्मिन्नित्यादीनां तु त-

यस्मिन्यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्यते च ॥ परावरेषां परमं प्राक्प्रसिद्धं तद्ब्रह्म तद्धेतुरनन्यदेकं ॥ ३० ॥

दित्युत्तरेणान्वयः ॥ यत्तस्मादिविभक्तिप्रकृतिभिस्तैर्यच्छब्दैरधिकरणादिकारकशक्त्याश्रयाणि वस्तूनि विवक्षितानि ॥ कुरुते कार्य्यते चेत्यत्र लकारेण प्रयोज-
ककर्तृशक्त्याश्रयं द्रव्यमपि विवक्षितं लकाराणां कृतिमत्यर्थशक्तिरित्यन्यत्र विस्तरः ॥ सुप्तिङं तस्य लेवेष्वस्त्यपि विशेष्यकः शाब्दबोधः ॥ एवं च तद्व्यापारं निर्वर्त्य-
२ काधिकरणादिशक्त्याश्रयाणि द्रव्याणि संबंधसामान्याश्रयत्वं च तद्ब्रह्मेत्यर्थः ॥ शक्त्याश्रयवस्तूनां परमात्मशरीरत्वेन विशेषणत्वात्तस्यैव मुख्यत्वेन कारकशक्त्या-
श्रयत्वादाधारकशक्तिशक्त्याश्रयत्वात्तस्य व्यापारस्य तदायत्तत्वमुपपन्नमिति भावः ननु एवं कारकशक्त्याश्रयत्वप्रयुक्तं परमात्मनः सक्रियत्वं तत्प्रयुक्तं क-
र्मवत्त्वप्रयुक्तमनित्यत्वं च प्रसज्येत तथा निष्क्रियं निष्कलं नित्यं विभुमित्यादिश्रुतिविरोधश्चेत्तत्राह ॥ प्राक्प्रसिद्धमिति हेतुरिति च हेतुः प्राक्प्रसिद्धमित्य-
नेन कार्य्यावस्थायाः पूर्वं कारणत्वेनावस्थितत्वमुच्यते ॥ अयं भावः तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् ॥ अंतः प्रविष्टः शास्ता जना-
नां सर्वात्मा ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठतीत्यादिश्रुतिस्मृत्यादिप्रमाणवशात्कार्यस्य जगतश्चिदचिदीश्वरात्मकत्वमभ्युपेत्य कार्य्यसजातीय

भा॰ष॰ एवमुक्तं विश्वं परमात्मानमस्पृष्टं तदसाधारणैर्धर्मैर्विशिंषन्तदनुग्रहं प्रार्थयते सार्धाभ्यामिति ॥ सर्वैरुक्तविधो भगवाननन्तगुणः सर्वे विशेषा विकारा यस्य स्यात्तस्य ।
११स्क मायाया निवृत्या यन्निर्वाणसुखं दुःखसंभिन्नं मोक्षसुखं तस्मिन्ननुभूतिरनुभवो यस्य मुक्तानामनुभवविषय इत्यर्थः ॥ य ईदृशः सर्वनामा सर्वैः शब्दैर्वाच्य इ
त्यर्थः ॥ सर्वे सर्वे शब्दा नाम यस्येति वा सर्वः ॥ शर्वः शिवः स्थाणुरिति नामपाठात् ॥ सर्वशब्दप्रवृत्तिनिमित्तपौष्कल्याश्रय इत्यर्थः ॥ सर्वनामत्वे हेतुः स च विश्वरू
तु प इति ॥ विश्वशरीरकत्वात्सर्वशब्दवाच्य इत्यर्थः ॥ विश्वान्तर्गतानां वाचकाः शब्दास्तच्छरीरकतमेवाभिदधति शरीरवाचिनां शब्दानां शरीरिपर्यन्तबोधनप्रतीतेः
यथा सर्वशब्दस्य कृत्स्नजगद्वाचकत्वात्तस्य च तच्छरीरत्वात्तत्प्रवृत्तिनिमित्तपौष्कल्येन तमेवाभिधत्त इति भावः ॥ ननु विश्वरूपत्वे परगतधर्मासंस्पर्शनं चेति कथ
म मुपपद्यत इत्यत आह ॥ अनिरुक्तात्मशक्तिर्वाङ्मनसापरिच्छेद्याः स्वाभाविकाः शक्तयो यस्येति सः ॥ विचित्रशक्तित्वात्तदुभयोपपत्तिरिति भावः ॥ एवंभूतो भगवान्मम प्रसीद
तां मामनुगृह्णात्वित्यर्थः ॥ २८ ॥ ननु यदि विश्वं तस्य शरीरं न तु स्वरूपं तर्हि तस्य स्वरूपं केन लक्ष्यत इत्यत्राह ॥ यद्यदिति ॥ यद्यद्वचसा निरुक्तं शब्देनाभिहितं जाति

सर्वैर्मनाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः ॥ स सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः ॥ २८ ॥
यद्यन्निरुक्तं वचसा निरूपितं धियादिभिर्वा मनसा वोत यस्य ॥ मा भूत्स्वरूपं गुणरूपमेव हि स वै गुणापायविसर्गलक्षणः ॥ २९ ॥

गुणादिकं प्रवृत्तिनिमित्तीकृत्य शब्देन बोधितं ॥ तथा धिया निरूपितं व्यवसितं तथाक्षभिरिन्द्रियैर्गृहीतं उतापि मनसा निरूपितं संकल्पितं यद्यपि यस्य स्वरूपं माभूत्
भवति किंतु शरीरमेवेति भावः ॥ तत्र चक्ष्वादिभिर्निरुक्तादित्वस्य स्वरूपत्वाभावे हेतुः ॥ गुणरूपं हीति ॥ गुणरूपाः सत्त्वादिगुणात्मका हेतवो यस्य तद्गुणरूपं हेतुस
त्त्वादिगुणत्रयकार्यं सत्त्वादिगुणगतमेव न तु तत्स्वरूपगतं तेनासाधारणो धर्मो येन यदुपलक्ष्यं परमात्मस्वरूपं स्यात् ॥ गुणस्वरूपं हि तदिति पाठे हि यस्मात्तद्गु
णरूपं गुणानामेव रूपं गुणरूपं वर्णितमिति पाठान्तरे गुणरूपे सत्त्वादिगुणगतैरसाधारणाकारैर्वर्णितमारब्धमित्यर्थः ॥ तथाप्यसौ परमात्मा गुणापायविस
र्गलक्षणः गुणापायविसर्गौ गुणकार्यभूतप्रपंचस्य संसर्गौ लक्षणं यस्य तथोक्तः ॥ अपायविसर्गाभ्यां स्थितिरपि लक्ष्यते ॥ यद्यपि कार्यात्मकं ॥ जगत्परम ।
त्मनो लक्षणं तथापि कार्यप्रपंचगतोत्पत्तिस्थितिप्रलयकारणत्वं परमात्मनोऽसाधारणो धर्म इति तेन तत्स्वरूपमुपलक्ष्यत इत्यर्थः ॥ प्रपंचजन्मादिकारण
त्वमपि न परमात्मनः स्वरूपविशेषणतया लक्षणं कारणत्वस्य कादाचित्कत्वात् शिष्टवस्तुनिष्ठत्वेन विशेष्यभूतवस्तुस्वरूपनिष्ठत्वाभावात्किंतु चंद्रादेः शाखाग्रादिवत्तदु

सर्वेशमिश्रत्वेनाभिप्रेतं ॥ परमात्मनः सर्वज्ञत्वं जीवस्य परमात्मना संश्लेषदशायामपि तदनाभिज्ञतां चोपपादयति ॥ यदेति ॥ नामरूपस्य देवमनुष्यत्वाश्रमादिना मरूपः नि
रूपकस्य मनसो यथा दृष्टश्रुतिः संप्रमोषाद्दृष्टस्य स्मृतिः स्मरणं दृष्टस्मृतिः स्वप्नावस्थोच्यते ॥ तस्याः संप्रमोषाद्धेतोः परामः सुषुप्तिः तदायं परमात्मा ईयते प्राप्यते
जीवेन समन्वितो भवति ॥ प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरं रायसुप्तेषु जागर्तीति श्रुत्यर्थोत्र विवक्षितः ॥ जीवस्याज्ञवोधेत्यनेन परमात्माप्य
बोधरस्यर्थः ॥ सर्वदा ज्ञैयते तु पास्मत्वं स्यादिति शंकां वारयति केवलयेयतेऽस्यनुषज्यते यच्च केवलया रागादिकलुषरहितया स्वसंस्थया स्वाभाविकज्ञाने
नयतेवगम्यते प्राप्यते वा तस्मै हंसाय शुद्धाय शुचिसद्मने शुद्धांतःकरणसद्मने उपासनविशुद्धांतःकरणे संनिहितायेत्यर्थः ॥ यद्वा केवलया स्वसंस्थया हंसा
यविशुद्धाय रागाद्यकालुषितेनापरिछिन्नानंदरूपविषयकनित्यासंकुचितापरिछिन्नधर्मभूतज्ञानेन विशुद्धायास्पृष्टचिदचिद्वर्माय शुचिसद्मन उपासन

यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसंप्रमोषात् ॥ य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिसद्मने नमः ॥
२६ ॥ मनीषिणोंतर्हृदि संनिवेशितं ॥ स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः ॥ वह्निं यथा दारुणि पांचदश्यं मनीषया निष्कर्षंति
गूढं ॥ २७

यापविशुद्धांतःकरणसद्म स्वाभिव्यक्तिस्थानं यस्य तस्मै इत्यर्थः ॥ हंसः शुचिषदिति श्रुत्यर्थश्चाभिप्रेतः ॥ २६ ॥ शुचिसद्मन इत्येतदेव प्रपंचयति मनीषिण इत्य
ति त्रिवृद्भिः त्रयाणां वृत्तेन पत्रितत्रिवृत् त्रिकमित्यर्थः ॥ तद्रूपाभिस्त्रिकत्रयमापन्नाभिरिति यावत् नवभिः शक्तिभिः ॥ श्रियापुष्ट्या गिरा कांत्या कीर्त्या तु
ष्ट्येलया जया ॥ विद्ययाविद्यया शक्त्या मायया च निषेवितमिति वक्ष्यमाणाभिः शक्तिभिः कार्योपयोगपदार्थक्रमिश्रविपोषणरूपाभिः शक्तिभिः सहांत
र्हृदि संनिवेशितं स्वेच्छया संनिवेशं गतं दब्धा देहः करणोस्याद्भा ॥ अनेनांतर्दर्शीम् दमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं अध्यात्मयोगाधिगमेन देवं मत्वेति
श्रुत्यर्थोत्र विवक्षितः ॥ इदेशेमेन स्मारदहीतुमशक्यं गुहायां करेके दयेविहितं गह्वरे जीवति ष्ठतीत्यंतरात्मतये जितवायं मनीषिणः परमात्मयाथात्म्यवि
वेचनकुशलाः मनीषया योगपरिशुद्धया धिया निष्कर्षंति पृथक् कुर्वंति पुरुषाभ्यां विविच्य पश्यंतीत्यर्थः ॥ यथा मथ्यामथनसाधनेनोत्तरारणिना दारुणः पंचदश
नामरणोपाचहरपमग्निं निष्कर्षंति ॥ तद्वत् स्वो चहरपंक्स्वरशीयकर्मसंबंधिनेदर्शपूर्णमासानुष्ठानहि पंचदशस्तुय्यकमम्माधीनमपीति वैदिको ग्निः पांचदश्य

४

भा॰ष॰ २० नामधेयरूपे कुर्वतोऽस्मनो रक्षणमित्यंते यस्य गंधेन प्रकृतिपुरुषविलक्षणं सत्यसंकल्पं प्रकृतेर्नियंतारमपरिच्छिन्नं प्रमाणाद्यगम्यमवधिं सर्वकारणं नमः नम
स्करोति ॥ पराय चिदचिद्विलक्षणाय ॥ तावच्छिद्याववर्त्तकधर्मयोगमाह ॥ अवितथानुभूतय इति ॥ अवितथाऽमोघानुभूतिः संकल्परूपात्मकं ज्ञानं यस्य सत्यसंकल्पा
येत्यर्थः ॥ जीवस्त्वसत्यसंकल्प इति ततोऽनेनास्य व्यावृत्तिः ॥ अचिद्व्यावर्त्तकधर्ममाह ॥ गुणत्रयाभासनिमित्तबंधवैगुणत्रयाभासः सत्वादिगुणत्रयोन्मेषस्तस्य
निमित्तं कारणं प्रकृतिः ॥ तस्य बंधे आश्रयभूतायप्रकृतिशरीरकायतन्नियंत्र इत्यर्थः ॥ अनेनाचितोऽस्य व्यावृत्तिः ॥ एवं पदद्वयेन चिदचिद्व्यावृत्तिः अन्वयप्र
जापतिवाक्योदितावित्येतौ सत्यसंकल्पः प्रकृतिविमुक्तः ॥ किं मुक्तो जीवः नेत्याह ॥ गुणतत्वबुद्धिभिर्गुणत्रयकार्यभूतदेहप्रियादितत्वविषयबुद्धिभिरस्पृष्ट
मनुपलक्षितं तथा मत्स्यरूपं परस्परमुक्तकस्मसारदणाद्यपिव्यादिसंघातपरिणामभूतशरीरविषयबुद्धिभिर्देवापं मनुष्यायमित्युपलक्षितमितिततोस्यानेन व्या इति
वृत्तिः किंनित्यसिद्धनेत्याह निवृत्तमानयस्मान्निवृत्तमानः ताहशोवधिरियत्तायस्य सतथोक्तः प्रमाणाद्यसावधयत्रिविधपरिच्छेदरहितस्वरूपायेत्यर्थः नैत्यसिद्धस्तुजीवःस्वरूप

न यस्य सख्यं पुरुषो ऽवैति सख्युः सखा वसन्संवसतः पुरेऽस्मिन् ॥ गुणो यथा गुणिनो व्यक्तदृष्टेस्तस्मै महेशाय नमस्करो
मि ॥ २४ ॥ देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् ॥ सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीडे ॥ २५ ॥

तः परिच्छिन्नः इतितताऽनेनास्य व्यावृत्तिः ॥ स्वयं तु केवलं कारणांतरमन्यापसर्वकारणायेति भावः ॥ २३ ॥ गुणत्रयाभासनिमित्तबंधवृत्त्यस्य नेनाविदाश्रयत्वमुक्तं ॥ अथ
जीवांतरात्मतया वसतः चेतनवत्त्वमाह न यस्येति ॥ पुरे देहे संवसतः सख्युर्हितैककारिणः यस्य परमात्मनः सख्यंतच्छेषभावं पुरुषो नावैति गुणिनो रत्नादेर्गुणाद्रूपप्रभादिवत् ॥ अथ कामिद
प्रकारः ततो वसन्तद्वाध्यत्वेनवसन्सखात समता तिणायाद्यानेकस्वरूपतयामित्रमयं पुरुषः नावैतिनानुसंधत्त इत्यर्थः ॥ तत्र हेतुः अव्यक्तदृष्टिः देहज्ञानगोचरज्ञानः
तस्मै सख्ये परमपुरुषाय नमस्करोमि ॥ सुपर्णावितिश्रुत्यर्थोऽत्र विवक्षितः ॥ २४ ॥ नावैतीत्येतत्प्रपंचयति ॥ देह इति ॥ देहप्राणसर्वेन्द्रियाणि प्राणा वा मनसः मनोवृत्त
यः ज्ञानेन्द्रियाणि भूतानि शब्दादीनि मात्रा गंधादीनित्याह काणिकमेन्द्रियाणि वा तान्यात्मानं स्वस्वरूपं परं स्वेभ्यः विलक्षणमन्यं जीवात्मानं न विदुः पुमान्जीवः
सन्यः सर्वं देहादिकं तद्वेदजानातीत्यर्थः ॥ एवं तत्तज्ज्ञो देहाद्यभिज्ञोऽपि जीवः यं सर्वज्ञं देहादिकं जीवं स्वगुणान्स्वात्मानं च जानाति तं भगवंतं तद्गुणांश्च न वेद तम
नंतमपरिच्छिन्नमीडे स्तौमि ॥ देहादयो हृष्टांतार्थमुपागताः यथा देहादयः स्वस्वरूपं तस्माद्विलक्षणं जीवात्मानं च न विदुरेवं पुमान्देहाद्यभिज्ञोऽपि सर्वज्ञं तद्गु रामः २०

तेभ्यःप्राचेतसेभ्यः तस्यां मारिषायां हे राजन् दक्षः प्रजापतिः प्रचेतस उत्पन्नः पूर्वं ब्रह्मणोऽङ्गुष्ठाज्जातो दक्षोऽपि रुद्रापराधवशात्तं देहं विहायास्यां मारिषायां प्रा
चेतसनामा जायते स्मेत्यर्थः ॥ तथा चोक्तं चतुर्थे यस्यां महदवज्ञानादजन्यजनयोनिजः इति ॥ प्राचेतसं विशिनष्टि ॥ यस्य प्राचेतसस्य दक्षस्य प्रजासर्गेण त्रयो
लोका आपूरिताः प्रायशो लोके ॥ यस्य प्रजाभिः संतानरूपकस्येत्यर्थः ॥ १७ ॥ दक्षः प्राचेतसः दुहितृवात्सल्ययुक्तः रेतसा वीर्येण मनसा संकल्पेन च यथा
भूतानि ससर्ज ॥ तथा तत्सर्जनं वदतो मम मत्तः सकाशादवहितः शृणु ॥ १८ ॥ पूर्वं प्रथमं प्रजापतिः प्रचेतसः मनसैव संकल्पेनैव इमाः प्रजाः ससर्ज ॥ काः देवादीन् न
भःस्थलवस्थले येषां जलमेवौकः स्थानं येषां तान् ॥ १९ ॥ तमेवं मनसा क्रियमाणं प्रजासर्गमबृंहितमवृद्धमालोक्य स प्रजापतिः प्राचेतसः विंध्यस्य पादा

तेभ्यस्तस्यां समभवद्दक्षः प्राचेतसः किल ॥ यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः ॥ १७ ॥ यथा ससर्ज भूतानि दक्षो
दुहितृवत्सलः ॥ रेतसा मनसा चैव तन्ममावहितः शृणु ॥ १८ ॥ मनसैवासृजत्पूर्वं प्रजापतिरिमाः प्रजाः ॥ देवासुर
मनुष्यादीन्नभःस्थलजलौकसः ॥ १९ ॥ तमबृंहितमालोक्य प्रजासर्गं प्रजापतिः ॥ विंध्यपादानुपव्रज्य सोऽचरद्दुष्क
रं तपः ॥ २० ॥ तत्राघमर्षणं नाम तीर्थं पापहरं परं ॥ उपस्पृश्यानुसवनं तपसातोषयद्धरिं ॥ २१ ॥ अस्तौषीद्धंसगुह्येन भग
वंतमधोक्षजं ॥ तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः ॥ प्रजापतिरुवाच ॥ नमः परायावितथानुभूतये गुण
त्रयाभासनिमित्तबंधवे ॥ अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्तमानाय दधे स्वयंभुवे ॥ २२ ॥

स्यास्मिंस्तपर्वते तानुपव्रज्य उपागत्य दुष्करमितरैः कर्तुमशक्यं तपश्चाचरत्कृतवान् ॥ २० ॥ तत्र विंध्यपादेषु त्रिकालमघमर्षणाख्यं पापहरं पुण्यं तीर्थमुप
स्पृश्य तत्र स्नात्वेत्यर्थः ॥ तपसा हरिमतोषयदाराधितवान् ॥ २१ ॥ तथा भगवंतमधोक्षजं हंसगुह्याख्येन स्तोत्रेणास्तौषीत् तदेव स्तोत्रं तुभ्यमभिधास्यामीति ते
ह्यविशिनष्टि ॥ यतो येन स्तोत्रेण हरिः ॥ कस्य प्रजापतेर्दक्षस्यातुष्यत् तुष्टोऽभूत् स्वमनोऽभिव्यक्तित्यर्थः ॥ २२ ॥ हंसगुह्याख्यं स्तोत्रमुपदिशति ॥ नमः परायेत्यादि

भा॰ष॰ स्वपालितत्वाद्वनस्पतिषु कोपोपशममाह ॥ तोकानामिति ॥ तोकानां बालानां पितरौ मातापितरौ यथा एवं भूरक्षकौ यथा हि पक्ष्म चक्षुषो यथा च स्त्रियः प
१९ तिर्बंधुः तथा प्रजानां नृपः यथा च भिक्षूणां गृहिणो आहारः ॥ यथा गुरुः ज्ञानां अज्ञानां श्रेयसां अकुशलानां बंधुः मीमांसा मतिज्ञः तथा भगवान् रक्षकः सुहृच्च भूता
नामंतर्देहेषु हृदये स्वात्मस्वरूपः ॥ [illegible]नः श्व विषयविर्यता हरिरात्मा ततः सर्वं जगतः स्वस्य भगवतो धिष्ण्यं स्थानं पश्यत एवं ईक्षणे सो भगवान् वः युष्माकं तो
षितो भवति ॥ यद्वा प्रतिनियतरक्षकत्वमवस्थाप्य सुरक्षकं [illegible] समह पेत्याह ॥ तोकानामिति ॥ पित्रादयश्च प्रजानां चराचरात्मकानां नृपः बंधुः रक्ष
कः सुहृच्च किं च भगवच्छरीरत्वाच्च न द्रोहः कार्य इत्याह ॥ अंतर्देहेष्विति उत्तरार्धयः ॥ गृहदज्ञानामिति निक विशेषणं वा [illegible] रहस्य सतं परमात्मस्व

अंतर्देहेषु भूतानामात्मास्ते हरिरीश्वरः ॥ सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ ॥ १३ ॥ यः समुत्पतितं देह आकाशा
न्मन्युमुल्बणं ॥ आत्मजिज्ञासया यच्छेत्स गुणानतिवर्तते ॥ १४ ॥ अलं दग्धैर्द्रुमैर्दीनैः खिलानां शिवमस्तु वः ॥ वार्क्षी ह्ये
षा वरा कन्या पत्नीत्वे प्रतिगृह्यतां ॥ १५ ॥ इत्यामंत्र्य वरारोहां कन्यामाप्सरसीं नृप ॥ सोमो राजा ययौ दत्वा ते धर्मेणोपये
मिरे ॥ मिरे ॥ १६ ॥

रूपादिकं ज्ञातुमिच्छता [illegible] उपदेष्टा विधातानि वेसम[illegible] ॥ रक्षणं च सर्वं [illegible] निष्ठ परिहारे [illegible] प्राणात्मकमेव ॥ १२ १३ ॥ किं च क्रोधोपशमस्याभ्युदयहेतु
त्वात्तत्तु पसंहरतेत्याह ॥ य इति देहे आकाशात्समुत्पतितं य इच्छया तस्मिन्निमित्तर्पः ॥ यद्वा देहे आकाशा हृदयविवरात्समुत्पतितं उल्बणं क्रुः स हि म
स क्रोधः आत्मजिज्ञासया स्वात्मपरमात्मयाथात्म्यविचारेण नियच्छेत् उपसंहरेत्स पुमान् गुणानस्त्वादीनतिवर्तते क्रमेण संसारबंधान्मुक्तो भवती
त्यर्थः ॥ १४ ॥ अलं दग्धैरनेन दीनैर्द्रुमैरलं दीनद्रुमदाहनेनालमित्यर्थः ॥ खिलानामवशिष्टानां द्रुमाणां वः युष्माकं च शिवमस्तु वार्क्षी हि दैः पालिता एष
वस्तु मुत्पन्ना कन्या मारिषा आत्मा पत्नीत्वेन स्वीकर्तुं ग्राह्येत्याशयः ॥ ससमानितिरितिशेषः ॥ १५ ॥ इतीत्यमान्य आमंत्र्य पित्रा प्सरसीमप्सरोदेहाद्विभ्रेताम्रषिवीर्यसंभ
तां वरारोहां सुकांडुयोन्मयां कन्यां ते भ्यो दत्वा सोमो राजा ययौ गतः ततस्ते प्रचेतसः सर्वे धर्मेण तामुपयेमिरे विवाहितवंतः धर्मेणोत्पन्नेनाष्टमध्यमे शीला नाम रामः
तावेषां वः सुमध्यमाः ॥ अष्टपदाध्यमे शीलेयं यस्या त्यर्पिता प्रायति भगवतो क्तत्वाद्धर्मिकेनाप्यापाणिग्रहो दोषो वहइति संकायेति समन्वितां १६ १९

सर्वं विवर्द्धिषव स्वप्रजा यतयस्त्व किं तु मेः प्रपोजननिस्यत्राह ॥ आदाविति ॥ प्रजापतीनां ब्रह्मादीनां पतिर्विभुर्दक्षमानुद्रुमे पत्तरात्तयाप्यव्ययः
स्वसंसृष्टानां तविकारः भगवान् हरिरादौ जगदादिकाले वनस्पतीनोषधीश्च समसर्ज तानतांश्च विशिनष्टि ॥ ऊर्जोमिषंऽति ऊर्जे पितॄन्तुद्दिश्य प्रदी
यमानमन्नं स्वधा देवानुद्दिश्य प्रदेयो ऽर्जे रूपावनस्पत्यादयः तस्पर्थः ॥ स्वधंभावः ॥ देवपितृयज्ञावशिष्टान्नेन प्रजानां जीवनं विहितं ॥ यज्ञशिष्टाशिनः संतो मु
च्यंते सर्वकिल्बिषैरिति स्मरणात् भुंजते ते त्वघं पापा ये पचंत्यात्मकारणादिति यज्ञानवशिष्टान्नभक्षणानिंदनाच्च एवं देवाद्युपजीव्यान्नरूपेण प
शिलममन्नानां वनस्पत्यादीनां द्रोग्धुमर्हसीति ॥ ८ ॥ एतदेवोपपादयति अन्नमिति ॥ तावत्सादं चारिणां चराणां भूतानामपादचारिणो चराः अन्नमपायाः अ

अहो प्रजापतिपतिर्भगवान् हरिरव्ययः ॥ वनस्पतीनोषधीश्च समसर्जोर्जमिषं विभुः ॥ अन्नं चराणामचरा ह्य
पदः पादचारिणां ॥ अहस्ता हस्तयुक्तानां द्विपदानां चतुष्पदः ॥ ९ ॥ त्वं च पित्रान्वादिष्टा देवदेवेन चानघाः ॥ प्रजा
सर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ ॥ १० ॥ आतिष्ठत सतां मार्गं कोपं यच्छत दीपितं ॥ पित्रा पितामहेनापि जुष्टं वः प्र
पितामहैः ॥ ११ ॥ तोकानां पितरौ बंधुर्दृशः पक्ष्म स्त्रियाः पतिः ॥ पतिः प्रजानां भिक्षूणां गृह्यज्ञानां सुहृद् बुधः ॥ १२

कोप्यतेष्ववधारभावो नास्ति किंतु तेषामुपभोग्यत्वाकारणकत्वैवेतिभावः ॥ चरेषु त्वाकारद्वयमस्तीत्याह ॥ अहस्ता इति हस्तयुक्तानां द्विपदामहस्ता
चतुष्पदः अन्नमदनीयाः भाभामा आभिप्राय कमेकत्वं क्रीवत्वं च चरेषु भयाकारकथनं व्यतिरेकदृष्टांतार्थं यथा चरेषु केषांचिदकर्तृत्वमन्येषा
मदनीयत्वं न तथा चेतनेषु किं त्वदनीयत्वमेवेति स्थावरोपभोग्यत्वान्निरपराधत्वाच्च न द्रोहः कार्य इति तात्पर्यं ॥ ९ ॥ किं च हे अनघा यूयं पित्रा प्राचीनबर्हि
षा देवदेवेन तपस्तानादिष्टे न भगवता च प्रजासर्गाय निर्दिष्टाः स्थ यतः एवमतः कथं वृक्षान्निर्दग्धुमर्हथ ॥ १० ॥ सतां साधूनां मार्गमातिष्ठतायूयतः कथमद्द
तं वः युष्मां कं पित्रा प्रचेतसा पितामहेन तस्मिन्नापि च वः प्रपितामहादयः तेषां जुष्टमेवितं ॥ पित्रा व्याचरितमेव सन्मार्गमातिष्ठय तेत्स्यार्थः दी

भा.ष. हे भगवन्ननेन तस्यैव सर्गस्य व्यासं विस्तरेण तेन त्वत्तो ज्ञातुमिच्छामि॥ को सौ विस्तरस्तत्राह भगवान्परः सृज्यमानप्रकृतिपुरुषविलक्षणः यया शक्त्या यथानुसर्गं यं
१८ अभिसर्गं सिसृक्षोऽकरोत्॥२॥ एवमाहृष्टोत्युनिमित्याह सूत इतीति। हे मुनिसत्तमाः। एतीस्यराजर्षेः परीक्षितः॥ तं संप्रश्नमाकर्ण्य प्रतिनंद्य साधु पृष्टमिति नंद्य
बादरायणिर्महायोगी जगाद॥३॥ गदितमेवाह यदेत्यादिना। तत्र भगवान्बादरायणिर्विस्तरेणाह षष्ठे मनुसर्गं विवक्षन् तावच्चतुर्थस्कंधांते प्राचीनबर्हि
षः पुत्राणां चरित्रं तपो दृष्ट्वा तेन नोक्तमिति। यत्त आपूरितास्त्रयस्तेन प्रचेतसः प्राचीनबर्हिषो दश पुत्राः यदा अंतःसमुद्रात्समुद्गमन् उन्मग्नाः निर्म

तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन्यथा॥ अनुसर्गं यया शक्त्या ससर्ज भगवान्परः॥२॥ सूत उवाच॥ इति संप्रश्नमाकर्ण्य रा
जर्षेर्बादरायणिः॥ प्रतिनंद्य महायोगी जगाद मुनिसत्तमाः॥३॥ श्रीशुक उवाच॥ यदा प्रचेतसः पुत्रा दश प्राचीनबर्हि
षः॥ अंतःसमुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृतां॥४॥ द्रुमेभ्यः क्रुध्यमानास्ते तपोदीपितमन्यवः॥ मुखतो वायुमग्निं च सस
सृजुस्तद्दिधक्षया॥५॥ ताभ्यां निर्दह्यमानांस्तानुपलभ्य कुरूद्वह॥ राजोवाच महान्सोमो मन्युं प्रशमयन्निव॥६॥ न
द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ॥ विवर्द्धयिषवो यूयं प्रजानां पतयः स्मृताः॥७॥ तांस्तदा गां भूमिं ददृशुः कथं

वृतां द्रुमैर्वृतां नारदोपदेशात्प्राचीनबर्हिषो निवृत्त्या राजके कृष्याद्यभावात् द्रुमैर्वृतामिति भावः॥४॥ द्रुमेभ्यः क्रुध्यमानास्तपसा उद्दीपितः मन्युः
क्रोधो येषां ते हि शासितृणां हेतोर्गां दिधक्षया दग्धुमिच्छया मुखाद्वायुमग्निं च ससृजुः सृष्टवंतः॥५॥ ताभ्यां निर्दह्यमानांस्तानुपलभ्य कुरूद्वह राजो
वाच महान्सोमो राजा वृक्षाणां मन्युतः तत्क्रोधं प्रशमयन्निव प्रशमयितुमित्यर्थः उवाच बोधितवान्॥६॥ किमुवाचेत्यपेक्षायां तद्वोक्तमाह मा द्रुमेभ्य
स्तादृशेभ्यो प्रतिमस्तेभ्यः हे महाभागाः दीनेभ्यो द्रुमेभ्यो द्रोग्धुमर्हथ॥ कुतः यतो यूयं विवर्द्धयिषवः लोकान्वर्द्धयितुमिच्छवः प्रजानां पतयश्च
स्मृता उक्ता विवर्द्धयिष्णूनां प्रजापतीनां इदं वनस्पतिदाहनमनुचितमिति भावः॥७॥ १८

वृत्तादिकं तु न तुल्यं स्यात् ॥ भगवतां हरेर्नामानि विपुलानि वीर्याणि यशांसि मुकुंद भगवतां मरालानां कथयतां चात्मा चित्तं भगवति श्रवणादिनासंजातयाभ
क्त्या यथा शुध्यति तथा व्रतादिभिर्न शुध्यति ॥ ३२ ॥ कृष्णस्यांघ्रिपद्मयोर्यन्मधु रसस्तं लेट्टा आस्वादयतीति तथाप्युनर्हे जिज्ञावदेषु दुरितापारके प्रविसृष्टेषु प्र
कृतिकार्येषु गतशब्दादिषु न रमते तेन मज्जते ॥ अन्यस्तु कामहतः साधिपद्ममध्वनभिज्ञस्तस्य कामैः शब्दादिभिर्हतो निवृतः ॥ आत्मनः स्वस्य रजः पापं प्रमार्ष्टुमपनेतुं
कर्मण्याचरितेनरूपं रहेन कुर्यादित्यर्थः ॥ कर्मविधिनाधिष्ठितः कर्मणोनंतरं पुनः रजः पापं स्यात्संभाव्येत पुनाऽतिरेकं फलोपेदीर्घः ॥ ३३ यमोक्तिमुपसंहरति इ
त्यमिति ॥ हे राजन्निस्वभगवान्येन गदितं कर्मकरणोतिसमासः ॥ भगवतो महित्वं महात्म्यं संस्मृत्य प्रत्यभिज्ञाय विष्णुदूतो किंकरीत्याराव ज्ञात्वा विस्मिता धीर्येषां

भगवतां मरालानां वीर्योरुपद्वानानि हरेर्मुकुंदः ॥ यथा सुजातया भक्त्या शुध्येन्नात्मा व्रतादिभिः ॥ ३२ ॥ कृष्णांघ्रिपद्ममधु
लिड्न पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु ॥ अन्यस्तु कामहत आत्मरजः प्रमार्ष्टुमीहेत कर्मयततएव रजः
पुनः स्यात् ॥ ३३ ॥ इदं स्वभर्तेगदितं भगवन्महित्वं संस्मृत्य विस्मितधियो यमकिंकरास्ते ॥ नैवाच्युताश्रयजनं प्रतिशं
कमाना द्रष्टुं च विभ्यति ततः प्रभृति स्म राजन् ॥ ३४ ॥ इतिहासमिमं गुह्यं भगवान् कुंभसंभवः ॥ कथयामास मलय आसी
नो हरिमर्चयन् ॥ ३५ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे अजामीलोपाख्याने तृतीयोध्यायः ॥ ३ ॥ राजोवाच ॥ देवा
सुरनृणां सर्गो नागानां मृगपक्षिणां ॥ सामासिकस्त्वयाप्रोक्तो यस्तु स्वायंभुवेंतरे ॥ १ ॥ नेयमकिंकराः तेन यमप्रणामने नाच्युताश्रयजनं भ
गवत्प्रपन्नजनं प्रतिशंकमानाः तत्समीपगमनेनास्माकं भद्रं दंडनं स्यादिति शंकमानाः ॥ ततश्चास्पृतं द्रष्टुं च विभ्यति भयं प्राप्नुवंतीत्यर्थः ॥ ३४ ॥ उक्तस्य प्रा
माण्यप्रसिद्धये तत्स्मात्प्रणीतत्तामाह ॥ इतिहासमिति ॥ मलये पर्वते आसीनो भगवान् कुंभसंभवोगस्त्यः हरिमाराधयन् इमं गुह्यमिति हासं कथयामा
सामकथितवान् ॥ ३५ ॥ इति श्रीभागवते टीकायां ॥ ३ ॥ एवमाकर्णितस्वायंभुवतस्य तोत्तानपादप्रियव्रतसंतति चरित्रस्तस्य संगात्सृष्टभूगोलस्कृत संस्थान
न प्रसंगात्स्पष्टनरकनिलाणपापप्रकृतपरिहारस्यपूर्वैंमेलपेराप्रकृत मनुसर्गविस्तरेणावभुत्सुः दक्षोतिराजा देवासुरेति द्वाभ्यां स्वायंभुवेमन्वंतरे यः सुर ॥

भा.ष.
१७

तर्हि कस्मान्नेयास्तत्राह ॥ तानिति ॥ तानानयध्वं कानजस्रं सततं निष्कामैः परमहंसानां कुलैः संघैः रसङ्गैर्जुष्टत्वे वितान् मुकुंदस्य पादारविंदयोर्मकरंदरूपो रसः तस्मा
द्विमुखान् ततएवासतः पापिष्ठान् नरकद्वारे गृहे बद्धतृष्णान् कृताभिलाषान् ॥ २८ ॥ किंच येषां जिह्वा चेतः शिरोऽपि भगवन्नामधेयचरणारविंदस्ववचनस्मरणनम
स्कारान्न कुर्वंति ॥ तानानयध्वमित्याह जिह्वेति ॥ भगवतो गुणप्रतिपादकं नामधेयं यस्य जिह्वा न वक्ति ॥ यस्य चेतः भगवतश्चरणारविंदं न स्मरति यस्य च शि
रः सकृदपि श्रीकृष्णाय न नमति तानानय कृतविष्णोः कृत्यमाराधनं यैस्तान् ततएवासतः दुष्टानानयध्वं ॥ २९ ॥ एवं स्वदूतानादिश्य पद्भ्यां कृतापराधभिया भगवंतं क्षमा

तानानयध्वमसतो विमुखान्मुकुंदपादारविंदमकरंदरसादजस्रं ॥ निःकिंचनैः परमहंसकुलैरसंगैर्जुष्टाद्गृहे निरय
वर्त्मनि बद्धतृष्णान् ॥ २८ ॥ जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविंदं कृष्णाय नो नमति यच्छिर ए
कदापि तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥ २९ ॥ तत्क्षम्यतां स भगवान्पुरुषः पुराणो नारायणः स्वपुरुषैर्यदसत्
कृतं नः स्वानामहो न विदुषां रचितांजलीनां क्षांतिर्गरीयसि नमः पुरुषाय भूम्ने ॥ ३० ॥ तस्मात्संकीर्तनं विष्णोर्जगन्मंग
लमंहसां ॥ महतामपि कौरव्य विद्ध्यैकांतिकनिःकृतं ॥ ३१ ॥

पयति तदिति स्वपुरुषैरस्मद्भृत्यैर्यदसत्कृतमपराधं तत्क्षम्यतां पुरुषो भग
वान्नारायणः क्षम्यतां दिवादिवानक्तं यैर्भावैर्धातुकेशपन स्वानां स्वभृत्यानां अज्ञानां कृतांजलीनां नोऽस्माकं क्षांतिरस्मद्विषया क्षांतिरित्यर्थः ॥ अहो गरीयसी गुरु
तरा व क्षमा भगवति वर्तत इति भावः ॥ तस्मै भूम्ने सर्वात्मने मिश्रणाय नमः ॥ अंजलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी इत्युक्तत्वात् सार निमित्तांजलिबंधनेन नमस्करोतीति भा
वः ॥ ३० ॥ एवं प्रसंगात् किं तावद्गति धर्मराजः इति पृष्टो यमो किमभिधायु तामुपसंहरिष्यमाणोंऽतरा राज्ञः पृष्टस्य पैव नरकांतरं नानीत यातनानेया इति तस्योत्त
रं संगमयति मुनिः तस्मादिति त्रिभिः ॥ हे कौरव्य तस्मादितिहाससमर्थनानामनमहात्म्यस्य पुष्कलत्वात् धर्मोक्त्या संवादितत्वाच्च विष्णोः संकीर्तनं जगतो मंगलावहं राम:
महतामपि पातकानामप्यंहसां पापानामैकांतिकनिष्कृतिं मुख्यं प्रायश्चित्तं विद्धि जानीहि ॥ ३१ ॥ १७

अतः पुंसामघस्य निर्हरणाय निःशेषफले प्रणाशाय एतावतैवालं ॥ किं यत् भगवतो गुणकर्मप्रतिपादकनाम्नां संकीर्तनमितीयत् ॥ कुतः यद्यस्मादघवान् पाप्यपि पुत्र
जामिलो म्रियमाणः पुत्रं नारायणेति विक्रुश्याहूय मुक्तिमुपैति स्म गतवानित्यर्थः ॥ २४ ॥ नन्वेवंविधं नाममहात्म्यादिकं स्वयंभ्वादिवदन्येऽप्यधीतशास्त्रा अपि किं न जा
नन्ति तत्राह ॥ प्रायेणेति महाजनः शास्त्रज्ञोऽप्ययं जनः तदिदं नाममहात्म्यादिकं प्रायेण न वेद ॥ तत्र हेतुः देवदेवस्य भगवतः संबंधिन्या मायया अलमत्यर्थं विमोहि
तामतिर्यस्य तादृशः तत्प्रतिविद्यां ते इति किंच मधुपुष्पितायां मधुवन्मधुरं यथा भवति तथा पुष्पितायां पुष्पस्थानीयक्रतुस्वर्गादिफलश्रवणाकार्यवादैर्मनोरमा
यां त्रय्यां जडीकृता मतिर्निदिध्यासनमतिर्यस्य ॥ अतएव वैतानिके महत्येव कर्मणि युज्यमानः भगवन्मायामोहितत्वादर्थवादश्रवणेन कर्मासक्तचित्ततात्तत्त्वं वेदेत्यर्थः

एतावतालमघनिर्हरणाय पुंसां संकीर्तनं भगवतो गुणकर्मनाम्नां ॥ विक्रुश्य पुत्रमघवान् यदजामिलोऽपि नारायणेति
म्रियमाणः इयाय मुक्तिं ॥ २४ ॥ प्रायेण वेद तदिदं न महाजनोऽयं देव्या विमोहितमतिर्बत माययालं ॥ त्रय्यां जडीकृतमति
र्मधुपुष्पितायां वैतानिके महति कर्मणि युज्यमानः ॥ २५ ॥ एवं विमृश्य सुधियो भगवत्यनंते सर्वात्मना विदधते खलु भाव
योगं ॥ ते मे न दंडमर्हंत्यथ यद्यमीषां स्यात्पातकं तदपि हंत्युरुगायवादः ॥ २६ ॥ ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः
समदृशो भगवत्प्रपन्नाः ॥ तान्नोपसीदत हरेर्गदयाभिगुप्तान्नैषां वयं न च वयः प्रभवाम दंडे ॥ २७ ॥

२५ ॥ एवं विदित्वा ये भगवंतं भजंति न ते पापाः स्म तद्दंडपात्रमित्याह एवमिति ॥ सुधियः कुशलाः ये जना एवं नाममहात्म्यादिकं विमृश्यानंते त्रिविधपरिच्छेदरहिते षाड्गुण्यपूर्णे भगव
ति भावयोगं विदधते कुर्वते ते खलु ते मम दंडं प्रति नार्हंति तेषां पातकाभावादित्यर्थः ॥ यदि किंचित्तेषां पातकं स्यात्तर्हि तदपि पातकं उरुगायस्य भगवतो वादः गुणानुवा
दात्मकनामस्मरणादिरूपो हंति नाशयति ॥ २६ ॥ एवमात्मपुरुषोत्तममभिधायाधुना स्वदूताननुशास्ति स्म तिसृभिः ॥ ये जनाः साधवः साधुगुणयुक्ताः समदृशः सर्व
त्र भगवदात्मकत्वेन समं द्रष्टुं शीला इति तथा भगवत्प्रपन्नाः उपायोपेयभावेन भगवंतं शरणंगताः ॥ ते देवैः सिद्धैश्च परिगीताः पवित्राश्च गाथा येषां तादृशास्तान्नोपसीदत ।
न तत्समीपं गच्छतेत्यर्थः ॥ तत्र हेतुः ते हरेर्गदया अभितो गुप्ता रक्षितास्तान्नतरावैषां भयं यतः स्तुतिर्भयं नास्ति न च तेषां दंडे वयं प्रभवाम समर्था भवेम ॥ २७ ॥

भाग॰ वीतरागमत्वादयो धर्मा उक्ता अभिरन्ये श्वकल्याणगुणैश्चिदचिदात्मकजगतो विलक्षणस्य स्वतंत्रस्य मायाधिपतेरधीशितुः सर्वेश्वरस्य महात्मनो निरतिशयप्रभावस्य
९६ हरेर्मनोहराः सुंदराः दूताः भगवतः ऽव गुणारूपस्वभावा येषां ताः दृशाः इह लोके चरंति ॥१७॥ विष्णोर्भूतानि किंकरात्मकानि भूतानि सुरैर्ब्रह्मादिभिः पूजितानि दु
र्दर्शानि सुज्वलानि लिंगानि स्वरूपाणि येषां तानि महाद्भुतानि दृष्टविसजातीयानि भगवद्भक्तिमतो जनान् मत्तो मर्त्योऽन्येभ्यश्च सर्वेभ्यः रक्षंति ॥१८॥ तद्भक्तिम॰
तो रक्षंतु नामायं त्वजामिलो निरतिशयदुष्कृतो भक्तिशून्यश्चेति कथमनेन रक्षित इत्यत आह धर्ममिति ॥ साक्षाद्भगवता प्रणीतमभिहितं धर्मं ऋषयः प्रभृतयो न वि

भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिंगानि महाद्भुतानि ॥ रक्षंति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च ॥१८॥
धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुरृषयो नापि देवाः ॥ न सिद्धमुख्या असुरा मनुष्याः कुतश्च विद्याधरचारणा
दयः ॥१९॥ स्वयंभूर्नारदः शंभुः कुमारः कपिलो मनुः ॥ प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयं ॥ द्वादशैते विजा
नीमो धर्मं भागवतं भटाः ॥ गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वामृतमश्नुते ॥२१॥ एतावानेव लोकेस्मिन्पुंसां धर्मः परः स्मृतः ॥ भ
क्तियोगो भगवति तन्नामग्रहणादिभिः ॥२२॥ नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः ॥ अजामिलोपि येनैव मृत्युपा
शादमुच्यत २३

दुर्भागवतधर्मस्य भावं दृष्टा गतिभावः ॥१९॥ यदि केऽपि न वि ज्ञातो इति धर्मः प्राप्तिविषयाणवदमतः कस्य स्यात् तत्राह ॥ स्वयंभूरिति ॥ वयमहं त्वस्मदोर्व योश्च
तिवक्तृवचनमेकत्वे विवक्षितं वा ॥ स्वयंभूर्ब्रह्मा शंभुः रुद्रः कुमारः सनत्कुमारः मनुः स्वायंभुवः वैयासकिः शुकः ॥२०॥ एते वयं द्वादश हे भटाः भागवतं धर्मं जानीमः तत्स्वभावं जानीमः
न त्वपरे ॥ कथंभूतं गुह्यं गोप्यं विशुद्धं केवलसत्त्वप्रधानाविकारं दुर्बोधं इतरैर्दुर्विज्ञेयं यं धर्मं ज्ञात्वा अमृतं भक्तिसुखं प्राप्नोति ॥२१॥ कोऽसावीदृशो धर्मः कियान्वा तत्राह ए
तावानेवेति ॥ भगवति तन्नामग्रहणादिभिरनुगृहीतो यो भक्तियोगः स एव पुंसां लोके परः उत्कृष्टो धर्मः लोकेषु रूपैः साध्यः उत्कृष्टो धर्मः भगवद्भक्तियोग एव सचै
तावानेवाविच्छिन्नप्रेमप्रवाहोऽनुध्यानपर्यंत एव प्रेमपूर्वमनुध्यानं भक्तिरित्यभिधीयत इति वचनात्पर्यंतमभिप्रेत्य भक्तिशब्देनैवापलाभादेतावानेवेत्युक्तं ॥२२॥ स्वा
तां भगवद्भक्तियोगप्रभावस्तावन्नामोच्चारणप्रभावमेव पश्यते त्याह ॥ हे पुत्रकाः हरेर्नामोच्चारणमहात्म्यं पश्यतः येन नामोच्चारणमहात्म्येनाजामिलोऽपि मृ॰

[illegible] २३ ९६

एवं सर्वोप्यधिकं तत्सर्वव्यापकत्वं सर्वजन्मादिकारणत्वं सर्वप्रमाणतत्वं चोक्तो भगवानस्योस्तीत्युक्तं ॥ अथ यान्सांख्यभगवतो धर्मान्स्वरूपं वयति ॥ यदति ॥ यो
भगवान्निजायां वाचि वेदे तात्विकायां तंत्यां दामन्या नामभिर्वर्णाश्रमनामभिर्जनं दामभिर्यथा पशुनभिः स्थूलतंत्यां गावः बलीवर्दान्निबध्नाति ॥ नामभि
र्निमेनेन ब्राह्मणब्रह्मचर्यादि वर्णाश्रमनामभिर्दर्शितः पूर्वे के वेदोक्ता वर्णाश्रमधर्माः विवक्षिताः तैरीश्वरस्याज्ञारूपायां तदुक्त्वेन नेदं दण्डनायादिकायां वावि
बध्नाति वागधीनान्करोतीति यावत् ॥ यस्मै व तेऽस्मे नामकर्मभिर्निबद्धकृतः बंधोपेयातान्प्राप्नुवन्ति नियतनामकर्माणः चकिताः बिभ्यतः बलिं पूजां कुर्वं
यो नामभिर्वाचि जनं निजायां बध्नाति तंत्यामिव दामभिर्गाः ॥ यस्मै बलिं त इमे नामकर्मनिबंधबद्धाश्चकिता वहंति
१४ ॥ अहं महेंद्रो निर्ऋतिः प्रचेताः सोमोग्निरीशः पवनोर्को विरिंच्यः ॥ आदित्यविश्वे वसवोथ साध्या मरुद्गणा रुद्र
गणाः ससिद्धाः ॥ अन्ये च ये विश्वसृजोमरेशा भृग्वादयोस्पृष्टरजस्तमस्काः ॥ यस्येहितं न विदुः स्पृष्टमायाः सत्वप्रधाना
अपि किं ततोन्ये ॥ १५ ॥ यं वै न गोभिर्मनसासुभिर्वा हृदा गिरा वासुभृतो विचक्षते ॥ आत्मानमंतर्हृदि संतमात्मनां
चक्षुर्यथैवाकृतयस्ततः परं ॥ १६ ॥ तस्यात्मतंत्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः ॥ प्रायेण दूता इह वै
मनोहराश्चरंति तद्रूपगुणस्वभावाः ॥ १७ ॥ तीत्यर्थः ॥ अहं यमः प्रचेता वरुणः ईशानो रुद्रः अर्कः सूर्यः अब्जयोनिः ब्रह्मा आदित्या अदितेः पुत्रा
विश्वावसुप्रभृतयः उपदेवाः विश्वसृजः दक्षादयः अस्पृष्टरजस्तमस्काः ये सत्वप्रधाना अपि यस्येहितमभिप्रायं न विदुः ततस्तेभ्योन्ये न विदुरिति किं वक्तव्यं अवेदं
नेहेतुः स्पृष्टमायाः ये तैर्मायामोहिता वादित्यर्थः ॥ १४ ॥ असुभृतः प्राणभृतः यं गोभिरिंद्रियैर्मनसासुभिः प्राणायामैः हृदा वृत्त्या गिरा वाक्कोपाल्येन यं न विचक्षते न पश्यं
तिन जानंतीत्यर्थः कुतः तमात्मनां जीवानामात्मानमंतरात्मानमंतर्हृदि संतं न विवदंते तेन चक्षुर्यथा तः चक्षुरिति आकृतयः रूपाणि ततः परमाकृतिभ्यो विलक्षण
माकृतीनां प्रकाशकं चक्षुरिंद्रियं न विवदंते तद्वदिति ॥ १६ ॥ एवं सर्वं वपितमवीराध्यत्वमवाविज्ञाताभिप्रायत्ववाङ्मनसाद्यगोचरापरिच्छिन्नस्वरूपस्वभावत्वस

भा॰टी॰ तस्यैवंभूतस्य तेतव दंडः शासनं लोके क्वाप्येतत्पर्यंतं विहतोन वर्त्तते किं त्विदानीं विहतएवाधुनात्वद्भूतरूपेण चतुर्भिः सिद्धैस्तेतवाज्ञा विप्रलंभिता वितथीकृता ॥ ८ ॥ क
२५ थं विप्रलंभितत्यत्राह ॥ नीयमानमिति तवादेशादस्माभिर्यातनागृहं नरकं प्रतिनीयमानं पातकिनं ते सिद्धा व्यमोचयन् ॥ किं कृत्वा प्रसह्य बलात्ते पाशान् छित्वा ततः
तान्सिद्धान्वेदितुं तत्कुलतत्क्षिपतितानादि प्रभावादिकं सर्वं वेदितुमिच्छामः इत्यर्थः ॥ नोस्माकं तं मं यदि मन्यसे तर्हि कथयेति शेषः ॥ तान्विशिंषति ॥ नाराय
णेत्येतच्छब्दे अभिहिते उच्चरिते सति द्रुतमाप्याययुः आजग्मुः ॥ १० ॥ एवमापृष्टोयमस्तान्प्रत्याह मुनिः ॥ इतीत्यमापृष्टः ॥ प्रजानां संयमनः संयमयति शास्तीति तथा
कृतेति स्मृः ॥ यमो देवः प्रीतः सुप्रसन्नेन हृदा हरेः पादांबुजं स्मरन्स्वदूतान्प्रत्याह ॥ ११ ॥ तत्किमेवाह ॥ परइत्यादिना पुरुषायभमन्यः स्य तेन मन्मतः परउत्कृष्टोन्योस्ति

स्यते विहतो दंडो न लोके वर्त्ततेधुना ॥ चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलंभिता ॥ ८ ॥ नीयमानं तवादेशादस्माभिर्या
तनागृहान् ॥ व्यमोचयन्पातकिनं छित्वा पाशान्प्रसह्य ते ॥ ९ ॥ तांस्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमं ॥ नारा
यणेत्यभिहिते मा भैरित्याययुर्द्रुतं ॥ १० ॥ श्रीबादरायणिरुवाच ॥ इति देवः स आपृष्टः प्रजासंयमनो यमः ॥ प्रीतः स्वदूता
न्प्रत्याह स्मरन्पादांबुजं हरेः ॥ ११ ॥ यम उवाच ॥ परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वं ॥ यदंशतो
स्य स्थिति जन्म नाशा नस्योतवद्यस्य वशे च लोकः ॥ १२ ॥

न केवलं मत्तः परः ॥ किं तु जगतः जंगमात्तस्थुषः स्थावराच्चरात्मक
दाद्युत्कृष्टस्तं वपर्यंतात्र्जगतः उत्कृष्टोन्योस्तीत्यर्थः ॥ अतो भवंतः तव शासनकारित्वान्नास्माकं मुख्यप्रशास्तृत्वं इति भावः ॥ कोसौ यत्र यस्मिन्निदं विश्वं तंतवः
पट इवोतं प्रोतं समायामतो विस्तरतश्च नस्यूतं सर्वतो व्याप्तमित्यर्थः ॥ यस्य चांशतः अंशादेव जगतः जन्मादयो भवंति ॥ तस्योतवन्नासिकायामोतवत्प्रोत राम: १५
बलीवर्दवद्यस्य वशेयं लोकः एवं प्रावल्यं लोक इत्यर्थः ॥ १२ ॥

उत्तरमाह श्रुत्वेति ॥ भगवत्पुरुषैरिति हे राजन्भगवत्किंकरैः प्रतिहतः उद्यमो येषां ते याम्याय यमभटाः पतिमधिपतिं संयमन्याः पुर्याः पतिं यमं प्रति विज्ञापयामासुः ३
विज्ञप्तिप्रकारमाह ॥ कतीत्यादिना ॥ आयपुरुषं तमित्यंतेन हे प्रभो यमः इह लोके त्रैविध्यं त्रिविधमेव त्रैविध्यं स्वार्थे ष्यञ् ॥ पुण्यपापतदुभयमिश्ररूपेण त्रिविधं क
र्म कुर्वतो जीवलोकस्य शास्तारः ॥ फलस्य सुखादिरूपस्य याभिव्यक्तिः प्रादुर्भावः तस्या हेतवः कति संतीत्याक्षेपः ॥ ४ ॥ संतु बहवः को बाधस्तत्राह यदीति ॥ बहव
यदि स्युर्दंडधारिणः शास्तारः ॥ दंडरूपप्राप्तनः कारिणः दंडप्रवेकपि ना कारिणो वा बहवः स्युः तर्हि मृत्युर्दुःखममृतं सुखं च कस्य स्यातां कस्य वा न स्यातां कस्याप्यु
भे स्यातामित्यर्थः ॥ अयं भावः अन्योन्यविरोधिशास्तृनियमादित स्यामुखदुःखादेः शास्त्रंतरेण निवारणं संभावनया कस्याप्युभे न स्यातां किंतूभयपरिहारे

श्रीशुक उवाच ॥ भगवत्पुरुषै राजन्याम्याः प्रतिहतोद्यमाः ॥ पतिं विज्ञापयामासुर्यमं संयमनीपतिं ॥ ३ ॥ यमदूता ऊचुः
कति संतीह शास्तारो जीवलोकस्य वै प्रभो ॥ त्रैविध्यं कुर्वतः कर्मफलाभिव्यक्तिहेतवः ॥ ४ ॥ यदि स्युर्बहवो लोके शास्ता
रो दंडधारिणः ॥ कस्य स्यातां न वा कस्य मृत्युश्चामृतमेव वा ॥ ५ ॥ किंतु शास्तृबहुत्वे स्याद्बहूनामिह कर्मिणां ॥ शास्तृत्वमुपचा
रो हि यथा मंडलवर्तिनां ॥ ६ ॥ अतस्त्वमेको भूतानां सेश्वराणामधीश्वरः ॥ शास्ता दंडधरो नृणां शुभाशुभविवेचनः ॥ ७ ॥

णोदासीनो लोकस्यादिति ॥ ५ ॥ परस्परविरोधिशास्तृबहुत्वे यद्यप्युभे स्यातां तथापि शास्तृत्वमनुपपन्नं स्यादित्याशंक्य ॥ किंत्विति ॥ धर्मिणां कर्मिणां ये शास्तारस्तेषां
बहुत्वे स्यात्सुखदुःखादिकं स्यात् यद्वा विरोधिशास्तृबहुत्वे सति कर्मिणां बहूनां कर्मानुसारेण शास्तृभिर्निराबाध्यमानं सुखादि स्यादेव किंतु शास्तृत्व
मुपचारः तेषां शास्तृत्वममुख्यं हि स्याद्वा यथा मंडलवर्तिनामस्य जनपदाधिपतीनां शास्तृत्वं यथा न मुख्यं निरंकुशत्वाभावात् ॥ ६ ॥ तस्य तच्छासनं तु निरं
कुशं वक्ष्यमतः शास्तृबहुत्वं न घटते इत्यन्यमभिप्रेत्य त्वमेक एव शास्तेत्यच्छासनं चेदानीं निहतमित्याशयः ॥ शास्तेति ॥ दंडधरः पापिनां नृणां दंडं धारयति
कोऽस्मतीति तत्पापान्ताहिताहितयो र्विविच्य ज्ञापयिता शुभाशुभे पुण्यपापे पुण्यपापविविनक्ति विभजतीति शुभाशुभविवेचकः नंद्यादित्वात्कर्तरि ल्युः ॥ ७

अथेतिहासश्रवणादिफलमाह ॥ य इति परममतीव गुह्यं गोप्यमघापहं पापहरमिममितिहासं यः पुमान् श्रद्धयायुक्तः ॥ शृणुयाच्छ्रावयेद्वा भक्त्यानुकीर्तयेत्कथयेत् ॥ ४७ ॥
स तु मानरकं न याति नैव ज्ञाप्यते स्पैव यमकिंकरैरीक्षितोऽपि न भवति । यद्यप्ययं मङ्गलः पापीयानपि मर्त्यः श्रवणादिकं कुर्वे विष्णुलोके श्रीवैकुंठे महीयते पूज्यते भगवद्विष
यकमन्युस्तत्रिवारा भगवत्केभ्यो कं ज्ञाप्यत तत्रैव कृमन्यत इत्यर्थः ॥ ४८ ॥ एवं श्रवणकीर्तनादिभक्तियोगारंभस्य केनुत्पन्नायेन यमदवपतापरिहारकत्वं वक्तुं कथि
तमितिहासमजामिलदृष्टांतन्यायेन नवडुपसंहरति । म्रियमाण इति अजामिलो म्रियमाणः ॥ पुत्रोपचारितं पुत्रोपचारेणाह्वयाह्वानाद्युपचारितमेव हृ
रेर्नाम समस्ततन् धाम हरेः स्थानमगात् प्राप्तः किमुत श्रद्धया दरेशगुणान्गृणन्प्रति पादकान्नारायणादिशब्दान्कीर्तयन्नित्यर्थः ॥ ५० ॥ इति श्रीभागवते द्वितीयः ॥ २

य एवं परमं गुह्यमितिहासमघापहं ॥ शृणुयाच्छ्रद्धया युक्तो यश्च भक्त्यानुकीर्तयेत् ॥ ४७ ॥ न वै स नरकं याति नेक्षितो
यमकिंकरैः ॥ यद्यप्यमंगलो मर्त्यो विष्णुलोके महीयते ॥ ४८ ॥ म्रियमाणो हरेर्नाम गृणन्पुत्रोपचारितं ॥ अजामिलो
प्यगाद्धाम किंपुनः श्रद्धया गृणन् ॥ ५० ॥ इति श्रीभागवते षष्ठस्कंधे द्वितीयोऽध्यायः ॥ २ ॥ राजोवाच ॥ निशम्य देवः स्व
भटोपवर्णितं प्रत्याह किं तानपि धर्मराजः ॥ एवं हताज्ञो विहतान्मुरारेर्नैदेशिकैर्यस्य वशे जनोऽयं ॥ १ ॥ यमस्य देवस्य
न दंडभागः कुतश्चनर्षे श्रुतपूर्व आसीत् ॥ एतन्मुने वृश्चति लोकसंशयं न हि त्वदन्य इति मे विनिश्चितं ॥ २ ॥ एवमितिहास

श्रवणेन कीर्तितभगवन्नाममहात्म्यः राजा पृच्छति त्वः पृच्छतः इति धर्मेऽस्मिन्यदि संशयः ॥ स वेद परमं गुह्यं धर्मस्य भगवान्यम इति भागवतपार्षदैरा उक्तम तेनाभिहितं
यममुखेन नाममहात्म्यं श्रावयितुं पृच्छति द्वाभ्यां निशम्येति ॥ एवमित्थं देवो धर्मराजः स्वभटैर्वर्णितं निशम्य कार्यं मुरारेर्भगवतो नैदेशिकैराज्ञाकारिभिः किंकरैर्वि
हितान् निराकृतान् तान् किंकरान्प्रति स्वयं विहितो निराकृता आज्ञा यस्य तादृशः किमुक्तवान् धर्मराजं विशिनष्टि यस्य धर्मराजस्य वशे अयं जनः यद्वशवर्ती अयं संसा
रिकजनः तत् किमाहेत्यर्थः ॥ १ ॥ हे ऋषे देवस्य यमस्य सत्ताहतो दंडस्य भंगः कुतश्चिदासीदिति न श्रुतपूर्वः न श्रुत इत्यर्थः ॥ एतस्मिन्नर्थे सर्वस्यापि संशयो वर्तते इति

एवं भावति स्थिरीकृतचित्तः मनयर्हि यदोपरताप्राकृतादिभ्यो निवृत्ताधीर्यस्य तादृशस्तस्मिन्काले पुराग्रे पुरुषान्पूर्वं दृष्टान् भगवत्पार्षदान द्राक्षीत् ततः प्राप्तु
पलब्धान्प्राक्तान्स्वरूपानुपलभ्याभिज्ञाय द्विजः शिरसा ववंदे ॥४३॥ दर्शनादनु दर्शनादनंतरं गंगायास्तीर्थे कलेवरं त्यक्त्वा गंगायांमिति पाठे तीर्थे गंगाद्वारे त
त्र गंगायांच्युतेः सपदि सद्यः भगवत्पार्श्ववर्त्तिनां पार्षदानां स्वरूपं तत्समानं रूपं जगृहे गृहीतवान् ॥४४॥ स विप्रो जामिलः महापुरुषकिंकरैः साकं हैमं वि
मानमारुह्य विहायसा आकाशमार्गेणाधिकारादिनेत्यर्थः ययौ गतः केत्यत आह यत्र श्रियः लक्ष्म्याः पतिरास्ते वैकुंठे इत्यर्थः ॥ भगवत्पार्श्ववर्त्तिस्वरूपग्र
हणरूपं वैकुंठगमनानंतरं वेदितव्यं तत्र गतस्य तत्साधृश्यत्वातिभावः ॥४५॥ उक्तमितिहासमुपसंहरन्भगवन्नामकीर्त्तनात्तद्विषयमसापादकमुपा

यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पुरः ॥ उपलभ्योपलब्धान्प्राग्ववंदे शिरसा द्विजः ॥४३॥ हित्वा कलेवरं तीर्थे गंगा
यां दर्शनादनु सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्त्तिनां ॥४४॥ साकं विहायसा विप्रो महापुरुषकिंकरैः ॥ हैमं विमानमा
रुह्य ययौ यत्र श्रियः पतिः ॥४५॥ एवं स विप्लावितसर्वधर्मा दास्याः पतिः पतितो गर्ह्यकर्मणा ॥ निपात्यमानो निरये हतव्रतः
सद्यो विमुक्तो भगवन्नाम गृह्णन् ॥४६॥ नातः परं कर्मनिबंधकृंतनं मुमुक्षतां तीर्थपदानुकीर्त्तनात् ॥ न यत्पुनः कर्म
सु सज्जते मनो रजस्तमोभ्यां कलिलं ततोन्यथा ॥४७॥

यांतरमुक्तहंतनास्तीत्याह । एवमिति द्वाभ्यां । एवमित्थं स द्विजः विप्लावितः विनाशि
तः सर्वैः स्ववर्णाश्रमोचितः धर्मो येन दास्याः पतिरत एव पतितः स्वधर्माच्च्युतः गर्ह्यैर्निंदितैः कर्मयस्य हतं व्रतं व्रयं तु स्फतसंपन्नः शीलवृत्तगुणालयः इत्या
दिनोक्तिं यस्य ॥ अत एव नरके निपात्यमानः यमभटैरिति शेषः तथाभूतोपि भगवन्नाम गृह्णन्नुच्चरन्सद्यः विमुक्तो मुक्त इत्यर्थः ॥४६॥ मुमुक्षूणां संसारबंधनाम्
नोकुमिच्छतां तन्मूलकर्मरूपबंधस्य निकृंतनं कृत्यतेच्छिद्यते नेनेति हेतुनमतः तीर्थपदस्य भगवतोनुकीर्त्तनात्परमन्यन्नास्ति ॥ यद्यस्मादनुकीर्त्तनाद्रजस्त
मोभ्यां कलिलं कश्मलं मनः कर्मसु संसृतिहेतुषु पुनर्न सज्जते भवत्यन्यथोपायांतरेण न च न सज्जत इति न किंतु संसृतिहेतुषु कर्मसु सज्जत एवेत्यर्थः ॥४७॥

किंकृत्वा विद्यादेहात्माभिमानमूलमज्ञानं कामः शब्दादिविषयाभिलाषः कर्मभिर्जीतं तमिमं बंधं गर्भेजन्माद्यवस्थापरिसृतिरूपं संसारं विमुच्या
पोह्य ॥ कथं वर्तमानः सर्वेषु भूतेषु सुहृच्छांतः निमदीतांतरिंद्रियः करुणः सर्वेषु भूतेषु कृपावानात्मवानप्रमत्तमनस्कः ॥ ३७ ॥ योषिन्मायया भगवन्म
यया गृहीतमात्मानं मनो बध्नाति विघ्नान स्मि यथैवाहमभ्रमो ज्ञानप्रमत्तः क्रीडामृग इव क्रीडितः ॥ ३८ ॥ देहेत्यादि शब्दात्तदनुबंधिष्वहंममेति पाभिध्यार्थ
धीमति मिथ्याऽस्थया पापायैयेधीर्देहाद्यथे विषयाधीस्तद्रूपामतिं तां ॥ अन्नदहमर्थे देहाद्यथे विषयकां ह धियोपरीतरूपत्वान्मिथ्यार्थधीरित्युक्तमो
हार्थे धीरितिपाठांतरं तत्रापि मोहात्मिकामहं त्वेन देहादिरूपार्थे धीरूपामित्येवार्थः ॥ हित्वा त्यक्त्वा भगवति तत्कीर्तनादिभिः शुद्धं मनो धास्ये आधास्ये

विमुच्य तमिमं बंधमविद्याकामकर्मजं सर्वभूतसुहृच्छांतो मैत्रः करुण आत्मवान् ॥ ३७ ॥ मोचये ग्रस्तमात्मानं योषि
न्मय्यात्ममायया ॥ विक्रीडितो ययैवाहं क्रीडामृग इवाधमः ॥ ममाहमिति देहादौ हित्वामिथ्यार्थधीर्मतिं ॥ धास्ये म
नो भगवति शुद्धं तत्कीर्तनादिभिः ॥ ३९ ॥ इति जातसुनिर्वेदः क्षणसंगेन साधुषु गंगाद्वारमुपेयाय मुक्तसर्वानुबंधनः
४० ॥ स तस्मिन्देवसदने आसीनो योगमास्थितः ॥ प्रत्याहृतेंद्रियग्रामो युयोज मन आत्मनि ॥ ४१ ॥ ततो गुणेभ्य आत्मा
नं वियुज्यात्मसमाधिना ॥ युयुजे भगवद्धाम्नि ब्रह्मण्यनुभवात्मनि ॥ ४२ ॥ ३९ ॥ इतीत्थं जात उत्पन्नः सुनितरां निर्वेदो यस्य तादृशः

साधुषु क्षणमात्रसंगेन मुक्तसर्वानुबंधनं ॥ पुत्रादिस्नेहो येन सः गंगाद्वारं हरिद्वारं तदुपेयाय प्राप्तवान् ॥ ४० ॥ सोजामिलः तस्मिन्देवसदने देवो भगवान् सी
दति सन्निहितो भगवद्यास्मिन्निति तस्मिन् गंगाद्वारे उपविष्टो योगं भगवद्भक्तियोगमास्थितः ॥ आरब्धवानित्यर्थः ॥ प्रत्याहृताः विषयेभ्यः इंद्रियग्रामः स्व
तवो द्येंद्रियपयोधी येन तादृशः प्रथममात्मानं प्रत्यगात्मानं गुणेभ्यः गुणपरिणामेभ्यो विविच्य पृथक्कृत्वा नानुसंधायत स्मिन्नात्मनि प्रत्यगात्मनि मनो युयुजे
४१ ॥ अतस्त्वात्मनः जीवांतर्यामिणः परमात्मनः समाधिना ध्यानेन तस्मिन् ब्रह्मणि स्वरूपेणागुणो निरतिशयबृहत्त्वस्यानुभवात्मनि ज्ञानस्वरूपे भग
वद्धाम्नि एवं वक्ष्यमाणे तेजसि युयुजे स्थिरमकरोत् ॥ ४२

ज्ञान

सर्वेविधोहंव्यक्तंनूनंनितरांदारुणेनरकेपतिष्यामि॥ यत्रनरकेधर्मघ्नायमाद्यःसंतिकामिनोमाहशाश्चयमयातनाविंदंतिलभंते॥३०॥ एवंतस्यपरितापमनुव
र्णेदानींविमर्शपूर्वकंमुक्तिसाधनधर्मानुक्रममाह॥ किंस्वप्नादिनाद्वयसरापत्तुभवात्मनात्यंतेनकिंस्वप्नमहोस्वित्साक्षात्तांगमनतत्संभावयन्नादिदर्शनंस्वप्नः॥ अहोस्वित्प्र
त्यक्षज्ञानप्रतीतमद्भुतमहाद्भुतंदृष्टमद्याधुनातेदूताःक्वयाताःयेपाशपाणयःसंतोमामाकृष्टवंतः॥३१॥ अथतेचत्वारश्चारुदर्शनासुंदराःसिद्धाःक्वगताःयेपाशैर्बं
द्ध्वाधोभुवःनरकान्नीयमानंमांमोचितवंतः॥३२॥ यद्यप्यहंमंदभाग्यस्तथापिमेदुर्भगस्यापिविबुधोत्तमानांदर्शनेनिमित्तसप्तमीदर्शनेननिमित्तेनेत्यर्थः

सोहंव्यक्तंपतिष्यामिनरकेभृशदारुणे॥ धर्मघ्नाःकामिनोयत्रविंदंतियमयातनाः॥३०॥ किमिदंस्वप्नआहोस्वित्साक्षा
द्दृष्टमिहाद्भुतं॥ क्वयाताअद्यतेयेमांव्यकर्षन्पाशपाणयः॥३१॥ अथतेक्वगताःसिद्धाश्चत्वारश्चारुदर्शनाः॥ व्य
मोचयन्नीयमानंबद्ध्वापाशैरधोभुवः॥३२॥ अथापिमेदुर्भगस्यविबुधोत्तमदर्शने॥ भवितव्यंमंगलेनयेनात्मामेप्र
सीदति॥३३॥ अन्यथाम्रियमाणस्यनाशुचेर्वृषलीपतेः॥ वैकुंठनामग्रहणंजिह्वावक्तुमिहार्हति॥३४॥ क्वचाहं
कितवःपापोब्रह्मघ्नोनिरपत्रपः॥ क्वचनारायणेत्येतद्भगवन्नाममंगलं॥३५॥ सोहंतथायतिष्यामियतचित्ते
न्द्रियानिलः॥ यथानभूयआत्मानमंधेतमसिमज्जये॥३६॥

मंगलेनभवितव्यंकिंतद्येनमंगलेनशुभकर्मणामममात्मामनःप्रसन्नात्मावाप्र
सीदति॥३३॥ अन्यथायदिमंगलेनभवितव्यंपुण्येनविनेत्यर्थः॥ वृषलीपतेरत्यन्ताशुचेम्रियमाणस्यममतेद्युतस्यममजिह्वावैकुंठस्यनामग्रहणंग्रहीतुं
नार्हतिनियतेचितमनेनेतिप्रहणंनामरूपग्रहणंवक्तुंनार्हति॥३४॥ कितवोधूर्तोब्रह्मघ्नःविप्रहननात्कःब्रह्मघ्नइतिपाठेस्पष्टक्वचेदंनिलज्जोहंक्वमंगलावहंभ
नारायणेत्येतद्भगवन्नामक्वहंहपापस्यममान्तकालेतन्नामोच्चारणंपुण्यंपुण्येनविनाकथंसंभवेदित्यर्थः॥३५॥ सोहंसिद्धदर्शनेवैकुंठनामग्रहणादिसंचितधं
र्मोयस्त्वादपापतःनियमितःचित्तादयोयेनतथाभूतःसन्तथापतिष्यामियतिष्यामिकथंयथाभूयःपुनरात्मानमंधेतमसिनरकेनमज्जयेमज्ज

भा. टी. ६८

भा॰ष॰ १२ अथतदंतर्दूतानांतरस्यजामिलःयमकृष्णयोर्दूतानांशुद्धंभागवतंधर्ममाकर्ण्यभगवन्माहात्म्यश्रवणाद्भगवद्भक्तिमानासीदित्युत्तरेणान्वयःयमदू
तानांत्रैविध्यंगुणाश्रयंधर्ममाकर्ण्यकृष्णदूतानांशुद्धंभागवतंधर्ममाकर्ण्येत्यन्वयःत्रिविधोवेदःऋग्यजुःसामात्मकस्तत्रविहितंत्रैविध्यंपूर्वभागवि
हितंकर्मगुणाश्रयंगुणत्रयपरवशजनाधिकारंशुद्धंसत्वगुणप्रधानजनाधिकारंभागवतंभगवतःसंबंधिभगवत्प्राप्त्येतिप्रावोचश्रीमदित्तिक्रियापदाध्या
हारः॥आकर्ण्येत्यस्यकर्णितमनस्यकथार्थेत्यर्थः॥अन्यथातिरोधानात्पूर्वमेवावर्णितत्वादथेत्यनेनसहविरोधापत्तेः॥अथेत्यस्यानन्वितिवार्थः
२५॥आत्मनःस्वस्याशुभंपापंस्मरतस्तस्यमहाननुतापश्चरितापश्चात्तापआसीत॥२६॥तस्यानुतापप्रकारमेवाह॥अहोइति॥अविजितआत्मामनोयेनतस्य

अजामिलोप्यथाकर्ण्यदूतानांयमकृष्णयोः॥धर्मंभागवतंशुद्धंत्रैविद्यंचगुणाश्रयं॥२५॥भक्तिमान्भगवत्याशुमाहा
त्म्यश्रवणाद्धरेः॥अनुतापोमहानासीत्स्मरतोशुभमात्मनः॥२६॥अहोमेपरमंकष्टमभूदविजितात्मनः॥येनवि
प्लावितंब्रह्मवृषल्यांजायतात्मना॥२७॥धिङ्मांविगर्हितंसद्भिर्दुष्कृतंकुलकज्जलं॥हित्वाबालांसतींयोहंसुराप
मसतीमगां॥२८॥वृद्धावनाथौपितरौनान्यबंधूतपस्विनौ॥अहोमयाधुनात्यक्तावकृतज्ञेननीचवत्॥२९॥

ममममहत्कष्टमहोअभूत्किंतद्वृषल्यांशूद्रायांजायताजायमानेनयेनात्मनामयाब्रह्मब्राह्मण्यंविप्लावितंविनाशितं।इतियत्तत्कायाजायाभवतिपदस्यांजाय
तेपुनरितिश्रुत्यर्थमभिप्रेत्यजायतात्मनेत्युक्तं॥२७॥सद्भिरार्यैर्विशेषेणगर्हितंमांधिक्॥नपरमेवतमोःकार्याधिकार्याद्विरतिसंबंधसामान्येषष्ठ्यःपश्चात्द्विका
द्वितीया॥धिगितिनिंदार्थोतःकर्मव्ययंमांममधिक्निंदानिंद्योहमित्यर्थः॥कथंभूतंदुष्कृतंदुष्टंकृतवानदुष्कृतंकुलस्यकज्जलंकलंकं॥किंचसतीविशु
द्धांबालांयोषांस्त्रियंहित्वासुरांपाःसुरापीवतीतितामतएवासतीमगामगच्छं॥२८॥वृद्धावयसाअनाथौपोषकरहितौनविद्यतेन्योबंधुःपुत्रादिर्ययोस्तौ रामः १२
तपस्विनौतपसंपन्नौपितरौमातापितरावकृतज्ञेनकृतघ्नेनमयाधुनातत्त्यागमेवनीचेनेवाहोतत्तौ॥२९॥

एवंयुक्तायमदूताविष्णुदूतैरित्याहसुविः ॥ तएति ॥ हेनृपतेयमभटाएवमुक्ताविधंभागवतंभगवन्नामोच्चारणरूपंधर्मंविनिर्णीयनिःशेषदुरितक्षयणसमर्थंवि
निश्चित्यतंविप्रंयाम्यपाशान्निर्मुच्यविमुक्तंकृत्वामृत्योरमूमुचन्मोचितवंतः मृत्योरमूमुचन्नित्यस्यायमभिप्रायः ॥ आयुःक्षयकरात्पापाधिक्यात्तस्य
मृत्युःप्राप्तःतत्समयेवर्तमानेतुयाम्याःपुरुषाश्चाजग्मुःतस्मिन्पापाधिक्येयान्त्रितिमनामोच्चारणेनाकस्मादापतितेनसमूलंविनष्टेसतिमृत्योरपिनिवृत्ति
रित्यतएवममेवंवत्तेम्भोजात्रास्यकालउपस्थितेमतिंचकारतेनयशतपूर्वेग्रंथस्यद्विजःपाशाद्विनिर्मुक्तइत्युत्तरग्रंथेनसहनविरोधः ॥ अन्यथाश्रुतक्रमस्यो
र्निवारणासंभवात्सनर्जीवनकथनंभक्तियोगोपसंहारकथनंचविरुध्येतेति ॥२१॥ ततोयमदूताद्विजोविष्णुदूताश्चकिमकार्षुस्तत्राह ॥ इतिप्रत्युदित

तएवंसुविनिर्णीयधर्मंभागवतंनृप ॥ तंयाम्यपाशान्निर्मुच्यविप्रंमृत्योरमूमुचन् ॥२१॥ इतिप्रत्युदितायाम्यादूता
यात्वायमांतिकं ॥ यमराज्ञेयथासर्वमाचचक्षुररिंदम ॥२२॥ द्विजःपाशाद्विनिर्मुक्तोगतभीःप्रकृतिंगतः ॥ ववंदे
शिरसाविष्णोःकिंकरान्दर्शनोत्सुकः ॥२३॥ तंविवक्षुमभिप्रेत्यमहापुरुषकिंकराः ॥ सहसापश्यतस्तस्य
तत्रांतर्दधिरेनघ ॥२४॥

प्रत्याख्याताःयाम्यादूताःयमसमीपंयात्वागत्वायमराज्ञेयमराजायममासविधेरनित्यत्वात्लरचः ॥ आर्षत्वाद्वादेश्च ॥ इदंमयथासर्वमुक्तंसर्वमनति
क्रम्याचचक्षुःकथितवंतः ॥२२॥ द्विजोयमपाशाद्विनिर्मुक्तःगतभीर्निर्भयः ॥ प्रकृतिंपूर्वावस्थांगतःप्राप्तःपुनर्जीवितवानित्यर्थः ॥ विष्णोःकिंकरान्दर्श
नेनोत्सवोहर्षोयस्यताहृकशिरसाववंदेनमस्कृतवान्हेअनघ ॥२३॥ तंद्विजंविवक्षुंकिंचिद्वक्तुमीच्छुमभिप्रेत्याजस्यमहापुरुषस्यभगवतःकिंक
राःसहसाझटितस्यद्विजस्यपश्यतःसतत्रांतर्दधिरेतिरोहितवंतः ॥ अस्यभगवत्प्राप्त्यपेक्षाजनायांतर्धानंसर्वज्ञोपिहिसर्वेशःसदाकारुणिकोपि
सन् ॥ संसारतंत्रवाहिन्यादपेक्षामपेक्षतेस्त्वतं ॥२४॥

भा० ष
११

ननु महतः पापस्य महदेव प्रायश्चित्तं न तु स्वल्पं नाममात्रं द्वरां पापतारतम्यप्रायश्चित्ततारतम्यस्य मन्वादिभिरुक्तत्वादन्यथा प्रायश्चित्तशास्त्रवैयर्थ्यं स्यादित्यत एक
स्यचिद्दांशकां निराकुर्वंति गुरूणां पापानां गुरूणि प्रायश्चित्तानि लघूनां लघूनि महर्षिभिर्यथावज्ज्ञात्वाप्युक्तानि ॥१६॥ तथापि तैस्तैः तपआदिभिः प्रायश्चि
त्तैरघानि पूयंते निवर्तंते न त्वधर्मजमधर्मजनयितृ अधर्मजं तद्धृदयं मनः चित्तशुद्धिर्न जायत इत्यर्थः ॥ तस्य धर्मस्य निमित्तं कदर्थं केन शुध्यती
त्यत आह तदपीति तत् हृदयमपीश्वरांघ्रिसेवया नामस्मरणादिरूपया भगवत्सेवया शुध्यतीत्यर्थः ॥१७॥ तस्मादज्ञानादिकं भगवन्नामाशेषाघनिवर्तकमिति
ज्ञानादथवा अज्ञानात् संकेतपरिहासादिनिमित्ताद्वा संकीर्तितमुत्तमश्लोकस्य भगवतो नाम पुंसः पापिनो घं हरत्येव किंतु तं यस्यैव यथानलोग्निः ज्ञानादज्ञा

गुरूणां च लघूनां च गुरूणि च लघूनि च ॥ प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः ॥१६॥ तैस्तान्यघानि पूयंते तपो ते
दानजपादिभिः ॥ नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया ॥१६॥ अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत् ॥ संकीर्तितम
घं पुंसो दहेदेधो यथानलः ॥१८॥ यथागदं वीर्यतममुपयुक्तं यदृच्छया ॥ अजानतोप्यात्मगुणं कुर्यान्मंत्रोप्युदाहृतः ॥१९॥ न
पतिं वो पृच्छत भटा धर्मेस्मिन्यदि संशयः ॥ स वेद परमं गुह्यं धर्मस्य भगवान्स्वयम् ॥२०॥ श्रीशुक उवाच ॥

नादवस्यापदहतितत्वदित्यर्थः ॥१८॥ यथा वीर्यतममगदमौषधं यदृच्छया ज्ञानादज्ञानाद्वा उपयुक्तं भक्षितं सदारोग्यं जनयति इति शेषः ॥ तथा भगवन्नामात्मको
मंत्रोपि अज्ञात्मनः स्वस्य गुणं नाम्नः सामर्थ्यमजानतापि पुरुषेणोदाहृतमुच्चारितं तदघं दहत्येवेति पूर्वेणान्वयः ॥ वस्तूनां किल दृग्गुणस्वभावत्वादिति भावः ॥१९॥
ते यद्यस्माद् उक्ता धर्मे युष्माकं संदेहस्तर्हि स्वपतिं यमं पृच्छतेत्याहुः ॥ पतिमिति ॥ हे भटाः ॥ हे दूताः ॥ यद्यस्मिन्नस्माभिरुक्तेर्थे धर्मे यदि संशयस्तर्हि वो युष्माकं पतिं यमं
पृच्छत मत्तु धर्मस्तत्त्वं जानातीत्याहुः ॥ सर्वतिसभगवान् ॥ उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति इत्युक्तविधः यम
धर्मस्य भागवतधर्मस्य गुह्यं रहस्यमतएव परमं श्रेष्ठं वेद जानातीत्यर्थः ॥२०॥ ११

तदुक्तं वासिमितकं निष्कृतं नैकांतिकं नात्यंतशोधकं ॥ कुतः हि यतः निष्कृते तस्मिन्कृतेपि असत्पथे पापमार्गे पुनर्मनो धावति चेदित्येवकारार्थः निपातानां
मनेकार्थत्वाद्धावत्येवेत्यर्थः ॥ तत्तस्मात्कर्मणां पापानां निर्हारं नाशं अभीप्सतां इच्छतां हरेर्गुणानुवादः स एव प्रायश्चित्तं गुणानुवदंतेयेन स गुणानु
वादः नामव्याहारः स हि सत्वभावनः सम्यग्ज्ञानहेतुभूतसत्ववर्द्धकः ॥ ११ ॥ अथ यद्वै यमदूताः कृतमशेषाघनिष्कृतं येन तमेनं मापनयत मानायत यत यमा
लयमितिशेषः कुतः यद्यस्मादसावजामिलः म्रियमाणो भगवतो नाम सम्यग्गृहीतवान् ॥ १२ ॥ ननु सोपि पुत्रे संकेतितं नारायणेति पदमुच्चारितवान् ततस्त
द्विषयकमतत्प्रसादनकारणं संसारयेदेव न तु भगवद्विषयकमतत्प्रसादनकारणमोचयेदित्यपेक्षायां यदृच्छयामस्मादिवद्भावास्पष्टस्याग्नेर्यदृच्छयापीतस्यौष

नैकांतिकं तद्धि कृतेपि निष्कृते मनः पुनर्धावति चेदसत्पथे ॥ तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्वभावनः ॥ ११ ॥
अथैनं मापनयत कृताशेषाघनिष्कृतं यदसौ भगवन्नाम म्रियमाणः समग्रहीत ॥ १२ ॥ सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा
वैकुंठनामग्रहणमशेषाघहरं विदुः ॥ १४ ॥ पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः ॥ हरिरित्यवशेनाह पुमान्नार्ह
तियातनाः ॥ १५ ॥
धस्यववदाहकत्वारोग्यकत्ववद्रहस्तां विलक्षणस्वभाववत्वात्संकेतितस्यासंकेतस्य वान्यान्याहश्रोभगवन्नाम्नः सर्वाघनिवर्तकत्वं भगवद्विषयकमतत्प्रसाद
कत्वं च स्वाभाविकोधर्मः स्यादुःसंकेत्यमित्यादिना कुर्योन्मंत्रोप्युदाहृतः २ त्संकेतेनगृणेन सांकेत्यं पुत्रादौ संकेतकृतपारिहास्यं उच्चारणासमर्थेजनपरिहा
सकृतं यद्वा मत्ता विष्णुर्मंत्रणात्यादिभिरालापं स्तोभः तत्कृतमित्यर्थः ॥ हेलनं स्वाविरोधिजननिंदार्थं कृतं ॥ यद्वा किं विष्णुनेति सावज्ञं हेलनरूपं वा ॥ अम
दपित्वकारांतरमापन्नं वैकुंठस्य भगवतो नामग्रहणं निःशेषपापहरं विदुः नामसामर्थ्ये याथात्म्यविद इति शेषः ॥ १४ ॥ तथा पतितः प्रासादादेः भगवदङ्ग
रूपवर्णोप्रभयवशमोदास्खलितः मार्गे भग्नपादाद्यवयवः संदष्टः सर्पादिभिः तप्तोज्वरादिना आहतो दंडादिना एतदन्यतमावस्थं प्राप्तः पुमानप्यवशेन ।
पि हरीरित्याहतर्हि यातनाः प्रतिनार्हति ॥ १५ ॥
स्तोभं गिरालापकृतं ३

ना.श्र. १०

तेषां सर्वेषामप्यघवतामिदमतिं विष्णोर्नामव्याहरणमेकमेव सुनिष्कृतं उत्तमं प्रायश्चित्तं ॥ यतः विष्णोर्नामव्याहरणात्तद्विषया विष्णुविषया मतिर्भव
ति भगवद्विषयकमनस्सम्पत्तिः प्रवर्तिबंधविसकं जहाति नन्तिरसमनवारणमस्तुत्पादकं स्मरणं ततश्च तस्मन्नामुचमति भगवत्प्राप्तिप्रतिबंधकनिरसनद्वारा मुक्ति
हेतुरिति नामस्य अयस्य नविरोध इति भावः ॥ नन्वेवं नामोच्चारणेनैव मुक्तिसिद्धेरुपासनप्रयासस्य वैयर्थ्यमेवं ॥ यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरं तं तमेवै
ति कौन्तेय सदा तद्भावभावित इत्युक्तन्यायेन ततदंतिमस्मरणस्य तत्तज्ज्ञावाप्त्यापादकत्वात् भगवत्स्मरणस्य भगवत्प्राप्त्यापादकत्वे स्थिते भगवदंतिमस्म
रणोपायतया उपायप्रयत्नपर्यंतमनुष्ठानं तदन्तरेण विधीयते तदेव स्मरणं प्राचीनसंस्कारवशात् कस्मात्स्यात् पारिंगङ्गानिपातन्यायेनापतितं चेत्तेनैव मुक्तिः
सतिजीवनहेतावंतिमस्मरणपर्यन्तं यामनके नामोच्चारणमभ्यसं सतकर्मज्ञानयोगादिवदनुग्राहकं अन्यसतितु तादात्विकस्मरणस्य मादान्मुक्तिसाधनस्यानुग्रा
हकमितिनकोऽपि विरोधः ॥ ननु जीवदंतरसमकृदात्तमपि नाम न भक्तिनिवर्तकत्वेन दृष्टमिति चेत्तर्हि तेरनुष्ठिता कर्मयोगादयोऽपि तन्निष्पादकत्वेन नह
ष्टाः ॥ अथ प्रवतत्प्रतिबंधकं व प्राङ्भक्तियोगानधिकारा वा पिष्ठिन्नस्यते दुर्देवनरकपरिहारकत्वे पुनर्जन्मांतरे भक्तियोगारंभापादकत्वं च तदा भक्तियो

सर्वेषामप्यघवतामिदमेव सुनिष्कृतं ॥ नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥१०॥ न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा
विशुद्ध्यत्यघवान्व्रतादिभिः ॥ यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलंभकं ॥११॥

गानुष्ठेहकतामावेऽपि जन्मान्तरे प्राचीनसंस्कारवशात् दशस्य मारणा भक्तियोगनिष्पादकाः कर्मयोगादयश्चेत्तर्हि नामोच्चारणमप्येवमेवेत्यवधेयं कर्मयोगादीना
मभिसंहितफलानामैश्वर्यकैवल्यादिसाधनत्वमनभिसंहितफलानां तु भक्तियोगनिवर्तकत्वं संयोगपृथक्त्वन्यायेन नामोच्चारणस्य तु सतिजीवनदेतावस
कृदाहृतस्य भक्तियोगोत्पत्तिप्रतिबंधकनिरसनेनाभिसंहितफलकत्वे योगवद्भगवद्भक्तियोगानुग्राहकत्वं संभवति ॥ इयांस्तु विशेषः सतिजीवितेतिमप्रत्ययजनक
तत्स्मार्यमाणगवतस्मात् तान्मुक्तिसाधनमिति न्नमित्यलमतिविस्तरेण ॥१०॥ सर्वेषामप्यघवतामिदमेव सुनिष्कृतमित्यनेन कतिपयदुरितनिवर्तकास्वातिपदोक्तप्रायश्चित्तानाम
कल्प इति निवर्तकत्वेन नाम्नोच्चारणस्योत्कर्षं संविधितं तदेव प्रतिपादयति नेत्यादिना ब्रह्मवादिभिर्मन्वादिभिरुदितैरुक्तैर्व्रतादिभिः प्राजापत्यकृच्छ्रचान्द्राय
णादिव्रतादिभिः प्रायश्चित्तैरघवान्स्तरु पथा पापान्न शुध्यति कथं यथा हरेर्भगवतो नामरूपैः पदैः शब्दैर्न ततः हेतुः नदितिति हरेर्नामपदोदाहरणं तदुत्तमश्लोकस्य
भगवतः गुणानामोपलंभकं उत्तमश्लोकगुणविषयकमनस्समुत्पादकमित्यर्थः जीवदशायामनभिसंहितफलकर्मयोगादिभक्तिरूपमनस्पदकमतिमदर्थाय ।

किंचमापराधलोकस्यदंडयितायमः नत्वपापिनामितिविश्वासविषयएवकृतवैषम्येनानपराधिनोपिदंडयितास्यात्तर्हिविश्वघातकतादोषःप्रसज्यते
तेनलोकपरिपाटीभंगेनाकूतः ॥ यस्येति ॥ यस्यविश्वसनीयस्यांकेउत्संगेशिरन्याधायविन्यस्ययोलोकोजनःनिर्वृतःसुखितःस्वपितितमेवलोकंसएवभक्त
नाविस्त्रंभत्योषःकृपावांश्चकथंप्रोग्भुमर्हतीत्यन्वयः ॥ निर्वृतोलोकःकथंभूतःयथापशुःतद्वत्स्वयंधर्ममधर्मंवानवेदकिंतुकेवलंमामयंहितकारीत्येववेदे
तिभावः ॥ ५ ॥ लोकंकथंभूतंतस्यपितात्मानंनितरामर्पितःसमर्पितःआत्मादेहोयस्य ॥ कृतमित्रंविश्वासोयेनननविद्यतेचेतःविवेकोयस्य ॥ अकेतनमितिपाठे
नविद्यतेकेतनंशरणमन्यस्यचयस्यतत् ॥ ६ ॥ नत्वस्यपापिनोदंडेकिमर्यमाकोपःकियतेतत्राकूतः ॥ स्वयंहीतिजनानांकोटिभिरर्जितानामंहसांपापानांकृतनिर्वे

यस्यांकेशिरन्याधायत्नोकःस्वपितिनिर्वृतः ॥ स्वयंधर्ममधर्मंवानहिवेदयथापशुः ॥ ५ ॥ सकथंन्यर्पितात्मानंकृत
मित्रमचेतनं ॥ विश्रंभणीयोभूतानांसघृणोद्रोग्धुमर्हति ॥ ६ ॥ स्वयंहिकृतनिर्वेशोजन्मकोट्यंहसामपि ॥ यद्व्या
जहारविवशोनामस्वस्त्ययनंहरेः ॥ ७ ॥ एतेनैवह्यघोनोस्यकृतंस्यादघनिष्कृतं ॥ यदानारायणायेतिजगादचतु
रक्षरम ॥ ८ ॥ स्तेनःसुरापोमित्रध्रुकब्रह्महागुरुतल्पगः ॥ स्त्रीराजपितृगोहंतायेचपातकिनोपरे ॥ ९ ॥ ५ भागवतटीकास्कं:

शः आयश्चित्तंयेनयथाभवेत् ॥ कोसौनिर्वेशःतत्राकूतः विवशःपरवशोपिहरेःस्वस्त्ययनंशुभावहंनामब्याजहारजगादेतियदस्मादेवनिर्वेशइत्यर्थः ॥ ७ ॥
ननुनामाग्र्यःपुत्रायाह्वानायविद्यतइतिन्यायोपासनमतिरिक्तोपायांतरनिषेधात्कथंपारवश्यपकृतस्पर्शकेतितन्नामोच्चारणस्याविलोहसोनिरसनद्वारेण
मुक्तिसाधनत्वमित्याकूतः ॥ एतेनैवेत्यादिनायत्तमङ्घियाममतिरिसंतेन ॥ यदाप्रयाणसमयेनारायणायेतिचतुरक्षरंनामजगादेतियदेतेनैवास्याघोनःअघा
त्यात् नांनिष्कृतंप्रायश्चित्तंकृतं ॥ ८ ॥ नकेवलंप्रतिपदोक्तप्रायश्चित्तादिवदंतियन्नामस्मरणंकतिपयपापानांनिष्कृतंकिंतुमहापातकोपपातकसंकीर्णी
दिरूपेणावक्रविधानांसर्वेषामपीत्याकूतः स्तेनइत्यादिनास्तेनस्वर्णचोरःतेनादयोयेमहापातकिनःयेचमित्रध्रुगादिकंहंतारउपपातिकनःअपरेचना

भा॰ष॰ एवंतस्यवृत्तिमभिधायावश्यंदंडंप्राप्स्यतीत्याह॥ यद्यस्मादसावजामिलःशास्त्रपथमतिक्रम्यस्वेच्छाचारीआर्यैःशिष्टैर्गर्हितःअघायुःपापाभि
६ रतपुत्रःदासीसंगात्पापात्मालालित्यमनुभिःसन चिरंकालमवर्त्तत॥६७॥ततःकृतंकिल्बिषंपापंयेनाकृतः॥निर्वेशःनिष्कृतिर्येनतंतमेनंदंडपाणेर्यमस्य
सकाशंप्रतिनेष्यामःप्रापयिष्यामःसकाशंविनिवेशिनदि यत्रदंडपाणेःसकाशेदंडेननरकानुरूपेणशुध्यति॥६८॥इतिश्रीभागवतेषष्ठस्कंधेप्रथ
मोऽध्यायः॥१॥एवंयमदूतैःकृतोविमृश्यस्त्राक्त्वाहुरित्याहश्रुत्वेति॥हेराजन्तेयमदूतैर्विशेषेणभाषितमुपधार्यअवगत्यनमन्नोमेधृत्वान्या

यस्मैशास्त्रमुत्सृज्यस्वैरचार्यऽयगर्हितः॥अवर्त्ततचिरंकालमघायुरशुचिर्मलात्॥६७॥ततस्तंदंडपाणेःसकाशं
कृतकिल्बिषं॥नेष्यामोऽकृतनिर्वेशंयत्रदंडेनशुध्यति॥६८॥इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेप्रथमोऽध्यायः॥१॥
श्रीशुकउवाच॥एवंतेभगवद्दूतायमदूताभिभाषितं॥उपधार्याथतान्राजन्प्रत्याहुर्नयकोविदाः॥१॥विष्णुदूताऊ
चुः॥अहोकष्टंधर्मदृशामधर्मःस्पृशतेसभां॥यत्रादंड्येष्वपापेषुदंडोयैर्ध्रियतेवृथा॥२॥प्रजानांपितरोयेचशास्तारःसा
धवःसमाः॥यदिस्यात्तेषुवैषम्यंकंयान्तिशरणंप्रजाः॥३॥यद्यदाचरतिश्रेयानितरस्तत्तदीहते॥सयत्प्रमाणंकुरुतेलोक
स्तदनुवर्त्तते॥४॥

यन्निपुणाभगवद्दूतास्तान्यमदूतान्प्रत्याहुः॥१॥उक्तमेवकष्ट॥अहोइत्यादि सवेदपरमंगुह्यंधर्मस्यभगवान्यतःस्वतेन॥अहोकष्टंध्रा
णांकिंतद्धर्मदृशांसभाजधर्मःस्पृशते॥कोधर्मस्तत्राह॥यत्रयमस्यसभायामपापेष्वतएवादंड्येषुदंडः॥येर्भवादृशैर्ध्रियते॥येनवाधर्मइतिभावः॥२॥धर्मा
धर्मविभागेनाधर्मानुसारेणशिक्षणीयंवैषम्यमनुचितमित्याह॥प्रजानामिति॥येषामाश्रितत्वाद्भवादृशाःतेसमाःवैषम्यरहिताःसाधवःदोषापकरणरूप
परकार्येसाधकाःस्वतएवप्रजानांपितरःहितकारिणःयदिईदृशेष्वपिवैषम्यंस्यात्तर्हिप्रजाःकंशरणंप्राप्नुवं॥३॥ब्राह्मणाःश्रेष्ठाःकृत्स्नविद्यायकर्माचे रामः
रितितत्तदेवकर्मेतरोऽकृत्स्नविद्योपीहतेचेष्टते॥सश्रेयानन्यदेवशास्त्रप्रमाणंकुरुतेप्रमाणमितिमन्यतेतदेवेतरोलोकेनुवर्त्तते॥अतःश्रेयसांसानुष्ठानेनधर्मप्र ५
वर्त्तकानांवेदानुवर्त्तिनामिदमदंड्यदंडनमनुचितमित्यर्थः॥४॥ ति

स्तंभयन्नियमयन्नपि मदनवेपितं मनः ४

मत्तया। तत एव विश्लथन्नीव्या विश्लथत् स्रंसमाना नीवी धृतवस्त्रग्रंथिर्यस्यास्तया। कथंभूतं शूद्रं व्यपेतं सत्पथादपेतं वा ह्राकभितस्य धीः ॥ अत एव निर
पत्रपं निर्लज्जं धृतमनयो कविधया भुजिष्यया सह हंतिके समीप एव क्रीडादिकं कुर्वंतं शूद्रं ॥ ६० ॥ कामेन रागविनोदनेन शूद्रेणाक्तौ वाहुना करेण परि
रंभितामालिंगितां तां दासीं दृष्ट्वा हृच्छयः कामस्तस्य वशं जगाम प्राप्तः ॥ कथंभूतः सहसा अकस्मादेवेन स्वकीयपूर्वरूपेण विमोहितः ॥ ६१ ॥ यावत्सत्वंय
थावलं यथाश्रुतं गुरुभ्यः श्रुतं मनो निग्रहप्रकारमनतिक्रम्यात्मना विवेकेनात्मानं मनः समाधातुं नशशाक न शशाक तत ॥ ६२ ॥ सा दासी निमित्तं यस्य स्मरः स्मर एव

मत्तयाविश्लथन्नीव्या व्यपेतं निरपत्रपं ॥ क्रीडंतमनुगायंतं हसंतमनयांतिके ॥ ६० ॥ दृष्ट्वा तां कामलिप्तेन वाहुना परि
रंभितां ॥ जगाम हृच्छयवशं सहसैव विमोहितः ॥ ६१ ॥ स्तंभयन्नात्मनात्मानं यावत्सत्वं यथाश्रुतं ॥ न शशाक समाधातुं
मनोमदनवेपितं ॥ ६२ ॥ तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः ॥ तामेव मनसा ध्यायन्स्वधर्माद्विरराम ह ॥ ६३ ॥ ता
मेव तोषयामास पित्र्येणार्थेन यावता ॥ ग्राम्यैर्मनोरमैः कामैः प्रसीदेत यथा तथा ॥ ६४ ॥ विप्रां स्वभार्यामप्रौढां कुले
महति लंभितां ॥ विससर्जाचिरात्पापः स्वैरिण्यापांगविद्धधीः ॥ ६५ ॥ यतस्ततश्चोपनिन्ये न्यायतोऽन्यायतो धनं वभा
रास्याः कुटुंबिन्याः कुटुंबं मंदधीरयं ॥ ६६ ॥ ग्र व्याजो हेतुः ॥ कपटपिशाचस्तेन ग्रस्तः गृहीतः ॥ अत एव विचेतनः ॥ विगतपूर्वस्मृतिः ॥
तां दासीमेव मनसा चिंतयन् स्वधर्मात् संध्योपासनादेर्विरराम धर्मं तत्याज हेति खेदे आश्चर्ये एवं भूतस्येह पापीदृशपापप्राप्तेरिति ॥ ६३ ॥ यावता कृत्स्नेणापि पित्र्येणापि
तृसंबंधिना धनेन तां दासीमेव तोषयामास ॥ उपायांतरमप्याह ग्राम्यैर्मनोरमैरभिलषितैः कामैर्वस्त्राभरणादिभिर्यथा प्रसीदेत तथा तां तोषयामास ॥ ६४ ॥
अप्रौढां तामनुरक्तां प्राङ्गुणवतीं विप्रां सुंदरीं महति कुले सत्कुले लंभितां लब्धां भार्यामचिरादाशु विससर्ज ॥ पापः पापाचारः स्वैरिण्याः कटाक्षोपांगेन करणेन
विद्धा विनाशिता धीर्विवेको यस्य सः ॥ ६५ ॥ न्यायतोऽन्यायतो वा यतस्ततो धनमुपनिन्ये आनीतवान् ॥ मंदधीरयमजामिलः कुटुंबिन्याः पुत्रवत्याः कुटुंबं

भा॰ष॰
८

निवृत्तानिवृत्तकर्मध्यानिभारतन्त्र्यकृतेनिवनाम्सेवेति ॥ यथा कर्मानुसारेणैव पिपीलिकादिरूपाः मत्तमातंगादिरूपाः स्थूलाश्च देहा भवंतीत्यर्थः ॥ तद्धि कर्मापि
पापपुण्यवासनाबीजमेवेत्याह ॥ यथा योनिः पश्वादियोन्यनतिक्रमेण यथा बीजं कर्मानुसारेण यथा यथा योनिमातृसदृशं यथा बीजं पितृसदृशं च बलाय सास्वभा
वेन मातृकादिकर्मणा मनारूपस्वभावेन भवतीत्यर्थः ॥५४॥ प्रपंचितं संसारस्य कारणं तद्धेतुं चोपसंहरति ॥ एवमिति ॥ पुरुषस्य जीवस्य प्रकृतिसंगेन यो विपर्ययः
संसारः सराध्वरावविध्वस्थापसंसरणानिस्तरणोपायमाह ॥ आसीदिति ॥ आसीत्सएव विपर्ययः ॥ यद्वा ॥ असत्पुरुषार्थरूपः प्रकृतिकार्यरूपो वाप २
मायितोज्ञावेविद्यमानो वा विपर्ययस्य प्रकृतिसंगस्य प्रकृत्यस्यानुपदमेवो कृत्वा दीशसंगादीश्वरभक्त्या न चिरादणुविलीयते विलीनो भवतीति निवर्तंत इत्य
र्थः ॥५५॥ एवं प्रतिपरिहृतस्य प्रकृतसंगस्याजामिलस्य दंडानवज्ञापनायतत्र हृत्तिं प्रपंचयंति ॥ अयं हि श्रुतसंपन्न इत्यादिना यावदध्यायपरिसमाप्तिः ॥ अयमजामिलः तावच्छ्रुत

एवं प्रकृतिसंगेन पुरुषस्य विपर्ययः ॥ आसीत्स एव न चिरादीशसंगाद्विलीयते ॥५५॥ अयं हि श्रुतसंपन्नः शील
वृत्तगुणालयः ॥ धृतव्रतो मृदुर्दांतः सत्यवाङ्मंत्रविच्छुचिः ॥ गुर्वग्न्यतिथिवृद्धानां शुश्रूषुरनहंकृतः ॥ सर्वभूतसु
हृत्साधुर्मितवागनसूयकः ॥५७॥ एकदासौ वनं यातः पितृसंदेशकृद्द्विजः ॥ आदाय तत आवृत्तः फलपुष्पसमि
त्कुशान् ॥५८॥ ददर्श कामिनं कंचिच्छूद्रं सह भुजिष्यया ॥ पीत्वा च मधु मैरेयं मदाघूर्णितनेत्रया मत्तया ॥५९॥

श्रुतसंपन्नः वेदशास्त्राध्ययनसंपन्नः शीलं सुस्वभावः वृत्तं सदाचारः गुणाः शांत्यादयः तेषामाश्रयः धृतं व्रतं येन सः ब्रह्मचर्यरूपं येन मृदुः कोम
लहृदयः दांतो जितबाह्येंद्रियः सत्यवाक् सत्यवादी मंत्रवित् स्वविद्यादिमंत्रोपासकः ॥ शुचिः सदा पवित्रः ॥५६॥ गुर्वादीनां शुश्रूषुः सेवकः ॥ अनहंकृतः त्यक्ता
हंकारः हितः सर्वेभूतानां सुहृत् प्रियकारी साधुः परकार्यसाधकः मितवाक् स्वल्पोचितवक्ता अनसूयकः गुणेषु दोषानाविष्कारः ॥५७॥ एवं भूतो
सौ द्विजः कदाचित्पितुर्निदेशं पित्रा आदिष्टं प्रयोजनं करोतीति तत्प्रावनं प्रति गतः ततो वनात् फलादीन्यादायावृत्तः पुनर्गच्छन् ॥५८॥ तत्र वने भुजिष्यया दास्या रामः
सह वर्तमानं कंचित् कामिनं शूद्रं ददर्श वा नक पंकतया दास्या मैरेयं पैष्टं सुरां पीत्वा मदेनाघूर्णिते भ्रमती नेत्रे यस्यास्तया ॥५९॥ ८

जीवेनात्मनानिषिध्यतइतिनन्वमितत्वंसत्त्वदशाः उक्तषोडशात्तत्वापेक्षयासप्तदशाः त्रीन्सुखदुःखमोहात्मकान्भुंक्तेनुभवतीत्यर्थः॥ तदेतत्षोडशकलंषो
डशकलात्मकंवाअसप्तदशंतत्षोडशात्तत्वात्मकंशक्तित्रयंशक्तीनांत्रयंयस्मिन्नितिव्यधिकरणपदोबहुव्रीहिः। प्रकाशक्रियावरणशक्तिमत्त्व
त्वाद्गुणत्रयात्मकमविद्याकर्मवासनारूपशक्तित्रयाश्रयंवामहत्कार्यदशायांस्थूलाकारंलिंगंसूक्ष्मशरीरंपुंसिजीवेहर्षशोकभयार्त्तिदामनुसं
सृतिंजन्मादिवस्थापरिवृत्तिरूपांधत्तेआपादयतिषोडशकलात्मकलिंगसंबंधनिमित्तंजीवस्यसंसारइतिभावः॥५०॥ एवंलिंगेनसंसृतिंपुंस्याप
यतिमत्स्यदेही अज्ञः देहाद्यभिमानवाननतएवाजितषड्वर्गः अजितषडिंद्रियकार्यैः नेच्छन्नपिवत्सलादित्यर्थः॥ कर्माणिधर्माधर्ममिश्ररूपाणिकार्यते
शक्तित्रयात्मकेनलिंगेनतिष्ठेषः एवंकृतेनकर्मणाकोशकारवदात्मानंस्वस्वरूपमाच्छाद्यतिरोधायमुह्यतिदेहमितिमोहंप्राप्नोतिकोशकारःकीटविशे

तदेतत्षोडशकलंलिंगंशक्तित्रयंमहत्॥ धत्तेनुसंसृतिंपुंसिहर्षशोकभयार्त्तिदां॥५१॥ देह्यज्ञोजितषड्वर्गोनेच्छन्कर्मा
णिकार्यते॥ कोशकारवदात्मानंकर्मणाछाद्यमुह्यति॥५२॥ नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत्। कार्यतेह्यव
शःकर्मगुणैःस्वाभाविकैर्बलात्॥५३॥ लब्ध्वानिमित्तमव्यक्तंव्यक्ताव्यक्तंभवत्युत। यथायोनियथाबीजंस्वभावेनबलीयसा॥५४॥

षः। स यथात्मनःकोशरूपेणसद्यःस्वनिर्गमोपायंनजानातितद्वदितिदृष्टान्तार्थः॥५२॥ नेच्छन्कर्माणिकार्यतइत्येतदुपपादयति नहिकश्चिदिति। कश्चिद्देही
जातुकदाचिदपिक्षणमपिअकर्मकृत्कर्माकुर्वाणोनतिष्ठतिस्वंततस्तत्रछेदादिकंवाकुर्वन्नेवतिष्ठतीतिभावः। स्वाभाविकैरनादिसिद्धैर्गुणैःसत्वादिभिर्बलात्कर्माणि
विषयादीनिकार्यतएवेत्यर्थः॥५३॥ एवमव्यक्तंसंसरताजीवेनाव्यक्तमनभिज्ञातंनिमित्तंसंसृतिनिमित्तंवर्जनीयंतयाकृतकर्मलब्ध्वाकर्मवासनाश्रयंसदि
त्यर्थः। लिंगमितिकर्तृपदमध्याहार्यं। अव्यक्तंव्यक्ताव्यक्तंस्थूलसूक्ष्मरूपंभवतिउत्पत्तिदशायांदेहरूपेणस्थूलाकारंमरणदशायांसूक्ष्माकारंभवतीत्यर्थः। यद्वाअव्य
क्तंमूलप्रकृतिरूपंप्रधानंकर्तृतन्निमित्तंजन्ममरणनिमित्तंकर्मलब्ध्वाबलंअव्यक्तंभवतिकदाचित्षोडशकलात्मकत्वेनाव्यक्तंकदाचिद्देवादिदेहाकारेणव्य
क्तंभवतिएकस्यप्रधानस्यस्थूलावस्थाउत्पत्तिः तस्यैवपुनःसूक्ष्मावस्थामरणमितिहिजन्ममरणयाथात्म्यविदआचक्षते। तथाचोक्तंभगवता। अव्यक्तादी

गी० व०
७
१५

प्रमातास्य धर्माधर्मेति कर्मैव तत्तदनुरूपसुखदुःखादिकारणमित्युक्तं तस्य तत्तन्निकर्तात्वात्कथं कालांतरे सुखादिनिमित्तत्वमित्यत आह मनसेवेति ॥ पुरे देहे दे
वः स्वतेजसा दीप्यमानः न तु जीववत्कर्मणा संकुचितज्ञानशक्तिरित्यर्थः ॥ जीवांतरात्मतयावस्थितः परमात्मा मनसैव नित्यासंकुचितापरिच्छिन्नधर्मरूपज्ञा
नेनैव पूर्वरूपेण कृतं जन्मसंबंधिपुण्यपापादिरूपं विपश्यति पुण्यपापादिरूपदर्शनेन नश्चिकीर्षितानुग्रहनिग्रहवान्भवतीति भावः ॥ तथा जीवो भगवान्मनसानु
पूर्वमेतद्वा जीवः कर्मानुसृत्य तेषां मांसं तत्फलं दानादिप्रकारं चिंतयति कर्मणा तत्कृतेपि तन्निमित्तानुग्रहवान्परमात्मा तदनुसारेण सुखदुःख
दिफलदो भवतीति भावः ॥ ४७ ॥ यदि कर्मनिमित्तनिग्रहदस्तदनुरोधिफलदः परमात्मा तर्हि स्वयं जीवः परमात्मानुग्रहपादकं शुभमेव कर्माचरन्सुखमेव
किं नानुभवतीत्यत आह ॥ यथेति तमसा प्रकृत्यंधकारेणाभिभूतः अतत्त्वज्ञत्वं यथा कर्मशरीरमेवोपात्तो चिंतयति न तु पूर्वं पुरः स्थितमपरं पश्यतः स्थितं

मनसैव परं देवः पूर्वरूपं विपश्यति ॥ अनुमीमांसते पूर्वं मनसा भगवानजः ॥ ४८ ॥ यथाज्ञस्तमसा युक्त उपास्ते व्यक्त
मेव हि ॥ न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा ॥ ४९ ॥ पंचभिः कुरुते स्वार्थान्पंच वेदाथ पंचभिः ॥ एकस्तु षोडशेन त्रीन्
स्वयं सप्तदशोश्नुते ॥ ५० ॥

न वेदनिद्रयायुक्तं स्वप्नेभिव्यक्तं देहं तथा प्राप्तेन तु जाग्रद्देहादिवदिति भावः तथा जीवोपि तमसाज्ञानेन युक्तः देहात्माभिमानयुक्त
स्त्वर्थः ॥ अतत्त्ववादः कर्मणा संकुचितज्ञानः अव्यक्तं वर्तमानं देहं उपात्ते तु संधत्ते न तु पूर्वं प्राक्तनमपरं भविष्यच्छरीरं न वेद तत्र हेतुः नष्टा जन्मस्मृतिर्यस्य सः पूर्वापर
जन्मविषयकस्मरणाभावात्केवलवर्तमानदेहात्माभिमानशीलत्वाच्च तत्परवशोज्ञो जीवः प्रकृते देहे सुखोचितमेव कर्म करोति न तु परमात्मप्रसादापादकं शु
भं कर्मेति भावः ॥ ४९ ॥ एवं जीवानामनाद्यविद्याकर्मवासनाभिस्तिरोहितस्वस्वरूपाणां सत्त्वादिगुणत्रयसंसर्गाणां स्वस्वगुणोत्थनिमित्तधर्माधर्ममिश्र
पेण कर्मणा सुखदुःखमिश्ररूपफलानुभावाय देवतिर्यङ्मनुष्यरूपेण संसरतां धर्मादिनिमित्तेश्वरानुग्रहहेतुकः सुखाद्यनुभव उक्तः ॥ अथैषां संसरणप्र
कारं तत्त्वतश्च प्रपंचयंस्तल्लिंगशरीरोपायमाह ॥ पंचभिरित्यादि सप्तभिः ॥ कर्मेन्द्रियैः पाण्यादिभिः स्वार्थाननुपादानगत्यादीन्पंच कुरुते ॥ अथ पंचभिर्ज्ञानेन्द्रि
यैः श्रोत्रादिभिः पंच शब्दादीन्षोडशेन करोति चेदत्र षोडशोत्र तत्पंचकर्मेन्द्रियाणि षोडशं मनः संयुक्तैः पंचभिः कुरुते पंचभिर्वेद वेत्यर्थः ॥ कथं स्वतः स्वयं जीव

कर्मणां स्वद्भिःयत इदं उस्मस्योत्तरमाहुः॥ येन गुणत्रयसंसृष्टेन जविन कर्त्रा यथास्व स्वगुणोन्मेषानुसारेण धर्मः धर्मो वा यावत् देहेन बुद्धीन्द्रियमनःप्राण
संघातरूपेण देहेन करणेन समीहितः स कर्त्ता तावदेव तत्फलं सुखममुत्र भुंक्ते न धार्मिको नरकं न वाप्नु धार्मिकः स्वर्गं नाप्यल्पपापान्महद्दुःखं नाप्य
ल्पधर्मान्महत्सुखं भुंक्ते इत्यर्थः॥ धर्मो यथेति दृष्टान्तोपात्तत्रायमर्थः यथा धर्मो यावान्देहसमीहितः॥ तावदेव तत्फलं सुखममुत्र स्वर्गे भुंक्ते॥ ४५॥ एवम
धर्मोपि यावान्तावदेव तत्फलं दंडरूपं भुंक्ते इति न केवलं परत्रैव कर्मानुसारेण तत्फलभोगः अपि त्विहापि लोके प्राचीनकर्मानुसारेणैव फलभोगइ
त्यनुमानद्वारा परलोकेप्यनुमीयत इत्याहुः॥ यथेति॥ हे देवप्रवराः इह लोके भूतेषु गुणवैचित्र्यात् सत्त्वादिगुणोन्मेषनिमित्तप्राचीनसात्त्विकादिकर्मवै
चित्र्याद्वैविध्यं सुखदुःखत्वमहत्त्वरूपं त्रैविध्यं उपलभ्यते गुणवैचित्र्यनिमित्तं त्रैविध्यमिति सार्वजननीनं ज्ञायते तथान्यत्र परलोकेपि गुणवैचित्र्या

येन यावान्यथा धर्मो धर्मो वेह समीहितः॥ स एव तत्फलं भुंक्ते तथा तावदमुत्र वै॥ ४५॥ यथेह देवप्रवरास्त्रै
विध्यमुपलभ्यते भूतेषु गुणवैचित्र्यात्तथान्यत्रानुमीयते॥ ४६॥ वर्त्तमानोन्ययोः कालो गुणाभिज्ञापको यथा॥ एवं
जन्मान्ययोरेतद्धर्माधर्मनिदर्शनं॥ ४७॥

त्रैविध्यमनुमीयत इत्यर्थः॥ ४६॥ एवं भूतभविष्यद्वर्तमानकालत्रयगोचरेषु कारिषु कर्मानुसा
रेणैव फलभोगः कर्म च धर्मो धर्मो मिश्ररूपं तच्च सत्त्वादिगुणोन्मेषनिमित्तमिति चोक्तं॥ इदानीं धर्मादिरूपं कर्म सत्त्वादिगुणोन्मेषनिमित्तमिति कथं ज्ञायत
इत्यपेक्षायां कार्येण कारणमनुमीयत इति सदृष्टान्तमाहुः॥ वर्त्तमान इति यथा वर्त्तमानः कालः सुखदुःखाद्यनुभवसहचरितः कालः॥ अनयोर्धर्माधर्म
योर्गुणनिमित्तभूताः सत्त्वादयः तेषां सुखदुःखमोहरूपैः कार्यैरभिज्ञापकः। यथा वर्त्तमानकालिका धर्मादिनिमित्ताः सुखदुःखमोहाः स्वनिमित्तभूतानां ध
र्मादीनां सत्त्वादिगुणोन्मेषमूलत्वं ज्ञापयंतीत्यर्थः॥ एवमेतद्वर्त्तमानकालिकं दुःखादित्रयं जन्मान्ययोरन्यजन्मनोः बहुलवचनाद्विशेषणस्य परनिपात
पूर्वापरजन्मनो धर्माधर्मनिदर्शनं तयोः सत्त्वादिगुणोन्मेषमूलत्वाभिज्ञापकमित्यर्थः। सत्त्वादयो हि धर्मादिरूपकर्मोपादानद्वारा तत्फलत्वेन सुखदुःखादी
निजनयंति तस्मात्सात्त्विकादितः सुखादीनां सत्त्वादिकार्यत्वात्कार्यभूतैस्तैः स्वनिमित्तभूतधर्मादीनां सत्त्वादिमूलत्वमनुमीयते कार्येण कारणानुमानादिति

॥ ८७ ॥

भा॰ ष॰
६

कोसौ नारायणः यतः प्रादुर्भूतो वेदस्तत्राह ॥ येनैते स्वधाम्नि स्वस्वरूपेण प्रविष्य पथारकेनामी भावाः वेददेवमनुष्यादयः पदार्था रजस्त्वादिगुणत्र
यवत्वराः गुणनामक्रियारूपैर्य्यथा यथा कर्मभाकृते व्यज्यन्ते स नारायणः इत्यर्थः ॥ तत्र गुणाः श्रोत्रगम्यत्वमिति स्यासौ दयादयः नामानि देवो
मनुष्यो ब्राह्मणः इत्यादि क्रिया यज्ञस्याध्ययनाध्ययनादयः रूपाणि घात्मकत्वार्थकत्वादीनि ॥ ४१ ॥ मत्तत्तु धर्मः वेदप्रमाणं वेदप्रणिहितो धर्मः वेदश्च नारा
यणादुद्भूतो नारायणात्तात्तत्पत्वात्त्वं प्रवृत्तिलक्षणं संसारिभिरनुष्ठितो धर्मो धर्मवत्तॆ नामानं कथं ज्ञायेत तत्राह ॥ स्त्य्येइति ॥ खमाकाशः रात्रिश्चाहनी दिव
र्नानिद्दैषा सामर्थ्यो दात्रिर्विविदित्ता ॥ कमुदकं कुः पृथ्वी स्वयं साक्षमा स्वरवादयः तदधिदेवताः सूर्याग्निसोमश्चैते चतुर्दशदेहस्याः स्वदेहस्य कर्मदे
दं ब्राह्मणादित्वा कर्मणिश्च प्रवृत्तैन्द्रियमनः प्राणात्मकेन देहेन क्रियमाणस्य कर्मणः साक्षिणः साक्षात्द्रष्टारः स्यादिसुखेन देह्यो धर्मो ज्ञायते॥

येनस्य धाम्न्यामी भावा रजःसत्त्वतमोमयाः ॥ गुणनामक्रियारूपैर्विभाव्यंते यथातथं ॥ ४१ ॥ सूर्योग्निः खं मरु
द्गावः सोमः संध्याहनी दिशः ॥ कं कुः कालो धर्म इति ह्येते दैह्यस्य साक्षिणः ॥ ४२ ॥ एतैरधर्मो विज्ञातः
स्थानं दंडस्य युज्यते ॥ सर्वे कर्मानुरोधेन दंडमर्हंति कारिणः ॥ ४३ ॥ संभवंति हि भद्राणि विपरीतानि चान
घाः ॥ कारिणां गुणसंगोस्ति देहवान्नह्यकर्मकृत ॥ ४४ ॥

त्यर्थः ॥ ४२ ॥ एतैरेवाधर्मोपि ज्ञायते तस्मात् ॥ एतैरधर्मो

स्थानं दंडस्य यु / विषयः तस्मात् / ने

विज्ञात इति ॥ एतैर्ज्ञापितोऽधार्मिकोऽदंडस्य विषयः तस्मात् स्थानं प्रयुज्यत इति दंड्याः किं कारिणः सर्वे सत्यस्येतर मा कुः सर्वे कारिणः कर्मिणः स्वतः
सर्वे कर्मानुरोधेन दंडं प्रत्यर्हंति धर्ममनुतिष्ठतामपि विषयपरवशत्वादधर्मो वर्जनीयः ॥ स्वधर्मफलानुभवदशायां च दंडमर्हंतीत्यभिप्रायेण सर्वे क
र्मानुरोधेन दंडमर्हंतीत्युक्तं ॥ ४३ ॥ एतदेव प्रतिपादयंति संभवंति हीति ॥ देह्यनघाः भद्राणि पुण्यानि विपरीतानि पुण्यानि च भवंति ॥ भद्राणि कुर्वतामभद्रा
ण्यवर्जनीयतया प्राप्ततीत्यर्थः कुतः यतस्तेषां कारिणां गुणो गुणात्वादि विषयेषु संगः आसक्तिरस्ति विषयपरवशत्वात्तेषाम भद्राण्यपि संभवंति ।
त्यर्थः ॥ वस्तीधर्मेपरिहारेणानृसी वर्तमाना दंडमाकुः ॥ देहवान्नह्यकर्मकृत् दिस्ह वान कर्मकृदस्तीत्यर्थः ॥ स्वरूपतः कर्मपरित्यागेनावस्थातुं न कोपि दे

एवमुक्ता विष्णुपार्षदाः प्रत्याहुरित्याह इत्युक्ते इति । इत्युक्ते यमदूतैस्ते वासुदेवाज्ञाकारिणः पार्षदाः प्रहस्य तान्यमदूतान्प्रतीदं वक्ष्यमाणं गर्जितमेघवद्गं
भीरया गिरा वाण्योचुः ॥३७॥ उक्तिमेवाह यूयमिति ॥ धर्मराजस्येति हेतुगर्भं धर्मयमस्वरूपेणावस्थितस्य यमस्य ॥ तस्य यदि यूयं निर्देशकारिणः शासनकारिणः
तर्हि यूयमपि धर्माधर्मस्वरूपज्ञा भवेयुरतो धर्मस्य तत्त्वं याथात्म्यं यदधर्मस्य लक्षणं स्वरूपं तं अन्योन्यसंबंधं ब्रूत ॥ यद्वा ॥ धर्मस्याधर्मस्य च तत्त्वं लक्षणं प्रमाणं चेत्य
न्वयः ॥३८॥ तत्र दंडनस्य प्रकारादिकं पृच्छन्ति कथं स्विदिति ॥ दंडः केन प्रकारेण क्रियते नित्यं दंडस्य स्थानं विषयः किं स्थानमेव कृत्स्नं यतिदं दंड्या इति कारिणः
कर्मिणः सर्वे दंड्या आहोस्वित्कारिणां नृणां मध्ये कतिचिदेव ॥३९॥ एवमुक्ता यमदूता आहुः वेदेत्यादिना वेदेन प्रणिहितः कर्तव्यत्वेन बोधितो धर्मो धर्म्मे

श्रीशुक उवाच ॥ इत्युक्ते यमदूतैस्ते वासुदेवोक्तकारिणः ॥ तान्प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा ॥३७॥
विष्णुदूता ऊचुः ॥ यूयं वै धर्मराजस्य यदि निर्देशकारिणः ॥ ब्रूत धर्मस्य नस्तत्त्वं यच्चाधर्मस्य लक्षणं ॥३८॥ क
थं स्विद्ध्रियते दंडः किं वास्य स्थानमीप्सितं ॥ दंड्याः किं कारिणः सर्वे आहो स्वित्कतिचिन्नृणां ॥३९॥ यमदूता
ऊचुः ॥ वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ॥ वेदो नारायणः साक्षात्स्वयंभूरिति शुश्रुम ॥४०॥

स्तद्विपर्ययः प्रत्यवायकर्तव्यत्वेन बोधितोनेन वेदेनैवाधर्मोपि धर्मोऽस्यत्र प्रमाणमिति लक्षणमुक्तं वेदप्रणिहितत्व तद्विपर्ययावेव धर्माधर्मयोः स्वरूपमिति चे
त् ॥ ननु वेदस्यापि पौरुषेयत्वात्पुरुषस्य च भ्रमविप्रलंभादिदोषसंभवात्कथं वेदस्य धर्मे प्रमाणकत्वमित्यत आह वेदो नारायण इति साक्षान्नारायण
एव वेदः स्वयंभूः अतः न पौरुषेयत्वाशंकेति भावः कारणवाचिनो नारायणशब्दस्य कार्यकारणयोरभेदात् कार्यभूते वेदे वृत्तिः नारायणाद्वेदस्याविर्भाव
त्वश्रुतेः ॥ अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद ऋचः सामानि जज्ञिरे छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत इति च कार्यत्वप्रयुक्ता
नित्यत्वशंकां वारयति स्वयंभूरिति स्वयमित्यात्मनेत्यर्थः ॥ स्वयमात्मनैवाविकृतरूपेणैवाविर्भूतः पूर्वानुपूर्व्या प्रादुर्भवतीति स्वयंभूरिति शुश्रुम
यमादिभ्य इति शेषः ॥४०॥

भा॰
५

निषेधं तु उर्द्ध्वमुखत्वमुखानिरोमानिर्येतो नात्मानं यमात्त्वयं प्रतिनेतुमागतान ॥२९॥ म्रियमाणस्य भर्तुर्मुखतस्मत्मुखेन यद्धरेः कीर्त्तनं नाम हरिः कीर्त्यते
येन तद्धरिकीर्त्तनं इति नामविशेषणं तन्निशम्य श्रुत्वा हे महाराज भर्त्तुर्भगवतः पार्षदाः सहसा त्वरया अभ्यपतन् आमाजग्मुरित्यर्थः ३० ते विष्णुदूता
नोऽजसा बलात्कारेण दासीपतिमजामिलं अंतर्हृदयाद्विकर्षतः यमप्रेष्यान्वारयामासुः ॥३१॥ एवं निषेधितास्ते वैवस्वतस्य यमस्य पुरःसराः भृत्याः ऊचुः
किमेवमाहकुर्वंति ॥ धर्मराजस्य यमस्य शासनमाज्ञां प्रतिषेद्धारो यूयं के ॥३२॥ कस्य वा संबंधिनः कस्माल्लोकादागताः अस्य कस्माद्गुणालेशाद्धेतोः धर्म

निशम्य म्रियमाणस्य ब्रुवतो हरिकीर्त्तनं भर्तुर्नाम महाराज पार्षदाः सहसापतन् ॥३०॥ विकर्षतोंतर्हृदयाद्दासी
पतिमजामिलं यमप्रेष्यान्विष्णुदूता वारयामासुरोजसा ॥३१॥ ऊचुर्निषेधितांस्तांस्ते वैवस्वतपुरःसराः ॥ के यू
यं प्रतिषेद्धारो धर्मराजस्य शासनं ॥३२॥ कस्य वा कुत आयाताः कस्मादस्य निषेधथ ॥ किं देवा उपदेवा वा यू
यं किं सिद्धसत्तमाः ॥३३॥ सर्वे पद्मपलाशाक्षाः पीतकौशेयवाससः ॥ किरीटिनः कुंडलिनो लसत्पुष्करमालिनः ॥
३४॥ सर्वे च नूत्नवयसः सर्वे चारुचतुर्भुजाः ॥ धनुर्निषंगासिगदाशंखचक्रांबुजश्रियः ॥३५॥ दिशो वितिमिरालोकाः
कुर्वंतः स्वेन रोचिषा किमर्थं धर्मपालस्य किंकरान्नो निषेधथ ॥३६॥

राजस्य शासनं निषेधथ यूयं किं देवा उत उपदेवा
गंधर्वा अथवा सिद्धश्रेष्ठाः ॥३३॥ एवं पृष्टाः पुनस्तान्वर्णयंतो यमशासनप्रतिषेधप्रयोजनं पृच्छंति सर्वे इति त्रिभिः सर्वे यूयं पद्मपलाशेऽक्षिणी येषां
पीतं कौशेयं कृमिकोशोत्थं वासो वस्त्रं येषां किरीटिनः येषां संतीति तथा कुंडलानि येषां संतीति तथा पुष्करमालाः कमलमाला येषां संतीति ॥३४॥ तथा सर्वे
नूतनं नववयः येषां ते चारवः सुंदराः चत्वारो भुजा येषां धनुरादीनां श्रीः शोभा येषां धनुरादिधरा इत्यर्थः ॥ तत्र निषंगः तूणः असिः खड्गः अंबुजं कमलं
३५ स्वेन रोचिषा दिशो वितिमिरालोकाः विगतं तिमिरं तमः यस्मात् स आलोकः प्रकाशो यस्यां तादृशा दिशः कुर्वंत इत्यर्थः ॥ धर्मराजस्य किंकरा

५

एवं निवसतो जीवतस्तस्याः दास्याः सुतांस्तास्तान्लालपानस्य लालनं कुर्वतः ॥ हे महाराजन् समासांतविधेरनित्यत्वाद्राजन्हे इत्यसमभावः का
लस्य सम्यगावृत्तिः कियान्कालोतिक्रांतस्तत्राह ॥ अष्टाशीतिपरिमिता आयुषः संवेधिन्यः समाः संवत्सराः ॥ २३ ॥ तस्य प्रवयसः वार्द्धकप्राप्त
स्य दशपुत्राः स्थिताः तेषां मध्ये नवमः कनीयान् बालस्तदवस्थितः सच नाम्ना नारायणः इति प्रसिद्धः प्रवयसः पुत्रोत्पत्तिकथनमपि पापातिशय
ज्ञापनार्थं ॥ दास्यां चैव वृद्धस्तस्यानिष्कृतिर्न विधीयत इति स्मरणात्तस्य नारायणाख्यस्य पित्रोर्मातापित्रोर्भृशं नितरां दयितः प्रियः ॥ २४ ॥ स द्विजस्तस्मि
न्नर्भके नारायणनाम्नि कलभाषिणि प्रपचात्मकमधुरभाषिणि बद्धहृदयः आसक्तचित्तः तस्यार्भकस्य लीलां चेष्टां निरीक्षमाणः जरठः भृशं मुमुदे हृष्ट

एवं निवसतस्तस्य लालयानस्य तत्सुतान् ॥ कालोत्यगान्महान्राजन्नष्टाशीत्यायुषः समाः ॥ २३ ॥ तस्य प्रवयसः
पुत्रा दश तेषां तु यो ऽवमः ॥ बालो नारायणो नाम्ना पित्रोश्च दयितो भृशं ॥ २४ ॥ स बद्धहृदयस्तस्मिन्नर्भके क
लभाषिणि ॥ निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशं ॥ २५ ॥ भुंजानः प्रपिबन्खादन्बालकं स्नेहयंत्रितः ॥ भोज
यन्पाययन्मूढो न वेदागतमंतकं ॥ २६ ॥ स एवं वर्त्तमानो ऽज्ञो मृत्युकाल उपस्थिते ॥ मतिं चकार तनये बाले ना
रायणाह्वये ॥ २७ ॥ स पाशहस्तांस्त्रीन्दृष्ट्वा पुरुषानभृशदारुणान् ॥ वक्रतुंडानूर्द्ध्वरोम्ण आत्मानं नेतुमागतान्
॥ २८ ॥ दूरे क्रीडनकासक्तं पुत्रं नारायणाह्वयं ॥ प्लावितेन स्वरेणोच्चैराजुहावाकुलेंद्रियः ॥ २९ ॥

२५ ॥ स्वयं भुंजानो बालकमपि तत्स्नेहपरवशो भोजयन्स्वयं पिबन्तमपि पाययन्मूढोऽज्ञः स्वतोऽगतं प्राप्तं मृत्युं न वेद ॥ २६ ॥ एवं वर्त्तमानः स द्विजः मृत्यु
काले उपस्थिते सत्यज्ञो नारायणाख्ये पुत्रे एवं मतिं चकार अपि मामसक्तामकरोदित्यर्थः ॥ २७ ॥ सोऽजामिलः त्रीन्पुरुषान्दृष्ट्वा आकुलेंद्रियः व्याकुलचित्तः
दूरे क्रीडासक्तं नारायणाह्वयं पुत्रं प्लावितेन प्लुतत्वं नीतेनेति यावत् स्वरेणोच्चैराजुहाव नारायणेत्याहूतवान् कथंभूतान्पुरुषान्पाशो हस्ते येषां
ते

[illegible]

क

भा॰ष॰ सर्वं तेन निःपुनंति न पवित्रयंति यथा सुरया पूर्णा भांडं आपगा जलानि व तत्॥ नारायणस्मरणाभासेप व प्रायश्चित्तानि चीर्णानि पुनंति न केवलानीति भावः॥१८॥
ष एवमल्पेनैव महाभागयत्नेन नरकान्तरगति पापस्य परिहारकः भवतीत्याह॥ सकृदिति॥ येनैरिह लोके तस्य भगवतो गुणेष्वनुरागि सकृत् मनः कृष्णपदा
रविंदयोः मनोनिवेशनरूपं येस्ता दृशाः सकृन्निवेशितमित्यनेनायं पाभिप्रेतः॥ निष्पन्नभगवद्भक्तियोगानां निरयप्राप्तिनिमित्त समस्तवृजिनविधूननिस्य।
निरतिशयानंदरूपभगवत्प्राप्तिरिति किमु वक्तव्यं पततन्तु गुणश्रवणनामस्मरणाद्यस्य तमेनापि मनस्त्वच्चरणनिवेशरूपो भक्तियोगारंभ एव सुतरां यमव
प्रपतापरिहारक इति॥ तथा चोक्तं भगवता नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते॥ स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्॥ नहि कल्याणकृत्कश्चिद्दुर्गतिं
तात गच्छति इत्यादि च॥१९॥ अथ भक्तियोगारंभस्यापि कैमुत्यन्यायेन दुरितनिवर्तकतां दर्शयितुमुपाख्यानं चकुमस्यापदेशेनापि स्मरतस्य भगवन्नाम्नो भ।

सकृन्मनः कृष्णपदारविंदयोर्निवेशितं तद्गुणरागि यैरिह॥ न ते यमं पाशभृतश्च तद्भटान् स्वप्नेपि पश्यं
ति हि चीर्णनिःकृताः॥१९॥ अत्रचोदाहरंतीममितिहासं पुरातनं॥ दूतानां विष्णुयमयोः संवादं तन्नि
बोधमे॥२०॥ कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः॥ नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः
२१॥ बंदयक्षकैतवैश्चौर्यैर्गर्हितां वृत्तिमास्थितः॥ बिभ्रत्कुटुंबमशुचिर्यातयामास देहिनः॥२२॥

क्तियोगारंभविरोधदुरितनिवर्तकत्वे दृष्टांततयेतिहासं प्रस्तौत्यवतिज्ञानितेः॥ अत्रेति॥ आस्तां तावन्निष्पन्नभक्तियोगस्याध्व भक्तियोगस्यवा न यमवश्यतेत्स्यास्या प
देशेनापि नामोच्चारणस्य यमवश्यतापरिहारकत्वं भक्तियोगारंभकारणत्वं चेत्येतत्तु पुरातनेतिहासं उदाहरंतीत्याह तेनकपयंति॥ इतिहासं विशिनष्टि दूता
नामिति॥ विष्णुयमयोर्ये दूतास्तेषां संवादरूपमितिहासं मे कथयतो मत्तो निबोध शृणु॥२०॥ प्रतिज्ञातं इतिहासमाह कान्यकुब्जेत्यादिना॥ कान्यकुब्जाख्ये जनप
दे कश्चिन्नाम्ना अजामिल इति प्रसिद्धो द्विजः दास्याः शूद्रायाः पतिरासीदिति विशेषः नष्टसदाचारः स्ववर्णाश्रमधर्मो यस्य तादृशस्तत्र हेतुर्दास्याः संसर्गेण दूषि
तः पतितः॥२१॥ गर्हितामाधर्म्यै गर्हितां वृत्तिमाश्रितो बंधूनभीघातं धनग्रहणं केरोति कैतवं कुटुंबं बिभ्रन्नित्यमशुचिः यदा बंधुतादिभिः कुटुंबस्य निर्वाह

म

ये केचिद्वासुदेवः परं येन प्राप्यं प्राप्तिसाधनमाधारश्च येषां ते तादृशाः संतः तपआदिभिर्निष्पन्नया केवलया भक्त्योपासनात्मवेदनया कार्त्स्न्ये
नाघं वासुदेवप्राप्तिप्रतिबंधकं भास्करः सूर्यो नीहारं तुहिनमिव धुन्वंति निरस्यंति ॥ केवलयेत्यनेन भक्तेरुत्सन्नावेव तपआद्यपेक्षा तपआदिभिरुत्स
न्नाया भक्तेरकैवल्यं तत्प्रतीत्यभिप्रेतं ॥ १५ ॥ कार्त्स्न्येन धुन्वंतीत्येतदेव प्रतिपादयति ॥ न तथेति ॥ हे राजन्नघवान्पापी तपआदिभिः ॥ प्रायश्चित्तैस्त
था न पूयेत न शुध्येत कं यथा कृष्णे भगवत्यर्पितः समर्पितः प्राणाः ॥ प्राणा जीवात्मा येन तादृशः ॥ ॐमित्यात्मानं युंजीतेति श्रुतेस्तदुक्तरीत्या भगवच्चरणारविं
दयोः समस्यात्मस्वरूप इत्यर्थः ॥ तत्पुरुषाणां भागवतानां निषेवया यथा पूयेत तथा कृष्णार्पितप्राणः कार्त्स्न्येनाघं च पूयेत अघवांस्तपआदिभिस्त

केचित्केवलया भक्त्या वासुदेवपरायणाः ॥ अघं धुन्वंति कार्त्स्न्येन नीहारमिव भास्करः ॥ १५ ॥ न तथा ह्यघवान्रा
जन्पूयेत तपआदिभिः ॥ यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया ॥ १६ ॥ सध्रीचीनो ह्ययं लोके पंथाः क्षेमोऽकुतो
भयः ॥ सुशीलाः साधवो यत्र नारायणपरायणाः ॥ १७ ॥ प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखं ॥ न निःपुनंति रा
जेंद्र सुराकुंभमिवापगा ॥ १८ ॥

ना ४

न कार्त्स्न्येन पूयेतेत्यर्थः ॥ १६ ॥ उक्तं निःशेषदुरितक्षपणसमर्थं भगवद्भक्तियोगं विशिनष्टि सध्रीचीन इति ॥ लोके श्रेयःसाधनत्वेन विचार्यमाणेषूपायसमुदायेष्वयं
भगवद्भक्तिरूपः पंथा उपायः सध्रीचीनः समीचीनः कुतः ॥ हि यतोऽकुतोभयः कुतश्चिदपि भयरहितः क्षेमं आनंदो मोक्षात्मके भवति ॥ अतएव शोभना
चाराः साधवो नारायणपरायणाः संतो यत्र भगवद्भक्त्यात्मके पथि वर्तंत इति शेषः ॥ अत्र वासुदेवपरायणा नारायणपरायणा इत्यनयोर्मध्ये पठिते
न कृष्णार्पितप्राणा इत्यनेनात्मसमर्पणपूर्वकं भगवत्सेवोपायोपेयभावानुसंधानमेव नारायणत्वमिति सूच्यते ॥ एवं च न्यासयोगोऽपि निरतिशयक्षेमंकर
इति सूचितं सच्च स्वतो वा भक्त्यंगतया वेत्यन्यत् ॥ १७ ॥ एवं नानाविधानंतदुःखावहनरकप्राप्तिनिमित्तदुरितनिस्तरणोपायो भगवद्भक्तियोग एवेत्यभिप्रायः
अघप्रायश्चित्तान्यपि भगवत्पराङ्मुखं न निःपुनंतीत्याह ॥ प्रायश्चित्तानीति ॥ चीर्णान्यनुष्ठितानि प्रायश्चित्तानि नारायणपराङ्मुखं कदाचिदपि नारायणम

गी॰ टी॰ ३

ननु सुकरा मशननिषेधः

कानि पापदुरितनिरसकर्माणि ॥ वेदनं तु निःशेषदुरितनिवर्तनेन घोरानरकपरिहारकमिसुकं ॥ तर्हि तावद्दृशं वेदनं केरुपायैर्निष्पद्यत इत्यपेक्षायां तन्निष्पत्ति।
प्रतिबंधककनिरसनोपायैर्नियमैस्तन्निष्पद्यत एवेति मन्हृष्यातमाह ॥ नाश्नतस्तु पथ्यमेवान्नमश्नतः पुरुषाश्चाधयो नाभवंति न वाधयो हि ॥ देशजन्मेवं
नियमकसमाणात्तथा नियमकारिणमानवानैः क्षेमायकुःखाभमंभिन्नानिरतिशयसुखाय कल्प्यते तमनेन मुक्तो भवतीत्यर्थः ॥ एतैरित्यनेनेयमत्रयमाणयमस्त्राभिप्र
ता ॥ ११ ॥ तावत्तपश्चरादिभिर्नियमैर्वेदनोत्पत्तिप्रतिबंधकदुरितनिवृत्तिः ॥ ततो वेदनस्य निष्पत्तिस्तदोजस्तेन ब्रह्मप्राप्तिबंधकस्ववीत्तरामघविनाशस्तेषो
तवो ब्रह्मप्राप्तिस्तता लेमं इति नियमानदर्शयन्न तेषां वेदनोत्पत्तिप्रतिबंधकदुरितनिवर्तकत्वमाह ॥ तपसेति द्वाभ्यां ॥ तपसा अनशनादिना तपसा नाशकेन भि
क्षतेः ॥ अनाशकेनेत्यपरा न निषेधः ॥ तथा मति देहधारणमात्रमभवेनोपमनानिष्पादात ॥ तथा चोक्तं भगवता ॥ युक्ताहारविहारस्येति ॥ ब्रह्मचर्येण कृत्वितर

नाश्नतः पथ्यमेवान्नं व्याधयो नाभिभवंति हि ॥ एवं नियमकृद्राजन्नरणानैः क्षेमायकल्पते ॥ १२ ॥ तपसा
ब्रह्मचर्येण शमेन च दमेन च ॥ त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ॥ १३ ॥ देहवाग्बुद्धिजं
धीरा धर्मज्ञाः श्रद्धयान्विताः ॥ क्षिपंत्यघं महदपि वेणुगुल्ममिवानलः ॥ १४ ॥ श्रीरामायनमः

कालिकं स्त्रीसंगादिराहित्यं नयमेनां तरिंद्रियनिग्रहेण दमेन वाह्येंद्रियनिग्रहेण त्यागेन सत्पात्रदानेन ॥ सत्यशौचाभ्यां सत्यं भूतहितकारित्वमन।
तावदनेवशौचं मदाचारः ॥ यमः कामाभिषंगः ॥ नियमः वर्णाश्रमधर्मः पंचमहायज्ञादिस्तेन ॥ १३ ॥ एभिर्धीराः प्रीतोष्णसुखदुःखादिद्वंद्वसहनशी
लाः धर्मज्ञाः निरतिशयसुखसाधनोपासनात्मकधर्मप्रतिपादकशास्त्रजन्मज्ञानवंतः श्रद्धया चिकीर्षितविषयकत्वरया युक्ताः संतः देहवाग्बु।
द्धिजं करणत्रयजं महदप्यघं वेदनोत्पत्तिवंधकमनलोऽग्निर्वेणुगुल्ममिव दग्धयंत्यपयंतुदंति ॥ एवं तपश्चरादिभिर्वेदनोत्पत्तिबंधके घोन रस्ते ततत
स्वेन यथा वेदनया ब्रह्मप्राप्तिप्रतिबंधकमघं निरस्यतीत्याह केचिदिति ॥ मनुष्याणां महत्त्वे शकप्रिवद्यनतिमिदयस्त्वकारी त्योक्तविधाधिकारि रामः ३
णां दुर्लभतामभिप्रायेणाह केचिदित्युक्तं ॥ १४ ॥

वदन्नुपायांतरं पृच्छति राजा ॥ दृष्टश्रुताभ्यामिति द्वाभ्यां ॥ यस्माद्दृष्टश्रुताभ्यां पापस्य दोषाणां ज्ञानं राजदण्डादिना शास्त्रवचनेन चात्मनः स्वस्माहितमनिष्टसाधनमिति
जानन्नपि पुनर्विवशः विषयपरवशः पापं करोत्यर्थतः प्रायश्चित्तं कथं कथं अवस्थितं सत् दुरितशोधकं कथं भवेदित्यर्थः ॥ अनद्धात्पापात्क्वचिन्निवर्त्त
ते विषयपरवशः क्वचिदभद्रं पुनश्चरति करोति ॥ अपोतः कृतमपि प्रायश्चित्तमपार्थं व्यर्थं भवति ॥ अत्र दृष्टांतः कुंजरशौचवदिति ॥ यथा कुंजरो गजः स्ना
तोपि पुनः स्वशिरसि धूलिं प्रक्षिपति तस्य शौचं स्नानं व्यर्थं तद्वत्कृतमपि प्रायश्चित्तं पुनः पापाचरणात् व्यर्थं मन्ये इत्यर्थः ॥ अतउपायांतरमेव कथयितव्य
मितिभावः ॥ १० ॥ एवमुक्ते निरवशेषतया दुरितनिवर्त्तकं विवक्षन्नादौ प्रायश्चित्तमपि कतिपयदुरितनिवर्त्तकत्वेनाधिकारिभेदेन व्यवस्थितमस्यपा॰
प्रायश्चित्तविधायकमन्वादिस्मृतिवैयर्थ्यं स्यादित्याह ॥ भगवान् बादरायणिः कर्मणेत्यादिना ॥ कर्मणा प्रतिपदोक्तप्रायश्चित्तरूपेन कर्मणा कर्मणा॰

कचिन्निवर्त्ततेऽभद्रात् कचिच्चरति तत्पुनः ॥ प्रायश्चित्तमथोपार्थं मन्ये कुंजरशौचवत् ॥ १० ॥ श्रीबादरायणिरुवाच
कर्मणा कर्मनिर्हारो नह्यात्यंतिक इष्यते ॥ अविद्वदधिकारित्वात् प्रायश्चित्तं विमर्शनम् ॥ ११ ॥ १२ ॥ ११२ ॥ श्री ॥

पकर्मनिर्हारः पनोदः ॥ आत्यंतिकः पुनः पापसंबंधरहितो नेष्यते यथोदेशमेव दुरितनिवर्त्तकं प्रायश्चित्तं नतु ज्ञानवदुत्तरोत्तरस्यापि साकल्येन वि॰
नाशकमितिभावः ॥ तर्हि प्रायश्चित्तविधिवैयर्थ्यमत आह ॥ अविद्वदधिकारित्वादविदुषोऽविदुषां परमात्मोपासनकस्माहंकारममकारस्य रागद्वेषादिमतः
प्रायश्चित्ते अधिकारित्वाद्विदुषस्तु तत्पूर्वोपायोरश्लेषविनाशकरस्य वेदनस्यैव सत्वात्तत्स्यापनिवर्त्तये प्रायश्चित्तापेक्षेति ॥ यद्यपि तद्विधिवैयर्थ्यं
तदाप्यविदुषस्तात्कालिकरोगोपशामकौषधादिवत् कतिपयदुरितनिरसनाय प्रायश्चित्तमपेक्षितमिति नतद्विधिवैयर्थ्यमितिभावः ॥ अतएवोच्यते प्रा
यश्चित्तं विमर्शनमिति ॥ विमृश्यते इति विमर्शनं कृत्स्नं ॥ ल्युडो बहुलमिति बहुवचनात् कर्मणि घञ् पापविशेषनिवर्त्तकत्वेन प्रायश्चित्तं विमृश्यते न॰
कात्स्न्येनेत्यर्थः ॥ यद्वा ॥ विमृश्यते विविच्यते ॥ एष कृत्स्नं निवर्त्त्यतेऽनेन पापमिति करणे घञ् ॥ ११ ॥ एवं प्रतिपदोक्तप्रायश्चित्तान्यधिकारिभेदेन

वीर्देश्रियव्रतो नाम यो दोष्मादि चतुर्थपंचमस्कंधार्थानुवादकमिति ॥५॥ एवमुक्तमन्वयाच्पूर्वस्कंधांते नु वर्णितं ॥ नरकनिस्तरणोपायं पृच्छति ॥
अधुनेह ति हे महाभाग भागो विवेकात्मको बुद्धिविशेषः ॥ विवेकेन हि हेयमुपादेयं च भज्यते विभज्यते तेनेति भागः करणे घञ् महान् भागो यस्य स महाभागस्त
त्संबोधनं भागः सोऽस्यास्तीति महाभागः अथेत्याद्यं च ॥ नानाविधा उग्रास्तीव्रा यातना येषु तान्नरान् अधुनैव यथा पुरुषो नैव नेयात् येन साधनेन प्राप्नुयात् तत्सा
धनं मे मह्यं व्याख्यातुमर्हसि ॥६॥ एवमापृष्टो भगवान्बादरायणिस्तावद्दुष्कृतनिष्कृतिभिर्विना पापस्य दुरितानुसारेण नरकाप्राप्तिरवेति वदन् ल्वणं
दुरितप्रतीकारं प्रतिजानन्नभिप्रायाह ॥ न चेदिति द्वाभ्यां मनउक्तिपाणिभिर्मनोवाक्कायैः कृतस्यांहसः पापस्यापचितिं प्रायश्चित्तादिभिः क्षयं यथा इहैव लोके कि के
श्रीशुक उवाच ॥ न चेदिहैवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः ॥ ध्रुवं स वै प्रेत्य नरकानुपैति ये
कीर्तिता मे भवतस्तिग्मयातनाः ॥७॥ तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यतात्मना ॥ दोषस्य दृ
ष्ट्वा गुरुलाघवं यथा भिषक् चिकित्सेत रुजां निदानवित् ॥८॥ राजोवाच ॥ दृष्टश्रुताभ्यां यत्पापं जानन्नप्या
वि त्मनोऽहितं ॥ करोति भूयो विवशः प्रायश्चित्तमथो कथं ॥९॥ यदि न कुर्यात्तदा स वै अकृतनिष्कृतिर्देही प्रेत्य मृत्वा ध्रु
वं नरकानुपैति प्राप्नोति नरकान्विशिनष्टि भवतस्ते तुभ्यं मे मया ये नरकास्तिग्मातीव्रा यातना येषु तादृशाः कीर्तिताः कथिता इत्यर्थः ॥७॥ तस्माद
कृतनिष्कृतेर्नरकप्राप्तेर्हि निःकारत्वात्पुरैव मृत्योः प्रागेव मेवा विपद्यता विपत्तिमगच्छता यदृत्नेरोगोऽस्यर्थः ॥ आत्मना देहेनेहैव लोके पापस्य
निष्कृतौ नाशो यतेत किं कृत्वा दोषस्य पापस्य गुरुलाघवं भावप्राधान्योतिदेशः गौरवलाघवे दृष्ट्वा यथा योग्यं प्रायश्चित्ते यतेतेत्यर्थः ॥ तत्र दृष्टांतः
यथा रुजां रोगाणां निदानवित्तो भिषक् रोगानुसारेण चिकित्सेत् प्रतीकारं कुर्यादिति ॥८॥ एवं प्रतिपदोक्तं प्रायश्चित्तमेव उपायत्वस्तुक्तं ॥ विषयपरव
शस्य तस्य पुनः पुनः पापाचरणापालनत्वात्तेषामानंतत्या प्रायश्चित्तानुष्ठानासंभवात् संभवेऽपि दुरितसंभावनया कृतप्रायत्वाच्च नेदं प्रश्नोत्तरमिति ॥

तथा देवेषु नेष्टकेवैगुण्यविषयः प्रवृत्तिलक्षणस्य मार्गः कथितः ॥ कापिले त्रैगुण्यविषयत्रैगुण्यप्रकृतपुरुषाधिकारः प्रवृत्त्या सुखदुःख
दिसाधनं धर्मेणालक्ष्यते प्राप्यत इति प्रवृत्तिलक्षणलक्षतेनेनेति लक्षणं प्रवृत्तिलक्षणं यस्येति वा ॥ कोसौ प्रवृत्तिलक्षणो मार्गस्तत्राह
कालीनप्रकृतेरविनष्टप्रकृतिसंबंधस्य जीवस्य यो मोक्षः पुनः पुनर्गुणसर्गः सृज्यते नेनेति सर्गः गुणाः गुणत्रयं सर्गो यस्य गुणसर्गः पुन
पुनः सुखदुःखानां गाथ्रगुणकार्यरूपदेहसंबंधस्तत्परः ॥ देहादिकर्मफलं भुक्तं सुखदुःखादिनो गाथ्रगुणात्मकप्रवृत्तस्य कर्मणा
प्राप्यते कर्मा हि देहसंबंधोपादानकारा सुखदुःखादिसाधनं नमास्तादतो गुणसर्गः प्रवृत्तिलक्षणो मार्गो भवतीत्यर्थः ॥२॥ अधर्मः कारण

प्रवृत्तिलक्षणश्चैव त्रैगुण्यविषयो मुने ॥ यो सावलीनप्रकृतेर्गुणसर्गः पुनः पुनः ॥२॥ तस्मात्सुरैर्वाप्यविहृत पापानि
अधर्मलक्षणानानानरकाश्चानुवर्णिताः ॥ मन्वंतरस्य व्याख्यात आद्यः स्वायंभुवो यतः ॥३॥ द्वीपवर्षसमुद्राद्रि
नद्यश्चानवनस्पतीन् ॥ धरामंडलसंस्थानं भागलक्षणमानतः ॥ ज्योतिषां विवराणां च यथेदमसृजद्विभुः ॥४॥ अथ
कानेह महाभाग यथैव नरकान्तरः ॥ नानो मयातना न्येयातन्ये व्याख्यातुमर्हसि ॥५॥

तथा लक्षणाः येषां ते नानाविधा
नरकाश्चानुवर्णिताः ॥ तथा स्वायंभुवसंबंधी आद्यो मन्वंतरस्य व्याख्यातः ३ कोसौ स्वायंभुवः यत्संबंधी मन्वंतरो व्याख्यातस्तत्राह ॥ यतः स्वा
यंभुवमनोः प्रियव्रतोत्तानपादौ वंश्यः संततिरपत्यं ततो विनिर्यावत् तथा तच्चरितानि प्रियव्रतोत्तानपादयोश्चरितानि च व्याख्यातानीत्यर्थः ॥४॥ तथा
द्वीपादीनां धरामंडलसंस्थानं ज्योतिषां सूर्यादीनां विवराणामतलादीनां संस्थानं च भागादिभिर्व्याख्यातवानसीति शेषः भागो वांतरविभागः लक्षणमसाधा
रणाकारः मानं परिमाणं ॥ किं बहुना यथेदं भगवानसृजद्याहृग्विधमिदं जगद्भगवानसृजत् ॥ तथैव व्याख्यातमित्यर्थः ॥ एवमुक्तानुवादद्वारेण कृत
तत्रायं क्रमश्चापेक्षितो विवक्षितः ॥ प्रवृत्तिलक्षणो धर्मः मन्वंतरस्य व्याख्यातः ॥ आद्यः स्वायंभुवो यत इति वरतीयश्लोकं धायो नुवादकं ॥ अधर्मलक्षणा इति पू

ना॰ प्र॰ २ श्रीमते रामानुजाय नमः ॥ एवं नानाविधनरकेषु तस्यास्ति हेतुषु पश्चाच्च तेषु पापेषु चोपवर्णितेषु तन्निस्तारोपायं पिपृच्छिषुस्तावद् २
क्रमनुवदन्निवृत्तिमार्गं इत्यादिभिः पंचभिः ॥ भगवता त्वया आदौ द्वितीये निवृत्तिमार्गः यथावत्कथितः ॥ निवृत्तिनिवृत्तधर्मः मोक्ष
धर्म इति यावत् ॥ तस्य कामादिनिवृत्तिपूर्वकत्वात्तेन प्राप्यो मार्गः मुक्तिस्वरूपं तदुपायादिकं संगं त्यक्त्वा द्विजितो धीरः पश्यतीर्थजला॥ सर्वं
प्लुतः इत्यादिना कथितमित्यर्थः ॥ कोसौ निवृत्तिमार्ग इत्यत्राह ॥ क्रमयोगेति ॥ क्रमस्तत्त्ववर्णाश्रमोचितपंचयज्ञादिरूपकर्मयोगानु महा
ष्ठानक्रम आत्मयाथात्म्यज्ञानयोगः भगवद्भक्तियोगप्रवर्तनं गुणयोगस्तद्देन विवलितौ क्रमयोगाभ्यामुपलक्षेन ज्ञानक्रमयोगाभ्यामनुग्र
हीतेन भक्तियोगेनोपलक्षेन प्राप्तेब्रह्मणा हेतुना संसरति मुक्तिरिति पदेष निवृत्तिमार्ग इत्यर्थः ॥ ब्रह्मणा इति षष्ठ्यंत पाठे ब्रह्मणः क्रमः क्र

राजोवाच ॥ निवृत्तिमार्गं कथित आदौ भगवता यथा
क्रमयोगोपलब्धेन ब्रह्मणा यदसंसृतिः १

मयोगोपलक्षेन ज्ञानकर्मयोगाभ्यामुपलक्षेन भक्तियोगेनेति शेषः ॥ केचिदत्र क्रमयोगोर्चिरादिमार्गस्तेनोपलब्धो ब्रह्मा चतुर्मुखस्तेन सम
हाप्रलये मोक्षो भवति ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मनः प्रविशंति परं पदमिति वचनादित्याहुस्तन्न मोक्षोपसंपत्त
म इति शरीरपाताव धिमात्रविलंबश्रवणविरोधापत्तेः ॥ ब्रह्मणा सहते सर्वे इति वचनस्य तु ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति
सर्वे इति ॥ श्रुतेश्च पुराणविशेषवशाच्चतुर्मुखलोकप्राप्तजीवविषयात्पुराणवशाच्चतुर्मुखलोकं प्राप्य तत्र निर्विष्टोपासनः ॥ ब्रह्मणा सहमु रामः
च्यंत इति तदर्थः ॥ १ ॥ श्रीरामचंद्राय नमः ॥ २ ॥ २

द्वितीयः

२

तृतीयः

३

श्रीहयग्रीवायनमः॥ अथभगवान्बादरायणिः पूर्वस्कंधांते। यथापुरस्ताद्व्यासेपाद्मकल्पमथोशृणुइतिप्रतिज्ञातमर्थंप्रतिपादयि
षुः तत्प्रतिपिपादयिषितस्यप्रामाणिकत्वप्रथिम्नेविदुरमैत्रेयसंवादंप्रस्तौष्यन्भवताहमिवमैत्रेयोपिविदुरेणपृष्टइत्याहश्लोकद्वये
न॥ एवमिति॥ वः पांडवानांमंत्रकृद्दौत्यकर्त्ताऽखिलेश्वरः पमस्तदंश्राभ्रतो भगवान्विदुरः आत्मसात्कृतंस्वकीयत्वबुद्ध्यापरिगृहीतं
पौरवेंद्रगृहंपौरवेंद्रोधृतराष्ट्रस्तस्यगृहंहित्वात्यक्त्वायद्यायद्वावाप्रविवेशचनमितिशेषः तदाऋद्धिमत्संपन्नंस्वगृहंत्यक्त्वावनंप्रविष्टे

श्रीमन्नारायणायनमः॥ श्रीशुकउवाच॥ एवमेतत्पुरापृष्टोमैत्रेयोभगवान्किल॥ क्षत्त्रावनंप्रविष्टेनत्यक्त्वास्व
गृहमृद्धिमत्॥१॥ यद्वाअयंमंत्रकृद्वोभगवानखिलेश्वरः॥ पौरवेंद्रगृहंहित्वाप्रविवेशात्मसात्कृतम्॥२॥
राजोवाच॥ कुत्रक्षत्तुर्भगवतामैत्रेयेणाससंगमः॥ कदावासहसंवादएतद्वर्णयनःप्रभोः॥३॥ ०

नन्वत्त्राविदुरेणभगवान्मैत्रेयोमित्रासुतः कौषारविः एतद्भवतापृष्टंप्रत्येवभवदीयप्रश्नानुसारेणपुरापृष्टः त्यक्त्वास्वगृहमितिपौर
वेंद्रगृहंहीत्वेतिचकायिकोमानसश्चत्यागोविवक्षितः अतोपौनरुक्त्यंगृहस्यऋद्धिमत्वहेतुनयाभगवानखिलेश्वरइतिश्रीकृ
ष्णस्यपौरवेंद्रगृहप्रवेशकथनमसंगतंतद्गृहस्यभगवन्निग्रहविषयतयाविनंक्ष्यमाणत्वेनभगवत्प्रवेशेनऋद्धिमत्वेवर्णना
संगत्याद्वित्वेतिपद्यस्वारस्याच्च॥१ २॥ अत्रलब्धावसरोराजापृच्छतिद्वयेनकुत्रेति॥ कुत्रप्रदेशेमैत्रेयेणसहभगवतःक्ष
त्तुर्विदुरस्यसंगमः संगतिरासबभूवकदाकस्मिन्कालेवातेनसहसंवादोभूदेतत्हेप्रभोशुकनोऽस्मभ्यंवर्णय॥३॥ ॥१॥

स्वस्य शुश्रूषामाविःकरोति ॥ नहीति ॥ महात्मनः ॥ भगवत्प्रपन्नचित्तस्य विदुरस्य संबंधि वरीयसि रतत्वादिगुणेन तत्त्वे मैत्रेयप्रश्नः अल्पोदयः अ
ल्पस्वार्थस्योदयो यस्मात्स अल्पप्रयोजनोदयः नहि भवति कथं भूतः प्रश्नः साधुवादोपबृंहितः साधूनां सतां वादेन चरित्ररूपेण वादेन उप
बृंहितः विस्तृतः ॥ अतस्तद्वर्णय मया श्रोतव्यमिति भावः ॥ ४ ॥ एवमापृष्टो राज्ञा मुनिराहेति सूत आह स इति राज्ञा परीक्षिता एवमापृष्टः
साकल्येन पृष्टः सुबहुवित्सु पुबहुवेत्तीति सुबहुवित्स मुनिः श्रीशुकः प्रीतात्मा समीचीनप्रश्नेन संतुष्टचित्तः श्रूयतां इत्याभंश्यराजानं

नद्यास्यार्थे दयस्तस्य विदुरस्य महात्मनः ॥ तस्मिन्वरीयसि प्रश्नः साधुवादोपबृंहितः ॥ ४ ॥ सूत उवाच ॥ स एवमृषिव
र्येण पृष्टो राज्ञा परीक्षिता ॥ प्रत्याह तं सुबहुवित्प्रीतात्मा श्रूयतामिति ॥ ५ ॥ श्रीशुक उवाच ॥ यदा तु राजा स्वसुताननसाधू
न्पुष्णन्नधर्मेण विनष्टदृष्टिः ॥ भ्रातुर्यविष्ठस्य सुतान्विबंधून्प्रवेश्य लाक्षाभवने ददाह ॥ ६ ॥ यदा सभायां कुरुदेव
देव्याः केशाभिमर्शं सुतकर्म गर्ह्यम् ॥ न वारयामास नृपः स्नुषायाः स्वास्रैर्हरंत्याः कुचकुंकुमानि ॥ ७ ॥ ॥

प्रत्याह ॥ ५ ॥ एवं राज्ञा पृष्टो मुनिस्तमेवं संवादं प्रसुस्तुष्टुत्वा विदुरस्य पौरवेंद्रगृहत्यागे निमित्तमाह ॥ यदेति ॥ यदा राजा धृतराष्ट्रः यविष्ठस्य क
नीयसः भ्रातुः ॥ पांडोः सुतान्विबंधून्निर्हीनान्युधिष्ठिरादीन्लाक्षाभवने जतुगृहे प्रवेश्य प्रविष्टान्कृत्वा ददाह दग्धवान् ॥ तदा स विदुरः
अपामरजत इत्येकादशश्लोकैः यासंबंधः एवमुत्तरत्रापि ॥ कथंभूतो राजा विनष्टदृष्टिः विनष्टा दृष्टिर्ज्ञानविषयकं ज्ञानं चक्षुश्च यस्य सः अ
तएवाधर्मेणासाधून्स्वसुतान्पुष्णन् एवंभूतो ददाहेत्यन्वयः ॥ ६ ॥ यदा च नृपः धृतराष्ट्रः सभायां कुरुदेवस्य युधिष्ठिरस्य देव्या द्रौपद्याः

भा॰तृ॰टी॰ केशाभिमर्शरूपं गर्ह्यं निंदितं सुतकर्म पुत्रकर्तृकं कर्म न निवारयामास तदा यादित्यन्वयः कथंभूतायाः कुरुदेव्याः आत्मनः स्नुषायाः स्वास्वैः स्वीयै
॥२॥ रश्रुभिः कुचकुंकुमानि स्वस्तनयतकुंकुमानि हरंत्याः अपहरंत्याः ॥७॥ द्यूत इति ॥ तमोजुषाणः तमः प्रधानो राजा यद्यूतसमयेन प्रतिज्ञानुसारे
ण दायं भिक्षयं याचतोऽजातशत्रोः नादान्न ददौ न दायादित्यर्थः कथंभूतस्याजातशत्रोः वनागतस्य वनात्प्रत्यागतस्य सतः सावलं बलसमंध
र्मेणावावलंब आश्रयो यस्य तस्य साधोः साधुलक्षणलक्षितस्य द्यूतेऽज्ञातिभिरधर्मेणाधर्मरूपेण दुर्योधनेन वा जितस्य पराजितस्य ९

द्यूते त्वधर्मेण जितस्य साधोः सत्यावलंबस्य वनागतस्य ॥ न याचतोऽदात्समयेन दायं तमोजुषाणो यदजातशत्रोः ॥८
यदा च पार्थप्रहितः सभायां जगद्गुरुर्यानि जगाद कृष्णः ॥ न तानि पुंसाममृतानि राजोरु मेने क्षतपुण्यलेशः
९ ॥ यदोपहूतो भवनं प्रविष्टो मंत्राय पृष्टः किल पूर्वजेन ॥ अथाह तन्मंत्रदृशां वरीयान् यन्मंत्रिणो वैदुरि
कं वदंति ॥१०॥

यदेति ॥ पार्थेन युधिष्ठिरेण प्रहितः जगद्गुरुः धर्मोपदेष्टा भगवान् श्रीकृष्णः सभायां यानि पुंसां भीष्मादीनाममृ
तायनान्यमृतस्रावीणि वचांसि जगाद तानि वचांसि यदा च राजा धृतराष्ट्रो न मेने न बहुमेने तदा यादित्यन्वयः ॥ कथंभूतो राजा क्षतपु
ण्यलेशः क्षतो विनिष्टः पुण्यस्य लेशो यस्य सः ॥ ९ ॥ यदेति यदा पूर्वजेन धृतराष्ट्रेण मंत्राय उपहूतः उपसमीपं हूतः आहूतः भ
वनं गृहं प्रविष्टः मंत्रदृशां मंत्रविदां मध्ये वरीयान् श्रेष्ठो विपश्चिन्मंत्रमालोचनं प्रतिपृष्टः मंत्रदृशां मंत्रविदां मध्ये वरीयान् वि
दुरः अथ प्रश्नानंतरमुवाच ॥ मंत्रविदस्तमेवाह यत्तस्यतः वैदुरिकं विदुरोक्तमेव मंत्रिणः इतरे सर्वे मंत्रिणः वदंति ॥१०॥ ॥२॥

रणे किमाहेत्यत आह ॥ अजातशत्रोरिति त्रिभिः दुर्विषहस्तोदुः ॥ शक्यं तत्वागः अपराधं तितिक्षतो मर्षयत ॥ अजातशत्रोर्दायं प्रतियच्छ ॥ अस
मर्थं परं तितिक्षयैव भवितव्यमित्यत आह महानुज अनुजैरर्जुनादिभिः सहितः वृकोदरः भीमः स एवाहिः रुषा श्वसन् यत्राजाशत्रु
संनिधौ वर्तते ॥ यद्यस्माद्वृकोदरात्त्वमलं नितरां बिभेषि यत्त्वमित्यपि पाठः तद्दायं प्रति बिभेषीत्यर्थः ॥११॥ भगवत्सहायानां पार्थानां बलीयु
स्त्वं किमु वक्तव्यमित्याह ॥ पार्थानिति ॥ देवः भगवान्समग्रज्ञानशक्त्यादिसंपन्नः मुकुंदः श्रीकृष्णः पार्थान्गृहीतवान् ममप्राणा हि पां

विदुर उवाच ॥ अजातशत्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं तवागः ॥ महानुजो यत्र वृकोदराहिः ॥ द
श्वसन् रुषा यत्त्वमलं बिभेषि ॥११॥ पार्थांस्तु देवो भगवान्मुकुंदो गृहीतवान्सक्षितिदेवदेवः ॥ आ
स्ते स्वपुर्यां यदुदेवदेवो विनिर्जिताशेषनृदेवदेवः ॥१२॥

डवा इत्यभिमानविशेषेण परिगृहीतवान् ॥ गृहस्थानुभ
गवां नतो पि किमित्यत आह ॥ स भगवान्नृक्षितिदेवाः ब्राह्मणास्तेषां देवः ब्रह्मण्य इत्यर्थः यत्र भगवान् ब्रह्मण्यो वर्त्तते तत्र श्रीर्विज
योभूतिर्निश्चिता येन तवैव विजय इत्यर्थः पूरस्थेन भगवता किं भवितव्यं इति मा वोच इत्याह स्वपुर्यामेवास्ते ॥ आस्तां स्वपुर्यां तथाप्येके
न तेन किं इत्यत आह यदुदेवदेवः यदुदेवा यदुश्रेष्ठाः ॥ सात्यकिप्रद्युम्नानिरुद्धादयः तेषां देवः प्रभुः यादवानां संनिधावेवास्ते इ
त्यर्थः ॥ यादवतुल्या योद्धारो मत्सन्निधावपि संतीत्यत आह ॥ विनिर्जिताशेषनृदेवदेवः विनिर्जिता अशेषाः नृदेवाः राजानः येस्ते
षामपि देव इत्यर्थः ॥ समस्तदिग्विजेतॄणामपि प्रभुः ॥१२॥

एवं भगवत्स्वयाख्यानं वा कीनामजेप म मभिधाय स्वकुलनाशको भवद्वेषी त्वत्सुतो निर्वास्यतामित्याह ॥ यं दुर्योधन मपत्य बुद्ध्या ॥ त्वं पुष्णासि
स एष दुर्योधनः दोषसंचुर ॥ तत्रापि पापरासिस्वापस्वरूपेण मूर्त्तः सन्गृहान्प्रविष्टः कुतः यतः पुरुषद्वेषी भगवद्वेषी आस्ते कथंभूतः पु
ष्णासि कृष्णाद्विमुखः अतएव गतश्रीः अत आश्वशेव ममंगलमेवं दुर्योधनं कुलकौशलाय ॥ त्यजेदेकं कुलस्यार्थे इति न्यायेन स्वकुला
निरुद्विवृत्तयेत्यजेमं हीनि ॥ आश्वर्थेनं आश्वसेत्यमितसविपातः ॥ आश्वेन दुर्योधनमाशु त्यजेत्यर्थः ॥ असेव्यं मसर्वं तमाशु त्यजेत्य
र्थः ॥ १३ ॥ इतीत्यमसचिवान्विदुर इति शेषः ॥ अथैतत्सर्वं गृहत्यागे च कृत्स्नेतस्मिन्सा ज्ञातसर कृताभिभवमाह ॥ तत्र विदुरेणैव सूच्यमानेप्र

स एष दोषः पुरुषद्विडास्ते गृहान्प्रविष्टो यमपत्यबुद्ध्या ॥ पुष्णासि कृष्णाद्विमुखो गतश्रीस्त्यजाश्वशैवं कुलकौशलाय
१३ ॥ श्रीशुक उवाच ॥ इति स्म विद्वान्स्तत्र सुयोधनेन प्रवृद्धकोपस्फुरिताधरेण ॥ असत्कृतः सत्स्पृहणीयशीलः क्ष
त्ता सकर्णानुजसौबलेन ॥ १४ ॥ दुर्योधन उवाच ॥ क एनमत्रोपजुहाव जिह्मं दास्याः सुतं यद्बलिनैव पुष्टः ॥ तस्मिन्प्र
तीपः परकृत्य आस्ते निर्वास्यतामाशु पुराच्छ्वसानः ॥ १५ ॥

प्रवृद्धकोपस्फुरिताधरेण प्रवृद्धः कोपः तेन स्फुरितश्चंचल
अधरो यस्य तेन ॥ सकर्णानुजसौबलेन कर्णदुःशासनशकुनिसहितेन सुयोधनेन सद्भिः स्पृहणीयं शीलं यस्य स क्षत्ता असत्कृतः तिरस्कृतः
१४ ॥ तिरस्कारप्रकारमवाह ॥ क इति ॥ दास्याः सुतं जिह्मं कुटिलात्मानमेनमत्र मंत्रे क उपजुहाव आहूतवान् ॥ जिह्मत्वं स्फुरयति ॥ यद्बलिनाय
स्यममबलिनान्नेनैव पुष्टः संवर्द्धितं तस्मिन्नपि प्रतीपः ॥ प्रतिकूलः परकृत्ये परेषां शत्रूणां कृत्ये कार्ये ॥ प्रथमांतत्वेऽप्यधिकरण बहुव्रीहि

सविदुरः अत्युल्बणैः कठिनैः भ्रातुः पुरः कर्णयोर्बाणवत्तापनद्भिः वाक्यैः तीक्ष्णैर्मर्मसु ताडितोपि सव्यथितोपि विगतव्यथः यं हि न व्यथयंत्येते पुरुषं पुरुष
पुरुषर्षभः इत्युक्तरीत्या गतव्यथः अतएव स्मयन्नीषद्धसन्स्वीयमिति पाठे धनुर्विशेषणं ॥ धनुः शरासनं द्वारि निधाय तीर्थान्यटिष्यतः मम किं धनुषेति
बुद्ध्या निधाय मायां सर्वजनमोहिनीं भगवन्मायां उरु मानयानः अहो मायामाहात्म्यमिति बहु मन्यमानः ॥ अयान्निर्गतः गृहादिशेषः ॥१६॥ एवं गृ
हत्यागहेतुं तत्यागं चाभिधाय तत्तीर्थाटनप्रकारमाह ॥ स इत्यष्टभिः कौरवपुण्यलब्धः सविदुरः गजाह्वयात्स्मरणान्निर्गत ॥ कौरवपुण्यलब्ध इत्यनेन
शुक उवाच ॥ स इत्थमत्युल्बणकर्णबाणैर्भ्रातुः पुरो मर्मसु ताडितोपि ॥ स्वयं धनुर्द्वारि निधाय मायां गतव्यथोयादुरुमा
नयानः ॥१६॥ स निर्गतः कौरवपुण्यलब्धो गजाह्वयात्तीर्थपदः पदानि ॥ अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यामधिष्ठितो
यानि सहस्रमूर्त्तिः ॥१७॥ पुरेषु पुण्योपवनाद्रिकुंजेष्वपंकतोयेषु सरित्सरःसु ॥ अनंतलिंगैः समलंकृतेषु चचा
रतीर्थायतनेष्वनन्यः ॥१८॥ तेषां भाग्यं तेन रूपेण निर्गतमिति सूचितं ॥ तीर्थपदः तीर्थं गंगा यस्मात्पदं तस्य हरेः पदानि स्थानानि पुण्यं कर्तुमिच्छ
याऽन्वाक्रमदनुचचार कानि पदानि उर्व्यां भूम्यां यानि पदानि सहस्रमूर्त्तिः सहस्राणि बहूनि मूर्त्तयो रंगेशश्रीवैंकटेशहस्तिशैलाद्यर्चारूपाणि यस्य त
थाभूतो भगवान् ॥ अधिष्ठितः अधिष्ठाय स्थित पुरेषु पुण्यान्युपवनानि चाद्रयश्च कुंजानि च तेषु तेष्वपंकानि निर्मलानि तोयानि येषु तेषु स
रित्सरःसु सरित्सु सरःसु च तेष्वनंतस्य भगवतो लिंगैर्मूर्त्तिभिः समलंकृतेषु तीर्थायतनेष्वनन्य अव्यभिचरितभगवद्भक्तियोगनि
ष्ठः चचार पर्यटत ॥१८॥

भा.तृ.टी. गांभुविंपर्यटन्मेध्यैर्विविक्तैर्जीन्यघ्नयनिमित्ताद्दुष्टैरन्नादिभिर्वृत्तिराजीविकायस्यसःसदाआप्लुतःस्नातःअधःशयनंयस्यसःअवधूतःअभ्यं-
॥६॥ गोद्वर्त्तनादिदेहसंस्काररहितःस्वैःस्वदेहसंबंधिभिरलक्षितःअदृष्टःअवधूतानांवेषोवल्कलाजिनधारणादिरूपोयस्यसःहरितोषणानिह
रिसंतोषणेनभिरितिहरितोषणानिव्रतानिचेरेचरत॥१९॥इत्थमिति॥भारतवर्षमेवइत्थंव्रजन्पर्यटन्कालेनयावद्यावताकालेनप्रभासंप्रभास
त तीर्थंप्रतिगतवान्विदुरस्तावंतंकालंपार्थोयुधिष्ठिरःअजितेनार्जुनेनसांकंश्रीकृष्णेनहेतुनावाएकातपत्रांएकमातपत्रंयस्यांताएकचक्राए

गांपर्यटन्मेध्यविविक्तवृत्तिःसदाप्लुतोऽधःशयनोवधूतः॥अलक्षितःस्वैरवधूतवेषोव्रतानिचेरेहरितोषणानि
॥१९॥इत्थंव्रजन्भारतमेववर्षंकालेनयावद्गतवान्प्रभासं॥तावच्छशासक्षितिमेकचक्रामेकातपत्रामजितेनपा
र्थः॥२०॥तत्राथशुश्रावसुहृद्विनष्टिंवनंयथावेणुजवह्निसंश्रयं॥संस्पर्द्धयादग्धमथानुशोचन्सरस्वतींप्रत्य
गियायतूष्णीं॥२१॥तस्यांत्रितस्योशनसोमनोश्चपृथोरथाग्नेरसितस्यवायोः॥तीर्थंसुदासस्यगवांगुहस्ययच्छ्राद्ध
देवस्यसआसिषेवे॥२२

कंसैवचक्रंसैन्यंयस्यांतांक्षितिंशशासअनुशिष्टवान्॥२०॥तत्रेति॥अथप्रभासतीर्थप्रतिगमनानंतरंतत्रप्रभा
सतीर्थेवसमीपेसंस्पर्द्धयापरस्परसंघर्षेणसुहृदांकौरवादीनांविनष्टिंशुश्रावाश्रणोत्॥परस्परसंस्पर्द्धयाविनाशेदृष्टांतःवेणुभ्योजातोयोव
ह्निस्तस्यसंश्रयमाश्रयंवनंयथादग्धंतद्वत्॥अथसुहृद्विनाशश्रवणानंतरमनुशोचन्प्रत्यक्पश्चिमाभिमुखंसरस्वतींनदींप्रतितूष्णींमियाय प
गतवान्॥२१॥तस्यांसरस्वत्यांत्रितस्यत्रितेनसेवितंतीर्थमित्यर्थः॥त्रितादीनामेकादशतीर्थानितत्तन्नाम्नाप्रसिद्धानिआसिषेवेआसेवित ॥४॥
वान्॥२२॥

अन्यानीति॥ द्विजदेवाऋषयस्तैर्देवैश्च कृतानि निर्मितानि विष्णोरायतनानि बहुविधानि स्थानानि॥ यद्दर्शनात् येषामायतनानां दर्शनात् कृष्णमनु
स्मरंति कृष्णस्मारकानीत्यर्थः प्रसंगान्यायुधानि तेषां मुख्यं चक्रं सुदर्शनं तेनांकितानि मूर्द्धन्यहेमकुंभेषु चिह्नितानि मंदिराणि येषु तान्यन्या
नि च तीर्थान्यासिषेवे इति पूर्वेणान्वयः॥२३॥ ततः परस्वस्मात् आरद्धं समृद्धं सुराष्ट्रं देशं सौवीरांश्च देशानतिव्रज्य यावद् कुरुद्धवः प्राप्तस्तावत्सर्वय
शु मपि कालेन यमुनां पेत्य तत्र यमुनातीरे भागवतं उद्धवं ददर्श॥२४॥ सः विदुरः वासुदेवानुचरं यं येन क्येन धाता गच्छतीत्युक्तमुक्तं वत्सबुद्ध

अन्यानि चेह द्विजदेवदेवैः कृतानि नानायतनानि विष्णोः॥ प्रत्यंगमुख्यांकितमंदिराणि यद्दर्शनात्कृष्णमनुस्मरं
म ति॥२३॥ ततस्त्वतिव्रज्य सुराष्ट्रमृद्धं सौवीरमत्स्यान्कुरुजांगलांश्च॥ कालेन यावद्यमुनामुपेत्य तत्रोद्धवं भागवतं दद
र्श॥२४॥ स वासुदेवानुचरं प्रशांतं बृहस्पतेः प्राक्तनयं प्रतीतं॥ आलिंग्य गाढं प्रणयेन भद्रं स्वानामपृच्छद्भगवत्प्रजा
नाम्॥२५॥ विदुर उवाच॥ कच्चित्पुराणौ पुरुषौ स्वनाभ्यपाद्मानुवृत्त्येह किलावतीर्णौ॥ आसात उर्व्याः कुशलं वि
धाय कृतक्षणौ कुशलं शूरगेहे॥२६॥ भगवद्दायतन॥ स्थितिप्रतिमंतं प्रमदमादिसंपन्नं बृहस्पतेः सकाशात्प्राप्तनयं प्राप्तो नयो र
नीतिर्येन तं प्रतीतं प्रख्यातं उद्धवं प्रणयेन गाढं यथा तथा आलिंग्य स्वानां स्वसंबंधिनां भगवत्प्रजानां भगवतस्तत्प्रजानां पुत्रपौत्रादीनाम
व न्येषां च पोष्याणां च भद्रं कुशलमपृच्छत्॥२५॥ प्रथमं तावद्रामकृष्णयोः कुशलं पृच्छति॥ कच्चिदिति कुशलप्रश्नद्योतकमव्ययं स्वस्य नाभेः प्र
वः स्वनाभ्यः स चासौ पाद्मः॥ पद्मसंभवः ब्रह्मा तस्यानुवृत्त्या प्रार्थनयेह भूर्लोकेऽवतीर्णौ पुराणौ पुरुषौ उर्व्याः कुशलं सुखं विधाय कृत्वा कृतक्ष
णौ लब्धावसरौ शूरगेहे वसुदेवगृहे कुशलं सुखं कच्चिदासाते किल॥२६॥

वसुदेवस्य कुशलं पृच्छति ॥ कुशल्यानकः परमः सुहृन्मामः भद्रः पृसौ वा ॥ यद्वा भगिनीपतिः अतो देवकीपादो भगिनीति लोकस्य व्यवहारः सः प्रसिद्धः शौरिः
शूरस्यापत्यं वसुदेवः अंग हे उद्धव सुखमास्ते कच्चित् कथंभूतः शौरिर्वदान्यो तु दाता स्वसृणां भगिनीनां वरतर्पणेन वरणां तत्पत्नीनां तर्पणेन तत्र च्छि
दारवत्सु जातप्रदानेन सह वरान् अभीष्टान् अर्थान् पितृवद्दातस्मरात् ॥२७॥ प्रद्युम्नमापृच्छति ॥ यदूनां वरूथाधिपतिः सेनापती वीरः प्रद्युम्नः सुखमास्ते
कच्चिदंग हे उद्धव कथंभूतः प्रद्युम्नः रुक्मिणी विप्रानाराध्यादि सम्पूर्वजन्मनि स्मरं कामं सुतं पं प्रद्युम्नं केशवतः सकाशात् लेभे लब्धवती ॥२८॥ उ

कच्चित्कुशल्यानकः परमः सुहृन्नो भामः स आस्ते सुखमंग शौरिः ॥ योसौ स्वसृणां पितृवद्ददाति वरान्वदान्यो वरतर्पणेन ॥२७॥
कच्चिद्वरूथाधिपतिर्यदूनां प्रद्युम्न आस्ते सुखमंग वीरः ॥ यं रुक्मिणी केशवतोभिलेभे आराध्य विप्रान्स्मरमादिसर्गे ॥२८॥
कच्चित्सुखं सात्वतवृष्णिभोजदाशार्हकाणामधिपः स आस्ते ॥ यमभ्यषिंचच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात् ॥२९॥
कच्चिद्धरेः सौम्य सुतः सदृक्ष आस्तेग्रणी रथिनां साधु सांबः ॥ असूत यं जांबवती व्रताढ्या देवं गुहं योंऽबिकया धृतो ग्रे ॥३०॥

उग्रसेनं पृच्छति ॥ सात्वकादीनामधिपतिः उग्रसेनः सुखमास्ते कच्चित् शतपत्रनेत्रः पुंडरीकाक्षो भगवान् स्वयं नृपासनस्याशामभिलाषं दूरा
त्परिहृत्य यमुग्रसेनमभ्यषिंचत् अभ्यषिंचत् अभ्यषिकवान् ॥२९॥ सांबं पृच्छति ॥ हे सौम्य रथिनां रथिकानामग्रणीः श्रेष्ठः हरेः श्रीकृष्णस्य सुतः सदृशः
हरिणा समानः सांबः साधु आस्ते कच्चित् ॥ जांबवती व्रताढ्या व्रतनिष्ठा सती देवं गुहं पूर्वजन्मनि कार्तिकेयं यं सांबं प्रासूत सूतवती ॥ यः गुहः अ
ग्रे पूर्वजन्मनि अंबिकया भवान्या धृतः गर्भे इति शेषः ॥३०॥ ॥ ॥ ॥ ॥ ॥ ॥५॥

सात्यकिं पृच्छति क्षेममिति ॥ युयुधानः सात्यकिः क्षेमं कुशलमास्ते कच्चित् यः युयुधानः फाल्गुनादर्जुनाल्लब्धं धनूरहस्यम् ॥ धनुर्वेदो येन सः अधोक्षजस्य
श्रीकृष्णस्य सेवयैव तदीयामधोक्षजसंबंधीनीं यतिभिरपि दुरापां गतिमंजसा सुखेनैव लेभे प्राप्तवान् ॥ ३१ ॥ अक्रूरं पृच्छति ॥ बुधः विज्ञाततत्वः अ
नमीवानमीवः अपापः भगवंतं शरणं गतः ॥ श्वफल्कपुत्रः अक्रूरः स्वस्ति कुशलमास्ते कच्चित् यः श्वफल्कपुत्रः कृष्णस्य पादाभ्यामंकितः यो मा
र्गस्तस्य पांसुषु रजःसु प्रेम्णा कृष्णपादांकितमार्गदर्शनजनितप्रीत्यतिशयेन विभिन्नं धैर्यं यस्य सः अचेष्टत अलुंवत ॥ ३२ ॥ देव
क्षेमं स कच्चिद्युयुधान आस्ते यः फाल्गुनाल्लब्धधनूरहस्यः ॥ लेभेंऽजसाधोक्षजसेवयैव गतिं तदीयां यतिभिर्दुरापाम् ॥ ३१
कच्चिद्बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः ॥ यः कृष्णपादांकितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः
३२ ॥ कच्चिच्छिवं देवकभोजपुत्र्या विष्णुप्रजाया इव देवमातुः ॥ या वै स्वगर्भेण दधार देवं त्रयी यथा यज्ञवितानमर्थम्
३३ ॥ अपिस्विदास्ते भगवान्सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः ॥ यमामनंति स्म हि शब्दयोनिं मनोमयं सत्वतुरीयतत्
त्वं ॥ ३४ ॥
कीं पृच्छति ॥ देवकनाम्नो भोजस्य पुत्र्या विष्णुः श्रीकृष्णः प्रजाऽपत्यं यस्यास्तस्या देवक्याः देवमातुरदितेरिव शिवं कुशलं कच्चित्
या देवकी स्वगर्भेण देवं भगवंतं दधार ॥ तत्र दृष्टांतः त्रयी वेदो यज्ञवितानमर्थं यथा प्रकाशकतया बिभर्ति तद्वदित्यर्थः ॥ ३३ ॥ अनिरुद्धं पृच्छति
अपीति ॥ सात्वतां भक्तानां वः युष्माकं कामदुघः अभीष्टप्रदः भगवाननिरुद्धः सुखमास्ते अपिस्वित् ॥ अपिस्विदाह यः कश्चित्सर्वप्रश्नार्थः यम
निरुद्धं शब्दयोनिं शास्त्रप्रमाणकं सत्वतुरीयतत्वं सत्वगवां तत्त्वस्य तुरीयं चतुर्थं समामनंति शब्दयोनित्वं कुतः मनोमयं योगपरिपुष्टमनो
ग्राह्यं लौकिकप्रमाणाविषयं इत्यर्थः ॥ ३४ ॥

भा॰स्क॰टी॰

॥६॥

अथ वशिष्टसर्वयादवानां कुशलं युगपत्पृच्छति ॥ निजात्मदेवं स्वकीयात्मदेवतं भगवंतमनन्यवृत्त्या एकांतभक्त्या समनुवर्त्तंते ये हृदीकादयः ते सर्वे हे
सौम्य स्वस्ति कुशलं चरंत्यपि स्वित् ॥३५॥ एवं यादवानां कुशलं पृष्ट्वा अथ पांडवानां तत्पृच्छति ॥ अपीति ॥ स्वदोर्भ्यां स्वभुजतुल्याभ्यां विजयाच्युताभ्यामर्जु
नकृष्णाभ्यां सह धर्मो युधिष्ठिरः धर्मेण वेदशास्त्राविरोधेन सेतुं वर्णाश्रमादिमर्यादां परिपाति रक्षत्यपि स्वित् यत्सभायां यस्य युधिष्ठिरस्य सभायां वि
जयोर्जुनस्तत्कर्तृकाया अनुवृत्तिः सेवा तया हेतुभूतया या साम्राज्यलक्ष्मीस्तया दुर्योधनोऽतप्यत् तपमनुवर्भूते विजयस्तमेव साम्राज्यलक्ष्मीरप्यनु

अपिस्विदन्ये च निजात्मदेवमनन्यवृत्त्या समनुव्रता ये ॥ हृदीकसत्यात्मजचारुदेष्णगदादयः स्वस्ति चरंति सौम्य ॥३५॥
अपिस्वदोर्भ्यां विजयाच्युताभ्यां धर्मेण धर्मः परिपाति सेतुं ॥ दुर्योधनोऽतप्यत यत्सभायां साम्राज्यलक्ष्म्या विजयानुवृत्त्या ॥
३६ ॥ किं वा कृताघेष्वघमत्यमर्षी भीमोऽहिवद्दीर्घतमं व्यमुंचत् ॥ यस्यांघ्रिपातं रणभूर्न सेहे मार्गं गदायाश्चरतो विचित्रं ॥
३७ ॥ कच्चिद्यशोधा रथयूथपानां गांडीवधन्वोपरतारिरास्ते ॥ अलक्षितो यच्छरकूटगूढो मायाकिरातो गिरिशस्तुतोष ॥३८॥

वर्त्तते इति वृद्धानपृच्छत्यर्थः ॥३६॥ किंवेति ॥ कृताघेषु कृतापराधेषु तत्कृततमघमपराधं कथंभूतं दीर्घतमं बहुकालानुसंचितमहिव
त् स्वमर्षं असहिष्णु भीमो व्यमुंचत् किंवा अमर्षमिति शेषः अमर्षमत्यजत्किं इत्यर्थः ॥ यस्य भीमस्यांघ्रिपातं पादाघातं रणभूर्न सहे कथंभू
तस्य गदाया विचित्रं मार्गं गतिं चरतः गदां विचित्रं भ्रामयत इत्यर्थः ॥३७॥ कच्चिदिति ॥ रथयूथपानां मध्ये यशोधाः कीर्त्तिधारकः उपरता निवृत्ता
अरयो यस्मात्स उपरतारिः गांडीवधन्वा आस्ते कच्चित् यस्य गांडीवधन्वनः शरकूटेन बाणसमूहेन गूढः संवृतः अतीवेन रैरलक्षितः मायाकि ॥६॥
रातः मायया किरातवेषधरः गिरिशो रुद्रस्तुतोष संतुष्ट ॥३८॥

नकुलसहदेवौ पृच्छति एकेन ॥ यमाविति पार्थैर्युधिष्ठिरभीमार्जुनैः पक्ष्मभिरक्षिणीव हृतौ रक्षितौ ॥ अक्षिणी वेति प्रत्यक्षत्वाभाव आर्षः पृथायाः कुंत्याः
सुतयोस्तनं पीतवंतौ यमौ युगपज्जातौ नकुलसहदेवौ मृधेषु धेस्वरिक्थं पराक्रम्य शत्रोरुद्धाय लब्ध्वा रेमाते उत स्वित् ॥ परात्स्वरिक्थलाभे दृष्टांतः व
ज्रिवक्त्रादिंद्रमुखात्सुपर्णाविव ॥ यद्दिहोगरुडावमृतमानयेतामिति दृष्टिस्पर्थः ॥ ३९ ॥ पृथायाकुशलं किं पृच्छे यं यतस्तस्मात् ॥ पांडुं विना प्राणधारमेवा
श्चर्यमित्याह ॥ अहो इति ॥ तेन प्रसिद्धेन राजर्षिवर्येण पांडुना विना प्रभर्मकार्थेऽर्भकपोषणार्थं पृथा कुंती प्रियते ऽवतिष्ठते ॥ अहो इत्याश्चर्ये यस्तु
पांडुरेकवीरः असहायवीरः धनुरेव ॥ द्वितीयं यस्य स तादृशो रथः एवंभूतश्च सन्स्वः ककुभः दिशः विजिग्ये जितवानेवंभूतेन पांडुना विना पृ

यमावुतस्वित्तनयौ पृथायाः पार्थैर्वृतौ पक्ष्मभिरक्षिणीव ॥ रेमात उद्धाय मृधे स्वरिक्थं परात्सुपर्णाविव वज्रिवक्त्रात
॥ ३९ ॥ अहो पृथापि ध्रियतेऽर्भकार्थे राजर्षिवर्येण विनापि तेन ॥ यस्त्वेकवीरो रथयो विजिग्ये धनुर्द्वितीयः ककुभः श्च
तस्रः ॥ ४० ॥ सौम्यानुशोचे तमधःपतंतं भ्रात्रे परेताय विदुद्रुहे यः ॥ निर्यापितो येन सुहृत्स्वपुर्या अहं स्वपुत्रान्समनुव्र
तेन ॥ ४१ ॥ सोऽहं हरेर्मर्त्यविडंबनेन दृशो नृणां चालयतो विधातुः ॥ नान्योपलक्ष्यः पदवीं प्रसादाच्चरामि पश्यन्गतर
विस्मयोत्र ॥ ४२ ॥
याजीवन्नप्याश्चर्यमेव ॥ ४० ॥ धृतराष्ट्रमनुशोचति ॥ हे सौम्य उद्धव परेताय परलोकं गताय भ्रात्रे पांडवे यो विदुद्रुहे तमु
त्रेभ्यो द्रोहकरणेन तस्मादेव द्रोहं कृतवानिति स्पर्थः ॥ अत एवाधः नरके पतंतं धृतराष्ट्रमनुशोचे ॥ येन धृतराष्ट्रेण सुहृन्मित्रमहं पर्यापितः ॥ येन क
थंभूतेन दुर्योधनादीन्स्वपुत्राननुव्रतेन स्वपुत्रानुसारिणेत्यर्थः ॥ ४१ ॥ एवं पांडवपांडवकौरवाणां कुशलं पृष्ट्वा स्वस्य स्थानप्रकारमाह ॥ सइति ॥ सो
हं तेन निर्यापितोऽहं मर्त्यविडंबनेन मनुष्यचेष्टानुकारेण नृणां दृशः दृष्टीर्भ्रमितवतीः तास्तालयतः भ्रामयतः विधातुर्जगन्नियंतुर्हरेः ॥ श्री

भा.तृ.टी.

॥७॥

कृतस्य प्रसादादनुग्रहात्स्वदवीनद्भिर्मतिं जगतश्चपन्नतएवगतविस्मयः निवृत्ताश्चर्यैः अत्रभक्ततत्वेनान्योपलक्ष्यः पृच्छन्नृश्वरामि॥४२॥ नन्वयंश्री
कृष्णोविधात्रभक्तानुग्राहीनाचेतिकिमितिपार्थान्स्वभक्तान्नानुजग्राह किमितिवाकौरवान्स्वस्मिन्द्वेषिणोनविगृहीतवानित्यत आह॥ नूनमिति
त्रिमदः अभिजनवित्तविद्यामदः यद्वाधनैश्वर्यसेनामदः तेनोत्पथानां चमूभिः सेनाभिः महीं पुनः पुनश्चालयतां नृपाणां वधाद्धेतोः प्रपन्नां
पांडवानामार्तैः पीडाया जिहीर्षया हर्तुमिच्छया ईशोप्यघसमयएवहंतुंसमर्थोपिभगवान्कुरूणामघमपराधंउपेक्षितवान् तदानीमेवतेषांवधोश्र
सहत्विभाजन्मवधोनस्यादित्यापायेनप्रतीक्षितवानित्यर्थः॥ नूनंनिश्चितं॥४३॥ ननुजगन्नियंतुर्भगवतः किमर्थंविडंबनेनप्रयोजनमित्य

नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः॥ वधात्प्रपन्नार्त्तिजिहीर्षयेशोप्युपेक्षताघं भगवान्कुरूणां
४३॥ अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसां॥ नन्वन्यथा कोर्हति देहयोगं परोगुणानामुत कर्मतंत्रं॥४४
तस्य प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे॥ अर्थाय जातस्य यदुष्वजस्य वार्त्तां सखे कीर्त्तय तीर्थकीर्त्तेः
दिव्य ॥४५॥

तत्राह॥ अजस्येति॥ अजस्य कर्मायत्तोत्पत्तिरहितस्य जन्म अकर्मोपतापाकृतेर्द्धिकं विग्रहरूपं ज जन्म उत्पथानां नाशनाय अकर्तुः कर्मा
धीनकरणयत्नव्यापाररहितस्य कर्माणि पुंसां ग्रहणाय लोकसंग्रहायेत्यर्थः॥ अन्यथादुःकृतविनाशार्थजन्मादिकं न चेत्तर्हि हे उद्धव गुर
णानांसत्वादीनां परः॥ नियंता गुणावच्छ इत्यर्थः देहं कर्मकृतं देहं कर्मतंत्रं कर्मविस्तारं च कोर्हतीति॥ अतो न॥ कर्मयतजन्मकर्मादिकं अ
पि तु तत्त्वघनाप्राद्यर्थमित्यर्थः॥४४॥ एवं साधुपरित्राणाद्यर्थमवतीर्णस्याश्रितवात्सल्यजलधेः वार्त्ता कथयेति वदन्नुपसंहरति॥ तस्येति॥ स्वे
स्वकीयेनुशासने आज्ञायामवस्थितानामाज्ञानुल्लंघिनामित्यर्थः प्रपन्नायेऽखिललोकपाला इंद्रादयस्तेषामर्थाय यदुषुजातस्यावतीर्णस्याज

स्य कर्मापन्नोत्तन्त्रिश्रमस्य तीर्थकीर्तेः पवित्रकीर्तेः तस्य भगव
तः॥ श्रीकृष्णस्य वार्त्तां वृत्तान्तं हे सखे उद्धव कीर्त्तय कथय ॥४५॥

॥८॥

इति श्रीमद्भागवते तृतीयस्कंधे व्याख्या श्री र घ लि तां प्रथमोऽध्यायः ॥१॥ एवं विदुरेण पृष्टे उद्धवे तस्य भगवतोवतारप्रभृति तत्समाप्त्यवधि दिव्यचेष्टि
तवर्णनानुकूलसमुत्तरं वक्ष्यंस्तावदुद्धवस्य भगवद्विरहौत्कंठ्यावेशेन प्रतिवचनासामर्थ्यमाह वादरायणिरितीमादि षड्भिः क्षत्त्रा विदुरेण प्रियं प्रियभगव
द्विषया वार्त्ता प्रतीतु कः प्रकारेण पृष्टः भगवत उद्धवः औत्कंठ्यात्स्नेहविशेषात्स्मारितः ईश्वरः श्रीकृष्णो यस्य सः प्रतिवक्तुं उत्तरं वक्तुं न चोत्सेहे न स
मर्थोऽभवत् ॥१॥ तन्नैरेव कैमुत्यन्यायेन प्रपंचयति य इति द्वाभ्यां पंचहायनः पंचवर्षः य उद्धवः मात्रा जनन्या प्रातराशाय प्रातर्भोजनार्थं याचि

इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे प्रथमोऽध्यायः ॥१॥ श्रीशुक उवाच ॥ इति भागवतः पृष्टः क्षत्त्रा वार्त्तां प्रियाश्रयां
प्रतिवक्तुं न चोत्सेहे औत्कंठ्यात्स्मारितेश्वरः ॥१॥ यः पंचहायनो मात्रा प्रातराशाय याचितः ॥ तन्नैच्छद्रचयन्यस्य
सपर्यां बाललीलया ॥२॥ स कथं सेवया तस्य कालेन जरसं गतः ॥ पृष्टो वार्त्तां प्रतिब्रूयाद्भर्तुः पादावनुस्मरन् ॥
॥३॥ स मुहूर्तमभूत्तूष्णीं कृष्णांघ्रिसुधया भृशं ॥ तीव्रेण भक्तियोगेन निमग्नः साधु निर्वृतः ॥४॥

तः प्रार्थितः तस्मात्प्रातराशं नैच्छत कथंभूतः सन् ॥ अस्य श्रीकृष्णस्य सपर्यां पूजां बाललीलया रचयन् ॥ बालक्रीडया श्रीकृष्णं किंचित्सरिकि
त्वा कल्पितैरेव साधनैः परिचर्यां कुर्वन्नित्यर्थः ॥२॥ एवं बाल्यप्रभृति तस्य भगवतः सेवया कालेन जरसं जरां वृद्धत्वं गतः प्राप्तः सः उद्ध
वः वार्त्तां प्रति पृष्टः भर्तुः श्रीकृष्णस्य पादावनुस्मरन् कथं प्रतिब्रूयात् एवं प्रत्युत्तरासामर्थ्यमभिधाय यत्तस्य परिपूर्णभक्तियोगेन परव
शत्वं महता प्रयत्नेन सामर्थ्यमाह ॥ स मुहूर्तमिति ॥ कृष्णांघ्रिसुधया साधु यथा तथा निर्वृतः भृशमत्यंतं तीव्रेण भक्तियोगेन निमग्नः परवा

भा॰द॰टी॰
॥८॥

श्री

पुलकेन रोमांचेनोद्भिन्नं व्याप्तं सर्वमंगं यस्य सः मीलद्दृशा निमीलद्दृष्ट्या शुचः आनंदाश्रूणि मुंचन् स्नेहप्रसरसंप्लुतः ॥ भगवति यः स्नेहः तस्य
प्रसरेण व्याप्तः संप्लुत आर्द्रचित्तः उद्धवस्तेन विदुरेण पूर्णार्थः कृतकृत्यलक्षितः ॥५॥ शनकैरिति ॥ भगवानेव लोकस्तस्मात् लोकं देहानुसंधा
नं शनकैः पुनरागतः नेत्रे विमृज्य संमृज्य उत्स्मयन् भगवल्लोकस्य लोकमध्यागतत्वात् क्लिश्यमाना प्राप्नुवन्नुद्धवः विदुरं प्रत्याह प्रत्यभाषत ॥६॥ कृष्णत्या
दि कृष्ण एव द्युमणिः सूर्यस्तस्मिन्निम्लोचेऽस्तमये सति अजगरेण कालरूपमहासर्पेण नोऽस्माकं गृहे षु गीर्णेषु सत्सु तेषु अप्रत्यभगेषु सत्सु कुशलं तस्य

पुलकोद्भिन्नसर्वांगो मुंचन्मीलद्दृशा शुचः पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसंप्लुतः ॥५॥ शनकैर्भगवल्लोकान्नृलो
कं पुनरागतः ॥ विमृज्य नेत्रे विदुरं प्रत्याहोद्धव उत्स्मयन् ॥६॥ उद्धव उवाच ॥ कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरे
ण ह ॥ किं नु नः कुशलं ब्रूयां गतश्रीषु गृहेष्वहं ॥७॥ दुर्भगो बत लोकोऽयं यदवो नितरामपि ॥ ये संवसंतो न विदुर्हरिं
मीना इवोडुपं ॥८॥ इंगितज्ञाः पुरुप्रौढा एकारामाश्च सात्वताः ॥ सात्वतामृषभं सर्वे भूतावासममंसत ॥९॥

शान्नो कुशलमहं किं ब्रूयां ॥७॥ गतश्रीत्वमेवाह दुर्भग इति बतेति खेदे अयं लोकः जनः दुर्भगः यदवस्तु सुतरामपि दुर्भगाः येयदवः संवसंतः
श्रीकृष्णेन सह संवसंतोपि हरिं भगवंतं न विदुः किंतु स्वसदृशं यादवाय मयमपीति विदुः तत्र दृष्टांतः मीना मत्स्या उडुपं प्लवमिव मीनाः उडुपमपि क्र
श्चिज्जलचर इति जानंति न तु तत्तारणहेतुरयमिति ॥ एवं यदवोप्ययं श्रीकृष्णः स्वाश्रितदुरितापहरन् संसारपारं नयतीति न जानंति किंतु कश्चिद्यादवो
वोबलवानेति ॥८॥ एतदेवाह ॥ इंगितज्ञाः परचित्तवृत्तिज्ञाः अत एव पुरुप्रौढाः बहुनिपुणाः एकारामाः एकस्थानवर्तिनश्च सात्वताः यादवाः
नय

वाः सर्वे सात्वतामृषभं यादवानां श्रेष्ठं श्रीकृष्णं भूता
वासं क्षेत्रज्ञमेवाममंसत ॥९॥
॥८॥

नकेवलंयादवाएवंभगवानस्माकंममसखेत्यमंसत किंत्वन्येपीत्याह देवस्यभगवतोमाययास्पृष्टामोहिता अतएवासदन्यच्छरीरंशब्दादिकंभोग्यत्वेनाश्रिताः
अन्येशिशुपालादयः तेसर्वेपिभगवंतंवासमंमंसते इतिपूर्वेणान्वयः तर्हिभवदादयोपिमायास्पर्शाविशेषात्तज्जानीयुरित्यत आह ॥ भ्राम्यतइति ॥ आ
त्मनिपरमात्मनिहरौउप्तात्मनांसमर्पितमनसामीदृशानांधीः तद्वाक्यैर्भगवन्मायामोहितानांजीवोयमित्यादिवाक्यैर्नभ्राम्यते ॥ ददामिबुद्धियो
गंतंयेनमामुपयांतितइतिभगवद्वचनेनानुगृहीतत्वादितिभावः ॥१०॥ भवत्वेवमजस्यवार्त्तासदेवकीर्त्तयेतस्यकिमुत्तरमित्यत आह ॥ प्रदर्श्येत्यादि
ना ॥ योभगवानतप्ततपसेअवितृप्तदृशःयेषांनृणांलोकलोचनंलोकैरवलोकनीयं कर्मणिल्युट् ॥ अतिसुंदरंस्वस्यबिंबंवपुःप्रद

देवस्यमाययास्पृष्टाः येचान्यदसदाश्रिताः ॥ भ्राम्यतेधीर्नतद्वाक्यैरात्मन्युप्तात्मनोहरौ ॥१०॥ प्रदर्श्यातप्ततपसाम
वितृप्तदृशांनृणां ॥ आदायांतरधाद्यस्तुस्वबिंबंलोकलोचनम् ॥११॥ यन्मर्त्यलीलौपयिकंस्वयोगमायाबलं
दर्शयतागृहीतम् ॥ विस्मापनंस्वस्यचसौभगर्द्धेःपरंपदंभूषणभूषणांगम् ॥१२॥ दर्शयित्वाआदायस्वबिंबंगृ
हीत्वांऽतरधात्अंतर्दधे आदायांतरधादित्यनेनस्वबिंबेनसहैवगमनमप्राकृतवदितिसूचितम् ॥११॥ लोकलोचनमित्यनेनसूचितमैं व
वपुषःसौंदर्यंवर्णयतित्रिभिः यदिति ॥ मर्त्यलीलौपयिकंयोग्यंस्वस्ययोगमायाआश्चर्यशक्तिः तस्याबलंदर्शयतालोकस्येतिशेषः
गृहीतमुपात्तंस्वस्यस्वस्यापिविस्मापनमाश्चर्यकरंसौभगर्द्धेःसौभाग्यसमृद्धेःपरंपदंपराकाष्ठाभूतं ॥ भूषणभूषणांगंभूषणानांकौस्तुभा
दीनांभूषयंत्यलंकुर्वंतीतिभूषणानिअंगानिउरःप्रभृतीनियस्मिंस्तदेवंभूतंयद्वपुःतदादायांतरधादितिपूर्वेणान्वयः ॥१२॥

भा.त्र.टी.

॥ ९ ॥

यद्दिति ॥ धर्मसूनोर्युधिष्ठिरस्यराजसूये यागेत्रिलोकः त्रिभुवनस्थोलोकः दृशांस्वस्त्ययनं परमानंदकरं यद्वपुर्निरीक्ष्य विधातुर्ब्रह्मणः
अर्वाक्सृतौ अर्वाचीनमनुष्यसृष्टौ यत्कौशलं नैपुण्यं तत्कार्त्स्न्येन साकल्येन इहवपुषि ॥ अद्य इदानीं गतं पर्यवसितमित्यमन्यत अनेन
विधातुः कौशलं कार्त्स्न्येनास्मिन्नेव वपुषि प्रकटितं नातः परं तस्य कौशलमस्तीत्येवममन्यतेत्यर्थः ॥ तद्वपुषो विधात्रा सृष्टत्वेपि लोकदृष्टि
रित्युक्ता ॥ १३ ॥ यस्येति ॥ यस्य भगवतः अनुरागेण प्लुतः हासो हसनं रासः ॥ क्रीडा लीलावलोकस्तैः साधनैः प्रतिलब्धः मानो बहुमा

यद्धर्मसूनोर्वतराजसूये निरीक्ष्यदृक्स्वस्त्ययनंत्रिलोकः ॥ कार्त्स्न्येन
चाद्येहगतंविधातुरर्वाक्सृतौकौशलमित्यमन्यत ॥ १३ ॥ यस्यानुराग
प्लुतहासरासलीलावलोकप्रतिलब्धमानाः ॥ व्रजस्त्रियोदृग्भिरनुप्र
वृत्तधियोवतस्थुः किलकृत्यशेषाः ॥ १४ ॥ ॥ ॥ ॥

नो याभिस्ता व्रजस्त्रियः दृग्भिः सहानुप्रवृत्तधियः अनुप्रवृत्ताः गच्छन्तमेवानुगताः धियो यासां ताः भगवद्गृहानुगमंतरवाह्येंद्रियवृत्त
यइत्यर्थः ॥ अतएव खिलकृत्यशेषाः खिलस्य कृत्स्नस्य शेषा यासां ताः कृत्याकृत्यविवेकशून्याः सत्योऽवतस्थुः किलकृत्य ॥ ९ ॥
शेषा इत्ययमपिपाठः ॥ १४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्वीरहत्तां भुवनसुंदरवपुः॥ किमर्थमंतर्धापितवानितीमामाशंकां परिहरन् वपुःपरिग्रहनिमित्तं वपुषः स्वरूपं चाह॥ प्रशांतरूपेष्विति॥ अ
नेनजीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि नामरूपयोर्निर्वहिता ते यदंतरा तद्ब्रह्म सत्यं चानृतं च सत्यमभवदित्यादिश्रुत्याद्युक्तरीत्या स
र्वाणि सत्त्वप्रचुराणि रजस्तमःप्रचुराणि च रूपाणि स्वस्यैव शरीराणि॥ तत्र प्रशांतरूपेषु सत्त्वोभरेषु इतरैः स्वरूपैर्घोररूपैरर्द्यमानेषु पीड्यमाने
षु सत्सु अनुकंपितः आत्मा चित्तं यस्य सः सत्त्वोभरेष्वनुकंपापरः परावरेशः सर्वाधिपतिः॥ भगवानजोपि कर्मायत्तोत्पत्तिशून्योपि महद
ंशयुक्तः महतांशेन बलरामरूपेण युक्तः अकर्मायत्तस्वेच्छोपात्ताप्राकृतदिव्यरूपविशिष्टोवतीर्ण इत्यर्थः॥ यथाग्निर्दार्वादिष्वाविर्भवन्

॥ प्रशांतरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकंपितात्मा॥ परावरेशो महदंशयुक्तो ह्यजोपि जातो भगवान् यथा
ग्निः॥१५॥ मां खेदयत्येतदजस्य जन्म विडंबनं यद्वसुदेवगेहे॥ व्रजे च वासोरिभयादिव स्वयं पुराद्व्यवात्सीद्यदनंत
वीर्यः॥१६॥

स्वस्वभावमजहन्नेवाविर्भवति तथायमपि भगवान् देवमनुष्यादियोनिष्वाविर्भवन्निरस्तनिखिलदोषानवधिकातिशया
संख्येयकल्याणगुणाकरत्वस्वभावमजहन्नेवावतीर्ण इति दृष्टांताभिप्राय॥१५॥ अजहत्सर्वज्ञत्वसंकल्पत्वज्ञानशक्त्यादिस्वभावस्य
वपुषः मर्त्यलीलानुकारेणैश्वर्याच्छादकोनकर्मायत्त इत्याह॥ मामिति द्वयेन॥ अजस्य भगवतः वसुदेवगेहे बंधनागारे यज्जन्म नो वि
डंबनमनुकरणं॥ न तु नृसिंहवदकस्मादाविर्भावः पश्चात्स्वयममितवीर्यः कंसभयादिव व्रजे च वासः कालयवनादिभयादि
व पुरान्मथुराया वासीत् प्रोषितवानिति च यदेतन्मां खेदयति मम चित्तं व्यामोहयति॥ एतत्सर्वमैश्वर्याच्छादकमेवेत्यर्थः॥१६

भा.द.टी.

॥१०॥

दुनोतीति ॥ पित्रोरेवं वक्ती वसुदेवयोः पादावभिवंद्य नमस्कृत्य हे तात पितः हे अंब मातः कंसादुर्वृधि कंपं शंकितानां भीतानां मत्कृतशुश्रूषाणं नो स्मा
कं तु वां अस्मी इतं प्रसादं कुरुतमिति ॥ यदाह ॥ एतत्स्मरतो मम चित्तं कर्म दुनोति खेदयति ॥ १७ ॥ एवं न हि नीश्वर एवार्थं किं न स्यादित्याशंक्याः परिहा
राय मर्त्यलीलामनुकुर्वन् पुनः पुनरैश्वर्यं पिप्रकाशितवानिति वदन् चिरतिशय वात्सल्यादिगुणवतस्तस्य विरहो अतिदुःसह इत्याह समग्र
भिः ॥ ध ॥ कर इति ॥ अमुष्य श्रीकृष्णस्य अंघ्रिसरोजरेणुं विजिघ्रन् को वा पुमान् विस्मर्तुमीशेन शक्नुयात् ॥ यः कृष्णः भ्रूरेव विटपलता विस्फुरं ख्वल

दुनोति चेतः स्मरतो ममैतद् यदाह पादावभिवंद्य पित्रोः ॥ नातांबकंसादुरुशंकितानां प्रसीदतं नोऽकृतनिष्कृतीनां ॥ १७ ॥
को वा अमुष्यांघ्रिसरोजरेणुं विस्मर्तुमीशेत पुमान्विजिघ्रन् ॥ यो विस्फुरद्भ्रूविटपेन भूमेर्भारं कृतांतेन तिरश्चकार ॥ १८
दृष्टा भवद्भिर्ननु राजसूये चैद्यस्य कृष्णं द्विषतोऽपि सिद्धिः ॥ यां योगिनः संस्पृहयंति सम्यग्योगेन कस्तद्विरहं सहेत ॥ १९ ॥
तथैव चान्ये नरलोकवीरा य आहवे कृष्णमुखारविंदं ॥ नेत्रैः पिबंतो नयनाभिरामं पार्थास्त्रपूताः पदमापुरस्य ॥ २०

स्यो भ्रूविटपः तेन भ्रूभंगानुवर्तिना कृतांतेन मृत्युना भूमेर्भारं तिरश्चकार अपहृतवान् ॥ भ्रूभंगेन भूभारापहरणे ऐश्वर्यप्रकाशकं ॥ १८ ॥ दृष्टेति
राजसूये कृष्णं द्विषतोपि चैद्यस्य शिशुपालस्य सिद्धिर्भगवत्प्राप्तिर्भवद्भिर्दृष्टा ननु कथंभूता सिद्धिः यां सिद्धिं योगिनः भक्तियोगनिष्ठाः सम्यग्यो
गेनैकांतभक्तियोगेन संस्पृहयंति वांछंति तस्य द्विषतोपि निरतिशयपुरुषार्थरूपमुक्तिप्रयच्छतो वात्सल्यनिधेः श्रीकृष्णस्य विरहे कः सहेत ॥
१९ ॥ न केवलं द्विषतां भजतां च परप्रापकः उदासीनानामपीत्याह ॥ तथैवेति ॥ आहवे युद्धे नयनाभिरामं नयनानंदकरं श्रीकृष्णस्य मुखकमलं नेत्रैः
पिबंतोऽनुभवंतः पार्थस्यार्जुनस्यास्त्रैः पूताः पवित्रीताः अन्ये
पि राजानः अस्य भगवतः परस्थानमापुः प्रापुः ॥ २० ॥

॥ १० ॥

एवंभूतलीलामनुकुर्वतो भूभारावतारणमुक्तिप्रदत्वादिकमैश्वर्यप्रकाशनमभिहितं पुनरैश्वर्यं प्रकाशयतो मर्त्यलीलानुकृतिमाह ॥ स्वयमिति द्वा
भ्यां ॥ असाम्यातिशयः समाभ्यधिकरहितः अतएव अधीशः प्रकृतिपुरुषकालानामीशः यद्वा त्रिलोकाधिपतिः सत्वादिगुणेशो वा ॥ अतः
स्वाराज्यलक्ष्म्या स्वराडित्यन्नायतः तस्य भावः स्वाराज्यं तेन तया लक्ष्म्या ऐश्वर्ययशआदिसंपत्तिस्तया आप्ताः कामा यस्य सः नित्यसंनिहितभोगपभोगो
पकरणभोगस्थानसमृद्ध इत्यर्थः बलिंभुजांहरद्भिः स्वीकुर्वद्भिः ॥ चिरलोकपालैश्चिरं लोकान्पालयद्भिः किरीटानां कोटिभिरीडितः सेवितः
पादपीठो यस्य सः ॥ २१ ॥ स्वयमेवंभूतोऽपि भगवान् अंग हे विदुर परमेष्ठिधिष्ण्ये सार्वभौमसिंहासने निषण्णमुपविष्टमुग्रसेनं प्रति स्वयं तिष्ठन्

स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः ॥ बलिं हरद्भिश्चिरलोकपालैः किरीटकोट्येडितपादपीठः ॥
२१ ॥ तत्तस्य कैंकर्यमलं भृतान्नो विग्लापयत्यंग यदुग्रसेनं ॥ तिष्ठन्निषण्णं परमेष्ठिधिष्ण्ये न्यबोधयद्देव निधारयेति
२२ ॥ अहो बकी यं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी ॥ लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम ॥ २३

हे देव निधारयावधारयेति यः अबोधयद्विज्ञापितवान् तद्विज्ञापनवचः तस्य भगवतः कैंकर्यं किंकरभावं उपाश्रितानामस्मान् ॥ अलंभृतानिर
तिपातेऽप्ययमेवार्थः अस्मान्विग्लापयति विस्मारयतीत्यर्थः ॥ २२ ॥ पुनरैश्वर्यं दयालुतां चाह ॥ अहो इत्याश्चर्ये इयं बकी पूतना स्तनकाल
कूटं स्तनयोः संभृतं कालकूटं विषं जिघांसया हंतुमिच्छया पाययत् एवमसाध्वी दुष्टापि धात्र्या योग्या उचितां तत्संबंधिनीं गतिं ले
भे प्राप्तवती एवमपराधवत्या अपि मुक्तिं यो दत्तवान् ततो भगवतोऽन्यं दयालुं कं पुरुषं शरणं भजेम व्रजेम ॥ २३ ॥ ॥ ॥ ॥ ॥

ननु नामन्स्यथाविधितेयनायेति भगवतः भक्तियोगप्राप्त्यश्रवणात्कथमुदासीनानां द्विषतां च मुक्तिं प्रायच्छदित्युत्प्रेक्षत इत्यत आह ॥ मन्य इति ॥ अधीशे
त्रिलोकेशे भगवति ये संरंभमार्गाभिनिविष्टचित्ताः संरंभः क्रोधावेशः तेन मार्गेण ॥ अभिनिविष्टं चित्तं येषां ते ये च संयुगे युद्धे प्राणांस्त्यक्तवंतस्ता
र्क्ष्यपुत्रस्य गरुत्मतोंऽसे भुजे आपतंतमधिष्ठितं सुनाभं चक्रमायुधं यस्य तं सुनाभायुधं चक्रायुधधरं भगवंतं समचक्षतापश्यन्तान्सर्वानसुरा
न्देवसंपत्त्या जातान्भागवतान्भगवद्भक्तानेव मन्ये ॥ तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेदिति वक्ष्यमाणरीत्या भक्तियोगेनैव तुल्यत्वादेव वै
रिविषहादयोऽपीति भावः ॥२४॥ अथावतारप्रभृति दिव्यचेष्टितानि संग्रहेण वर्णयति वसुदेवस्येत्यादिना ॥ भोजेंद्रः कंसस्तस्य बंधने कारागृहे वसु

मन्ये सुरान्भागवतांस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तान् ॥ ये संयुगेऽचक्षत तार्क्ष्यपुत्रमंसे सुनाभायुधमापतंतं
॥२४॥ वसुदेवस्य देवक्यां जातो भोजेंद्रबंधने ॥ चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः ॥२५॥ ततो नंद
व्रजमितः पित्रा कंसाद्विबिभ्यता ॥ एकादश समास्तत्र गूढार्चिः सबलोऽवसत् ॥२६॥ ॥ ॥ ॥

देवस्य तद्भार्यायां देवक्यां जातः प्रादुर्भूतः कथंभूतः भगवान्समग्रज्ञानशक्तिबलैश्वर्यादिसंपन्नः अजेन ब्रह्मणाभियाचितः प्रार्थि
तः ॥ अस्या भूमेः शं सुखं चिकीर्षुः कर्तुमिच्छुरेवंभूतोऽवतीर्ण इत्यर्थः ॥२५॥ कंसाद्बिभ्यता विते न पित्रा वसुदेवेन निमित्तभूतेन नंदव्रजं इतः गतः
एकादश समाः संवत्सरान् तत्र तत्र नंदव्रजे गूढार्चिरनभिव्यक्तैश्वर्यः सरामः अवसदुषितवान् ॥२६॥ किंकुर्वन्नवसदित्यत आह ॥११॥
पुक

किं कुर्वन् वत्सैरितस्ततः आह ॥ पशीत इति ॥ वत्सपैर्वत्सपालकैः सह वर्त्मनि रितं वारयन् कूजद्भिः प्रार्दं कुर्वद्भिर्द्विजैः ॥ संकुलिताः व्याप्ताः अंघ्रिपाः वृक्षाः य
स्मिन् तस्मिन् यमुनायाः उपवने स्वयं विभुः सर्वान्तर्यामी सन् ॥२७॥ कौमारीं वनवासिनां प्रेक्षणीयां चेष्टां दर्शयन् स्वयं सहसा स्त्रे वरुदन्निव मुग्धः
सुंदरो बालसिंहः तस्य अवलोकनं यस्य सः अहरहः क्रीडद् इति श्लोकद्वयमेकान्वयम् ॥२८॥ २९॥ प्रयुक्तानिति ॥ भोजराजेन कंसेन प्रयुक्तान् प्रे
षितान् मायिनः वंचकान् कामरूपिणः स्वेच्छावरूपवेषधारिणः तान् तान् असुरान् धेनुकारिष्टादीन् व्यनुदत् हतवान् बालः क्रीडनकानि वेत्सनापासेट्

पशीतो वत्सपैर्वत्सां श्चारयन् व्यहरद्विभुः ॥ यमुनोपवने कूजद्द्विजसंकुलितांघ्रिपे ॥२७॥ कौमारीं दर्शयंश्चेष्टां प्रेक्ष
णीयां व्रजौकसाम् ॥ रुदन्निव हसन्मुग्धबालसिंहावलोकनः ॥२८॥ स एव गोधनं लक्ष्म्या निकेतं सितगोवृषं ॥ चा
रयन्ननुगान् गोपान् रणद्वेणुररीरमत ॥२९॥ प्रयुक्तान् भोजराजेन मायिनः कामरूपिणः ॥ लीलया व्यनुदत्तां
स्तां बालः क्रीडनकानिव ॥३०॥ विपन्नान् विषपानेन निगृह्य भुजगाधिपं ॥ उत्थाप्यापाययद्गावस्तत्तोयं प्रकृति
स्थितं ॥३१॥ अयाज यज्ञोसवेन गोपराजं द्विजोत्तमैः ॥ वित्तस्य चोरुभारस्य चिकीर्षन्सद्व्ययं विभुः ॥३२॥

शांतः क्रीडनकान् क्रीडार्थं स्वकल्पितोपकरणानि वेत्यर्थः ॥३०॥ विपन्नानिति विषतोयेन कालीयहृदजलेन विपन्नान् आपन्नान् मूर्छितानित्यर्थः
दृष्ट्वेति शेषः भुजगाधिपं कालियं निगृह्य विपन्नान् उत्थाप्य प्रकृतिस्थितं तत्त्वविषं तत्तोयं कालीयहृदं जलं गाः अपाययत् स्नानमकारयत् ॥३१॥
अयाज यष्टवान् इति उरुभारस्य बहुभारस्य संभृतस्य वित्तस्य सद्व्ययं समीचीनोपयोगं चिकीर्षन् प्रभुः द्विजोत्तमैः सहितः गोसवेन गोसवाख्ययागेन

वर्षतीति॥ मन्नमाने विहन्तपूजेंद्रकोपाद्वर्षतिसतिहे भद्र विदुर अतिविह्वलः अत्यापन्नः व्रजः अनुग्रहकृता गोत्रं पर्वतएव लीलातपत्रं यस्य तेन भगवता
त्रातः रक्षितः॥३३॥ शरदि शशकाल्यैवः शशी चंद्रमास्तस्यकरैः किरणैः मृष्टं उज्ज्वलं रजनीमुखं प्रदोषं मानयन् कृतांतस्यापादयन्निस्वर्थः स्त्रीणां गोपीनां
मंडयन्निभूषयतीतिमंडलमंडनः॥ कलान्यव्यक्तमधुराणिपदानि अक्षराणि यस्मिन्कर्मणितन्तथागायन्नरेमे रमत्॥३४॥ इति तृतीये द्वितीयोध्यायः॥ २
एवं नंदव्रजे हे तावत्ते च श्रीकृष्णकृतानि चेष्टितानि संग्रहेण वर्णयत॥ अथ व्रजान्मथुरामेत्य भगवताकृतानि ततो द्वारकां चेत्य कृतानि च संग्रहेण वर्णयति
वर्षतीद्रे व्रजःकोपाद्भग्नमानेऽतिविह्वलः॥ गोत्रलीलातपत्रेण त्रातो भद्रानुगृह्णता॥३३॥ शरच्छशिकरैर्मृष्टं मानयन्
रजनीमुखम्॥ गायन्कलपदं रेमे स्त्रीणां मंडलमंडनः॥३४॥ इति श्रीभागवते महापुराणे विदुरोद्धवसंवादे तृतीये ल
लाणं द्वितीयोध्यायः॥ २॥ उद्धव उवाच॥ ततः स आगत्य पुरं स्वपित्रोश्चिकीर्षया शं बलदेवसंयुतः॥ निपात्य
तुंगाद्रिपुयूथनाथं हतं व्यकर्षद्व्यसुमोजसोर्व्याम्॥१॥ सांदीपनेः सकृत्प्रोक्तं ब्रह्माधीत्य सविस्तरम्॥ तस्मै प्रादाद्वरं
पुत्रं मृतं पंचजनोदरात्॥२॥
यस्मध्याय द्वयेन॥ तत्र मथुरायां कृतानि भगवच्चेष्टितान्याह॥ तत इति द्वाभ्याम्॥ स्वपित्रोर्देवकीवसुदेव
योः॥ शं सुखं चिकीर्षया कर्तुमिच्छया बलदेवेन संयुतः ततः व्रजात् पुरीं मधुपुरीमागम्य हतं स्वेनेति शेषः रिपुयूथनाथं कंसं व्यसुं गतप्राणं ओजसा
बलेन तुंगाद्राजमंचादुर्व्यां भूम्यां निपात्य व्यकर्षदेवानां विश्वासार्थमितिभावः॥१॥ सांदीपने रुपाध्यायात्सकृत्प्रोक्तं सविस्तरं सांगोपांगं वेदं ब्रह्म
वेदमधीत्य तस्मै सांदीपनये मृतं पुत्रं मृतपुत्रप्रदानरूपं वरं पंचजनोदरात् पंचजनो नाम कश्चिदसुरस्तस्योदरविदारणद्वारा यमपुरीं गत्वा ततः

॥१२॥

द्वारकां वेशितान्याह ॥ समाहुता इति यत्र लक्ष्म्याः सवर्णेन समानरूपेण युक्तयेति शेषः भीष्मककन्यया रुक्मिण्या निमित्तभूतया तदुद्वाहार्थमित्यर्थः ॥ र
ये शिशुपालाद्यः समाहुताः सम्यगाहूताः रुक्म्यादिभिरिति शेषः तेषां चेद्यादीनां मिषतां पश्यतां मूर्द्ध्नि पदं दधत् दधानः तानभिभूयेत्यर्थः गांध
र्ववृत्त्या परस्परसंकेतरूपया भवितुमुद्वोढुमिच्छया सुपर्णः शोभमानरथः स्वभागं रुक्मिणीम् ॥ राघवत्वे भवत्सीता रुक्मिणी कृष्णजन्मनि अ
न्येष्वप्यवतारेषु विष्णोरेषानपायिनी ॥ भास्करस्य प्रभा यथेत्सा घुक्करीत्या स्वांशभूतां नित्यानपायिनीं जह्रे हृतवान् ॥ ३ ॥ ककुद्मिन इति ॥ अविद्धन
सः भद्रनासिकान् ककुद्मिनः वृषभान् दमित्वा छिन्ननासिकान् कृत्वा नाग्निजितो राज्ञः कन्यां स्वयंवर उद्वाह उद्वहन् ॥ उद्यमानान् तेन ककु

समाहुता भीष्मककन्यया ये श्रियः सवर्णेन बुभूषयैषां ॥ गांधर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्द्ध्नि दधत्सुपर्णः ॥ ३ ॥ ककुद्मि
नोऽविद्धनसो दमित्वा स्वयंवरे नाग्निजितीमुवाह ॥ तद्भग्नमानानपि गृध्यतोऽज्ञान् जघ्नेऽक्षतः शास्त्रभृतः स्वशास्त्रैः
४ ॥ प्रियं प्रभुर्ग्राम्य इव प्रियाया विधित्सुरार्छद्द्युतरुं यदर्थे ॥ वज्र्याद्रवत्तं सगणो रुषांधः क्रीडामृगो नूनमयं वधूनाम् ॥ ५ ॥

च्छिन्नमेव भग्नः मानः बलिनो वयमिति मानो येषां तानपि गृध्यतः कामयमानान् नाग्नजितीमित्यर्थः अत एवाज्ञान् मूढान् शास्त्रभृतः शास्त्रधारिणो राज्ञः
स्वशास्त्रैः स्वस्यादिवैः सुदर्शनादिभिरायुधैः स्वयमक्षत अवर्जितः सन् जघ्ने हतवान् तान्विजित्य नाग्नजितीमुद्वहदित्यर्थः ॥ ४ ॥ प्रियमिति स्वयं प्र
भुः स्वतंत्र एव ग्राम्य इव स्त्रीपरतंत्रग्रामजन इव प्रियायाः सत्यभामायाः प्रियं विधित्सुः कर्तुमिच्छुः द्युतरुं पारिजातमार्छद्धृतवान् ॥ कथंभूतं यदर्थे यस्य
पारिजातस्यार्थः निमित्तं तद्विमोचनायेत्यर्थः वज्री इंद्रः सगणः मरुद्गणसहितः रुषा क्रोधेनांधः ॥ तं पारिजातापहर्तारं भगवंतं प्रमादवशात् अपि
रितो युद्धमभिमुखमायततयाभ्रतमित्यर्थः ॥ हंत तस्य श्रीकृष्णस्य प्रोषत्वमजानानं स्त्रीपरं तं वज्रिणं निंदति अयं वज्री वधूनां स्त्रीणां क्रीडामृग

भा.टी.

॥१३॥

क्रीडार्थं संपादितं म्रगद्रव ॥ भगवांस्तु पतिविश्वस्येति श्रुत्युक्तरीत्या विश्वशेषित्वात्तस्य स्वशेषभूतपारिजातापहरणं युक्तमेव तावतैतावता स्त्रीपारतं
त्र्यं द्वंद्वसत्वेनात्मन्यात्मबुद्धिर्या अस्वत्वमिति यामतिरित्युक्तरीत्या पारिजाते स्वत्वमभिमन्यतो ज्ञानमेवेति भावः ॥ ५ ॥ अन्यदपि हितं चेष्टितमा
ह ॥ सुतमिति ॥ स धेनुहेव पुषारवमं तरिहंतं प्रसंतं इव स्थितं सुनाभेन चक्रायुधेन मथितं भिन्नं नरकं दृष्ट्वा धरित्र्या मात्राभूम्या आमंत्रितः प्रार्थि
ततस्तत्तनयाय नरकस्य सुताय शेषं स्वपरिगृहीतावशिष्टं कोशराज्यादिकं दत्वा तस्यांतःपुरमाविवेश प्रविष्टवान् ॥ ६ ॥ तत्रेति तत्रांतःपुरे कुजे
न भूमिपुत्रेण नरकेण आहृता आनीतास्ताः प्रसिद्धाः नरदेवकन्या राजकुमार्यः आर्तबंधुं हरिं दृष्ट्वा सद्यः तदैवोत्थाय प्रहर्षस्य व्रीडाया अनुरागस्य

सुतं स्वधेरैव वपुषा ग्रसंतं दृष्ट्वा सुनाभोन्मथितं धरित्र्या ॥ आमंत्रितस्तत्तनयाय शेषं दत्वा तदंतःपुरमाविवेश ॥ ६ ॥
तत्राहृतास्ता नरदेवकन्याः कुजेन दृष्ट्वा हरिमार्तबंधुं ॥ उत्थाय सद्यो जगृहुः प्रहर्षव्रीडानुरागप्रहितावलोकैः ॥ ७ ॥
आसां मुहूर्त एकस्मिन्नानागारेषु योषिताम् ॥ सविधं जगृहे पाणीननुरूपः स्वमायया ॥ ८ ॥ तास्वपत्यान्यजनयदात्म
तुल्यानि सर्वशः ॥ एकैकस्यां दश दश प्रकृतेर्विबुभूषया ॥ ९ ॥ ते प्रहिताः प्रेरिताः योऽवलोकास्तैर्जगृहुः स्वीकृतव
तः ॥ ७ ॥ आसां स्वीकृतवतीनां योषितां स्त्रीणां नानागारेषु प्रतियोषिद्भिन्नेषु गृहेषु एकस्मिन्नेव मुहूर्ते स्वमायया यया स्वीयसंकल्पेन
स्वयमपि बहुरूपः सविधं विजगृहे गृहीतवान् ॥ ८ ॥ तासु गृहीतपाणिषु स्त्रीषु एकैकस्यां भार्यायां सर्वशः सर्वप्रकारेणात्मनातुल्या
न्यपत्यानि दश दश अजनयदुत्पादयामास ॥ किं कर्तुमिच्छया प्रकृतेर्विबुभूषया विभवितुमिच्छया पृथ्वीच्छयेत्यर्थः ॥ मत्रियाम्यायां
प्रकृतेः सृष्टिरीदृशीति प्रकाशयितुमिच्छयेति यावत् ॥ ९ ॥ ॥ ॥ ॥ ॥१३॥

कालेत्यादि ॥ कालः कालयवनः मागधो जरासंधः कालप्रभृतीनामनीकैः सैन्यैः पुरीं रुंधतः आवृण्वतः स्वयमजीघनत् घातितवान् ॥ स्वपुंसां भीमार्जु
नादीनां दिव्यं स्वीयं तेजः ॥ आदिशदभवान् ॥ भीमादिद्वारा स्वयमेव तेषां सामर्थ्यप्रदानेन हंतेत्यर्थः ॥१०॥ एतदेवाह ॥ शंबरद्विविदबल्वलमुरान्स्वा
नपि कांश्चिद्रामप्रद्युम्नादिभिर्घातयत् ॥ अन्यभाव आर्षः घातितवान् घातयति त्रिवापावः दंतवक्त्रादीन् स्वयमेवाबधीत् ॥ ११ ॥ अथेति तेन
बंधुना ते पंडुधृतराष्ट्रयोर्ये पुत्रा युधिष्ठिरादयो दुर्योधनादयश्च तेषां पक्षयोः पतितानाप्ताञ्छत्रपानघातयदित्यनुषज्यते ॥ कथंभूतान्नृपा
न्येषां कुरुक्षेत्रं प्रत्यायततां नृपाणां बलैः सैन्यैर्भूः सर्वापि भूमिश्च चालचलितवती ॥१२॥ एवं स्वयं निहत्य घातयित्वा च स्वकुलं संजि

कालमागधशाल्वादीननीकैः रुंधतः पुरीम् ॥ अजीघनत्स्वयं दिव्यं स्वपुंसां तेज आदिशत् ॥१०॥ शंबरं द्विविदं बाणं
मुरं बल्वलमेव च ॥ अन्यांश्च दंतवक्त्रादीनवधीत्कांश्च घातयत् ॥११॥ अथ तेऽभ्रातृपुत्राणां पक्षयोः पतितान्नृपान्
चचाल भूः कुरुक्षेत्रं येषामापततां बलैः ॥१२॥ सकर्णदुःशासनसौबलानां कुमंत्रपाकेन हतश्रियायुषं ॥ सुयोधनं सा
नुचरं शयानं भग्नोरुमुर्व्यां न ननंद पश्यन् ॥ १३ ॥

पुत्सलज्ञान पुत्रतनपक्षपातिनां च वधेन नु भुवो भारः क्षपित
इति ॥ स भगवान्कर्णादीनां कुत्सितमंत्रपाकेन स्वानिष्टावहालोचनेन फलेन हता श्रीसंपद्यायुश्च यस्य तं भग्नावु
रू यस्य तं भग्नोरुमुर्व्यां भूम्यां शयानं सानुचरं दुर्योधनं पश्यन्नपि न ननंद संतोषं न प्राप ॥ १३ ॥ छ ॥ छ ॥
॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

भा॰ तृ॰ टी॰

॥२४॥

अनंतो यहेतुर्वदंस्तत्प्रकारमेवाह ॥ कियानिति ॥ मदंशैर्मद्विभूतिभूतैर्द्रोणभीष्मार्जुनभीमाः मूलमादिर्येषां तैः मदंशैर्भीमार्जुनादिभिरष्टादशा
क्षौहिणीसंख्यायुक्तः ॥ क्षपितः निरस्तः सचासावुरुर्भारश्च क्षपितोरुभारो यं कियानल्पः इत्यर्थः ॥ भीष्मादिद्वारा मया भूभारो निःशेषो नावता
रितः कुतः यद्यस्मात् दुर्विषहं सोढुमशक्यं यदूनां बलमास्ते तिष्ठति ॥१४॥ एवमनभिनंद्य स्वकुलसंहृतौ उपायं संचिंतितवानित्याह ॥ मिथइति
माध्वाः सुरायाः मदस्तेनाताम्राणि विलोचनानि येषां तेषां ॥ एषां यदूनां यथा विप्रशाप परिजिहीर्षया प्रभासतीर्थगमनानंतरं विवादो भविता इ

कियान्भुवोयं क्षपितोरुभारो यद्द्रोणभीष्मार्जुनभीममूलैः ॥ अष्टादशाक्षौहिणिको मदंशैरास्ते बलं दुर्विषहं यदू
नां ॥१४॥ मिथो यदैषां भविता विवादो मध्वामदाताम्रविलोचनानां नैषां वधोपाय इयानितोन्यो मय्युद्यते
ऽतर्दधते स्वयंस्म ॥१५॥ एवं संचिंत्य भगवान्स्वराज्ये स्थाप्य धर्मजम् ॥ नंदयामास सुहृदः साधूनां वर्त्म दर्शय
न् ॥१६॥ उत्तरायां धृतः पूरोर्वंशः साध्वभिमन्युना ॥ स वै द्रौण्यस्त्रसंभिन्नः पुनर्भगवता धृतः ॥१७॥

यानेवमेषां वधोपायः नान्योस्तिकोसावित्यत आह ॥ मयीति सर्वांतरात्मनि सर्वसंहर्तरि मयि उद्युक्ते मल्लोकं गंतुमुद्युक्ते सति स्वयमेवैते विवा
देनांतर्दधते ऽतर्धीयन्ते लयं प्राप्स्यंतीत्यर्थः ॥१५॥ एवमिति ॥ एवमुक्तरीत्या संचिंत्य भगवान्स्वराज्ये स्वस्य धर्मराजस्य राज्ये तस्मिन्धर्मजं युधिष्ठिरं स्था
पयित्वा साधूनां वर्त्म वर्णाश्रममर्यादां दर्शयन्स्वानुष्ठानेन लोकमनुष्ठापयन्सुहृदः ॥ मित्राणि नंदयामास ॥१६॥ उत्तरायामिति
अभिमन्युना स्वभार्यायां उत्तरायां पूरोर्वंशः धृतः पूरोर्वंशस्य वंशवर्द्धकः परीक्षिदुत्पादितः सर्वैः परीक्षिदुत्तरागर्भस्थः ॥ द्रौणेरश्वत्थाम्नोऽस्त्रेण शि

रोस्त्रेण संभिन्नः पुनर्भगवता श्रीकृष्णेन धृतः रक्षितः ॥१७॥

॥२४॥

अयाजयदिति सोपि धर्मसुतोपि कृष्णमनुव्रतः सेवमानः अनुजैः सह क्ष्मां पृथिवीं तन् रेमे ॥१८॥ भगवानिति ॥ विश्वात्मा विश्वस्यांतः प्रविश्य
धारकः भगवान् श्रीकृष्णोपि लोकवेदपथानुगः श्रौतस्मार्त्तधर्मानुवर्त्तमानः द्वारवत्यां पुर्यां कामान् सिषेवे कथंभूतः सांख्यं संख्या बुद्धिस्तया गम्य
मानं स्वं मुमुक्षुरूपात्मस्वात्मानमास्थितः स्वानंदमेवानुभवन्नित्यर्थः ॥ अतएवासक्तः ॥ अत्र कामं तदिति कामाः कल्याणगुणाः तान् सिषेवे ॥ स्व
कीयकल्याणगुणानां शीलनपरो बभूवेत्यर्थः ॥ ननु शब्दादिविषयानुभवो विवक्षितः यद्वा कामाननुभवन्निवावतस्थावित्यर्थः ॥१९॥ नरे

अयाजयद्धर्मसुतमश्वमेधैस्त्रिभिर्विभुः ॥ सोपि क्ष्मामनुजै रक्षन् रेमे कृष्णमनुव्रत ॥१८॥ भगवानपि विश्वात्मा
लोकवेदपथानुगः ॥ कामान् सिषेवे द्वार्वत्याममसक्तः सांख्यमास्थितः ॥१९॥ स्निग्धस्मितावलोकेन वाचापीयूष
कल्पया ॥ चरित्रेणानवद्येन श्रीनिकेतेन चात्मना ॥२०॥ इमं लोकममुं चैव रमयन्सुतरां यदून् ॥ रेमे क्षणदया दत्त
क्षणस्त्रीक्षणसौहृदः ॥२१॥ तस्यैवं रममाणस्य संवत्सरगणान्बहून् गृहमेधेषु योगेषु विरागः समजायत ॥२२॥ रा० २२

वपूंषि चयति ॥ स्निग्धेत्यादिना ॥ स्निग्धः कृपायुक्तो यस्मिन् स्मितावलोकः मंदहासयुक्तावलोकः तेन पीयूषममृतं तत्तुल्यया वाचा अनवद्येन
निर्दुष्टेन चारित्रेण श्रियो लक्ष्म्या निकेतेन आश्रयेणात्मना शरीरेण च ॥२०॥ इमं लोकममुं च उपरिलोकान् रमयन् तस्मिन् लोके यदूंश्च सु
तरां रमयन् क्षणदया रात्र्या दत्तं क्षणमात्रं स्त्रीणामीक्षासु सर्पसौहृदं येन सः दत्तक्षणसौहृदः रेमे ॥२१॥ तस्येति ॥ इत्थमनासक्तस्यापि बहून् संवत्स
रगणान् रममाणस्य तस्य भगवतः गृहमेधेषु गृहाश्रमप्रयुक्तेषु उपसंजिहीर्षया रागः उपसंजिहीर्षया अनादरः समजायत सम्यक् जा

भा.द.टी.

॥१५॥

एतदेवकैमुत्यन्यायेनाह ॥ दैवाधीनेष्विति ॥ योगेश्वरं योगफलप्रदं भगवंतंभक्तियोगेनानुव्रतः ॥ सेवमानः स्वयंदैवाधीनः दैवायत्तः कःपुमान्
दैवायत्तेषुकामेषुविस्रंभमेतविश्वसेत्तनकोपीत्यर्थः ॥ किमुतभगवान्नविश्वसितीत्यभिप्रायः ॥२३॥ अथस्वकुलंजिहीर्षतोभगवतोभिप्रायानु
सारेणविप्रशापप्रवृत्तिंयदुकुलसंहृतिंचसंग्रहेणाह ॥ पुर्यामिति ॥ पुर्यांद्वारकायांकदाचिद्भगवत्स्वकुलसंजिहीर्षोत्तरकालेक्रीडद्भिःरम
माणैर्यदुभोजकुमारकैःकोपिताकोपंप्रापिताःमुनयःभगवन्मतकोविदाभगवदभिप्रायाभिज्ञाःशेपुःशेपंददन्तवंतः ॥२४॥ ततःशापानं

दैवाधीनेषुकामेषुदैवाधीनःस्वयंपुमान् ॥ कोविस्रंभमेतविश्वसेसयोगेश्वरमनुव्रतः ॥२३॥ पुर्यांकदाचित्क्रीडद्भिर्यदुभोजं
कुमारकैः ॥ कोपितामुनयःशेपुर्भगवन्मतकोविदाः ॥२४॥ ततःकतिपयैर्मासैर्वृष्णिभोजांधकादयः ॥ ययुःप्रभासं
संहृष्टारथैर्देवविमोहिता ॥२५॥ तत्रस्नात्वापितृन्देवानृषींश्चैवतदंभसा तर्पयित्वाथविप्रेभ्योगावोवहुगुणाददुः
॥२६॥ हिरण्यंरजतंशय्यावासांस्यजिनकंबलान् ॥ हयान्रथानिभान्कन्याधरांवृत्तिकरीमपि ॥२७॥ अन्नंचोरुरसं
तेभ्योदत्वाभगवदर्पणम् ॥ गोविप्रार्थासवःशूराःप्रणेमुर्भुविमूर्द्धभिः ॥२८॥
ततःकतिपयैर्मासैःनानाविधारिष्टद
र्शनानंतरंतस्माद्दयोदेवविमोहिताः अतएवसंहृष्टाःसंतोरथैःसहप्रभासंययुः ॥२५॥ तत्रप्रभासेस्नात्वातदंभसाप्रभासांभसापित्रा
दीन्तर्पयित्वावहुगुणाःपयःशीलादिवहुगुणोपेताःगावःविप्रेभ्योददुः ॥२६॥ हिरण्यादीन्वृत्तिकरींधरांभूमिंचददुरितिपूर्वेणान्वयः ॥य
द्वादत्वेत्युत्तरेणान्वयः ॥२७॥ चाद्गुरसंमृष्टरसमन्नंतेभ्योविप्रेभ्योभगवदर्पणंयथाभवतितथादत्वाभगवद्प्रीणनकरमन्नंदत्वेतिवागावि।

[illegible] ॥२८॥ [illegible]

॥१५॥

इति तृतीयेन्नीयः ३॥ अथ यस्मात् स्नानदानाद्यनंतरं नेयदृवः तदनुज्ञाताः विप्रैरनुज्ञाताः भुक्त्वा वारुणीं यैरीं मदिरां पीत्वा तया वारुण्यैव नितरां भ्रंशितज्ञा
नाः विभ्रष्टस्वपरविज्ञानाः संतो दुरुक्तैः मर्मस्थानानि निस्पृशुः ॥ १ ॥ ततः मैरेयस्य मद्यस्य दोषेण मदेन विषमीकृतानि विभ्रंशितानि चेतांसि
येषां तेषां यदूनां रवौ अस्तं यै निम्लोचति अस्तं गच्छति वेणूनामिव मर्दनं परस्पर संघर्षणमासीत् ॥ २ ॥ भगवान् आत्मनो मायायाः आक्रान्तसंकल्पस्य
गतिं फलरूपां स्वकुलसंहृतिमवलोक्य सरस्वतीमुपस्पृश्य सरस्वत्यां स्नात्वा वृक्षमूलमभ्युत्य वृक्षमूलं प्राविशत् ॥ ३ ॥ अहमिति ॥ प्रपन्ना

इति श्रीभगवते महापुराणे त्रीलावर्णनं नाम तृतीयोध्यायः ३॥ अथ ये तेन तदनुज्ञाता भुक्त्वा पीत्वा च वारुणीम् ॥ तया विभ्रं
शितज्ञाना दुरुक्तैर्मर्म पस्पृशुः ॥ १ ॥ तेषां मैरेयदोषाणां विषमीकृतचेतसां ॥ निम्लोचति रवावासीद्वेणूनामिव
मर्दनं ॥ २ ॥ भगवान्स्वात्ममायाया गतिं तामवलोक्य सः ॥ सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत् ॥ ३ ॥ अहं र
वो ज्ञो भगवता प्रपन्नार्तिहरेण ह ॥ बदरीं त्वं प्रयाहीति स्वकुलं संजिहीर्षुणा ॥ ४ ॥ अथापि तदभिप्रेतं जानन्न
हमरिंदम ॥ पृष्ठतोऽन्वगमं भर्तुः पादविश्लेषणाक्षमः ॥ ५ ॥ अद्राक्षमेकमासीनं विचिन्वन्दयितं पतिं ॥ श्री
निकेतं सरस्वत्यां कृतकेतनमकेतनम् ॥ ६ ॥ र्तिहरेण स्वकुलं जिहीर्षुणा भगवता त्वं बदरिकाश्रमं प्रति प्रयाहि गच्छेत्युक्तो हे ॥ ४ ॥
तथाप्येवमुक्तोऽहं तदभिप्रेतं स्वकुलसंहारादिकं जानन् हे अरिंदम विदुर भर्तुर्भगवतो ॥ पादविश्लेषणेऽक्षमः तमेव पृष्ठतोऽन्वग
न्ववर्तत ॥ ५ ॥ एवमनुगच्छन्नहं तमेव विचिन्वन् मनसा चिंतयन्नद्राक्षं चक्षुषा दृष्टवानस्मि ॥ कथंभूतमेकमसहायं दयितं निरतिश

यप्रियतमंपतिंनिरुपाधिकश्रेयोधिर्णंश्रीनिकेतंश्रीनिवासंसरस्वत्यांसरस्वतीतीरेकृतकेतंकृतनिवासस्थानंअनिकेतमनाश्रयंतस्यैवसर्वाश्रयत्वा
त्तदनिभावः ॥ ६ ॥ श्यामावदातंनीलस्वेनवर्णेविरजंनिर्मलंप्रसन्नेऽरुणेलोचनेयस्यतंचतुर्भिर्दोर्भिर्भुजैःपीतकौशांबरेणचकौशेयपीतकौ
शेयांबरेणचविदितंलक्षितंइति ॥ ७ ॥ दक्षिणपादसरोरुहंवामेऊरावधिश्रित्यउपरिस्थापयित्वाउपाश्रितःपृष्ठतोवष्टब्धःअर्भकोबालः
कोमलोऽश्वत्थोयेनतं ॥ त्यक्तपिप्पलंत्यक्तकर्मफलं ॥ अतएवाकृतंकर्माभकार्श्यस्योत्याधिव्याध्यादिरहितं ॥ ८ ॥ तस्मिन्निति ॥ तस्मिन्नि

श्यामावदातंविरजंप्रशान्तारुणलोचनं दोर्भिश्चतुर्भिर्विदितंपीतकौशांबरेणच ॥ ७ ॥ वामऊरावधिश्रित्यदक्षिणां
घ्रिसरोरुहम् ॥ अपाश्रितार्भकाश्वत्थमकृशंत्यक्तपिप्पलं ॥ ८ ॥ तस्मिन्महाभागवतोद्वैपायनसुहृत्सखः लोका
ननुचरन्सिद्ध आससादयदृच्छया ॥ ९ ॥ तस्यानुरक्तस्यमुनेर्मुकुंदःप्रमोदभावानतकंधरस्य ॥ संशृण्वतो
मामनुरागहाससमीक्षयाविश्रमयन्नुवाच ॥ १० ॥

तितत्रभगवत्सन्निधौद्वैपायनोव्यासःतस्यसुहृन्मित्रंसखाचसोह्या
ईसमहाध्येत्वंचोभयमपिविवक्षितं ॥ भागवताग्रगण्यः अतएवसिद्धःकृतकृत्यःमैत्रेय ॥ लोकाननुचरन्यदृच्छयाआससादाग
तोमदादिसमर्थः ॥ ९ ॥ तस्येति प्रमोदेनभगवद्दर्शनजनितसंतोषेणभावेनभक्त्याआनताकंधरायस्यानुरक्तस्यभगवत्यनुरागयुक्तस्यतस्यमु
नेर्मैत्रेयस्यशृण्वतःसतमुकुंदोभगवाननुरागहाससमीक्षयानुरागहासावितवलोकनेनविश्रमयन्श्रमहानिंजनयन्मांप्रत्युवा

भगवद्बुद्धिमेवाह॥ इत्येन॥ वेदेति॥ हे वसो उद्धव पूर्वजन्माभिप्रायेणेदं संबोधनं॥ विश्वसृजां प्रजापतीनां वसूनां च सत्रे पुरा पूर्वजन्मनि मत्सिद्धिका-
मेन मत्प्राप्तिकामेन त्वयाऽहं इष्टः सम्यगाराधितः अंतर्मनसीति तवांतर्मनसि अंतःकरणे ईप्सितं यत्तद्ददामि अन्यैरनाराधितमच्चरणैर्दुरवापं दुःखेना-
प्यवाप्तुमशक्यं तद्ददामि दास्यामि॥११॥ स इति हे साधो उद्धव भवानां जन्मनां स एष भवः॥ चरमः॥ अंतिमः कुतः यद्यस्मात्ते त्वया मदनुग्रहः आ-
सादितः॥ लब्धः॥ यस्माच्च पुनः नृलोकान्मर्त्यलोकान्रहः एकांते उत्सृजंतं मर्त्यलोकाद्वैकुंठं गच्छंतं मां विशदानुवृत्त्या एकांतभक्त्या ददृश्वान्द-

श्रीभगवानुवाच॥ वेदाहमंतर्मनसीप्सितं ते ददामि यत्तद्दुरवापमन्यैः॥ सत्रे पुरा विश्वसृजां वसूनां मत्सिद्धिकामेन वसो
त्वयेष्टः॥११॥ स एष साधो चरमो भवानामासादितस्ते मदनुग्रहो यत्॥ यन्मां नृलोकान्रह उत्सृजंतं दिष्ट्या ददृश्वान्विशदानुवृ-
त्त्या॥१२॥ पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे॥ ज्ञानं परं मन्महिमावभासं यत्सूरयो भागवतं वदंति॥१३॥
उद्धव उवाच॥ इत्यादृतोक्तः परमस्य पुंसः प्रतीक्षणानुग्रहभाजनोऽहं॥ स्नेहोत्थरोमा स्खलिताक्षरस्तं मुंचन्शुचः प्रांजलिराब-
भाषे॥१४॥

ष्टवानसि एतद्दिष्ट्या जातमित्यर्थः॥१२॥ किं ददामीत्यपेक्षायां निर्दिशति॥ पुरेति॥ आदिसर्गे सृष्ट्युपक्रमे नाभ्ये नाभिभवे पाद्मे पद्मे नि-
षण्णाय उपविष्टायाजाय ब्रह्मणे पुरा पूर्वं मया प्रोक्तं॥ मम महिमा अवभास्यते प्रकाश्यतेऽनेनेति मन्महिमावभासं यद्देव सूरयो भागवतमिति व-
दंति तत्परमं ज्ञानं ददामीत्यनुषंगः॥१३॥ एवं भगवतोक्ते मयैवमुक्तमित्याह॥ इतीति॥ इतीत्थमादृतोक्तः आदृतं यथासावुक्तः परमस्य पुंसः परमपुरु-
षस्य प्रतीक्षणं कृपावलोकः॥ अनुग्रहस्तयोर्भाजनः पात्रभूतः स्नेहोत्थरोमा स्नेहेनोर्ध्वानि पुलकितानि रोमाणि यस्य सः स्खलिताक्षरः

भा.त.टी. किमाभाषितवानसीमत आह ॥ क इति ॥ हे ईशाने तव पादसरोजभाजां पादकमलं भजमानानां इह पुरुषाणां चतुर्ष्वर्थेषु धर्मार्थकाममोक्षेषु
॥९७॥ को नु दुर्लभः न कोपि दुर्लभ इत्यर्थः ॥ तथापि पुरुषार्थचतुष्टयस्य सुलभत्वेपि हे भूमन् विभो नाहं प्रवृणोमि पुरुषार्थचतुष्टयमिति
शेषः कथंभूतोहं भवत्पदांभोजयोर्निषेवणे औत्सुक्यं यस्य सः ॥१५॥ तेषां ज्ञानी नित्ययुक्तविधज्ञानमहं नित्ययोगविरोधिनं धर्मादि
कं न वृणोमि किंतु घटितघटनासामर्थ्यरूपां भवदीयां प्राप्तिं स्मरतां चित्तं पारवश्यं प्रयातीत्यनुभवमित्याह ॥ कर्माणीति ॥ अनीहस्य र

को न्वीशते पादसरोजभाजां सुदुर्लभोर्थेषु चतुर्ष्वपीह ॥ तथापि नाहं प्रवृणोमि भूमन्
भवत्पदांभोजनिषेवणोत्सुकः ॥१५॥ कर्माण्यनीहस्य भवोभवस्य ते दुर्गाश्रयोऽथा
रिभयात्पलायनम् ॥ कालात्मनो यत्प्रमदायुताश्रयः स्वात्मन्रतेः खिद्यति धीर्विदामिह

निर्व्यापारस्य तव कर्माणि भवस्य जन्मरहितस्य भवः ॥ जन्मकालात्मनः कालशरीरस्य दुर्गाश्रयश्चारिभयात्कालयवनभ
यात्पलायनं स्वात्मनि रतेः प्रमदायुताश्रयः वह्वीभिः प्रमदाभिर्युक्तः य आश्रय इति च यदिहास्मिन् विषये विदां विदुषां
ममपी धीः खिद्यति पारवश्यं प्रयाति ॥१६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥९७॥

किं च मंत्रेषु ब्रह्मस्तु तेषु सत्सु मामुपहूयवै आहूयवै अहो पृच्छेः पृष्टवानसि कथंभूतस्त्वमकुंठिताखंडसदात्मबोधः ॥ अकुंठितः ॥ आवरणर
हितः अखंडः अपरिछिन्नः सन्मात्ररूपः आत्मनः स्वस्य बोधः यस्य सः अनावृतोऽपरिछिन्नात्मज्ञान इत्यर्थः ॥ अतएवाप्रमत्तः स्वयमे
वंभूतोपि मुग्धइव मूढइव यत्त्वं पृष्टवानसि तन्मे मनो मोहयतीव मोहं प्रापयतीव वर्त्तत इव शब्देन परमार्थत एवमत्सर्वंउपपन्नमेवेति
सूचयते ॥ नयाहि अकर्मायुत क्रियस्य लीलया कर्माणि ॥ अकर्मायतभवस्य स्वेछोपात्तप्राकृतदिव्यमंगलास्पदविग्रहपरिग्रहरूपो
भवजन्म उपपद्यते ॥ दुर्गाग्रयाहि कर्मलीलयोपपद्यते यो वै वालकेएनेषां पुरुषाणां कर्त्ता यस्य चैतत्कर्म ॥ अजायमानो बहुधा विजा
मंत्रेषु मां वा उपहूय यत्त्वमकुंठिताखंडसदात्मबोधः ॥ पृच्छेः प्रभो मुग्ध इवाप्रमत्तस्तन्नो मनो मोहयतीव देव ॥ १७
ज्ञानं परं स्वात्मरहःप्रकाशं प्रोवाच कस्मै भगवान्समग्रं ॥ अपि क्षमं नो ग्रहणाय भर्त्तर्वदांजसा यद्वृजिनं तरेम ॥ १८ ॥
इत्यावेदितहार्दाय मह्यं स भगवान्परः ॥ आदिदेशारविंदाक्ष आत्मनः परमां स्थितिं ॥ १९ ॥ यतेलोकवत्तु लीलाके
वन्यमित्याह विभ्रः ॥ १७ ॥ एवमुक्त्वाहार्दमपि निवेदितवानस्मीत्याह ॥ ज्ञानमिति ॥ स्वात्मनस्तव रहः यायात्म्यं तस्य प्रकाशं परंज्ञानमेषु प्रधा
न भूतं समग्रं नागोपेतं यज्ज्ञानं भगवान्पूर्णषाड्गुण्यो भवान्कस्मै कायत्र ह्मणे सर्वनामत्वमार्षं प्रोवाचोचिवान् ॥ तज्ज्ञानं हे भर्त्तः स्वामिन्नोऽस्मा
कं ग्रहणाय ग्रहीतुं क्षममपि चेद्वद ॥ यद्यस्माज्ज्ञानाद्वृजिनं दुःखात्मकसंसारमंजसा सुखेन नतरेमातिवर्त्तेम ॥ १८ ॥ एवं स्वाभिप्रायेनिवेदि
ते मह्यं स भगवानंतत्वमुपदिदेशेत्याह इतीत्यमावेदितं निवेदितं हार्दमभिप्रायं येन तस्मै मह्यं स भगवानरविंदाक्षः आत्मनः परमांप
रेतात्व्योमानयस्मात्सापरमांज्ञातव्यां नररहितां स्थितिं यायात्म्यावगतिमादिदेशोपदिदेश ॥ १९ ॥

उपसंहरतिसइति॥आराधितपादतीर्थात्तीर्थशब्दःपावनवाची॥आराधितपवित्रपादादित्यर्थः॥यद्वापादेतीर्थंयस्यसः आराधितश्चासोपा
दतीर्थश्चतस्माद्भगवतः एवमधीततत्वात्मविवोधमार्गः तत्वात्मकपरमात्मावगतिरूपोवोधःसम्यगप्यतेपरिशील्यतेऽनेनेतितत्वात्मविवोधमार्गः
आत्मयाथात्म्यविगतिप्रकाशकंशास्त्रं॥अधीतःतत्वात्मविवोधमार्गःयेनसोहंपादौभगवतश्चरणौप्रणम्यदेवंश्रीकृष्णंपरिवृत्यप्रदक्षि
णीकृत्यतद्विरहेणभगवद्विश्लेषणेआतुरःखिन्नःआत्माचित्तंयस्यसःएवंभूतः॥सन्निहागतोस्मि॥२०॥इहागतस्त्वंक्वगमिष्यसी

सएवमाराधितपादतीर्थादधीततत्वात्मविवोधमार्गः॥प्रणम्यपादौपरिवृत्यदेवमिहागतोहंवि
रहातुरात्मा॥२०॥सोहंतद्दर्शनाह्लादवियोगार्त्तियुतःप्रभो॥गमिष्येदयितंतस्यवदर्या
श्रममंडलम्॥२१॥यत्रनारायणोदेवोनरश्चभगवानृषिः॥मृदुतीव्रंतपोदी
र्घंतेपातेलोकभावनो॥२२॥

त्यत आह॥सइति॥सोहंवदरींत्वंप्रयाहीत्याज्ञप्तोहंतस्य॥भगवतःदर्शनयोममाह्लादः
वियोगेनार्तिश्चताभ्यांयुतःसन्प्रभोर्भगवतःतस्यदयितप्रियंवदर्याश्रममंडलंप्रतिगमिष्ये॥२१॥आश्रमंप्रस्तौति॥यत्रे
ति॥यत्रवदर्याश्रममंडलेनरऋषिःसर्वज्ञोनारायणोनरश्चमृदुलोकानांक्षेमस्वस्त्यादिकरंतावद्दुश्चरंदीर्घमाकल्पातत
पस्तेपतेतिचक्राते कथंभूतौतेपातेलोकभावनौलोकानुग्राहकौ॥लोकानुग्रहार्थंतस्यतपश्चरेणमितिभावः॥२२॥

एवमुद्धवादुपश्रुतवृत्तांतस्य सुहृदुरवस्थितिप्रकारमाह श्रुकः श्लोकद्वयेन ॥ इतीति ॥ क्षत्ता विदुरः बुधः विद्वानित्युक्तप्रकारेण उद्धवादुद्धवमुखा
ज्ञातीनां दुःसहं सोढुमशक्यमसंतद्दुःखजनकमित्यर्थः वधं नाशमुपाकर्ण्य श्रुत्वोत्पतितमुत्पन्नं प्रोक्तं ज्ञानेन स्वात्मपरमात्मयाथात्म्यज्ञा
नेनाशमयत् ॥ २३ ॥ सइति ॥ स्वकीयो वृषभः विदुरः व्रजंतं व्रजिष्यंतं वदर्याश्रमं प्रतीतिशेषः महाभागवतश्रेष्ठमुद्धवं विश्रंभाद्विश्वासादिद
मभ्यधत्तानुसंहितवान्लिंगितवानित्यर्थः ॥ किं कृत्स्नपरिग्रहे कृत्स्नानुग्रहे यमुद्धवो मुख्य इति कृत्स्नपरिग्रहविषयाणां मध्येऽयंमुख्य

श्रीशुक उवाच इत्युद्धवादुपाकर्ण्य सुहृदां दुःसहं वधम् ॥ ज्ञानेनाशमयत्क्षत्ता शोकमुत्पतितं बुधः ॥ २३ ॥ स तं महाभाग
वतं व्रजंतं कौरवर्षभः ॥ विश्रंभादभ्यधत्तेदं मुख्यं कृष्णपरिग्रहे ॥ २४ ॥ विदुर उवाच ॥ ज्ञानं परं स्वात्मरहःप्रकाशं य
दाह योगेश्वर ईश्वरस्ते ॥ वक्तुं भवान्नोर्हति यद्धि विष्णोर्भृत्याः स्वभृत्यार्थकृतश्चरंति ॥ २५ ॥ उद्धव उवाच ॥ ननु ते त
त्वसंराध्य ऋषिः कौषारवोंतिमे ॥ साक्षाद्भगवतादिष्टो मर्त्यलोकं जिहासता ॥ २६ ॥ इति विश्वासपूर्वं निश्चितवानित्यर्थः

२४ ॥ अथ श्रुतभगवद्वृत्तांतः तदुपदिष्टतत्त्वजिज्ञासुः ॥ क्षत्ता पृच्छति ॥ ज्ञानमिति ॥ योगीश्वरः योगफलप्रदः ईश्वरो भगवानात्मरहःप्रका
शं परं यज्ज्ञानमाह ॥ तज्ज्ञानं भवान्नः अस्मभ्यं वक्तुमर्हति ॥ यद्यस्माद्विष्णोर्भक्ताः स्वभृत्यार्थकृत ॥ स्वभृत्यप्रयोजनकारिणश्चरंति हि ॥
२५ ॥ तत्त्वजिज्ञासुर्वै क्षत्ता एष उद्धव आह ॥ नन्विति ॥ ननु हे विदुर ते त्वया ऋषिस्तत्त्वदर्शी कौशारवो मैत्रेयः तत्त्वसंराध्यः तत्त्वोपदेशार्थमा
राधनीयः पूज्यः न त्वहं कथये भ्रातः कौषारविः मर्त्यलोकं जिहासता हातुमिच्छता भगवता मेंऽतिसमीपे साक्षादादिष्टः ॥ आज्ञप्तो तीर्थान्यटि

भा.त.टी.

॥ १९ ॥

विदुरोद्धवसंवादमुपसंहरतिशुकः ॥ इतीति ॥ विदुरेणसहविश्वमूर्तेः ॥ विश्वशरीरस्यभगवतोगुणकथारूपयासुधया आप्लुतःनिरस्तः ॥ उरुस्ता
पोयस्यसः औपगविःउद्धवः यमस्वसुर्यमुनायाःपुलिनेतटेतांनिशांरात्रिं क्षणमिवसमुषितः सम्यग्भगवद्गुणकथयातांरात्रिंक्षणमिव
नीत्वाततःयमुनायाअगात् ॥ बदरीकाश्रमंप्रतीतिशेषः ॥ २७ ॥ अत्रोद्धवविषयेकिंचिद्राजापृच्छति ॥ निधनमिति ॥ वृष्णिभोजेषुनिधनं
ब्रह्मशापेननाशमुपगतेषुसत्सुउद्धवस्तुकथमेकोवशिष्टः अस्यापिविप्रशापविषयत्वादितिभावः ॥ किमुवक्तव्यंवृष्णयोयदिनिधन

शुक उवाच ॥ इतिसहविदुरेणविश्वमूर्तेर्गुणकथयासुधयाप्लावितोरुतापः ॥ क्षणमिवपुलिनेयमस्वसुस्तांसमुषितऔ
पगविर्निशांततोऽगात् ॥ २७ ॥ परीक्षिदुवाच ॥ निधनमुपागतेषुवृष्णिभोजेष्वधिरथयूथपयूथपेषुमुख्यः ॥ सतुकथमव
शिष्टउद्धवोयद्धरिरपितत्यजेआकृतिंत्र्यधीशः ॥ २८ ॥ श्रीशुक उवाच ॥ ब्रह्मशापापदेशेनकालेनामोघवांछितः संहृत्य
स्वकुलंनूनंत्यक्ष्यन्देहमचिंतयत् ॥ २९ ॥ अस्माल्लोकादुपरतेमयिज्ञानंमदाश्रयम् ॥ अर्हत्युद्धवएवाद्धासंप्रत्यात्मवतां

मुपयन्तादिति यद्युत्तः अतिरथानांयूथपानामतिरथयूथपाः तेषामयेयूथपास्तेष्वपिमुख्यः त्र्यधीशः लोकत्रयेशः हरिरप्याकृतिंम
मनुष्यसजातीयसंनिवेशंतत्यजेतिरोधापयामास ॥ अत्रभूमागएवविहितं ॥ सर्वेनित्याःशाश्वताश्चदेहास्तस्यमहात्मनइतिस्मरणा
त् ॥ २८ ॥ विप्रशापादेःसर्वस्यभगवत्संकल्पानुविधायित्वात्तत्संकल्पेनायंशापविषयोऽप्युद्धवइहैवस्थापितइत्युत्तरमाहवैयासकिः
ब्रह्मेत्यादि ॥ ब्रह्मशापापदेशेनविप्रशापव्याजेनकालेनस्वयंसंकल्पितकालेनामोघवांछितंयस्यसः सत्यसंकल्पइत्यर्थः ॥ एवंभूतोभ

गवान्स्फीतंसमृद्धंस्वकुलंसंहृत्यदेहस्यदेहंत्यक्ष्यन्
तिरोधापयिष्यन्निदमचिंतयत् ॥ २९ ॥

॥ १९ ॥

चितामेवाह॥ अस्माल्लोकान्मय्युपरते स्वलोकं गते॥ मतिमदाश्रयं अर्हमाश्रयो विषयो यस्य तन्मदाश्रयं मद्विषयं ज्ञानं संप्रतीदानीमुद्धव एवान
त्वेन साक्षादर्हतीति॥ स्वयं गृहीतुमन्यान्ग्राहयितुं च उद्धवयोग्यः न त्वन्य इत्यर्थः॥ कथंभूत उद्धवः॥ आत्मवतां स्वात्मपरमात्मयथात्म्यज्ञानव
तां मध्ये वरः मुख्य॥ ३०॥ न देवाहनेति॥ उद्धवे एवमन्न्यूनः मत्तः न्यूनो न भवति निरंजनः परमं साम्यमुपैतीति॥ जगद्व्यापारवर्जं भोगमात्रसाम्य
लिंगाच्च मम साधर्म्यमागता इत्यादि श्रुतिसूत्रस्मृत्यादि प्रतिपन्नं भोगसाम्यं विवक्षितं॥ मत्तो मया सह समाभाग इत्यर्थः॥ कुतः यद्यस्मात्गुणैः रज

अस्माल्लोकादुपरते मयि ज्ञानं मदाश्रयः॥ अर्हत्युद्धव एवाद्धा संप्रत्यात्मवतां वरः॥ ३०॥ नोद्धवोण्वपि मन्न्यूनो यद्गुणै
र्नार्दितः प्रभुः॥ अतो मद्वयुनं लोकं ग्राहयन्निह तिष्ठतु॥ ३१॥ एवं त्रिलोकगुरुणा संदिष्टः शब्दयोनिना॥ बदर्याश्रममा
साद्य हरिमीजे समाधिना॥ ३२॥ विदुरोप्युद्धवाच्छ्रुत्वा कृष्णस्य परमात्मनः॥ क्रीडयोपात्तदेहस्य कर्माणि श्लाघि
तानि च॥ ३३॥ देहन्यासं च तस्यैवं धीराणां धैर्यवर्द्धनं॥ अन्येषां दुष्करतरं पशूनां विक्लवात्मनां॥ ३४॥ तमोभिश्चतैः॥ त्कार्यशब्

दादिविषयैर्नार्दितः न पीडितः॥ अत एव प्रभुः वशीकृतेंद्रियः॥ अनेन मुक्तिसाधनसमग्रसंपत्तिः सूचिता अत आत्मवद्दूरत्वान्मद्वयुनं मद्विषयं
ज्ञानं लोकं ग्राहयन्नस्मिँल्लोके तिष्ठतु मुक्तिपर्यंतमिति शेषः॥ ३१॥ उपसंहरंति एवमिति एवं इत्येवं त्रिलोकगुरुणा शब्दयोनिना शास्त्रप्रमाणग
म्येन भगवता संदिष्टः आज्ञप्तः उद्धवः बदर्याश्रममासाद्य समाधिना ध्यानयोगेन हरिं भगवंतमीजे यष्टवान्॥ ३२॥ विदुरस्त्विति॥ विदुरोपि क्री
डार्थं उपात्तदेहस्य स्वेच्छया त्वात्ता प्राकृतिदिव्यविग्रहस्य परमात्मनः श्रीकृष्णस्य कर्माणि श्लाघितानि चरित्राणि च उद्धवाच्छ्रुत्वा॥ ३३॥ तस्य

भा.वृ.टी.

॥ २० ॥

कुरुश्रेष्ठ राजन्कृष्णेन भगवता कर्त्रीमनसा करणेन चिंतितं दृष्टमात्मानं च श्रुत्वेति शेषेणान्वयः भागवते उद्धवे गतमेव सति नमेस्मी कृष्णमेव ध्यायन्प्रेमवि
ह्वलः विरतिशयभगवत्प्रेमपरवशास्सन् रुरोद ॥ २५ ॥ कालिंद्याइति ॥ भगवतर्षभः भागवतश्रेष्ठो विदुरः स्वयंसिद्धएव परिनिष्पन्नभक्तियोग
सिद्धएव कतिचिद्दहोभिर्दिनैः कालिंद्यायमुनायाः सकाशात्स्वःसरितं गंगां प्रापद्यत प्राप्तः यत्र गंगातीरे हरिद्वारे मित्रासुतो मैत्रेयः आस्ते
तत्रापद्यत इत्यर्थः ॥ २६ ॥ इमिद्वादशोचतुर्थः ॥ ४ ॥ एवं कुरुश्रेष्ठमुभगवतो मैत्रेयेण समागमः कदाचासमहः संवाद इत्यस्योत्तरमुक्तं अथेत्यःप्र
श्नेतिरतीयचतुर्थस्कंधाभ्यां विदुरमैत्रेयसंवादं विवक्षन्नतावद्विदुरस्य मैत्रेयोपसतिप्रकारं तत्प्रश्नभगवल्लीलारूपमहदादिसृष्टिप्र

आत्मानं च कुरुश्रेष्ठ कृष्णेन मनसेक्षितं ॥ ध्यायन्गते भागवते रुरोद प्रेमविह्वलः ॥ २५ ॥ कालिंद्याः कतिभिः सिद्ध अहोभि
भरतर्षभः ॥ प्रापद्यत स्वःसरितं यत्र मित्रासुतो मुनिः ॥ २६ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरोद्धवसंवादो ना
म चतुर्थोध्यायः ॥ ४ ॥ श्रीशुक उवाच ॥ द्वारि द्युनद्या ऋषभः कुरूणां मैत्रेयमासीनमगाधबोधम् ॥ क्षत्तोपसृत्याच्युतभाव
शुद्धः पप्रच्छ सौशील्यगुणाभितृप्तः ॥

कारं चाह पंचमेनाध्यायेन तावद्यथाविधि क्षत्तुर्मैत्रेयोपसतिप्रकारमाह बादरायणिः ॥ २६ ॥ द्वारी
ति ॥ द्युनद्या गंगायाः द्वारि हरिद्वारे आसीनं निषण्णमगाधबोधमगाधोपारः बोधः आत्मपरमात्मयाथात्म्यज्ञानं श्रोत्रियं ब्रह्मनिष्ठं इत्याद्युक्ता
चार्यलक्षणलक्षितमित्यर्थः ॥ एवंभूतं मैत्रेयं उपसृत्य सगुरुमेवाभिगच्छेत्समित्पाणिरित्याद्युक्तरीत्या उपसमीपे प्राप्य तत्तापप्रच्छ कथंभू
तः अच्युतभावः परमात्मभक्तिः तेन शुद्धः निर्मलचित्तः अनेन प्रशांतचित्ता पशमाचिन्तापशमाच्चिन्तापेतस्यार्थः सौशील्यगुणा
भितृप्तः सौशील्यं महतो मंदैः सहनीरंध्रेण संश्लेषस्वभावत्वं मैत्रेयस्य सौशील्यगुणेनाभितृप्तः सत्यार्जवदयादानादीनामुपलक्ष

॥ २० ॥

किंदृष्टः वा निरपेक्षायां तावच्छरीरस्य लोकानित्यस्यार्थस्य चयं तत्प्रमेवाह सुखायेमादिना ॥ लोकः जनः सुखाय सुखार्थं सुखं लिप्सयेत्यर्थः कर्माणि
करोति नैव लोकान्तिकानिश्रोतस्यात्मानि च करोति नैतैः कर्मभिः सुखं वा निरतिशयसुखं वान्यदुपारमम् आत्यंतिकनिवृत्तिं वा न विंदते ॥ किंतु तैस्तैः क
र्मभिः पुनः पुनः दुःखमेव विंदेत ॥ अत्र निरतिशयसुखप्राप्तौ आत्यंतिकदुःखनिवृत्तौ च साधनत्वेन यद्युक्तं कर्तव्यं तत्र अस्मभ्यं भगवानुत्तमा
दिज्ञानसंपन्नः त्वं वदेदित्यर्थः ॥ तद्युक्तं येह कर्मचितो लोकः क्षीयते एवमामुत्र पुण्यचितो लोकः क्षीयते इति श्रुतेरित्याह कर्मणामात्यंतिकदुःखनिवृ
त्तिपूर्वकनिरतिशयसुखप्राप्तिसाधनत्वानुपपत्तिं परीक्ष्यमाणाय निरतिशयसुखसाधनविविक्त्साहं मुपदिशेत्यर्थः ॥ २ ॥ निवृत्तः वाह्यान

विदुर उवाच ॥ सुखाय कर्माणि करोति लोको नैतैः सुखं वान्यदुपारमं वा ॥ विंदेत भूयस्तत एव दुःखं यदत्र युक्तं भगवान्वदेन्
नः ॥ २ ॥ जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य ॥ अनुग्रहायेह चरंति नूनं भूतानि भव्यानि जनार्दन
स्य ॥ ३ ॥ तत्साधुवर्यादिश वर्त्म शं नः संराधितो भगवान्येन पुंसां ॥ हृदि स्थितो यच्छति भक्तिपूते ज्ञानं सतत्त्वाधिगमं पुराणं ॥ ४ ॥

तः करणव्यापारस्य भगवत्स्वरूपे कश्चित्तस्य मे किं भवत्तत्न प्रश्नानां प्रतिवचनेन प्रयोजनमित्याशंक्याशामयन्स्वस्य प्रतिवचनोत्सुकमा
विष्करोति ॥ जनस्येति ॥ दैवात्पूर्वकर्मवशात् अधर्मशीलस्य धर्मनिरस्तस्य पापः अज्ञानात्प्रायश्चित्तक्रियमाणं पुनः पुनः नष्टप्रज्ञः पापमेव नित्यमा
रभते इत्यनरनिवचनात् ॥ अत एव कृष्णाद्विमुखस्य परान्मुखस्य सुखदुःखितः स्यातिदुःखितस्य जनस्यानुग्रहाय भव्यानि भद्राणि जनस्य वि
ष्णोः भूतानि ॥ विष्णुभक्ता भवंत इत्यर्थः इह मर्त्यलोके चरंति ॥ कृपालू नाभवतां लोकान् जिघृक्षयैवमस्मिँल्लोके संचरणं नान्यथेत्यर्थः ॥ ३ ॥ बु
भुक्षिताविकमशाः पृच्छति ॥ तदिति ॥ हे साधुवर्य शं सुखसंपादकं तद्धर्मउपायं नः अस्मभ्यं आदिश कथय ॥ कथंभूतं वर्त्म येन वर्त्मना संराधितो भगवा

पुंसां भक्तिहृते भक्तियोगेन परिविचिते हृदि हृदये स्थितः सन् तत्त्वाधिगमं तत्त्वमधिगम्यते येन तत्त्वावभासकं पुराणमनादि वेदप्रमाणकं ज्ञान पृच्छति
तदत्मीदिशेत्यर्थः॥४॥करोतीति॥ अधीशः त्रिलोकेशः॥ भगवान्स्वतंत्रेः॥ अकर्मवश्य एव कृतावतारः॥ ब्रह्मादिरूपेण कृतानुप्रवेशावतारः या
नि कर्माणि करोति॥ अग्रेऽग्रे सृष्टेः पूर्वं निरीहः॥ निर्व्यापार एव स्वयमिदं विश्वं यथा येन प्रकारेण ससर्ज॥ यथा संस्थाप्य सम्यक् स्थितिं रक्षां कृत्वा जग
तः वृत्तिं जीविकां विधत्ते करोति॥ तदनेये तु परीतनेनान्वयः एवमग्रेपि॥५॥ यथेति स भगवान्स्वशरीरे भूतेरवेस्वस्मावस्थे आकाशस्थकार
णे भूते अक्षरं तमसि लीयते इत्युक्ततमः॥ शब्दवाच्यप्रकृतिद्रव्य इमं कार्यप्रपंचं निवेश्य संहृत्य निवृत्तवृत्तिं जगव्यापारगुहायां परमाकाशे ॥७॥
करोति कर्माणि कृतावतारो यान्यात्मतंत्रो भगवांस्त्र्यधीशः॥ यथा ससर्जाग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते॥५॥
यथा पुनः स्वे ख इदं निवेश्य शेते गुहायां स निवृत्तवृत्तिः॥ योगेश्वराधीश्वर एक एतदनुप्रविष्टो बहुधा यथासीत॥६॥
क्रीडन्विधत्ते द्विजगोसुराणां क्षेमाय कर्माण्यवतारभेदैः॥ मनो न तृप्यत्यपि शृण्वतां नः सुश्लोकमौलेश्चरितामृता
वैकुंठेत्यर्थः॥ शेतेव शांति॥ हे योगीश्वराधीश्वर श्रेष्ठ एकः स्वयं चिदचिदात्मक जगदनुप्रविष्टः स्वप्रशासनाधीनं कुर्वन् धीरकनि॥७॥
तया स्थितः बहुधा देवमनुष्यादि बहुना मभाक् यथा आसीदभव॥६॥ क्रीडन्निति॥ यथा च द्विजगोसुराणां ब्राह्मणगोदेवानां क्षेमायाव
तारभेदैः भेदशब्दः गौरगावेशशक्त्याद्यं तराणां प्रदर्शनार्थः स्वयं क्रीडन्नेव कर्माणि दुष्कृद्विनाशनसाधुपरित्राणादि रूपकर्माणि विध
त्ते करोति॥ अन्मदपि शृण्वमाणाः॥ अनंतस्य सप्रतिवचनश्रवणोत्सुकमाविष्करोति इदं न॥ मन इति सुश्लोकमौलेः सुष्टु श्लोक्यंते कीर्त्यंत
इति सुश्लोकाः॥ पवित्रकीर्तिमंतः॥ तेषां मौलिः शिवप्रधानः तस्य भगवतश्चरितामृतान्यमृततुल्यानि चरित्राणि शृण्वतामपि नः॥ न तृप्य

अन्यदपि पृच्छति ॥ येरिति ॥ अधिलोकनाथः लोकाधिपतिः येस्तत्त्वभेदैर्महदादिभिरित्यर्थः सह लोकपालान्सह विद्यमानाः लोकपाला येषां तान् लोका
न्लोकान्लोकाल्लोकं बहिर्भागा वरकान्वा अचीक्लृपत्कल्पयामास तान्वर्णयेत्यर्थः यत्र येषु लोकादिषु सर्वाणिमानि सत्त्वानि प्राणिनः तेषां निकायाः
तत्र त्वमेतेषां भेदः भिदा अधिकृतः कर्मानुगुणाधिकारवान्मनीतः प्रतीयते ॥ ८ ॥ येनेति ॥ उतापि चात्मैयोनिः कारणं यस्य सः आत्मयोनिः कारणं
तरशून्य इत्यर्थः विश्वसृष्टानारायण प्रजानां व्याप्तिभूतानां आत्मकर्मरूपाभिधानाम् ॥ आत्मा ज्ञानेंद्रियगुणाः ॥ रूपाणि देवमनुष्यादिरूपाणि
अभिधा देवो मनुष्यादित्याद्यभिधाः आसां भिदां येन प्रकारेण व्यधत्ताकरोत् ॥ किंसा क्षात्परं परयेत्समभिप्रायः एतत्सृष्टं चकारादृष्टमपिनो
येस्तत्त्वभेदैरधिलोकनाथो लोकानलोकान्सह लोकपालान् ॥ अचीक्लृपद्यत्र हि सर्वसत्त्वनिकायभेदोधिकृतः प्रतीतः ॥
८ ॥ येन प्रजानामुत आत्मकर्मरूपाभिधानां च भिदां व्यधत्त ॥ नारायणो विश्वसृगात्मयोनिरेतच्च नो वर्णय विप्रवर्य ॥ ९
परावरेषां भगवन्व्रतानि श्रुतानि मे व्याससुखादभीक्ष्णं ॥ अतृ मः क्षुल्लसुखावहानां तेषामृते कृष्णकथामृतौघात् ॥ १०
कस्तृप्नुयात्तीर्थपदोभिधानात्सत्रेषु वः सूरिभिरीड्यमानात् ॥ यः कर्णनाडीं पुरुषस्य यातो भवप्रदां गेहरतिं छिनत्ति ॥ ११ ॥
स्पष्टं हे विप्रवर्य वर्णय ॥ ९ ॥ ननु बहु श्रुतं किमनया पृच्छयेत्यत आह ॥ परावरेषामिति ॥ हे भगवन्मैत्रेय परे च वर्णिका अपरे स्त्रीशूद्रादयः तेषां
व्रतानि व्याससुखादभीक्ष्णं पुनः पुनर्मे मया श्रुतानि ॥ भगवत्कथामृतप्रवाहं विना क्षुल्लसुखावहानामल्पसुखसंपादकानां तेषां व्रतानां श्रवणेनेति शेषः
अतृप्नुमः तृप्ता अभूम: भगवत्कथामृतश्रवणेन तु न तृप्ता इत्यर्थः ॥ १० ॥ एतदेवाह ॥ कइति ॥ वः युष्माकं सत्रेषु सूरिभिर्विद्वद्भिरीड्यमानात्स्तू
यमानात्तीर्थपदो भगवतः ॥ अभिधानाच्चरित्रात्कः स्पएव सुरतस्तृप्नुयान्न कोपि तृप्नुयादित्यर्थः कथंभूतः तीर्थयात् यस्तीर्थयात् सुरुषस्य स्प

भा॰ द्वा॰ टी॰

॥२२॥

शृण्वतः पुंसः कर्णनाडी श्रोत्रविलं यातः गतः कथाश्रवणेन श्रोत्रविलद्वारेण हृदयं प्रविष्ट इत्यर्थः ॥ भवप्रदां संसृतिसंपादको देहं हरतिं देहापत्य
कलत्रादिष्वासक्तिं छिनत्ति ॥ नन्वेवं व्रतानां तापत्रयाभिहतिसामर्थ्यमस्तीति भावः ॥११॥ ननु भगवत्कथायामेव तापत्रयात्मकसंसृति।
विच्छेदकत्वे सैव प्राधान्येनाव्यासेन महाभारते किमिति नानुवर्णिता ॥ किमिति वा प्रायशो व्रतान्येव वर्णितानीत्याशंक्याऽन्यारोहवादन्यायेन श्री
महाभारतस्यापि भगवद्गुणानुवर्णने तात्पर्यमित्याह ॥ मुनिरिति तेसखा मुनिः कृष्णः व्यासः भगवद्गुणानां विवक्षुः भगवद्गुणान्वक्तुमिच्छु
र्भारतमाह ॥ यस्मिन्भारते ग्राम्यसुखानुवादैर्धौरभ्यनैरनुपश्चाद्धरेः ॥ कथानां नृणां मतिः गृहीता वतारितेत्यर्थः शाखाचंद्रन्यायेन

मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः ॥ यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता नु हरेः कथायां
॥१२॥ सा श्रद्दधानस्य विवर्द्धमाना विरक्तिमन्यत्र करोति पुंसः ॥ हरेः पदानुस्मृतिनिर्वृतस्य समस्तदुःखात्ययमाशु
धत्ते ॥१३॥

भगवत्कथायां बुद्ध्यवतारार्थं भारते ग्राम्यसुखानुवादः कृतः नहि तावतान्तत्रैव तात्पर्यमिति वक्तुं युक्तं तदुक्तमितिहाससमुच्च
ये कामिनो वर्णयन्कामान्लोभं लुब्धस्य वर्णयन् ॥ नरः किं फलमाप्नोति कूपेंऽधमिव पातयन् ॥ लोकचित्तावतारार्थं वर्णयित्वानु तेनैव ।
इतिहासैः पवित्रार्थैः पुनस्तत्रैव वर्णितैः ॥ अन्यथा घोरसंसारबंधहेतुजनस्य तौ वर्णयेत्स कथं विद्वान्महाकारुणिको मुनिरिति ॥ अतो भार
ताभिप्रायो दुरवगम इत्यर्थः ॥१२॥ भगवत्कथायां मतिप्रवेशस्य फलमाह ॥ सेति ॥ साहरिकथाहरहः श्रवणेन वृद्धिं प्राप्ता सती श्रद्द।
धानस्य कथाश्रवणे श्रद्धां कुर्वतः पुंसः अन्यत्र शब्दादौ विरक्तिं करोति ॥ ततः किमित्यत आह हरेर्भगवतः पादयोरनुस्मरसाऽनध्य । ॥२२॥
नेन निर्वृतस्य समस्तदुःखानामप्ययं नाशं विधत्ते सा हरिकथेति शेषः ॥१३॥

हरिकथैवस्वसम्यांश्रद्धानामस्यमुमुक्षोः प्रदारादिविषयेषुविरक्तिभगवत्पदारविंदभक्तिंचजनयतितापत्रयाभिहंतिचविधत्ते अतएवंवि
धप्रभाववतोहरिकथायांयेविमुखास्तान्शोच्यानामपिशोच्यशोच्यान्शोच्यानामपिशोच्यानंतंशोच्यानित्यर्थः कुतः अविदः ॥ अज्ञान्तान्
शोचे ॥ तेकेहरेः कथायां उत्तमगुणशालिन्यामयेनपापेनविमुखाः पराङ्मुखाः अतएवयेषांहरिकथाविमुखानामायुरनिमिषोदेवः
रविः क्षिणोतिक्षपयतीतिकिंनिरमुच्यतेयतः कथाः एवतोह्यायुः क्षिणोतितापंशंकाशमयंविमुखान्विश्रिनष्टिः वृथावादगति
स्मृतीनामितिवादोवाग्व्यापारः गतिर्देहव्यापारः स्मृतिर्मनोव्यापारः वृथाव्यर्थाः वादगतिस्मृतयोयेषांतेषां ॥ भगवतः कथाः एवतास्तुवागति

ताञ्शोच्यशोच्यानविदोनुशोचेहरेः कथायांविमुखैरघेन ॥ क्षिणोतिदेवोऽनिमिषस्तुयेषामायुर्वृथावादगतिस्मृ
तीनाम् ॥ १४ ॥ तरत्यकोपारवशर्मदातुर्हरेः कथामेवकथासुसारं ॥ उद्धृत्यपुष्पेभ्यइवार्त्तबंधोशिवायनः कीर्तयती
र्थकीर्त्तेः ॥ १५ ॥ सविश्वजन्मस्थितिसंयमार्थेकृतावतारः प्रगृहीतशक्तिः ॥ चकारकर्माण्यतिपूरुषाणियानीश्वरः
कीर्तयतानिमह्यं ॥ १६ ॥

स्मृतयः सफलाइत्यर्थः आयुःक्षपणंतुतुल्यमेव ॥ १४ ॥ प्रश्नमयसंहरतिद्वाभ्यां ॥ तदिति ॥ तत्तस्माद्धरिकथाया
एवसमस्तदुःखापयकत्वाद्धेतोः हेकौषारवेमैत्रेयशर्मदातुः सुखप्रदस्यपवित्रकीर्त्तेर्हरेः कथामेवकथासुसारंसारभूतांउद्धृत्यपुष्पेभ्यः
मधुकरोमधुइवनः शिवायहेआर्तबंधोतापत्रयाभिपीडितानांसुखकरकीर्तय ॥ १५ ॥ भगवत्कथास्वपिप्राधान्येनश्रीकृष्णकथैवकथ
नीयेत्याह सइति ॥ योभगवान्विश्वस्यजन्मस्थितिसंहारार्थंप्रगृहीतायात्राशक्तिर्येनसः शक्तिनत्त्वसम्भृतिशरीरादयः शब्दाः पर्यायाः

पालनायेष्विक्षुतस्यावतारकृत्यविस्तुगतपालनानुकूलसामर्थ्यस्यस्वशक्तित्वं बोधयन्नेवं भूतः सएवेश्वरः कृतावतारः॥ अतिपुरुषाएयमानुषाणिदिव्या
निकर्माणिचकारतानिमह्यंकीर्त्तय॥१६॥ एवंक्षत्त्रा एषोमैत्रेय आहेत्याह। पृष्टकः एवमिसेकेन॥ भगवानुत्तमत्वादिज्ञानसंपन्नः सकुषारवत्तुतोमैत्रे
यः एवंक्षत्त्राविदुरेणपुंसांनिःश्रेयसार्थायमोक्षोदयाय॥ स्वमतुसिद्धत्वान्नस्वनिःश्रेयसायेत्यर्थः॥ एवमापृष्टः तंक्षत्त्रारंबहुमानयन्संमानन्नाह
१७॥ पुंसांनिःश्रेयसार्थायेत्यनेनसूचितमेवस्पष्टंलोकानुग्रहकारित्वमाविःकुर्वन्साधवत्यसम्भमभिनंदतिमैत्रेयःसाध्विति हेसाधोविदुरत्वयासा
धुसम्यकृष्टं॥ त्वयाकथंभूतेनलोकान्साधुअनुगृह्णता॥ अधोक्षजात्मनः स्वस्याधोक्षजचित्तस्यस्वस्येतिवा॥ कीर्त्तिंलोकेवितन्वताविस्ता

श्रीशुक उवाच॥ एवंसभगवान्पृष्टःक्षत्त्राकौषारविर्मुनिः॥ पुंसांनिःश्रेयसार्थायतमाहबहुमानयन्॥१७॥ मै
त्रेय उवाच॥ साधुपृष्टंत्वयासाधोलोकान्साधुअनुगृह्णता॥ कीर्त्तिंवितन्वतालोकेआत्मनोधोक्षजात्मनः॥
१८॥ नैतच्चित्रंत्वयिक्षत्तर्बादरायणवीर्यजे॥ गृहीतोनन्यभावेनयत्त्वयाहरिरीश्वरः॥१९॥ मांडव्यशापा
द्भगवान्प्रजासंयमनोयमः॥ भ्रातुःक्षेत्रेभुजिष्यायांजातःसत्यवतीसुतात्॥२०॥ श्री:

रयता॥१८॥ हरिकथाप्रश्नस्त्वयिनचित्रमित्याह नैतदिति॥ हेक्षत्तः बादरायणवीर्यजेव्यासवीर्यसंभूतेत्वयिहेतुगर्भविशेषणं॥ तद्धरिक
थाप्रश्नरूपमेतन्नचित्रंनकेवलंबादरायणवीर्यजत्वमात्रएवकिंतुयद्यस्मात्हनन्यभावेनैकांतभावेनेश्वरोहरिस्त्वयागृहीतः॥१९॥ व्या
सवीर्यजत्वंचस्पष्टयति॥ मांडव्यशापादिति॥ प्रजानामभागवतानांप्रजानांसंयमयःदंडयितायमःवैवस्वतःमांडव्यस्यमुनेःशापाद्भ्रा
तुःसत्यवतीसुतस्यविचित्रवीर्यस्यक्षेत्रेक्षेत्रत्वेनपरीगृहीतायांभुजिष्यायांदास्यांसत्यवतीसुतादासात्कृतःउत्पन्नःयमएवत्वंजा

॥२०॥ टि ॥२३॥

किंच भवानिति ॥ सानुगस्य सभागवतस्य भगवतः श्रीकृष्णस्य भवान्नित्यं संमतः ॥ प्रीतिविषयः ॥ यद्यस्मात्तवज्ञानोपदेशाय मां भगवान्व्र
जन्भुवंस्त्यजादिशादिष्टवान्तसमीपेऽसंतमपि भवंतं स्मृत्वा ज्ञानोपदेशार्थमामाज्ञप्तवान् एतेन भगवन्निरतिशयप्रीतिविषयत्वमव
गम्यते प्रियो हि ज्ञानी नो नित्यमिति स्मरणात् ॥ २१ ॥ अतो निरतिशयभगवत्प्रीतिविषयाय ते यथा प्रश्नं वर्णयामीति प्रतिजानीते ॥ अथेति
अथ ननु भगवल्लीलाः वर्णयामिति संबंधः कथंभूता योपबृंहिताः युज्यते इति योगा वा सौ माया आत्मैश्वर्यशक्तिः तयोपबृंहिताः भगव

भगवान्भगवतो नित्यं संमतः सानुगस्य ह ॥ यस्य ज्ञानोपदेशाय मादि
शान्भगवान्व्रजन् ॥ २१ ॥ अथ ते भगवल्लीला योगमायोपबृंहिताः
विश्वस्थित्युद्भवांतार्था वर्णयाम्यनुपूर्वशः ॥ २२ ॥ ९

न्नियात्मैश्वर्यशक्त्युपकल्पिताः ॥ अतः संहारः अर्थो मोक्षः विश्वस्य स्थित्यादयो यासां ताः एवंभूता लीलाः यद्वा अर्थशब्दः स्व
रूपपरः वस्तुन्यर्थशब्दप्रयोगात् ॥ अंतशब्देन संहारो मोक्षश्च विवक्षितः यत्प्रयंत्यभिसंविशंतीति श्रुतेः विश्वस्य स्थित्यादयः
अर्थः स्वरूपं यासां ताः लीलाः क्रीडाः चेष्टाः आनुपूर्व्यशः प्रश्नानुसारेण वर्णयामीत्यर्थः यद्वा सृष्ट्यादिलीलादिक्रमेणेत्यर्थः ॥ २२

भा.तृ.टी.
॥२४॥

प्रथमं सृष्टिलीलां वर्णयितुं सृष्टेः पूर्वं कारणत्वेनावस्थितवस्तुस्वरूपमाह ॥ भगवानिति ॥ इदं परिदृश्यमानं नामरूपविभागार्हं स्थूलचिदात्म-
कं जगदात्मकं जगदग्रे सृष्टेः पूर्वकाले आत्मनां जीवानामात्मांतःप्रविष्टधारकः विभुः स्वामी एक अविभक्तनामरूपसूक्ष्मचिदचि-
च्छरीरः भगवानेवासीदित्यर्थः स एव भगवानात्मेच्छानुगतावात्मनः ॥ स्वस्येच्छा सृष्ट्युपयोगिसंकल्पः ॥ तस्या अनुगतौ ऽनेको ऽसति नाना-
मत्युपलक्षितः देवादिनानानामरूपविषयबुद्धिबोध्यः पूर्वस्मिन्कल्पे आसीत् कुतः आत्मा आत्मपर्यंततत्वान्नामरूपविषयमतीनां इ-
त्यभिप्रायः एक एव भगवान् कदाचिदविभक्तनामरूपचिदचिच्छरीरकः कार्यावस्थः नानासएव कदाचिन्नामरूपविभागानर्हसूक्ष्मचि-
दचिच्छरीरकः परमात्मा कारणावस्थ इत्यर्थः यद्वा नानामत्युपलक्षित इति छेदः आत्मेच्छानुगतौ संहारविषयात्मीयसंकल्पोन्मेषइ

भगवानेक आसेदमग्र आत्मात्मनां विभुः ॥ आत्मेच्छानुगतावात्मा नानामत्युपलक्षणः ॥२३॥

ति ॥ अनानामत्युपलक्षितः तद्देवादिनामरूपविषयबुद्ध्यनुपलक्षितः कुत आसाद्देवादिनामरूपभास्कं तदभावाद्ध्यात्मन एवेत्यर्थः नन्वे-
वं विकारेणप्रसंगः संहारकत्वान्नामरूपसंस्पर्शस्येत्यभिप्रायान् अत्रैकशब्देन स्थूलचिदचिच्छरीरकः परमात्मैवोच्यते तस्यैव स्थूला-
वस्थाप्रहाणेन सूक्ष्मचिदचिच्छरीरकतयावस्थितस्य कारणत्वमुच्यते ॥ न च चिदचिच्छरीरकत्वस्यात्राप्रतीतेरेक एवेत्यनेन सजाती-
यविजातीयस्वगतभेदशून्यं ब्रह्मैव जगत्कारणं इत्युच्यते ॥ इति भ्रमितव्यम् ॥ अग्र इति कालस्य निर्देशात् विजातीयभेदस्यात्मनामात्मेति
व्यतिरेकनिर्देशेन सजातीयभेदस्य भगवानित्यनेन कारणत्वोपशिक्षु सार्वज्ञसर्वशक्तित्वसत्यसंकल्पत्वादिस्वगतभेदस्य चोक्तेश्च प्रति- ॥२४॥
पन्नत्वात् ॥ तर्ह्येक इत्यनेन किमुच्यते ॥ इति चेदुच्यते महदादिसृष्टिक्रमेण वक्ष्यमाणनानात्वप्रतिसंबंधि द्वियेकत्वमेक इत्यनेनोच्यत इति ना-

तदेवंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यांव्याक्रियतइतिश्रुतेः प्रकृतिपुरुषकालशरीरकस्यसार्वज्ञादिकल्याणगुणाकरस्यैवकारणत्वंप्रपंचयति
द्वाभ्यामिति ॥ सवाएषः सोयंभगवांस्तदाप्रलयदशायांदृशासर्वज्ञः तत्रहेतुः असुप्तदृगसंकुचितज्ञानतत्कुतः एकराट् एकरूपप्रकाशः न
तुजीववत्कर्मायत्तकदाचित्कसंकोचविकासभाग्ज्ञानसंपन्नः सुप्तशक्तिः सूक्ष्मावस्थचिदचिद्रूपस्वशक्तिः तत्कुतः तत्त्वादिपर्यायः ॥ शक्तिश
वदस्तुतेकार्यैर्नापश्यत् किंतु असंख्यवहारानर्हंनामरूपरहितमिवात्मानंमेने अमनुत ॥ इवशब्देनतस्यसूक्ष्मदर्शित्वात्स्वशरीरभूतसूक्ष्मा
वस्थचिदचिद्विषयज्ञानसंपत्तिःसूच्यते ॥ अनेनसार्वज्ञादिगुणसंपत्तिर्नामरूपविभागाभावश्चोक्त ॥२४॥ अथचित्तचिच्छरीरकसमाह

सवाएषतदाद्रष्टानापश्यद्दृश्यमेकराट् ॥ मेनेसंतमिवात्मानंसुप्तशक्तिरसुप्तदृक् ॥२४॥ सावा
एतस्यसंद्रष्टुःशक्तिःसदसदात्मिका ॥ मायानाममहाभागययेदंनिर्ममेविभुः ॥२५॥

सावाएतस्येति ॥ सदसदृष्टुसतोद्रष्टुसत्वायोगिसकलपदार्थद्रष्टुः शक्तिःपृथक्सिद्धविशेषणभूतामायानामप्रकृतिः सदसदात्मिकार
चेतनात्मिका ॥ भूमिरापोनलोवायुःखंमनोबुद्धिरेवच ॥ अपरेयमितस्त्वन्यांप्रकृतिंविद्धिइति चेतनाचेतनयोरुभयोरपिपरस्परविल
क्षणप्रतीत्याभिधानात् ॥ ययासदात्मिकयाप्रकृत्याइदंकार्यावस्थचेतनाचेतनात्मकंजगत्स्वयंविभुः जगद्गतदोषासंस्पृष्टः ॥ निर्ममे
सएवाग्रेषामायापिविभोःशरीरतेनसूक्ष्मावस्थयाआसीदित्यर्थः ॥ भगवानेकएवेदमग्र आत्मात्मनांविभुरासीदित्यनेनसूक्ष्म
चिदचिद्विशिष्टस्योपादानत्वं ॥ ययेदंनिर्ममेविभुरित्यनेनकेवलनिष्कृष्टस्वरूपस्यनिमित्तत्वंचाभिहितं ॥२५॥

अथ महदादिक्रमेण सृष्टिं वक्तुं शरीरभूतजीवानुप्रवेशेनाहितसृष्टिसामर्थ्याया एव प्रकृतेर्महदादिरूपेण परिणाम॥ न तु केवलाया इत्याह॥ काल
वृत्त्या मन्तरा वगुणमय्यां सम्यानापन्नसत्त्वादिगुणप्रचुरायात्मभूतेन शरीरभूतेन पुरुषेण जीवेन वीर्यं सृष्टिसामर्थ्यं स्वयं वीर्यवानपि सन्नेवा
धत्तं संपादितवान्॥ मायाभिमानी स्वात्मकजीवानुप्रवेशेन मायां स्रष्टुं सत्त्वीमकरोदित्यर्थः॥ २६॥ महतः सृष्टिमाह॥ तत इति॥ तत आहितवी
र्यात् कालचोदितात् कालप्रेरितात् अव्यक्तात् स्वात्मकादव्यक्तात् स्वयमेव विज्ञानात्मा विज्ञानं यज्ञं तत्तु नेदमुक्तं जीवांतरात्मा आत्मदेहस्थं स्वशरीरभू
तप्रकृतिगतं विश्वं कार्यजातं व्यंजयन् प्रकाशयन् प्रकाशयितुमित्यर्थः पर्यवसानं वोधं तमोनुदः तमः शब्दवाच्यसूक्ष्मावस्थप्रकृतिप्रेरकोभ

कालवृत्त्यां तु मायायां गुणमय्यामधोक्षजः॥ पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान्॥ २६॥ ततोऽभवन्महत्तत्व
मव्यक्तात्कालचोदितात् विज्ञानात्मात्मदेहस्थं विश्वं व्यंजंस्तमोनुदः॥ २७॥ सोऽप्यंशगुणकालात्मा भगव
द्दृष्टिगोचरः॥ आत्मानं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया॥ २८॥

वदित्यर्थः प्रकृतिपुरुषशरीरको भगवानेव मह
त्तत्त्वशरीरकोऽभूदित्यर्थः॥ २७॥ महतोऽहंकारसृष्टिमाह सोऽपीति॥ सोऽपि स महानपि अंशगुणकालात्मा अंशो जीवः॥ अंशो नाना व्यप
देशात्॥ ममैवांशो जीवलोके जीवभूतः सनातन इति प्रयोगात्॥ गुणाः सत्त्वादयः कालश्चैतैरुपलक्षितः॥ आत्मा स्वरूपं यस्य सः कालवश्य
गुणमयो जीवं गर्भस्थेत्यर्थः॥ भगवद्दृष्टिगोचरः॥ भगवतो दृष्टिः संकल्परूपं तस्य गोचरः विषयः आत्मा परमात्मकः सोऽह्यात्मेति सामाना
धिकरण्येन शरीरात्मभावनिर्वंधनं॥ एवंभूतो महानस्य सिसृक्षया अहंकारादीनि स्रष्टुमिच्छया आत्मानं स्वात्मानं व्यकरोत् विकृतमकरोत्

॥२५॥

महत्तत्वादिति ॥ विकुर्वाणाद्विक्रियमाणान्महत्तत्वादहंकार अजायत उत्पन्नोभवत् ॥ कथंभूत कार्यकारणकर्त्रात्मा कार्यं शरीरं कारणमिंद्रियं तयोः क
र्त्तात्मा कर्तृरूपः कारणभूत इत्यर्थः तद्विवृणोति भूतेंद्रियमनोभवः भूतेंद्रियमनसां भवः भवत्यस्मादिति भावः ॥ भूतेंद्रियमनोमय इति पाठे भू
तेंद्रियरूपपरिणामस्वभावप्रचुरः ॥ २९ ॥ अहंकारं विभजते ॥ वैकारिकः सात्विकाहंकारः तैजसो राजसो राजसाहंकारः तामससाहंकारः
तस्यैव भूतादिरिति नामांतरम् ॥ वैकारिकाहंकारकार्यमाह अहंतत्वादिति कुर्वाणाद्विक्रियमाणाद्वैकारिकात्सात्विकात्मनोभूदुद्भूत्
ये देवा दिगादिदेवाधिष्ठेयानींद्रियाणीत्यर्थः ॥ न तु दिगादिदेवास्तेषां चतुर्मुखस्य वक्ष्यमाणतयातदुत्पत्ते ॥ पूर्वं तेषां त्वसंभवात् अतो दे

महत्तत्वाद्विकुर्वाणादहंतत्वं व्यजायत ॥ कार्यकारणकर्त्रात्मा भूतेंद्रियमनोभवः ॥ २९ ॥ वैकारिकस्तैजसश्च ता
मसश्चेत्यहं त्रिधा ॥ अहंतत्वाद्विकुर्वाणान्मनो वैकारिकादभूत् ॥ वैकारिकाश्च ये देवा अर्थाभिव्यंजनं यतः
॥ ३० ॥ तैजसानींद्रियाण्येव ज्ञानकर्ममयानि च ॥ तामसो भूतसूक्ष्मादिर्यतः खं लिंगमात्मनः ॥ ३१ ॥ ०

अतो देवशब्देन तदधिष्ठेयानींद्रियाण्येव विवक्षितानि ये देवास्तेपि वैकारिकात्सात्विकाहंकार्यभूता इत्यर्थः ॥ कथंभूता देवाः यतो येभ्यः ।
अर्थाभिव्यंजनं शब्दस्पर्शरूपरसादीनामर्थानामभिव्यंजनमुपलंभो भवति एवंभूता देवा वैकारिकादभूवन्नित्यर्थः ॥ ३० ॥ ३१ ॥ ज्ञानक
र्ममयानि ज्ञानेंद्रियाणि कर्मेंद्रियाणि तैजसान्येतैजसाहंकारसहकृतसात्विकाहंकारकार्याण्येवेत्यर्थः तैजसस्य वैकारिकतामस
योरनुग्राहकत्वेन पृथक्कार्याभावादनुग्राहकत्वेनैव हि तैजसस्य कीर्यता ॥ अथ तामसाहंकारकार्यमाह ॥ तामसः भूतसूक्ष्मादिः भूताना

माकाशादीनां तत्सृष्टौ एवं प्राक्हीनां चादिः कारणं ॥ एतदेवोपपादयति यतः भूतादेः सकाशात्तान्नभो ब्रह्मणो यल्लिंगप्रमापकं शब्दः सत
तोलिंगाभतः स्वमाकाशं चाभरदित्यर्थः ॥ ब्रह्मणः ॥ शब्दैकप्रमाणकत्वं शास्त्रयोन्यधिकरणसिद्धं ॥ ३१ ॥ नभः कार्यमाह कालेत्यादि माया
सत्वादिगुणाः सोंऽशगुणाः कालात्मेति पूर्वमुक्तत्वात् अंशोजीवः कालादियोगेन हेत्वर्थे तृतीया कालादियोगेन हेतुना भगवद्वीक्षितं भगवत्सं
कल्पज्ञानविषयं नभो नभस्त एवं भूतान्नभसोनुसृतमुद्भूतं स्पर्शतन्मात्रं विकुर्वत्क्रियमाणं सदनिर्ममेऽसृजत ॥ ३२ ॥ स्पर्शोद्भूतस्तन्तोनिलो वायु
विकुर्वाणः नभसा नभोगुणेन शब्देन सहितः स्वयं चोरुबलान्वितः अधिकबलयुक्तः बलमपि प्राणेनौजः सहसामप्युपलक्षणं रूपतन्मा

कालमायांशयोगेन भगवद्वीक्षितं नभः ॥ नभसोऽनुसृतं स्पर्शं विकुर्वन्निर्ममेनिलम् ॥ ३३ ॥ अनिलोपि विकुर्वा
णो नभसोरुबलान्वितः ॥ ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनम् ॥ ३४ ॥ अनिलेनान्वितं ज्योतिर्विकुर्वत्प
रवीक्षितम् ॥ आधत्ताम्भो रसमयं कालमायांशयोगतः ॥ ३५ ॥ ज्योतिषाम्भोनुसंसृष्टं विकुर्वद्ब्रह्मवीक्षितम्
महीं गंधगुणामाधात्कालमायांशयोगतः ॥ ३६ ॥

त्रं ससर्ज रूपतन्मात्रं च लोकस्य लोचनं प्रकाशकं ज्योतिः तेजः ससर्ज ॥
॥ ३४ ॥ नच ज्योतिरनिलेनान्वितं स्पर्शगुणेनान्वितम् ॥ अनिलेनेति नभसोप्युपलक्षणम् ॥ एवमग्रेपि शब्दस्पर्शाभ्यां स्वकारणभूतगु
णाभ्यां स्वगुणेन रूपेण चान्वितं ज्योतिर्भगवत्संकल्पविषयं सत् ॥ कालमायांशयोगतो हेतो रसमयं रसगुणकमंभः जलमधमात्सृजत्
भगवद्वीक्षणकालमायांशयोगाः सर्वत्रान्वेतव्याः रसमयं अंभः ससर्जेत्यनेन प्रथमं रसतन्मात्रं ततोंभ इति क्रमो विवक्षितः ॥ ३५ ॥
ततोंभो ज्योतिः स्पर्शशब्दैरनुसंसृष्टमनुसंहितं ब्रह्मसंकल्पविषयं कालादियोगतो हेतोः गंधगुणां महीमधात् प्रथमं गंधं ततो महीं चाधा

भूतानामिति ॥ हे भव्य विदुर नभआदीनां भूतानां मध्ये अवरत्वमवरं तं भव्यं तत्तत्परानुसंसर्गकारणात् द्रव्यगुणानुवृत्त्या यथासंख्यं गुणान्विदुः
प्रथमस्यैको गुणः द्वितीयस्य द्वौ तृतीयस्य त्रयः चतुर्थस्य चत्वारः ॥ पंचमस्य पंच गुणा इत्येवं विदुः ॥३७॥ अथ एतानि पृथिव्यादि महत्तत्वा-
नि परस्परं पंचीकरणरूपसंमेलनाभावात् ब्रह्मांडरचनायामसमर्थानीश्वरं तुष्टुवुरित्याह एत इति ॥ ननु भगवद्दृष्टिगोचरः ॥ भ-
गवद्वीक्षितं नभः परवीक्षितं ब्रह्मवीक्षितमिमेषां तत्त्वानां भगवत्संकल्परूपज्ञानविषयकत्वोत्पत्त्या स्वसृष्टिसामर्थ्यावगमात् पुनः स्तुतिप्रीत-
परमेश्वरानुप्रवेशकृतसामर्थ्ये क्रिविंतिध्यते न चान्य एव वसमाणोऽनुप्रवेश इति वक्तुं शक्यं विभोरीश्वरस्य ज्ञानेनैवानुप्रवेशस्य वाच्यर

भूतानां नभआदीनां यद्यद्भव्यावरावरम् ॥ तेषां परानुसंसर्गाद्यथासंख्यं गुणान्विदुः ॥ ३७ ॥ एते देवाः कला विष्णोः
कालमायांशलिंगिनः ॥ नानात्वात्स्वक्रियानीशाः प्रोचुः प्रांजलयो विभुम् ॥ ३८ ॥

भावतैव तेषां शरीरत्वोपपत्तेः आ-
धेयत्वशेषत्वानां शरीरत्वनिर्वाहकत्वं यच्चेतनस्य यद्द्रव्यमाधेयं शेषं च तत्तस्य शरीरमिति ॥ हि शारीरलक्षणमेवं पूर्वं महदादीनां स्व-
स्वकार्योत्पादनसामर्थ्यवहेश्वरप्रवेशस्योक्तत्वात् येभिः ॥ सर्वैः संहत्यांडोत्पादनसामर्थ्यापादकानुप्रवेशस्यानुक्तत्वेनैवंविधानुप्रवेश-
यस्तु तेन ततः प्रीतपरमात्मनोऽनुप्रवेशस्य ततोऽण्डसृष्ट्योपपत्तेः ॥ एते महदादयो देवाः देवस्य भगवतः शरीरत्वाद् इत्युक्तिः यथा
हं ताहमिमास्तिस्रो देवता इत्यादौ कालमायांशलिंगिनः कालमायांशरूपाणि लिंगानि यस्य से तीति कालमायांशलिंगी तस्य कालमा-
याजीवशरीरस्येत्यर्थः विष्णोर्भगवतः कलाः शरीरभूतानां नानात्वात् परस्परसंबंधाभावात् स्वक्रियायामनीशा असमर्थाः संतः

विभुं भगवंतं प्रांजलयो बद्धांजलयः प्रोचुः तुष्टुवुः ॥३८॥

भा.ए.टी.

॥२७॥

नन्वचेतनानांमहदादीनांतोहतानुपपत्तिः नवाधिष्ठातृत्वाण्यमुपपन्नमितिप्राकुतं ॥ अंतरस्यध्यनंतरंवतुमुखस्वस्वप्नारणरित्येंद्रादीनांमंडस्यशेषः
प्रोक्तानुपपत्तेः ॥ नचतत्वशरीरकपरमात्मनः स्तोत्रत्वमुपपन्नमितिव्याचष्ट ॥ स्तुमत्वस्तोत्रत्वयोरेकस्मिन्नसंगतत्वात् ॥ ब्रह्मणः सर्वोपादान
त्वेनसर्वविकाराश्रयत्वेपिमहदादिकविकाराश्रयत्वेनतस्यजीवद्वारैवस्तोत्रत्वादुच्यतेपरमाकाशवर्त्तिनस्तत्वाभिमानिदेवास्तत्वान्यधि
ष्ठायनुष्टुवुः ॥ इतंचतुःषोडशपंचशक्तिमितिपरमाकाशेतत्वाभिमानिदेवतास्थितत्वगमात् ॥ यद्वापुरुषेणात्मभूतेनवीर्यमाधत्तेत्र
वीर्यवानितिजीवद्वारैवपरमात्मनोमहदादिष्टदिव्यंततत्वेष्वनुप्रवेशकथनात्परमात्मकादृष्टविशेषसचिवजीवानुप्रवेशसंपा

देवा ऊचुः ॥ नमाम ते देव पदारविंदं प्रपन्नतापोपशमातपत्रं ॥ यन्मूलकेता यतयोऽञ्जसोरुसंसा
रदुःखं वहिरुत्क्षिपंति ॥ ३९ ॥
इतस्तत्र्हिसामर्थ्यानांतत्वानांस्वस्वकार्येतादृकत्वावतस्तोत्रत्वोपपत्तेरिति ॥ प्रथमंका
रणत्वव्याप्तोपास्यत्वमोक्तप्रदत्वगुणविशिष्टंप्रणमंति ॥ नमामइति ॥ हेदेवभगवन् तेतवपदारविंदंनमामनमस्कुर्मः ॥ कथंभूतं
पदारविंदंप्रपन्नतापोपशमातपत्रंप्रपन्नाः शरणागतास्तेषांयेतापा ॥ आध्यात्मिकाधिदैविकाधिभौतिकास्तेषांउपशमेनिर्हर
णे ॥ आतपत्रछत्रमिववर्त्तमानम् ॥ अनेनतापत्रयात्त्रातृत्वमुक्तं यन्मूलकेताः यत्पदारविंदमूलमेवकेतनमाश्रयोयेषां
यतयः मनोनियमनुयतमानाः अंजसासुखेनसंसारदुःखं ॥ अनेनमोक्षप्रदत्वमुक्तंवहिर्दूरतएवउत्क्षिपंतित्यजंति ॥
सांसारिकः ॥ सुखंदुःखंशब्देनविवक्षितं ॥ मुमुक्षोरिष्टप्राप्तिविरोधित्वात्सुखस्यापिदुःखशब्दवाच्यत्वात् ॥ ३९ ॥ ॥ ॥२७॥

तद्व्यतिरेकमुखेनापि कथयंतो नमस्कुर्वंति ॥ कृतइति हे ईश अस्मिन् भवे संसारे यद्दतेयत् भगवत्पदांबुजं विना भगवत्पदांबुजोपासनं विना तापत्र
येणाभिहताः जीवा आत्मनः आत्मनि संबोधनं वा शर्मसुखं न लभंते ॥ अतोन्वयव्यतिरेकाभ्यां भगवत्पदांबुजोपासनस्यैव तापत्रयनिवृत्तिपूर्व
कमुक्तिसाधनत्वाद्धेतोः हे भगवन् त्वं तवांघ्रिछायां विद्यां मुक्त्युपायम् अतो पासनात्महितां अंघ्रिछायां मुक्तिमाश्रयेम उपासनानिष्ठ्या मुक्तिं
प्राप्नुयामेत्यर्थः ननु कथं भगवत्पदांबुजोपासनमात्रेण सांसारिकसुखनिवृत्तिरुच्यते ॥ यतस्तत्सुखदुःखोत्पादकपुण्यपापरूपकर्मणा
मविनश्वरत्वादित्याशंकां तदुपासनस्यैवात्यंतिककर्मनिरासकत्वमपीति सूचयंतस्तद्भगवत्पदांबुजस्यैव मुमुपास्यत्वाद्वयमपि तमेव शरणं

धातर्यदस्मिन्भव ईश जीवास्तापत्रयेणाभिहता न शर्म ॥ आत्मंल्लभंते भगवंस्तवांघ्रिछायां सविद्यामत आश्रयेम ॥४०
मार्गंति यत्ते मुखपद्मनीडैश्छंदः सुपर्णैर्ऋषयो विविक्ते ॥ यस्याघमर्षोदसरिद्वरायाः परं पदं तीर्थपदः प्रपन्नाः ॥४१

पन्नाइत्याहुः ॥ मार्गंतीति ॥ तीर्थपदस्तव त्वत्पदांबुजं वयं प्रपन्नाः शरणंगताइत्यन्वयः तीर्थपदः पवित्रपादस्यस्वाश्रितदुरितनिवर्तकपा
दकमलस्येत्यर्थः कथंभूतं त्वत्पदांबुजं पदं अघमर्षोदसरिद्वरायाः अघमर्षाणिपापहरणकानि उदकानि उदकानि यासुतासुसरित्सु मध्ये
वरायाः श्रेष्ठायागंगायाः परंपदमुत्कृष्टमुत्पत्तिस्थानं ॥ एतेन समस्तजनदुरितनिवर्तकसरिद्वराया एवंदुरितनिवर्तकत्वात्तदुत्पत्ति
स्थानं भगवत्पदांबुजस्य दुरितनिवर्तकत्वं कैमुत्यन्यायसिद्धं ॥ यथापुष्करपलाश आपो न श्लिष्यंते एवमेवंविदि पापं कर्म न श्लिष्यते
इत्यादिकाश्श्रुतिरत्रानुसंधेया ॥ उपासकानामात्यंतिकपुण्यपापनिवृत्तिपूर्वकनिरतिशयसुखप्रापकत्वाद्वेत्वत्पदांबुजं ऋषयः

उपाशत इत्याहुः ॥ मार्गंतीति ॥ त्वन्मुखपद्मनीडैर्मुखकमलनिलयैर्मुखकमलोत्पन्नैरितियावत् तमेतद्ब्रह्मवेदइतिश्रुतेः ॥ भगवन्मुखकमलोत्पत्ति
स्थानैश्छंदःसुपर्णैर्वेदरूपैःपक्षिभिर्नीडंप्राकुंनाइव जातपक्षा इतिन्यायेन साम्यं बोध्यं ॥ यथा नीडे जातपक्षाः पक्षिणो नीडादुड्डीना इतस्ततः परिभ्रम्य
पुनस्तत्रैव प्रविशंति तथा वेदा अपि त्वन्मुखादुत्पन्नास्तत्रैव पर्यवस्यंतीत्यभिप्रायः एवंविधैश्छंदःसुपर्णैः विविक्तैर्निःसंगैर्मनसि ऋषयः मार्गं
तिपरिशीलयंति वेदोक्तकर्मज्ञानोपासनाप्रवृत्तियोगैर्यथाकथंचित्तत्सारविद्वद्वर्यं प्रपन्ना इत्यर्थः ॥४१॥ ननु कथं मार्गसंपत्स्यते इत्याहुः
यदिति श्रद्धया श्रद्धायुक्तया श्रद्धानाम स्वचिकीर्षितत्वधीराविशेषः श्रुतवत्या श्रुतिविहितपंचमहायज्ञादिरूपासंगकर्मयोगयुक्तया भक्त्या
उपासनया वैराग्यशब्दादिविषयनासक्तिः तदेव बलं यस्य तेन ज्ञानेन प्रकृतिविविक्तात्मज्ञानेन ज्ञानकर्मयोगानुगृहीतभक्तियोगेन संमृज्यमा

यच्छ्रद्धया श्रुतवत्या च भक्त्या संमृज्यमाने हृदयेऽवधार्य ॥ ज्ञानेन वैराग्यबलेन धीरा व्रजेम तत्तेंऽघ्रिसरोजपीठं ॥४२॥
विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदांबुजं ते ॥ व्रजेम सर्वे शरणं यदीश स्मृतं प्रयच्छत्यभयं स्वपुंसां ॥४३॥

ने शोध्यमाने हृदये अवधार्य धारणाविषयं कृत्वा धीरा जितेंद्रिया यद्न्वेषयंति तत्तवांघ्रिसरोजपीठं शरणं व्रजेम ॥ अतमार्गणप्रकारउक्तः ॥४२॥
अथ भगवतः भक्तानुग्राहकत्वं आहुः ॥ विश्वस्येति ॥ हे ईश यत्ते पदांबुजं स्वपुंसां स्वभक्तानामभयं शत्र्वादिभिरप्रतिहतं स्मृतं भावेक्तः ध्रुवा
नुस्मरणं ॥ यद्वाभयं न विद्यते भयं संसारो यस्मात्तथाभूतं स्मृतं प्रयच्छति इद्धानि निवर्त्तयतीत्यर्थः ॥ ते तव पदांबुजं यं सर्वे शरणं व्रजेम कथं
भूतस्य ते विश्वस्य जगतः सर्गस्थितिसंयमार्थे सृष्टिस्थितिसंहारार्थं कृतावतारस्य कृतब्रह्मरुद्रानुप्रवेशस्यावतारस्येदमेव हि स्वभक्ता
नुग्राहकत्वं तापत्रयाभिहतिनिवर्तकं नित्यनिरतिशयानंदसाधनं भक्त ॥ वानुस्मरति निर्विभैकत्वम् ॥४३॥ ॥ ॥ ॥ ॥

स्वभक्तानां प्रयच्छतीत्यनेनाभक्तानननुग्राहकत्वं सूचितं तत्प्रतिपादयंतः शरणं व्रजंति ॥ यदिति ॥ सानुबंधे अनुबध्नंतेइत्यनुबंधाः पुत्रदाराद
यः पात्रवस्त्रादयः देहानुबंधिनो गृहानुबंधिनश्चतैः सहिते ऽसति अचेतनपरिणामरूपे देहगेहे समाहारं द्वंद्वे एकत्वम् ॥ ममेदं देवोऽहंम
नुष्योऽहं इत्युरुः निरूढः दुराग्रहः दुरभिमानो येषां तेषां पुंसां पुंसां शरीरे हृदयगुहायां इत्यर्थः वसतोपि वात्सल्यातिरेकात्पुरीमधितिष्ठतोपि
तेतव ॥ हे भगवन्नस्मदांवुजं सुदूरमतिविप्रकृष्टं तत्संदांवुजं शरणं व्रजेमेत्यर्थः ॥ ४४ ॥ अहंसमाभिमानग्रस्तचित्तानां शास्त्रसंगतिरेव दुर्ल
भा कुतः शास्त्रसंगमिशुश्रुषा चार्योपसत्तिप्रणज्या भगवत्संदांवुजोपासनं नि ईत्तिः स्या हि साहुः तानितिहे परेश परेषां ब्रह्मादीनां ईश
नियंतः असद्वृत्तिभिरचेतनपरिणामरूपशब्दादिप्रवणैरसत्तिभिरिंद्रियैः परारूढं दूरमयकृष्टं अंतस्थं मनो येषां ते ये लोकास्वात्मप
यत्वानुबंधे सति देहगेहे ममाहमिति रूढदुराग्रहाणां ॥ पुंसां सुदूरं वसतोपि श्रयां व्रजेम तत्ते भगवत्पदाब्जं ॥ ४४ ॥ तान्वा
असद्वृत्तिभिरक्षिभिर्ये पराहृतांतर्मनसः परेश ॥ अथो न पश्यंत्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ॥ ४५
श्यंति वै प्रसिद्धं केन पश्यंतीत्यत आह हे उरुगाय बहुगेहये तव पदन्यासविलासलक्ष्म्याः ॥ पदयोर्न्यासः ॥ स्वात्मसमर्पणं तस्य विलासो
विलसितं येषां ते प्रामादयो गुणास्तेषां लक्ष्मीः संपद्येयां ते भगवत्पादारविंदात्मसमर्पणविलसितप्रामादिगुणसंपत्समृद्धा इत्यर्थः ल
क्ष्मीतित्वतीयांत पावेत यो पलक्षितानाइत्यर्थः अथो तये वनपश्यंति नवीक्षंते किमुत तत्संगतिं न कुर्वंति ॥ यथा इति पाठे अथ ऽत्ति सध्या
हर्तं वाम ॥ ययः मार्गांभ्रष्टान्न पश्यंतीत्यर्थः ॥ लक्ष्मीमिति द्वितीयांत पाठे ये यद्इति पाठे च अपदन्यासविलासलक्ष्मीं नितिपदच्छेदः ॥ पदन्यास
विलासलक्ष्मी रहिताननत एव पथः मार्गाद्भ्रष्टामार्गं तिय ते इति पूर्वप्रस्तुता भगवदुपासकान पश्यंतीत्यर्थः त्वां वेत्यपि पाठः ॥ असिम्मा

भा.टी.

॥२९॥

ते एवमाहुः स्मितपूर्वदृष्ट्युपग्रहाणां पुंसां भवत्पदांबुजं सुदूरमिति युक्तं तेषामप्युपासनाधिकृतानां संनिकृष्टं स्यादित्याशंकायामुपासनाधिकार एव तावद्दु
र्लभ इत्याहुः त्वामिति अस्मिन्भावे भ्रष्टा इति प्रथमांतं अध्याहारः ये ऽसद्वृत्तिभिः पराहृतांतर्मनसो न एव सन्मार्गः भ्रष्टा ये ते त्वां न पश्यंति नोपास
ते ॥ तर्हि के उपासत इत्यत आहुः ॥ ये इति ॥ त्वमस्मासविलाससलक्ष्मस्तु पश्यंतीत्यर्थः ॥ लक्ष्म्या इति पंचम्यंतपाठे यथ इत्यस्य विशेषणं
पदन्यासविलाससलक्ष्मीरूपामघो भ्रष्टा न पश्यंति ॥ अस्मिन्भावे भ्रष्टा इति पाठे अभ्युपगमे लक्ष्म्याः भ्रष्टाः अथो ऽत एव न पश्यंतीत्यर्थः ॥ ४५
एवमनुग्राहकत्वानुग्राहकत्वे उक्ते ॥ अथानुग्रहविषयेष्वपि भगवत्कथा श्रोतॄणां समाधिपरेभ्यः सौकार्यमाहुर्द्वाभ्याम् ॥ पानेनेति

तथा परे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठाम् ॥ त्वामेव
धीराः पुरुषं विशंति तेषां श्रमः स्यान्न तु सेवया ते ॥

हे देव ते कथासुधायाः ॥ अमृततुल्यकथायाः पानेन श्रवणेन प्रवृद्धभक्त्या प्रवृद्धे प्रेमात्मकज्ञानेन विशदाशयाः निर्मितांतःकरणाः अन्ये
नोपायो नास्ति प्रतिबंधकपुण्यपापनिवृत्तिरुक्ता भवति वैराग्यं सारं वैराग्येण सारभूतं वैराग्यं नाम निष्कामपर्यायं कामेष्वलालसत्व
रूपं कामानभिष्वंगत्वं ॥ इदं च विवेकादीनामप्युपलक्षणम् ॥ विवेकादिसाधनसत्यकानुग्रहीतबोधं तैलधारावदविच्छिन्नस्मृति
संतानरूपं भक्त्युत्पन्नं प्रेमात्मकं ज्ञानं प्रतिलभ्यांजसासुखेनाकुंठधिष्ण्यं कालसत्त्वादिगुणादिभिरप्रतिहतं वैकुंठाख्यं मुक्तप्राप्य ॥२९॥
स्थानं यथा यान्वीयुः प्राप्नुयुः ॥ ४६ ॥

अथापरे चात्मेष्यात्मसमाधियोगवलेनात्मनोंतःकरणस्य यः समाधिस्थैर्यंस्सावयोगः उपायस्तस्य वलेन यद्वा आत्मनः परमात्मनः यः स
माधिः ॥ स एव योगस्तस्य वलेन निष्पादनेन परिपक्वभगवत्समाधिनावलिष्ठां दुस्तरां प्रकृतिं भगवन्मायां जित्वा तीर्त्वा धीरा जितेंद्रियाः
पुरुषं परमपुरुषं त्वामेव विशंति प्राप्नुवंति तथापि तेषां श्रमः स्यात् ॥ अष्टांगयुक्तभक्तियोगनिष्ठानां श्रमः स्यात् ॥ एकैकस्यांगस्येव दुःसं
पाद्यत्वात् ॥ न तु सेवया ते कथाश्रवणादिरूपत्वत्सेवयोपलक्षितानां तु न श्रम इत्यर्थः ॥४७॥ तदेवं स्तुत्वा स्वस्याभिप्रायमाविष्कुर्वंति ॥
नरित्यादिभिश्चतुर्भिः ॥ नोऽस्माकं शरणागतत्वाद्धेतोः हे आद्यपरमकारण ते वयं तत्संवंधिनो वयं लोकसिसृक्षया लोकान्स्रष्टुमिच्छया

तथापरे चात्मसमाधियोगवलेन जित्वा प्रकृतिं वलिष्ठां ॥ त्वामेव धीराः पुरुषं विशंति तेषां श्रमः स्यान्न तु सेवया ते
४७ ॥ तत्ते वयं लोकसिसृक्षयाद्य त्वयानुसृष्टास्त्रिभिरात्मभिः स्म ॥ सर्वे वियुक्ताः स्वविहारतंत्रं न शक्नुमस्तत्प्रतिह
र्त्तवे ते ॥४८॥

त्रिभिः सत्वादिभिर्गुणैः स्वे आत्मन्याधारभूते सृष्टाः स्मेति पाठे आत्मभिः शरीरभूतैस्त्रिभिरित्यर्थः ॥ अनुसृष्टाः मह
दाद्यनुक्रमेणानुसृष्टाः सर्वे वियुक्ताः परस्परमसंमिलिताः ते तुभ्यं स्वविहारतंत्रं स्वाधिकारनिर्वहणं प्रतिहर्त्तवे प्रत्यवहर्तुं त्वल्लीलो
पकरणब्रह्मांडरचनारूपप्रत्युपकारार्थं न शक्नुमः ॥४८॥ प्रतिहरणसामर्थ्यमेव प्रपंचयंति यावदिति ॥ हे अज काले तत्तदवसरे
तेन तव वलिं मारा धनं यथा हरामः समर्पयामः करवामेति यावत् ॥ वयं च भगवत्क्रीडोपकरणभूता वयमप्यन्नं शब्दादिभोगपम् ॥ यथा
हरामः अनुभुंजामः ॥ यथा चेमे लोकाः सृज्यमाना हे वादरयोर्लोकाः उभये येषां ज्ञानकर्मेंद्रियाणां वलिं शब्दादीन् गंतव्यादीश्चाविषया

भा.तृ.टी.

॥ ३० ॥

न्दहरंतः उपस्थापयंत ॥ अनूहाः निस्संशयाः अत्र मद्दंतिसुखमनुभवंति ॥ तथाकर्त्तुंनशक्नुमइत्यर्थः ॥ यावच्छब्दोवधारणे ॥ न
शक्नुमेतियावन्नशक्नुमएवेत्यर्थः ॥ ४९ ॥ एवंब्रह्मांडसृष्टावसामर्थ्यमावेद्यायतत्सामर्थ्यंप्रार्थयिष्यंतस्त्वमेवतत्स्रष्टुंसमर्थइ
त्याहुः त्वंनइति ॥ सान्वयानांसकार्याणांसुराणांनः अस्माकंत्वमाद्यः कारणभूतोसि ॥ आद्यत्वेनविकारित्वमाशंक्याहुः कूटव
त्स्थः निर्विकारः तर्ह्याद्यत्वमयुक्तमित्याशंक्योक्तंपुरुषइति ॥ पुरुषेतेपुरुषः तत्तद्देहांतरात्मतयावस्थितः नतुतद्गुणगतविकाराश्रय

यावद्बलिंतेजहरामकालेयथावयंचान्नमदामयत्र ॥ यथोभये
षांतइमेहिलोकाबलिंहरंतोन्नमदंत्यनूहाः ॥ ४८ ॥ त्वंनः
सुराणामसिसान्वयानांकूटस्थआद्यःपुरुषःपुराणः ॥ त्वंदे
वशक्त्यांगुणकर्मयोनौरेतस्त्वजायांकविमादधेजः ॥ ५० ॥

इत्यर्थः ॥ तस्यापिकारणांतरमाशंक्योक्तंपुराणइति सर्वापेक्षयात्वमेवपुराणः नतुत्वदपेक्षयाकिंचित्सुराणमस्तीत्यभिप्रायः एवंभूतो
ऽजस्त्वंहेदेवगुणकर्मयोनौ प्राकृतादिगुणग्राहकज्ञानेंद्रियाणांकर्मेंद्रियाणांयोनौकारणभूतायांशक्त्यांमायास्वापृथक्सिद्धविशेषण
भूतायामजायांप्रकृतौरेतः सृष्टिसामर्थ्यंकविंसमष्टिपुरुषंब्रह्माणंचादधौनिहितवान् ॥ पुरुषेणात्मभूतेनवीर्यमाधत्तवीर्यवा

॥ ५० ॥ [illegible] ॥ ३० ॥

तस्यज्ञानस्यनिमित्तानिसाधनानियानिसूरिभिःप्रोक्तानिचहेअनघब्रूहीत्यर्थःगुरूपदेशमंतरेणसर्वगमेतन्नसंपद्यतइत्याह॥स्वतःगुरूपदेशमंत
पुंसांज्ञानंकुतोभक्तिःततोवैराग्यंचकुतःस्यात॥ततोज्ञानभक्तिवैराग्याद्येर्गुरूपदेशमंतरेणासंपत्तेः॥३९॥हरेःकर्मविवित्सयाभगवद्विचेष्टितंबुभु
त्सयैतानस्मान्स्वत्रविषयानयान्पृच्छतःअजयाप्रकृत्यानष्टचक्षुषःहृतज्ञानस्यातएवाबोधस्यमेमह्यंब्रूहीत्यन्वयभेदान्नपौनरुक्त्य॥४०॥भवभय
भीतस्यतत्त्वोपदेशेनाभयप्रदानान्नान्योत्तमोधर्मोस्तीत्याह॥सर्वइति॥वेदाध्ययनाध्यायनार्थज्ञानानिवेदशब्देनविवक्षितानि॥यज्ञादयोवेदार्थानु
निमित्तानिचतस्येहप्रोक्तान्यनघसूरिभिः॥स्वतोज्ञानंकुतःपुंसांभक्तिर्वैराग्यमेवच॥३९॥एतान्मेपृच्छतःप्रश्नान्हरेः
कर्मविवित्सया॥ब्रूहिमेऽज्ञस्यमित्रत्वादजयानष्टचक्षुषः॥४०॥सर्ववेदाश्चयज्ञाश्चतपोदानानिचानघ॥जीवाभ
यप्रदानस्यनकुर्वीरन्कलामपि॥४१॥श्री क वा सइत्थमापृष्टपुराणकल्पःकुरुप्रधानेनमुनिःप्रधानः॥प्रवृ
द्धहर्षोभगवत्कथायांसंचोदितस्तंप्रहसन्नुवाच॥४२॥दानरूपाःयज्ञाःपंचमहायज्ञादयःतपोऽनशनादिज्ञानमुपासनंएतानिस
र्वाणिजीवाभयप्रदानस्यास्यसंसारनिवृत्त्युपायोपदेशरूपाभयप्रदानधर्मस्यकलांमात्रामपिनकुर्वीरन्॥४१॥विदुरकृतप्रश्नाननुपसंहरंस्तेषा
मुत्तरप्रदानायमैत्रेयःप्रारभतइत्याहश्रीशुकःसइति॥इत्थंपूर्वोक्तप्रकारेणापृष्टपुराणकल्पःकल्प्यतइतिकल्पंपुराणार्थमत्रकल्पइति
यावत्तस्यप्रकाशकतयाकल्पइत्युक्तं॥आपृष्टःआसमंतात्पृष्टःपुराणकल्पोयस्यसःमुनिप्रधानःमुनिश्रेष्ठोमैत्रेयःकुरुप्रधानेनवि
दुरेणभगवत्कथायांसंचोदितःप्रवर्त्तितः॥अतएवप्रवृद्धहर्षःप्रहसन्निवप्रश्नानांसुंदरत्वात्सुखेनोत्तरयितुंशक्यत्वाच्चहसन्निवतंप्र

त्याहेत्यर्थः ॥ अत्रेदं ज्ञेयं तावद्राजप्रश्नानां विदुरप्रश्नानां चैकरूप्यं प्रतीयते उभयत्रोभयेषां प्रत्यभिज्ञानात् ॥ अप्रत्यभिज्ञानात्तु पलक्ष
णतया युक्ताः आत्रेषां केषांचित्प्रश्नानां मैत्रेयोक्तमेवोत्तरं गणितं तृतीयतुरीयाभ्यामाह शुकः ॥ अन्येषां तु स्वयमेतद्व्याख्यानप्रवर्तनेनोपरि
तनैः स्कैराचचक्षे मैत्रेयस्य कार्त्स्न्येन प्रश्नानामुत्तरानभिधानं तु विदुरस्य महात्मनो भगवद्धर्मप्रवर्तकस्योत्तरितप्रश्नैरेव बुभुत्सायाः
शांतत्वादुपपद्यत इति ॥ अलमिति विस्तरेण ॥ ४२ ॥ इति श्री तृतीयस्कंधे सप्तमोध्यायः ॥ ७ ॥ एवं भगवत्कथायां हन्ता प्रवर्तितो मे

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां तृतीयस्कंधे दु ह्म प्र स ता कं नाम सप्तमो
ध्यायः ॥ ७ ॥ मैत्रेय उवाच ॥ सत्सेवनीयो बत पूरुवंशो यल्लोकपालो भगवत्प्रधानः ॥ बभूविथेहाजितकीर्ति
मालां पदे पदे नूतनयस्यभीक्ष्णम् ॥ १ ॥

मैत्रेयः तत्कृतप्रश्नानां उत्तराण्यभिधास्यमानः प्रथमं भगवन्नाभेः ब्रह्मण उत्पत्तिं भ
गवंतमज्ञानतस्तस्यैव जले विभ्रतस्तपसा भगवत्तोषणं चाष्टमेनाध्यायेनाह ॥ तत्र भगवत्कथायां प्रवर्तयितारं प्रश्नोत्तरं हन्तारमभि
नंदति ॥ सत्सेवनीय इति ॥ बताहो पूरुवंशः सत्सेवनीयः सद्भिः संमाननीयः यद्यस्माद्भगवत्प्रधानः भगवानेव प्राप्यतयोपायतया च
प्रधानः यस्य सः लोकपालधर्मराजांशभूतत्वाद्विदुरो लोकपाल इत्युच्यते एवं भूतस्त्वमिह पूरुवंशे बभूविथ उत्पन्नोभूत ॥ अतः सत्सेवनी
य इत्यर्थः ॥ भगवत्प्राधान्यमेव विशदयति ॥ अजितः परमपुरुषः तस्य कीर्तीनां यशसां माला ॥ पंक्तिस्तां पदे पदे पुनः पुनरभीक्ष्णं भृ

स्वयमपि नेंद्रष्टत्वत्कृतप्रश्नात्र केवलमस्मद्बुद्धिगोचरैरेवोत्तरयाम्यपि तु सत्संप्रदायागतश्रीभागवताख्यानेनैवेत्याह ॥ सोहमिति ॥ स भवताष्ट
ष्ट अहं सदाचार्यश्रीपराशरकृपया परावरतत्वदर्शी भवत्कृतप्रश्नोत्तरविवक्षया भागवताख्यं पुराणं प्रवर्तये ॥ प्रवर्तनफलमाह क्षुल्लसु
खायाल्पसुखायाल्पसुखसंपादनार्थं महदधिकं दुःखं गतानां प्राप्तानां लोकानां तस्य महतो दुःखस्य विरमाय नाशाय ॥ अनेन लोकोज्ञि
जीविषयेवायं संवादः प्रवृत्त इत्यवगम्यते उभयोरपि बहुज्ञत्वेन दृष्टव्यवक्तव्यांतराभावात् ॥ कथं भूतं पुराणं यद्भागवतं पुराणं भगवान्सं
कर्षणः ऋषिभ्यः सनकादिभ्यः साक्षादाहतथाभूतमित्यर्थः ॥ द्वेधा हि भागवतसंप्रदायः एकं हि भागवतं भगवंतमारभ्य चतुर्मुखनार

सोहं नृणां क्षुल्लसुखाय दुःखं महद्गतानां विरमाय तस्य ॥ प्रवर्तये भागवतं पुराणं यदाह साक्षाद्भगवानृषि
भ्यः ॥ २ ॥ आसीनमुर्व्यां भगवंतमाद्यं संकर्षणं देवमकुंठसत्वं ॥ विवित्सवस्तत्वमतः परस्य कुमारमुख्या मुनयोन्व
॥ एछन् ॥ ३ ॥

दव्यासद्वैपायनपर्यंत चतुःश्लोकीरूपेण प्रवृत्तं तदेव व्यासेन विस्तृतं दशलक्षणं श्रीशुकेनाधीतं राज्ञे उपदिष्टमष्टादश
सहस्रात्मकम् ॥ अपरं तु भागवतं संकर्षणमारभ्य सनत्कुमारसांख्यायनपराशरमैत्रेयपर्यंतं परं पर्या चतुःश्लोकीरूपेणैव प्रवृत्तं मैत्रेये
ण विस्तृतं विदुरायोपदिष्टं च ॥ तदेव द्वैपायनः स्कंधद्वयात्मना विहरिष्यमाणांतर्भाव्य द्वादशस्कंधात्मकं पुराणं चक्रे इति बोध्यम् ॥ २ ॥
अस्य संकर्षणभागवतस्य संकर्षणप्रभृति स्वपर्यंतं सत्संप्रदायकृतमभिधास्यमानः ॥ सनकादीनां विधिवत्संकर्षणोपसत्तिमाह
चतुर्भिः आसीनमिति ॥ उर्व्यां पातालतले आसीनमुपविष्टं भगवंतमाद्यमकुंठसत्वं रजस्तमोभ्यामप्रतिहतं सत्वं यस्य तं शुद्धसत्वमयं

भा.द.टी.
॥४६॥

दिव्यमंगलविशिष्टं इत्यर्थः एवंभूतं संकर्षणं देवकुमारमुख्याः सनत्कुमारप्रभृतयः अन्वपृछन्विधिवदुपसत्यानुपृष्टवंतं कथंभूतामुन
यः ॥ भूतचेतनाचेतनात्मकजगतः परस्यविलक्षणस्यपरमात्मनस्तत्वं याथात्म्यं विवित्सवः वक्तुमिछवः ॥ ३ ॥ तमेवसंकर्षणं विशिनष्टि
स्वधिष्णं यंवासुदेवाभिधं वासुदेवशब्दवाच्यमामनंति ॥ तं स्वधिष्ण्यं स्वावासभूतं स्वकारणं भगवंतं इत्यर्थः ॥ वहुमानयंतं सर्वोत्कर्षेण पूज
यंतं प्रतन्वद्धृताक्षांवुजकोशं प्रत्यगात्मन्याभिमुख्येन निमित्तेन धृतं मुकुलितं यन्नेत्रांवुजकोशं तं विवुधोदयाय विदुषामभ्युदयायेषुदल्सं
उन्मीलयंतं मन्वष्टृछन्निति पूर्वेणान्वयः ॥ ४ ॥ मुनीन्द्रविशिनष्टि साई्द्रनस्वर्धुनीति स्वर्धुन्या गंगाया उदकेनार्द्रैः स्वजटाकलापैः श्रीभागवत

स्वमेवधिष्ण्यं वहुमानयंते यं वासुदेवाभिधमामनंति ॥ प्रतन्वद्धृताक्षांवुजकोशमीषदुन्मीलयंतं विवुधोदयाय
॥ स्वर्धुन्युदार्द्रैः स्वजटाकलापैरुपस्पृशंतश्चरणोपधानं ॥ पद्मं यदर्चंत्यहिराजकन्याः सप्रेमनानावलिभिर्वरा
र्थाः ॥ ५ ॥ मुहुर्गृणंतो वचसानुरागस्खलत्पदेनास्य कृतानि तज्ज्ञाः ॥ किरीटसाहस्रमणिप्रवेकप्रद्योतितोद्दामफ
णासहस्रम् ॥ ६ ॥

स्य वर्णार्थं सत्यलोकात्पातालमवतरंतो निरंतरं गंगामध्यत एवावतीर्णा इति तत्स्नानेनार्द्रजगत्कलापा
इति भावः एवंभूतैर्जटाकलापैश्चरणोपधानं चरणावुपधीयते स्मिन्नग्रे इति चरणोपधानं पादपीठं उपस्पृशंतः नमस्कुर्वंतः कथंभू
तं चरणोपधानं यत्पद्ममहिराजस्य संकर्षणस्य कन्याः वरार्थाः पतिकामाः सप्रेम प्रेमसहितं भवति तथा वलिभिर्नानोपहारैरर्चंति तत
थाभूतमित्यर्थः ॥ ५ ॥ अस्य भगवतः कृतानि कर्माणि तज्ज्ञाः तानि जानंति इति तज्ज्ञाः विचेष्टिताभिज्ञाः अनुरागेण प्रेमातिशयेन स्खलंति पदा
नियस्मिंस्तेन वचसा मुहुर्गृणंतः गायंतः मुनयः किरीटानां सहस्रं तस्मिन्मणिप्रवेकाः मणिपुत्तमाः तैः प्रद्योतितं उद्दामफणानां सहस्रं य

णवमंतर्गतावस्थितिमभिधाय तस्य ब्रह्मांडसृष्ट्यौन्मुख्यमाह ॥ चतुर्विति सहस्रशब्दोऽनंतवाची ॥ अनेक अल्पमित्यर्थः चतुर्युगानां कृतादीनां सह
स्रमप्सु स्वपन् तत्र णवा साधितलोकतंत्रः अप्रंपादिति ॥ लोकरचनः स्वयोगेरितया स्वसंकल्पप्रेरितया स्वशक्त्या स्वांशपृथक् सिद्धविशेषणभूत
या कालरूपशक्त्या हेतुभूतयोपलक्षित इति वा ॥ निपीतानर्पितान् लोकान्स्वदेहे ददृशे ॥ लोककारणभूतान् भूतसूक्ष्मरूपानर्थान् दृष्ट
वानित्यर्थः ॥ स्वदेह इस्मदादिवद्विग्रहाश्रयेत्वाधिष्ठिते प्रधाने इत्यर्थः श्रीवत्ससंस्थानधर्ममनंतेनमस्यचितं प्रधानमितिहि पराश
रवचनं देहशब्दस्यादिवमंगलविग्रहत्वं परअर्पितत्वं सधारकं देहशब्दः प्रधानपरो वा यस्याव्यक्तं शरीरमिति हि श्रुतिः ॥ अत्र चतुर्युगानां

चतुर्युगानां च सहस्रमप्सु स्वपन्स्वयोदीरितया स्वशक्त्या ॥ कालाख्ययासादितकर्मतंत्रो लोकानपीतान्ददृशे स्व
देहे ॥ १२ ॥ तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरंतर्गतोऽर्थो रजसा तनीयान् ॥ गुणेन कालानुगतेन विद्धः सूष्यंस्तदाभिद्य
॥ तनाभिदेशात् ॥ १३ ॥

सहस्रं स्वपतेद्रसुक्ता नाभिदेशात्सपद्मकोशः सहसोदतिष्ठदित्यभिधानेन क्रमेणविवृद्धं तज्जलवुद्बुद
वत्सममितिवचनार्थः स्यादित्याभवति ॥ अंडसृष्टेऽपारध्यायां गृहगोपुरादिनिर्माणेष्विव विलंबो नेति हि तस्यार्थः ॥ १२ ॥ अथ ब्रह्मां
डोत्पत्तिमाह ॥ द्वाभ्यां ॥ तस्येति ॥ अर्थसूक्ष्माभिविविष्टः दृष्टेः भूतसूक्ष्मेषु प्रवर्तितकर्तृसकल्परूपज्ञानस्य तस्य भगवतो तर्गतः तनी
यान्सूक्ष्मतरोः अर्थः भूतसूक्ष्मवर्गः ॥ कालानुगतेन कालवशादुन्मिषितेन रजसा गुणेन विद्धः स्पृष्टः ॥ सूष्यन्स्वरूष्यन्नुद्भविष्यन्
नाभिदेशान्निरभिद्यत उद्भूत उद्भूतसूक्ष्मजातं जगमयस्तरूपेण परिणाममित्यर्थः रजःशब्देन पद्मरागसमाधिश्रुस्सूच्यते व ॥ १३ ॥

भा.द.टी. कथंभूतात्तो निरभिद्यत इत्यत आह ॥ आत्मयोनिः कारणं यस्य सः ॥ आत्मयोनि परमात्मस्वरूपः पद्मकोशः लोकात्मकयमरूपः कर्मजीवाद्दृष्टं तस्य
॥४८॥ तिबोधयतेनेति तथा कालेन सह मानकर्मेणोत्पथ्यः उदतिष्ठत ॥ कथंभूतः पद्मकोशः स्वरोचिषा लं तत्सलिलमावरणजलं सूर्य इव विद्योत
यन् ॥ १४ ॥ अथ भगवान्नाभिदेशादुत्पन्न ब्रह्मांडरूपपद्मकोशे चतुर्मुखोत्पत्तिमुत्पन्नस्य व्यापारं च वक्ष्यंस्तस्य तदधिष्ठितपद्मस्य च भग
वदात्मकत्वमाह सा ईंव ॥ तदिति उ इति संबोधने विस्मये वा सर्वगुणावभासं सर्वगुणान् जीवोपभोग्यार्थान् अवभासयतीति तथा तल्लोकपद्मं
स एव यस्माज्जातं स एव विस्नुः प्राविशदंतर्यामितया प्रविष्टोभूत् निहृत्त्येरणाविशालं चूधित्स्यमिति पाठांतरं तदा सर्वे गुणाः स्वष्टा

स पद्मकोशः सहसोदतिष्ठत्कालेन कर्मप्रतिबोधितेन ॥ स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयो
नि ॥ १४ ॥ तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासं ॥ तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यस्म वदं

त्वोपधिका गुणाः तैरवभास्यते इति तथाभूतं स्वात्मकं जीवविशेषं लोकपद्मरूपं धिष्ण्यं प्रावीविशदिति समक ॥ ति सोऽभूत् ॥ १५
रोत्तामिस्मरामि जेस्याप यामासेत्यर्थः कोसौ स्वात्मको जीवविशेष इत्यपेक्षायां तद्विशदयंस्तस्य तन्नोत्पत्तिमाह तस्मिन्निति ॥ यं स्वयंभु
वं प्रवदंति स वेदमयो वेदप्रचुरः ॥ विधाता स्रष्टा तस्मिन्पद्मेऽभूदुत्पन्नः उदाप्लुतमित्यादयः श्लोकाः अवांतरप्रलयपरा वा वर्ण
नायाः तदानीमर्थः सुगमः तथाहि पूर्वं सर्गश्चैवानुसर्गश्चेति चतुर्मुखात्पूर्वोत्तरसृष्ट्याः एतत्तात्र भगवानेक आसेदमग्र आ
सान्नान्नो विभुरित्यादि महाप्रलय कथनं पूर्वकमवांतरं सर्गचतुर्मुखपाद्मात्स्यः दैनंदिनः कथ्यते ॥ तत्र दैनंदिनसर्गाणां तत्प्रलया ॥४८॥

णं च बहुत्वात्तत्कथनस्य तत्क्रमणस्य चाशक्यत्वात्सर्वपराह्वं इतिनं पाद्मारव्यं कल्पमेवतत्कल्पाये क्षयासन्निहितत्वात्कथयितुं प्रलयपूर्वकत्वात्स्रष्टेः सृष्टिप्रकरणेषु सदेव सौम्येदमग्र आसीदित्यादिप्रलयकथनपूर्वकमेव सृष्टिप्रकरणेषु देवसौम्येदमग्र आसीदित्यादिप्रलयकथनपूर्वकथनाच्च प्रथमं पाद्मकल्पात्प्राक्तनं प्रलयमाह उदाप्लुतमिति निशायामनहृज्ञायो निर्मुक्तशशिभास्करं इत्यारभ्यस्त्वावयं सुक्तटाटोपचंवानोमेयदसंतवक्ष्यमाणरीत्या विश्वं त्रिलोकात्मकं जगदुदाप्लुतमासीदित्यर्थः॥ अन्यत्पूर्ववत् एवं प्रलयमभिधाय सर्गं वक्तुमारभते॥ तस्येत्यादिना॥ प्राक्कल्पांते धाता भगवतो योगनि चतुर्मुखात्प्राक्तनसर्गस्य कथितत्वात् तदुपजीव्येदानीं अवांतरप्रलयकथनपू

तस्यां स चांभोरुहकर्णिकायामवस्थितो लोकमपश्यमानः॥ परिक्रमन्
व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेनुदिशं मुखानि ॥१६॥

र्वकलोक्यास इह॥ भगवति रोहितः तस्मिन्प्रबुद्धे ततएव पाद्मे कल्पे यद्वारेणाभिव्यक्तिं प्राप्ता इति कथयितुं पद्मोद्भवमाह तस्येत्यादिना अध्यात्मं प्रावीविशत्स्य यानप्रविष्टमकरोत्नाभिसरसि स्थापयामासेत्यर्थः॥ अन्यत्पूर्ववत्॥१५॥ अस्य चतुर्मुखाख्यस्य जीवविशेषस्य कर्मणा संकुचितज्ञानस्य भगवद्रूपासनैवैर्वा विभर्तज्ञानक्रियाशक्तेर्लोककर्तृकत्वं न स्वतः इति वक्तुं तस्य प्रथमं मोहनमाह तस्यामित्यादिद्वाभ्यां सच स्वयंभूः तस्या जगत्स्य ब्रह्मकर्णिकायामवस्थितः तस्मिंल्लोकं प्रपंचमपश्यमानः तद्दर्शनार्थं व्योम्नि विवृत्तैर्विस्फारितैर्नेत्रैर्यस्मात् परिक्रमत्कमलमध्ये चतुर्दिक्षु परिभ्रमन् चत्वारि मुखानि लेभे प्राप्तवान्॥१६॥

भा.त.टी.
॥४५॥

तस्मात्तनः युगांते प्रलयांते यः श्वसनः पवनस्तेनावघूर्णं भ्रमत् यन्महोर्मीणां चक्रं तद्वत्सत तस्मात्सलिलाद्विरूढं कंजं जगत्पद्मं उपाश्रितः ॥ अ
धिष्ठितः आदिदेव स्वतुर्मुखः लोकतत्त्वं लोकात्मकपद्मतत्त्वमात्मानं चाद्धातत्वेन वेद ॥१७॥ अवेदनमेव प्रपंचयति ॥ कं जएषः एकमलक
र्णिकायां स्थितो योसावहमस्मि पृष्ठः अनन्यदद्वितीयः एतदब्जमप्सु कुतो वा जातं एवमज्ञस्य तस्य तर्कमाह ॥ अस्तीति ॥ तत्राधिष्ठाने एत
त्पद्ममधिष्ठितं तदधिष्ठानमतं किंचन वस्तु अधस्तादस्ति हि ॥ यस्मात्तेनैव सद्यनुमानाधिष्ठेयेन भवितव्यम् ॥ अधिष्ठानाभावेऽधिष्ठेय

तस्माद्युगांत श्वसनावघूर्णजलोर्मिचक्रात्सलिलाद्विरूढं ॥ उपाश्रितः कंजमु लोकतत्त्वं नात्मानमद्धाविददादिदेव
१७॥ क एष योसावहमब्जपृष्ठ एतत्कुतो वाब्जमनन्यदप्सु ॥ अस्ति ह्यधस्तादिह किंचनैतदधिष्ठितं यत्र सता नु भाव्यं
१८॥ स इत्थमुद्वीक्ष्य तदब्जनालनाडीभिरंतर्जलमाविवेश ॥ नार्वाग्गतस्तत्खरनालपद्मनाभिं विचिन्वंस्तदविंदताज
१९॥ तमस्यपारे विदुरात्मसर्गं विचिन्वतोभूत्सुमहांस्त्रिणेमि ॥ यो देहभाजां भयमीरयाणः परिक्षिणोत्यायुरजस्य
हेतिः ॥२०॥

स्य पद्मस्यासंभवादित्यर्थः ॥१८॥ स इति ॥ स ब्रह्मा इत्थं उक्तप्रकारेण उद्वीक्ष्य प्रतर्क्य तदब्जनाभिनाडीभिस्तल्लोकपद्मनालछि
द्रैरंतर्जलं जलस्यांतः प्रविवेश प्रविश्य अजः ब्रह्मा खरं कठिनं नालं यस्य तस्य पद्मस्य नाभिमधिष्ठानं विचिन्वन्नत्वेष्यन्नर्वाग्गतोपि तदा तदधि
ष्ठानं नाविंदल्लेभे ॥१९॥ तमसीति हे विदुर अपारे तमसि स्वमोवद्रूपदर्शनप्रतिबंधके जले आत्मसर्गः सृज्यतेऽनेनेति कर्तुरेव करणत्वविवक्ष
यां वा अधिकरणे घञ् आत्मकारणमित्यर्थः विचिन्वतः सतः त्रिणेमिः ॥ न्यूनाधिकसमहिवसरूपनेमित्रययुक्तः महादीर्घः कालः अभू

एवंलोकपद्माधिष्ठानभूतःपरमात्मानान्वेषणाद्वगतःकिंतुपासनयैवेत्याह ततइतिद्वाभ्यां सदेवःब्रह्माऽप्रतिलब्धकामःनप्रतिलब्धःकामः अ
धिष्ठानदर्शनरूपमनोरथःयेनसस्ततोऽन्वेषणात्प्रतिनिवृत्तःपुनःस्वधिष्ण्यंकमलकर्णिकामासाद्यशनैःजिताःश्वासाःप्राणाःनिवृत्तंविषय
विमुखंकृतंचित्तंयेनसः॥२१॥अतएवकालेनाभिप्रवृत्तोयोयोगःसमाधियोगस्तेनविरूढउत्पन्नोबोधोयस्यसःयत्पूर्वंविचिन्वताजलेनापश्य
त्तत्स्वयमेवांतर्हृदयेऽवभातमपश्यत॥२२॥तद्दर्शयति मृणालेत्यादिनवभिः॥नवस्वयमपश्यदित्यस्यैवानुषंगः॥मृणालवत्शुभ्रंतंतुव

ततोनिवृत्तोऽप्रतिलब्धकामःस्वधिष्ण्यमासाद्यपुनःसदेव॥शनैर्जितश्वासनिवृत्तचित्तोन्यषीददारूढसमाधियोगः
२१॥कालेनसोजःपुरुषायुषाभिप्रवृत्तयोगेनविरूढबोधः॥स्वयंतदंतर्हृदयेऽवभातमपश्यतापश्यतयन्नपूर्वं॥२२॥
मृणालगौरायतशेषभोगपर्यंकएकंपुरुषंशयानं॥फणातपत्रायुतमूर्द्धरत्नद्युभिर्हतध्वांतयुगांततोये॥२३॥
प्रेक्षांक्षिपंतंहरितोपलाद्रेःसंध्याभ्रनीवेरुरुरुक्ममूर्द्ध्नः॥रत्नोदधारौषधिसौमनस्यवनस्रजोवेणुभुजांघ्रिपांघ्रेः २४

गौरश्चयसावुदातश्चयःशेषस्यभोगःसएवपर्यंकःतस्मिन्शयानंएकपुरुषमपश्यत्कुत्रस्थितेपर्यंकेफणाएवातपत्राणिते
षामयुताःसर्वतोयुक्ताःयेमूर्द्धानःतेषांरत्नानिकिरीटस्थानानितेषांद्युतिभिःहतंनिरस्तंध्वांतमंधकारंयस्मिंस्तस्मिन्युगांततोयेस्थितइत्य
र्थः॥२३॥कथंभूतंपुरुषंहरितोपलाद्रेर्मरकतशिलामयपर्वतस्यप्रेक्षांशोभांक्षिपंतंस्वल्पावन्यातिशायेनतिरस्कुर्वंतं कथंभूतस्य
हरितोपलाद्रेःसंध्याभ्रमिवनीविःपरिधानंयस्य॥संध्याभ्रस्यशोभांपीतांबरेणक्षिपंतमित्यर्थःउरुरुक्ममूर्द्धः॥भूयिष्ठकनकशृंगः

भा.द.टी.
॥५०॥

सखिभिरैः कनकशृंगशोभां त्विषं तमिम्यर्थः रत्नानि च उदकधाराः उदकधाराश्च ओषधयश्च तृणज्योतींषि च सोमनस्यानि पुष्पाणि सुमनसां
समूहा एव वा तेषां वन्यस्रजे श्रेष्ठेन मालां श्रयस्तस्य वेणव एव भुजा अंघ्रिपाः वृक्षा एव वा ग्रयः प्रहा यस्य तन्वी रत्नतुलसीमुक्तापुष्पदाम
भिः भुजैरंघ्रिभिश्च वृहद्विततो पत्राद्रेः रत्नानं घ्रिपान्तानि त्विषं तद्वेत्यर्थः ॥ परिमरकताद्रेः रत्नादयो वनमालाद्य्व वेणवो भुजाद्य्व वृद्
क्षाश्चिपादाद्य्व वैर्भैरलंकृतस्य शोभां स्वीयरत्नादिभिः त्विषं तमिवेत्याभ्रतोपमेयम् ॥२४॥ किं चायामतः दैर्घ्येण विस्तरतः ॥ विस्तारे
ण स्वमानदेहेन स्वातुल्यप्रमाणदेहेन नात एव लोकत्रयसंग्रहेते ऽनेनास्मिन्निति वा ॥ लोकत्रयं संग्रहस्तेन च चित्राणि प्रतानि दिव्याभ्यमा

आयामतो विस्तरतः स्वमानदेहेन लोकत्रयसंग्रहेण ॥ विचित्रदिव्याभरणांशुकानां
कृतश्रियापाश्रितवेषदेहम् ॥२५॥ पुंसां स्वकामाय विविक्तमार्गैरभ्यर्चितां काम
दुघांघ्रिपद्मम् ॥ प्रदर्शयंतं कृपया नखेंदुमयूखभिन्नांगुलिचारुपत्रं ॥२६॥

णुपाण्याभरणानि अंशुकानि च तेषां ॥ तृतीयार्थे षष्ठी ॥ तैः कृतासंपादिता श्रीः शोभा यस्य तेनेति देहेह विशेषणं ॥ यद्वा आभरणांशुकैः ॥ कृ
तायाश्रीः तया लोकत्रयसंग्राहक स्वमानदेहे चोपाश्रित वेषदेहे उपाश्रितः प्रवृद्धः स्फीतः वेषो यस्य स एवंभूतो देहो यस्य तमिति
वहुव्रीहिगर्भो वहुव्रीहिः ॥२५॥ पुंसामिति स्वकामाय स्वाभिलषितफलाय विविक्तमार्गैरसंकीर्णैर्वर्णाश्रमादिधर्मैरभ्यर्चितामाराध
ना पुंसां कामान्स्वाभीहितफलानि दोग्धीति कामदुघं पद्मं तत्कृपया प्रदर्शयंतं पुरुषमपश्यत् कथंभूतमंघ्रिपद्मं नखा एवेंदवः तेषां मयू

रवैः किरणैः भिन्नाः संभिन्ना आप्ता इत्यर्थः ते चांगुलय एव चारूणि सुंदराणि पत्राणि यस्य तत् ॥२६॥

॥५०॥

मुखेनेति लोकानां उपासकानामार्तिहरं दुःखहरं स्मितं यस्मिंस्तेन स्फुरद्भ्यां कुंडलाभ्यां मंडितेनाधरबिंबद्युत्या शोणापितेन शोणवद्दाचरितेन
सुनसा शोभमाननासिकायुक्तेन सुभ्रा सुभ्रुवा चाननेन प्रत्यर्हयंतं उपासकान्संमानयंतं ॥२७॥ किंच कदंबकिंजल्कवत्पिसंगवर्णेन वाससा
मेखलया च नितंबेऽलंकृतं हे वत्स हे विदुर अनंतधनेन बहुमूल्येन श्रीवत्सयुक्तं यद्वक्षःस्थलं तस्य वल्लभेन सुंदरतरभूषणभूषितेन
न हारेण च स्वलंकृतं ॥२८॥ पुनः स्वं दर्शनं वृक्षरूपेण निरूपयितुं तं विशिनष्टि परार्ध्यानि केयूराणि अंगदानि मणिप्रवेषाः मणिपुत्तमास्तैः पर्य
स्ता व्याप्ता यस्य दोर्दंडा भुजदंडा एव सहस्रमनंतः शाखा यस्य तं वृक्षोऽपि केयूरादितुल्यैः फलपुष्पादिभिर्व्याप्तशाखो भवति ॥ अव्यक्तं ब्रह्म

मुखेन लोकार्तिहरस्मितेन परिस्फुरत्कुंडलमंडितेन ॥ शोणायितेनाधरबिंबभासा प्रत्यर्हयंतं सुनसेन सुभ्र्वा ॥२७॥ कदं
बकिंजल्कपिशंगवाससा स्वलंकृतं मेखलया नितंबे ॥ हारेण चानंतधनेन वत्स श्रीवत्सवक्षःस्थलवल्लभेन ॥२८॥
परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दंडसहस्रशाखं ॥ अव्यक्तमूलं भुवनांघ्रिपेंद्रमहींद्रभोगैरधिवीतवल्शं ॥२९॥
चराचरौको भगवन्महीध्रमहींद्रबंधुं सलिलोपगूढं ॥ किरीटसाहस्रहिरण्यशृंगमाविर्भवत्कौस्तुभरत्नगर्भं
॥३०॥

मूलं यस्य तं व्यक्ताभिव्यक्तिरूपत्वात् वृक्षस्यापि मूलमव्यक्तम् भुवनांघ्रिपेंद्रं भुवनकारणं अंघ्रिपेंद्रं वृक्षश्रेष्ठं अहींद्रस्यानंतस्य भो
गैर्देहावयवैः अधिवीताः संवेष्टिताः वल्शाः स्कंधा यस्य तं वृक्षोऽपि सर्पैर्वेष्टितो भवति ॥२९॥ प्रेक्षोक्षिपं तमिमं चैव पर्वतरूपेण रूपित
मपि विशेषणांतरैः पुनरूपयति ॥ चराचरैरित्यादिना ॥ भगवानेव महीध्रः पर्वतस्तं कथंभूतं चराचराणामोकः स्थानं पर्वतोऽपि तथाऽहींद्र
स्य बंधु ॥ पर्वतोऽप्यहींद्राणां बंधुः सलिलोपगूढं जलेनावृतं पर्वतो मैनाकादिस्तथा ॥ किरीटानां सहस्रमेव हिरण्यशृंगाणि यस्य तं मेर्वादि

भा॰टी॰

॥५१॥

तथा स्याविर्भवत्सद्दृश्यमानं कौस्तुभरत्नं गर्भे मूर्त्तिमध्ये यस्य तं पर्वतस्यापि हिरण्यगर्भे क्वचिद्रत्नमाविर्भवति ॥३०॥ किंच वनमालया निवीतं कंठ॰
लंबिन्या व्याप्तं कथंभूतया वनमालया आम्नायमधुव्रतश्रिया आम्नाया वेदास्त एव मधुव्रता भ्रमरास्तैः श्रीर्यस्यास्तया कीर्त्तिमय्या स्वकीर्त्तिप्रचुरया
स्वगाथयाद्भिर्वेदैरूपैर्भ्रमरैराहितशोभयेत्यर्थः ॥ सूर्येंदुवाय्वग्न्यगमं सूर्यादिभिरगमं अगमं स्वव्यापारेणाकलयितुमशक्यमित्यर्थः ॥ सूर्येंदुतारा
ग्न्यगममित्यपि पाठः तदा सूर्यादिभिरप्रकाश्यमित्यर्थः तथा च श्रुतिः न तत्र सूर्यो भाति न चंद्रतारकं इत्यादिका ॥ त्रिधामभिः त्रिधामभिः १
त्रिषु लोकेषु धामस्फूर्त्तिर्येषां तैः रक्षणार्थं परिभ्रमद्भिः प्राधनिकैः प्रधनं संग्रामस्तत्प्रयोजनकैः सुदर्शनादिहेतिभिर्दुरासदं दुःप्राप्यं

निवीतमाम्नायमधुव्रतश्रिया स्वकीर्त्तिमय्या वनमालया हरिं ॥ सूर्येंदुवाय्वग्न्यगमं त्रिधामभिः परिक्रमत्प्राधनिकैर्दुरा
सदं ॥३१॥ तर्ह्येव तन्नाभिसरःसरोजमात्मानमंभः श्वसनं वियच्च ॥ ददर्श देवो जगतो विधाता नातः परं लोकविसर्गदृष्टिः ॥
३२॥ स कर्मबीजं रजसोपरक्तः प्रजाः सिसृक्षन्नियदेव दृष्ट्वा ॥ अस्तौद्विसर्गाभिमुखस्तमीड्यमव्यक्तवर्त्मन्यभिवेशितात्मा

३३॥ तर्हीति ॥ यदैव हरिमपश्यत्तर्ह्येव तदैव लोकविसर्गदृष्टिः लोकसृष्ट्यर्थं ज्ञानं यस्य सः जगतां सृष्टीनां कर्त्ता स्रष्टा देवः ब्रह्मा तस्य १
भगवतः नाभिसरसि सरोजं श्वसनं प्रलयकालवायुं तात्कालिकमंभः आत्मानं स्वात्मानं च ददर्श तु सरोजादिभ्यः परमन्यत्सृष्टिप्र
कारादिकं न ददर्शेत्यर्थः ॥३२॥ अथालब्धजगत्सृष्टिज्ञानस्तल्लब्धये भगवंतं तुष्टावेत्याह ॥ स इति स ब्रह्मा रजसा रजोगुणेन उपरक्त
ः युक्तः ॥ अव्यक्तवर्त्मन्यभिव्यक्तमतावभिनिवेशितः आत्मा चित्तं यस्य सः ईड्यं स्तुत्यं कर्मबीजं क्रियत इति कर्म जगत्तस्य चेतत्कर्मेति
श्रुतेः तस्य बीजं कारणं भगवंतमस्तौत्स्तुतवान् ॥३३॥



इति श्री भा॰ व्याख्यायां तृतीये ऽष्टमो ऽध्यायः ॥ ८ ॥ अथ स्तुतिप्रकारेण तया प्रसन्नस्य भगवतो ऽनुग्रहविशेषं चाह नवमेन तत्र कल्पस्य चिदचिदात्मकप्रपंचस्य भ
गवच्छरीरत्वेन ज्ञातवतः स्वस्य कृतार्थतामाविष्कुर्वन्नीदृशज्ञानविधुरान्निंदन्न ब्रह्मात्मकवस्त्वंतराभावमुपपादयति ॥ ज्ञातोसीति ॥ ननु हे भग
वन्सुचिराद्बहुकालोपार्जितात्तपस इति शेषः मे मया अद्याधुना ज्ञातोसि यथावस्थितत्वेन दृष्टोसि कार्यावस्थकारणावस्थकृत्स्नचिदचिदंत
र्यामित्वसर्वकोपादानप्राकृतप्रपंचोपनिषन्मयदिव्यमंगलविग्रहविशिष्टत्वसर्वज्ञत्वसर्वशक्तित्वसत्यसंकल्पत्वाश्रितवात्सल्यैकजलधित्वा
द्याकारविशिष्टत्वेन मम ज्ञानं दृष्टस्वरूपत्वमत्र विवक्षितम् ॥ तस्मै नमो भगवते भुवनद्रुमाय तिर्यङ्मनुष्यविबुधादिषु नानाः परं परमेसादि

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कंधे ऽष्टमो ऽध्यायः ॥ ८ ॥ ब्रह्मोवाच ॥ ज्ञातोसि मेद्य
सुचिरान्ननु देहभाजां न ज्ञायते भगवतो गतिरित्यवद्यं ॥ नान्यत्त्वदस्ति भगवन्नपि तन्न शुद्धं मायागुणव्यतिकरा
द्यदुरुर्विभासि ॥ १ ॥

नाद्येन देवप्रपंचयिष्यति । ईदृशज्ञानविधुरान्निंदति ॥ भगवतः षाड्गुण्यपूर्णस्य तव गतिः स्वरूपं न ज्ञायते इति
यदेतन्देहभाजां कर्मायत्तप्रकृतिपरिणामरूपशरीरभाजां क्षेत्रज्ञानामवद्यं दोषः अत्र ब्रह्मोवायुभक्त्वरत्यादिवद्भगवज्ज्ञानमेवेत्यवधारणम्
विवक्षितं आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विज्ञातं भवति येनाश्रुतं श्रुतं भवति ॥ ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामिति भगवद् यां ३
ज्ञानेनैव कृत्स्नस्य ज्ञानत्वश्रवणात् अब्रह्मात्मकस्य स्वतंत्रवस्तुनो भावात् तमेव विदित्वातिमृत्युमेतीति ब्रह्मज्ञानस्यैव मृत्युतरणोपा
यत्वश्रवणाच्च भगवानेव ज्ञातव्य इति तज्ज्ञानविधुराद्दूषणमित्यभिप्रायः एतदेवोपपादयति हे भगवन्सर्वषाड्गुण्यमूर्ते न त्वत्तः अन्य

भा.द.टी.
॥५२॥

त्वदात्मकं नास्ति सर्वस्य त्वदात्मकत्वात्त्वज्ञानेनैव सर्वस्य ज्ञानत्वात् ज्ञातव्यांतराभावात्त्वमेव ज्ञातव्य इत्यभिप्रायः ननु स्वतंत्रत्वेनैव देवमनु
ष्यत्वादिवस्तुप्रतीतेस्त्वदन्यन्नास्तीति कथमुच्यते ऽत आह ॥ अपि स्वतंत्रत्वेन प्रतीतमपि तद्देवादिवस्तु न श्रुतं नाबाधितं ॥ अत्रात्र ब्रह्मात्म
कस्वतंत्रबुद्धीर्भ्रांतेरित्यर्थः ॥ कुतस्तत्रत आह ॥ माययेति ॥ यत यतः मायायाः प्रकृतेर्गुणानां व्यतिकराद्वैषम्यात्परिणामादित्यर्थः ॥ त्वमेव
उरुर्बहुधा विभासि प्रकाशसे ॥ एकः स न बहुधा विचचार बहुस्यां प्रजायेति ॥ तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवदि
निरुक्तं चानिरुक्तं च सत्यमभवदिति श्रुत्युक्तरीत्या स्वयमपरिछिन्नज्ञानानंदस्वभावोत्पन्नस्य तया संकल्पस्वलीलोपकरणविद
चिद्वस्तुशरीरतया तन्मयः परमात्मा विचित्रानंतक्रीडनकोपादिरूपां स्वशरीरभूतप्रकृतिपुरुषसमष्टिपरंपरया महाभूतपर्यंतमा
त्मानं तत्तच्छरीरकं परिणमय्य न त्वयः पुनः सन् शब्दवाच्यविचित्रचिदचिन्मिश्रदेवादिस्थावरांतरूपो भवसीत्यर्थः ॥ ब्रह्मणि
जगद्रूपतया विक्रियमाणेपि तत्प्रकारभूताश्चिदंशाः सर्वे विकाराः तत्प्रकारभूतदेहेचाजगताश्चापुरुषार्थाः ब्रह्म तु निरस्तनिखि
लदोषगंधमपरिछिन्नज्ञानानंदमेकस्वरूपमेव भवदिति विवेकः एवं कृत्स्नचिदचिदंतरात्मनो भगवत एव ज्ञानस्य मुक्तिसाधनत्वं
तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति श्रुत्यंतरस्य सर्वब्रह्मात्मकत्वेनोपासीनस्येत्यर्थः ॥ तथा च श्रुत्यंतरं सर्वं ख
ल्विदं ब्रह्म तज्जलानिति शांत उपासीतेति ॥१॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥५२॥

अय जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्वतः॥ त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन इति भगवदवतारहस्यज्ञानस्यापि मोक्षसाधनत्वस्मर
णात् अवतारस्याप्यात्म्यमपि शोधयति॥ रूपमिति॥ अवबोधरसोदयस्यावबोधरूपस्य रसस्योदयः स्वाभाविकाविर्भावो यस्येति बहुव्री
हिः निरुपाधिकनित्याविर्भूततापरिछिन्नानंदरूपज्ञानवतइत्यर्थः॥ अतएव शश्वन्निवृत्तं तमोऽज्ञानं यस्मात्तस्य अनेन विशेषणद्वयेन त्रि
विधचेतनाचेतनव्यावृत्तिः आद्येनाचेतनव्यावृत्तिर्द्वितीयेन चेतनव्यावृत्तिर्बद्धानां मनिवृत्ततमस्त्वान्मुक्तानामपि संसारदशायां तमःसंबंधा

रूपं परेतरववोधरसोदयस्य शश्वन्निवृत्ततमसः सदनुग्रहाय आदौ गृहीतमवतारशतैक
वीजं यन्नाभिपद्मभवनादहमाविरासम् २

च्छश्वन्निवृत्ततमस्त्वाभावात् नित्यानंतयातस्य परसंकल्पायतत्वेन
सोपाधिकत्वात्॥ एवंभूतस्य स्वरूपस्य नवपुःरूपविग्रहः कथंभूतम्॥ अवतारशतैकवीजमवतारशतानां एकवीजं मूलं तदेव प्रदर्शयति
यस्य परिगृहीतेवंविधरूपस्य तव नाभिपद्ममेव भवनं गृहं तस्मादहं तवावेशावताररूपो हंसः षष्ठितः करिष्यामि त्वामाविश्य प्रजाप
तेइत्तिवनुर्मुखस्य भगवदावेशावताररूपत्वसिद्धेः एतद्रूपमादौ सदनुग्रहाय साधूनां परित्राणायेत्यर्थः गृहीतमाविष्कृतं न तु र
जीववत्कर्मायत्तसुखदुःखोपभोगाय गृहीतमित्यर्थः तथा च श्रुतिस्मृती॥ अजायमानो बहुधा विजायते॰ अजोपि सन्नव्ययात्मा भू
तानामीश्वरोपि सन्नित्यादिके॥ २॥

एवं चिदचिद्विलक्षणत्वेन प्रबोधितस्वरूपस्य शरीरविलक्षणत्वेन प्रबोधितरूपस्य चोभयोरेवोपास्यत्वं वदन्गुणरत्नैरपि धर्मैरूपरूपैर्विशिनष्टि आनन्देति
हे परम परो न विद्यते यस्मात् स परमः तस्य संबुद्धिः भगवतस्तव यत्स्वरूपं कथंभूतम् ॥ आनंदमयं मात्र चादुःखसंभेदनिरासः ॥ अविकल्पं जा
तिगुणादिरहितं आभ्यां चिदचिद्विद्विधावृत्तिः ॥ अविद्धवर्चः ॥ अविद्धमप्रतिहतं वर्चः संकल्परूपं ज्ञानं यस्य तदेवंभूतं रूपं यच्चाविश्वं वि
श्वविलक्षणं विश्वसृजं विश्वस्य कारणं ॥ भूतेंद्रियात्मकं रूपं चोपनिषन्मात्रप्रतिपाद्यं प्राकृतभूतेंद्रियात्मं रूपं चेतियतः ॥ अतः अस्मा

नातः परं परम यद्भवतः स्वरूपमानंदमात्रमविकल्पमविद्धवर्चः ॥ पश्यामि विश्वसृजमेकमवि
श्वमात्मन्भूतेंद्रियात्मकमदस्त उपाश्रितोस्मि ॥ ३ ॥ तद्वा इदं भुवनमंगल मंगलाय ध्याने स्म नो दर्शितं त
उपासकानाम् ॥ तस्मै नमो भगवतेनुविधेम तुभ्यं योनादृतो नरकभाग्भिरसत्प्रसंगैः ॥ ४ ॥ श्रीः

त्परं विलक्षणं स्वरूपं रूपं च न पश्यामि ॥ अत अदः एतद्द्वयमेव आत्मन परमात्मन उपाश्रितोस्मि सम्यगनुवृत्त्या शरणं गतोस्मि ॥ ३ ॥ पुनरु
क्ताकारविशिष्टस्य भगवतो भक्तैकलभ्यत्वं वदंस्तमेव नमस्करोति ॥ तद्वा इति हे भुवनमंगल विश्वस्य मंगलरूप यत्त्वया उपास
कानां नोस्माकं ध्यानेन मंगलाय अस्मदभ्युदयाय तदेवेदं ते सुप्रसिद्धं इदं रूपं दर्शितं तस्मै ईदृशरूपस्वरूपगुणविभूतिमते भगवते पू
र्णवाङ्मणप्रमर्त्यैः तुभ्यं नमो नुविधेम नमस्कुर्महि यस्त्वमसत्प्रसंगैः असत्सु शास्त्रादिषु प्रकृष्टः संगो येषां तैः अतएव नरकभाग्भिर्हेहि ॥

॥४३॥

आदरेणत्वामभजंतोनरकभाजस्त्वामादरेणभजंततेतुकृतार्था इत्याह येत्विति॥श्रुतिःश्रवणंतदेववातःपवनःतेननीतंप्रापितंत्वदीयचर॰
णांबुजकोशस्यगंधंकर्णविवरैर्येजिघ्रंति येषांचपरयाऽव्यभिचारिण्याभक्त्यागृहीतौचरणौयस्यसतथाभूतोभवति तेषांस्वपुंसांस्वभ
क्तानांहृदयांबुरुहाद्धृदयकमलात्हेनाथनापैषिनापसरसि येत्वत्कथाश्रवणमत्यादरेणकुर्वंतितेएकांतभक्त्यात्वांप्रपन्नास्तेषांहृदिभग
वच्चिरसंनिहितोभवसीत्यर्थः॥५॥भवतुमत्प्राप्तिविघ्नमेतावताकथंतेषांकृतार्थतेत्यतआह॥तावदिति॥तेतवाभयंनविद्यतेभयंयस्मा
त्तदभयंसंसृतिनिवर्तकमंघ्रिंलोकोयावन्नप्रवृणीतनिरतिशयप्रियप्रियत्वेननोपासीततावदेवभयादयइत्यन्वयः॥आगामि

येतुत्वदीयचरणांबुजकोशगंधंजिघ्रंतिकर्णविवरैःश्रुतिवातनीतं॥भक्त्यागृहीतचरणःपरया
चतेषांनापैषिनाथहृदयांबुरुहात्स्वपुंसाम्॥५॥तावद्भयंद्रविणगेहसुहृन्निमित्तंशोकःस्पृ॰
स्पृहापरिभवोविपुलश्चलोभः॥तावन्ममेत्यसदवग्रहआर्त्तिमूलंयावन्नतेंघ्रिमभयंप्रवृणी
तलोकः॥६॥

दुःखदर्शनजंज्ञानंभयंतच्चद्रविणदेहसुहृन्निमित्तंभाविद्रविणादिविपत्तिनिमित्तदुःखविषयंज्ञानंभय
मित्यर्थः॥शोकस्तात्कालिकप्रतिकूलविषयविषयंवाज्ञानंस्पृहाऽनुकूलविषयेऽपीच्छापरिभवस्तिरस्कारःविपुलःविस्तारोलोभःतृष्णा
असदवग्रहः अनात्मन्तेषामीऽवग्रहआत्मत्वाभिमानःअयंचोक्तानांभयादिरूपाणांआर्त्तीनांमूलंकारणंएतेसर्वेतावत्कालंत्वेनता॰
वदवत्त्वच्चरणारविंदप्रवणावधिअनुवर्तंतइत्यर्थःत्वच्चरणावरणेनतुसांसारिकभयादिनिवृत्त्याविर्भूतापहतपाप्मत्वादिगुणाष्टकवि

भा.स्क.टी.
॥५४॥

एवंभगवतोभक्त्येकलभ्यत्वमभिधाययोनादृतोनरकभाग्भिरसत्प्रसंगैरितिप्रस्तुतान्विषयलालसान्निर्दिश्यतानेवशोचति॥दैवेनेतिद्वाभ्याम् सर्वाशु
भोपशमनाशर्वाणिअशुभानिभयशोकादीनिउपशाम्यंतेऽनेनेतितथाभूतोभगवतस्तवप्रसंगाद्दर्शनश्रवणादिरूपाद्विमुखानीद्रियाणिचक्षुः
श्रोत्रादीनियेषांतेअकुशलान्यक्षेमकराणिकर्माणिशश्वन्निरंतरंकामसुखानिशब्दादिविषयसुखानितेषांलवायलोभेनतत्स्वातिशयेना
भिभूतंमनोयेषांते॥अतएवदीनाःक्षुद्राःकुर्वंतितेदैवेनहताःप्रतिहताधियोयेषांतेनतथोक्ताःमंदभाग्याइत्यर्थः॥७॥क्षुदित्यादिनाक्षुत्
तृट्चापिपासा॥इमेशोकमोहजरामृत्युरत्यादीनामप्युपलक्षणं॥क्षुधादिषडूर्मिभिःत्रिधातवः॥वातपित्तश्लेष्माणःतैश्चतथाशीतादिभिः

दैवेनतेहतधियोभवतःप्रसंगात्सर्वाशुभोपशमनाद्विमुखेंद्रियायेकुर्वंतिकामसुखलेशलवायदीनालोभाभिभूत
मनसोकुशलानिशश्वत॥७॥क्षुत्तृट्त्रिधातुभिरिमामुहुरर्द्यमानाःशीतोष्णवातवर्षैरितरेतराच्च॥कामाग्निनाच्युतरुषा
चसुदुर्भरेणसंपश्यतोमनउरुक्रमसीदतेमे॥८॥यावत्पृथक्त्वमिदमात्मनइंद्रियार्थमायाबलंभगवतोजनईशपश्येत्
तावन्नसंसृतिरसौप्रतिसंक्रमेतव्यर्थापिदुःखनिवहंवहतिक्रियार्था॥९॥ इतरेतरैःपरस्परैश्चकामाग्निनाकामएवाग्निस्तेनक
थंभूतेनसुदुर्भरेणच्युतरुषाचाविच्छिन्नक्रोधेनचदेवमनुष्यादिदेहयोगेनअच्युतेतिसंबोधनंवाएभिर्मुहुर्मुहुरर्द्यमानाःप्रजाःसंपश्यतोमेमनः
हेउरुक्रमसीदतेक्लिश्यति॥८॥असदवग्रहः॥आर्तिमूलमितिदेहात्मभ्रमस्यार्तिमूलत्वमुक्तमुपपादयति यावदितिद्वाभ्यां॥भगवतस्तवमाय
याःबलंबलकारितंइंद्रियार्थेवाह्येंद्रियविषयभूतंएषयत्वंदेवमनुष्यादिदेहगतएषयत्कं आत्मनः॥आत्मसंबंधिनयाजनःयावत्तत्पश्येद्धेईश
तावदसौसंसृतिर्नप्रतिसंक्रमेतनन्निवर्तेत॥नकेवलंनिवृत्तिरेवकिंतुक्रियाअर्थःप्रयोजनंयस्याःसाक्रियार्थासंसृतिःव्यर्थापरमपुरुषार्थ ॥५४॥

एकस्यैवांतःकरणस्य विक्रिया बोधाभिमानविवेकरूपवृत्तिभेदेन मनोबुद्ध्यहंकारचित्तभेदस्य चंद्रवागीशरुद्रप्रजापतिरधिष्ठातारो बोध्याः॥ तत्र सं
कल्पविकल्पात्मकवृत्त्यवच्छिन्नस्यांतःकरणभेदस्य चंद्रमसाधिष्ठितस्य समष्टिपुरुषाद्विभागः अथ बुद्ध्यादिविभागमाह॥ बुद्धिमित्यादित्रिभिः ब्रह्म
णः विनिर्भिन्नां बुद्धिं धिष्ण्यं स्थानं वागीशः ब्रह्मा बोधेन निश्चयात्मकज्ञानजननसामर्थ्येन सहाविशत्॥ यतः बोधेन बोद्धव्यस्य निश्चितस्य प्र
तिपत्तिर्ज्ञानं भवेत्॥२४॥ आत्मानमिति आत्मानमहंकारं अस्य ब्रह्मणः निर्भिन्नं पदं स्थानमभिमानः अभिमन्यते तेनेत्यभिमानः अनात्मन्यात्मा
भिमानकृद्देवता रुद्रः सर्वात्मनोंतःकरणं गिरित्रं इति प्रागुक्तत्वात् कर्मणा देहाभिमानेनांशेनाविशत्॥ येन कर्मणाऽसौ जीवः कर्त्तव्यमभिमा

बुद्धिं चास्य विनिर्भिन्नां वागीशो धिष्ण्यमाविशत्॥ बोधेनांशेन बोद्धव्यप्रतिपत्तिर्यतो भवेत्॥२४॥ आत्मानं चास्य नि
र्भिन्नमभिमानो विशत्पदम् कर्मणांशेन येनासौ कर्तव्यं प्रतिपद्यते॥२५॥ सत्वं चास्य विनिर्भिन्नं महान्धिष्ण्यमु
पाविशत्॥ चित्तेनांशेन येनासौ विज्ञानं प्रतिपद्यते॥२६॥ शीर्ष्णोऽस्य द्यौर्धरा पद्भ्यां खं नाभेरुदपद्यत॥ गुणानां वृ
त्तयो येषु प्रतीयंते सुरादयः॥२७॥

न विषयं प्रतिपद्यते ऽभिमनुते॥२५॥ सत्वमिति॥ अस्य ब्रह्मणो विनिर्भिन्नं सत्वं सत्वं देहात्मविवेकज्ञा
नहेतुर्बुद्ध्यास्यमंतःकरणं बुद्धिचित्तयोरभेदेनात्र निर्देशः॥ धिष्ण्यं स्थानं महान्प्रजापतिः चित्तेनांशेन सम्यगर्थचिंतनरूपेण मनसोपाविशत् येन
चित्तेनांशेनासौ जीवः विज्ञानं सम्यक् चित्तेन यथार्थविषयं ज्ञानं प्रतिपद्यते लभते॥२६॥ एवं षष्ठींद्रियविभागमुक्त्वाऽथ देवादीनां भोगस्थाने विभाग
माह॥ शीर्ष्ण इति॥ अस्य ब्रह्मणः शीर्ष्णः शिरसः द्यौः पद्भ्यां पादाभ्यां धरा भूमि॥ अस्य नाभेरंतरिक्षलोकः उदपद्यत उद्भूतः॥ येषु द्युधराखेषु गुणा
नां सत्वरजस्तमसां वृत्तयः वृत्तिमंतः देवमनुष्यादयः॥ वृत्तिशब्दोऽजहल्लक्षणया वृत्तिमत्परः प्रतीयंते देवादय उत्पद्यंत इत्यन्वयः॥२७॥

॥३५॥

मेढ्रमिति ॥ तस्य ब्रह्मणः विनिर्भिन्नमेढ्रं उपस्थेंद्रियस्थानं स्वधिष्ण्यं स्वस्थानं कः प्रजाःपतिर्देवता अंशेन रेतोरूपस्वाधिष्ठेयेनेंद्रियेण सहाविशत् येन
रेतसा ऽसौ व्यष्टिजीवः ॥ आनंदं रतिसुखं जानाति ॥१९॥ गुदमिति ॥ पुंसो ब्रह्मणः विनिर्भिन्नं गुदं पाय्विंद्रियस्थानं लोकेशः मित्रः पायुनांशेन पायिं-
द्रियेण सहाविशत् ॥ येन पायुना विसर्गं पुरीषत्यागं प्रतिपद्यते करोति ॥२०॥ हस्ताविति ॥ अस्य ब्रह्मणः विनिर्भिन्नौ हस्तौ स्वर्पतिः स्वर्गस्य पति-
रिंद्रः वार्त्तया कृष्यादिव्यापाररूपसाधनेनांशेन पाणींद्रियेणाविशत् पुरुषो व्यष्टिजीवः यया वृत्तिसाधनपाणींद्रियेण वृत्तिं जीवनप्रकारं प्रति-
पद्यते प्राप्नोति अत्र हस्तादिस्थनेना। श्रेणीति द्वीवचनेतेषां श्लोकानां चतुर्मुखशरीराद्भिन्नत्वमपि देहविषये त्वस्पष्टं न तु तस्यैव हस्ताद्युत्प(

मेढ्रं तस्य विनिर्भिन्नं स्वधिष्ण्यं क उपाविशत् ॥ रेतसांशेन येनासावानंदं प्रतिपद्यते ॥१९॥ गुदं पुंसो विनिर्भिन्नं मि-
त्रो लोकेश आविशत् ॥ पायुनांशेन येनासौ विसर्गं प्रतिपद्यते ॥२०॥ हस्तावस्य विनिर्भिन्नाविंद्रः स्वर्पतिराविश-
त् ॥ वार्तयांशेन पुरुषो यया वृत्तिं प्रपद्यते ॥२१॥ पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत् ॥ गत्या स्वांशेन पुरु-
षो यया प्राप्यं प्रपद्यते ॥२२॥ हृदयं चास्य निर्भिन्नं चंद्रमा धिष्ण्यमाविशत् ॥ मनसांशेन येनासौ विक्रियां प्रतिपद्यते

त्तिपरत्वं चतुर्मुखस्य भुजचतुष्टयनेत्राष्टकसद्भावात् ॥२१॥ पादाविनिर्भिन्नौ पादौ चरणौ लोकेशो विष्णुर्गत्यागतिसाधनेनांशेन ॥२३॥
स्वाधिष्ठेयपादेंद्रियेण सहाविशत् ॥ यया गतिसाधनेन पादेंद्रियेण सो जीवः गंतव्यं गमनेन प्रतिपद्यते प्राप्नोति ॥२२॥ हृदयमिति ॥ अस्य नि-
र्भिन्नं हृदयं कमलाकारं धिष्ण्यं स्थानं चंद्रमा मनःप्रांशेनेंद्रियेण सहाविशत् ॥ येन मनसा ऽसौ जीवः विक्रियां विकल्पसंकल्परूपां प्रतिपद्यते
॥२३॥

भा.रु.टी.
॥२४॥

विसोर्विलासमकाडुस्मनासे निर्भिन्ने अश्विनावंशेन स्वाधिष्ठेयन घ्राणेंद्रियेण गंधस्य सुगंधादुर्गंधादेः प्रतिपत्तिः ज्ञानं भवेत् ॥१४॥ विभोर्ब्रह्मणः सकाशान्निर्भिन्ने अक्षिणी स्थाने लोकपालः त्वष्टा आदित्यः स्वाधिष्ठेयेन चक्षुरिंद्रियेण सह आविशत् रूपाणां नीलपीतादीनां प्रतिपत्तिर्यतः येन चक्षुषा भवेत् ॥१५॥ निर्भिन्नानीति ॥ अस्य ब्रह्मणः ॥ निर्भिन्नानि चर्माणि लोकपालो वायुरंशेन त्वगिंद्रियेण प्राणवत् कृत्स्नदेहं व्यापिनेमर्थः ॥ आविशत् ॥ असौ समष्टिजीवः येन त्वगिंद्रियेण मंस्पर्शं मृदुत्वकठिनत्वशीतोष्णादिसंस्पर्शं प्रतिपद्यते ॥१६॥ कर्णाविति अस्य ब्रह्मणः

निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदम् ॥ घ्राणेनांशेन गंधस्य प्रतिपत्तिर्यतो भवेत् ॥१४॥ निर्भिन्ने अक्षिणी त्वष्टा लोकपालो विशद्विभोः ॥ चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो भवेत् ॥१५॥ निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलो विशत् ॥ प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते ॥१६॥ कर्णावस्य विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः ॥ श्रोत्रेणांशेन शब्दस्य सिद्धिं येन प्रतिपद्यते ॥१७॥ त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः ॥ अंशेन रोमभिः कंडूं यैरसौ प्रतिपद्यते ॥१८॥

विनिर्भिन्नौ कर्णौ स्वधिष्ण्यं स्वस्थानं दिशः देवताः श्रोत्रेणांशेन श्रोत्रेंद्रियेण सह विविशुः शब्दस्य सिद्धिः ज्ञानं येन श्रोत्रेण प्रपद्यते प्राप्नोति ॥ त्वचमिति ॥ अस्य ब्रह्मणः विभिन्नां त्वचं मोषधीः ओषध्यः तदभिमानिदेवताः विभक्तिव्यत्यय आर्षः रोमभिरंशेन रोमरूपेण स्वाधिष्ठेयेनेंद्रियेण विविशुः या विशत् ॥ असौ समष्टिजीवः यैः रोमभिः ॥ कंडूं प्रतिपद्यते जानाति त्वगिंद्रियस्यैव स्थानभेदेन विषयद्वयं कंडूः स्पर्शश्च ॥ न चायं नाममभेदेन देवताभेदस्थिति द्वितीय एव व्याख्यातः ॥१८॥ ॥ ॥ ॥ ॥ ॥

॥२४॥

अधिशरीरेंद्रियाणांतु ब्रह्मणः सकाशाद्विभागप्रतिपादनं प्रतिजानीते॥ अथेति॥ अथालोचनानंतरं अभितप्तस्य उक्तसंकल्पविषयस्य तस्माद्ब्रह्मण इत्य
र्थः॥ नेदस्यशृणोतीति वक्तव्यं च सत्यर्थः नेदस्यशृणोतीति सयाषशंतो विवक्षितः देवानां चक्षुरिंद्रियाणां कति चापतनानि कतिपयानि स्थानानि
निरभिद्यंत उद्भवन्त तोस्यानानि गदतः मेमनः आणवाकर्णयेत्यर्थः॥ विभागमाह॥ तस्येत्यादिभिश्चतुर्दशभिः अत्र प्रतिश्लोकं प्रस्तुतः
समष्टिपुरुषो भगवदात्मकश्चतुर्मुखस्तस्यास्येत्यादिषष्ठ्यंतैः परामृश्यते॥ तस्य भगवदात्मकाच्चतुर्मुखान्निर्भिन्नं विभक्तमुत्पन्नमि
ति यावत्॥ अग्निर्भूतजातस्यास्यं पदं स्थानमास्यरूपं स्थानं स्वांशेन स्वाधिष्ठेयभूतेन वाचा वागिंद्रियेण सह लोकपालोऽग्निराविशत्

अथैतान्यभितप्तस्य कतिधायतनानि ह॥ निरभिद्यंत देवानां तानि मे गदतः शृणु॥ ११॥ तस्याग्निरास्यं नि
र्भिन्नं लोकपालो विशत्पदम्॥ वाचा स्वांशेन वक्तव्यं ययासौ प्रतिपद्यते॥ १२॥ निर्भिन्नं तालु वरुणो
लोकपालो विशद्धरेः॥ जिह्वयांशेन च रसं ययासौ प्रतिपद्यत॥ १३॥ कथंभूतया वाचा ऽसौ समष्टिजीवो यया वा

चा वक्तव्यमुच्चार्यं शब्दं प्रतिपद्यते उच्चारयतीत्यर्थः॥ समष्टिपुरुषाद्विभक्तोऽग्निस्तस्मादेव विभक्तस्य समष्टिजीवस्य विभक्तमास्यं विभक्ते
न वागिंद्रियेण सह प्राविशदित्यर्थः एवमग्रेपूह्यं सर्वत्रासाविति प्रथमांतमध्यात्मपरं वाचेत्यादितृतीयांतमधिदैवतसमर्पकं वक्त
व्यमित्यादि प्रतिपत्त्यंशशब्दादिकमधिभूतसमर्पकं वेदितव्यम्॥ १२॥ निर्भिन्नमिति निर्भिन्नं पृथग्विभक्तं तालुस्थानं लोकपालो व
रुणः अंशेन स्वाधिष्ठेयेन जिह्वया सह प्राविशत्॥ यया जिह्वया रसं मधुरादिमसौ समष्टिजीवः प्रतिपद्यते॥ १३॥

भा.टू.टी. प्रस्तुतत्रिविधैकादशविधविभागावुपपादयन्समष्टिपुरुषत्वमेवोपादयति ॥ साध्यात्मक इति ॥ विविधं राजतिव्यष्टिरूपेण भातीति विराट्

यद्यपिविराट्शब्दो निरूढ्यपरः तथापि इह समष्टिपुरुषाद्विभक्तव्यष्ट्युत्पत्तिप्रकरणाच्चतुर्मुखः परः ॥ स ब्रह्मा साध्यात्मः अध्यात्मसहितः स

॥३३॥ मष्टिरूपेण स्वशरीरांतर्गतभोक्तृवर्गसहितः आत्मनि देहे वर्तमानो जीवो ह्यध्यात्मशब्दोक्तः स चाविभक्तरूपः समष्ट्यवस्थः साधिभूत

भूतेषु वर्तमानः शब्दादिविषयसहितः ब्रह्मशरीराध्वभोग्यजातमविभक्तं साधिदैवः इंद्रियसमष्टिसहितः आदित्यमंडलादिषुस्थानेषु

षु वर्तमाना आदित्यादयो देवशब्दवाच्याः तदधिष्ठेयं इंद्रियवर्गः तदधिदैवशब्दोक्तः समष्ट्यवस्थशरीरांतर्गतभोग्यभोगोपकरणग्राम

साध्यात्मः साधिभूतश्च साधिदैव इति त्रिधा ॥ विराट्प्राणो दशविध एकधा हृदयेन च ॥ ९ ॥

स्मरन्विश्वसृजामीशो विज्ञापितमधोक्षज ॥ विराजमतपत्स्वेन तेजसैषां विवृत्तये ॥ १० ॥

वानित्यर्थः ॥ अथाधिदैवांशविवृणोति ॥ प्राणशब्द इंद्रियपरः तमुत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीति श्रुतिप्रयोगात् दशविधः श्रोत्रादिरूपेर

णैकधा हृदयेन मनसा व्यष्टिकरणेंद्रियादीनां ब्रह्मणाविभक्तत्वं व्रूते ॥ ९ ॥ ततु न स्वातंत्र्येण कृतं किंतु भगवदनुप्रवेशादित्याह ॥ स्मरन्निति

ईशः नियंता अधोक्षजो भगवान् विश्वसृजां महदादितत्त्वानां विज्ञापितं यावत्कलितेऽजहराम कालेत्यादिना विज्ञापितं स्मरन् तेषां इंद्रिया

दीनां विवृद्धये व्यष्टिरूपेण विस्ताराय स्वेन स्वीयेन तेजसा ज्ञानेन विराजं ब्रह्माणमतपत् आलोचयत् ॥ तप आलोचने ॥ अयं व्यष्टिशरीरेंद्रिय ॥३३॥

विभागसामर्थ्यवान् यथा भवेत्तथा तं समसंकल्पयदित्यर्थः ॥ १० ॥

एवं समष्टिपुरुषोत्पत्तिमभिधायास्मात्समष्टिपुरुषशरीराद्व्यष्टिशरीरेन्द्रियाणामुत्पत्तिं वक्तुं तावदस्य समष्टिपुरुषत्वं वदन्कारणमौ विषयं स्क१
रूपेण त्रिधा विभागं करणांशेन दशधा विभागं कर्तृकमाह ॥ स इति ॥ विश्वसृजां महदादीनां गर्भः अपत्यरूपः दैवं भगवत्संकल्पः कर्मात्म
शक्तिः कर्मरूपा आत्मनां जीवानां शक्तिः अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यत इत्युक्तत्वात् तद्वानित्यर्थः यद्वा दैवं भगवत्संकल्पः कर्म जी
वानां कर्म आत्मानो जीवाः शक्तिः जीवसंघशरीरारंभका चिच्छक्तिस्तास्य सन्तीति तद्वान् अनेन समष्टिपुरुषत्वमुक्तं एवंभूतः स वै स
मष्टिपुरुषः आत्मना कर्त्रा आत्मानं प्रथमं त्रिधा करणभोग्यविषयरूपेण ॥ तत्रापि करणांशेन एकधा दशधा मनः पर्यन्तेन्द्रियरूपेणैका

स वै विश्वसृजां गर्भो दैवकर्मात्मशक्तिमान् ॥ विबभाजात्मनात्मानमेकधा दशधा त्रिधा ॥७॥
एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः ॥ आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यते ॥८॥

दशधेत्यर्थः विबभाज विभक्तमकरोत् स्वसंश्लिष्टजीवसंघभोक्तृत्वेन स्वं द्विधैकदेशान्तं तद्भोग्यकरणत्वेनाकारेण करोदित्यर्थः ॥७॥ अ
स्यैवंविधविभागसामर्थ्यमाह ॥ एष इति एष ब्रह्माण्डशरीरः तत्त्वानां समस्तव्यष्टिपदार्थानामात्मा आधारः तच्छरीरकपरमात्मा द्रष्ट इत्यु
क्तम् ॥ परमात्मनोंशः अपृथक्सिद्धविशेषणभूतः न त्विदं सर्वजीवसाधारणमत आह ॥ आद्य इति ॥ आद्यः ॥ अवतारः परमात्म
न इत्यनुषंगः ॥ परमात्मन आवेशावतारो बोध्यः स्रष्टुं ततः करिष्यामि त्वामाविश्य प्रजापते इत्युक्तेः यत्र परमात्मात्मके समष्टिपुरुषे प
रमात्मांशावतारभूतेऽसौ भूतग्रामः व्यष्टिपदार्थजातं विभाव्यते विविधमुत्पाद्यते ॥ अत ईदृशविभागसमर्थः इत्याहेति ॥८॥

भा.तृ.टी. ॥३२॥

कथमजनयदित्यपेक्षायांतदेवविवृणोति परेणेति मात्रयांशभूतस्यकालरूपज्ञानेनस्वस्मिन्विशताऽनुप्रविष्टेनपरेणभगवतोपलक्षितःहेतौतृ
तीया॥विश्वसृग्गणः विश्वंसृजतीतिविश्वसृग्गणःत्रयोविंशतितत्वजातं॥यस्मिन्गणेचराचराःस्थावरजंगमाल्लोकाःकार्यत्वेनावस्थिताः
एवंभूतोगणःअन्योन्यंपरस्परमासाद्यसंहत्यचुक्षोभपरिणतोभूत्समष्टिपुरुषगर्भब्रह्मांडरूपेणपरिणतोभूदित्यर्थः॥५॥हिरण्मयइत्यंडकोश
विशेषणंसपुरुषःसमष्टिपुरुषसहितः॥यदाअस्यवर्त्तमानेंडकोशेहिरण्मयःस्वर्णमयांकोशाद्वृत्तत्वाद्धिरण्मयःपुरुषःप्रसिद्धःसमष्टि
पुरुषश्चतुर्मुखःदेवादिसर्वसत्वोपबृंहितयुक्तःसहस्रंपरिवत्सरान्यावदंडस्यपरिपाकस्तावदप्सुवासउषितवानित्यर्थः अत्रास्यचासेत्यने
नांडकोशोत्पत्तेःपूर्वमायांस्थितस्यवगमान्उदाहृतंविश्वमिदंतदासीदितिवक्ष्यमाणत्वाच्चावरणजलस्थपिंडरंडोत्पत्तेःपूर्वमवगंतव्यास

परेणविशतास्वस्मिन्मात्रयाविश्वसृग्गणः॥चुक्षोभान्योन्यमासाद्ययस्मिंल्लोकाश्चराचराः॥५॥हिरण्मयःसपु
रुषःसहस्रंपरिवत्सरान॥अंडकोशउवासाप्सुसर्वसत्वोपबृंहितः॥६॥

सर्वसत्वोपबृंहितइत्यनेनचतुर्मुखस्यसमष्टि
पुरुषत्वमावेदितं॥एतेनावरणजलेशयानस्यभगवतोनाभ्यःप्रसृतत्वारध्यपद्मकोशरूपब्रह्मांडोत्पत्तिरर्थसिद्धावेदितव्यासपद्मकोशःसहस्रो
दितिष्ठदितिवक्ष्यमाणेकाख्यातं॥एवंतत्वानांसमष्टिपुरुषशरीरारंभकत्वमुक्तंसमष्टिपुरुषत्वंनामभूतसंघातारब्धस्वसंश्लिष्टजीवसंघातमनः
प्राणेंद्रियात्मकशरीरवत्वंनचपुत्रादिशरीरारंभकशरीरवत्वात्पित्रादीनांसमष्टिपुरुषत्वशंकाकार्यापंचम्यामाहुतावापःपुरुषवचसोभ
वंति॥तदंतरप्रतिपत्तौरंहतिसंपरिष्वक्तःप्रश्ननिरूपणाभ्यांशरीरंयदुपादत्तेयच्चाप्युत्क्रामतीश्वरः॥गृहीत्वैतानिसंयातिवायुर्गंधानिवाश
यादित्यादिश्रुतिस्मृत्यादिप्रमाणेपनमनआदींद्रियविश्लेषाभावेनपित्रादिशरीराणांतदारंभकत्वाभावात्तर्हिइंद्रियाद्यधिष्ठानमा

॥३२॥

एवं निवेदितहार्दानां तत्त्वानां मतः प्रवेशेनादिनस्य स्रष्टितामर्थ्यानां ब्रह्माण्डस्रष्टिं न समष्टिपुरुषचतुर्मुखोत्पत्तिस्तत्र मर्त्येंद्रियादिभ्यो व्यष्टींद्रियो॰
त्पत्तिश्च वक्ष्यते षष्ठेनाध्यायेन तत्र तावदसंहतानां परमात्मानुप्रवेशेन सृष्टिसामर्थ्यमाह ईश्वरो भगवानिति सुकरीत्या समेत्य मिलित्वा सतीनां॰
वर्तमानानां स्वशक्तीनां यस्य पृथिवी शरीरं यस्य चक्षुः ॥ शरीरं यस्यात्मा शरीरं इत्यादि प्रकारेण शरीरभूतानां ॥ प्रसुप्तम् अनुद्बुद्धं लोकतन्त्रं लोकरचना सा॰
मर्थ्यं यासां समष्टिचेतनप्रमुखमहदादितत्त्वानां गतिं स्थितिं निशाम्य दृष्ट्वा गणमाविशदिति उत्तरेणान्वयः ॥१॥ कालसंज्ञामिति ॥ ततो निशा॰

इति तासां स्वशक्तीनां सतीनामसमेत्य सः ॥ प्रसुप्तलोकतन्त्राणां निशाम्य गतिमीश्वरः ॥१॥ कालसंज्ञां तदा देवीं बिभ्रच्छ॰
क्तिमुरुक्रमः ॥ त्रयोविंशति तत्त्वानां गणं युगपदाविशत् ॥२॥ सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणं ॥ भिन्नं सं॰
योजयामास सुप्तं कर्म प्रबोधयन् ॥३॥ प्रबुद्धकर्मा दैवेन त्रयोविंशतिको गणः ॥ प्रेरितोऽजनयत्स्वाभिर्मात्राभिर॰
धिपूरुषम् ॥४॥

ततोऽनन्तरं कालसंज्ञां कालाख्यां देवीं देवसम्बन्धिनीं शक्तिं मह्यं कमिद्धविशेषणभूतां रूपान्तरमित्यर्थः वि॰
भ्रद् ततः प्राविशत् प्रशाशनेन धारयन् त्रयोविंशति महदहंकारपंचभूतपंचतन्मात्रैकादशेंद्रियरूपाणां तत्त्वानां गणं समूहं विक्रमो विस्त॰
तया इदं विश्वं यस्य सः त्रिविक्रमो भगवान्युगपदेकदा आविशदनुप्रविष्टोऽभूत् ॥२॥ स इति ॥ भगवांश्चेष्टारूपेण प्रेरणात्मचेष्टापूर्वं लक्षितः सुप्तं क॰
र्म तद्व्यापारं प्रबोधयन् उद्बोधयन् ॥३॥ आहितसामर्थ्यस्य तत्त्वगणस्य ब्रह्माण्डोत्पत्तिद्वारा चतुर्मुखशरीरारम्भकत्वं संग्रहेणाह दैवेन प्रबुद्धकर्मे॰
ति ॥ दैवेन भगवत्कालेन प्रबुद्धम् उद्बुद्धं कर्म स्वव्यापारो यस्य सः त्रयोविंशतितत्त्वात्मको गणः प्रेरितः दैवेनेत्यनुषंगः स्वाभिर्मात्राभिरंशैरधि॰

वस्थातोऽस्त्वमेदेऽप्यवस्थावद्द्रव्याणामेकत्वात्सर्वावस्थाद्रव्यस्य परमात्मशरीरत्वमेव ॥ ननु द्वैतेऽपि विकमतत्रीत्यात्कार्यकारणयोर्भिन्नद्रव्यत्वेना
शरीरत्वमिति प्रतिपन्नार्थत्वात् ॥ न च महदादीनां केवलाचेतनपरिणामरूपत्वे विशिष्टोपादानत्वासिद्धिः प्रकृतिपुरुषविशिष्टपर
मात्मन उपादानत्वं भाव्यवस्थाविशेषाश्रयत्वं ह्युपादानत्वमिति वाच्यम् ॥ विशिष्टोपादानत्वेऽपि प्रयाणमसंकार्येण कार्यताभ्युपगमे
न विरोधाभावात् अचेतनमचेतने प्रति चेतनश्चेतनं प्रति ईश्वर ईश्वरं प्रति कारणं इत्यंगीक्रियते ॥ तत्राचेतनस्य कार्यता महद
दादि पृथिव्यंतावस्थाश्रयतारूपा स्वरूपान्यथाभावलक्षणा ॥ चेतनस्य कार्यता तु संकुचितज्ञानस्य तद्विकासरूपा स्वभावान्यथा
भावलक्षणा सेवाग्रिमाध्याये प्रतिपादयिष्यते अत्रापि ॥ अयतस्याभितस्याभितन्नस्यकति चायतनानि चेति उपक्रम्य जीवस्य

इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरमैत्रेयसंवादे तत्त्वसर्गो नाम पंचमोऽध्यायः ॥ ५ ॥ श्रीहरये नमः

तत्संश्लिष्टस्य समष्टिपुरुषस्य चतुर्मुखस्य वागादीन्द्रियेभ्यः अधिष्ठातॄणां देवादीनामिंद्रियोत्पत्तिं चातुर्वर्ण्योत्पत्तिं चाभिधाय ॥ एतेव
र्णाः स्वधर्मेण यजंति स्वगुरुं हरिं श्रद्धयात्मविशुद्धये यज्जाताः सह वृत्तिभिरिति प्रलयदशायां संकुचितज्ञानानामचेतनप्रयाणं जी
वानां भगवदाराधनोपयुक्तकरणकलेवरोत्पत्तिद्वारा विज्ञानविकासरूपकार्यता ह्यभिधास्यते चेतनाचेतननियमनरूपाद्वारा
कावस्थाश्रयतारूपा चेतनाचेतनगतकार्यतानिर्वाहकत्वरूपा सद्वारकावस्थाश्रयता चेत्युभयविधावस्थाश्रयतेश्वरस्यानुप्र
वेशे चेतनाचेतनसामानाधिकरण्यादिभिरस्मिन्शास्त्रे बहुधा प्रतिपाद्यते ॥ अतोऽस्मिन्नध्याये चेतनं न परिणामपरंपरामात्र ॥२१॥

ननु इति ॥ ननु तस्मात्तेवैव परमकारणत्वात्तत्प्रमुखाः रामर्षिपुरुषा प्रश्नयोर्वयं तच्छरीरभूता वयं यदर्थे वयं यं भवविमतन् किं ते कार्यं करवाम स
षिमिति चेत्तत्राह ॥ तर्हि नोऽस्मभ्यं त्वं क्रियार्थं सृष्ट्यर्थं स्वचक्षुः स्वाधिकारानुरूपं ज्ञानं शक्त्यासामर्थ्येन सह यदनुग्रहाणां इति स्यानुग्रहो येषां
इति व्यधिकरणबहुव्रीहिः यस्य तवानुग्रहभाजामस्माकं देहीत्यर्थः यद्वाऽनुग्राह्यं तेयेन भवता इमनुग्रहाः संसारिणां फलनिष्पत्तावनुग्राह
कतयानुगृहीताः तेषां नः क्रियार्थं स्वस्वप्रवृत्ते यच्च तु ज्ञानं तद्देहीत्यर्थः ॥ अत्रेदं तत्त्वं पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् रेतस्त्वजा
यां कश्चिद्धेज इति परमात्मकसमष्टिपुरुषसंसृष्टायां मायामहदाद्यारंभकत्वमवगम्यते ॥ तत्र महदादिपृथिव्यंताः अचेतनस्यैवावस्थावि
शेषाः तत्रास्वहितायाएव मायाः प्रदेशभेदेन महद्रूपत्वेन परिणामः ॥ एवं महतोप्यखंडितप्रदेशभेदेनाहंकाररूपपरिणामः एवमहंकारादि
ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन् करवाम किं ते ॥ त्वं नः स्वचक्षुः परिदेहि शक्त्या देवक्रियार्थे यदनुग्रहाणां
ष्वपि द्रष्टव्यं ननु कार्त्स्न्येन महदादीनामुत्तरोत्तरकार्यरूपपरिणामः तथा समुत्तरोत्तरं कार्यरूपेण कृत्स्नस्यापि महदादेः परिणतत्वात् ॥ ५१ ॥
महदादीनां पृथक् स्थितिरनुपपन्ना पृथिव्यप्सु प्रलीयते इत्यारभ्य महानव्यक्ते लीयते इत्यंतेन लयश्रवणं विरुध्यते ॥ अयमेव हि लयः यत्सूक्ष्मपूर्वाव
स्थायावस्थितेन द्रव्येण तदेकदेशस्योत्तरोत्तरावस्थाप्रहाणेन संश्लेषः एवं च पंचीकरणोपपत्तिः अन्यथा एय कृतानामभावात्तदनुपपन्नत्वात्
एवं च महत्त्वादहंकारत्वावकाशतादिपृथिवीत्वपर्यंतावस्थापन्नस्य प्रधानद्रव्यस्य परमात्मात्मकसमष्टिपुरुषब्रह्मानुप्रवेशेन परमात्म
शरीरत्वव्यपदेश उपपन्नः कार्यावस्थाकारणावस्थयोर्द्रव्यस्यैकेन तत्तैवानुप्रवेशमात्रेण यस्य पृथिवी शरीरमित्यादीनां उपपत्तेः ननु पृथिवी
आद्यवस्थास्वनुप्रवेश उपपन्नः न चैवं यस्याव्यक्तं शरीरमित्येतावतैव महदादिपृथिव्यंतानां शरीरत्वं पृथक्त्वेनार्थमिति वाच्यम् ॥ परस्परम्

एवं संकर्षणात्मं प्रहाय प्रवृत्ति प्रदर्शप्रस्तुतप्रश्नानामुत्तराणि विवक्षुः पूर्वोक्तामेव महदादिसृष्टिर्यं तत्तत्वसृष्टिमुपजीव्य ब्रह्मांडरूपपद्मोत्प
त्तिं वक्ष्यन्त्लंतराजगद्व्यापाराधिकृतानिरुद्धरूपिभगवदवस्थितिप्रकारमाह उदितिद्वाभ्यां यदा ऽहींद्रतल्पे शेषशय्यायां मधि ॥ नः एक
असहायः कृतक्षणः तत्कालिजगद्व्यापाराद्दुपरतत्वेन लब्धयोगनिद्रावसरः स्वात्मरतौ स्वात्मानुभवसुखे ऽहीनः पूर्णः ॥ अनीह इत्यपी
पाठः तदा स्वात्मरतौ कृतक्षणः अनीह ॥ निष्क्रियः निद्रया स्वात्मानुभवरूपयोगनिद्रया न्यमीलयन् ॥ लोचन इति शेषः ॥ तदेदं वि
श्वं चेतनाचेतनात्मकं जगदुदावरणोदकेनाप्लुतं व्याप्तमित्यर्थः ॥ अस्य यावद्ब्रह्मांडरूपपद्मोत्पत्तेर्वक्ष्यमाणत्वायोगात् ॥ उदाप्लुतमि
त्यनेन तत्कालिकावस्थया वस्थितास्योदाप्लुतत्वमुच्यते ॥ न कारणभूतजातस्यावरणजलसृष्टिद्वारा स्वकार्योदकव्याप्तिरुच्यते

उदाप्लुतं विश्वमिदं यदासीद्यन्निद्रयामीलितदृङ्न्यमीलयत् ॥ अहींद्रतल्पेधिशयान एकः कृतक्षणः स्वात्मरतावनी
ह ॥१०॥ सोंऽतःशरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः ॥ उवास तस्मिन्सलिले पदे स्वे यथानलो दारुणि
॥ रुद्धवीर्यः ॥११॥

आवरणजलपर्यंतं सष्टुस्तानस्मिन्नावरणजले शायितत्वानि सुक्तं भवति ॥१०॥ पुनस्तमेव विशिनष्टि स इति ॥ अं
तःशरीरे शरीरांतः अर्पितभूतसूक्ष्मः अर्पितानि निहितानि भूतसूक्ष्माणि येन सः दिव्यविग्रहस्य भोक्तृकरणविषयरूपशक्तित्रयाश्रय
त्वात्कारणत्वानांतर्हितगतित्वयुक्तं ॥ कालात्मिकां शक्तिं स्वादृष्टयुक्सिद्धविशेषभूतं कालं कालेन हीरयाणः प्रेरयन्कालशक्तिप्रेरणपु
नः सृष्ट्यवसरे प्रबोधनार्थं स्वे स्वकीये पदे स्थाने स्थाने सलिले विलोरायतनद्व्यापहिस्मर्यते ॥ उवास उषितवान् वहिर्व्यापाराभावे दृ
ष्टांतः यथानल इति ॥ दारुणि काष्ठे ऽनलो ऽग्निः निरुद्ध वीर्यः निरुद्धप्रकाशत्वं पिंगलत्वदाहकत्वादिस्वभावोवतिष्ठते एवं सोपि सेक्षयेवा

एवंविधिवद्दत्ताचार्यैः समनियमविधायोपपन्नेभ्यः श्रीभागवतमुपदिदेशेति वदन्‌ तदर्वाचीनामप्याचार्यपरंपरामाह ॥ प्रोक्तमिति ॥ निवृत्तिधर्माभिरताय
मोक्षधर्मैषासक्ताः सनत्कुमाराय भगवत्तमेन तेन संकर्षणेन तद्भागवतं प्रोक्तं किल ॥ सनत्कुमारायेत्येकत्वं संघाभिप्रायकं स च सनत्कुमारः
पृष्टः विधिवदुपसन्नात्पृष्टः सांख्यायनेनेति शेषः ॥ धृतव्रताय धृतानि निवृत्तानि शिष्यधर्मा येन तस्मै ॥ ७ ॥ पारमहंस्ये धर्मे मुख्यः प्रधानः सां
ख्यायनः भगवद्विभूतीर्विवक्ष्यमाणः वक्तुमिच्छुः ब्रुवादेशस्य वचेर्नम यय्यदीत्वाद्विवक्ष्यमाण इत्यात्मनेपदं ॥ अन्विता यानुगताया
न्ववर्त्तमानायेतियावत्‌ अस्मद्गुरवे पराशराय बृहस्पतये च उवाच ॥ ८ ॥ दयालुः स मुनिः पराशरः पुलस्त्येनोक्तः ॥ त्वं परदेवतापारमा

प्रोक्तं किलैतद्भगवत्तमेन निवृत्तिधर्माभिरताय तेन ॥ सनत्कुमाराय स चाह पृष्टः सांख्यायनायांग धृतव्रताय ॥ ७
सांख्यायनः पारमहंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः ॥ जगाद सोऽस्मद्गुरवेन्विताय पराशरायाथ बृहस्पतेश्च
८ ॥ प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यं ॥ सोऽहं तवैतत्कथयामि वत्स श्रद्धालवे नित्यमनुव्रताय
॥ ९ ॥

र्थज्ञानवान् पुराणकर्त्ता च भवेति दत्तवरः एवं ह्याख्यायिका पितरं राक्षसभक्षितं श्रुत्वा पराशरो राक्षससत्रे प्रवृत्तः वसिष्ठवचनान्नि
वृत्तः ततः पुलस्त्येन स्वसंततिरक्षणतुष्टेन वरो दत्तः पुराणसंहिताकर्त्ता भवान्‌ भव ॥ भविष्यति देवतापारमार्थ्यं च यथावद्वेत्स्यते ॥ भवा
निति ॥ एवं अतः दयालुः पराशरः मह्यं पुराणं प्रोवाच ॥ सोऽहं पराशरेणोपदिष्टं श्रीभागवतपुराणमहं हे वत्स विदुर ॥ श्रद्धालवे नित्यमनु
व्रताय च तव तुभ्यं ॥ नित्यमिति पूर्वपरान्वयतवेति विभक्तिव्यत्यय आर्षः एतच्छ्रीभागवतं कथयामि ॥ ९ ॥ ॥ ॥ ॥

भा. त. टी.

॥ ४४ ॥

श्रोतस्मात्तत्कर्मणोऽश्रवणस्य त्वं तदपि ॥ प्रवासस्य स्वदेशे शान्तरगतस्य योऽनुष्ठेयो धर्मः तं ॥ उतापि च पुंसः आपदि विविधस्य अनुष्ठेयो धर्मस्तं च
३४ ॥ धर्मप्रवर्तको जनार्दनः जनानामन्तरात्मा भगवान्येन मार्गेण तुष्येत् ॥ येषां वा हृष्टानां वा संप्रसीदति तदेतत्सर्वं मे मह्यमाख्याहि कथ
य हे अनघ मे वेदय ॥ ३५ ॥ तस्मान्न तत्र पृष्टप्रतिवचनौत्सुक्यमायाद्यन्नमदपिच्छति ॥ अनुव्रतानामित्यादिना ॥ हे द्विजोत्तम मे वानुव्रतानां से
वमानानां शिष्याणां पुत्राणां चानापृष्टमपि ब्रूयुः वहेतो यतो गुरवो दीनवत्सलाः दीनजनेषु वात्सल्यवन्तः पुत्राणामिति दृष्टान्तार्थं यथा पु

येन वा भगवांस्तुष्येद्धर्मयोनिर्जनार्दनः ॥ संप्रसीदति वा येषामेतदाख्याहि चानघ ॥ ३५ ॥ अनुव्रतानां शि
ष्याणां पुत्राणां च द्विजोत्तम ॥ अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः ॥ ३६ ॥ तत्त्वानां भगवंस्तेषां कति
धा प्रतिसंक्रमः ॥ तत्रेमं क उपासीरन्क उ स्विदनुशेरते ॥ ३७ ॥ पुरुषस्य च संस्थानं स्वरूपं वा परस्य च ः
ज्ञानं च नैगमं यत्तद्गुरुशिष्यप्रयोजनम् ॥ ३८ ॥

त्रेभ्यः पृष्टमपि ब्रूयुस्तथा शिष्येभ्योऽपीत्यर्थः अशेषपीरहस्यार्थः कश्चिद्द
त्ति चेत्सोऽपि वक्तव्य इत्यर्थः ॥ ३६ ॥ हे भगवन्मैत्रेय तत्त्वानां प्रतिसंक्रमः प्रलयः कतिधा कतिप्रकारः ॥ किं पृथिव्यादीनि सर्वाणि संहृत्य स्व
परसकारणे लीयन्ते उतोत्तरेषां पूर्वस्मिन्लयः उतो भयविधोऽपीत्यादि संप्रायानां प्रवृत्तेः कतिधेत्युक्तिः तत्र प्रलये एनं परमात्मानं
केऽपासीरन् अनुपसंहृताः सेवन्ते मुक्ता इत्यर्थः केऽस्वित्के वाऽनुशेरते उपसंह्रियन्ते इत्यर्थः ॥ ३७ ॥ पुरुषस्य जीवस्य संस्थानं स्वासा
धारणप्रकारस्वरूपं धर्मिस्वरूपं च तथा परस्य परमात्मनः संस्थानं स्वरूपं च नैगमं प्राप्तज्ञानं च ॥ कथंभूतं यद्गुरुशिष्ययोः प्रयो

॥ ४४ ॥

तथा रूपशीलस्वभावतः ॥ रूपं लिंगं शीलमाचारः ॥ स्वभावः शमादिः ॥ तृतीयार्थे तसि रूपादिभिः सह वर्णाश्रमविभागांश्च वर्णादीनां परस्परविवि
क्तस्वरूपं चास्याहीत्युत्तरेणान्वयः एवमग्रेपि द्वितीयांतानां तेनैवान्वयः वेदस्य विकर्षणं व्यासं विभागं इति यावत् ॥ २९ ॥ यज्ञस्य वितानानि
विस्तारांश्च योगस्यानभिसंहितकर्मयोगस्य पथः मार्गान् नैष्कर्म्यस्य प्रवृत्तिधर्मस्यागमस्य सांख्यस्य ज्ञानयोगस्य च वितानानि वदेति वा ॥ यद्वा ॥ ज्ञान
योगादीनां प्रतिपादकं यद्भगवता तंत्रं शास्त्रं तत् ॥ ३० ॥ पाषंडानां वैदिकबहिष्कृतानां पंथाः प्रवृत्तिः तस्या वैषम्यं प्रतिलोमनिवेशनं वर्णाश्र

वर्णाश्रमविभागांश्च रूपशीलस्वभावतः ॥ ऋषीणां जन्मकर्माणि वेदस्य च विकर्षणम् ॥ २९ ॥ यज्ञस्य च वि
तानानि ॥ योगस्य च पथः प्रभो ॥ नैष्कर्म्यस्य च सांख्यस्य तंत्रं च भगवत्स्मृतम् ॥ ३० ॥ पाषंडपथवैषम्यं प्रतिलोम॰
निवेशनम् ॥ जीवस्य गतयो याश्च यावतीर्गुणकर्मजाः ॥ ३१ ॥ धर्मार्थकाममोक्षाणां निमित्तान्यविरोधतः ॥ वा
र्त्तायाः दंडनीतेश्च श्रुतस्य च विधिं पृथक् ॥ ३२ ॥ श्राद्धस्य च विधिं ब्रह्मन् पितॄणां सर्गमेव च ॥ ग्रहनक्षत्रताराणां
कालावयवसंस्थितिं ॥ ३३ ॥ दानस्य तपसो वापि यच्चेष्टापूर्त्तयोः फलं ॥ प्रवासस्थस्य यो धर्मो यश्च पुंस उतापदि ॥ ३४ ॥

मिलोमजानां प्रतिकल्पनं जीवस्य सत्वादिगुणकर्मजाः या गतयः फलानि ताश्च ॥ ३१ ॥ धर्मादीनामविरोधतः परस्पराविरोधेन निमित्तान्युपा
यान् वार्त्तायाः कृष्यादिव्यापारस्य दंडनीतेश्च दंडोपकारि लोकशिक्षा तद्विषयानीतन्यायस्य श्रुतस्य श्रुतिविहितस्य संध्योपासनादेश्च पृथक्
प्रविभक्तं विधिं ॥ ३२ ॥ हे ब्रह्मन् मैत्रेय पितॄणामर्यमादीनां सर्गं ग्रहाः सूर्यादयो नवग्रहः नक्षत्राण्यश्विन्यादीनि ताराः लक्षितरताराः ॥ तेषां का

लावयवं वंसंस्थितिं कालावयवावछेदकतया स्थितिं ॥ ३३ ॥ दानस्य तपसः कृच्छ्रचांद्रायणादेः इष्टापूर्त्तयोः

भा.त.टी.

॥४३॥

प्रजापतीनां मरीच्यादीनां पतिः स ब्रह्मा कान्प्रजापतींश्चक्लृपे सृष्टवान्तदेतत्सर्वं वर्णयेत्युपरितनेनान्वयः समष्टिपुरुषो न व्यष्टिप्रजापतिं स्वसृष्टि
द्वारा तत्सुतादिभिरिदं ब्रह्मांडमापूरितं यथाकरोत्तत्प्रकारं वर्णयेत्यर्थः तथा सर्गान्वक्ष्यमाणान्नवविधप्राकृतसर्गाननुसर्गांश्च चतु
र्मुखसर्गांस्तथात्मसर्गान्मनून्स्वयंभुवादींश्चतुर्दश मन्वन्तरेषु येऽधिपास्तान् ॥२४॥ एतेषां मन्वन्तराधिपानां ये वंश्यास्तान् वंश्या
नां वंशजानामनुचरितानि हे मित्रात्मज मैत्रेय ॥ भूमेरुपर्युपरिष्टादधोधस्ताच्च ये लोका आसते तांश्च तेषां लोकानां संस्थामवयवावि

प्रजापतीनां स पतिश्चक्लृपे कान्प्रजापतीन् ॥ सर्गांश्चैवानुसर्गांश्च मनून्मन्वंतराधिपान् ॥२५॥ एतेषामपि
वंशांश्च वंश्यानुचरितानि च ॥ उपर्यधश्च ये लोका भूमेर्मित्रात्मजासते तेषां संस्थां प्रमाणं च भूर्लोक
स्य च वर्णय ॥२६॥ तिर्यङ्मानुषदेवानां सरीसृपपतत्रिणाम् ॥ वद नः सर्गसंव्यूहं गार्भस्वेदांडजोद्भिजां
॥२७॥ गुणावतारैर्विश्वस्य सर्गस्थित्यप्ययाश्रयम् ॥ सृजतः श्रीनिवासस्य व्याचक्ष्वोदारविक्रमम् ॥२८॥

न्यासं प्रमाणं च परिमाणं च वर्णय कथयेत्यर्थः ॥२६॥ तिर्यगिति ॥ तिर्यञ्चः पश्वादीनां मानुषाणां देवानां सरीसृपाणां सर्पादीनां पतत्रि ॥ ७४ ॥
णां च ॥ गार्भाणां जरायुजानां स्वेदानां स्वेदजानां अंडजानामुद्भिजां च सर्गसंव्यूहं सर्गविकल्पनं नोऽस्मभ्यं वद कथय ॥२७॥ गुणावतारै
रज आदिगुणप्रधानैरावेशावतारैर्ब्रह्मादिभिः सृजतो जगद्व्यापारं कुर्वतः श्रीनिवासस्योदारविक्रमं उदारव्यापारमाचक्ष्व ॥ क ॥४३॥
थं भूतमुदारविक्रमं विश्वस्य सर्गस्थित्यप्ययाश्रयं सर्गस्थितिसंहारणमाश्रयं हेतुभूतं सर्गादि यः माश्रयो विषयो यस्य तमिति वा

कं यं अस्ततो विभुः यं पुरुषं प्राद्वा च आद्यं सर्वकारणकारणं सहस्रांघ्रुरुवाहुकमाहुः सहस्रशीर्षापुरुष इत्याद्याः श्रुतयः श्रोनुप्राविर
शादिमन्वयः तमेव विशिनष्टि । यत्रेति यत्र चतुर्मुखशरीरे केवि श्व इमे सर्वे लोकाः सविकाशमसंकोचेन समासत तिष्ठंति ॥ २२
यस्मिन्निति दशविधः प्राणा याः पानादयः पंच नागकूर्मकृकलदेवदत्तधनंजयाः पंचोपप्राणा इंद्रियार्थी इंद्रियाणि ज्ञानकर्माभयात्म
कानि तत्सहितो यस्त्रिवृत्त्रिगुणात्मकः प्राणः यस्मिन्वैराजे समाप्ते । यत स्वैराजात येभ्यो त्वत्कृत्वाः ब्राह्मणादयो वर्णा अभ
वन् । तद्विभूतीः स्वैराजस्य विभूतीः प्राधान्येन नियाम वर्णान्नोऽस्मभ्यं वद वर्णायस्व ॥ २३ ॥ द्वितीयेऽष्टमेध्याये यदधातुमह

यमाहुराद्यं पुरुषं सहस्रांघ्र्युरुवाहुकम् । यत्र विश्व इमे लोकाः सविकाशं समासते ॥ २२ ॥ यस्मिन्दश
विधः प्राणः सेंद्रियार्थेंद्रियस्त्रिवृत् । त्वयेरितो यतो वर्णास्तद्विभूतीर्वदस्व नः ॥ २३ ॥ यत्र पुत्रैश्च
पौत्रैश्च नप्तृभिः सह गोत्रजैः । प्रजा विचित्राकृतय आसन्याभिरिदं ततम् ॥ २४ ॥ छ

तोऽब्रह्मन्नित्यादिना राजकृतप्रश्नानां केषांचिदुत्तराण्यभिधाय अवशिष्टानामुत्तराण्यभिधातुं विदुरमैत्रेयसंवादः प्रस्तावतः
एव मेतत्पुराष्टृष्ट इत्यादिना मिहानीते षामेव प्रश्नानामुत्तरविवक्षया अनतएव विदुरकृत प्रश्न इत्याह यत्रेत्यादिनायावद
ध्यायसमाप्ति । यत्र ब्रह्मांडे पुत्रादिभिः सह प्रजाः विचित्राकृतयः नानाविधः देहा ॥ आसन् ॥ याभिः प्रजाभिरिदं ब्रह्मांडं ततं व्या
छ छ छ छ छ छ छ छ छ छ प्तं ॥ २४ ॥

स्यापिनात्मनः। अनात्मनः देहस्य निषेधार्थको नशब्दः ॥ अर्थाभावमात्मत्वाभावविनिश्चितमतां चापि देहात्मप्रतीतिमपि युष्मच्चरणसेव
यात्वत्सेवया पराणुदे प्रणाशयेदित्यर्थः ॥ अहं पराणुदेऽपाकरोमीत्यर्थः ॥ १८ ॥ तत्सेवाया एव प्रथमकारणत्वमाह परा ॥ यत्सेवयेति
यत्सेवया येषां सतां सेवया कूटस्थस्य निर्विकारस्य मधुद्विषः भगवतः पादयोः तीव्रः विघ्नानुपहतः व्यसनार्दनः तापत्रयनिवर्त
कः रतिरासः स्नेहोल्लासः अनुरागोल्लासः भवेत् ॥ १९ ॥ सत्सेवापि बहुतपसो लभ्येति तिव्यतिरेकमुखेनाह ॥ दुरायेति ॥ अल्पतपसः

यत्सेवया भगवतः कूटस्थस्य मधुद्विषः ॥ रतिरासो भवेत्तीव्रः पादयोर्व्यसनार्दनः ॥ १९ ॥ दुरापा ह्यल्पतपसा
सेवा वैकुण्ठवर्त्मसु ॥ यत्रोपगीयते नित्यं देवदेवो जनार्दनः ॥ २० ॥ स्रष्टाग्रे महदादीनि सविकाराण्य
नुक्रमात् ॥ तेभ्यो विराजमुद्धृत्य तमनुप्राविशद्विभुः ॥ २१ ॥

तपोहीनस्य वैकुण्ठवर्त्मसु वैकुण्ठप्रापकेषु भागवतेषु सेवा दुरापा हि दुर्लभा हीत्यर्थः कथंभूतेषु यत्र वैकुण्ठवर्त्मसु देववरैर्देवैः ब्र
ह्मादीनामपि देवः जनार्दन उपगीयते । अनेन सत्सेवायाः श्रवणादिप्रणाड्यैव भक्त्युत्पादकत्वं ॥ इति सूचितम् ॥ २० ॥ अथार्था
न्तराण्येकामस्तुदुक्रममनुवदति स्रष्टेति विकारैरिंद्रियादिभिः सहितानि सविकाराणि महदादीन्यग्रे अपि सृष्टेः पूर्वं सृष्ट्वा तेभ्यो
महदादिभ्यः विराजं व्याष्टिरूपैर्विविधं राजतीति विराट् ब्रह्माण्डमुद्धृत्य अण्डसृष्टिद्वारेणाद्यविभुर्भगवान् तं विराजमनुप्राविशत्
॥ २१ ॥

महं नवतरीयेन सक्तासिना सद्वं सो पश्यति कवा कंपते स्वामिः खड्गः तेन मम दुर्हे शेषेन त्वयाभिहितवाक्यखड्गेन संछिन्नः अपितु उभयत्र गुणानुवाद
श्रवणेन चरणारविंदपरागसेवार्थी च मेमनः संप्रधावति प्रवणं भवति ॥ अनेन स्वाभिप्रेतमाविष्कृतं ॥ १५ ॥ उत्तरमेव प्रपंचेनाभिनंदति ॥ साध्विति
आत्माजीवः साक्षात्प्रकृतिः उभयमेवायनं हरेस्तस्य वासस्थानं साधु व्याहृतं इत्यर्थः पूर्वशरीरगतच्छेदनादेहात्मभ्रमस्य शोइद्दृष्टांती कृतमहि शरीरम्
चिदचिद् तत्त्वेषामावः परमात्मन उक्तः अतस्तस्य भगवतः ॥ चिदचिद्व्याप्तिपूर्वार्द्धेनान्तरीकृता कथं चेतनाचेतनं तस्यायतनं तद्धीदं जगदात्म
तत्त्वेन प्रतीयते इत्यत्राह ॥ आभातीति ॥ विश्वमत्वं विश्वकारणं यद्रूपसंपन्नं बहिः यस्य जगतः ॥ बहिर्न अंतः प्रविष्टं तदिदं जगन्निर्मलं मल
साध्वेत व्याहृतं विदन्नात्ममायायनं हरेः ॥ आभात्यर्थो निर्मलं विश्वमलं न यदहिः ॥ १६ ॥ यश्च मूढतमो ल
लोके यश्च बुद्धेः परं गतः ॥ तावुभौ सुखमेधेते क्लिश्यत्यंतरितो जनः ॥ १७ ॥ अर्थाभावं विनिश्चित्य प्रतीतस्या
पि नात्मनः ॥ तां चापि युष्मच्चरणसेवयाहं पराणुदे ॥ १८ ॥ अतः परब्रह्मरहितमतदात्मकं भातीति यन्नदिदमयार्थ
मर्थशून्यं निर्विषयं भाति रूपमिति यावत् ॥ अनेनाब्रह्मात्मकत्वप्रतिभासो मिथ्यारूप इत्युक्तः ॥ १६ ॥ एवं देहात्मप्रतीतिभ्रांतिरूपेति ब्रह्म
तद्ब्रह्मात्मकत्वं चात्मभ्रम देहात्मभ्रमवतां क्लेशत्वमाह ॥ य इति ॥ यश्च लोके मूढतमः ॥ यश्च बुद्धेः परं विलक्षणं ब्रह्मात्मकं स्वात्मानं गतः
कर्मरिक्तः अवगतवान् तावुभौ मूढतमात्मस्वरूपभिज्ञो सुखमेधेते वर्द्धते ॥ मूढं तमस्यापि मोहमेव किंचित्सुखजनकमित्यभिप्रायः
इदं चानरित्वस्य सर्वथा क्लेशित्वाभिप्रायकः अंतरितः न मूढतमः नापि बुद्धेः परंगतः किंतु संशयात्माजनः किंतु संशयात्माजनः
क्लिश्यति ॥ १७ ॥ देहात्मप्रतीतेर्भ्रांतित्वं वदन्निवर्त्तने मूलकारणमाह ॥ अर्थाभावमिति ॥ प्रतीतस्यापि ॥ आत्मता हात्म्येन प्रतीयमानर

भा.त.टी.

॥४१॥

किंपर्यंतमभक्त्याहेत्यनिवृत्तिरित्यत आह यदेति ॥ अर्थान् शब्दादीन् प्रति इंद्रियोपरतिरिंद्रियविनिवृत्तिः तदा परे प्रकृतिपुरुषविलक्षणे हरावा
श्रितबंधहारिणि आत्मनि परमात्मनि पूर्वोक्तभक्त्या दृष्टे साक्षात्कृते सति ॥ दृष्टे आत्मनीति पदच्छेदः ॥ अयादेशेय लोपे चार्षो गुण ॥ कृत्स्नशः
क्लेशाः विलीयंते इत्यर्थः तस्मिन् दृष्टे परावरे इति श्रुतेः तेषामस्थिरत्वे दृष्टांतमाह ॥ संसुप्तस्येवेति ॥ नहि संसुप्तस्य कार्त्स्न्येन दुःखनिवृत्तिः
तस्येव जाग्रतः पुनः क्लेशाश्रयत्वात् ॥ दृष्टात्मनि इत्यपि पाठः तदार्थान् दृष्टे इंद्रियोपरतिः ॥ इंद्रियाणामविकृतिर्यदा हरावात्मनि जीवस्थि
ते सति क्लेशविलय इत्यर्थः ॥ दृष्टात्मा येत्यपि पाठः ॥ तदा सर्वज्ञैः आत्मनि हरौ इंद्रियाणामुपरामो नेष्वत्स्य यदा अथानंतरं प्रसक्तनाप

यदेंद्रियोपरामोऽथ दृष्टात्मपरे हरौ ॥ विलीयंते तदा क्लेशाः संसुप्तस्येव कृत्स्नशः ॥१३॥ अशेषसंक्लेशशमं विध
त्ते गुणानुवादश्रवणं मुरारेः कुतः पुनस्तच्चरणारविंदपरागसेवारतिरात्मलब्धा ॥१४॥ विदुर उवाच ॥ सं
छिन्नः संशयो मह्यं तव सूक्तासिना विभो ॥ उभयत्रापि भगवन्मनो मे संप्रधावति ॥१५॥ नाम्निका ध्रुवानुस्मृति

र्भवति तदा कार्त्स्न्येन क्लेशविलय इत्यर्थः ॥१३॥ साक्षात्कारपर्यंतभगवद्भक्तेः कैमुत्यन्यायेन क्लेशनिवर्तकत्वमाह ॥ अशेषेति ॥ हरेर्गुणा
नुवादः अनुवर्णनं श्रवणं चेत्येतदुभयमेवाशेषक्लेशशमं विधत्ते करोति किं वा पुनः किंपुनः ॥ आत्मलब्धा मनसा लब्धा तस्य भगव
तः चरणारविंदयोः परागः तस्य सेवा तैलधारावदविच्छिन्नस्मृतिसंततिरितियावत् ॥ अशेषक्लेशसमं विधत्ते इति किं वक्तव्य
मित्यर्थः ॥

रणायभवति॥तथाचश्रुतिः॥अस्मान्मायीसृजतेविश्वमेतत्तस्मिंश्चान्योमाययासंनिरुद्धः॥मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरं इतिमायाप्रकृ
तिःमायीश्वरः॥अत्रयथार्थेनविनामुष्येत्यपिपाठः तत्रायमर्थः परमात्मनःअप्यचिद्विकृतदोषास्पर्शेदृष्टांतमाहयथेतियथामुष्यजीव
स्यार्थेनविनापुरुषार्थभूतस्वस्वरूपेणविना आत्मनःस्वरूपाप्रतीतिदशायामित्यर्थः॥आत्मविपर्ययः॥आत्मनःजीवस्यविपर्ययःदेहाका
रः॥प्रतीयतेउपद्रष्टुरात्मस्यैवदेहतादात्म्यमभिमन्यमानस्यशिरश्छेदादिकोपुरुषार्थभूतस्वात्मप्रतीतिदशायांतुनविपर्ययःशिरश्छेदादि
कोवाप्रतीयतेतस्यदेहविलक्षणत्वात्तस्यदेहात्मबुद्धेःभ्रांतित्वात्देहातिरिक्तत्वसिद्धिःएवंजीवस्यापिपरमात्मशरीरत्वात्तस्यतस्यनतत्कृतदोष

सवैनिवृत्तिधर्मेणवासुदेवानुकंपया॥भगवद्भक्तियोगेनतिरोधत्तेशनैरिह ॥१२॥ श्रीरामः॥

स्पर्शइत्यर्थः॥दृष्टांतांतरमाहयथाचंद्रमसोजलाद्युपाधिवशात्प्रतीयमानःकंपादिर्नपरमार्थतोस्तिकिंतुभ्रांत्याद्रष्टुःसर्वज्ञस्यात्मनःपर
मात्मनःअनात्मनःअपरमात्मनःगुणःअपरमात्मभूतचेतनगतोधर्मःअसन्नपिभ्रांत्याप्रतीयतेपरमात्मनःचेतनाचेतनगतदोष
संसर्गशंकामलभूतावुद्धिर्भ्रांतिरित्यर्थः॥११॥नकेवलंभगवतस्तत्तद्धेयाकारजीवांतरात्मतयावस्थितस्यदोषस्पर्शाभावरूपकल्या
णगुणएवप्रतिपादितःकिंतुतस्यजीवगतहेयनिवर्तकत्वंचेत्याह॥सवाइति॥सवैहेयगुणःकर्मयोगानुगृहीतभगवद्भक्तिजन्यभग
वदनुकंपयातिरोधत्तेइत्यर्थः॥यद्व्यक्त्याहेयनिवृत्तिस्तस्यहेयप्रत्यनीकत्वमर्थसिद्धं॥१२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

प्रदेशोक्त्या कार्त्स्न्यैरीनांनतरतु कात्स्न्यैरितं तु संयुक्तप्रदेशे कांतस्थितिवत् ॥ शरीरगतत्वात्स्य योषिन्नारीनामात्मन्यस्पर्शवच्च परमात्मनि प्रसक्तस्वाभावा
द्दतः सर्वत्रैवस्थितस्यापि परमात्मनोन तेत्रगतदोषसंस्पर्शः ॥ ९ ॥ जीवस्यतु स्वतोपहतपाप्मत्वादिविशिष्टत्वेपितत्स्वरूपस्याविद्याकर्मसंसारा
चिप्रकृतिसंबंधादिभिस्तिरोहितत्वेनतत्तद्देहात्माभिमानेनापुरुषार्थसंबंधोवर्जनीय इति सदृष्टांतमाह ॥ यदर्थेनेति ॥ यद्यपि तत्र मुष्यकर्म
वश्यस्य पुंसो जीवस्यार्थेन पुरुषार्थभूतेनात्मस्वरूपेणविना आत्मविपर्ययः देवमनुष्यत्वादिभावः तत्प्रयुक्तः स्वशिरश्छेदनादिकः स्वश
रीरस्य तद्देवमनुष्यादिशिरसिछिन्नेममेदंशिरश्छिन्नमिति शोकश्च उपद्रष्टुर्देहिमात्मतादात्म्येनानुसंदधतः प्रतीयत्वेऽनुभूयतेसेयमपि

परार्थेन विनामुष्य पुंस आत्मविपर्ययः ॥ प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिकः ॥ १० ॥ यथाजले चंद्रमसः
कंपादिस्तत्कृतो गुणः ॥ दृश्यतेसन्नपिद्रष्टुरात्मनोनात्मनो गुणः ॥ ११ ॥ भगवतो माययेमर्थः ॥ १० ॥ एतदेव दृष्टांतेनोपपा
दयति ॥ यथेति ॥ यथाजले चंद्रमसः स्वतश्चंद्रस्यासत्त्रपितत्कृतः जालाद्युपाधिकृतः कंपादिश्चलनादिरूपोगुणः ॥ दृश्यत एवमात्मनोपिर
आत्मनोदेहस्यगुणः उपद्रष्टुर्देहस्यात्मतादात्म्यमभिमन्यमानस्यदृश्यतेकर्मवश्यपायः नाद्यविद्यासंबंधेनस्वरूपाप्रतीतिर्देहात्मभ्रांतिस्त
यान्वशोकमोहादयः परमार्थतस्तुनदेहगतैर्दमैःस्पृश्यतेइत्यभिप्रायः परमात्मनस्त्वविद्ययानितिरोहितस्वरूपस्य प्रकृतिपुरुषयोर्नियं
तुः नाविद्यानत्कार्यप्रसंगइत्यर्थः एतदेवमुक्तभोगापरित्यक्ताद्दृष्टदोषा चनित्यशः नेश्वरस्याशुभंधत्तेस्वमहिम्निस्थितस्यचेत्युक्तंज्ञी
वेशयोरुभयोरपिप्रकृतिसंबंधोविशिष्टः इयांस्तुविशेषः प्रकृतिरेकस्यस्ववश्यस्ववश्यस्याशुभंधत्ते अन्यस्यतुस्वनियंतुलालोपक ॥५०॥

यदुक्तं चेतनाचेतननियमनार्थं तदंतरात्मतया स्वेच्छयाप्यवस्थितस्य तत्संबंधं प्रयुक्तपरिणामित्वदुःखित्वाद्यपुरुषार्थसंबंधोऽवर्जनीय इतिनै
तद्युक्तं नह्यविद्यस्यापि स्वभावतोऽपुरुषार्थस्वरूपं कर्मबंधनानां तु कर्मस्वभावानुगुण्येन परमपुरुषसंकल्पादेकं एव वस्तु कालभेदेन पुरुषभे
देन पुरुषभेदेन च सुखाय दुःखाय च भवति ॥ वस्तुस्वरूपप्रयुक्तत्वे तु नाडूप्ये सर्वं सर्वस्य सुखाय दुःखायैव वा स्यात् न चैवं दृश्यते ॥ तथा चोक्तं
नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम ॥ वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च ॥ कोपाय च यतस्तस्माद्वस्तु वस्त्वात्मकं कुतः ॥ तदेव प्रीतये भू
त्वा पुनर्दुःखाय जायते ॥ तदेव कोपाय यतः प्रसादाय च जायते तस्माद्दुःखात्मकं नास्ति न च किंचित्सुखात्मकमिति अतो जीवस्य कर्मवश्यता
नैतत्कर्मानुगुण्येन तद्वस्तुसंबंधाद्वापुरुषार्थः परस्य तु ब्रह्मणो निरस्तनिखिलदोषस्य समस्तकल्याणगुणाकरस्य स्वाधीनतस्य विवि

मैत्रेय उवाच ॥ सेयं भगवतो माया यन्नयेन विरुध्यते ॥ ईश्वरस्य विमुक्तस्य कार्पण्यमुत बंधनम् ॥ ९ ॥

धविचित्रस्वाभाविकशक्तिमतः अपुरुषार्थाश्रयचेतनाचेतनसंबंधस्तद्विचित्रनियमनरूपलीलारसायैवस्याज्जीवस्य तु विद्यासंबंधोऽ
पुरुषार्थजननायस्यादित्याह ॥ सेयमिति त्रिभिः ॥ ईश्वरस्य कृपणत्वं मुक्तस्य बंधनं च येन हेतुना न विरुध्यते सेयं भगवतो माया आश्च
र्यशक्तिः जीवत्वव्यापिनो भगवत आप्यहृष्याबद्धजीवगतदोषास्पर्शहेतुभूताश्चर्यशक्तियोगाद्व्याप्यवस्तुगतदोषास्पर्शकारित्वेहेतो
र्नविरोध इत्यर्थः पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतेः ॥ विविधविचित्रानंतशक्तियोगास्तत्तद्वस्तुव
स्थानप्रयुक्तनत्तद्दोषास्पर्श उक्तः ॥ अनेन च ब्रह्मणः कथं भगवत इति कारणत्वात्क्षेपोऽपि परिहृतः गुणक्रियाणां चेतनाचेतनद्वारक
त्वेन ब्रह्मणस्तत्संस्पर्शाभावात् प्रकृतिपुरुष ॥ विशिष्टस्य कारणत्वाभ्युपगमेन प्रकृतिपुरुषगतविकाराणां मुक्तकृत्स्नकर्तृत्वारब्ध

आत्मनोंतर इत्यादिश्रुतेः॥ अतो दुःखितं संसारित्वादयो गुणकार्यभूताः न परमात्मानं स्पृशंतीति चेत्तत्राह॥ अमुष्य भगवतः दुर्भगत्वं कर्मभिः
क्लेशो वा कुतः स्यादित्यर्थः अयमभिप्रायः यदि परमात्मनः सर्वत्र व्याप्तिस्तच्चेत्तर्हि जागरस्वप्नसुषुप्तिसंक्रांतिषु जीवस्य तत्स्थानप्रयुक्त
ये दोषास्ते नदंतर्यामिणः॥ परस्य ब्रह्मणोपि संभवंति॥ न च परमात्मनो कर्मवश्यत्वेन दोषाभाव इति वाच्यं कर्मणां देहसंबंधापादनद्वारा
क्लेशाद्यपुरुषार्थजनकत्वेन देहसंबंधस्याप्यपुरुषार्थत्वात् अन्यथा कर्मणामेव दुःखादिजनकत्वेन देहसंबंधस्य प्रयोजनत्वाप
त्तेश्च परमात्मनः॥ कर्मवश्यत्वाभावेपि सर्वज्ञत्वेनैव व्यवस्थित इति देहसंबंधानुपगमानाविधाप्युचि देहसंबंधस्यैवापुरुषार्थत्वात्॥

एतस्मिन्मे मनो विद्वन्खिद्यते ज्ञानसंकटे॥ तन्नः पराणुद विभो कश्मलं मानसं महत्॥ ७॥ श्रीशुक उवाच
स इत्थं चोदितः क्षत्त्रा तत्त्वजिज्ञासुनात्मनिः॥ प्रत्याह भगवच्चित्तः स्मयन्निव गतस्मयः॥ ८॥

अत एव तन्नियमनार्थं स्वेच्छया तत्त्वे ब्रह्मस्य पुरुषार्थसंबंधोप्यवर्जनीयः॥ पूयशोणितादिमज्जतं स्वेच्छाकारितमप्यपुरुषार्थ एवानीय
द्यपि जगदेकं कारणं सर्वज्ञत्वादिकल्याणगुणाकरं च ब्रह्म तथापि यः पृथिव्यां तिष्ठन् य आत्मनि तिष्ठन्नित्यादिवचनात्तत्र तत्रावस्थि
तस्य तत्संबंधरूपाः पुरुषार्थाः संतीत्यर्थः॥ ६॥ प्रश्नमुपसंहरति॥ एतस्मिन्निति हे विद्वन्मैत्रेय एतस्मिन्ज्ञानसंकटे इति पदच्छेदः॥ अ
ज्ञानरूपसंकटे मनो खिद्यते तस्माद्धे विभो मैत्रेय नः अस्माकं मानसं मनः॥ संबंधि महत्कश्मलं खेदं पराणुद अपाकुरु॥ ७॥ एवमापृ
ष्टो मैत्रेय आहेत्याह श्रीशुक स इति तत्त्वजिज्ञासुना क्षत्त्रा इत्थमुक्तरीत्या चोदितः आपृष्टो मुनिर्मैत्रेयः भगवच्चित्तः भगवत्येव चित्तं यस्य सः गत

स्मयः तत्त्वदर्शित्वेन विगतस्मयः स्मयन्निव प्रश्नस्य सुपरिहारकत्वादिति भावः॥ प्रत्याह प्रत्यभाषत॥ ८॥
॥२९॥

यंनमपादेनेन परिहरति ॥ अस्राक्षीदित्यादिना गुणमय्या सत्त्वादिगुणप्रचुरया आत्मसंबंधिन्या मायया भगवान्विश्वमस्राक्षीत् तया माय
योपलक्षितया मायया उपलक्षितः एतद्विश्वं संस्थापयति सम्यक् स्थापयति प्रतिष्ठापयति पालयतीति यावत् ॥ पुनर्भूयः प्रत्यभिधास्य
प्रातिलोम्येनापिधास्यति तिरोहितं करिष्यति ॥ अपिपूर्वो धाधातुस्तिरोधाने एव वर्त्तते ॥ स्वाधिष्ठेयां गुणमयीं मायां महदादिरूपेण परिणाम
य स्वयं गुणत्रययुक्तत्रिमूर्त्तिरूपेण सृष्ट्यादीन्करोति ॥ ४ ॥ अतः परिणामादयः स्वाधिष्ठेयमायागता न स्वगता इति चेत्तत्राह ॥ दे
शत इति ॥ योसौ परमात्मा दीप्रभाया इव देशतः विद्युत इव कालतः स्मृतेरिवावस्थातः स्वप्नवत् स्वजीवदन्यतः ससत्त्वादिभिरवि

अस्राक्षीद्भगवान्विश्वं गुणमय्यात्ममायया ॥ तयासंस्थापयत्येतद्भूयः प्रत्यभिधास्यति ॥ ४ ॥ देशतः काल
तो योसावस्थातः स्वतोन्यतः ॥ अविलुप्तावबोधात्मा स युज्येताजया कथम् ॥ ५ ॥ भगवानेक एवै
ष सर्वक्षेत्रेष्ववस्थितः ॥ अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ॥ ६ ॥

लुप्तावबोधात्मा विशेषेण लु
प्तज्ञानरूपो न भवति सर्वगतत्वान्नित्यत्वान्निःसत्त्वाद्दविक्रियत्वादनितरानुभाव्यत्वत्कालमात्रावसायित्वाभावात्कर्मवश्यत्वाभावात्
अतएव स परमात्माऽजया मायया कथं युज्येत ॥ यदि येन केनापि देहादिनाऽलुप्तावबोधे भवेत्तर्ह्यविद्यासंबंधः समभविष्यत्
तदभावात्कथमजया युज्येतेति शंकाभिप्रायः ॥ ५ ॥ एवं जीवशरीरकत्वेन जनक्लेशाद्यनाश्रयत्वमद्वैतार्शकां परिहरति ॥ भगवानि
ति ॥ एष भगवानेव सर्वक्षेत्रेषु समस्तशरीरेष्ववस्थितः जीवांतरात्मतयाऽवस्थितः अंतःप्रविष्टः शास्ता जनानां य आत्मनि तिष्ठ

वैकस्यैवकर्तृत्वोपोपादानत्वलीलैकप्रयोजनयोरभ्युपगम्यमानयोर्विर्विकारिणोनिर्गुणस्यपरिणामादयः क्रियाः गुणकार्यंगर्भजन्म
मरणक्लेशादयश्चदुर्वाराआपतिष्यंततः कथंजगत्कारणत्वमिति॥ अनेनप्रयोजनवत्वाधिकरणसिद्धांते दूषणमुक्तंभवति॥ न
न्वहिसप्तद्वीपवतीमेदिनीमधितिष्ठतोमहाराजस्यकंदुकाद्यारंभवत्पूर्णषाड्गुण्यपूर्त्तेस्वात्तस्यसमस्तकामस्यस्वपरप्रयोजनरहि
तस्यापिभगवतः केवललीलैकप्रयोजनजगद्व्यापारउपपन्नइतिस्थापितंतत्रविषमोयंदृष्टांतः॥ महाराजस्याषाड्गुण्यपूर्णत्वे
नानवाप्तसमस्तकामत्वात्सत्वादिगुणवश्यत्वाद्विकारित्वाद्रमणस्तद्विपरीतत्वादुक्तदोषापातश्चेति॥२॥ एवंदृष्टांतांतरमपि

विदुर उवाच॥ ब्रह्मन्कथंभगवतश्चिन्मात्रस्याविकारिणः॥ लीलयावापियुज्येरन्निर्गुणस्यगुणाः क्रियाः॥२॥
क्रीडायामुद्यमोर्भस्यकामश्चिक्रीडिषान्यतः॥ स्वतस्तृप्तस्यचकथंनिवृत्तस्यसदान्यतः॥३॥ श्री०:

नोपपद्यतेत्याह॥ क्रीडायामिति॥ अर्भस्यक्रीडायामुद्यमः सप्रयत्नः तद्धेतुस्ततः कामः अन्यतः क्रीडोपकरणैः कालांतरप्रवृत्तेनेनवाचिक्री
डिषाक्रीडेच्छाचस्यादीश्वरस्यतुस्वशरीरस्यततस्तृप्तस्यस्वानुभवेनैवतृप्तस्यकथंकाम॥ सदाऽन्यतः स्वव्यतिरिक्तास्वतंत्रंक्रीडोपकर
णात्क्रीडाप्रवर्त्तकपुरुषांतरेभ्यश्चनिवृत्तस्यचिक्रीडिषाचकथंतस्मादतोर्भकदृष्टांतोऽनुपपन्नइतिभावः॥३॥ नन्विदंदोषापादनमयु
क्तंयदुपादानत्वेपरिणामित्वक्लेशाद्याश्रयत्वमिति। यतः प्रकृतिपुरुषयोःकारणत्वाभ्युपगमेनगुणक्रियाणांस्वशरीरभूतप्रकृतिपु
रुषगतत्वादितिमैवंशंक्यंभगवानेकएवेपइतिपूर्वोक्तंनजानीम॥ अमुष्यदुर्भगत्वमितुत्तराद्वैनहेयतः कालतइतिश्लोकेचदो ॥३८॥

मतश्चयस्यामतंमतंतस्यमतंयस्यनवेदसः॥ अविज्ञातंविजानतांविज्ञातमविजानतां॥ यतोवाचोनिवर्त्तंते अप्राप्यमनसासह॥ आनंदंब्रह्मणो
विद्वानितिवेदनविधिप्रतिषेधयोरुपपत्तिः अपरिछिन्नत्वपरिछिन्नत्वाभ्यांतयोर्व्यवस्थितिविषयत्वात्॥४०॥ इतितृतीयेषष्ठोध्यायः॥६॥
एवंप्रकृतिपुरुषकालनियंतृपरमेश्वराधिष्ठितात्प्रधानान्महदादिसृष्टिंततस्तेषुसृष्टेषुतेषुस्वानुप्रवेशाहितसृष्टिसामर्थ्यब्रह्मांडंचतुर्मु
खशरीरंतद्वारासमष्ट्यवस्थयावस्थितेषुकथितेषुपुनस्तेभ्याव्यष्टिशरीरेंद्रियादिविभागेपरमात्मात्मकचतुर्मुखकर्तृकेभिहितेषु
नः क्षत्ताकांक्षितस्तस्मात्॥ प्रथमंभगवतोजगदुपादानत्वप्रयुक्तदोषसंपर्कशंकापरिहारंबुभुत्सयापप्रछेत्याहश्रुकः॥ एवमिति॥ द्वै

इतिश्रीमद्भागवतेमहापुराणेतृतीयस्कंधेसृष्टिवर्णनंनामषष्ठोध्यायः॥ ६॥ श्री उ च एवंब्रु
वाणंमैत्रेयंद्वैपायनसुतोबुधः प्रीणयन्निवभारत्याविदुरःप्रत्यभाषत॥ १॥ छ॥

पायनश्रीव्याससुतः बुधस्तत्वंदृशाभारत्यास्वगिराप्रीणयन्निवउक्तप्रकारेणब्रुवंतंकथयंतंमैत्रेयंप्रत्यभाषत॥१॥ भगवतस्तच्छु
त्वमुपादानत्वंवाशिपतिब्रह्मन्नितिद्वाभ्यां॥ हेब्रह्मन्नेमैत्रेयभगवतःपूर्णषाड्गुण्यस्यचिन्मात्रस्यज्ञानैकरसस्यमात्रचाक्कापिजडत्वा
भ्यावृत्तिः अतएवाविकारिणः अतएवनिर्गुणस्यसत्वादिगुणरहितस्यगुणाःगुणकार्यभूताःक्लेशादयःक्रियाःपरिणामादयः
लीलयावापिकथंयुज्येरन्नित्यन्वयः अयमभिप्रायः॥ भगवतस्सृष्ट्यादिकर्तृत्वंजगदाकारेणपरिणमस्यलीलयेवेतिवक्तव्यंन
तुकर्मणा॥ अपहतपाप्मेत्यादिश्रुतेः एतेदेवहिनप्रयोजनत्वाधिकरणेलोकवत्तुलीलाकैवल्यमित्यनेनसूत्रेणसिद्धांतितं॥ एवं

भा.तृ.टी.

॥३७॥

नकेवलमस्माभिरेव भगवन्माहिमा कार्त्स्न्येन दुर्ज्ञेयः किंतु ब्रह्मादिभिरपि ज्ञानाधिकैरित्याह ॥ आत्मन इति हे वत्स विदुर आदिना कविना चतुर्मुखे
नात्मनो भगवतो महिमा वहुसंवत्सरांते योगविपक्वया धिया ऽविसितः ॥ किमिति का कथा एतावानिति न ज्ञात इत्युक्तं यद्वा अवसितः अपरिछिन्नत्वे
नैव ध्याहारः ॥ ३८ ॥ न केवलं माहिकविरेवापरिछिन्नत्वेन वेद किंतु भगवानपि स्वयं न थैव वेदेत्याह ॥ अहो इति ॥ भागवती भगवत्संबंधिनी मा
या आश्चर्य शक्तिर्मायिनामप्याश्चर्यशक्तिमतामपि मोहिन्या श्चर्यजनयित्री ॥ अहो इत्याश्चर्ये यद्यस्मादात्म वत्मात्मात्मवर्त्मनः स्वरूपक्रमा
र्गमतस्य वेद स्मात्मावेद समर्त्नि म ॥ न वेद इयत्तया न वेदापरे ब्रह्मादयः ॥ न विदुरिति किमु वक्तव्यमित्यर्थः ॥ ३९ ॥ ननु वाङ्मनसोरतींद्रि
यार्थदर्शिनोरपयोर्देवा अजानीयुरेवं सर्वेषामपि दुर्ज्ञेयत्वे ऽनुपास्यत्वप्रसंगादित्यत आह ॥ यत इति ॥ वाचो वेदवचांसि मनः योगपरि

आत्मनोवसितो वत्स महिमा कविनादिना ॥ संवत्सरसहस्रांते धिया योगविपक्वया ॥ ३८ ॥ अहो भगवती
मायामायिनामपि मोहिनी ॥ यत्स्वयं चात्मवर्त्मात्मा न वेद किमुतापरे ॥ ३९ ॥ यतो ऽप्राप्य निवर्तंते वाच
श्च मनसा सह ॥ अहं चान्य इमे देवास्तस्मै भगवते नमः ॥ ४० ॥

शुद्धं मनः तेन सहाहमतींद्रियार्थदर्शिनोऽस्मत्प्रभृत
यः ॥ अपरे ऽपि देवा ब्रह्मादयश्चाप्राप्य कार्त्स्न्येन यन्महिमानमनवगम्य यतो भगवतः सर्वज्ञत्वं तस्मै भगवते नमः नहि कार्त्स्न्येन वाङ्म
नसादयो विदुः किंतु तन्महिमानमपरिछिन्नत्वेनैव विदुः न चानुपास्यत्वप्रसंगः तत्स्वरूपगुणविभूतीनामपरिछिन्नत्वेनोपासनोप
पत्तेः अत एव न भगवतो ऽपि कार्त्स्न्येन स्वस्वरूपाद्यज्ञानेन सर्वज्ञताहानिः अपरिछिन्नत्वेनैव ज्ञानस्य सर्वज्ञतानिर्वाहकत्वात् यद्यद्वस्तु य
थाविधं प्रमितं तत्तथा यथात्म्यज्ञानं हि सर्वज्ञतापादकं नहि अपरिछिन्नस्य परिछिन्नस्य वा ऽपरिछिन्नताज्ञानं सर्वज्ञत्वं निर्वोढुमलं ॥३७॥

एवंसृष्टिलीलां वर्णयित्वा पुनः प्रस्तावसरप्रहानापापारमहिम्नो भगवतः साकल्येन महिमानमुपवर्णयितुं न कोपि शक्नोतीति वदन्नुपसं
हरति एतदिति ॥ दैवकर्मात्मरूपिणः दैवनियाम्यतेन तत्संबंधित्वात् कर्मशब्देन जीवादृष्टस्यैव गुणपादानात् ॥ आत्मानः कालकर्मावश्य
।जीवा दैवादिरूपाणि शरीराणि यस्य संतीति दैवकर्मात्मरूपी तस्य भगवतः पूर्वपाडुणस्य योगमायाबलोदयं युज्यतेनेनेति योगाऽधिष्ठेय
।सा चासौ माया तस्याः बलं जवनसामर्थ्यं तस्योदयः विभवो यस्मिंस्तदेतद्विश्वं हे क्षत्तः विदुर उपाकर्तुं साकल्येन व्याकर्तुं वर्णयितुमिति
यावत् कः पुमान् श्रद्दध्यात् श्रद्धां कुर्यात् न कोपीत्यर्थः ॥३५॥ ननु कस्मात्प्यशक्तो कथं भवता वर्ण्यत इत आहुः ॥ अथापीति ॥ अथापि
एतन्न तत्त्वं भगवतो दैवकर्मात्मरूपिणः ॥ कः श्रद्दध्यादुपाकर्तुं योगमायाबलोदयं ॥३५॥ अथापि कीर्तयाम्य
ङ्ग यथामति यथाश्रुतम् ॥ कीर्तिं हरेः स्वां सत्कर्तुं गिरमन्याभिधासतीम् ॥३६॥ एकांतलाभं वचसो नु पुंसां
सुश्लोकमौलेर्गुणवादमाहुः ॥ श्रुतेश्च विद्वद्भिरुपाकृतायां कथासुधायामुपसंप्रयोगम् ॥३७॥
कार्त्स्न्येन वर्णयितुं कस्याप्यशक्तावपि यथाश्रुतं गुरुमुखाच्छ्रुतमनतिक्रम्य तत्रापि यथामति यावत्स्वबुद्धिविषयमनतिक्रम्य ह
रेः कीर्तिं ॥ अंग हे विदुर कीर्तयामि न त्वहं साकल्येन वर्णयामीति प्रतिज्ञातवानस्मीत्यभिप्रायः ॥ तर्हि किमेकदेशवर्णनेन प्रयोजनमि
त्यत आह ॥ स्वां स्वकीयामन्याभिधा हरिव्यतिरिक्तार्थाभिधानं तया ॥ सतीं दुष्टां गिरं वाचं सत्कर्तुं पवित्रं पवित्रीकर्तुमित्यर्थः ॥३६॥ ए
तदेवोपपादयति ॥ एकांतलाभमिति ॥ सुश्लोकमौले ॥ श्लोकनीयप्रधानस्य भगवतो गुणवादं गुणकथनमेव पुंसां वचसः एकांतलाभं
एकांतफलमाहुः ॥ श्रुतिस्मृतीतिहासपुराणानि तज्ज्ञाः विद्वद्भिरुपाकृतायां उपवर्णितायां कथासुधायां उपसंप्रयोगं सन्निधौ अर्पण

बाहुभ्य इति॥ क्षत्रं क्षत्रियधर्मः पालनरूपा वृत्तिः॥ तद्बाहुभ्यो ऽवर्त्तत तदनुव्रतः क्षत्रियश्च स्ववृत्तिरूपा बाहुभ्यां वर्त्तते यो ब्रह्मणो बाहुभ्यो जातः पौरुषः समष्टि
पुरुषांशः क्षत्रियः पौरुषः समष्टिपुरुषांशः क्षत्रियः कंटकक्षताः कंटकः कंटकवत्क्षोकोपद्रवकारिणः॥ चोरादयः तेभ्यो जातं यत् क्षतं उपद्रवस्तस्माद्
र्णान् त्रायते रक्षति॥ ३१॥ विश इति॥ तस्य विभोः ब्रह्माण ऊर्वोः पादान्नस्यैव शेषत्वविवक्षया षष्ठी॥ लोकवृत्तिकरीः कृषिविक्रयरूप्यादिलोकाजीविकी
हेतवः॥ विभक्तिलिंगव्यत्ययावार्षौ॥ विशः वैश्याः॥ अवर्त्तंत तदुद्भवः ब्रह्मण उद्भूतः यो वैश्यः सन्नृणां वार्त्तामाजीविकां समवर्त्तयत् शं प्रापितवान्
॥३२॥ पद्भ्यामिति॥ भगवतः भगवदात्मकस्य ब्रह्मणः पद्भ्यां शुश्रूषाधर्मसिद्धये स्वपूर्ववर्णशुश्रूषारूपधर्म्मसिद्ध्यर्थं जज्ञे॥ कथंभूता शुश्रूषा इत्यत
बाहुभ्यो वर्त्तत क्षत्रं क्षत्रियस्तदनुव्रतः॥ यो जातस्त्रायते वर्णान्पौरुषः कंटकक्षतात्॥ ३१॥ विशो ऽवर्त्तंत तस्योर्वोर्लोकवृ
त्तिकरीर्विभोः॥ वैश्यस्तदुद्भवो वार्त्तां नृणां यः समवर्त्तयेत्॥ ३२॥ पद्भ्यां भगवतो जज्ञे शुश्रूषा धर्मसिद्धये॥ तस्यां जा
तः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः॥ ३३॥ एते वर्णाः स्वधर्मेण यजंति स्वगुरुं हरिम्॥ श्रद्धयात्मविशुद्ध्यर्थं यज्जा
ताः सह वृत्तिभिः॥ ३४॥ आह॥ तस्यामिति॥ यद्वृत्त्या यस्य शूद्रस्य वृत्त्या हरिस्तुष्यती तस्यां तादृश शुश्रूषावृत्तिनिमित्तकं शूद्रजन्मेत्यर्थः
अनेन स्ववृत्त्या भगवत्संतोषजनमेव परो धर्म इति सूचितं॥ ३३॥ नरदेवोपपादयति॥ एता इति॥ एते वर्णा ब्राह्मणादयश्चत्वारः वर्णाः स्वधर्मे
ण स्ववर्णोचितधर्मेण श्रद्धया आत्मविशुद्ध्यर्थं आत्मन अनादिपापवासनादूषितस्यांतःकरणस्य विशुद्ध्यर्थं स्वगुरुं स्वजनकं हरिं स्वा
श्रितसंसारहरं हरिं यजंति यजेयुरित्यर्थः कथंभूतं हरिं यज्जाताः यस्माच्चतुर्मुखशरीरकात्परमात्मनो हरेः सकाशाद्वृत्तिभिः सह जाताना ते
हरिं यजंतीत्यर्थः॥ ३४॥

गुणात्मकंत्रयइत्येतत्देवप्रपंचयतिद्वाभ्यां ॥ आत्यंतिकेन ऊर्जितेन औत्पत्तिकेनापिपादः ॥ तदानेसर्मिकेणेत्यर्थः सत्वंगुणेनउपलक्षितादेवाः
दिवंसात्विककर्मानुष्ठाननिष्पादितफलभोगानुरूपद्युलोकंप्रतिपेदिरेप्राप्ताः पणायः ॥ पणव्यवहारेपणंते आयासादिनाव्यवहारेणपणंतीति
पणायोमनुष्याः ॥ नान्नेनुसरत्सयेउपकरणभूतागवादयस्तेसर्वेरजः स्वभावेनउपलक्षिताः राजसकर्मफलभोगानुकूलांधरांभूमिंप्रपेदिरे
हेत्वर्थेतृतीयासात्विकादिस्वभावेनहेतुनाद्यः पृथिव्यादीन्देवादयः प्रपेदिरेइत्यर्थः ॥ २८ ॥ तार्तीयेनेति ॥ तृतीयंतेमः तदीयेनतार्तीयेन
तमःस्वभावेनभगवन्नाभिंभगवतःभगवतःवैराजधारणायांनभस्थलंनाभिसरोगणंति ॥ भूः पादीयस्पनाभोवियदित्यादिभिर्नाभित्वेनानु

आत्यंतिकेन सत्वेन दिवं देवाः प्रपेदिरे ॥ धरां रजःस्वभावेन पणयो ये च तानन्नु ॥ २८ ॥ तार्तीयेन स्वभावेन भग
वन्नाभिमाश्रिताः ॥ उभयोरंतरं व्योम ये रुद्रपार्षदां गणाः ॥ २९ ॥ मुखतोऽवर्त्तत ब्रह्म पुरुषस्य कुरूद्वह
यस्तून्मुखत्वाद्वर्णानां मुख्योऽभूद्ब्राह्मणो गुरुः ॥ ३० ॥ संधीयमानं यद्वा भगवतनाभिं भगवतश्चतुर्मुखशरीरस्य भगव

तः नाभिं ॥ नाभ्या आसीदंतरिक्षमितिश्रुतेः उपचारस्त्वाप्येकारणात् रुद्रः उभयोर्द्यावापृथिव्योरंतरं मध्यस्थं व्योमांतरिक्षं रुद्रपार्षदागणाः भू
तप्रेतपिशाचाद्या आश्रिताः ॥ २९ ॥ चातुर्वर्ण्यसृष्टिमाह मुखत इति ॥ पुरुषस्य समष्टिपुरुषस्य मुखतः ब्रह्मब्राह्मणजातिरध्ययनादिलक्षणमुखतोऽ
ऽवर्त्तत प्रवृत्तं एतदेवाहि ब्राह्मणानां ब्रह्ममुखोद्भवत्वं नाम यत्तन्मुखव्यापारभूताध्ययनादिकृत्स्नाश्रितत्वं ॥ एवं क्षत्रियादिष्वपि द्रष्टव्यं हे कु
रुद्वह विदुर यद्यस्माद्ब्राह्मणः तन्मुखत्वात्तन्मुखोद्भवत्वात्तन्मुखाद्भूताध्यायनादिमुख्यव्यापारत्वात्तस्माद्वर्णानां मुख्यः मुखमिव प्रधानः
गुरुश्चाभूत ॥ ३० ॥

अन्यथा भगवतः । प्रीत्यभावेऽव्यक्तगतेः ॥ सांसारिकैरलक्ष्यगतेर्वनीयसः ॥ अतिशयेन वनवासिनः संसिद्धस्य कृतकृत्यस्य तेन त्वद्दर्शनं
नृणां संसारिणां तत्रापि नितरां म्रियमाणानां नोऽस्माकं कथं स्यात् । वनमस्यास्तीति वनवासि मत्कृतऋषिसंघापेक्षया अतिशयेन वनीति
वनीयांस्तस्य वनीयसः ॥ ३६ ॥ यतो दुर्लभमपि त्वद्दर्शनमभूदतो योगिनामपि परमं गुरुं त्वां संसिद्धिं पृच्छामि ॥ संसिद्धिशब्दो मुक्तिसाध

अन्यथा तेऽव्यक्तदृशेर्दर्शनं नः कथं नृणां ॥ नितरां म्रियमाणानां संसिद्धस्य वनीयसः
॥ ३६ ॥ अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुं ॥ पुरुषस्येह यत्कार्यं म्रियमाणस्य स
र्वथा ॥ ३७ ॥

नं पृच्छामीत्यर्थः ॥ तदेव विशदयति ॥ इहलोके पुरुषस्य मुमुक्षोः सर्वदा तत्रापि म्रियमाणस्य मत्कर्तव्यं मुक्तिसाधनतयेति शेषः । तत्पृच्छा
मीत्यन्वयः ॥ तद्ब्रूहीत्युत्तरेणान्वयः ॥ ३७ ॥

कर्त्तव्यमेव विभज्य पृष्ठं तद्विपर्ययमकर्तव्यं च ब्रूहीत्याह ॥ यदिति ॥ हे प्रभो नृभिर्मुमुक्षुभिस्तत्रापि मुमुक्षुभिर्यच्छ्रोतव्यादिकं यच्च विपर्य।
यमश्रोतव्यादि च तत्सर्वं ब्रूहि। कथय। यत्कर्तव्यमिति पातश्रोत्रादिकरणं व्यतिरिक्तकरणव्यापारीयं प्रश्नः। स्मर्तव्यं भजनीयं प्रीतिपूर्वक

यच्छ्रोतव्यमथो जाप्यं यत्कर्तव्यं नृभिः प्रभो ॥ स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययं ॥ ३८ ॥
नूनं भगवतो ब्रह्मन्गृहेषु गृहमेधिनाम् ॥ न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित्
॥ ३९ ॥

मनुष्येयमतो न पौनरुक्त्यमथो ऽपि चेत्यर्थः। ३८। यावत्तनुत्यागमेतत्सृष्टं प्रतिवरता ऽनियतावस्थानेनापि त्वयावस्थातव्यमित्यभि
प्रायेण तदवस्थानमनियतत्वेन स्तौति। नूनमिति। हे ब्रह्मन् गृहमेधिनां गृहाश्रमीणां गृहे क्वचिदपि भगवतस्तवावस्थानं गोदोहनम
पि गोर्दुह्यते यावता कालेन तावान्कालो गोदोहनशब्देन विवक्षितः। तावत्कालमपि न लक्ष्यते हि ॥ ३९ ॥ ॥ ॥ ॥ ॥ १४९

एवमिति ॥ इत्यराज्ञा भाषितः ॥ अहो अद्य वयं ब्रह्मन्नित्यादिनोक्तः पृष्टः । अतः । इच्छामि संसिद्धिमित्यादिप्रश्नः भगवान् धर्मज्ञः ।
सुसूक्ष्णं सुमधुरेण कर्तव्यधर्मीयार्थात्माभिज्ञो बादरायणिः श्रीशुकः । श्लक्ष्णया विशुद्धया मृद्व्या गिरा प्रत्यभाषत । प्रश्नानामुत्तरा
ण्युवाचेत्यर्थः ॥ ४० ॥ इति श्रीवत्सान्वयपयःपारावारएकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तच्चरणकमलपरिच

सूत उवाच ॥ एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा ॥ प्रत्यभाषत ध
र्मज्ञो भगवान् बादरायणिः ॥ ४० ॥ इति श्रीभागवते महापुराणे पारमहं
स्यां संहितायां अष्टादशसाहस्र्यां प्रथमस्कंधे एकोनविंशोध्यायः ॥ १९ ॥

र्यात्रसन्नतत्सूक्ति समधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैल्लवासेन श्रीवीरराघवविदुषा विलिखितायां श्रीमद्भागवतचंद्रचंद्रि
कायां प्रथमस्कंधदीपिकायां टीकायामेकोनविंशोध्यायः ॥ १९ ॥ इति श्रीवीरराघवटीकायां प्रथमस्कंधे एकोनविंशोध्यायः ॥ ॥

भा० प्र० कथमतिथिरूपेण स्वदागमनरूपेण वा तीर्थभूता इत्यत्र तत्कैमुत्यन्यायेन दर्शयति । येषामिति । येषां भवतां स्मरणादेव सद्यः पुंसां स्मर्तृ
१५८ णां गृहाः शुध्यंति ॥ किं पुनर्भवतां दर्शनादिभिः शुध्यंतीति वक्तव्यं । पादशौचं पादजलम् ॥ ३३ ॥ यत एव मनो हे महायोगिंस्तव सान्निध्यादेव
हेतोः पुंसां मादृशानां महांत्यपि सर्वाणि पातकानि सद्य एव नश्यंतीति ॥ ३४ ॥ किंच । भगवतः श्रीकृष्णस्य अनुग्रहकारित्वं भवद्दर्शनादिकं म
म न्यथा तद्कुले भवमित्याह अपीति द्वाभ्यां ॥ तावत्तदनुग्रहस्त्वस्माकं सुलभ इति संभावयामीत्यभिप्रायेणाह । अपीति । अपिशब्दः संभावना
द्योतकः । मम भगवान् कृष्णः ॥ प्रीतः प्रसन्नः स्यात्तत्र हेतुं वदंस्तं विशिनष्टि ॥ पांडुसुताः प्रिया यस्य सः । पांडुसुतानां च प्रियः । अस्तु पां

येषां संस्मरणात्पुंसां सद्यः शुध्यंति वै गृहाः ॥ किं पुनर्दर्शनस्पर्शपादशौचासनादिभिः ॥ ३३ ॥ सान्निध्यात्ते महायोगे पात
कानि महांत्यपि ॥ सद्यो नश्यंति वै पुंसां विष्णोरिव सुरेतराः ॥ ३४ ॥ अपि मे भगवान्प्रीतः कृष्णः पांडुसुतप्रियः । पैतृष्वसे
येप्रीत्यर्थं तद्गोत्रस्यात्तबांधवः ॥ ३५ ॥

डुसुतप्रियः । तत्प्रियत्वं तु कथं इत्यत्रोभयत्रानुगतिं हेतुं वदन् विशिनष्टि । पितुर्भगिनी पितृष्वसा कुंती तस्या अपत्यानि पैतृष्वसेयास्तेषां प्रीत्य
र्थं तद्गोत्रस्य पैतृष्वसेयसंतानस्यात्तबांधवः । पितृष्वसुः प्रियस्तत्प्रीत्यर्थं तत्सुतेषु पुनस्तत्प्रीत्यर्थं तत्सुतादिष्वित्येवं यावत्तत्संतानप्रिय इत्यर्थः
आत्तबांधव इति पाठे ॥ आत्तः उपात्तः । परिगृहीतो बांधवः । इष्टबांधव इत्यर्थः ॥ भगवत्प्रसादेन त्वद्दर्शनं जातं ॥ तत्प्रसादस्तु तत्पितृष्वसुः १५८
संतानप्रभावत्वादिति भावः ॥ ३५

तत्रासने उपविष्टः । स महीयसामपि महीयान् माहात्म्ययुक्तः भगवान् शुकः ॥ ब्रह्मर्षिप्रभृतीनां संघैरलं नितरां व्यरोचत । यथा ग्रहादीनां
निकरैः समूहैः परिवृतश्चन्द्रः शोभते ॥ ग्रहाः अंगारकादयः ॥ ऋक्षाण्यश्विन्यादीनि नक्षत्राणि तदुभयेतराणि नक्षत्राणि ताराः ॥ ३० ॥ प्रशां
तं सात्त्विकवेषमकुंठमव्याहतां वरणरहितां मेधां धीर्यस्य तं ॥ यद्यपि नित्यमसिच्प्रजामेधयोरित्यत्र नञो मस्सुलभ्य एवेति नियमस्तथा
प्यार्षत्वादसिच् ॥ आसीनमुपविष्टं मुनिं शुकमभिमुखं समीपमागत्य महाभागवतो नृपः परीक्षिन्मूर्ध्ना प्रणम्य बद्धांजलिरवहितस्स

स संवृतस्तत्र महान्महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसंघैः ॥ व्यरोचतालं भगवान्यथेंदुर्ग्रहर्क्षतारानिकरैः परी
तः ॥ ३० ॥ प्रशांतमासीनमकुंठमेधसं मुनिं नृपो भागवतोऽभ्युपेत्य ॥ प्रणम्य मूर्ध्नावहितः कृतांजलिर्नत्वा गिरा सू
नृतयान्वपृच्छत् ॥ ३१ ॥ परीक्षिदुवाच ॥ अहो अद्य वयं ब्रह्मन्सत्सेव्याः क्षत्रबंधवः ॥ कृपयातिथिरूपेण भवद्भि
स्तीर्थकाः कृताः ॥ ३२ ॥

द्युक्तः श्रवणोपयुक्तावधानयुक्तः सूनृतया मधुरया गिरा अन्वपृच्छत् ॥ ३१ ॥ तदेवाह ॥ अहो इति यावत्समाप्तिः ॥ तावत्समागमनेनात्मनः
कृतार्थतामाविःकरोति ॥ अहो इति ॥ हे ब्रह्मन् वयं क्षत्रबंधवोऽप्यद्य हे सत्सेव्याः संतः सेव्या येषां तथाभूता अभूम ॥ यद्वा सतां वः सेव्या अ
तुयाद्या अभूम तत्र हेतुमाह ॥ कृपया भवद्भिरिति थिव्याजेन वयं तीर्थकाः कृताः पवित्रीकृताः ॥ ३२ ॥ ॥ ॥ ॥

भा०प्र० निगूढेमांसलेनाप्रकासेजत्रुणीअसध्यसंधिगतास्थिनीयस्य।पृथुविशालंतुंगमुन्नतंवक्षोयस्य।आवर्त्तोआवर्त्तवद्वर्तुलाविवि
१४१ क्तारंध्रयुक्ताचनाभिर्यस्य।वलिभिस्त्रिभिर्वल्गुसुंदरमुदरंयस्य।दिगंवरंदिगेवांवरंयस्य॥वीरधरत्वेनप्रशस्तांवरत्रहितमित्यर्थः
अवरिवासस्तारहितंवा॥अन्यथामोक्षधर्मादिषूक्तप्रकारविरोधात्॥वक्त्राविकीर्णाश्चकेशायस्य।प्रलंबावाजानुलंबौवाहूयस्य

निगूढजत्रुंपृथुतुंगवक्षसमावर्तनाभिंवलिवल्गूदरंच।दिगंवरंवक्त्रविकीर्णकेशंप्रलंबबाहुंस्वमरोत्तमाभं॥२७॥
श्यामंसदापीव्यवयोंगलक्ष्म्यास्त्रीणांमनोज्ञंरुचिरस्मितेन॥प्रत्युत्थितास्तेमुनयःस्वासनेभ्यस्तल्लक्षणज्ञा
अपिगूढवर्चसं॥२८॥सविष्णुरातोतिथयआगतायतस्मैसपर्यांशिरसाजहार।ततोनिवृत्ताह्यबुधाःस्त्रियोर्भ
कामहासनेसोपविवेशपूजितः॥२९॥

स्वमरोत्तमस्यामरश्रेष्ठस्येवाभायस्य॥२७॥अपीच्यंकमनीयंवयोयस्मिंस्तस्यांगस्यलक्ष्म्याकांत्यासुंदरस्मितेनचसदास्त्रीणांमा
नोज्ञंस्पृहणीयं॥२८॥अथसविष्णुरातःपरीक्षिदागतायातिथयेतस्मैश्रीशुकायशिरसानम्रेणेतिशेषःसपर्यांपूजांजहारचका
रशिरसाप्रणामपूर्वकंपूजांचक्रेइत्यर्थः॥तथातमनुसृत्यागताअज्ञाबालकाःप्रतिनिवृत्ताबभूवुः।ततःसपूजितःशुकःमहा १४१
सनेमहतिराज्ञासमर्पितेआसनेउपविवेश॥२९॥

तत्रैवश्छतो राज्ञः संनिधौ भगवान् व्यासस्य पुत्रः श्रीशुको भक्त्यागत्य तस्थौ ॥ कथंभूतः यदृच्छया गां भूमिमटमानः । तत्र हेतुरनपे
क्षकः । कृत्यपेक्षारहितः ॥ तत्र हेतुः । निजलाभेन ब्रह्मात्मकस्वात्मानुभवेनैव तुष्टः ॥ अलक्ष्यं रूषिभिरिति ज्ञातुमशक्यं लिंगं रूपं यस्य ते
त्र हेतुरवधूतवेषः ॥ अभिभाव्यवेषः ॥ अत एव बालैर्वृतः परिवृतः ॥ २५ ॥ तमिति । तमागतं गूढमप्यसंवृतं मणिवत्तिरोहितं व
चोयस्य तथाभूतमपि तस्य शुकस्य चिह्नाभिज्ञा मुनयः स्वासनेभ्यः प्रत्युत्थिता बभूवुरित्यन्वयः ॥ कथंभूतं व्यष्टवर्षं षोडशव

सूत उवाच ॥ तत्राभवद्भगवान् व्यासपुत्रो यदृच्छया गामटमानोनपेक्षः ॥ अलक्ष्यलिंगो निजलाभतुष्टो
वृतश्च बालैरवधूतवेषः ॥ २५ ॥ तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रं ॥ चार्वायताक्षो
न्नसतुल्यकर्णसुभ्र्वाननं कंबुसुजातकंठं ॥ २६ ॥

र्षवयस्कं स्वस्थितं । द्विराहृता अष्टौ वर्षाणि यस्य तमिति ॥ समाः सुकुमाराः । पादादयो यस्मिंस्तत्तथाभूतं शरीरं यस्य ॥ चारु
णी सुंदरे आयते विशाले अक्षिणी यस्मिन् । उन्नता नासिका यस्मिन् ॥ तुल्यौ समौ कर्णौ यस्मिन् शोभने भ्रुवौ यस्मिंस्तत्तस्तेषां क
र्मधारयः ॥ तदाननं यस्य ॥ कंबुवत्कंठः रेखावद्वर्तुलः रेखात्रयोपेतश्च कंठो यस्य ॥ २६ ॥

भा०स्कं०
११३

अपीत्यपिशब्दः संभावनाद्योतकः॥ देवर्षिणानारदेनादिष्टः। सूचितः सकालो धुनोपस्थितो भ्युपस्थितः स्यात् किमित्यर्थः। कोसौ यस्मिन्काले
भगवान् कृष्णश्चात्मनः स्वस्य क्रीडंक्रीडां गंतुमिच्छति सकालः॥ आक्रीडं क्रीडार्थं मनुष्यसंस्थानमागेष्ठु इस लममयमग्रा।
कृतं शरीरमुत्सिसृक्षतीति। भूमेर्विश्लेषयितुमिच्छतीत्यर्थः।२५॥ भगवंतं विशिनष्टि। यस्माद्भगवतो हेतोः नोस्माकं संपदा स्योवभूवुः। यस्य
चानुग्रहात्सुरपलोकाभवंति। सभगवानुत्सिसृक्षतीत्यन्वयः संपदः भोग्यभोगोपकरणादिसमृद्धयः। सपत्नविजयः। शत्रुविजयः
हे नरव्याघ्र दिव्यानदिविभवान् भौमान् भूमौ भवान्देहे च भवान्। दारुणान्घोरान् क्रूरान्समनंतरमेव नोस्माकं बुद्धिं मोहयतीति त

अपि देवर्षिणादिष्टः सकालोयमुपस्थितः॥ यदात्मनोऽगमं माक्रीडंभगवानुत्सिसृक्षति। २५॥ यस्मान्नः संप
दोराज्यंदाराः प्राणाः कुलंप्रजाः॥ आसन्सपत्नविजयो लोकाश्चयदनुग्रहात्॥ २८॥ पश्योत्पातान्नरव्याघ्र दिव्या
न्भौमान्सदैहिकान्॥ दारुणान्शंसतो दूरा द्भयंनोबुद्धिमोहनं॥ २९॥ ऊर्वक्षिबाहवो मह्यंस्फुरंत्यंगपुनः पुनः। वेपथुश्चा
पि हृदयेआराद्दास्यतिविप्रियं॥ ३०॥ शिवैषोद्यंतमादित्यमभिरौत्यनिलानना॥ मामंगसारमेयोयमभिरौदित्यभीरुवत्॥ ३१॥

ध्याभूतंभयंशंसतः सूचकानुत्पातानुपश्य॥ २९॥ तावद्दैहिकानुत्पातान्दर्शयति। ऊर्विति। अंगहेभीम मम वामो वीदयः पुनः पुनः स्फुरं
तिचलंति॥ हृदये वेपथुः कंपश्च भवति। तान्येतान्यूर्वादिस्फुरणानि। आरात्समनंतरकालमेवमत्यमप्रियं दास्यंति। ममविप्रियसूचकाभ
वंतीत्यर्थः॥ ३०॥ एषाशिवा शृगालविशेषः। अनलवज्ज्वलदाननंयस्याः साआरौदित्यमभिः॥ आदित्यमभिमुखंरौति। अंगहेभीमायंसा

॥२८॥ 514

११३

जिह्मप्रायं कौटिल्यप्रचुरं व्यवहृतं व्यवहारं । शाठ्यमिश्रं च मौर्ख्योयुक्तं सौहृदं च । पित्रादीनां परस्परं कल्कनं रागादिदोषं च ।४। कन्यां विक्री
णातीति तथा तातं पितरं । पित्रोरपोषकं सुतं च । वेदेभ्यो विमुखान् ब्राह्मणान् ॥ ब्रह्मवादिनो वेदपाठकान् शूद्रांश्च ।५। तथात्यरिष्टानि ।
निमित्तानि दुःखसूचकानि । कालेत्वनुगते निमित्तभूते विपरीतकालानुसारिणीत्यर्थः ॥ नृणां लोभाद्यधर्मस्वभावं च दृष्ट्वा लोभा।दी-

जिह्मप्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदं ॥ पितृमातृसुहृद्भ्रातृदंपतीनां च कल्कनं ॥४॥ कन्याविक्रयकं तातं सुतं पि
त्रोरपोषकं ॥ ब्राह्मणान् वेदविमुखान् शूद्रांश्च ब्रह्मवादिनः ॥५॥ निमित्तान्यत्यरिष्टानि काले त्वनुगते नृणाम्
लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः ॥६॥ युधिष्ठिर उवाच ॥ संप्रेषितो द्वारकायां जिष्णुर्बंधुदिदृक्षया । ज्ञातुं
च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं ॥७॥ गताः सप्ताधुना मासा भीमसेन तवानुजः ॥ नायाति कस्य वा हेतो
नाहं वेदेदमंजसा ॥८॥

त्यादिशब्देन क्रोधादिसंग्रहः ॥ नृपो युधिष्ठिरः ॥ अनुजं भीमं प्रोवाच ॥६॥ तदेवाह ॥ संप्रेषित इति बाम्धसं घोऽथाभिः ॥ द्वारकायां ये बांधवास्ते
षां दिदृक्षया कृष्णस्य विचेष्टितं ज्ञातुं च जिष्णुः संप्रेषितः ॥ प्रस्थापितः ॥७॥ हे भीमसेन सप्तमासा अधुना क्रांताः ॥ अधुनापि कस्माद्धेतोस्तवा
नुजोऽर्जुनो नायाति इदमनागमननिमित्तमंजसा न वेद्म्यंजसे सम्यग्यं तत्त्वेशी प्रार्थयो वर्तते ॥८॥ ॥ ॥ ॥ ॥

भा० प्र० ह कुरुनंदन तत तस्य राश्चर्यं निशम्य हृष्टा विदुरः। हर्षशोकाभ्यां भ्रातुर्मुक्तिर्विश्लेषजाभ्यां युक्तः। तस्य देशात्तीर्थानि षेवकः सेवितुमिच्छ
११२ न्गंतागमिष्यति ॥६१॥ इतीत्थमुक्त्वा सह तैस्तुंबुरुभिर्भगवान्नारदः स्वर्गमारुरोह स्वर्गं प्रत्यूर्ध्वं जगामेत्यर्थः ॥ युधिष्ठिरस्तु तस्य नारदस्य वचः
हृदि कृत्वा निधाय प्रजाः शोकानजहात्तत्याज ॥६२॥ इति प्रथमे त्रयोदशः ॥ संस्थितमिति । बंधूनां यदूनां दिदृक्षया पुण्यश्लोकस्य ।

विदुरस्तु तदाश्चर्यं निशाम्य कुरुनंदन ॥ हर्षशोकयुतस्तस्माद्गंता तीर्थनिषेवकः ॥६१॥ सूत उवाच ॥ इत्युक्त्वाथारुह
त्स्वर्गं नारदः सह तुंबरुः ॥ युधिष्ठिरो वचस्तस्य हृदि कृत्वाजहाच्छुचः ॥६२॥ इति श्रीभागवते महापुराणे प्रथम
स्कंधे त्रयोदशोऽध्यायः ॥१३॥ संप्रस्थिते द्वारकायां जिष्णौ बंधुदिदृक्षया ॥ ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य
च विचेष्टितं ॥१॥ व्यतीताः कतिचिन्मासास्तदा नायात्ततोऽर्जुन ॥ ददर्श घोररूपाणि निमित्तानि कुरूद्वहः
॥२॥ कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः ॥ पापीयसीं नृणां वार्तां क्रोधलोभानृतात्मनां ॥३॥ ॥

पुण्यश्लोकस्य श्रीकृष्णस्य विचेष्टितं ज्ञातुं च जिष्णावर्जुने द्वारकायां संप्रस्थिते प्रस्थानपूर्वकं द्वारकायां प्रविष्टे सति द्वारकायां बंधूनां दि
दृक्षया चेति वान्वयः ॥१॥ कतिचिन्मासा व्यतिक्रांता बभूवुः ॥ तथापि ततोऽर्जुनो नागच्छत तदा कुरूद्वहो युधिष्ठिरः ॥ घोररूपाणि निमित्ता
न्यरिष्टानि ददर्श ॥२॥ विपरीता ऋतूनां वसंतादीनां धर्मा यस्य तस्य रौद्रां घोरां गतिं च ॥ द्वितीयांतानां पूर्वेण ददर्शेत्यनेनान्वयः
क्रोधादिप्रचुरा आत्मा मनो येषां नृणां पापीयसीं वार्तां जीवनार्थप्रवृत्तिं ॥३॥ ११२

ध्वस्तास्तुरणा गुणानां रजआदीनांउदर्को रागद्वेषादिकार्यो यस्य॥ निरुद्धानि करणानींद्रियाणि आशयो वासनांतःकरणं वा येन। निवर्तिता अ
खिला आहारा तेनाऽस्थो पिवेन तथाभूतः स्थाणुरिवाचलो निश्चलः सन्नास्ते आसिष्यते॥ प्रत्याहृतषडिंद्रियइत्यनेनेंद्रियाणां विषयेभ्यः आ
कर्षमात्रमुक्तं॥ निरुद्धकरणाशयइत्यनेन तु पुनर्विषयेषु प्रवृत्तिप्रतिबंध उक्तः॥ अतो न पौनरुक्त्यं॥ तथा ध्वस्तरजस्तमोमलइत्यनेन गु
णपापाद्यभाव उक्तः॥ ध्वस्तमायागुणोदर्कइत्यनेन तु पापपुण्यमूलकरागद्वेषाद्यभाव उक्तः। तथा तावदन्नसंस्तनो निवर्तिताखिलाहार

ध्वस्तमायागुणोदर्को निरुद्धकरणाशयः॥ निवर्तिताखिलाहार आस्ते स्थाणुरिवाचलः॥५७॥ तस्यांत
रायो मैवाभूः संन्यस्ताखिलकर्मणः॥ स वा अद्यतनाद्राजन्परतः पंचमेहनि। कलेवरं हास्यति स्वं तच्च भस्मी
भविष्यति॥५८॥ दह्यमानेग्निभिर्देहे पत्युः पत्नी सहोटजे॥ बहिः स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति॥५९॥

इति॥५७॥ कथं चिंतमानयिष्यामीति युधिष्ठिराभिप्रायमालक्ष्याह॥ तस्येति॥ संन्यस्तानि त्यक्तान्यखिलानि देहधारणार्थान्यपि का
र्माणि येन तस्य॥ धृतराष्ट्रस्यांतरायो विघ्नभूतस्त्वं माभूः॥ न भवेः हे राजन्॥ स धृतराष्ट्रः॥ अद्यतनाद्वर्तमानदिनादारभ्य परतः पंचमेहनि
स्वं कलेवरं हास्यति त्यक्ष्यति॥ तच्च कलेवरं योगाग्निना भस्मी भविष्यतीति॥५८॥ तदा स होटजे पर्णशालया सहिते भर्तुर्देहेऽग्निभि
र्दह्यमाने सति तस्य पत्नी साध्वी पतिव्रताधर्मधारी बहिःस्थिता तमग्निमनुवेक्ष्यत्यनुप्रवेक्ष्यति॥५९॥ ॥ ॥

प्राणादिवायवो येन सः ॥ प्रत्याहृतानि शब्दादिविषयेभ्यो नियमितानि षडिंद्रियाणि येन ॥ हरिभावनया भगवद्रूपानुस्मृत्या ध्वस्तानि निरस्तानि रजः प्रभृतिगुणत्रय ×

जितान्यासनं येन सः ॥ चिरमासीनोपि क्लमरहित इत्यर्थः ॥ जिताः श्वासाः कार्याणि मुक्तिप्रतिबंधकानि गुणपापादिरूपाणि मलानि यस्य तथाभूतः
५५ विज्ञानात्मानि विज्ञानस्वरूपे हेतौ क्षेत्रज्ञे प्रत्यगात्मन्यभिसंयोज्य पूर्वं प्रस्तुतानीन्द्रियाणीत्यर्थसिद्धं ॥ इंद्रियाणि संयोज्यैरनाहूय चित्तमि
त्यर्थः ॥ तमात्मानं क्षेत्रज्ञमाधारे धारके ब्रह्मणि विलाप्य विलीनं कृत्वोपाधिविधूनेन ब्रह्मसमानाकारतयाऽनुसंधायेतिर्यावत् । तत्र
दृष्टांतमाह ॥ घटांबरमिवांबर इति महाकाशे घटाकाशमिव ब्रह्मण्यात्मानं प्रविलाप्यास्थाणुरिवास्त इत्युत्तरेणान्वयः ॥ अंबरदृष्टांते

जितासनो जितश्वासः प्रत्याहृतषडिंद्रियः ॥ हरिभावनया ध्वस्तरजः सत्वतमोमलः ॥ ५५ ॥ विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तं ॥ ब्रह्मण्यात्मानमाधारे घटांबरमिवांबरे ॥ ५६ ॥

न जीवब्रह्मणोः स्वरूपैक्यमनुसंधायेति नभ्रमितव्यं घटाद्युपाध्यपगमेन घटाकाशस्य महाकाशसंश्लेषेपि स्वरूपभेदसद्भावात् । पंचीक
रणकारणादाकाशे ष्वंशभेदा वेदांतिभिरपृष्टांगीकार्यत्वात् ॥ यद्वा ॥ घटाकाशेंशभेदोनाभ्युपगम्येत तदाकृतत्वस्याप्याकाशस्य घटाद्यु
पाहितत्वप्रसंगः ॥ नचेष्टापत्तिः ॥ घटाकाशयोर्व्याप्यव्यापकभाववैपरीत्यापात्त्यात्कृत्स्नेनाकाशस्य घटोपहितत्वे हितस्य रिच्छिन्नस्याका
शस्य व्याप्यत्वं स्पष्टं । अतः संश्लेषदशायामपि घटाकाशयोः प्रदेशभेदोऽस्त्येव ॥ उपाध्यपगमेन समानाकारत्वमात्राभिप्रायक एवायं

॥ ॐ ॥ श्रीकृष्णार्पणमस्तु

तेनच देवकृत्यं देवार्थं कर्तव्यं कृत्यं प्रयोजनं तदपि प्रायःप्रायेण हत्यं निष्पादितं ॥ अधुनात्वयं भगवानवशेषं स्वकुलविनाशात्मकमिति गृ-
ह्याभिसंधिः प्रतीक्षते ॥ अतो यावदिह भूर्लोके भगवानीश्वरः कृष्णो भवेद्वर्तेत तावदेव यूयमप्यवेक्षध्वं ततः पितृवन्निर्गच्छतेति भावः ॥ ५१ ॥
भ्रातृत्वमिति प्रकृतप्रश्नस्योत्तरमाह ॥ धृतराष्ट्र इति द्वाभ्यां ॥ स्वभार्यया गांधार्या भ्रात्रा विदुरेण च सह धृतराष्ट्रो हिमवतो दक्षिणेन ऋषीणामा-
श्रमं गतः ॥ हिमवतो दक्षिणपार्श्वान्तरवर्तिनमाश्रमं गत इत्यर्थः ॥ एतच्च मतान्तरस्यामहरूपं चमत्कारस्यवधिमतः । सामीप्ये एनप्रत्यये भुत्सन्नमि-

निष्पादितं देवकृत्यमवशेषं प्रतीक्षते ॥ तावद्यूयमवेक्षध्वं भवेद्यावदिहेश्वरः ॥ ५१ ॥ धृतराष्ट्रः [illegible] सह भ्रात्रा
गांधार्या स्वभार्यया ॥ दक्षिणेन हिमवत ऋषीणामाश्रमं गतः ॥ ५२ ॥ स्रोतोभिः सप्तभिर्या वै स्वर्धुनी सप्तधा व्यधात् ।
सप्तानां प्रीतये नाना सप्तस्रोतं प्रचक्षते ॥ ५३ ॥ स्नात्वानुसवनं तस्मिन् हुत्वा चाग्नीन्यथाविधि ॥ अब्भक्ष उपशांतात्मा
स आस्ते विगतैषणः ॥ ५४ ॥

दक्षिणेनेत्यव्ययं ॥ ५२ ॥ कोसावाश्रम इत्यत्राह ॥ स्रोतोभिरिति ॥ यं सप्तस्रोत इति प्रचक्षते तमाश्रमं गत इत्यन्वयः ॥ तत्र तन्नाम्नः प्रवृत्तेनि-
मित्तमाह ॥ या वै प्रसिद्धा स्वर्धुनी स्वर्गनदी गंगा सप्तानामृषीणां प्रीतये यतः सप्तभिः स्रोतोभिः प्रवाहैर्नानावकुधात देवाह ॥ सप्तधा व्यधात्सु-
विभक्ता वभूवात्मानं देशं सप्तस्रोत इत्याचक्षते ॥ यमेव माचक्षते तं गत इत्यर्थः ॥ ५३ ॥ तत्र किं करिष्यति कथं वा वर्तिष्यतीत्यत्राह ॥ तत्रानुस-
वनं त्रिसंध्यं स्नात्वाग्नीन्यथाविधि च हुत्वा अब्भक्षः ॥ अतएव भक्षयन्नुपशान्तः ॥ रागाद्यकलुषित आत्मा मनो यस्य ॥ विगता ईषणा धनेषणा

सर्वत्रवनेगृहेवानेवररहितेत्यभिप्रायेणतदुपयुक्ततयाभगवतः सर्वात्मकंकृत्स्नंजगततदात्मकतयातदनन्यत्वंचाह। तदिति। हेराजन्नतदीश्वर
वशत्वेनोक्तमिदंपरिदृश्यमानंचिदचिदात्मकंजगद्भगवानेकएव॥ मृदंघटइतिवत्स्वरूपाभेदशंकावारयितुंविशिनष्टि॥ आत्मनोदेवम
नुष्यादिदेहभृतांजीवानामात्माऽन्तः प्रविश्यप्रशासनधारकत्वाभ्यामस्थितः॥ आत्मशब्दस्यैतदेवहिप्रवृत्तिनिमित्तं॥ यदंतः प्रविश्यप्रशा
सनधारकत्वाभ्यामवस्थानं॥ अनेनशरीरात्मभावनिबंधनस्यानन्यत्वव्यपदेशा दृष्टचरः। आत्मादेवोजातः॥ मनुष्योजातइतिव्याप्यसुग
तदोषसंस्पर्शशंकांनिराकुर्वन्विशिनष्टि॥ स्वदृगात्मनात्मात्मतयावस्थितोपिस्वात्मयाथात्म्यदर्शी अतोनास्यदोषसंस्पर्शइतिभावः
तथाचश्रूयते। अनश्नन्नन्योऽभिचाकशीति॥ नकेवलमंतरात्मैवापितु अंतरोप्यनंतरोभातिबहिश्चभाति॥ नन्वेकस्यकथंदेवमनुष्यादिरूपे

तदिदंभगवान्राजन्नेकआत्मात्मनांस्वदृक्॥ अंतरोनंतरोभातिपश्यतंमाययोरुधा॥ ४८॥ सोयमद्यमहाराजभग
वान्भूतभावनः। कालरूपोऽवतीर्णोस्यामभवायसुरद्विषां॥ ५०॥

णबहुधावस्थानमित्यत्राह। पश्यतंमाययोरुधेति॥ माययादेवमनुष्यादिरूपेणपरिणमतयाशरीरभूतयाजीवसंसृष्टयातंभगवंतमुरुधा
बहुधापश्यचिदचिदात्मकदेवादिशरीरभेदेनैकएवावस्थितइतिविजानीहीत्यर्थः॥ ४८॥ नकेवलंत्वयितरः स्वार्थमेवनिर्गताः अपितु
युष्माभिरेवमेवनिर्गंतव्यमितिभवतांप्रदर्शनार्थमपीत्यभिप्रायेणाह। सोयमितिद्वाभ्यां। हेमहाराजनिखिलजगदंतरात्मावशीकृता
लोकत्रयः कालशरीरकोयंभगवान्श्रीकृष्णः॥ भूतानिस्वाज्ञानुवर्तीनिभावयत्यभ्युदययुक्तानिकरोतीतितथा। हेतुगर्भमिदंसाधुपरि ११०
त्राणत्वादितिभावः॥ सुरद्विषां। दुष्कृतामभवायनाशायकालरूपोमृत्युरूपोऽस्यांभुव्यवतीर्णः॥ ५०॥ ॥ ॥

तस्माद्धे राजन्नज्ञानकृतं देहात्मभ्रमकृतमात्मनः स्वस्य मनसो वा वैक्लव्यं दैन्यं जह्यपनय ॥ तदभिप्रेतं प्रश्नान्तरं सर्वज्ञत्वात्स्वयमेवाविष्कृत्य
तिवक्ति कथमिति सार्द्धद्वयेन तत्र कथमित्यर्धेन प्रश्नाविष्कारः । ततः श्लोकद्वयेन तस्य प्रतिवचनमिति विवेकः । मां विनाऽन्यथा रहितं दीना
अनाथा एव दीनास्ते कथं वर्तजीवेरन् । इति शब्दोऽत्राध्याहर्तव्यः । कथं जीवेरन्निति पृच्छसि चेदित्यर्थः ॥४६॥ तावत्तत्तुल्ययोगक्षेमे स्वस्मिंस्तद्देहत्वक
त्वाभिमानं त्यजेत्यभिप्रायेणाह ॥ कालेति । कर्मादृष्टं गुणाः सत्त्वादयः । पृथिव्यादिपंचभूतारब्धोऽयं देहः कालाद्यधीनः । अयमित्यनेन त्वद्दे
होऽप्येवंविध एवेति सूचितं । स्वयमेवंविधदेहः ॥ कथमन्यान्गोपायेद्रक्षेत्र रक्षेदेवेत्यर्थः ॥ यथा स्वयं सर्पग्रस्तोऽन्यांस्तद्ग्रस्तान्न गोपाय

तस्माज्जह्यंग वैक्लव्यमज्ञानकृतमात्मनः ॥ कथं त्वनाथाः कृपणा वर्त्तेरन्नूवतमां विना ॥४६॥ कालकर्मगुणाधी
नो देहोऽयं पांचभौतिकः । कथमन्यांस्तु गोपायेत्सर्पग्रस्तोऽथवा परं । ४७ ॥ अहस्तानि सहस्तानामपदानि चतुष्पदां
फल्गूनि तत्र महतां जीवो जीवस्य जीवनं ॥४८॥

तित्वदत ॥४७॥ अस्त्वेवं तथापि जीविकावति गृहे स्थितानामस्माकं जीवनं सुशकं कथमितो गतानां तेषां जीवनं स्यादित्यत आह अ
हस्तानीति ॥ अहस्तानि भूतानि सहस्तानां तेषां जीवनं यथालाभं यथायोग्यमोषधिफलमूलपशुमृगादीनि जीवनमित्यर्थः । तथाह
स्तरहितानामपि चतुष्पदामपदान्यविद्यमानपादादिभूतानि जीवनं तत्राप्यपदेष्वपि महतामजगरादीनां भूतानां फल्गूनि तुच्छानि भू
तानि जीवनं ॥ किं बहुना जीवस्य भूतस्य जीवः जीवनं । जीवनशेषे महत्स्यपरः ॥४८॥

किंदेहतदनुबंधादीन्नित्यान्मत्वा शोचसि किंवाऽनित्यान् अथवोभयथा तथापि न ते शोकविषया इति वक्तुं तावद्देहादिसंश्लेषो क्रीडा
र्थं जगद्व्यापारेश्वरस्येच्छया तत्कर्मानुगुण्येन संपद्यत इति सदृष्टांतमाह। यथेह लोके कस्यचित्क्रीडितुः पुंस इच्छया क्रीडोपस्क
राणां क्रीडासाधनानां संयोगाभावन्यथा च भवतः॥ यथा क्रीडोपस्कराः। क्रीडितुरिच्छया कदाचित्संश्लिष्य पुनस्तदिच्छयैव विश्लिष्टाश्च भवंति
ईश्वरेच्छया नृणामपि संयोगवियोगौ स्यातां॥४४॥ उक्तं श्लोकस्य मनुवादपूर्वकं प्रतिक्षिपति। यदि लोकं ध्रुवं स्थिरं मन्यसे यदा अध्रुवमथ
वोभयं। तत्र तृतीयः कल्पोऽसंभवादेव निरस्तः इत्यभिप्रायेणाह॥ नचोभयमिति॥ नहि द्व्यात्मकं वस्तु दृष्टं श्रुतं वेत्यर्थः। परस्परविरु

यथा क्रीडोपस्कराणां संयोगविगमाविह॥ इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणां॥४४॥
यन्मन्यसे ध्रुवं लोकमध्रुवं वा न चोभयं॥ सर्वथा न हि शोच्यास्ते स्नेहादन्यत्र मोहजात्॥४५॥

द्धयोर्ध्रुवत्वाध्रुवत्वयोरेकत्र समावेशोऽसंभव निरस्त इति भावः॥ तदस्तु परगम्यापि तेन सहेतरश्छिरोद्वयं प्रति सर्वथेति ध्रुवत्वे चोभय
विधत्वे च ते देहादयः। तत्त्वमेवेति न शोच्याः॥ तत्वादेवेति न शोच्याः। नहि वस्तुतो यावदात्माभाविधर्मः। केनाप्यपनेतुं शक्य इति भावः
एवं सति तच्छोकहेतुः। केवलं देहात्मभ्रममूलको देहादिष्वनुराग एवेत्यभिप्रायेण स्नेहादन्यत्र मोहजादिति। मोहजाद्देहात्मभ्रमजा
त्स्नेहादन्यत्रान्यास्मिन् शोकमोहेतुत्वं नास्तीति शेषः॥४५॥ १०९

हे भार्गव इत्थं धर्मपुत्रेण युधिष्ठिरेण दृष्टः । सर्वज्ञो भगवान् मुनिश्रेष्ठो नारदः तमाबभाषे ॥४२॥ भाषणमेवाह । मा कंचनेति विंशत्या यत्तुष्टं पित्रोर्गतिं बुद्ध्वा मित्रितस्योत्तरं विवक्षुः आवतानुबद्ध कर्मानुगुण सुखदुःखादि फलप्रदानप्रवृत्ते तत्त्वात्कलस्य जगतस्तदंतर्गतस्य कर्मी यत् देहतदनुबंध्यादि संश्लेषनिमित्तं शोकं मा कुर्विति वैराग्योत्पादनायाह । चतुर्भिः ॥ हे राजन् कंचन देहं तदनुबंधिनं वा कंचिदपि मा शुचः शोकं मा कार्षीः । कुतः । यद्यस्मादिदं जगदीश्वरवशं कर्मानुगुणफलदानप्रवृत्तेश्वरघटितन्नियाम्यमित्यर्थः ॥ को सावीश्वरः इत्यत्रा

सूत उवाच ॥ इत्थं दृष्टः स सर्वज्ञो धर्मपुत्रेण भार्गव ॥ तमाबभाषे भगवान्नारदो मुनिसत्तमः ॥४१॥ नारद उवाच ॥ मा कंचन शुचो राजन् यदीश्वरवशं जगत् ॥ लोकाः सपाला यस्येमे वहंति बलिमीशितुः ॥ स संयुनक्ति भूतानि स एव वियुनक्ति च ॥४१॥ यथा गावो नसि प्रोतास्तंत्यां बद्धाश्च दामभिः ॥ वाक्तंत्यां नामभिर्बद्धा वहंति बलिमीशितुः ॥४२॥

ह । सपालाः इंद्रादिलोकपालैः सहिताः । लोका विरिंचिप्रभृत्यकिंचनपर्यंता इमे यजना यस्येशितुर्बलिं पूजां वहंति किं करा भवंतीत्यर्थः ॥४२ बलिवहनमेव सदृष्टांतमुपपादयति ॥ यथेति । तंतीति रश्मीनाम महती रज्जुस्तद्बद्धाः क्षुद्ररज्जव उपदामानि यद्वा तंती नाम सा रज्जुस्तस्यां वा बद्धा ऋक्कर्षणपाशा दामानि । यथा गावः चतुष्पादः । नसि घ्राणे तस्यां नासिकायां प्रोताः संयुक्ताः संतस्तंत्या मुपदामभिर्बद्धाः द्विपदे किं कुर्वंति ॥ तथा वाक्तंत्यां वेदरूपतंत्यां नामभिर्वर्णाश्रमविशेषान्वयात्मकनामभिरूपदामस्थानीयैर्बद्धाः सपाला लोका ईशितुरीशस्य बा

॥ भा ॥ टी॰ प्र॰ टी

ततः शनैः पाणिभ्यामश्रूणि विमृज्यात्मना विवेकात्मिकया धियात्मानं संकल्पविकल्पात्मकं मनो विष्टभ्य प्रतिबध्य स्थिरीकृत्य प्रभोर्धृत
राष्ट्रस्य पादावनुस्मरन्नजातशत्रुं प्रत्यूचे। उक्तिमेवाह। नेति। हे कुरुनंदन वः युष्माकं पित्रोर्विदुरधृतराष्ट्रयोर्गांधार्याश्च व्यवसितं निश्चि
तं नाहं वेद्मि। हे महाबाहो त्वामिवाहमपि महात्मभिः तैर्मुषितोस्मि वंचितोस्मि॥ ३७॥ अथ तस्मिन्नेव समये तुंबरुणा सहितो भगवान्ना
रदः तत्राजगाम। तमवलोक्य सानुजो युधिष्ठिरः प्रत्युत्थायाभिवाद्याभ्यर्चयन्नेवाह॥ ३८॥ उक्तिमेवाह। नाहमिति द्वाभ्यां भगवस्त्रियो

विमृज्याश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना॥ अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन्॥ ३६॥ संजय उवाच। नाहं वेद
व्यवसितं पित्रोर्वः कुलनंदन॥ गांधार्या वा महाबाहो मुषितोस्मि महात्मभिः॥ ३७॥ सूत उवाच। अथाजगाम भगवान्
नारदः सहतुंबरुः॥ प्रत्युत्थायाभिवाद्याह सानुजोभ्यर्चयन्मुनिं॥ ३८॥ युधिष्ठिर उवाच। नाहं वेद गतिं पित्रोर्भगवन्क्व
गतावितः॥ अंबा वा हतपुत्रार्ता क्व गता सा मनस्विनी॥ ३९॥ दिष्ट्या नो भगवान्दृष्टो मग्नानां व्यसनार्णवे। कर्णधार इवा
पारे भगवान्पारदर्शकः॥ ४०

गतिं नाहं वेद अहं न जाने ताविततः क्व गतौ तथा हतपुत्रा आर्ता च तपस्विनी पतिव्रता चांबा क्व गता॥ ३९॥
दिष्ट्येत्यानंदद्योतकमव्ययं चादिराकृतिगणस्तान्निपातसंज्ञायां स्वरादिनिपातमव्ययमित्यव्ययसंज्ञा॥ व्यसनार्णवे पतितविश्लेषजदुः
खार्णवमग्नानामस्माकं कर्तरिवही॥ नोस्माभिर्भगवांस्त्वं दिष्ट्या दृष्टः। त्वद्दर्शनेन व्यसनमपगतमेवानंदश्च भविष्यतीति भावः कथंद
ष्टः। अपारे दुःप्राप्यतीरे समुद्रे तारयिता कर्णधार इव नाविक इव नस्त्वं पित्रोर्गतिं ब्रूहि॥ तव प्रीतिमावोचइत्यभिप्रायेणतं विशिनष्टि पा

प्रश्नमाह। गावल्गणे इत्यादिभिस्त्रिभिः॥ हे गावल्गणे संजय नोऽस्माकं तातः पिता नेत्रयोर्नेत्राभ्यां हीनः रहितः वृद्धश्च क्व गतः॥ हताः पुत्रा।
यस्याः साऽतएवार्ता दुःखिता वा माता गांधारी च क्व गता॥ तथा पितृव्यः॥ पितृभ्राता सुहृच्च विदुरः क्व गतः॥ अपीत्यपिशब्दः संभावना।
द्योतकः प्रश्नद्योतको वा॥ २२॥ हता मया हताः बंधवः पुत्राश्च यस्य सोऽतएव दुःखितो भार्य्यया सहाकृतप्रज्ञे विवेकहीने मयि दोषं शमल
मपराधमिति यावत्। आशंसमानः चिंतयन् गंगायामपतत् पतितवान् स्यात् पतितवान् किमित्यर्थः॥ २३॥ वात्सल्यमुक्त्वा तस्याप

युधिष्ठिर उवाच॥ गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः॥ अंबा वा हतपुत्रार्ता पितृव्यः क्व गतः सुहृत्॥ २२॥
अपि मय्यकृतप्रज्ञे हतबंधुः सभार्यया॥ आशंसमानः शमलं गंगायां दुःखितोऽपतत्॥ २३॥ पितर्युपरते पां
डौ सर्वान्नः सुहृदः शिशून्॥ अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः॥ २४॥ सूत उवाच॥ कृपया स्नेहवैक्लव्यात्
सूतो विरहकर्षितः॥ आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः॥ २५॥

राधेव पिदोषमनवेक्ष्योपकारत्वेन चिंतयन् गच्छति॥ पितरीति॥ पितरि पांडावुपरते सति सर्वान्नो सुहृदः पुत्रान् शिशून् व्यसन
तः। आपद्भ्यः। यावरक्षतां तौ पितृव्यौ पितुर्भ्रातरौ धृतराष्ट्र विदुरावितः क्व गतौ। छत्रिन्यायेन विदुराभिप्रायाद्वा व्यसनतो रक्षता
मित्युक्तं॥ २४॥ एवमुक्तः सूतः संजयः। आत्मनः स्वस्येश्वरं प्रभुं धृतराष्ट्रमचक्षाणः। अपश्यमानः। अतएवार्तीव पीडितो दुःखितः
तद्विरहेण कर्षितः। क्षणादेव कृशीभूतः। सन् कृपया स्नेहवैक्लव्यात् धार्ष्ट्याच्चितावत्र प्रत्याह प्रत्युत्तरं वक्तुं न प्रबभूवेत्यर्थः। २५

एवं सा दृष्टा जातकको विदा ब्राह्मणास्तस्य भाविनो गुणान् वर्णयंति। पार्थेत्यादि दशभिः एकैकमितरसाधारणैकगुणैकगुणमेवा
नुवर्तिना। अपितु तत्तदसाधारणगुणाः सर्वानपीत्याहुः॥ हे पार्थ मानवः। मनोर्वैवस्वतस्य सुतः इक्ष्वाकुरिव साक्षात् प्रजाविता प्रजाना
मविता रक्षिता। यथा दाशरथिर्दशरथस्य पुत्रः श्रीरामस्तद्वदेषः। ब्रह्मकुले साधकस्सेवाचिके संधाद्वद्वामि संधिर्यस्य तथा भूतश्चैष
दाता आत्मपर्यंतदाता शरण्य। शरणे रक्षणोपाय मर्हतीति॥ १८ ॥ यथौशीनरसुतः शिबिश्चक्रवर्ती तद्वद्दाता शरण्यश्च। दौष्यंतिरिव भ

ब्राह्मणा ऊचुः॥ पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः॥ ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा॥ १९॥ एष
दाता शरण्यश्च यथा ह्यौशीनरः शिबिः॥ यशो वितनिता स्वानां दौष्यंतिरिव यज्वनां॥ २०॥ धन्विनामग्रणीरेष तुल्य
श्चार्जुनयोर्द्वयोः॥ हुताश इव दुर्धर्षः समुद्र इव दुस्तरः॥ २१॥ मृगेंद्र इव विक्रांतो निषेव्यो हिमवानिव॥ तितिक्षुर्व
सुधेवासौ सहिष्णुः पितराविव॥ २२॥ पितामहसमः साम्ये प्रसादे गिरिशोपमः॥ आश्रयः सर्वभूतानां यथा देवो रमाश्र
यः॥ २३॥

रत इव यज्वनां यष्टॄणां यशो वितनिता यशसो विस्तारयिता॥ २०॥ धन्विनां धनुष्मतामग्रणीः श्रेष्ठः तत्र द्वयोरप्यर्जुनयोः कार्तवीर्यपार्थयो
स्तुल्यः। ताभ्यां तुल्य इत्यर्थः॥ हुताशोऽग्निरिव दुर्धर्षः। असोढुमशक्यः समुद्र इव दुस्तरः अगाधाशयः॥ २१॥ सिंह इव विक्रांतः कर्तरि क्तः परा
क्रमी पारवित्तेयवान्वा हिमवानिव निषेव्यः भूतानामुपजीव्यः असौ क्षितिं सुधेव भूमिरिव तितिक्षुः प्रसहिष्णुः पितराविव माता
पितराविव सहिष्णुरपराधसहिष्णुः॥ २२॥ साम्ये सर्वभूतसमत्वे पितामहेन ब्रह्मणा समस्तुल्यः प्रसादे ज्ञानप्रसादे अनुग्रहे वा गिरिशोप

मो रुद्रतुल्यः सर्वभूतानां रूपार्थलिप्सूनामाश्रयः आश्रयितुं
योग्यः यथा रमाश्रयः श्रीनिवासो देवस्तद्वत्॥ २३॥

भा० प्र०
१८

सर्वसद्गुणानिर्दुष्टाः गुणास्तत्कृतं माहात्म्यं यस्मिन् कृष्णं भगवंतमनुव्रतः॥ अनुवर्तिता कृष्णतुल्यसद्गुणमहात्म्ययुक्त इत्यर्थः रंतिदेव
इवोदारस्त्यागी॥२४॥ धृत्याधैर्येण बलिसमः वैरोचनितुल्यः प्रल्हादइव कृष्णे भगवति भक्त इति शेषः। सद्ग्रहः सतां ग्राहकः एष शिशुर
श्वमेधानामाहर्ता अनुष्ठाता वृद्धानां ज्ञानेन च वृद्धानां पर्युपासकः। यथोचितसेवकः॥२५॥ राजर्षीणां जन्मेजयादीनां जनयिता उत्प
थगामिनां धर्ममार्गान्निर्वर्तीनां शास्ता। भुवः पृथ्व्याः हेतोः धर्मस्य च कारणान्निमित्तात् धर्मार्थं चेत्यर्थः। एष कलेर्निग्रहीता निग्रहिष्यति

सर्वसद्गुणमाहात्म्य एष कृष्णमनुव्रतः। रंतिदेवइवोदारो ययातिरिव धार्मिकः॥२४॥ धृत्या बलिसमः कृष्णे प्र
ल्हादइव सद्ग्रहः॥ आहर्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः॥२५॥ राजर्षीणां जनयिता शास्ता चोत्पथगामिनां
निग्रहीता कलेरेष भुवो धर्मस्य कारणात्॥२६॥ तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात्। प्रपत्स्यत उपश्रुत्य
मुक्तसंगः पदं हरेः॥२७॥ जिज्ञासितात्मयाथार्थ्यो मुनेर्व्याससुतादसौ। हित्वेदं नृप गंगायां यास्यत्यद्धाकुतोभयं
२८

२६। द्विजपुत्रेणोपसर्पिता च्छापद्वारा नियोजिता तक्षकादात्मनः स्वस्य मृत्युं मरणमुपश्रुत्याकर्ण्य मुक्तो देहतदनुबंधिषु संगो येन तथा
भूतो हरेः पदं स्थानं प्रपत्स्यते प्राप्स्यति॥२७॥ एतदेवोपपादयति। व्याससुतान्मुनेः शुकाज्जिज्ञासितं विचारितं निर्णीतमिति यावत्
आत्मयाथार्थ्यमात्मतत्त्वं परमात्मस्वभावतत्त्वं देहतदनुबंधसंगहेतुभूतं येन सोऽसौ परीक्षित् हे नृप इदं शरीरं गंगायां त्यक्त्वा नास्ति १८
कुतश्चिद्भयं यस्मात्तद्धरेः पदं धाम स्फुटं यास्यति॥२८॥

इत्थं राज्ञे युधिष्ठिराय तत्कुलकर्मादिकमुपादिश्यावेद्य जातकमधिकृत्य प्रवृत्तेभ्योऽतिः शास्त्रे कोविदा इति निपुणा विप्राः सर्वे लब्धाऽपचिति
र्वेदुमतिर्यैर्लब्धा भूताः स्वकान् गृहान्प्रतिजग्मुः ॥२९॥ स जातकोविदैरनुवर्णितभाविगुण एष उत्तरासुतः। परीक्षिदिति लोके विख्यातः
कुतः। यद्यस्मात्स प्रभुरयमुत्तरासुतो गर्भे मातुरुदरे दृष्टं पुरुषं ध्यायन्निह लोके नरेषु तं पुरुषं परीक्षितवानन्वेषितवानिति यावत् परीक्ष
त्याऽऽकृन्मध्यवस्यदित्यर्थः ॥ ततः प्रवृत्तिनिमित्तात्सपरीक्षिच्छब्दवाच्ये विख्यातइत्यर्थः ॥ पूर्वपर्ययैस्ततकदस्यसा वितिगर्भावस्थायामपि

सूत उवाच ॥ इति राज्ञ उपादिश्य विप्रा जातककोविदाः ॥ लब्धोपचितयः सर्वे प्रतिजग्मुः स्वकान्गृहान् ॥२९॥ स ए
ष लोके विख्यातः परीक्षिदिति यत्प्रभुः ॥ गर्भे दृष्टमनुध्यायन्परीक्षेत नरेष्विह ॥३०॥ स राजपुत्रो वव्रुधे आशु शुक्ल इ ववृधे
वोडुप ॥ आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहं ॥३१॥

निरीक्षमाणमपि तच्छब्दप्रवृत्तिनिमित्तमिति सूचितं ॥ परिपूर्णादीक्षते शतरिपरीक्षिदिति चप्रायिकः पाठो दृश्यते। इत्युक्तरुहियुधिष्ठिरः
रितोऽणादिकस्ततेर्दृत्ते तेगृहणाभावेपि वालकाऽऽदिति प्रत्ययेऽहरित्सरदादीशश्व बधुसाधः ॥३०॥ स परीक्षिति प्रसिद्धो राजपुत्रः एकस्त्रच्छ
ब्दः प्रसिद्धियोतकः ॥ अपरस्तु प्रकृतपरामर्शकस्तं तानपोनरुक्त्यं पितृभिर्वा पितामहैर्हेतुभूतैरन्वहं मांशुव वृधे यथा शुक्लेपक्षेऽस्रा
पूर्यमाणाभिर्दृढिं गताभिः काष्ठाभिरुडुपश्चंद्रो वर्द्धते तद्वदित्यर्थः ॥३१॥

भा० पु०
१०३

अथ यदकार्षीत्तदाह इति त्रिअश्वसो तं सोपोद्घातमाह। यक्ष्यमाणऽस्यादिनायावत्संचदशाध्यायसमाप्ति ज्ञातिद्रोहजिहासयाज्ञातिवधप्रयु
क्तदोषपरिजिहीर्षयाऽश्वमेधेन तरति ब्रह्महत्यां योऽश्वमेधेन यजत इति ब्रह्महत्यादीनामपि परिहारकत्वश्रुतेन ब्रह्महत्याश्वमेधाभ्यां
नापरं पुण्यपापयोरिति निरतिशयपुण्यत्वेन च प्रसिद्धेनाश्वमेधेन यक्ष्यमाणो भगवंतमाराधयितुं कामो राजा युधिष्ठिरः। अन्यत्र करदंड
योः करः स्वामिग्राह्यो दंडः प्रसिद्धः तयोरन्यत्र ताभ्यां विनेत्यर्थः॥ अलब्धधनः। उपायांतरेण प्राप्ताधनः मनोरथ्यो चिंतितवान्। क

यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिहासया॥ राजाऽलब्धधनो दध्यौ वन्यत्र करदंडयोः॥३२॥ तदभिप्रेतमालक्ष्य भ्रातरोऽ
च्युतचोदिताः॥ धनं प्रहीणमाजह्रुरुदीच्यां दिशि भूरिशः॥३३॥ तेन संभृतसंभारो लब्धकामो युधिष्ठिरः॥ वाजिमे
धैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिं॥३४॥ आहूतो भगवान्राज्ञा याजयित्वा द्विजैर्नृपं॥ उवास कतिचिन्मासा
न्सुहृदः प्रियकाम्यया॥३५॥

करदंडाभ्यां लब्धधनेन यागाशक्तेः उपायांतरेण तु न प्राप्तं धनमतः। कथं यक्ष्यामीति चिंताव्याकुलो बभू
वेत्यर्थः॥३२॥ तस्य युधिष्ठिरस्याभिप्रेतमालक्ष्याच्युतेनाहूतेन श्रीकृष्णेन चोदिता आदिता आदिष्टाः आहूतो भगवानिति वक्ष्यमाणत्वा
त्॥ भ्रातरो भीमादय उदीच्यां दिशि प्रहीणं पराजितै राजभिस्त्यक्तं धनं भूरिशः आजह्रुः॥३३॥ तेन धनेन संभृताः संचिताः संभाराः यागसा
धनानि यस्य सोतएव लब्धकामः युधिष्ठिरः त्रिभिर्वाजिमेधैः भीतो मंत्रतंत्रद्रव्यलोपादिभ्यो भीतः निश्छिद्रं यथा तथेति भावः हरिं स हरि १०३
मयजदाराधितवान्॥३४॥ भगवान् कृष्णोपि राज्ञा आहूतः द्विजैर्नृपं युधिष्ठिरं याजयित्वा सुहृदां प्रीतिं कर्तुमिच्छया कतिचिन्मासानुवास

ततो वंधुभिः सहराज्ञा युधिष्ठिरेण कृष्णया द्रौपद्या चानुज्ञातोऽर्जुनेन सहितो यदुभिश्च परिवृतो हे ब्रह्मन् द्वारवतीं ययौ ॥ ३६ ॥ इति प्रथमे द्वादशः ॥
कुरुपांडवयुद्धात्प्रागेव मंत्राय धृतराष्ट्रेण हूतस्य पुत्रेण पराभूतो विदुरः । तीर्थयात्रायां निमित्तभूतायां सत्यां गतः । तत्रात्मनः परात्मनो गतीर्मै
त्रेयात्कृपेण ज्ञात्वा तया ज्ञात्वा ज्ञानविषयभूतयाऽवाप्त विविधित्सितः । कृतकृत्य विविक्षितः । इतिपाठे विदितवेद्यः । येनाश्रुतं श्रुतं भवत्यमतं मत
मविज्ञातं विज्ञातमात्मनि खल्वरे दृष्टे श्रुते मते विदिते इदं सर्वं विज्ञातं भवतीति श्रुतेः । पुनर्हास्तिनपुरं प्रागात्प्राप्तः ॥ १ ॥ तया वाप्त विविधित्सत इत्येतद्दे

ततो राज्ञाभ्यनुज्ञातः कृष्णया सह वंधुभिः ॥ ययौ द्वारवतीं ब्रह्मन्सार्जुनो यदुभिर्वृतः ॥ ३६ ॥ इति श्रीभागवते महापुराणे
प्रथमस्कंधे द्वादशोऽध्यायः ॥ १२ ॥ सूत उवाच ॥ विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिं । ज्ञात्वागाद्धास्तिनपुरं तयावाप्त
विवित्सितः ॥ १ ॥ यावतः कृतवान्प्रश्नान् क्षत्ता कौषारवाग्रतः । जातैकभक्तिर्गोविंदे तेभ्यश्चोपरराम ह ॥ २ ॥ तं वंधुमागतं
दृष्ट्वा धर्मपुत्रः सहानुजः । धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतस्तथा ॥ ३ ॥ गांधारी द्रौपदी ब्रह्मन्सुभद्रा चोत्तरा कृपी । अन्याश्च जा
मयः पांडोर्ज्ञातयः ससुताः स्त्रियः ॥ ४ ॥

वोपपादयति । यावतः क्षत्ता विदुरः । कौषारवो मैत्रेयः कुषारवगोत्रप्रसूतत्वात्तस्याग्रतः यावतः प्रश्नान्कृतवान् । तत्र कतिपयानामेवप्र^
श्नानां सुरे गोविंदे जाता । एकाऽव्यभिचारिण्यनन्यप्रयोजना भक्तिर्यस्य तथाभूतः । तेभ्योऽवशिष्टप्रश्नेभ्य उपरराम । अवशिष्टप्रश्नानामुत्त
५ हास्तिनपुरं प्राप्त इत्यर्थः ॥ जातैकभक्तिरित्यनेन कृतकृत्यत्वमुक्तं ॥ २ ॥ तमागतं वंधुं विदुरं ज्ञात्वा सहानुजो धर्मपुत्रो युधिष्ठिरो धृतराष्ट्रादयः स^
तः संजयः । शारद्वतः कृपः ॥ ३ ॥ अन्याश्च जामयः अंबतः पुरस्त्रियः ससुताः पांडोर्ज्ञातयश्च हे ब्रह्मन् ॥ ४ ॥

भा०प्र प्रहर्षेणप्रत्युज्जग्मुरभिमुखंययुः। यथाआगतंप्राणंतन्वःशरीराणितद्वत्प्राणमागतंदृष्ट्वातंप्रत्युज्जग्मुरित्यर्थः। परिष्वंगाभिवादनैर्वि
१०७ धिवद्यथोचितमभिसंगम्य॥५॥विरहप्रयुक्तोत्कंठ्येनकातराः प्रेमवाष्पौघमानंदाश्रुसमूहंमुमुचुः॥कृतआसनपरिग्रहोयेनतंविदुरं
राजायुधिष्ठिरोर्हयामासपूजयामास॥६॥ततोभुक्तवंतंविश्रांतमासनेसुखासीनंतंविदुरंस्वानांशृण्वतांसतांप्रश्रयेणावनतः प्राह॥७॥

प्रत्युज्जग्मुः प्रहर्षेणप्राणंतन्वइवागतं॥अभिसंगम्यविधिवत्परिष्वंगाभिवादनैः॥५॥मुमुचुः प्रेमवाष्पौघं
विरहौत्कंठ्यकातराः॥राजातमर्हयांचक्रेकृतासनपरिग्रहं॥६॥तंभुक्तवंतमासीनंविश्रांतंसुखमासने॥प्र
श्रयावनतोराजाप्राहतेषांचशृण्वतां॥७॥युधिष्ठिर उवाच॥अपिस्मरथनोयुष्मत्पक्षच्छायासमेधितान्॥वि
पद्गणाद्विषाग्न्यादेर्मोचितायत्समातृकाः॥८॥कयावृत्त्यावर्तितंवश्चरद्भिः क्षितिमंडलं॥तीर्थानिक्षेत्रमु-
ख्यानिसेवितानीहभूतले॥९॥

तदेवाह॥अपीसादिभिश्चतुर्भिः॥युष्मत्तवपक्षयोः परिग्रहरूपयोः छायांसमेधिता
न्नोस्मानपिस्मरथकिं॥आत्मानंतत्पक्षच्छायासमेधितंत्वंस्मारयति॥समातृकाः मात्रासहितावयंविषाग्न्यादिरूपाद्विपद्गणात्त्वया
विमोचिता॥८॥क्षितिमंडलेचरद्भिः कयावृत्त्यावर्तितंइहभूतलेकानितीर्थानिभगवत्क्षेत्रमुख्यानिचभवद्भिः सेवितानि॥९॥ १०७

कृतकृत्यानांभवतांनतीर्थयात्रासुप्रयोजनमस्तीत्यभिप्रायेणाह॥भवद्विधाइति हेविभोभवादृशाः।भागवताः स्वयमेवतीर्थभूताः
पवित्रभूताः।अतस्तीर्थयात्राकृतंपवित्रत्वंनापेक्षितमितिभावः॥तर्हिकिमर्थंतीर्थान्यटतीत्यत्राह।तीर्थीकुर्वंतीति॥स्वांतस्थेन
गदाभृता भागवतास्तीर्थान्यपितीर्थीकुर्वंति॥तीर्थान्यपितीर्थीकर्तुंतान्यटंतीतिभावः॥वस्तुतः परिशुद्धान्येवगंगादितीर्था
नितथापिपापिभिः।तेषुपरिकृतानिपापान्यादायतान्यपिपवित्रीकुर्वंति स्वगतानितुस्वांतरात्मतयावस्थितेनगदाभृताक्षप
यति।तस्यतद्दोषप्रतिभटत्वात्तस्मिन्पापसमावेशप्रसक्तिरितिभावः॥एतदभिप्रायेणैवगदाभृतेत्युक्तं॥तथाचनवमे॥किंचाहंन

भवद्विधाभागवतास्तीर्थभूताः स्वयंविभो॥तीर्थीकुर्वंतितीर्थानिस्वांतस्थेनगदाभृता॥१०॥अपिनःसुहृ
दस्तातबांधवाःकृष्णदेवताः॥दृष्टाःश्रुतावायदवःस्वपुर्यांसुखमासते॥११॥सूतउवाच॥इत्युक्तोधर्म
राजेनसर्वंतत्समवर्णयत्॥यथानुभूतंक्रमशोविनायदुकुलक्षयं॥१२॥

भुवंयास्येनरामय्यामृजंत्यघं॥मृजामितदघंक्वाहंराजंस्तत्रविचिंत्यतामितिगंगयोक्तोभगीरथश्चाह॥साधवोन्यासिनःशांताब्रह्मिष्ठा
लोकपावनाः।हरंत्यघंतेंगसंगात्तेष्वास्तेह्यघभिद्धरिरिति॥१०॥अपीति॥हेतातकृष्णएवदेवतायेषांतेनोस्माकंसुहृदोबांधवाश्चयदवःदृष्टाः
श्रुतावास्वपुर्यांद्वारकायांसुखमासतइतिश्रुताःकिं॥११॥इतीत्थंधर्मराजेनोक्तःविदुरोयदुकुलक्षयंविनाऽन्यत्सर्वं॥यथाभूतंदृष्टंश्रु
तंचानतिक्रमशः समवर्णयत्

भा०प्र०
१०५

यदुकुलक्षयं कुतो नावेदयदित्यत्राह । नन्विति । ननु हे शौनक दुर्विषहं सोढुमशक्यं स्वयमुपस्थितं स्वयमेवोपस्थितं स्वदप्रियं यदुकुलक्षयात्मकं नावेदयत । कुतः यतः सकरुणः दयावान् अत एव दुःखितान् दुःखिष्यमाणान् द्रष्टुमक्षमः अक्षमो द्रक्ष्यमाणः । १३ । अथ स्वैरेव विदुरः सत्कृतो देववत् सुमतः । कंचित्कालं ज्येष्ठस्य भ्रातुः धृतराष्ट्रस्य श्रेयस्कृत् सर्वेषां धर्मराजादीनां प्रीतिमावहन् सुखमवात्सीत् उवास । श्रेयः कर्तुं प्रीतिमावोढुं चावात्सीदित्यर्थः । भ्रातुः श्रेयस्करणमत्र तस्य मरणज्ञापनपूर्वकं मुक्त्युपायप्रवर्तनरूपं विवक्षितं । १४ । कथं

नाप्रियं दुर्विषहं नृणां स्वयमुपस्थितं । नावेदयत्सकरुणो दुःखितान्द्रष्टुमक्षमः ॥ १३ ॥ कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखं ॥ भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् ॥ १४ ॥ अबिभ्रदर्यमा दंडं यथावदघकारिषु ॥ यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः ॥ १५ ॥ युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलंधरं ॥ भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया ॥ १६ ॥

तस्य तज्ज्ञापनसामर्थ्यमिति शंकामुदासाय सर्वप्राणिमृत्युकालज्ञत्वं दंडधरश्च यो यमः । स एवायं विदुर इति वदन् शंकांतरं च निरास अबिभ्रदिति शापान्मांडव्यशापादितो र्यमो यावच्छूद्रत्वं विदुररूपं शूद्रभावं दधार तावद्वर्षशतमर्यमा सूर्यो ऽघकारिषु पापिषु यथार्हं तत्पापानुरूपं दंडमबिभ्रत्कारयामास । १५ । युधिष्ठिर इति सार्धाभ्यां । लब्धराज्येनेन युधिष्ठिरः कुलधरं कुलनिर्वाहकं पौत्रं परीक्षितं दृष्ट्वा १०५
इंद्रादिलोकसदृशैर्भ्रातृभिः परया श्रिया च मुमुदे । १६ ।

एवं गृहेषु सक्तानां तदीहया याऽगार्हीयचेष्टया प्रमत्तानामविदितमृत्युकालानां कर्त्तरि षष्ठी। तैरविज्ञातः परमः। सर्ववशी कुर्वन्नत एव दुस्तरः
कस्याप्यवश्यः। कालोऽत्यक्रामत् अतिक्रांतवान्॥ तदीहया अविज्ञात इति वान्वयः। युधिष्ठिरादीनां विषयानुभवकालो व्यतिक्रांतो बभूवेत्य
र्थः॥१७॥ भ्रातुः श्रेयस्क्रियाप्रकारं प्रपंचयति। विदुर इत्यादिभिर्दशभिः। तं कालातिक्रममभिप्रेत्य विदुरो धृतराष्ट्रमभाषत॥ तदेवाह। राज
न्नित्यादिसार्द्धैश्चतुर्भिः॥ हे राजन्निति। शीघ्रं निर्गम्यतां त्वयेति शेषः। आगतमुपस्थितमिदं भयं पश्य आलोचय॥१८॥ किं तत्तत्राह। प्रतिक्रि
येति। कुतश्चिदपि हेतोः कदाचिदपि यस्य भयस्य प्रतीकारः निवारणं नास्ति। स एष भगवान् भगवन्नियामकः। सर्वेषां नोऽस्माकं कालो मृत्यु

एवं गृहेषु सक्तानां प्रमत्तानां तदीहया॥ अत्यक्रामदविज्ञातः। कालः परमदुस्तरः॥१७॥ विदुरस्तदभिप्रेत्य धृतराष्ट्रम
भाषत॥ विदुर उवाच॥ राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतं॥१८॥ प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित्प्रभो। स
एष भगवान् कालः सर्वेषां नः समागतः॥१९॥ येन चैवाभिपन्नोऽयं प्राणैः प्रियतमैरपि॥ जनः सद्यो वियुज्येत किमु
तान्यैर्धनादिभिः॥२०॥ पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः। आत्मा च जरया ग्रस्तः परगेहमुपासते॥२१॥

कालः समागतः सम्यगुपस्थितः॥१९॥ गृहासक्तिं त्याजयितुं कालं विशिषन्नाह॥ येनेति। अयं परिदृश्यमानो जनः येन कालेनाभिपन्नः। अभिप
द्यमानः। प्रियतमैरतिशयप्रियैः प्राणैरपि सद्यो विमुच्येत त्यजेत। अन्यैः प्राणानुबंधिभिर्धनादिभिर्मुच्येतेति किमु वक्तव्यं स कालः समा
गत इत्यन्वयः॥२०॥ विरक्तिमुत्पादयितुं तस्यावस्थां वर्णयति। पित्रित्यादिभिश्चतुर्भिः। तव पित्रादयो हताः मृताः। वयो यौवनं चापगतं। आ
त्मा देहो जरया च ग्रस्तः॥ तथापि परेषां शत्रूणां गेहमुपाससे। जीवनार्थमिति शेषः॥२१॥

भा० प्र० जीविताशां त्याजयितुं विस्मयमानस्त्वाह ॥ अहोजंतोर्जीविताशा महीयसी बलीयसी । यया जीविताशया भवान् भीमेनावर्जितं परिभवद
१०६ त्तं पिंडं कवलमादत्ते स्वीकरोति अत्तीति यावत् गृहपालः श्वा तद्वत् ॥ २२ ॥ पिंडस्य भीमावर्जितत्वख्यापनाय भीमादीनां शत्रुत्वं प्रख्यापयंस्त
द्वर्जितं पिंडं अन्नं प्राणधारणमत्यंतं हीनमित्याह ॥ अग्निरिति ॥ येषामित्यस्याग्न्यादिभिः प्रत्येकमन्वयः येषामग्निर्निसृष्टः लाक्षागृहे क्षिप्ति
शेषः ॥ येषां गरो विषं दत्तं येषां च दाराः द्रौपदी दूषिताः ॥ कचग्रहणवस्त्रापहरणादिभिर्दूषिताः । येषां च धनं क्षेत्रं राज्यं चापहृतं सर्वं त

अहो महीयसी जंतोर्जीविताशा यथा भवान् ॥ भीमेनावर्जितं पिंडमादत्ते गृहपालवत् ॥ २२ ॥ अग्निर्निसृ
ष्टो दत्तश्च गरो दाराश्च दूषिताः ॥ हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् ॥ २३ ॥ तस्यापि तव देहोयं कृपणस्य
जिजीविषोः ॥ परैत्यनिच्छतो जीर्णो जरया वाससी इव ॥ २४ ॥

येति बोध्यं ॥ तत्कर्त्तृत्वैरिति कर्त्तृपदं बोध्यं ॥ तद्दत्तैस्तद्दपवर्जितैः पिंडदानायतत्त्वात्तद्दत्तैरित्युक्तं ॥ असुभिः प्राणैः कियन्न किंचिदति
हीनमिदं जीवनमित्यर्थः ॥ २३ ॥ किंविधेयं प्रारब्धमनुभूयमेवेत्यत्र जीविताशां त्याजयितुमेव विशिंषन्नाह ॥ तस्येति । तस्य तद्दत्ता
सोः कृपया जीवितुमिच्छोरप्यनिच्छतः । देहत्यागमनिच्छतोपि तव देह इति शेषः । जीर्णो वाससी इव जरया देहः परैत्यपगमिष्यत्येव ॥ २४ १०६

तर्हिज्ञानिसन्निधावन्नैवपरैर्लिप्यत्राह । गतेति । गतःस्वार्थः । स्वापेक्षितपुरुषार्थो यस्मात्तं इमं देहं योजह्यात्त्यजेत् । कथंभूतः विरक्तः । देहा
दिषु स्पृहारहितः ॥ मुक्तानि बंधनानि संसृतिबंधायकानि पुण्यपापात्मकानि येन ॥ अविज्ञाता ज्ञातिभिर्ज्ञाता गतिर्देहत्यागलोकांतरप्राप्ति
रूपायस्य स एव धीरः योगी उदाहृतः ॥२५॥ किंच । स्वकात्परतश्च स्वस्मादन्योपदेशाद्वा ॥ इहजातो निर्वेदो वैराग्यं यस्य सः । पुमानात्मवान्
जितेंद्रियः ॥ हरिमाश्रितानां संसृतिबंधहरं भगवंतं हृदि कृत्वा विधाय ध्यानेन संनिधाप्य गेहात्प्रव्रजेत् स एव नरेषूत्तमः । त्वमेवं कुर्विति भा

गतस्वार्थमिमं देहं विरक्तो मुक्तबंधनः ॥ अविज्ञातगतिर्जह्यात्स वै धीर उदाहृतः ॥२५॥ यः स्वकात्परतो वेह जा
तनिर्वेद आत्मवान ॥ हृदि कृत्वा हरिं गेहात्स वै धीर उदाहृतः ॥२६॥ अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान्
इतोर्वाक् प्रायशः कालः पुंसां गुणविकर्षणः ॥२७॥

वः ॥२६॥ तदेवाह ॥ अथ इति ॥ अथो अतः । स्वैर्ज्ञातिभिरविज्ञातगतिर्यस्य स भवानुदीचीं दिशं यातु । तत्र हेतुमाह ॥ इतोऽर्वागितोऽनं
तरं कालः प्रायशः पुंसां गुणानात्मगुणान् । अक्रोधादीन् विकर्षत्यपनुदत इति तथाभूतः । नंद्यादित्वाल्ल्युः । यदा इतो नंतरकालः
अर्वागधरः निकृष्टः कलिकालः इतियावत् ॥ अर्वाक्त्वमेवाह । गुणविकर्षणः उक्तार्थः ॥२७॥

भा॰ श्र॰
१०१

एवमित्थमनुजेन विदुरेण बोधितश्चाजमीढः। अजमीढवंशजातत्वात् अजनवमे स्फुटं। मत्रैव वचस्तुर्यस्य। अंधइति भावः। यद्वांधत्वेपिप्रा
ज्ञयाचक्षुः त्याग्नीयया सर्वेसात्तात्कुर्वाणः धृतराष्ट्रः। भ्रात्रा विदुरेण संदर्शितः अध्वागंतव्यदेशाध्यायस्पसः। अनेन विदुरोपदितेनैव स
हनिरगादिति सूच्यते॥ इत्यिन्नः। नितरां हृढमूलान्स्वेषु देहतदनुवंध्यादिषु स्नेहाः अनुरागास्त एव पाशाः पाशवद्बंधहेतुत्वात्तान्निश्चक्राम
गृहादिति शेषः॥२८॥ पतिमिति॥ सुवलस्य पुत्री गांधारी मतस्तस्य क्रोभूतद्रोहे ये तेषां सर्वभूतसुहृदां योगिनां प्रहर्षकरं हिमालयं प्रति

सूत उवाच। एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधितो ह्याजमीढः॥ छित्वा स्वेषु स्नेहपाशान्दृढिम्नो निश्चक्रा
म भ्रातृसंदर्शिताध्वा॥२८॥ पतिं प्रयांतं सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी। हिमालयं न्यस्तदंडप्रहर्षं मनस्वि
नामिव सत्संप्रहारः॥२९॥ अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा तिलगोभूमिरुक्मैः॥ गृहं प्रविष्टो गुरुवंदनाय
न चापश्यत्पितरौ सौबलीं च॥३०॥ तत्र संजयमासीनं पप्रच्छोद्विग्नमानसः॥३१॥

यातं गच्छंतं पतिमनुजगाम युक्तं चैतदित्य
भिप्रायेण तां विशिनष्टि। पतिव्रता साध्वी चेति॥ मनस्विनामिवेति स धृतराष्ट्रनिर्गमः इत्यध्याहारः॥ स निर्गमः मनस्विनां विवेकिनां सत्प्रहार इव
स्थितः। मनस्विनां सुवोधकः स्वावर्तते स्पष्टः॥२९॥ ततोऽजातशत्रुः कृताशमय आहवनीयाद्यो ये न तथाभूतः॥ अनेन राज्ञा वैवध
तराष्ट्रो निरगादिति सूचितं। तिलादिभिः सत्कृत्य विप्रान्नत्वा॥ कृतं मैत्रं येन सः॥ अत एव गुर्वोर्गांधारीधृतराष्ट्रयोर्वंदनाय तयोर्गृहं प्र
विष्टः पितरौ धृतराष्ट्रविदुरौ सौबलीं गांधारीं च नापश्यन्न ददर्श॥ पितराविति द्विवचनेन विदुरो विवक्षितः सौबल्या गांधार्या श्वश्रुरुपारा

नात॥३१॥ ततस्तत्र धृतराष्ट्रगृहे आसीनमुपविष्टं संजयं धृतरा
ष्ट्रगीतोपदेशादजातशत्रुः पप्रच्छ कथंभूतः उद्विग्नं भीतं
मानसं यस्य तथाभूतः॥३२॥

१०१

किंतत्तद्दर्शनजं फलमाह । भक्त्येति । यस्मिन्भक्त्या मनो निवेश्य वाचा यस्य भगवतो नाममात्रमेव कीर्तयन् कलेवरं त्यजन् योगी कामकर्मभिः का
म्यंत इति कामाः शब्दादिविषयास्तेषां निमित्तभूतैः कर्मभिः । पुण्यपापात्मकैः कामैः कामैः कर्मभिश्चेति वा मुच्यते संसृतिबंधान्मुच्यत इत्यर्थः
यच्छब्दस्य सकृत्पठितस्याध्याहृततच्छब्दतात्पर्येणान्वयः । स देवदेवः प्रतीक्षतां वा । नामकीर्तनमेव कामकर्मविमोचनद्वारा निःश्रेयसफलकं किमुत सा
क्षाद्दर्शनमिति भावः । यत एवमतो यावत्तत्कृतयाणं तावद्भगवान्प्रतीक्षतामिति प्रार्थयते । स इति । यावदिदं कलेवरं शरीरं हिनोमि त्यजामि ।

भक्त्यावेश्य मनो यस्मिन्वाचा यन्नाम कीर्तयन् । त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः ॥२३॥
स देवदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहं । प्रसन्नहासारुणलोचनोल्लसन्मुखांबु
जो ध्यानपथश्चतुर्भुजः ॥२४॥ सूत उवाच । युधिष्ठिरस्तदाकर्ण्य शयानं शरपंजरे । अपृच्छद्विविधान्
धर्मानृषीणां चानुशृण्वताम् ॥२५॥

यावद्विमर्शीतिभावः । तावत्प्रसन्नेन हासेनारुणलोचनाभ्यां उल्लसन्मुखांबुजं यस्य स चतुर्भुजो भगवान् श्रीकृष्णः । देवानामपि देवो ध्यानपथः
ध्यानविषयभूतः सन् प्रतीक्षतां । चक्षुःपथत्वं प्राप्त एव ध्यानपथोपि भवत्वित्यभिप्रायेण ध्यानपथ इत्युक्तं । यद्वा द्विभुजत्वेन ध्यानपथो भवति
त्यभिप्रायेण तदुक्तिः । तत्र त्यानां द्विभुजत्वेन चक्षुःपथोपि स्वस्य चतुर्भुजत्वेन चक्षुःपथस्तेनैव रूपेण ध्यानपथोस्त्वित्यभिप्रायेण वा ध्यानप
थश्चतुर्भुज इत्युक्तं । २४ । तस्मिन्नेव वचो निशम्य युधिष्ठिरः शरपंजरे शयानं भीष्मं ऋषीणां शृण्वतां सतां नानाविधान् धर्मान् पप्रच्छेत्य । २५ ॥ ॥

यद्यप्येवं मन्यसे ऽक्रूरो: च तत्कृतं दैत्यसारथ्यादिक्रिया कृतं मतिवैषम्यं कदाचिदप्यस्य न विद्यते। मतिवैषम्याभावे हेतुं वदन् विशिनष्टि। सर्वात्मन इ
ति। सर्वात्मनः मातुलेयादीनामात्मत्वादस्य इतं सारथ्यं च कुर्वतस्तत्त्वाध्यंतरात्मतया वधहत्वादिकारणमप्यन्धामपि चोदयत इति भावः। अथाप्यनवद्य
स्यनिषिद्धाचरणगतावद्यासंस्पर्शस्य तत्र हेतुरनहंकृतेर्देहात्माभिमानरहितस्य किंचाद्वयस्य द्वितीयवस्तुरहितस्य व्याप्यत्वतंत्र वस्तुरहितस्येत्यर्थः। अतए
व समदृशः।। सर्वमपि प्रकृतिपुरुषाद्यात्मकं उच्चावचं स्वशरीरतया स्वनियाम्यतया चैकरूपं पश्यतः।। उक्तगुणविपरीतस्यैव हि पुंसो मतिवैषम्य
मिति भावः।। २१।। सर्वात्मनः। इत्यनेन सर्वस्य तत्प्रीतिविषयत्वमवगतं शरीरं ह्यात्मनः।। प्रीतिविषयं यद्यपि सर्वं चिदचिदात्मकं जगच्छरीरमतं

सर्वात्मनः समदृशो ह्यद्वयस्यानहंकृतेः।। तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित्।। २१।।
तथाप्येकांतभक्तेषु पश्य भूपानुकंपितं।। यन्मे ऽसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः।। २२।।

प्रियं कृपाविषयं च तथापि सेवकानुजिघृक्षया जगद्व्यापारे प्रवृत्तस्य स्वस्य वैषम्यनैर्घृण्यादिपरिहाराय व्याजमात्रापेक्षिणः स्वानुवर्तिनो नित
रां प्रियाः कृपाविषयाश्चेति तदेव दर्शयितुं भक्तस्य मुमुक्षोर्मम चक्षुर्विषयतां गत इत्याह।। तथापीति।। यद्यपि सर्वात्मा समदृशी च तथापि हे
भूप एकांतभक्तेष्वनन्यप्रयोजनेष्वनुकंपितं। अनुकंपास्य संजातेत्यनुकंपितः।। तारकादित्वात् इतच्।। अनुकंपावत्त्वे हि। तत्र लिंगमाह। य
दस्मात्कृष्णोऽसून् प्राणांस्त्यजतस्त्यक्तुमुद्युक्तस्य मम साक्षाद्दर्शनं प्राप्तः।। २२।।

अस्त्वेवं प्रकृते: किमित्यत्राह। तस्मात्सर्वलोकस्य कालाधीनत्वात्सुखादिमत्वात्कर्मो देश्वकृत्स्नायत्तत्वात्कृत्स्नस्य कालाद्यनुवर्तितत्वाच्च॥ हे भरतर्षभ इदं
सुखदुःखादिकं सर्वं दैवतंत्रं दैवाधीनं व्यवस्य निश्चित्य। दैवमत्र कालकर्मादिरूपो धिपतितावत्तदनुवर्ती वेश्वरः कृत्स्नो विवहितः। तस्य दैवस्यानुविहितः
तस्येति कर्तरि षष्ठी। तेनवर्तितस्त्वं हे प्रभो नाथ अनाथाः प्रजाः पाहि पालय। ७॥ एवं तदनुशास्य लोकानुग्रहकाम्यया श्रीकृष्णयाथात्म्यमावेदयति
एषइति॥ एष श्रीकृष्णः साक्षाद्भगवान् षाड्गुण्यपरिपूर्णः आद्यो जगत्कारणभूतः। परमपुरुषो नारायण एव सन्मायया लोकं मोहयन्गूढः विरोधा

तस्मादिदं दैवतंत्रं व्यवस्य भरतर्षभ॥ तस्यानुविहितो नाथा नाथ पाहि प्रजाः प्रभो॥१७॥ एष वै भगवान्सा-
क्षादाद्यो नारायणः पुमान्॥ मोहयन्मायया लोकं गूढश्चरति वृष्णिषु॥१८॥ यं मन्यसे मातुलेयं प्रियमित्रं
सुहृत्तमं। अकरोः सचिवं दूतं सौहृदादथ सारथिं॥१९॥ अस्यानुभावं भगवान्वेद गुह्यतमं शिवः। देवर्षि-
र्नारदः साक्षाद्भगवान्कपिलो नृप॥२०॥

पित्स्वकीयवेषः। वृष्णिषु यादवेषु चरति॥ कश्चिद्यादवस्त्वानुकरोति॥१८॥ त्वमेव परममित्यं जानासि तथापि तस्य तत्कृतं न वैषम्यमस्तीत्याह। य
मितिकाभ्यां॥ यं कृष्णं मातुलेयं मातुलपुत्रपुत्रं प्रियं प्रीतिविषयं पंचमित्रं स्वतुल्यं वसुहृत्तमं महोपकारकं च मन्यसे। पंच त्वं सचिवं मंत्रिणं च कदा
चित्सदूतं कदाचित्सौहृदातिशयात्सारथिं चाकरोः कृतवानसि॥१९॥ तस्यानुभावं भगवान् शिवो वदेति पूर्वेणान्वयः। देवर्ष्यादयो विदुरिति वहेन

भवतामप्रियं दुःखमभूदेतत्सर्वं कालकृतं कालो दुर्दैवकृतं मन्ये। कोसौ कालः यत्कृतं मदप्रियं तत्राह। वायोर्वशे मेघपंक्तिरिव यस्य वशे सर्वो
लोको वर्तते स एव कालः ॥१४॥ अत्यंतासंभाविनमिदमभवदिति विस्मयते। यत्र धर्मसुतादयः। तत्र विपदिति चित्रमित्यर्थः। अत्राद्यः॥ कृष्णशब्दोऽ
र्जुनपरः। द्वितीयस्तु भगवत्परः॥ तद्विशेषणं सुहृदिति॥ धर्मसुतादीनां सुहृत् स्त्रीशब्देन कृष्णाख्या स्त्री द्रौपदी विवक्षिता॥ धर्मसुतादीनामन्यतम एव सर्व
विपत्तरणे तमे सति संभूय सर्वेषामवस्थाने पि विपदभवदिति चित्रमिति॥ इदं सर्वं कालकृतमेवेति भावः। सुहृत्कृष्ण इत्यनेन सुहृदपि कृष्णः

सर्वं कालकृतं मन्ये भवतां च यदप्रियं। सपालो यद्वशे लोको वायोरिव घनावलिः॥१४॥ यत्र धर्म
सुतो राजा गदापाणिर्वृकोदरः॥ कृष्णोऽस्त्री गांडीवं चापं सुहृत्कृष्णस्ततो विपत्॥१५॥ न ह्यस्य कर्हि
चिद्राजन्पुमान्वेद विधित्सितं॥ यद्विजिज्ञासया युक्ता मुह्यंति कवयोपि हि॥१६॥ ॥ ॥

४ कालमेवान्ववर्ततेति सूचितं॥ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च॥ यदनुग्रहतः संति न संति यदुपेक्षया इत्युक्तविधस्य तत्रापि भवतामतीव
सुहृदः। कृष्णस्य विपन्निमित्तकर्मौघोधकालानुवर्तित्वादेवोपेक्षा संगतानान्यथेत्याशयः॥१५॥ ननु यद्वशे लोकाः स कालोपि श्रीकृष्णो यत्र सत्रा
द्विमांश्चेत्तर्हि कालानुवृत्त्या किमस्य चिकीर्षितमित्यत्राह॥ नेति हे राजन्नस्य कृष्णस्य विधित्सितं चिकीर्षितं न कोपि पुमान्वेद। अवेद्यत्वमेवोपपादयति
विधित्सितं विशिनष्टि। यस्य विधित्सितस्य जिज्ञासया युक्ताः सहिताः। विधित्सितं ज्ञातुं प्रवृत्ताः कवयोपि मुह्यंतीति॥१६॥ ॥ ॥ ॥

भा० प्र०
८२

हे ब्रह्मन् अन्ये च ब्रह्मरातः शुकः आदिर्येषां ते। अमला मुनयः शिष्यैरुपेताः कश्यपादयश्चाजग्मुः॥७॥ तान् ब्रह्मर्षिप्रभृतीन् समुदितानुपलभ्या
भिज्ञाय धर्मज्ञो देशकालविभागज्ञश्च वसूत्तमो भीष्मो यथार्हं पूजयामास पूर्वजन्मनि वसुत्वाद्वसूत्तमः इत्युक्तः॥८॥ तथा कृष्णं च तत्प्रभावाभिज्ञो हृ
दिस्थं पूजयामास॥ ध्यानेन हृदि स्थं कृत्वा मानसैरुपचारैः पूजयामासेत्यर्थः। कथंभूतमासीनमग्रत उपविष्टं जगदीश्वरं मायया संकल्परूपज्ञाने
नोपात्तो विग्रहो येन तं॥९॥ तत उपासीनानुपविश्य अनुवर्तमानान्वा। प्रश्रयेण विनयेन प्रेम्णा च संगतान् पांडुपुत्राननुरागास्रैरनुरागजैरश्रुबिंदु।

अन्ये च मुनयो ब्रह्मन् ब्रह्मरातादयोमलाः। शिष्यैरुपेता आजग्मुः कश्यपांगिरसादयः॥७॥ तान्समेतान्महा
भागानुपलभ्य वसूत्तमः॥ पूजयामास धर्मज्ञो देशकालविभागवित्॥८॥ कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्व
रं हृदिस्थं पूजयामास माययोपात्तविग्रहं॥९॥ पांडुपुत्रानुपासीनान् प्रश्रयप्रेमसंगतान्॥ अभ्याचष्टानुरागा
स्रैरंधीभूतेन चक्षुषा॥१०॥ भीष्म उवाच॥ अहो कष्टमहोन्याय्यं यद्यूयं धर्मनंदन। जीवितुं नार्हथ क्लिष्टं विप्रधर्मा
च्युताश्रयाः॥११॥ संस्थिते तिरथे पांडौ पृथा बालप्रजा वधूः॥ युष्मत्कृते बहून् क्लेशान् प्राप्ता तोकवती मुहुः॥१२॥

भिरंधीभूतेन चक्षुषा अभ्याचष्ट ददर्श अथवा चचक्षे उभयार्थकत्वात्॥ अत्र तंत्रेणोभयमपि विवक्षितं॥१०॥ तत्रोक्तिमाह। अहो इति द्वादशभिः
हे धर्मनंदनाः कष्टं जीवनमन्याय्यमिति छेदः संधिरार्षः। उं दितिप्रकृतिभावो विभाषात्॥ यद्यस्माद्विप्रा धर्मो अच्युतो भगवांश्च आश्रयो येषां ते विप्रा द्युतु
वांते तेनो यूयं क्लिष्टं कष्टं यथा तथा जीवितुं नार्हथ॥११॥ अतिरथे पांडौ संस्थिते प्रेते सति बालाः प्रजाः पुत्रा यस्याः सा वधूः पृथा कुंती तोकवत्यपत्य
वतीसत्स्वपि पुत्रस्वर्थं मुहुर्मुहुः बहून् क्लेशान् प्राप्ता हि॥१२॥

८२

ततस्तीर्थं प्रजाद्रोहाद्भीतो युधिष्ठिरः । स्वर्गान् धर्मान् वोढुमिच्छया विशसनं विशं सिता हिंसिता यत्र वं धवः । तद्विशसनं कुरुक्षेत्रं प्रायात्स्म तस्थे
विनशनं विशिनष्टि । यत्र देवव्रतो भीष्मोऽपतत् भीष्माद्धर्मान् वोढुं प्रायादित्यर्थः ।१। तदा तस्य युधिष्ठिरस्य भ्रातरो भीमादयः । सर्वे संतो भ्रायेषां तैः
स्वर्णभूषितै रथैरन्वगच्छन् । तथा हे विप्राः व्यासधौम्यादयश्चान्वगच्छन् ।२। हे विप्रर्षे स धनंजयः सार्जुनो भगवान् श्रीकृष्णोपि रथेनान्वगच्छत् तदा स

सूत उवाच ॥ इति भीतः प्रजाद्रोहात्सर्वं धर्मविवित्सया ॥ ततो विनशनं प्रागाद्यत्र देवव्रतोऽपतत् ॥ तदा ते भ्रातरः
सर्वे सदश्वैः स्वर्णभूषितैः ॥ अन्वगच्छन् रथैर्विप्रा व्यासधौम्यादयस्तथा ।२। भगवानपि विप्रर्षे रथेन सधनंजयः ॥ स तैर्व्यरो
चत नृपः कुवेर इव गुह्यकैः ॥३॥ दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरं ॥ प्रणेमुः पांडवा भीष्मं सानुगाः सहचक्रिणः ।४॥
तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम ॥ राजर्षयश्च तत्रासन् द्रष्टुं भरतपुंगवं ॥५। पर्वतो नारदो धौम्यो भगवान्वादरायणः
बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ॥६॥ वसिष्ठ इंद्रप्रमदस्त्रितो गृत्समदोऽसितः ॥ कक्षीवान् गौतमोऽत्रि
श्च कौशिकोऽथ सुदर्शनः ॥७॥ ॥ ॥

नृपो युधिष्ठिरो व्यरोचत । यथा गुह्यकैर्यक्षैः कुवेरस्तद्वत् ।३। दिवः स्वर्गाच्च्युतमिमरमि
वस्थितं भूमौ निपतितं भीष्मं दृष्ट्वा सानुगाः सभृत्याः । पांडवाश्चक्रिणा श्रीकृष्णेन सह प्रणेमुः ।४। तत्र भरतपुंगवं भरतवंशश्रेष्ठं भीष्मं द्रष्टुं देव
र्षिप्रभृतयश्चासन्नागत्य स्थितवंतः ।५। तानेव कांश्चिदाह । पर्वत इति द्वाभ्यां रेणुकासुतो भार्गवरामः कौशिको विश्वामित्रः ।६।७॥ ॥

नहुषोऽर्थे तेजो धृतिर्दीर्घायुः दोषोऽपि खलायनं। धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते इत्यादि शास्त्रेर्धर्म्ययुद्धस्य धर्मत्वावबोधनात् तत्राह हता
न प्रतिकिं शोचे मद इत्यत आह। मेति। प्रजाभर्तुः पोषणाधिकृतस्य राज्ञो युद्धे द्विषां वधो धर्मो। इति न पेतः। नेन: नपापं किंतु धर्म एवेति यदनुशास
नात्मकं वचो भगवद्वचः। तन्मम बोधाय विवेकाय न कल्पते विवेकं जनयितुं न समर्थमित्यर्थः। धर्म्ययुद्धस्य धर्मत्वे पितदनुबंधितया महतः प्राप्तस्ये
वप्राप्तत्वादिति भावः। ५०। ननु धर्मोऽर्थयतमानस्याऽवर्जनीयतया प्रसक्तमपि पापं वर्णाश्रमधर्मैरपोहितुं शक्यमेव धर्मेण पापमनुदतीति श्रुतेः। दि
त्यत [illegible] आह। स्त्रीणामिति। मया हता बंधवः पतयो यासां तासां स्त्रीणां योऽसौ द्रोहः पापात्मकः। इहधर्मयुद्धे प्रवृत्ते तेन मम सुस्थितः
नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषां॥ इति मे न तु बोधाय कल्पते शासनं वचः। स्त्रीणां मद्धतबंधूनां द्रोहो योऽसाविहोत्थि
तः। कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुं॥ ५१॥ यथा पंकेन पंकांभः सुरया वा सुराकृतम्। भूतहत्यां तथैवैकां न य
ज्ञैर्मार्ष्टुमर्हति॥ ५२॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे ८ मोऽध्यायः॥ ८॥

तमहं गृहमेधीयैर्गृहस्थाश्रमिणः। कर्तव्यैर्धर्मैर्व्यपोहितुं न कल्प्यः। न प्रभुः। बहुकालानुभाव्यफलो विपुलो द्रोहोऽल्पकालनिवर्त्यैर्गृहमेधीयैः कर्म
भिर्नापोहितुं कल्प्यः। कर्मणा कर्मनिर्हारः अयुक्त इति भावः। ५१। एतदेव सदृष्टांतमुपपादयति। यथेति॥ पंकांगं सपंकमंगं पंकेनेव यथा मार्ष्टुं शोधयि
तुं नार्हति लोकः यथा च सुराकृतं सुराकृतदोषदूषितं भांडं युक्तः सुरयैव मार्ष्टुं नार्हति तथा यज्ञैरेकामपि भूतहत्यां न मार्ष्टुमर्हति। पंकांक इति पाठे पं
कांकमिति द्वितीयांतपाठे पंकस्यांको यस्मिंस्तदंगं पंकेन मार्ष्टुं नार्हतीति तद्वत्। ५२

तावत्स्व पर्यात्तमुद्यत्कोभगवांस्तं पृथामन्याः। स्त्रीश्च वाहमोमि सुपामंत्र्यांगीकारपूर्वकमनुज्ञाप्य प्रेमणा राज्ञा युधिष्ठिरेण च निवारितः गजाह्वयं
हास्तिनपुरमेव पुनः प्राविशत्॥ प्रविश्येति पाठे प्रविश्य तत्रैव कंचित्कालमुवासेति शेषः ॥४५॥ तदा ईश्वरेहाज्ञैरीश्वरचेष्टाभिज्ञैर्व्यासाद्यैरद्भुतक
र्मचेष्टितं यस्य तेन श्रीकृष्णेन भगवता च इतिहासैः॥ प्रतिबोधितोपि धर्मसुतः॥ अतएव शुचार्पितः॥ नाबुध्यत कालस्य गतिरीदृशी तिन विजज्ञे
४६॥ किं तु हे विप्राः। बंधुकुलेन मोहस्योर्वशं प्राप्तः॥ अतएव प्राकृतेन देहेन तदनुबंध्यादिश्च वर्णो नाम मनसा सुहृदां वधमेव चिंतयन्। धर्मसुतो रा

तं वा हमित्युपामंत्र्य प्रविश्य गजसाह्वयं। स्त्रियश्च स्वपुरं यास्यन्प्रेमणा राज्ञा निवारितः॥४५॥ व्यासाद्यैरीश्वरेहाज्ञैः
कृष्णेनाद्भुतकर्मणा॥ प्रबोधितोपीतिहासैर्नाबुध्यत शुचार्पितः॥४६॥ आह राजा धर्मसुतश्चिंतयन्सुहृदां वधं॥
प्राकृतेनात्मना विप्राः स्नेहमोहवशं गतः॥४७॥ अहो मे पश्यताज्ञानं हृदि रूढं दुरात्मनः। पारक्यस्यैव देहस्य बह्व्यो
मेक्षौहिणीर्हताः॥४८॥ बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः॥ न मे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः
॥४९॥

जा युधिष्ठिरश्चाब्रवीत्॥४७॥ तदेवाह यावत्समाभिः॥ अहो दुरात्मनो मम हृदि रूढमज्ञानं पश्यत॥ तदेवोद्दर्शयति। पारक्यस्य श्वशृगालादि
भक्ष्यदेहस्यैव देहसुखार्थमेवमेमया वाक्यैः॥ अक्षौहिणीरक्षौहिण्यः हताः॥४८॥ बालादिद्रुहः बालादिहंतुर्मम वर्षायुतानामयुतैरपि निर
यान्मोक्षो न हि भवेत्॥४९॥

भा० प्र० ८०

तदेवं व्यंजयंती प्रार्थयते त्वयीति । हे मधुपते यादवानामेव माधवा इति नामांतरं । तच्च न वमे स्फुटी भविष्यति । त्वय्यनन्यविषया सकलेभ
दितरान्यविषया मम मतिरसकृद्द्धा उदन्वति समुद्रे गंगाजलौघमिव उद्वहतात् । यथा गंगा समुद्रमप्राप्य न स्वजलौघं वोढुं क्षमा समुद्रं प्राप्यै
व स्वजलौघं वहति । एवं त्वामप्राप्य रंतुमक्षमा मे मतिस्त्वय्येव रतिमुद्वहतामित्यर्थः ॥४२॥ स्वाभिप्रेतज्ञत्वमनुमत्वा वंजलिः परमानुग्रहाभिप्रे
देव प्रसादिनी कृष्णं विधारेवोपायो न ततोऽन्योऽस्तीत्यभिप्रायेण केवलमनितरसाधारणगुणविशिष्टं संबोध्य नमस्करोति । श्रीकृष्णेति । हे
श्रीकृष्ण सर्वलोकसुखकर कृष्णोऽर्जुनस्तस्य सखा कृष्णसखः तत्संबोधनं ॥ वृष्णीनामृषभश्रेष्ठ अवनिद्रुहामवनयुपलक्षितलोकोप

त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत् ॥ रतिमुद्वहतादद्धा गंगेवौघमुदन्वति ॥४२॥ श्रीकृष्ण कृष्णस
खवृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य ॥ गोविंद गोद्विजसुरार्तिहरावतार नारायणाखिलगु
रो भगवन्नमस्ते ॥४३॥ सूत उवाच ॥ पृथयेत्थं कलपदैः परिणूताखिलोदयः ॥ मंदं जहास वैकुंठो मोहयन्निव मा
यया ॥४४॥

द्रवकारिणां राजन्यानां वंशस्य दहन ॥ यथा वेणोर्दहनोऽग्निर्नाशकः । तद्वद्राजन्यकुलनाशकः । अनपवर्गमनंतं वीर्यं यस्य
हे गोविंद गवां द्विजानां सुराणां चार्तिहरो यस्य । योगेश्वर ॥ सूक्ष्मदर्शिन् अखिलगुरो हितोपदेष्टः ॥४३॥ इत्थं कलानि मधुराणि पदानि
वचांसि तैः ॥ पृथया कुंत्या कर्त्र्या परिणुतः परिगीतोऽखिलउदयो महिमा यस्य स वैकुंठः श्रीकृष्णः मायया हासात्मिकयाश्चर्य्या ।
शक्त्या लोकं मोहयन्निव मंदमीषद्धास हसितवान् । मंदमिति क्रियाविशेषणम् ॥४४॥ ॥ ॥ ॥ ८०

सर्वमिदं निर्हेतुकया त्वत्कृपयैव संपन्नं न त्वस्मत्कृतगुणनिरीक्षणेनेत्यभिप्रायेणाह॥ क इति। नामरूपाभ्यामुपलक्षितस्येति शेषः। मद्भु
घ्रसनाता यन्नामरूपाभ्यामुपलक्षितस्य तव दर्शनं हृषीकाणां इंद्रियाणां ईशितुः। कारणाधिपस्य देहे त्वन्नस्य दर्शनमिव यर्हि यदा येषां जा
तं ते पांडवा वयं यदुभिः सह केनकेपि त्वद्दर्शनहेतुना गुणेन युक्ताः। किंतु त्वत्कृपयैवेत्थं जातमिति भावः। तव यं नामरूपाभ्यां क इति वान्वयः
न त्वद्दर्शनात्कृष्णादिनाम्ना तापसादिरूपेण वान्विता इत्यर्थः॥ ३८॥ हे गदाधर धराधरणा इयं भूमिः स्वैः स्वासाधारणैः। लक्षणैश्चिह्नैः। ध्वजव

के वयं नामरूपाभ्यां यदुभिः सह पांडवाः। भवतो दर्शनं यर्हि हृषीकाणामिवेशितुः॥ ३८॥ नेयं शोभिष्यते भूमिर्य
थेदानीं गदाधर। त्वत्पदैरंकिता भाति स्वलक्षणविलक्षितैः॥ ३९॥ इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः। वना
द्रिनद्युदन्वंतो ह्येधंते तव वीक्षितैः॥ ४०॥ अथ विश्वेश विश्वात्मन् विश्वमूर्ते स्वकेषु मे। स्नेहपाशमिमं छिंधि
दृढं पांडुषु वृष्णिषु॥ ४१॥

ज्रांकुशादिरेखारूपैर्विलक्षिता अभिव्यक्ता त्वत्पदैरंकिता सती भाति तथा तत्र बहुमनानंतरं कालेन शोभिष्यते॥ ३९॥ तव वीक्षितैरेवेमे ज
नपदा देशा ऋद्धाः स्वृद्धाः सुसमृद्धाः स्वृद्धत्वमेवाह। सुपक्वौषधयो वीरुधः गुल्मानि येषु। तथा वनानि चाद्रयश्च नद्यश्चोदन्वंतः ललाक
राश्च तद्वंतो हि॥ ४०॥ मदभिप्रायं जानासि वेत्सीत्यभिप्रायेण संबोधयंती त्याह॥ अथेति प्रश्नप्रद्योतकः। हे विश्वेश सर्वांतःकरणनियंतः हे विश्वात्मन्
सर्वांतरात्मन् विश्वशरीरक स्वकेषु पांडवेषु मे मयि विभक्तिव्यत्यय आर्षः। वृष्णिषु यादवेषु चेमं दृढं स्नेह एव पाशः तं छिंधि यद्वा वृष्णिषु पांडवे

षु च त्वत्स्नेहपाशः। त्वयि तु मत्स्नेहपाशः इत्यभिप्रायेणेमं इत्युक्तं॥ ४१॥

भा० प्र० अविद्यादिभिः क्लिश्यमानानां जनानां श्रवणार्हाणि इत्यनेन भगवच्चेष्टितानां क्लेशापहर्तृत्वं सूचितं ॥ तच्च न साक्षात् किंतु संसृतिनिवर्त-
७८ कभगवच्चरणारविंदसाक्षात्कारावहभक्तियोगनिष्पादनद्वारेत्यभिप्रायेण भगवच्चेष्टितश्रवणादिपराणामेव त्वच्चरणांबुजसाक्षात्कारो ना-
न्येषामित्याह ॥ शृण्वंतीति ॥ ये जनास्तव ईहितं चेष्टितं शृण्वंति वक्तृसान्निध्ये ॥ गृणंति अन्योन्यं तत्सांनिध्ये तदुभयासंनिधौ च स्वयं गायंति स्मरंति नं-
दंति च ॥ त एव भवप्रवाहस्य संसारप्रवाहस्योपरमो यस्मात्तत्तावकं त्वदीयं पदांबुजमचिरेण पश्यंति ॥ ३६ ॥ तदेवं संस्तुसाधनान्प्रयाणमुपसं-

शृण्वंति गायंति गृणंत्यभीक्ष्णशः स्मरंति नंदंति तवेहितं जनाः ॥ त एव पश्यंत्यचिरेण तावकं भवप्रवाहो-
परमं पदांबुजं ॥ ३६ ॥ अप्यद्य नस्त्वं स्वकृतेहित प्रभो जिहाससि स्वित्सुहृदोऽनुजीविनः ॥ येषां न चान्यद्भ-
वतः पदांबुजात्परायणं राजसु योजितांहसां ॥ ३७ ॥

हरेति सूचयितुं त्वत्पदांभोजैकशरणानस्मान् हातुं उत्सहसे किमिति काक्वाह ॥ अपीति षड्भिः ॥ स्वकृतेहित स्वार्थे त्वमपीहितः किंप्रवृत्तः किमि-
त्यर्थः । यद्यस्माद्धे प्रभो सुहृदोऽनुजीविनो भृत्यांश्च नोऽस्मानद्धना जिहाससि त्यक्तुमिच्छसि स्विदिति त्यागानर्हत्वं सूचयितुमात्मनो विशि-
नष्टि ॥ येषां भवतः पदांबुजादन्यत्परायणं श्रेयः । प्रापकं प्राप्यं च नास्ति ॥ अत एव राजसु राज्ञां मध्ये जितांहसां जितदुःखानां येषामन्यत्पराय-
णं नास्ति तानस्मानित्यन्वयः ॥ ३७ ॥ ७८

यतो विडंबनमात्रं न तु तात्त्विकमत एव त्वदवतारप्रयोजननिमित्तं चेदमेवेति निश्चेतुमशक्याः सन्तो नानाशतर्कयंतीत्याह । केचिदिति पंचभिः । के
चित्त्वदवतारप्रयोजननिर्णयाय प्रवृत्तानां मध्ये ॥ अजमपि त्वां प्रियस्य भक्तस्य पुण्यश्लोकस्य यदोः कीर्तये तद्वंशे जातमाहुः । यदुवंशकीर्तिजनना
नामतत्र त्वां जातमाहुरित्यर्थः ॥ यथा मलयस्य पर्वतस्य कीर्तये चंदनं जातं तद्वदिति तद्वत् ।३२॥ अपरे तु त्वं साधुलोकस्य क्षेमाय सुरद्विषां वधाय
चाजस्त्वं वसुदेवस्य देवक्यां । ताभ्यां पूर्वजन्मनि ॥ याचितः सन्नभ्यगात् । पुत्रत्वं प्राप्त इत्याहुः । वसुदेवस्येत्यपादानस्य शेषत्वविवक्षया षष्ठी ।

केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये ॥ यदोः प्रियस्यान्ववाये मलयस्येव चंदनं ॥३२॥ अपरे वसुदेव
स्य देवक्यां याचितोभ्यगात् ॥ अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषां ॥३३॥ भारावतारणायान्ये भुवो नाव
इवोदधौ ॥ सीदंत्या भूरिभारेण जातो ह्यात्मभुवार्थितः ॥३४॥ भवेस्मिन् क्लिश्यमानानामविद्याकाम
कर्मभिः ॥ श्रवणस्मरणार्हाणि करिष्यन्निति केचन ॥३५॥

३३ ॥ अन्ये तूदधौ अर्णवे नाव इव भूरिभारेण सीदंत्याः । क्लिश्यंत्या भुवो भारापहाराय आत्मभुवा चतुर्मुखेनार्थितो भगवान् जात इत्याहुः ॥३४॥ के
चनत्वस्मिन् लोके विद्यादिभिः । क्लिश्यमानानां जनानां श्रवणस्मरणाद्यर्हाणि चेष्टितानि करिष्यन् कर्तुं जात इत्याहुरित्यर्थः ॥ अविद्या देहा
त्मभ्रमादेर्निमित्तमज्ञानं ॥ कामस्तु तन्मूलकाः शब्दादिविषयाभिलाषः ॥ कर्माणि तदनुकूलव्यापारात्मकानि ॥३५॥ ॥ ॥ ॥ ॥

भा० प्र० विडंबनत्वमेवानुपपत्त्या द्रढयति । जन्मेति । अजस्य जन्मरहितस्य कर्मायत्तोत्पत्तिरहितस्याकर्तुः प्राचीनकर्मानुरूपग्रहीतबुद्ध्यधीनक-
७८ र्मरहितस्यात्मनः भवंति रात्मनस्तव तिर्यगादिषु जन्म तत्सजातीयं कर्म चेति यत्तदत्यंतविडंबनमेव ॥ अन्यथाऽजस्याकर्तुरात्मनश्च तत्रघरतर-
तिभावः । तत्र तिर्यक्षु वराहादिषु ऋषिषु भार्गवात्रेयकार्दमादीषु नृषु राघवयादवादिषु यादस्सु मत्स्यकूर्मादिषु जलौकःसु विडंबनमात्रम् ।
३० । नन्वेवं घटत इत्यभिप्रायेणाह । गोपीति । तावद्यथा त्वयि कृतमागः अपराधो येन तथाभूते सति गोपी यशोदा दामरज्जुमाददे त्वद्बंधनार्थं य-

जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः ॥ तिर्यङ्नृषिषु यादस्सु तदत्यंतविडंबनं ॥ ३० ॥ गोप्याददे त्वयि कृता-
गसि दाम तावद्या ते दशाश्रुकलिलांजनसंभ्रमाक्षं । वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति
भीरपि यद्बिभेति ॥ ३१ ॥

रिजग्राह । तदाऽश्रुभिः । कलिलं । कलुषितमंजनं ययोस्ते संभ्रमे भयसूचकाटोपयुक्तेऽक्षिणी यस्य तद्वक्त्रं निनीय उन्नीय उन्नम्य । अश्रुकलि-
लेत्यादिक्रियाविशेषणं वा । अश्रुकलांजनसंभ्रमाक्षं यथा तथा वक्त्रं निनीय प्रापय्येत्यर्थः । यस्मात्त्वत्तो भीरपि बिभेति तस्य तव भयभावनया
भयाभिनयेन स्थितस्य या दशा सा मां विमोहयति । अत्र भीशब्देन सर्वं मां भयहेतुर्मृत्युर्लक्ष्यते । भीषास्माद्वातः पवते भीषोदेति सूर्यः । भीषादग्निश्च-
चेंद्रश्च मृत्युर्धावति पंचम इत्युक्तेर्विधस्यासंभावितभयस्य तवेत्यर्थः ॥ तावद्विमोहयति । मूढां करोति । पश्चात्तु नरचेष्टानुकारमात्रमिदमिति ज्ञाप- ७८

त्वदन्यस्य कश्चिदेशाद्यन्यतमः कश्चित्त्वदुक्तविधो नत्वहमित्यत्राह। मन्य इति ईशानं। ब्रह्मादीनपि स्ववशीकुर्वाणं कालं त्वा मन्ये कालशरीरकं त्वाम
न्यस्यार्थः। अत एव कालकृतजन्ममरणादिरहितं। नन्वहमपि प्राकृतवद्वैषम्यादिमानेव ततः कालं विशिनष्टि। सर्वत्र समं चरंतं कालस्य यंत
यद्यप्यात्मा कालाल्लिमिता नानाभूतानां मिथः कलिः कलहो भवति। समं चरंतमित्यनेन कालशरीरकस्य तव वैषम्यनैर्घृण्यादिकमस्तीति सूचि
तं। यन्मिथः कलिरित्यनेनापि तत्तज्जीवकर्मानुसारेण सुखदुःखादीन्प्रति निमित्तमात्रमस्त्वीति सूचितं ॥ २८ ॥ नन्वहमपि कांश्चिदनुगृह्णा
नु कांश्चिन्निगृह्णान्। कथं वैषम्यादिरहितइत्यत आह। नेति हे भगवन् नृणां विडंबमननुकारमीहमानस्य कुर्वाणस्य तव चिकीर्षितं न

मन्ये त्वां कालमीशानमनादिनिधनं विभुम्। समं चरंतं सर्वत्र भूतानां यन्मिथः कलिः ॥ २८ ॥ न वेद कश्चिद्भगवं
श्चिकीर्षितं तवेहमानस्य नृणां विडंबनं। न यस्य कश्चिद्दयितोऽस्ति कर्हिचिद्द्वेष्यश्च यस्मिन्विषमा मतिर्नृ
णाम् ॥ २९ ॥

कोऽपि वेद। कश्चिन्निगृह्णाति इत्थं ततोऽनुग्रहरूपतया फलतीति न वैषम्यादिकमस्ति। पूतनाशकटयमलार्जुनधेनुककेशिकुवलयापीडचाणूरमुष्टि
शलतोशलकंसादिविषयनिग्रहस्यापि तत्तत्तेषां निरतिशयपुरुषार्थरूपमुक्तिहेतुदर्शनादिति भावः। यत एवमत एव त्वयि वैषम्यादिरहिते
तदापाद्यं तं नृणां मतिरेव विषमेत्याह। न यस्येति। कर्हिचिदपि दयितः। प्रियो द्वेष्यश्च नास्ति यस्मिन् नृणां मतिर्विषमा रजस्तमोऽन्वयादयथा
र्था भवति। नृणां विडंबनमीहमानस्येत्यनेन नरैश्चेष्टानुकारमात्रमेव न तु सर्वथा तत्सजातीयचेष्टितं। जन्म कर्म च मे दिव्यमिति भगवतैवोक्तत्वा

[illegible] ॥ २९ ॥

भा० प्र०
७१

यदेतद्विपन्निवारकत्वं तदेतन्नव किं यदर्थादेव तन्निवृत्तेरित्यभिप्रायेणाह विपद इति। हे जगद्गुरो तत्र शश्वत्सदा ता एव या निरसनीयास्त्वाश्रि
तानां विपदः संतु। असतां न तन्निरसनाय यत्नस्त्वया कार्य इति भावः॥ यद्यस्मात्पुनर्भवं दर्शनं भवतो दर्शनं तस्मान्न विद्यते पुनर्भवस्य संसृतेर्दर्श
नं यस्मात्तथाभूतं भवद्दर्शनं यदि स्यात् संभावनायां लिङ्। सकलानर्थमूलसंसृतिपरिहारक्षमं तद्यदि स्यात्। विपदः संतु नाम। अर्थादेव तन्निवृत्ते
रिति भावः॥२५॥ नन्वहमीश्वरस्त्वेतर्हि त्वमिव सर्वेपि मामेवं विधं किं न वदंतीत्यत आह। जन्मेति ऐश्वर्यं श्रेष्ठधनपरः श्रुतं शास्त्रविद्यापरः जन्मैश्व
र्यश्रुतानां सत्कुलप्रसवधनविद्यानां श्रीभिः समृद्धिभिरेधमानः मदो यस्य स पुमां त्वाममभिधातुं न वार्हति। त्रिमदोन्मत्तत्वेन स्वयाथात्म्यविवे

विपदः संतु मे शश्वत्तत्र तत्र जगद्गुरो। भवतो दर्शनं यत्स्यादपुनर्भवदर्शनं॥२५॥ जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः
पुमान्। नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरं॥२६॥ नमोकिंचनवित्ताय निवृत्तगुणवृत्तये। आत्मारामाय शांता
य कैवल्यपतये नमः॥२७॥

कामाभावादिति भावः। अनर्हतामेव सूचयितुं विशिनष्टि। अकिंचनगोचरं। नास्ति किंचन येषां तेऽकिंचना निःकामास्तेषां गोचरम्॥२६॥ अनन्यैश्च वि
द्व्यावर्तकैरीश्वरासाधारणधर्मैर्विशिंषन्निति नमस्करोति। नम इति॥ अकिंचनानां वित्ताय विल्लृ लाभे इति धातुः विद्यते लभ्यत इति वित्तः तस्मै
निवृत्ता गुणानां रजआदीनां वृत्तयः कामक्रोधादयो यस्य तस्मै॥ अनेनाविद्यावृत्तिः। शांताय ऊर्मिषट्करहिताय॥ अशनापिपासाशोकमोह
जरामृत्यवः षडूर्मयः॥ अनेन बद्धजीवव्यावृत्तिः॥ तत्र हेतुरात्मारामाय। स्वानुभवैकपराय॥ कैवल्यं प्रकृतिसंबंधराहित्यं मोक्ष इति यावत्
तस्यापतिस्तस्मै मोक्षप्रदायानेन मुक्तनित्यजीवव्यावृत्तिः॥२७॥ ७१

नचैवानारदशायामयोगपरिशुद्धमनोभिरपि सर्वैर्दृश्यमानस्य भगवतः कथमलक्ष्यमव्याधोक्षजं नलक्ष्यसे मूढदृशा लुप्तं। न मांसचक्षुरभिवीक्षते तं
तवेत्तुबा पशुपतिके। अथैनेनमित्यादिभिः श्रुतेश्चादृश्यत्वमितिचेन्न। सर्वैर्दैवमनुष्यादिसजातीये न दृश्यमानत्वेपि तदखिललक्षणेनादृश्यत्वादखिललक्षण
दर्शनमेवालक्ष्यमित्यादिभिः प्रतिपाद्यते। न दृष्टो तेनापि तदेवात्रं तत्त्वमजानंस्याऽपि कथं पश्येम हि स्त्रियइत्युक्ति लौकपरिपाट्यभिप्रायिका। य
तत्त्वं साक्षात्त्वं कृतेः परः। परमपुरुषईश्वरस्त्वत एवस्यावतारदशायामपि स्वस्वभावमजत्त्वासाधारणानुधर्मानुदर्शयसीत्यभिप्रायेणाह। यथेति। हे
हृषीकेश खलेन दुरात्मना कंसेन चिरं शुचा शोकेनार्पिता निधापिता शोकं प्रापितेतियावत्॥ याच देवकी यथा विमोचिता तथाहमपि सपुत्राहे वि

यथा हृषीकेश खलेन देवकी कंसेन रुद्धाति चिरं शुचार्पिता॥ विमोचिताहं च सहात्मजा विभो त्वयैव नाथे
न मुहुर्विपद्गणात्॥ २३॥ विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः॥ मृधे मृधेऽनेकमहार
थास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः॥ २४॥

भो सर्वशक्ते त्वयैव नाथेन विपद्गणान्मुहुर्मुहुर्विमोचिता॥ किं किमेतस्यनेत्यादि विमोचितैवेत्यर्थः। अनेन स्वार्थनिरपेक्षपरदुःखनिराचिकीर्षा हृ
द्यं कृपालुत्वं॥ आश्रितानिष्टपरिहर्तृत्वं निष्ठत्वं तानादरेणाश्रितमात्रपक्षपातित्वं च प्रदर्शितमिति फलितं॥ २३॥ कोसौ विपद्गणः यस्मात्त्वं विमो
चितेत्यत्राह॥ विषादिति। महाग्नेर्लाक्षागृहाग्नेः। पुरुषादानां राक्षसानां दर्शनाद्भयात्॥ वनवासकृच्छ्रतः। वनवासक्लेशात्। मृधे मृधे प्रतियुद्धं महार
थानामस्त्रेभ्यः॥ द्रौणेरस्त्रतः॥ ब्रह्मास्त्राद्धे हरे रक्षितास्म॥ अयं भावः। विषादिभ्यो रक्षणमकरोत्। महाभारतादवगंतव्यः विस्तरभयान्नात्र लिख्यते २८

अथपरिशुद्धमनोग्राह्यत्ववदंती योगानधिकारिण्योऽपरिशुद्धमनसः ।स्त्रियो वयं कथं जानीमइत्याह । तथेति । तथातथा हीत्यर्थः । मुनीनां स
दात्मस्वरूपमननशीलानाममलात्मनां विशुद्धमनसां परमहंसानां भक्तियोगविधानार्थं ॥ अर्थशब्दोत्र विषयभूतपदार्थवाची ॥ भक्तियोग
प्रपंचस्यार्थे विषयभूतं भक्तियोगदृश्यं त्वां स्त्रियो वयं कथं पश्येम हि जानीमहि । तर्हि किं जानासीत्यपेक्षायां नटं नाट्यधरं नाट्योपयुक्तनाम

तथा परमहंसानां मुनीनाममलात्मनां ॥ भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः ॥२०॥ कृष्णा
यवासुदेवायदेवकीनंदनायच ॥ नंदगोपकुमारायगोविंदायनमोनमः ॥२१॥ नमः पंकजनाभा
यनमः पंकजमालिने ॥ नमः पंकजनेत्रायनमस्ते पंकजांघ्रये ॥२२॥

रूपादिविशिष्टतयैव जानते न तु तत्त्वतोऽयमेतत्प्रातिनामरूपगुणक इति तदस्मिन्नवतारे यानि कृष्ण वासुदेव देवकीनंदनानि नामानि यच्च
पंकजनाभाद्यवयवोपेतं तान्येव सर्वेषामवतारसमानानि केवलं जानीमइत्यभिप्रायेणउक्तनामरूपविशिष्टं नमस्करोमीति । कृष्णायेतिश्लो

कृष्णायवासुदेवायेति ॥२०॥२१॥२२॥

तत्र हेतुः मायाजवनिकाछन्नं मायैव जवनिका नेपथ्यं तद्वत्तिरोधायकत्वात् । तया जीवाज्ञानरूपया हेतुभूतया छन्नं तिरोहितं इंद्रियाविष
यमिति यावत् ॥ किं सर्वेषामप्यतींद्रियं नेत्याह ॥ अधोक्षजेति ॥ अक्षजा इंद्रियवृत्तय । अधोऽधःकृता यस्मात्सोऽधोक्षजः इंद्रियवृत्त्यविषय ॥ अज्ञानाम
नुपासकानामधोक्षजम् अज्ञाधोक्षजं तत्र हेतुरव्ययमिति ॥ न व्येति विविधं विकारं गच्छतीत्यव्ययं विविधविकाराभावाज्ञानविषयत्वव्ययत्वाद
ज्ञाधोक्षजेत्यर्थः ॥ अनेनैतत्सूच्यते । योगविशुद्धमनसा तु ग्राह्य इति ॥ तथा च श्रूयते । न चक्षुषा पश्यति कश्चनैनं । न मांसचक्षुरभिवीक्षते न दृश्य

मायाजवनिकाछन्नमज्ञाधोक्षजमव्ययम् । न लक्ष्यसे मूढदृशा नटो नाट्यध
रो यथा ॥१९॥

तत्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ हृदा मनीषया मनसाभिक्लृप्ता य एनं विदुरित्यादि । तदेवाह ॥ न लक्ष्यसे मूढदृशेति । योगपरिशुद्धधिया
न लक्ष्यसे न दृश्यसे ॥ ननु सर्वैरपि दृश्य एवाहं इत्यत्राह ॥ नटो नाट्यधरो नटो यथा दृश्यते । तथा दृश्यस इत्यर्थः ॥ यद्वा मूढदृशा नटयाथात्म्यमजान
तां पुंसा नाट्यधरो नटो यथा न लक्ष्यते ॥ अयमेवंविधेति न ज्ञायते ॥ किंतु । नाट्योपयुक्तवेषविशिष्टतयैव दृश्यते तद्वत् ॥ अनेनाज्ञाधोक्षजेत्य
नेन च योगपरिशुद्धमनोग्राह्योऽपरिशुद्धमनसा त्वग्राह्य इति ॥ तत्र न लक्ष्यसे इत्यनेनाग्राह्यत्वमुपपादितम् ॥१९॥ ॥ ॥ ॥ ॥

भा० प्र०
७५

तदेवाह । नमस्यइति ष[illegible]डिंशत्या । प्रयाणाभिमुखं कृष्णमवलोक्य तद्विश्लेषमसहमाना तं तत्तो निवर्तयितुं लौकिकी कोपि कश्चिज्जनोदन्यः पु
मानाश्रितान्नहातुमुत्सहते । परमकारणस्य सर्वांतरात्मनोऽचिंत्यविविधविचित्रशक्तेः स्वेच्छोपात्तप्राकृतनाश्चर्यदिव्यतनोराश्रितवात्सल्यं जलधे
राश्रितार्तिहरस्य निरतिशयसुखरस्य योगपरिशुद्धमनसैवगोचरस्याविज्ञातचिकीर्षितस्य सशरीरकस्य सर्वसुहृदोऽचिंत्यविविधविचित्रचेष्टि
तस्याविनत्कृताऽवतारस्य तव पदांबुजमंतरेण नोस्माकं शरणमस्त्यतः कथमनन्यात्मनोस्मान् विहाय गंतुमुद्युक्तसे इति विज्ञापयति । तत्र तावच्छो
किकरुणकवैनान्यज्ञापनायानि तत्साधारणैर्धर्मैर्विशिष्टं नमस्करोति ॥ नमस्येति । आद्यं जगत्कारणं प्रकृतेः परं पुरुषमीश्वरं त्वां नमस्करोमि
नमस्कारेण पूजयामीत्यर्थः ॥ नमः शब्दश्चैवेरकलहास्त्रकएवमेघेप्यकरणेऽस्यतः । करणेऽस्यनुवर्तमाने शमोपरिवश्चिवजः । क्रमितिकरो

कुंत्युवाच ॥ नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परं । अलक्ष्यं सर्वभूतानामंतर्बहिरवस्थितं ॥ १८ ॥

त्यर्थे क्यच्यार्षत्वादात्मनेपदम् ॥ सांख्याभिमतपुरुषव्यावृत्त्यर्थमीश्वरमित्युक्तं ॥ सापेक्षमीश्वरत्वं ब्रह्मादिसाधारणमिति तद्व्यावृत्त्यर्थं सर्वभूता
नामंतर्बहिश्चावस्थितमित्युक्तं ॥ अनेन यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा । अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितेति श्रुतिरूपबृंहि
ता भवति ॥ अनेन देवतावैशेष्यत्वं च फलितं । सर्वभूतानां ब्रह्मादिस्थावरांतानामंतर्बहिश्च व्याप्य नियंतृतयावस्थितमित्यर्थः ॥ प्रकृतेः प
रत्वे हेतुरलक्ष्येति प्रकृतिवन्न लक्ष्यते न दृश्यते त्वलक्ष्यं । यद्वांतर्बहिश्चावस्थितमप्यलक्ष्यमदृश्यम् ॥ १८ ॥ ॥ ॥ ॥ ॥

सर्व

७५

तत्रन विस्मयः कार्य इत्याह। मेति। सर्वेभ्यो प्याश्चर्येभ्या श्चर्यमये अश्चर्यशक्तिप्रचुरे सुदर्शनेनएवाप्रतिक्रियं ब्रह्मास्त्रं सुदर्शनमेवाः च्युते स्वाश्रिता
स्त्रभूषणगुणविभूत्यादीन्न च्यावयति न विहन्तान् करोतीत्यच्युतः। तथाभूते भगवत्येतत्सुदर्शनेन ब्रह्मास्त्रं निरस्तमित्येतदाश्चर्यं मामंस्था नमन्य
स्व। सर्वाश्चर्यमयत्वमेव व्यंजयितुं विशिनष्टि। यो भगवानच्युतः। अजः। स्वयं कर्माधीनत्यादिषड्भावविकाररहितः। इदं चिदात्मकं कृत्स्नं जगत्

मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते। य इदं मायया देव्या सृजत्यवति हंत्यजः॥२६॥
ब्रह्मतेजोविनिर्मुक्तैरात्मजैः सह कृष्णया। प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती॥२७॥

मायया देव्या देवस्य स्वस्य संबंधिन्या मायया आश्चर्यशक्त्या सृजत्यवति हंति च। कृत्स्नजगत्सृष्टिस्थितिलयलीलस्याक्रियदेतत्सुदर्शन निरस्त
ब्रह्मास्त्रमिति च अतो नाश्चर्यं कार्यमित्यर्थः॥२६॥ ततो ब्रह्मतेजसा ब्रह्मास्त्रेण विनिर्मुक्तैरात्मजैर्युधिष्ठिरादिभिः। कृष्णया द्रौपद्या च सह सती
पृथा कुंती प्रयाणाभिमुखं कृष्णमिदं वक्ष्यमाणमाह॥२७॥

यथा भगवानेवमबुध्यः। तर्हि तथैव हे भृगुश्रेष्ठ शौनक पांडवा अपि आत्मनोभिमुखमागच्छतः दीप्तान्पंचसायकान् आलक्ष्यास्त्राणि
उपाददुः। जगृहुः॥१२॥ तदाऽनन्यविषय आत्मा मनो येषां तेषामत्रचरास्त्रकाणां पांडवानां तद्व्यसनं दुःखमवलोक्य विभुः कृष्णः। स्वासाधारणे
न सुदर्शनेनास्त्रेण स्वानां पांडवानां रक्षां व्यधात् अकरोत्॥ सुदर्शनेन तान्सायकान्निरस्य पांडवान्ररक्षेत्यर्थः॥१३॥ ततः सर्वांतरात्मतयावस्थितः
आत्मानः प्रविश्य धारकश्च भगवान् तत एव योगेश्वरः निरतिशयसत्सामर्थ्यदर्शी उत्तरागर्भप्रविष्टपांडवास्त्रदर्शीत्यर्थः। हरिः कृष्णः कुरुतंतवे कुरु

तर्ह्येवथमुनिश्रेष्ठ पांडवाः पंचसायकान्॥ आत्मनोभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाददुः॥१२॥ व्यसनं वीक्ष्य तत्
तेषामनन्यविषयात्मनां॥ सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः॥१३॥ अंतःस्थः सर्वभूतानामात्मा योगे
श्वरो हरिः। स्वमायया वृणोद्गर्भं वैराट्याः कुरुतंतवे॥१४॥ यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियं॥ वैष्णवं ते
ज आसाद्य समशाम्यद्भृगूद्वह १५

वंशविस्तारार्थं वैराट्या विराटपुत्र्या उत्तराया गर्भं स्वमायया आत्मनैवावृणोत् वैराट्या उदरं स्वयं प्रविश्य तद्गर्भो यथा ब्रह्मास्त्रेण न हन्येत तथा वृणोद्गर्भमासा
द्यदर्शनेनास्त्रं चिच्छेदेत्यर्थः॥१४॥ कथं न प्रतिमहत् ब्रह्मास्त्रं सुदर्शनेनापि निरस्तं इति शौनकाभिप्रेतं चोद्यमनूद्य नु प्रतिवक्ति। यद्यपीति ब्रह्म
शिरो नामास्त्रमप्रतिक्रियं केनाप्यनिवार्यं अतएवामोघमप्रतिहतं तथापि हे भृगूद्वह वैष्णवं विष्णोः संबंधि तेजः तेजोरूपं सुदर्शनमा
साद्य शममगात्॥ सुदर्शनेन एवाप्रतिक्रियं ब्रह्मास्त्रं सुदर्शनमेव सर्वाप्रतिक्रियमिति भावः॥१५॥ ॥ ॥ ॥

ततः पांडुसुतानत्वच शाशरदन्याश्च आमंत्र्याप्रच्छ्य शैनेयः शिनेर्नप्ता सात्यकिः शैनेयो ह्युद्धवाभ्यां सात्यकिउद्धवाभ्यां सहितः आत्मना पूजितैः द्वै
पायनआदिभिर्मुख्यायेषां तैर्विप्रैः प्रतिपूजितः द्वारकां प्रतिगंतुंकृतमतिर्निश्चितामतिर्हैव्रजन्नू रथमास्थितः अधिष्ठितः ।७। तदा ऽभिधा
वंती भयेन विह्वलां उत्तरामभिमन्युपत्नीं इत्थं विज्ञापयंतीमिति शेषः उपलेभे पश्यतिस्म दर्शत्यर्थः । यद्वा अभिधावंती विज्ञापनपूर्वकमभ
नुवर्तमानां उपलेभे इत्यन्वयः ।८। विज्ञापनमेवाह । पाहीतिद्वाभ्यां । हे देवानामधिदेव । हे जगत्पते निखिलजगत्त्रातः ॥ हे महायोगिन्
आमंत्र्य पांडुपुत्रांश्च शैनेयोद्धवसंयुतः ॥ द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः ।७। गंतुं कृतमतिर्ब्रह्मन्द्वारकां
रथमास्थितः । उपलेभेऽभिधावंतीमुत्तरां भयविह्वलाम् ।८। उत्तरोवाच ॥ पाहि पाहि महायोगिन्देवदेव जगत्पते ना
न्यं त्वदभयं पश्ये यत्र मृत्युः परस्परं ।९। अभिद्रवति मामीश शरस्तप्तायसो विभो कामं दहतु मां नाथ मा मे गर्भो नि
पात्यताम् ।१०। सूत उवाच उपधार्य वचस्तस्या भगवान्भक्तवत्सलः । अपांडवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ॥११॥ ॥
मृत्युरस्त्ये स्यादर्शनत्वात् पाहि पाहि । न विद्यते भयं यस्मात्तथाभूतं त्वत्तोऽन्यं न पश्ये । अदर्शनहेतुं वदन्सन्यान् विशिनष्टि यत्र त्वद्व्यतिरिक्ते सुप
रस्परं मृत्युर्मृत्युः परस्मात् इत्यर्थः ॥ न हि त्वदन्यं मृत्योस्त्रातुं प्रभुरिति भावः ।९। न किं तव भयमुपस्थितं यस्मात्त्वं मया रक्षणीयेत्यत्राह । अभिद्रवतीति
हे ईश हे विभो तप्तश्चासावायसश्च सोऽयशो विकारः शरः मम अभिद्रवति मुखमागच्छति हे नाथ स शरो मां कामं यथेच्छं दहतु मम गर्भश्च यथा मा निपात्ये
त तथा अनुग्रहाणेत्यर्थः ।१०। तस्या उत्तराया वचोऽवधार्य ज्ञात्वा एष भक्तवत्सलो भगवानबुध्यत अध्यवस्यत् । किमिति अपांडवं पांडवाभावं कर्तुमिदं

तत्र गंगातीरे आसीनमुपविष्टं सहानुजं कुरूणां पतिं धृतराष्ट्रं । पुत्रशोकार्त्तामिति गांधारीकृष्णयोर्विशेषणं । तत्र गांधारी धृतराष्ट्रभार्य्या पृथा
कुंती कृष्णा द्रौपदी माधवः ॥ कृष्णः । सांत्वयामासेत्युत्तरेणान्वयः ॥ सहानुजमित्यत्रानुजशब्दः । पांडुसुतधर्मराजादीनां उपलक्षकः । तेषाम
प्यशोकार्त्तत्वेन सांत्वनीयत्वात् न तु विदुरपरः । तस्य पूर्वमेव धृतराष्ट्रेण निर्यापितत्वात् तीर्थयात्रानंतरमागमिनस्तदावस्थानासंभवात्
एतच्चास्मिन् तृतीये स्कंधे स्फुटीभविष्यति ॥ ३ ॥ हता बंधवो येषां तान् तत एव शुचा शोकेनार्पितान् अर्दितान् धृतराष्ट्रादीन् बंधून् भूतेषु लोकेषु

तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजं । गांधारीं पुत्रशोकार्त्तां पृथां कृष्णां च माधवः ॥ ३ ॥ सांत्वयामास मु
निभिर्हतबंधून् शुचार्पितान् । भूतेषु कालस्य गतिं दर्शयन्न प्रतिक्रियां ॥ ४ ॥ साधयित्वाजातशत्रोः स्वं राज्यं
कितवैर्हृतं । घातयित्वासतो राज्ञः कचस्पर्शहतायुषः ॥ ५ ॥ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः ।
तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ॥ ६ ॥

न विद्यते प्रतिक्रिया प्रत्युपायो यस्यास्तां कालस्य गतिं जन्ममरणाद्यापादनरूपां दर्शयन् मुनिभिः सह सांत्वयामास । माधव कर्तृपदे स्यनुषंगयो
जनीयः । एवमुत्तरत्रापि ज्ञेयं ॥ ४ ॥ कितवैः रत्नद्यूताद्युपायेन वंचकैः दुर्योधनादिभिर्हृतमजातशत्रोर्युधिष्ठिरस्य स्वं राज्यं साधयित्वा राज्ञो
पद्याः कचस्पर्शेन केशापाशाग्रहणेनैव हतं क्षीणमायुर्येषां तान् असतो दुष्टान् दुःशासनादीन् घातयित्वा अर्जुनादिभिरिति शेषः ॥ ५ ॥ उत्तम
कल्पकैर्मुख्यकल्पैरन्यूनमंत्रदक्षिणैः । त्रिभिरश्वमेधैः युधिष्ठिरं याजयित्वा पावनं पवित्रं तस्य युधिष्ठिरस्य यशः शतमन्योः शक्रस्य यश

इवव्यतनोद्विस्तारयामास ॥ ६ ॥

तन्वेवमपि स्वश्रतिस्मृतं भीमगादितं चन कृतमेवेत्याह शंकमानं शौनकं प्रत्याह सूतः । वपनमिति । वपनं मुंडनं द्रविणादानं । धनापहरणं
स्थानान्निर्यापणं चेत्येष एव हि ब्रह्मबंधूनां वधः । अन्यो दैहिकः । शिरः पाण्यादिच्छेदरूपः । नास्तिहि । तत्रैतत्त्रयमपि कृतमेवेतिनैव वधो
पि कृतस्याय एवेति भावः ।५७। ततः सर्वे पांडवा युधिष्ठिरादयः । कृष्णया द्रौपद्या सह शोकपीडिताः संतो मृतानां स्वानां पुत्रबंधूनां यत्कृत्यं

वपनं द्रविणादानं स्थानान्निर्यापणं तथा ॥ एष हि ब्रह्मबंधूनां वधो नान्योस्ति दैहिकः ॥५७॥ पुत्र
शोकातुराः सर्वे पांडवाः सह कृष्णया स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं ।५८॥ इति श्रीभाग
वते महापुराणे प्रथमस्कंधे सप्तमोध्यायः ॥७॥ सूत उवाच ॥ अथ ते संपरेतानां स्वानामुदकमिछतां
दातुं सकृष्णा गंगायां पुरस्कृत्य ययुः स्त्रियः ॥१॥ ते निनीयोदकं सर्वे विलप्य च भृशं पुनः । आप्लुता
हरिपादाब्जरजः पूतसरिज्जले ।२॥

तेषां निर्हरणादिकं तच्चक्रुः ।५८। इति प्रथमे सप्तमः ।७। अथ ते पांडवाः संपरेतानां स्वानां उदकं तिलोदकं एतच्छूद्रादीनामप्युपलक्षणं इच्छतां
प्रेतरूपेण कामयमानानां दातुं उदकं दातुं स्त्रियः द्रौपद्यादिस्त्रीः पुरस्कृत्य कृष्णेन सहिता गंगां ययुः ।१। तत्र ते सर्वे पांडवादयो भृशं पुनः वि
लप्य संपरेतानामुदकं निनीय प्रदाय हरेः कृष्णस्य पादाब्जयो रजसा पूते नसरितः गंगाया जले आप्लुताः स्नाताः विशुद्धा बभूवुरित्यर्थः ।२

रादेवकृतिप्रकृष्टविलक्षणं परमात्मस्वरूपमुद्दिश्य तदुपासनया तत्साक्षात्कारात् यावन्न ज्ञानपर्यंतं संसारो न निवर्तत इत्याह नेति हे नरेंद्र रहूगण तनुभृद्देही वयुनोद
येन ज्ञानोदयेन यावदेतां मायामहंममाभिमानरूपां विधूय निरस्य विमुक्तसंगो देहगेहादिषु येन जिताः षट्सपत्नाः ॥ षड्वर्गो मनसा सह षडिंद्रियरूपाः येन तथाभूतः
सन्नात्मनः परमात्मनः तत्त्वं याथात्म्यं वेद तावदिह संसारे भ्रमति ॥१६॥ कदायं तनुभृदात्मतत्त्वं वेद इत्यत आह नेति यदि जनस्य संसारतापापादनमाध्यात्मिकादीनां
भावपनं तत्त्वमात्मनो जीवस्य लिंगं पूर्वोक्ताकारत्वात् संसृतिमत्त्वोः कारणं मनो यावच्छोकादिकं ममतां च न विधत्ते तदा वेद ॥ यद्वा ॥ यावच्छोकादिकं विधत्ते
तावन्न वेदेत्यन्वयः तत्र मोहः प्रमादः आमयो रोगः वैरानुबंधः वैरपूर्वकानुस्मरणं शोकादीनां समाहारद्वंद्वः यद्वा शोकादिरूपमनुबंधमनुबध्नंते इष्टतः
न यावदेतां तनुभृन्नरेंद्र विधूय मायां वयुनोदयेन ॥ विमुक्तसंगो जितषट्सपत्नो वेदात्मतत्त्वं भ्रमतीह तावत् ॥१६॥ न यावदेतन्मन
आत्मलिंगं संसारतापावपनं जनस्य यच्छोकमोहामयरागलोभवैरानुबंधं ममतां विधत्ते ॥ भ्रातृव्यमेनं तददभ्रवीर्यमुपे १०
क्षयाध्येधितमप्रमत्तः ॥ गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोषं ॥१८॥ इति श्रीभागवते महापुराणे पंचम
स्कंधे एकादशोऽध्यायः ॥११॥ श्रीशुक उवाच ॥

एवं ध्यतेऽस्यानुबंधः अप्रमत्तो मननंतांतत्स्वभावेन शोकादिकं च यावन्न विधत्ते इत्यर्थः कदेदं मनः शोक ।
द्यविधायकमिति चेद्यदा गुणानुरक्तं कदा गुणानुपरक्तं इति चेत्तदाह रजोहीनसत्त्वगुणहिंसिस्याद्युक्तसात्त्विकाहारसत्क्रियादिभिः सत्त्वप्रवृद्धमित्यन्वदेतत् ॥१७
तस्मादेवं मनःकारणं रूपं भ्रातृव्यं समहज्ज शत्रुं उपेक्षया निमित्तं हेयागात्यंतमेधितं संवृद्धं ॥ अतएवादभ्रमनल्पं वीर्यं संसारप्रदत्वरूपं यस्य ॥ अनादरमवज्ञाकं त
वाद्विषकाशं तत्र हेतुः आत्ममोषमात्मापहारिणं तं अप्रमत्तः अनन्यः गुरोर्हरेरीकरेव हरिस्तस्य चरणोपासनमेवास्त्रं यस्य तथाभूतः सन् जहि घा
तयः सदा चार्थे एवार्थे वा इति प्रमाणात्सर्वपी कुर्वित्यर्थः ॥१८॥ इति श्री पंचमे ११ कारणे परमात्मस्वरूपे चोपदिष्टे देहात्मनोरन्यभेदं जिज्ञासुः प्रणत्यात
इत्याभिलंबनेन च तं प्रसादयन् स्तौति रहूगणः नमो नम इति चतुर्भिः कारणविग्रहाय कारणस्य परमात्मनो विग्रहाय शरीरभृताय ॥ यद्वा ॥ महापुरुषालो

जी.पं.
७६

करणतया कारणतो नर्विग्रहो देहो यस्य तस्मै आचार्यदेवो भव देवमिवाचार्यमुपासीतः॥ आचार्यं मां विजानीयादिति शास्त्रानुसंधानकृतेनेश्वरभावेनैवमुक्तं स्वरू
पानुसंधानेन तु छीकृतो निरस्तो विग्रहो विरोधः कृतापराधेष्वपि नाहशोध्यस्य अवधूतः सर्वैः परिभाव्यः वेषः द्विजबंधोर्लिंगेन वेषेण निगूढो नित्यानुभवः
नित्यस्वपरमात्मनोऽनुभवः ततो वधूतनामेत्येनकर्मधारयः एवंभूताय तुभ्यं नमः॥१॥ ज्वररूप आमयो रोगः तेनार्तस्य पीडितस्य यथा सद्विगुडमादमोघवंघष
वाभिदाघेन यो भ्रमः तापेन तप्तस्य हिमांभः पादुशनिवर्तकं च॥ तथाहं व्रसनकुत्सितो यो देहः तस्मिन्नात्माभिमानः स एवाहिः सर्पः तेन विशेषेण दष्टा दष्ट
स्य विवेकेन गारुडस्य तस्य ममतेत्यवचनं अमृततुल्यमोषधं॥२॥ तस्मादेवं तत्प्रतिमम शंसयार्थं शंसयनिवस्यर्थं॥ अर्थशास्त्रोक्तनि इति वाची॥ मणक

नमो नमः कारणविग्रहाय स्वरूपतुच्छीकृतविग्रहाय॥ नमोऽवधूतद्विजबंधुलिंगनिगूढनित्यानुभवाय तुभ्यं॥१॥ ज्वरा
मयार्तस्य यथागदं सन्निदाघदग्धस्य यथा हिमांभः॥ कुदेहमानाहिविदष्टदृष्टेः ब्रह्मन्वचस्तेऽमृतमौषधं मे॥२॥ तस्मा
द्भवंतं मम शंसयार्थं प्रस्त्वामिपृच्छाम्यधुना सुबोधं॥ अध्यात्मयोगग्रथितं तवोक्तमाख्याहि कौतूहलचेतसो मे॥३॥ य
दाह योगेश्वर दृश्यमानं क्रियाफलं सद्व्यवहारमूलं॥ न ह्यंजसा तत्त्वविमर्शनाय भवानमुष्मिन्भ्रमते मनो मे॥ ४

र्यौ हृष्यतीति वत्॥ पृच्छामि त्वमिदानीमेव तवयाप्युक्तं तदध्यात्मयोगेन ग्रथितं तदुर्बोधं सुबोधं यथा तथा कौतूहलचेतसः॥ कौतूहलग्रस्तबु
क्तमपरः॥ कौतूहलयुक्तं चेतो यस्य तस्य मे मह्यमाख्याहि कथय॥३॥ तत्र दुर्बोधमर्थमनुवदति॥ यदाहेति॥ हे योगेश्वर भावान्स्वस्य साक्षिभिर्दृश्यमा
नं यत्क्रियाफलं स्वर्गमनं क्रियाफलं स्वेदपमादिकं॥ सद्व्यवहारमूलमबाधितव्यवहारहेतुकं तद्रूपं शिष्यांतो सात्यबाधितव्यवहारस्य मूलं न हि म
वतामियकावानाहतत्त्वमेमनः॥ अंजसा सुखेन तत्त्वविमर्शनाय भ्रमते न्वामस्ये क्षिप्यति॥४॥ भ्रमति तत्र क्रियाफलस्य बाधितव्यवहारमूलत्वं
भवतु हि शिष्यो सत्यकाल्पयोर्द्विव्यवहारस्य स्वरूपेणामत्वमुक्तं देहविषयस्य तस्याबाधितत्वात् किं त्वात्मनियद्भवता परिश्यांतो सिनातिपीवापरास्ताधि

राम:
७६

गोत्रानपातिरितिव्यवहृतंतदाधितमिथ्यात्वे ॥ नचमदीयोपिव्यवहारःशरीरविषयएवेतिचाधितत्वमहंत्वयाद्वयोरात्मविषयत्वादभिमुखीकर्त्तव्यात्तत्रां
धिनिषधस्यवत्तानिवचेतनेरावर्ततयोर्व्हते अचेतनविशिष्टानिमुखाश्चिचेतनविषयत्वेपिविशेष्यास्थौल्यादेर्बाधितत्वादितिवहेहात्मनोरत्यंतभेदमाहद्वा
भ्याम्रति ॥ अयमिति ॥ हे पार्थिवः यः पार्थिवः पृथिव्याविकारसएवकस्यहेतोः कस्माच्चित्कारणात्पृथिव्यांचलन्नयंभारवाहादिजनोनामयसिद्धया
म्मानचलतिमपाषाणादिरित्येतावानेवभेदः कस्यहेतोरित्यनेनकश्चिज्जीवस्यकर्मणएवशेषएवतच्छरीरस्यचराचरत्वयोरित्यभिप्रेतस्यापिपृथिवीवि
कारस्यापि अस्योः पादयोः उपर्युपरिगुल्फादयः उरस्सलोपश्चार्धः शिरोधराग्रीवा अंसौस्कंधौ ॥५॥ अंसेचदारुमयीशिबिकात्तस्याचसौवीरराजंरमे
वृत्तः ॥ वा ॥ अयंजनोनामचलन्पृथिव्यांयःपार्थिवःपार्थिवकस्यहेतोः ॥ तस्यापिचांघ्र्योरथिगुल्फजंघाजा
नूरुमध्योरशिरोधरांसाः ॥५॥ अंसेधिदार्वीशिबिकाचयस्यांसौवीरराजेत्यपदेशमास्ते ॥ यस्मिन्नन्यवान्नृरूढनि
जाभिमानोराजास्मिसिंधकवितितुर्मेदाधः ॥६॥ शोच्यानिमांत्वमधिकष्टदीनान्विष्टानिगृह्णन्निरनुग्रहोसि ॥ जन
स्यगोत्रास्मिविकत्थमानोनवरोमसेवहमनास्मुद्रष्टः ॥७॥ यदास्तितावेवचराचरस्याविदामनिष्टाप्रभवंचनित्यं ॥ तन्न
मतोन्यद्यवहारस्त्वलंनिरूप्यतांसतत्किमयावमेयं ॥८॥ त्यपदेशः अपदिश्यतइत्यपदेशाव्यवहर्त्तव्यआस्तेसौवीरराजेतिव्यपदेशोव्यव
हारोयस्यस्यांसपिंडआस्तेइतिवासौवीरराजव्यपदेशोभवान्स्वरूपतःस्वभावतश्चततोत्यंतविलक्षणोपिभवान्निरूढतादात्म्याभिमानसिंधुश्च
देशोश्चराजास्मीतिदुर्मदेनांधः सन् अनेनात्मनिराजत्वबुद्धिभ्रांतिरित्युक्तं ॥६॥ अतस्त्वंतेकष्टेनवहनादिजनितदुःखेनदीनानःतएवशोच्यानिमान्
विष्टान्स्वान्निगृह्णन्निरनुग्रहःनिष्ठुरोवर्तसे ॥ अनेनात्मनिराजत्वबुद्धिप्रयुक्तनिग्रहादिकर्तृत्वस्यचस्वरूपप्रयुक्तत्वबुद्धिभ्रांतिरित्यु
क्तं जनस्यगोत्रास्तकोस्मीतिकत्थमानस्त्वंवहसमास्तुदेहात्मविवेकिषुनप्रोभसेयतोधष्टदेहात्मभ्रांत्याचृतः ॥७॥ आस्थिरेषुस्थिरबुद्धिश्च

भ्रांतिरितिदर्शयितुमस्थिरत्वमाहयदेतिचराचरस्य

भा॰प॰ ४०

देहजातस्य स्वभावस्मृत्यतिविशेषं नापीवतितौ भस्मामेव विदामहि इति शाद्वो ब्रह्माण्डपर॥ सम्भवं विपत्तोऽस्त्येति श्रोतप्रयोगात्। उत्पत्तिविनाशौ क्षितावेव पश्यामः स्थिर
त्वं पश्यामः इति भावः॥ तस्मादस्थिरत्वाभावात्॥ अनित्येति॥ स्वदेहादासर्वान्तिमलानित्यत्वस्य प्रतिबाधितत्वात् उक्तिमात्रत्वात् सत्क्रियया अबाधितव्यवहारेणाभ्यु
पेयव्यवहारस्यात्मनि राजत्वादिव्यवहारस्य च तन्निरूप्यता॥ तत्र किंचिदप्युक्तत्रिविधाम्नातिमलत्वादित्यर्थः॥ क्षितावेवोत्पत्तिविनाशौ चराचरस्य विदा
म इत्यनेनोक्तिते तेन नित्यत्वं प्रतीतं तन्निराकुर्वन्नाह॥ एवमिति॥ असन्निधानमसतामनित्यानां कार्याणां निधानं लयस्थानं यतः क्षितिशब्दवाच्यं क्षितिशब्दस्य
चेतं वृत्तिर्व्यक्तिस्तत् क्षितिशब्दवाच्यं तदप्येवं निरुक्तं दर्शितं॥ यत्र देहाद्युत्पत्तिः॥ सा क्षितिरप्यनित्येत्यर्थः॥ भूमेरनित्यत्वज्ञापनाय तत्रावयवविभागमव
यवानां चानित्यत्वमाह परमाणव इति॥ ये परमाणवः भूतसूक्ष्माणि येषां परमाणूनां समूहेन विशेषः कृतः॥ भूमण्डलं कृतं ते परमाणवः मनसाधिष्ठातुरा प्र

एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानात्परमाणवो ये॥ अविद्यया मनसा कल्पितास्ते येषां समूहेन कृतो विशेषः॥ ९॥ ए
वं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीवमजीवमन्यत्॥ द्रव्यस्वभावाशयकालकर्मनाम्नाजयावेहि कृतं द्वितीयम्॥ १०

सङ्कल्पेन विद्ययाविद्यया कल्पिता॥ ईश्वराधिष्ठितप्रकृतिपरिणामरूपत्वादनित्या एवेति भावः॥ यद्वा ये परमाणवो नित्यास्ते मनसा अविद्यया कल्पि
ताः॥ शरीराकारेणावस्थिताः॥ ते राज्ञां ममेत्यविद्यया आत्मत्वेन कल्पिता इत्यर्थः॥ वेदान्तार्थोपबृंहणपरे स्मिन्ग्रन्थे परमाणुकारणवादायोगाद्वैशेषिक
दृष्टिमितेषामविद्याकल्पितत्वानभ्युपगमाच्चेयमेवोक्तरेवार्थः॥ असन्निधानादित्यपि पाठो दृश्यते तत्रासत्त्वमित्येषु स्वकारणं भूतेषु भूतसूक्ष्मेषु निधाना
ल्लयात् क्षितिशब्दवृत्तमप्यनित्यमित्यर्थः॥ ९॥ शरीरात्मनो नित्यत्वनिगमं यत्स्थौल्यादिकं तत्कृतमेवेत्याह॥ एवमिति॥ एवं कार्श्यादिगुणयुक्तं सदसदात्म
कं कार्यकारणात्मकं उत्कर्षापकर्षात्मकं वा सजीवं जीवभेदं भिन्नं चराचरात्मकं द्वितीयमात्मनो भिन्नं शरीरद्रव्यादिनाम्ना अजया अकृत्याकृतमि
ति बुध्यानिरूपणायावेहि॥ तत्र द्रव्यं पृथिव्यादि पंचभूतजातं स्वभावस्तेषां परिणामः आशयोऽन्तःकरणं वासना वा कालः सत्वादिगुणक्षोभकः द्रव्यादी

राम: ४०

एवं देहस्यानात्मत्वमुक्तं ॥ अथात्मस्वरूपं शोधयति ज्ञानमिति । ज्ञानमिति जरात्मवृत्त्युद्गमः ॥ विशुद्धं स्वतः कर्मसंबंधरहितं रागादिदोषरहितं वा परमार्थं परमार्थरूपं
मनंतरात्मकं सर्वत्र ज्ञानैकाकारमनंतरं बहिरंतर्विभागप्रदेशवभेदरहितं निरवयवत्वात् ॥ ब्रह्मगुणतो व्यापकं सत्यं नित्यं प्रत्यक् स्वस्मिन्भासमानं प्रशांतमशनायापिपा
सा शोकमोहजरामृत्युऊर्मिषट्करहितं । सांख्यमततद्व्यावृत्त्यर्थं ब्रह्मात्मकं स्वं सामानाधिकरण्येनाह ॥ भगवच्छब्दसंज्ञं वासुदेवमिति भगवच्छब्दः संज्ञा यस्य स
भगवच्छब्दसंज्ञः तत्र पूज्ये पदार्थोक्तिपरिभाषासमन्वितः ॥ शब्दोऽयं नोपचारेण त्वन्यत्र उपचारतस्तत्रकारीत्या भगवच्छब्दोऽयत्र वासुदेवमस्मदर्थं तत्त्वं वासु
देवं वासुदेवात्मकं वदंतिकवयः ॥ आत्मयाथात्म्यज्ञानविदः वदंति ॥ अत्र विशुद्धं परमार्थमित्यादिविशेषणैरोरचेतनशरीरव्यावृत्तिः वासुदेवात्मक
त्वकथनेन तत्स्वरूपत्वनियाम्यत्वधार्यत्वशेषत्वादिधर्मैः तदात्मिन्नित्ततो वेदनरूपस्थितं एवं भूतप्रकृतिविलक्षणस्वात्मपरमात्मयाथात्म्यज्ञानं कथं
ज्ञानं विशुद्धं परमार्थमेकमनंतरं त्वबहिर्ब्रह्मसत्यं प्रत्यक्प्रशांतं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदंति ॥ ११ ॥ रहूगणै
तत्तपसा न याति न चेज्यया निर्वपणाद्गृहाद्वा न छंदसा नैव जलाग्निसूर्यैर्विना महत्पादरजोऽभिषेकं ॥ १२ ॥ यत्रोत्तमश्लो
कगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः ॥ निषेव्यमाणोऽनुदिनं मुमुक्षोर्मतिं सतीं यच्छति वासुदेवे ॥ १३ ॥
लभ्येतेत्यपे
क्षायां नोपायांतरैः किंतु महत्सेवाभगवद्गुणानुश्रवणादिपराणामेवेत्याह द्वाभ्यां ॥ हे रहूगण एतदात्मपरमात्मयाथात्म्यज्ञानं महतां भागवतानां पादरजःसेवां
विना तपआदिभिः स्वमनीषया पुरुषो न याति न प्राप्नोतीति तत्र तपः कृच्छ्रचांद्रायणादि रन्नपानादिवा इज्या वैदिकं कर्म निर्वपणं सत्पात्रनिःक्षेपरूपं दानं गृहं
गृहस्थधर्मः छंदो वेदाभ्यासः एभिस्तपआदिसाधनैः पापक्षयात्मितेर्नत्वाशिभिस्तु न यातीत्यर्थः ॥ १२ ॥ कथं महत्सेवया तद्याप्तीत्यत्राह ॥ यत्र येषु महत्सु ग्राम्यकथाना
मभिघातो यस्मात्स उत्तमश्लोकस्य भगवतो गुणानुवादः प्रस्तूयते तत्र सत्यतो गुणानुवादः प्रकृते किं माया नेत्यत्राह ॥ अनुदिनं निषेव्यमाणो गुणानुवा
दः वासुदेवे सतीं पतिं शुद्धां दोषं च्छति स्वात्मपरमात्मयाथात्म्यविषयं ज्ञानं संपादयतीत्यर्थः ॥ १३ ॥ एवं गृहमेधिसौख्यवैराग्यस्य ज्ञानहेतुत्वमभि

भा॰ पं॰
७८

भायविषयं संगस्य ज्ञानं वैराग्यकारणत्वं च दृष्टांतेन वदन्नुक्तं चनिरस्यत इत्यादि प्रश्नस्योत्तरमाह ॥ अहमिति द्वाभ्यां ॥ पुरा पूर्वं तस्मिन् जन्मनि अहं भरतो नाम प्रसिद्धः
राजाऽभवं तत्रापि शोभेतरास्य कुतः दृष्टेहिकश्रुतपारलौकिकेषु विषयेषु अभिलाषेण स्वर्गादिषु च संगरूपो बंधो येन तथाभूतः सन् भगवतस्त्वाराधनं कुर्वाणस्तत्र मृगसंगा
द्धतं विहितं आराधनलक्षणो यो र्थो यस्य तथाभूतो मृगो ऽभवं मृगजन्म प्राप्तोऽभवं ॥ १४ ॥ हे वीर कृष्णार्चनप्रभवा भगवदाराधनजा सा भगवद्विषया स्मृतिः
मृगदेहेपि मां न जहाति नात्याक्षीत् कृष्णार्चनप्रभावविषयको विस्मय अहो इति । अथ जनाज्जनसंगाद्विशंकमानः ॥ अतएवासंगः विवृतः अप्रकट
एव चरामि ॥ १५ ॥ तस्मात् संगस्य बंधकत्वान्नरः ॥ असंगेन ज्ञानिसुसंगेन जातो यः ज्ञानरूपोऽसिः खड्गस्तेन विशेषेण वृक्णः छिन्नः संगो देहत

अहं पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसंगबंधः आराधनं भगवत ईहमानो मृगोऽभवं मृगसंगाद्धतार्थः ॥ १४ ॥ सा मां स्मृतिर्मृगदे
हेपि वीर कृष्णार्चनप्रभवा नो जहाति ॥ अथो अहं जनसंगादसंगो विशंकमानोऽविवृतश्चरामि ॥ १५ ॥ तस्मान्नरोऽसंगसुसंगजा
तज्ञानासिनेहैव विवृक्णमोहः हरिं तदीहाकथनश्रुताभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनः ॥ १६ ॥ इति श्रीभागवते पंचम
स्कंधे द्वादशोऽध्यायः १२ ॥ ब्राह्मण उवाच ॥ दुरत्यये ऽध्वन्यजया निवेशितो रजस्तमःसत्वविभक्तकर्मदृक् ॥ स एष सार्थोऽर्थपरः परि
भ्रमन् भवाटवीं याति न शर्म विंदति १ ॥ एवं विधसुयेन तथाभूतः सन् अध्वनः संसारात् अध्वनः पारमत्यंतं तमवधिं हरिं भगवंतं तदीहाकथनश्रुता
भ्यां भगवच्चेष्टितं कथनश्रवणाभ्यां कथनादिप्रमाणाद्योऽस्यार्थः लब्धा स्मृतिर्भगवद्विषया यस्य स याति प्राप्नोति ॥ १६ ॥ इति पंचमे द्वादशः ॥ एवं तत्त्वं निरूपि
तमप्यविरक्तस्य न प्रतितिष्ठितं भवतीति वैराग्योदयाय संसाराध्वानं लोकप्रसिद्धद्गोध्वत्वेन संसारमटवीत्वेन च रूपयति दुरत्यय इति त्रयोदशेनाध्याये
न ब्राह्मणाः दुरत्ययेऽदुरतिक्रमेऽध्वनि कर्ममार्गे अजया प्रकृत्या निवेशितः रजस्तमःसत्वैर्विभक्तानि कर्माणि कार्याणि तया पश्यतीति तथा शुभाशुभमिश्ररूपकर्मा
णि यस्य सः विभक्तानीत्यर्थः सार्थो वणिक्समूहः अर्थपरः धनार्थी प्रवृत्तो बहुरूपो जीव समूहः अर्थपरः धर्मादिपुरुषार्थपरः भ्रमन् भवाटवीं याति कर्मफलं न प्राप्नोति तस्य परः शर्म सुखं न विंदति न लभते

यथा वणिक् स्वर्थोर्जनाय गच्छन्नटवीं याति सुखं च न विंदति तद्व
दित्यर्थः १

७८

यद्यप्यस्याध्यायस्य व्याख्यानरूपस्त्रयोदशाध्यायः प्रवृत्तस्तथापि मुमुक्षुप्रतिपत्तये किंचिदत्रापि व्याख्यायते तत्र देवाद्द यस्यामिति हे नरदेव यस्यां भवाटव्यां षडिंद्रि
यनामानः दस्यवः कुटुंबजनतः चौराः कुमतिः सन्मार्गो न भोग्यः नायकः बुद्धिरूपः नेता यस्य तं सार्थं जीवसमूहं विलुंपंति ॥ जीवस्य भगवदाराधनरूपं धनं लुंपंतीत्यर्थः
यत्र भवाटव्यां गोमायवः शृगालतुल्या दारापत्याद्यः प्रमत्तमनवहितं सार्थिकं स्वार्थिकं त्वं मे भर्त्तासि पितासीत्येवं प्रविश्य हरंति यथोरणं मेषं वृका हरं
ति तद्वत् योन्यथा संतमात्मानमन्यथा प्रतिपद्यते इत्युक्तरीत्यात्मानं स्वरूपविस्मारकाभिमानजनकत्वात् आत्मानमपहरतीत्यर्थः ॥२॥ वीरुधो लताः गु
ल्मा निविडास्तैः गह्वरे दुर्गमे कर्मवीजं वप्त्वा फलप्ररोहदर्शनेत्रैव तेन गहने आश्रमे इत्यर्थः कठोरैस्तीव्रैर्दंशैर्मशकैर्नीचैः विशेषेण कैश्चन यथा कश्चिदुपद्रुतो भव
ति तथा दंशप्रादिसमा दुर्दशो राजभटादिभिरुपद्रुतो भवतीत्यर्थः क्वचिद्गंधर्वपुरं स्वप्नदस्थिरं मनुष्यशरीरं स्थिरवत्पश्यति गंधर्वीणां हि पुरं न विद्यते तद्वद्देह

यस्यामिमे षट् नरदेव दस्यवः सार्थं विलुंपंति कुनायकं बलात् ॥ गोमायवो यत्र हरंति सार्थिकं प्रमत्तमाविश्य यथोरणं
वृका ॥२॥ प्रभूतवीरुत्तृणगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः ॥ क्वचित्तु गंधर्वपुरं प्रपश्यति क्वचित्क्वचिच्चाशुरयोल्मुकग्रहं क्वचित्
३ ॥ निवासतोयद्रविणात्मबुद्धिस्ततस्ततो धावति भो अटव्यां ॥ क्वचिच्च वात्योत्थितपांसुधूम्रा दिशो न जानाति रजस्वलाक्षः ॥४

स्थापि नित्यत्वमविद्यमानमपि पश्यतीत्यर्थः क्वापि क्वापि आशुरयः अतिवेगो उल्मुकाकारो ग्रहः तत्तुल्यं सुवर्णमुपादेयत्वेन प्रपश्यतीत्यर्थः ॥ असुरहरोल्मुकग्र
हः स्यपिपाचोह पश्यते तत्र प्रारादारोल्मुकपिशाचतुल्यं पश्का यं सुवर्णमुपादेयत्वेन प्रपश्यतीत्यर्थः यथा पिशाचगतोल्काज्वलनं प्रकाशार्थं जिघृक्षया पिशाच
हतो भवति एवं सुजनसंबंधि सुवर्णस्य स्वोपकारकत्वबुद्ध्या जिघृक्षुः सुजनैरुपद्रुतो भवतीत्यर्थः ॥३॥ पिपासतोयद्रविणात्मबुद्धिः पिपासो विषयतोयं पि
पासतोयं मृगतृष्णिकाः पिपासया शीघ्रगत्याद्यायोसंज्ञाः शुद्धं दस्रोरित्याद्यौ ऋत्स्वः ॥ पिपासा विषयतो यं तु तृप्तं प्रविरागं वित्तं तस्मिन्नात्मबुद्धिः ॥ स्वबुद्धिर्यस्य तथाभू
तः क्वचिन्निवासतोयेद्रविणात्मबुद्धिरिति पाठे तत्र निवासादिष्वात्मभावो यस्यासामात्मबुद्धिर्यस्येत्यर्थः ॥ अटव्यामितस्ततो धावति भ्रमति भो राजन् वात्या
वक्रवाततुल्या नारी वा स्याः वात्या प्रमदया उत्थितो रागादिदोषः पांसुस्तेन धूम्रा आविलादिशः धर्ममर्यादा रजस्वलाक्षो रजोव्याप्तनेत्रो यस्य सः रजोगुणोप
गो

भा॰पं॰ ४९ हृतज्ञानः सन्न जानाति यथा वणिक् वातोत्थितधूलिमात्रवेष्टितो व्याप्तदिग्विभागः सन् न जानाति तद्वद्धर्ममार्गोऽस्मन्नजानातीत्यर्थः ॥ ४ ॥ क्वचिद्दृश्यानां किल्लीनां झंगारक
संज्ञानां कीटविशेषाणां स्वनेन ध्वनिना कर्णयोः शूलं व्यथा यस्य सः ॥ परोक्षमप्रियभाषिरिपुवाक्यश्रवणजनितकर्णशूलव्यथायुक्तो भवति ॥ यथारण्ये विघोद्दृश्य
किल्लीस्वनव्यथितकर्णः इत्यर्थः ॥ तथा उलूकानां पक्षिविशेषाणां प्रियभाषवतामुलूकसदृशानां राजभटादीनां वाग्भिर्व्यथितमेतरात्मा मनो यस्य तथा सन् ततः क्वचिद्भव
ति ॥ यथारण्ये उलूकवाग्भिर्व्यथितहृदयो भीतहृदयो भवतीत्यर्थः ॥ क्वचित् क्षुधाणनयार्दितः पीडितः ॥ अपुण्यवृक्षान् विषवृक्षदृष्टान् अनुपकारकर्मी व्र
तिमान्श्च धनान् पापिष्ठजनानाश्रयते आश्रयति क्वचिन्मरीचितोयानि मरीचिकाजलवत्सुखाभासान् विषयाननुधावति नोपभुञ्जीतान्वेषयति ॥ अभोग्य
अहृश्यफिल्लीस्वनकर्णशूलउलूकवाग्भिर्व्यथितान्तरात्मा ॥ अपुण्यवृक्षान् श्रयते क्षुधार्दितो मरीचितोयान्यभिधावति क्वचित् ॥ ५ ॥
क्वचिद्वितोयाः सरितोऽभियाति परस्परं वालषते निरन्धाः ॥ आसाद्य दावं क्वचिदग्नितप्तो निर्विद्यते क्व च यक्षैर्हृतासुः ॥ ६ ॥ शूरैर्हृतः स्व
क्वचिद्विशीर्णचेताः शोचन् विमुह्यन्नुपयाति कश्मलं ॥ क्वचिच्च गन्धर्वपुरं प्रविष्टः प्रमोदते निर्वृतवन्मुहूर्तं ॥ ७ ॥ चलन् क्वचित्कं
॥ ॥ टकशर्कराङ्घ्रिर्नगारुरुक्षुर्विमना इवास्ते ॥ पदे पदेऽभ्यन्तरवह्निनार्दितः कौटुम्बिकः क्रुध्यति वै जनाय ॥ ८ ॥
देये विषयमनुधावतीत्यर्थः ॥ ५ ॥ क्वचिद्वितोयाः जलरहिताः सरितः नदीरभियाति यथा वितोयासु सरित्सु पतितस्य गात्रभंगात् सद्योदुःखं भवति तिग्मचोद
कलाभः ॥ तद्वदिह परत्र च दुःखदा ॥ निष्फलानपाखण्डाश्रमानभियाति आश्रयते क्वचिन्निरन्नाः परस्परं दायादेभ्यो न्नादिकं लषते वाञ्छति पिता निरन्नकत्तये
त्यर्थः ॥ क्वचिद्दावं दावाग्नितुल्यं गृहसम्मितं विषयमासाद्य दुःखं दावप्रविष्टः अग्नितप्तः शोकतप्तो भवति क्वचित् यक्षैर्यक्षवत्प्रतिकूलैः राजभि
र्हृतासुरपहृतप्राणतुल्यधनः निर्विद्यते ॥ ६ ॥ तथा शूरैः राजभटादिभिः हृतस्वे धनं यस्य सः क्वचित् दुःखितचित्तो भवति ॥ हृतस्वः क्वचिच्छोचन् विमुह्यन् कश्मलं म
र्छां याति क्वचिद्गन्धर्वपुरमिवास्थिरं बन्धुवर्गं प्रविष्टः निर्वृतवत्सुखितवन्मुहूर्तं मुहूर्तमात्रं मोदते ॥ ७ ॥ क्वचिन्नगारुरुक्षुः पर्वतवत् दुरारोहयज्ञादिकर्मा
प्रविविक्षुः कण्टकैः शर्कराभिः सन्नपादो दुःखितचरणो यथा पर्वतमारोढुं न शक्नोति तथा कण्टकादितुल्यैर्विघ्नैरभिहतः सन् तत्कर्मारोढुं कर्तुं न रामः ४९

शकः सन विना ऽवासे भास्वरत्वे नावतिष्ठते क्वचिद्वदग्धो दग्धोऽयं तरं वह्निनाज्जाराग्निनार्दितपीडितः जनाय कलत्रादीन्प्रति क्रुध्यति यतोयं कौटुंबिकः ॥८॥ क
चिदयं जनः अजगराहिना जगराख्यसर्पतुल्यया निद्रया निगीर्णो ग्रस्तः ॥ किंचिदपि न वेत्ति यथा विपने रण्ये प्रविष्टस्त्यक्तः शव इव क्वचदंदशूकैः सर्वतुल्यैर्हिं
वैर्दुर्जनैर्दष्टः पीडितः अंधोऽल्पविवेकः अंधकूपे मोहरूपे शरीरकूपे वा पतितः तस्मिन्स्वेदुःखादिभिर्व्याप्तकः ॥९॥ कर्हिचित्क्षुद्ररसान्विचिन्वंस्तन्मक्षिक
भिः रमाद्विज्ञामभिव्यथितः ताडितः विमानो वज्ञातो भवति यदि कथंचित मां तिलेशेन प्रतिलब्धमानः प्राप्तपरदाराभिर्निर्भवति तदा तं वंचयित्वा बलाद्
न्येतान् क्षुद्ररसान्परस्पर रंति राजंते भ्योऽप्यन्योपहरंति इत्यर्थः ॥१०॥ क्वचिच्छीतादीनां प्रतिक्रियां कर्तुं शीतादिनिहारकवस्त्रगृहादिकं संपादयितुमसम
क्वचिन्निगीर्णोऽजगराहिना जनो नावैति किंचिद्विपिने पविद्धः ॥ दष्टः स्म शेते क्व च दंदशूकैरंधोंऽधकूपे पतितस्तमिस्रे ॥९॥ क
र्हिस्म चित्क्षुद्ररसान्विचिन्वंस्तन्मक्षिकाभिर्व्यथितो विमानः । तत्रातिकृच्छ्रात्प्रतिलब्धमानो बलाद्विलुंपंत्यथ तं ततो
न्ये ॥१०॥ क्वचिच्च शीतातपवातवर्षप्रतिक्रियां कर्तुमनीश आस्ते ॥ क्वचिन्मिथो विपणन्यच्च किंचिद्विद्वेषमृच्छत्युत वित्त
शाठ्यात् ॥११॥ क्वचित्क्वचित्क्षीणधनस्तु तस्मिन् शय्यासनस्थानविहारहीनः ॥ याचन्परादप्रतिलब्धकामः पारक्य
दृष्टिर्लभतेवमानं ॥१२॥ अन्योन्यवित्तव्यतिषंगवृद्धवैरानुबंधो विहरन्मिथश्च = र्थस्तैर्दुःखितश्चास्ते क्वचिन्मिथः यत्किंचि
चिदल्पमपि विपणनं क्रयविक्रयादिभिर्व्यवहारं वाणिज्यं कुर्वन्नित्यर्थः वित्तशाठ्याद्धनवंचनया विद्वेषं प्राप्नोति ॥११॥ तस्मिन्संसारध्वनि क्वचित्क्वचित् क्षीणध
नपस्यासः ॥ स्वतल्पस्वशय्यासनादिभिर्विहीनः रहितः भवति यतोस्याभिति पाथ्यापये कारस्त्रास्यतेस्मिल्लित्यासनं कं बलादिस्थीयतेस्मिन्निति स्थानं गृहादि विहरंत्यनेने
ति विहारो यानादि याचद्यदायाद्रसत्तदाप्राप्तकामः तदा परकीयेवस्तुनि दृष्टिरभिलाषो यस्य सोऽवमानमवज्ञां लभते ॥१२॥ एवमन्योन्यं वित्तव्यतिषंगेणावित्तव्य
यायेन वृद्धप्रवृद्धः वैरानुबंधो यस्य सः मिथः विवादं कुर्वन् विवहन्मिथश्चेत्यपि पाठः ॥ तदा भार्यालब्धवित्तनियमव्यत्यासेन विवृद्धवैरानुबंधः वैराधि

इत्थंचिंतितः ॥ परस्परं विवादं कुर्वन्नस्मिन्नदुरत्यये ध्वनि त्रिभिः कष्टैः स्वमैः चितवान्वेरुपसर्गैश्चदेवादिभिः विपन्नः मत्तप्रायो भवति ॥ १३ ॥ दुरत्ययतममध्वनो
दृशोमति ॥ तांस्तान्विपन्नान्स्मतान्नृपिण्डादीनत्रत्रत्र विहाय जातं सार्थं पुत्रादिकं परिगृह्य क्षापद्यत्रावर्तते भ्राम्यति ॥ क्वचित्सर्वश्चचक्र पारं योगं कश्चिदपि नो
पैति ॥ स्वत्वमाथे कश्चिदतिसमयोपि ॥ १४ ॥ तदेवाहमनस्विनश्च राजानोजिताः दिग्गजेंद्रा ये ते ममेयं भूरित्यभिमानमतिबद्धतायां पुनर्विवर्द्धवैरा ये ते मे
देहादेके वलं शायीरस्मायास्त्यक्त्वं तःनतु तद्व्रजंति प्राप्नुवंतीति किंतत ॥ यत्र व्रजंति मनस्विनस्तत्राह ॥ न्यस्तदंडस्त्यक्तभूतदंडः ॥ त्यक्तभूतवैरस्य योगीय॰
स्य ध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तवाध्योपसर्गैर्विहरन्विपन्नः ॥ १३ ॥ तांस्तान्विपन्नान्स हितत्र तत्र विहाय जातं परिगृह्य सार्थः ॥ आ
वर्तते द्यापि न कश्चिदत्र वीराध्वनः पारमुपैति योगं ॥ १४ ॥ मनस्विनो निर्जितदिग्गजेन्द्रा ममेति सर्वे भुवि बद्धवैराः ॥ मृधे शयीरन्न
तु तद्व्रजंति यन्न्यस्तदंडो गतवैरोभियाति ॥ १५ ॥ प्रसज्जति क्वापि लताभुजाश्रयस्तदाश्रयाव्यक्तपदद्विजस्पृहः ॥ क्वचित्कदाचिद्ध
रिचक्रतस्त्रसन्सख्यं विधत्ते बककंकगृध्रैः ॥ १६ ॥ तैर्वंचितो हंसकुलं समाविशन्नरोचयन्शीलमुपैति वानरान् ॥ तज्जा
तिरासेन सुनिर्वृतेंद्रियः परस्परोद्वीक्षणविस्मृतावधिः ॥ १७ ॥
द्विस्त्रोः ॥ पदं याति तत्र व्रजंतीत्यर्थः ॥ १५ ॥ सिंहावलोकनन्यायेन पुनर्भवाटवीमे॰
वानुवर्णयति प्रसज्जतीति प्रसक्तः यासक्तिं करोति कीदृशः लतानां भुजाः शाखास्ता नाश्रितः लतातुल्यकामिनीभुजोपधान इत्यर्थः ॥ तदाश्रयाः कामिनीलताश्र
याये व्यक्तपदा नभिव्यक्तवर्णमधुरवचोभाषिणो द्विजाः पक्षिसदृशाः शिशवः बालाः तेषु स्पृहा यस्य सः तादृशो भवति प्रसज्जतीत्यर्थः ॥ क्वचिद्धरिचक्रं सिंहसमूहस्त
त्तुल्याद्धरिचक्राद्गवतः संबंधिनः कालचक्रात्त्रसन्बिभ्यत् कालचक्रनिमित्तजन्मजरामरणादेस्त्रसन्नत्यपरिहाराय केश्चित्स्वलोभितः बकादितुल्यैः पाषं
डदेवतैः सह सख्यं विधत्ते तेषु भक्तिं करोतीत्यर्थः ॥ १६ ॥ तैर्वंचितः स्वयं तान्वंचयं सैर्वंचितफललाभाभावेनातद्धंसकुलं पुनर्विशुद्धं ब्राह्मणकुलं समाविशन्नविशन्
तेषां शीलं प्रायश्चित्तप्रवेकं प्रतरूपण यत्नाद्यचारूपमरोचयन् सर्वेद्रवामनया प्रियं परपन्चानरतुल्यान्भ्रष्टसदाचारान्स्वछंदप्रायान्नुपैति ॥ जातिरासे

नवानरजातिक्रीडया मिथुनीभूय परस्परं भावप्रणयं वे कामरस्य
रसरथनिरीक्षणेन विस्मृतः अवधिः अवधिर्मरणकालो येन सः १७

द्रुमतुल्येषु केवलं दृष्टार्थेषु गृहेषु संस्थ न क्रीडन् व्यवायेन मैथुनेच्छया दीनः कृपणः सुतेषु दारेषु वत्सलः एवं स्वस्य यद्बंधनं ब्राह्मं तस्मिन्विवशः ॥ परिहर्तुमश
क्तो भवति क्वचित्प्रमादान्नरसिंहव्याघ्रभयात् गिरिकंदरवद्भयानके रोगादिदुःखे वर्तमानः परस्य राजतुल्यस्य मृत्योर्भीतः स नव वल्लीव वल्लीतुल्यां यावा नवासनामवलंब्य
स्थितो भवति ॥१८॥ ततः आपदः दुःखात्कथंचिदिति आयासं न विमुक्तः पुनः प्रसार्थं वर्णाश्रमनिषिद्धं जनं च विशति यथा पूर्वं च वृत्तिमार्गे रमते ॥ हे अरिंदम अस्मिन्सं
साराध्वनि अजया भगवन्मायया निवेशितो जनः भ्रमन्नद्यापि पारं न याति ॥१९॥ तस्मात् हे रहूगण त्वमपि त्यक्तः न्यस्तदंडो येन कृतं भूतेषु मैत्रं येन ॥ असज्जितः विषये
ष्वनभिनिवेशितः आत्मा येन तथाभूतः सन् हरिसेवया निवेशितः सेवा च वर्णाश्रमधर्मे भगवदाराधनरूपा तया निशितं ज्ञानं भगवदुपासनात्मकं तदेवासिः ख

द्रुमेषु रंस्यन्सुतदारवत्सलो व्यवायदीनो विवशः स्वबंधने ॥ क्वचित्प्रमादाद्गिरिकंदरे पतन्वल्लीं गृहीत्वा गजभीत आस्थितः ॥१८॥
अतः कथंचित्स विमुक्त आपदः पुनश्च सार्थं प्रविशत्यरिंदम ॥ अध्वन्यमुष्मिन्नजया निवेशितो भ्रमञ्जनोद्यापि न कश्चन वेद
रहूगण त्वमपि ह्यध्वनोस्य संन्यस्तदंडः कृतभूतमैत्रः ॥ असज्जितात्मा हरिसेवया शितं ज्ञानासिमादाय तरातिपारं ॥२०॥ राजोवा
च ॥ अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन् । न यद्धृषीकेशयशःकृतात्मनां महात्मनां वः प्रचुरः समागमः ॥२१॥

द्रुत्तमादाय पत्र कर्तितस्य छेदनायेति भावः यथा अस्य त्वमेनं सुविरुद्धमलयं संगाणस्त्वेणम्हदेन छित्वा गति ॥ अस्याध्वनः पारं वै ब्रह्मपदं व्रजति आपतितरः अध्वनः पार
मितित्वात्वा ब्रह्म सेविं प्रपर्णा वा संसाराध्वनो नितारणोपाय तत्ज्ञानासिमादाय संसारमुक्तो भवेत्यर्थः ॥२०॥ एवमुपदिष्टतत्वज्ञया यामस्य बंधमोक्षहेतुः संसा
रामारत्वोपदेशेन च तस्य वैराग्यार रहूगणः स्वात्मन कृतार्थतामाविःकुर्वन्नत्संगतिं तदुक्तस्याभिनंदनमकरोति त्रिभिः श्लोकैः अहो इति ॥ अहो नृजन्म मनुष्य
जन्म सुशोभनं परम अमुष्मिन्परलोके परैर्देवादिजन्मभिरपि किं प्रयोजनं येषु देवादिजन्मसु हृषीकेशस्य भगवतो यशसा कृतः शोधितः आत्मा चित्तं येषां ते
षां महात्मनां वो युष्माकं समागमः प्रचुरो न भवति भगवत्संगाविरहितैर्देवादिजन्मभिरपि किं व्यर्थो त्येतावतानीत्यर्थः ॥२१॥ निरंतरं त्वादृशानां उपासि

भा.पं.
५२

नयोश्चरणाब्जयो रेणुभिर्हतमंहः पापं यस्य तस्याधोक्षजेऽमला भक्तिर्भवतीति नैवाद्भुतं कुतः यस्य तव मौहूर्तिकात्क्षणमात्रभवात्समागमान्मे
दुस्तर्कैर्मूलं यस्य अमलोऽविवेकोऽपहतः विनष्टोऽभवत् ॥२२॥ ज्ञानिनः केन रूपेण चरंतीति ज्ञात्वा सर्वान्नमस्करोति ॥ नमः इति महद्भ्यो नमः । तत्रापि विशुद्धरूपे
भ्यो नमः येषु वा न त्वादृशास्तेभ्योऽपि नमः आवटुभ्यः वटुपर्यंतेभ्यो वटुर्माणवकः वटवस्तमाङ्गास्त्यान विष्करणशीलपर्यंतेभ्य इत्यर्थः ॥ ज्ञानिनो वि
स्मनद्वा त्वागविक्षोरणातिष्ठंति तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदिति श्रुतेः पांडित्यं नाम ज्ञानं निर्विद्य बाल्येन तिष्ठासेदित्यर्थः । ये त्वा
दृशा ब्राह्मणास्त्ववधूतवेषा गां भूमिं चरंति तेभ्यः साम्प्रतं राज्ञां मादृशानां कृतागसां शिवमस्तु मदत्तां निग्रहो मा भूत् ॥२३॥ संवादमुपसंहरति श्रीशुकः इ

नह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेऽमला ॥ मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः ॥२२॥
नमः महद्भ्योस्तु नमः शिशुभ्यो नमो युवभ्यो नम आवटुभ्यः ॥ ये ब्राह्मणा गामवधूतलिंगाश्चरंति तेभ्यः शिवमस्तु राज्ञां ॥२३॥
श्रीशुक उवाच ॥ इत्येवमुत्तरामातः स वै ब्रह्मर्षिसुतः सिंधुपतय आत्मसतत्त्वं विगणयतः परानुभावः परमकारुणिक
तयोपदिश्य रहूगणेन सकरुणमभिवंदितचरणः आपूर्णार्णव इव निभृतकरणोर्म्याशयो धरणिमिमां विचचार ॥२४॥
सौवीरपतिरपि सुजनसमवगतपरमात्मसतत्त्व आत्मन्यविद्याध्यारोपितां स्वदेहात्ममतिं ससर्ज =

उत्तरामातः उत्तरमामातो यस्य स उत्तरामातः परावृत्तिः तस्येदं संबोधनमुत्तरामातरिति आविगणयतेन विगणयत इत्यविगणयत् तस्मै अवमानं कुर्वाणाय सिंधु
सौवीरपतये रहूगणाय विगणितः परिच्छेतुमशक्यः परमानुभावः प्रभावो यस्य स वै ब्रह्मर्षिसुतः परमकारुणिकत्वेन हेतुना आत्मनस्तत्त्वं प्रकृति
विलक्षणमात्मिकत्व विशुद्धज्ञानानंदस्वरूपं कृतपातं तत्त्वादिया थात्म्यमुपदिश्य सकरुणं सस्नेहं यथा भवति तथा रहूगणेनाभिवंदितौ चरणौ पादौ
यस्य सः आसमंतात्पूर्णः समुद्र इव निभृतानि शांतानि करणानि इंद्रियाणि कुर्मयः ॥ अपरामाधादयः आशयोऽंतःकरणं वा सम्यग्वा यस्य सः इमां धरणिं

स्वगणोपि सुजनाद्ब्रह्मर्षिसुतात्तस्य भगवतानं परस्यात्मनस्तत्त्वं यथा यात्मप्ये नतथा भ्रतः स नततदानीमेवात्मन्यविवेकयाज्ञानेनारोपितां देहात्माभिमतिं ससर्ज जहौ
एवं भगवदाश्रिताश्रितानुभावः भगवदाश्रिता भगवद्दासानुदासास्तेषामनुभाव एवंविधो हि भवतीत्यर्थः ॥२५॥ एवं तत्त्वसंवादे उपवर्णिते वणिक्सार्थोपाख्यानादिरूपेणाध्व
वर्णनापरोक्षरूपेणाभिहितं यन्मुक्तिनामार्थं जिज्ञासमाना राजा परोक्षितत्तत्कं पृच्छति ॥ हे महाभागवत बहुकबहुविदा बहुज्ञेन त्वया योजीवलोकस्य भवाध्वाप
रोक्षरूपेणाभिहितः कथितः स हि यस्मादार्याणां विवेकिनां मनीषया बुद्ध्या एवं दस्युस्थानीयानीन्द्रियाणि गोमायुस्थानीया अपत्यादीनीत्येवं कल्पितः
विषयो ज्ञानं यस्य सः कल्पितपदार्थो वा न ॥ अतो ञ्जसा सुखेनाव्युत्पन्नानामविवेकिनां लोकानां तैः समधिगम्यः ॥ न त्वव्युत्पन्नमादृशासमाधिगम्यः अथ तत्स ।
एवं हि नृप भगवदाश्रिताश्रितानुभावः ॥२५॥ राजोवाच ॥ यो ह वा इह बहुविदा महाभागवत त्वयाभिहितः ॥ प
रोक्षेण वचसा जीवलोकभवाध्वा स ह्यार्यमनीषया कल्पितविषयो नाञ्जसाव्युत्पन्नलोकसमधिगमः ॥ अथ
तदेवैतद्दुरवगमं समवेतानुकल्पेन निर्दिश्यतामिति ॥२६॥ इति श्रीभागवते महापुराणे पंचमस्कंधे त्रयोदशोध्यायः १३
श्रीशुक उवाच य एष देहात्ममानिनां सत्वादिगुणविशेषविकल्पितकुशलाकुशलसमवहारविनिर्मितविविधदेहा=
तद्दुरवगमं दुःखेनाप्यवगन्तुमशक्यमेतत्परोक्षरूपमुक्तिजातं सम्यवेतानुकल्पेन प्रकृतोपयुक्तार्थसमवेतप्रत्यक्षयोगेन निर्दिश्यतां व्याख्यायतां श
ब्दार्थयोः सदृशकं मिर्दत्वाभिप्रायेणासमवेतत्वात् प्रयुक्तः पृथगर्थत्वमभिधाव्यत्वेनाभिरूपतं संसारो ध्वस्वरूपं समवेतानुकल्पे प्रसिद्धार्थस्य ध्वनिस
मेतामनवस्थितार्थैर्वस्तुगोमायुप्रभृतयः नानानुसत्यतद्धर्मसाम्येन कल्प्याः रूप्यास्तैर्युक्तत्वेन निर्दिश्यतां कथ्यतामित्यर्थः ॥२६॥ इति पंचमे त्रयोदशः
तावदिमां ककः समवेतानुकल्पे न निर्दिशन्नाह यद्धर्मत्यय इति श्लोकं व्याचष्टे य एष इति यश्च जीवलोकः ईश्वरस्य भगवतो विष्णोर्वशवर्तिन्या अधीनया माय ।
यया तिदुर्गाध्वनि असुगमे संसाराध्वनि कर्ममार्गे आपतितो मायायाः स्वकार्ये द्वारेण संसारमार्गपातहेतुत्वमाह देहात्माभिमानिनां सत्वरजस्तमोभि

भा॰पु॰
५२

गुणैर्विशेषेण कस्मिंश्चानि विभक्तानि सात्विकराजसतामसभेदभिन्नानि यानि कुशलानि सुखसाध्यानि सात्विकानि अकुशलानि दुःखसाधनानि राजसतामसानि मि
श्राणि च मिश्राणि सुखदुःखसाधनानि राजसतामसानि कर्माणि तैर्विनिर्मिताभिरुपपादिताभिर्विविधदेहावलिभिः ऊर्ध्वं गच्छंति सत्वस्था मध्ये तिष्ठंति राजसाः
जघन्यगुणवृत्तिस्था अधो गच्छंति तामसा इत्युक्तत्वात् तिर्यक्त्वेन सत्वेन दिवं देवाद्युपेद्रिं॥ वर्णसंज्ञः स्वभावेनेत्याद्युक्तरीत्या नियतदेशाद्दृति देवमनुष्यासुरादिदे
हपंक्ति मिथो वियोगसंयोगौ देहवियोगतत्संयोगौ आदिग्रहे नवात्स्ययौवनस्य विरामादिना वृसंगृहः॥ रातडयोनादिसंसारः तदत्र भवस्य द्वारभूतेन
षडिंद्रियवर्गेणास्मरात् तस्मिन् दुर्गेध्वन्यसुगमे संसाराध्वनि कर्ममार्गेऽत्रापतितः यथा वणिजां सार्थः समद्दोर्थाजनपरः॥ तथास्वदेहनिष्ठो दितानां प्रवे
वालन्निर्विषयोऽसंयोगाध्वनादि संसारा तु भवस्य द्वारभूतेन षडिंद्रियवर्गेणातस्मिन् दुर्गे ध्ववदसुगमे ध्वन्यापतितईश्वरस्य भ
गवतो विष्णोर्वशवर्तिन्या मायया जीवलोकोऽयं यथा वणिक् सार्थोर्थपरः स्वदेहनिष्पादितकर्मात्रभवः प्रमत्तानवदणिवतमा
योऽस्य संसाराटव्यां गतो नाद्यापि विफलबहुप्रतियोगेहस्ततापोपशमनीं हरिगुरुचरणारविंदमधुकरानुपदवीमवरुंधे यस्य
षडद्वा षडिंद्रियनामानः कर्मणा दस्यवः एवावत्ते॥१॥ तद्यथा पुरुषस्य धनं यत्किंचित्साद्धर्मौपयिकं बहुकृच्छ्राधिगतं॥
तानां कर्मणां फलद्वारेणात्र भवो यस्य विफलास्य बहुलप्रतियोगा बहुव्यघोपहता इहाचेष्टा यस्य सः प्रमत्तानवदमंगलरूपायां संसाराटव्यां गतोऽद्य
पितस्यां संसाराटव्यां येतापत्त्वा आध्यात्मादयस्तेषां शामनी हरिरेव गुरुस्तस्य गुरोश्चरणारविंदयेमधुकराभ्रमरतुल्या भक्तास्तेषामनुपदवी तेरनुष्ठितं
मार्गं नावरुंधेनप्राप्नोति॥१॥ यस्यामित्यादिश्लोकं व्याचष्टे यस्याग्रहेति॥ यस्यां संसाराटव्यां येषडिंद्रियनामानस्ते कर्मणा दस्यवः एवावदस्युत्वं
पारमार्थस्तुत्वेन प्रवंमिरूपितान्यर्थः इंद्रियनामानः स्त्यनेनकेवलेनामभेदेन कर्मणा तेदस्यवः एवेत्युक्तं॥ दस्युनामिंद्रियाणां च धनापहारित्वरूपंक
र्मतुल्यमिति॥ दृष्टांतदार्ष्टांतिकभावेन दर्शयति॥ यथेति यथा स्य पुरुषस्यानवहितात्मनः सार्थस्य वणिजादेः धनं बहुकृच्छ्रेणातिदुःखेनातिदुःखे राम:
५२

र्जितं धर्मौपयिकं धर्मोपयोगार्हं धनस्य धर्मेणैवोपयोगः सफलो न तु कामस्यभिप्रायेण धर्मौपयिकमित्युक्तं तथा चोक्तं प्रथमे ॥ धर्मस्य ह्यापवर्ग्यस्य नार्थोर्थायो-
पकल्प्यते ॥ नार्थस्य धर्मैकांतस्य कामो लाभाय हि स्मृत इत्येवं विविधं यत्किंचिद्धनं यथा दस्यवश्चोरा अपहरंत्येवमस्य पुरुषस्य यो भगवदाराधनरूपो धर्म-
स्तं सांपरायिकं परलोकहितं धनमुदाहरंति ॥ तद्धर्म्यं धर्मोद्धरणोस्मादिधर्मादनपेतं धर्म्यं वर्णाश्रमादिधर्मो दिधर्मयुक्तमित्यर्थः धनं भगवदारा-
धनात्मकं धनं इंद्रियाणि घ्राणादिभिः पंचभिर्ज्ञानेंद्रियवृत्तिभिः संकल्पव्यवसायाभ्यामंतःकरणवृत्तिभ्यां चेत्येतैर्गृहे ग्राम्यस्य सांसारिकस्योप-
भोगतेन कुनाथस्य कुत्सितवरतेराजितात्मन अजितेंद्रियस्यास्य पुरुषस्य संबंधि वित्तं पंति अपहरंति ॥ २ ॥ गोमायवो यत्रेति रात व्याचष्टे अथ चेत्यथो

साक्षात्परमपुरुषाराधनलक्षणो योसौ धर्मस्तं तु सांपरायमुदाहरंति ॥ तद्धर्म्यं धनं दर्शनस्पर्शनश्रवणास्वादनावघ्राणसंक-
ल्पव्यवसायगृहग्राम्योपभोगेन कुनाथस्याजितात्मनो यथा सार्थस्य तथाजितात्मनो विलुंपंति ॥ २ ॥ अथ च यत्र कौटुं-
बिका दारापत्यादयो नाम्ना कर्मणा वृकसृगाला एवानिछतोपि कदर्यस्य कुटुंबिन उरणकवत्संरक्ष्यमाणं मिषतो हरंति
यथाह्यनुवत्सरं कृष्यमाणमप्यदग्धबीजं क्षेत्रं पुनरेवावपनकाले गुल्मतृणवीरुद्भिर्गह्वरमिव भवत्येवमेव गृहाश्र-
मः कर्मक्षेत्रं यस्मिन्न हि कर्माण्युत्सीदंति यदयं कामकरंडएष आवसथः ॥ ४ ॥

तरोपन्यासेनाम्ना दारापत्यादयः कर्मणा तु वृ-
काः सृगालाश्चापहरंतीत्यर्थः ॥ वृकसृगालसाधर्म्यमेवाह ॥ अनिछत इति कुटुंबिनः गृहाश्रमिणः कदर्यस्यातिलुब्धस्यानिछतोपि ॥ आत्मा पद्माश्रमि
निपोषः वत्सादिरितिभावः मिषतः पश्यतः सतः संरक्ष्यमाणमुरणमिव हरंति स्वपोषत्वे न कुर्वंति तस्मात्स्वरूपं भगवच्छेषतैकरूपमपहरंतीत्यर्थः ॥ ३ ॥ अ-
नंतर्वाक्स्वतगृहस्य गार्हस्थ्यं न त्याज्यमित्याशंक्य तावत्तद्गृहाश्रमस्य प्रसिद्धये तेन तत्तुल्यतामाह यथा हीति ॥ अनुवत्सरं प्रतिवत्सरं कृष्यमाणमहलछे-
दपूर्वकं कर्षणेन संस्कृतमपि तेनैव अदग्धबीजं न दग्धानि बीजानि यस्मिन्न तथाभूतं सत्स्फुरणावपनकाले बीजावापकाले यथा ।

रा०प०
५३

तत्या दिभिर्भिः करणैरेव भवत्येवं स्वदृशा स्वमरूपं कर्मलेखमपि त्वमिदं देवत्तुल्यं कृतः हि यस्मात्॥ यस्मिन्नगरे हास्यमेके कर्मणि रिमो त्सीदंति न मूलतो न श्यंति कुतो यदि च्छत्यस्मादयमा
वमस्य मदं कामनकरं दुःकामानामाकरं दुःख्याकर स्वरः भाजने कर्पूरं लयेपि पदरिमलो न दीयतु॥ एवमत्र कर्मनाशोपि तत्तद्वासनानाम् आत्मना कामानां पेटिकेत्यर्थः॥ त
त्रैवंश तैकर्मैलेखैरस्वदृशा स्वमेपतितः दंशामशाकतुल्यैः परपदैर्दैन्यैरूपद्रुतः शतिशोषः पालभादिभिरुपरुध्यमानः पीड्यमानश्च हिरण्यधनधान्यादिरूपो यस्य सप्ताहस्रि
त्रिरपहृतसम्यग्धीत्यपवाभवतीत्यर्थः॥ ग्रामावलिर्यत्र वाप्यासत्वाच्च धनस्य बहिःप्राणाः स्मृत्युक्तेः॥४॥ क्वचिद्गंधर्वपुरमित्युत्तरार्द्धं व्याचष्टे क्वचिदस्मिन्संसारे स्वविप
रीत्यर्तमानः स्वाम्यविद्याकृतिभिः यदुपरक्ते तेन मनसा तत्र विद्यादं स्वमाभिमानकामविषयाभिलाषः कर्मप्ररूपाप्ररूपकमेवासनाः नरलोकं स्वशरीरं पुत्रादिशरी
रं गंधर्वनगरवदनुपपन्नार्थं नरनुपपन्नमित्यर्थः॥ नित्यत्वरूपं वस्तुकं यस्यतं मिथ्यादृष्टिरनित्येनित्यरूपज्ञानरूपामिथ्याभ्रमयुक्तः उपपन्नार्थमिति नित्यं पश्यतीत्यर्थः॥५॥

क्वचित्स्फुरितवत्येषा नोदयस्मिन्लब्धवत्यविद्याकामकर्मभिरुपरक्तेन मनसानुपपन्नार्थेन नरलोकं गंधर्वनगरमुपपन्नमिति मिथ्यानुपश्य
ति॥५॥ क्वचिद्दातपोदकनिभान्विषयाननुपधावति पानभोजनस्नवायादिष्वसन्नलोलुपः॥६॥ क्वचिच्छाशोषदोषनिषदनंप्ररीष
विशेषतद्दरांगणानिर्मितमतिः॥ सुवर्णमयपादिस्त्वस्मिन्निकामकामरस्वोल्मुकपिशाचे॥७॥

उपपश्यतीति पश्यत्यर्थांतरमाह
तत्रैतित्वत्तत्र गंधर्वपुरे क्वचिदातपोदकं मृगतृष्णाजलं तत्तुल्यान्विषयान्पानादिषु लोलुपतया सक्तः सन्नुपधावत्यन्वेषयतीत्यर्थः॥६॥ चतुर्थपादं व्याचष्टे क्व
चिच्चेति क्वचिच्छापोषणं दोषाणां निषदनं स्थानं पुरीषविशेषमन्वेषिष्टो तस्य पुरीषस्यैव लोहितो वर्णो यस्य रजोगुणस्य तेन निर्मिता पुरीषविषयामतिर्य
स्य सः सुवर्णमयपादानुमिच्छति सुवर्णस्यान्नेपुरीषत्वं च वित्तलवर्णानगादेश्च वित्रभानुमातिरिश्वनाम माध्यमानस्रोजसापि वति तनिष्ठ्यूतं हाटकाख्यं सुवर्णमिति
बस्यातितत्रैवदृष्टांतः स्वाग्निकामेन कासरापरवश॥ उल्मुकमहत् पिशाचमिवेति शीतातुरो हसरपेग्निमिव ज्वलत्स्वमानं ततस्ततो धावंतमुल्मुकपिशाचम राम:
नित्तुद्ध्याध्यायति न तु तन्नाप्नोति कथंचित्प्राप्तव्येनेन भर्जितः सन्म्रियते एवं सुवर्णमनुधावन्नपीत्यर्थः॥७॥ ५३

निवासमतो येति व्याचष्टे अर्थेति ॥ निवासा दिव्यस्थाने केषांचिन्न नत्वपजीव्येष्वभिनिवेशो यस्य तथाभूतस्ततोस्यां संसारारण्यां परिधावति ॥८॥ कचिद्वेवाल्येत्याद्यरिव ।
चष्टे कचिद्वेति ॥ वाल्यौ पम्यया चकवा ततुल्यया प्रमदयास्त्रियायया वाल्या रजः स्वले पर्णाधीकरोत्येवं रजोगुणोत्कर्षकत्वेनाज्ञातामायादयंतीतत्तुल्याप्र
मदेतिभावः ॥ आरोहमं कमारोपितः आरूढस्तस्मिन्काले यः रजोरागस्तेन कपंभूतेन रजनी भूतेन रात्रिवदप्रकाशकेनाज्ञानवर्णेनेत्यर्थः ॥ रजनीभूत स्येवे
त्यपिपाठः ॥ तेनतमो मयरवेत्यर्थः दीर्घपाभेरजन्यारात्रौ भूता भवेत्यर्थः ॥ आतिरजस्वलमतिरतीवरजसाछन्नमतिरतरावासाधुमर्यादः ॥ अतोरजोव्याप्तचक
निवाद्विकाम्यितानर्थादीतिकमभाव्नौ नतादेवतानजानात्यनुपादेयमेवोपादेयतयाग्रस्त्वाति ॥९॥ एवक्रमसाजात्याडुत्तरश्लोकचतुष्टयं व्याचष्टे कचि

त्स्वचकदाचिल्लिवासयानीयद्विराणाद्यनेकोपजीवनाभिनिवेशगतस्त्वांसंसाराटव्यांमितस्ततः परिधावति ॥८॥ कचिच्च वाल्यै
पम्ययाप्रमदयारोहमारोपितस्तत्कालरजसारजनीभूतास्वसाधुमर्यादोरजस्वलालोदिग्देवता ॥ अतिरजस्वलमतिर्लोविजाना
ति ॥९॥ क्वचित्सकृद्वगतविषयवैतथ्यः स्वयंपराभिधानेनवि भ्रंशितस्मृतिस्तथैवमरीचितोयप्रायांस्तानेवाभिधावति ॥१०॥
कचिदुलूककोशिस्वनवदतिपरुषरभसाटोपंप्रत्यक्षंपरोक्षं वारिपुराजकुलनिर्भर्त्सितेनातिव्यथितकर्णमूलहृदयः ॥११॥

दिति ॥ कदाचित्सकृद्वगतं विषयेष्वन्यहारिषुवैतथ्यं वैयर्थ्यं पौरुषार्थस्यत्वं येन तथाभूतोपिपराभिध्यानेन देहवितया विभ्रंशितस्मृतिर्विभ्रंशितात्मस्मृ
तिरात्मविषयायस्य तयैववि भ्रंशितस्मृत्यामरीचितोयतुल्यान्स्वयमपुरुषार्थरूपत्वेपितत्वेनावभासमानान्तानेवविषयानभिधावति ॥१०॥ एवाङ्देम ।
वष्टे ॥ कचिदुलकेति ॥ उलूककोशिस्योः व्यककोटविशेषयोर्ध्वनिवदतिपरुषोरभसउत्साहस्तेनाटोपः संभ्रमः यथाभवत्येवं रिपूराजकुलस्य निर्भ
र्त्सितेनात्यंतव्यथितं कर्णमूलं हृदयं च यस्य तथाभूतस्तत्रास्ते ॥ तत्रप्रत्यक्षापरिवयवाक्यहलकस्यानीयं राजकुलं परोक्षात्रियवाक्यहंतकोशिस्थानीयं रि
पुकुलं विवक्षितं ॥११॥ सरति यथा दुग्धपदं वै मुक्तस्त्रपर्णादृक्षं मुक्तः सुकृतदीनाः स्त्यर्थः ॥ तथाकारस्करो विषति ङः तत्प्रगुस्याये भ्रणपद्रमाः तथाविधा

भा.पं.
५४
लेतापविषोदपनाविषकपाख्यततुल्यातभयापर्यग्रत्यद्रविणात्रष्टाहष्ठत्रयोजनपरस्यानिद्रविणानिधनानिपेषांतान।येषांद्रविणंकार्त्यपंदृष्ट्वार्थचनभव
तितेभयापर्यग्रत्यद्रविणात्रतरवजीवन्मृतानस्वयंजीवन्नपिम्रियमाणःमृतप्रायःजीवन्मृतःउपधावति॥१२॥कचित्क्षितोयाःसरितस्त्येताविव्याचष्टेएकदेति
कदाचिदसतोवेदेदेवव्रासराविद्गमकानांसत्संगात्संगान्निकृतानांचिनामतिर्येस्यमः॥क्षुदकस्नातःस्खलनवन्निरुदकनदीपतनवत्‌यथानिर्जलनदीगते
पतितस्यनपिपासाशामकजललाभःप्रत्युतशिरस्फुटनंचक्षयोभवतिपश्चादपितद्वेदनाजवतेतेएवमुभयतस्रइपरलोकेचदुःखदंपाषंडंपाषंडाचारमभि
यातिप्राप्नोतिस्वीकरोति॥यद्वा॥पाषंडकुलंप्राप्नोतितत्रजायतेत्यर्थः॥१३॥परस्परचालयनिरन्नइत्येतद्व्याचष्टे यदेति यदातुपरपीडयाऽन्धस्त्वन्नमात्मने
नपदाद्रुग्धपूर्वेमुकतमततदाकारस्कारकाकर्तुंपराप्नुमलताविषोदपानवदुभयार्थग्रन्थद्रविणाज्जीवन्मृतास्वयंजीव
नम्रियमाणउपधावति॥१२॥एकदासत्संगान्निकृतमतिर्शुदकस्रतः।स्खलनवदुभयतोपिदुःखदंपाषंडमभियाति॥१३॥य
दातुपरबाधयांधआत्मनेनोपनमति।तदाहिपितरपुत्रबर्हिष्मतःपितरपुत्रान्वासरवलुभक्षयति॥१४॥कचिदासाद्यगृहंदावव
त्प्रियार्थविधुरमसुखोदर्कशोकाग्निनादह्यमानोभृशंनिर्वेदमुपगच्छति॥१५॥कचित्कालविषमितराजकुलरक्षसाप
हृतप्रियतमधनासुः॥मृतकइवविगतजीवलक्षणआस्ते॥१६॥ स्वस्मैनोपनमतिनोपतिष्ठतेपरपीडयाप्यन्नंनलभतइत्यर्थः॥त
थापितरपुत्रबर्हिष्मनपितरपुत्रादीनांबर्हिःकृपाःतद्वत्पितरपुत्राणांकृशादित्तृणमात्रमपियेषुपश्यतितान्भक्षयतिबाधतइत्यर्थः॥१४॥आसाद्यदा
वमित्येतद्व्याचष्टेकचिदिति कदाचिद्दवाग्नितुल्यंप्रियार्थविधुरंभोग्यपदार्थरहितमसुखोदर्कंदुःखपरंपराप्रयुक्तंगृहदवाप्यशोकाग्निनादग्धाललाम
निश्वानिद्दितिनतदुःखेनशरीरंदह्यमानपाग्रमानोनिर्वेदमहोमयासुकृतमतोदुर्भगोमंदभाग्योहमित्येवमुपगच्छति॥१५॥कचयदेहेतामुश्येनव्याचष्टेक
चित्कालेनविषमितप्रतिकूलतांप्राप्तंयद्राजकुलंतदेवरक्षस्तेनापहृताःप्रियतमधनरूपाअसवःप्राणायस्यविगतानिजीवलक्षणानिहर्षादीनिय ५४

मेवैनैवमरैकैतवस्य तत्र श्लोकस्य पूर्वार्द्धं व्याख्यातप्रायमित्यभिप्रेत्य तदुत्तरार्द्धं व्याचष्टे कदाचिदिति। कश्चिदसत्कालांतरेऽनवस्थायित्वेन पुरुषांतरान
तुभाव्यत्वेन पुरुषांतरानतुभाव्यत्वेनचासत्स्वप्नदृष्टे कालांतरभाव्यत्वे तत्कालमात्रावसायि चेति यावत्। मनोरथेन मनोव्यापारेण संकल्पविकल्पात्मके
नउपगतं प्राप्तं स्वप्नदृष्टकर्मानुसारेण संकल्पविकल्पात्मकमनोरथानुसारि भगवत्स्वरूपाप्राप्तमित्यर्थः। ईदृशं पितृपुत्रादिसंश्रितिमन्वानः गतिशोचः
कालांतरावस्थायिप्रकृष्टांतरोऽनुभाव्यजाग्रतवस्तुतुल्यमतिरित्यर्थः। स्वप्ननिर्वृतिः स्वप्ने पितृपुत्रादिसुखलक्षणमात्रमनुभवति। स्वप्नस्य गंधर्वनगरतुल्यत्वे
चतद्वत्कालमात्रावस्थायित्वेनाप्यनुभाव्यत्वेऽप्यत्र विवक्षितं गंधर्वादिकं कश्चिल्लियतं चिरं नवसंति कश्चित्क्षणमवस्थितवंतोऽपि नपरे ज्ञायते तत्त
कश्चिन्मनोरथोपगतपितृपितामहाद्यसत्सदिति स्वप्ननिर्वृतलक्षणमनुभवति॥१७॥ क्वचिद्गृहाश्रमकर्मचोदनातिभरगि
रिमारुरुक्षमाणो लोकव्यसनकर्षितमनाः कंटकशर्करां क्षेत्रं प्रविशन्निव सीदति॥१८॥ क्वचिद्दुःसहेन कायाभ्यंतर
वह्निना गृहीतसारः स्वकुटुंबाय क्रुध्यति॥१९॥ स एव पुनर्निद्राजगरगृहीतोंऽधे तमसि मग्नः शून्यारण्य इव शेते। नास्य
त्किंचन वेद शव इवापविद्धः॥२०॥ तेषां निवासस्थानपरंपरया यन्नगरं कालांतरावस्थापी तत्र प्ररूपात्रभाव्यं चेति वदंति च॥१७॥ चलनक
विदित्यस्य पूर्वार्द्धं व्याचष्टे क्वचिदिति कदाचिद्गृहाश्रमे याकर्मणा चोदनाविषयत्वासामतिभरोपि स्तारः स एव गिरिस्तमारुरुक्षमाणस्तमारोढुमिच्छ
न्नदंतंगंतुमिच्छन्नवर्जुतिपित्तस्यशरीरायास यज्ञादिकर्मारंभ्यावसमाप्तिकर्तुकामस्ततरालौकिकैर्लोकभवैर्व्यसनैर्दुःखैरंतरायभूतैः पुत्रवि
रहत्याधिभिः कर्षितमनाः पीडितचित्तचित्तः कंटकशर्करासे क्षेत्रं प्रविशन्निव पर्वतमारुरुक्षन्नध्ये कंटकैः शर्करादिभिः स्वल्पपाषाणैश्चाकीर्णं क्षेत्रं प्र
विशन्स्वसीदतीत्यन्वयः॥१८॥ उत्तरार्द्धं व्याचष्टे कश्चिद्वेति। कदाचित् दुःसहेन सोढुमशक्येन कायाभ्यंतर वह्निना शरीरमध्यपरिवर्तिजठराग्नि
नागृहीतसारः गृहीतबलकादर्पैषाप्तस्व कुटुंबाय भार्यायै क्रुध्यति॥१९॥ कश्चिन्निर्गीरोऽस्य पूर्वार्द्धं व्याचष्टे स एवेति स एव संसाराध्वन्यन्यमा

भा·पं·
५५

णाराव यद्व ॥ कुर्तुं वायकुष्यन्नेव निर्दैवाजगर स्तेनस्वीतः स्वंधतमसि स्वंधे पतती त्यंधं स्वपराप्रकाशंयत्तम स्त्रज्ञानं तस्मिन्मग्नः मृत्यारण्ये निर्जने रण्ये स्वशो
ते स्वयस्य किंचिदपि न वेद किं त्वहमित्येतावन्मात्रमेव भासते न तु व्याप्तस्रग त्वादि वाह्याकारं जानाति तात्कालिकमस्य देहं लक्षयति अपविद्धः शवः इ
तः परिष्कृतः शाव स्वेति ॥ २० ॥ न स्येवो त्तरार्द्धं व्याचष्टे कदाचिदिति ॥ कचित्तद्दुर्जेनाराव दंदष्प्रकः सर्पादयो दशात्त्वभावः ते भग्नो मानो गर्वः स तिद्दुःखे तरती
वो गर्वः स शव दंष्ट्र्य स्वत्यान्तरा वालक्ष्णो निदाघाः त्दरणोयेन व्यथितं दुःखतं यद्ददयं तेन क्षीयमाणासंको च मानं यस्य सः स्वं धवदं धकूपे महति दुःखे पतति स्त्रयर्थः
२२ ॥ कर्हिचित्तकपरसाम्निति श्लोकं व्याचष्टे कर्हिचित्स्मे इति ॥ कामो विषयोपभोगः तेन ये मधुलवा सुखले शास्तानविचिन्वन्नेषयन्यदा परदारान्परस्व

कदाचिद्दन्नमानदंष्ट्रोदुर्जनदंदशूकैरलब्धनिद्राक्षणो व्यथितहृदयो नानुक्षीयमाणविज्ञानोंधकूपेंधवत्पतति ॥ २१ ॥ कर्हि
स्मचित्काममधुलवान्विचिन्वन्यदा परदारपरद्रव्याण्यवरुंधानो राज्ञः स्वामिभिर्वा निहतः पतत्यपारे निरये ॥ २२ ॥ अ
थ च तस्मादुभयथापि हि कर्मास्मिन्नात्मनः संसारावपनमुदाहरंति ॥ २३ ॥ मुक्तस्ततो यदि बंधाद्देवदत्त उपाच्छिनत्ति ॥ तस्मा
दपि विष्णुमित्र इत्यनवस्थितिः ॥ २४ ॥ कचिच्च शीतवाताद्यनेकाधिदैविकभौतिकात्मीयानां दशानां प्रतिनिवारणेऽकल्पो दुरंतचिंत
याविषण्णः आस्ते ॥ २५ ॥ विणग्निधावर्करुंधानः स्त्री कर्तुमारम माणाः राज्ञा स्वामिभिः परैर्वा निहतो भवति तदा परेऽनिरयेनरकप्रायकारागृहेऽनि
पतति राजादिभिर्निहितः ॥ कामगृहादिकष्टो भवतीत्यर्थः ॥ २२ ॥ मुक्तस्तत्र बंधादिस्यतैः प्रसंगात्प्रवृत्तस्य कर्मणिसंसारहेतुत्वं स्फुटयति अथ चेति ॥
यस्मादेवं तस्माद्व्यानंतरमेव उभयथापि हि परत्रास्मिन्नपि त्वतिमार्गे संसारस्यावपनं जन्मदेत्र्कं कर्मोदाहरंति ॥ २३ ॥ तत्रापि कृत्वात्त्वतिलमात्रं इत्ये तर
याच क्षेमतः इति ॥ यदि बंधान्मुक्तो भवति तर्हि तं तस्मात्काशाद्देवदत्तः अन्यदुपाच्छिनत्ति हरति तस्मादपि विष्णुमित्रो मोहरति इत्यनवस्थितिः त्वयसौ भोक्तुं लभत
इत्यर्थः ॥ २४ ॥ कचिच्च शीतातपेत्येतद्व्याचष्टे कचिच्छेति शीतादयो नेकाधिदैविकानां भौतिकात्मनां च दशानां दुःखावस्थानामाधिदैविकाश्चाधिभौतिकाश्च

रामः
५५

प्रतिक्रियायैश्चकस्योऽसमर्थः प्रतिक्रियां कर्तुमसमर्थः । अतएव चिंतयन्दुःखितः अपारचिंतायुक्त आस्ते २५ कश्चिन्मिथस्त्येतद्व्याचष्टे कदाचित्परस्परं अ
पहरन्यत्किंचिद्धनमन्येभ्यः सकाशात्काकिणिकामात्रं विंशतिकपर्दमात्रं ततोऽन्यूनं वाऽथ किंचिदपहरन्वित्तशाठ्येन धनलोभेन विद्वेषं प्राप्नोति ॥२६॥
कश्चित्कश्चित्क्षीणधनस्त्येतद्व्याचष्टे ॥ कश्चित्क्षीणधनं यस्मात्तएव शय्यासनवासादिभिरुपभोगैर्भोगोपकरणैर्विहीनः रहितः उपभोगश्च भोगश्च ।
प्रलब्धकः । कश्चिन्नृपदैवविद्योऽनवाप्तितदा यावदवाप्ति लब्धमनोरथः आप्राप्तसमीहितः तावत्स्वादानोऽन्यदीयधनग्रहणेऽभवस्मिति मतः केनापि परवं
चनोपायेन तदीयं धनं गृहीतं स्यादिति निश्चयप्रयुक्तः ततः परवचनादिग्रहणोद्योगाद्वमानादीनि प्राप्नोति ॥२७॥ अन्योन्यवित्तेति व्याचष्टे । एवं परस्परं वित्तस्य

कश्चिन्मिथोऽपहरन्नथ किंचिद्धनमन्योन्यं वा काकिणिकामात्रमप्यपहरन्नथ किंचिद्वा विद्वेषमेति वित्तशाठ्यात् ॥२६॥
कश्चित्क्षीणधनः शय्यासनाद्युपभोगविहीनोऽपावृतलब्धमनोरथस्त्यागादात्मवशं मतिमांस्ततो वै मानादीनि जनोऽद
भिलषते ॥२७॥ एवं वित्तव्यतिषंगविवृद्धवैरानुबंधोऽपि पूर्ववासनया मिथ उद्वहत्यथापवहति ॥२८॥ एतस्मिन्संसा
राध्वनि नानाक्लेशोपसर्गबाधित आपन्नविपन्नो यत्र यस्तमु ह वावेतरस्तत्र विसृज्य जातं जातमुपादाय शोचन्मुह्यन् ॥०

नापरं चाप्यधनस्य व्यतिषंगेण व्यसनेन विवृद्धारूढमूलं यद्वैरं तदनुबंधोऽपि प्रियकारित्वादिरूपपर्वस्यैवं नृत्तोऽपि पूर्ववासनया जात्याभिमानयुक्त
याः पूर्ववासनया मिथ उद्वहतः विवाहं करोति सतानेव वैरविषयानेवोद्वहति वैरविषयैरेव साजात्याभिमानेन विवादक्रियया संबध्नातीत्यर्थः
२८ । एतस्मिन्संसाराध्वन्येवमुक्तविधेनानाविधैः क्लेशैरुपसर्गैर्बाध्यमानः सुखदुःखरागद्वेषादिभिर्व्याविनन्ते वितत्ते नं तत्क्लेशोपसर्गयुक्त इत्यर्थः
आपन्नः आपदं प्राप्तः तत्र यो यो विपन्नो विपत्तिं प्राप्तः मृत इति यावत् तं तं विपन्नं पित्रादिरूपं विसृज्य जातं जातं पुत्रादिरूपमुपादायात्मीयाभिम
तिं कृत्वा पुनर्जातविपत्तौ शोचन्नतेन मुह्यन्न खिद्यन्नपक्रंदन्नतत्र शोको मानसी व्यथा खेदो वाचिकी दैन्योक्तिरूपा प्ररोदः कायकी अश्रु वि

भा॰ पं॰ सोऽचनादिस्पृशोऽज्ञात्मास्तु न रम्यजनतेन संहृष्यन् हाहादिभिः रुदैव ध्वंसं कुर्वन् विस्मयन् जात्यादीनात्मगामिदुःखसंभवानि निमित्तप्रतिकूलज्ञानप्रयत्नः कदापि विज्ञाता
५६ शनैर्गुणानगायन् उद्व्यमानः स्वेदमोहाभ्यां मोहं प्राप्तः तेन साधुना कर्मणा वर्जितः व्यमान इति पाठे वध्यमानः अथापि जीवसमद्भुः ॥ आरुरुक्षुरुपक्रान्तयोगः सं
साराध्वनया रजोऽस्मात्संसाराध्वनः सकाशात् तदध्वनः पारं व्रतिनैवावर्तते नायाति न प्राप्नोतीत्यर्थः किं तदध्वनः पारं यत्प्राप्तिनावर्तते तत्राह ॥ यदिदं योगाश्र
ममनाश्यमात्र शासनमिति प्रसिद्धं तत्संसाराध्वनः पारं उपदिष्टं तितव विदुः इति शेषः योगस्याध्यात्मयोगकर्मयोगानुगृहीतभावभक्तियोगस्यानुष्ठानसमं वि
विच्यज्ञानं शितवगौवा तदनुष्ठानमितिया ववदे वसंसाराध्वनः पारमित्यर्थः ॥२९॥ मनस्विनो निर्जितेति श्लोकं व्याचष्टे नवा इति ॥ उपशमरावशीलं ध्येयोपर

रविध्यन्नवरुदन् संहृष्यन् विस्मयन्नुद्ध्यमानः ॥ साधुवर्जितो नैवावर्तेत व्यापि यत आरब्धएव परलोकस्या
ध्वनः पारमुपदिष्टं यदिदं योगानुशासने ॥२९॥ न वा एतदनुरुन्धते यच्छन्ति मन्यत्तदंडाप्रनयश उपशमशीला
उपरतात्मन् समनव गच्छति यदपि दिगिभजयिनो मनस्विनो वै राजर्षयः किं तु परमर्धपाया रन्तस्यामेव ममयामिति
हतवैरानुवेधायां विसृज्य स्वयमुपसंहृता ॥३०॥ अस्मिन्नध्वन्यनुमिन्नुपसर्गाः सायायासुखं दुःखराग द्वेषभयाभिमानप्रमा
न्मादशोकमोहलोभमात्सर्येर्ष्यावमानक्षुत्पिपासाधिव्याधिजन्मजरामरणादयः ॥३१॥

तः मिसद्दीतः आत्मा मनो यैस्तेऽनुव योमननशीलाः यत्तदंडान् निवृत्तमनतद्रोहाः सर्वभूतसुहृदः संतः इत्यर्थः यच्छंति मं निरतिशयसुखरूपं परमात्मप्राप्त्युपायं योगानुशास
नमुपतिष्ठंति प्राप्नुवंति ॥ तच्छतमं निर्जितदिग्गजेन्द्रा अमनस्विनः अनिर्जितांतःकरणा राजर्षयो नैवावरुन्धते न प्राप्नुवंति नैवेवव्रजंति उपायानुष्ठानं सर्व
कमुपदंनयांतिकिं तु यं पृथिवीं ममेत्यतिमानेनैव प्रहृतवैरानुवंधः मृधेषु धेशयीरन केयं ममाभिमानविषयभूता तत्राह ॥ यां पृथिवीं विसृज्य स्वयमुपसंहृताम् राम॰
ताः इत्यर्थः ॥३१॥ सिंहावलोकिन्यायेन वाधोपसर्गैरित्यत्राभिप्रेतमुपसर्गराशिं दर्शयति मादृग्ध्वनीति ॥ अस्मिन्नध्वनि संसाराध्वनि इमे स्वर्गादयः उपसर्गा इत्यर्थः ॥३० ५६

यम जातो येत द्या चष्टे कापीति ॥ स्त्रीवेषयादेवमायया भगवन्मायया कल्प्या भुजलताभ्यामुपगूढः आलिंगितः प्रस्कन्नंगतं विवेकात्मविज्ञानं यया यद्वा ॥ विवे-
को देहादिलक्षणात्मविवेकः विज्ञानं भगवद्रूपमनात्मकं तद्रहितः तस्याः स्त्रिया विहारगृहं क्रीडागृहं तदारंभे आकुलं हृदयं यस्य तस्मिन्नाश्रमे वनिताधि-
ष्ठानगृहे आसक्ताः प्रसक्ताः सुतादयस्तेषां भाषितादिभिरपहृतं हृदयं यस्य अतएव अजितेन्द्रियः अंधे तमसि दुःखेन नरके आत्मानं प्रहिणोतीति प्रक्षिपति ॥ ३१ ॥ पूर्वो-
क्त्याख्यातमप्यतोतरार्धं व्याचष्टे कदाचिदिति परमाण्वादिपरार्धोऽपवर्गो अन्तः स एवोपलक्षणं यस्य कालोपलक्षणादिति पाठे अपरमाण्वादिपरार्धापवर्गा-
वान्तरूपं यत्कालस्योपलक्षणं उपलक्ष्यते अस्य उपलक्षणं स्वरूपं तस्माद्धि त्वर्थः रंहसा शीघ्रेणापरिवर्तितेन परिभ्रमणेन वयसा बाल्यादिक्रमेण ब्रह्माणमभिव्या-

क्वापि देवमायया स्त्रिया भुजलतोपगूढः प्रस्कन्नविवेकविज्ञानो यद्विहारगृहारंभाकुलहृदयस्तदाश्रयावसक्तसुतदु-
हितृकलत्रभाषितावलोकविचेष्टितापहृतहृदय आत्मानमजितात्मापारेंऽधे तमसि प्रहिणोति ॥ ३२ ॥ कदाचिदीश्वरस्य
भगवतो विष्णोश्चक्रात्परमाण्वादिद्विपरार्धापवर्गकालोपलक्षणात्परिवर्तितेन वयसा रंहसा हरत आब्रह्मतृणस्तंबादी-
नां भूतानामनिमिषतो मिषतां वित्रस्तहृदयस्तमेवेश्वरं कालचक्रनिजायुधं साक्षाद्भगवंतं यज्ञपुरुषमनादृत्य पाखंडदेव-
ताः कंकगृध्रबकवटप्राया आर्यसमयपरिहृताः सांकेत्येनाभिधत्ते ॥ ३३ ॥ प्य तृणस्तंबादिभूतानां कालयमानानां नीलत्वादिरूपेण

ग्रासयमानानायुषामित्यर्थः ॥ मिषतां पश्यतामनिमिषतः निमेषमकुर्वत ॥ अप्रमत्तादिति वा हरतः आयुरिति क्रियायास्तस्य शेषः ॥ अनिमिषः अकालयमानाद्वित्रस्तोऽप्र-
क्रान्तः वित्रस्तहृदयं मरणाशंकमानं यस्य तं अमरत्वाय पाषंडदेवताः सांकेत्येनाभिमुख्येन धत्ते किं कृत्वा कालचक्रं निजं स्वीयमायुधं यस्य तमेव
साक्षाद्भगवंतं यज्ञपुरुषमनादृत्य पाखंडदेवताः कथंभूतास्ताः कंकगृध्रबकप्रायाः विप्रवंचनोपि वंचयंताः ॥ आर्याणां वैदिकानां समयात्सिद्धांताद्बहिष्कृताः
सांकेत्येनेत्यनेन पाखंडदेवताराधनं पाखंडसांकेत्यनिबंधनं न तु वैधमित्युक्तं ॥ ३३ ॥ यदा स्विति ॥ आत्मा वंचितो यैस्ते रूपवंचिताः सन्न ब्रह्मकुलं प्रविष्टस्तेषां

भा॰पं॰ ५७

श्रासंगानां शीलमिति प्रतीकोपादानं तद्व्याचष्टे तैर्वैचित्र्यमिति तद्व्याचष्टे उपनयनादौ त्याराधनमेवेत्यं तेनश्वारोचयन्नभिमन्यमानः उपैति वानरामित्यस्य व्या
ख्यानं पश्चात्कुले मज्जते इति तदुपपादयति ॥ निगमोक्तेश्वाचारे परिशुद्धः स्वस्यब्धमावातमस्य पश्चात्कुलस्य मिथुनीभावः कुटुंबवर्द्धनं केवलं देहमापारस्त्रे
षेवंकेवलमाप्यसुखमेवनाशंथ यथा वानरजातेरितिनेत्रदृष्टांतः ॥३४॥ तज्जातिरासेनेत्येतद्व्याचष्टे तत्रापीति ॥ पश्चात्कुलेपि निरवरोधः प्रतिबंधरहि
तः स्वैरेण स्वैकृपयायुत्कृदेशकालप्रतीवामंतरेणाक्रीडन्नतिकृपणात्यंतं तथाकुलावृद्धियस्ययोषित्पुरुषयोः परस्परं मुखनिरीक्षणादिरूपेण ग्राम्यकर्मणो वृ
विस्मृतः कालावधिर्येयोवमानेयस्यमत्राते ॥३५॥ द्रुमेषु रंस्यन्नित्येतद्व्याचष्टे क्वचिदिति विहन्वत्केवलमैहिकसुखयोजनके गृहद्रुमादिके

यदा तु पाषंडिभिरात्मवंचितैरुपवंचितो ब्रह्मकुले समावसंस्तेषां शीलमुपनयनादि श्रौतस्मार्तकर्मानुष्ठानेन भगवतो य
ज्ञपुरुषस्याराधनमेव तदरोचयन् शूद्रकुले भजते निगमाचारेऽशुद्धितो यस्य मिथुनीभावः कुटुंबभरणं यथा वानरजातेः ॥३४॥
तत्रापि निरवरोधः स्वैरेण विहरन्नतिकृपणबुद्धिरन्योन्यमुखनिरीक्षणादिना ग्राम्यकर्मणैव विस्मृतकालावधिः ॥३५॥
क्वचिद्द्रुमवदैहिकार्थेषु गृहेषु रंस्यन् यथा वानरः सुतदारवत्सलो व्यवायक्षणः ॥३६॥ एवमध्वन्यवरुंधानो मृत्युगजभयात्तम
सि गिरिकंदरे प्रायेपतन्नकर्मवल्लीमवलंब्य ततः श्वापदः कथंचिन्निस्तारकाद्विमुक्तः पुनरप्येवं संसाराध्वनि वर्तमानो नरलोकसार्थे
मुपयाति एवमुपरिगतोपि ॥३७॥

केवलमिहैव सुखं तेन पश्येति भावः यद्वा द्रुमवत्तद्वमरवयथा वानरः सुतदारवत्सलो मैथुनमेव दनाणउत्सवो यस्य तथा भूतो भवत्ते
व्यमयमपि केवलमैहिकार्थेषु गृहेषु रंस्यन् सुतदारवत्सलो व्यवायलक्षणः स्वबंधनं विवशो भवतीत्यर्थः ॥३६॥ क्वचित्प्रमादादित्येतद्व्याचष्टे रावमिति संसाराध्वनि
सुखदुःखाद्यवस्थासु अनुभवमानः मृत्युरेवाजगरस्य भयाद्गिरिकंदरतुल्ये तमसि रोगाद्यापदि पतन् ततः पुनरप्येवं जीवनहेतुभूतां कर्मरूपां वल्लीमव
लंब्य ततः श्वापदः रोगाद्युपद्रवरूपात्मकात्केनापि द्वयासेन विमुक्तः पुनरप्येवमुक्तरीत्या संसाराध्वनि वर्तमानो नरलोकसार्थेनस्वपारीरजीवसमूहमुपयाति

रामः ५७

पि संसाराध्वन्यटतीत्यर्थः तथा चोक्तं ते तं भुक्ता स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंतीति ॥३७॥ एवं परोक्षरूपमवधूतवचो व्याख्याय तन्माहात्म्यप्रति-
पादकान् श्लोकानवतारयति ॥ तस्येदं माहात्म्यं ॥ आर्षभस्य ऋषभपुत्रस्य महात्मनो महानुभावस्य राजर्षेर्वर्त्मेनागंमनसाप्यनुवर्त्तुमन्यो नृपो नार्हतीति यथा
गरुडस्य गतिं मक्षिकेत्यर्थः ॥३८॥ तत्र वक्तुमाह ॥ यस्त्वार्षभो राजर्षिः स्वाधीनः मनोज्ञा नतएव दुस्त्यजान दुःखेनापि त्यक्तुमशक्यान्पुत्रान्सुहृच्च जनपदौ हृद्दैवं
युवैव मलमिव हित्वा मिव जहौ वमासीत ॥ त्यागे हेतुमाह उत्तमश्लोके भगवति लालसः लंपटः आसक्तचित्त इति यावत् ॥३९॥ न केवलमसौ श्रीर्देवापि तु नैच्छ-
दित्याह योदुरप इति ॥ आर्षभः दुस्त्यजान्क्षित्यादीन् नैच्छदिति क्षितिं भौरतं वर्षं सुताः पुत्राः अर्थं धनं दाराः स्त्रियः इमान्सुरवरैरिंद्रादिभिः प्रार्थ्यां श्रियं संपदं कथंभूतां सदया-

तस्येदमु पद्यां पति आर्षभस्येह राजर्षेर्मनसापि महात्मनः नानुवर्त्मार्हति नृपो मक्षिकेव गरुत्मतः ॥३८॥ यो दुस्त्यजान्दारसुता-
न्सुहृद्राज्यं हृदिस्पृशः जहौ युवैव मलवदुत्तमश्लोकलालसः ॥३९॥ यो दुस्त्यजान्क्षितिसुतस्वजनार्थदारान् प्रार्थ्यां श्रियं सुरव-
रैः सदयावलोकां नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवानुरक्तमनसामभवोपि फल्गुः ॥४०॥ यज्ञाय धर्मपतये विधिनै-
पुण्याय योगाय सांख्यशिरसे प्रकृतीश्वराय ॥ नारायणाय हरये नम इत्युदारं हास्यन्मृगत्वमपि यः समुदाजहार ॥४१॥

वलोकां सदयापूर्वकः अवलोको राज्ञोपस्यां ता राज्ञो दयायुक्तो वलोको मयि प्रसरत्विति प्रार्थयमानामिति भावः ॥ नैच्छन्नित्यादिष्टरागमपि नाकरोदित्यर्थः नै-
तच्चित्रं किंतूचितं चैतदित्याह ॥ तदुचितमिति कुतो यतो मधुद्विषः सेवायामनुरक्तमनसां महतामभवो मोक्षोपि फल्गुरल्पः भगवत्सेवापेक्षया मोक्षोप्यल्प इ-
त्यर्थः ॥४०॥ तस्य मधुद्विषः सेवानुरागातिशयमेवाह यज्ञाय यज्ञनाम्नो ऋषभमवे च धर्मपतये वतारे वंशोस्य मधर्मो रक्षणगोत्रे विधिनिपुणाय धर्मानुवर्तिने।
वत्ता विधौ वैनैपुण्ययुक्ताय योगाय सांख्याय आत्मानात्मविवेकात्मको ध्यानयोगः स एव शिरः शिरोवत्प्रधानं अंगं यस्य तस्मै योगाय विवेकादिसाधनसन्नकानुग्रहे।
भक्तियोगगम्याय योगहृत्तस्य अन्ये ओपचारिकः प्रकृतीश्वराय मायानियंत्रे नारं जीवसमूहः अयनमाश्रयो यस्य तस्मै अनेन चिदचिच्छरीरकत्वमुक्तं हरये अ-

भा॰पं॰
१८

भितत्वं च हरायनमनत्यदारंभ्यामृदाजदारसदाहृतवान् किं कर्तुमिच्छन् मृगत्वं ह गिरणाशरीरमपि हास्यन् हातुमिच्छन् ॥ अत्र मृगत्वं हास्यन्नमृदाजदारेति दारो
दाहरणाद्योयोगपदप्रतीयते तथापि मृगजन्मनो वै कल्पदशायां समृदाहरणमत्र विवक्षितं अन्यथा चरमदशायां मुक्तो नाम मृगदेहरोत देहावसाने मुक्ते र
भिन्न्यावेषवेष्टत्यक्तस्पृहत्वे न पूर्वापरग्रंथविरोधापत्तेः उदाहरणं चात्रा व्यक्तो च्चारणं विवक्षितं मृगजन्मनस्तस्य व्यक्तोच्चारणसंभवादन्यथा भक्तियोगो
पसंहारापत्त्याजन्मांतरविलंबायोगापत्तेः ॥ ४१ ॥ तत्र भरतचरितस्य श्रवणादिफलमाह यइदमिति । भागवतैः समाजिताः संस्तुता अवदाताः शुद्धा गुणा यस्य क्रो
धादयः कर्माणि भरत हितानाचरणादिरूपाणि च यस्य तस्य राजर्षेर्भरतस्य चरितं यः शृणोति स्वस्त्ययनं मंगलावहमायुष्करं धन्यं धनप्रापकं स्वर्ग्यं स्वर्गसाधनम्

य इदं भागवतसभाजितावदातगुणकर्मणो राजर्षेर्भरतस्यानुचरितं स्वस्त्ययनमायुष्यं धन्यं यशस्यं स्वर्ग्यापवर्ग्यं वानु
शृणोत्याख्यास्यत्यभिनंदति च सर्वा एवाशिष आत्मन आशास्ते न कांचन परत इति ॥ ४२ ॥ इति श्रीभागवते महापुराणे पंच
मस्कंधे चतुर्दशोध्यायः ॥ १४ ॥ श्रीशुक उवाच ॥ भरतस्यात्मजः सुमतिर्नामाभिहितो यमु ह वाव केचित्पाखंडिनः ॥ ऋषभ
स्यपदवीमनुवर्तमानं चानार्या अवेदसमाम्नातां देवतां स्वमनीषया पापीयस्या कलौ कल्पयिष्यंति ॥ १ ॥

नापवर्ग्यं मुक्तिसाधनं च यो नु शृणोत्याख्यास्यति कथयति च अभिनंदति अनुमोदते च स आत्मनः स्वतः एव सर्वा आशिषः समीहितान्यायशास्ते प्राप्नोति न तु कंचि
दप्याशिषं परस्मादपेक्षते स्वस्य धीः चरित्रस्य स्वस्त्ययनादिकं चन स्वरूपेणापि तु श्रवणादिविषयत्वेनेति ख्यापनाय शृणोत्याख्यास्यतीत्युक्तं न केवलं स्वस्त्यय
नादिकमेवास्य फलमपि तु न तु कमन्यत्सर्वमपीत्यभिप्रायेणोक्तं सर्वा एवाशिष आत्मान आशास्ते इत्यादीति ॥ ४२ ॥ इति पंचमे चतुर्दशः ॥ १४ ॥ एवं भरत
चरित्रमुपवर्ण्य तत्संततिं प्रपंचयति श्रीशुकः भरतस्य सुमतिर्नामाभिहितः अथ वह ततः यं सुमतिमृषभस्य पदवीं योगचर्यारूपामनुवर्तमानमवलोक्य
केचित्पाखंडिनोनार्याः कलौ पापीयस्या स्वमनीषया अवेदसमाम्नातामवेदोक्तां बौद्धदेवतामिति भावत ॥ कल्पयिष्यंति बुद्धएवसाक्षात्सुमतिरूपेणाव

८

रामः
१५८

तस्मात्सुमतेः वृद्धसेनायां भार्य्यायां देवताजिन्नामा पुत्र उत्पन्नः आसुर्यां देवताजिद्भार्यायां तत्तनयः देवताजित्पुत्रः देवद्युम्नो नाम्ना अभवत्ततो देवद्युम्नात्त
द्भार्यायां धेनुमत्यां परमेष्ठी नाम सुतो जातः तस्य परमेष्ठिनस्तद्भार्यायां सुवर्चलायां प्रतीहाख्यः पुत्र उपजायत यः प्रतीहः स्वकुलस्य आत्मविद्यामाख्याय उपदि
श्य स्वयमनेनैव स्वयं संशुद्धः निर्मलान्तःकरणः परमपुरुषमुपासितवान् अनुस्मृतिरत्र प्रत्यक्षतापन्नमुपासनं विवक्षितं भवति प्रतीहात्सुवर्चलायां जातास्त
प्रतिहर्त्तादयः प्रतिहर्त्ता प्रस्तोता उद्गातेति त्रयोपीज्याकोविदा यज्ञनिपुणाः सूनवः पुत्रा आसन् तत्र प्रतिहर्त्तुः स्तुत्यां भार्यायामजभूमानावजोत्पद्येतिच
द्वौ पुत्रावजनिषतां उद्गतवंतौ तस्माद्भूम्नो ऋषिकुल्यायां भार्यायां उद्गीथाख्यः पुत्रः तत उद्गीथाद्देवकुल्यायां भार्यायां प्रस्ताराख्यः पुत्रः प्रस्ताराद्धि ऋषिकुल्या

तस्माद्वृद्धसेनायां देवताजिन्नाम पुत्रोभवत्॥ अथासुर्यां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां सुतः परमेष्ठी तस्य सुव
र्चलायां प्रतीह उपजातः य आत्मविद्यामाख्याय स्वयं संशुद्धो महापुरुषमनुसस्मार॥२॥ प्रतीहात्सुवर्चलायां प्रतिहर्त्रा
दय स्त्रय आसन्निज्याकोविदाः सूनवः प्रतिहर्त्तुः स्तुत्यामजभूमानावजनिषातां॥ भूम्नः ऋषिकुल्यायामुद्गीथस्ततः प्रस्तावो दे
वकुल्यायां प्रस्तावान्नियुत्सायां हृदयज आसीद्विभुर्विभोरत्यां च पृथुषेणस्तस्मान्नक्त आकूत्यां जज्ञे नक्ताद्द्रुतिपुत्रो गयो
राजर्षिप्रवर उदारश्रवा अजायत साक्षाद्भगवतो विष्णोर्जगद्रिरक्षिषया गृहीतसत्त्वस्य कलात्मवत्वादिलक्षणेन महापुरुषतां प्राप्तः

यां भार्यायां विभुर्नाम हृदयज आसीद्विभोः रत्यां भार्यायां पृथुषेणाख्यः पुत्रः तस्मात्पृथुषेणादाकूत्यां भार्यायां नक्तो नाम जज्ञे जातः नक्ताद्गयो नाम द्रुतिपुत्रः क्र ३
तो नक्तस्य भार्यायां पुत्रत्वमासीदित्यर्थः॥ गयं विशिनष्टि राजर्षीणां मध्ये श्रेष्ठः उदारश्रवा विपुलकीर्त्तिः जगतो रिरक्षिषया रक्षितुमिच्छया गृहीतसत्त्वस्य उ
पात्तशुद्धसत्वमूर्त्तेर्भगवतो विष्णोः कलांशः अंशः अतः स्वात्मनस्तत्वं प्रशांतमनस्कत्वं तस्य प्रतिनालक्षणेन गुणेन लक्षितेनेति अखिललक्षणो धर्मः महापुरुष
त्वप्राप्तः ॥३॥ महापुरुषत्वमेवाह स वा इति ॥ स वै गयः प्रजापरिपालनादिरूपेण स्वधर्मेण स्ववर्णधर्मेण तत्र पालनं स्यात् पोषणमन्नपानादिना प्रीणनम

गी॰ पं॰ ध्यितप्रदानेन उपलालनं सुतवत्स्य पोषणं भक्षणासनं दुग्धो गो गोस्त्रि वारणं तथाश्चमादिना पंचमहायज्ञादिना स्वाश्रमधर्मेण च ॥ इज्याश्रद्धः पंचमहायज्ञपरः आदिशब्दे

५५ विवेकविशोकादीनामपि संग्रहः एकः चशब्दश्चात्मयाथात्म्यज्ञानयोगसमुच्चायकः इज्यादिकं स्वाश्रमधर्मं विशिनष्टि भगवति ब्रह्मणि परावरे महापुरुषे स

र्वात्मनां समर्पितपरमार्थलक्षणेनेति भगवति ब्रह्मणीति भगवद्ब्रह्मशब्दयोरेकविशेषणत्वमुक्तं भगवत्त्वे पराकरत्वे हेतुः परे ब्रह्मादयो यस्मै अवराः यस्मात्स परा

वरः तस्मिन् यथा कर्तुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति तत्क्रतुन्यायेनोपासितुर्भेदापुरुषत्वापादकं भगवद्दासावरणमुपास्यमहापुरुषत्वं म

हापुरुषशब्देन सर्वात्मना सर्वप्रकारेण करणत्रयेणापि तेनां समर्पितं परमार्थलक्षणं यत्फलस्वरूपं यस्मिंस्तेन ॥ अनभिसंहितफलत्वेत्यर्थः भगवत्परमा

र्थाभिलाषितोर्थः फलमिति यावत् तत्त्वदस्ति येन संगेनार्पितः परमार्थलक्षणः संयोगस्य इति ममेदं कर्मेन भवतीति तदित्युक्तं संगेनेति वार्थः ब्रह्मविद

सवैस्वधर्मेण प्रजापालनपोषणाद्यात्मनोपलालनादिप्रशासनलक्षणेनेज्यादिना च भगवति महापुरुषे परावरे ब्रह्मणि सर्वात्म

नार्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेन चाभीक्ष्णशः परिभावितविशुद्धमतिरुपर

तात्मन्येवात्मानं विस्वयमुपलभमानं ब्रह्माभवोपि निरभिमानेनावावनिमज्जपत् ॥ ४ ॥

रणाउसेवयापादितभगवद्भक्तियोगे

नेत्यस्मत्तत्त्वापमर्थं अर्पितपरमार्थलक्षणेन कर्मभिस्याराध्या तेयुंजीतेत्युक्तविधात्मसमर्पणरूपशरणागतियोगांगविशिष्टेनेति तमेव शरणं गच्छ सर्वभावेन भारतम

मेकं शरणं व्रजेति भक्त्युगतयाशरणागतेः कर्तव्यताभिधानात् ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेनेत्यनेन भगवद्भक्तियोगोत्पत्तिस्सेवा

येत्युक्तं ब्रह्मविच्चरणानुसेवयेत्यनेन देवमिवाचार्यमुपासीत आचार्यवान् पुरुषो वेद तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्यादिप्रकृतिविहिताचार्यस

बंधोस्याभिहितः ब्रह्मविदित्यनेनाचार्यलक्षणमुक्तं गुरुस्समाश्रयणसमयस्मस्त्यच्यतेस्वधर्मेणेत्यादिना ॥ ज्ञानकर्मयोगाङ्गद्वयमाह तेनन्यासयोगांगकेन भ

क्तियोगेनेत्युक्तं भवति ॥ उक्तविधेन भगवद्भक्तियोगेनाभीक्ष्णशः पुनः पुनः परिभाविताविशोधितान्तराव विशुद्धामतिर्यस्य सः ॥ अतएव उपरतमम । ५५

श्वहेमकुरुहरिमालयमाल्यवद्गंधमादनाख्यैः सुष्ठु विभक्तानि अत्र्यंसंकीर्णानि भवंति वर्तंते तेषां नवानां वर्षाणां मध्ये इलावृतं नाम वर्षमभ्यंतरं अंतर्विद्यते इत्यर्थः
यस्य जंबूद्वीपस्य इलावृतवर्षस्य वा नाभ्यां मध्ये अवस्थितः सौवर्णः सुवर्णमयकुलगिरीणां राजा मेरुः । द्वीपस्य जंबूद्वीपस्य आयामो विस्तारः लक्षयोजनप्रमा
णं तावत्समुन्नाह उच्छ्रायो यस्य तथाभूतः कुवलयं भूमंडलमेव कमलं तस्य कर्णिकाभूतः स्थितः तस्य मेरोर्मूर्ध्नि उपरिभागः द्वात्रिंशत् सहस्रयोजन
२ विस्तीर्णः मूले षोडशसहस्राणां योजनानां यस्य सः सुमेरुरिति विशेष्यानुषंगः योजनमिति नपुंसकपाठे तस्य मेरोर्मूले षोडशसहस्राणां योजनानां
समाहारः षोडशसहस्रयोजनं परिमाणं वेदितव्यमित्यर्थः पाताद्वितात्स्त्रीवाभवः । तावता षोडशसहस्रमानेन भूम्यामंतः प्रविष्टः एवं लक्षयोजनोन्न
तस्स मेरुरिति फलितं ॥३॥ उत्तरोत्तरेणेलावृतं इलावृतवर्षस्योत्तरोत्तरं क्रमेण नीलश्वेतशृंगवत्संज्ञकारम्यकादीनां त्रयाणां मर्यादागिरयः सीमापर्वताः प्रा
उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृंगवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादाः गिरयः प्रागायताः उभयतः
क्षारोदावधयो द्विसहस्रपृथव एकैकशः पूर्वस्मात्पूर्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्येण एव ह्रसंति ॥४॥ एवं
दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभा
रतानां यथासंख्यं ॥५॥ गायताः पूर्वतो दीर्घाः उभयतः पूर्वपश्चिमयोः क्षारोदेः लवणसमुद्रावधि येषां ते लवणोदधिपर्यंताः इत्यर्थः द्विसह
स्रयोजनविस्तीर्णाः दशांशाधिकांशेन दैर्घ्येण ह्रसंतीति नत्वेवं पृथुत्वयोः नीलादिषु त्रिषु पूर्वपूर्वापेक्षया उत्तरस्य दैर्घ्ये दशांशाधिकांशेन न्यू
नमित्यर्थः द्वीपस्य मंडलाकारत्वादिति भावः ॥४॥ एवं दक्षिणेनेलावृतं इलावृतवर्षस्य दक्षिणतः ॥ निषधादयस्त्रयः पर्वताः क्रमेण नीलादिभिः समप
रिमाणा अयुतयोजनमुत्सेधः उच्छ्रायो येषां ते अयमर्थः यथा नीलादीनां पृथुत्वं नीलादिषु पृथुत्वं चैषामिति द्रष्टव्यं हरिवर्षादीनां त्रयाणां यथा
संख्यं मर्यादागिरयः ॥५॥ तथा इलावृतमपरेणेलावृतस्यापरेण पश्चात्पूर्वेण च माल्यवद्गंधमादनौ अपरेण माल्यवान् पूर्वेण गंधमादनः ॥

भा॰ पं॰ ६२

इत्येतौ पर्वतौ क्रमेणानीलनिषधायतौ उत्तरतो नीलपर्यंतं दक्षिणतो निषधपर्यंतं च दीर्घौ नीलनिषधपर्यंतोत्तरदक्षिणायामावित्यर्थः॥ तावेव द्विसहस्रं पृथुवि-
स्तीर्णावित्यर्थः। तावेव केतुमालभद्राश्वयोर्वर्षयोः सीमानं मर्यादां विदधाते कुरुतः। नन्वेवं सति द्वीपरेखायामिलावृतवेष्टितो मेरुर्मध्ये ततः पूर्वा-
परतो गिरिद्वयं वर्षद्वयं च नातः किंचिदस्ति दक्षिणोत्तरदिशायां च तथैवेलावृतवेष्टितो मेरुर्मध्ये नवपत्राणि वर्षाणि गिरयश्च तत्कथं सर्वतो लक्षप्र-
माणत्वं जंबूद्वीपस्य उच्यते मेरोः षोडशसहस्राणि सर्वतः स्थितत्वादिलावृतस्याष्टादश अन्येषां वर्षाणां चतुःपंचाशत् गिरीणां दश चेत्येवं दक्षिणोत्तरदिशि
तावल्लक्षत्वे। पूर्वापररेखायामपि तु मेरोरिलावृतस्य चतुस्त्रिंशत् गिर्योश्चत्वारि शेषाणि द्विषष्टिसहस्राणि केतुमालभद्राश्वयोर्वर्षयोरित्येवं लक्षं सर्वतः स्थि-

तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गंधमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः॥ केतुमालभद्राश्वयोः सीमा-
नं विदधाते॥ ६॥ मंदरो मेरुमंदरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टंभगिरयः उपक्लृप्ताः
चतुर्ष्वेतेषु चूतजंबूकदंबन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपवित-
तयः शतयोजनपरिणाहाः॥ ७॥ ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभावि-
कानि भरतर्षभ धारयंति॥ ८॥ तत्वादिलावृतस्याष्टादश द्वीपरवर्षयोगात्समुद्रदैर्घ्ये द्रष्टव्यं न ततो विरोधः॥ ६॥ मंदरादयश्चत्वारो गिरयः प्रागादिक्र-
मेण मेरोश्चतुर्दिशमवष्टंभगिरयः मेरोरवलाऽवष्टंभं निपतितिवद्धेतीत्यवष्टंभास्ते च ते उपक्लृप्ताः विन्यस्ताः कथंभूताः अयुतयोजनप्रमाणो विस्तारो
न्नाहौ येषां तथाभूताः॥ चतुर्ष्वेतेषु मंदरादिषु क्रमेणाम्रजंबूकदंबन्यग्रोधाश्चत्वारः पादपश्रेष्ठाः पर्वतानां केतवः ध्वजा इवाधिसहस्रमेकादशशता-
न्युन्नाहो येषां तावत्प्रमाणानां विटपानां शाखानां विततिर्येषां शतयोजनपरिणाहो येषां ते उपक्लृप्ताः इत्यनुषंगः॥ ७॥ तथा च चत्वारो ह्रदाश्च क्रमेण क्षी- राम:
रमध्विक्षुरसमृष्टजलात्मकाः संति॥ तानेव विशिनष्टि यदुपस्पर्शिनः यज्जलस्पर्शिनः सिद्धादयः स्वाभाविकान्यष्टमहैश्वर्याणि हे राजन् धारयंति॥ ८॥ ६२

देवोद्यानानि देववनानि क्रमेण नंदनादीनि भवंति तान्येवाह विपिनद्वि येषु देवोद्यानेषु अमरललनानां सुरस्त्रीणां ललामभूयपतंतद्धत्स्थितम् सुरवनितानां श्रे
ष्ठास्त्रियः तासां यूथस्य पतयः ताभिः सह संभूय उपदेवगणैः उपगीयमानः महिमा येषां ते विहरंति देवानां क्रीडास्थानानीत्यर्थः ॥ ९ ॥ वृत्ताद्विभवा नदीराह
मंदरेति मंदरशिखरस्याधस्तात् उत्संगे एकादशशतयोजनमुत्तुंगउन्नतो यो देवचूतः तस्य शिरसः सकाशात् गिरिशिखरवत् स्थूलानि फलानि फलप्रमा
णकं वा उपरमोत्तरतीतोपातान्यथोर्द्धकयद्याधिकानि च फलप्रमाणमाख्यातमपि मिमित्तवद्दर्शिभिरिति ॥ अमृतकल्पानि अमृततुल्यानि फलंति
फलानि फलंतीति गौर्गच्छतीति वत् ॥ कर्तृत्वविशेषणत्वार्थस्याविवक्षितत्वेद्याग्राह कानात्यकानि भवंतीत्यर्थः ॥ तेषां फलानां विशीर्णानामधःपातेन

देवोद्यानानि च भवंति चत्वारि नंदनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति येष्वमरपरिवृढाः सह सुरललनाललामयूथप
तय उपदेवगणैरुपगीयमानमहिमानः किल विहरंति ॥ ९ ॥ मंदरोत्संगे एकादशशतयोजनोत्तुंगदेवचूतशिरसो गि
रिशिखरस्थूलानि फलान्यमृतकल्पानि निपतंति ॥ तेषां विशीर्यमाणानामतिमधुरसुरभिसुगंधिबहुलारुणर
सोदेनारुणोदा नाम नदी मंदरगिरिशिखरान्निपतंती पूर्वेणेलावृतमुपप्लावयति ॥ १० ॥ यदुपजोषणाद्भवान्या
अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगंधिवातो दशयोजनं समंतादनुवासयति ॥ ११ ॥

विशीर्यमाणानामतिमधुरमासौरस्यं सुरभिश्च सुगंधि रम्येषां गंधैरधिवासितः ॥ नेति उपरिष्ठात् बहुलश्चारुणश्च रसः सरस्वोदकं तेनारुणोदा नामारु
णोदेति प्रसिद्धा नदी मंदरशिखरान्निपतंती स्यंदमाना पूर्वेणेलावृतं ॥ इलावृतवर्षस्य पूर्वप्रदेशमुपप्लावयति सिंचति आत्मानं उपस्यंदयतीत्य
र्थः ॥ १० ॥ अरुणोदानदी विपिनद्वियदिति ॥ यस्या अरुणोदाया उपजोषणाद्रससपानाद्भवान्या अनुचरीणां पुण्यजनानां यातुधानानां याव बधूः
तासामवयवसंस्पर्शेन सुगंधः सुरभिर्वातो वायुः समंतात् सर्वतो दिशं दशयोजनमनुवासयति सुरभीकरोतीत्यर्थः ॥ ११ ॥ एवं जंबूफलानां मेरु

भा॰पं॰ मंदरोत्संगे गिरिकूटे जंबूफलानामत्युच्चान्मेरुमंदरात्पातोऽतिपातः तेन विशीर्णानां भिन्नानामनस्थिप्रायाणामतिसूक्ष्मबीजानां इभकायनिभानां गजशरीरसदृशानां
६३ रसेन जंबूनदी निपत्य मेरुमंदरस्य शिखरादयुतयोजनोच्छ्रायादवनितले निपतंती दक्षिणेनेलावृते इलावृतस्य दक्षिणभागे यावदिलावृतमात्मानमुपस्यंदय
ति स्रोतोवहा तस्य दक्षिणभागं प्राप्य वहतीत्यर्थः ॥२१॥ यावदिलावृतमुपस्यंदयति तावत्पर्यंतमुभयोरपि रोधसोः तटयोर्या मृत्तिका तद्रसेन तस्मान्नद्या रसेनानु
संपृक्ता वा वाय्वर्कसंयोगात् तोयोविवेकः परिणामस्तेन जांबूनदं नाम सुवर्णं सदा सिंचंत रसममरलोकानामाभरणं प्रयोगि भवतीत्यत देवाह ॥ यद्यत्सुवर्णं स्त्रि

एवं जंबूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जंबूनाम नदी मेरुमंदरशिख
रादयुतयोजनादवनितले निपतंती दक्षिणेनात्मानं यावदिलावृतमुपस्यंदयति ॥२२॥ तावदुभयोरपि रोधसोर्या मृत्तिका तद्र
सेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जांबूनदं नाम सुवर्णं भवति ॥ यदु ह वाव विबुधादयः
सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयंति ॥२३॥ यस्तु महाकदंबः सुपार्श्वनिरूढो यस्तस्य को
टरेभ्यो विनिःसृताः पंचायामपरिणाहाः पंच मधुधाराः सुपार्श्वशिखरात्पतंत्योऽपरेणात्मानमिलावृतमनुमोदयंति या ह्यु
पयुंजानानां मुखनिर्वासितो वायुः समंताच्छतयोजनमनुवासयति ॥२४॥

धारयो युवतिभिः सह मुकुटाद्याभरणरूपेण धार
२३ यंति पश्चिमेति सुपार्श्वस्य पर्वतस्य यः पश्चिमो भागस्तत्र निरूढो यो महाकदंबस्तस्य कोटरेभ्यो विनिःसृताः पंचायामपरिणाहाः सकरयोर्बाह्वोः प्रति
पंचांतरं तच्चायामः पंचायामः परिणाहः स्थौल्यं यासां ताः पंच मधुधाराः सुपार्श्वशिखरात्पतंत्यः अपरेणेलावृतस्य पश्चिमभागे स्वस्यात्मानमनुमो
दयंति सुरभीकुर्वंतीत्यन्वयः स्यंदते इत्यर्थः धारा विशिनष्टि याभिरिति ॥ उपयुंजानानां धारा उपभुज्यमानानां यो मुखनिर्वासितो मुखगंधेन वासितः निरंतरासु रामः
रभीकृतो वायुः समंताच्छतयोजनं सुरभीकरोति निरतिशयसौरभ्ययुक्ता धारा इत्यर्थः ॥२४॥ ६३

गवं कुमुदपर्वते निरूढो यः शतवल्शिः इति प्रसिद्धो वटस्तस्य स्कंधेभ्यो विनिर्गताः पयोदधिमधुघृतगुडान्नाद्यंबरशय्यासनाभरणान्यादीनि गुडान्नादीनि
वस्त्राणि च अंबराणि धार्याणि शय्यासनादीनि भोगस्थानानि आभरणानि च दुहंतीति दुघाः सर्वे नदाः कुमुदस्य पूर्वस्यामारभ्य तं तस्य तत्र उत्तरे इलावृतं इलावृ
तस्योत्तरभागे उपजीव्य यंति प्रीणयंति इलावृतस्योत्तरभागस्थान् लोकान् सुखयंतीत्यर्थः ॥ एतदेवाह ॥ यानुपजुषाणानां मेव मानानां प्रजानां वल्य
दयः तापविशेषा न भवंति किंतु यावज्जीवं निरतिशयं सर्वोत्कृष्टं सुखमेव भवति ॥ वलिस्त्वगातो विकारः पलितं केशगतं क्लमः श्रमः आमयो रोगः उ

एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कंधेभ्यो नीचीनाः ॥ पयोदधिघृतमधुगुडान्नाद्यंबरशय्यासनाभरणाद
यः सर्व एव कामदुघाः नदाः कुमुदाग्रात्पतंतस्तमुत्तरेणेलावृतमुपयोजयंति यानुपजुषाणानां न कदाचिदपि प्रजानां व
लीपलितक्लमस्वेददौर्गंध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयः तापविशेषा भवंति यावज्जीवं सुखं निरतिशयमे
व ॥ २५ ॥ कुरंगकुररकुसुंभवैकंकत्रिकूटशिशिरपतंगरुचकनिषधशिनीवासकपिलशंखवैदूर्यजारुधिहं
सर्षभनागकालंजरनारदादयो विंशतिगिरयो मेरोः कर्णिकाया इव केसरभूताः ॥ मूलदेशे परित उपक्लृप्ताः ॥ २६ ॥ जठ
रदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुंगौ भवतः एवमपरेण पवनपारियात्रौ दक्षिणेन॰

पसर्गाः सुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोहलोभमदमात्सर्येर्ष्यादयः भागवतात् ज्ञेया इत्यर्थः ॥ २५ ॥ कुरंगेति ॥ कुरंगादयः पर्वताः कुवलयकम
लकर्णिकायां तस्य मेरोर्मूलदेशे केसरभूताः परित उपक्लृप्ताः विन्यस्ता धात्रेति शेषः ॥ २६ ॥ तथा मेरुं पूर्वेण मेरोः पुरस्तात् मेरुमूलात् योजनसहस्रेत्यत्र ।
जठरदेवकूटौ पर्वतौ अष्टादशयोजनसहस्रदीर्घौ द्विसहस्रयोजनपृथुतुंगौ च भवतः ॥ एवं मेरुपरभागे पवनपारियात्रौ जठरदेवकूटाभ्यां तुल्यायाम

इषुतुंगो भगवतः तथा मेरोर्दक्षिणतः कैलाशकरवीरौ प्रागायतौ पूर्वतो दीर्घौ एवमुत्तरतस्त्रिशृंगमकरौ भवतः दर्भैः परिस्तृतोग्निरिवाष्टभिरेतैर्जठरादि
भिः कांचनगिरिर्मेरुः परितश्चकास्ति द्योतते ॥२७॥ मेरोर्मूर्द्धन्युपरिभागमध्ये तन्मध्यप्रदेशे उपक्लृप्तां भगवतः । आत्मयोनेः पुरीं मेरुवत्पुरामयुतयोजनवि
स्तारां समचतुरस्रां शातकौंभीं ति ब्रह्मसिद्धाश्च वदंति तां शातकौंभीं पुरीं अनु सर्वमेरौ परितोष्टदिक्पयस्या दिशं पूर्वां दिदिशामनतिक्रमागामि इन्द्रादीनां लो

कैलासः करवीर इति प्रागायतौ । एवमुत्तरतस्त्रिशृंगमकरौ अष्टभिरेतैः परिसृतोग्निरिव परितश्चकास्ति कांचनगिरिः
२७ ॥ मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौंभीं वदंति तामनु
परितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोष्टावुपक्लृप्ताः ॥२८॥ इति श्रीभागवते महापुराणे पं
चमस्कंधे षोडशोध्यायः ॥१६॥ श्रीशुक उवाच ॥ तत्र भगवतः साक्षाद्यज्ञलिंगस्य विष्णोर्विक्रमतो वामपादांगु
ष्ठनखनिर्भिन्नोर्द्ध्वाण्डकटाहविवरेणांतःप्रविष्टा या बाह्यजलधारा तच्चरणपंकजावनेजनारुणकिंजल्कोपरंजि
ताखिलजगदघमलापहोपस्पर्शनामला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोभिधीयमानातिमहता काले

कपालानामष्टौ पुरः ॥ अमरावती तेजोवती संयमनी कृष्णांगना श्रद्धावती गंधवती महोदया यशोवती संज्ञास्तुरीयमानेन ॥ अयुतस्य तुरीयभागेन उपक्लृप्ताः
सार्द्धद्विसहस्रयोजनविस्तारा लोकस्थिता इत्यर्थः ॥२८॥ इति श्रीपंचमे षोडशः ॥१६॥ एवं जंबूद्वीपपर्वतवर्षतत्परिमाणादिकमभिधायाथ गंगागमन
कथनपूर्वकं इलावृतादिवर्षेषु रुद्रादीनां संकर्षणादिभगवन्मूर्त्युपासनाप्रकारमुपवर्णयति सप्तदशोद्विभिरध्यायैः तत्र भगवतस्स
तिपलक्ष्यलिंगस्य यज्ञमूर्तेस्तत्र भगवतः यज्ञस्य विष्णोर्वामनरूपस्य विक्रमतस्त्रिलोकीं पादत्रये क्रममाणस्य सतः ॥ तस्य वामपादांगुष्ठनखेन निर्भि

एवं ब्रह्मशरीरत्वेन तदायत्त सत्ता स्थितिप्रवृत्तिकत्वरूपपारतंत्र्यमप्यनुसंधेयमित्युक्तं ॥ एवमनुसंधेनानार्थमाह यदीति ॥ यद्येतत्संसो देहिन आत्मनः स्वस्य
मद्भावं भावप्रकारः क्रीवत्वमार्थमत्प्रकारकत्वं विस्मृतं भिन्नं भावप्रधानो भिन्नशब्दः भिन्नत्वं हपृथक्सिद्धत्वरूपं स्वतंत्रत्वम्यादित्यर्थः ॥ भिन्नत्वेनानुसं
हितं स्यादिति भावः ततो हेतोरस्य जीवस्य संसारो भवतीति संसारस्वरूपमाह ॥ देहादेहः ॥ जन्मांतरं पुनर्जन्म मृतेरनंतरं पुनर्मृतिश्चेति ॥ ५७ ॥ एवं ब्रह्मात्मकत्वान
नुसंधानेन पीमस्मृतिरूपत्वकः ॥ स्वयं च मनुष्यजन्मनैव परिहार्यो न तिर्यगादिजन्मनेत्याह ॥ लब्ध्वेति ॥ एष जीवः ज्ञानं शास्त्रजन्यं विज्ञानं विवेकविमोका
दिसाधनमत्यकजनुपासनात्मकं तयोः संभवो यस्यास्तां मानुषीं योनिं लब्ध्वा मानुष्यं जन्म प्राप्यापीत्यर्थः ॥ आत्मानमुक्तविधमात्मस्वरूपं यो न बुध्येत
मपमानः क्वचिदपि क्षेमं नाप्नुयात् तिर्यगादियोनिषु ज्ञानविज्ञानयोरप्यतैवनास्तित द्योग्यां दुर्लभां मानुषीं योनिं प्राप्यापि ब्रह्मात्मकमात्मानं स्वशरीरकं

पद्येत तद्विस्मृतं पूर्वमोमद्भावं भिन्नमात्मनः ॥ ततः संसार एतस्य देहाद्देहो मतेर्मृतिः ५७ लब्ध्वेह
मानुषीं योनिं ज्ञानविज्ञानसंभवां ॥ आत्मानं यो न बुध्येत न क्वचित्क्षेममाप्नुयात् ५८ स्मृत्वे
हायां परिक्लेशं ततः फलविपर्ययं ॥ अभयं चाप्यनीहायां संकल्पाद्विरमेत्कविः ५९ ५९ ॥

बुद्ध्वा नोपासीत स पुनः पुनः संसरेदेवेति भावः ॥ ५८ ॥ मानुषीं योनिं लब्धवतोऽपि विषयासक्तस्य कथं ज्ञानादिकं प्रतिष्ठितं भवेत्तत्राह स्मृत्वेति ॥ ई
हायां विषयसुखार्थायां चेष्टायां प्रवृत्तिधर्मे परिक्लेशमत्यंतशरीरायासादिरूपं ततः ईहातः फलविपर्ययं फलविपर्यासं सुखार्थचेष्टातो दुःखं ॥
चाप्तिं च स्मृत्वा सदृष्टांतमालोच्यानीहायां निवृत्तिधर्मे भयमत्यत्वास्थिरत्वदुःखोदर्कत्वनिमित्तभयरहितममृतत्वं च पश्यन्मुनिः ॥ स्वात्मपरमा
त्मयाथात्म्यमननशीलः ततः ईहातः शनैर्विरमेत् उक्तविधालोचनेन शनैर्वैराग्यमुत्पादयेदित्यर्थः ॥ ततो ज्ञानविज्ञाने प्रतिष्ठिते भवत इति भाव
॥ ५९ ॥ ईहायां परिक्लेशफलविपर्ययावेव स्पष्टयति ०

गी॰ग॰ सुखायेति॥ सुखायतत्प्राप्तये दुःखनिवृत्तये च क्रियाः तदुपयुक्तव्यापारान् दंपती यद्यपि कुर्वाते तथापि तत्तत्क्रियाभ्यः दुःखस्यानिवृत्तिः सु
८४ खस्याप्राप्तिश्च दुःखस्य निवृत्तिः सुखस्य प्राप्तिश्च न भवति प्रत्युत विपरीतमेव भवतीति भावः॥६०॥ अनीहायामुभयं स्पष्टयति एवमिति ।
विज्ञाभिमानिनां वयमीश्वराः प्राज्ञाः कुशला इत्यभिमानवतां नराणां ईहायामेवमुक्तप्रकारेण विपर्ययं बुद्ध्वा आलोच्य स्यान्न त्रयविलक्षणां जाग्रत्स्वप्न
सुषुप्त्यतीतां केवलविषयामतः तुरीयामात्मनः ब्रह्मगात्मनो गतीं ब्रह्मात्मकतां स्वाकारं बुद्ध्वा॥६१॥ दृष्टश्रुताभिरैहिकामुष्मिकाभिर्मात्राभि
र्विषयसुखलेशैः स्वेन तेजसा स्वविवेकबलेन निर्मुक्तस्मात्सुजातविरागः ज्ञानविज्ञानाभ्यां पूर्वोक्ताभ्यां संतुष्टः ज्ञानस्य हढतम भगवदनुभवरूपवि

सुखाय दुःखमोक्षाय कुर्वाते दंपती क्रियाः॥ ततोऽनिवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च॥६०॥ एवं विपर्य
यं बुद्ध्वा नराणां विज्ञाभिमानिनां॥ आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणां॥६१॥ दृष्टश्रुताभिर्मात्रा
भिर्निर्मुक्तः स्वेन तेजसा॥ ज्ञानविज्ञानसंतृप्तो मद्भक्तः पुरुषो भवेत॥६२॥ एतावानेव मनुजैर्योगनैपुण्यबुद्धिभिः
स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनं॥६३॥

ज्ञानमात्रसंतुष्टः मद्भक्तः ममनिरतिशयप्रियः पुरुषो भवेत्॥ एवं चाभयं तस्य
ब्रह्मात्मकत्वमतुसंदधतः करस्थमिति भावः॥६२॥ एतावानिति॥ योगनैपुण्यं यस्याः सा बुद्धिर्येषां तैर्मनुजैः सर्वात्मना सर्वप्रकारेण ज्ञेयः स्वार्थोऽनि
ष्टपरिहारेष्टप्राप्तिरूपः पुरुषार्थः एतावानेव तत्परिमित एव॥ कोसौ तत्राह यत्परात्मै
कदर्शनमिति॥ परस्य परमात्मनः स्वस्य चैक्यदर्शनमहं परमात्मेत्येतावानेव स्वार्थः॥ यद्वा परात्मनः परमात्मन एक
दर्शनमेकत्वेन प्रकारित्वेनैकाकारेण च दर्शनमित्यपरः॥६३॥ ८४

छिद्यमानाभिन्नर्वा एवं गानि यस्य ताहृशः हा हा कारश्च विवेकं हतोस्मीति वदन्नरमयातो बुध्यावेदनया पदे पदे मूर्छां प्राप्नोति पततीति ॥ एवं स्वधर्मद्वारा धर्मस्यागी पापं
डानुगतं पापंडधर्माभासानुगुणं फलं दुःखमनुभवति ॥ अथ मिसहस्रा निपत्रालिये पांच दारुणं वनमसिपत्रवनमित्यवयवार्थः ॥ १७ ॥ अथ सूकरमुखं नरकं
तत्प्राप्तिनिमित्तपापं चानुवर्णयति ॥ यस्त्विहेति ॥ इह लोके राजा वा राजपुरुषो वा कश्चिददंड्ये दंडनार्हे दंडं दंडनं प्रणयति दंड्योपि ब्राह्मणे शारीरदंडं कारय
ति ॥ वपनं द्रविणादानं स्थानान्निर्यापणं तथा । एष हि ब्राह्मणे वधो नान्यस्य स्मृतः दैहिकं इत्युक्तरीत्या वध्योपि ब्राह्मणो देहदंडानर्हो यः शारीरं दंडं कारयति स
यः ॥ स पापीयान्सूकरमुखे नरके निपतति तत्रा नरके सूकरास्यवमुखं येषां तैर्जंतुभिः निति रांपीड्यमाना अवयवा यस्य ताहृशः यथा ॥ इमे नगजेने देदंडः

पदे पदे निपतति स्वधर्मद्वारा पापंडानुगतं फलं भुंक्ते ॥ १७ ॥ यस्त्विह वै राजा राजपुरुषो वा अदंड्ये दंडं प्रणयति ब्राह्म
णे वा शरीरदंडं स पापीयान्नरकेऽमुत्र सूकरमुखे निपतति तत्रातिबलैर्विनिष्पिष्यमाणावयवो यथैवेहेक्षुखंड आर्त
स्वरेण स्वनयन्क्वचिन्मूर्छितः कश्मलमुपगतो यथैवेहादृष्टदोषा उपरुद्धाः ॥ १८ ॥ यस्त्विह वै भूतानामीश्वरकल्पित
वृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथो व्यथामाचरति स परत्रांधकूपे तदभिद्रोहे
णानिपतति ॥ तत्र हासौ तैर्जंतुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये के चाभिद्रुग्धाः

पीड्यते तत्र हठात्तेस्वरेण स्वनयन्क्वचिन्मूर्छितः कश्मलं मोहमुपगतो भवति यथा पूर्वमिह दृष्टदोषा दोषरहिता स्तेन उपरुद्धाः पीडिताः संतः कश्मलमुपगता
स्तद्वदित्यर्थः ॥ अवयवापल्लसुखरूपकः ॥ १८ ॥ अथांधकूपं वर्णयति तत्प्राप्तिनिमित्तपापं च वर्णयति यस्त्विह वा इति ॥ वक्तदेहा संसारे ईश्वरेणोपकल्पिता मनु
ष्यरूपाणां हि रूपा वृत्तिर्येषां अविदिता परस्य व्यथा यैरविवेकिभिस्तेषां मज्ञातपरदुःखानां वा भूतानां मत्कुणमशकादीनां व्यथामाचरति करोति
कथंभूतः स्वयं पुरुषोपकल्पितवृत्तिः परमेश्वरेण पुरुषरूपेण उपकल्पिता वर्णाश्रमादिभिर्मार्गेण विधिनिषेधपूर्विका कल्पिता वृत्तिर्यस्य विविक्ताविवि
क्ता ज्ञाता परस्य व्यथा येन अविवेकी मनुनित्यर्थः ॥ स परत्र विधिभृत क्रीक तदभिद्रोहेण मतद्रोहेण निमित्तेनांधकूपाख्ये नरके निपतति तत्रांधकूपे हेति स्व

भा.पं. दंशोपहतितैस्तैः सर्वैर्दंशितैर्जंतुभिः कोऽभिवत्ता न दर्शयतीति पश्विस्यादिना ॥ तेषामनंत्यात्संग्रहार्थ इत्येके पाभिद्रुग्धा हिंसिता स्तैः सर्वैः पश्वादिरूपतामाप
११५ न्नैः सर्वतोऽभिद्रूयमाणोरेव विहतानिद्रानिर्वृतिर्निद्रासुखं यस्य तत्स्मिन्नलब्धमवस्थानं येन तथाभूतः तदर्ते तेषं चारासमपर्णशरीरे जीवो यथा लब्धनिद्रविश्र
ान्तिन पैत्यर्थः ॥ अंधकारावृतकूपोऽंधकूप इत्यवयवार्थः ॥१९॥ अपक्रमिभोजनं नरकं नु भवपापं च वर्णयति इहवा ॥ असंविभज्येति यस्त्व देही इहलोके
यद्भिन्नादिकं दैवादुपनतं तत्प्राप्तमप्यन्नमसंविभज्य अविभज्यात्मानमिति यो पदार्थेत्यर्थः ॥ अश्नातीति स्वयं भुंक्ते पञ्चान्निर्मितपञ्चयज्ञः अननुष्ठितपंचमहाय
ज्ञः ॥ सवायसंस्तुतः वायसैः समत्वेन वर्णितः परत्र परलोके कृमिभोजनाख्ये नरकाधमे निपततीति शतसहस्रयोजनपरिमिते कृमिकुंडे स्वयमपि कृ
मिभूतः कृमिभिरेव भक्ष्यमाणः कृमिभोजनः कृमीनेव भुंजानः यावदप्रत्तेति योजनमितत् कृमिकुंडं तावंति वर्षाण्यात्मानं यातयते दुःखयति ॥ क

तैः सर्वतोऽभिद्रूयमाण न तमसि विहतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति । यथा कुशरीरे जीवः ॥१९॥ यस्त्विह वा
असंविभज्याश्नाति यत्किंचनोपनतमनिर्मितपंचयज्ञो वायससंस्तुतः स परत्र कृमिभोजने नरकाधमे निपतति
तत्र शतसहस्रयोजने कृमिकुंडे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावदप्रत्ताप्रहुतादोऽनिर्वेश
मात्मानं यातयते ॥२०॥ यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वापहरत्यन्यस्य वानापदि पुरुषस्तम
मुत्र राजन्यमपुरुषा अयस्मयैरग्निपिंडैः संदंशैस्त्वचि निःकुषंति ॥२१॥

यन्नं तं अप्रत्ताकृतादप्रत्तं दत्तावशिष्टं अप्रहुतं यज्ञावशिष्टं प्रत्तं च प्रहुतं च प्रत्तप्रहुते न प्रत्तप्रहुते अप्रत्ताप्रहुते ते अत्तीति अप्रत्ताप्रहुताद । एवंभूतोऽहमित्य
कृतनिर्वेशः परितापो येन तमात्मानं ॥२०॥ अथ संदंशाख्यं नरकं पापं च वर्णयति ॥ यस्त्विह ॥ वै स्तेयेनेति ॥ इह यो देही स्तेयेन चौर्येण वा अनाप
दि ब्राह्मणस्यान्यस्य वा हिरण्यरत्नादीपहरति तं देहिनं परत्र संदंशाख्ये नरके हे राजन् यमभटाः ॥ अग्निवर्णैः संतापेनाग्निवर्णतामापन्नै
रयस्मयैः लोहमयैः संदंशैः संदंशाख्यैः भिरिति संदंशाः तैः छेदनसाधनैः त्वचि निःकुषंति छिंदंति संदंशैः संदंशंति यत्रेति संदंशः इत्यवयवार्थः ॥२१॥ ११५

अथ तत्र द्र मितस्याविहेतुं दुरितं प लिहं वा अगम्या गति ॥ य त्क देवा स्वयं पुरुषः सन्न गम्या मनुषेया स्त्रिय मभि गच्छति स्वयं यो षि त्स्त्री स ति ॥ अगम्यमु पे
तु मयो गंप पुरुषं वो षगच्छति तं देहि नेम नुत्र स्य स्यो स्येन रके कशया ताडयंतः लो हमयाति मयात न्न्या मस्त्र्यो स्थूणा से व स्त्री रूपेण पुरु षु रूपे ण चोत्कर्षे
तया म स्यां वृति मयापुरु षं पापि न मा लिंग यंति स्त्रि यं पापिनी पुरुष रूपया म स्यां लिंगयंति ॥ तप्ता सूर्मि य स्मिन्स तत्र सूर्मि रि मव प वार्थः ॥ २२ ॥ अथ व ज्र
कंटक शाल्मली माह य स्तास्विह वैस र्वा भिगम भजति ॥ सर्वाभिगमः लो भाद दोषो विशेषोपस्थाति ॥ सर्वाभिगमः लो भाद से व्य सेवी पश्वा धप गं ते ति के चिद्व्या
चक्षते ॥ तं स र्वाभिगमम मुत्र नि रये वज्रकंटक शाल्मली मा रू के वर्तमानं पतितं वज्र मया नि कंटका नि य स्यतं शाल्मली द्वा मारो प्य नि कृ षंतीत्यर्थः ॥
यास्त्विह वा अगम्यां स्त्रियं मनगम्यं वा पुरुषं यो षि दभि गच्छति ता व मुत्र कशया ताडयंत स्तिग्मया सूर्म्या लो हमय्या
पुरुषमालिंगयंति स्त्रियं चापुरुषरूपया सूर्म्या ॥ २२ ॥ यास्त्विह वै सर्वाभिगमस्त मुत्र निरये वर्तमानं वज्रकंटक
शाल्मली मारोप्य नि कर्षयंति ॥ २३ ॥ ये त्विह वै राजान्या राजपुरुषा वा अपाखंडा न धर्म सेतून्भिंदंति ते संपरेत्य वैत
रण्यां निपतंति भिन्नमर्यादास्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्य
माना श्वासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरंतः उपतप्यंते ॥ विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांस
वसावाहिन्याम् उपतप्यंते ॥ २४ ॥ वज्रकंटक शाल्मल्यां भिन्नमर्त्यस्य व प वार्थः ॥ २३ ॥ ये तु राज्ञां वर्णा यति य इति ॥ राजन्याः क्षत्रिय
वैश्या वा ॥ राजन्या दयः ॥ अस्यां वै
ते षां पुरुषा वा ॥ पाखंडान वैदिकान धर्मसेतून धर्ममर्यादान भिंदंति नाशयंति कथंभूताः भिन्नमर्यादा अतिक्रांत धर्ममर्यादाः ते राजन्यादयः ॥ अस्यां वै
तरण्यां नरकस्य परिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा अपि आत्मना वियुज्यमाना न अस्य तनुदेहाद्यस्पर्धः तत्र हेतुः असुभिः प्राणैः रुह्यमानाः क
र्मणाः कर्तव्य विवशाः पातेती या धूतश्चाणा अस्पर्धः तत्रापि हेतुमाह ॥ स्वाघेनेति स्वकीयदुरितेन तत्र पच्यमानं स्वकीयदुरितेन कर्मपाकं स्वकीयपापकर्मफलं
स्मरंतः अस्यैव स्मरंत उपतप्यंते क्लिश्यंति ॥ नदी विशिनष्टि विण्मूत्रेति विट् पूय शोणित केश नख अस्थि मेद मांस वसा वहति तां वाहिन्यां वाहः प्रवाहः सो अस्या इत्यस्ति तिस प

नस्यां वा न दी रूप ता वा पंच रकःस्य व प वार्ण मे दः २८

भा०पं अथ वृषलीपतिनरकं वर्णयति ॥ ये त्विहेति ॥ ये द्विजा इह वृषलीपतयः ब्राह्मणादयः संतः शूद्रायाः पतयो नष्टाः त्यक्ताः शौचाचारयोर्ये तैः तत्र शौचं स्नानपर्यंतं सत्कर्म

२२६ आचारः संध्योपासनादिनियमः न स्नामि भस्मादिनियमः ॥ अतएव त्यक्ताः लज्जा यैस्ते पशुचर्यां स्वेच्छाचारं कुर्वंति पाकं पचंतीति वह्निर्देवः ॥ तेपि प्रेत्य मृत्वा विड्श्ले-

ष्मिः पूर्णे अर्णवे वाहिनीसेके देनि पतंति ॥ तदेव विड्ादिकमेवाति हेयमश्नंतीत्यर्थः इति ह्यपमुदस्य दकं यस्मिन्नित्यवयवार्थः ॥२५॥ अथ प्राणनिरोधं सपापं वर्णय-

ति ॥ ये त्विह ॥ वै श्वगर्दभपतय इति श्वानां गर्दभानां च पतयः पालकाः ब्राह्मणाः मृगयैव विहारो येषां ते तीर्थे मृगान्निघ्नंति ॥ अतीर्थेऽप्रलोकारक्षणार्थत्वाभावात् अशा-

णिवद्योद्योपावदःनो यैश्रुतस्तुणाणीसंचारायकतोऽपुष्पमनववधोनदोषायभवतियतः तस्मादतीर्थे दृश्यत्वं तानपि श्वगर्दभपतीनपि संपरेतान्मृतान्वेशसनेषुणाज्ञान्ले

यस्त्विह वृषलीपतयो नष्टशौचाचारनियमाः त्यक्तलज्जाः पशुचर्यां चरंति ते चापि परेत्य पूयविण्मूत्रश्लेष्मलालापूर्णा-

र्णवे निपतंति तदेवातिबीभत्सितमश्नंति ॥२५॥ ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्नि-

घ्नंति तानपि संपरेतान् लक्ष्यभूतान् यमपुरुषा इषुभिर्विध्यंति ॥२६॥ ये त्विह वै दांभिका दंभयज्ञेषु पशून् विशसंति तानमुष्मिं-

ल्लोके वैशसे नरके पतितान्निरयपतयो यातयित्वा विशसंति ॥२७॥ यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पाययति ॥ काममोहित-

स्तं पापकृतममुत्र रेतःकुल्यायां पातयित्वा रेतः संपाययंति २८

सम्भृतान् लक्ष्यीकृत्येत्यर्थः ॥ इषुभिर्वाणैः ये मनुष्याविध्यंति ताडयंति विध्यंतीत्यनेन प्रा-

णनिरोधनिमित्ता यमयातना ज्ञेया इत्येतानेन नरकस्य प्राणनिरोध इति संज्ञा ॥ प्राणानां निरोधो यस्मिन्नित्यवयवार्थः ॥२६॥ अथ विशसनं वर्णयति ॥ ये त्विह वै दांभि-

काः इति ॥ इहलोके ये वै द्विजः दांभिकाः लोकवंचकाः दंभयज्ञेषु वयमपि यज्ञानुष्ठानपरा इति ॥ लोकाः स्मरंतु इत्येवं पितृमारकेषु दंभार्थयज्ञेषु पशून्विशसंति हिंसंति

तान्दांभिकान् अमुष्मिन्वैशसनाख्ये नरके निपतन्निरयपतयः ॥ यमपुरुषाः पातयित्वा दुःखयित्वा विशसंति विहिंसंति यस्मिन्स विशसनं ततः विशसनमेव वैशसमित्य-

वयवार्थः ॥२७॥ लालाभक्षं नरकं वर्णयति ॥ यस्त्विह वै सवर्णामिति ॥ इहलोके यो वै द्विजः कामेन मोहितः सवर्णां भार्यां रेतः स्वरेतः पाययति पानं कारयति तं रामः

द्विजं पापकृतं रेतः कुल्यायां पातयित्वा रेतः संपाययंति यमपुरुषा इति शेषः ॥ लाला रेतः तस्य भक्षणं यस्मिन्स लालाभक्षः ॥ इत्यवयवार्थः ॥२८॥ श्रीरामाय २२६

अथ सारमेयादनं सपापमनुवर्णयति यस्त्विह वै दस्यु वदति ॥ इह ये दस्यवोऽत्र सभ्याः के ते अग्निदा गरदा ग्रामादीनां दाहका ये च गरदा विषदाः ये च राजभटाः प्रजाकरयमानुभरा
कः सन्ता नमस्यान ॥ श्लोकः स्वनिमार्षोन जीवसमूहान् वा विलुंपंति ढिंदति दिंमंतीत्यर्थः तान् संपरेतान् ये वज्रवत् तीक्ष्णा दंष्ट्रा येषां ते यमदूताः श्वानः विंशत्या अधिक
सप्तशतसंख्याकाः सरभसं सत्वरं खादयंति खादंतीत्यर्थः ॥ निवृत्तप्रेयराणान् स्वादे शिवसारमेयानां गुणामदनं सारमेयकर्तृकं भदनं यस्मिन् नित्यत्ववयवार्थः ॥ २९ ॥ अथ
वीचिमंतं सपापं वर्णयति ॥ यस्त्विह वा अनृतमिति ॥ यस्त्विह लोके देवसाक्षिणः कर्मसाक्षे तस्मिन् द्रव्यविनिमये वा क्रयविक्रयादिरूपे वा सज्ज्ये वा अनृतं समसत्यं व
दति स वै प्रेत्य कर्मविदस्यं तद्भुः स्वस्ता वा विमतिनिरके निरवकाशे निरालंबे योजनशतोच्छ्रितात् तद्देशगिरिमूर्द्धसु पर्वतशिखरेभ्यः शिराः निपात्यते ॥ अ

यस्त्विह वै दस्युर्वाग्निदो गरदो ग्रामान् सार्थान् वा विलुंपति राजा राजभटो वा तांश्चापि हि परेत्य यमदूताः वज्रदंष्ट्राः
श्वानः सप्तशतानि विंशतिश्च सरभसं खादंति ॥ २९ ॥ यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथंचित्स वै
प्रेत्य नरके वीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायाद्गिरिमूर्द्ध्नः संपात्यते ॥ ३० ॥ यत्र जलमिव स्थलमश्मपृष्ठम
वभासते तदवीचिमत्तिलशो विशीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति ॥ ३० ॥ यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोम
पीथस्तत्कलत्रं वा सुरां व्रतस्थोऽपि वा पिबति प्रमादतस्तेषां निरयं नीतानामुरसि पदाक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसम

वीचिमन्नरकस्यावयवार्थमाह यत्रेति यत्र नरके अश्मपृष्ठं रूपं स्थलं जलमिवावभासते तदवीचिमत् वीचिस्तरंगः तदस्यास्तीति वीचिमत् जलं न विद्यते वीचिमत् यस्मिन् सो
ऽवीचिमत् जलरहितमप्यश्मपृष्ठं जलमिवावभासते तदवीचिमदित्यर्थः एवं निपात्यमानपापी तिलशस्तारणाः विशीर्यमाणं शरीरं यस्य तथाभूतोऽपि न म्रियमाणमर
णमप्राप्तः पुनरपि तस्यैवारोपितो निपतति ॥ ३० ॥ अथ सुद्धरितमयःपानमाह यस्त्विह वै विप्र इति यो विप्रस्तत्कलत्रं वा सुरां पिबति यस्तोऽपि वा व्रतस्थः राजन्यो वैश्यो वा प्र
मादात्सोमपीथः क्षत्रसोमपानस्य त्वयः तयोः स्यात् अनेकलत्रं च प्रसविधानात् सोमपान्निषेधाच्च तथा च श्रुतिः न्यग्रोधं तिमिनीरा ह्रस्वताः संपिस्य दधिन्यस्तमज्यत स्मेभक्षं
प्रत्येक्षसोममिति तेनिनीः फलानि दधति दध्नि ते यां विधाय सोमं भर यं प्रापितानां उरसि पदा पादेनाक्रम्य वह्निना द्रवमाणमत्यंततप्तेन द्रवीकृतं कार्ष्णायसमयो विप्रो यं तेषामा

॥ ५ क ॥

भा॰पं॰ भाव्यमुक्तेवेति पिबंतीति ॥ अपमत्यानं यस्मिन्निरयत्व वयवार्थः ॥ अथ समपापं तस्य कर्दममाह ॥ यस्त्विह वात्मवेति ॥ सोऽसंभावनेन देही इह लोके स्वयं जन्मादिभिरधमः निकृष्ट
११० सन्नतः स्वस्य संभावनेनौत्कृष्ट्यापादनेन जन्मादिमतः अत एव वरीयसः श्रेष्ठान्न बहु मन्येत किं त्ववमन्येतेत्यर्थः ॥ स एव मृतक आपरावमत्वात् क्षारकर्दमे नरके अवाक्शि
राः निपातितः अपारयातना अश्नुते भुंक्ते भवति क्षारः कर्दमो यस्मिन्निरयत्व वयवार्थः ॥३१॥ अथ परक्षोगणभोजनं नरकमाह ॥ ये त्विह वै पुरुषा इति ॥ ये चेह पुरुषा पुरुष
मेधेन नरमेधेन भद्रकाल्यादिदेवताय जेरन् याश्च स्त्रियः अपशास्त्रीयान् अविहितान् नृपशून् नररूपान् पशून् घातयंति ताश्च तांश्च तान् पुमानः स्त्रियश्च कुत्सितो
तांश्च पुरुषमानतां पशुवदेव भिन्नपर्यः ॥ नृपशवस्ते निहितास्ते यमसदने रक्षोगणाः स्वबाधाते पतितोऽसृक्पिबंति सौनिकाः स्वहस्तानामपरस्परं बद्धस्थाने न तत्र भवाः सौनि

अथ यस्त्विह वा आत्मसंभावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमाचारवतो वरीयसो न बहु मन्येत स मृत
क एव मृत्वा क्षारकर्दमे निरये वाक्शिरा निपातितो दुरंतयातना ह्यश्नुते ॥३२॥ ये त्विह वै पुरुषाः पुरुषमेधेन यजंते याश्च
स्त्रियो नृपशून्खादंति तांश्च ते पशव इव निहता यमसदने यातयंतो रक्षोगणाः सौनिका इव स्वधितिनावदायासृक्पि
बंति नृत्यंति च गायंति च हृष्यमाणा यथेह पुरुषादाः ॥३३॥ ये त्विह वा अनागसोऽरण्ये ग्रामे वा वैश्रंभकैरुपसृतानुपविश्र
भ्य जिजीविषून् शूलसूत्रादिषूपप्रोतान् क्रीडनकतया यातयंति ते पि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मानः क्षुत्तृ
ड्भ्यां चाभिहताः कंकवटादिभिश्चेतस्ततस्तिग्मतुंडैराहन्यमाना आत्मशमलं स्मरंति ॥३४॥ कात्ययित्वा ब्राह्मणक कत्रय प

शात्रूप इव रसनानामस्थानाभिनि छिनत्वा एक ॥ वायुधेन विदार्य छित्वा एक रक्तं पिबंति यथेह पुरुषा कृष्यमाणाः संतः पूर्वं मस्यमाननजरुगश्च तत्र कंन्नत्यंति गायंति
च रक्षोगणाः तां रक्षसभोजनं यस्मिन्निरयत्व वयवार्थः ॥३३॥ अथ शूलप्रोतं नरकमाह ॥ ये त्विह वा अनागस इति ॥ इह ग्रामे अरण्ये वा अनागसो निर
पराधान् जीवितुमिच्छून् जंतून् देहिनो वैश्रंभिके विश्वासोपायैरुपसृतानुपविश्रंभ्य विश्वास्य शूलसूत्रादिषु प्रोतान् संलग्नान् कृत्वेत्यर्थः ॥ क्रीडनयात्क्रीडार्थं यातनयंति
ते पि च यमयातनासु शूलमुखशूलादिषु प्रोताः संलग्नात्मानः देहा येषां ते क्षुत्पिपासाभ्यां पीडिताश्च तिग्मतुंडैः सूचीमुखवक्त्रैः तीक्ष्णानि तुंडानि मुखानि येषां तैः रामः

काकादिभिरितिमतोहन्यमानान्स्वात्मघातसंवादोयंपापंम्नखोरावंविधमित्येवंस्मरंतिशूलेश्लादौप्रोतायस्मिन्नितिशूलप्रोतमित्यवयवार्थः ॥३४॥ अथदंदशूकंस
पापमाह ॥ येत्विहवैभूतानीति ॥ येचहस्माउल्बणस्वभावाः अत्युग्रस्वभावाः यथादंदशूकाःसर्पास्तद्वद्भूतान्युद्वेजयंतिभीषयंतीतेपिप्रेत्यदंदशूकाख्येदंदशूक
संज्ञकेनरकेनिपतंतिदंदशूकंविशिनष्टियत्रेति ॥ हेनृपयत्रदंदशूकेदंदशूकाःसर्पाःपंचमुखानिसप्तमुखानियेषांताद्दशाःउपसृत्यसमीपमागत्यग्रसंतियथा
बिलेशयान्मूषकान्ग्रसंतितद्वत् ॥ दंदशूकाख्यमिमंत्तीत्यवयवार्थः ॥ अर्शआदेराकृतिगणत्वान्मत्वर्थीयोऽचः ॥३५॥ अथावटनिरोधनमाह ॥ येत्विहवाअंधावटाति
ति ॥ इहयेदेहिनोधान्यकानावावलहीनान्निरंतान्यवटादिष्वअवटोगर्तःयथानिरुंधंतितथामंपरेतानमुल्लावटनिरोधाख्येनरकेतेष्वेवावटादिष्वे

येत्विहवैभूतान्युद्वेजयंतिनराउल्बणस्वभावायथादंदशूकास्तेपिप्रेत्यनरकेदंदशूकाख्येनिपतंति ॥ यत्रनृपदंदशूका
पंचमुखाःसप्तमुखाउपसृत्यग्रसंतियथाबिलेशयान् ॥३५॥ येत्विहवाअंधावटकुसूलगुहादिषुभूतानिनिरुंधंतितथा
मुत्रतेष्वेवोपवेश्यसगरेणवह्निनाधूमेननिरुंधंति ॥३६॥ यस्त्विहवाअतिथीनभ्यागतान्वागृहपतिरसकृदुपगतम
न्युर्दिधक्षुरिवपापेनचक्षुषानिरीक्षतेतस्यचापिनिरयेपापदृष्टेरक्षिणीवज्रतुंडागृध्राःकंककाकवटादयःप्रसह्यो
रुबलादुत्सारयंति ॥३७॥ यस्त्विहवाआढ्याभिमतिरहंकृतिस्तिर्यक्प्रेक्षणःसर्वतोभिविशंकीअर्थव्ययविनाशचिंतया

वोपवेश्यसगरेणविषयुक्तेनवह्निनाधूमेनवह्निसंबंधिनाधूमेननिरुंधंति ॥ अवटोनिरोधोऽस्मिन्नित्यवटनिरोधः निरुध्यतेनेनास्मिन्नितिनिरोधः अवटो
निरोधोऽस्मिन्नितिवाअवटावाप्र ॥३६॥ अथपर्यावर्तनमाह ॥ यस्त्विहवाअतिथीनिति ॥ यस्त्विहलोकेस्वयंगृहस्वामीसन्अतिथीनज्ञातपूर्वानभ्यागतान्ज्ञा
तपूर्वानसकृदुपगतमन्युःसंजातक्रोधःदग्धुमिच्छुरिवपापेनतिरश्चीनेनचक्षुषानिरीक्षतेतस्यचपापदृष्टेःप्रेतस्यनिरयेत्रिपर्यावर्ताख्येअक्षिणीनेत्रेवज्रतुंड
येषांतेकाकादयःप्रसह्यबलादुत्सारयंति ॥ अत्रेमाःपर्यावर्तनंउत्पादनमस्मिन्नित्यवयवार्थः ॥३७॥ सूचीमुखंसपापमाह ॥ यस्त्विहवाआढ्याभिमतिरिति ॥ यस्त्वि
हलोकेआढ्योहमितियस्याभिमतिरभिमानोयस्यसधनगर्ववानित्यर्थः ॥ अहंकृतः ॥ प्रेष्टोहमितिमानीतिर्यक्प्रेक्षणःयस्यसर्वतःगुर्वादेरपिशंकाधनंचोरयिष्यतीति

पं.भा. कमात्ः अयो वि नियोगेनार्थेन यः विनाशः सम्लतः तथः तद्विषयाविंनयापरिशुष्यमाणांहृदयंवदनं यस्य स्तः निर्वृतिंसुखमनुपगतः स्वप्नावः गहृदस्वपि शावस्वार्थे वित
११२ मितितोसत्वोतिमचापिचेत्स तस्माद्धीयो स्याद्भ्रादिभिः शमलंपापंमस्लातीतितथा ॥ उत्पादनं च यमतोमलदृवमंपादनंतकर्माणीतस्य पश्वाहृष्याहिनावर्द्धनं रत्नांगश्चम
नागतस्य सुतःशमलंगहृनस्याथैः सचोनुत्तमोके नरके निपतंतीति ॥ सद्धा मुखंविदिशिनष्टि ॥ यत्रादिवेति तंवित्तमहधनपिपासाचमतरावपापपुरुषाज्ञतिपापं धर्मराजस्ययम
स्यपुरुषाः तेतुवापकाम्यवस्त्रेवयुत्क सत्त्वावस्त्रादिवेधकारिणाऽवमर्वेषुसांगेषुमत्रैः परिवर्यंतिसत्त्रनोतानतस्यावयवानकुर्वंतीत्यर्थः नरकावयवार्थः स्पष्टार्थ
३४ ॥ अदंतस्केवणोनंपापवर्जितेनंचादिंडुमात्रमित्याह ॥ एवंविधाउक्तविधानस्कांध्वशतशःमहस्रप्रोयमालयेसंनितेभुनरकेषुसर्वेणवाधर्मवर्त्तिनस्त्वात्रानुक्रवज्ञ

परिशुष्यमाणहृदयवदनो निर्वृतिमनवगतोमनहृदवाप्यंमस्त्रितिमचापिचेत्स तदुसादनोक्त्पर्णतासंरत्नलयशमलम्
हः सचोनुत्तमेनरके निपततीतिपत्रादिवित्तदंपापपुरुषंधर्मराजपुरुषावापकाऽवमर्वेषुनोगेषु सत्रैः परिवेष्टि ॥ ३८ ॥ एवं
विधानस्कांधमालयेसंनिशतशः सहस्रयातेषु सर्वेषु च सर्वेणवाधर्मवर्तिनोयेकेचिदिहोदिताअनुदितायाव निपते
पर्यायेणविशंति ॥ तथैवधर्मानुवर्तिनइतरत्र ॥ इहतुपुनर्भवेतेउभयशेषाभ्यांनिविशंतिनिवृत्तिलक्षणमार्गआदावेव
आख्यातः ॥ ३९ ॥ एतावानेवांडकोशोयश्चतुर्दशधापुराणेषुकल्पितउपगीयते ॥ ४० ॥ विधाधर्मपरायेचेहोदिताउक्ता अधर्मवर्तिनः उक्ते

षुनरकेषु निपतेषुतेऽपिपर्यायेणतथैवविशंतिपर्यायेणनरकेषु विशंतितथातेऽपिविशंतीत्यर्थः ॥ यथा ॥ तथैवेत्युक्तरेणान्वयः ॥ यथाधर्मवर्तिनो नरकेषु विशं
ति एवंधर्मानुवर्तिनस्वर्गादौविशंतीत्याह ॥ तथैवेति ॥ इतरत्रस्वर्गादौऽहलोकेविशंतीत्यत्राहइहत्विति ॥ पुनर्भवेपुनः पुनः भवोजन्मयस्मिंस्तस्मिँल्लिंहमर्त्यलोका
सेउभयशेषाभ्यांधर्माधर्मशेषाभ्यांयुक्ताविशिष्टाभ्यामित्यर्थः ॥ निविशंतिजायंतइत्यर्थः ॥ एवंप्रवृत्तधर्मवर्तिनांमार्गः कथितः ॥ अथनिवृत्तिधर्मवर्तिनः कविशं
तीत्यत्राह ॥ निवृत्तिलक्षणमिति ॥ निवृत्तिधर्मप्राप्यमार्गः आदावेवक्षितीपकंधरावैश्वानरंयातिविद्युयमागतः पुरुषमायावृत्यपश्येतत्सारभ्यकथितइत्यर्थः ॥ ३९
एवंनरकोपांतरमनंतरेनैवोपवर्णितेषुमत्सुतदिमहंजनावित्रुवन्नातिक्रमंतीतिराज्ञः प्रश्नोयोगमवीसाह ॥ एतावानिति ॥ अंडकोशाएतावानेवोक्तविधास्त्रिलो

[illegible]

११२

नमलिषुतथामलेषुजलाशयेषुचक्रिकानिविविधानिनवानिवृन्तरुहाणिनारंजानितेषामामोदेनव्रजरितैःराजहंसादिभिर्मधुकराणांचाकृतिभिः।नाजिविशोषैरु
पकूजितेषुमस्तुतेषुजलक्रीडाद्यांयेविविधाविनोदास्तैःसुललितैस्सुललितानामतिसुंदरीणांसुरस्त्रीणांकामेनकलिलैःकम्पितैःविलासहासादिभिरारात्कृष्टमनोदृष्टि
मयेषांतेवंततःसंतःस्वेछायथाभवेकंविहरंतीत्यर्थः॥१२॥इलावृतादिषुनवस्वपिवर्षेषुभगवान्नारायणःमहापुरुषेणाततत्वर्षपतिनासेव्यमानःपुरुषाणांतदनुग्रहाय
पुरुषाणांवस्वताराणामनुग्रहायपुरुषाननुग्रहीतुमात्मतत्वव्यूहेनात्मनाविगतकल्मषकैः॥व्यूहश्चात्मतत्वस्यज्ञानतत्वस्यव्यूहोयस्मिन्नतेनजीवैर्द्वव्यत्वलास
जातीयत्वेनचिंतयितुमशक्येनात्मनेत्यर्थः॥यद्वा॥आत्मनःतत्वंतत्स्वभावःतत्वंकल्याणगुणास्तेषांव्यूहःसमूहोयस्यतेनात्मनासमस्तकल्याणगुणविशिष्टे

कंकरनिकराकुलितमिथुनपक्षिकूजितेषुजलक्रीडादिभिर्विचित्रविनोदैः॥सुललितसुरसुंदरीणांकामकलिलविलासहासलीला
वलोकाकृष्टमनोदृष्टयःस्वैरंविहरंति॥१२॥नवस्वपिवर्षेषुभगवान्नारायणोमहापुरुषःपुरुषाणांतदनुग्रहायात्मतत्व
व्यूहेनात्मनाद्यापिसंनिधीयते॥१३॥इलावृतेतुभगवान्भवएकएवपुमान्नह्यन्यस्तत्रापरोनिर्विशतिभवान्याःशापनि
मित्तज्ञःयत्प्रवेक्ष्यतःस्त्रीभावस्तत्पश्चाद्वक्ष्यामः॥१४॥भवानीनाथैःस्त्रीगणार्बुदसहस्रैरवरुध्यमानोभगवतश्चतुर्मूर्ते

नात्मनेत्यर्थः।नत्वात्मतत्वव्यूहेनसंकर्षणादिरूपाणांविभावत्वेनव्यूहत्वाभावात्।नन्वस्वपिवर्षेष्वित्यनेनसहविरोधापत्तेःसंनिधीयतेसंनिहितोभवतीत्यर्थः॥
तत्रेलावृतादिषुक्रमेणोपास्यमानरूपंतदुपासकंचाह।इलावृतेवर्षेभगवान्भवोरुद्रएवैकःपुरुषोवसतिनापरःपुरुषःतत्रवसतिःतत्रहेतुःभवान्याःशापरूपं
यन्निमित्तंस्त्रीत्वनिमित्तंतज्जानातीतितथाभवान्याःशापनिमित्तज्ञोपरःपुरुषःतत्रनवसतियदिप्रविशेत्अज्ञानात्प्रविशतितर्हिस्त्रीत्वमाप्नोतीत्याहयत्प्रविष्ट
स्यपुंसइलावृतेप्रविष्टस्यस्त्रीभावआपद्यतेतत्रप्रविष्टस्यस्त्रीत्वनिमित्तंशापरूपंपश्चात्नवमेस्कंधेवक्ष्यामीत्यर्थः।तत्रभवानीरुद्राणीनाथास्वामिनीईश्वरीयेषांतै
र्गणानामर्बुदसहस्रैरवरुध्यमानःसेव्यमानोभवोरुद्रः।भवानीनाथइतिएकपदंनवविशेषणंवाअनेनभवानीसामीप्यंविवक्षितं।आत्मनःस्वस्यप्रकृतिरूपं

भा॰ पं॰ कारणभूतो चतुर्मूर्तेर्वासुदेवादिरूपेणावस्थितस्य भगवतो महापुरुषपरपुरुषस्य संकर्षणसंज्ञां तुरीयां मूर्तिं रूपमित्यर्थः वासुदेवप्रद्युम्नानिरुद्धसंकर्षणक्रमवि
६७ वक्षया तुरीयामित्युक्तं क्रमानादरणात्तामसीं तमोधिष्ठात्री नमः शब्देनात्र प्रधानात्प्रधानं विविदितं तत्तमश्चासीत्तमसा गूढमग्रे प्रकेतं अव्यक्तं महदहंकारे लीयते अव्य
क्तं अक्षरे विलीयते इति प्रकृतिप्रयोगान्नद्धानावरणाद्भूतमसो नियंत्रीमित्यर्थः आत्मनि चित्ते समाधिरेव रूपमाकारो यस्य तेन उपायेनेति शेषः सन्निधाप्य साक्षात्कृत्य रात्रवस
मारां मंत्रात्मकं वाक्यमनुगृणन् जपन्नुपधावति स्तौतीति भज इत्यादिभिरित्यर्थः ॥१६॥ जप्यमंत्रमाह ॐ नमः ॐमिति ब्रह्मणो निर्देशः ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिवि
धः स्मृत इति वचनात् ॥ स्वव्यतिरिक्तं चिदचिदात्मकं सर्वं जगल्लिस्य विभूतिं च स्वशेषतया स्वभावेनैव स्वीकृतं वत इत्यर्थः भगवत इत्यनेन षड्गुणैश्वर्याद्गुणं विवक्षितं महा
पुरुषायेत्यनेन निखिलजगदुदयविभवलयलीलत्वमभिप्रेतं महापुरुषपरत्वस्य वेदाहमेतं पुरुषं महान्तमिति पुरुषसूक्तार्थप्रत्यभिज्ञायकत्वात् तत्र च तस्मादि

महापुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृतिमात्मनः संकर्षणसंज्ञामात्मसमाधिरूपेण संनिधाप्यैतदभिगृणन् भव उपधाव
ति ॥१७॥ श्रीभगवानुवाच ॥ ॐ नमो भगवते महापुरुषाय सर्वगुणसंख्यानायानन्तायाव्यक्ताय नम इति ॥१८॥ राडजायतेत्यादिना

कैत्वजगत्कारणत्वप्रतिपादनात् अद्भ्यः संभूत इत्यनुवाकोप्यत्रेत्यभिज्ञापते तत्रापि महापुरुषपरत्वस्य वर्णनात् ॥ अद्भ्यः संभूत इत्यनुवाकस्य हिरण्यगर्भः
समवर्तताग्रे इत्यनेनाचैन महाद्भ्यः संभूतं वृक्षी गर्भः इत्यष्टाविंत्येकं वाक्यत्वं प्रतिपादना हिरण्यगर्भादिकारणत्वेच्छायानुकारिणामपि वैदिकवाक्यानाम
हापुरुषपरत्वमवगतं सर्वगुणानां चेतनाचेतनयोरसंभावितानां जगत्कारणत्वौपाधिकानां महापुरुषपरत्वमेवोक्तार्थ्योपपादकानामाश्रितकार्योपपादका
दीनां च समवेतं तत्तस्य कीर्त्तिर्वा सत्यसौशील्यसौलभ्यज्ञानशक्तिप्रवृत्त्यादीनां संख्यानां कथनं स्फुति गणनं यस्मिंस्तस्मै अनेन सर्वे वेदा यत्पदमामनंतीति प्रकर्ष
पोंछिविदितः सर्वगुणानां संख्यानं च परिच्छिन्नत्वेन क्रियते अपि त्वानंत्येन स्वरूपतो गुणतश्चानंत्याभिप्रायेणानंतायेत्युक्तं ॥ अनेनोपायत्वप्राप्यत्वादिकं च विव
क्षितं एवं भूतं तस्या अप्युपायत्वमुपासनेन तच्चरणं एवं नान्य इति पुरुषसूक्तापौरुषत्यभिज्ञानादेव स्फुरितं तत्र तमेवं विद्वानमृत इह भवति नान्यः ॥ पंथा इति वेदनातिरि रामः
क्तोपायांतरनिषेधात् तस्यैव शरण्यत्वं जयनाद ॥ अव्यक्तायेति ॥ व्यक्तेरिंद्रियादिभिर्न व्यज्यते न गृह्यते इत्यव्यक्तः न चक्षुषा गृह्यते नेनापि वाचेत्यादि श्रुतस्य योन्निसंधे ६७

नखनिर्भिन्नपरिभागोर्ध्वस्य तस्यांडकटाहस्य विवरेणांतःप्रविष्टा या बाह्यजलधारा साऽतिमहता कालेन दिवो मूर्द्धन्यवततारेत्यन्वयः जलधारा वि
शिनष्टि तस्य त्रिविक्रमस्य यच्चरणपंकजं तस्यावनेजनेन क्षालनेनारुणं कुंकुमं तद्देवकिंजल्कास्तैरुपरंजिता सा चाखिलस्य जगतोऽघं पापं एव मलं तं
दपहंति वर्तते केवलमुपस्पर्शनेन जलं यस्याः सा ॥ न च हेतुरमलास्वरूपतो दुरितमिर मननत्वमा यथा ॥ अखिलजगदघमलापहोपस्पर्शनामला अंतर्म
लमगमस्या सा साक्षाद्भगवत्पदीति यदनुपलक्षितं जाह्नवी भागीरथीत्याद्युपलक्षणांतररहितं वचो नामधेयं तेनाभिधीयमानात्स्पर्शनात्पूर्वं
जाह्नव्यादिनामांतररहिता तथा केवलं भगवत्पदीति नामधेयेनाभिधीयमानेत्यर्थः ॥१॥ कौमोदिवो मूर्ध्नि यत्रावततारेति तत्राह ॥ यत्तद्विति य

नयुगसहस्रोपलक्षणेन दिवो मूर्द्धन्यवततार ॥१॥ यत्तद्विष्णुपदमाहुः यत्र ह वाव वीरव्रत औत्तानपादिः परमभागव
तोऽस्मत्कुलदेवताचरणारविंदोदकमिति यामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेन दृढं क्लिद्यमानांतर्हृदय औत्कं
ठ्यविवशामीलितलोचनयुगलकुड्मलविगलितामलबाष्पकलयाभिव्यज्यमानरोमपुलककुलकोऽधुनापि पर
मादरेण शिरसा बिभर्ति ॥२॥ ततः सप्त ऋषयस्तत्प्रभावाभिज्ञा यां ननु तपस आत्यंतिकी सिद्धिरेतावती भगवति सर्वा
त्मनि वासुदेवेऽनुपरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतां मुमुक्षव इव सबहुमानमद्यापि
याजटाजूटैरुद्वहंति ॥३॥

विष्णुपदमाहुस्तत्रेत्यर्थः किं तद्विष्णुपदं तत्राह यत्रेति ध्रुवमंडलेत्यर्थः यत्र ध्रुवो मूर्द्धनि वीरव्रतः दृढसंकल्पः भागवतश्रेष्ठः औत्तानपादिर्ध्रुवः अ
स्मत्कुलदेवताया भगवतः चरणारविंदोदकमिति हेतोः परमादरेण या धारामनुसवनं त्रिकालं शिरसाद्यापि बिभर्तीत्यन्वयः यद्वा ॥ अनुसवनं प्रतिक्ष
णं वर्द्धमानो भगवद्भक्तियोगः तेन दृढमंत्यं तत्क्लिद्यमानं क्लिद्यमानमंतःकरणं यस्य तथा तेनौत्कंठ्येन विवशं यथामीलितं च यल्लोचनयुगलं तदेव कु

भा॰ पं॰
६५

मानंरोमपुलककाकुलं यस्मतयाभ्यतः सन्निरस्यर्षयः॥२॥ ततः सप्तर्षयः तस्या गंगायाः प्रभावाभिज्ञाः संतो नोस्माकं तपःसिद्धिफलं स्यं विष्णुपदी सवेतावती रजो
धिकानात्तीत्यवं मन्वाना अद्यापि बद्धमाने जटाकलापकुटान्तिते रुद्वहंतीत्यन्वयः॥ तव दृष्टांतः॥ प्रभुसर्वात्मनि किमिवागतामिति तत्र हेतु सर्वात्मनि भगवति वा
सुदेवे विच्छिन्नभक्तियोगलाभेनैव उपेक्षिता अन्नाहेता अन्यपुरुषार्था अर्थकामादयः आत्मगतिः कैवल्यं च यैस्तैः इति सप्तर्षिविशेषणं॥३॥ ततो
अनेकसहस्रकोटीनां विमानानामनीकैः संघैः संकुलितेन देवयानेनाकाशमार्गेणावतरंत्यधः प्रस्रवंती इंदुमंडलमावार्य ब्राह्मसेरुमूर्द्धस्थे ब्रह्मस
दने निपतति॥४॥ तत्र चतुर्द्धा विभज्यमाना नामसीतादिसंज्ञाभिश्चतसृभिर्धाराभिः त्वासीतादिनाभिरभिधीयमाना चतुर्दिशं नदनदीपतिं समुद्रमेवाभिनिविशति स
ततोनेकसहस्रकोटिविमानानीकसंकुलदेवयानेनावतरंतीन्दुमंडलमावार्य ब्रह्मसदने निपतति॥४॥ तत्र चतुर्द्धाभिद्य
माना चतुर्भिर्नामभिश्चतुर्दिशमभिस्यंदंती नदनदीपतिमेवाभिनिविशति॥ सीतालकनंदा चक्षुर्भद्रेति॥५॥ सीतां तु ब्रह्मसद
नात्केशराचलादिगिरिशिखरेभ्योधोधः प्रस्रवंती गंधमादनमूर्द्धसु पतित्वांतरेण भद्राश्ववर्षं प्राच्यां दिशि क्षारसमु
द्रमभिप्रविशति॥६॥ एवं माल्यवच्छिखरान्निष्पतंती ततोनुपरतवेगा केतुमालमभि चक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति॥७॥
द्वे प्रविशति अभिनिविशत्योरित्याधारसंज्ञायां द्वितीया नामाप्याद्॥५॥ तत्र च समस्तलोकमध्ये सीता नाम प्राचीना धारा ब्रह्मसदनात्केसरादिशिखरेभ्यः केसराचल
हानि मेरुसमानोद्भूयप्रवाहान्यथ पंतेषामद्रिशिखरेषु पत्वा शिखरेषु पतति ततस्तेभ्योधोधः प्रस्रवंती गंधमादनस्य मूर्द्धसु परिभागे पतित्वांतरेण भद्रा
श्ववर्षं भद्राश्ववर्षस्य मध्ये च स्यंदमाना प्राच्यां दिशि क्षारसमुद्रं प्रविशति॥६॥ तथा चक्षुःसंज्ञा प्रतीची धारा माल्यवच्छिखरे निपतित्वा ततोधः प्र
विवंती अनुपरतः अप्रतिहतो वेगो यस्याः सा केतुमालं वर्षमभितो व्याप्य केतुमालस्य मध्ये प्रवंतीत्यर्थः प्रतीच्यां दिशि सरितां पतिं समुद्रं प्रविशति
अभिधारस्यैव कर्मत्वविवक्षयात्र द्वितीयाधारवत्तरत्राप्यभिनिविशश्चेत्यत्रोपसर्गसंघातपूर्वत्वस्यैव विवक्षितत्वात्॥७॥

६५

तथाभद्रासंज्ञाधारोत्तरतो मेरुशिखरान्निपतंती गिरिशिखरात् कुमुदशिखरादुच्चलितो श्वेतं गच्छंती नीलशिखरं उच्चलिता श्वेतपर्वतस्य शिखरमतिहायाश्रृं
गैवंश्रृंगवतः पर्वतस्य श्रृंगे पतिता ताननंतोधः स्यंदमाना उत्तरान् कुरून् भित्वा प्राप्य वदीच्यां दिशि लवणार्णवं प्रविशति ॥५॥ तथैवालकनंदासंज्ञाधारा मे
रोर्देवसदनाद्दक्षिणतः स्रवंती वहूनि गिरिशिखराण्यतिक्रम्य मध्यमस्य पर्वतशिखरात् पुष्पहेमकूटहिमवत्कूटात् हेमकूटहिमवत्पर्वतयोः श्रृं
गात्पतित्वा मस्तकतरं रंहसा विस्खलितवेगेन लुठंती भिंदंती भारतं वर्षमति व्याप्य दक्षिणस्यां दिशि समुद्रमनुप्रविशति ॥ अन्ये च नदा नद्यश्च अन्येचा
स्याप्लान्यप्रमानस्त्रिपेस्येकप्रोषः मेर्वादिगिरिदुहितरः तत्वसतावर्षे वर्षे शतशः संति ॥६॥ तत्रापि जंबूद्वीपेपि भारतं वर्षमेव कर्मक्षेत्रं कर्मसुख

भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखराद्गिरिशिखरमतिहाय श्रृंगवतः श्रृंगादवस्यंदमाना उत्तरांस्तु कुरून्
भित्वः ॥ उदीच्यां दिशि लवणार्णवमभिप्रविशति ॥५॥ तथैवालकनंदा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटान्यति
क्रम्य हेमकूटाद्धैमकूटान्यतिरभसतररंहसा लुठयंती ॥ भारतमभिवर्षं दक्षिणस्यां दिशि जलधिमभिप्रविशति य
स्यां स्नानार्थं चागच्छतः पुंसः पदे पदेऽश्वमेधराजसूयादीनां फलं न दुर्लभमिति ॥ अन्ये च नदा नद्यश्च वर्षे वर्षे सं
ति बहुशो मेर्वादिगिरिदुहितरः शतशः ॥६॥ तत्रापि भारतमेव वर्षं कर्मक्षेत्रमन्यान्यष्ट वर्षाणि स्वर्गिणां ०२

धुक्वनिमित्तानां पुण्यापुण्यरूपाणां देवमनुष्याणां स्थानमपदिशति सत्वतरेणान्वयः ॥ अस्मान्नित्वष्टौ वर्षाणि स्वर्गिणां पुण्यकर्मणां पुण्यशेषस्य भुक्तावषि
षस्य पुण्यकर्मणां उपभोगस्थानान्यन्तराव भौमानि स्वर्गपदानि व्यपदिशंति नतु तानि पुण्यापुण्यकर्मक्षेत्राणीत्यर्थः ननु अत्र केवलेष्वाष्टसु दत्तक
मेकाणिनां स्वर्गादिनापितवालोनयथावद्भवं संगतानां तत्र सुखानुभवतां पुण्यकर्मणां पुनस्त्वागमनमस्ति ते यावत्तं यातमवित्वावपेतमेवाध्वानं पुनर्नि
वर्ततमीत संपतत्यनेन स्वर्गलोको इतियातकर्मोच्यते ॥ ततरं च प्राप्यात कर्मणस्तस्य यदि किं चेदकरोत्ययं तस्मात्स्वर्गलोकात्पुनरेत्यस्मै लोकाय

भा॰पं॰ विषयाणांस्वधर्मफलानामकृतप्रायश्चित्तानांकर्मणांसद्भावोवक्तव्यः अन्यथायेदकर्मनिमित्तमजन्मनोःसंभवात्तुनरकरोहणात्नृपपतेः तथाचश्रुतेरमणी॰
६६ याचरणारमणीयांयोनिमापद्येरन्ब्राह्मणयोनिंक्षत्रिययोनिंवैश्ययोनिंवेति॥ स्मृतिरपि॥ वर्णाश्रमाश्चस्वकर्मनिष्ठाःप्रेत्यकर्मफलमनुभूयततःशेषेण
विशिष्टतरजातिकुलरूपायुःश्रुतवित्तसुखमेधसोजन्मप्रतिपद्यंतइति एवंचभुक्तावशिष्टेनपुण्येनकर्मणातिशयितविशिष्टभोगार्थंतद्देशस्य
त्यभिःसंभवतीति॥१०॥तान्यष्टौवर्षाणिवर्णयतियस्त्विति यत्रेतिचगद्यद्वयेनयेष्विति येष्वष्टसुवर्षेषुपुरुषाणांत्रेतायुगसमःकालोवर्ततेसुखोत
कर्षोत्रेतायुगसाम्यमुक्तंकृतयुगेहिसर्वेध्याननिष्ठाःद्वापरादौतुरुग्वकुलाः कथंभूतानांदेवतुल्यानांनागायुतबलानांपुरुषाणांस्वयुतंपुरुषमानेन

पुण्यशेषोपभोगस्थानानिभौमानिस्वर्गपदानिव्यपदिशंति॥१०॥ एतेषुपुरुषाणामयुतपुरुषायुर्वर्षाणांदेवकल्पानांनाग
युतप्राणानांवज्रसंहननबलवयोमोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणांतुत्रेता॰
युगसमःकालोवर्तते॥११॥यत्रहदेवपतयःस्वैःस्वैर्गणनायकैर्विहितमहार्हणाःसर्वर्तुकुसुमस्तबककिसलय॰
श्रियानम्यमानविटपलताविटपिभिरुपशुंभमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषुतथाचामलजला॰
शयेषुविकचविविधनववनरुहामोदमुदितराजहंसजलकुक्कुटकारंडवसारसचक्रवाकादिभिर्

एषांशिरपेषांवज्रवद्दृढसंहननंनेपारांतस्मिन्कठवयोमोदातैःप्रमुदितानियानिमहांतिसौरतानियेषांतानिमिथुनानितेषांव्यवायापवर्गेभोगाव
सानेएकवर्षावशिष्टेआयुषिधृतएकोगर्भोयैस्तानिकलत्राणियेषां॥११॥यत्रवर्षेदेवपतयःदेवश्रेष्ठाःस्वैःस्वैःसेवकगणनायकैःवि
हितमहार्हणाःकृतमहोपचाराःसंतःस्वैरंविहरंतीत्यन्वयः एतेषुस्थानेषुसर्वेषुऋतुषुकुसुमस्तवकादीनांश्रियासमृद्ध्यानम्यमानाः
प्रकीर्णताःशाखालताश्चयेषांतेविटपिभिर्वृक्षैरुपशोभमानानिरुचिराणिकाननानियेषुतेष्वाश्रमायतनेषुगिरिद्रोणीषुवर्तिर्यगंतरां ६६

विरजस्येति विरजाद्विषूच्यां भार्यायां शतजित्प्रवरो यस्य तत्पुत्राणां शतं जातं कन्या च जाता किलेति प्रसिद्धौ ॥२०॥ प्रियव्रतसंतानमुपसंहरति तत्रेति ॥ तत्र प्रि-
यव्रतसंतानविषये यं श्लोकः पठ्यते अतिप्रायः । चरमोद्भवः चरमस्य पुत्रशतस्य शतजिदादेरुद्भवः उद्भवत्यस्मादित्युद्भवः जनको विरजः । इमं प्रैयव्रतं वं-
शं कीर्त्याऽलमकरोदलंकृतवान् यथा विष्णुरुपेन्द्रः सुरगणं इन्द्रादिदेवतावर्गमिति ॥२१॥ इति श्रीभं वमे पं चदशः ॥ १५ ॥ एवं प्रकृतप्रियव्रतसंतानतच्चरित्रो राज्ञा
प्रियव्रतचरित्रे संक्षेपेण निर्दिष्टाः याद्वीपादिकल्पनाया विशेषं कथयति उक्तानुवादपूर्वकं पृच्छति ॥ भूमंडलस्यायामविशेषः दैर्घ्यविशेषः विस्तार इति यावत् उ-
क्तः । किंपर्यंतमुक्तस्तदाह यावदादित्यस्तपतीति ॥ यत्र चासौ ज्योतिषां गणैः नक्षत्रगणैः सह चंद्रमा वा दृश्यते ॥ किंपर्यंतमादित्यस्तपति चंद्रमा वा दृश्यते तेन

अत्रायं श्लोकः प्रैयव्रतं वंशमिमं विरजश्चरमोद्भवः अकरोदत्यलं कीर्त्या विष्णुः सुरगणं यथा ॥२२॥ इति श्रीभागवते मह-
पुराणे पंचमस्कंधे पंचदशोऽध्यायः ॥१५॥ राजोवाच ॥ उक्तस्त्वया भूमंडलायामविशेषो यावदादित्यस्तपति यत्र चासौ
ज्योतिषां गणैश्चंद्रमा वा सह दृश्यते ॥ तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः सप्त सिंधव उपक्लृप्ताः यत एत-
स्याः सप्तद्वीपविशेषविकल्पस्त्वया भगवन् खलु सूचितः ॥ एतदेवाखिलमहं मानतो लक्षणतश्च सर्वं विजिज्ञासामि ॥
भगवतो गुणमये स्थूलरूप आवेशितं मनो ह्यगुणेपि सूक्ष्मतम आत्मज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षमम-
वेशितुं तदु हैतद्गुरोऽर्हस्यनुवर्णयितुमिति ॥२॥

नाह यत्रेति भूमंडलविस्तारेणैतस्याः प्रभवः सप्तद्वीपानां जंबुद्वीपादीनां ये विशेषाः नाममानलक्षणादय-
स्तेषां विकल्पः भेदो भगवान् त्वया सूचितः संक्षेपेणोक्तः एतदेवं भूमंडलमखिलं मानतो लक्षणतश्च प्रकाराणाम् तथाहं सर्वं विस्तरतो विजिज्ञासामि ज्ञातु-
मिच्छामि किं तज्जिज्ञासया तत्राह भगवत इति ॥ गुणमये सत्त्वादिगुणपरिणामरूपे भगवतः स्थूलरूपे आवेशितं मनः ॥ हि यस्मादगुणे सत्त्वादिगुणरहिते
सूक्ष्मतमे इति यावत् ॥ सूक्ष्मतमं गुणप्रभवतः सूक्ष्मतमरूपेतयात्मज्योतिषि स्वयंप्रकाशे परमात्मस्वरूपे ब्रह्मणि भगवद्वासुदेवादिनाम्ना वाच्ये आवेशितुमा-

भा॰ पं॰
६१

मंके सममलंमवेदत्तोजित्वा सामितत्तोममजिज्ञासुरवादेग्रोरोरात इमंडलमानलक्षणादिभिरनुवर्णितमर्हसि॥२॥ इत्थं पृष्टो बादरायणिस्तावद्भगवद्विभूतेरनंतत्वा
त्कार्त्स्न्येन वाङ्मनसोरविषयतां वदन्मानादिभिर्भूमंडलवर्णनं प्रतिजानीते। नवा इति। महाराज भगवतो मायागुणानां विभूतिः सत्वादिगुणपरिणामानंतब्र
ह्मांडात्मिका लीला विभूतिस्तस्याः स्थानविशेषाणां विस्तृत्यंतर्गतलोकानामित्यर्थः॥ काष्ठामंतमात्मरूपतः नामरूपाभ्यां मनसा वचसा वाधिगंतुं ज्ञातुं
वक्तुं च पुरुषायुषेणापि पुरुष एवालं न तु अतः स्थानविशेषाणां मानं स्यादिति भावः। तस्मात्कार्त्स्न्येन वाङ्मनसाविषयत्वात्प्राधान्येन भूगोलस्य विशेषमवां

ऋषिरुवाच॥ न वै महाराज भगवतो मायागुणविभूतेः स्थानविशेषाणां नामरूपतः काष्ठां मनसा वचसा वाधिगंतुमलं वि
बुधायुषापि पुरुषस्तस्मात्प्राधान्येनैव भूगोलकविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः॥१॥ यो वायं द्वीपः
कुवलयकमलकोशाभ्यंतरकोशो नियुतयोजनविशालः समवर्तुलो यथा पुष्करपत्रं यस्मिन्नव वर्षाणि नवयोजन
सहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवंति एषां मध्ये इलावृतं नामाभ्यंतरवर्षं यस्य नाभ्यामवस्थितः स
र्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य॥ मूर्द्धनि द्वात्रिंशत्सहस्रयोज
नविततो मूले षोडशसाहस्रं तावतांतर्भूम्यां प्रविष्टः॥३॥ तत्रभेदं नाममानलक्षणैर्व्याख्यास्यामः प्रकटयिष्यामः इति॥२॥ तदेवाह यो
वा इति॥ प्रसिद्धोयं द्वीपो जंबूद्वीपः कुवलयं भूमंडलं तदेव कमलं तस्य कोशाः सप्तद्वीपाः तेष्वभ्यंतरः॥ अंतरवर्ती कोशः जंबूद्वीप इत्यर्थः॥ नियुतयोजनविशा
लः लक्षयोजनविस्तीर्णः॥ समवर्तुलो समो वर्तुलश्च वर्तुलत्वेन कोणाभावात्सर्वतः समपरिमाण इत्यर्थः यथा पुष्करस्य पत्रं कमलपालाशं समवर्तुलं त
थेति। यस्मिन् जंबूद्वीपे वर्षाणि प्रत्येकं नवयोजनसहस्रमायामो येषां तानि आयामो विस्तारः॥ एतच्च भद्राश्वकेतुमालव्यतिरेकेण द्रष्टव्यं तत्सन्नि
वेशप्रकारस्तूक्तः प्रवृत्तं संस्थिते द्वे द्वे वर्षे दक्षिणोत्तरे दीर्घे इति तत्र चत्वारि चतुरस्राणि लावृतमित्यादि नामभिः समर्पितैः नीलश्वेतश्रृंगवच्चिष

रामः
६१

स्वहारिषासक्तिर्हि तेषां प्रीतिविषयतयाऽदोषदर्शनात्स्यागपूर्वकं निरतिशयप्रियत्वात्म परमात्मस्वरूपमनुभवतां तेषु पुनः कुतः प्रीति
रित्याह ।। नेति हे द्विजश्रेष्ठ तादृशानां भागवतानामात्मारामाणां मुकुंदसंगानां दुःखहेतुत्वानुसंधानेन त्यक्तदेहापत्यकलत्राद्यभिनिवेशा
नां पुंसां पुनर्देहेष्वभिनिवेशः पूर्वं दोषदर्शनेन त्यक्ताभिनिवेशः ।। भवितुं नार्हतीति नूनं निश्चयः ।। २ ।। दोषहेतुत्वेपि तादात्विकसुखहेतु
त्वादस्त्वभिनिवेश इति चेत्तत्राह ।। महतामिति ।। हे विप्रर्षे उत्तमश्लोकस्य भगवतः पादयोश्छायया या छाया तत्तापत्रयनिरसनद्वारानंदहे
तुत्वात्तदनुभूतिः छायाशब्देन विवक्षिता ।। भगवत्पादाब्जानुभूत्या निर्वृतं सुखितं चित्तं येषां महतां कुटुंबे स्पृहारूपा मतिर्न संभवति निरतिश

नूनं निर्मुक्तसंगानां तादृशानां द्विजर्षभः ।। गृहेष्वभिनिवेशोयं पुंसां भवितुमर्हति ।। २ महतां खलु विप्रर्षे उत्तमश्लोकपा
दयोः ।। छायानिर्वृतचित्तानां न कुटुंबे स्पृहामतिः ।। संशयोयं महान्ब्रह्मन्दारागारसुतादिषु ।। सक्तस्य यत्सिद्धिर
भूत्कृष्णे च मतिरच्युता ।। ४ ।।

यानंदरूपभगवच्चरणानुभवसुखितचित्तानां दुःखमिश्रात्यल्पसुखहेतुष्वेवंविधनिमित्तेष्वभिनिवेशो न संभवतीत्यर्थः ।। ३ ।। स्वस्तस्वा
त्मारामस्य प्राक्तनबलवत्प्रतिबंधवशात्स्पृहामतिः स्यादपि पुनर्गृहासक्तस्य भगवद्भक्तिः कुतो मुक्तिस्वरूपं घटत इत्याह ।। संशय इति ।।
हे ब्रह्मन्नयं महान्संशयः कोसावित्यत्राह ।। दारागारसुतधनादिषासक्तस्य कृष्णे मतिर्भक्तिस्ततो गार्हस्थ्यधर्मैरविच्छिन्नाया मुक्तिस्वरूपम
भूदिति यदयं महान्संशय इत्यर्थः ।। ४ ।।

भा॰ पं॰ एवमापृष्टो बादरायणिः सत्यमात्मारामस्य गृहासक्तिर्गृहासक्तस्य च पुनर्भक्तिश्च न घटत इति ॥ आत्मारामस्य भागवतस्यापि तु पाधिवग्राहा
२ हाशक्तत्वेपि प्राचीननिवृत्तधर्मात्तु प्राग्वलात्पुनर्भक्तियोगोपसंहारः संभवत्येवेत्याह ॥ बाढमुक्तमिति ॥ सत्यमुक्तमित्यर्थः ॥ गृहासक्तस्य भ
क्तियोगासंभवस्तस्याङ्गीकारः ॥ आत्मारामस्य पुनः गृहाद्यभिनिवेशस्तत्राङ्गीकारः ॥ प्रियव्रतस्य स्वायंभुवः स्वयंभ्वादिप्रार्थनया गृ
हाश्रमपरिग्रहः ॥ न तु स्वाभिनिवेशेनेत्यात्मारामस्य गृहाद्यभिनिवेशो नास्त्येवेत्यभिप्रायः ॥ ज्ञातेनोपि गृहाद्यभिनिवेशो नास्तीति तु स
म्यगुक्तं ॥ अपि तु गृहासक्तस्य पुनर्भक्त्युपसंहारो न घटत इत्युक्तं तत्स्यादित्याह ॥ किंत्विति ॥ उत्तमैर्वृत्त्यादिभिः श्लोक्यते स्तूयते इत्युत्तमश्लोकः उ
त्तमः श्लोकः स्तवो यस्येति वा ॥ तस्य भगवतः श्रीमतोः श्रियासेव्यमानयोश्चरणारविंदयोररविंदवत्सौगंध्यसौकुमार्यलावण्यादिश्चे

बाढमुक्तं किंतु भगवत उत्तमश्लोकस्य श्रीमच्चरणारविंदमकरंद आवेशितचेतसो भागवतपरमहंसदयितक स

थां किंचिदंतरायविहतां स्वां शिवतमां पदवीं न प्रायेण हिन्वंति ॥५॥

मात्रक्तयोश्चरणयोर्यो मकरंदः ॥ मकरंदवत्सेवाह्लादसुखरूपो भक्तिरसस्तस्मिन्नावेशितं चेतो येषां ते कथंचिदंतरायेण विघ्नेन विहतां वि
च्छिन्नामपि कथंचिदित्यनेन भागवतैर्भक्तैरविचाल्यत्वं व्यज्यते भागवताये परमहंसा नितरां विशुद्धांतःकरणाः तेषां दयितस्य प्रीतिविषय
स्य भगवतः कथां कथाश्रवणादिजन्यां भक्तिं शिवतमां पदवीं मोक्षमार्गभूतां न हिन्वंति न त्यजंतीति किंतु पूर्ववासनया तामेवानुतिष्ठंतीत्यर्थः ॥ त
था चोक्तं भगवता ॥ पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते इत्यादिना ॥ तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं ॥ यतते च ततो भूयः संसिद्धौ कुरुनंद रामः
न पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः इत्यनेन च ॥ प्रायेणेत्यंतरायविहतामित्यस्यान्वयः ॥ भक्तियोगस्य विघ्नबहुलत्वात् ॥ न तु प्रायेण न हि २

एवमुक्तयावृत्त्यावर्षाणामयुतानि तेषां सहस्राणि तेषां मंते तत्पर्यंते काले वसितो निश्चितः कर्मनिर्वाणावसरः राज्यभोगादेः समाप्तिसमयो येन सः अधिकृत्य भुज्य
मानं पित्रादिपरंपरयाऽऽगतं तं रिक्थं स्वतनयेभ्यो यथाविभागं विभज्य दत्त्वा स्वयं सकलानां संपदां निकेतनाद्गृहाश्रमात् स्वनिकेतात् स्वगृहात् पुलहाश्रमं शालिग्रामक्षेत्रमु
ति प्रवव्राज जगाम ॥७॥ कौसौ पुलहाश्रमः यं प्रवव्राजेत्यत्राह यत्र घद्वयेन । यत्र ह पुलहाश्रमे भगवान् हरिरद्यापि निजजनानां वात्सल्येन निजजनविष
यकवात्सल्येन स्वेच्छापरिगृहीतरूपेण सन्निधाप्यते सन्निहितो भवतीत्यर्थः ॥८॥ यत्राश्रमस्थानामुभयतः उपर्यधश्च नाभिभिर्बाह्यचक्रैः शिलामध्यगै

एवं वर्षायुतसहस्रपर्यंतावसितकर्मनिर्वाणावसरोधिभुज्यमानं स्वतनयेभ्यो रिक्थं पितृपैतामहं यथादायं विभज्य स्वयं
सकलसंपन्निकेतात् स्वनिकेतात्पुलहाश्रमं प्रवव्राज ॥७॥ यत्र ह वाव भगवान् हरिरद्यापि तत्रत्यानां निजजनानां वात्सल्ये
न संनिधाप्यते इच्छारूपेण ॥८॥ यत्राश्रमपदान्युभयतो नाभिभिर्दृषच्चक्रैश्चक्रनदी नाम सरित्प्रवरा सर्वतः पवित्रीकरोति ॥९॥
तस्मिन्वाव किल स एकलः पुलहाश्रमोपवने विविधकुसुमकिसलयतुलसिकांबुभिः कंदमूलफलोपहारैश्च समीह
मानो भगवत आराधनं ॥ विविक्त उपरतविषयाभिलाष उपभृतोपशमः परां निर्वृतिमवाप ॥१०॥ तयेत्थमविरतपुरुषपरि
चर्यया भगवति प्रवर्द्धमानानुरागभरद्रुतहृदयशैथिल्यः प्रहर्षवेगेनात्मन्युद्भिद्यमानरोमपुलककुलक औत्कंठ्यप्रवृत्तप्रणयबाष्प क
निरुद्धावलोकनयनोभिरेभे ॥११॥ चक्रैश्चिह्नितैश्च नद्याख्या सरितां प्रवरा श्रेष्ठा सर्वतः पवित्रीकरोति ॥९॥ तस्मिन्पुलहाश्रमोपवने एकलः
असहायः नानाविधैः कुसुमादिभिः कंदादिरूपैरुपहारैर्नैवेद्यैश्च भगवतस्त्वाराधनं समीहमानः कुर्वाणः विविक्तः विशुद्धाहारः ॥ उपरतो निवृत्तो विष
येष्वभिलाषो यस्य स्वांतरवोपभृतः समृद्धः उपशमः बाह्यांतःकरणनिग्रहो यस्य सः निर्वृतिं प्रीतिरूपां परां भक्तिमवाप ॥१०॥ एतदेव प्रपंचयति गच्छ
द्वयेन ॥ एवं तयेत्थं विधयाऽविच्छिन्नया परमपुरुषपरिचर्यया सर्वांतरात्मनि भगवति निरतिशयकीर्त्तौ प्रवर्द्धमानोऽनुरागः प्रेमा तस्य बलेनोत्कर्षे

णाय हृतं द्रवीभूतं तेन हृदयं तेन पैौपित्यमनुपमोपस्य च हर्षवेगेनानंदातिशयेनात्मनि देहे उद्भिद्यमानेन रोमपुलककुलं रोमांचवृंदं यस्य स समासांतः कका
रः ॥ औत्कंठ्यात्प्रवृत्तेन प्रणयबाष्पेण निरुद्धे अवलोको यः पयोस्तेन यनेयस्य स मश्रमिरेमेररामेत्यर्थः ॥ ११ ॥ एवं वर्त्तमानः ॥ तामपि क्रियमाणां भगवत्सप॰
र्यां न सस्मार ॥ तत्र हेतुं वदन् विशिनष्टि ॥ निजरमणमरणास्वनिरतिशयप्रीतिविषयस्य भगवतोरुणे चरणारविंदे तयोः युगं ध्यानेनोपचितसम्बद्धः योभ॰
क्तियोगः कृतः प्रभाग्रविषयः तेन परिप्लुतः सर्वतो व्याप्तः परमाह्लादः परमानंदो यस्मिन्सः गंभीरो हृदये हृदस्तस्मिन्नवगाढा निमग्ना धिषणा बु

एवं निजरमणारुणचरणारविंदयुगध्यानपरिचितभक्तियोगेन परिप्लुतपरमाह्लादगंभीरहृदयहृदवगाढधिषणस्तामपि
क्रियमाणां भगवत्सपर्यां न सस्मार ॥ १२ ॥ इत्थं धृतभगवद्व्रत ऐणेयाजिनवाससानुसवनाभिषेकार्द्रकपिशकुटिलजटाक
लापेन च विरोचमानः ॥ सूर्यर्चा भगवंतं हिरण्मयं पुरुषमुज्जिहाने सूर्यमंडलेभ्युपतिष्ठन्नेतदु हो वाच ॥ १३ ॥

द्धिर्यस्य सः ॥ १२ ॥ एवं धृतानि भगवद्व्रतानि प्रायेण सः । एणाया हरिण्याः चर्म ऐणेयं तदेव वासस्तेनानुसवनं कालत्रये अभिषेकेण स्नानेन आर्द्राः कपिशा
श्च कुटिलाश्च या जटास्तासां समूहेन विरोचमानः सूर्यमंडले उज्जिहाने उत्तिष्ठति सति स्वयमुपतिष्ठन् सूर्यमंडलस्थं हिरण्मयं ॥ एषोंतरादित्ये हिरण्मयः पुरुषो
दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी इत्यंतरादित्यविद्योक्तं भगवंतं सूर्यवास्तव्यंतिर्वर्तिभगव
त्वकापिकया ऋचावक्ष्यमाणया यायजन् ऋग्युक्तप्रकारं ध्यायन्नित्यर्थः एतद्वाक्यमुवाच ह ॥ १३ ॥

तद्यथुदाहरति परोरजइति सवितुः सर्वलोकस्य प्रसवनादुत्पादनात्सविता सर्वलोकप्रसववात्सविता स तु कीर्तिं तरति स्मरते यद्वा श्रेयरणे ॥ प्रचोदयिता सविता अ
विष्णुरेव विष्णोर्नाम सहस्रमेऽस्यपक्रमात्सविताऽरविलोचनइति सवितृशब्दस्य भगवन्नामतया परितत्वात् ॥ तस्य सवितुर्देवस्य विष्णोर्भर्गस्तेजो मयं रूपं ऽस्मः
रणागता विश्वस्मात्स्वटउत सवकृत्व चनेरूप मे ततत्पारणं गच्छेमः इत्यर्थः ॥ भर्गो विशिष्टं परोरजः रजसपरं लोकं विलक्षणं लोकपरोत्ररजः शब्दः लोकारजां ॥
स्य ञ्चत्तगतिवोक्तेः यद्वा ॥ रजः प्रकृतिमंडले ततः परं चर्यं तमस्परजसः पराक ॥ आदित्यवर्णं तमसः परस्तादिति श्रुतेः रजसः प्रकृतिमंडलात्परा कपरस्म
तत्वयं तन्निवासं वंतंस्त्यर्थः ॥ जातवेदः जातं सततमाविर्भूतं वेदः ज्ञानं यस्य ततः नित्यासंकुचितज्ञानं नित्यर्थः अत्र सवितृवेदभर्गपदैर्गायत्री ज्ञाताभव
तित्राप्रियपोक्तार्वार्थः ॥ देवस्य भर्गो ऽम इति निर्देशः ॥ शिलापुत्रकस्य शरीरमितिवद्द्रष्टव्यः ॥ कीदृशोसौ देवः यस्य भर्गं ऽमस्तत्राह ॥ मनसा संकल्परूप

परोरजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान स्वरेतसादः पुनराविश्य चष्टे हंसं गृध्राणं नृषद्रिंगिरामिमः
१७ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे सप्तमोध्यायः ॥ ७ ॥ श्रीशुक उवाच ॥ एकदातु महानद्यां कृता ।
भिषेकनैयमिकावश्यको ब्रह्मासादरमभिगृणानो मुहूर्तत्रयमुदकांतउपविवेश ॥ १ ॥

ज्ञानेनैवाचिदात्मकं इदं जगज्जजान ससर्ज पश्चाद्वः स्वसृष्टजगत्स्वरेतसा स्वस्यरेतः ॥ स्वशक्तिः स्वशरीरभूतेन जीवेनाविश्याप्रविश्य ॥ यद्वा ॥ इदं चिदचिदा
त्मकं जगत्स्वतेजसा स्वीयसंकल्परूपेण ज्ञानेन प्रविश्य पूर्वं जीवांतः प्रविष्टोपि पुनः कारणकलेवरप्रेरणोनुकूलव्यापराय स्वसंकल्परूपेण ज्ञानेना
नुप्रविश्येत्यर्थः ॥ हंसं जीवं चष्टे पश्यति हंसं विशिनष्टि गृध्राणं शब्दादिविषयान्कांक्षमाणोन्नपद्रिंगिंनृषीदति अत्र वसादयति क्षेपयति संसारयति इति
नृषद्रुद्धितस्याशिंगिं गिरणं वृत्तिः गिगिगता विति धातुः वृद्धिवृत्तिरित्यर्थः ॥ तयाराध्याददाति कर्मफलानि भुंक्ते नृषद्रिंगिरस्तनृषद्रिंगिरं छांदसत्वा छंदसि
नित्वविरूपता भावे सवर्णदीर्घ इति ॥ नृषद्रिंगिरं समाचष्टे इति पदे त्तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतिश्रुतिप्रत्यभिज्ञाताभवति तत्राप्ययं ।

भा.पं. वान्नद्यां चक्रनद्यां कृतत्र्यभिषेकः स्नानं नैत्यिकं नियतमावश्यकं नित्यं नैमित्तिकं च येन सः। ब्रह्माक्षरं प्रणवं जपन्नुदकान्ते नद्यास्तीरे मुहूर्तत्रयं उपविष्टो बभू-
३१ व॥१॥ हे राजन् तत्र तीरे तदा भरतावस्थानसमये हरिणी एणी पिपासया जलाभ्याशं जलसमीपं तत्रत्यैकैव असहायैव जगाम तया हरिण्या उदके नितरां पेपीयमाने स-
ति अविदूरे समीप एव नदतो ध्वनिं कुर्वतो मृगपतेः सिंहस्य लोकभयंकरस्तु उन्नादो ध्वनिरुदपद्यत हरिण्याः श्रुतो भवदित्यर्थः॥२॥ तमुन्नादमुपश्रुत्याकर्ण्य
सा मृगस्य वधूः हरिणी प्रकृत्या स्वभावेनैव विक्लवा व्याकुला सुतरां हरिभयस्याभिनिवेशेन व्यग्रं व्याकुलं हृदयं यस्याः सा अत एव पारिप्लवदृ-
ष्टिस्तरलचकितनिरीक्षणा पिहिते दृशा अगता अनुपगता तृषा पिपासा यस्याः सा तथाभूता सैव सहसा अत्राक्रान्तुं उच्चक्राम नदीमुत्प्लुत्य लंघितवती॥३॥ उत्पतन्त्या अन्त-

तत्र तदा राजन् हरिणी पिपासया जलाशयाभ्याशमेकैवोपजगाम। तया पेपीयमाने उदके तावदेवाविदूरे नदतो
मृगपतेरुन्नादो लोकभयंकर उदपतत्॥२॥ तमुपश्रुत्य सा मृगवधूः प्रकृतिविक्लवा चकितनिरीक्षणा सुतराम
रगततृषा पि हरिभयाभिनिवेशव्यग्रहृदया पारिप्लवदृष्टि भयात्सहसैवोच्चक्राम॥३॥ तस्या उत्पतन्त्या अन्तर्वत्न्या उरुभयाव
गलितो योनिनिर्गतो गर्भः स्रोतसि निपपात॥४॥ तत्प्रसवोत्सर्पणभयखेदातुरा स्वगणेन वियुज्यमाना कस्यांचिद्
दर्यां कृष्णसारसती निपपाताथ च ममार॥५॥ तं त्वेणकुणकं कृपणं स्रोतसानूह्यमानमभिवीक्ष्यापविद्धं बन्धु
रिवानुकंपया राजर्षिर्भरत आदाय मृतमातरमित्याश्रमपदमनयत्॥६॥

र्वत्न्याः पूर्णगर्भिण्याः तस्या हरिण्या गर्भ उरुभ-
येनावगलितः स्वस्थानात्प्रच्युतो योनेर्निर्गतः स्रोतसि प्रवाहे निपपात पतितो भूदित्यर्थः॥४॥ तत्प्रसवो गर्भपातः उपसर्पणमुत्प्लवनं भयं चेत्येतैः यः खेदः
तेनातुरा पीडिता स्वयूथेन वियुक्ता कृष्णसारसती कृष्णमृगवधूः कस्यांचिद्दर्यां गिरिगुहायां निपपात॥ अपपतनानन्तरं ममार मृतवती च॥५॥ तत्स्रो-
तसा प्रवाहेणोह्यमानमेणकुणकं एणस्यापत्यमभिवीक्ष्य राजर्षिर्भरतः मृता माता यस्य तं मृतमातरं बन्धुभिः स्वपित्रादिभिरपविद्धं परित्यक्तं स्व- एमः ३१

एतस्मिन्नेणशिशौ कृतः निजाभिमानः आत्मीयत्वाभिमानो येन तस्य अहरहस्तस्याहरहः ॥ तस्यैणशिशोः पोषणाद्यनुध्याने ध्यानेन तत्पोषणमाहारेणापा
लनं व्याघ्रादिभ्यो रक्षणं प्रीणनं कंडूयनादि लालनं करस्पर्शचुंबनादि ॥ एतैर्यदनुध्यानमासक्तिस्तेनांतरायेण भगवत्परिचर्यादयः ॥ आत्मनियमाः
अहिंसादिभिः सहिताः सर्व एव वर्णीकृत्य एकैकशो वियुज्यमानाः संतः कतिपयेनाहर्गणेनोदवसन्तु सम्भावमभूव ॥७॥ तदासक्तिं प्रपंचयति अहो इ
त्यादिना रीति कृतोऽत्र पंगत्यंतेन ॥ अयं हरिणकुणकः ईश्वररथचरणः कालचक्रं तस्य परिभ्रमणवेगेन स्वगणादिभ्यो विवर्जितः अतएव कर्षणो॰
दीनो मां शरणमासादितः प्राप्तश्च मामेव मातापित्रादिबुद्ध्योपेयाय प्राप्तः यौथिकाः संघातिनः नोपयमामेव गोपानां गोप्तारमधिकं मन्वानमतोऽस्मं॰

तस्य ह वा एणकुणक उच्चैरेतस्मिन्न कृताभिमानस्याहरहस्तत्पोषणपालनप्रीणनलालनानुध्यानेनात्मनियमाः स
हयमाः पुरुषपरिचर्यादय एकैकशः कतिपयेनाहर्गणेन वियुज्यमानाः किल सर्व एवोदवसन् ॥७॥ अहो बतायमे
णकुणकः कृपण ईश्वररथचरणपरिभ्रमणरयेण स्वगणसुहृद्बंधुभ्यः परिवर्जितः शरणं च मोपसादितो मामेव ५
मनु मातापितरौ भ्रातृज्ञातीन्यौथिकांश्चैवोपेयाय नान्यं कंचन वेद मय्यतिविस्रब्धश्चात एव मया मत्परायणस्य पाल
नप्रीणनलालनमनसूयुनानुष्ठेयं शरण्योपेक्षादोषविदुषा ॥८॥ नूनं ह्यार्याः साधव उपशमशीलाः कृपणसुहृद एवंविधार्थे ग्त

कंचन गोप्तारं न वेद मय्येवातिविस्रब्धः अभितरां विश्वासयुक्ता मतिर्यस्य सः अतः कारणादेवं मत्परायणस्य मदेकशरणस्य हरिणकुणकस्य पोषणादि साधवः
कं एतस्मिन्निमित्तं मम स्वार्थो नश्यतीत्यसूयारहितेन मया अवश्यमनुष्ठेयं ॥ यस्माच्छरण्योपेक्षा शरणागतानादरः विदुषां दोषः प्रत्यवायकारः यथा शर
णागतं त्यक्त्वा शरणपालकत्वाच्चेन विश्वस्तनीयोऽसौ शरण्योपेक्षा शरणागतविषयेऽनादरः विदुषो दोषः इति ॥८॥ अतएवार्याः साधवः परोपकारशीलाः उ
पशमस्वभावाः कृपणेषु सुहृदः सौहार्दवंतः एवंविधार्थे शरणागतरक्षणार्थे स्वार्थान्स्वप्रयोजनानि गुरुतरानपि उपेक्षंते तरां न पित्र्यो जनानना

भा॰पं॰ ३२ इत्येवं विश्वस्तशरणागतस्वत्यागं कुर्वीति । स्वमित्येव कृतात्मपंगः कृतस्वत्वपंगः ॥ आसक्तिर्येन स भरतः आ मनाच्च वस्यामुतत्रासनमुपवेशनमटनं संचरण
मशनं भोजनं कंदमूलादीनां मृगपत्सेन सहायेस्नेहेन नानुविद्धं हृदयं येन तथाभूत आसीत् ॥ ९ ॥ स्नेहानुबंधमेवाह कुशकुसुमेत्यादिना स्वादयंती
त्यतेन ॥ कुशादीन्याहरिष्यमाणः मृदिमगो मा विनागच्छामि चेन्मृगोनेव कादादयो न दयेयुरिति वृकशालावृकादिभ्यो भयमाशंकमानः एण
हकोश्वरणपश्वानः हरिणकुणकेन सहैव वनं प्रविशति । पथिषु पथि च मुग्धभावेन सौकुमार्येण मोढ्येन वा विषक्तमतिराकृः स्वात्मतिर्वा
गंतुमसमर्थो भवति नेष्ठति वा मृगस्तदा तं प्रणयस्य स्नेहस्योत्कर्षो यस्मिंस्तद्धृदयं यस्य तथाभूतो भरतः कार्पण्यान्मृगविश्वो मजदुःखासहि

वाधीनपितृकृतरानपेतं तं इति कुनाउपंग आसनशयनाटनस्थानाशनादिषु सहमृगजहुना स्नेहानुबद्धहृदय आसीत् ॥ ९ ॥ कु
शकुश[illegible] समित्पलाशफलमूलोदकान्याहरिष्यमाणो वृकशालावृकादिभ्यो भयमाशंकमानः सह हरिणकुणकेन
व नं समाविशति पथिषु मुग्धभावेन तत्र विषक्तमतिः प्रणयभरहृदयः कार्पण्यात्स्कंधेनोद्वहति । एवमुत्संग उरसि चाधायोपला त
लनमुदं परमामवाप ॥ १० ॥ क्रियायां निर्वत्यमानायामंतरालेप्युत्थायोत्थाय यदैनमभिचक्षीत तर्हि वाव स वर्षपतिः प्र
कृतिस्थेन मनसा तस्मा आशिष आशास्ते स्वस्तिस्ताद्वत्स ते सर्वत इति ॥ ११ ॥ ११ । ११ । ११ । ११ । ११ । ११ । ११ । ११ । ११ ॥

श्चतत्स्वरूपादैन्यात्स्कंधेनोद्वहति स्कंधयोरारोप्य गच्छति । एवमासनसमये उत्संगे शयनसमये उरसि चाधाय परमां मुदमवाप ॥ १० ॥ क्रियायां नित्यनैमित्तिक
यां निर्वर्त्यमानायां क्रियमाणायां सत्यामंतराले मध्ये दत्तो त्थायोत्थाय यदैनं मृगमभिचक्षीत पश्यति । तर्हि वाव तदा हि स वर्षपतिः भरतः प्रकृति
स्थेन मनसा तस्मै मृगाय आशिष आशास्ते । आशीराशासनमेवाह स्वस्तीति हे वत्स हे तुभ्यं सर्वतः सर्वत्र देशे काले च स्वस्तिस्यादिति आशास्ते स्तादिति राम:
पाठेप्ययमेवार्थः ॥ ११ ॥ ३२

त्मपदेहात्मभ्रमो यस्य समनिहतदेहात्मभ्रमस्येत्यर्थः ॥ अनात्मात्मेतरच्छरीरमनात्मा एवं सत्ये स्वात्मनि उपलभ्यमानमंतरात्मतया साक्षात्क्रियमाणं ब्रह्म तदेवात्मा परमात्मा ।
तस्यानुभवो यस्य सः ॥ यद्वा ॥ स्वांतरात्मा मत्तत्त्वं ब्रह्मैव परमात्मा तस्यानुभवउपलभ्यते येन तथोक्तः य आत्मा तत्त्व तिति ष्ठति तिप्रकारेण जीवात्मन्यवस्थितं परमात्मा
नं उपलभ्यमानमित्यर्थः ॥ एवं भूतोपि निरभिमान एव देहात्मभ्रमस्वतंत्र्यात्मरक्षित एव रमां च भिमनुगपतत्र उरुदत्तस्येत्यर्थः ॥ ४ ॥ गयस्य महात्म्यप्रतिपादिकां
गाथामवतारयति ॥ तस्येति ॥ हे पांडवेय पुराविदः पूर्वकालिकवृत्तांताभिज्ञाः तस्य गयस्येमां महात्म्यसूचिकां गाथामुपगायंति गाथामेवाह गयमिति अभि:
गयं नृपं कः पुमान् कर्मभिः प्रतियाति तत्सदृशो जीयकर्मभिः कोपि पुमान्नानुकर्तुं शक्नोतीत्यर्थः तत्कृतं कर्म पुनरन्यः न भवतीति यावत् ॥ तत्र हेतुं वदन्प्रति
पानाप्राक्यधर्मेतामाह ॥ यज्वा यावन्क्रतिविहितयज्ञानुष्ठाता ॥ अभिमानी मानास्पदः बहुवर्णोक्ष्मम धर्मो रांगो गोप्ता समागताश्रीसंपद्येन यस्मिन्नि

तस्येमां गाथां पांडवेय पुराविद उपगायंति ॥ गयं नृपः कः प्रतियाति कर्मभिर्यज्वाभिमानी बहुविद्धर्मगोप्ता ॥ समागतश्रीः
सदस्पतिः सतां सत्सेवकोन्यो भगवत्कलामृते ॥ ५ ॥ यमभ्यषिंचन्परया मुदा सतीः सत्याशिषो दक्षकन्याः सरिद्भिः ॥ य
स्य प्रजानां दुदुहे धराशिषो निराशिषो गुणवत्सस्नुतोधाः ॥ ६ ॥ छंदांस्यकामस्य च यस्य कामान्दुदूहुराजह्रुरथो बलिं
नृपाः ॥ प्रत्यंचिता युधि धर्मेण विप्रा यदाशिषां षष्ठमंशं परेत्य ॥ ७ ॥ त्रिवासमभसद्यः सभायाः पतिः सतां सेवकः कस्तस्मादन्यो भगवत्कलां
यमृते विनाकः गयं विनाय ज्वादिगुणाश्रयः कोपि नास्तीत्यर्थः ॥ यद्वा ॥ यज्वत्वादिगुणविशिष्टोपि भगवत्कलाभगवत्कलांगयमृते गयं कोन्यः प्रतियातीत्यन्व
यः अस्मिन्पक्षे भगवत्कलात्वमेव प्रतिपाद्यानशकोधर्मः ॥ ५ ॥ सतीः सत्यः सत्या आशिषो यासां ताः दक्षकन्याः श्रद्धामैत्रीदयाकीर्तिप्रभृतयः सरतिमेधा इतितत्
यमाद्याः स्वरूपभिः स्वतेजोभिः यमभ्यषिंचन्नग्रेषमकुर्वन् यस्य गयस्य निराशिषः निष्कामस्य प्रजानामाशिषः कामानधरा दुदुहे धरा कथंभूता तस्य गुणास्स
वत्सास्तैः स्नुतमोधोयस्याः सा ॥ ६ ॥ छंदांसि वयस्य कामान्दुदुहुः नृपा युधि प्रत्यंचिताः पराजिताः बलिमाजह्रुः यस्य प्रजा अनुतया धर्मेण धर्मप

भा॰पं॰
६०

रिपुजनेनस्वकिरणैरिविनिष्ठप्रपन्नंचितविप्राः प्रोत्पलो कांतेरैस्वारिपांधर्मफलानांघमंशमाकुः पुरुषपात्यघगमादतेरात्मायोयेनपासघनिनितिसरतेः ७ यस्यगय
स्याध्वरेयस्येगयकर्तेकेमज्ञःस्पर्धः मघोनोंद्वेरुः सोमपापः यस्यतस्मिनवृकुशोमपानेः तस्यवमाछतिपदंप्राप्तवतिसुतिरुसोमपीयेऽस्याध्वरस्यविशेषणं
वा अक्षेसात्मायज्ञपारिरक्षकः सभगवानस्त्रह्माविष्ठग्रेनिष्केवो योबलोतरायात्मपद्दतोभक्तियोगतस्तेनसमर्पितंइज्याफलंआजहार भक्तियोगो पादि
तप्रीतिरूपमिज्याफलमईशामिवप्रत्यप्रतः सोकृतवानित्यर्थः ॥ ८ ॥ तदेवप्रपंचयति ॥ बर्हिषियज्ञेयत्प्रीणनाद्यस्यभगवतःप्रीणनादाचमुर्मखंदेवादिसर्व
प्रायेतप्रीतोभवेतदेवादीनांविदेकस्कुतः द्वियमाससविप्रवज्ञीवःविप्रवस्यप्राणभूतः एवंभूतोभगवानस्वयंप्रीतः अतिशयप्रीतिविषयः गयस्यप्रीतिमगातप्राप्त

यस्माध्वरेभगवानध्वरात्मामघोनिमाद्यस्सरुसोमपीथे ॥ श्रद्धाविशुद्धाचलभक्तियोगसमर्पितेज्याफलमाजहार ॥ ८ ॥ यत्प्री
णनाद्बर्हिषिदेवतिर्यङ्मनुष्यवीरुत्तृणमाविरिंच्यात ॥ प्रीयेतसद्यःसहविश्वजीवः प्रीतिःस्वयंप्रीतिमगाद्गयस्य ॥ ९ ॥ गया
द्गयंत्यांचित्ररथःसुगतिरवरोधनइतित्रयःपुत्राबभूवुः ॥ चित्ररथादूर्णायांसम्राडजनिष्टततउत्कलायांमरीचिः ॥ मरीचेर्बिं
दुमत्यांबिंदुमानुदपद्यत ॥ तस्मात्सरघायांमधुर्नामाभवतमधोःसुमनसिवीरव्रतस्ततोभोजायांमंथुप्रमंथूजज्ञाते ॥ मंथोः
सत्यायांभौवनस्ततोदूषणायांत्वष्टाजनिष्टःत्वष्टुर्विरोचनायांविरजोविरजस्यशतजित्प्रवरंपुत्रशतंकन्याचविषूच्यांकिलजातं १

गयस्यप्रीतिविषयोभवदित्यर्थः ॥ श्रद्धादितिपाठे स्वयंगयविषयकेनिरतिशयप्रीतियुक्तो भगवानतस्यापिस्वविषयांप्रीतिंप्रीत्यात्मिकांबुद्धिमदादित्यर्थः प्रियोहिज्ञानि
नोत्यर्थमहंसचममप्रियः ददामिबुद्धियोगंतंयेनमामुपयांतिते अहदान्मेज्ञानमैश्वर्यंचस्मिन्नभावंचेकेशवस्त्यादिवचनजातात्पर्यावसंधेयः ॥ १० ॥ एवंगयस्यमहत्त्व
रूपमानाउपपाद्यप्रसक्तांमततिमाहगयादिति ॥ गयाज्जयंत्यांभार्यायांचित्ररथादयस्त्रयःपुत्राबभूवुः ॥ तेषांमध्येचित्ररथादूर्णायांभार्यायांसम्राडाख्यपुत्रोऽजनिष्टउत्
पन्नः ततः सम्राजः उत्कलायांभार्यायांमरीचिः मरीचेर्बिंदुमत्यांबिंदुमान्पुत्रउत्पन्नः तस्माद्बिंदुमतः सरघायांभार्यायांमधुर्नामात्मजोभवत ॥ मधोःसुमनसिभार्यायां

त्वष्टानामपुत्रोजातः ततस्त्वष्टुर्विरोचनायांभार्यायांविरजोजातः ॥

रामः
६०

ततस्तत्तिरूपान् श्लोकानाह ॥ भजन इत्यादिना ॥ ईश्वरं त्वां भजनं स्यं स्तवयः तमीश्वरं विविनष्टि भजनस्यारणपादपंकजं भजनस्य भजनीयं उपास्य मरणं प्राप्यं पाद
पंकजं यस्य तं श्रीमानो यस्कानरलोन्यार्थः ॥ भजनस्येति पृथक् पदं संबुद्ध्यंतं वा यद्वा भजनं कुर्वाणो भजनप्राह्वाज्ञाव साधनात्तत्करोतीति एयं त्वात्तत्कत दिलोपात्क
ते शिक्षिपत्तानानपानिषत्रीतोति येषां सन्निहितं भवति इति भजन्स्यमिति कुत्स्याद्यते भजनूप्राह्नेनांते कमेशक पदे स्यातोपसर्गे कः दिलोपस्यस्थानिवत्वान्नलोपः
कृतास्पनमपमनस्यभगास्य स्वर्ग्यादिवक्तस्य परं केवलं परायणं मास्त्रयं भक्ते बलमित्यर्थं भावितं प्रकटीकृतं भक्तभावनं भक्तिर्भावं तं उपपाद्यंते येन तदुक्तं
भावनं निखिलभूतकारणं स्वरूपं येन यद्वा भूतभावनं भक्तानामभ्युदयहेतुं भक्तेषु भवापहं भवनाशनमित्यर्थः भवभावं संसारस्य प्रवर्त्तकं स्वसंकल्पायत जीवसं
बंधिवंधमोचकमित्यर्थः ॥१८॥ एवमुपास्यत्वप्राप्यत्वपापघ्नत्वस्य भयहेतुत्वं बंधमोचकारणत्वादिभिर्धर्मैर्विशिष्टचिद्देलदारणपजकं तदेवचैधर्म्यदृष्टां

भजे भजन्यारणपादपंकजं भगस्य कृत्स्नस्य परं परायणं भक्तेष्वलं भावितभूतभावनं भवापहं त्वा भवभावमीश्वरं ॥१८॥ न यस्य
मायागुणचित्तवृत्तिभिर्निरीक्षितो ह्यण्वपि दृष्टिरज्यते ईशे यथा नोजितमन्युरंहसां कस्तं न मन्येत जिगीषुरात्मनः ॥१९॥ असद्दृशो
यः प्रतिभाति मायया क्षीबेव मध्वासवताम्रलोचनः ॥ न नागवध्वोर्हण ईशिरे ह्रिया यत्पादयोः स्पर्शनधर्षितेंद्रियाः ॥२०॥

तेन विशदयतिनयस्येति ॥ यस्य निरीक्षितः सर्वं स्वतः पश्यतः ईशातियद्ध्यंते ईश्वरस्येत्यर्थः दृष्टिर्ज्ञानं मायागुणचित्तवृत्तिभिस्त्रिगुणकार्यरागद्वेषादिचित्तवृ
त्तिभिरण्वपि न रज्यते नानुविध्यते अजितमन्युरंहसामजितक्रोधवेगानां नोस्माकं यथेति वैधर्म्यदृष्टांतः ईशो इति पाठे ईशाः ईशनं नियमनं तत्समिरी
क्षिततत्त्वमर्थः तमेवंभूतं भगवंतमात्मनः इंद्रियाणि देहान्वा तदुपलक्षितं संसारं जिगीषुर्जेतुमिच्छुः को नाम पुमान्नानुमन्येत नाद्रियेत सर्वोपि मुमुक्षुरत्वं सेवेत
इत्यर्थः ॥२०॥ रागद्वेषादिभिर्दृष्टिर्नाज्यते इत्युक्तं तत्कथं नाम मत्वेन प्रतीयमानस्य रागाद्यनुरागत्त्याशंक्याह असद्दृश इति असद्दृशः परमार्थदृष्ट
यः असति देहे दृष्टिरात्मनो भिमानो यस्य तस्येति वा जनस्य मायया विद्यया ज्ञानेन मध्वासवः मादकस्त्रासवः मद्यं तेन मध्वासवताम्रे रक्ते लोचने य
स्य

भा॰ पं॰
६२

स्मतथा न्ततो यः तावः मत मङ्गवेतिघ्नतिभातियोभवान ज्ञावेवेत्यत्र संधिरार्षः परमार्थस्तत्त्वमतव मयाप्रकृतस्येच्छोपात्तकर्मवपुष कल्याणविग्रहस्यार्थः
स्मातरवहिनागवध्वो नागानां स्त्रियः नागकन्याकाः यस्य तव पादपद्मयोः स्पर्शेन धर्षितं व्याकुलितमिंद्रियमनो यासां ताः कामादि पारवश्यावयं रागादि
प्रतिभाः पुरुषमत्तचत्ते पादौ कथं स्पृशेम भवानमितिधर्षितेंद्रियाः सत्यस्त्वरर्हंग प्रज्ञानं इश्वरेन समर्थो भवत् भुः निपंगाक्रंकर्तुमिति शेषः एवं नंतं कोनानु
मन्येत पूर्वेणान्वयः १९ पुनरेष प्रविमेव व्यंजयन्त्यो द्वयमिति चतुर्भिः अस्य विश्वस्य जगतः स्थितिजन्मसंयमं स्थितिउत्पत्तिसंहारकारणं रूप
यो वेदानां निःश्वासाः यस्मात् स्वरूपस्य इति दीर्घश्चार्षः कारणत्वे त्रिभिर्गुणैः सत्वादिभिर्विहीनं त्रैगुण्यपरं परमं अनंतं स्वरूपतः स्वभावतश्च देशकालवस्तु
परिच्छिन्नत्वात् सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयः सत्यं ज्ञानमनंतमित्यादयः श्रुतयो रूपिण्यश्च विवक्षिताः अनंतत्वमेवाह
यो मूर्द्धसु विततासु सहस्रसंख्याकासु धामसु फणासु तेषु मध्ये कचित्सिद्धार्थमिव सर्षपमिव स्थितं भूमंडलं न वेद अस्मात्वेनात्र संधि तेजानाति वा यः छन्द्रानां कः
यमाहुरस्य स्थितिजन्मसंयमं त्रिभिर्विहीनं यमनंतमृषयः। नवेद सिद्धार्थमिव क्कचित्स्थितं भूमंडलं मूर्द्धसहस्रधामसु
२१ यस्याद्य आसीद्गुणविग्रहो महान् विज्ञानधिष्ण्यो भगवानजः किल यत्संभवोऽहं त्रिवृता स्वतेजसा वैकारिकं
तामसमैंद्रियं सृजे २२ एते वयं यस्य वशे महात्मनः स्थिताः शकुंता इव सूत्रयंत्रिताः महानहं वैकृततामसेंद्रियाः सृजाम सर्वे यदनु
ग्रहादिदं २३
तं न मन्येते ति पूर्वेणान्वयः २१ यस्येति त्रयाणां आत्मस्य संबंधमात्रविवक्षया षष्ठी यस्मात् महान् आसीत् गुणविग्रहस्तत्त्वाभिमानी विज्ञानधिष्ण्यः
ज्ञानशक्तिर्मोक्षगुणपद्मकर्ता नाम्न यः गुणविग्रहः रजः प्रधानशक्तिर्महान् ॥ स्वाद्यः रूपाद्य पेतया स्वादो भव भगवन् अजो ब्रह्मा न स्वासीत् यत्संभवः यस्माद्ब्रह्मणः सका
शात्संभवो ऽहंकारः किंभूतः त्रिवृतेति त्रिविधोऽहंकारेण स्वभावेनैव सती तिवत फलस्यैव हेतुत्वविवियात देवादिदेहेषु त्रिविधाहंकारश्च ज्ञत्वयं ज्ञातोऽहमित्यर्थे
स्वतेजसा स्वस्य कर्मणा तत्तेजसा स्वस्य दत्ते नाहंकारश्च वर्तते नोपपद्यते नत्सा नेन वैकारिकं सात्विकं तामसमैंद्रियं च राजसं सृजे देहे ग्रत्रिविधाहंकारंश्च वर्तताया
मीत्यर्थः २२ रात इति महान् अहंतत्वं च अहमहंकारस्त्रिधा भेदमाह वैकृततामसेंद्रियाः सात्विकाहंकारो वैकृत तामस सोऽभूतादिरिंद्रियो राजसः सर्वे वयं सान्द्रयो ६२

स्ववंतो यस्य भगवतोनुग्रहादिकं ब्रह्मा उत्तरं तद्वेत्ति वक्तुं जातं च अथापि सम यथात्मकं यथायथं सृजाम ॥२२॥ एवं सर्वजगत्कारणत्वसत्यज्ञानानंतत्वसर्वांतरात्वान
न्याधिपतित्वादिगुणविशिष्टं स्तुत्वा प्रधानसेव्यपतिगुणेशः संसारमोक्षस्थितिबंधहेतुरितिबंधहेतुत्वेन स्तुवन्नमस्करोति यन्निर्मितामिति ॥ येन भगवता
निर्मितां कर्मपर्वणीं कर्माश्रयभूतां मायां प्रकृतिं गुणसर्गपरिणामपरिणामात्मकं देहेन्द्रियादिसंबंधेन मोहितः स्वात्मपरमात्मयाथात्म्यज्ञानरहितो
ब्रह्मात्मकत्वस्वतंत्रात्मत्वादिभ्रमयुक्तो जनो जननमरणादिकं सांसारिकं बंधनाकं जीवतदेवमायास्वरूपमेव न वेद किं तन्निस्तरणोपायं न वेदेति विक्रम
मित्याह ॥ तन्निस्तरणयोगं मायानिस्तरणोपायमंजसा सुखेन न वेद तेन तस्मै तद्विलयोदयात्मने तद्विलयप्रकृतिसंबंधविलयस्तदुदयः प्रकृतिसंबंधविलयस्त
यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोयं गुणसर्गमोहितः नवेद निस्तरणयोगमंजसा तस्मै नमस्ते विलयोदयात्मने ॥२३॥
इति श्रीभागवते महापुराणे पंचमस्कंधे सप्तदशोध्यायः ॥१७॥ श्रीशुक उवाच ॥ तथा च भद्रश्रवा नाम धर्मसुतस्तत्कु
लपतयः पुरुषा भद्राश्ववर्षे साक्षाद्भगवतो वासुदेवस्य प्रियां तनुं धर्ममयीं हयशीर्षाभिधानां परमेण समाधिना संनिधा
प्येदमभिगृणंत उपधावंति ॥१॥ भद्रश्रवस ऊचुः ॥ दुदयः प्रकृतिसंबंधः । तदुभययापादनोपयुक्तं मात्मज्ञानं यस्य तस्मै नम इति ॥ इति पंचमेसप्तद
शः ॥१७॥ तत्र किंपुरुषवर्षे उपास्यं रूपं उपासनं तु पासनप्रकारं चाभिधाय भद्राश्ववर्षादिषु तानाहाध्यायद्वयेन तथा चेति ॥ भद्रश्रवाः नाम धर्मसुतो भद्राश्ववर्षे
धिपतिः तस्य कुलपतयः कुलश्रेष्ठाः सेवकमुख्या उपासकमुख्याः भद्रश्रवसः पुरुषाः भद्राश्ववर्षे मेरोः पूर्वस्मिन्साक्षाद्भगवतो वासुदेवस्य साक्षाच्छ
ब्दः यत्साक्षादपरोक्षादृश्यत्वादाविर्भूतत्वात् हयग्रीवस्य च पौष्कल्येन प्रवृत्तिनिमित्तवत्परत्वस्तवनार्थः प्रियामिति वासुदेवकथनं तु रामकृ
ष्णादिरूपं यस्यां हयशीर्षाभिधानां यां धीम्यतिशयद्योतनार्थं धर्ममयीं यज्ञो यामनादिधर्मो वेदप्रवर्तकमित्यर्थः इदं धर्ममयत्वं रामादिष्वप्यविशिष्टं त
त्पामिधानेन विशेषितवेदाहरणादुपदेशार्थत्वात्स्मात्तन्वा धर्ममयीमित्युक्तं हयग्रीवाख्यानतु परमेण साक्षात्कारपर्यंतकाष्ठां गतेन समाधिना संन्निधा

प्यसास्कतेदेवसमाराणमंचवंचस्वधिमरणांत्तोजपेतउपधावतिच
समाराप्तोकैःस्तवैतोत्पर्यैः १

भा० पं० ॐकाराद्यः पूर्वं भगवत्प्रोक्तं धर्मादयं वोंतरभागात्मकवेदावेदित्वमेयो धर्मः तत्र पूर्वं भागस्याराध्यस्वरूपशोधनप्रकारवेदत्वेनाराध्यतात्पर्यकत्वात् तथैव
६५ मेवेदा वेदो विद्यार्थे चाध्यात्मवेदो जनाः ते वदंति महात्मानं केसं धर्मं सनातनमित्युक्तरीत्या भगवतः पूर्वं भागप्रमेयत्वं उत्तरभागप्रमेयं तु स्वमेवेति धर्मोये।
त्यस्य पूर्वोत्तरभागप्रमेयाद्येत्यर्थः आत्मविशोधनाय आत्मांतःकरणं जीवो वा शोध्यते येन स आत्मविशोधनः तस्मै पतत्प्रसादादंतःकरणं जीवो वा शुद्धिरज
तमोभ्यामनभिभवरूपा प्रक्षालितमवं धवादित्यवाराबुसम्याप्तिरूपा मुक्तिं च प्राप्नोति सतपोच्यते अत्र धर्मायेत्यनेन प्रापक आपकपरंपर्यायाउपाध्यत
उच्यते ॥ आत्मविशोधनायेत्यनेन प्राप्यत्वमुक्तं भगवत्त्वेन तदुभयोः पृथक्करणात्वं विवक्षितं ॥ २ ॥ कृतिरूपान्स्तोकानाह ॥ तावद्भगवन्मायायाउरत्य
यत्वयोतनाय विस्मयजनकाश्चाङ्गः अहो इति ॥ घ्नंतंम त्युपित्रादिहंयातेनायं जनो मिषन्नयनपिनपश्यति नात्मन उपसंधत्ते इत्येतज्जगद्विचेष्टितं भगवन्मा
ॐ नमो भगवते धर्मायात्मविशोधनाय नम इति ॥ २ ॥ अहो विचित्रं भगवद्विचेष्टितं घ्नंतं जनोयं हि मिषन्न पश्यति ॥ ध्या
यन्नसद्यर्हि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जिजीविषति ॥ ३ ॥ वदंति विश्वं कवयः स्म नश्वरं पश्यंति चाध्यात्मविदो
विपश्चितः तथापि मुह्यंति तवाज मायया सुविस्मितं कृत्यमजं नतोस्मि तं ॥ ४ ॥
यादेमवरूपं तद्दर्शादि चित्रं विस्मयनीयं अहोविचित्रमिति निपातसंघात आश्चर्यद्योतकः कथंभूतो न पश्यति पुत्रं पितरं च मरतं निर्हृत्य दग्ध्वा स्वयं
तदुपार्जितेजिजीविषतुमिच्छः किमर्थं मसतुच्छ विषयसुखं सेवितुं किंकुर्वन्यर्हि यदापि कर्म विरुद्धं कर्मोपायं ध्यायन् ॥ ३ ॥ ननु विद्वान्न पश्यतीति किमत्र चि
त्रमत्राह वदंतीति कवयः अधीतवेदांतविद्या विश्वं जगति न श्वरं स्कवं नेव दंतिन त्वनुसंदधते नन्वात्मयाथात्म्यविदोनुसंदधत एव तत्राह अध्यात्मविदः अ
धीतवेदांतविद्याः विपश्चितः उपासितस्वात्मपरमात्मनः यद्यपीदं विश्वं नश्वरं पश्यंति तथापिहे अज तव मायया मुह्यंति मोहं प्राप्नुवंति विपश्चितामपि पुत्रमरणा
दिनिमित्तशोकदर्शनादिति भावः ॥ अतएवं कृतं भगवद्विचेष्टितं सुविस्मयं विस्मयनीयं ॥ ४ ॥ इत्थमोहनिवर्तनयेकेवलं त्वां प्रपद्यामहइत्याहुः ॥ अजं जन्ममरणा
दि संसारधर्मप्रतिभटं त्वां नतोस्मि कर्तरि क्तः ॥ नमस्कृतवानस्मि प्रत्येकाभिप्राय मेकवचनम् ॥ ४ ॥ ननु किं यदेतच्चित्रं यज्जीवमोहनात्कूटमाया टी० भ्र०
६५

ततोप्येतद्विचित्रतरं अकर्तुर्मम विश्वसृष्ट्यादिकर्तृत्वमस्ति तच्चाबंधकं चेत्यत्राह । विश्वोद्भवेति ॥ अकर्तुः चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ॥ तस्य कर्तार
मपि विद्ध्यकर्तारमव्ययं इत्युक्तरीत्या चातुर्वर्ण्यं चातुराश्रम्यादिव्यवस्थाप्याति विचित्रजगत्सृष्ट्यादिकर्तृत्वेपि तत्तत्कर्मायत्तदेवादिवैचित्र्यादकर्तुस्तेनवकर्तारि
यशात्वयोर्थः विश्वस्य जगतः उद्भवस्थाननिरोधकर्म सृष्टिस्थितिप्रलयरूपं कर्म अंगीकृतं स्वीकृतमिति यत उक्तमेव न तु त्वय्यपि विचित्रं जीवस्येव न बंधका
मित्यभिप्रायः कुतः यतस्त्वमपावृतः कदाचिदपि पुण्यपापारब्धकर्मणा ज्ञानसंकोचरहिते जीवानां त्वन्तरे न हि तत्त्वस्य रागः तेषां सत्त्वानां सतामन्तरमपिधानमितिक
र्मोत्थाविद्यया ज्ञानसंकोचरूपावरणसद्भावात् अविद्यावृतज्ञाने रजोपहितानां पूर्वपूर्ववासनानुरूपाणां सुखदुःखादिजननद्वारा बंधकत्वं उक्तं भगवंतो नित्यनिरस्त
निखिलदोषस्य सार्वज्ञादिगुणविशिष्टस्य जगदुदयविभवलयलीलस्य विश्वसृष्ट्यादिकर्म बंधकमित्यभिप्रायः अपावृत अपगतावरणः अविद्याकृतावर
णाद्यतिमदत्तस्यापावृतस्येति यद्यपि तत्त्वेन व्याख्येयं अपावृतमिति पाठे विश्वोद्भवादिकर्मणो कृतमत्राधारकं तिरोधानद्वारा न बंधकमिति रत्युक्तं जीवस्येत्यर्थः
आवरणद्वारा वैषम्यनैर्घृण्यादिदोषापादकं नेति चेत्यर्थः कुतो मम विश्वोद्भवादिकर्म नाबाधकं तत्राह कार्यकारणे कार्यकारणरूपस्य जगतः सत्त्वावस्थाचिदचिद्वस्तु

विश्वोद्भवस्थाननिरोधकर्म ते ह्यकर्तुरंगीकृतमप्यपावृतः युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुतः ॥५॥

पारार्थ्यकत्वेन तद्रूपस्येत्यर्थः कार्यकारणरूपत्वं च न तावदात्मनि बंधनं किं त्वात्मा देवो जात इत्यादि तदंतरात्मभूतत्वकमित्याशयेन सर्वात्मनीत्युक्तं एवंभूतेपि वस्तुतः
प्रकृतिपुरुषाभ्यां विविक्तस्वरूपतः अतिरिक्ते सा तात्कार्यत्वकारणत्वानयावस्थान्वयरहिते त्वयि न हि कर्तृत्वमात्रेण कर्मणो बंधकत्वम् अपि तत्कर्तृत्वेन अन्यथा
युक्तानामपि जलस्यादिकर्तृत्वस्य बंधकत्वापत्तेः अयं भावः यद्यपि विश्वसृष्ट्यादिकर्तृत्वेन विश्वोपादानत्वेन च विश्वगतद्विविधगतविकाराश्रयत्वाद्धि विश्वोद्भवा
दिकर्म तद्बंधकमिति संभाव्यते तथापि विश्वोद्भवादिकर्मणो लीलारूपत्वेन कर्मायुक्तत्वाभावात् स्वरूपान्यथाभावस्वभावान्यथाभावरूपविकाराश्रयप्रकृतिपुरु
षशरीरकस्येव कार्यकारणोभयावस्थाश्रयत्वात् तद्वारकावस्थाश्रयत्वेपि मदादवस्थाश्रयत्वाभावाच्च न विश्वोद्भवादिकर्म बंधकं यथा जीवस्य शरीराधिष्ठा
नत्वमात्रेण शरीरगतकौमारयौवनाद्याश्रयत्वमित्यर्थः ॥५॥ एवं विविधविचित्रशक्तिमत्त्वेन भगवंतं स्तुत्वा अथैतदवतारप्रयोजनमाविष्कुर्वंतो नमस्कुर्वंति वे
दा इति ॥ युगांतकालमिषिदेन दैनंदिनप्रलये तमसा रेतस्य रूपेणातिरस्कृतानपतीतानवेदानरतुरंगविग्रहेना चतुरंगस्त्वं तुरंगोविलसहो यस्मात्स तुरंगविग्रहः ।

भा॰ ५ इयमिरोमङ्क्तिर्यो भगवान्नभियाचते कवये चतुर्दशावापप्रसादये प्रत्यर्पितवान् तस्मै तेऽविदिते हितायामोघ अन्वेष्ठायते तुभ्यं नमः नमस्करोमीति ॥६॥ अथ हरिवर्षे मे
७० तोरङ्किरो उपास्योपासको पासना प्रकारानाह हरिवर्षे चेति ॥ नरहरिरूपेण नृसिंहरूपेण तत्सन्निहितो भवति तन्नृसिंहरूपपरिग्रहे निमित्तं गुरुत्तरं सप्तमस्कंधे २
वक्ष्यामः तत्स्थितं नरूपप्रकारात् तद्वर्षपुरुषैः महाभागवतव्यवधानानन्यभक्तियोगेनाव्यवधानाः अविच्छिन्नविषयानुपहतः अनन्यः न विद्यते अन्यस्तल्लंपटस्य सोऽनन्यः ।
प्रयोजनं तत्ररहितः तेन भक्तियोगेनानुपाले आराधयतीत्यर्थः प्रह्लादं विशिनष्टि महापुरुषो भगवांस्तस्य ये गुणास्तेषां भाजनमाप्यकं भगवद्गुणसमानगुणाकस्य अ
महाभागवतो भागवतश्रेष्ठः दैत्यानां दानवानां च यत्कुलं तस्य पवित्री क्रियते नेनेति दैत्यदानवकुलतीर्थीकरणं तस्य शीलमाचरितं शीलरूपमाचारो यस्य यद्वा
वेदानुगुणं तेन मघातिरस्कृता वस्मात्तन्नाक्षो न तुरंगविग्रहः ॥ तत्स्यादद्देवे कवये भिया चते तस्मै नमस्ते ऽवितथे हिताय मस्ति
६ ॥ हरिवर्षे चापि भगवान् नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये । तद्दयितं रूपं महापुरुषगुणभाजनो महा
भागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते इदं चोदा
हरति ॥७॥ ॐ नमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान् रंधय रंधय तमो ग्रस ग्रस स्वाहा अभ
यमभयमात्मनि भूयिष्ठाः ॐ क्ष्रौं ॥८॥ उक्तविधं शीलं सहतिः शौचाचमनसंध्यादिरूपमाचरितं आचारो यस्य तत्र दानहोमादिरूपा यस्य स इदं वक्ष्यमा
णमुदाहरंति जपति ॥७॥ इदमादिश्लोमेवाह ॐमिति ॥ ॐ भगवच्छब्दार्थो व्यवेवत तेजसामपि तेजसे तेजोंतरैरप्रकाश्याय सर्वतेजसां प्रकाशायेत्यर्थः तथा च श्रुतिः न तत्र
सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः तमेव भांतमनुभाति तस्य भासा सर्वमिदं विभाति कठवल्ल्यां आम्नायते तद्रूपमेव चाथर्वणे परं ब्र
ह्माधिकृत्य श्रूयते अत्रोत्र परं ब्रह्म तत्त्वं विवक्षितं आविराविर्भव आविः शब्दो निपातः प्राकट्यद्योतकः तस्याविर्वचनं पुनः पुनः प्रकटो भवेत्यर्थः अत्र वज्रव
दृढतरं नखदंष्ट्रे तिसंबोधनं कर्माशयात्कर्मवासनाः रंधय रंधय निर्दहेति द्विर्वचनं येन प्रियिष्ठा वकुलास्तान् कर्माशयान् इत्यापाय विशेषणं समध्याहारेणेति
बोध्यं आत्मनेमह्यमस्यै भयम् इति महं यथा तथा विर्भवेत्यनुषंगः ॥ यद्वा भूयिष्ठाः इति विभक्तिप्रतिरूपकमव्ययं वत्सप्तम्यर्थकं भयः अभयमाविर्भवेत्यर्थः अथवाभ रामः ७०

लोकानां स्वस्तीति ॥ विश्वस्य जगतः स्वस्ति मंगलं स्यात् ननु विश्वस्य स्वस्ति प्रार्थने खलस्यापि भवेत्तस्य साधुपीडां विना तस्मादन्योन्यमंगलं ध्यायतां भक्तानां परस्परं स्व
स्तं विना न भवेदित्याशंक्याह खलः प्रसीदतादिति ॥ प्रसन्नो भवतु कौर्यादिकं परित्यजंतु भक्तिर्भवत्वित्यर्थः ॥ भूतानि मिथः परस्परं केवलं शिवमेव धिया ध्यायं
तु तेषां स्वस्तं नोस्मन्मनश्च भद्रं उपशमादिकं भजतु नोस्माकं मतिरपि प्रणिहिता इतानाच मतिः अहेतुकी फलाभिसंधिरहिता सत्यधोक्षजे भगवत्यावेश्यतामविशतां भ
वतु भगवत्स्वेव सा भवत्वित्यर्थः ॥ ९ ॥ मेति नोस्माकं संगश्चासक्तिः कापि मा न स्यात् ॥ यदि कापि कथंचित्स्यात्तर्ह्यगारादिषु न स्यात्किंतु भगवत्प्रिये भागवतेष्वेव स्यात्त
दागारादिषामरहाः भवत्वगारादिष्वप्यासक्तिः तत्र को दोष इत्याशंक्याह भागवत्संगमहाहि संगयोगेण दोषाभावात् ॥ यः प्रमत्तात्मवान् भगवत्प्रियसंगेन समा

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायंतु भूतानि शिवं मिथो धिया ॥ मनश्च भद्रं भजतादधोक्षजे आवेश्यतां नो
मतिरप्यहेतुकी ॥ ९ ॥ मागारदारात्मजवित्तबंधुषु संगो यदि स्याद्भगवत्प्रियेषु नः यः प्राणवृत्त्या परितुष्ट आत्मवान् सि
ध्यत्यदूरान्न तथेंद्रियप्रियः ॥ १० ॥ यत्संगलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसं ॥ हरत्यजोंतः श्रुतिभि
र्गतोंगजं को वै न सेवेत मुकुंदविक्रमं ॥ ११ ॥

हितमनाः प्राणवृत्त्या प्राणधारणमात्रेणोपपन्नकंदफलपरिधानादेन परितुष्टः यथा सिध्यति भगवत्क
याश्रवणाचार्योपसत्त्यादि प्राप्य अदूरादाशु मुक्तो भवति न तथा इंद्रियप्रियः इंद्रियपोषणप्रिया पाद्यादिविषयप्रवणचित्तः सिध्यतीत्यर्थः पुनः सत्संगेन
सिद्धिहेतुत्वमेव प्रपंचयति यत्संगेनेति येषां भगवत्प्रियाणां ज्ञानिनां संगेनैव लब्धं प्राप्तं निजवीर्यवैभवं यच्चितस्य भगवद्ध्यानसामर्थ्यं भगवत्प्रियसंगेनैव मयाल
ब्धमित्यर्थः तथाहि तीर्थं गंगादितीर्थवत्पवित्ररूपं भगवद्यशः मुहुः संस्पृशतां सम्यक्सेवमानानां मानसं श्रुतिभिः श्रोत्रेंद्रियैरंतः प्रतिष्ठितो भगवानंगजमंत
र्गतमलं दहतीति निर्मलं च मनः तद्ध्यानसमर्थं भवतीति भावः अत एवं पूर्वं मुकुंदस्य विक्रमं यशः को वै पुमान्न सेवेत मुकुंदविक्रमसेवा च भगवत्प्रियसंगाद्यते तिरे
व प्रार्थ्यत इति भावः ॥ यद्वा ॥ येषां भगवत्प्रियाणां संगात् लब्धं प्राप्तं निजवीर्यवैभवं निजप्रभावो भगवतस्तस्य भगवद्वीर्यवैभवं मुहुः संस्पृशतां पुंसां श्रुतिभिः श्रोत्रैर्वि

यत्कापात्रैः श्रवणादिभिरंतः प्रविष्टो भगवान्मानसमनःसंदं

भा०पं०
७१

क्षिप्तमलेऽदूरतितत्वदृष्टांतः यथा भगवच्चरणांबुजातं गंगादितीर्थं संस्पर्शतां नामगजं शारीरमलं हरतीति दोषपूर्वे वत् अपवायत्संगलब्धं निजवीर्यवैभवनिजासाध्य ।
रणः वीर्यवैभवं प्रभावातिशयो यस्य तथाभूतेऽरुक्रं दस्य विक्रमं अंघ्रिः संस्पर्शतां फ्कतिभिः रंतर्गतो योमानसंमलं मलंहरतीति यथा तस्मादंबुजतीर्थमंगजं मलं शतिवी
योजना ॥ अत्रनसेवेते स्यत्रांतरुक्रं दविक्रममित्यध्याहारः तस्य संस्पर्शातामित्यनेनान्वितत्वादावृत्तिर्वीऽरुक्रं दविक्रमामित्यस्याध्योजनना यांतु तीर्थपदस्य गौ-
णपावृत्त्या भगवच्चरणमिवृत्तिः अंगशाद्वस्य मनःपरत्वं च द्वितीयोजनायांतु न कोपि दोषः एतत्संगते भगवद्यशः श्रवणं ततो मनो नैर्मल्यं ततस्तस्य भगवद्ध्यानं सा
मर्थ्यं तत भगवदुपासनं ततोपि च सिद्धिरिति प्रणाडी दर्शिता भवति ॥ ११ ॥ इदानीं भगवद्भक्तिं प्रशंसतीति यस्येति अकिंचना नास्ति किंचन यस्याः सा किंचिदैहिकाम
ष्मिकं च फलं न वलेव माना भगवति भक्तिर्यस्य पुंसोस्ति तत्र भगवद्भक्ते सर्वा देवाः इंद्रादयः सर्वैर्गुणैर्ज्ञानादिभिः शमदमादिभिश्च सह सम्यगासते तत्रमेवा
यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः । हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः
१२ ॥ हरिर्हि साक्षाद्भगवाञ्छरीरिणामात्मा झषाणामिव तोयमीप्सितं ॥ हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा
दंपतीनां ॥ १३ ॥ तद्वर्तनस्त्यर्थ एवं भक्तस्य सद्गुणाश्रयत्वमुक्त्वा भक्तस्य तत्राभावमाह । हरौ भगवत्यभक्तस्य तत एवासति ग्राह्यादौ मनो
रथेन वहिर्धावतिः वचितत्वः महद्गुणा महतां भगवद्भक्तानां ये गुणा उक्तास्ते कुतः कस्माद्धेतोर्भवेयुः अतो भक्तस्य न महद्गुणाश्रयत्वमित्यर्थः ॥ १२ ॥ ननु विषयास
क्तोपि कश्चिल्लोके महानेव दृश्यते तत्राह हरिरिति यथा झषाणां मीनानां ईप्सितं तोयं जलमिवात्मधारकं तेन विना जीवनाभावात् तथा शरीरिणां देहिनां साक्षात्
भगवानेवात्माधारकः तथा च श्रुतिः को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनंदो न स्यात् निरतिशयानंदरूप आकाशः सर्वप्रकाशकः परमात्मा यदि
स्यात् नोपासितः स्यात्तदा को ह्यन्यात् दैहिकामुष्मिकसुखसंपादकेन जीवयेत् को वा प्राण्यात् आपवर्गिकसुखसुखसंपादनेनोज्जीवयेदिति श्रुत्यर्थः ॥ तथा च
स्मरति भगवान् वाल्मीकिः न च सीता त्वया हीना न चाहमपि राघव । मुहूर्तमपि जीवावो जलान्मत्स्याविवोद्धृतौ इति यस्मादेवं तस्मात्तं भगवंतं महानपि वयोरूपध
नपुत्रधनादिभिर्महद्दोपि हित्वा यदि गृहे सज्जते आसक्तो भवति महांतं इति पाठे महत्त्वरूपं भगवंतं विहायेत्यर्थः तदा दंपतीनां वयसा महत्त्वं न तु ज्ञानादिभिरित्यर्थः
निष्प्राप्तानां यदयमाहादिभिर्निर्वृत्तः दैशिकलत्वानिरतिशयमाह झुः सुखहेतुः सुखलेशः तत्कृतं न भवेत् वामहात्म्यं न तु निरतिशयानंदापादकत्वात्मपरमात्मयाथात्म्या

श्रीमद्भागवतटीका १२८
७१

तस्माद्भगवच्चक्रे निरतिशयाय दुःसुखहेतुत्वाद्विषयासयासक्ते निरतिशयदुःखहेतुत्वाच्च रजआदीनां मूलं संसृतिचक्रं वालं संसारपरिवृत्तिहेतुं गर्वं हं संसृतिर्जन्मम
रणरूपा तस्याश्चक्रवालं मंडलं मविनेदो यस्मात् हं हित्वेत्यर्थः नृसिंहस्य पादं भजतां कुतो भयं दुःखं न तु कोपि न यमित्यर्थः कथंभूतं मं कुतो भयं न दुःखं न कुतोपि
भयमित्यर्थः तत्र रजः कामः स्वरूपं लः विषयाभिलाषरूपः रागः क्रोधः विषयानुभवविरोधिविषयः विषादविषयः विद्वतिनिमित्तः शोकः मानमहंकारः म
हाजनावमानहेतुः मन्युस्तज्जन्यः क्रोधः स्पृहा परदारधनादिषु भीः स्वामयमागामिदुःखे हेतुदर्शनजा तज्जा तज्जन्यं मनसो ऽवसादः आधिस्तत्कृता मनःपीड़ा ॥१४
अथ केतुमालेवर्षे उपास्योपासकावीनाह केतुमालेपीति ॥ भगवान्कामदेवरूपेण प्रद्युम्नरूपेण केतुमाले वर्षे आस्ते इति शेषः किमर्थं लक्ष्म्याः प्रियं कर्तुमि
च्छया किंच प्रजापतेः संवत्सरस्य संवत्सरो वै प्रजापतिरिति श्रुतेः तस्य दुहितरो रात्र्याभिमानिन्यो देवताः पुत्राश्चाहरभिमानिनो देवाः केतुमालवर्षाधिपतयः ता
तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलं ॥ हित्वागृहं संसृतिचक्रवालं नृसिंहपादं भजतां कुतो भयमिति ॥१४॥
केतुमालेपि भगवान्कामदेवरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां पुत्राणां च तद्वर्षपतीनां पुरुषायुषाहोरा
त्रपरिसंख्यानानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्विग्नमनसां विध्वस्ता व्यसवः संवत्सरांते विनिपतंति ॥१५॥
तासां तेषां पुरुषायुषा अहोरात्रसंख्यानानां पुरुषस्यायुः पुरुषायुषं च चतुरविचतुरेत्यादिना निपातनात्समासांतो ऽच्प्रत्ययः एकं पुरुषायुषं वर्षशतमहोरात्रस्य
नां परिसंख्यानं गणनं येषां ते तथोक्ताः ॥ अहश्च रात्रिश्चाहोरात्रश्च द्वंद्वैकदेशः संख्यात पूर्वपदाद्रात्रेरिति समासांतो ऽच्प्रत्ययः पुरुषायुषपरिमाणकमहोरात्र
देवानामित्यर्थः षड्विंशत्सहस्रवर्षपरिमिता पुत्राणामिति यावत् तेषां प्रियचिकीर्षया च यासां प्रजापतेर्दुहितॄणां रात्र्यभिमानिनीनां देवतानां कथंभूतानां महा
पुरुषस्य भगवतो महास्त्रं चक्रं राजन्यस्तत्तेजसा उद्वेजितं भीतं मनो यासां तासां गर्भाः संवत्सरांते गर्भाधानादारभ्य तस्य वत्सरांते विध्वस्ता विस्रस्ता अत एव व्यसवः विगत
प्राणाः संतो निपतंति ॥१५॥ अतीवेति तत्र रमां लक्ष्मीं रमयन् बीजान्निंद्रियाणि रमयते केन साधनेन रमयन् तदाह अतीव सुललितया सुंदरया गत्या यो विलासस्तेन विला
सितो रुचिरो हासलेशो मंदस्मितं तत्सहितो यो ऽवलोकः तथा ललितया किंचिदुन्नमितं उत्तुंगितं सुंदरं यद्भ्रूमंडलं तेन सुभगं यद्वदनारविंदं तस्य श्रिया रमया भगवतस्तन्माया

वी॰ पं॰ मयंमायाप्रवृत्तेरवात्मायत्तं कल्पेश्वरपरिसृष्टीतमित्यर्थः ज्ञानपर्यायो वा मायांशाद्वृः स्मात तस्मां देवीं देवस्य भगवतः संवंधिनीं योगोदाख्यायामिति डीपम्संवत्सरस्मरा त्रिषष्ट्यना
७२ यतेङ्गुष्ठिः भिराग्निभिमानिनीं निर्देवताभिरुपेतामतीमं वत्सरस्माहस्सु वतर्ष्टदे भिः रात्र्याभिमानिदेवता अहर्भिर्दिवाभिमानि भिर्देवैरुपेता परमेणसमाधियोगेन उपासे
१६ ॥ इदं वस्समाणमंत्रवाक्यं चोदाहरति जपतीत्यर्थः किंवचनं संवत्सरदृष्टित तदन्तर्नि प्रायकं जप्यं मंत्रमाह ॐ भगवद्भ्यां पैधृर्ववत् क्रिषीकाणां इंद्रियाणां ईशाय नियं
वेसर्वैः प्रकृतिपुरुषयोरसंभावनीयैर्गुणविधयैः सत्यज्ञानादिभिः गंभीर्यादिभिः सर्वकर्मा सर्वकामः सर्वगंधः सर्वरसः इत्यादिश्रुतिप्रसिद्धैर्विवक्षितमाश्रयत्वेन वक्तुं
शक्तिपाद्यितुमिष्टुमात्मस्वरूपं यस्य तस्मैकल्याणगुणाश्रयत्वेन वेदांतैः प्रतिपाद्यमानायेत्यर्थः सर्वत्राधिकरणार्थोत्रानुसंधेयः स्वाहृतीनां किं याणांवि
भ्रूतीव्रमुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किंचिदुत्तंभितसुंदरभ्रूमंडलसुभगवदनारविंदश्रि
या रमां रमयन्निंद्रियाणि रमयते ॥ १७ ॥ तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहि
तृभिरुपेताहस्सु च तद्भर्तृभिरुपास्ते ॥ १८ ॥ इदं चोदाहरति ॐ ह्रां ह्रीं ह्रूं नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्म
ने आकूतीनां चित्तीनां चेतसां विशेषाणां चाधिपतये षोडशकलाय छंदोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बला
य कांताय कामाय नमस्ते उभयत्र भूयात् ॥ १९ ॥ तानां चेतसां संकल्पाध्यवसायादीनां कर्मेंद्रियज्ञानेंद्रियमनोव्यापाराणां विशेषः पृथिवीवज्र
वचनमाकाशाद्यभिप्रायकं पृथिवीप्रभृतिपंचमहाभूतानां चाधिपतये नियंत्रे इदं चाधिपत्यं न सत्यपि दृष्टयग्राभावेऽस्य निरूपितं नियंतृभावस्य राज्ञ
इव स्वापित्वात्मत्व प्रयुक्तं रतिघ्योतयितुं शरीरात्मभावनिबंधनसामानाधिकरण्यपयाह षोडशकलायेति षोडशकलाः पंचभूतानि मनः सहितान्येकादशेंद्रिया
णि मतांतस्वरूपाय तच्छरीरकत्वेनावस्थितायेत्यर्थः षोडशकलात्त्रयाणामूर्तयो यस्येति वक्त्राद्विग्रहापंचभूतान्येकादशेंद्रियाणि च जगत्कारणत्वमाह छंदोम
यायेत्यादि वेदत्रयरायतस्यहेवारात स्मात् तस्य निश्वसितमेतद्यदृग्वेद इति श्रुत्यर्थो त्राविवक्षितः रावं सन्निहितत्वात्मकत्वमाह अन्नमयाय अन्नमयो प्राणो वाग्
अप्यातत्वसंघातस्मकं देदपरः तदुपायव्यष्टिशारीरकायेत्यर्थः एवं व्यष्टिसमष्ट्यात्मकतत्त्वांतरात्मकत्वमभिधाय जीवांतरात्मत्वमपि सामानाधिकरण्येनाह
तेजोमयममयायेति अमृतमणाद्वो तेजो वै वाचो परमात्मपर्यंतः अमृतशरीरकायेत्यर्थः उक्तानुक्तकालाद्यंतरात्मत्वमभिप्रायेणाह सर्वमयायेति सर्वात्मकायेत्य

पवनाय देहशक्तिरूपाय सह आदेर्दैस्तुत्वा न्तता दात्म्यव्यपदेशः कांताय निरतिशयप्रीतिविषयाय कामाय स्वीये च निरतिशयप्रीतिविशिष्टाय ते तुभ्यमभयत्रप
रतात्पृष्टतस्थ नमो नम इंनमन्त्र्याद्यस्त्वित्यर्थः ॥ १७ ॥ एवमिमं मंत्रमुदाहरन्ती इति पत्नी लक्ष्मीपतिशब्दप्रवृत्तिनिमित्तपोषकस्य विशिष्टत्वमेवोत्पादस्त्रिय इति स्वतद्धृषीक
नामिंद्रियाणामधीश्वरमधिपतिं स्वतः शब्देनाधिपत्यस्य निरूपाधिकत्वं व्यज्यते एवं भूतं त्वां व्रतैराराध्य लोके संसारे स्त्रियः अन्यपतिमाशासते कामयंते ते चाशा
स्यमानाः पतयः तासां काम्यमानानां स्त्रीणां प्रियप्रीतिविषयमपत्यं आत्मा पत्यधनायूंषि च न परियांति न रक्षंति यातुमसमर्थत्वादिति भावः तत्कुतः यतः ते पत
यः अन्यतंत्राः कालेन ग्रस्ताः ते पापतित्वेदि कर्मायत्तं न हि कर्मपरवशाः कर्मनिर्हरणे समर्था इति भावः एवं निरुपाधिकरक्षकत्वस्यैव पतिशब्दप्रवृत्तिनिमित्तत्वात्तेप
त्वयेव न भवति त्वमभिप्रायः ॥ १८ ॥ एवमन्यत्र पतिशब्दो मुख्यवृत्त्यस्तु तं न एव तिमस्य पतिरित्यर्थः स चाऽतिसः मंत्रोक्तगुणसंपन्नः भवान्पतिर्वै वै शब्दो वधारणो भवानेव
पतिरित्यर्थः तथा च श्रुतयः एष सर्वेश्वर एष भूताधिपतिरेष भूतपालः पतिं विश्वस्यात्मेश्वरं न तस्य कश्चित्पतिरस्ति लोके इति स त्वं चेतद्विषयकं अन्तस्याधिपतिरिति

स्त्रियो व्रतैस्त्वां हृषीकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासतेऽन्यं ॥ तासां न ते वै परिपांत्यपत्यं प्रियं धनायूंषि यतोऽस्वतंत्राः ॥ १८ ॥ स
वै पतिः स्यादकुतोभयः स्वयं समंततः पाति भयातुरं जनं ॥ स एक एवेतरथा मिथो भयं नैवात्मलाभादधि मन्यते परं ॥ १९ ॥

कुतोभयमनिरुपाधिकं पतित्वं तत्राद्य अकुतोभयत्वमाह नास्ति कुतोपि भयं यस्य सः कुतोभयः अकर्मवश्यत्वेन कर्मकृतपारतंत्र्याभावान्निरुपाधिकरक्षकत्वं त्वय्येवेति भा
वः अतएव भयातुरं जनं समंततः पाति सर्वेभ्योपि भयेभ्यः त्रायते स च निरुपाधिकपतिर्भवानेक एव इतरथा ईश्वरद्वित्वे मंडलेश्वराणामिव मिथोन्योन्यं भयं स्यात् य
तो भवानेक एव पतिरत एव भवानात्मलाभात्परमन्यदधिकं न मन्यते आत्मनो लाभः परमात्मस्वरूपत्वज्ञानं तस्मिन्न हि सत्यात्मनः सर्वज्ञाः तस्यासत्त्वात्तत्वमयवते वतन
मात्रमेव चेतनं सर्वलोभवान् पेक्षते न तु ततो न्यदित्यर्थः ॥ १९ ॥ तदेव प्रपंचयति येति स्त्रियः विलेषु कामेषु पत्यपत्यधनादिषु लंपटा असत्कामसतीयास्त्रीन स्पोतकविध
स्यते नव पादसरोरुहयोरर्हणामाराधनं न कामयेत्न कुर्यात् न स्यात् तदेवेप्सितं पत्यपत्यादिकं स्वकंदफलमर्चितस्त्वं रासि ददासि रा दाने इति धातु कथं अतः त्वं ईप्सितं
प्रीतिविषयः पुरुषार्थरूपः सर्वविधपुरुषार्थरूपत्वात् अपुरुषार्थरूपं मत्वा तत्तोन्यं पतिं किंचित्पुरुषार्थत्वतः प्रार्थयते न स्यात्तदेव पुरुषार्थाभासं ददासि न तु स्वात्मानं
तस्याभिप्रायः यत त्वत्तोन्यत्पुरुषार्थरूपमतएव भगवतायास्त्वाया विनाप्यो यस्यास्तपा नता सती हे भगवन् कामदेव प्रार्थयते दुःखिता भवति न तु लब्धा हमिव नितरां

वीत्यभिप्रायः ईप्सितार्चितमिति पाठांतरं तदाप्यर्थत्वेन प्रार्थिते उ ईप्सितमिति यावत्तु तु पुरुषार्थरूपमविनिरशति प्रायपुरुषार्थरूपत्वेन मान्यमानं पत्यपत्याद्यन्यत्तमसांस
रिकमेव फलं रासीत्यभिप्रायः ॥२०॥ न तल्लक्ष्मीर्हि लोके पुरुषार्थत्वेन प्रसिद्धा न तत्त्वं हेय तत्कथमेवमुच्यते तत्राह मत्प्राप्तय इति ऐंद्रिये प्राप्ता दोधीर्येषां तथाभूताः केवेका
नेवदृष्टकसकामाः अजो ब्रह्मा ईशो रुद्रः सुरा इंद्रादयः असुरा मयादयः यद्यपि मत्प्राप्तये मां प्राप्तं भवत्पादपरायणा ऋते भवत्पदारविंदशरणवरणां विनान्य उग्रं तपः तप्यंति
पाकं पचंतीतिवन्निर्दिष्टः तपः कुर्वंतीत्यर्थः तथापि मां न विंदंति न प्राप्नुवंति कुतः हे अजित यतोहं त्वद्धृदया तव हृदयं अपयाप्राप्तात्वद्धृत्ताहं त्वदद्यपकमिद्धत्वेन
ममत्वं दत्तमेतत्वेनैव पुरुषार्थरूपत्वेन तु हेयमित्यर्थः यद्वा त्वन्निरतिशयपुरुषार्थरूपत्वं हृदयं हृतो यस्मात्तथाभूताहं त्वय्येव हृदयं यस्याः सेति निरतिशयपुरुषार्थरूप
त्वं तव नित्यं मद्भक्तत्वेनाहमपि पुरुषार्थरूपा भवामि न तु स्वतंत्रत्येत्यर्थः अतो ये भवत्पादारविंदपरायणास्तानेवाहं भजे वर्त्ते यामीत्यभिप्रायः ॥२१॥ इदानीं तत्कृपाप्रा
र्थयते ॥ सत्वमिति यत्पुरुषार्थरूपः स त्वं हे अच्युत वंदितं सर्वपुरुषार्थप्रदत्वेन ख्यातं तत्करांबुजं मम शिरसि निधेहि कथंभूतं यत्सात्वतामेकांतिनां शीर्ष्णि अधायि

यो तस्य ते पादसरोरुहार्हणं निकामयेत्साखिलकामलंपटा ॥ तदेव रासीप्सितमीप्सितोर्चितो यद्भग्नयांचा भगवन्प्रतप्यते ॥२०॥
मत्प्राप्तयेजेशसुरासुरादयस्तप्यंत उग्रं तप ऐंद्रिये धियः ॥ ऋते भवत्पादपरायणान्न मां विंदंत्यहं त्वद्धृदया यतोजित ॥२१॥
स त्वं ममाप्यच्युत शीर्ष्णि वंदितं करांबुजं यत्त्वदधायि सात्वतां ॥ बिभर्षि मां लक्ष्मवरेण्य मायया क ईश्वरस्येहितमूहितुं
विभुरिति ॥२२॥

कृपया निहितं मत्प्रार्थ्यं कृपा विषयात्वमप्यपूर्वं किमिदं प्रार्थ्यं य … तत्राह हे वरेण्य मायया मायामयरूपेण श्रीवत्सेन सह मां चिह्नं वक्षसि बिभ
र्षि चिह्नरूपेणाधिनयमित्यर्थः ॥ श्रीवत्सस्य प्रधानात्मकं श्रीवत्सस्थानमपरमानंते तेनमना श्रितं प्रधानबुद्धिरूपा सा त्वयदा रूपेणामा भवमिति भगवता प्रसादे
णोक्तं मायये तिवक्तंता पर्यायाः श्रीवत्सेतर्थाल्लक्ष्म्यतः स्मादहमपि लक्ष्म अतः सात्वतस्य शिवमपि कृपास्त्वित्यभिप्रायः प्रियो हि ज्ञानिनोत्यर्थमहं स च ममप्रि
यः ज्ञानीत्वात्मैव मे मतमित्युक्तं भगवदभिप्रायमालोच्य शीर्ष्णि सात्वतां यददधायीत्युक्तं अत्र कारणं न कोपि वेत्तुं प्रभुरित्याह ॥ ईश्वरस्य तव ईहितं चेष्टि
तमभिप्रेतं ॥ वा ऊहितुं कल्पितुं । को वा प्रभुः समर्थः न कोपीत्यर्थः ॥ २२ २२२२ २२२२२२२२२२२२२२२२२२२२ श्री श्री श्री श्री श्रीः

णं केतुमाले उपास्योपासकादिकमुक्तमपरस्य केतदाह ॥ रम्यके चेति ॥ प्रागुक्तं तत्समये न मनोरम्यकवर्षाधिपतेः प्रदर्शितं यन्मात्स्यं रूपं भगवतः प्रियतमं तदेवरूपं
स एव मनुरम्यके वर्षे इदानीं महता भक्तियोगेनाराधयन्नास्ते ॥ २३ ॥ मंत्रमाह ओमिति ॥ सत्त्वाय शुद्धसत्त्वमूर्तये मुखे भवः मुख्यः तस्मै प्रथमावताराय इत्यर्थः
प्राणाय जीवयित्रे प्राणाख्याय अंतरात्मने वा ओजसे इंद्रियशक्त्यधिष्ठात्रे बलाय शरीरशक्त्यधिष्ठात्रे तत्तद्देवतारसाधारणगुणाः सर्वे तेपासनार्थं मंत्रे सक्ताः एवं भक्ता
य महते च विसृज्ञातीय मत्स्याय नमः ॥ २४ ॥ कृत्स्नं चिदचिदात्मकं जगन्नियंतृत्वेन सकलविशिष्टं स्तुवंति अंतरिति ॥ लोकपालैरंतर्बहिरदृष्टरूपं यस्य ॥ उर्वधिक
स्वनो वेदात्मको नादो यस्य तथाभूतस्त्वमीश्वर एव कोसावीश्वर इत्यत्राह ॥ य इदं विश्वं चिदचिदात्मकं कृत्स्नं जगद्विधिनिषेधावलंबनं नम्नतेन ब्राह्मणादिना म्ना

रम्यके च भगवतः प्रियतमं मात्स्यमवताररूपं तद्वर्षपुरुषस्य मनोः प्राक्प्रदर्शितं स इदानीमपि महता भक्तियोगेनाराधयतीदं
चोदाहरति ॥ २३ ॥ ओं नमो भगवते मुख्यतमाय नमः ॥ सत्त्वाय प्राणायौजसे सहसे बलाय महामत्स्याय नम इति ॥ २४ ॥ अंतर्बहि
श्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः स ईश्वरस्त्वं य इदं वशेनयन्नाम्ना यथा दारुमयीं नरः स्त्रियं ॥ २५ ॥ यं लो
कपाला किल मत्सरज्वरा हित्वा यतंतोपि पृथक्समेत्य च ॥ पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते ॥ २६

वशे नयन् नीतवान् ॥ नयनं चात्र नियमनपूर्वकं रचनं यथा दारुमयीं दारुणो विकाररूपां स्त्रियं स्त्रीप्रकृतिं नरः स्ववशीकृत्य नाटयति तथेति ॥ अनेन कृत्स्नजगन्नि
यंतृत्वकथनेन कारणात्मकमप्युक्तं कारणत्वे तत्त्वयोरेकगतत्वाद्देयसर्वभूतांतरात्मा पदतपाद्यमादिव्यो देव एको नारायण इति श्रवणात् सर्वभूतांतरात्मेत्यनेन नेतृ
त्वेन कर्तृत्वनेन कारणत्वोक्तं एको ह वै नारायण आसीदित्यनेन संवादादित्यर्थः ॥ २५ ॥ इदं च जगन्नियंतृत्वादिकमनितरसाधारणं इत्याह यमिति मत्सरज्वरं मत्सरः परैश्व
र्यासहिष्णुत्वं स एव ज्वरस्तं हित्वापि पृथक्समेत्य संधीभूयापि वा यतंतोपि लोकपाला इंद्रादयो द्विपदं चतुष्पदं पातुं रक्षितुं न शेकुः न प्रभवन्नपि त्वं विविधानि नन्वियत द्विपदादिरूपं च
सरीसृपाख्यं पर्वतादिरूपं स्थावरजातं च अत्र चपं चेदृश्यते तत्त्वं तु रक्षितवानित्यर्थः ॥ २६ ॥ भवानीति ॥ कर्मिमालिनि उच्चतरतरंगपंक्तियुक्ते दुग्धार्णवे कस्मिंश्चिद्देने

दिन प्रलयार्णवे ओषधीनां वीरुधां गुल्मानां च निधिमाश्रयभूतां इमां क्षोणीं भूमिं मया मनुना सह धृतवेति शेषः। यो भवानोजसा उर्वधिकं विक्रमते विचरति यद्वा पा
तुमित्यस्यानुषंगः॥ क्षोणीं पातुं क्रमते उत सहतेऽत्यर्थः। यतो जसं यदाह॥ उरु क्रमते ज ओजसा तेजो रूपेण संकल्परूप ज्ञानात्मकेन ओजसा बलेन तस
ध्यनां तस्मानां क्षोणीरक्षितवानित्यध्याहारः उवाह धृतवानित्यर्थः तस्मै जगत्प्राणगणात्मने तुभ्यं नमः। जगत्प्राणगणा प्रतिशरीरं प्राणाख्यगणाः तदंतरा(
त्मने इत्यर्थः॥ जगत्प्राणगणात्मन इति पाठे तु जगत्प्राणगणस्वभावायेत्यर्थः॥२७॥ अथ हिरण्मयवर्षे उपास्योपासनादीन्याह हिरण्मय इति॥ भगवान् कूर्मरूपं बिभ्रा
णो हिरण्मयवर्षे निवसति तस्य भगवतस्तां प्रियतमां कूर्मतनुं पितृगणानामधिपतिर्यमा तद्वर्षस्थैः पुरुषैः सह उपधावति अनुवर्तते उपास्ते इत्यर्थः। शेषं स्पष्टं

भवान् युगांतार्णव ऊर्मिमालिनि क्षोणीमिमामोषधीवीरुधां निधिं॥ मया सहोरु क्रमते ज ओजसा तस्मै जगत्प्राणगणात्मने
नम इति॥२७॥ हिरण्मयेपि भगवान्निवसति कूर्मतनुं बिभ्राणस्तस्य तत् प्रियतमां तनुमर्यमा सह वर्षपुरुषैः पितृगणाधिपति
रुपधावति मंत्रमिमं चानुजपति॥२८॥ ॐ नमो भगवते अकूपाराय सर्वसत्वगुणविशेषणायानुपलक्षितस्थानाय नमो व
र्ष्मणे नमो भूम्ने नमो नमोवस्थानाय नमस्ते॥२९॥

त॥२८॥ अकूपाराय कूर्मरूपाय कूपाः स्थिताः स्वल्पा आपो यस्मिंस्तत्कूपं स्वाश्रयतया तत्र त्यादधाति स्वीकरोतीति कूपारः स न भवतीत्यकूपारः सर्वैः सत्वैः जंतवः गुण
त्वान्तर्हिताः कल्याणाः ज्ञानशक्तिबलैश्वर्यादयः ते विशेषणानि सद्वारकाण्यपद्वारकाणि च प्रकारभूतानि यस्य तस्मै तद्वा सर्वसत्वानां कल्याणगुणानां च सा
क्षाद्विशेषणं त्वसत्वगतगुणाभासत्वद्वारा विशेषणमिति विवेकः अनुपलक्षितस्थानायांतः समुद्रे मंदरमूले स्थितायेत्यर्थः॥ अवर्ष्मणे प्राकृतदेहरहिताय वर्ष्म
णेत्यप्राकृतदिव्यदेहाय। वर्ष्मणा ह्यो दद्विपर्यंतः कृतः वर्ष्मणे स्वेष्ठायेति वा। गरीयसे वा गरीयस्त्वं च कालानवच्छिन्नत्वं भूम्ने महिम्ने च स्थानायाधारभूताय राम:
अविकारे स्फुटगुणभेदाभिप्रायान नमः यदाहेति॥२९॥ ७५

विश्वरूपत्वादिगुणविशिष्टं लोकनियन्तृरूपमिति ॥ एतज्जगत्रयस्य रूपं शरीरं तस्मै व्यवसायरूपिणे नम इत्यन्वयः व्यवसायरूपिणो सम्यग्ज्ञानप्रवर्तकायेत्यर्थः ॥ यद्वा
व्यवसायो ऽत्र नित्यासंकुचितापरिच्छिन्नं ज्ञानं तदेव रूपमाकारस्तदस्यास्तीति तथा तस्मै नमस्ते व्यपदेशरूपिणे इति पाठांतरं तत्र व्यपदेशरूपिणो व्यपदिश्यते इति व्य
पदेशः वाग्व्यवहारादिः देवमनुष्यादिनामरूपात्मकः प्रपंचः स जगदेव रूपं तदस्यास्तीति तथा न च यद्रूपमित्यनेन पौनरुक्त्यं व्यपदेशरूपेण इत्यस्यैवोपपादकत्वाच्छ्लोक
शेषस्य अव्यपदेशरूपिणो इति वा छेदः अव्यपदेशाचेतनाचेतनसजातीयत्वेन व्यपदेष्टुमशक्यं रूपं तदस्यास्तीति तथा तस्मै एतच्च ह्य निर्दिष्टं जगद्भिन्नभिन्नजमायया
र्पितं प्रकृत्या निवर्तितं स्वरूपं भोग्यत्वेन तृतीयमानं बहुरूपरूपितं जातिगुणादिनिरूपणं एवंविधं जगत्रयस्य रूपं यस्य च संख्यापरिच्छेदो नास्ति कुतः अयथोप
लंभनात यथा वस्तुकस्येन उपलंभाभावात यस्येत्यनेन जगद्रूपं परामृश्यते यस्य जगतः संख्याप्रकाशको नास्ति कुतः अयथोपलंभनादब्रह्मात्मकत्वेनोपलंभनात्
यद्यपि जगत्प्रतीयते एव तथाप्यविदुषाम ब्रह्मात्मकत्वेनोपलंभात ॥ यद्यपि जगत्प्रतीयत एव तथाप्यविदुषाम ब्रह्मात्मकत्वे न तत्प्रतीतिरसतीत्यभिप्रायेणास

यद्रूपमेतन्निजमाययार्पितमर्थस्वरूपं बहुरूपरूपितं ॥ संख्या न यस्यास्त्ययथोपलंभनात्तस्मै नमस्ते व्यपदेशरूपिणे ॥ ३० ॥ ज
नेषु जन्मेदजनं डजोद्भिज्जं चराचरं देवर्षिपितृभूतमैंद्रियं ॥ द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः ॥ ३१ ॥

ख्यानयस्यास्तीत्युक्तं यद्वा यस्य जगतः अयथोपलंभनात्संख्यापरिच्छेदो नास्ति अयथोपलंभनात्साकल्येनोपलंभनाभावात् कोटिशो ब्रह्मांडानां इति जगतोऽप्यनंतत्वादिति भा
वः ॥ यद्वा यस्य जगतः अयथोपलंभनात् अयथार्थत्वेनोपलंभनात् अप्यर्पितत्वात् स्वरूपत्वबहुरूपरूपितत्व भगवच्छरीरत्वादिव्यतिरेकेणोपलंभात्संख्याप्रकाशो ना
स्ति जगद्भुताकारविपरीताकारोपलंभो ऽत्र मरूपत्यर्थः ॥ ३० ॥ एवं विश्वरूपत्वमनंतत्वं चोक्तं यतो विश्वरूपत्वमत एव द्यौः खमादिशब्दैः भवानेवाभिधीयत इत्याह
जनेषु जन्मेति ॥ हे देव चराचरभेदेन द्विविधं प्रजनेरायुजादिभेदेन चतुर्विधमेतज्जगत एवं विभक्ति भेदं विभक्ति विशेषरूपमित्यर्थः ॥ अत एव द्यौः खमित्याद्येवमभिधे
यत्वमेक एव द्यौरादिशब्दैरभिधीयमानत्वमेवेत्यर्थः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभव
दित्यादिश्रुत्युक्तविधया नामरूपतदुपतद्रूपभाजां परमात्मपर्यंतत्वमिद्धैः द्यौरादीनां परमात्मशरीरत्वाच्छरीरवाचिनां शब्दानां शरीरपर्यंताभिधानस्य गवादिशब्दादिना
नियुणादिशब्दानां जातिगुणादिपर्यंताभिधानवदाकृत्यधिकरणन्यायसिद्धत्वाच्च द्यौः खमित्येवं रूपेण त्वमेव वाच्यो वोध्य इत्यभिप्रायः ॥ ३१ ॥ एवमनंतविविध

.पं. विचित्रविश्वतिमत्त्वमुक्तं नतु संख्या न यस्मास्तीत्यानंत्यमुक्तं तदयुक्तं पृथिव्यादितत्त्वानां चतुर्विंशत्यादिसंख्यावच्छिन्नत्वादत आह यस्मिन्निति ॥ असंख्येयाप्यनंतत्वात्परिच्छे
७५ तुमशक्या विविधविशेषणानि विलक्षणानि देवादिनामानि रूपाणि चाकृतयश्च यस्य रूपशब्देन पृथिव्यादिद्रव्यं विवक्षितं तत्तत्संयात संस्थानमाकृतिशब्देनतद्वाचकशब्दो नाम
शब्देनाविवक्षितः अत्र संख्येयाविशेषाये यामितिपूर्वेत्र वक्तुव्रीहिः उक्तानि नामानि रूपाण्याकृतयश्च यस्येति वा रात्ता हृष्टो प्रकृतिपुरुषकालशरीरके संख्येयवै
भवे वस्या दिव्ये चतुर्विंशतिपंचविंशतिरित्यादिरूपा संख्या कविभिः कपिलादिभिः पृथिव्यादितत्त्वयाथात्म्यविद्भिः कल्पिताः ॥ मंदबुद्धीनां सुखबन्धहणाय संकल्प्य संग
ह्य प्रदर्शिता वस्तुतः पृथिव्यादीनामचेतनत्वानामनंतावांतरभेदानां च चेतनानां च परमात्मनश्चानंत्यादसंख्येयत्वमेवेति भावः एवं कल्पितासंख्या यया तत्त्वदृशा यच्छि
ष्यपाताविकवुद्ध्यानंतत्वेभवत्वयाथात्म्यवुद्ध्याऽपनीयते पत्र्यतेसंख्यातविस्तृतित्वान्तस्मैसांख्यनिदर्शनाय संख्याबुद्धिर्व्यवमायात्मिका प्रकृतिपुरुषेश्वरयाथात्म
विषयास्यैवसांख्यनित्तरो हृष्यतेनेनेति निदर्शनं यस्य सांख्यज्ञानगम्या येत्यर्थः ननु भगवच्छिन्नतिमतस्य ज्ञात आनंत्यैकपंभावस्वरूपस्यानंत्यं प्रकृतिपुरुषादि
निरूप्यं हितस्यानंत्यं प्रकृतिपुरुषपरतंत्रत्वमेवन घटते नान्यथा अत्रोच्यते देशकालवस्तुपरिच्छेदराहित्यरूपं हितावदानंत्यं तदेवत्रिविधमानंत्यपरमात्मनि सु
यस्मिन्नसंख्येयविशेषनामरूपाकृतौ कविभिः कल्पिते यं संख्याय यया तत्त्वदृशापनीयते तस्मै नमः सांख्यनिदर्शनाय ते इति ॥ ३२ ॥
स्यं इदमत्रास्य त्रनास्तीदमिदानीमस्तिकल्यांतरेनास्तीति देशकालपरिच्छेदयोरभावादिदमिदं भवति न भवतीति वस्तुपरिच्छेदस्यापि सर्ववस्तुसामानाधिकरण्या
भावरूपस्याभावद्वसत्गुणः सर्वात्मकत्वेन सर्ववस्तुसामानाधिकृतत्वपदे प्रविषयतातजीवानांत्वणुपरिमाणाविषयत्वेऽपि तेषामानंत्याद्भेमेभूतत्ताना तस्यासंसारदश
यां कर्मसंकुचितत्वेऽपि वस्तुतः स्वदभावान्मुक्तिदशायां सचानंत्या कल्प्यत इत्यानंत्यमावणाद्वसरणा चेतनांतरत्वं जीवव्यापकतया तेनजीवेनात्मनानुप्रविश्येति
श्रवणाज्जीवस्वरूपस्यानंत्यताश्रुतेषामप्यानंत्यं देशतः कालतश्चास्त्येव ॥ अचेतनस्यापिकारणावस्थायांनिरतिशयसूक्ष्मदशापन्नत्वेऽपिकार्यावस्थायामा
नंत्यमस्त्येवतर्हि प्रकृतपुरुषापेक्षायां परमात्मन आनंत्यको विशेष इति चेद्भियांस्तु विशेषः यत्कार्यावस्थायां कारणावस्थायां च स्वरूपे गुणतोऽप्यानंत्यं इतरयोस्तु
देशतश्चकालकृतं कालकृतं तु कार्यावस्थाकार्यावस्थायोरितिन चत्वस्य गुणः स्वरूपस्यसर्वात्मकत्वेन सर्ववस्तुसामानाधिकरण्यात्मकतत्त्वपरिच्छेदसत्त्वेऽपिकर्षंत
गुणानां वस्तुपरिच्छेद इति चेदेवं तर्ह्येव स्वपरिच्छेदः यद्गुणैर्निकर्षं तच्छयापादरणावर्णस्वर्णापेक्ष यानववर्णस्वर्णस्यपवित्रत्वोज्ज्वलत्वगुरुत्वादिभिर्गुणैर्निकर्षेस्तदपेक्ष

यावत्कलयोतस्मैवं गुणोनिकर्षोभावोवस्तुपरिच्छेदोबोध्यः ३२ ७५

अथोत्तरकुरुपुरुषपाम्यादिकमाह ॥ तत्रेति स्थितिकृतं धृतं वराहरूपं येन तत्वाहयो भगवान्याड्गुण्यपूर्णः यज्ञपुरुषः यज्ञशरीरकः तदाराध्यस्तत्फलदश्चास्ते तं तु वाराहरूपं भ
गवंतं सधामदेवी कुरुभिः कुरुवर्षस्थैः पुरुषैः सह स्खलितभक्तियोगेनाविच्छिन्नभक्तियोगेनोपधावंत्युपत्रवर्ततेभक्तियोगेनाराधयतीत्यर्थः इमां च समाराणीरमोंऽग्रे स्थं
पनिषद्मावर्तयति जपति ॥ ३३ ॥ ॐ भगवद्भव्याप्येश्वर्वेतत्‌मंत्र तत्त्वलिंगाय मंत्रप्रतिपाद्यं वासुदेवलिंगं शरीरं यस्य यद्वा मंत्रतत्त्वमस्वरूपस्य लिंगं ज्ञापको यस्य मंत्रलिंगेत
त्प्रतिपादिते लिंगे शरीरे ज्ञापको वा यस्येति वा । यज्ञमंत्रेमताभिन्नतत्वाभिरिंद्राद्यपेस्वरूपाणि तानि लिंगानि शरीराणि यस्य तस्मै यज्ञकृतवे अश्वसोमकाय ज्ञायायागसमोना:
कृतवः तद्भेदा यागतयरंतरात्मत्वात तदाराध्यत्वात तत्फलदत्वाच्च तादात्म्यविवक्षितं महांतोध्वरा अवयवस्तायस्य यध्वाध्वरस्मावयवाः स्त्रुकस्रुवैज्ञादयः महांत
ध्वरा अवयवा अगादयस्य स्त्रुवादिरूपेणाय प्रभिरन्नसंधेयाय स्मतस्मै इत्यर्थः तथा चोक्तं तृतीये सुकं ड आमीत्त्वं च ईप्रनासयोरिडोदरे चमसाः कर्णौ स्त्रु
उत्तरेषु कुरुषु भगवान यज्ञपुरुषः कृतवराहरूप आस्ते तं तु देवी हैषा भूः सह कुरुभिरस्खलितभक्तियोगेनोपधावति । इमां च परम
मुपनिषदमावर्तयति ॥ ३३ ॥ ॐ नमो भगवते मंत्रतत्वलिंगाय यज्ञक्रतवे महाध्वरावयवाय पुरुषाय नमः कर्मशुक्लाय त्रियु
गाय नमस्ते ॥ ३४ ॥ यस्य स्वरूपं कवयो विपश्चितो गुणेषु दारुष्विव जातवेदसं मंथंति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरिता
त्यादि नाम महापुरुषाय वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसः त्मने ॥ ३५ ॥ परस्तादिति पुंसूक्तप्रतिपाद्यजगत्कारणत्वाद्यनंतकल्याणमहागुणावि
शिष्टाय पुरुषाय सर्वांतरात्मनि कर्मशुक्लाय कर्मणा शुद्धस्य विशुद्धकर्मणो संस्तुतिप्रतिभटकर्मणा इति यावत्तु कर्मरहितायेत्यर्थः सर्वे कर्माः स
वे काम मर्वेगांधः सर्वेऽनिरेवं मनुष्यादि सजातीय विजातीय विजातीया वधक मर्वे कर्माश्रयत्व मवगाततनिष्क्रियं निष्फलमित्यनेन वंधक कर्मनाश्रय
त्वमुक्तं त्रियुगाय कर्मशुक्लायापि त्रियुगाय षाड्गुण्यपूर्णाय चाणिमादि गानि ज्ञान शक्त्यादीनि यस्य तस्मै यद्यपि भगवतस्त्वनेनापि षाड्गुण्यं प्रतीत
कर्मशुक्लायेत्यनेन क्रिया स्पष्टत्वं कथनं पृथक्तं जीवस्येवाज्ञानादिकं वारयितुं त्रियुगायेत्युक्तं अस्मरणाया स्मरणवर्णीय स्वतवराहरूपत्वेपि च क
धोरदंष्ट्रावर्णत्वात् तदनिष्टाये णा रणाद्येत्युक्तं भवतीति मंत्रार्थो ह्येयः ॥ ३४ ॥ सर्वांतरात्मत्वमुक्तं पापपत्वादिकं मंत्रसंधानोनमस्करोतीत्यस्येति क

भा॰ ४ वय प्रकृतिपुरुषैश्वर्य्याथात्म्य विमयस्य विपश्चितः सर्वज्ञस्य तव विविधं पश्यञ्चिद्विपश्चित् पृषोदरादित्वात् छुद्रूपग्याख्याने चकारादेशः सोऽस्मिन्ते सर्वानि कामानश्न

७६ इति ब्रह्मणा विपश्चितेति विपश्चि बहुधा ब्रह्मणा पृथक् स्वरूपं सत्यं ज्ञानमनन्तं ब्रह्मेति लक्षणलक्षितं गुणो गुणपरिणामरूपेषु देवादिशरीरेंद्रियसंस्थेषु भूतेषु

क्रियार्थैः दृढक्रियार्थैः कर्मफलैरुम्भे ठेतिरोहितं जीवसंवंधि क्रियाफलैस्तैर्यामहंतं दद्यौम्य तमनुप्रविष्टगुणादिगं गुह्यरेखं पुराणमितिजीवानां कर्मभिः परमात्म

स्वरूपस्य तिरोहितत्वमावरणादिह दृष्टवोढुं मालाल्क्रतुमिच्छवः दारुषु जातवेदसमिव मथ्याविवेकसाधनेन मनसा मथ्नंति विविंजति पंचविंशतितत्वेभ्यः

पृथक् कुर्वंत इत्यर्थः दारुष्विव जातवेदसमित्यनेन सर्वांतरात्मत्वमुक्तं ॥ दिदृक्षवः कवयः इत्यनेन तत्व मुक्तं तस्मै ईशितात्मने कर्त्रेरिक्तः ईश्वराय परमात्म

नेनमः ईशितात्मन् मतिपाठे ईरिताः प्रेरिताः नियमिता आत्मनो जीवा यस्य तस्मै इत्यर्थः ॥ २५ ॥ गुणशब्दोपलक्षितचिदचिदात्मनि कर्त्रे रिक्तईश्वराय परमात्मा

द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने ॥ अन्वीक्षयांगातिशया

त्मबुद्धिभिर्निरस्तमायाकृतये नमो नमः ॥ २६ ॥

तेनदैलक्षण्य मुक्तं तदेवाविशदयन्नमस्करोति द्रव्यंति अंगेत्यभिमुखीकरणं हे भगवन्नतिशयात्मबुद्धिभिरिति प्रापितात्म परमात्मविषयबुद्धिमद्भिः पुरुषैर

न्वीक्षया निपुणनिरूपेणावस्तुतः परमार्थतः प्रकृतिपुरुषविलक्षणत्वेनेति यावत् निरीक्षितः ॥ आत्मस्वरूपं यस्य निरस्तमायाकृतये निरस्ता माया कृतिः प्रकृति

कार्यं येन तस्मै तेन मो नमस्करोति ॥ कैः सह कुत्र निरीक्षणं तत्राह द्रव्यभूतं पंचकं क्रियाक्रियाहेतुवर्गादिकमेंद्रियं अयनं ज्ञानेंद्रियं ईयते नेनेति ज्ञानसाधनत्वात्

ईशः साक्षात् इंद्रियस्वरूपासमाहारद्वंद्वः ॥ एतत्संघातरूपशरीरे सकर्तृभिः सपरिषंजकैः मायागुणैः सह निरीक्षितात्मने नमः ॥ देहं भूतेंद्रियगणं त्रयजीवा

त्मभिः सह विविच्य निरीक्षितायेत्यर्थः ॥ अनेन पूर्वस्मिन् श्लोके गुणपदं देवाद्यवस्था जीवोपलक्षणमित्यावेदितं ॥ अन्यथास्मिन् श्लोके जीवोपस्थापककार्टप राम:

दासंगतिः स्पष्टैव ॥ रावंच गुणपदेन देहमात्रामभिप्रेतं तेषु जीवितारात्म्येन मथ्नंतीति निरूपितव्यं ॥ २६ ॥ ७६

निरस्तमायाकृतपरस्त्यनेन मायाकार्यदोषप्रतिभटत्वमुक्तं तदुपपत्तये मायाया ईश्वरवश्यतामाह करोतीति यो भवानस्य प्रधानस्य गुणैः सत्वादिभिः प्रधानाभिप्राये
ण यस्येति नपुंसकनिर्देशः विश्वस्य स्थितिसंयमोदयं स्थितिलयसर्वं करोति कथंभूतमीप्सितं धर्मार्थकाममोक्षार्थचतुष्टयस्य साधनोपयुक्तकरणकलेवरादिप्र
दानेन जीवानुग्रहार्थत्वात् जगत्सृष्ट्यादि तस्येप्सितत्वं जीवार्थत्वेनेप्सितमिति यावत् स्वार्थत्वेनानीप्सितमित्यर्थः तस्मादीक्षितुः संकल्परूपज्ञानवतस्तस्य ततमा
यामत्वादिगुणात्मिकात्वच्छरीरभूता माया यथा भ्रामकायस्कांतात तदाश्रयत्त दभिमुखं समादयो लोहं भ्रमति तथा त्वत्संकल्पानुगुणकारिणी भ्रमतीति भावः। यद्वा ईप्सि
तुः त्वदेतत्वक्षस्यापन्नापत्तयेत्युक्तविधेन लाव ततः तस्य तव माया यस्येति षष्ठी शरीरभावसंबंधेन त्वच्छरीरभूता माया यद्वा तादधीन्ये षष्ठी दृष्टांतस्य सामर्थ्येत्व
दधीना माया त्वदाहितशक्ति विश्वस्य सृष्ट्यादिकरोति इत्यर्थः स्वतोऽसक्तायाः कथं मदनुप्रवेशमात्रेण शक्तिमती स्यादत आह। यथायो भ्रमते तदाश्रयं मावागतिः
विश्वसृष्ट्यादिकर्तृत्वस्य परमात्मधर्मत्वेन माया करोतीत्युक्तमिति तदुच्यते भगवद्दत्तस्वरूपाणां ब्रह्मादीनां सृष्ट्यादिकर्तृत्वस्य राजभृत्यादिमायागुणप्रावर्ण्ये
करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेप्सितमीक्षितुर्गुणैः॥ माया यथायो भ्रमते तदाश्रयं ग्राव्णो नमस्ते गुणकर्मसाक्षिणे
त्वाद्युक्तत्वात् माया विश्वसृष्ट्यादिकं करोति इत्युक्तमिति नेप्सितमित्यनेन विश्वस्थित्यादिकं न भगवतो भोगार्थमित्युक्तं ईप्सितमित्यनेन जीवानुग्रहार्थं ॥२७॥
लोकार्थं चेति सचिंतनं तु विश्वस्थित्यादिकं न जीवानुग्रहार्थं किंतु गर्भजन्मजरामरणादिदुःखहेतुत्वेन जीवनिग्रहार्थमेव स्यात् किंचाहितकरणाहिताकर
णादिप्रयुक्तवैषम्यनैर्घृण्ये च भगवतः प्रसज्येते तत्राह नमस्ते गुणकर्मसाक्षिण इति गुणानां मायागुणानां सत्वादीनां कर्मणां पुण्यपापरूपाणां वादीनां साक्षिणे
साक्षाद्द्रष्टेत्यनेन मः जीवकर्मगुणानुसारित्वात् हिताकरणादेर्न वैषम्यनैर्घृण्यदोषप्रसक्तिरिति भावः तथा च सूत्रं वैषम्यनैर्घृण्ये न सापेक्षत्वात्। न कर्माविभागा
दिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते चेति भगवन् जगदादौ स्वस्मिन्नुपसंहृतचिदचित्तत्वः सर्वज्ञः सर्वशक्तिः परमकारुणिको वा प्रसमस्तकामः स्वस्मिन्
प्रलीनमसत्कल्पं चेतनवर्गमालोक्य सर्वेषां सामान्येन धर्मादिपुरुषार्थसाधनत्वाराधनोपयुक्तकरणकलेवराणि प्रदाप्याराधनप्रकारावबोधि विद्यारूपाणा
स्त्रं च प्रदर्श्यैवं जगतश्चाद्धिलील्यत्वात्ते ततस्ते जीवाः करणकलेवराणि परिग्रहाद्यप्राचीनकर्मवासनानुसारेण साध्वसाधुकर्मणा कुर्वंतः स्वस्वकर्मानुरू
पत्वाईश्वरादिष्टफलं भुंजते इति न ईश्वरस्य वैषम्यादिप्रसक्तिरिति ॥ २७ ॥ पहृतावतारचरित्रं वदन्नमस्करोति प्रथमस्येति योजगतामादिः कारणभूतः सकरमं

भा० ६ वपवृहतिपुरुषैषेष्वरथाद्यात्मविषयस्यविपश्चितःसर्वज्ञस्यतववृविविधंपरपश्चिद्विपश्चित्पृषोदरादित्वाच्छब्दस्याप्यानेचकारादेशः सोऽश्नुतेसर्वान्कामान्स
७६ हब्रह्मणाविपश्चितेतिविपश्चिञ्छब्दोब्रह्मणःप्रयुक्तःस्वरूपंसत्यंज्ञानमनंतंब्रह्मेतिलक्षणलक्षितंगुणोगुणपरिणामरूपेषुदेवादिशरीरेंद्रियसंस्पृष्टेषुमूर्तेषु
क्रियार्थैर्दृष्टंक्रियार्थैःकर्मफलैर्मूढतिरोहितंजीवसंबंधिक्रियाफलैस्तैर्षामदृष्टंतद्दर्शयतुमनुप्रविश्यगुहाहितंगुहाकरेणंपुराणामितिजीवानांकर्मभिःपरमात्म
स्वरूपस्यतिरोहितत्वम्भवणादिद्दृक्षोर्द्रष्टुमात्मानंकर्तुमिच्छवःदारुषुजातवेदसमिवमथ्याविवेकसाधनेनमनसामथ्नंतिविविंजतिपंचविंशतितत्वेभ्यःपृ
थक्कुर्वंत्यपश्यंतीत्यर्थःदारुष्विवजातवेदसमित्यनेनसर्वांतरात्मत्वमुक्तं॥दिदृक्षवःकवयःइत्यनेनतत्वमुक्तंतस्मैईशितात्मनेकर्त्तरिक्तःईश्वरायपरमात्म
नेनमः ईशितात्मममतिषष्ठईशिताःप्रेरिताःनियमिताआत्मनोजीवायस्यतस्मैइत्यर्थः॥२५॥गुणशब्दोपलक्षितचिदचिदात्मनिकर्त्तरिक्तःईश्वरायपरमात्मा

व्यक्तिक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने॥ अन्वीक्षयांगातिशया
त्मबुद्धिभिर्निरस्तमायाकृतयेनमोनमः॥२६॥

नेतद्वैलक्षण्यमुक्तंतदेवविशदयन्नमस्करोतिद्वयंतिअंगेत्यभिमुखीकरणंहेभगवन्नतिशयात्मबुद्धिभिरितिशायितात्मपरमात्मविषयबुद्धिमद्भिःपुरुषैर
न्वीक्षयानिपुणनिरूपेणावस्तुतःपरमार्थतःप्रकृतिपुरुषविलक्षणत्वेनेतियावत् निरीक्षितः॥आत्मस्वरूपंयस्यनिरस्तमायाकृतयेनिरस्तामायाकृतिःप्रकृति
कार्यंयस्मात्तस्मैतेनमोनमइति॥कैःसहकुत्रनिरीक्षणंतत्राहव्यक्तंमहत्तत्त्वंपंचकर्मक्रियाक्रियाहेतुवर्गादिकर्मेंद्रियंअयनंज्ञानेंद्रियंईश्यतेनेनेतिज्ञानसाधनत्वा
च्चक्षुरादेर्ज्ञानेंद्रियस्यग्रहणमनाहंकारवर्गःईशः॥एतत्संघातरूपशरीरेसकर्तृभिःसपरिश्रंजकैःमायागुणैःसहनिरीक्षितात्मनेनमः॥देहभूतेंद्रियगणत्रयजीवा
त्मभिःसहविविच्यनिरीक्षितायेत्यर्थः॥अनेनपूर्वस्मिन्श्लोकेगुणपदंदेवाद्यवस्थाजीवोपलक्षणमित्यावेदितं॥अन्यथास्मिन्श्लोकेजीवोपस्थापककाष्टप रामः
दासंगतिःस्पष्टेव॥एवंचगुणपदेनदेहमात्रमभिप्रेतंतेषुजीवितादात्म्येनमथ्नंतीतिमंतव्यं॥२६॥ ७६

निरस्तमायाकृतयस्त्वनेन मायाकार्यदोषप्रतिभटत्वमुक्तं तदुपपत्तये मायाया ईश्वरवश्यतामाह करोतीति यो भवान् अस्य प्रधानस्य गुणैः सत्वादिभिः प्रधानाभिप्राये
णायस्येति नपुंसकनिर्देशः विश्वस्य स्थितिसंयमोदयं स्थितिलयसर्वं करोति कथंभूतमीप्सितं धर्मार्थकाममोक्षार्थचतुष्टयस्य साधनोपयुक्तकरणकलेवरादिप्र
दानेन जीवानुग्रहार्थं वा जगत्स्रष्टादि तस्येप्सितत्वं जीवार्थत्वेनेप्सितमिति यावत् स्वार्थत्वेनानीप्सितमित्यर्थः तस्माद्दीक्षितुः संकल्परूपज्ञानवतस्तस्य तत्तमा
यासत्वादिगुणात्मिका त्वच्छरीरभूता माया यथायस्कांतात् तदाश्रयत इदमिमुखं सादयो लोहं भ्रमति तथा त्वत्संकल्पानुगुणकारिणी भ्रमतीति भावः। यद्वा ईप्सि
तुः तदैतत्तवकस्मात् प्रजापतये त्युक्तविधेतरणावततः तस्य तव मायाय स्येति षष्ठी शरीरभावसंबंधे त्वच्छरीरभूता मायाय द्वा तादधीन्ये षष्ठी दृष्टांतस्य सामर्थ्येत्व
दधीनाया मायात्वदाक्षिणाति विश्वस्य सृष्ट्यादि करोति अत्यर्थः स्वतोऽसत्तायाः कथं भवदनुप्रवेशमात्रेण शक्तिमती स्यादित्यत्राह। यथायो भ्रमते तदाश्रयं ग्रावाणमिति।
विश्वसृष्ट्यादिकर्तृत्वस्य परमात्मधर्मत्वेन मायाकरोतीत्युक्तमिति तदुच्यते भगवदवतारस्वरूपाणां ब्रह्मादीनां सृष्ट्यादिकर्तृत्वस्य राजन्यादिमायागुणत्रायत्र्यं
करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेप्सितमीक्षितुर्गुणैः॥ माया यथायो भ्रमते तदाश्रयं ग्राव्णो नमस्ते गुणकर्मसाक्षिणे
चायुक्तत्वान्माया विश्वसृष्ट्यादिकं करोति इत्युक्तमिति नेप्सितमित्यनेन विश्वस्थित्यादिकं न भगवतो भोगार्थमित्युक्तं ईप्सितमित्यनेन जीवानुग्रहार्थं॥३७
लोकार्थं चेति सूचितं न तु विश्वस्थित्यादिकं न जीवानुग्रहार्थं किं तु गर्भजन्मजरामरणादिदुःखहेतुत्वेन जीवनिग्रहार्थमेव स्यात् किं चाहितकरणाहिताकर
णादिपक्षपक्षे वैषम्यनैर्घृण्ये च भगवतः प्रसज्येतेत्यत्राह नमस्ते गुणकर्मसाक्षिणे इति गुणानां मायागुणानां सत्वादीनां कर्मणां पुण्यपापरूपाणां चादीनां साक्षिणे
साक्षाद्द्रष्टे नमः जीवकर्मगुणानुसारित्वात् हिताकरणादेर्न वैषम्यनैर्घृण्यदोषसक्तिरिति भावः तथा च सूत्रं वैषम्यनैर्घृण्ये न सापेक्षत्वात्। न कर्माविभागा
दिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते चेति भगवन् जगदादौ स्वस्मिन्नुपसंहृतचिदचित्तत्वः सर्वज्ञः सर्वशक्तिः परमकारुणिको वाप्तसमस्तकामः स्वस्मिन्
प्रलीनमसत्कल्पं चेतनवर्गमालोक्य सर्वेषां सामान्येन धर्मादिपुरुषार्थसाधनत्वाराधनोपयुक्तकरणकलेवराणि प्रदापाराधनप्रकारावबोधिविद्याः
स्यंच प्रदर्शयेव यं जगन्तशाद्वादिलीलमश्नाते तततेजीवाः करणकलेवराणि परिग्राह्यप्राचीनकर्मवासनानुसारेण साध्वसाधुकर्मणाकुर्वते तः स्वस्वकर्मानुसा
रेणेश्वराद्दिष्टफलं भुंजते इति नेश्वरस्य वैषम्यादिप्रसक्तिरिति ॥ ३७ ॥ प्रहृतावतारचरित्रं वदन्नमस्करोति प्रथमेति यो जगतामादिः कारणभूतः स्करमा

भा.पं.
७७

ष्ठीव्य दंष्ट्राग्रे कृत्वा निष्ठाय रसातलाद्रसामुद्धरन्ततः कलयालोकवादिनो गजेन्द्र इव निरगात्ततस्तं प्रतिवारणं प्रतिगजतुल्यं दैत्यं हिरण्याक्षं प्रमथ्य हत्वा क्रीडन् स्थितं तं
विभुं प्रणतोऽस्मि ॥ ३९ ॥ इति श्रीभ० ने० प्र० ५ टी० ॥ १८ ॥ एवमिलावृतादिषु वर्षेषु उपास्यादिकमुक्त्वा इदानीं किंपुरुषे भारते च वर्षे तद्वदन्नेवायं मध्ये भारतवर्षे
ह चाह विशेषेण ॥ तत्रादौ किंपुरुषे उपास्यं भगवन्तं तदुपासकं जप्यमन्त्रं चाह किंपुरुष इति ॥ आदिपुरुषं जगत्कारणभूतः परमपुरुषः लक्ष्मणस्य सौमित्रेरग्रजं
सीताया अभिरामं रामं तत्र रूपं रामं दाशरथिं रामं रमन्ते योगिनो नंते नित्यानंदे चिदात्मनि इति रामपदेनासौ परं ब्रह्माभिधीयते इति निरुक्तरामशब्दः पृथक्लक्ष
इति निमित्ताश्रयत्वेन तस्य श्रीरामस्य पादयोश्चरणयोः संनिकर्षः सान्निध्यं भजनमिति यावत् तस्मिन्नभिरतः आसक्तो महाभागवतो हनूमानांजनेयः किंपुरुषवर्षस्थ

प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया जगदादिसूकरः कृत्वाग्रदंष्ट्रे निरगादुदन्वतः क्रीडन्निवेभः प्रणतास्मि तं विभुं ॥ ३९
इति श्रीमद्भागवते महापुराणे पंचमस्कंधे अष्टादशोऽध्यायः ॥ १८ ॥ श्रीशुक उवाच किंपुरुषे वर्षे भगवंतमादिपुरुषं लक्ष्मणा
ग्रजं सीताभिरामं रामं तच्चरणसंनिकर्षाभिरतः परमभागवतो हनूमान्सह किंपुरुषैरविरतभक्तिरुपास्ते ॥ १ ॥ आर्ष्टिषेणे
न सह गंधर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति स्वयं चेदमुपगायति ॥ २ ॥ ॐ नमो भगवते
उत्तमश्लोकाय नमः ॥ आर्यलक्षणशीलव्रताय नमः उपशिक्षितात्मने उपासितलोकाय नमः साधुवादनिकषणाय न
मो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति ॥ ३ ॥ सह अविरता अविच्छिन्ना भक्तिर्यस्य तादृश उपास्ते ॥ १ ॥ भगवतो भर्तुः श्रीरामस्य कथां गंधर्वै
रनुगीयमानां आर्ष्टिषेणेन किंपुरुषवर्षस्य प्रभुणा सह समुपशृणोति स्वयमिदं वक्ष्यमाणं मंत्रमुपांशु गायति जपति ॥ २ ॥ उत्तमैर्वृद्धादिभिः श्लोक्य
ते स्तूयते उत्तमश्लोकः तस्मै नमः इति प्रायः श्लोकस्य शोभस्येति वा तस्मै आर्याणां लक्षणानि व्रतानि च शीलानि यस्मिन् उपरीति तस्मै शिक्षितः आत्मा चित्तं येन उपासित उपस्तः लो
को येन साधुवादस्तेषामभिवादः तस्य निकषणाय निकषोपलवन्निकषोऽरणस्यानां यद्बलसागि कुले साधुः वृसलपः तत्र साधुरिति यत्तरत्ययः येषामाकर्मणोऽरि
ति प्रकृतिभावादिलोपः ॥ अस्य हंत जीवितं जयोत्सवं वा मीते मलत्वरणानं तु प्रतिज्ञा संस्कृत्यब्रह्मरोप्यो विशेषतः तत्र कृते रीत्या बाह्मणासरदत्तणा वदैकदीतव

१७७

तच्चामौ देवतत्त्वैर्महापुरुषाय प्रतिपाद्यजगत्कारणत्वोपलक्षककल्याणगुणविशिष्टाय परमपुरुषाय महाराजाय राजाधिराजः सर्वेषां विशुद्धबुद्धिमयोम
हानेईश्वरं तं विज्ञानीथ्यं स पिता स प्रजापतिरित्युक्ते नमः पदाहृतिर्गुणभेदाभिप्राया ॥३॥ प्रकृतिपुरुषाखिलदृशा परमात्मस्वरूपं विशेष्यतद्धीरामरूपेण
वस्थितं नमस्करोति यदि तद्विशुद्धं रागाद्यकलुषितं तदनुभवैकमात्रं ज्ञानेनैकस्वरूपं मात्रं कश्चिदप्यजडः स्वस्वरूपत्वविवक्षितं विशुद्धानुभवैकमात्रम
नेनस्वरूपं निर्दिश्यते स्वतेजसा स्वप्रकाशेन नित्यासंकुचितानंदस्वरूपविषमकथमंतज्ञानेन ध्वस्ताविद्यं निरस्तगुणारजस्त्रादयः तं त्वकृतातिस्वउत्पत्तिस्थिति
मरणरूपा अवस्थायस्य स्वतेजसा ध्वस्तगुणत्र्यवस्थामित्यनेन प्रकृतिसंसृष्टचेतनव्यावृत्तिः सत्त्वध्वस्तगुणत्र्यावस्थः प्रशांतमशनायापिपासाशोकमोहज
राक्तमसरूपोर्मिषट्करहितानंदस्वरूपं ॥ यद्वा ॥ विशुद्धपदेनेंद्रियकाद्यनुभवव्यावृत्तिः प्रशांतरपदेन नित्यरागाद्यकलुषितत्वमुच्यते नेन मुक्तचेतनव्यावृत्तिः संसि
वस्थायां रागादिभिः कलुषितः प्रत्येकस्वस्मै नासमानमनेन पराचोः चेतनस्य व्यावृत्तिनस्यचेतनं स्वस्मै अवभासते किं तु परस्मैरवस्तुधिया सम्यग्ज्ञानेनोपलं
तेनपलभ्यते ॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मदर्शिभिः कवामनीषया मनसाभिक्लिप्त इति श्रुत्यक्तयोगपरिशुद्धबुद्ध्योपलभ्यमानमित्यर्थः ॥ अनेने
प्रत्यग्विशुद्धानुभवमात्रमेकं स्वतेजसा ध्वस्तगुणव्यवस्थं ॥ प्रत्यक्प्रशांतं सुधियोपलंभनं ह्यनामरूपं निरहं प्रपद्ये ॥४॥
वतत्कारणत्वमुपलक्षितं कथ्यध्येयः ॥ कारणं तु ध्येयमिति ध्येयत्वकारणत्वयोरेकनिष्ठात्वश्रवणात ॥ यदि कारणं तर्हि कारणस्य भावत्वस्यावस्थाविशेषत
आगवस्थायोगित्वरूपत्वादेवादिनामरूपाश्रयत्वं स्यात ततश्च सत्यं ज्ञानमनंतं निष्क्रियं स्यादि निर्विकारित्वश्रवणविरोधस्तत्राह ॥ अनामरूपमिति ॥ न विद्य
तेस्य मात्रनिषेधादिनामरूपे यस्य प्रकृतिपुरुषविशिष्टस्यैव कारणत्वाद्देवादिनामरूपयोः स्वविशेषणीभूतप्रकृतिपुरुषगतत्वात द्वारा मनामरूपत्वेपिसा
साक्षान्नामरूपमित्यर्थः ॥ एवं च तं यदेवं तेषु प्रसिद्धं तत्परब्रह्मस्वरूपं नरहितपुरुषश्रेष्ठपुरुषोत्तमं इतियावत् ॥ एवं च द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च उत्तम
पुरुषस्त्वन्यः परमात्मेत्युदाहृतः इति भगवद्गीतोक्तनित्यमुक्तबद्धत्रिविधचेतनव्यावृत्तस्वरूपं विवक्षितं ॥ तत्राहिकूटस्थपदेन मुक्तो नित्यसिद्धश्चचेतनउच्य
ते उभयोरपि प्राकृतविकाररहितत्वेनाक्षरत्वात् अक्षरस्य शब्दवाच्यत्वात ॥ यद्यपि प्रशांतशब्देन मुक्तव्यावृत्तिस्तथापि नित्यसिद्धत्वाद्व्यावृत्तये नक्षरमित्युक्तं ॥ निर
हमिति ॥ प्राकृतनामरूपत्वेनिरहंत्वहेतुः ॥ अहमहममपोक्षितं तत्र अहंपदेनाहंकारः प्रकृतिपरिणामविशेषः जीववाच्योच्यते ॥ आत्मनोप्यहमर्थता तत्तत्सान्निरहं प्रकृति

ध्यानं वेदांतेषु पद्यते उपास्योपायभावे वाच्यावस्थामित्यर्थः ॥४॥ ननु वक्तपरस्य ब्रह्मणोऽनामरूपत्वं श्रीरामस्य त्वनामरूपत्वमित्युक्तं तस्य मनुष्यनामरूपाभावा
त्तत्राह ॥ मर्त्येति ॥ विभोः परस्यैव ब्रह्मण इह लोके श्रीरामरूपेण मर्त्यावतारः मनुष्यावतारः ॥ अवतारो नाम जन्म इत्यनभावस्यैव रूपांतरपरिग्रह ॥ एवं च परब्र
ह्मणो जन्मत्वभावे मनुष्यसजातीयरूपपरिग्रहात्तद्वदिति भावः किमवतारप्रयोजनं तत्राह मर्त्यशिक्षणं मर्त्यानां संसारदोषज्ञापनेन धर्मसंस्थापनं सा
धुपरित्राणं प्रयोजनमिति भावः ननु मर्त्यशिक्षणमेव तस्य प्रधानं प्रयोजनमित्यर्थः तथा चोक्तं भगवता परित्राणाय साधूनां विनाशाय च दुष्कृतां धर्मसं-
स्थापनार्थाय संभवामि युगे युगे इति विनाशस्य चेत्यत्र चकारो वा च परः भिन्नक्रमो मानयेति वत् दुष्कृत विनाशन मानुषंगिकं प्रयोजनमित्यर्थः ॥ धर्मो नाम
चतुर्वर्णानां चातुराश्रम्याव्यवस्थायाव स्थितः ईश्वराराधनरूपः पंच महायज्ञादिस्तस्य संस्थापनं संसारदोषज्ञापनेन शिक्षणं दुष्कृतविनाशनं तु संक

मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः ॥ कुतोऽन्यथा स्याद्रमतः स्व आत्मनः सीताकृतानि व्यसनानी
श्वरस्य ॥५॥

ल्पमात्रेण प्रपद्यते ॥ साधूनां शाप्यापानाटनभोजनादिषु भगवता सह वर्तमानानां तं विनापि क्षणमात्रमपि कल्पसहस्रं मन्वानानां दर्शनस्पर्शनसंभाषणा
दिभिः परित्राणं सुखीकरणं धर्मसंस्थापनं च संकल्पमात्रेणाप्युपपद्यत इति भावः ॥ यदुक्तं मर्त्यशिक्षणार्थमेवावतार इति तदस्मिन्नेवावतारे निर्दर्शयति
कुत इत्यादिना ॥ अन्यथावतारस्य मर्त्यशिक्षणार्थत्वाभावे ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि माययेत्युक्त सर्वनियं
तुः दारापहर्तृरावणांतरात्मतया दारापहरणादिकं कारयितुः स्वे स्वस्मिन्निरतिशयापरिच्छिन्नानंदस्वरूपे आत्मनि रमतः ॥ उक्तविधस्वरूपानुभावेन नि
त्यमविषयासक्तिरहितस्य सीताकृतानि सीताविश्लेषादिभिः कृतानि व्यसनानि दुःखानि कुतः कस्माद्धेतोः स्यात् तस्य कामिप्रायं स्यादित्येकवचनं कु
तोन्यथास्याद्रमत इति पाठांतरं तु सुगमं सर्वनियंतुः सर्वांतरात्मनः स्वात्मन एव सतु यस्य श्रीरामरूपेणावस्थितस्य परब्रह्मणः सीताविश्लेषादिकृतव्यसनानुकरणं निरतिशय

दुःखावहाः संसार इति लोकस्य प्रदर्शयितुमेवान्यथोक्तविधस्य तस्य सीताकृतव्यसनानि न घटंत इति भावः ५

ग्नस्वोपपादयति नेति म॥ श्रीरामरूपेणावस्थितः परमात्मा आत्मवतां प्रशस्तमनसां निर्धूतनिखिलसंसारिकधर्माणां सनकादीनामात्मा सुहृत्तमा॥ या
स्थितेषु क्षितिशायिषु योद्धव्ये निवृत्तः आश्रितानां निरतिशयप्रीतिविषयस्स भगवान् ज्ञानशक्तिबलैश्वर्यादिषाड्गुण्यपूर्णः वासुदेवः सर्वत्रासौ समस्तं च वसत्यत्रैव
वैव यतस्ततः वासुदेवेति विद्वद्भिः परिकीर्तितस्तस्य शरीरत्वात् सर्वत्रावस्थितोपि तत्तद्दोषैरसंस्पृष्टः सर्वस्वधार्यत्वेन च परिगृहीतवांस्त्रिलोक्यां कृत्स्नजग
गदं ततस्तस्मिन्नेकस्मिन्नपि क्वचिदपि पुत्रादिविषये सक्ते वस्तुनि न सक्तः वैराग्यावधारणेन समतरुवेत्यर्थः॥ यतो न सक्तः अत एव स्त्रीकृतं स्त्रीविश्लेषादिकृतं कश्मलं दुःखं
नाश्नुवीत स्त्र्यवतारस्य मर्त्येपि त्वैराग्यत्वाभावे स्त्रीकृतं कश्मलं एवं ततो न प्राप्नुयादेवास्य पेत्यस्य सर्वत्रानुषंगः तथा लक्ष्मणं च प्राह्वासीतां च विहातुं त्य
क्तुं नार्हतीति निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणाद्युपयुक्तशरीरभेदैः शेषत्वात् ततो भगवतो नित्यानपायिनो न तस्यावताररूपं॥ भवां
न वै स आत्मात्मवतां सुहृत्तमः सक्तस्त्रिलोक्यां भगवान् वासुदेवः॥ न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं चापि विहातुमर्हति
६॥ न जन्म नूनं महतो न सौभगं न वाङ् न बुद्धिर्नाकृतिस्तोषहेतुः तैर्यद्विसृष्टानपि नो वनौकसश्चकार सख्ये बत लक्ष्मणाग्रजः॥७॥
त्तं सवैदेह्या गिरिसानुषु रंस्यते॥ अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते॥ कुरुष्व मामनुचरं वैधर्म्यं नेह विद्यते कृतार्थोहं भविष्यामि न च चार्थप्रकल्प
नादिति सर्वावस्थोचिताशेषशेषवृत्तिकृतनित्यकिंकरत्वाद्वय्यमानेन लक्ष्मणं नित्येवासौ जगन्माता लक्ष्मीर्नित्यानपायिनी राघवत्वे भवत्सीता रुक्मिणी
कृष्णजन्मनि अन्येष्वप्यवतारेषु विष्णोरेषानपायिनीत्युक्तविधां नित्यानपायिनीं॥ लक्ष्म्यवताररूपां भगवतीं सीतां वा मर्त्यशिक्षणामंतरेण प्रियो हि ज्ञानि
नोत्यर्थमहं स च मम प्रियः मित्रभावेन संप्राप्तं न त्यजेयं कथंचन॥ अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं ममेति कथं त्यक्तुमर्हति॥६॥ अतः केवलं मर्त्यशिक्षणा
र्थं सांसारिकपुरुषचेष्टामनुसृतवानित्यर्थः॥ सीतात्यागादिकं तु श्रीरामायणोत्तरकांडे प्रसिद्धः॥ अत्रात्मवतामित्यनेनासत्स्यतु नाप्राप्तिविते
नात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति वीतरागोपास्यत्वप्रतिपादकश्रुत्यर्थप्रत्यभिज्ञानतः स्वरागादिभिरकानुपसचितं॥ अत एवात्र स
योगवियोगकृतसुखदुःखाद्यभावस्वभावेदितवा भगवान्नित्यानेनषाड्गुण्यपूर्णत्वात्मा समस्तकामत्वोक्तिलाभस्त्रीसंगादिनिमित्तसुखानादरश्रोक्तः सुहृत्त

भा॰ पं॰
७८

मत्र्यत्वेन नमस्करोत्यर्थका राणां यत्तनुष्यात्मतयाकर्षंचित्तुपकारेण कृतैनेके न तु भगवति इत्युक्तरीत्या दोषानवेक्ष्य तारतम्यमनालोच्य उपकाराभासमेव लंकस्वामि
तत्वमात्रेणापविस्मृत्यतो निरतिशयसुहृत्तमतमस्य नम्र्यपि दर्शनान्मत्तरेणानित्यानपायिनोः सीतालक्ष्मणयोस्त्यागो न घटत इत्युक्तं भवति॥ तारतम्यमनादृत्य यस्मा
त्त्वमात्रेण निरतिशयप्रीतिविषयत्वरूपं तस्मिन्नेवावतारे दर्शयति नेति महतः पुरुषाणां गतत्वाद्वानामाज्ञे निहितजन्मादि शिष्टपापीयसं समपि रक्षितुं
वदीक्षितमस्य श्रीरामरूपेणावस्थितस्य ब्रह्मणः जन्मविधानि जन्म ततो भवेतु॥ तथा सौस्वर्यो भूयन बुद्धिजातयो न ततोपहेतवः॥ तिर्यक्त्वपि तस्याप्रतन्ह
दपीनाप्ति इति भावः तथा हि तिर्यञ्चोपीभावः॥ तेर्यंचति यत्कं ते न सख्यान्वनौकसः वनस्थानप्यनुकंपीनृपतिलक्ष्मणाग्रजः पूर्वोक्तविधानंतावतारूपलक्ष्म
णायन्तजो निर्त्यतेत्सख्ये वरी भौनामः सख्यं चकारवर्तिष्ठामर्षे॥ सख्यमिति पाठे सख्येविषयेन स्वकारेत्यर्थः तेयहिसखीति पाठे यत्तयस्मात्तेजेनसो भवा
शिनिः विशिष्टास्मि स्मकान पिनोस्मात्सख्यमेव चकार जन्मादिकं तारतम्यमनवेक्ष्य स्वयमात्रेणास्माभिः हीनैः सह सख्यं कृतवान्॥ वताहोस्य सुहृत्तमत्वमेवं

सुरोऽसुरो वाप्यथ वानरो नरः सर्वात्मना यः सुकृतज्ञमुत्तमं॥ भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत्कोशलान्दिवं॥ ८॥
भारतेऽपि वर्षे भगवान्नरनारायणाख्य आकल्पान्तमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलम्भनमनुग्रहायात्मव
तामनुकम्पया तपोऽव्यक्तगतिश्चरति॥ ९॥

विधमिति निर्वकुमशक्यमित्यर्थः॥ ७॥ यत एवायं निरतिशयसुहृत्तमस्ततस्तं मनुजाकृतिमप्याक
ंश्याहरिंसुकृतं उपकाराभिज्ञमप्योपजीवनायं तु यत्त्वयोपकृतं कपेनरः प्रत्युक विधोपकाराभिज्ञे पुरुषोत्तमं श्रीरामं सुरासुरासुरनराणां मध्ये यः कश्चित
सर्वात्मना सर्वप्रकारेणाकेनापि तदीयतां संपादनप्रकारेणेति यावत्॥ भजेत्तमेवेत्तकंपत्तन्मात्रेणैव तमनुगृह्णाती यत्राह यः श्रीरामः उत्तरकोसलान्नरकोस
लस्थानलोकानुत्तरान् कोसलजादीन्स्वदेशवासितमात्रमेव लंब्यादिवस्वर्गं त्वनयत्स्थापितवान् न केवलं ज्ञानक्रियाभक्तियोगानेवापेक्षानुग्रहा
त्ययस्माद्राम इति भावः॥ तथाचोक्तं श्रीवत्साकमिश्रैः तामामवंतिकपयः करुणामत्याधेज्ञानक्रियाभजनलभ्यमभ्यः तेषु केनवरसेतरकोसलस्या
पूर्वं सर्वमभजंतिहि जंतवस्तामिति॥ ८॥ अथ भारतेवर्षेउपास्यं भगवद्रूपं उपासकं जप्यमानं मंत्रं स्तोत्रं चाह भारतेपीति॥ भारतेऽपि वर्षे भगवान्नरनारायणाख्य आव

७८

भा० क०
७२

धर्मवित्पुमानमत्तादि हन्तुं रिपुं न हंति । एवंतु धर्मस्थितिरित्यर्थः । तत्र मत्तं मद्यपानाप्रमत्तमनवहितं । उन्मत्तं पित्तादिना जडं केवलमज्ञं । ३६ । योऽघृ
णः निष्कृपावाननत एव खलो दुरात्मा यः पुमान् परेषां प्राणैः स्वप्राणान् प्रपुष्णाति तस्यैव धस्तस्यैव श्रेयस्करः । अन्यथा तस्माद् कृतप्रायश्चित्ता
द्दोषात्पुमानधः । नरके पातति । ३७ । किंच मम श्रुएव तः सतो भवता पांचाल्यै द्रौपद्यै प्रतिश्रुतं प्रतिज्ञातं । किमिति । हे मानि नियस्तव पुत्रहं

मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडं । प्रपन्नं विविरथं भीतं न रिपुं हंति धर्मवित् । ३६ । स्वप्राणान्यः परप्राणैः प्र
पुष्णात्यघृणः खलः । तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् । ३७ । प्रतिश्रुतं च भवता पांचाल्यै श्रृण्वतो मम
श्चाहरिष्ये शिरस्तस्य यस्त्वे मानिनि पुत्रहा । ३८ । तदसौ वध्यतां पापश्चात सव्यप्याल्मवंधहा । भर्तुश्च विप्रियं वीर कृत
वान्कुलपांसनः । ३९ । सत उवाच । एवं परीक्षिता धर्मे पार्थः कृष्णेन चोदितः नैच्छद्धंतुं गुरुसुतं मम पार्थाल्मजहंनं महा
न् । ४० ।

ता तस्य शिरश्चाहरिष्ये । श्चाहरिष्यामीति । ३८ । तत्तस्मादसौ पापात्मा श्चाततायी आत्मनस्तव वंधहा । कुमारघाती हे वीर । भर्तुर्धृतराष्ट्रस्य विप्रि
यमिदं कर्म कृतवान् । कुलपांसनः कुलदूषकश्चातो वध्यतां । ३९ । इत्यं धर्मपरीक्षता धर्मपरीक्षार्थं एवं ब्रुवता कृष्णेन चोदितोपि पार्थोऽर्जुनः श्चा
त्मजहनमपि । सुतहनमपि गुरुसुतं द्रौणिं हंतुं नैच्छत् । यतोऽर्जुनो महान् गुरुकृतोपकारामिज्ञः । ४० ॥ ॥ ॥ ॥ ७१

ततस्तयोरुभयोरस्त्रयोस्तेजसा शरैर्व्याप्तेऽन्योन्यं संहत्य संगत्य रोदसी द्यावापृथिव्यौ खमाकाशं चावृत्यावस्थार्कवह्नीइव ववृधाते वृद्धिं गते ॥३०॥ किं
च ॥ ततस्त्रींल्लोकान्प्रदहत्तयोर्द्रौण्यर्जुनयोरस्त्रतेजः । तत्र युक्तास्त्रतेन दह्यमानाः सर्वाः प्रजाः सांवर्तकं प्रलयाग्निसमं मत्वा अमन्यत ॥३१॥ लोकव्य
तिकरं लोकोपमर्दनरूपं प्रजोपद्रवं वासुदेवस्य मतमभिप्रायं चालक्ष्यार्जुनः द्वयं संजहार उपसंहृतवान् ॥३२॥ ततश्चासाद्य समीपमेत्य दारुणमु
ग्रं गौतम्याः द्रोणपत्न्याः कृप्याः सुतं द्रौणिममर्षेण क्रोधेन ताम्राक्षिणी यस्य सोऽर्जुनस्तरसा बलेन बबंध यथा रज्ज्वा पशुं तद्वत् ॥३३॥ रिपुं द्रौणिं

संहत्यान्योन्यमुभयोस्तेजसी शरसंवृते । आवृत्य रोदसी खं च ववृधातेऽर्कवह्निवत् ॥३०॥ दृष्ट्वास्त्रतेजस्तु तयोस्त्रीं
ल्लोकान्प्रदहन्महत् ॥ दह्यमानाः प्रजाः सर्वाः सांवर्तकममंसत ॥३१॥ प्रजोपद्रवमालक्ष्य लोकव्यतिकरं च तं
मतं च वासुदेवस्य संजहारार्जुनो द्वयं ॥३२॥ तत आसाद्य तरसा दारुणं गौतमीसुतं बबंधामर्षताम्राक्षः पशुं रशन
या यथा ॥३३॥ शिबिराय निनीषंतं रज्ज्वा बध्वा रिपुं बलात् ॥ प्राहार्जुनं प्रकुपितो भगवानंबुजेक्षणः ॥३४॥ श्री कृष्ण उ
वाच ॥ मैवं पार्थार्हसि त्रातुं ब्रह्मबंधुमिमं जहि ॥ योऽसावनागसः सुप्तानवधीन्निशि बालकान् ॥३५॥

बलाद्रज्ज्वा बध्वा शिबि
राय राजनिवेशमयं शिबिरं प्रति निनीषंतं नेतुमिच्छंतमर्जुनं भगवानंबुजेक्षणः कृष्णः प्रकुपित इवाह धर्मपरीक्षार्थमिति भावः ॥३४॥ तदेवाह । मैवमि
ति पंचभिः । हे पार्थ इमं ब्रह्मबंधुं त्रातुं जीवयितुं नैवार्हसि किंतु जहि । आततायिनमायांतं हन्यादेवाविचारयन्निति स्मृतेरिति भावः । तदेवाह । योऽसो

ब्रह्मबंधुर्निशि बालकांस्तत्रापि सुप्तानवधीत् ॥३५॥

नकेवलमंतरात्मतयैवंविधस्त्वंऽपित्ववतारमुखेनापीत्यभिप्रेत्याह ॥ तथेति ॥ भुवोभारभूतानांदुष्कृतांजिहीर्षयासंहारेच्छयाऽनन्यभावानामनन्यप्र
योजनभक्तियोगनिष्ठानांस्वानांस्वकीयानामसकृदनुध्यानायचायंतवावतारः ॥ २५ ॥ एवंसंस्तुत्यप्रकृतंपृच्छति ॥ किमिति ॥ इदंतेजःकिंस्विदितिया
थात्म्यप्रश्नः कुतोवेतिहेतुप्रश्नः ॥ कुतोवाऽस्माआगच्छति कुतश्चशयिष्यतीत्यर्थः ॥ स्वस्यतदज्ञानमावेदयति ॥ नवेद्म्यहमिति ॥ तर्हिकिंजानासीत्यत्राह
सर्वतोमुखंपरमदारुणंतेजः ॥ आयात्येतावदेववेद्मीत्यर्थः ॥ २६ ॥ इत्थंसंस्तुतोविज्ञापितश्चभगवान्सर्वज्ञश्चाह ॥ वेत्थेतिद्वाभ्यां ॥ प्राणबाधउपस्थितेस

तथायंचावतारस्ते भुवोभारजिहीर्षया ॥ स्वानांचानन्यभावानामनुध्यानायचासकृत् ॥ २५ ॥ किमिदंस्वित्कुतोवेतिदेव
देवनवेद्म्यहं ॥ सर्वतोमुखमायातितेजःपरमदारुणं ॥ २६ ॥ श्रीभगवानुवाच ॥ वेत्थेदंद्रोणपुत्रस्यब्राह्ममस्त्रंप्रदर्शि
तं ॥ नैवासौवेदसंहारंप्राणबाधउपस्थिते ॥ २७ ॥ नह्यस्यान्यतमंकिंचिदस्त्रंप्रत्यवमर्शकं ॥ जह्यस्त्रतेजउन्नद्धमस्त्रज्ञोह्य
स्त्रतेजसा ॥ २८ ॥ सूतउवाच ॥ श्रुत्वाभगवताप्रोक्तंफाल्गुनःपरवीरहा ॥ स्पृष्ट्वापस्तंपरिक्रम्यब्राह्मंब्राह्मास्त्रायसंदधे ॥ २९ ॥

तिद्रोणपुत्रस्येतिकर्तरिषष्ठी ॥ तेनप्रदर्शितंप्रयुक्तंब्राह्ममस्त्रमिदंतेजोवेत्थजानीहि ॥ असौद्रोणपुत्रःसंहारंप्रयुक्तब्रह्मास्त्रोपसंहारंनवेदनजाना
ति ॥ २७ ॥ तर्हिकथमिदंउपसंहर्तव्यमित्यत्राह ॥ नेति ॥ अस्यद्रोणपुत्रप्रदर्शितस्यब्रह्मास्त्रस्यप्रत्यवमर्शकंप्रतिभटमस्त्रंततोऽन्यतमंकिंचिदपिन
विद्यतेऽतोऽस्त्रज्ञः ॥ ब्रह्मास्त्रप्रयोगोपसंहाराभिज्ञस्त्वमस्त्रतेजसाब्रह्मास्त्रतेजसैवोन्नद्धमुद्रिक्तंतेजःब्रह्मास्त्रतेजोजहित्वमपिब्रह्मास्त्रेणैवतदभि
भावयेत्यर्थः ॥ २८ ॥ इत्थंभगवताप्रोक्तमस्त्रसंहारोपायंश्रुत्वापरवीरहाफाल्गुनोर्जुनःअपआचम्यतंकृष्णंपरिक्रम्यप्रदक्षिणीकृत्यब्रह्मास्त्राय ६९
प्रतिभटंब्राह्ममेवास्त्रंसंदधेप्रयुयोज ॥ २९ ॥

एवंविधस्त्वीश्वरो नाहमित्यत आह । त्वमिति । त्वमेव साक्षादीश्वरः । यत्किंचिदीशितव्यं वस्त्वपेक्षया सर्वोपि लोक ईश्वर एवेत्यतः साधारणे ईश्वरे अभि
प्रेतमीश्वरमितरस्माद्व्यावर्तयति । आद्यः आदिभव । निखिलजगत्कारणत्वेनावस्थितः पुरुषः सर्वान्तरात्मतया सर्वप्रशासितृत्वेन सर्वहृदयान्त
र्वर्तीत्यर्थः ॥ अथापि प्रकृतेः परः । भूमिरापोनलो वायुः खं मनो बुद्धिरेव च ॥ अपरेयमितस्त्वन्यां इत्यादिश्लोकद्वयोक्तप्रकृतिद्वयाद्विलक्षणः पुरुष
शब्देन । पूः संज्ञे देशे शरीरे स्थित्वा शयनात्पुरुषो हरिरिति निरुक्तेन सर्वाधिष्ठानत्वं सर्वाधारत्वं फलितं ॥ प्रकृतेः परेत्यनेन प्रकृतिगतधर्मास्पर्श उक्तः । नन्वी
श्वरश्चेत्सर्वधारकश्चेत्तस्य किं धारकं देहादिलक्षणमपि जीवस्य देवोहं मनुष्योहमिति देहधर्मस्पर्शदर्शनात्कथं तस्य प्रकृतिधर्मास्पर्शश्चेत्यतो वि
शिनष्टि । चिच्छक्त्या शक्तिशब्दः सर्वत्र कार्योपयोग्यपृथक्सिद्धविशेषणवाची चिच्छक्त्या ज्ञानशक्त्या नित्याविर्भूतापरिच्छिन्नधर्मभूतज्ञानशक्त्या मायां

त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः । मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि । २३ । स एव जीवलोकस्य मा
यामोहितचेतसः ॥ विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणम् ॥ २४ ॥

प्रकृतिं चेतनाचेतनात्मिकां व्युदस्य मायाशब्दोपचारान्मायाधर्मपरः ॥ मायाधर्मान्व्युदस्य मायाधर्मैरस्पृष्ट इत्यर्थः । केवल एव कैवल्यः । स्वार्थे ष्यञ् । के
वले आत्मनि स्थितः ॥ स्वमहिम्नि प्रतिष्ठितः । इत्युक्तरीत्या आधारान्तरानपेक्ष इत्यर्थः ॥ जीवस्तु कर्मणा संकुचितज्ञानत्वाद्देहात्मभ्रमेण देहधर्मानात्म
न्यध्यस्यति ॥ ईश्वरस्तु चिच्छक्त्या तान्व्युदस्य तत्र जीवान्तरात्मतया तत्तज्जीवकर्मानुरूपं फलं प्रयच्छन्नितरान्धारयन्नेव तिष्ठतेति भावः । २३ । तदेवाह
सेति ॥ उक्तविध ईश्वर एव त्वं मायया देहात्मभ्रमस्वतन्त्रात्मभ्रमादिरूपमायाकार्येण मोहितं चेतो यस्य जीवलोकस्य धर्मादिलक्षणं धर्मार्थकाममोक्षलक्ष
णपुरुषार्थचतुष्टयरूपं श्रेयस्तद्विपर्ययरूपमश्रेयश्च तत्तत्कर्मानुगुण्येन स्वेन त्वस्वेन वीर्येण स्वाभाविकेनाच्युतेन महात्म्येनोपलक्षितः । विधत्से प्रयच्छ ।

॥ रु ॥ प्र

ततः सर्वतोदिशं सर्वदिक्षु प्रादुः कृतं प्रादुर्भूतं प्रचंडमुग्रं तेजः तेजः प्राणापहमभिप्रेक्ष्य प्राणविपत्तिकारित्वेनउत्प्रेक्ष्य जिष्णुरर्जुनो विह्वलंश्री कृष्णमुवा
च ॥२१॥ तदेवाह कृष्ण कृष्णेत्यादि पंचभिः । प्रादुःकृततेजोपाध्यात्म्य तदुपसंहारानभिज्ञस्तदुपज्ञापनाय भगवंतं कृष्णं पृष्ट्वा मोनाहमपि वेद्मीति मावो
चेत्यभिप्रायेण तावद्भगवंतात्स्वाभाविकैर्धर्मैः स्तौतीति चतुर्भिः ॥ हे कृष्ण ॥ कृषिर्भूवाचकः णश्च निर्वृति वाचकैस्तु कृष्णशब्दो पस्थापितसर्वलोक

ततः प्रादुःकृतं तेजः प्रचंडं सर्वतोदिशं ॥ प्राणापहमभि
प्रेक्ष्य विह्वलं जिष्णुरुवाच ह ॥२१॥ अर्जुन उवाच ॥ कृष्ण कृ
ष्ण महावाहो भक्तानामभयंकर ॥ त्वमेको दह्यमानाना
मपवर्गोसि संसृते ॥२२॥

सुखावहत्वरूपगुणानुसंधानकृतसंभ्रमाद्द्विरुक्तिः । हे महावाहो । वाहू राजन्यः कृतेत्युक्तरीत्या राजन्यकुलप्रभववाहो । भक्तानामभयंकरो वीतित
घामृतत्वस्य संबोधनं दह्यमानानां जनानां संसृतेरपवर्गः संसाराद्विमोचकेतियावत् ॥ त्वमेव एव । कृष्णत्वजगत्सुखावहस्य तत्रापि भक्ताभयंक
रस्य संसृतिरूपमहाभयहृत्परणत्वमस्य तव किंयानेतदुपस्थितभयापनयने प्रयासेतिभावः ॥२२॥ ॥ ॥ ॥

इतीत्थं वल्गुभिः सुंदरैर्विचित्रैश्च जल्पैर्भाषणैः । प्रियां द्रौपदीं सांत्वयित्वा अच्युतः कृष्णो मित्रं सूतः सारथिश्च यस्य । सारथीकृताच्युतेत्यर्थः दंशितः
कवचितः । उग्रं धनुर्गांडीवं यस्य । कपिध्वजः हनुमच्चिह्नितः ध्वजो यस्य सोऽर्जुनः । रथेन साधनेन गुरोर्द्रोणाचार्यस्य पुत्रमश्वत्थामानमन्वाद्रवदन्वधा
वत् ॥१७॥ आपतंतमर्जुनं दूरादेव विलक्ष्य मत्समभिज्ञाय कुमारहा कुमारघाती सोऽश्वत्थामा उद्विग्नं भीतं मनो यस्य तथाभूतः । प्राणपरीप्सुः प्राणान्प्राप्नु
मिच्छुर्जिजीविषुरित्यर्थः । उर्व्यां भूमौ यावद्गमं यावद्गंतुं शक्यं तावद्रथेन साधनेन पराद्रवत्पलायितवान् ॥ कोदहः यथा रुद्रभयात्तद्वत् ॥१८॥ यदाऽश

सू॰ उ॰ वा॰ इति प्रियां वल्गुविचित्रजल्पैः स सांत्वयित्वाच्युतमित्रसूतः अन्वाद्रवद्दंशितउग्रधन्वा कपिध्वजो गुरुपुत्रंरथे
न ॥१७॥ तमापतंतं स विलक्ष्य दूरात्कुमारहोद्विग्नमना रथेन ॥ पराद्रवत्प्राणपरीप्सुरुर्व्यां यावद्गमं रुद्रभयाद्यथार्कः ॥१८॥ यदा
शरणमात्मानमैक्षत श्रांतवाहनं ॥ अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः ॥१९॥ अथोपस्पृश्य सलिलं संदधे तत्समा
हितः ॥ अजानन्नपि संहारं प्राणकृच्छ्र उपस्थिते ॥२०॥

शरणं रक्षकरहितं श्रांतवाजिनो यस्य तमैक्षत पर्यालोचितवान् ॥ तदा स द्विजात्मजो द्रौणिरात्मा त्रायतेऽनेनेत्यात्मत्राणं च रक्षणोपायं ब्रह्मशिरो
नामकमस्त्रं मेनेऽबुबुध्यत ॥ ब्रह्मशिरोऽस्त्रेणार्जुनं हत्वात्मानं रक्षिष्यामि इत्यध्यवसितवानित्यर्थः ॥१९॥ अथ सलिलमुपस्पृश्याचम्य समाहितः ॥
अस्त्रप्रयोगे प्रयुक्तमनाः प्रतिधानयुक्तः संहारमस्त्रोपसंहारमजानन् प्राणकृच्छ्रे प्राणापद्युपस्थिते यातद्ब्रह्मशिरोऽस्त्रं संदधे प्रयुयोज ॥२०॥॥

भा०प्र० द्रौणिरश्वत्थामा स्वमिकीर्षितं भर्तुर्धृतराष्ट्रस्याप्रियमपि प्रियमिव पश्यन्मन्यमानः स्वपतां शयानानां कृष्णायाः द्रौपद्याः सुतानां शिरांसि अपाहरत्
६७ छित्त्वानीतवान् ॥ इदं कर्म तस्य धृतराष्ट्रस्य विप्रियमेव । यद्वा । तस्याश्वत्थाम्नः कर्म विप्रियमेव सर्वलोकस्यापीति शेषः ॥ अत एव जुगुप्सितं विगर्ह्यंते
अक्षकनापि विनिंदयंति ॥ १४ ॥ यद्येवं तदा माता द्रौपदी शिशूनां सुतानां घोरं निधनं मरणं निशम्य दृष्ट्वा परितप्यमाना वाष्पैराकुले अक्षिणी यस्यास्त
थाभूता बभूवेति ॥ तदा तां द्रौपदीं सांत्वयन्नुपछंदयन् किरीटमाली किरीटानां माला एव माला अप्यस्तीति किरीटमाली । अर्जुन । व्रीह्यादेराकृ

भर्तुः प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि । उपाहरद्विप्रियमेव तस्य तज्जुगुप्सितं कर्म विगर्हयंति
॥ १४ ॥ माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना । तदारुदद्वाष्पकलाकुलाक्षी तां सांत्वयन्नाह कि
रीटमाली ॥ १५ ॥ अर्जुन उवाच ॥ तदा शुचस्ते प्रमृजामि भद्रे यद्ब्रह्मबंधोः शिरआततायिनः । गांडीवमुक्तैर्विशिखैरु
पाहरे त्वाक्रम्य यत्स्नास्यसि दग्धपुत्रा ॥ १६ ॥

तिगणत्वाद्व्रीह्यादिभ्यश्चेति मत्वर्थीय इति । इदं वक्ष्यमाणमाह ॥ १५ ॥ तदेवाह । हे भद्रे । ब्रह्मबंधोर्ब्राह्मणाधमस्याततायिनः । अग्निदो गरदश्चैव शस्त्र
पाणिर्धनापहः । क्षेत्रदारापहर्त्ता च षडेते आततायिन इति । शस्त्रपाणेराततायित्वस्मरणादाततायिनेत्युक्तं । शस्त्रपाणिर्नाम शस्त्रधारणेन निर
पराक्षिप्राणिघातुकः । तस्य शिरो गांडीवमुक्तैर्विशिखैर्बाणैर्यदा । आहरेऽयंयद्यदा चाहं हृतं शिरः पादेनाक्रम्य दग्धपुत्रा त्वं स्नास्यसि तदा ते तव शु ६७

तदेवं कस्मिन्युगे प्रवृत्तेयमित्यादिप्रश्नानामुत्तरमुक्तम् । अथ तस्य पुत्रो महायोगी इत्यादिप्रश्नोत्तरं विवक्षुस्तावदभिमन्युसुतं सूत प्राहुर्भा-
गवतोत्तमं ॥ तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि न इत्यादिप्रश्नानामुत्तरं सोपोद्घातं वक्तुं प्रतिजानीते । परीक्षित इति । परीक्षितो राजर्षेर्जन्म कर्म
च विलापनं विलयं वैतेषां समाहारः तदुपोद्घातरूपं पांडुपुत्राणां संस्थानं स्थितिवृत्तान्तमिति यावत् ॥ तदेवं सर्वं कृष्णस्य भगवतः कथाया उ-
दयः प्रसङ्गो यस्मिंस्तद्वक्ष्ये । संस्थां च कृष्णकथोदयमिति च पाठान्तरम् ॥ तदा कृष्णकथोदयमिति संस्थाविशेषणं । संस्थाशब्दस्य यथोक्त
एवार्थः ॥ तत्र पांडुपुत्राणां संस्थानं परीक्षिज्जन्मकर्मादिकं वक्तुं पांडुपुत्राणां संस्थानमाह ॥ यदेत्यादिना यावद्दशाध्यायसमाप्तिः तत्र
×कर्माद्युपोद्घातरूपं परीक्षिज्जन्मकर्मादिकं तु ततः प्रधानप्रतिपाद्यं तदुभयानुप्रसक्ता कृष्णकथा सर्वोपलक्षणः कृष्णप्रबंधोपोद्घातरूप इति विवेकः ॥१२॥ ताव
परीक्षितो जन्म ×१

परीक्षितोऽथ राजर्षेर्जन्म कर्म विलापनं । संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयं ॥१२॥ यदा मृधे कौ-
रवसृंजयानां वीरेष्वथो वीरगतिं गतेषु । वृकोदराविद्धगदाभिमर्शभग्नोरुदंडे धृतराष्ट्रपुत्रे ॥१३॥

परीक्षितो जन्मरूपोपोद्घात एवांतर्भाव्योच्यते ॥ कर्मादिकं तु तत उपरितनग्रंथेनेति विशेषः ॥ यदेत्यस्य तदेति तृतीयेनान्वयः । मृधे युद्धे कौर-
वाणां सृंजयानां च । वीरगतिं वीराणां गतिं गतेषु प्राप्तेषु सत्सु धृतराष्ट्रपुत्रे दुर्योधने वृकोदरेण भीमेन आविद्धया प्रयुक्तया गदया अभिमर्-
शेनाघातेन भग्नावूरुदंडौ यस्य तथाभूते सति ॥१३॥

भा०स्क०
६६

नेवंसंहिताभगवन्मननविरोधिनीप्रस्तुततद्रूपगुणेभगवत्स्वरूपगुणविवरणरूपत्वादतोधीतवानित्युत्तरं वक्तुं तावद्भक्तेः स्वरूपगुणविषयक
तामाह सूतः। आत्मारामाइति। यद्यपिमुनय आत्मारामाः परमात्मैकनिष्ठाः अतएव निर्ग्रंथाः। लौकिकार्थप्रबंधधारणरहिताः। अग्निर्ग्रंथ्याइ
तिपाठे। अशिक्षणीया अपरप्रेष्या निरपेक्षा इत्यर्थः। तथापि ते उरुक्रमे भगवत्यहैतुकीमनन्यप्रयोजनांभक्तिंकुर्वंति। सविषयायाभक्तेः
स्वरूपमाह इत्थमिति॥ इत्थंभूता एवंविधा गुणा यस्य तथाविधो हरिरिति। एवंविधांभक्तिंकुर्वंतीत्यन्वयः। हरिरेवंविधगुणकः। तत्स्वरूपकइतीत्य
मनुध्यानात्मकत्वाद्भक्तेस्तत्रभजनीयस्वरूपरूपगुणविषयकज्ञानस्यापेक्षितत्वात्तद्विवरणरूपामिमांसंहितामधीतवानितिभावः॥१०॥
तदेवाह॥ हरेरिति॥ हरेर्गुणैर्वेदांतेभ्योऽवगतैरनुभूयमानैर्गुणैराक्षिप्ता आकृष्टा मतिर्यस्य सभगवान्बादरायणिः शुकः विष्णुजनप्रियः

सूतउवाच। आत्मारामाश्चमुनयोनिर्ग्रंथा अप्युरुक्रमे। कुर्वंत्यहैतुकींभक्तिमित्थंभूतगुणोहरिः॥१०॥ हरेर्गु
णैराक्षिप्तमतिर्भगवान्बादरायणिः॥ अध्यगान्महदाख्यानंनित्यंविष्णुजनप्रियः॥११॥

महदिदमाख्यानमध्यगादधीतवान्॥ हरेर्गुणाक्षिप्तमते विष्णुजनप्रियइतीदंविशेषणद्वयंहेतुगर्भं। विष्णोर्जनाभक्ताः प्रियायस्येतिव
हुव्रीहिः॥ अयंभावः। यद्यप्यनुभगवद्गुणावेदांतेभ्योऽवगतास्तथापिस्वाध्यायाद्योगमासीत् योगात्स्वाध्यायवान्भवेदित्युक्तरीत्याभगव
द्गुणप्रतिपादकप्रबंधसंशीलनस्यावश्यापेक्षितत्वात्कात्स्न्येनास्यप्रबंधस्यभगवद्गुणप्रतिपादकत्वात्सावतारतद्गुणसविभूतिकसम
क्तितद्गुणस्यैवभगवतोनुभाव्यत्वादवतारतद्गुणानांविशिष्यवेदांतेभ्योऽवगतानांवेदांतावगततद्गुणेभ्योऽप्यतिशायितानांआस्मादा
ख्यानादवगमादिदमध्यगादिति॥ अनेनप्रबंधस्याशास्त्रत्वंसूचितम्॥१२॥ ६६

नित्यं

तामेव विशिनष्टि । यस्यामिति । यस्यां सात्वतसंहितायां श्रूयमाणायां शोकाद्यपहर्तरि परमपुरुषे कृष्णे भक्तिरुत्पद्यते । तत्र मोहो नामानात्मन्या
त्मबुद्धिर्यो ऽस्वत्वमिति यामतिरित्युक्तविधः । शोको वा हृत्क्लेशः । दुःखमांतरः ॥ भयमागामिदुःखदर्शनजं प्रतिकूलज्ञानं । पूरुष इति दीर्घश्छां
दसः ॥ ७ ॥ स व्यासोऽनुक्रम्य विवक्षितार्थान् विशेषेणाविन्यस्य तदनुक्रमेणैवेमां संहितां कृत्वा सुतं शुकमध्यापयामास ॥ अस्यावसरदानाय शुकं
विशिनष्टि निवृत्तिनिरतं सांसारिकवैमुख्यद्वारा केवलचित्तैकाग्र्यावहः । शमदमादिभिर्निवृत्तिः ॥ तत्र निरतं मुनिं परब्रह्मैकाग्र्यात्मा मननशीलं

यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे ॥ भक्तिरुत्पद्यते पुंसां शोकमोहभयापहा ॥ ७ ॥ स संहितां भागवतीं कृ
त्वाऽनुक्रम्य चात्मजं ॥ शुकमध्यापयामास निवृत्तिनिरतं मुनिं ॥ ८ ॥ शौनक उवाच ॥ स वै निवृत्तिनिरतः सर्व
त्रोपेक्षको मुनिः ॥ कस्य वा महतीमेतामात्मारामः समभ्यसत् ॥ ९ ॥

८ । तत्र लब्धावसरः पृच्छति शौनकः । सेति । वा शब्द्यवधारणे ॥ निवृत्तिनिरतः । सुनिरत एव सर्वत्र श्रोतव्येषु ध्येतव्येषु चोपेक्षकः । अन्यादरारहितः
आत्मारामः । परमात्मैकपरः । एवंविधः कस्य वा हेतोः इति शेषः ॥ कस्माद्धेतोरीहतीं विपुलामेतां संहितामभ्यसदधीतवान् ॥ कथमेकाग्रचि
तो भगवन्मननपरस्तद्विरोधिनीमेतां बृहतीं संहितामभ्यसदिति प्रश्नाशयः ॥ ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इत्थमाशङ्क्याह सूतः । ब्रह्मनद्यामित्यादिभिः सप्तभिः । ब्रह्मनद्यां ब्रह्मर्षिभिः सेवितायां नद्यां सरस्वत्याख्यायां पश्चिमे तटे शम्याप्रास इति प्रसिद्धो व्या-
सस्याश्रमः । ऋषीणां सत्रवर्द्धनः सत्राणि वर्द्धन्ते यस्मिन्निति तथा ॥२॥ तस्मिन् बदरीणां षण्डेन खण्डैर्मण्डिते आश्रमे शम्याप्रासे व्यासोऽप उपस्पृ-
श्याचम्य बद्धपद्मासनो मनः प्रणिदध्यौ विषयान्तरेभ्यः प्रत्याहृत्यात्मस्थमकरोदित्यर्थः ॥३॥ भगवद्भक्तियोगेनामले मनसि सम्यक् प्रणिहि-
ते समाहिते पूर्वं तावत्पुरुषं परमपुरुषमपश्यत् । ततस्तदपाश्रयां पुरुषापाश्रयां तदाधेयां तच्छरीरभूतामिति यावत् । मायामपश्यत् ॥४॥ मायां

सूत उवाच ॥ ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे ॥ शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्द्धनः ॥२॥ तस्मिन्स्व आश्र-
मे व्यासो बदरीखण्डमण्डिते ॥ आसीनोऽप उपस्पृश्य प्रणिदध्यौ मनः स्वयं ॥३॥ भक्तियोगेन मनसि सम्यक् प्रणिहितेऽम-
ले ॥ अपश्यत्पुरुषं पूर्णं मायां च तदपाश्रयां ॥४॥ यया संमोहितो जीव आत्मानं त्रिगुणात्मकं ॥ परोऽपि मनुतेऽनर्थं त-
त्कृतं चाभिपद्यते ॥५॥ अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे ॥ लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिताम् ॥६॥

विशिनष्टि । ययेति । परोऽपि मायाख्यप्रकृतेर्विलक्षणोऽपि जीवो यया मायया मोहितः । त्रिगुणात्मकं । गुणत्रयपरिणामात्मकं शरीरमेवात्मानं
मनुते मन्यते ॥ तत्कृतं देहात्मभ्रमकृतमनर्थं तापत्रयस्वरूपं प्रतिपद्यते ॥५॥ किंच ॥ अनर्थोपशमं । तापत्रयरूपानर्थोपशमनात्मकं उपाय-
मजानतो लोकस्याधोक्षजे भक्तियोगमेवानर्थोपशमं विद्वान् सर्वज्ञानवान् व्यासोऽपश्यदित्यनुषङ्गः ॥ भगवद्भक्तियोगमेवानर्थोपशमो-
पायत्वेन निश्चितवानित्यर्थः ॥ ततस्सात्वतसंहितां श्रीभागवतरूपां संहितां ॥ संहिता संदर्भविशेषः । सात्वतशब्दस्तु पुरस्तादेव निरुक्तः ॥६॥ ६५

ब्रह्मस्यो नारदस्तु पसंहरति । सर्वमिति हे अनघ त्वयाहं यत्पृष्टस्तदेतत्सर्वमाख्यातं । आख्यातमेव संगृह्य दर्शयति मेममजन्मकर्मणोरह
स्यं तथा भवतस्तवात्मा मनः तुष्यते । येन तच्चैतत्सर्वमाख्यातमित्यन्वयः ॥३७॥ व्यासनारदसंवादमुपसंहरति सूतः । एवमिति । एवमित्थं संभा
ष्य भगवान्नारदो मुनिः वासवीसुतमुपरिचरवसुवीर्यजायाः सत्यवत्याः सुतं व्यासमामंत्र्य पृष्ट्वा वीणां रणयन्नूयाद्दृच्छिकः स्वेच्छानुवर्तीय ।
यौ ३८ देवर्षिं स्तौति । अहो इति धन्यत्वं स्वस्य परस्य च सुखोपादकत्वं ॥ तदेवाह ॥ यो देवर्षिः शार्ङ्गधन्वनो भगवतः । कीर्तिं गायंस्तंत्र्या वीणा

सर्वं तदिदमाख्यातं यत्पृष्टोहं त्वयानघ । जन्मकर्मरहस्यं मे भवतश्चात्मतोषणं ॥३७॥ सूत उवाच ॥ एवं संभाष्य भगवा
न्नारदो वासवीसुतं । आमंत्र्य वीणां रणयन्ययौ याहच्छिको मुनिः ॥३८॥ अहो देवर्षिर्धन्योयं यत्कीर्तिं शार्ङ्गधन्वनः
गायन्माद्यन्निदं तंत्र्या रमयत्यातुरं जगत् ॥३९॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे षष्ठोध्यायः ॥६॥ शौनक उवाच ॥
निर्गते नारदे सूत भगवान्बादरायणः ॥ श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः ॥१॥ ॥ ॥ ॥

या माद्यन्मदं प्राप्नुवन्स्वयं वीणास्वनं जहर्ष मग्नः सन्नित्यर्थः ॥ आतुरं तापत्रयातुरं जगदपि रमयति सुखयति । ३९ । इति प्रथमे षष्ठः ॥६॥ वास
वीसुतमामंत्र्य नारदो यया विभुरुक्तं तत उपरितनं व्यासवृत्तांतं पृच्छति शौनक । निर्गतेति ॥ हे सूत तदभिप्रेतं किं वा भागवता धर्मा न्यायेन निरू
पिता । इत्युक्ते स्थितमेव नारदस्याभिप्रेतं श्रुतवान्भगवान्मुनिर्बादरायणो नारदे निर्गते सति ततः किमकरोत् ॥१॥ ॥ ॥ ॥

भा० प्र० ततो महतो विष्णोरनुग्रहात् क्वचिदप्यविघाताऽप्रतिहता गतिर्यस्य अस्कंदितमखंडितं व्रतं ब्रह्मचर्यं यस्य सोऽहं त्रिलोकानंतर्बहिश्च पर्येमि परितः
६५ संचरामि ॥ ३२ ॥ देवेन भगवता ब्रह्मणा वा दत्तां स्वरा निषादर्षभगांधारषड्जमध्यमधैवतपंचमाख्याः सप्त एव ब्रह्म तेन विभूषितां । स्वरैः सप्तधा
पितेन ब्रह्मणा भगवता विभूषितामिमां पाणिस्थां वीणां मूर्छयित्वा वादयित्वा ॥ मूर्छा वीणादिवादनं । वादने मूर्छना केति वैजयंतीकोशात् । ह
रिकथां गायमानोऽहमेवं चरामि ॥ ३३ ॥ प्रियं भक्तानां प्रीत्यावहं श्रवः यशो यस्य । तीर्थौ पवित्रो गंगादितीर्थाश्रयो वा पादौ यस्य । तीर्थपादो यस्ये
तिवा । स भगवान् स्ववीर्याणि यशांसि प्रगायतो मम चेतस्याहूत इव शीघ्रं दर्शनं याति दृष्टो भवतीत्यर्थः । ३४ । तदेवमात्मवृत्तं यथावदनुवर्ण्योपसर्वे

अंतर्बहिश्च लोकांस्त्रीन्पर्येम्यस्कंदितव्रतः ॥ अनुग्रहान्महाविष्णोरविघातगतिः क्वचित् ॥ ३२ ॥ देवदत्तामिमां वीणां
स्वरब्रह्मविभूषितां ॥ मूर्छयित्वा हरिकथां गायमानश्चराम्यहं ॥ ३३ ॥ प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः । आहू
त इव मे शीघ्रं दर्शनं याति चेतसि । ३४ । एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः । भवसिंधुप्लवो दृष्टो हरिचर्यानुवर्णनं
३५ यमादिभिर्योगपथैः कामलोभहतो मुहुः ॥ मुकुंदसेवया यद्वत्तथात्माद्धा न शाम्यति ॥ ३६ ॥

श्रात्वं हरिचरित्राण्येवानुवर्णयेत्यभिप्रायेण तापत्रयातुरजनानां भगवद्गुणवर्णनानुश्रवणमंतरेण तापत्रयविघातकं नोपायांतरमस्तीत्याह
एतदिति द्वाभ्यां । अस्य तन्मात्रास्पर्शेच्छया मात्राः शब्दादिविषयास्तासां स्पर्शेच्छयानुभवतृष्णेच्छया आतुरं पीडितं चित्तं येषां जन्मनां भवसिं
धोः प्लवः पूरः । स हि यस्मात्कारणाद् दृष्टो नष्टो भवति । तदेवं देव किं हरिचर्याया अनुवर्णनमिति । ३५ । मुहुः कामलोभाभ्यां हत आत्मा मनः
यद्वद्यथा मुकुंदसेवया गुणानुश्रवणादिरूपयाऽद्धा स्फुटं शाम्यति कामादिरहितो तथा यद्यात्तथा यमादिभिर्योगमार्गैर्न शाम्यति ॥ ३६ ॥ ॥ ६७

हे ब्रह्मन् कृष्णे भगवत्येव मतिर्यस्य तत एवासक्तमनसो विशुद्धस्यात्मा मनो यस्य तत एव शब्दादिविषयेष्वसक्तस्य मम काले तद्देहारंभकं प्रारब्धं
भावसानकाले कालः मृत्युकालः प्रादुरभूदुपस्थितो भूत्। मृत्युकालस्य तत्क्षणिकत्वद्योतनाय दृष्टांतमाह। सौदामिनी सुदाम्नः पर्वतस्याद्भवा
सौदामिनी। चातुरर्थिकोऽण्प्रत्यय इति प्रकृतिभावेनांतत्वात् ङीप्। सौदामिनीत्यपि पाठः॥ २७॥ तदा तां प्रसिद्धां सर्वजीवलयाधारभूतामित्यर्थः। शु
द्धामप्राकृतां भागवतीमनिरुद्धाख्यां तनुं मयि प्रविशति मयि प्रयुज्यमाने संश्लिष्यमाणे लयं प्राप्तुमुद्यते सतीत्यर्थः॥ आरब्धकर्मनिर्वाणः। तद्देहावा-

एवं कृष्णमतेर्ब्रह्मन्नसक्तस्यामलात्मनः॥ कालः प्रादुरभूत्काले तडित्सौदामिनी यथा॥ २७॥ प्रयुज्यमाने मयि तां शु
द्धां भागवतीं तनुं॥ आरब्धकर्मनिर्वाणो न्यपतत्पांचभौतिकः॥ २८॥ कल्पांते इदमादाय शयानेंभस्युदन्वतः। शिशयि
षोरनुप्राणं विविशेंतरहं विभोः॥ २९॥ सहस्रयुगपर्यंते उत्थायेदं सिसृक्षतः। मरीचिमिश्रा ऋषयः प्राणेभ्योहं च ज
ज्ञिरे॥ ३०॥

वस्थितिनिमित्तस्य प्रारब्धकर्मणः निर्वाणमवसानं यस्य स पांचभौतिको देहो न्यपतत्॥ २८॥ एवं प्राक्कल्पीयशरीरपातावधिवृत्तांतः कथि
तः॥ अथ तदुपरितनवृत्तांतमाह। कल्पांत इत्यादिना। तदा कल्पांते इदं जगदादाय स्वस्मिन् प्रविलाप्य उदन्वतः प्रलयार्णवस्यांभसि शयानेऽनि
रुद्धाख्ये भगवति शिशयिषोः स्वप्नाभिपद्ये शिशयिषोर्विभोश्चतुर्मुखस्यांतः प्राणमनुविविशेऽनुप्रविष्टवानस्मि। सनर्थस्त्व विवक्षितः। २९
सहस्रयुगावसान उत्थाय नाभिकमलादिति शेषः। इदं ब्रह्मात्मकं जगत्सिसृक्षोश्चतुर्मुखस्य प्राणेभ्यः प्राणादिभ्यः मरीचिमिश्रा ऋषयो व
शिष्ठादयः॥ अहं नारदश्च जज्ञिरे उद्भूवुः॥ अहं च जज्ञे इति पुरुषविपरिणामेनान्वयः॥ ३०॥ ॥ ॥ ॥

भा० प्र० यतस्तेत्वादीर्घयाकल्पिकयैवसत्सेवयामयिदृढामतिःजाता ततस्त्वमिममवद्यंलोक्यतेतिलोकोदेहस्तंशूद्रदेहमित्यर्थः हित्वात्यक्त्वामज्ज
६३ नतांमत्पार्षदत्वंगंतागमिष्यसिकल्पांतरेतिशेषः ।२४। यदनुग्रहाद्धेतोः कर्हिचिदपिप्रजासर्गनिरोधेप्रलयकालेपितवमयिनिबद्धानिश्चितेयंम
तिः स्मृतिश्चनविपद्येतननश्येत ॥ कर्हिचिन्मयिनिबद्धामतिः प्रजासर्गनिरोधेमयिस्मृतिश्चनविपद्येतेतिवान्वयः ।२५। अलिंगंकर्मजदेहरहितं
नभोलिंगमाकाशशरीरकमीश्वरंसर्वनियंतृ ऐश्वरमितिपाठे ईश्वरशब्दवाच्यंतन्महत्सर्वव्यापकंमूर्तंस्वाधीनंसमादिमद्भूतं ॥ तस्यहतत्रपःतस्य

सत्सेवयाऽदीर्घयापिजातामयिदृढामतिः। हित्वावद्यमिमंलोकंगंतामज्जनतामसि ॥२४॥ मतिर्मयिनिबद्धेयंनवि
पद्येतकर्हिचित् ॥ प्रजासर्गनिरोधेपिस्मृतिश्चमदनुग्रहात् ॥२५॥ एतावदुक्त्वोपरराम तन्महद्भूतंनभोलिंगमलिंग
मीश्वरं। अहंचतस्मैमहतांमहीयसेशीर्ष्णावनामंविदधेनुकंपितः ॥२६॥ नामान्यनंतस्यहतत्रपःपठन्गुह्यानिभद्रा
णिकृतानिचस्मरन्। गांपर्यटंस्तुष्टमनाःगतस्पृहःकालंप्रतीक्षन्विमदोविमत्सरः ॥२७॥

महतोभूतस्यनिःश्वसितमितिश्रुतेः। एतावदुक्त्वाविररामतूष्णींमासततोमहतांतेजस्विनामपिमहीयसेतस्मैमहतेभूतायतेनानुकंपितोहमा
वनामंप्रणामंविदधेकृतवानस्मि ॥२६॥ ततोनंतस्यभगवतोनामान्यहंगतलज्जःपठन्भद्राणिलोकानांमंगलावहानिगुह्यानिवेदगुह्या
निजन्मादिकर्माणिचस्मरन्गांभूमिंपर्यटन् ॥ तुष्टमनोयस्यगतास्पृहाशब्दादिविषयायस्यविगतोभूतविषयकोयस्यविगतःमदोदेहपा १ स्कं
रवश्यरूपोयस्यसः ॥ अप्रयदइतिपाठेऽनिकेतः देहावसानकालंप्रतीक्षन्नासमितिक्रियापदमध्याहार्य्यंयावत्कल्पावसानंजीवितवानस्मी ६३

तदा सहायत्वात्तद्रूपं भूयः पुनः द्रष्टुमिच्छुरहं हृदि मनः प्रणिधाय स्थिरीकृत्य वीक्षमाणोऽपि तद्रूपं नापश्यम् अत एवातुर इव विषयातुर इवावितृप्तो
ऽभवमिति ॥२०॥ एवं द्रष्टुं पुनः पुनः । यतंतं यत्नं कुर्वंतं मामुद्दिश्य गिरामगोचरः । यद्वाचो ननिवर्तंते स्तुतोऽपीत्यादि वाग्विषयः । अपरिच्छेद्यत्वादिति भावः ।
अगोचरः सन्निति तात्पर्यं भगवानिति विशेष्यमध्याहर्तव्यं । गगनेगंभीरया वाचा शुचः शोकान् प्रशमयन्निवाह ॥२१॥ उक्तिमेवाह । हंतेति च
तुर्भिः । इह लोकेऽस्मिन् जन्मनि भवान् मां द्रष्टुं मार्हति । नार्हतीति माशब्दे यं नञ्पर्यायः । अतो माङि ति लुङि ति लुङ् भावः । दर्शनानर्हत्वे हेतुं व

दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि । वीक्षमाणोऽपि नापश्यमवितृप्त इवातुरः ॥२०॥ एवं यतंतं विजने मामाहागो
चरो गिरां ॥ गंभीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव ॥२१॥ सकृद्यद्दर्शितं रूपमेतत्कामाय तेऽनघ ॥ मत्कामः शनकैः
साधुः सर्वान्मुंचति हृच्छयान् ॥२३॥

+ हंतास्मिन् जन्मनि भवान्मा मां द्रष्टुमिहार्हति ॥ अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनां ॥२२

दत्वा त्मानं विशिनष्टि । अविपक्वोऽविनष्टः कषाय दर्शनप्रतिबंधकः पुण्यपापात्मकः कषायः कर्मोपाधिर्येषां तेषां कुयोगिनामहं दुर्दृशः दुः
खेनापि द्रष्टुमशक्यः ॥२२॥ तर्हि सकृत्कथं दृष्टोऽसीत्यत्राह । सकृदिति हे अनघ सकृद्रूपमदीयं दर्शितं इति यत्तत्तवमत्कामाय मद्विषयदिदृक्षायै
एव कामायैतेऽत्रेति पाठांतरं तत्रैतेषु मध्ये सकृद्दर्शितं रूपं एतत्कामाय द्रष्टुमिति शेषः । निवृत्तमेरणात्स्वार्थेणिजंता त्कर्महेतुमणिविणिचश्चेतिवैक
ल्पिकं परस्मैपदं । किंकाममात्रेणेत्यत आह मत्कामः मां द्रष्टुं कामयमानः साधुः साधुचरितः पुमान् शनैः सर्वान् हृच्छयान् हृज्जातान् रागादीन्

तत्राहं परिश्रांतानींद्रियाण्यात्मा देहश्च यस्य तथा पिपासया परीतः व्याप्तः बुभुक्षितः क्षुधितश्च नद्या ह्रदे स्नात्वोपस्पृष्टः । कर्त्तस्कि: । आचांतः
पीत्वा जलमिति शेषः गतः श्रमो यस्य तथाभूतः ॥१५॥ तस्मिन्निर्मनुष्येऽरण्ये विपुलस्याश्वत्थस्योपस्थे मूले आश्रितः उपविष्टः । आत्मस्थं जीवात्म
निस्थितं हृदयकमलस्थं वा । आत्मानं परमात्मानमात्मना मनसाऽचिंतयं ध्यातवानस्मि ॥१६॥ भावनिर्जितेनाभ्यासवशीकृतेन चेतसा ।
चरणांभोजं ध्यायतः चिंतयतः । औत्कंठ्यं ग्रातिमपूर्वकानुध्यानाद्धेतो रश्रूणामानंदजनेत्रजलानां कलाबिंदवो ययोस्तेऽक्षिणी यस्य त

परिश्रांतेंद्रियात्माहं तृट्परीतो बुभुक्षितः ॥ स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः ॥१५॥ तस्मिन्निर्मनुजेऽरण्ये पि
प्पलोपस्थ आश्रितः ॥ आत्मनात्मानमात्मस्थं यथाश्रुतमचिंतयम् ॥१६॥ ध्यायतश्चरणांभोजं भावनिर्जितचेत
सा । औत्कंठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः ॥१७॥ प्रेमातिभरनिर्भिन्नपुलकांगोऽतिनिर्वृतः ॥ आनंदसंप्लवे ।
लीनो नापश्यमुभयं मुने ॥१८॥ रूपं भगवतो यत्तन्मनःकांतं शुचापहं ॥ अपश्यन्सहसोत्तस्थौ वैक्लव्याद्दुर्मना इव ॥१९॥

स्य मे मम हृदि शनैः हरिरासीदाविरासीत् ॥१७॥ तदा प्रेमाधिक्येन हेतुना निर्भिन्ना अभिव्यक्ताः पुलका रोमांचा यस्मिंस्तदंगं शरीरं यस्य अ
तीव निर्वृतः सुखितः । आनंदसंप्लवे ॥ आनंदप्रवाहे लीनो मग्नः । हे मुने तदुभयं देहमात्मानं च नापश्यं न दृष्टवानस्मि ॥१८॥ यदाविर्भूतं मनःकां
तं मनसोऽतीवप्रियमत एव शुचापहं शुचायाः शोकस्यापहं तं भगवतो रूपं तत्पुनरपश्यन् वैक्लव्याद्दर्शनकृताद्धार्ष्ट्याद् दुःखितमनाः स
हसा आशु उत्तस्थौ उत्थितवानस्मि वैकल्यादिति पाठांतरम् ॥१९॥ ६२

तत्र प्रस्थाने स्फीतान् समृद्धान् जनपदान् देशान् ॥ द्वितीयांतानाम मतिर्याते सुपरिष्टादन्वयः । पुराणि पट्टनानि ग्रामाणि हट्टरहितान् । व्रजान्
गोपालनिवासान् । आकरान् रत्नाद्युत्पत्तिस्थानानि । खेटान् कृषीवलग्रामान् खर्वटान् निषादादिग्रामान् । वाटी पुष्पवाटिकाः वनान्यरण्य
रूपाणि ॥ उपवनानि कृत्रिमवनानि च ११ ॥ तथा चित्रैर्नानाविधैर्धातुभिर्गैरिकादिभिर्विचित्रान् नदीन्पर्वतान् । इभैर्गजैर्भग्नाः विछिन्ना भुजाः
शाखा येषां तान् द्रुमान् ॥ शिवानि विशुद्धानि जलानि येषु तान् जलाशयान्सरांसि ॥ तथा सुरैः सेविताः क्रीडिताः नलिनीयस्मात् कारान् । कथंभू

स्फीतान्जनपदांस्तत्र पुरग्रामव्रजाकरान् ॥ खेटखर्वटवाटीश्च वनान्युपवनानि च ॥ ११ ॥ चित्रधातुविचित्राद्रीनिभभ
ग्नभुजद्रुमान् । जलाशयान्शिवजलान्नलिनी सुरसेविताः । चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः ॥ १२ ॥ नलवे
णुशरस्तंबकुशकीचकगह्वरं । एकमेवातियातोहमद्राक्षं विपिनं महत् ॥ १३ ॥ घोरं प्रतिभयाकारं व्यालोलूकशि
वाजिरम् ॥ १४ ॥

ताः । चित्राणि नानाविधानि स्वनानि येषां तैः पत्ररथैः । पत्राणि तद्रूहात्मकाः पत्ररथाः पक्षिणः तद्गमनसाधनानि येषां तै
रित्यर्थः । पक्षिभिः संकुला इति शेषः । भ्रमद्भिर्भ्रमरैः श्रीः शोभा यासां ताः ॥ १२ ॥ अतियातो निःक्रांतः एकोऽसहाय एवाहं नलादिभिर्गह्वरं मह
द्विपिनं वनमद्राक्षं दृष्टवानस्मि । तत्र नलो ग्रंथिपर्णी वेणवः । स्थूलवंशाः । सशराः । कीचकाः सूक्ष्माः सच्छिद्राः शरस्तंबाः । अश्ववालाः कुशाः
प्रसिद्धाः ॥ विपिनमेव विशिनष्टि ॥ घोरं उग्रं दुःप्रवेशमत एव वालानां दुष्टगजानां मजगराख्य सर्पाणां वा उलूकानां घूकानां शिवानां शृगा
लविशेषाणां चाजिरं क्रीडास्थानं ॥ अतीव प्रतिभयाकारं प्रतिमुखगतं भयापादकम् ॥ १४ ॥

तदेवाह । एकात्मजेत्यादिकल्यांतेस्यतः श्राक्ननेनग्रंथेन ॥ एकोऽहं मात्मजः पुत्रो यस्याः सा मम जननी माता योषेति स्वभावोक्तिः जननीत्व
नैनैव स्त्रीत्वोक्तेः । अत एव मूढा किंकरी अनेन पराधीनत्वमुक्तं ॥ अनन्यगतो गतिः योषणोपायः । अनन्यपोषके मय्यात्मजे स्नेहानुबंधनं स्ने
हपारवश्यं चक्रे ॥ ६ ॥ सा मम जननी अस्वतंत्रा किंकरीत्वात् तत एव मम योगक्षेमं इच्छत्यपि न कल्पन समर्था बभूव । योगश्च क्षेमश्च तयोः
समाहारः । योगोऽलब्धलाभः । लब्धपरिरक्षणं रक्षितविवर्द्धनं । तस्य पात्रे प्रतिपादनं च क्षेमः ॥ ७ ॥ अहं च तदा पंचहायनः पंचवर्षवयस्को

एकात्मजा मे जननी योषिन्मूढा च किंकरी ॥ मय्यात्मजेनन्यगतौ चक्रे स्नेहानुबंधनं ॥ ६ ॥ सास्वतंत्रा न कल्पासीद्योगक्षे
मं मम मेछती ॥ ईशस्य हि वशो लोको योषा दारुमयी यथा ॥ ७ ॥ अहं च तद्ब्रह्मकुले ऊषिवांस्तदपेक्षया ॥ दिग्देशका
लाव्युत्पन्नो बालकः पंचहायनः ॥ ८ ॥ एकदा निर्गतां गेहात् दुहंतीं निशि गां पथि ॥ सर्पोऽदशत्पदा स्पृष्टः कृपणां का
लचोदितः ॥ ९ ॥ तदा तदहमीशस्य भक्तानां शममीप्सतः ॥ अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्तरां ॥ १० ॥

बालकः ॥ अत एव दिग्देशकालाव्युत्पन्नः ॥ दिग्देशकालस्वभावानभिज्ञः । तदपेक्षया मात्रपेक्षया तद्देहावसानप्रतीक्षणेन हेतुत्वेने
त्यर्थः ॥ तस्मिन्ब्रह्मकुले ब्राह्मणगृहे उषिवानस्मि ॥ ८ ॥ एवं स्थिते कदाचिन्निशि गेहान्निर्गतां गां दुहंतीं दोग्धुं प्रवृत्तां कृपणां मम मातरं
पथि मार्गे पदा पादेन स्पृष्टः । कालचोदितः कालप्रेरकेण दैवेन चोदितः सर्पः अदशत् ददंश ततसाम्रियतेत्यर्थतो द्रष्टव्यं ॥ ९ ॥ तदाहं
तन्मरणं भक्तानां शं सुखमभीप्सतः कामयमानस्येशस्य भगवतोनुग्रहं रूपं मन्यमान उत्तरां प्रतिप्रातिष्ठं प्रस्थितवानस्मि ॥ १० ॥ ॥ ६१

कृष्णवचोनुगमिष्यंतः। कृपयादीनवत्सलाः इत्युक्तं। तत उपरितनं देवर्षिवृत्तांतं जिज्ञासुः पृच्छति। व्यास इत्याह सूतः एवमिति। इत्थं वर्णितं दे
वर्षेर्जन्म कर्म च पौर्वदेहिकं निशम्य सत्यवत्याः सुतो भगवान् श्रीव्यासः। तं देवर्षिं। हे ब्रह्मन् शौनक भूयः पुनः पप्रच्छ १ प्रश्नमेवाह।
भिक्षुभिरिति। तेन त्वविज्ञानादेष्टृभिर्विज्ञानोपदेष्टृभिः संन्यासिभिर्विप्रवसिते चातुर्मास्यांते अन्यत्र गते सति ततः पश्चाद्भवानाद्ये वयसि
वर्तमानः किं कृतवान् २ हे स्वायंभुव ते त्वया परं वयः। भिक्षुविप्रवासप्रभृति वयः कया वृत्त्या वर्तितं नीतं कथं वा प्राप्ते काले इदं कलेव

सूत उवाच। एवं निशम्य भगवान् देवर्षेर्जन्म कर्म च॥ भूयः पप्रच्छ तं ब्रह्मन् व्यासः सत्यवतीसुतः। १ व्यास उवाच। भिक्षुभि
र्विप्रवसिते विज्ञानादेष्टृभिस्तव। वर्तमानो वयस्याद्ये ततः किमकरोद्भवान्॥ २ स्वायंभुव कया वृत्त्या वर्तितं ते परं वयः
कथं चेदमुदस्राक्षीः काले प्राप्ते कलेवरं। ३ प्राक्कल्पविषयामेतां स्मृतिं ते मुनिसत्तम। न ह्येष व्यवधात्काल एष सर्व
निराकृतिः॥ ४॥ नारद उवाच॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम। वर्तमानो वयस्याद्ये तत एतदकारषं। ५॥

रमुदस्राक्षीः उत्सृष्टवानसि प्राक्कालीयमपि कलेवरं वृत्तांतकथनमुखेन प्रस्तुतत्वादिदमिति सन्निहिततया परामृश्यते। ३ हे मुनिसत्तम
प्राक्कल्पविषयां पूर्वकल्पीयामेतां मिथ्योपदेशप्राप्तां भगवत्स्मृतिं एष कालो न व्यवधात् न तिरोहितवान्। अनुभाव इत्यर्थः। अत्रागमशास्त्र
स्यानित्यत्वाद्विना व्यवधानं किमिति प्रश्नो विवक्षितः। व्यवधायकत्वसूचनाय कालं विशिनष्टि। एष कालः सर्वनिराकृतिः सर्वविनाश
कः॥ ४ इत्थमाश्चर्यं यथावत्स्ववृत्तांतं वक्तुमारेभे नारद इत्याह। भिक्षुभिरिति। तत्र तस्य तत्पूर्ववत् वेदार्थः। एतद्वक्ष्यमाणमकारषमकार्षं कृतवा

१ ॥ ६६

इतीत्यमसूर्तिकं कर्मविग्रहप्राकृतमूर्तिरहितं मूंत्रमंत्रमूर्तिमेवामित्या द्युक्तमंत्रप्रकाश्यामूर्तिरप्राकृताऽकर्ममूलात्स्वेच्छोपात्ताचयस्यतं मंत्रश
रीरकं वाभिध्याय नत्वो मादिनामान्यनुगृणंश्च यज्ञाराध्यं परमपुरुषं यो यजते स्वधर्मैराराधयति स एव पुमान्सम्यग्दर्शनः। ज्ञानी त्वात्मैव मे मत
मित्युक्तेरितेधिकारीत्यर्थः॥३८॥ एवं यजतामात्मभक्तियोगो निष्पाद्यते इत्यभिप्रायेणात्मानं दृष्टांतयति। इममिति॥ हे ब्रह्मन्नमदनुष्ठितमिमं
स्वस्य भगवतो निगममनुशासनमवेत्य दृष्ट्वा केशवः। स्वस्मिन्भावं भक्तिं तत्साध्यं दर्शनात्मकं ज्ञानमैश्वर्यं च देवर्षित्वोचितमदाद्ददावित्य

इति मूर्त्यभिधानेन मंत्रमूर्तिममूर्तिकं। यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान्॥३८॥ इमं स्वनिगमं ब्रह्मन्नवेत्य
मदनुष्ठितम्॥ अदान्मे ज्ञानमैश्वर्यं स्वस्मिन्भावं च केशवः॥३९॥ त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन
विदां बुभुत्सितं॥ प्रख्याहि दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाणमुशंति नान्यथा॥४०॥ इति श्रीभागवते महा
पुराणे प्रथमस्कंधे पंचमोध्यायः॥ ॥५॥

र्थः॥३९॥ वक्तव्यमुपसंहरति॥ त्वमिति॥ हे अदभ्रश्रुतानल्पकीर्ते त्वं विभोर्भगवतो विश्रुतं यशः प्रख्याहि प्रवर्णीहि। येन विश्रुतप्रख्यानेन।
विदां बोद्धॄणां बुभुत्सितं बोद्धुमिष्टं समाप्यते। आपूर्यते न निरवशिष्यतेति यावत्। यद्भूतस्य जिज्ञासितव्यं। नावशिष्यते। तथाविधमाख्यानं
कुर्वित्यर्थः॥ किंच। दुःखैस्त्रिभिर्मुहुरर्दितः पीडितः। आत्मा मनो येषां तेषां यत्संक्लेशनिर्वाणं क्लेशा आध्यात्मिकादयः तेनिर्वाप्यंतेऽप
नोद्यंते येन। अन्यथोपायांतरेण तु ना निर्वाप्यंते तथाविधं यथो शंति। अतिवाञ्छीयते। तादृशं प्रख्याहि इत्यन्वयः॥४०॥ इति प्रथमे पंचमः॥५॥ ६०

न केवलं भगवत्परितोषणात्मकं कर्मैव भक्तियोगानुग्राहकमपि तु भगवद्गुणश्रवणादिकमपीत्याह। कुर्वाणा इति भगवच्छिक्षया। यत्करोषि
यदश्नासि यज्जुहोषि। मयि सर्वाणि कर्माणि संन्यस्येत्याद्युक्तभगवदीक्षया असकृत्कर्माणि वर्णाश्रमानुरूपाणि कुर्वाणाः कृष्णस्य भगवतः
गुणनामानि च कल्याणगुणप्रकाशकानि नामानि वा गायंति अनुस्मरंति च नामानि गृणंति गुणाननुस्मरंति चेत्यर्थः। भक्तियोगं निष्पादयंतीति का
मा इति कर्तृपदमध्याहर्तव्यं। यथा भगवच्छिक्षया सकृत्कृतानि कर्माणि भक्तियोगानुग्राहकानि तथा गुणनामनुस्मरणादिकमपीति भावः।
३६ गुणनामस्मरणादिपूर्वकमनभिसंहितफलकर्मानुष्ठानकारमेवदर्शयंस्तथा कुर्वाणा एवोत्तमोधिकारीत्याह॥ ॐ मिति द्वाभ्यां। ॐ ब्रह्मणे
ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः इति भगवदुक्तेः॥ वासुदेवादिव्यूहचतुष्टयरूपेणावस्थिताय भगवते नमो नम इति नामोच्चारणप्र

कुर्वाणा यत्र कर्माणि भगवच्छिक्षयासकृत्॥ गृणंति गुणनामानि कृष्णस्यानुस्मरंति च॥ ३६॥ ॐ नमो
भगवते तुभ्यं वासुदेवाय धीमहि। प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च॥ ३७॥

कारप्रदर्शनं। धीमहि। ॐ मादिशब्दप्रकाशितकल्याणगुणविशिष्टं परमात्मानं ध्यायेम स्मरेमेति गुणस्मरणप्रकारप्रदर्शनं। तत्राव तेर्धातोर्निष्प
न्नित्यमेनमर्वरक्षकत्वमकारोकारमकाराणां संहितावशान्निष्पन्नेनोमित्यनेन तु सर्वकारणत्व सर्वशेषित्वादिकमुभयविधेनोमित्यनेन। प्रत्यभि
ज्ञापितब्रह्मशब्देन स्वरूपतो गुणतश्च कल्याणगुणानंत्यत्वमहतामपि बृहत्वाबृहत्त्वं च॥ वासुदेवपदेन सर्वांतरात्मत्वं च प्रद्युम्नशब्देन न तत्र
सूर्यो भाति [illegible] स्तुतो विधनिरतिशयदीप्तियुक्तत्वमनिरुद्धपदेन सर्वव्यापकत्वं संकर्षणपदेनांतीद्रियार्थविषयकज्ञानापादकत्वं च फलितं
उपलक्षणमिदं॥ एतश्च मूर्तयो गुणाश्चानुसंधेया इत्यर्थः॥ संकर्षणशब्दनिरुक्तिः पंचमस्कंधे वक्ष्यते॥ ३७॥ ॥ ॥ ॥

त्रैवर्गिककर्मणस्तापत्रयहेतुत्वं वक्तुं तावद्दृष्टांतमाह ॥ आमयेति । यद्यपुदाहृतश्रुतिस्मृतिवचोभिः पापस्यैव तापत्रयमूलत्वं सूचितं तथापि त्रैवर्गिककर्मणोंततो निषिद्धबहुलत्वेन पापवदनिष्टसाधनत्वात्तदपि तापत्रयनिमित्तमेव । हे सुव्रत यथा येनापथ्यादिना भूतानां य आमयो रोगो जायते तदामयकारणं द्रव्यं चिकित्सितमपि प्रतीकारत्वेन सेवितमप्यामयं न पुनाति न शोधयति । चिकित्सितोपि व्याधिरपथ्यादिना पुनर्वर्द्धते इत्यर्थः । चिकित्सितमित्यामयविशेषणं वा आमयकारणेन चिकित्सितं प्रकृतिकृतमप्यामयं व्याधितदामयकारणं द्रव्यं न पुनातीत्यर्थः ।३३॥ दृष्टांतेनाभिमतमर्थं दार्ष्टांतिकेनुगमयति ॥ एवमिति । एवमपथ्यान्नादेरामयकारणत्वान्नृणां सर्वे क्रियायोगाः अनभिसंहितफलकर्मव्यतिरिक्ताः । सर्वे त्रैवर्णिकाः क्रियायोगाः संसृतेर्हेतवः ॥ अत एव यदस्मिन्नात्मन्यकल्पिताः । असमर्पिताः । आत्म

आमयो यश्च भूतानां जायते येन सुव्रत । तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितम् ॥३३। एवं नृणां क्रियायोगाः
सर्वे संसृतिहेतवः ॥ त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ।३४। यदत्र क्रियते कर्म भगवत्परितोषणं । ज्ञानं यत्तद-
धीनं हि भक्तियोगसमन्वितम् ॥३५॥

विनाशाय कल्पंते आत्मनः । अंततः स्थावरत्वरूपविनाशाय कल्पंते संपन्ना भवंति ।३४॥

तर्हि परस्मिन्कल्पिताः क्रियायोगाः किं वा साक्षान्निःश्रेयसहेतवः । न भक्तियोगनिष्पादनद्वारेत्याह । यदिति । भगवान्परितुष्यते भक्तियोगोत्पत्तिप्रतिबंधनिरसनोपयुक्तपरितोषयुक्तो भवति येन तदाराधनरूपेण कर्मणा तद्भगवत्परितोषणं यत्कर्मात्र लोके क्रियते अनुक्रियाते इति पाठे । अनुस्यूततया शरीरपातं क्रियते । तदधीनं तत्कर्माधीनं तल्लिप्स्या ह्यमेव भक्तियोगसमन्वितं । ज्ञानमत्र ध्यानसाध्यं दर्शनात्मकं विवक्षितं ॥ भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतपेत्युक्तत्वात् ॥३५॥ ॥ ॥ ॥

ज्ञानं विशिनष्टि । येन ज्ञानेनाहं भगवतो वेधसः । विश्वविधातुर्वासुदेवस्य मायानुभावं त्रिगुणात्मिकप्रवृत्तिमहिमानमविदं ज्ञातवानस्मि । अनेना-
विरोधिज्ञानमुक्तं । येन च ज्ञानेन तस्य वासुदेवस्य परं स्थानं गच्छंति ॥ अनेन प्राप्यप्रापकविषयज्ञानमुक्तम् ॥ अर्थपंचकज्ञानमुपदिष्टमिति फलितम्
॥ ३१ ॥ तदेवं स्वपूर्वजन्मवृत्तांतदृष्टांतेन भगवद्गुणश्रवणादेस्तत्साधनत्वमुक्तम् । भक्तियोगस्य शास्त्रद्वारारंभे तु पूर्वमेव प्रतिपादितं । धर्मकृतेऽनु-
शासनः । स्वभावरक्तस्येत्यनेन त्रैवर्गिककर्ममूलकतापत्रयाभिहतजनोद्देशेन पुनस्त्रैवर्गिककर्मानुशासनं तापत्रयनिमित्तधर्मार्थत्वेन नि- क
दितमित्युक्तम् ॥ तेनेश्वरेण चार्पितं कर्मेत्यनेन चानभिसंहितफलस्य भगवद्भक्तियोगानुग्राहकस्य वर्णाश्रमधर्मस्य तापत्रयनिवृत्तिहेतुत्वमतएवो-

येनैवाहं भगवतो वासुदेवस्य वेधसः ॥ मायानुभावमविदं येन गच्छंति तत्पदं ॥ ३१ ॥ एतत्संसूचितं
ब्रह्मंस्तापत्रयचिकित्सितं ॥ यदीश्वरे भगवति कर्म ब्रह्मणि भावितम् ॥ ३२ ॥ ॥ ॥

पादेयत्वं च संसूचितं । अथैकेन श्लोकेनाभिसंहितफलस्य कर्मणो भक्तियोगनिष्पादनद्वारा तापत्रयनिवृत्तिहेतुत्वं वदंस्त्रैवर्गिकस्य कर्मणः पुनः
पुनस्तापत्रयहेतुत्वमेव सदृष्टांतमुपपादयति । एतदिति त्रिभिः हे ब्रह्मंस्तापत्रयचिकित्सितं तापत्रयप्रतीकारकमित्यर्थः । तदेतदेव संसूचितं श्रुति
स्मृत्यादिभिरिति शेषः । किं यत्कर्माणि ईश्वरे भगवति समर्पितं । कर्मेति ईश्वरार्पितं कर्मैव तापत्रयचिकित्सितमिति सूचितमित्यर्थः धर्मेण पापमप
नुदति ॥ अविद्यया मृत्युं तीर्त्वेत्यादिका श्रुतिः ॥ स्मृतिश्च यज्ञदानतपः कर्म साधनानि मनीषिणां इत्यादिका ॥ तापत्रयं हि पापमूलकं । अनभिसंहि-
तफलेन धर्मेण पापे निवृत्ते भक्तियोगनिष्पत्तिद्वारा तापत्रयं निवर्तते तत्श्रुतिस्मृतिभिः सूच्यते ॥ ३२ ॥ ॥ ॥

त्स्यादि दुःखसमूहं वहन्ति प्राप्नुवन्ति ॥ अहंकारमूला संसृतिस्ततो नरकमीर्ज्जनहेतुस्तस्मान्मोक्षविरोधिनी दुःखावहा चेत्यर्थः ॥ ८ ॥ अ ने ह्यकार्पण्यादुपस्थ
र्त्तकरणा अन्हि व्यापृतान्यर्थकरणानि शब्दादिविषयेंद्रियाणि येषां ते ॥ आर्त्तानि पाठे व्यापृतान्यार्त्तानि दुःखितानि करणानि ब्रह्मवर्चसं विद्याशा
निशि रात्रौ निःशयानाः नितरां शयाना निवृत्तबाह्येंद्रियव्यापाराः विषयसुखलवोपि नास्तीत्यभिप्रायः नानामनोरथेषु मनोर ऽपगच्छतीत्यर्थः
नेनेत्यर्थः ॥ क्षणे क्षणे भग्ना निद्रा येषां ते ॥ दैवाहतार्थरचनाः दैवेनाहता वितथीकृतार्थः रचना प्रयोजनविषयव्यापारो ये त्वध्यानिवृत्ताभ्यां
भक्तिरहितास्ते दैवं विधा भवन्तः संसरन्ति इत्यर्थः ॥ १० ॥ एवं देहात्ममानिनां भगवद्भक्तिविधुराणां संसृतमनिवृत्तमभिधाने न कामस्यां तं गच्छतीति दिशो जित्वा भुक्त्वापि
व संशयान ... ती

अह्न्यापृतार्त्तकरणा निशि निःशयाना नानामनोरथधिया क्षणभग्ननिद्राः ॥ दैवाहतार्थरचना ऋषयोपि दे जो विद्या
विमुखा इह संसरन्ति ॥ १० ॥ त्वं भावयोगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसां ॥ यद्यद्धियात याति लो[illegible]वि
भावयंति तत्तद्वपुः प्रणयसे सदनुग्रहाय ॥ ११ ॥ नातिप्रसीदति तथोपचितोपचारैराराधितः सुरगणैर्हृदि बद्धकामैः ॥
यत्सर्वभूतदययासदलभ्ययैको नानाजनेष्ववहितः सुहृदंतरात्मा ॥ १२ ॥ वसुहृदयत्वनिष्कामेषु उपासकेषु भगवत्सौलभ्य

माह ॥ त्वमिति द्वाभ्याम् ॥ हे नाथ पुंसां स्वभक्तानां भावयोगो भक्तियोगः तेन परिभाविते शोधिते हृत्सरोजे हृदयकमले श्रुतेक्षितपथः शास्त्रदर्शि
तमार्गः एवंभूतस्त्वं आस्से तिष्ठसि ॥ हे उरुगाय ते त्वत्पुंसः ॥ धिया तेन वपुंषि त्वयुध्यायंति तत्तद्वपुः सतामनुग्रहाय प्राणयसे प्रकटयति ॥ या
दृशविग्रहविशिष्टं ॥ वांविशेषयतो भावयंति तादृशविग्रहविशेषो भवसीत्यर्थः ॥ अनेन सौलभ्यमुक्तं ॥ ११ ॥ निष्कामानामेव भगवान्सुल
भ इत्याह नेति सुरगणैः रनुकूलजनैः विष्णुभक्तिपरो देवो विपरीतस्तथासुर इति वचनात् ॥ कथंभूतैः हृदि बद्धकामैः प्रसक्तकामैः सर

कामादिभिर्भगवद्भक्तिरासुरप्रकृतीनां न संभवतीत्यभिप्रायः एवंभूतैः सुरगणैः कर्तृभिरुपचितोपचारैः पुष्कलोपचारैराराधितो भगवान्नातिप्रसीद
ति नात्यंतं प्रसन्नो भवति निरतिशयमोक्षसुखप्रदो न भवतीत्यर्थः कुत इत्यत आह यद्यस्मात् सल्लभ्यया सद्भिर्हृदि आत्मतयानुसंदधद्भिर्लभ्य
मशक्यया सर्वभूतदयया सर्वेषु भूतेषु आत्मतयावस्थिते सति तत्र यत्किंचिदपि भूते कृतो द्रोहस्तस्यैव कृतो भवतीति बुद्ध्या सर्वेषु भूतेषु क्रि
यमाणया स्वार्थनिरपेक्षपरदुःखनिराचिकीर्षापरं पर्यायसामवान्प्रसीदतीति सर्वभूतानामीश्वरशरीरत्वानुसंधानपराणामेवैष सुलभ इ
ति भावः शरीरात्मभावमेवोपपादयति नानाजनेषु समस्तजनेष्ववहितः स्थितः ॥ कथमवस्थितः अंतरात्मा जीवांतः प्रवेशेन तज्जनर
दोषैरस्पृष्टः प्रशासितृत्वेन धारकत्वेन च स्थितः अत एव सुहृत्कामनापूर्वकान् यज्ञादिकर्मणोऽपि सर्वभूतदयात्वत्प्रसादहेतुश्चितोऽर्थः ॥१२

पुंसाममतो विविधकर्मभिरध्वराद्यैर्दानेन चोग्रतपसा व्रतचर्यया च ॥ आराधनं भगवतस्तव सत्क्रिय ॥ ऽर्पि
तः कर्हिचिद्ध्रियते न यत्र ॥१३॥

यतोऽभिसंहितफलैरुपचारैर्नातिप्रसन्नः अत एव सत्कर्मणामीश्वराराधनैकस्य कर्मणः पुनः
कार्यमित्याह पुंसामिति ॥ अतोऽभिसंहितफलानां कर्मणामीश्वराप्रसत्तिहेतुत्वात्सर्वात्मकब्रह्मोपासनस्यैव तत्प्रसादैकत्वं सूचितं श्रुति
पुंसां भगवन्मामाराधयितॄणां संबंधिभिरध्वराद्यैर्यज्ञादिभिः नानाविधश्रौतस्मार्तकर्मभिर्दानादयः प्रदर्शनार्थं तपः र्थः धर्मेण पापमप
व्रतचर्यया व्रतानुष्ठानं यैर्भिर्भगवतस्तव यदाराधनं तत्सत्क्रियार्थः सत्क्रियाणां सत्कर्मणामर्थः प्रयोजनं तदाराधनैकप्रयो लकं ॥ अनभिसंहि
णि कर्माण्यनुष्ठेयानीत्यर्थः एवंविधकर्मानुष्ठानस्यापि स्वयि सुफलसाधनत्वमाह ॥ धर्मः यज्ञादिरूपः यत्र यस्मिंस्त्वय्यर्पितः ॥ ॥
योजनः न तु स्वर्गादिफलहेतुरिति बुद्ध्या त्वय्यर्पितः कर्हिचित्कदाचित्कथंचिदपि न ह्रियते न विनश्यति भगवदुपासनः

हेराजन् संतुष्टः केनानुप्राप्तान्नादिनापि न वर्त्तेत संतुष्टस्तु वारिणापि यात्रां विधाय सुखयतीत्यर्थः असंतुष्टस्तु जन औपस्थ्यजैह्व्यकार्पण्याद् उपस्थ
जिह्वासुखार्थं दैन्यान्निमित्ताद् गृहपालायते गृहपालः श्वा तद्वदाचरति १८ किंचासंतुष्टस्य विप्रस्यात्मनस्तेज आदयः स्रवंति तेजो ब्रह्मवर्चसं विद्या शा
स्त्रजन्यं ज्ञानं तपः अनशनादिरूपं यशः प्रथा तथेंद्रियलौल्येनेंद्रियार्थासक्तया ज्ञानं विवेकादिजन्यमवकीर्यते च विक्षिप्यतेऽपगच्छतीत्यर्थः
१९ किंच कामक्रोधादयः सावधिकाः लोभस्त्वसंतोषात्मको निरवधिक इत्याह कामस्येति जनः कामक्रोधलोभवान् क्षुत्तृड्भ्यां निवृत्ताभ्यां इ
तिशेषः निमित्तभूताभ्यां कामस्यांतं याति अन्नोदकादिना क्षुत्पिपासादौ निवृत्ते सति अन्नादिव्यतिरिक्तकामांतराभावात्कामस्यांतं गच्छतीति
भावः तथा क्रोधस्याप्यंतं तत्फलोदयात् तस्य क्रोधस्य यत्फलं परपीडादिरूपं तस्योदयान्निष्पत्तेः हेतोर्याति लोभस्यांतं तु भुवो दिशो जित्वा भुक्त्वापि
नैव याति २० अतएव हे राजन् बहवः पंडिताः शास्त्रजन्यज्ञानवंतः बहुज्ञाः बहुविधलौकिकवैदिकन्यायाभिज्ञाः अतएव संशयान् छिंदंती

संतुष्टः केन वा राजन्न वर्त्तेतापि वारिणा औपस्थ्यजैह्व्यकार्पण्याद् गृहपालायते जनः १८ असंतुष्टस्य विप्रस्य तेजो विद्यात
पो यशः स्रवंतींद्रियलौल्येन ज्ञानं चैवावकीर्यते १९ कामस्यांतं च क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात् जनो न याति लोभ
स्य जित्वा भुक्त्वा दिशो भुवः २० पंडिता बहवो राजन् बहुज्ञाः संशयच्छिदः सदसस्पतयोऽप्येके असंतोषात्पतंत्यधः २१ अ
संकल्पाज्जयेत्कामं क्रोधं कामविवर्जनात् अर्थानर्थेक्षया लोभं भयं तत्त्वविमर्शनात् २२ आन्वीक्षिक्या शोकमोहौ दंभं म
हदुपासया योगांतरायान्मौनेन हिंसां कामाद्यनीहया २३

तितथाऽसत एव सदसः सभायाः पतयोऽप्येके जनाः असंतोषाद्धेतोरधो नरके पतंति २१ एवमसंतोषस्यानर्थावहत्वमुक्त्वाथ कामादीनां जयोपाया
नाह असंकल्पादिति चतुर्भिः असंकल्पात् भोगार्हतानुद्धिवर्जनात् कामं शब्दादिविषयस्पृहां जयेत् क्रोधं तु कामविवर्जनाज्जयेदित्यनुषंगः क्रोधः
कामानुभवविरोधिविषयकोऽमर्षः लोभं त्वसंतोषात्मकमर्थानर्थेक्षयार्थे धनेऽनर्थेक्षयाऽनर्थहेतुत्वदर्शनेन जयेत् भयं तु तत्त्वावमर्शनात्
चिदचिदीश्वरयाथात्म्यरूपतत्त्वानुसंधानात् २२ आन्वीक्षिक्या जातस्य विनाशो ध्रुव इत्यादिपर्यालोचनया शोकमोहौ जयेदित्यनुषंगः
दंभं तु महतामदांभिकानामुपासनया सेवया योगांतरायान् योगस्यांतरायभूतान् लोकवार्त्तादींस्तु मौनेन भूतहिंसां कामाद्यनीहया स्वदेहादि
ष्वनिस्पृहया जयेत्

पुंभिरिच्छयाऽपृथक् चतुर्भिराश्रमैः पृथक् कल्पितः आश्रमो वधूतादिः स्वधर्मानुष्ठानानंतरमपि धर्मभेदस्त्वार्थमपि च धर्मान्ननुष्ठेयः अनुपयोगादि
त्याह स्वभावेति स्वभावेन ब्राह्मणादिस्वभावानुगुणेनाभिहित इत्यादिरूपः स एवास्योपशांतये कल्पते ऽतो न परधर्मस्योपयोग इत्यर्थः १४ एवं
भगवदुपासनांगभूता वर्णाश्रमधर्मा उक्ताः अथ प्रधानभूतभगवदुपासनात्मकाष्टांगयुक्तभक्तियोगानुष्ठानप्रकारं वक्ष्यंस्तव तद्विरोधिनां
कामक्रोधलोभभयशोकमोहदंभतापत्रयनिद्रादीनां जयोपायानाह धर्मेत्यादिना पूर्वमिष्टं तथा सत इत्संतेन तत्रादावद् संतोषस्य लोभात्मक
स्यानर्थावहत्वं तन्निमित्ताया धनलिप्साया त्याज्यत्वं च वक्तुं देवादुपनतेनैव द्रव्येणास्व धर्मदेहधारणं च कुर्यान्न तु तदर्थं धनं कामयेते त्याह धर्मा
र्थमिति अधनो निर्द्धनः पुमान् स धर्मार्थमपि यात्रार्थं देहधारणार्थं न पि वा धनं वितेनेहेत न कामयेत यात्रार्थमपि नेहेतेत्यत्र पंचयति अनीहेति
सार्द्धः षड्भिः महाहेरिवानीहमानस्य यात्रार्थं धनार्थमपि चेष्टामकुर्वतः देवोपनतेन प्राणान्धारयमाणस्येत्यर्थः अनीहाऽकामनाएव वृत्तिर्दा

यस्त्विच्छया कृतः पुंभिराभासो ह्याश्रमान्पृथक् स्वभावविहितो धर्मः कस्य नेष्टः प्रशांतये १४ धर्मार्थमपि नेहेत यात्रार्थं वा
धनो धनं अनीहानीहमानस्य महाहेरिव वृत्तिदा १५ संतुष्टस्य निरीहस्य स्वात्मारामस्य यत्सुखं कुतस्तत्कामलोभेन धा
वतोऽर्थेहया दिशः १६ सदा संतुष्टमनसः सर्वाः सुखमया दिशः शर्कराकंटकादिभ्यो यथोपानत्पदः शिवम् १७

जीवनावहा देवादुपनतेन जीवतोऽकामयमानस्याकामनैव नितरां सुखजननद्वारा वृत्तिदेति भावः १५ तदेवाह संतुष्टस्येति निरीहस्य संतु
ष्टस्य देवाल्लब्धेन संतुष्टस्य स्वात्मारामस्य स्वस्मात्मा तरात्मा परमपुरुषस्तस्मिन्नरममाणस्य स्वशरीरक ब्रह्मानंदानुभवपरस्य यत्सुखं तत्काम
लोभेन कामस्तद इति कामाः शब्दादयो विषयास्तेषु लोभेन संगेन तन्निमित्ते नार्थेहया धनेच्छया कामलोभनिमित्तक धनेच्छया सर्वा दिशः प्रतिधा
वतोऽभ्रमणस्य पुंसः कुतो हेतोर्भवति निरीहया यत्सुखं न तदीहया नास्तीत्यर्थः १६ एवं देवोपनत यात्रयाऽर्थेच्छया ह्यसात्यत्वमुक्तं अथासंतोष
स्य दुःखहेतुत्वं वक्तुं तावत्संतोषस्य सुखहेतुत्वमाह सदेति सदा संतुष्टं देवादुपनतेनैव संतुष्टं मनो यस्य न स्य पुंसः सर्वा दिशः सुखमय्यः यत्र
क्वापि गतस्य तस्य सुखमेवेत्यर्थः यथा उपानहो पादत्राणे पादयोर्यस्य शर्करादिभ्य सुखं एवं तद्वत् १७ ॥ ॥श्री॥ ॥ ॥

७५ तस्मात्सर्वोक्तभूतसुहृत्त्वरूपोत्कृष्टधर्मवित्सुमान् दैवादुपपन्नेन मुन्यन्नेनापि न तु मांसादिना हरहः नित्यनैमित्तिकाः क्रियाः संतुष्टः कुर्यात यद्यप्यत्र मुन्य
न्नैः स्यात् परा प्रीतिस्तथा न पशुहिंसये त्यनेन द्रव्ययज्ञैर्यक्ष्यमाणमित्यनेन च मांसश्राद्धान्नीषोमीयादिकर्मणां हिंसागर्भत्वेन पापमिश्रत्वं प्रतीयते तच्चा
शुद्धमिति चेन्न शब्दादिति शारीरकाधिकरणन्यायविरुद्धं तत्र ह्यग्नीषोमीयादिकर्मणां पशुहिंसादिरूपपापमिश्रत्वेनाशुद्धियुक्तत्वं परिचोद्य नैतद्युक्तं
कुतः शब्दादग्नीषोमीयादेः संज्ञपनस्य स्वर्गलोकप्राप्तिहेतुतया हिंसात्वाभाववशाद्दान्य शोर्हि संज्ञपननिमित्तां स्वर्गलोकप्राप्तिं वदंतं शब्दमामनंति हिर
ण्यशरीर ऊर्ध्वं स्वर्गं लोकमेतीत्यादिकमतिशयिताभ्युदयसाधनभूतो व्यापारोऽल्पदुःखदोऽपि न हिंसा प्रत्युत रक्षणमेव तथा च मंत्रवर्णः नवाउवेतन्म्रि
यसे न रिष्यसि देवां गीदेषि पथिभिः सुगेभिः यत्र यंति सुकृतो नापि दुष्कृतस्तत्र त्वा देवः सविता दधात्विति चिकित्सकं च तादात्विकल्पदुःखकारिणमपि
रक्षकमेव वदंति पूजयंति चेत जाइति हिंसात्वाभावः सिद्ध्यतीति तथाप्यत्र हिंसागर्भत्वमात्रेण पश्वादिहिंसायाश्च सर्वभूतसुहृदां ज्ञानिवामननुरू

तस्माद्दैवोपपन्नेन मुन्यन्नेनापि धर्मवित् संतुष्टोहरहः कुर्यान्नित्यनैमित्तिकीः क्रियाः ११ विधर्मः परधर्मश्च आभास
उपमा छलः अधर्मशाखाः पंचेमा धर्मज्ञोऽधर्मवत्त्यजेत् १२ धर्मबाधो विधर्मः स्यात्परधर्मोन्यचोदितः उपधर्मस्तु पा
षंडो दंभो वा धर्मभिच्छलः १३

पत्वे च तात्पर्येनानुयागी यहिंसायाः पापत्वेऽप्यत एव केवलं भूतानि बिभ्यतीत्येतावदेवोक्तं न तु हिंसायाः पाप
त्वमपीत्यस्यो न शारीरकन्यायविरोधः ११ तदेवं प्रासंगिकान्साधारणांश्च वर्णाश्रमधर्मान् निधायाथ तेषां धर्माभासेभ्यो विविक्तत्वज्ञापनाय तत्ता
न् संग्रहश्च दर्शयन् तेषां त्याज्यत्वमाह विधर्म इति विधर्मादयः पंचेमे धर्माभासाः अधर्मस्य वृक्षरूपस्य शाखा शाखाभूताः ततस्तान्धर्मयाथ्या।
त्म्यवित् अधर्मवत्त्यजेत् १२ विधर्मादीन्स्वयं व्याचष्टे धर्मबाध इति धर्मबुद्ध्या यस्मिन्क्रियमाणे स्वधर्मबाधः स्यात्स विधर्मः इत्यर्थः अन्यस्य
क्षत्रियादेश्चोदितो विहितो धर्मः स ब्राह्मणादेः परधर्मः उपधर्म इति पाषंडः वेदविरुद्धागमोक्तः दंभो वा परवंचनार्थो वा उपधर्मः छलं व्याचष्टे
शब्दभिच्छल इति शब्दस्य प्रमापकस्य भिदन्यथा व्याख्यानं यस्मिन् यथा द्वादशावरान् भोजयेदित्युक्ते द्वादशसंख्याकेभ्योऽवरानेकादश द
शवेत्यादि शब्दश्छदिति पाठे धर्मशब्दमात्रं विभर्त्तीति तथा गां दद्यादित्युक्ते मरिष्यंतं गां दीनं इति १३ आभासं व्याचष्टे॥ ॥श्री॥ ॥ ७५

दर्शतिद्वे देशे पूर्वोक्ते काले च पर्वण्यादिरूपे मन्वादिरूपे च काले च प्राप्ते कर्तव्यत्वेन प्राप्ते श्राद्धे पात्रे सत्पात्रे विधिवच्छ्रद्धया न्यस्तं मुन्यन्नमारण्यव्रीह्यादि
जमन्नं हरिदैवतं विष्णुदैवत्यं तस्मै निवेदितं तदुद्देशेन च दत्तं अन्नं कामधुक्कामदमक्षयफलमुक्तिसाधनं चेत्यर्थः ५ सर्वाश्रमसाधारणमन्नं काम्यद्धर्मा
न्तरं वक्ष्यतीति देवादिभ्य आत्मने स्वजनाय बंधुजनाय चान्नं विभजेद्विभज्य दद्यात् देवादिकं सर्वं प्राणिजातं पुरुषात्मकं भगवदात्मकं पश्येत् ६ आमिषं मां
सं श्राद्धे पित्राद्युद्देशेन न दद्यात् इदं क्षत्रियाभिप्रायकं तथा धर्मयाथात्म्यवित्स्वयमप्यामिषं नाश्नीयात् यथा मुन्यन्नैः परोत्कृष्टा पित्रादीनां प्रीतिः स्यान्न
तथा पशुहिंसया न स्यात् ७ किं च सद्धर्ममिच्छतां नृणामेतादृश एव पर उत्कृष्टो धर्मः कोसौ यो भूतेषु मनोवाक्कायजस्य दंडस्य न्यासस्त्यागः करणत्रयेण भू
तद्रोहाभाव एव नृणां परो धर्म इत्यर्थः एतादृशोन्यः परो धर्मो नास्तीति भावः न दद्यादामिषमित्यनेन पशुमृगादिहिंसागर्भमांसादिद्रव्यकश्राद्धादेरपि

देशे काले च संप्राप्ते मुन्यन्नं हरिदैवतं श्रद्धया विधिवत्पात्रे न्यस्तं कामधुगक्षयं ५ देवर्षिपितृभूतेभ्य आत्मने स्वजनाय च अ
न्नं संविभजन्पश्येत्सर्वं तत्पुरुषात्मकं ६ न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्ववित् मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया ७
नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छतां न्यासो दंडस्य भूतेषु मनोवाक्कायजस्य यः ८ एके कर्ममयान्यज्ञान् ज्ञानिनो यज्ञवित्तमाः
आत्मसंयमनेनीहा जुह्वति ज्ञानदीपिते ९ द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति एष माकरुणो हन्यादतज्ज्ञो ह्यसुतृप्खलः

मुन्यन्नेनापि कृतं श्राद्धादिकं निरंतरं विज्ञाय दीयतामिति कृदित्युक्तं नैतादृश इत्यनेन भूतहितमेवोत्कृष्टधर्म इत्युक्तं ८ यत एवमतः एव केचिदानिष्टाहिंसा
गर्भं द्रव्ययज्ञान् जहति ज्ञानयज्ञनिष्ठा भवंतीत्याह एके इति यज्ञवित्तमा यज्ञयाथात्म्यविदः अतीहा निष्कामाः केचिज्ज्ञानिनः पूर्वोक्तोत्कृष्टधर्मज्ञान
वंतः कर्ममयान्यज्ञान्पशुपुरोडाशादिद्रव्यकान् ज्ञाना ज्ञानदीपिते आत्मसंयमने जुह्वति ज्ञानेन परमात्मोपासनात्मकेन दीपिते प्रज्वलिते आत्मनो मन
सः संयमो नियमनं तल्लक्षणो योग्निस्तस्मिन्नित्यर्थः तत्र जुह्वति तस्मिन्नेव विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्मम् उरो वेदिर्लोमानि बर्हिरित्यादिश्रुतेः
विधोक्तविधया त्रिंशामयान्यज्ञान् हित्वा ज्ञानमयान्यज्ञाननुतिष्ठंतीत्यर्थः ९ एवं जुह्वतामयं भाव इत्याह द्रव्ययज्ञा इति द्रव्ययज्ञैः पशुपुरोडाशा
दिद्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि पश्वादीनि एष यक्ष्यमाणो निर्घृणोऽज्ञः असुतृप् अस्माकमसुभिः तृप्यतीति तादृशः मां ध्रुवं भूतं हन्यादिति बिभ्यती
त्याशयेन द्रव्ययज्ञान्हित्वा ज्ञानयज्ञाननुतिष्ठंतीत्यर्थः १० ॥

७४ णतदेवकं मुनिकन्यायेन हृदयति नन्वस्येति हे राजन्ननुविलोकीं पादरजसा पुनंतः पवित्री कुर्वतः जगदंतरात्मनः श्रीकृष्णस्यापि ब्राह्मणा महद्दैवतं
किं उतान्येषामस्मदादीनां ब्राह्मणा दैवतमित्यर्थः ४२ इतिसप्तमे चतुर्दशः १४ तपसाविद्ययेत्यादिना ब्राह्मणो यपितय आदिगुणतारतम्येन पात्रत्वं तारत
म्येनव्यवस्थितमित्युक्तं चितत्त्वतदेव विवृण्वन्नुपात्रायैव श्राद्धादिषु न्नादिकं दद्यादितिवदन्नन्यानपि श्राद्धीयनियमानाह देवर्षिः कर्मनिष्ठाइत्यादिना हे नृ
प केचित् द्विजाः त्रैवर्णिकाः कर्मनिष्ठाः स्ववर्णाश्रमोचितकर्मनिष्ठाः केचित्तपोनिष्ठाः केचित्स्वाध्याये प्रवचने वाध्यापने च परिनिष्ठिताः
केचित् ज्ञानयोगयोः उभयोः परिनिष्ठिता इतिशेषः ज्ञानमात्मयाथात्म्यज्ञानपूर्वकं भगवदुपासनात्मकं योगोनभिसंहितफलकर्मयोगः १ तत्र ज्ञान
निष्ठाय ज्ञानकर्मानुगृहीतभगवदुपासनात्मकज्ञानयोगनिष्ठाय पितृनुद्दिश्य देयानि कव्यानि श्राद्धान्नादीनि आनंत्यमपरिमितं फलं मोक्षरूपं फल
नन्वस्य ब्राह्मणा राजन्कृष्णस्य जगदात्मनः पुनंतः पादरजसा त्रिलोकीं दैवतं महत् ४२ इतिश्रीमद्भागवते महापुराणे स
प्तमस्कंधे चतुर्दशोध्यायः ॥१४॥ नारद उवाच ॥ कर्मनिष्ठा द्विजाः केचित्तपोनिष्ठा नृपापरे स्वाध्यायेन्ये प्रवचने येकेचिज्ज्ञा
नयोगयोः १ ज्ञाननिष्ठाय देयानि कव्यान्यानंत्यमिच्छता दैवे च तदभावे स्यादितरेभ्यो यथार्हतः २ द्वौ दैवे पितृकार्ये त्रीन्
एकैकमुभयत्र वा भोजयेत्सुसमृद्धोपि श्राद्धे कुर्यान्न विस्तरं ३ देशकालोचिता श्रद्धा द्रव्यपात्रार्हणानि च सम्यग्भवंति
नैतानि विस्तरात्स्वजनार्पणात् ४
मिच्छता पुंसा देयानि तथा दैवे च कर्मणि हव्यान्यपि ज्ञाननिष्ठायैव देयानि तदभावे ज्ञाननिष्ठस्याभावे इतरेभ्यः कर्मनिष्ठादिभ्योपि यथायोग्यं ज्ञानादिना
तारतम्येन देयं स्यात् २ दैवे विश्वेदेवस्थाने द्वौ ब्राह्मणौ पितृकार्ये पितृप्रयोजने पित्रर्थमिति यावत् त्रीन् ब्राह्मणान् उभयत्र द्वयोरपि स्थानयोरेकैकं ब्रा
ह्मणं भोजयेत्सुसमृद्धोपि धनाढ्योप्येवं ब्राह्मणान्भोजयेत् न तु श्राद्धे विस्तरं कुर्यात् ३ श्राद्धविस्तरदोषमाह देशेति देशकालपात्राणि यथोक्ता
न्येव उचिता श्रद्धा विश्वासः कर्तव्यविषया त्वरा वा अर्हणं पूजासाधनं तानि समीचीनान्यपि स्वजनार्पणान्मर्पणा द्विद्वौ निमंत्रितश्चेत्सुतादयः ३
द्वि स्तरान्न सम्यग्भवंति विगुणानि भवन्तु इत्यर्थः ननु कुतो विस्तरः प्राप्तः येन निषिध्यत इति शंकां वारयितुं स्वजनार्पणादित्युक्तं स्वजनानामर्पणाद्दोहि
त्रो निमंत्रितश्चेत्सुतादयः कथं वर्ज्या इत्याद्येव प्राप्ताद्विस्तरादित्यर्थः ४ श्राद्धे विद्वन्मुख्यमपि ब्राह्मणं भोजयेदित्याह॥ ॥श्री॥ ॥ ७४

इतोऽपि पुरुषशब्दवाच्यः स्वसमर्हत्वेनान्येषां तदाधायकत्वेत्याह तेष्विति हे राजन् तिर्यगादिष्वस्तेषु पुरुषेषु तारतम्येन स्वकीयज्ञानशक्त्यादिगुणाविर्भावतारतम्येन वर्त्त
ते भगवान् ततोऽसौ पुरुषः पुरुषश्रेष्ठिकं पुरुषेषु शेत इति पुरुषः यत एवं अतो तस्य तद्दृष्ट्यैवार्हणमर्हणीयेषु सर्वेषु पुरुषेषु विधेयमिति भावः यतो देवमनुष्यादिष्वंतर्यामि
तया जीवशरीरक तया च भगवान्वर्त्तते यतश्च सर्वे पुरुषा देवादयो भगवच्छरीरभूताः तेन तारतम्यं आम्नाय्यत अस्मादात्मा परमात्मा पुरुषः परमपुरुषो यावान्
यावद्गुणाविर्भाववान् अध्यायत्रयत्रेयतेत्रतीयतेन तत्पात्रं यत्र यत्राधिकं भगवतो ज्ञानशक्त्यादिगुणाविर्भावस्तत्तदुत्तमं पात्रं न्यूनाविर्भाववत्वं उत्तममिति भा
वः ३८ तदेवं भगवत एवोत्तमपात्रत्वमितरेषां प्रपितदात्मकत्वेनैवार्हणीयत्वं तदपि तदाविर्भावानुसारेणाव्यवस्थितमिति चोक्तं ननु भगवतस्तदात्मका
नां पुंसामानेवार्हणीयत्वे सत्कृतिकारादिभिराराधनीयत्वेन विहिता हरिप्रतिकृतिः पूजिता नफलदा स्यादिति चेद्भूतद्रोहिणां व्यर्थैवेत्याह दृष्ट्वेति

तेष्वेव भगवान्राजंस्तारतम्येन वर्त्तते तस्मात्पात्रं हि पुरुषो यावानात्मा यथेयते ३८ दृष्ट्वा तेषां मिथो नृणामवज्ञानात्म
तां नृप त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ३९ ततोऽर्चायां हरिं केचित्संश्रद्धाय सपर्यया उपासत उपास्तापि ना
र्थदा पुरुषद्विषां ४० पुरुषेष्वपि राजेंद्र सत्पात्रं ब्राह्मणं विदुः तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुं ४१ ॥ ॥

मिथोऽवज्ञानं तिरस्कारः तन्निमित्तात्मा बुद्धिर्येषां तेषां भावं दृष्ट्वा हे नृप हरेः क्रियायै पूजार्थमर्चा प्रतिमा कविभिः त्रेतादिषु युगेषु कृता पूज्यत्वेन विहिता त्रेतादि
ष्वित्यनेन प्रायशः कृते सर्वात्मकब्रह्मोपासनमेव विहितमिति सूचितं ३९ ततोऽर्चायां पूजार्थं प्रतिमायां केचिद्धरिं संश्रद्धाय श्रद्धापूर्वकमुपासते एवमु
पास्ताराधिताप्यर्चा पुरुषद्विषां भगवदात्मकान् पुरुषान् द्विषंतीति तथा तेषां नार्थदा न पुरुषार्थदा भवति पुरुषान् वहु मन्यमानानामेवार्चाराधनं फ
लवदित्यर्थः ४० यदुक्तं तस्मात्पात्रं हि पुरुष इत्यादि तद्विवृणोति पुरुषेष्विति हे राजेंद्र पुरुषेष्वपि ब्राह्मणं सत्पात्रं विदुः सुपात्रतया ध्यात्मविदः सुपा
त्रत्वे हेतुं वदन् विशिनष्टि इदं ब्राह्मणात्मकं सुपात्रं तपसा नशनेन विद्यया आत्मयाथात्म्यज्ञानपूर्वकभगवदुपासनरूपेया तुष्ट्या दैवाल्लब्धसंतोषेण वे
दं स्वधर्मशमदमादीनामप्युपलक्षणं एभिर्गुणैर्हरेस्तनुं विभर्त्ति च शब्दः पादपूर्त्यर्थः एवकारार्थो वा हरेरेव तनुं धत्त इत्यर्थः ४१ ॥ ॥

७३ नारायणाश्रमो बदरिकाश्रमः नंदालकनंदातटं सीतारामयो राश्रमश्चित्रकूटादिः एतत्प्रभृतयः तथा हे राजन् महेंद्रमलयादयः सर्वे कुलगिरयश्च ३३
तथा हरेरर्चा स्थिरा पूज्या प्रतिमा तया आश्रिता अधिष्ठिताः एते सर्वे पुण्यतमा देशाः विंबं भगवतो यत्र तिष्ठति शालग्रामशिलार्चनदेशानुक्तः अत्र तु वेंकटाद्रिस्था
द्वीन्युक्तं ते द्वृत्तपोनरुक्तं श्रेयस्कामः पुमान् अभीक्ष्णशः पुनः पुनरेतान् देशान्नितरां सेवेत ३४ पुंसां यत्फलसाधनत्वेयो धर्म उदितः विहितः स एषु देशेषु
कृतः सहस्रगुणमधिकस्य फलस्य उदयो यस्मात्तादृशो भवेत् अथ पात्रमाह पात्रं त्वित्यादिना हे उर्वीश पात्रवित्तमैः सत्पात्रयाथात्म्यविद्भिः कविभिर्ह
रिरेक एव पात्रं निरुक्तं सत्पात्रं इति निर्णीतं इत्यर्थः पात्रपूज्यं समर्हणीयं वस्तु हरिं विशिनष्टि एतच्चराचरात्मकं जगद्यन्मयं यद्रूपं प्रचुरमतेन तत्समर्हणेन
सर्वे समर्हिता भवंतीति सूचितं ३५ हरेरेव पात्रत्वं युधिष्ठिरराजसूये धुना त्वयैव दृष्टमित्याह देवर्षीति हे राजन् देवर्षिष्वर्हत्सु तपोयोगादिसिद्धेषु ब्र
ह्मजादिषु सनकादिषु विद्यमानेषु तव दीये राजसूये यद्यस्मात् अच्युत एवाग्रपूजायां पात्रतया मतः ज्ञातः ३६ हरेः समर्हणेन सर्वेषां समर्हणं कृतं स्या

नारायणाश्रमो नंदा सीतारामाश्रमादयः सर्वे कुलाचला राजन् महेंद्रमलयादयः ३३ एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये एता
न्देशान्निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः ३४ धर्मो ह्यत्रेहितः पुंसां सहस्राधिफलोदयः पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः हरि
रेवैक उर्वीश यन्मयं वै चराचरं ३५ देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु राजन्यदग्रपूजायां मतः पात्रतयाच्युतः ३६ जीवराशिभि
राकीर्ण आंडकोशांघ्रिपो महान् तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणं ३७ पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः शेते जीवे
न रूपेण पुरेषु पुरुषो ह्यसौ ३८

यन्मयमित्याह जीवेति जीवराशिभिराकीर्णो व्याप्तः ब्रह्मांडकोश एव यो महानंघ्रिपो वृक्षस्तस्य मूलत्वात्कारणत्वादच्युतस्येज्या आराधनं सर्वेषां जीवानां तर्पणं
प्रीतिकरं यथांघ्रिपस्य मूलेर्पितं जलं तच्छाखोपशाखानां तृप्तिकरं तथा ब्रह्मांडकोशमूलभूते अच्युते कृतमर्हणं मंडांतरगतेषु सर्वेषु कृतप्रायमेवेत्य
र्थः अतः सत्पात्रमयात्र मितिभावः इतरत्रापि तद्दृष्ट्या अर्हणं कार्यमिति च ३७ तदेव पुरुषनामनिरुक्त्या द्रढयति पुराणीति मनुष्यतिर्यगृषिदेव
तारूपाणि पुराणि शरीराणि कामनेन भगवता सृष्टानि सृष्ट्वा च परेषु यतो भगवान् जीवेन रूपेण जीवात्मना शरीरेषु शयस्तात्मा शरीरमिति श्रुतेः पुरेषु शे
ते अतोसौ पुरुषः पुरुषशब्दः पुरुषकलप्रवृत्तिनिमित्ताश्रयः पुरेषु शेते इति पुरुषः शकारस्य षकारः शकारस्योकारश्च अत्र पृषोदरादित्वात् इति उ अत्र जीवे
न रूपेणात्मनेन केवलं सर्वकारणत्वादेव तदर्हणेन तत्कार्यपर्यंतं पर्यवसन्नमपि तु तत्तदंतरात्मतया तत्तद्रूपेण अवस्थितत्वाच्चेत्युक्तं भवति ३८ ॥:॥

नकेवलं श्राद्धस्यैवैते कालाः किंतु धर्ममात्रस्येत्याह तइति द्वाभ्यां ऐतेत त्र्ययनादयः नृणां श्रेयः सश्रेयः साधनधर्मानुष्ठानस्य योग्याः श्रेयो वर्द्धयंतीति
तथाता ह्शाः कालाः तस्मात् सर्वात्मना करणत्रयेणैतेषु कालेषु श्रेयः श्रेयसाधनं वर्तमानांस्नानादिकमनुतिष्ठेत्तदेवायुषो अमोघं अमोघत्वं साफल्य
मित्यर्थः २५ एषु कालेषु हुतं यजुयादिकं यच्च पित्रा द्युद्देशेन दत्तं दानं च तदनश्वरमक्षयफलसाधनं २६ किंच हेनृप जायायामात्मनां संस्कारकाले
तत्र जाया वासंस्कारः पुंसवनादिरपत्यस्य संस्कारो जातकर्मादिः आत्मनः स्वस्य संस्कारो यज्ञदीक्षादिः एतेषां कालेषु यदा प्रेतस्य संस्थादहनादिकर्म मृता
हश्च तदाऽस्मिन्नभ्युदयार्थे कर्मणि कृतं स्नानादिकमनश्वरं इति पूर्वेणान्वयः २७ अथ कालकथनानंतरं धर्मादिश्रेयस्त्रावहंतीति तथाता न् देशा
न्यवक्ष्यामि तानेवाह सइति यत्र देशे सत्पात्रं लभ्यते २८ यत्र यस्मिन्न सर्वमेतच्चराचरमाधेयतया नियाम्यतया वास्ति तस्य भगवतो विंबं यत्र च देशे

त एते श्रेयसः कालान् नृणां श्रेयो विवर्द्धनाः कुर्यात्सर्वात्मनैतेषु श्रेयोऽमोघं तदायुषः २५ एषु स्नानं जपो होमो व्रतं देवद्विजार्चनं पितृ
देवनृभूतेभ्यो यद्दत्तं तद्ध्यनश्वरं २६ संस्कारकालो जायाया अपत्यस्यात्मनस्तथा प्रेतसंस्थामृताहश्च कर्मण्यभ्युदयेनृप॥२७ अ
थदेशान्प्रवक्ष्यामि धर्मादिश्रेयआवहान् सवैपुण्यतमो देशः सत्पात्रं यत्र लभ्यते २८ विंबं भगवतो यत्र सर्वमेतच्चराचरं यत्र ह
ब्राह्मणकुलंतपोविद्यादयान्वितं २९ यत्र यत्र हरेरर्चासदेशः श्रेयसांपदं यत्र गंगादयो नद्यः पुराणेषु च विश्रुताः ३० सरांसि पुष्करा
दीनि क्षेत्राण्यर्हाश्रितान्युत कुरुक्षेत्रं गयशिरः प्रयागः पुलहाश्रमः ३१ नैमिषं फाल्गुनं सेतुः प्रभासोथ कुशस्थली वाराणसी मधुपु
री पंपाविंदुसरस्तथा ३२ वर्तते यत्र च देशे तप आदिभिर्युक्तं ब्राह्मणकुलं वर्तते २९ यत्र यत्र देशे हरेर्भगवतोर्चा पूजा वर्तते स सर्वोपि देशः पुण्यतमः
श्रेयसां पदं श्रेयः साधनधर्मानुष्ठानयोग्यं स्थानं किंच यत्र येषु देशेषु पुराणेषु प्रसिद्धाः गंगादयो नद्यः सरंति ३० तथा पुष्करप्रभृतीनि सरांसि च यत्र
संतीति पूर्वेणान्वयः उत किंच यानि चार्हश्रितानि महात्मभिरधिष्ठितानि क्षेत्राणि संति तान्येव दर्शयति कुरुक्षेत्रमिति यद्वा कुरुक्षेत्रादिव्यतिरिक्त
क्षेत्राणि प्रायेणोत्तमहाश्रितानीति गयस्यासुरस्य शिरः तत्पतनस्थानं गयेत्यर्थः प्रयागो गंगायमुनयोः संगमस्थानं पुलहाश्रमः शालग्रामक्षेत्रं ३१
फल्गुनी नदी गयायां एव तत्स्थानं फाल्गुनं सेतुरामसेतुः प्रभासः प्रत्यक्सरस्वतीसंगमस्थानं कुशस्थली द्वारावती पंपा पंपानरं विंदुसरः कर्द

स्मृ०कौ० ३९

९२ किंच यदि यदात्मनः स्वस्याधिकारः अर्थी समर्थो विद्वांश्चेत्युक्तोधिकारः स्यात्तदा सर्वा यज्ञसंपदः स्युरेव यथाधिकारं सर्वे यज्ञाः कर्तव्या एवेत
र्थः विनात्मीयद्रव्यं श्रौतकल्पसूत्रादिरूपसद्ग्रंथोक्तेन विधिना अग्निहोत्रादिकर्मणा परमपुरुषं यजेत १७ अग्निमुखाराधनाद्विप्रमुखाराधनम
पीव भगवतस्तोषकृदित्याह नहीति हे राजन् विप्रमुखे हुतैरन्नादिभिर्यथायं सर्वयज्ञभुग्भगवानिज्यते राध्यते तथाग्निमुखतो हविषाराध्य
ते १८ तस्माद्ब्राह्मणेषु देवेषु च महायज्ञदेवेषु मर्त्यादिषु च यथाशक्तिः यथायोग्यं तैस्तैः कामैरन्नादिभिर्ब्राह्मणानन्तं ब्राह्मण एवानन्तं मुखं
यस्य तमेवं क्षेत्रज्ञं परमात्मानं देवाद्यवस्य जीवशरीरकं वा यजस्वाराधय ब्राह्मणानन्विति पाठे ब्राह्मणेषु यजनानन्तरमन्येषु मर्त्यादिषु यजस्वेत्य
र्थः युधिष्ठिरस्य गृहस्थत्वात्तद्वाच्येव माराधनमप्यवश्यं कर्तव्यमित्यभिप्रायेण आह यजस्वेति मध्यमपुरुषप्रयोगः १९ किंच प्रोष्ठपदे भाद्रपदे
मासि द्विजः त्रैवर्णिको धनवांश्चेद्यथावित्तं वित्तानुसारेण पित्रोर्मातापित्रोस्तद्बंधूनां चापरपक्षीयं कृष्णपक्षीयं श्राद्धं महालयाख्यं कुर्यात्तु रं

यद्यात्मनोधिकारायाः सर्वाः स्युर्यज्ञसंपदः वैतानिकेन विधिना अग्निहोत्रादिना यजेत् १७ न ह्यग्निमुखतोऽयं वै भगवान्सर्वयज्ञ
भुक् इज्येत हविषा राजन्यथा विप्रमुखे हुतैः १८ तस्माद्ब्राह्मणदेवेषु मर्त्यादिषु यथार्हतः तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं ब्राह्मणाननु
१९ कुर्यादपरपक्षीयं मासि प्रोष्ठपदे द्विजः श्राद्धं पित्रोर्यथावित्तं तद्बंधूनां च वित्तवान् २० अयने विषुवे कुर्याद्व्यतीपाते दिनक्षये
चंद्रादित्योपरागे च द्वादश्यां श्रवणेषु च २१ तृतीयायां शुक्लपक्षे नवम्यामथ कार्तिके चतसृष्वप्यष्टकासु हेमंते शिशिरे तथा २२ माघे च
सितसप्तम्यां मघाराकासमागमे राकया चानुमत्या च मासर्क्षाणि युतान्यपि २३ द्वादश्यामनुराधा स्यात् श्रवणस्तिस्र उत्तरा तिसृष्वे
कादश्यां वा सु जन्मर्क्षश्रोणयोगयुक् २४

किंचायनादिषु कालेषु पित्रोः श्राद्धं कुर्यादित्यन्वयः तत्रायनं कर्कटसंक्रांतिर्मकरसंक्रांतिश्च तुले वै
षुवसंज्ञके तथा च वृद्धवसिष्ठः ह्यव कर्कटसंक्रांती द्वे तद्दक्षिणायने विषुवे तु तुलामेषगोलमध्ये ततो परा इति कुहूर्नष्टेंदुकला चंद्रादित्योपरागोग्र
हः तत्र शुक्लपक्षेऽक्षयतृतीयायां इत्यर्थः कार्तिके मासि शुक्लपक्षे नवम्यां हेमंतशिशिरे चतस्रो च तसृष्वष्टकासु मार्गशीर्षादिमासचतुष्टयकृष्णा
ष्टमीषु माघे मासि सितसप्तम्यां शुक्लसप्तम्यां २२ मघानक्षत्रयोः पौर्णमासी संयोगकाले च संपूर्णचंद्रापौर्णमासी राका कलाहीनचंद्रापौर्णमासी नुमती
नाम्न्यायुतानि यानि मासर्क्षाणि मासनामप्रवृत्तिनिमित्तानि नक्षत्राणि तदुपलक्षितेषु च कालेषु २३ यदा द्वादश्यामनुराधा श्रवण उत्तरा फाल्गुनी
उत्तराषाढा उत्तराभाद्रपदा इति तिस्र उत्तरा वा सु अनुराधास्वात्यामुक्तिस्वष्ट एकादशी चाय यदा स्यात्तदा सा च जन्मर्क्षश्रोणयोगयुक्ते जन्मनक्षत्रस्य श्रव
णनक्षत्रस्य वा योगेन युक्तः कालः तदानुयोगमहत्त्वं संबंधबाहुल्यज्ञापनायेति सूचितं २४

विद्वत्तमर्थमुपसंहरति त्रिवर्गमिति स्वयं गृहस्थोऽप्यनेन दुपयुक्तवर्गत्रयमनिष्टतामस्य ताते ऽतिकृच्छ्रेणातिप्रयासेन त्रिवर्गं धर्मार्थकामान्नभ
जेत नसेवेत तदेवात्मा दैवेनतुप्रतिपादितमित्यर्थः तदेवाह यावद्दैवेन देशकालानुगुणेन प्रापितं तदेव यथोपयुक्तं भजेत ११ धर्मान्तरमाह आश्वानमा
या आ इति या श्वान श्वान्तेवसायिनश्चण्डालादयस्तत्पर्यन्तानतिथ्यापन्नेभ्यः यथोचितं कामान्संविभजेद्यथाशक्ति तद्देहस्थितानन्नादीन्दद्यादित्यर्थः
संगमात्मजायासुताद्दिकृविषु चेत्युक्तं जायासंगत्यागमुपपादयति अपीति आत्मनः स्वस्य दारान्भार्यामेकामपि जह्यात्तस्यां स्वत्वाभिमानं त्य
जेदित्यर्थः एतदेव वक्तुं तावत्तस्या दुस्त्यजत्वमाह यतो यस्यां भार्यायां नृणां स्वत्वग्रहः ममैवेयमित्याग्रहः १२ यदर्थे यद्भार्यार्थे स्वकीयान्प्रा
णानपि पितरं गुरुं वा हन्यात्तस्यां स्वत्वाभिमानं त्यजेदित्यर्थः एवंभूतायां तस्यां स्त्रियां भार्यायां स्वत्वं जह्यात्स्वत्वाभिमानं न कुर्यादित्यर्थः यः पुमाने
वं जह्यात्तेन पुंसाऽजितः परमात्माजितः वशीकृतो भवति १३ कथमेवं तस्यां स्वत्वाभिमानं त्यक्तुं शक्यम् तत्त्वविचारेणेत्याह क्रिमिति क्रिमिवि

त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि यथादेशं यथाकालं यावद्दैवोपपादितं ११ आश्वाद्यान्तेवसायिभ्यः कामान्संविभजेद्य
था अप्येकामात्मनो दारां नृणां स्वत्वग्रहो यतः १२ जह्याद्यदर्थे स्वप्राणान्हन्याद्वा पितरं गुरुं तस्यां स्वत्वं स्त्रियां जह्याद्यस्तेन
ह्यजितो जितः १३ क्रिमिविड्भस्मनिष्ठान्तं क्वेदं तुच्छं कलेवरं क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः १४ सिद्धैर्यज्ञावशिष्टार्थैः
कल्पयेद्वृत्तिमात्मनः शेषे स्वत्वं त्यजेत्प्राज्ञः पदवीं महतामियात् १५ देवान्ऋषीन्नृभूतानि पितॄनात्मानमन्वहं स्ववृत्त्यागतवि
त्तेन यजेत पुरुषं पृथक् १६

क्रिमिविड्भस्मनिष्ठापर्यवसानमंतो यस्य तदिदं कलेवरं क्व तदीया देहार्था रतिर्यस्याः सा भार्या क्व नभश्छदाकाश
स्यापि छादयिता आकाशतुल्यो निर्लेप इत्यर्थः ईदृश आत्मा के तेवं तत्त्वविचारेण जह्यादित्यर्थः १४ यावदर्थपरिग्रहः इति दैवालब्धेष्वपि प्राणमा
त्रोपयुक्तान्नादिपरिग्रह उक्तः इदानीं तैरपि यज्ञावशिष्टैरेवार्थैरात्मनो वृत्तिं कल्पयेदित्याह सिद्धैरिति सिद्धैर्दैवालब्धैर्यज्ञावशिष्टैः पंचमहायज्ञादि
भिरवशेषितैरेवार्थैरन्नादिभिरात्मनः स्वस्य वृत्तिं प्राणधारणरूपां कल्पयेत् शेषे यज्ञाद्यनुपयुक्ते स्ववृत्त्यनुपयुक्ते च दैवालब्धेऽप्यर्थे स्वत्वाभिमा
नं त्यजेत् प्राज्ञः एवंविधज्ञानवान्महद्भिर्गम्यां मुक्तिरूपां पदवीं प्राप्नुयात् १५ एतद्विवृण्वन्नाह देवानृषीन्मनुष्यान्भूतानि पितॄंश्च पंचमहायज्ञ
देवता आत्मानं च स्ववृत्त्या याजनाध्यापनादिपूर्वोक्तवृत्त्या आगतेनार्जितेन वित्तेनान्वहमहरहः पृथक् पुरुषं देवाद्यंतरात्मानं परमपुरुषं यजेदेक
मेव परमपुरुषं देवादिशरीरभेदेनांतरात्मत्वेनावस्थितमाराधयेदित्यर्थः १६

७१ कथंभूतः तेभ्यो भगवत अवतारकथामृतमभीक्ष्णं पुनः पुनः यथाकालमावश्यकधर्मानुष्ठानावशेषितं कालमुपयुंजानैः सहितः श्रद्धापूर्वकं शृ
ण्वन् ४ एवं सत्संगाद्देहदारादिषु शनकैः संगं विमुंचेत ग्रहममताद्यभिमानं त्यजेदेवं मुच्यमानेषु मुक्ताभिमानविषयेषु स्वप्नवदुत्थितः यथा स्वप्ने
तद्विषयेषु आदौ तस्मादुत्थितः तत्कालमात्रमनुभाव्यतां भाव्यते ५ तथा देहे च गेहे च पुत्रदारादिषु च पंडितः अस्थिरत्वात्पुरुषार्थज्ञानवान् तत्र दे
हादौ स्वयं विरक्तोपि रक्तवदासक्तवद्यावदर्थं प्राणधारणावच्छिन्नमर्थमुपासीनः स्वीकुर्वन्न नृलोके नृशरीरे नरतां न्यसेदनुसंदधीत नरत्वादि
के देहगतमनुसंदधीत न त्वात्मन्यनुसंदधीतेत्यर्थः ६ ज्ञात्यादयस्तेभ्योन्ये च यद्वदंति यच्चेच्छंति तत्स्वयं निर्ममः ममकाररहितो मोदेतानु
मोदेत ७ यावदर्थं परिग्रहमुक्त्वा तदेव विवृणोति यद्यद्भगवता निर्मितं प्रापितं तद्भूम्यादिभेदभिन्नं वित्तं तत्र दिव्यं वृष्ट्यादिभिर्जातं धान्यादिभौ
मं भूमेर्जातं सुवर्णादिरूपमांतरिक्षमकस्मादेव प्राप्तम् यद्वा दिव्यं वित्तमर्कालोकादि आंतरिक्षं वर्षं भौमं लवणादि तदेतत्सर्वमुपयुंजानो

श्रृण्वन्भगवतोऽभीक्ष्णमवतारकथामृतं श्रद्दधानो यथाकालमुपशांतजनावृतः ४ तत्संगाच्छनकैः संगमात्मजायात्मजादिषु
विमुंचेन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः ५ यावदर्थमुपासीत देहे गेहे च पंडितः विरक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत् ६ ज्ञात
यः पितरौ पुत्रा भ्रातरः सुहृदोऽपरे यद्वदंति यदिच्छंति चानुमोदेत निर्ममः ७ दिव्यं भौमं चांतरिक्षं वित्तमच्युतनिर्मितं तत्सर्वमुपयुंजा
न एतत्कुर्यात्स्वतोऽबुधः ८ यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनां अधिकं योऽभिमन्येत स स्तेनो दंडमर्हति ९ मृगोष्ट्रखरमर्काखुस
रीसृप्खगमक्षिकाः आत्मनः पुत्रवत्पश्येत्तैरेषामंतरं कियत् १०॥ विनियुंजान अबुधोऽविवेकी चेत्स्वतः स्वत्वेन कुर्यात्तदेतत्सर्वं स्वत्वेना

भिमन्येतेत्यर्थः यद्वा बुधः इत्येवच्छेदः विवेकी तत्सर्वमुपयुंजानः एतद्यथोपयुक्तं स्वतः कुर्यात्स्वीदेहधारणमात्रोपयुक्तमेव स्वीकुर्यादित्यर्थः ८ अत्र
धिकं न स्वीकुर्यात् इत्यभिप्रायवान् तस्मिन् स्वत्वाभिमानं कुर्यादित्याह यावदिति हि यस्माद्यावज्जठरमुदरं भ्रियेत पूर्यते तावदेव स्वत्वं देहिनां उदरभर
णोपयुक्त एव हि वित्ते देहिनां स्वत्वाभिमान इत्यर्थः योऽधिकमपि स्वत्वेनाभिमन्येत स पुनः स्तेनः चोर एव यत एवं ततो दंडमेवार्हति इह दंडाभावेप्यमुत्र दंडम
र्हत्येव यद्वा संसृतिरूपं दंडमर्हतीति भावः ९ यतोऽधिके स्वत्वाभिमानो दंडहेतुरित्येवं तद्भक्षणप्रवृत्तान्मृगोष्ट्रादीनात्मनः स्वस्य पुत्रवत्पश्येत्पुत्रा
निव मन्येत न तु निगृह्णीयादित्यर्थः तथा हि तैः पुत्रैः सह एषां मृगादीनां कियदंतरं न किंचिदप्यंतरं तारतम्यमस्तीत्यर्थः तत्र मृगाः शुनकमार्जारादयः
मर्को मर्कटः आखुर्मूषकः सरीसृपा अन्ये सर्वेपुस्त्वभावाः जंतवः विमक्षिकाः विशदः पादपूरणार्थः विशिष्टमक्षिका इति वा स्पृक्खगेति वा पाठः १० ७१

उक्तं स्ववृत्तमुपसंहरति स्वात्मवृत्तं इति इत्थं मया सुगुप्तमपि स्वात्मनो मम वृत्तं मे देहाद्यालोकशास्त्राभ्यां व्यपेतं न न तु तत्त्वदृष्ट्याव्यपेतं वहिर्भूतं ते
तुभ्यं तु वर्णितं हि यस्मात्त्वं भगवत्परोऽतो गुप्तमप्युद्वर्णितमित्यर्थः ४५ एवं मुनिनोपवर्णितं पारमहंस्यं तुर्याश्रमनिष्ठानामनुगुणं श्रुत्वाऽसु
रेश्वरः प्रह्लादः तं प्रीतः सन्पूजयित्वाऽमंत्र्यानुज्ञाप्य स्वगृहं ययौ ४६ इति सप्तमे त्रयोदशः ॥१३॥ एवमाश्रुताश्रमद्वयधर्मो गृहस्थाश्रमधर्माननुबुभु
त्सुः पृच्छति युधिष्ठिरः गृहस्थ इति हे देव ऋषे संध्यभावश्चार्षः गृहेष्वेव मूढाधीर्यस्य गृहासक्तचित्तो मादृशो गृहस्थाश्रमस्थः पुमान्येन विधिना एतां
पदवीं तुर्याश्रमगम्यां पदवीं मार्गं प्राप्नुयादित्यर्थः यायात्प्राप्नुयात्तं विधिं ब्रूहि १ एवमापृष्टगार्हस्थ्यधर्मो देवर्षिस्तत्राश्रममभिनंदंस्तान्धर्मान्वक्तुं प्र
तिजानीते साध्विति हे महाराज जानतापि त्वया लोकानां साधु यथा तथानुग्रहः कृतः साधु पृष्टमनेन त्वत्पृष्टं गार्हस्थ्यधर्मं नमहं तुभ्यं प्रवक्ष्यामि यतः कर्मणः
मयावक्ष्यमाणात् गार्हस्थ्यधर्मात् प्रतिबंधकानां पुण्यपापात्मकानां निरासद्वारा नैष्कर्म्यं ज्ञानयोगलाभो भवेत् २ एवं प्रतिज्ञाय गार्हस्थ्यधर्मान्

स्वात्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितं व्यपेतं लोकशास्त्राभ्यां भवान्हि भगवत्परः ४५ नारद उवाच ॥ धर्मं पारमहंस्यं वै
मुनेः श्रुत्वाऽसुरेश्वरः पूजयित्वा ततः प्रीत आमंत्र्य प्रययौ गृहं ४६ इति श्रीभागवते महापुराणे सप्तमस्कंधे त्रयोदशोऽध्या
यः॥१३॥ युधिष्ठिर उवाच गृहस्थ एतां पदवीं विधिना येन चांजसा यायाद्देवऋषे ब्रूहि मादृशो गृहमूढधीः १ नारद उवाच॥
साधु पृष्टं महाराज लोकानां साध्वनुग्रहकृता एतत्तेऽहं प्रवक्ष्यामि नैष्कर्म्यं कर्मणां यतः २ गृहेष्ववस्थितो राजन्क्रियाः कु
र्वन्गृहोचिताः वासुदेवार्पणं साक्षादुपासीत महामुनीन् ३

ह गृहेष्ववस्थितादिना यावदध्यायसमाप्ति यद्यपि प्रथमाश्रमधर्मं कथ्यमानं
तरं एवैतदाश्रमधर्मवर्णनं युक्तं क्रमप्राप्तत्वात्तथापि गार्हस्थ्यधर्माणां बाहुल्यान्महता प्रबंधेन वर्णनीयत्वादाश्रमांतरधर्मवर्णनानंतरं ते कथ्यंते
क्रमावाप्तराघा अत्र केचित् इदं तिमोक्षांतरंगत्वेन प्रथमं वनस्थयतिधर्मान्निधाय पश्चाद्गृहस्थधर्मान्निदधातीति तन्मंदं अतस्त्वितरज्ञा
यो लिंगाद्वेति शारीरकन्यायेन ब्रह्मविद्यानुग्राहकान्धर्मान्सर्वाश्रमानपेक्ष्य यातदनुग्राहकबहुधर्मकगार्हस्थ्यस्यैवांतरंगत्वादतो यद्योगेऽत्रएवाश
यः हे राजन्गृहेष्ववस्थितः गृहाश्रमस्थ एव गृहोचिता आश्रमानुगुणाः क्रियाः कर्माणि संध्योपासनपंचमहायज्ञादीन्यावश्यकानि साक्षाद्वासुदे
वार्पणं यथा तथा कुर्वन्फलसंगकर्तृत्वत्यागपूर्वकं कुर्वन्महामुनीनुपासीत भगवद्गुणमननशीलान्महाभागवतानुपासीत सेवेतेत्यर्थः ३

क्वचिदल्पंप्रति वल्गुः क्वचित् कदाचिदल्पं कदाचिद्वहु भूरि वहु क्वचित्स्वादु क्वचित्स्वादु स्वादु समीचीनमसम्यक् क्वचिच्च गुणैर्व्यवदुरसवत्कदाचिन्निर्गुणं
३७ कदाचित्श्रद्धयानीतं कदाचिद्दुर्निंदापूर्वकमानीतं वा अन्नादिकं भुंजे अपि कदाचिद्दिवा नक्तं च यदृच्छया प्राप्तं भुंजे ३८ एवं वस्त्रमपि दुकूलादिघर्म
तमसम्वादे वा अल्पं वसे आच्छादयामि परिदधे च चीरं जीर्णं वस्त्रं एवं दिष्टभुक् प्रारब्धभुक् संतुष्टचित्तश्चाहं ३९ क्वचिद्भूपृष्ठ एव क्वचित्पर्यंकादि
कुशये क्वचिच्च प्रासादोपरि पर्यंकेतत्रापि कशिपौ वातस्पर्शो लभ्यं कांनिराहपरेषां इच्छयेति इदं उत्तरत्राप्यनुवंजनीय ४० स्नातमनुलिप्तं
चंदनेन चांगं यस्य शोभनं वासो वस्त्रं यस्य सत्वग्निरलंकृतः रथादिभिर्यानैः चरेसं चरामि क्वचिद्दिग्वासा दिगंवरः ग्रहवच्चरेत ४१ हे विभो
नचमनादिकर्तृपुरुषमवेक्ष्यमित्याह नाहमिति स्वभावत एवविषमंजनं स्तुतिनिंदयोः कर्त्तारं नस्तौमि न निंदे च किंतु तेषां जना नां श्रेयः

क्वचिदल्पं क्वचिद्भूरि भुंजे अन्नं स्वाद्वस्वादु वा क्वचिद्भूरिगुणोपेतं गुणहीनमुत क्वचित् ३७ श्रद्धयोपहृतं क्वापि कदाचिन्मा
चिन्मानवर्जितं भुंजे भुक्त्वाथ कस्मिंश्चिद्दिवा नक्तं यदृच्छया ३८ क्षौमं दुकूलमजिनं चीरं वल्कलमेव च वसेन्यदपि संप्रा १९
प्राप्तं दिष्टभुक् तुष्टधीरहं ३९ क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु क्वचित्प्रासादपर्यंके कशिपौ वा परेच्छया हरि
४० क्वचित्स्नातोनुलिप्तांगः सुवासाः स्रग्व्यलंकृतः रथेभाश्वैश्चरे क्वापि दिग्वासाः ग्रहवद्विभो ४१ नाहं निंदे न च स्तु ६८
स्तौमि स्वभाव विषमं जनं एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि ४२ विकल्पं जुहुयाच्चित्तौ तां मनस्यर्थविभ्रमे श्री
मनो वैकारिके हुत्वा तं मायायां जुहोत्यनु ४३ आत्मानुभूतौ तां मायां जुहुयात्सत्यदृङ्मुनिः ततो निरीहो विरमेत्स्वा

धर्मादिरूपं उतापि च महात्मनि भगवत्येकात्म्यं एकचित्तत्वं चाशासे प्रार्थये ४२ इत्यममस्यास्थिवस्थितो उपायमाह विकल्पमिति विकल्पं जा
तिरूपादिविकल्पं चित्तौ मनो आधारे जुहुयात्प्रलीनं भावयेत् चित्तमर्थविभ्रमे दाहात्मभ्रमहेतौ मनसि मनश्च वैकारिके सात्विकाहंकारे तं च वैका
रिकं मायायां मूलप्रकृतौ जुहुयात सर्वत्र होमोनाम लयानुसंधानरूपः ४३ तां च मायां स्वात्मानुभूतौ जुहुयात्ततः सत्यं स्वात्मशरीरकं परमात्मा
नं पश्यतीति सत्यदृङ्मुनिः तन्मननशीलः निरीहो निश्चेष्टः स्वानुभूत्यात्मनि परमात्मात्मके परिशुद्धजीवस्वरूपे स्थितः तदनुसंधानपरः विरमेत्
प्रारब्धावसाने कलेवराद्विरमेत् ४४ ॥ ॥:॥ ॥ ॥श्री॥ ॥

मनुष्यनार्जने हि दुःखं लब्धधनानां तु सुखमेवेत्यत्राह पश्यामीति धनिनां लब्धधनानामपि क्लेशं पश्यामि क्लेशित्वे हेतुं वदन् धनिनो विशिनष्टि लुब्धानामिति
लब्धधनलिप्सया लब्धधनव्ययभयेन च क्लिश्यतामिति भावः अजितात्मनामजितेन्द्रियाणां कामानामपर्याप्त्या च क्लिश्यतामिति भावः भयादलब्धनिद्राये
त्वेषां चोरादयो धनमपहरेयुरिति भयाद्विगतनिद्राणामित्यर्थः इतोऽपि क्लेश इति भावः भये हेतुं वदन् विशिनष्टि सर्वतः सर्वेभ्योऽपि अतीव विशंकिनामपहरेयु
रिति शंकां कुर्वतां ३१ एतदेव विवृणोति राजत इति राजादिभ्यः पशुतः पशुभ्यः राजाग्न्यादिभ्यः पक्षितः पक्षिभ्यः सस्यादिभक्षणार्थं प्रवृत्तेभ्यः कालतः
स्वस्मात् दानभोगयोः प्रवृत्तात् स्वस्माच्च प्राणास्तु तुल्यमर्थं चेद्वा मरिष्यतीति तत्प्रातेषां नित्यं भयमनुवर्तते ३२ न केवलं भयमेवापि तु शोकमोहभयादयः
सर्वेऽप्यनर्था यदर्थमेव भवन्ति ये ये तेषां ते नृणां स्युर्भवेयुः तस्माद्बुधः हेयोपादेयविवेकवान् प्राणार्थयोः स्पृहां जह्यात्त्यजेत् ३३ यदुपदेशात्त्वमीदृशोऽसि

पश्यामि धनिनां क्लेशं लुब्धानामजितात्मनां भयादलब्धनिद्राणां सर्वतोऽभिविशंकिनां ३१ राजतश्चौरतः शत्रोः स्वजनात्प
शुपक्षितः अर्थिभ्यः कालतः स्वस्मान्नित्यं प्राणार्थवद्भयं ३२ शोकमोहभयक्रोधरागक्लैब्यश्रमादयः यन्मूलाः स्युर्नृ
णां जह्यात्स्पृहां प्राणार्थयोर्बुधः ३३ मधुकारमहासर्पौ लोकेऽस्मिन्नो गुरूत्तमौ वैराग्यं परितोषं च प्राप्ता यच्छिक्षया व
यं ३४ विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात् कृच्छ्राप्तं मधुवद्वित्तं हत्वाप्यन्यो हरेत्पतिं ३५ अनीहः परितुष्टात्मा
यदृच्छोपनतादहं नो चेच्छये बह्वहानि महाहिरिव सत्त्ववान् ३६

वृत्तधर्ममास्थितस्त्वं कथयेत्यत्राह मधुकारेति अस्मिन्लोके
नोऽस्माकं गुरुश्रेष्ठौ मधुकाराजगरावेव दृष्टादृष्टशिक्षकौ भवतः तदेवाह ययोर्मधुकारमहासर्पयोः शिक्षया वृत्तिपर्यालोचनया वयं वैराग्यं प
रितोषं दैवाल्लब्धेन संतोषं च प्राप्ताः तत्र मधुकाराद्वैराग्यं महासर्पात्परितोषं च प्राप्ता इत्यर्थः ३४ एतदुभयं विवृणोति विराग इति द्वाभ्यां तावत्सर्व
भ्यः विरागो मया मधुव्रतात् मया शिक्षितः तच्छिक्षया मम वैराग्योदय इत्यर्थः किं तच्छिक्षितं तदाह यथा मधुव्रतैरितस्ततः पुष्पेभ्यः आनीय स
ञ्चितं निवेशितं मधु तत्स्वामिनो मधुव्रतान् हत्वान्यो हरतीति तथा मधुवत् दुःखेनार्जितं धनमन्यः पतिं धनस्य पतिं हत्वा हरेदिति तन्मधुव्रताच्छिक्षितमित्य
र्थः ३५ अजगराच्छिक्षितमाह अनीह इति महाहिरिवाहमप्यनीहः निर्व्यापारः यदृच्छोपनतात् दैवाल्लब्धान्नादेः परितुष्टात्मा संतुष्टचित्तः नो
चेत् यदृच्छोपनतं नो प्राप्तं चेत्तर्हि सत्त्ववान् धैर्यवान् बह्वहानि अहानि शये शयानोऽस्मि ३६ पीनत्वे हेतुत्वेन यदृच्छया प्राप्तान्नसंतोषं प्रपंचयति ॥ छ ॥

६९ ननु प्रवृत्तस्याकदाचित्सुखं स्यादपि किं निवृत्तस्यास्यादित्यत्राह सुखमस्यात्मनः प्रगात्मनो रूपं स्वरूपमेवातो न तदर्थं यत्नः कार्यः इति भावः तर्हि स्वतः
सुखरूपस्यात्मा तत्वेन किं नोपलभ्यते इति शंकां निराकरोति सर्वा सांईहानां देहात्माभिमानात् सुखपरमस्याभावोऽस्यात्मनस्तनुशाकारः निष्क्रियं सुख
मेव तस्य तनुरित्यर्थः कर्तृत्वेनेहापरमपूर्वकं तद्यथा आत्मावि मर्शने सुखरूपतयोपलभ्यत इति भावः यत एवमतो भोगान् शब्दादि विषयभोगा
न्मनः संस्पर्शजान्मनोरथमात्रज्ञानस्याभवतान् दृष्ट्वा संविशन्नात्मयाथात्म्यावलोकने प्रविष्टोऽहं प्रारब्धानुभवे प्रविष्टो वा स्वाप्न्याभिशया
नो भिन्न २६ तर्हि सर्वोऽपि लोकस्त्वमिव सुखरूपमात्मानं किं नोपलभ्यत इति शंकां निराकर्तुं स्वाभाविकसुखरूपाविमर्शे वफलकदेहा
त्माभिमानशोते किंतु संसरतीत्याह इतीति इत्येतदात्मनः सुखात्मकं रूपं स्वार्थं स्वस्य पुरुषार्थरूपं स्वतएव संतं विस्मृत्य स्वतएव संतमा
हं इत्यभिमानरूपे द्वैते भेदनिमित्ते द्वैतेनेत्यर्थः विचित्रां गर्भजन्मजरामरणादिरूपामत एव घोरां भयंकरां संसृतिमाप्नोति २७ एतदेव दृष्टे
सुखमस्यात्मनो रूपं सर्वेहोपरतिस्तनुः मनः संस्पर्शजान् भोगान् दृष्ट्वा स्वप्स्याभिसंविशन् २६ इत्येतदात्मनः स्वार्थं संतं विस्मृ
त्य वै पुमान् विचित्रामसति द्वैते घोरामाप्नोति संसृतिं २७ जलं तदुद्भवैश्छन्नं हित्वाज्ञो जलकाम्यया मृगतृष्णामुपाधावेत्तथा
२८ देहादिभिर्दैवतंत्रैरात्मनः सुखमीहतः दुःखात्ययं चानीशस्य क्रिया मोघाः कृताः कृताः २९ आध्यात्मि
कादिभिर्दुःखैरविमुक्तस्य कर्हिचित् मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किं ३०
नसुखेनाह जलमिति जलं तदुद्भवैर्जलोद्भवैस्त
णादिभिश्छन्नं जलं हित्वाऽज्ञात्वा यथा जलकाम्यया मृगतृष्णां जलवत्प्रतीयमानामुपाधावेत्तथा स्वतः सुखरूपमात्मनः स्वरूपं वि
स्मृत्यान्यत्रैव वैषयिकसुखे पुरुषार्थदृक् पुरुषार्थदृष्टिर्भवति लोकः स्वत आत्मनोऽन्यत्र देहादौ पुरुषार्थं दृग्वा २८ विपर्ययं दृष्ट्वा निवृत्तोऽस्मीत्ये
तदेव विवृणोति देहादिभिरिति पंचभिः दैवतंत्रैः कर्माधीनैर्देहेंद्रियादिभिरात्मनः स्वस्य सुखं दुःखनिवृत्तिं चेहतं इतश्चत आ
नीशस्य कर्मैव परवशस्य पुंसः कर्तृत्वरिवष्टी इच्छता कृताः कृताः पुनः पुनरारब्धाः क्रिया मोघा व्यर्थाः नसुखजनका नापि दुःखनिवर्तकाश्च दृष्टा
इति भावः २९ कथंचित्क्रियाणाममोघत्वेपि न तु साम्यं सुखमनुभूयमानं दुःखमेवेत्यभिप्रायेणाह आध्यात्मिकादिभिरादिशब्देनाधिदैविका
धिभौतिके आध्यात्मिकैर्दुःखैः कर्हिचित्कदाचिदप्यविमुक्तस्य मर्त्यस्य मरणशीलस्य कृच्छ्रोपनतैर्दुःखेनार्जितैरर्थैर्वित्तैस्तन्निमित्तैः कामैश्च ६९

किंच लोकविविधिद्दानकल्पाः इक्षुः निपुणाद्दकुचतुरः चित्राप्रियालोकरंजनाः कुथायस्य सएवं भूतोपि लोकस्य कर्मव्यापारं कुर्वतः सतः तद्दीक्षितो
विरमन् उदासीनः सन् तूष्णीं शेते शयानो मितस्तत्कारणं वदेति भावः १८ एवं दैत्यपतिना प्रह्लादेन पृष्टः स महामुनिस्तस्य प्रह्लादस्य वाग्भिरामृत
तेनयंत्रितः चोदितः स्मयमानः तमभ्याह यथावदभिमुखं उक्तवान् १९ तदेवाह यावदध्यायसमाप्ति वेदेति असुरश्रेष्ठ इदं किं तन्नत्ति भो हो परम
योः प्रवृत्तिनिवृत्त्योः वदाभिकारणानीति यत् त्वं दिदं भवान् ध्यात्मचक्षुषा सर्वलोकमनोभिप्रायविषयकज्ञानेन वेद जानात्येव कुतः यतस्त्व
मार्यसंमतो नीतिः आर्याणां दृष्टिः नां मंमतोसि यतः २० किंच भगवान् षाड्गुण्यपूर्णः स्वतेजसा दीप्यमानो नारायणोऽनन्यप्रयोजनया भक्त्यानु
ष्ठो यस्य त्वाद्दृशस्य सदा हृदि स्थितः सन् अर्कवत् सूर्यवद्ध्वांतमज्ञानरूपमंधकारं धुनोति निरस्यतीति निःशेषनिरस्ताज्ञानानां सर्वज्ञानां भवाद्दृशां किं
मविदितमस्तीति भावः २१ यद्यप्येवमथापि हे राजन् त्वया श्रुतं तवप्रश्नान् प्रति ब्रूमहे प्रश्नानामुत्तराणि वदामीत्यर्थः यथाश्रुतमित्यनेनोद्ध
कविः कल्पो निपुणाद्दकुचित्रप्रियकथः समः लोकस्य कुर्वतः कर्मशेषे तद्दीक्षितापिवा १८ नारद उवाच ॥ सइत्थं दैत्यपतिना परि
पृष्टो महामुनिः स्मयमानस्तमभ्याह तद्वागमृतयंत्रितः १९ ब्रह्मण उवाच ॥ वेदेदमसुरश्रेष्ठ भगवान्नन्वार्यसंमतः ईहोपरमयोर्नृ
णां पदान्यध्यात्मचक्षुषा २० यस्य नारायणो देवो भगवान् हृद्गतः सदा भक्त्या केवलयाऽज्ञानं धुनोति ध्वांतमर्कवत् २१ अथापि
ब्रूमहे प्रश्नांस्तव राजन् यथाश्रुतं संभावनीयो हि भवानात्मनः शुद्धिमिच्छता २२ तृष्णया भववाहिन्या योग्यैः कामैरपूरया कर्माणि
कार्यमाणोऽहं नानायोनिषु योजितः २३ यदृच्छया लोकमिमं प्रापितः कर्मभिर्भ्रमन् स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च २४ अत्रापि
दंपतीनां च सुखाय अन्यापनुत्तये कर्माणि कुर्वतां दृष्ट्वा निवृत्तोस्मि विपर्ययं २५
तत्परिहाराय योक्तं आत्मानः स्वस्य शुद्धिमिच्छता पुंसा भवान्
वक्ष्यमाणमिति योहि २२ लोकः कर्मसु प्रवर्त्तते त्वं तु निवृत्तः स किं शेषे इति यत्पृष्टं तत्र तावदुत्तरमाह तृष्णयेति चतुर्भिः तावदहं योग्यैर्यथो
चितैरपि कामैरपूरया पूरयितुमशक्यया भववाहिन्या जन्मपरंपराकारिण्या तृष्णया कर्माणि कुर्वन् यापात्मकानि कार्यमाणः कर्मसु प्रवर्त्तमा
नः पूर्वं नानायोनिषु योनितः प्रवेशितः २३ तैरेव कर्मभिर्भ्रमन् यदृच्छया दैवादिमं तो कं मनुष्यजन्म प्रापितः लोकं विशिनष्टि स्वर्गमोक्षयोः तिर
श्चां तिर्यक्त्वानां पुनरस्य मनुष्यत्वस्य च प्राप्तेर्द्वारं कारणं धर्मेण स्वर्गस्य द्वारं ज्ञानसंपादनेनापवर्गस्याधर्मेण तिरश्चां प्राप्तिर्यत्र कस्य पूर्वसजातीय
सुकृताचरणेन तु पुनर्मनुष्यत्वस्य च कारणं इत्यर्थः २४ अत्रादिमनुष्यजन्मनि स्वर्गापवर्गदे पि दंपतीनां यत्नेषु नादिसुखं तदर्थमन्यापनुत्तये

दुःखनिवृत्तये च कर्माणि कुर्वतां लोकानां विपर्ययं मु
खार्थं कृतेभ्यः कर्मभ्यः दुःखप्राप्तिरूपं विपर्ययं दृष्ट्वा नि
वृत्तोस्मि २५

६८ अत्रापीति अत्रास्य महात्मानो विभूत्यादिज्ञानाज्ञानिनो वस्थाने इतिहासमपि दृष्टांतत्वेनानुदाहरंति इतिहासं विशिनष्टि पुरातनं न त्वस्मत्कपोल
कल्पितं प्रह्लादस्याजगरस्य अजगरव्रतवरस्य मुनेश्च संवादरूपं ११ तमजगरव्रतस्थं सह्यपर्वतस्य सानुनि कावेर्या का वेशीतटे धरोपस्थे भू
रुपृष्ठे शयानं रजस्वलैर्धूलिभिर्धूसरैस्तनुदेहो देहावयवैर्निगूढं प्रच्छन्नममलं तेजो देहकांतिर्यस्य तं प्रह्लादो ददर्शेति परेणान्वयः १२ कथं
भूतः भगवत्प्रियः कतिपयैरमात्यैः परिवृत्तो लोकानां तत्वस्य विवित्सया वेत्तुमिच्छया चरन् कर्मादिभिर्यं सो सौ भवति न भवति वा सेवं जना
न विदुः संवादयोः शिरसा स्पृशन् त्वा विधिवदभ्यर्च्य वेत्तुमिच्छुर्महाभागवतः प्रह्लादः इदं वक्ष्यमाणमप्राक्षीत्पृष्टवान् १५ तदेवाह सार्द्धत्रि
भिः बिभर्षीति उद्यमुद्यमसहितः भोगवान् देहवान् पीवा बलपुष्टीलोपश्चात त्वं पीवानं कायं देहं बिभर्षि इति संदेहः ननूद्यमं विनैव मम प्रारब्धवशाद्

अत्राप्युदाहरंतीममितिहासं पुरातनं प्रह्लादस्य च संवादं मुनेराजगरस्य च ११ तं शयानं धरोपस्थे कावेर्यां सह्यसानुनि रज
स्वलैस्तनूदेशैर्निगूढामलतेजसं १२ ददर्श लोकान्विचरन्लोकतत्वविवित्सया वृत्तोमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः १३
कर्मणाकृतिभिर्वाचा लिंगैर्वर्णाश्रमादिभिः न विंदंति जना यं वै सो सावितिन वेति च १४ तं नत्वाभ्यर्च्य विधिवत्पादयोः शिरसा स्पृश
न् विवित्सुरिदमप्राक्षीन्महाभागवतोसुरः १५ प्रह्लाद उवाच बिभर्षि कायं पीवानं सोद्यमी भोगवान्यथा वित्तं चैवोद्यमवतां भो
गो वित्तवतामिह भोगिनां खलु देहोयं पीवा भवति नान्यथा १६ न ते शयानस्य निरुद्यमस्य ब्रह्मन्नु हार्थो यत एव भोगः अभोगिनोयं
तव विप्रदेहः पीवा यतस्तद्वद नः क्षमं चेत् १७ त्रेव भोगः संप्राप्नोतीत्यत्राह इह लोके तावदुद्यमवतामेव वित्तं धनं भवति वित्तवतां एव भोगः
त्वं तु निरुद्यमः कुतः तव वित्तं कुतस्तरां भोग इति भावः अंतरेणापि भोगं मम देहः पीवा इत्यत्राह भोगिनां भोगवतां एव देहः पीवा भवति भोगेन पीवा
भवत्यन्यथा तु कृशो भवति तत्कथं मंतरेणापि भोगं देहवृद्धिरिति भावः १६ तदेव विवृण्वन्पृच्छति नेति हे ब्रह्मन् शयानस्य अत एव निरुद्यमस्य
निर्थोपार्यस्य न वनं तु इह लोकेऽर्थः नु ते वित्तं नास्ति हि नु इति प्रसिद्धौ न वार्थो नास्तीति प्रसिद्धमेवेत्यर्थः यतो वित्तादेव हेतो भोगादेहपोषणं
दभो भवति अतो भोगरहितस्य तव देहो हे विप्र यतो हेतोः पीवाऽभवत तत्कारणं नोऽस्माकं श्रोतुं इति शेषः क्षमं योग्यं चेत्तर्हि वद कथय यागो ६८
प्यं चेत्तर्हि वर्णयेत्यर्थः १७ ॥ ॥श्री॥ ॥

अतो धर्मविभ्रमयाद्भायजेद्दाश्रमं त्यागोप्यवधृतविकल्पो ज्ञानहीनः तेन्यासाश्रमनिष्ठः धर्मप्रयोजनत्वेन विभ्रमयात ज्ञानवांस्तु धर्मा
लिंपकत्वं त्यजेदित्यर्थः यद्वा उपवासादिदेहक्लेशकररूपधर्मः शारीरदौर्बल्यजनकत्वेन योगविघातकेन चेत्तं विभ्रमयाद्भियान्न कश्चित्तं त्यजेदि
त्यर्थः यद्वा ननु शिष्यानुबंधनग्रंथाभ्यासव्याख्योपयोजनादिभिः कश्चिद्धर्म एवार्जितः स्यादिति किमर्थं ते निषिध्यंत इत्यत्राह नेति यदि
यतेराश्रमो धर्मार्थः स्यात्तर्हि कर्त्तव्याः स्युः शिष्यानुबंधनादयः स तु प्रायशो न धर्महेतुर्यत्याश्रमस्य धर्महेतुत्वाभावे हेतुं वदन्नुतं विशिनष्टि शांतस्येति
शांतस्य जितेंद्रियस्य धर्मसाध्यैहिकामुष्मिकफलादिविषयभोगेच्छारहितस्य समचित्तस्याधर्मस्येव धर्मस्यापि स्वफलजननद्वारा मुक्तिप्रतिबंधकत
ज्ञानवत्वेन धर्माधर्मयोः समचित्तस्य प्रायः इत्यनेन क्वचिद्यत्याश्रमस्यापि धर्महेतुत्वमस्त्येवेति सूचितं अतो यदि यतिर्धर्मप्रयोजनकयत्याश्रमनिष्ठ
स्तर्हि शिष्यानुबंधनादीन् विभ्रमयाद्धर्महेतुत्वाभावे तु त्यजेदित्यर्थः ८ ननु शिष्याद्यनुबंधनाभावे स्वस्य ज्ञानित्वादिमहात्म्यं न प्रकाशितं स्यादि
त्यत आह अव्यक्तलिंग इति अव्यक्तलिंगोऽस्फुटचिन्हः स्वमहात्म्यमनाविष्कुर्वन् वर्त्तेत यतेदिति भावः तथा च शारीरकसूत्रं अनाविष्कुर्व
न्नयेतराश्रमः प्रायो धर्महेतुर्महात्मनः शांतस्य समचित्तस्य विभ्रमयाद्वा त्यजेत् ९ अव्यक्तलिंगो व्यक्तार्थो मनीष्युन्मत्त
बालवत् कविर्मूकवदात्मानं स्वदृष्ट्या दर्शयेन्नृणां १० नन्वयादिति श्रुतिश्च तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेदिति
बालस्य कर्मस्वमहात्म्यानाविष्काररूपं बाल्यं तेन तिष्ठासेदित्यर्थः ज्ञानित्वाद्यनाविष्काराभिप्रायेणाह दृष्टांतयति उन्मत्तबालवदिति उन्मत्तवद्वा
लवच्च किं चाव्यक्तार्थः परैरविदितप्रयोजनः मुनिरालेवसंशीलनशीलश्च वर्त्तेतालेवसंशीलनं च मनाश्रयपरिशीलनं एतदेव बाल्यं च पांडि
त्यं च निर्विद्याथ मुनिर्भवतीति मुनिशब्देन विहितं तद्विषयकं चेदं सूत्रं सहकार्यंतरविधिः पक्षेण तद्वतो विधानं विध्यादिवदिति तत्वत्त्रवा
लवदिति दृष्टांतेन बालस्य यत् कर्मकामचारादिकं तदभिप्रेतं नाविरतो दुश्चरितान्नाशांतो नासमाहितः नाशांतमानसो वापि प्रज्ञानेनैव
माप्नुयादिति दुश्चरितस्य परिनिष्पन्नसाधनविरोधित्वश्रवणात् मनीष्युन्मत्तबालवदिति पाठे मनीष्युन्मत्तादिवच्चरेदिति यथोक्त एवा
र्थः कविर्विद्वानपि मुनिपुंगवाषितुं समर्थोपि स्वमात्मानं मूकमिव नृणां दर्शयेत् यथा उन्मत्तादिरूपं मन्येरंस्तथा वर्त्तेत स्वदृष्ट्येति पाठे स्वदृष्ट्या
देहविलक्षणया स्वात्मदृष्ट्येत्यर्थः १० अजगरव्रतस्य संन्यासाश्रमानपेक्षत्वेपि यदृच्छयोपनतसंतोषसमीक्षाविरोधि प्रवृत्त्युपरतज्ञाना
विष्कारस्य च तदपेक्षितत्वात्तद्वग मनायतदिति हासंप्रस्तौति ॥

स्मर्यं दार्ष्टांतिके दर्शयति ॥ एवमिति ॥ एवं स्वप्नावस्थावज्जागरणादीनि जीवस्थानानि शरीरकस्य जीवस्यावस्थानान्यवस्था इत्यर्थः ॥ स्वप्नजागराद्यन्व
योपि नात्मस्वरूपत्वयुक्त अपि तु प्रकृत्युपाधिकः स्वरूपत्वयुक्तं तत्तस्य सर्वावस्थानुगतत्वेन तत्त्वयुक्ताः पूर्वपूर्वावस्था उत्तरावस्थासूपलभ्येत
तत्त्वप्रकृत्यवयवप्रपंचभेदं उपपादितुं शक्यः ॥ कर्मानुस्मृतिप्रसंगविरोधानुपपत्तेः ॥ कर्मतावत्सुषुप्तेन पूर्वकृतं पुण्यपापरूपं तत्त्वज्ञानात्प्राक्केनैवभो
क्तव्यं ॥ अनुस्मृतिरपि य एवाहं सुप्तः स एव प्रतिबुद्धोस्मीति प्रबुद्धः ॥ स्मृतिरपि सुप्तं प्रबुद्धं स एवेति दर्शयति ॥ त इह व्याघ्रो वा सिंहो वा वृको वा वराहो
वा दंशो वा मशको वा यद्यद्भवंति तत्तथा भवंतीति विधयस्वभावो न्यायः सुप्तस्य पुनरुत्थितो अनन्यकाः स्युः ॥ अस्येवं स्वप्नावस्थावज्जागरादयो न जीव
स्वरूपत्वयुक्ताः अपि तु प्रकृत्युपाधिकाः इति तथापि जीवरूपविमर्शने किं मयात्र तत्राह ॥ आत्मन इति ॥ जागरादीन्यवस्थानान्यात्मनो मात्राणि प्र

एवं जागरणादीनि जीवस्थानानि चात्मनः ॥ मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥ ५४ ॥ येन प्रसुप्तः
पुरुषः स्वापं वेदात्मनस्तदा ॥ सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि माम् ॥ ५५ ॥

स्मात्मसंबंधिप्रकृत्युपाधिकानि स्वस्वरूपत्वयुक्तानीति ज्ञात्वा आत्मनो मायामात्राणीत्यनेन जीवस्य स्वप्नावस्था परमात्मीयत्वेति दर्शितं तद्द्रष्टारं
तत्तदवस्थासाक्षिणं परं प्रकृतिविलक्षणं जीवात्मानं स्मरेत् ॥ अचेतनस्य तत्त्वद्रष्टृत्वानुपपत्तेः कर्मानुस्मृत्याद्यनुपपत्तेश्च रागैकैकं शरीरमेकैके
न जीवेनाक्रांतं तत्स्वरूपं च तत्तदवस्थाद्रष्टृत्व पूर्वपूर्वावस्थानुस्मर्तृत्वाहंप्रत्ययगोचरत्वादिभिर्धर्मैर्निपुणतरविवेकेनावगंतव्यमिति भावः
५४ ॥ एवं परमात्मस्वरूपविमर्शनप्रकारमाह ॥ येनेति ॥ येन हेतुभूतेन परमात्मना प्रसुप्तः सुषुप्त्यवस्थः प्राप्तः पुरुषो जीवः जीवस्य प्रसुप्तोपरमा
त्मनो हेतुत्वाद्येनेति हेतुत्वपंचकत्वतीयांते नि निर्देशः तथाहि स्वप्नांतमे सोम्य विजानीहि इत्युपक्रम्य यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संप
न्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवतीति ॥ छांदोग्यश्रुतेः ॥ स्वमात्मं सुषुप्तिः सता ब्रह्मणा संपन्नो भवति जीवः सता सा कं
संपत्ति नाम शरीरेंद्रियाद्युपाधिप्रहाणेन स्वव्याप्तात्वादिप्रागतराहित्येन ब्रह्मणि स्थितिमात्रमेव सुषुप्तिः स्वशरीरकं परमात्मानं प्रत्यपीतो भवति लीनो भवः

तिउक्तो विश्रामं प्रतिरेकलयः कारणाय बहिकार्ये स्थलयः एवं सुषुप्त्याधारत्वात्तत्कारणात्वाच्चयेनेति तद्धेतुत्वेन निर्दिष्टः ॥ एवं येन सुषुप्तः पुरुष आ
त्मनः स्वस्य स्वापं वेदानुभवतीत्यर्थः ॥ तथा च सुखमवेदं सुखमहमस्वाप्समिति परामर्शानुगुणं सुखं च यत्संपत्तिकृतं वेदं तन्निर्गुणं हेयगुणरहितं ब्र
ह्मणत्वाच्च परमात्मानं मामवेहि जानीहीत्यर्थः ॥ सुषुप्त्याधारत्वतत्कारणत्वसौषुप्तिकसुखहेतुत्वादिभिर्धर्मैः परमात्मस्वरूपं विमर्शनाय मिति भाव
निर्गुणमिति सुखविशेषणं वा निर्गुणं प्रबोधस्वभमप्य संधीयमानस्यात्मनो यावरणोप्रमादिविशिष्टतातात्हयगुणरहितमात्प्रबोधादहमित्येकाका
रेणानुसंधीयमानं सुखरूपमात्मानं तमोगुणाभिभवात्स्वागर्पानुभवाभावाच्चास्फुटप्रतिभासं वेदेत्यर्थः ॥ सुषुप्तोत्थितस्य परामर्शानुगुणमेव हि सौषुप्ति
कं सुखं वर्णनाद्भ्यं तत्परामर्शो एवंविधः सुखमहमस्वाप्सं नाहं किंचिदवेदिषमिति तत्राहमस्वाप्समित्यनेनाहमर्थस्यात्मनोनुवृत्तिर्दर्शिता सुखमित्य
नेन तस्य सुखरूपता भात् ॥ किंचिदवेदिषमित्यनेन तस्य वाह्यवस्तुज्ञानत्वाद्याकारवैधुर्यं च दर्शितं ॥ एवं विधत्वं सुखमिति विशिष्टपरामर्शाभावाच्चास्फु

उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः ॥ अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत्परं ॥ ५६

टत्वं च ॥ ५५ ॥ एवं सुषुप्तौ परमात्मस्वरूपविमर्शनप्रकारकथनमुखेन जीवस्वरूपमुभयमित्यादिना विमृशन्नन्वयवत्ब्रह्म तत्परमित्यनेन ब्रह्मात्मकत्वं विदध
ाति ॥ उभयं स्वापप्रतिबोधं चेत्युभयं स्मरतः पुंसो देहिनो यज्ज्ञानं प्रस्वापप्रतिबोधयोरन्वेति व्यतिरिच्येत तत्तदवस्थाश्रयेणानुवर्तते तदुपाधिविगतमे
तदवस्थाभिर्व्यतिरिक्तं स्यात्तदवस्थानाश्रयं स्यात ॥ यद्वा उत्तरोत्तरावस्थासु पूर्वपूर्वावस्था व्यतिरिक्तं स्यात्तस्मात्परिशिष्टं ज्ञानस्वरूपाज्जीवात्स
र्वविलक्षणं तदात्मकं तद्ब्रह्मेत्यर्थः ॥ यद्वा उभयमित्यादिदृष्टान्तार्थे यथा यज्जीवस्वरूपात्मकं ज्ञानं सर्वावस्थानुवर्तितदुष्टउत्तरोत्तरावस्थासु
पूर्वपूर्वावस्था व्यतिरिक्तं च तथा तस्मात्परं विलक्षणं सर्वावस्थासु जीवस्वरूपनियंतृतयानुवृत्तं दुष्टतदवस्थासंबंधिसुखदुःखाद्यननुवर्तित
यात्व्यतिरिक्तं च ब्रह्मेत्यर्थः ॥ यथा सर्वावस्थानुवर्तितज्ज्ञानानंदादिस्वरूपं तत्स्वभावतत्तदवस्थातत्संबंधित्वाहं प्रत्ययगोचरत्वादिभिर्धर्मैर्जीवस्व
रूपं विशोध्य तत्पर ब्रह्मशरीरत्वेनापि तद्विशोध्यमस्त्यभिप्रायः ॥ ५६ ॥

गवंपरमात्मैक्यदृष्ट्याचेत्संपन्नः ॥ कतैरितिः ॥ ज्ञानविज्ञानयोः संपत्तिर्यस्मात्तन्ममवचः धारयन्स्वनिष्ठं कुर्वन्नज्ञानविज्ञानसंपादकंमद्भक्त्यापेमत्तु
ष्टन्नित्यर्थः ॥ ब्रह्मात्मकत्वानुसंधानेनज्ञानविज्ञानेप्रतिष्ठितमवाप्नोतीतिभावः ज्ञानविज्ञानसंपन्नइति प्रथमांतपाठेस्पष्टार्थः ॥ आशुसिद्धोसि
मुक्तोभविष्यसि ॥ ६४ ॥ एवमुपदिश्यभगवानंतर्दधेइत्याहमुनिः ॥ आश्वास्येति ॥ विश्वात्माजगद्गुरुभवेगवान्हरिः ॥ संकर्षणश्चित्रकेतुमि
त्यमाश्वास्यनारदांगिरोभ्यांसंवादितवचसाविश्वात्मातस्यचित्रकेतोः पश्यतः सतस्तत्रैवपातात्वादधस्तात्कस्यांचिद्दिशिअंतर्हितवान् ॥ ६५ ॥
ति षष्ठे षोडशः ॥ १६ ॥ ततउपरितनंचित्रकेतोर्वृत्तांतमाहमुनिः ॥ यतः यस्यांदिशिसंकर्षणोंतर्हितस्यैदिशेनमस्कृतामविद्याधरः विद्याधरत्वं

नमेतद्वच्चपारासजननब्रमतोवचोमम ॥ ज्ञानविज्ञानसंपन्नोधारयन्नाशुसिद्ध्यसि ॥ ६४ ॥ श्रीशुकउवाच
आश्वास्यभगवानित्थंचित्रकेतुंजगद्गुरुः ॥ पश्यतस्तस्यविश्वात्माततश्चांतर्दधेहरिः ॥ ६५ ॥ इतिश्रीभा
गवतेमहापुराणेषष्ठस्कंधेषोडशोध्यायः ॥ १६ ॥ श्रीशुकउवाच यतश्चांतर्हितोनंतस्तस्यैकृत्वादिशेनमः
विद्याधरश्चित्रकेतुश्चचारगगनेचरः ॥ १ ॥ सलक्षंवर्षलक्षाणामव्याहतबलेंद्रियः ॥ स्तूयमानोमहायो
गीमुनिभिःसिद्धचारणैः ॥ २ ॥ कुलाचलेंद्रद्रोणीषुनानासंकल्पसिद्धिषु ॥ रेमेविद्याधरस्त्रीभिर्गापयन्हरि
मीश्वरं ॥ ३ ॥ एकदासविमानेनविष्णुदत्तेनभास्वता ॥ गिरिशंददृशेगच्छन्परीतंसिद्धचारणैः ॥ ४ ॥

प्राप्तः विद्याधरैरितिपाठेतैःसहचित्रकेतुर्गगनचारीसन् तातत्रतत्रचचार ॥ १ ॥ तदेवाह सइति ॥ महायोगीभगवान्सचित्रकेतुरव्याहतंबलंयेषांतानींद्रि
याणियस्यताहशोलक्षवर्षाणांलक्षंबहुकालमित्यर्थः ॥ मुनिभिःसिद्धचारणैश्चस्तूयमानः ॥ २ ॥ नानाविधाःस्वसंकल्पानुसारिणःसिद्धयःभोगभो
गोपकरणादिसिद्धयोयासुकुलाचलेंद्रस्यमेरोर्द्रोणीषुविद्याधरैश्चस्त्रीभिरीश्वरंहरिंगापयन्गानंकारयन्रेमे ॥ ३ ॥ सचित्रकेतुःकदाचिद्विष्णुदत्तेनय

भा० ष० थासंकर्षणं भगवताद्दत्तेन भाववत्ता प्रकाशमानेन तद्वेतत्र गच्छन्नसंचरन्नसिद्धैर्योगिभिः स्वपरीतं रूद्रं ददर्श ॥ ७ ॥ कथं भूतं तं कृत्स्नमंकेउत्संगे कृतां विधायितां देवी
२९६ मंबिकां बाहुना स्वलिंगभिनिवां मननशीलानां संसदि सभायां स्थितमिति शेषः ॥ ततो देव्यां शृण्वत्यां सत्यां उवाच ॥ जहास च हसितवांश्च ॥ ५ ॥ तदेवाह
त्रिभिः ॥ एषरुद्रः ॥ मातालोकानां गुरुर्द्विजोपदेष्टा किंच शरीरिणां धर्मवक्ता मुख्यः प्रधानः स्वयमीदृशः सन् सभायां भार्यया मिथुनीभूयास्ते ॥ ६ ॥ किं
च जटाधिभृतीतितपा तीव्रं सुमहनीनं तं वा तपो यस्य स ब्रह्मवादी ब्रह्मज्ञानोपदेष्टा एव च सभायाः पतिः प्रधान एवं भूतोपि लज्जाहीनः ॥ अंके स्त्रियं कृत्वा
निधायास्ते उपविष्टवान् ॥ किंच प्राकृता अपि विविक्तप्रदेशे रहस्येव स्त्रियं बिभ्रति निधायंति ॥ अयं तु महाव्रतधरो सभायामेव स्त्रियमंके विभर्ति ॥

आलिंग्यांकीकृतां देवीं बाहुना मुनिसंसदि ॥ उवाच देव्याः शृण्वत्या जहास मोच्चैस्तदंतिके ॥ ५ ॥ चित्रकेतुरु
वाच ॥ एष लोकगुरुः साक्षाद्धर्मं वक्ता शरीरिणां ॥ आस्ते मुख्यः सभायां वै मिथुनीभूय भार्यया ॥ ६ ॥ जटाधरस्तीव्र
तपा ब्रह्मवादिसभापतिः ॥ अंकीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो यथा ॥ ७ ॥ प्रायशः प्राकृताश्चापि स्त्रियं रह
सि बिभ्रति ॥ अयं महाव्रतधरो बिभर्ति सदसि स्त्रियं ॥ ८ ॥ श्रीशुक उवाच भगवानपि तच्छ्रुत्वा प्रहस्यागाधधीर्नृ
प ॥ तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः ॥ ९ ॥ इत्यतद्वीर्यविदुषि ब्रुवाणे व्यशोभनं ॥ रुषाह देवी धृष्टाय निर्जि
तात्माभिमानिने ॥ १० ॥

यन्महानव्यन्यासमतिभावः ॥ ८ ॥ ततस्तच्चित्रकेतोर्वचः श्रुत्वापि भगवान् रुद्रः अगाधा गंभीरा धीर्यस्य तादृशो ऽतएव
प्रहस्य तूष्णीं बभूव देवेनपतत्या तं रुद्रमनुव्रतास्तदनुव्रताः सभ्याश्च तूष्णीं बभूवुः ॥ ९ ॥ अतद्वीर्यविदुषि तस्य रुद्रस्य वीर्यं प्रभावं तेजो यस्तं
नदोषायेतिस्मायंततेजो विशेषं विद्वांस्तस्मिंश्चित्रकेतौ इत्थं ब्रह्म ब्रह्मात्मकं शोभनं शिवं प्रति ब्रुवाणे सति देव्यंबिका निर्जितात्माभिमानिने तस्मै
वद्धृष्टाय चित्रकेतवे रुषा क्रोधेनोवाच ननु तदनुव्रता सभ्यास्तूष्णीं बभूवुः कथं सभा मनुव्रता भवतिस्म अस्मात् तदनुव्रता देवी चित्रकेतुं शशाप ननीत्या २९६

तदेवाह ॥ अयमित्यादिना किल्विषमितिस्यं तेन तावत् तद्रूपालभंत इत्याभ्यां अयमधुना किमर्थमागत इति शेषः अहो स्मान् दंडयितुमधुना यममात् तन्वपुण्
येभ्यः ॥ तदेवाह अहो नि ले ज्ञानामस्मद्विधानां दुष्टानामयं शास्ता द्विता हितयोर्विविच्य ज्ञापकः शासनातिवर्त्तिते दंडधरः दंडयिता प्रभुर्दंडने स
मर्थः स्वातरग वि प्रकृत दमनकारी ॥११॥ अहो पद्मयोन्यादयो धर्मं न विदंतिपतस्ते तिवर्त्तितमर्यादातिवर्त्तिनं हरं रुद्रं नो निषेधंत्ययं त्वधुना
निषेधतस्त्वपालंभंतत्र पद्मयो ब्रह्मा कुमारः सनत्कुमारः मनुः स्वायंभुवः ॥१२॥ तमेवमुपालभ्य वस्पमर्यन्निग्रा इत्स्याह ॥ एषमित्याभ्यां
तावत्यतिपारम्यद्द्वारुद्रं विशिनष्टि ॥ पद्मापद्मयोन्यादीनामनुध्येयं ध्यातुं योग्यं पादाब्जयुग्मं यस्य ॥ जगद्गुरुं जगद्धितोपदेष्टारं स्वयं सान्नान्मंग

देवउवाच ॥ अयं किमधुना लोके शास्ता दंडधरः प्रभुः ॥ अस्मद्विधानां दुष्टानां निहंत्रे ज्ञातो च विप्रकृत ॥११॥ न
वेद धर्मं किल पद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः ॥ न वै कुमारः कपिलो मनुश्च ये नो निषेधंत्यतिवर्तिनं हरं
॥१२॥ एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मंगलमंगलं स्वयं ॥ यः क्षत्रबंधुः परिभूय सूरीन् प्रशास्ति धृष्टस्तदयं हि दं
ड्यः ॥१३॥ नायमर्हति वैकुंठपादमूलोपसर्पणं ॥ संभावितमतिः स्तब्धः साधुभिः पर्युपासितं ॥१४॥ अतः पापीय
सीं योनिमासुरीं याहि दुर्मते ॥ यथेह भूयो महतां न कर्त्ता पुत्र किल्बिषं ॥१५॥
लानां अपि मंगलं ईदृशं हरं सूरीन् पंडितान् परिभूय यस्मात् प्रशास्ति तत्तस्मादयं दुष्टो दुरात्मा दंड्य एव सूरीन् परिभूय जगद्गुरुं गिरिशं शास्ति
निवारयति ॥१३॥ ननु भगवत्केतोपि न दंड्य इत्यत्राह ॥ नायमिति साधुभिः परिसेवितं समत्कृतं यद्वैकुंठस्य भगवतः पादमूलस्य उपसर्पणं मनुसरणं सेवेतिया
वत् तन्नास्त्ययं तत्र संबंधुर्नार्हति कुतः यतोयं भावितात्मसंभवि कस्त्वभिमानवती मतिर्यस्य सः ॥ अतः एव स्तब्धः निश्चलपरश्च स्थितः ॥१४॥ किं तर्हि
एतं तत्राह ॥ अतः भगवत्सेवानर्हत्वाद्धे दुर्मते त्वमासुरीं पापीयसीं योनिं याहि हे पुत्र यथा भूयो महतां किल्विषमपराधं न कर्त्ता न करिष्यसि तथा

भा०टी० ४५

भा·पु· ८७

हेभारततराज्यंत्यक्त्वाऽऽहः सचित्रकेतुर्विमानादवरुह्य मतीमं विकांनम्रेणामनं श्रीप्रसादयामास प्रसन्नां च करोत्॥१६॥ तत्त्देवाह॥ प्रतीत्यादिनाकृत्य रतं
मतीम्प्रति तेन तावन्मम रोषो नास्तीति त्वच्चयन शापं स्वीकरोमि इत्याह॥ हे अम्बविके॥ तन्त्वया दत्तं शापमात्मनोंजलिना प्रतिगृह्णाम्यंजलिं बध्वा स्वीकरो
मि यदि मम हानानुग्रहस्तत्र वा तोतनतु निग्रहइतिभावः तदेवस्पष्टयति॥ देवैर्यद्यन प्रोक्तं निग्रहरूपमनुग्रहरूपं वा तत्सर्वमेवं प्राप्तं कुतः हि य
स्माद्देवैः प्रोक्तं तस्य निग्रहस्यास्य वा जंतोः पूर्वदिष्टं प्राचीनकर्मप्रयुक्तं मोतविरोधि प्राचीनकर्मणा एवं भ्राम्यत्तो नितरां सुखं दुःखमे मा प्रतद्विरो
धि प्राचीनकर्मफलरूपत्वाच्चानुभवेनैव निःशेषनिरस्तकर्मवंधस्य भगवत्साम्यानिरतिशयानंदरूपमहाभ्युदयलाभात्तयानुग्रहरूपत्वम्

श्रीशुक उवाच॥ एवं सन्तप्तश्चित्रकेतुर्विमानादवरुह्य सः॥ प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत॥१६॥
चित्रकेतुरुवाच॥ प्रतिगृह्णामि ते शापमात्मनोंजलिनांबिके॥ देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्टं हि तस्य
तत्॥१७॥ संसारचक्र एतस्मिन् जंतुरज्ञानमोहितः॥ भ्राम्यन्सुखं च दुःखं च भुंक्ते सर्वत्र सर्वदा॥१८॥

तेइतिभावः॥१७॥ एतदेव स्फुटयितुं तावज्जंतूनां कर्मभिन्नमाह॥ संसारचक्र इति॥ एतस्मिंश्चक्रवत्परिवर्तिनि शीलेगर्भे जन्मजरामरणरूपे संसारे सा
नेनाज्ञानेतरेणानादिपुण्यपापात्मकेन कर्मणा मोहितः स्वात्मपरमात्मयाथात्म्यज्ञानरहितः केवलदेहात्माभिमानी जंतुर्भ्राम्यन्सन् पुनः पूर्वपूर्व
वासनानुरूपेणोत्तरोत्तरसुखदुःखहेतुभूतानि कर्माणि कुर्वन् तत्फलं सुखदुःखं च भुंक्ते॥ एतन्न केवलमन्येषामेव जंतूनां किंतु तवापीत्याशयेनाह स
र्वत्र सर्वदा यावन्मुक्ति एतत्समानमिति भावः॥ अस्य यावत्तदेव तनाद्यनादि कर्मप्रयुक्त देहात्माभिमानमूलकः को धरएवतस्मादितिभावः॥१८॥ ८७

यत एवं मत्कारस्त्वत्कारः सुखदुःखादिकं सर्वमेतदनादिकर्मनिमित्तमेव अतस्तिरस्कर्तुं मम न शापं स्मात्तव वचनदोष इत्याह नैवेति ॥ सुखदुःखयोः कर्त्तारं कः सुख
दुःखापादकस्तत्रपृष्ठः ॥ आत्मा स्वयं परो वा स्वतन्त्रस्त्वन्नभवति किं तु तयोः कर्मैव निमित्तमिति भावः ॥ कर्मणः क्षणिकत्वाज्जडत्वाच्च कथं कार्यं तत्र भावि
सुखदुःखनिमित्तं तत्राह ॥ कर्त्तारमिति ॥ प्राज्ञः पुण्यपापयाथात्म्यविस्मरणात्मानं परमपुरुषमेव सुखदुःखयोः कर्त्तारं मन्यते अयं भावः ॥ पुण्यपापे हि
परमात्मनो निग्रहानुग्रहरूपेण ज्ञेयः तिस्मरत्स्याथात्म्यकशास्त्रार्थानुवर्त्तिन्यनुग्रहः परमपुरुषस्य स एव हि पुण्यं नाम ॥ अननुवर्त्तिनि तु निग्रहः स एव
हि पापं एवं च परमपुरुष एव स्वशास्त्रानुवर्त्यननुवृत्तिनिमित्तानुग्रहनिग्रहरूपपुण्यपापफलमत्र तथैव सुखदुःखयोः कर्त्तेति ॥ १९ ॥ एवं वैषयिकसु-
खदुःखयोः पुरुषार्थत्वापुरुषार्थत्वाभ्युपगमेन कर्मानुसारेणोपस्थितवरशापयोः कर्तृत्वमुक्तं ॥ इदानीं वैषयिकसुखं विषमिश्रक्षीरवदन्ततो दुःखहेतुत्वादपुरु-

नैवात्मा न परश्चापि कर्त्ता सुखदुःखयोः ॥ कर्त्तारं मन्यते प्राज्ञ आत्मानं परमेव च ॥ १९ ॥ गुणप्रवाह एतस्मि-
न् कः शापः को न्वनुग्रहः ॥ कः स्वर्गो नरकः को वा किं सुखं दुःखमेव च २०

षार्थरूपमेवेत्याह ॥ गुणप्रवाह इति गुणानां प्रकृतेर्गुणानां सत्त्वरजस्तमसां प्रवाहे परिणामरूपे एतस्मिन्प्रकृतिमंडले जंतूनां कः शापः को वानुग्रहः
उभयोर्वैलक्षण्यमेव दुर्वचमेवेति भावः नन्वेवं तयोः स्वरूपं स्वर्गहेतुरनुग्रहो नरकहेतुर्निग्रह इति सुवचमेवेत्यत्राह कः ॥ स्वर्गो नरको वेति स्वर्ग
नरकयोरपि दुर्वचमेवेति भावः ननु स्वर्गः सुखं दुःखं नरकमिति सुवचमित्यत्राह ॥ किं सुखं दुःखमेव वेति ॥ तदप्यपरिस्थितमित्यर्थः ॥ स्वर्गस्य सुख
रूपत्वे दुःखगर्भत्वे तस्मान्नरकस्य दुःखरूपत्वे वा तस्य सुखगर्भत्वात्तस्मात्स्वर्गोऽप्यन्ततो दुःखहेतुर्नरकोऽप्यन्ततः किंचित्सुखहेतुरेवेति ॥ अतउभ-
योरुभयगर्भत्वात्परस्परव्यवस्थितिरिति भावः ॥ शापनरकदुःखानि दृष्टान्ताप्यन्ते योपात्तानि यफतेषु पुरुषार्थत्वं च नास्ति तथानुग्रहस्वसुखेष्वपि

स्पष्टः २०

भा.द.
८८

नन्वेवंविधसुखदुःखभाजानि भूतानि किमकस्मात्स्वयमेवोत्पद्यंते नेत्याह ॥ एक इति भगवान्निरस्तनिखिलदोषः षाड्गुण्यपूर्णः ॥ परमपुरुष।
आत्मनः स्वस्य मायया मेकः निस्समाभ्यधिकः कर्तृतरोपकरणांतरनिरपेक्ष एव भूतानि देवमनुष्यादीनि चिदचिदात्मकानि आब्रह्मस्तंबप
र्यंतानि सृजति न तु तान्यकस्मादुत्पद्यंत इति भावः ॥ तर्हि किं कुलालादिवत्कर्मायत्तदेही भगवान्नेत्याह ॥ निःकलः कर्मायत्तपाणिपादाद्यव
यवात्मकदेहरहितः तस्य वैषम्यनैर्घृण्यादिदोषपरिहाराय भूतानि विशिनष्टि ॥ येषामिति ॥ येषां भूतानां स्वस्वकर्मानुगुणं बंधमोक्षादिकं भव
ति तानि सृजतीत्यन्वयः बंधमोक्षमिति द्वितीयांतपाठे येषां भूतानां तत्तत्कर्मानुसारेण बंधादिकं च सृजति सृष्टवतान्यपि सृजतीति ततो न वैषम्या।
दिदोषप्रसक्तिरित्यर्थः ॥ एषामित्येतत्पाठे बंधमित्यादीनां द्वितीयांतपाठे तु सृष्टानामेतेषां भूतानां तत्तत्कर्मानुसारेण बंधादिकमपि सृजतीत्यर्थः ॥ एवं

एकः सृजति भूतानि भगवानात्ममायया ॥ एषां बंधं च मोक्षं च सुखं दुःखं च निष्कलः ॥ २१ ॥ न तस्य कश्चिद्दयि
तः प्रतीपो न ज्ञातिबंधुर्न परो न च स्वः समस्य सर्वत्र निरंजनस्य सुखे न रागः कुत एव रोषः ॥ २२ ॥

बंधादिकं देवमनुष्या
दिवैचित्र्यं तत्तज्जीवकर्मानुसारेण तेषां ईश्वरकृतमौपाधिकं न स्वरूपप्रयुक्तं भवतीत्यर्थः ॥ २१ ॥ कीदृशं तर्हि जीवस्य स्वरूपं कुतस्तस्य कर्मायत्ता
देवादिवैचित्र्यं बंधादिकं चेत्यपेक्षायामाह न कस्येति वस्तुतः कस्यापि जीवस्य कश्चिद्दयितादिर्नास्ति कुतः ॥ सर्वत्र देवादिशरीरेषु समस्य सम
त्वेनावस्थितस्य ज्ञानैकाकारतया ज्ञानानंदस्वरूपत्वेन चावस्थितस्येत्यर्थः ॥ परस्परतारतम्ये हि प्रियाप्रियादिविभागः ॥ सर्वेषामात्मनामेकरू
पत्वान्न स्वरूपकृतः प्रियाप्रियादिविभाग इति भावः ॥ ननु देवादिरूपेण वैचित्र्यात्कथं समत्वं तत्राह निरंजनस्येति ॥ अंजनं रूपांतरापत्तिः तद्रहितस्य देवा
दिवैचित्र्यस्य प्रकृतिगतत्वाज्जीवस्वरूपगतत्वाभावात्सर्वत्र सम इति भावः । यत एव समो निरंजनश्चात एवातस्य वैषयिकसुखे न रागः नासक्तिः ॥ सु
खैकतानस्वरूपत्वेन वैषयिकसुखलेशे न तस्य राग इति भावः । यत एव सुखे न तस्य रागः कुतस्तस्य वैषयिकलाभप्रतिबंधकविषयो रोषः स्यादित्यर्थः ॥ त
त्र दयितः प्रीतिविषयः स्नेहल इति यावत् प्रतीपः प्रतिकूलः ज्ञातिः सपिंडः बंधुर्वैवाहिकादिसंबंधवान् परो मदीयः स्वः स्वकीयः ॥ २२ ॥

रामः
८८

गवं प्रवृत्तिनिवृत्तिलक्षणां स्वाभाविकं जीवस्वरूपमुक्तमप्येवंभूतस्यैव देवादिवैचित्र्यं बंधादिकं चोपपादयति ॥ यद्यप्येवंभूता जीवास्तथाप्येवं शरीरिणां जीवानां त
द्भक्तिविसर्ग एव तत्स्यात् जीवसंबंधिकर्मणो यामकि तस्मात् विसर्गः सृष्टिरुत्तरोत्तरकर्मवसुखादिरूपसंसृतये मोक्षाय चावकल्पते समर्थो भवतीति तन्निमि
त्तमित्यर्थः ॥ अयं भावस्वभावतः सर्वोक्तविधानामपि बीजांकुरन्यायेनानादिकर्मवासनामात्रावशेषितानां कल्पांते परमात्मन्युपसंहृतानां पुनः कल्पा
दौ परमकारुणिकेन स्वेरणात्स्वाराधनैर्नैतेनित्तरेयुरित्यनुजिघृक्षणा प्रदत्तकरणकलेवरधर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनावबो
धवेदाख्यशास्त्राणामप्यनादिवासनया तन्नोज्ञस्यमनुष्याणां स्वपरविदनाहाराविस्त्याद्युक्तरीत्याऽमानानां पुण्यपापारूपकर्मोपातनतत्फलानुभवपु

नयापि तद्भक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय ॥ बंधाय मोक्षाय च मृत्युजन्मनोः शरीरिणां संसृतये वक
ल्पते ॥ २३ ॥ अथ प्रसादये न त्वां शापमोक्षाय भामिनि ॥ यन्मन्यसे ह्यसाधूक्तं मम तत्क्षम्यतां सति ॥ २४ ॥ श्रीशुक उवाच
॥ इति प्रसाद्य गिरिशौ चित्रकेतुररिंदम ॥ जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः ॥ २५ ॥ ततस्तु भगवान्रु
द्रो रुद्राणीमिदमब्रवीत ॥ देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वतां ॥ २६ ॥ श्रीरुद्र उवाच ॥ नत्तदर्थकर्मोपनिपात

तत्फलानुभवादिपरंपरया सर्वमुपपन्नमित्यर्थः ॥ तत्र हिताहिताय सुखदुःखहेतुभूतधर्माधर्माय मृत्युजन्मनोर्जन्ममरणायेत्यर्थः ॥ तादर्थ्ये संबंध
सामान्ये न विवक्षया षष्ठी प्रयुक्ता मोक्षाय च तद्भक्तिविसर्ग एवावकल्पत इत्यनेन भगवत्प्रसादहेतुः कश्चिद्याद्दच्छिकानुषंगिकप्रासंगिकाद्यात्मत
मपुण्यपापकर्मविशेष एव मोक्षोपायोपसंहारहेतुरिति सूचितं ॥ २३ ॥ एवं वस्तुस्थितिमभिधाय तच्छापोऽनुग्रहरूप एवेति वदन्स्वापराधं क्षमाप
यति अथेति अतः स्वकृतस्थितेरेवंविधत्वात् हे भामिनि शापनिर्हरणाय त्वां न प्रार्थये किं तु हे सति मम मया यद्दुरुक्तमसाधु यद्यपि तथापि मन्यसे तत्क्षम्यतामिति त्वां प्रा
र्थये ॥ २४ ॥ इतीत्थं गिरिशं पार्वती प्रसाद्य प्रसन्नां कृत्वा चित्रकेतुर्हि अरिंदम स्मयतोरस्मात्प्रत्ययं प्राप्तयोस्तयोर्भवभवान्योः पश्यतोः सतोर्विमानेन गमनसा

भा० ष०
२९

कोपीति क्रुद्धः अंबं दृश्यमानां देवर्षिं ब्रुवतीनां स्वपार्षदानां च शृण्वतां सतीमब्रवीत् ॥२६॥ तदेवाह दृष्टवतीत्यादिना समदर्शित्वं तेन ॥ हे सुश्रोणि अद्भुत
कर्मणः विविधविचित्रस्वाभाविकक्रियाशक्तेर्भगवतो भृत्यवर्गाणां महात्म्यं दृष्टवत्यसि कं भृत्यानां निस्पृहाणां वैषयिकं सुखमनिच्छतां महात्म
नाम पकर्तेष्वप्युपकर्तृत्वबुद्धीनां सुखदुःखयोः समबुद्धीनां चेत्यर्थः ॥२७॥ एतदृष्टांतेनान्यान्यपि भगवद्भक्तानीदृशान्येवेत्याह ॥ नारायणपराः इति सर्वे
नारायण एव परः परमतत्वं येषां ते कुतश्चनापि चौरसर्पनिग्रहादेर्न बिभ्यति भयं न कुर्वंति ॥ कुतस्ते यतः स्वर्गादिष्वपि तुल्यार्थदर्शिनः तुल्यप्रयोजनद
र्शिनः विपर्यार्थदर्शनमेव भयहेतुरिति भावः ॥ अपवर्गोत्र कैवल्यमोक्षस्य भगवदनुग्रहरूपत्वेन तेषां तस्य स्वर्गादितुल्यं कल्पनानुपपत्तेः ॥ यद्वा ॥ अत्र

दृष्टवत्यसि सुश्रोणि हरेरद्भुतकर्मणः ॥ माहात्म्यं भृत्यानां निःस्पृहाणां महात्मनां ॥२७॥ नारायणपराः
सर्वे न कुतश्चन बिभ्यति ॥ स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥२८॥ देहिनां देहसंयोगाद्द्वंद्वा
नीश्वरलीलया ॥ सुखं दुःखं मृतिर्जन्म शापोनुग्रह एव च ॥२९॥

पवर्गो भक्तिरेव भावद्दास्यमंतरेण तेषां न प्रयोजनं किं पुनः स्वर्गादिस्तेषां न प्रयोजनमिति सूचनार्थं चापवर्गशब्दः प्रयुक्तः स्वर्गस्यापि नरकतु-
ल्यताख्यापनाय नरकग्रहः यथा नरकस्तथा स्वर्गोपीत्यर्थः ॥ तथा चोक्तं एते वै निरयास्तात स्थानस्य परमात्मनः इति वासुदेवे मनो यस्य जपहोमार्च
नादिषु तस्यांतरायो मैत्रेय पदेंद्रत्वादिकं फलं इति च स्वर्गादिषु तुल्यार्थदर्शिनः इत्यनेन विषमदर्शनं भयहेतुरिति सूचितं ॥२८॥ तत्र समदर्शनमि-
ति तं वक्तुं तावद्विषमदर्शनमित्याह ॥ देहिनामिति ॥ चाभ्यां तावद्देहिनां जीवानां ईश्वरलीलया हेतुभूतया ईश्वरलीलात्मिकया जगत्सृष्ट्या यो देह
संबंधस्तस्मादेव सुखदुःखादीनि द्वंद्वानि भवंति न तु स्वरूपतः इति निर्विवादं देहसंयोगमात्रमेवेश्वरलीलाभूतताहेतु ॥ न तु द्वेषवादेहयोगविचित्र्ये रामः
वा हेतुरिति तात्पर्यं २९ २९

नोहितत्र कोहेतुस्तत्राह॥ अविवेककृत इति आत्मनि ज्ञानैकाकारे जीवे यर्थभेदः स्वदेवमनुष्यादिभेदः स्वगुणाकामदोषविकल्पः गुणाः सुखजन्म
तुपद्माः दोषाः दुःखमतिशापारोषां विकल्पः भेदः॥ अविवेककृतः अनादिकर्मनिमित्तो यो देहात्मभ्रांतिरूपो विवेकः तेन कृतः तस्मिन्निमित्त
त्तमर्थः॥ अर्थभेदस्याविवेककृतत्वसिद्धवत्कारेण दृष्टांतितः उभयमप्यविवेककृतमितितात्पर्यं॥ अतएवार्थभेदस्याविवेककृतत्वं देहात्मभ्रा
तिमतापरूपाणामत्र प्रसिद्धमितितस्य दृष्टांतमस्वरसमित्यभिप्रेत्य तत्र प्रसिद्धं दृष्टांतरमाह॥ भिदेव स्वप्नकल्पितेति यथा स्वप्नद्रष्टुः स्वस्मिन्वस्तुतो
विद्यमानराजर्कधारोहणादेशांतरगमनराज्याभिषेकशिरश्छेदाद्यहेदेहभेदस्तन्मात्रानुभाव्यः तत्कालमात्रावसायी च तत्तत्कर्मनिमित्त
देहात्मभ्रांत्याद्यनुगुणमीश्वरकल्पितो विवेककृतस्तथा जाग्रदवस्थानुभाव्यसुखदुःखादिकं द्वंद्वजालानि देवादिवैचित्र्याणि च तत्तत्कर्मतन्त्र

अविवेककृतः पुंसो ह्यर्थभेद इवात्मनि॥ गुणदोषविकल्पश्च भिदेव स्रजिवत्कृतः॥२०॥
वासुदेवे भगवति भक्तिमुद्वहतां नृणां॥ ज्ञानवैराग्यवीर्याणां नेह कश्चिद्व्यपाश्रयः॥२१॥

त्मकदेहात्माभिमानाद्यनुगुणमीश्वरकृतान्यप्यविवेकमूलान्येवेतिभावः॥ एवं भयनिमित्ते विषमदर्शने विवेको हेतुरित्युक्तम् अथ नारायण
परायणानां ईदृशाविवेकाभावात्कचित्कदाचिदप्यजातस्याविवेकस्य पुनस्त्वात्मपरमात्मयाथात्म्यावमर्शनेन तदपोहात्तन्मूलकं विषमदर्शनं तत
मूलकं भयदर्शनं च नास्तीत्याह वासुदेव इति॥ ज्ञानं शास्त्रजन्यं प्रकृतिपुरुषेश्वरयाथात्म्यावमर्शनं तदपोहात्तन्मूलत्वाद्युक्तं वैराग्यं शब्दादिविषयेष
नामसक्तिरूपं तदुभयं एव वीर्यं बलं येषां तेषां वासुदेवे भगवति निरतिशयानंदरूपे भक्तिमुद्वहतां कुर्वतां नृणां कुतश्चिदपि हेतोर्व्यपाश्रयः अपगत
आश्रयः यस्मात्स विषमदर्शनाव्यपाश्रयः॥ आक्रियमाणाः परमात्मा व्यपगतो भवति विस्मृतो भवति ताहृशविषयदर्शनं नास्तीत्यर्थः॥ निरंतरप्रकृति
पुरुषेश्वरयाथात्म्यावलोकनतस्त्वयुक्तवैराग्यबलविस्मृतदेहतदनुबंधितकर्माणां निरतिशयानंदरूपभगवद्भक्तिनिष्ठानामविवेकाभावात

भा॰ष॰
५०

कचित्केनापि चित्कापि तस्याप्युक्तविधज्ञानवैराग्यबलेन तत्तन्निरसनशीलत्वाच्च तेषां विषमदर्शनमेव नास्ति कुतस्तन्निमित्तं भयमिति भावः ॥ ३१ ॥ एवं स्व
भार्यायै नारायणपरायणानां माहात्म्यमजानत्यै तत्त्वं दर्शितं रुद्रेणाथ स्वीयस्वभावत्वात्सर्वेश्वरे सर्वकारणे त्वयि त्वद्भक्तेषु वा कृत्स्नज्ञत्वनियामकता रा
यणस्य तद्भक्तानां वा समुद्रे विन्दुरेव किंयदेतन्महात्म्यमित्याशङ्कमानां पार्वतीमाह ॥ नाहमिति ॥ अहं रुद्रः अस्मदादयो यस्य नारायणस्येहितं भावेक्तः ॥
ईहां चेष्टां तत्त्वरूपं च न विदामः न जानीमः ईहां च जगद्व्यापाररूपां चेष्टां अज्ञाने हेतुः अंशांशकाः तदाहित तज्ज्ञानशक्तिलेशयुक्ताः तन्मात्रेणैव वयम
पि पृथगीश्वरा इत्यभिमानयुक्ताः अनेन स्वस्मिन्सर्वेश्वरत्वशङ्का निवर्त्तिता ईहितं न विदाम इत्यनेन कारणत्वशङ्कापि सृष्ट्यादिव्यापारस्य तत्कर्तृत्व
कथनात्तत्त्वरूपं च न विदाम इत्यनेन तत्स्वरूपस्यानन्तमहिमशालित्वमपरिछिन्नत्वं चोक्तं ॥ तत्र विरिंचो ब्रह्मा कुमारः सनत्कुमारः ॥ ब्रह्मपुत्रा मरीच्या

नाहं विरिंचो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः सुरेशाः विदाम यस्येहितमंशकांशका न तत्स्वरूपं पृथगीश
मानिनः ॥ ३२ ॥ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोपि वा ॥ आत्मत्वात्सर्वभूतानां सर्वभूतप्रियो हरिः ॥ ३

दयः मुनयः तद्व्यतिरिक्ता अन्ये मुनयः सुरेशा इंद्रादयः ॥ ३२ ॥ यद्ययं सर्वेश्वरः सर्वकारणभूतः तर्ह्यस्य वाक्कृतस्य वा श्रितेष्वेव विशिष्टोक्तविधमहा
त्म्यापादकः किमयं पक्षपातः तत्राह नहीति ॥ अस्य नारायणस्यातीव प्रियादिः कश्चिन्नास्ति तत्र हेतुरात्मत्वात्सर्वभूतानां ब्रह्मादिस्तंबपर्यंतानां
चिदचिदात्मकानां भूतानामात्मत्वादंतरात्मत्वात् ॥ न ह्यात्मन एकं शरीरं प्रियमेकमप्रियं भवतीति भावः ॥ यत एवात्मा सर्वभूतानामतस्तेषामाश्र
यः धारकः अंतः प्रविश्य भर्त्तेत्यर्थः सर्वभूताश्रयः इत्यनेन शरीराणां सर्वभूतानामात्मपरमात्मानुवर्त्तनं युक्तमिति सूचितं ॥ न हि शरीरमात्मानमन
नुवर्त्यावतिष्ठते शरीरस्यात्मानुवर्त्तनस्वभावत्वात् ॥ हरिरित्यनेन स्वानुवर्त्तिनामार्त्तिहरत्वं सूचितं ॥ एवं च यः स्वाभाविकं जीवपरमात्मनोः शरीरात्मभा
वं ज्ञानं तस्यमनुवर्त्तंते ते प्रतस्यानुग्रहस्तत्रैव तदाभाव इति तात्पर्यं ॥ अत एव तस्य वैषम्यमित्यपि सूचितं न ह्यनुवर्त्तिष्वनुग्रहमात्रेण तस्य वैष

म्यं न ह्याश्रितानीष्टप्रदस्य सीष्टप्रदानमात्रेण तस्य वैष

५०

म्यपादयितुं शक्यं ॥ ३३ ॥ यतएवायमात्माभूतानामाश्रितानामभीष्टार्पको विषमस्ततएव चित्रकेतुवदहमपितमेवोपासइत्याह तस्येति म
हाभागो विवेकी सर्वत्रसमदृक् शांतश्च चित्रकेतुस्तस्य नारायणस्यानुगः अस्य भक्तस्ततएव प्रियः निरतिशयप्रीतिविषयः तथाहमप्यच्यु
तस्य प्रियः तस्मिन्निमित्तभक्तिमांश्च ॥ ३४ ॥ तस्मान्महापुरुषस्य भगवतो भक्तेषु महात्मसु प्रकृतिपुरुषेश्वरयाथात्म्यावगमेन च वैराग्यवि
तेषु ततएव समदर्शिषु शांतेषु विरक्तेषु पुरुषेषु न विस्मयः कार्यः ॥ ३५ ॥ भगवतः शिवस्यैतत्पूर्वमभिभाषितं वचः श्रुत्वा गौरी देवी विगतवि
स्मया विस्मयारहिता शांतधीः क्रोधरहिता च बभूव ॥ ३६ ॥ ततो भागवतश्चित्रकेतुर्गौर्याः प्रतिशप्तुं प्रतिशापं कर्तुं समर्थोपि तस्याः ॥ शापं मू

तस्य चायं महाभागश्चित्रकेतुः प्रियोनुगः ॥ सर्वत्र समदृक् शांतो ह्यहं चैवाच्युतप्रियः ॥ ३४ ॥ तस्मान्न
विस्मयः कार्यः पुरुषेषु महात्मसु ॥ महापुरुषभक्तेषु शांतेषु समदर्शिषु ॥ ३५ ॥ श्रीशुक उवाच ॥ इति श्रुत्वा
भगवतः शिवस्योमाभिभाषितं ॥ बभूव शांतधी राजन् देवी विगतविस्मया ॥ ३६ ॥ इति भागवतो देव्याः प्रति
शप्तुमलंतमः ॥ मूर्ध्ना संजगृहे शापमेतावत्साधुलक्षणं ॥ ३७ ॥ जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रि
तः ॥ वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ॥ ३८ ॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृष्टवानसि ॥ वृत्रस्यासु
रजातेश्च कारणं भगवन्मतेः ॥ ३९ ॥ मूर्ध्ना संजगृहे शिरसोवाह साधूनां लक्षणमेतावदिहापकर्तर्यप्युपकर्तृत्वबुद्धिमत्वमव
हि साधूनां लक्षणमित्यर्थः ॥ ३७ ॥ यतः पृष्टं राज्ञा वृत्रस्यासुरस्वभावस्य नारायणे भगवति कथमासीद्दृढा मतिस्तस्योत्तरं संगमयति जज्ञ इति यो
यमुक्तविधश्चित्रकेतुः सएव त्वष्टुः संकल्पाद्दक्षिणाग्नौ जज्ञे जातः ॥ सएवासुरीं योनिमासुरं भावमाश्रितः वृत्र इत्यभितः विख्यातः प्रसिद्धः सपू
र्वजन्मसिद्धभगवद्भक्त्यास्मिन्नपि जन्मनि ज्ञानविज्ञानाभ्यां युक्तः ॥ ३८ ॥ एवं तत्प्रश्नस्योत्तरमुक्तमित्याह एतदिति ॥ यत्त्वमसुरजातेर्वृत्रस्य भग॰

भा॰ष॰ वतिस्म तेर्मैकैः कारणापरिष्टक्तमिपर्यटन्तस्योतरमेतत्सर्वंप्रवंचतेतुभ्यंमयाख्यातं कथितं ॥ २९ ॥ अस्याचित्रकेत्विति हासस्यश्रवणा
४१ दिफलमाह ॥ इतिहासमिमिति ॥ महात्मनश्चित्रकेतोः संबंधिनंपुण्यमिममितिहासंविष्णुभक्तानांमहात्म्यसूचकंश्रुत्वाबंधात्संसारबंधाद्वि
मुच्यतेश्रुतोभवेत् ॥ ४० ॥ यः प्रातरुत्थायश्रद्धावान्वाग्यतः नियमितवाक् हरिंस्मरत्वारत्नमिमितिहासंपठेत्सपरमांगतिंसर्वोत्कृष्टांभगव
त्संपदाप्नुयात् वक्त्रापठनाभ्यांपापानैः परिनिष्ठान्नभक्तियोगोभवेदितिभावः ॥ ४१ ॥ इति षष्ठे सप्तदशः ॥ १७ ॥ एवंदाक्षायण्याः कश्यपस्य

इतिहासमिमंपुण्यंचित्रकेतोर्महात्मनः ॥ माहात्म्यंविष्णुभक्तानांश्रुत्वाबंधाद्विमुच्यते ॥ ४० ॥ यएतत्प्र
ातरुत्थायश्रद्धयावाग्यतः पठेत् ॥ इतिहासंहरिंस्मृत्वासयातिपरमांगतिं ॥ ४१ ॥ इति श्रीभागवते मह
पुराणे षष्ठस्कंधे सप्तदशोऽध्यायः ॥ १७ ॥ श्रीशुक उवाच ॥ पृश्निस्तुपत्नीसवितुः सावित्रींव्याहृतिंत्रयीं ॥ अ
ग्निहोत्रंपशुंसोमंचातुर्मास्यंमहामखान् ॥ १ ॥ सिद्धिर्भगस्यभार्यांगमहिमानंविभुंप्रभुं ॥ आशिषंचवरारो
हांकन्यांप्रासूतसुव्रतां ॥ २ ॥ धातुः कुहूः सिनीवालीराकाचानुमतिस्तथा ॥ सायंदर्शमथप्रातः पूर्णमासमनु
क्रमात् ॥ अग्नीन्पुरीष्यानाधत्तक्रियायांसमनंतरः ॥ ३ ॥

भार्यापुत्रादितेर्वंशानुपक्रमस्यविवस्वदर्यमपूषत्वष्टाणांवंशमभिधायततस्त्वष्टुर्वंशप्रसंगादनुप्रसक्तंचाभिहितमथसवित्रादीनांवंशमनुक्रमतेषु
भिः ॥ पृश्निरित्यादिना ॥ सवितुः पत्नीपृश्निः सावित्र्याद्यभिमानीदेवताः प्रासूततेत्वदारम्यानुषंगः ॥ पशुंपशुयागंतदभिमानीदेवताविशेषमि
तिएवमुत्तरत्रापिमहामखान्महायज्ञान् ॥ १ ॥ एवंभगस्यभार्यासिद्धिरितित्रमिद्धा अंगादीश्चतुरः पुत्रान्सुहृतान्सुशीलान्वरारोहामहा
त्म्यंतसुंदरीमार्षीनाम्नीकन्यांचप्रासूतधापत्नीकुहूः परंमत्स्यश्चतस्रः अनुक्रमात्सायादीनचतुः पुत्रान् ॥ २३ ॥ रामः
४१

तथाधातुः समनंतरो विधाता क्रियायां पत्न्यामग्नीन्पुरीष्यसंज्ञकानिष्टकचिताग्नीनाधत्त जनयामास वरुणस्य चर्षणीति वसिष्ठा भार्या आसीत् भृगुः
पूर्वं ब्रह्मणः पुत्रो यस्सोपुनर्जातः तथा वरुणस्यैव पुत्रो वाल्मीकिर्महायोगी वल्मीकादभवदेतौ वरुणस्यासाधारणौ पुत्रौ ४ ५ तथा रेवत्यां भार्यायां
मित्रस्योत्सर्गादयोसाधारणासुताः उभयोरसाधारणौ सुतावगस्त्यवशिष्ठावृषी कथमेकैकस्योभयसुतत्वं तत्राह रेत इति कदाचिन्मित्रावरुणौ
उर्वश्याश्रमसमः संनिधौ द्रुतं स्खलितरेतः कुंभे घटे सिक्तवंतौ तत्र कुंभे वशिष्ठागस्त्यौ जातौ इति भावः ५ रेवत्यामित्यर्द्धं व्याख्यातप्रायं व्यधाज्जनया
मास ॥ ६ ॥ हे तात प्रभुरिंद्रः शक्रः पौलोम्यां शच्यां पत्न्यां जयंतमृषभं तृतीयमीढुषं इति त्रीन्पुत्रानजनयदिति नोस्माभिः श्रुतं ७ तथोरुक्रमस्य त्रिभिः

चर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः ॥ वाल्मीकिश्च महायोगी वल्मीकादभवत्किल ॥ ४ ॥ अगस्त्य
श्च वसिष्ठश्च मित्रावरुणयोरृषी ॥ रेतः सिषिचतुः कुंभे उर्वश्याः सन्निधौ द्रुतं ॥ ५ ॥ रेवत्यां मित्र उत्सर्गमरिष्टं
पिप्पलं व्यधात् ॥ ६ ॥ पौलोम्यामिंद्र आधत्त त्रीन्पुत्रानिति नः श्रुतं ॥ जयंतमृषभं तात तृतीयं मीढुषं प्रभुः
७ ॥ उरुक्रमस्य देवस्य मायावामनरूपिणः ॥ कीर्तौ पत्न्यां बृहच्छ्लोकस्तस्यासन्सौभगादयः ॥ ८ ॥ तत्कर्मगु
णवीर्याणि काश्यपस्य महात्मनः । पश्चाद्वक्ष्यामहेदित्यां यथैवावततार ह ॥ ९ ॥

पादक्रमैस्त्रैलोक्यमाक्रांतवतो मायया आत्मीयसंकल्पेन वामनस्वरूपेणावतीर्णस्य कीर्त्याख्यायां भार्यायां बृहच्छ्लोकः पुनस्तस्य बृहच्छ्लोकस्य
सौभगादयः पुत्रा आसन् ॥ ८ ॥ कश्यपपुत्रस्य महात्मन उरुक्रमस्य तानि प्रसिद्धानि कर्माणि पदत्रयेण लोकत्रयप्राप्त्यादीनि गुणाः स्वभक्तविषय
कानुग्रहादिसर्वेषां तत्त्वादयः वीर्याणि उत्कृष्टगुणैरन्येभ्य उत्कर्षो हि वीर्यं तद्रूपाणि च पश्चाद्दशमस्कंधे वक्ष्यामस्तथादित्यां येन प्रकारेणावतीर्णवां
स्तं प्रकारं च तत्रैव वक्ष्याम ॥ ९ ॥ एवं साकल्पेनादितेर्वंशमनुक्रम्यापदितेर्वंशस्यानुक्रमं प्रतिजानीते ॥ १० ॥

भा॰ष॰
५२

अथेति॥ काश्यपादीनां विवस्वदादीनामादितेयानां दायादान्सपिंडान्शत्रून्वा दैतेयान्दितेः पुत्रान्तेषु मध्ये कीर्तयामि तद्वंशो भागवतानाम भा
वान्नतत्तु वर्णमामाप्रेतितमिति राज्ञोभिप्रायमालोच्याह॥ यत्रेति वैष्णवश्रीमान्भगवत्तानुकल्पकल्याणगुणसंयुक्तः महाभागवतः प्रह्लादः
बलिश्च वैसत्वतुः॥१०॥ तर्हि कथयेत्यत्राह दित इति दितेर्द्वौ वैव दायादौ देवानां शत्रू मरुतामदायादाहृस्ववसमानात्वाहृ वे वेत्युक्तं प्रयौ दे
त्यैस्तत्तुत्रपोत्वादिभिर्दानवैश्च वंदितौ वभवतुः॥ तौ च हिरण्यकशिपुर्हिरण्याक्षश्च कीर्तितौ प्रख्यातौ॥११॥ तत्र हिरण्यकशिपोर्भार्या भिर्मस्य

श्यथ कश्यपदायादान्दैत्येयान्कीर्तयामि ते॥ यत्र भागवतः श्रीमान्प्रह्लादो बलिरेव च॥१०॥ दितेर्द्वा
वेव दायादौ दैत्यदानववंदितौ॥ हिरण्यकशिपुर्नाम हिरण्याक्षश्च कीर्तितौ॥११॥ हिरण्यकशिपोर्भार्या
कयाधुर्नाम दानवी॥ जंभस्य तनया सा तु सुषुवे चतुरः सुतान्॥१२॥ संह्रादं प्रागनुह्रादं ह्रादं प्रह्लादमेव
च॥ तत्स्वसा सिंहिका नाम राहुं विप्रचित्तोग्रहीत्॥१३॥ शिरोहरद्यस्य हरिश्चक्रेण पिबतोमृतं॥ संह्राद
स्य कृतिर्भार्यासूत पंचजनं ततः॥१४॥ ह्रादस्य धमनी भार्यासूत वातापिमिल्वलं॥ योगस्त्यायत्वतिथये प
पे चेवातापिमिल्वलः॥१५॥ इह्रिता दानवी दनुवंशोद्भवा कयाधुरिति प्रसिद्धा सा कयाधुः प्रह्लादीन्चतुरः सुतान्सुषुवे॥१२॥ प्रागग्र
थमं प्रह्लादं ततः क्रमेणानुह्रादसंह्रादान्सुषुवेत्यर्थः॥ तत्स्वसा तेषां प्रह्लादादीनां स्वसा भगिनी सिंहिकेति प्रसिद्धा बभूव॥ सा विप्रचितेर्भर्तुः
दानवात्सिंहिकायां राहुं पुत्रमग्रहीत् सुषुवे इत्यर्थः॥१३॥ राहुं विशिनष्टि शिर इति॥ यस्य राहोरमृतं पिबतः शिरश्चक्रेण चिच्छेद॥ संह्रादस्य हिरण्य
कशिपोः सुतस्य कृतनाम भार्या पंचजनाख्यं सुतमसुत॥१४॥ तथा ह्रादस्य धमनीति प्रसिद्धा वातापिमिल्वलं चासूत॥ इल्वलं विशिनष्टि॥ य इति॥
अतिथयेतिथ्यार्थं निमंत्रितायागस्त्याय इल्वलो मेषरूपं वातापिं पेचे पपाचेत मित्यन्वयः॥ इल्वल इति प्रयुक्तं न पारक्तं सुगमः॥१५॥ ५२

तथानुह्रादस्य सूर्यायां वाष्कलो महिष इति द्वौ पुत्रौ बभूवतुः॥ तथा धुम्यां प्रह्रादस्य भार्यायां विरोचनस्य पुत्रो बलिरभवत्॥१६॥ ततो बलेः अशना-
यां वाणः ज्येष्ठो यस्य तत् पुत्राणां शतमभवत् तस्य बलेः अनुभावः सुश्लोकः अतीव वर्णनीयः स पश्चादेव अष्टमे स्कंधे एव कथयिष्यति
॥१७॥ वाणस्तु गिरिशं रुद्रमाराध्य तद्गणेषु मुख्यतां लेभे॥ तदेवं जयन वाणं विपिनष्टि॥ यस्य वाणस्य पार्श्वे अद्यापि पुरपालकः सन् भगवान् वाधि-
रिपान्वास्ते॥१८॥ अस्मानपि दितेः पुत्रानाह॥ मरुतश्चेति॥ चकारो हिरण्यकशिपुहिरण्याक्षयोः समुच्चयार्थः॥ मरुतो मरुद्गणाश्चत्वारिंशन्नवाधि॰

अनुह्रादस्य सूर्यायां वाष्कलो महिषस्तथा॥ विरोचनस्तु प्राह्रादिः देव्यां तस्याभवद्बलिः॥१६॥ वाणज्येष्ठं
पुत्रशतमशनायां ततोभवत्॥ तस्यानुभावः सुश्लोक्यः पश्चादेवाभिधास्यते॥१७॥ वाण आराध्य गिरिशं
लेभे तद्गणमुख्यतां॥ यत्पार्श्वे भगवानास्ते ह्यद्यापि पुरपालकः॥१८॥ मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवा-
धिकाः॥ त आसन्नप्रजाः सर्वे नीता इंद्रेण सात्मतां॥१९॥ राजोवाच॥ कथं त आसुरं भावमपोह्यौत्पत्तिकं
गुरो॥ इंद्रेण प्रापिताः सात्म्यं किं तत्साधु कृतं हि तैः॥२०॥ इमे श्रद्दधते ब्रह्मन्नृषयो हि मया सह॥ परि-
ज्ञानाय भगवंस्तन्नो व्याख्यातुमर्हसि॥२१॥

काः एकोनपंचाशत्संख्याकाः दितेः पुत्रा एव ते सर्वे मरुतः अप्रजाः अपुत्रा आसन् ते चेंद्रे-
ण सात्मतां समानरूपत्वं देवत्वं इति यावत् नीताः प्रापिताः॥ अतो न ते देवानां दायादा इति भावः॥१९॥ एतदेव शुश्रूषुः पृच्छति राजा द्वाभ्यां कथमिति हे गुरो
तु नैते मरुतः कथमौत्पत्तिकं जन्मसिद्धमासुरं भावमपोह्य त्यक्त्वा इंद्रेण सात्म्यं देवत्वं प्रापिताः देवत्वं प्रापितैर्मरुद्भिः किं तस्येंद्रस्य साधु हितं कृतं॥२०॥
न केवलमिदमहमेव शुश्रूषुः अपितु हे ब्रह्मन् इमे ऋषयोऽपि परिज्ञानाय वेदितुं श्रद्दधते श्रद्धां कुर्वंति अतो हे भगवन् नोऽस्मभ्यं व्याख्यातुं कथयितुमर्हसि २१

एवमाद्युक्तोमुनिः इदमभिनंदन्यथावदाचरौमस्याहसूतः ॥ तदिति ॥ बादरायणस्यापत्यं पुमान विष्णुरातः श्रीशुकोऽल्पं मितान्तरमर्थयद्दाप्राय
मेतत्स्पराज्ञस्तद्वचश्चादृतमादरं यथातथा निशम्य निभृतेन चेतसा पूर्णेनांतःकरणेन तं राजानं सभाजयन्संपानयन्सर्ववेत्तामुनिर्हेसत्रायणसत्रं
वोसमत्रमयनमाश्रयोयस्य वृत्तसमत्वेरणादिदितिन्नस्यर्थः ॥ तस्यसंबोधनं हे शौनक जगाद ॥ २२ ॥ तदेवाह हतपुत्रेति ॥ शक्रपार्ष्णिग्राहेणशक्रं इन्द्र
पार्ष्णिप तन्वीयवेनग्राहिणागृहीतवता विष्णुनाहतौपुत्रौ हिरण्यकशिपुहिरण्याक्षौयस्याः साहितिरत्नरावशोनकेदीप्तोयोमन्युःक्रोधस्तेन ।

सूत उवाच ॥ तद्विष्णुरातस्य स बादरायणिर्वचो निशम्यादृतमल्पमर्थवत् ॥ सभाजयन्संभृतेन चेतसा
जगाद सत्रायण सर्ववेदशौनः ॥ २२ ॥ श्रीशुक उवाच ॥ हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना ॥ मन्युना
शोकदीप्तेन ज्वलंती पर्यचिंतयत ॥ २३ ॥ दितिरुवाच ॥ कदानुभ्रातृहंतारमिंद्रियाराममुल्बणं ॥ अक्लिन्न
हृदयं पापं घातयित्वा शये सुखं ॥ २४ ॥ कृमिविड्भस्मसंज्ञासीद्यस्येशाभिहितस्य च भूतध्रुक्तत्कृते स्वार्थं किं वेदनि
रयोयतः ॥ २५

ज्वलंतीपरितपंती पर्यचिंतयत परितश्चिंतामकरोत ॥ २३ ॥ चिंतामेवदर्शयति कदेति भ्रात्रोर्हिरण्यकशिपुहिरण्याक्षयोर्विष्णुद्वाराहंतारं तत्रहेतुः इंद्रिया
रामं केवलं वैषयिकसुखासक्तं उल्बणं क्रूरमक्लिन्नहृदयमनार्द्रचित्तमतएवपापं पापात्मानं इंद्रं घातयित्वा कप्यमहं सुखंयथातथाशये जातनिद्राभवेयमित्यर्थः ॥
ननुसर्वोपिलोकःस्वसुखायपरस्याहितमाचरति किमनेनाक्रोशेनतत्राह ॥ कृमीति ॥ राज्ञाभिहितस्य ईश्वरोहमहं भोगीत्युक्तस्येशत्वेनाभिहितस्य
पामनस्थानस्ययस्यदेहस्यमरणानंतरं दाहाभावे कृमिरिति तत्समये स्वादिभिर्भक्षितस्यविष्ठेतिदग्धस्यतुभस्मेतिसंज्ञाआसीत्तत्कृतेताहृशदेहसुखार्थं भूत
द्रुगभूतहिंसाकारीसकिंस्वार्थं पुरुषार्थं वेदनवेदेत्यर्थः ॥ कुतः यतोभूतद्रोहाद्धेतोस्तस्मात्ततोनिरयोनरकएवातोभूतध्रुककस्वार्थं नवेदेत्यर्थः ॥ २५ ॥

मदं शरीरमेकमेवाश्रयमानस्यात्मानं मन्यमानस्य उन्नद्धमुत्कटं च चेतो यस्य तस्य तस्मैं दुस्त्यजो मदस्तस्य शोषकः स्त्रैणं मम येन कारणेन मधुवत् तन्मया त
द्धेशाजनितं स्त्रीस्वभावेनाभिप्रायेण सा दितिर्भर्तुः कश्यपस्य शुश्रूषादिभिरकृत्रिमं प्रेम हितं च चाराचरितवती रतिस्तत्पर्यः ॥ तत्र शुश्रूषया सेवा परिचर्येति ॥
यावदनुरागः प्रश्रयो विनयः दमः इंद्रियनिग्रहः ॥ २७ ॥ भावज्ञादिति वेल्गुभाषितैः मधुरालापैः सस्मितैः मंदहाससहितैरपांगवीक्षणैः कश्यपस्य म
नोजग्राह स्ववशीकृतवती बभूव ॥ २८ ॥ कथं जितेंद्रियस्य विदुषः स्त्रीवश्यता तत्राह एतमिति ॥ विद्वानपि विदग्धया पुरुषवचननैपुण्ययुक्तया स्त्रि

याशासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः ॥ मदशोषक इंद्रस्य भूयाद्येन सुतो हि मे ॥ २६ ॥ इति भावेन सा भर्तुराच
चारासकृन्नृप ॥ शुश्रूषयानुरागेण प्रश्रयेण दमेन च ॥ २६ ॥ भक्त्या परमया राजन्मनोज्ञैर्वल्गुभाषितैः ॥ मनो
जग्राह भावज्ञा सुस्मितापांगवीक्षणैः ॥ २७ ॥ एवं स्त्रिया जडीभूतो विद्वानपि विदग्धया ॥ बाढमित्याह विवशो
न तच्चित्रं हि योषिति ॥ २८ ॥ विलोक्यैकांतभूतानि भूतान्यादौ प्रजापतिः ॥ स्त्रियं चक्रे स्वदेहार्धं यया पुंसां मतिर्हृता
॥ एवं शुश्रूषितस्तात भगवान्कश्यपः स्त्रिया ॥ प्रहस्य परमप्रीतो दितिमाहाभिनंद्य च ॥ ३० ॥

यान्द्रियाज्जडीभूतः मोहं प्रापितो तत एव विवशः परवशः बाढमित्याशंभोगार्थमंगीकृतवानित्यर्थः ॥ योषितिस्वयं कामयमानायां स्त्रियां पुरुषस्य तत्प्र
इंगतिवचोनिचत्रं हीति लोकचरित्रप्रदर्शनं ॥ २९ ॥ प्रजापतिः कश्यप आदौ प्रथमं भूतानि स्त्रीपुरुषरूपाण्येकांतान्येकदेशाद्वाविभागेनलक्ष्मा
णानि विलोक्य परस्परमेकशरीरवन्मिलितानीत्यालोच्येत्यर्थः ॥ स्वयमपि स्त्रियं स्वदेहस्यार्धांशं चक्रे सिसृक्षुर्नीमत्तो बभूवेत्यर्थः ॥ एवं करणे हेतुं वि
दन्नामान्यतः स्त्रियं विशिनष्टि ॥ यया स्त्रिया पुंसां मतिर्हृता भवतीति लोकरीत्युक्तिः ॥ ३० ॥ भगवान्कश्यपः स्त्रिया दित्या एवं संभोगेन शुश्रूषितः परि
चरितः ॥ अतएव नितरां प्रीतः अभिनंद्य तस्याः संभोगकौशलमभिनंद्य प्रहस्य आदितिं एवं वक्ष्यमाणमाह ॥ ३१ ॥

ना॰प॰ तदेवाहवरमिति ॥ हेवामोरुहे अनिंदिते वरमभीष्टं वरयकामयस्वभर्तुरिश्स्त्रियानितरांप्रीतेसतिइहलोकेचकारात्परत्रचलोकेस्वगमोऽवाप्यक
२४ मकोवानकोप्यस्तीत्यर्थः स्त्रियाप्राप्यस्त्यर्थः ॥ ३२ ॥ ननुकर्मवोपनीस्वरेभर्त्तरिप्रीतेसतिकथंसर्वत्रसर्वकामप्रोप्लम्यंतत्राह ॥ पतिरिति ॥ ना
रीणांपतिरेवहिसर्वोत्कृष्टदेवतमततस्मिन्प्रीतेसर्वेकामेसोलभ्यमितिभावः ॥ ननुतदेवतानांपरमंचदैवतं इतिश्रुतस्तत्करीत्स्याख्रियःपतिर्हिपरमंदैव
तंनभवतीतत्राहमानसइति ॥ यः सर्वभूतानांमानसः मनसः साक्षीवासुदेवः सर्वोतरात्माख्रियःपतिः ॥ ३३ ॥ सएवभगवान्नामरूपाभ्यांविकल्पितेविं
भिन्नैर्देवतालिंगैरग्नीन्द्रादिदेवतारूपैः प्राशैरिज्यतेऽदंहृष्टांतार्थंतदेवाग्निस्तछायुस्तत्स्यैत्स्यादुक्तरीत्यापुंभिर्यज्ञभिरस्मादिशरीरेस्तोष्यतेऽस

कश्यपउवाच ॥ वरंवरयवामोरु प्रीतस्तेहमनिंदिते ॥ स्त्रियाभर्त्तरिसुप्रीतेकः कामइहचागमः ॥ ३२ ॥ पतिरेव
हिनारीणांदैवतंपरमंस्मृतं ॥ मानसः सर्वभूतानांवासुदेवः श्रियःपतिः ॥ ३३ ॥ सएवदेवतालिंगैर्नामरूपविक
ल्पितैः ॥ इज्यतेभगवान्पुंभिः स्त्रीभिश्चपतिरूपधृक् ॥ ३४ ॥ तस्मात्पतिव्रतानार्यः श्रेयस्कामाःसुमध्यमे ॥ यजंतेन
न्यभावेनपतिमात्मानमीश्वरं ॥ ३५ ॥ साहंत्वयार्चितोभद्रे ईदृग्भावेनभक्तितः ॥ तंतेसंपादयेकाममसतीनांसुदु
र्लभं ॥ ३६ ॥ दितिरुवाच वरदोयदिमेब्रह्मन्पुत्रमिंद्रहणंवृणे ॥ अमृत्युंमृतपुत्राहंयेनमेघातितौसुतौ ॥ ३७ ॥

यैः ॥ भगवतितुष्टेसतिसर्वेकामाःसुलभाइतिभावः ॥ ३४ ॥ यतएवंतस्माद्धे सुमध्यमेश्रेयस्कामाःपतिव्रतानार्यः अनन्यभावेनात्मार्हशेषत्वेनेश्वरा
त्मकंपतिंनेवाराधयंति ॥ ३५ ॥ हेभद्रे यतोहमीदृग्भावेनानन्यभावेनभक्तितश्चत्वयार्चितः ॥ ततस्मात्तेतवकाममिष्टंसंपादयेसिद्धवत्करोमिकथंभूतमस
तीनामपतिव्रतानांसुतरांदुर्लभंलब्धुमशक्यं ॥ ३६ ॥ एवंवरायचोदितादितिः वरदइति हेब्रह्मन्ममयदित्वंवरदः वरंदद्यात्तर्हिमत्स्यैदैवैर्हतौपुत्रौ
यस्याः साहंइंद्रस्यहंतारंपुत्रंवृणे ॥ येनेंद्रेणद्वयोजकेनमघवताद्वयोरस्मत्पुत्रोमिसुतौहिरण्यकशिपुहिरण्याक्षघातितौ ॥ ३७ ॥ ५३

राएवंतस्याः इतितः वचोनिशम्य विप्रः कश्यपः विमनाः खिन्नः पर्येतप्यत परितापं चकारः ।। तमेव परितापप्रकारमाह अहोमति ।। अद्य महानधर्मो मम प्रा
प्तः अहोइति ।। अहो अद्यास्माद् अधर्मात् अहं नरके ध्रुवं वसंतं पतिष्ये कष्टं भवतः ।। इंद्रियारामश्रुतरवयोषिद्रूपया भगवन्मायया गृहीतं चेतो यस्य सत्र
तापकृपणः दीनः ।।३७।। स्वभावं स्त्रीस्वभावमनुवर्तमानायाः योषितः कोतिक्रमः न कश्चिद्दोषः ।। अपितु मामेव स्वार्थेन जानंतं विगर्ह मे स्वार्थेन
पन्नातनिजस्य स्वार्थः ।। यद्यस्मादहं लालितानींद्रियाणि येन तादृशाः ।।४०।। स्त्रीणां स्वभावं प्रकाशयन् परितप्यते ।। शरदिति ।। अहो स्त्रीणां वक्त्रं शर

श्रीशुक उवाच ।। निशम्य तद्वचो विप्रो विमना पर्यतप्यत ।। अहो अधर्मः सुमहानद्य मे समुपस्थितः ।।३८।। अहो अद्यें
द्रियारामो योषिन्मय्येह मायया ।। गृहीतचेता कृपणः पतिष्ये नरके ध्रुवं ।।३९।। कोतिक्रमोनुवर्तंत्याः स्वभावमि
हयोषितः ।। धिङ्मां बताबुधं स्वार्थे यदहं त्वजितेंद्रियः ।।४०।। शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतं ।। हृदयं क्षुरधा
राभं स्त्रीणां को वेद चेष्टितं ।।४१।। न हि कश्चित्प्रियः स्त्रीणामंजसा स्वाशिषात्मनां ।। पतिं पुत्रं भ्रातरं वा घ्नंत्यर्थे घा
तयंति च ।।४२।। प्रतिश्रुतं ददामीति वचस्तन्न मृषा भवेत् ।। वधं नार्हति चेंद्रोपि तत्रेदमुपकल्पते ।।४३।। इति संचिंत्य
भगवान् मारीचः कुरुनंदन ।। उवाच किंचित्कुपित आत्मानं च विगर्हयन् ।।४४।।

शरत्पद्मं तुल्यं तथा वचश्च श्रवणयोः कर्णयोर
मृतं तुल्यं हृदयं तु क्षुरस्य धारया आभा उपमा यस्य तादृशं अतः स्त्रीणां चेष्टितं को वेद न कोपीत्यर्थः ।।४१।। न हि स्त्रीणामंजसा सम्यक् कश्चिदपि पुमान् प्रियोस्ति तत्र हेतु
स्वाशिषात्मनां स्वाशिषि स्वापेक्षिततरवार्थे आत्मा चित्तं यासां ता स्वाशिषात्मनास्तासामिति भावः ।। अतएव अर्थे स्वापेक्षिताय निमित्तं पतिं पुत्रं भ्रातरं वा घ्नंति मारयं
ति ।।४२।। इदं मह्यं संकटं स्यादिह ददामीति यत्प्रतिश्रुतं प्रतिज्ञारूपं मम वचः तन्मृषा न भवेत् मिथ्या न भवितुं नार्हति वचसो न्यूनतः भयेन दास्यामि चेत् इंद्रो हन्यते इंद्रोपि
वधं प्रति नार्हति अतः इदं मह्यं संकटं इति भावः ।। तत्रैतस्मिन्संकटे इदं मया वक्ष्यमाणं सामरांरात तत्संकटनिवृत्ते उपकल्पते योग्यं भवति ।।४३।। हे कुरुनंदन भगवान् मारी

चः कश्यपः स्त्रात्यं संचिंत्यालोच्य किंचित्कुपितः मनसैवात्मानं गर्हयन् उवाच ।।४४।।

ना.प. देनदेवदेवमयोच्यमानंवृतमंजः सम्यक्संवत्सरपर्यंतंयदित्वंकरिष्यसितंतंहीदृस्यहंताएव्रतंवनभविष्यतिनोचेद्देवानांबांधवोभविष्यतीति ४५ तद्वचः
५५ श्रुत्वाहदितिः ॥ देवत्वस्मृतमदंधारिष्ये ॥ मेमयाकर्तव्यानिप्रवर्त्तिनिवृत्तिरूपाणियानिचकर्माणिव्रतेनघ्नंतिव्रतघ्नानिहत्तिरूपाणिचकार्याणिमेब्रू
हि ॥ ४६ ॥ रावंमुक्तःसव्रतागभृत्तान्नित्त्वृत्तिरूपाणियमानाह ॥ कश्यपः ॥ नेतिमत्तजातानिप्राणिमम्नहान्नहिंस्यान्नहन्यात्तथाकंचननशयेत्लाक्रोशेत् तं
पान्नतमस्यचनवदेत्तथाकालंकेशकपालास्थितुषभस्मादिसत्नस्पृशेत् ॥ ४७ ॥ अप्सुजलेषुप्रविश्यनस्तायात्कस्मैचिदपिनकुप्येत्तदुर्जनैनंसं
पृक्तोभवितामदेवेंद्रहादेववांधवः ॥ संवत्सरंव्रतमिदंयद्यंजोधारयिष्यसि ॥ ४५ ॥ दितिरुवाच धारयिष्येव्रतं
ब्रह्मन्ब्रूहिकार्याणियानिमे ॥ यानिचेहनिषिद्धानिनव्रतंघ्नंतियान्यत ॥ ४६ ॥ कश्यपउवाच ॥ नहिंस्याद्भूत
जातानिनशपेन्नानृतंवदेत् ॥ नछिंद्यान्नखरोमाणिनस्पृशेद्यदमंगलं ॥ ४७ ॥ नाप्सुस्नायान्नकुप्येतनसंभा
षेतदुर्जनैः ॥ नवसीताधौतवासःस्रजंनविधृतांक्वचित् ॥ ४८ ॥ नोच्छिष्टंचंडिकान्नंचसामिषंवृषलाहृतं ॥ भुं
पी जीतोदक्यादृष्टंपिबेदंजलिनात्वपः ॥ ४९ ॥ नोच्छिष्टास्पृष्टसलिलासंध्यायांमुक्तमूर्द्धजा ॥ अनर्चितासंयतवाग्
नासंवीतावहिश्चरेत् ॥ ५० ॥ नाधौतपादाप्रयतानार्द्रपान्नोदकशिराः ॥ शयीतनापराग्नान्यैर्ननग्नानचसंध्ययोः
भाषेत ॥ अधौतमप्रक्षालितंवासःवस्त्रंनावसीतनाच्छादयेन्नविस्मयाच्चपूर्वंविधृतांत्यक्तांस्रजंनपुनर्धारयेत् ॥ ४८ ॥ भोजनेपंचनिषिद्धानित्याह ॥ उच्छिष्टंचंडिका
५१
लेभ्यद्रकाल्येनिवेदितंसामिषंपिपिलिकादिदूषितंवृषलाहृतंशूद्रानीतंउदक्ययारजस्वलयादृष्टंवान्नंनभुंजीतांजलिनापापःजलंनपिबेत् ॥ ४९ ॥ उच्छिष्ट
वेदस्पृष्टसलिलानभवेतकिंतुजलंनस्पृशेत्संध्यायांसायंप्रातर्मुक्ताःमूर्द्धजाःकेशायस्याताहृशीतथानर्चितानलंकृताचनभवेत्नसंयतावाग्यस्यासानभवेदसंवी
तावाहृत्तावहिर्नैचरेत् ॥ ५० ॥ अधौतौपादौयस्याःअप्रयतासमाहितचितानशयीततथाआर्द्रौपादौयस्याःउदकउत्तरदिशियस्याःउदकउत्तरदिशिशिरोयस्याःसपराक् ना.पु.
पश्चिमशिरास्तथाअन्यैःसहनग्नाविवसनाचतथामध्ययोरपिनशयीत ॥ ५१ ॥ ५५

धौतौ वासो यस्याः सा महाशुचिः सर्वैर्मंगलैर्हरिद्राचंदनादिभिर्द्रव्यैः संयुता कान्ता तत्रातरभोजनात्प्रागेव गाः विप्रान् श्रियं महालक्ष्मीमच्युतं च पूजये
त् ॥ ५२ ॥ तथा वीरवती पुत्रवती जीवत्पतिका नारी स्रक्स्रगादिभिरर्चयेत् ॥ बलिरुपायनं मंडनमलंकारः तथा यत्विं चार्च्य संपूज्य उपसमीपे तिष्ठेत् तं त्वप
तिमेव कोष्ठगतस्त्वोदरगतं ध्यायेत् ॥ ५३ ॥ एतदंगकलापेन युक्तं पुंसवनाख्यं व्रतं संवत्सरं संवत्सरपर्यंतं कार्यं ह्येतमविस्रुतमविलंघयतात धाधारयि
ष्यामि चेत्तर्हि त्वस्मिन् हतापुत्रस्तव भविष्यति ॥ ५४ ॥ तस्यैवमुक्ता दितिहे राजन् वाढमित्यंगीकृत्याथ महामनाः उत्कृष्टमनाः सती कश्यपात्गर्भमाध

धौतवासाः शुचिर्नित्यं सर्वमंगलसंयुता ॥ पूजयेत्प्रातराशात्प्राग्गोविप्रान् श्रियमच्युतं ॥ ५२ ॥ स्त्रियो वीरवतीश्चा
र्चेत् स्रग्गंधबलिमंडनैः ॥ पतिं चार्च्योपतिष्ठेत ध्यायेत्कोष्ठगतं च तं ॥ ५३ ॥ सांवत्सरं पुंसवनं व्रतमेतदविप्लुतं ॥ धा
रयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः ॥ ५४ ॥ बाढमित्यभ्युपेत्याथ दितीराजन्महामनाः ॥ कश्यपाद्गर्भमाधत्त व्रतं
चांजो दधार सा ॥ ५५ ॥ मातृष्वसुरभिप्रायमिंद्र आज्ञाय मानद ॥ शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत्कविः ॥ ५६ ॥ नि
त्यं वनात्सुमनसः फलमूलसमित्कुशान् ॥ पत्रांकुरमृदोऽपश्च काले काल उपाहरत् ॥ ५७ ॥ एवं तस्या व्रतस्थाया व्रत
छिद्रं हरिर्नृप ॥ प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ॥ ५८ ॥

त्त दधार तत्पालनं सम्यग्व्रतं च दधार ॥ ५५ ॥ तत इंद्रः कविर्विद्वानतए
वमातरभगिन्या दितेरभिप्रायं ज्ञात्वा हे मानदाश्रमस्थां व्रतस्थां कश्यपाश्रमस्था वा दितिं शुश्रूषणेन पर्यचरन् ॥ ५६ ॥ तदेवाह नित्यमहरहः सुमनसः पु
ष्पाणि फलानि च मूलानि समिधश्च कुशाश्च तान् पत्राणि किसलयानि च दूर्वांकुरा मृदः मृत्तिका आपश्च जलानि ॥ काले कालेऽवचितकाले उपाहरदानाय
संपादितवान् ॥ ५७ ॥ एवं तस्यां दितौ व्रतस्थायां सत्यां हे नृप हरिरिंद्रः व्रतस्य छिद्रं वैकल्यं प्रेप्सुः कामयमानः अत एव जिह्मः कुटिलवृत्तिः पर्यचरत् यथा मृग

भा.ष. हेमहीपतेतत्परः व्रतछिद्रंपश्यन्नोचनपरोपिव्रतच्छिद्रंनाध्यगाच्छन्नापश्यत् ॥ अथनितरांचिंतांप्राप्तः केनहेतुनाममशिवंभद्रंस्यादितितीव्रांचिंतांप्रा
५६ प्तः ॥५९॥ एकदास्याद्दितिव्रतकर्षितातत्एवाशत्त्यानस्पृष्टंवारिजलंययासाधौतावप्रक्षालितावंघ्रीययासातादृशपत्तएवउच्छिष्टासंध्यायांसापंकालेवि
धितादैवेनमोहितासतीसुष्वाप ॥६०॥ तदांतरंतदंतरंव्रतच्छिद्रंलब्ध्वाशक्रोनिद्रयापहृतंचेतोयस्यास्तस्यादितेरुदरंप्रविष्टः ॥ कथंपरकायप्रवेशसामर्थ्यं
तस्येत्यत्राहयोगेशःपरकायप्रवेशसामर्थ्यप्रपादकयोगयुक्तः ॥ अतएवयोगमाययाविचित्रयोगसामर्थ्येनोदरंप्रविष्टंमित्यर्थः ॥६१॥ उदरंप्रविष्टश

नाध्यगच्छद्व्रतच्छिद्रंतत्परोथमहीपते ॥ चिंतांतीव्रांगतःशक्रःकेनमेस्याच्छिवंत्विह ॥५९॥ एकदासातुसंध्यायामु
च्छिष्टाव्रतकर्शिता ॥ अस्पृष्टवार्यधौतांघ्रिःसुष्वापविधिमोहिता ॥६०॥ लब्ध्वातदंतरंशक्रोनिद्रापहृतचेतसः ॥ दिते
प्रविष्टउदरंयोगेशोयोगमायया ॥६१॥ चकर्तसप्तधागर्भंवज्रेणकनकप्रभं ॥ रुदंतंसप्तधैकैकंमारोदीरितिता
न्पुनः ॥६२॥ तेतमूचुःपात्यमानाःसर्वेप्रांजलयोनृप ॥ नोजिघांससिकिमिंद्रभ्रातरोमरुतस्तव ॥६३॥ माभैष्टभ्रातरो
मह्यंयूयमित्याहकौशिकः ॥ अनन्यभावान्पार्षदानात्मनोमरुतांगणान् ॥६४॥

क्रोवज्रायुधेनतंकनकप्रभंगर्भंसप्तधाचिच्छे
दरुदंतंतमेकैकंगर्भस्यभागंमारोदीरितिवदनतान्पुनःसप्तधाएकैकंचिच्छेदयतोमारोदीरितितान्चिच्छेदातएवनिमित्तान्मरुच्छब्दस्यतेषुप्रवृत्तिः ॥ आर्षत्वा
त्पाशक्रस्यवज्रस्यभावेछिद्यमानाःसर्वेगर्भस्यभागाःतथैवप्रविभक्तपादाद्यवयवाः ॥ प्रांजलयःसंतःतमिंद्रमूचुः ॥ तदेवाहकिमितिहेइंद्रतवभ्रातरो
मरुतःमरुत्संज्ञालोस्मान्किंकिमर्थंजिघांससिहंतुमिच्छसि ॥६३॥ इतितैरुक्तःकौशिकःशक्रोयदियूयंमह्यंममभ्रातरःतर्हिमाभैष्टभयंमाकुरुते
त्याह ॥ ततश्चात्मनःस्वस्यपार्षदानपार्षदत्वंप्राप्तानमनन्यभावाननन्यस्वामिप्रायकान्मरुतांगणानाहेतिपूर्वेणान्वयः ॥६४॥ रामः
५६

ततो दितेर्गर्भो कुलिशेन वज्रेण बहुधा छिन्नोपि श्रीनिवासस्य भगवतोनुकंपया पूर्वकानुग्रहविशेषेण न ममार न मृतः यथा भवानश्वत्थाम्नो
ऽस्त्रेणादग्धदेहोपि भगवता रक्षित इत्यर्थः ॥६४॥ अस्मिन्नर्थे उपपत्तिमाह सकृदिति य मानसकः आदिपुरुषं भगवंतं इष्ट्वा तन्महात्म्येन छिन्नैः सात्मनां समा
न रूपतां याति किं पुनरकृदर्चितेति भावः यत एवमतः किंचिदूनसंवत्सरं एवं दित्या हरिराराधितः ॥६६॥ इंद्रेण सह जुषमाणे सेवितस्तु इति सजूः इंद्रेण सहव
र्तमानः इत्यर्थः ॥ हरिर्भगवाननुपेत्रोभ्युपादागात्स्वगर्भे स्परखंडानजिवायदित्यर्थः ॥ ततः ते पंचाशद्देकोनपंचाशदन्यथा मरुतस्त्व दितेः पुत्राश्चत्वारिंशदन्ते
वाधिकाः चकर्तेमत्तधा गर्भे पुनरेकैकं सप्तधा चकर्तेति पूर्वोक्तसंख्याविरोधापत्तेः मरुतो मरुत्संज्ञकाः मातुर्दोषमसुरत्वापदेशं त्यक्त्वा देवा अभवं

न ममार दितेर्गर्भः श्रीनिवासानुकंपया ॥ बहुधा कुलिशक्षुण्णो द्रौण्यास्त्रेण यथा भवान् ॥६५॥ सकृदिष्ट्वादिपुरुषं
पुरुषो याति साम्यतां ॥ संवत्सरं किंचिदूनं दित्या यद्धरिरर्चितः ॥६६॥ सजूरिंद्रेण पंचाशद्देवास्ते मरुतो भवन् ॥ व्य
पोह्य मातृदोषं ते हरिणा सोमपाः कृताः ॥६७॥ दितिरुत्थाय ददृशे कुमारानलप्रभान् ॥ इंद्रेण सहितान्देवी पर्यतु
ष्यदनिंदिता ॥६८॥ अथेंद्रमाह ताताहमादित्यानां भयावहं ॥ अपत्यमिच्छंत्यचरं व्रतमेतत्सुदुःकरं ॥६९॥ एकः संक
ल्पितः पुत्रः सप्त सप्ताभवन्कथं ॥ यदि ते विदितं पुत्र सत्यं कथय मा मृषा ॥७०॥

तेच हरिणा इंद्रेण भगवता वा सोमं पिबंतीति सोमपाः यज्ञीयधाराहीः कृता इत्यर्थः ॥६७॥ ततो दितिरुत्थाय कुमारानग्नितुल्यकांतीनिंद्रेण सहितान्
ददृशे । दृष्ट्वा च देवी दितिरनिंदिता वत्सकतः सुखमावाप पर्यतुष्यत ॥६८॥ अथानंतरं इंद्रमुवाच । तदेवाह । हे तात इंद्र आदित्यानामदितेरपत्यानां युष्माकं
भयावहमेकमपत्यमहमिच्छंती सुदुःकरमेतत्पुंसवनं व्रतमचरं आचरितवत्यास्मि ॥६९॥ मया त्वेकः पुत्रः संकल्पितः कथं सप्त सप्तकोनपंचा
शदभवन् हे पुत्र यदि ते विदितं तर्हि सत्यं कथय मृषा मिथ्या मा कथय ॥७०॥

वा॰ष॰ एवमुक्तः शक्रस्तामाह हे अंब वत्ते तव व्यवसितमभिप्रेतं उपधार्य ज्ञात्वाहं तत्र वांतिकं समीपं गतः आप्त लब्धमंतरं छिद्रं येन साह शोहं गर्भमच्छिदं छिन्न

८० वान्स्मियतो हमर्थे वैषयिकपुरुषार्थेरव बुद्धिर्यस्य न धर्मवित् ॥७१॥ यतो हमीदृशस्ततो मया तावत्सप्तधा गर्भः कृतः च्छिन्नः कृत इति पाठे वज्रेणेति

शेषः ॥ एवं सप्तधा कृतोपि गर्भः तावत्सप्त कुमारा आसन् ते पि पुनरेकैकशो वृक्णाः छिन्नाः सप्त सप्तधा बभूवुः ॥ नापि मम्रिरे न मृताश्च ॥७२॥ ततोन

तरं इदं महाश्चर्यं विलोक्य मया निश्चितं अध्यवसितं एवाहं महापुरुषस्य भगवतः पूजायाः कथं पूजकाभिलषितं प्रयोजनं तदानुषंगिकमप्रधानं

फलं यस्यास्ता सिद्धिप्रुक्तिर्भवतीति ॥ असमाप्तायामपि महापुरुषपूजायां पूजकाभिलषितं प्रयोजनावहा तत्र मध्य नावलोक्य प्रत्यर्थ तेनापि दृष्ट

इदमाह ॥ अंब वत्ते हं व्यवसितमुपधार्यागतोंतिकं लब्धांतरैच्छिदं गर्भमर्थबुद्धिर्न धर्मवित् ॥७१॥ कृतो मे सप्तधा

गर्भ आसन्सप्त कुमारकाः ते पि चैकैकशो वृक्णाः सप्तधापि न मम्रिरे ॥७२॥ ततस्तत्परमाश्चर्यं वीक्ष्याध्यवसितं म

या ॥ महापुरुषपूजायाः सिद्धिः काप्यानुषंगिकी ॥७३॥ आराधनं भगवत ईहमाना निराशिषः ये तु नेच्छंत्य

पि परं ते स्वार्थकुशलाः स्मृताः ॥७४॥ आराध्यात्मप्रदं देवं स्वात्मानं जगदीश्वरं को वृणीत गुणस्पर्शं बुधः स्यान्नरकेपि

यत् ॥७५॥

तायामस्य पूजायाः परिपूर्णायाः मुक्तिरेव प्रधानं फलं पूजकाभिषितं तु आ नुषंगिकमिति मया निश्चितमित्यर्थः यद्वा महापुरुषस्य पूजायाः सकाम

पूजायाः सिद्धिर्मम इवैककार्यानुषंगिकी कार्येराप्रयोजेनेनानुषज्यते नु वध्यते पूजकाभिलषितं प्रयोजनावहा भवति न तु परिपूर्णा सा तु विपरीतफलदैवेति

मयाभिप्रेतमित्यर्थः ॥७३॥ अतएव ये पुरुषा निराशिषो निष्कामा भगवत आराधनं कुर्वाणाः परं मोक्षमपि नेच्छंति त एव स्वार्थे स्वस्य निरतिशयपुरुषा

र्थे कुशलाः स्वस्य निरतिशयपुरुषार्थसाधनकुशलाः स्मृताः ॥७४॥ एवं सकामनिमित्तं सहितफलं भगवदाराधनं प्रशस्यासहितफलं निंदति ॥ आराध्येति ॥ आ

त्मपदं निरतिशयपुरुषार्थरूपमात्मानं प्रददातीति तथा तमात्मानं निरतिशयप्रियमीश्वरं देवं भगवंतं तमाराध्य बुधो विवेकी चेतकः प्रमान् गुणस्पर्शं शब्दादिविषया

८०

स्वापराधक्षमार्थं तां प्रार्थयते तदिदमिति हे महीयसि बालिशस्य मम सर्वस्वममतं दिदं गर्भच्छेदनादिरूपं दौर्जन्यं प्रभुजेन मत्कर्म हे मातः त्वं क्षंतुमर्हसि
मातुरसह्योपराधो न कालीस्मिन्निति त्रापये मातरिति संबोधनं दिष्ट्या दैवात् मृतोपि तव गर्भः पुनरुत्थितो जीवितः ॥७६॥ एवमुक्तया विशुद्धभावेन निष्कपट
भावेन तुष्टया दित्याभ्यनुज्ञातस्तां नत्वा मरुद्भिः सह प्रभुरिंद्रस्त्रिदिवं स्वर्गं जगाम ॥७७॥ एवं पदर्श्यंकपतत्त्रमासुरं भावं त्यक्त्वा दिना तस्योत्तरमुक्तं स्माह ए
वमिति मरुतां जन्म तेभ्य परिपृच्छसि तत्तावतां मंगलावहं सर्वं प्रपंचं यथा तथा ते तुभ्यं मया कथितं भूयः किं कथयामि यत्किंचिच्छुश्रूषितमस्ति तत्

तदिदं मम दौर्जन्यं बालिशस्य महीयसि ॥ क्षंतुमर्हसि मातस्त्वं दिष्ट्या गर्भो मृतोत्थितः ॥७६॥ श्रीशुक उवाच ॥ इंद्रस्त
याभ्यनुज्ञातः शुद्धभावेन तुष्टया ॥ मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ॥७७॥ एवं ते सर्वमाख्यातं यन्मां त्वं परि
पृच्छसि ॥ मंगलं मरुतां जन्म किं भूयः कथयामि ते ॥७८॥ इति श्रीभागवते षष्ठस्कंधे अष्टादशोध्यायः ॥१८॥ राजोवा
च ॥ व्रतं पुंसवनं ब्रह्मन् भवता यदुदीरितं ॥ तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति ॥१॥ श्रीशुक उवाच ॥ शुक्ले मार्गशिरे
पक्षे योषिद्भर्तुरनुज्ञया ॥ आरभेत व्रतमिदं सार्वकामिकमादितः ॥२॥ निशाम्य मरुतां जन्म ब्राह्मणाननुमंत्र्य च ॥ स्नात्वा
शुक्लदती शुक्ले वसीतालंकृतांबरे ॥ पूजयेत्प्रातराशात्प्राग्भगवंतं श्रियासह ॥३॥

दितं कथयामीति प्रश्नोत्साहनं ॥७८॥ इति षष्ठे ष्टादशः ॥१८॥ किंभूय
इति प्रश्नार्थं चोदितः पृच्छति राजा व्रतमिति हे ब्रह्मन् भवता यदुदीरितं पुंसवनाख्यं व्रतं तस्य प्रपंचमिति शेषः ज्ञातुमिच्छामि येन व्रतेन तत्र व्रतेन वा प्रसीद
ति ॥१॥ एवमापृष्टः सप्रपंचं व्रतमाह मुनिः शुक्ल इत्यादिना मार्गशिरे मासि शुक्ले पक्षे कस्मिंश्चिच्छुभतिथौ भर्तुरनुज्ञया प्राप्य विदिदं व्रतमारभेत सार्वकामिक
मभिलषितसर्वपुरुषार्थसाधनं पुंसवनाख्यं व्रतमाचरेत ॥२॥ तत्रादितः प्रथमं मरुतां जन्मोत्पत्तिकथां श्रुत्वा ब्राह्मणाननुमंत्र्यानुज्ञाप्य तैरनुज्ञाता स्पर्धैः स्नात्वा
च शुक्ला धौता दंता यस्याः सा दती तेन शुक्ले च अंबरे वसित्वा ॥३॥

भा०ष्ठ ५८ वातरागाणां भोगैर्वेनमर्वंतं श्रियाः न तस्मात् मद्दप्रसयेत ॥ तावन्नमस्कारमंत्रानाह त्रिभिः ॥ तेतुभ्यंमलंपर्याप्तमेव किंचिदन्यैः कृत्यमस्तितत्र हेतुः ॥ हे पूर्णकाम
वाप्तसमस्तकामात राववनिरपेक्षायते तुभ्यं निरपेक्षाय मः पूर्णकामत्वमेव विपादयंस्तं विशिनष्टि ॥ महाविभूत्योर्निस्मलीलाविभूत्योरधिपतये तरावसकलाः
सिद्धयो भिषितफलानि यस्मात्तस्मै ॥ ३ ॥ हे ईश यथा तत्त्वं रूपादिभिः सर्वैर्गुणगणैः जुष्टः युक्तस्ततु त्वं भगवान् प्रभुरसि ॥ तत्र रूपाख्यापापेक्षपरकुःखभिराचिः
कीर्यामूर्तिरैश्वर्यं तेजः पराभिभवसामर्थ्यं महिमानोक्ते नरप्रभावः ॥ ओजोवलंसवैरिस्यनेनान्ये सर्वे शक्तित्वादयो गुणाः अभिप्रेताः ॥ ४ ॥ हे विष्णुपत्नि हे महा

अनंते निरपेक्षाय पूर्णकाम नमोस्तु ते ॥ महाविभूतिपतये नमः सकलसिद्धये ॥ ४ ॥ यथा त्वं रूपयाम्ना तेज
सा महितो दया ॥ जुष्ट ईश गुणैः सर्वैस्ततोसि भगवान् प्रभुः ॥ ५ ॥ विष्णुपत्नि महामाये महापुरुषलक्षणे । प्रीये
थामे महाभागे लोकमातर्नमोस्तु ते ॥ ६ ॥ ॐ नमो भगवते महापुरुषाय महानुभवाय महाविभूतिपतये सह महा
विभूतिभिर्बलिमुपाहराणीति ॥ अनेनाहरहर्मंत्रेणाविष्णोरावाहनार्घपाद्योपस्पर्शनस्नानवासउपवीतविभू
षणगंधपुष्पधूपदीपोपहाराद्युपचारान् सुसमाहितोपाहरेत ॥ ७ ॥ हविःशेषं तु जुहुयादनले द्वादशाहुतीः ॥ ८ ॥

मायेमहदाश्चर्यप्राप्तिप्रकेलक्षसतेनपेति लक्षणा महापुरुषस्य चिह्नान्यतेत्यर्थः ॥ तथा महापुरुषस्य प्रियधर्मेसर्वलोकसंपदाश्रयभूते हे लोकानां मातः ते तुभ्यं
नमः ॥ ६ ॥ पूजामंत्रमाह ॐ नमः । भगवते षाड्गुण्याय निरस्तनिखिलदोषाय महापुरुषाय पुरुषलक्षणप्रतिपाद्यमहात्म्ययुक्ताय महानुभवाय लोकविलक्षणाश्र
भावाय महाविभूतेः लक्ष्म्याः पतये विभूतिभिः सह पार्षदाद्यैस्सर्पतुभ्यं बलिमर्घ्यादिकमुपहरामि समर्पयामीत्यनेन मंत्रेणाहरहर्विष्णोरावाहनाद्युपचारानुपहृ
तुपहारेत तत्रोपस्पर्शनमाचमनं उपहारा नैवेद्यं हविः । आदिशब्देन तांबूलनीराजनादिकं विवक्षितं शेषं भगवते निवेदितं हविरनले द्वादशाहुतीर्जुहुयात् ॥ ७ ॥ त रमः
त्रमंत्रमाह ॐ नमः इति । यदिसर्वसंपदः इत्येतत्कामयेत्वेदेवप्रियंलक्ष्मीविष्णुवा शिषांप्रभवंत्याभ्यां इति प्रभवोत्पत्तिर्भक्त्या सम्यक्प्रजयेत ॥ २ ५८

तत्रमंत्रमाह । येनेमइति यदिसर्वसंपदःइच्छेत्कामयेच्चेद्देवंश्रियंलक्ष्मींविष्णुंचापियांप्रभवंत्साम्यांइतिप्रभवौउभौभक्त्यासम्यक्समर्जयेत् । पभक्त्याप्र
ह्वेणानन्यत्वेनाशिरसेतिशेषः । चेतसाचदंडवद्भूमौप्रणमेत्ततोमंत्रमोंनमोभगवतेमहानुभवायमहाविभूतिपतयेइतिमंत्रंदशवारंजपेत् । ततोवक्ष्य
माणंस्तोत्रमुदीरयेत्पठेत् ॥ ९ ॥ तदेवाहयुवांविश्वस्यविभुश्चविभ्वीविभुप्रमानस्त्रियेत्येकशेषःजगतःपरंकारणंस्वयंकारणांतररहितकारणभू
तोऽस्यपदेः । इयंलक्ष्मीःप्रकृतिःस्त्रीनाम्नामेंत्रयेयस्तुकप्रकारेणप्रकृत्यादिस्त्रीनामकयदापेविभूतिमत्वात्प्रकृतिरित्युच्यतेप्रकृतिपुरुषादिप
दार्थानांत्वंपुमात्मकानांतयोर्विभूतित्वेनस्तीनात्मकमिदंसोत्वंविभूतिमन्तांप्रकृतिंविशिनष्टि । सत्त्वाकारणावस्थायांनिरतिशयसत्त्वाद्दुरत्यो
ॐनमोभगवतेमहापुरुषायमहाविभूतिपतयेस्वाहेति ॥ श्रियंविष्णुंचवरदावाशिषांप्रभवावुभौ ॥ भक्त्यासंपू
जयेन्नित्यंयदीच्छेत्सर्वसंपदः ॥ ८ ॥ प्रणमेद्दंडवद्भूमौभक्तिप्रह्वेणचेतसा दशवारंजपेन्मंत्रंततःस्तोत्रमुदीरे
येत् ॥ ९ ॥ युवांतुविश्वस्यविभूजगतःकारणंपरं ॥ इयंहिप्रकृतिःसूक्ष्मामायाशक्तिर्दुरत्यया ॥ १० ॥ तस्या
अधीश्वरःसाक्षात्त्वमेवपुरुषःपरः ॥ त्वंसर्वयज्ञइज्येयंक्रियेयंफलभुग्भवान् ॥ ११ ॥ ११
येत्वरूपाव्यावमायाश्चाप्यर्यशक्तिकार्योपपत्त्याभगवदद्रूपकमिहविशेषणंभूतादुरत्ययाभगवदप्रपन्नैरनतिलंघ्याकथंभगवद्विभूतिभूता
याःप्रकृतेर्लक्ष्मीविभूतित्वमितिनशंकनीयंकृत्स्नस्यजगतउभयोरपिशेषत्वात् ॥ १० ॥ तस्याःप्रकृतेरधीश्वरस्त्वमेव । हेपुरुषोत्तमत्वमेवसर्वयज्ञ
रूपात्विषंलक्ष्मीः । तत्रयज्ञप्रधानयोगःइज्यात्वंगभूतादीक्षणीयेष्ट्यादिकातथास्मात्क्रियाचइयंलक्ष्मीरेवतादात्म्यकतत्रतत्फलदातृत्वेन ।
तदाराध्यत्वेनचतद्विभूतित्वप्रयुक्तंतदेवाहफलभुगिति । त्वंस्यंलक्ष्मीश्चयजियंयत्फलंचरुपुरोडाशादिकंतद्भुंक्तेइतितथायद्वाक्रियाइयंलक्ष्मी
फलभुक् । क्रियाफलभोक्तातुत्वमित्यन्वयःक्रियालक्ष्म्याविभूतिःकर्तातुत्वद्विभूतिरित्यर्थः ॥ ११ ॥

श्री·प·
५५

तथाग्रगण्यात्मिकेयं देवी लक्ष्मीः यया सर्वं वस्तु गतागुणाभिव्यक्तिमा लक्ष्मीस्तद्विन्नतिरित्यर्थः ॥ भोग्यत्वभोगोपकारणादिगुणानां सर्वत्र व्यक्तगतानां मभि
व्यंजकस्तु भगवान् तद्विन्न इति रित्यर्थः ॥ तथा गुणानुगभवत्तुक्तिरियं देवी स्वपि वोध्यं त्वं सर्वशरीरिणश्चात्मा शरीरं यस्य तादृशः सर्वे शरीरिणो जी
वात्तद्विन्न निमित्ताख्या लक्ष्मी सर्वेन्द्रियबुद्धिरूपा तद्विन्न तिमतीत्यर्थः ॥ तथा नामरूपे भावत्वाल्लक्ष्मीः श्वस्यपः नामरूपविषयकः प्रकाशो पाश्रयं त्वा॰
धारः नामरूपयोर्निर्वोढा च त्वमित्यर्थः ॥ १२ ॥ एवं तु तौ स्तुत्वा तयोरुक्तधर्मवैशिष्ट्यवत्त्वस्यार्पनाया अपि सत्यत्वं प्रतिजानीते यथेति प्रवां यथा त्रि
लोकस्य वरदौ परमेष्ठिनौ यथेदमपि सत्यं भवतीति भावः ॥ तेत्तमस्लोकतथा ममाशिषः तद्विषयप्रार्थना सर्वाः सत्याः संतु ॥ १३ ॥ श्रिया लक्ष्म्या सह

गुणव्यक्तिरूपं देवी व्यंजको गुणभुग्भवान् त्वं हि सर्वशरीर्यात्मा श्रीः शरीरेन्द्रियाशयाः ॥ नामरूपे भगवती
प्रत्ययस्त्वमपाश्रयः ॥ १२ ॥ यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ ॥ तथा मे उत्तमश्लोक संतु सत्या महाशि
षः ॥ १३ ॥ इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह ॥ तन्निःसार्योपहरणं दत्वाचमनमर्चयेत् ॥ १४ ॥ ततः स्तुवी
त स्तोत्रेण भक्तिप्रह्वेण चेतसा ॥ यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिं ॥ १५ ॥ पतिं च परया भक्त्या महापुरुषचेतसा
प्रियैस्तैस्तैरुपनमेत्प्रेमशीलः स्वयं पतिः ॥ १६ ॥ बिभृयात्सर्वकर्माणि पत्न्या उच्चावचानि च कृतमेकतरेणापि
दंपत्योरुभयोरपि ॥ १७ ॥ सहितं पत्नीनिवासं वरप्रदं स्तुत्वाभिष्टूय तत्पत्न्याचादिभिः भगवत्सकाशादुपहरणमवशिष्टं द्रव्यं निःसार्य
पत्नीय भगवते आचमनीयं दत्वा सम्यक् पुनरर्चयेत् ॥ १४ ॥ ततः पुनः स्तोत्रेण स्तुवानाः स्तोत्रं कुर्वाणाः भक्तिप्रह्वीभावेन चेतसा यज्ञोच्छिष्टं
आघ्राय पुनरपि हरिमर्चयेत् ॥ १५ ॥ महापुरुषचेतसे श्वरबुद्ध्या परया भक्त्या तैस्तैः प्रियैर्वस्तुभिः पतिमुपनमेत् जेत्पतिरपि भार्यायां स्वयं प्रेमशी
लः सन् तां कर्माणि बिभृयात् यथेयुक्तधर्मानुष्ठाने भवेदित्यर्थः ॥ १६ ॥ एवमनोन्यानुरूप्यकारणमाह कृतमितिदंपत्योरन्यत्रेणापि कृतं कर्मोभयोरपि
फलदं भवति यतस्ततोन्योन्यानुकूल्येन भाव्यमिति भावः ॥ १७ ॥

न्यतरा वपत्न्यामवदीयां मसक्तायां मस्यां पतिरेवैतद्व्रतं समाहितचित्तः सन्कुर्यात् स्त्रियश्चाकाचेतत्कर्तुं भर्ता कुर्यादित्यर्थः॥ विष्णोरिदं व्रतं विभेत्केनापि
हेतुना न विहन्यात् तदंतरितं न कुर्यात्॥ १८॥ विप्रान्वीरवतीः पुत्रवतीर्जीवद्भर्तृकाः स्त्रियः स्रगादिभिरहरहरेवं व्रतमास्थितः प्रमानन्नर्चयेत॥ १९॥ त
तो देवं भगवंतं स्वे धाम्नि स्वस्थाने हृदादौ वा विसर्जयेदित्यर्थः॥ उद्वास्यागतः तस्मै भगवते निवेदितं हविरात्मविशुद्ध्यर्थं सर्वकामसमृद्ध्यर्थं चाद्यात् स्त्री पातिस्त्रः
भक्तेनोक्तेन प्रजाविधानेन द्वादशमासान् हायनं संवत्सरं नीत्वा कार्तिके मासि चरमेऽहन्युपवसेत् व्रतोद्यापनं गां स्रुपचारं कुर्यात् तद्द्वादशमासा

ऽस्यां कुर्याद्दोहदीयां पतिरेतत्समाहितः॥ विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात्कथंचन॥ १८॥ विप्रान्स्त्रियो वीरवतीः
स्रग्गंधबलिमंडनैः॥ अर्चेदहरहर्भक्त्या देवं नियममास्थितः॥ १९॥ उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः॥ अ
द्यादात्मविशुद्ध्यर्थं सर्वकामसमृद्धये॥ २०॥ एतेन पूजाविधिना मासान्द्वादश हायनं॥ नीत्वाथोपचरेत्साध्वी का
र्तिके चरमेऽहनि॥ २१॥ श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत् पयःशृतेन जुहुयाच्चरुणा सह सर्पिषा॥ २२॥ पाक
यज्ञविधानेन द्वादशैवाहुतीः पतिः॥ ब्राह्मणान्भोजयेत्तत्याः स्वल्पाद्यैर्द्वादशात्मकान्॥ २३॥

निखके केवाचित्तन्मध्येमस्य
मासेमासि तेन सह द्वादशसंख्यायां मस्यां द्वादश्येकस्य त्यागः स्याद्धायनमित्युक्ते तन्मध्यपातितः। तस्यापि प्रसंगः स्यात् भयं वारयितुं द्वादशमासान्हायनमित्यु
क्तं नयेन्महत्त्वा॥ २१॥ उपचारमेवाह श्वइति। श्वोभूते प्रातः रउपस्पृश्य स्नात्वा पूर्ववत्कृष्णं तमभ्यर्च्य पयःशृतेन पयसि दीरेपक्वेन चरुणा घृतेपाक इति
निपातितः शाद्वः सर्पिषा सर्पिस्सहितेन पाकयज्ञविधिना द्वादशैवाहुतीः पतिर्जुहुयात्॥ २२॥ ततो द्वादश ब्राह्मणान्साध्वन्नैः समीचीनान्नैर्भक्त्या भोज
येदात्मविशुद्धाब्राह्मणान्स्वरूपत्वेन प्रपन्नित्यर्थः। तेभ्यो ब्राह्मणेभ्यः स्वर्णोदकपात्रैः सहितां तान्गंधान्वितां स्तिलाजां स्वदद्यात्॥ २३॥

मा॰ष॰ द्विजैः समीरिताः प्रयुक्ता आशिषः शिरसाधायच तेभ्यः प्रणम्य ततः तदनुज्ञया स्वयं भुंजीत ॥ २४ ॥ ततो बंधुभिः सहाचार्यमग्र
१०० तः पुरतः कृत्वोपवश्य सुपक्वान्नं सौभाग्यवत्वं फलकं च रोहे विप्रः शोषं पत्न्यै दद्यात ॥ २५ ॥ एवं सविस्तरं व्रतमुपवर्ण्य तदनु

आशिषः शिरसा दाय द्विजैः प्रीतैः समीरिताः ॥ प्रणम्य शिरसा भक्त्या भुंजीत तदनुज्ञया ॥ २४ ॥ आचार्यमग्र
तः कृत्वा बान्धवैः सह बंधुभिः ॥ दद्यात्तस्यै च रोः शेषं सुपक्वान्नं सुसौभाग्यं ॥ २५ ॥ एतच्चरित्वा विधिवद्व्रतं वि
नोरभीप्सापेलभते पुमानिह ॥ स्त्रीवेतदास्थाय लभेत सौभाग्यं श्रियं प्रजां जीवपतिं यशोमहं ॥ २६ ॥

व्रतफलमाह ॥ एतद्विष्णोः परमात्मनः ॥ व्रतं यथाविधि कृत्वा पुमान्निह लोके भीप्सीतं लभेत ॥ स्त्री तु तद्व्रतमनुष्ठाय रा॰म॰
सौभाग्यसंपत्पुत्रपतिदीर्घजीवकीर्त्तिगृहादीन् लभते ॥ २६ ॥ १००

अवीरा लब्धाभर्तृका कन्या त्वं तत्तद्व्रतमास्थाय समग्राशिषां लाभाय स्वतं पत्यं विंदेत लभेत ॥ यद्वा अवीरा विधवा तु हतं किल्बिषं य
स्याः सा गतिं सम्प्राप्नोति लभते मृताः प्रजाः ॥ सा जीवत्सुता यस्याः सा न वेत्त यासु दुर्भगा सौभाग्यरहिता सुभगा भवेत् ॥ २७ ॥ विरूपा समं श्रेष्ठं
रूपं विंदेत यः प्रमानामयावी रोगी स ञ्नेतद्व्रतं कृत्वा विरुजा न्नानारोगाद्विमुच्यते इंद्रियकल्पदेहं यद्वत्तरेंद्रियं देहं विंदेत ॥ एवमेतद्व्रतं क
र्म्यमभ्युदयकर्मणि पठन्यो वर्तते तस्य पितृणां देवानां चानंतातृप्तिर्भवति ॥ २८ ॥ ते च पितरो देवाश्च तस्मै प्रहृष्टा सर्वान्कामान्प्रयच्छंति

कन्या च विंदेत समग्रलक्षणं वरं त्ववीरा हतकिल्बिषां गतिं ॥ मृतप्रजा जीवसुता धनेश्वरी सुदुर्भगा सुभगा
रूपमग्र्यं ॥ २७ ॥ विंदेत विरूपा विरुजा विमुच्यते य आमयावींद्रियकल्पदेहं ॥ एतत्पठन्नभ्युदये च कर्मण्यनं
ततृप्तिः पितृदेवतानां ॥ २८ ॥ तुष्टाः प्रयच्छंति समस्तकामान् होमावसाने हुतभुक् श्रीहरिश्च ॥ राजन्महन्
मरुतां जन्म पुण्यं दितेर्व्रतं चाभिहितं महत्ते ॥ २९ ॥ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां षष्ठस्कंधे एकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥

पितृदैवत्ययोर्होमयोरवसाने साक्षाद्धरिः श्रीश्च हुतभुगग्निश्चेत ॥ तावपि प्रसन्नौ भवेयातां इत्यर्थः ॥ उक्तमुपसंहरति राजन्निति हे राजन्
मरुतां महत्स्वरूपं जन्म दितेर्व्रतं पुंसवनं च ते तुभ्यं मयाभिहितं ॥ २९ ॥ इति वत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्री
शैलगुरोः सुतेन चरणकमलपरिचर्याप्रसन्नतत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवीरराघवविदुषा
विलिखितायां श्रीमद्भागवतचंद्रचंद्रिकायां षष्ठस्कंधे एकोनविंशोऽध्यायः ॥ १९ ॥ श्रीमते रामानुजाय नमः १०१

थेरूपत्वं तु आनंदो ब्रह्मकं ब्रह्मखं ब्रह्मरसो वै सः ॥ रसं ह्येवायं लब्ध्वानंदी भवति ॥ यदेष आकाश आनंदो न स्यात् । एष एवानंदयतीत्यादि
मिरवगतं ॥ निरतिशयसुखस्यैव पुरुषार्थत्वात् ॥ अयोगव्यवच्छेदिकां सार्वज्ञादिगुणवत्तामाह । अभिज्ञ इति । अभितः सर्वत्र सर्वं जानातीति।
त्यभिज्ञः सर्वज्ञः इदं च सार्वज्ञं निमित्तकारणत्वोपयुक्तं । तच्चोपादानकारणत्वोपयुक्तसर्वशक्तित्वस्याप्युपलक्षणं । सर्वज्ञत्वात्सर्वशक्तित्वाच्च।
स्योभयविधकारणत्वमुपपन्नमिति भावः ॥ ननु सार्वज्ञादिकं सुकृतहेतुकं स्यादित्येवंरूपं कर्मवश्यत्वमध्येयत्वादिकमाशंक्याह । स्वराडिति
स्वराट् स्वतंत्रः ॥ अकर्मवश्यः । कर्मवश्यानां प्रेरकः ॥ तस्माद्ध्येय एवेति भावः ॥ यद्वा ॥ सार्वज्ञादिकं सुकृतहेतुकं चेत् । सुकृतस्य तन्मूलकसा
र्वज्ञ्यादेरपरिमितत्वसंभावनया कृत्स्नजगत्कारणत्वासिद्धिः ॥ ततश्च कारणं तु ध्येय इति श्रुतिविरुद्धं ॥ अकारणवस्तुध्यानमनुचितमि
त्यत्राह ॥ स्वराडिति ॥ स्वेनैव राजते प्रकाशते सर्वं विषयीकरोति न तु कर्मणेति स्वराट् ॥ अनेन सार्वज्ञादिकं स्वरूपानुबंध्येव न तु कर्ममूलक
मित्युक्तम् ॥ एवं सार्वज्ञादिगुणवत्ताकथनेन ब्रह्मणोऽकारणत्वव्यवच्छेदरूपोऽयोगव्यवच्छेद उक्तः । स एव पुनराहित्य परिहृयते । तेन इ
त्यादिना ॥ अत्रेयमाशंका ॥ यद्यपीश्वरः प्राक्सृष्टेरेक एव सन् । सकलेतरविलक्षणत्वेन सर्वार्थशक्तियुक्तः ॥ स्वयमेव विचित्रं जगत्स्रष्टुं
शक्नोति तथापीश्वरकारणत्वं न संभवति । अप्रयोजनकत्वात् ॥ विचित्रसृष्टेरीश्वरस्य च प्रयोजनाभावात् ॥ बुद्धिपूर्वकारिणामारंभे हि
किंचित्प्रयोजनं । स्वार्थः परार्थो वा ॥ न हि परस्य ब्रह्मणः स्वभावत एवावाप्तसमस्तकामस्य जगत्सर्गेण किंचित्प्रयोजनं । अनवाप्तमवाप्यते ना
पि परार्थं ॥ अवाप्तसमस्तकामस्य परार्थो । ना हि परानुग्रहेण भवति ॥ न चेह शागर्भजन्मजरामरणनरकादिनानाविधानंतदुःखबहुलं जग
त्करुणावान् सृजति । प्रत्युत सुखैकतानमेव जनयेत् जगत्करुणया हि सृजन् ॥ अतः प्रयोजनाभावात् ॥ न ब्रह्मणः कारणत्वमुपपद्यते

भा० प्र०
५

इतो मामाशंकामर्थी रेवापनयन्नाह । तेन इत्यादिना । तदा संकल्पेनादिकवये ब्रह्मणे चतुर्मुखाय । ब्रह्म धर्मादिपुरुषार्थतत्साधनादि
निरतिशयपुरुषार्थस्वस्वरूपगुणादिकं चावेदयतीति तथा तं वेदं तेने विस्तृतवान् प्रकाशितवान् प्रादिशदिति यावत् । यो ब्रह्माणं
विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इति श्रुत्यर्थोऽत्रानुसंधेयः ॥ शास्त्रप्रवर्तनं हितार्थं । एवं च तुल्यन्यायतया जगत्सृष्टिरपि
हितार्थैवेति सूचितं । तत्र च कारुण्याच्चेतनानामपवर्गोपयुक्तज्ञानप्रवृत्तिनिष्पादककरणकलेवरप्रदानाय जगत्सृष्टिः तदापि परि
पूर्णत्वादिति फलितं । गर्भजन्मादिदुःखानुभवस्तु स्वस्वकर्ममूलक इति नेश्वरस्य दोष इति भावः ॥ तेन इत्यादिना । नामप्रपंचसृष्टिरु
च्यते इति केचित् ॥ तत्र नामकल्पनस्य सृष्ट्यंतर्भावेन पृथगुक्त्यनपेक्षत्वात् ॥ नामरूपव्याकरणं हि सृष्टिः ॥ नामरूपे व्याकरवाणि । त
न्नामरूपाभ्यां व्याक्रियत इति श्रुतेः ॥ ब्रह्मशब्दस्य नामधेयपर्यायत्वाभावाच्च ॥ स हि वेदपर्यायशब्दः ॥ ब्रह्म च स एव । मूलं कल्पो ब्रह्म च
ब्राह्मणश्चेति प्रयोगात् । कवय इत्यस्यानन्वयापत्तेश्च । यच्छास्त्रप्रवर्तनेन चिकीर्षितं हितं तद्दर्शयन् विशिनष्टि । मुह्यंति यं सूरय इ
ति ॥ सूरयो ज्ञानवंतः उपासकाः यं प्रति मुह्यंत्यपरिच्छेद्यत्वे भवत्वाद्याकुलीभवंतीत्यर्थः । अपरिच्छिन्नब्रह्मानुसंधानं हि शास्त्रप्रव
र्तनस्य परमं प्रयोजनं ॥ शास्त्रप्रवर्तनाभावे अपरिच्छेद्यस्वरूपरूपगुणविभूत्यादीन्यानंतरानवगमान्निरतिशयपुरुषार्थरूपान
वगंतुमशक्ताः सूरयो मुह्येयुरत एषां मोहो मा भूदित्येतदर्थं ब्रह्मतेन इत्यर्थः ॥ यदीशि पावे यद्यस्माच्छास्त्रप्रवर्तनाभावे मुह्यंति । अतो
ब्रह्मतेन इत्यन्वयः ॥ यद्वा ॥ आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखमिति अभियुक्तोक्तेश्चिकीर्षितकृत्स्नप्रबंधार्थरूपवस्तुनः शारी व
रकाध्यायचतुष्टयार्थरूपस्यात्र प्रबंधादौ निर्देष्टव्यत्वेन तत्र तावत् कवय इत्यंतेन समन्वयाध्यायार्थरूपं वस्तु निर्दिष्टं ॥ मुह्यंतीत्यादि ५

भा-द्वि-टी०

॥१॥

श्रीहयग्रीवायनमः॥ वेदांतोपबृंहणपरेस्मिन्पुराणेउपोद्घातरूपप्रथमस्कंधांते प्रसंगाच्छुकागमउक्तः॥ सचशुकः॥ श्रोतव्याद्यर्थी
न् श्रोतव्यादीन्प्रष्टुमिच्छत्याह एषश्रेयानितीराज्ञः प्रश्नमभिनंदति॥ वरीयानिति॥ हेनृपराजंस्ते त्वयापुंसांश्रोतव्यादिषु श्रोतव्यमंतव्य
निदिध्यासितव्यार्थेषुपरःगोचरः श्रोतव्याद्यर्थतत्वविषयः॥ लोकहितमितिपाठेप्रतीतिशेषः॥ लोकहितंप्रतिपःप्रश्नकृतनए
षःप्रश्नोवरीयान्श्रेष्ठः कुतइत्यतआह॥ यद्यतः॥ आत्मवित्संमतः आत्मज्ञानिनांसंस्तुतः ननुनायमात्मविषयकश्रवण
मननादिप्रश्नः॥ यच्छ्रोतव्यमथोजाप्यंब्रूहि॥ यद्वा॥ विपर्ययमितिसामान्येनपृष्टत्वादतः॥ कथमात्मवित्संमत्वाप्रश्नाभिनंद

श्रीमन्नारायणायनमः॥ श्रीशुकउवाच॥ वरीयानेषतेप्रश्नः कृतोलो
कहितंनृप॥ आत्मवित्संमतः पुंसांश्रोतव्यादिषुयःपरम्॥ १॥

नमितिचेन्नैवम्॥ किमयंपृष्टा आत्मविषयकश्रवणादीनांमुक्तिसाधनत्वंजानातिनवा॥ नांत्यः म्रियमाणस्ययत्कर्त्तव्यं
यच्छ्रोतव्यमितिपुरुषविशेषकर्तृकप्रश्नायोगात्॥ नाद्यः सुतरांप्रश्नानुपपत्तेरतः॥ सामान्याकारेणात्मश्रवणादीनांमु
क्तिसाधनत्वंजानतोविशेषतआत्मनः॥ श्रवणादीनांचस्वरूपमजानतोयंप्रश्नइतिप्रश्नस्यविशेषनिष्ठत्वादात्मवित्सं
मत्याभिनंदनस्योपपत्तेः॥ १॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥१॥

अथनृहियद्वाविपर्ययमित्यस्यप्रश्नस्यश्लोकत्रयेणोत्तरमाह ॥ श्रोतव्यादीनीति ॥ हेराजेंद्रगृहमेधिनां ॥ नृणांश्रोतव्यादीनिसहस्रशः
संति ॥ मुमुक्षोस्तुत्वयैकएवेत्यभिप्रायः ॥ तदनुबंधित्वेनोपासनादीनांश्रवणमर्थसिद्धम् ॥ गृहमेधिनांतत्रतत्पंचसूनापराणांमेधःहिं
सार्थः ॥ यद्वा ॥ मेधःबुद्धिर्गृहेषुमेधएषामस्तीतिगृहमेधिनःगृहासक्ताः ॥ यद्वामेधःपशुःउपनयनमेधापुरआशासानामेधपति
म्यांमेधमितिवैदिकप्रयोगात्ततत्संबंधिव्यापारोपिउपचारान्मेधःसएषामस्तीतिगृहमेधिनः ॥ पशुर्हियज्ञांगभूतेंद्रादीनांप्रीतिजन
कः तद्वदेतेपिकेवलकर्मानुष्ठानासक्तास्तत्प्रीतिसंपादकाइतिपशुसाम्यमुच्यते ॥ केवलैहिकामुष्मिकफलासक्ताःगृहस्थाइतियाव

श्रोतव्यादीनिराजेंद्रनृणांसंतिसहस्रशः ॥ अपश्यतामात्मतत्वंगृहेषुगृहमेधिनां ॥ २ ॥ निद्रयाह्रियतेनक्तंव्यवायेनचवावयः
॥ दिवाचार्थेहयाराजन्कुटुंबभरणेनवा ॥ ३ ॥ देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि ॥ तेषांप्रमत्तोनिधनंपश्यन्नपिनपश्यति ॥ ४

त ॥ अतएवात्मतत्वमात्मयाथात्म्यमजानतांगृहेषुसहस्रशःसंतीत्यनेनबहुशाखाह्यनंताश्चबुद्धयोव्यवसायिनामितिरीत्यासांसारिकफल
साधनानामानंत्यंतारतम्यंचाभिप्रेतम् ॥ २ ॥ एतेभ्यएवयैवायुर्यापयंतइत्याह ॥ निद्रयेति ॥ नक्तंरात्रौयद्वयस्तन्निद्रयाव्यवायेनमिथुनीभावे
नवाह्रियतेयाप्यतेदिवायद्वयस्तदर्थेहयाअर्थार्जनानुकूलचेष्टयासंपादितेचार्थेकुटुंबभरणेनकुटुंबपोषणेनचकाराद्वानुक्तसमु
च्चयार्थोऽत्रातिरिक्तव्यापारांतरेणापीत्यर्थः ॥ ३ ॥ ननुनश्वरकुटुंबाद्यर्थंकथमायुर्व्ययःतत्राह ॥ देहेति ॥ आत्मसैन्येषुआत्मनःस्वस्यपरि
जनेषुसत्सुअंतवत्स्वपिदेहापत्यकलत्रादिप्रसक्तः ॥ अमीषांनिधनंअंतवत्वंदृष्टांततत्वेनपश्यन्नपितेषांदेहादीनामंतवत्वंस्वात्मनि
नपश्यतिनानुसंधत्ते ॥ ४ ॥

विपर्ययप्रश्नस्योत्तरमुक्त्वा श्रोतव्यादिप्रश्नस्योत्तरमाह ॥ तस्मादिति ॥ हे भारत भरतवंश्य सर्वात्मा सर्वजीवानां मंतर्यामी अंतः प्रविष्टः शास्ता जना
नामिति श्रुतिप्रसिद्धात् ॥ जनशब्दस्य चेतनमात्रे स्वारस्यात् ॥ हरिः आश्रितदुरितहर्त्ता अनेनोपासकानां स्वप्राप्तिविरोधिदुरितनिवर्त्त
कत्वमुक्तं भवति भगवानित्यनेन देवताविशेष उक्तः ॥ भगवानिति ॥ शद्वोयस्मितिस्मरणात् ईश्वरः कार्यकारणवस्य चेतनाचेतननियंता
अनेन कारणत्वमभिप्रेतं कारणं तु ध्येय इति श्रुतेः ॥ ईदृशो हरिः ॥ अभयं मोक्षं कामयमानेन श्रोतव्य इत्यादि विषयीकर्त्तव्यः स्वरूपरू
पगुणविभूतिविशिष्टपरमात्मविषयकश्रवणादिकमेव मुमुक्षुणा कार्य्यं नान्यविषयकमित्यर्थः ॥ आत्मा वा रे द्रष्टव्यः तमेवैकमा

तस्माद्भारत सर्वात्मा भगवान्हरिरीश्वरः ॥ श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यश्चेच्छताभयं ॥ ५ ॥
एतावान्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ॥ जन्मलाभः परः पुंसामंते नारायणस्मृतिः ॥ ६ ॥

त्मानं जानथ ॥ अन्या वाचो विमुंचथेति श्रुतेः ॥ एवं च शारीरकशास्त्रार्थप्रतिज्ञापराथातो ब्रह्मजिज्ञासेति प्रथमसूत्रार्थोनुसंहितो भव
ति ॥ ५ ॥ एतस्मात् स्मर्तव्यं नान्यत्तीत्याह ॥ एतावानिति ॥ सांख्यं ज्ञानयोगः फलाभिसंधिरहितकर्मयोगः ॥ ज्ञानयोगः ज्ञानयोगेन सांख्या
नां कर्मयोगेन योगिनामिति भगवद्वचनात् ॥ स्वधर्मो भगवच्छेषतैकवृत्तिः ॥ तदुपासनमिति यावत् तस्य परिनिष्ठया ॥ अविघ्नपरि
समाप्त्या च अंते देहावसाने नारायणस्मृतिः ॥ साध्येति यत् एतावान् परउत्कृष्टः जन्मलाभः फलं ज्ञानकर्मयोगानुगृहीतभगवदुपा
सनासाध्यानारायणस्मृतिरंतकाले संपाद्येत्यर्थः ॥ ६ ॥

अत्रसदाचारंप्रमाणयति प्रायेणेति॥विधिनिषेधतः विधिनिषेधात्मकात्मवेदबोधितात्काम्यात्कर्मणोनिवृत्ताः॥नत्वावश्यकार्यंचमहा
यज्ञाद्यनुष्ठानरूपात्कलंजभक्षणादिनिषेधाद्वानिवृत्ताः॥सर्वापेक्षाचयज्ञादिश्रुतेरश्ववत्॥तमेतंवेदानुवचनेनब्राह्मणाविविदिषं
ति॥क्रियावानेषब्रह्मविदांवरिष्ठः॥नाविरतोदुश्चरितान्नाशांतोनासमाहितइतिविधिनिषेधानुवर्त्तनाभावेनदुपासनानिष्टत्वभाव
प्रतिपादनात्॥नचनस्माद्ब्राह्मणःपांडित्यंनिर्विद्यबाल्येनतिष्ठासेद्बाल्यंचपांडित्यंचनिर्विद्याथमुनिरितिबाल्यस्ययत्कर्मकामचारादिकंत
द्विदुषउपादेयतयाश्रुतमितिवक्तुंशक्यं अनाविःकुर्वन्नन्वयादित्यधिकरणेबाल्यस्यस्वमाहात्म्यानाविष्काररूपंकर्मतद्देवविदुषउ

प्रायेणमुनयोराजन्निवृत्ताविधिषेधतः॥नैर्गुण्यस्थारमंतेस्मगुणानुकथनेहरेः॥७॥त
~~हहंतेमिधामिमहापौरुषिकोभवान्॥यत्रश्रद्दधतामाशुस्यान्मुकुंदेमतिःसती॥८॥~~ ॥ ॥
इदंभागवतंनामपुराणंब्रह्मसंमितं अधीतवान्द्वापरादौपितुर्द्वैपायनादहं ८

पादेयंननुकामचारादिकमितिसिद्धांतितत्वाद्ब्रह्मणोविद्यावान्पांडित्यंनिर्विद्यउपास्यंब्रह्मतत्वंपरिशुद्धंपरिपूर्णंविदित्वावेदनंप्रतिल
भ्यतत्स्वभावानाविष्काररूपंकर्मतदुपादेयानोवर्त्ततेतितस्यार्थः॥मुनयःश्रुभाश्रयसंशीलनपराः॥नतिरंश्रवणानंतरभाविमननंविद्या
पांडित्यंबाल्यमाग्रमनंतरभाविनोमननानंतरस्यायुक्तेहशास्त्रविष्णुभाश्रयसंशीलनरूपत्वांगांतरस्यापिविहितत्वान्नैर्गुण्यस्थाःरजस्तमस्त
त्संकीर्णरहितेब्रह्मणिस्थाःतदुपासकाइत्यर्थः॥हरेराश्रितदुरितहारिणोगुणानुकथनेगुणानुवादेरमंतेस्म॥७॥नकेवलंपूर्वएवरमंते
ऽहमपितत्रैवरमइत्याह॥इदमितिद्वयेन॥भगवत्प्रोक्तंभागवतंचतुःश्लोक्याममलभूतायास्तत्प्रोक्तत्वात्॥यद्वाभगवत्स्वरूपप्ररूपादिप्रतिपाद

कत्वेन भागवतं ब्रह्मवेदस्तेन संमितं तुल्यम् ॥ यद्वा ब्रह्मसम्यग्मितं प्रमितं येन तदेवं पुराणं कर्मपितुर्द्वैपायनाद्व्यासाद्द्वापरादौ द्वापर आदिर्यस्य ॥
सः द्वापरादिः कलियुगादिः ॥ तस्मिन्नंशतनुचक्रवर्त्तिसमकालत्वप्रसिद्धेर्व्यासावतारस्य अहमधीतवान् ॥ ८ ॥ ननु सिद्धस्य तव कुतोऽध्ययने प्रवृ ॥
त्तिस्तत्राह ॥ परिनिष्ठित इति ॥ नैर्गुण्ये परिनिष्ठितः ॥ काष्ठां गतः शास्त्रनैरपेक्ष्येणो भगवदनुसंधानप्रकारे स्थित इत्यर्थः ॥ ईदृशोऽप्यहमुत्तमश्लो
कलीलया भगवल्लीलया गृहीतचेताः आकृष्टचित्तः हे राजर्षे ॥ यदाख्यानं पुराणमधीतवानस्मि ॥ तदभिधास्यामीत्युत्तरश्लोकेनान्वयः ॥ ९ ॥
आकृष्टानां मादृशामप्यस्य पुराणस्योपादेयत्वात्कैमुत्यन्यायेनारुरुक्षोस्तव सुतरामिदमुपादेयमिति तुभ्यमुपदिशामीत्याह तदहं ते तुभ्य ॥

परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया ॥ गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥ ९ ॥
तदहं तेऽभिधास्यामि महापौरुषिको भगवान् ॥ यत्र श्रद्दधतामाशु स्यान्मुकुन्दे मतिः सती ॥ १० ॥
एतन्निर्विद्यमानानामिच्छतामकुतोभयम् ॥ योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम् ॥ ११ ॥

तदभिधास्यामि कथयिष्यामि ॥ चिरमशुश्रूषवे मह्यं कथमभिधास्यसीत्यत आह ॥ महापौरुषिक इति ॥ महापुरुषो भगवान् ॥ वेदाहमेतं पुरुषं मह
न्तमिति श्रुतेः ॥ स उपास्यत्वेनास्यास्तीति महापौरुषिको महापुरुषभक्तो भवान् ॥ न हि भगवद्भक्तानां रहस्यार्थोपदेशेन चिरं शुश्रूषापे
क्षेति भावः ॥ यत्र पुराणे श्रद्दधतां श्रद्धां कुर्वतां मुकुन्दे मोक्षप्रदे भगवति सती अहैतुकी मतिर्भक्तिः स्याद्भवेत् ॥ १० ॥ मुमुक्षूणां नातःप
रमन्यन्मोक्षसाधनमित्याह ॥ एतदिति ॥ तापत्रयाभिहेतुकनिर्वेदं प्राप्तानामकुतोभयं मोक्षमिच्छतां योगिनामनभिसंहितफलक
र्मयोगनिष्ठानां हे नृप हरेर्नामानुकीर्तनं स्वरूपादिचिन्तनादेरप्युपलक्षणमिदं तन्नामानुकीर्तनं तत्स्वरूपादिचिन्तनं चेत्येतदेवमु ॥ ३ ॥
क्तिसाधनं नान्यदित्यर्थः ॥ ११ ॥

अल्पमेवायुरवशिष्टं किमहं साधये यमिति मा शुच इत्याह ॥ किमिति ॥ प्रमत्तस्य देहाद्यसक्तत्वादिष्वासक्तस्य परोक्षैरज्ञाततत्त्वैर्बहुभि
र्हायनैः किं किं प्रयोजनं किमपीत्यर्थः ॥ विदितं वृथायातीति ज्ञातं मुहूर्त्तमेव वरं यतः ॥ येन विदितेन मुहूर्त्तेन श्रेयसे घटते तयत्नं कुर्यात् ॥ १२
विदितस्य मुहूर्त्तस्य श्रेयोघटकत्वमितिहासमाह ॥ खट्वाङ्ग इति ॥ खट्वाङ्गो हि देवपक्षे स्थित्वा दैत्यान् जयेन्ततः ॥ प्रसन्नैर्देवैर्वरं वृणीष्वेत्यु
क्तेनेनोक्तं प्रथमं ममायुः ॥ कथ्यतामिति ॥ ततो देवैरुक्ते मुहूर्त्तमात्रमस्तीति ततश्शीघ्रं विमानेन भुवमागत्य हरिं शरणं गत इति नवमस्
कंधे प्रसिद्धं ॥ खट्वाङ्गो नाम राजर्षिरायुष इयत्ताम् ॥ एतावत्तां ज्ञात्वा इदमस्मिल्लोके सर्वं देहादिष्वात्मात्मीयत्वाद्यभिमानं मुक्त्वा सहित्वाऽ

किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह ॥ वरं मुहूर्त्तं विदितं घटते श्रेयसे यतः ॥ १२ ॥ खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामि
हायुषः ॥ मुहूर्त्तात्सर्वमुत्सृज्य गतवानभयं हरिम् ॥ १३ ॥ तवाप्येतर्हि कौरव्य सप्ताहं जीवितावधिः ॥ उपकल्पय तत्सर्वं ता
वद्यत्साम्परायिकम् ॥ १४ ॥ अन्तकाले तु पुरुष आगते गतसाध्वसः ॥ छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम् ॥ १५ ॥

भयं भवप्रतिभटं हरिं गतवानित्यान्तः ॥ १३ ॥ के मुमुक्षायेनाह ॥ तवेति ॥ अपि त्वर्थः तवापीत्यर्थः हे कौरव्य तव तु एतर्हीदानीमपि जीवितावधि
र्जीवितस्यावधिः परिमाणं सप्ताहं सप्तदिनपर्यन्तं तावत् ॥ तावता सप्ताहेन कालेन साम्परायिकं परलोकहितं यत्तत्सर्वं उपकल्पय सं
पादय ॥ १४ ॥ तावद्वैराग्यमाह ॥ अन्तकाले देहावसानकाले आगते प्राप्ते सति पुरुषः गतसाध्वसः निवृत्तभयः ॥ असङ्गो नासक्तिः स एव श
स्त्रं तेन देहे तं देहमनु ये अनुसृत्य ये वर्त्तमाना अपत्यकलत्रादयो देहानुबंधिनस्तेषु च स्पृहामात्मात्मीयत्वाभिमानं प्रयुक्तं भोगे छांछि

भाग ॥ १४ ॥

भा.द्वि.टी.

॥४॥

किंच गृहात्प्रव्रजितः निर्गतः धीर इत्यादिना आश्रयं भद्रमीक्षत इत्यंतेनाष्टांगयोगसंक्षेपोक्तिः ॥ धीरः जितेंद्रियः अनेन ब्रह्मचर्यादिलक्षणो यम उ
क्तः ॥ पुण्यतीर्थजलेषु स्नान इत्यनेन स्नानादिनियम उक्तः ॥ शुचौ परिशुद्धे विविक्ते एकांते विधिवच्चैलाजिनकुशोत्तर इति व्युत्क्रमेण कर
ल्पिते आसने विधिवदासीनः ॥ ऋजुकायत्व स्वस्तिकादीननतिक्रम्योपविष्टः अनेनासनरूपांगमुक्तम् ॥१६॥ प्राणायामस्य जपगर्भ
त्वात्तावज्जपमंत्रमाह ॥ अभ्यसेदिति ॥ त्रिवृत्त्रयाणामकारोकारमकाराणां वृद्वृत्तं यस्मिन् तत्त्रयग्रथितमित्यर्थः ॥ ब्रह्माक्षरं ब्रह्मप्रति
पादकमक्षरं प्रणवं मनसाभ्यसेदावर्तयेत् ॥ जितश्वासः जितप्राणः ब्रह्मबीजं प्रणवमविस्मरन्स्मरन्नेव मनो यच्छेन्नियच्छेत् ॥ इदं च

गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः ॥ शुचौ विविक्त आसीनो विधिवत्कल्पितासने ॥१६॥ अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्मा
क्षरं परम् ॥ मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् ॥१७॥ नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः ॥ मनः कर्मभि
राक्षिप्तं शुभार्थे धारयेद्धिया ॥१८॥ तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा ॥ मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत् ॥१९

प्राणायामरूपमंगमुक्तम् ॥१७॥ इंद्रियप्रत्याहारमाह ॥ नियच्छेदिति विषयेभ्यः शब्दादिभ्यः अक्षान् श्रोत्रादींद्रियाणि बुद्धिः ॥ सारथिर्यस्य स तथाभूत
प्रग्रहभूतेन मनसा यच्छेत् ॥ बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च इति श्रवणात् ॥ धारणमाह ॥ मन इति ॥ पुनश्च कर्मभिस्तद्वासनाभिराक्षिप्तं वि
क्षिप्तं मनः ॥ शुभार्थे शुभाश्रये भगवद्रूपे निश्चयात्मिकया बुद्ध्या धारयेत् स्थिरं कुर्यात् शुभाश्रये मनसो वस्थापनं धारणं ॥ शुभाश्रयस्य पुनः पु
नः चिंतनं ध्यानं ॥ तस्य विजातीयप्रत्ययांतराव्यवहितत्वं समाधिरिति भेदः ॥१८॥ ध्यानमाह ॥ तत्रेति ॥ अव्युच्छिन्नेन समग्रशुभाश्रयाविषु
क्तेन चेतसा चिंतनेन ॥ एकावयवं प्रधानांगं मुखाकारं ध्यायेत् ॥ अनेनास्य चिंतायाः पूर्वं भावितं सिद्धं पूर्णध्यानात्मक एकावयवं स्मरेदित्यर्थः ॥४॥

समाधिमाह ॥ मन इति ॥ निर्विषयं बाह्यविषयानुभवरहितं मनो युक्त्वा समाधाय किंचन बाह्यविषयादिकं न स्मरेदित्यर्थः ॥ आनंदसंप्लवे
लीनत्वान्न किंचित्स्मर्तुं द्रष्टुं वा क्षमत इति चार्थः ॥१९॥ शुभाश्रयरूपमाह ॥ पदमिति ॥ यत्र मनः प्रसीदति ॥ यस्मिन्स्वरूपे चिंत्यमाने मनः
रागाद्यकलुषितं भवति तद्वै विष्णोः परमं पदोमा यस्मात्तत्परमं सर्वोत्कृष्टं स्वरूपमित्यर्थः ॥ कदाचिद्रागादिकालुष्यसंभावनामाशंक्याह ॥ र
जस्तमोभ्यामिति रजसा आक्षिप्तं तमसा विमूढमात्मनः ॥ स्वस्य मनः धारणया यच्छेत् ॥ धारणामाहात्म्यमाह ॥ या धारणा तत्कृतं रजस्तमोभ्यां
कृतं मलं रागादिकं हंति निवर्तयति ॥२०॥ यस्यां धारणायां संधार्यमाणायां ॥ पाकं पचतीतिवन्निर्देशः ॥ धारणायां क्रियमाणायामित्यर्थः ॥

पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति ॥ रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः ॥ यच्छेद्धारणया धीरो हंति या तत्कृतं मलं
॥२०॥ यस्यां संधार्यमाणायां योगिनो भक्तिलक्षणः ॥ आशु संपद्यते योगो आश्रयं भद्रमीक्षतः ॥२१॥ राजोवाच ॥
यथा संधार्यते ब्रह्मन्धारणा यत्र संमता ॥ यादृशी वा हरेदाशु पुरुषस्य मनोमलम् ॥२२॥

भक्तिलक्षणो योगः प्रीतिपूर्वमनुध्यानं भक्तिरित्यभिधीयते इत्युक्तलक्षणरूपो योगः भद्रं शुभमाश्रयं ईक्षतः ध्यातुराशु संपद्यते संपन्नो
भवति ॥ एतादृशमहात्म्यवती धारणेत्यभिप्रायः ॥२१॥ एवं संग्रहेणाष्टांगयुक्ते योगे उपदिष्टे पुनर्विस्तरबुभुत्सया परीक्षित्पृच्छति यथे
ति ॥ धारणाविषयप्रश्नः ॥ यादृशीति धारणादृशाविशेषप्रश्नः ॥ यथेति यत्नक्रमप्रश्नः ॥ ननु धारणाया एव दृशाविशेषादीनां वि
शेषेण प्रश्नः ॥ ननु प्रधानभूतस्य ध्यानस्येति किंचित ॥ धारणापूर्वकत्वाद्ध्यानस्य धारणानुसारेणैव ध्यानाच्च तत्प्रश्नेनैव गतार्थत्वात् एवमु

तच्चैकं ब्रह्मसंयोगरूपचोदनाख्याविशेषान्नानाशाखादिभिः हादिस्याद्दिश्याये नोपास्यब्रह्मरूपाणां नानात्वेनोपासनानामपि नानात्वात् यथा जगच्छरीरकस्यो
पासनमाह ॥ जितासनइति ॥ जितासनः आसनजयः कृताभ्यासरहितः ॥ जितप्राणः स्ववशीकृतप्राणः जितसंगः जितासंगः करणः जितेंद्रियः जितबाह्ये
न्द्रियः स्थूले स्थविष्ठे भगवतो रूपे स्वाधारे मनः सारथिमत्तया धियाधारयेत् ॥२३॥ चिरविद्यात्मकप्रपंचस्य भगवच्छरीरत्वकथनपूर्वकं तस्यधारणा
विषयत्वमाह ॥ विशेषइति ॥ विशेषः कार्यकारणकारणः पृथिव्यादिभिः तमयप्रपंचः ॥ तस्यदेहः स्थवीयान् स्थूलतराणामपि मध्ये स्थविष्ठः स्थू
लतरः ॥ यत्रदेहे विश्वं समस्तं भूतं भव्यं च भवच्च भूतभविष्यद्वर्त्तमानकालगोचरं समष्टिव्यष्ट्यात्मकं पदार्थजातं दृश्यते अंतर्गतत्वेनोपास्य

श्रीशुकउवाच ॥ जितासनो जितश्वासो जितसंगो जितेंद्रियः स्थूले भगवतो रूपे मनः संधारयेद्धिया ॥२३॥ विशेषस्तस्य देहोयं स्थविष्ठ
श्च स्थवीयसां ॥ यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च यत् ॥२४॥ अंडकोशे शरीरेस्मिन्सप्तावरणसंयुते ॥ वैराजः पुरुषो यो
सौ भगवान् धारणाश्रयः ॥२५॥ पातालमेतस्य हि पादमूलं पठंति पार्ष्णिप्रपदे रसातलं ॥ महातलं विश्वसृजोथ गुल्फौ तला
तलं वै पुरुषस्य जंघे ॥२६॥

ते ॥२४॥ एतच्छरीरकानिरूढांशभूतः पुरुषो विषयइत्याह ॥ अंडकोशइति ॥ सप्तावरणसंयुते पृथिव्यप्तेजोवाय्वाका
शाहंकारमहत्तत्वानि तैर्युक्ते अंडकोशाख्यशरीरे वैराजः विराट् ॥ अनिरुद्धः तदंशभूतः पुरुषः वैराजः न चतुर्मुखः तस्यैवं पुराधारणायाम्नये
निरित्येतद्रूपोपासकत्वावगमात् सोवैराजः पुरुषः भगवान् धारणाश्रयः धारणाविषयः ॥२५॥ एवं चतुर्दशभुवनात्मकांडकोशस्यतच्छरीर
त्वसामान्येनांडकोशांतर्गतपदार्थाविभज्यपादाद्यवयवत्वेनोपासनामाह ॥ पातालमिति ॥ एतस्य वैराजपुरुषस्य पादतलं पादस्याधोभागं पाता
लं वदंति ॥ पादतलत्वेन पातालमुपास्यं वदंतीत्यर्थः ॥ एवमग्रेपि ॥ पार्ष्णिश्च प्रपदं च पार्ष्णिप्रपदे ॥ पार्ष्णिः पादमूलं प्रपदं पादाग्रं एतदुभयं रसातल
मित्यर्थः विश्वसृजः विश्वसृष्टः तावपि गुल्फौ महातलं द्वे अपि जंघे तलातलम् ॥२६॥

विश्वमूर्तेः द्वे जानुनी सुतलं वितलमतलं च ऊरुद्वये महीतलं भूर्लोकं तस्य जघनं कट्याः पुरोभागं नभस्थलं भुवर्लोकं नाभिरेव सरस्तत्त्वेनोपास्यं गृणं
ति वदंति ॥ तत्त्वविद इति शेषः ॥ २७ ॥ अस्य वैराजस्योरःस्थलं उरःप्रदेशं ज्योतिरनीकं ज्योतिश्चक्रं ग्रीवात्वेन महर्लोकं उपास्यमित्यर्थः ॥ अ
स्य वदनं जनलोकः ॥ आदिपुंसः वराटं ललाटं तपोलोकं विदुः सहस्रशीर्ष्णः सहस्रशिरसः शीर्षाणि शिरांसि सत्यं सत्यलोकं विदुरित्यर्थः ॥
२८ ॥ इंद्रादय उस्राः देवा बाहव इत्याहुः ॥ अमुष्य कर्णौ श्रोत्रेंद्रियाधिष्ठानभूतकर्णबिले दिशः ॥ तदधिष्ठेयं श्रोत्रेंद्रियं तु शब्दः ॥ ध्वन्यात्मा

द्वे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलं चातलं च ॥ महीतलं तज्जघनं महीपते नभःस्थलं नाभिसरो
गृणंति ॥ २७ ॥ उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य ॥ तपो वराटीं विदुरादिपुंसः सत्यं
तु शीर्षाणि सहस्रशीर्ष्णः ॥ २८ ॥ इंद्रादयो बाहव आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः ॥ नास
त्यदस्रौ परमस्य नासे घ्राणोऽस्य गंधो मुखमग्निरिद्धः ॥ २९ ॥ द्यौरक्षिणी चक्षुरभूत्पतंगः पक्ष्माणि
विष्णोरहनी उभे च ॥ तद्भ्रूविजृंभः परमेष्ठिधिष्ण्यमापोऽस्य तालू रस एव जिह्वा ॥ ३० ॥ कोवर्णित्वमकस्त्वएवमते

पि ॥ परमस्य समाध्यधिकारहितस्य नासापुटे नासत्यदस्रावश्विनौ गंधः घ्राणो ग्राहिरूपेण नानाविधो गंधः तदिंद्रियं इद्धः दीप्तः अग्निरस्य
स्य मुखम् ॥ २९ ॥ द्यौर्द्युलोकः ॥ अक्षिणी नेत्रगोलकं ॥ तत्र च चक्षुरिंद्रियं पतंगः सूर्यः विष्णोर्वैराजस्य पक्ष्माणि उभे अहनी अहोरात्रः तस्य
वैराजस्य भ्रूविजृंभः भ्रूविनामः भ्रूविलास इति यावत् परमेष्ठिधिष्ण्यं परमेष्ठिनः चतुर्मुखस्य स्थानमस्य वैराजस्य तालु आपः तदभि

भा॰द्वि॰टी॰

॥६॥

अनंतस्य त्रिविधपरिच्छेदरहितस्य शिरश्छंदांसि गृणंति दंष्ट्रा यमः द्विजा दंताः नपुंसकत्वमार्षं ॥ स्नेहकालाः स्नेहस्य कला अंशा अस्य हादीनां
स्नेहकला वैराजस्य दंता इत्यर्थः ॥ तस्य हासः हसनं जनोन्मोहकरी माया आश्चर्यशक्तिः मायाशब्दस्य सर्वत्रानुगतं प्रवृत्तिनिमित्तमाश्चर्य
मेव तच्च विस्मयनीयत्वरूपं तच्च नानाविधकार्यकरत्वात् ॥ यस्यापांगमोक्षः दुरंतसर्गः अपारसर्गः ॥३१॥ व्रीडा लज्जा उत्तरोष्ठः अधरः अध
रोष्ठः लोभः धर्मः स्तनः अधर्मपथः अधर्ममार्गः तस्य पृष्ठभागः तस्य वैराजस्य मेढ्रं कः प्रजापतिः वृषणौ मित्रावरुणौ समुद्राः कुक्षिरुद

छंदांस्यनंतस्य शिरो गृणंति दंष्ट्रा यमः स्नेहकला द्विजानि ॥ हासो जनोन्मादकरी च माया दुरंतसर्गो यदपांगमो
क्षः ॥३१॥ व्रीडोत्तरोष्ठोऽधर एव लोभो धर्मः स्तनोऽधर्मपथोऽस्य पृष्ठं ॥ कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समु
द्रा गिरयोऽस्थिसंघाः ॥३२॥ नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेंद्र ॥ अनंतवीर्यश्वसितं
मातरिश्वा गतिर्वयः कर्म गुणप्रवाहः ॥३३॥ ईशस्य केशान्विदुरंबुवाहान्वासस्तु संध्ये कुरुवर्य भूम्नः
अव्यक्तमाहुर्हृदयं मनश्च स चंद्रमाः सर्वविकारकोशः ॥३४॥

रं गिरयस्तस्यास्थिसंघाः ॥३२॥ नद्यः गंगायमुनाद
योऽस्य नाड्यः तनूरुहाणि रोमाणि महीरुहाः वृक्षाः विश्वतनोर्विश्वशरीरकस्य हे नृपेंद्र अनंतवीर्यश्वसितमनंतवीर्यस्यापारवीर्यस्य श्व
सितं प्राणः मातरिश्वा वायुः गतिर्गमनं वयः कालः तस्य कर्म गुणप्रवाहः गुणानां सत्वरजस्तमसां प्रवाहः कार्यं प्राणिनां संसार इत्यर्थः
३३ ॥ ईशस्य भगवतः केशानंबुवाहान्मेघान्विदुः हे कुरुवर्य भूम्नः विभोर्वासः वस्त्रं संध्ये सायंप्रातःसंध्ये तस्य हृदयं हृदयकमलमव्यक्तं ॥६॥
प्रधानमाहुः ॥ स प्रसिद्धः सर्वविकारकोशः ॥ सर्वौषधिविकारहेतुः चंद्रमाः तदीयं मनः इत्यर्थः सर्वविकाराश्रय इत्यर्थः ॥३४॥

विज्ञानशक्तिं व्यवसायशक्तिं तां महिं महत्तत्त्वमामनंति उपासते सर्वात्मनः सर्वांतर्यामिणः गिरित्रं रुद्रः अंतःकरणमहंकारम् ॥ अतएव रुद्रोव
त्तसि चाभवदिति विश्वरूपेण कथितम् ॥ अहंकारस्यानात्मन्यात्माभिमानहेतुरिति मोहकस्य गिरित्रस्य तदात्मकत्वं युक्तं रासभोड्डवा
यामुष्ट्रचाश्वतरी ॥ अश्वाश्वतर्युष्ट्रगजास्तस्य नखानीत्यर्थः ॥ सर्वे मृगाः पशवश्च तस्य श्रोणिदेशे उपास्यास्तत्वेनानुसंधेयाः इत्यर्थः ॥
३५ ॥ वयांसि वेदात्मकतित्तिरयादयः पक्षिणस्तस्य व्याकरणं नामरूपे व्याकरवाणीति श्रुतेः शिल्पं नैपुणं मनुर्मंत्रः तस्य मनीषा बुद्धिः

विज्ञानशक्तिं महिमामनंति सर्वात्मनोंतःकरणं गिरित्रं ॥ अश्वाश्वतर्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणि
देशे ॥ ३५ ॥ वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा मनुजो निवासः ॥ गंधर्वविद्याधरचारणाप्सरः स्वरः स्मृति
रसुरानीकवीर्यः ॥ ३६ ॥ ब्रह्माननं क्षत्रभुजो महात्मा विडूरुरंघ्रिश्रितकृष्णवर्णः ॥ नानाभिधाभीज्यगणोपप
न्नो द्रव्यात्मकः कर्मवितानयोगः ॥ ३७ ॥
मनुजः मनुष्यवर्गः तन्निवासस्थानं ॥ गंधर्वादीनां द्वंद्वैकवम् ॥ गंधर्वादिरूपः स्वरोंऽतोव
र्गः अस्य स्वरः षड्जादिस्वरः तेषां गानाद्यवयवः तत्स्वरत्वं युक्तं ॥ असुरानीकवीर्यः असुरसमूहश्रेष्ठः प्रल्हादादयस्तस्य स्मृतिः ॥ ३६ ॥
ब्रह्म ब्राह्मणास्तस्याननं महात्मा वैराजः क्षत्रभुजः क्षत्रं क्षत्रियो भुजो यस्य सः विड्वैश्यः ऊरूयस्य तथोक्तः अंघ्रिश्रितकृष्णवर्णः ॥ अं
घ्रिश्रितः कृष्णवर्णः शूद्रो यस्य सः कृष्णवर्णस्तु तदंघ्रित्वेनानुसंधेय इत्यर्थः ॥ नानाभिधाभिज्यगणः ॥ नानानामका अभीज्या यष्टव्या
वसुरुद्रादयस्तेषां गणैरुपपन्नो युक्तः योद्रव्यात्मको हविःसाध्यावितानयोगः स तस्याराधनरूपं कर्मेत्यर्थः ॥ ३७ ॥

भा.द्वि.टी.

॥ १ ॥

ईश्वरविग्रहस्य वैराजविग्रहस्य यः॥ संनिवेशः अवयवसंनिवेशः॥ कथितः। असौ इयानेतावानेवास्य विशेष्टस्मिन् वैराजसंबंधिनि वपुषि स्वकीय
बुद्ध्या मुमुक्षुभिर्मनः संधार्यते यतः॥ यस्मादीश्वरशरीरादस्माद्बहिर्भूतं नास्ति सर्वं तच्छरीरांतर्भूतमित्यर्थः॥ ३८॥ एतदेवाह॥ स इति॥ दृश्यतेन्अ
यनेचेति अस्यार्थ उच्यते॥ सर्वधीवृत्तिभिः प्रत्यक्षानुमानादिसर्वैर्विधज्ञानैरनुभूताः॥ सर्वे ये पदार्थास्ते ऽबहिर्यस्याधिष्ठेयतया यस्य स तथोक्तः
॥ एवं च तदधिष्ठेयपदार्थानां तच्छरीरत्वमर्थसिद्धम्॥ तत्र दृष्टांतमाह॥ यथा एक आत्मा जीवः॥ स्वप्नेक्षिता स्वप्नजनद्रष्टा स्वाप्नजनद्रष्टा आत्मा स्व
कीयसुकृतदुष्कृतानुसारेण परमात्मसृष्टान् स्वेनैवानुभाव्यान् तत्कालमात्रावसानान् पदार्थानधिष्ठाय राज्याभिषेकशिरश्छेदादिसुखदुःख

इयानसावीश्वरविग्रहस्य यः संनिवेशः कथितो मया ते॥ संधार्यतेऽस्मिन्वपुषि स्थविष्ठे मनः स्वबुद्ध्या न यतोऽस्ति
किंचित्॥ ३८॥ स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः॥ तं सत्यमानंदनिधिं भजेत नान्य
त्र सज्जेद्यत आत्मपातः॥ ३९॥ इति श्रीमद्भागवते महापुराणे द्वितीयस्कंधे ऽष्टांगयोगधारणावर्णनं नाम प्रथमो ऽ
ध्यायः॥ १॥

मनुभवति तथा॥ अत्रैकस्यानेकपदार्थेष्वधिष्ठातृत्वमात्रे दृष्टांतः। एवं दृष्टाश्रुतचेतनाचेतनशरीरकत्वेपि शरीरगतदोषासंस्पर्शित्वमाह।
सत्यमिति॥ सत्यं स्वस्वरूपतो गुणतश्चानिर्विकारं तस्य पुरुषार्थत्वमाह॥ आनंदनिधिमिति॥ आनंदाश्रयमित्यर्थः॥ आनंदस्वस्वरूपमुपलक्षणम्
आनंदं ब्रह्मणो विद्वान्विज्ञानमानंदमित्युभयत्रापि श्रवणात्॥ भजेत उपासीत॥ यद्वा॥ सत्यमित्यचिद्व्यावृत्तिः॥ आनंदनिधिमिति संसारिव्यावृ
त्तिः॥ अन्यत्र न सज्जेदत्र ब्रह्मात्मकस्वतंत्रं वस्तु किंचित्परिकल्प्य तत्र॥ सक्तो न भवेत्॥ यतस्तदासंगादात्मपातः॥ आत्मनः स्वस्य पातः संसारः स्यात्
स्मान्नासज्जेदित्यर्थः॥ ३९॥ इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचयप्रसन्नततत्सन्निधिसमधिग

एवं वैराजधारणामुक्त्वा मुमुक्षोर्हृदये उपास्यं तदुपासनं निष्कामस्यार्चिरादिना गतिं च वक्ष्यन् तत्कारणं वैराजधारणाया एव तावन्माहात्म्यमाह ॥ एवमिति ॥ एवं या धा-
रणा तया तुष्टाद्धरेः पुरा प्रलयसमयेन नष्टां पूर्वकल्पचतुर्मुखेन सह विनष्टां स्मृतिं सर्गविषयकज्ञानं प्रत्यवरुध्य लब्ध्वा व्यवसायबुद्धिः स्मृतिविषय-
व्यवसायरूपज्ञानः अत एवामोघदृष्टिरमोघया यथावस्थितार्थदृष्टिस्ततद्वस्तुविषयज्ञानं यस्य स तथोक्तः ॥ आत्मयोनिश्चतुर्मुखः अप्ययात्प्रलयात्प्रा-
ग्यथा तथा ससर्ज पूर्वकल्पपदार्थसजातीयानेव पदार्थान् ससर्जेत्यर्थः ॥ अत्र यद्यपि पूर्वकल्पे विनष्टां स्मृतिं परिरभ्येत्यनेन पूर्वकल्पीयश्चतुर्मुखः स
एवास्मिन्कल्पेऽपि प्रतीयते ॥ तथापि प्रतिकल्पं चतुर्मुखानां भेद एव नाप्यः ॥ तत्तत्कल्पचतुर्मुखस्य ब्रह्मणः सह ते सर्वे संप्राप्ते प्रतिसंचरे ब्रह्मलोके तु
पर्यंतकाले परामृतात्परिमुच्यंति सर्वे इति मुक्त्यवगमेन पुनरावृत्त्यसंभवाद्भगवत्पूर्णकृपापात्रस्य पुनःसंसारायोगाच्च ॥ तथा हि वक्ष्यति ॥ भग-

शुक उवाच ॥ एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् ॥ तथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसायबुद्धिः ॥ १ ॥

वान् ऋषिमाद्यं नव भ्रांतिपापीयांस्त्वां रजोगुणः ॥ नात्मावसीदत्यस्मिंस्ते वर्षीयान्मदनुग्रह इति ॥ अतः प्रतिकल्पं विभिन्ना एव चतुर्मुखाः ॥ अत एव यद्यपि
पूर्वानुभूतवस्तुविषयकज्ञानपरः स्मृतिशब्दः तथापीह सर्गविषयकज्ञानमात्रपरः स्मृतिशब्दप्रयोगस्तु ज्ञातज्ञेयनानामप्यंतःसाजात्याभिप्रायक-
तः पूर्वदृष्टांतसजातीये गव्यंतरे स एवायं गौरिति प्रत्यभिज्ञावत् ॥ ननु वैराजधारणया विश्वस्रष्टिसामर्थ्यं विश्वस्रष्टौ च सत्यां स्रष्टानां पाताला-
दीनां वैराजपादतलादिरूपेण धारणीनीतरे तदाश्रयवद्दाति ॥ न च स्वस्रुमाणपदार्थविषयकज्ञानसद्भावेन पातालादीनामवयवत्वकल्पनं
युक्तं स्मृतिं प्रत्यवरुध्येत्यनेन तस्यानस्यापि धारणातो लभ्यत्वावगमात्सत्यं भगवन्नाभिकमलाच्चतुर्मुखे उत्पन्ने तदीयतपश्चर्यया भगवति च प्रस-
न्ने ॥ भयत्वं तप आनिहविद्यां चैवमदाश्रयाम् ॥ ताभ्यामंतर्हृदि ब्रह्मन्लोकान्द्रक्ष्यस्यपावृतान् ॥ तत आत्मनि लोके च भक्तियुक्तः समाहितः द्र-

भा.द्वि.टी.
॥८॥

त्वासितंतनंब्रह्मन्यथिलोकांस्वमात्मनइतिवस्तमाणनीत्वास्वस्तमाणेषुसर्वेषुपदार्थेषुदृष्टेषुतेषांचपदार्थानांभगवदवयवत्वेनधारणयास्तद्दृष्टिवि
षयज्ञानस्यदृष्टिसामर्थ्यलाभस्यात्राभिधानात्॥ दैनंदिनकल्पाभिप्रायंवा॥ एवंप्रपंचशरीरकतदाश्रयभगवद्ध्यानाद्ब्राह्मणःस्वदृष्टिस्मृतिलाभउक्तः
१॥ अथमुमुक्षुहृदिउपास्यरूपंवक्ष्यन्॥ यावानर्थउदपानेसर्वतःसंप्लुतोदकेइतिन्यायेनवेदेमुमुक्षोःसाकल्येनार्थानुपादेयत्वमाह॥ शाब्दस्येति
शाब्दस्यब्रह्मात्मकस्यब्रह्मणोवेदस्यैषपंथाएषादिक॥ कइत्यतआह॥ यदिति॥ अपार्थैरपगतपरमपुरुषार्थैःनामभिःस्वर्गादिविषयशब्दैर्धीर्बु
द्धिर्ध्यायतिचिंतांकरोतीतियत्स्वर्गादिफलेश्रुतेतत्रधीः॥ प्रवणस्यादित्यर्थः॥ नात्मासारवत्वंनस्वरूपतइतिद्योतनार्थंनामपदप्रयोगःतृ
तीयाचाध्ययनेनवसतीत्यादिवद्धेत्वर्थेनाममात्रसारभूतस्वर्गाद्यर्थकर्मणिबुद्धिप्रावण्यापादनमितियदयंवेदमार्गइत्यर्थः॥ स्वर्गादीनाम

शाब्दस्यहिब्रह्मणएषपंथायन्नामभिर्ध्यायतिधीरपार्थैः॥ परिभ्रमंस्तत्रनविंदतेर्थान्मायामयेवासनयाशयानः॥ २॥ अ
तःकविर्नामसुयावदर्थःस्यादप्रमत्तोव्यवसायबुद्धिः॥ सिद्धेऽन्यथार्थेनयतेतभूयःपरिश्रमंतत्रसमीक्षमाणः॥ ३॥

पार्थत्वमेवाह॥ परिभ्रमन्निति॥ मायामयेप्रपंचेवासनयाऽनादिकर्मवासनयाशयानोवर्तमानः॥ तत्रस्वर्गादिविषयेपरिभ्रमन्नर्थान्मोक्षत
उपायादीन्नविंदतेनलभते॥ २॥ ननुमातापितृसहस्रेभ्योपिवत्सलतमोवेदआत्मोज्जीवनेप्रवृत्तः॥ कथंनाममात्रसारभूतस्वर्गाद्यर्थक
र्मबोधयन्प्रतारयेदित्याशंकांपरिहरन्मुमुक्षोरपेक्षितांशस्योपादेयतामाह॥ अतइति॥ अतःवेदोक्तस्यसाकल्येनानुपादेयत्वात्कविः
त्याज्योपादेयविषयविवेकवाननेनोक्ताशंकापरिहृता॥ वेदोहितमःप्रचुराणांरजःप्रचुराणांसत्वप्रचुराणांचलोकानांवत्सलत
यैवहितमवबोधयति॥ यद्येषांस्वगुणानुगुण्येनस्वर्गादिसाधनमेवहितंतावद्बोधयेत्तद्वारेणैवरजस्तमःप्रचुरतयासात्विकफलर ॥ ८॥

मोक्षाविमुखाः स्वापेक्षितफलमजानंतः कामप्रावण्यवशा अनुपायेउपायभ्रांत्या प्रणष्टाभवेयुरिति गुणत्रयप्रचुराणां स्वर्गादिफलानि तत्साधना
नि वा व बोधयति केवलसात्विकस्य तु मुमुक्षोस्तानि परित्याज्यानि परिगृहीतानि वा तत्फलानि परिमत्सर्वाणि मोक्षैकफलतयानुष्ठेयानीति विवे
कसंपन्नः ॥ अप्रमत्तः कदाचिद्देहधारणार्थतया परिग्राह्येष्वप्यन्नपानादिष्वनासक्तः व्यवसायबुद्धिः ॥ स्वर्गादीनां क्षयिष्णुत्वसातिशयत्व
निश्चयात्मिकज्ञानवान्नामसुनाममात्रसारभूतेषु भोग्येषु यावदर्थस्यात् यावत्प्रयोजनवान्स्यात् न तु प्रयोजनाभावेषु रतः स्यादित्यर्थः ॥
नानाविधेषु फलेषु तत्साधनभूतेषु बहुषु कर्मसु वेदबोधितेषु सत्स्वपि यावता देहधारणमुपासना निर्वृत्तिश्च भवति तावत्परिग्रहवान्स्या
दित्यर्थः ॥ देहधारणार्थं क्षुद्रफलेष्वपि न यतितव्यमित्यत आह ॥ सिद्ध इति ॥ अर्थेऽपेक्षितेऽर्थे ऽयथापूर्वकमानुरूपं सिद्धे सति तत्तत् क्षुद्र

सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किं ॥ सत्यंजलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः ॥

फलं तदुपायादिष्वपि न यतेत ॥ कथंभूतो न यतेत तत्र यत्ने क्रियमाणे परिश्रमं समीक्षमाणः ॥ भवितव्यमेव भवति परिश्रमस्तु फलति
इत्यर्थः ॥ ३ ॥ अप्रयाससिद्धिं विवृणोति ॥ सत्यामित्यादिना द्वयेन ॥ क्षितौ सत्यां कशिपोः ॥ शय्यायाः पर्यंकादेः प्रयासैस्तदर्जनानुकूल
प्रयत्नैः किं न किमपि ॥ किंतु परिश्रम एवेत्यर्थः ॥ स्वतः सिद्धे बाहौ सत्युपबर्हणैः किं ॥ अंजलौ सति पुरुधान्नपात्र्या नानाविधभोज
नपात्रेण किं ॥ वल्कलादौ ॥ सति दिक्षुत्तरीयस्थानीयासु सतीषु वल्कलेषु उत्तरीयस्थानीयेषु सत्सु ॥ ननु वल्कलाभावे दिक्षु
सतीष्वित्यर्थः ॥ स्वरसः अपवित्रकरो नग्न इति ॥ नग्नस्य कर्मानर्हत्वस्मरणान्मुमुक्षोरप्यावश्यकानामनुष्ठेयत्वात् ॥ दुकूलैः सू
क्ष्मैः किम् ॥ ४ ॥ ननु वल्कलमात्रं तोयं वासस्थानं च पात्र्यादिप्रयत्नं विना कथं प्राप्येत तत्राह ॥ चीराणीति ॥ जीर्णवस्त्रखंडानि पथि मार्गेन

संतिकिं॥ परभृतः परान्नविभ्रतिपुरुषांस्तिपफलादिभिः येतेऽप्रियाः॥ भिक्षांनदिशंतिवाकिंनप्रयच्छंतिकिंइत्यर्थः॥ सरितोनद्यः अप्सुष्यन्किं॥ गुहाः॥
पर्वतविलानिरुद्धाः निरुद्धाकिम॥ ननुकदाचिदेवामलाभेकिंकार्यस्यात्तत्राह॥ अजितइतिउपसन्नान्शरणगतानजितः॥ सर्वेश्वरः नावति
नरक्षतिकिं॥ कवयोधनेनयोदुर्मदः॥ तेनांधान्कार्याकार्यानभिज्ञान्कस्माद्धेतोः भजंतिकविभिरत्राद्यर्थमपिदुर्मदांधानभजनीयाइत्यर्थः॥ ५॥
इतरेदुःसेव्याः हरिस्तुसुसेव्यउक्तरीत्यावस्थितरवेवेत्स्याभगवतएवप्रीतिविषयत्वादित्याह॥ एवमिति॥ स्वचित्तेस्वकीयचित्तेएवंसिद्धउक्ता
नुसंधानपरेसतिविषयांतरविरक्तचित्तविषयभूतये आत्मत्वादिगुणकः॥ यत्रचयस्मिन्सत्यमानेसंसारहेतुपरमस्वबंधहेतुभूताविद्या
द्यानिवृत्तिस्त्वभवतितंभजेतेत्यन्वयः॥ भजनीयत्वस्योपपयिकगुणानाह॥ आत्मेत्यादि॥ आत्माऽतःप्रविश्यधारकःधार्यस्यशरीरस्यजीवा

चीराणिकिंपथिनसंतिदिशंतिभिक्षांनैवांघ्रिपाः परभृतः सरितोप्यशुष्यन्॥ रुद्धागुहाःकिमजितोवतिनोपपन्नान्कस्माद्भजंति
कवयोधनदुर्मदांधान॥ ५॥ एवंस्वचित्तेस्वतएवसिद्धआत्माप्रियोर्थोभगवाननंतः॥ तंनिर्वृतोनियतार्थोभजेतसंसारहेतूपरम
श्चयत्र॥ ६॥

त्मनःधारकपरमात्मानुवर्तित्वंयुक्तमित्यभिप्रायः॥ अतआत्माऽतएवप्रियःनिरतिशयप्रीतिविषयकः॥ आत्मसंबंधादेव
हिदेहापत्यकलत्रादिकंसर्वंप्रियवद्भाभाति॥ आत्मनोप्यात्माहरिःप्रियइतिकिमुवक्तव्यंप्रियइतिनिरतिशयसुखस्वरूपत्वस्याप्युपलक्ष
णं॥ अतएवार्थःनिरतिशयपुरुषार्थस्वरूपःनिरतिशयसुखमेवहिपरमपुरुषार्थः॥ पुरुषार्थस्वरूपस्यापिदुर्भगत्वेऽभजनीयत्वंस्यादत
आह॥ भगवान्हेयप्रतिभटसमसमग्रज्ञानशक्तिबलैश्वर्यवीर्यतेजः॥ संपन्नस्वरूपस्यज्ञानादिगुणानांचपरिछिन्नत्वशंकांव्यावर्तयति
अनंतइति॥ उक्तविधंस्वप्राप्तिविरोधिभूताविद्यानिवर्तकमात्मानंनिर्वृतइतरविषयवैतृष्ण्यान्निरतिशयसुखरूपपरमात्मोपासनाच्चसु।

खितः नियतार्थः नियतप्रयोजनः फलांतरनिवृत्तइत्यर्थः॥
उपासीतेत्यर्थः॥ ६॥

॥ टी ॥

णनहेवार्थोतर चिंतानिहृयाहृदयान्तिकइति॥ तंईश्वरमनादृत्यतामितिपाठेईश्वरचिंतामनादृत्येत्यर्थः॥ कलोकः नरतेपश्यन्पश्यत्विनापरानुचिंतामर्थांत
रचिंतामसतीमशोभनांकुर्यात्मामपशुरेवतथाकुर्यात्तथाकुर्वन्पशुरित्यर्थः॥ पसनुर्चिंतयावैतरण्यांयमलोकसिद्धौतत्सदृशेसंसारेङ्गत्यर्थः
पतितंतत्रचस्वकर्मजानाध्यात्मिकादिक्लेशानजुषाणंसेवमानंपश्यन्कःकुर्यादितिपूर्वेणसंबंधः॥ ७॥ एवंफलांतरतदुपायनिवृत्तस्य
भगवद्ध्यानप्रकाशमाह॥ केचिदित्यादिना॥ भगवदुपासनावाहुल्येनउपासकवाहुल्यात्केचिदित्युक्तिः नतुस्वासंमतत्वेनस्वदेहस्यांतर्म
ध्येयोहृदयावकाशस्तत्रवसंतंप्रादेशमात्रंप्रादेशसंबंधिनीमात्रावपुःपरिमाणंयस्यतंहृदयांतःप्रदेशसंबंधिमात्रयापरिछिन्नंयस्त्व

कस्यांवनाहृत्यपरानुचिंतामृतेपश्यन्सतीनामकुर्यात्॥ पश्यन्जनंपतितंवैतरण्यांस्वकर्मजान्परितापान्जुषाणम्॥ ७॥
केचित्स्वदेहांतर्हृदयावकाशेप्रादेशमात्रंपुरुषंवसंतं॥ चतुर्भुजंकंजरथांगशंखगदाधरंधारणयास्मरंति॥ ८॥ प्रसन्न
वक्त्रंनलिनायतेक्षणंकदंबकिंजल्कपिशंगवाससम्॥ लसन्महारत्नहिरण्मयांगदंस्फुरन्महारत्नकिरीटकुंडलं॥ ९

तमेनंप्रादेशमात्रमभिविमानमात्मानंवैश्वानरमुपास्तेइतित्रैलोक्यशरीरकेप्युपासकानुग्रहायप्रदेशसंबंधिमात्रयापरिछिन्नत्वश्रवणा
द्धृदयकमलस्यांगुष्ठमात्रत्वाच्चगणेनतर्जन्यंगुष्ठविस्तारंप्रादेशस्तत्परिमितंइत्ययुक्तमितिवोध्यम्॥ कंजंकमलंरथांगंचक्रंदक्षिणावा
हुभ्यांकंजरथांगेवामाभ्यांशंखगदेइतिविश्रतमित्यर्थः॥ एवंविधंपुरुषंकेचिद्योगीश्वराःधारणयास्मरंतिधारणापूर्वकमुपासतइत्यर्थः॥ ८॥
एवमेवपुरुषंविशिनष्टि॥ प्रसन्नवक्त्रमिति॥ अनुग्रहोन्मुखमुखंनलिनंपद्मंतद्वत्प्रसन्नेआयतेदीर्घेईक्षणेयस्यकदंबकुसुमस्यकिंजल्कः
केसरस्तद्वत्पिशंगेवाससीयस्यलसंतिमहारत्नानियेषुतानिहाटकानिगदानियस्य॥ स्फुरंतिमहारत्नानितन्मयानिकिरीटकुंडलानियस्यतं॥ ९

उन्निद्रं विकसितं यद्हृदयपंकजं हृदयकमलं तस्य कर्णिके वालयं स्थानं तस्मिन् योगीश्वरास्थापितौ ध्यानविषयीकृतौ पादपल्लवौ यस्य ॥ श्रीर्लक्ष्मीरेव
लक्ष्म चिन्हं यस्यासौ श्रीलक्ष्माणः यामादिविहितमवर्ष्यायोनप्रमयः तस्मात् तिगणत्वात् ॥ कौस्तुभरत्नं कंधरायां यस्य ॥ अत्र कंधराशब्दस्तदासन्न
वक्षःपरः अम्लानलक्ष्मीः शोभायस्यास्तया वनमालया आचितं व्याप्तम् ॥१०॥ मेखलया कटिसूत्रेण महाधनैः रत्नैः अंगुलिभूषणैर्नूपुरकंकण
ादिभिश्च विभूषितं विशेषेणालंकृतम् स्निग्धत्वादिविशिष्टैः कुंतलैर्विराजमाने आननेयो हासस्तेन पेशलं तत्र स्निग्धाः सस्नेहाः आकुंचिताव
क्राः ॥११॥ अदीनमुदारं यल्लीलाहसितं तेन युक्तं यदीक्षणं तेनोल्लसंतो येऽभंगाः अविक्षेपास्तैः संसूचितो भक्तेष्वनुग्रहो येन तं चिंतामयं चिंताविष

उन्निद्रहृत्पंकजकर्णिकालये योगेश्वरास्थापितपादपल्लवं ॥ श्रीलक्ष्मणं कौस्तुभरत्नकंधरमम्लानलक्ष्म्या वनमालयाचितं ॥१०॥
विभूषितं मेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः ॥ स्निग्धामलाकुंचितनीलकुंतलैर्विरोचमानाननहासपेशलं ॥११॥
अदीनलीलाहसितेक्षणोल्लसद्भ्रूभंगसंसूचितभूर्यनुग्रहं ॥ ईक्षेत चिंतामयमेनमीश्वरं यावन्मनोधारणयावतिष्ठते ॥१२॥
एकैकशोऽङ्गानि धियानुभावयेत्पादादि यावद्धसितं गदाभृतः ॥ जितं जितं स्थानमपोह्य धारयेत्परं परं शुध्यति धीर्यथा यथा ॥१३॥

यं चिंताप्रचुरं ईक्षेतेति क्रियाविशेषणं वा ॥ एवंविधमीश्वरं यावद्धारणया मनो वतिष्ठते तावदीक्षेतोपासीतेत्यर्थः ॥१२॥ युगपत्कृत्स्नशुभाश्रयगोचर
ध्यानाशक्तस्य तदुपायभूतमुक्तरूपस्यैव ध्यानक्रमविशेषमाह ॥ एकैकश इति ॥ गदाभृतः परमात्मनः पादादिः पादप्रभृति यावद्धसितं मंदस्मितावधि
अंगानि एकैकशः प्रत्येकं धिया नुभावयेच्चिंतयेत् जितं जितं भावनया स्फुरितं प्रतिष्ठितमिति यावत्तत्स्थानं पादगुल्फाद्यवयवमपोह्य त्यक्त्वा विशेषा
कारेणेति भावः ॥ सामान्याकारेण कृत्स्नशुभाश्रयगोचरज्ञानस्याविवक्षितत्वात् परं परं जंघाजान्वादिस्थानं धीर्यथा शुद्धतिप्रसीदत्यनाकुलीभवति ॥१०॥
तथा धारयेत ॥ कृत्स्नशुभाश्रयगोचरभक्तियोगोत्पत्तेः ॥ सर्वमिदमवश्यो विभावनं यत्नेन कर्तव्यं उत्पन्नायां तु भक्तौ हानायोगात् ॥१३॥

अनन्तत्वं यत्नेन ध्येयमवयवशऽस्त्याह ॥ यावदिति ॥ परे ब्रह्मादयो ऽवरे यस्मात्स परावरः तस्मिन्नीश्वरे नियंतरि सर्वज्ञे ऽस्मिन्नुक्तविग्रहविशिष्टे
पुरुषे भक्तियोगः विशेषाकारेण ह्यत्तत्स्वभावाश्रयगोचरः प्रीतिपूर्वको ऽविछिन्नो ध्यानयोगः यावन्न जायेत नोत्पद्येत तावत्क्रियावसाने आवश्यक
नुष्ठानांते पुरुषस्य प्रादेशमात्रं पुरुषमित्युक्तस्य पुरुषस्य स्थविष्ठं रूपं दिव्यात्मस्वरूपापेक्षया स्थविष्ठं विग्रहं प्रयतः समाहित अवयवशः
स्मरेत्तेन यो ॥ स्थविष्ठं रूपं वैराजस्य पूर्वोक्तरूपमिति तु मंदं रूपांतरोपासनाया एतद्रूपोपासनानुपयुक्तत्वात् ॥ १४ ॥ एवमेकैकमवयवं शिष्ट

यावन्न जायेत परावरेऽस्मिन्विश्वेश्वरे द्रष्टरि भक्तियोगः तावत्स्थवीयः पुरुषस्य रूपं क्रिया
वसाने प्रयतः स्मरेत ॥ १४ ॥ स्थिरं सुखं चासनमास्थितो यतिर्यदा जिहासुरिमंगलोकं ॥
काले च देशे च मनो न सज्जयेत्प्राणान्नियच्छेन्मनसा जितासुः ॥ १५ ॥ श्रीरामायनमः ॥

यित्वा पश्चादेकैकांगध्यानपूर्वकं तत्तद्ध्यानाभ्यासउक्तः ॥ अथैवंद्रष्टोपासनानिष्ठस्य देहत्यागप्रकारं वक्ष्यन्स्वात्मनः परमात्मनि समर्प
णप्रकारमाह ॥ स्थिरमिति ॥ यतिर्योगी यदा परिपूर्णभक्तियोगसंपादकशरीरावस्थितिहेतुभूतप्रारब्धावसानकाले अंग हे राजन्निमं लोकं
प्राकृतं लोकं जिहासुर्हातुमिच्छुर्भवति तदा गंगातीरोत्तरायणादि देशकालादिषु मनो न सज्जेत्तत्सक्तं न कुर्यात्किंतु जितप्राणः ॥ जितासुः स्थिरं
निर्भयदेशस्थं सुखं स्वस्त्यासनमास्थितः ॥ मनसा प्राणानिंद्रियाणि नियच्छेद्धनम्यपराणि कुर्यात् ॥ १५ ॥ ॥ ॥ ॥ ॥

स्वबुद्ध्यानिश्चयात्मिकया ऽबुद्ध्या ऽमलभगवदुपासनेन निर्धूतमलया मनः॥ नियम्य बुद्धिमापारमात्रं तं कृत्वा तां बुद्धिं क्षेत्रज्ञे जीवे निनयेन्नियच्छेत्तं
क्षेत्रज्ञमात्मनि परमात्मनि यच्छेदित्यर्थः॥ एवमात्मानं जीवमात्मनि परमात्मनि अवरुध्य समर्प्य लब्धोपशांतिः प्राप्तनिर्वृत्तिः सन् कृत्याद्विरमेत॥ अंतकालेप
रमात्मनि स्वात्मसमर्पणावधि कर्म न त्याज्यमिति कृत्याद्विरमेतेत्यनेनावगम्यते॥ आप्रयाणात्तत्रापि हि॥ दृष्टमिति न्यायेनोपासना या आप्रयाणादनुव
र्तनीयत्वेन तद्विधायकः कृत्स्नस्याप्याप्रयाणादनुवर्तनीयत्वान्न हि मुमूर्षोः कृत्यविरतिर्विधेया स्वत एव विरतेः॥ अत्र यद्यपि यदा जिहासुरिम
मंगलोकमित्यनेन योगिनां स्वच्छंदमरणानां कृत्यमेव प्रतीयते तथापि तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये इति कृत्स्नयोगशरीरारंभकप्रार
ब्धावसान एव परमात्मसंपत्तिश्रवणान्न तेषामिदं कृत्यं न च मुमूर्षोरिदं नवहितकरणत्वेनाशक्तत्वात्तस्मज्ञेन्नियच्छेद्विरमेतेत्यादिविधिविषय र

मनः स्वबुद्ध्यामलया नियम्य क्षेत्रज्ञ एतां निनयेत्तमात्मनि॥ आत्मानमात्मन्यवरुध्य धीरो लब्धोपशांतिर्विरमेत कृत्यात्॥१६॥
न यत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे॥ न यत्र सत्वं न रजस्तमश्च न वै विकारो न महान्प्रधानम्॥ १७ ॥

त्वानुपपत्त्या स्वच्छंदमरणं कृत्यमेवेदमिति वक्तुं युक्तं योगप्रभावातिशयेन करणानां स्वायत्तत्वात्॥ ये च योगमहात्म्यादविनष्ट एव प्रारब्धे म्रियंते तेषांपु
नः संसार एवातएवभीष्मादीनामुत्तरायणादिकालप्रतीक्षाप्रारब्धस्याविनष्टत्वात्॥ अतो पदेत्सस्य प्रारब्धावसान इत्युक्त एवार्थः साधुः॥१६॥ अ
यप्राप्य परमात्मस्वरूपं वर्णयंस्तस्मिन्स्वात्मसमर्पणावधि कर्म न त्याज्यमित्याह॥ न यत्रेति॥ यत्र वै तद्वैपदे कालो न प्रभुः किमपि कर्तुं न समर्थः॥ अन
एव देवा न प्रभवन्तीत्याह॥ अनिमिषांब्रह्मादीनां देवानां परः॥ प्रभुः कालो यत्र न प्रभुः तत्र कुतो देवाः प्रभवः स्युः देव नियाम्यानां जगतां प्राणिनां
कावार्तेत्याह॥ जगतां प्राणिनां ये ईशिरे जगंति ये नियमयन्देवाः ते कुतो नु प्रभवः॥ तन्नियाम्यानां जगतां त्वप्रभुत्वं कैमुतन्यायसिद्धमित्यर्थः॥ ॥११॥

सर्वैरनियाम्यं सर्वनियंतृ विमर्शः ॥ किं च यत्र पदे प्रधानेन गुणाः सत्वादयः प्रधानकौभनमहदहंकारादयश्च स्वकीयकार्यजननं समाना भवंति ॥ १७ ॥
यद्विष्णोः संबंधिपदं सर्वोत्कृष्टं पदं प्राप्यं स्वरूपं पद्यते गम्यत इति हि युक्ततिभिः ॥ आमनंति वेदा इति शेषः ॥ किं कर्तुं मिछव आमनंति यद्यस्मिन्नतत्वे
ति नेतीति उत्सिसृक्षवः तद्व्यतिरिक्तमुत्स्रष्टुमिछवः आवर्तयितुमिछवः ॥ अब्रह्मात्मकं स्वतंत्रं वस्तु नेति नेतीति बोधयंतः कालादिभिरनियाम्यं
कालादीनां च नियंतृ यत्सत्वादिकार्यास्पृष्टं च वैष्णवं प्राप्यं स्वरूपं वेदांताः आमनंति ॥ दौरात्म्यं रागाद्युपहतचित्तत्वं विसृज्य अनन्यत्वात् दृश्यमर्हं स्याराध
नीयं भगवतः ॥ परमनन्यसौहृदा अनन्यसौहृदयेन हृदयं सहृदा हृदा देशः ॥ यद्वा अनन्यसौहृदा वेदांताः आमनंतीति पूर्वेणान्वयः अनन्यतात्पर्ये

परं पदं वैष्णवमामनंति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः ॥ विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे ॥ १८ ॥ इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरंधिताशयः
स्वपार्ष्णिनापीड्य गुदं ततोनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः ॥ १९ ॥ श्रीरामायनमः

का इत्यर्थः ॥ हृदा हृदयेनोपगुह्य पदे पदे क्षणे क्षणे आश्लिष्य कृत्यादिरमेततत्त्वा कृतकृत्यो भवेदिति पूर्वेणान्वयः ॥ १८ ॥ अथ देहाद्युत्क्रांतिप्रका
रमाह ॥ इत्थमिति ॥ इत्थं तूपरमेत देहादिति शेषः ॥ तु शब्दः क्रमादिरतेः देहादुपरामस्य वैषम्यद्योतकः ॥ इत्थं वक्ष्यमाणप्रकारेण ॥ एतदेवो
पपादयति ॥ विज्ञानेति ॥ सर्वं ब्रह्मात्मकमिति व्यवस्थितमिति विज्ञानं भगवदुपासनात्मकं ज्ञानं तदेव दृग्दर्शनात्मकं प्रमहतातापत्रमित्य
र्थः ॥ ताहशस्य ज्ञानस्य यद्वीर्यं सामर्थ्यं तेन सुरंधितः विहिंसितः निःशेषनिहतः आशयो वासना यस्य स तथोक्तः ॥ योगी स्वपार्ष्णिना स्वपा

दमूलेनगुदंमूलाधारमापीड्यनिरुध्यततआपीडनानंतरं अनिलंप्राणंषट्सुनाभ्यादिषुचक्रस्थानेषुउन्नमयेत्जितक्लमोयेननिवृत्तश्रमः
सन् ॥ १९ ॥ नाभ्यांमणिपूरकेस्थितंप्राणंहृद्यनाहताख्यहृदयकमलेऽधिरोप्यतस्माद्धृदःउदानगत्योदानस्योदानवायोर्गत्यासंचारप्रकारे
णउरसिवक्षोदेशेस्थितेविशुद्धचक्रेतंप्राणंनयेत्ततउरसःधियासंधायगंतव्यमनुसंधायमनस्वीयतचित्तःस्वतालुमूलंस्वजिह्वा
ग्रपूर्वचक्रस्यैवाग्रभागंशनकैःततोबहुधागमनसंभवाच्छनकैरित्युक्तंनयेत्प्रापयेत ॥ २० ॥ तस्मात्स्वतालुमूलाद्भ्रुवोरंतरंभ्रूमध्यस्था

नाभ्यांस्थितंहृद्यधिरोप्यतस्मादुदानगत्योरसितंनयेन्मुनिः ॥ ततोऽनुसंधायधियामनस्वीस्वता
लुमूलंशनकैर्नयेत ॥ २० ॥ तस्माद्भ्रुवोरंतरमुन्नयेतनिरुद्धसप्तायतनोऽनपेक्षः ॥ स्थित्वा
मुहूर्तार्द्धमकुंठदृष्टिर्निर्भिद्यमूर्द्धन्विसृजेत्परंगतः ॥ २१ ॥ ॐनमोभगवतेवासुदेवाय

ज्ञाचक्रंप्रत्युन्नयेतऊर्ध्वंनयेत कथंभूतःनिरुद्धसप्तायतनःनिरुद्धानिसप्तायतनानिश्रोत्रद्वयाक्षिद्वयनासारंध्रद्वयास्यरूपाणिस्थाना
नियेनसःविषयांतरनिरपेक्षःश्रमध्येमुहूर्तार्द्धंस्थित्वाकुंठदृष्टिःस्वर्गगंतव्यविषयाप्रतिहतज्ञानसंपन्नःपरंपरमात्मानंप्राप्तःअनुसं
दधन्मूर्द्धनमूर्द्धानंसुषुम्नामुलुगितिसुलुक् ॥ निर्भिद्यशीर्षकपालंभिनत्तीतिश्रुतिः ॥ स्मारितानिविसृजेत्स्थूलदेहमितिशेषः ॥ २१ ॥ ॥१२॥

अथ मुमुक्षोर्गंतव्यमर्चिरादिमार्गं वक्तुं तस्य मुमुक्षोर्धूमादिमार्गस्य हेयत्वज्ञापनाय धूमादिमार्गेण गतानां गंतव्यलोकानाह ॥ यदीति ॥ एते स्रुती ते नृप वेद
गीते इति मार्गद्वयस्य वक्ष्यमाणत्वादस्मिन्नध्याये धूमादिमार्गविषयग्रंथांतराभावाच्चैतासां मूर्द्धानमभिनिस्सृतैका तयोर्ध्वमाय
न्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवंतीति श्रुतेः ॥ मूर्द्धनिष्क्रांतस्यार्वाचीनलोकगत्यनुपपत्तेश्च यदीत्यादिश्लोकद्वयं धूममार्गगतानां गंतव्य
वारप्रदर्शनपरमेव न च यदा सर्वे प्रमुच्यंते कामा येस्य हृदि स्थिताः ॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते इति सद्योमुक्तिरेका प्रतीयते तेन
र्चिषमभिसंभवंत्यर्चिषोहरन्ह इत्यादिना क्रममुक्तिरन्या प्रतीयते ॥ अत्रापि विरजेत्यरं गतः इति सद्योमुक्तिः ॥ वैश्वानरं यातीति क्रममुक्तिश्च प्र
तीयते ॥ अतः क्रममुक्तिसद्योमुक्तिरूपमार्गद्वयस्यैवैते स्रुतीनेव समाणत्वान्न धूमादिमार्गगतगंतव्यप्रदर्शनपरमिति श्लोकद्वयमिति चेदु

यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारं ॥ अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेंद्रियैश्च ॥ २२ ॥ श्रीः ॥

च्यते ॥ सद्योमुक्तिस्तावद्ग्रामाणिकैव ये चेमेऽरण्ये श्रद्धां तप इत्युपासते तेर्चिषमभिसंभवंतीत्यादिना स एनान्ब्रह्म गमयतीत्यनेन न ब्रह्मोपासीनाना
र्चिरादिनागतानामेव ॥ ब्रह्मप्राप्त्यवगमाद्विकल्पाविशिष्टफलत्वादिति न्यायेन सर्वब्रह्मविद्यानामेकफलत्वेनार्चिरादिगतेः सर्वब्रह्मविद्यानिष्ठा
नां समत्वाच्छास्त्रप्रतिपाद्यायाः सद्योमुक्तेरभावात् ॥ अथ ब्रह्मणः सर्वगतत्वान्न तत्प्राप्तये देशांतरगमनापेक्षेति न तस्य प्राणा उत्क्रामंति ब्रह्मै
व सन् ब्रह्माप्येतीत्यादेः कोर्थ इति चेदुच्यते ॥ अत्रास्मिन्लोके उपासनदशायां ब्रह्मानुभवति तस्य ब्रह्म प्रेप्सोः प्राणा नोत्क्रामंति तं विहाय न गच्छं
तीति किं तूपासनाफलभूतब्रह्मप्राप्तये तदधिष्ठितलोकांतरगमनाय सहैव तिष्ठंतीत्यर्थः ॥ इति ॥ अतो धूमादिनागतानां गंतव्यप्रदर्शनपरमिदं
श्लोकद्वयमित्याह ॥ यदीति ॥ हे नृप पारमेष्ठ्यं चतुर्मुखलोकं वैहायसानां खेचराणां सिद्धानां यद्विहारस्थानं ॥ कीदृशमष्टाधिपत्यमणिमाद्यैश्वे

स्यर्थसंबन्धः॥ यदि प्रयास्यन्नगमिष्यन्भवति तदा गुणसंनिवाये मरणे मनसा इंद्रियैश्च सहैव गच्छेत्स्थूलदेहस्यैव भस्मीभावात्सूक्ष्मदेहेनैव गच्छतीत्यर्थः॥
अर्वाचीनलोकान्गच्छतोऽन्यतस्स्वेंद्रियात्मकलिंगशरीरेणैव सह गमनं ब्रह्मप्रेप्सोःस्तु किंचिद्दूरं गच्छतो मध्ये विश्लेष इति विशेषः॥२२॥ योगेश्व
राणां भगवद्भक्तिव्यतिरिक्तयोगनिष्ठानां ब्रह्मात्मकस्वतंत्रजीवोपासकानां त्रिलोक्याः बहिः जनलोकादिषु पवनांतरात्मा तेन वायुभूतसूक्ष्मदेहे
न गतिमाहुरित्यर्थः॥ यद्वा वायुमनुप्रविश्य गच्छतीति वा॥ वायुतुल्यवेगो गच्छतीत्याहुरित्यर्थः॥ भगवद्भक्तिव्यतिरिक्तयोगनिष्ठानां गतिरितरैर्नल

योगेश्वराणां गतिमाहुरंतर्बहिस्त्रिलोक्याः पवनांतरात्मना॥ न कर्मभिस्तां गतिमाप्नुवंति विद्यात
पोयोगसमाधिभाजाम्॥२३॥ वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन शोचिषा
विधूतकल्कोऽथ हरेरुदस्तात्प्रयाति चक्रं नृप शैशुमारम्॥२४॥

भ्यत इत्याह॥ नेति॥ विद्या शास्त्रजन्यं ज्ञानं तपः कर्मयोगः
योगो यमनियमादिः समाधिर्ब्रह्मात्मकस्वात्मस्वरूपानुसंधानं एतान्भजंति ये तेषां योगीश्वराणां तां गतिं ब्रह्मांडांतर्गतापेक्षितलोकगतिकर्म
भिरभिसंहितफलैः कर्मभिर्न प्राप्नुवंति॥ केवलकर्मिभ्योऽधिको योगी केवलयोगिभ्योऽधिको भगवदुपासक इत्यभिप्रायः॥ यद्वा॥ भगवद्भक्तानां
गतिः कर्मभिः नावाप्यत इत्याह॥ योगीश्वराणामिति॥ भगवद्भक्तियोगनिष्ठानामित्यर्थः॥ त्रिलोक्यास्त्रिलोकांतर्भूतचतुर्दशभुवनात्मकांडकोशाद्ब
हिः समाधिः परमात्मोपासनमिति भेदः एवं हैयत्वेन धूमादिमार्गगतिरुक्ता॥२३॥ अथ मुमुक्षोरर्चिरादिमाह॥ वैश्वानरमिति॥ कांहोग्येय थापु
ष्करपलाशा आपो न श्लिष्यंते एवमेवं विदि पापं कर्म न श्लीष्यत इत्युपक्रम्य ब्रह्मविद्यामुपदिश्य पाम्नाता॥ अथ यदु चास्मिंछव्यं कुर्वंति यदु च ॥१३॥

नार्चिषमेवाभिसंभवंति अर्चिषोहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यं आदित्याच्चं
द्रमसं चंद्रमसो विद्युतं तत्पुरुषोमानवः स एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथः ॥ एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तंत इत्याश्रा
नाश्रुतिः ॥ स वै पुनर्नैहाविष्पज्ञांतेगमिष्यंतेनाभिमता अन्यानुक्ताहरादिप्रदेशास्त्वर्थसिद्धा वेदितव्याः ॥ शीर्षकपालभेदनानंतरमेव वैश्वान
रप्राप्तिसंभवाच्छ्रुतावपि च हर्णोंद्र प्रजायमादयोऽस्मत्र श्रुता अर्थसिद्धा इति वेदितव्यं ब्रह्मपथेनेति सुषुम्णाविशेषणं ब्रह्मप्रेप्सोर्मार्गभू
तयाशेषविषयप्रकाशमानतया सुषुम्णाया सुषुम्नाख्यया नाड्या देहान्निर्गतः शाचिषेत्यनेन तेन प्रद्योतेनैष आत्मा निष्क्रामतीति श्रुत्युक्तसु
म्नासंबंधिहृदयकमलाय स्य प्रकाशानं स्मारितम् ॥ तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च
हार्दानुगृहीतः शताधिकया इति सूत्रकारः तदोकः तस्य ब्रह्मप्रेप्सो जीवस्य स्थानभूतं यद्धृदयकमलं तस्याग्रं सुषुम्नाख्यनाडी
द्वारं तस्य ज्वलनं प्रकाशनं भवति ॥ अयं जीवः हार्दानुगृहीतः हृदयकमलस्य परमात्मानुगृहीतः तेन परमात्मना प्रकाशितसुषुम्नाद्वारो विद्यायाः ब्रह्मवि
द्यायाः सामर्थ्याद् ब्रह्मविद्यांगभूतार्चिरादिगतिस्मृतियोगाच्च शताधिकया सुषुम्नया गच्छतीति सूत्रार्थः ॥ एवंभूतसुषुम्णायागतः विहायसा शीर्षक
पालवहिर्देशाकाशेन वैश्वानरमर्चिःशब्दवाच्यमातिवाहिकं देवतं याति ॥ अर्चिर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं ॥ अर्चिषमभिसंभवतीत्ये
नैनैकार्थ्यात् ॥ अस्यैवमोक्षमार्गत्वं सूचयति ॥ विधूतकल्क इति पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीति ॥ अश्व इव रोमाणि विधूय पापं चं
द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमिति हि श्रूयते ॥ न हि धूमादिमार्गगतानां पुण्यपापप्रहाणं श्रूयते ॥ विधूतकल्कः निवृत्तपुण्यपापः ॥ अत्राह
रादिप्रवेशाउक्तः ॥ हरेरादित्यस्योर्ध्वस्तादुपरिष्टात्स्थितं शैशुमारं चक्रं प्रयाति ॥ हेन्नपशैशुमारचक्रस्यरूपं तु पंचमस्कंधे वक्ष्यते ॥ २४ ॥

भा॰द्वि॰टी॰

॥१४॥

विश्वनाभिं विश्वस्य ग्रहतारकनक्षत्रचारैः कृत्स्नस्याश्रयम् अतं विष्णोः स्थानमिति शेषः विरजेन प्रणवपुण्यपापेनाणीयसा सूक्ष्मतरेणात्मनालिं
गशरीरेणैक असहायः नमस्कृतं ब्रह्मविदां ब्रह्मविद्भिर्नमस्कृतम् ॥ इदं शिशुमारचक्रविशेषणं तदतिवर्त्येत्यन्वयः ॥ अनेन ऐंद्रप्राप्तिरपि सि
द्धा तस्याव्यवहितः शिशुमारः यद्यत्र कल्पायुषः विबुधा आकल्पान्तायुषः रमंते जनलोकं उपैति प्रयाति ॥ २५ ॥ अथ अत्र ध्रुवस्तात्स्थितस्थानं
तस्य मुखानलेनावांतरप्रलये शेषमुखोद्भूतरुद्रगणज्वालानलेन दंदह्यमान इति ॥ मत्त कस्यापीदृहमस्तुरीत्या सत्यमभिप्रायो वर्त्तमाननि

तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः ॥ नमस्कृतं ब्रह्मविदामुपै
ति कल्पायुषो यद्विबुधा रमंते ॥ २५ ॥ अथो अनंतस्य मुखानलेन दंदह्यमानं स नि
रीक्ष्य विश्वम् निर्याति सिद्धेश्वरजुष्टधिष्ण्यं यद्द्वैपरार्ध्यं तदु पारमेष्ठ्यम् ॥ २६ ॥

हैश्राः निरीक्ष्य त्रिकालज्ञानबलात् परोक्षं दृष्ट्वेत्यर्थः ॥ जनलोके स्थित्वा कल्पांतरे ततः उपैतीत्ययमर्थोनुपपन्नः पुण्यपापविधूननस्योक्तत्वेन तत
त्रावस्थितिहेतुभूतकर्माभावात् तेषु लोकेषु स्थित्ययोगात् ॥ अतो हे पंद दृष्ट्वा द्वैपरार्ध्यं द्विपरार्धस्यापि सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि विमानानि
यस्मिंस्तत् श्रेष्ठं पारमेष्ठ्यं चतुर्मुखसंबंधिस्थानं याति निर्यातीत्यर्थः ॥ बरुणेंद्रादिप्राप्तिस्त्वर्थसिद्धा ॥ २६ ॥ ॥१४॥

चतुर्मुखलोकस्य स्वर्गाद्यपेक्षया चिरकालस्थायित्वमभिप्रपन्नाह॥ यत्रेति॥ यत्रैतस्य तत्र दुरंतदुःखप्रभवानुदर्शनादित्युपरीतनेनान्वयः॥ आर्त्ति
दुःखं उद्वेगो मनःक्षोभः भयमागामिदुःखदर्शनजं ज्ञानं कुतश्चिदित्यस्य भयमित्यनेनान्वयः कुतश्चिच्छीतातपवातवर्षादिभ्यः एवंविधेपि च
तुर्मुखलोके ब्रह्मविद्वांनिर्वेदमाह॥ यच्चित्ततदिति॥ यद्यस्मादित्यर्थः॥ अनिदं विदांइदं शब्दवाच्यपरिदृश्यमानप्रपंचविलक्षणपरब्रह्मवि
दांक्रियया कर्मणा हेतुभूतेन दुरंतदुःखप्रभवानुदर्शनात् दुरंतपारं यद्दुःखं तस्य प्रभवः प्रभवत्यस्मादिति प्रभवः दुःखहेतुभूतसंसारस्तस्यानुदर्श
नउत्प्रेक्षणात्तस्माच्चित्तं अचिंतंतादृः दुरंतदुःखमिति यच्चतुर्मुखलोकेपि ब्रह्मविद्भिः कर्महेतुकं दुरंतदुःखं चित्तेनानुमीयत नत एव हेतोर्विशे
षं प्रतिपद्येत्युत्तरत्रान्वयः॥ अर्थांतरपरत्वमनुपपन्नमध्याहारवाहुल्यात्॥ यस्माद्धिरण्यगर्भस्य चित्तं न उपासनात्॥ अदस्तस्य स्थानं उपास

न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेगभये कुतश्चित्॥ यच्चित्ततोदः क्रियया ऽनिदंविदां दुरंतदुःखप्रभवानुदर्शनात्॥ २७॥

कैर्लभ्यत इत्यत्र योजना तद्धि उपासकैर्लभ्यत इत्यध्याहारः अनिदंविदां हिरण्यगर्भोपासनारहितानां दुरंतदुःखप्रभवानुदर्शनात् उपासकाना
मेव दुःखनिवृत्तिस्थानं ब्रह्मलोकाख्यं लभ्यत इति नोपपद्यते॥ हिरण्यगर्भस्थानस्यापि दुःखनिवृत्तिहेतुत्वाभावाच्चतुर्मुखलोकं गतस्यैव नाव
स्थातः पुनर्भुवमागमप्रतिदिनं स्त्रीपशवभक्षणं प्रसिद्धं॥ आदर्शनाच्च ब्रह्मलोकस्य योगिनां न पुनरावृत्तिदुःखभयं॥ तत्रमोक्षमाणत्वानि
ष्क्रयादिति चेच्च भूतलस्थयोगिनामपि मोक्ष्यमाणानां निष्क्रयात्तन्न पुनरावृत्तिभयमिति मुमुक्षूणां महीतलचतुर्मुखलोकयोः को विशेषः आब्र
ह्मभुवनाल्लोकाः पुनरावर्तिनोर्जुन इति द्विपरार्धांते न च द्वे पराधमित्यनेन सूचित॥ अतो यथोक्त एवार्थः॥ २७॥

विशेषं पृथिवीमयमंडकटाहं प्रतिपद्याप्येत्यर्थः॥ अनेन पृथिवीमंडं भिनत्तीति श्रुतिर्व्याख्याता विशेषशब्दः॥ पृथिवीवाचकः महदादयो विशेषां
तादृति प्रयोगात्॥ अत्रापि विशेषस्तु विकुर्वाणादंभसो गंधवानभूदिति वक्ष्यमाणत्वाच्च विशेषं प्रतिपद्य नियातीत्यनुषंगः॥ यद्वा॥ उत्तरत्रोपेती
त्यनेनान्वयः॥ तेनात्मनात्स्वरूपेणोपलक्षितः॥ आपः आवरणजलं प्रतिपद्येत्यन्वयः॥ आवरणाग्निव्याप्तिमहा अनलमूर्तिमिति॥ मूर्ति
रावरणाग्निं प्रतिपद्यात्वरन्त्वरामकुर्वन् लोहदाहादिशंकाभावादित्यभिप्रायः ज्योतिर्मयः वायुर्भूत्वा अग्रं भवतीति वत्संश्लेषाभिः

ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनापोऽनलमूर्तिमत्वरन्॥
ज्योतिर्मयो वायुमुपेत्य काले वाय्वात्मना खं बृहदात्मलिंगम्॥ २८॥

प्रायो ज्योतिर्मयशब्दः वायुं आवरणवायुमुपेत्य काले पूर्वपूर्वकावरणात्ययानंतरकाले वाय्वात्मना वायुसंश्लिष्टरूपेणोपलक्षितवृहत्त्वा
कार्यभूतवाय्वाद्युपेततया बृहत्॥ आत्मलिंगं स्वासाधारणशब्दलिंगकं खं आवरणाकाशमुपेत्य आत्मलिंगमित्यत्र आत्मा स्वासाधारण
शब्दः लिंगं आत्मानात्मनोः प्रमाणं यस्य तत् इत्यर्थः लिंगयद्दृष्टृदृश्ययोरिति वक्ष्यमाणत्वात्॥ इदमावरणांतरेष्वपि तत्तद्धाहिगुणविशि
ष्टपृथिव्यादिसंश्लेषप्रदर्शनार्थमुक्तं एवमाकाशं भिनत्तीत्यंतः श्रुत्यर्थ उक्तः॥ २८॥ ॥१५॥

गच्छतो मुक्तस्य सूक्ष्मदेहस्थैरिन्द्रियैस्तत्तद्भूतगुणग्रहणमाह ॥ घ्राणेनेति ॥ ब्रह्मलोकपर्यंतेष्वेव शब्दादिष्वनादरोऽभिप्रेतः ॥ आवरणीभूतगुणानां तत्त्वनित
रभोग्यत्वात्तत्तद्गन्धादीन् गृह्णातीत्यभिप्रायः ॥ घ्राणेन स्वकीयघ्राणेन्द्रियेण गंधमावरणपृथिवीभूतगंधं ॥ एवं च रसनेन्द्रियेण रसं दृष्ट्या चक्षुरि
न्द्रियेण रूपं तेजोगुणम् ॥ त्वचा ॥ त्वगिन्द्रियेण एवकारः सांकर्याभावद्योतकः ॥ श्वसनं वायुगुणं स्पर्शं श्रोत्रेण श्रोत्रेन्द्रियेण नभोगुणत्वं स्वार्थे त्व
प्रत्ययः ॥ प्राणेनान्तःकरणेनाकूतिमभिप्रायं समानीव आकूतिरिति श्रुतम् ॥ अत्र प्राणशब्देनेन्द्रियवृत्तिहेतुभूतमुख्यप्राणेन विवक्षितः तेनाकू
तिग्रहणासंभवादन्तःकरणं विवक्षितम् ॥ अन्तःकरणप्रसक्तो ह्यभिप्रायः ॥ एवं घ्राणादिभिर्गन्धादीनुपेत्य तत्तद्भूतभेदनदशायां तत्तद्गुणान्गृ-
ह्णन्नुपैतीत्यर्थः ॥ २९ ॥ अथाहंकारमाहृत्य सहत्रिवृतीनामतिक्रममाह ॥ स इति ॥ स योगी गत्या गमनेन विकार्यं स्वकार्यरूपेण परिणामिनमहंकारं सं

घ्राणेन गंधं रसनेन वै रसं रूपं तु दृष्ट्या श्वसनं त्वचैव ॥ श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी ॥ २९ ॥ स भूतसू
क्ष्मेन्द्रियसन्निकर्षं मनोमयं देवमयं विकार्यम् ॥ संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसन्निरोधम् ॥ ३० ॥ ॥

साद्य सन्त्यज्य ॥ विकार्यमेवाविशिनष्टि ॥ देवमयं दिग्वातादिदेवाधिष्ठितेन्द्रियकारणं मनोमयं मनःकारणं भूतसूक्ष्मेन्द्रियसन्निकर्षं भूतानामाकाशा
दीनि तत्सूक्ष्माणि शब्दादीनीन्द्रियाणि ज्ञानकर्मोभयेन्द्रियाणि एतेषां सन्निकर्षकारणं भूतसूक्ष्मसन्निकर्षत्वेन्द्रियसंनिकर्षत्वाभ्यां त्रिविधाहंकार
भेदेन तामससात्विकाहंकारावुक्तौ ॥ मनोमयं देवमिति च सात्विकाहंकारकार्यप्रदर्शनम् ॥ देवमयमित्येतावतैव सिद्धे तत्कार्यप्रदर्शनेन्द्रियस
न्निकर्षत्वमनोमयत्वोक्तिः ॥ इन्द्रियस्य शब्दानुग्राहकराजसाहंकारग्रहणाय ॥ अत एव राजसाहंकारस्य न पृथक्कार्यप्रदर्शनं ॥ तस्यानुग्राहकमा
त्रत्वेन पृथक्कार्याक्षमत्वात् ॥ एतत्सर्वाग्रे स्फुटीभविष्यति ॥ तेनातिक्रान्ताहंकारेण सहोपलक्षितः विज्ञानतत्त्वं महान्तं याति विज्ञानसारथिर्यस्तु

भा.द्वि.टी.

॥१६॥

बुद्धिं तु सारथिं महान्वै बुद्धिलक्षण इति वचनान्नामैकार्थ्यात् ॥ गुणसाम्यावस्थप्रकृत्यतिक्रममाह ॥ गुणसंनिरोधमिति गुणानां सत्वरजस्तमसां सन्निरो-
धः ॥ साम्यं यस्मिन् तत्प्रधानं यातीत्यर्थः ॥ ३० ॥ तेनेति ॥ अवसाने प्रकृतेरवधौ गौरवाद्यंतवती सा जनित्री निमासनतविक्रियेत प्रकृतेर्निमित्ताद्देशाव-
धिरवसानशब्दोक्तः स्वकीयभूतस्य सेंद्रियाणां स्वकारणे प्रलयो अवसानशब्दविवक्षितः ॥ तेनात्मनाविरजसा स्वरूपेणोपलक्षितः शां-
तमूर्मिषट्करहितमानंदं निरतिशयानंदस्वरूपं आत्मानं आनंदमयपरमात्मसाम्यापत्त्या आनंदमयः स्वयं निरतिशयानंदप्रचुरः उपैति
आत्मानंदशब्दाभ्यां आत्मन आकाशः संभूतः ॥ आनंदो ब्रह्मेति व्यजानादित्युपक्रमोपसंहारगतवाक्यद्वयं स्मारितं एवं क्षयं तमसस्रजसः प-
राके आदित्यवर्णं तमसः परस्तादृत्तरे परमे व्योमन्निति सुक्तप्रकृतिपुरुषातीतपरमाकाशस्थाभगवत्प्राप्तिरर्चिरादिनागतस्योक्ता ॥ एवं स

तेनात्मनात्मानमुपैति शांतमानंदमानंदमयोवसाने ॥ एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेऽगम् ॥ ३१ ॥
एते सृती ते नृप वेदगीते त्वयाभिपृष्टे ह सनातने च ॥ ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान्वासुदेवः ॥ ३२ ॥

गतानंदब्रह्मगमयतीत्यस्यार्थ उक्तः ॥ अथ धूमाद्यर्चिरादिमार्गयोः प्रामाणिकत्वं कथयन्नेतेन प्रतिपाद्यमानाद्गस्य शास्त्रार्थमाह ॥ एतामिति ॥ भा-
गवतीं भगवद्वृद्देश्यां गतिमर्चिरादिमार्गं योगतः ॥ स पुनरिह प्रकृतिमंडलेऽगं कर्माधीनदेहं प्रति न विषज्जते नासक्तो भवति ॥ ३१ ॥ अथ धूमा-
दिद्वयमुक्तं निगमयति ॥ एते इति ॥ इमौ मार्गौ अर्चिरादिधूमादिमार्गौ वेदगीते ये चेमेरण्ये श्रद्धां तप इत्युपासते तेर्चिषमभिसंभवंति ॥ अथ य इमे ग्र-
ष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंतीत्यादिवेदबोधिते अत एव सनातने स्थिते अत एव स्मृतीहे नृप त्वयाभिपृष्टे च यच्छ्रोतव्यमित्येनेना-
र्चिरादिमार्गस्य धूमादिमार्गस्यापि पृष्टत्वात् ॥ चकारान्मया कथिते इत्यर्थः ॥ सनातनत्वं विशदयति ॥ ये इति ॥ ये वै ये सृती पुरा कल्पादौ ब्रह्म- ॥१६॥

णेचतुर्मुखायाराधितः॥ सम्यगुपासनया प्रीतः वासुदेवः सर्वभूतांतरात्मा भगवानाह उवाच तस्मात्मनाननइत्यर्थः॥३२॥ संसारिणोर्चिरादिप्राप्तौ भक्तियो
गाख्यउपायोनास्यर्चिरादिगतिचिंतापि भक्तियोगोपाय इत्याह॥ नहीति॥ अतः अर्चिरादेरन्यः अपरः संसृतौ संसारे शिवः पंथाः कल्याणरूपो मार्गो न
विश्रुतः॥ विशेषेण नश्रुतः॥ यतः॥ अर्चिरादिमार्गचिंतनाद्वासुदेवे सर्वभूतांतरात्मनि भगवति परमात्मनि भक्तिर्भवेत् तस्मात्तच्चिंता च कार्या॥ तथाच
सूत्रकारः योगिनः प्रतिस्मर्यते स्मार्त्ते चैते॥ योगिनो योगनिष्ठा स्मातिस्मार्त्तैस्मरतिविषयभूते स्मर्तव्ये देवयान पितृयाणाख्ये गती स्मर्येते योगांगतया
नुदिनं॥ नैते सृती पार्थ जानन् योगी मुह्यति कश्चन॥ तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुनेति स्मरणादित्यर्थः॥३३॥ कथं वासुदेवभक्तिरेवा

नह्यतोन्यः शिवः पंथा विशतः संसृताविह॥ वासुदेवे भगवति भक्तियोगो यतो भवेत्॥३३॥ भगवान्ब्रह्मकार्त्स्न्येन त्रिर
न्वीक्ष्य मनीषया॥ तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत्॥३४॥

र्चिरादिगतावुपाय इत्याह॥ भगवानिति॥ एवमेष महाशब्दो मैत्रेय
भगवानित्यादि प्रकारेण भगवच्छब्दशब्दितः॥ वासुदेव एव ब्रह्म जगत्कारणं तद्भक्तिरेव मोक्षोपायः कथमित्यत्राह॥ कार्त्स्न्येनेति॥ मनीषया बु
द्ध्या कार्त्स्न्येन त्रिरन्वीक्ष्य कृत्स्नप्रमाणजातं मुहुर्मुहुरालोच्यालोच्य सर्वशास्त्राणि विचार्य च पुनः पुनरिति वत्॥ तदध्यवस्यन्निश्चितवस्थितः॥ कि
मध्यवस्यत्तत्राह॥ कूटस्थ इति॥ निर्विकारे परमात्मनि रतिः मुक्तौ॥ आनंदः निरतिशयानंदपरमात्मानुभवजनितसर्वावस्थोचिताशेषविशेषैनैक
रतिर्यतो भक्तियोगाद्भवेत्सा एव भक्तियोगो मुक्त्युपायः निश्चितवान् निपुणतरो लोकः स्थित इत्यर्थः॥३४॥ ॐ नमो भगवते वासुदेवाय॥

नन्वतींद्रिये भगवति कथं भक्तिरुत्पद्यते कथंतरां रतिरित्याशंक्य परिशुद्धमनोविषयत्वादनुभवमपि संभवतीत्याशयेनाह ॥ भगवानिति ॥ स्वात्मना योग
परिशुद्धमनसा सर्वभूतेषु भगवान् लक्षितः ॥ साक्षात्कारार्हः ॥ मनसा तु विशुद्धेन मनसाभिक्लृप्त इति श्रुतेः ॥ तर्हि स किं घटादिवदुपलक्षितो
दृश्यत एवेत्यत आह द्रष्टा सर्वज्ञः न केवलं योगपरिशुद्धमनोविषय एव प्रमाणांतरविषयोपीत्याह ॥ बुद्ध्यादिभिः महदादिभिः महान्वै बुद्धिल
क्षण इति वचनात् ॥ कार्यभूतमहदादिभिर्दृश्यैस्तत्कारणभूतोनुमीयत इत्यर्थः ॥ न केवलमनुमानविषय एव किंतु शास्त्रविषयोपीत्याह ॥ ल

भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः ॥ दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणै
रनुमापकैः ॥ ३५ ॥ तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा ॥ श्रोतव्यः
कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम् ॥ ३६ ॥ श्रीहरये नमः ॥ ० ॥

क्षणैरनुमापकैरिति पदद्वयेन ॥ लक्षयंतीति लक्षणानि वेदांतवाक्यानि सत्यं ज्ञानमनंतं ॥ यतो वा इमानि भूतानीत्यादीनि तथा तदुपजी
व्यकारणत्वप्रतिपादकानि ॥ सदेव सौम्येदमग्र आसीदित्यादीनि तैरनुमापकैः ॥ स्मृतिवचनैः स्मृतीनां श्रुत्यनुमापकत्वाच्छ्रुतिस्मृतीभ्यामप्युप
लक्षितः ॥ अनेन केवलानुमानगम्यत्ववादिनो वैशेषिका निरस्ताः ॥ तन्निरासस्तु शास्त्रयोनित्वादित्यधिकरणसाध्यः बुद्ध्यादिकार्यवर्गैरुपल
क्षितः ॥ जगत्कारणतया शास्त्रैः प्रतिपन्नः तत्स्वरूपं तु योगपरिशुद्धमनसा साक्षात्कुर्वंतीत्यागमोत्थविवेकजन्यज्ञानद्वयविषयत्वमुक्तं भवति ॥१७॥
३५ ॥ यच्छ्रोतव्यमित्यादिप्रश्नोत्तरमुपसंहरति ॥ तस्मादिति ॥ स्पष्टोस्यार्थः ३६

अस्तुयोगपरिशुद्धमनोग्राह्यत्वंयोगारंभोवाकथंस्यादित्यतआह॥पिबंतीति॥भगवतआत्मनःपरमात्मनःकथामृतंयेपिबंतितेविषयदूषिताशयं
पुनंतीत्यन्वयः॥कथामृतंवाकथंलभ्यतेइत्यतआह॥सतामितिकर्त्तरिषष्ठी॥सद्भिःकर्णपुटेषुसंभृतंपूरितम्॥अनेनसत्सेवयाप्रथमंभवति
त्यमित्युक्तंभवतिसत्सेवयाप्राप्तहरिकथाश्रवणेनविषयैःशब्दादिभिर्विदूषितंकलुषितमाशयमंतःकरणंपुनंति॥सत्सेवादिभक्तियोगात
सफलमाह॥व्रजंतीति॥तस्यभगवतश्चरणसरोरुहयोरंतिकंसमीपंव्रजंतिप्राप्नुवंति॥प्रथमंसत्सेवाततःश्रवणंततोयोगारंभःततआ
गमोत्थविवेकादिसाधनसंपन्नकजन्यज्ञानाभ्यामनुगृहीताप्रसन्नतापन्नाभक्तिरित्ययंक्रमोऽत्रोक्तः॥३७॥इतिद्वितीयेद्वितीयः॥ २॥एवं

पिबंतियेभगवतआत्मनःसतांकथामृतंश्रवणपुटेषुसंभृतम्॥पुनंतितेविषयविदूषिताशयंव्रजंतितच्चरणसरोरुहांतिकं
३७॥इतिश्रीमद्भा०द्वितीयस्कंधेद्वितीयोऽध्यायः॥२॥श्रीशुकउवाच॥एवमेतन्निगदितंपृष्टवान्यद्भवान्मम॥नृणांयन्म्रियमाणानां
मनुष्येषुमनीषिणाम्॥१॥ब्रह्मवर्चसकामस्तुयजेतब्रह्मणस्पतिम्॥इंद्रमिंद्रियकामस्तुप्रजाकामःप्रजापतीन्॥ २॥

मुमुक्षोर्भगवच्छ्रवणादिकंकर्त्तव्यमित्युक्तं॥अथतदेवव्यतिरेकमुखेनद्रढयितुंमन्यदेवतानांक्षुद्रफलत्वंवक्ष्यन्पूर्वोक्तमनुवदति॥एवमिति
मनुष्येषुकदाचिदेववशान्मनुष्यत्वंप्राप्तेषुजीवेषुयेमनीषिणः॥तेषांतत्रापियेम्रियमाणास्तेषांविशेषतोयत्कर्त्तव्यंपुरात्वंप्रतिपृष्टवान्॥
तद्भगवच्छ्रवणादिकमेवैतमेवंनिगदितंउक्तमित्यर्थः॥१॥कामफलप्राप्त्यर्थमन्येषांदेवतानांभजनमाह॥ब्रह्मवर्चसेत्यादिना॥ब्रह्मवर्चसंकाम
यमानः॥ब्रह्मणस्पतिंबृहस्पतिंयजेत इंद्रियकामःइंद्रियसामर्थ्यकामःइंद्रभजेतेत्यनुषंगः॥एवमग्रेपि॥प्रजापतीन्दक्षादीन्॥ २॥

देविं देवस्य विद्वोः संवेधिनीमायां विस्मयनियशक्तिं विभावसुमग्निं ॥ वसुकामः अर्थकामः वसून् यजेत ॥ वीर्यकामस्तु रुद्रान् यजेत यजनकर
त्वमाह ॥ वीर्यवानिति तिम वेद्दितिशेषः ॥ इदं सर्वं व्रतत् फलावाप्तरूपलक्षणम् ॥ ३ ॥ अन्नं भोज्यं अर्थं भक्ष्यं खर विशद्दमभ्यवहार्यं भक्ष्यं खरं क
ठिनं विशदं विविक्तावयवं भक्ष्यमिति शेषः ॥ तद्भक्तो भयकामो दितिं यजेत ॥ अदितेः सुतान् देवानादित्यान्वा विश्वं साधकः दिक्पतित्वका
मः ॥ ४ ॥ पुष्टिर्देहबलं तत्कामः इलां पृथ्वीं यजेत । प्रतिष्ठाकामः स्थानाद्प्रच्युतिकामः रोदसी द्यावापृथिव्यौ ॥ तयोः सर्वलोकाधारत्वाल्लोकमात

देवीं मायां तु श्रीकामस्तेजस्कामो विभावसुं ॥ वसुकामो वसून् रुद्रान्वीर्यकामोथ वीर्यवान् ॥ ३ ॥ अन्नाद्यकामस्त्वदितिं स्वर्गकामो
दितेः सुतान् ॥ विश्वान्देवान्राज्यकामः साध्यान्संसाधको विशाम् ॥ ४ ॥ आयुःकामोश्विनौ देवौ पुष्टिकाम इलां यजेत् ॥ प्रति
ष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥ ५ ॥ रूपाभिकामो गंधर्वान् स्त्रीकामोप्सरउर्वशीम् ॥ आधिपत्यकामः सर्वेषां यजेत पर
मेष्ठिनम् ॥ ६ ॥ यज्ञं यजेद्यशस्कामः कोशकामः प्रचेतसं ॥ विद्याकामस्तु गिरिशं दांपत्यार्थ उमां सतीम् ॥ ७ ॥ धर्मार्थ उत्तमश्लो
कं तंतुं तन्वन्पितॄन्यजेत् ॥ रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान् ॥ ८ ॥ राज्यकामो मनून्देवान्निर्ऋतिं त्वभिचरन्यजेत् ॥
॥ कामकामो यजेत्सोमम कामः पुरुषं परम् ॥ ९ ॥ रत्वं ॥ ५ ॥ रूपमभिकामयमानः ॥ अप्सरास्वासार्वुर्वशी च तां ॥ सर्वेषामाधिपत्यकामः प्रभुत्व
कामः परमेष्ठिनं ब्रह्माणं ॥ ६ ॥ यज्ञं विष्णुं कोशो वसुसंचयः । वसुकाम इत्यत्र धनमात्र इति भेदः प्रचेतसं वरुणं विद्याकामः ज्ञानकामः ॥ दांपत्यार्थं दंप
त्योरन्योन्यप्रीत्यर्थं सतीमित्युमाविशेषणं पतिव्रतामुमां देवीमित्यर्थः ॥ ७ ॥ उत्तमश्लोकं विष्णुं । तंतुं संतानं तन्वन्विस्तारयन् संतानस्पृष्टिकाम इत्यर्थः
रक्षाकामः बाधनिवृत्तिकामः । पुण्यजनान्यक्षानोजस्कामः बलकामः ॥ ८ ॥ राज्यकामः मनुरूपान्देवानभिचरन् शत्रुमरणमिच्छन्निर्ऋतिं राक्षसं ॥ १८ ॥

॥ ९ ॥ कामिकाराः श्रेष्ठेषु ॥ १८ ॥

अकामः वैराग्यकामः परे पुरुषं परमपुरुषं ॥ यो यो यां यां तनुं भक्त इतिरीत्या इंद्रादिरूपिणोपि परमपुरुषस्यैवांतर्वत्फलदत्वात् ॥ तत्तत्फलेप्सुभिरिज्यतः परमपु
रुषघ्राणांतवत्फलानि प्रयच्छंति ॥ अनन्याश्चिंतयंतो मामितिरीत्यानुभजमानस्य स एव मुक्तिं प्रयच्छतीत्यभिप्रायः ॥ उदारधीरिति मोक्षकामविशेष
णं ॥ तीव्रेण अविच्छिन्नेन भक्तियोगेन ॥ १० ॥ एवं भजद्भिः कदा मोक्षो वाप्यत इत्यत आह ॥ एतावानिति ॥ इहास्मिन् लोके भजतां निःश्रेयसस्य मोक्ष
स्योदयो लाभः ॥ एतावानेतदेवाधिकं ॥ भागवत्संगाद्भगवत्यचलो भाव इति यत् भागवत्संगात् भगवत्यचलो भावे सति निःश्रेयसोदयः सिद्ध ए
व तस्माद्भगवत्संगात् ॥ अचलो भाव एव संपाद्य इति भावः ॥ ११ ॥ यद्भागवतसंगत इत्यनेन सूचितां हरिकथां प्रशंसति ॥ ज्ञानमिति यासु हरि

अकामः सर्वकामो वा मोक्षकाम उदारधीः ॥ तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ १० ॥ एतावानेव यजतामिह निःश्रेयसोदयः
॥ भगवत्यचलो भावो यद्भागवतसंगतः ॥ ११ ॥ ज्ञानं यदाप्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसंगः ॥ कैवल्य
संमतपथस्त्वथ भक्तियोगः ॥ को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥ १२ ॥ शौनक उवाच ॥ इत्यभिव्याहृतं राजा निशम्य भरतर्षभः
॥ किमन्यत्पृष्टवान् भूयो वैयासकिमृषिं कविम् ॥ १३ ॥
कथासु ज्ञानादीनि संपद्यंते तासु हरिकथासु रतिं को न कुर्यादित्यन्वयः ॥ यद्वा ॥ हरि
कथारतिदशायां प्रतिनिवृत्ताः गुणाः सत्वादिकार्याणि ऊर्मयः ॥ अशनापिपासा शोकमोहजरामृत्यवो यस्मात् तथाभूतं ज्ञानं ॥ आत्मप्रसादश्चित्त
नैर्मल्यं उभयत्र लोकद्वये गुणेषु शब्दादिषु विषयेष्वसंगो वैराग्यं कैवल्ये मुक्तौ संमतः पंथा उपायः कैवल्यसंमतपथः तथाभूतो भक्तियोगश्चेत्येते
संपद्यंते ॥ तथाभूतासु हरिकथासु निर्वृतः सुखितः रतिमासक्तिं को न कुर्यात् सर्वोपि कुर्यादेवेत्यर्थः ॥ १२ ॥ एवं हरिकथाप्रभावे उक्ते पुनर्जगद्व्या

भा॰टी॰टी॰ पारत्तपद्दरिकथाबुभुत्सयामुनिनृपयोः॥ सवादमवतारयितुं शौनकः पृच्छति॥ इतीत्यादिना॥ इतिपूर्वोक्तप्रकारेणाभिव्याहृतं निशम्यश्रुत्वाभरतर्षभः
भरतवंश्यश्रेष्ठः राजापरिक्षिद्विष्णुपरब्रह्मदर्शिनंकविंशब्दब्रह्मणिनिस्नातं वैयासकिंव्यासपुत्रंश्रीशुकंप्रत्यन्यत्किंपृष्टवान्॥१३॥ एतच्छुश्रूष
॥१९॥ तांनः अस्माकं हे सत हे विद्वन्भाषितुंवक्तुमर्हसि॥ नन्वस्मिन्तवकोलाभइतिचेत्तत्राह॥ कथाइतं हरिकथैवउदर्कः उत्तरफलंयासांताः हरिकथोदर्काः
हरिकथाप्रधानाइत्यर्थः तथाभूताः कथाःसतांभगवद्भक्तानांसंसदिसभायांराजशुकयोः स्युः ध्रुवंनिश्चयः॥ अतः भगवत्कथाश्रवणमेवला
भइतिभावः॥१४॥ भगवद्भक्तत्वमेवाह॥ सइतिसार्द्धेन॥ पांडवेयोमहारथोराजामहाभागवतः॥ योराजावालक्रीडनकैः वालक्रीडाभिः क्रीडन्

ध्या एतच्छुश्रूषतांविद्वन्सूत नोर्हसिभाषितुं॥ कथाहरिकथोदर्काः सतांस्युः सदसिध्रुवम्॥१४॥ सवैभागवतोराजापांडवेयोमहारथः॥
वालक्रीडनकैःक्रीडन्कृष्णक्रीडांयआददे॥१५॥ वैयासकिश्चभगवान्वासुदेवपरायणः॥ उरुगायगुणोदाराः सतांस्युर्हिसमा
गमे॥१६॥ आयुर्हरतिवैपुंसामुद्यन्नस्तंचयन्नसौ॥ तस्यर्तेयत्क्षणोनीतउत्तमश्लोकवार्त्तया॥१७॥
कृष्णक्रीडांश्रीकृष्णसेवारू
पांक्रीडामाददे॥ तस्यक्रीडाअपिश्रीकृष्णपूजारूपाएवातः॥ आवाल्यभागवतइत्यभिप्रायः॥१५॥ एवंभगवानुत्पत्तिंप्रलयंचैवभूतानामित्यादिगु
णविशिष्टोवैयासकिः वासुदेवः परायणंपरमप्राप्यंपरमोपायश्चयस्यसतथोक्तः॥ एवमुभयोरपिभागवतत्वात्तत्संवादएवपृष्टव्यइत्याह
॥ हियस्मात्सतांभागवतानांसमागमेसंगमेउरुगायस्यभगवतोगुणैरुदाराःमहत्यः कथाः स्युः प्रवृत्ताभवेयुः॥१६॥ किंचहरेर्वक्ष्यमाणमायु ॥२॥
र्हरिकथायामेवसफलंकुर्वित्याशयेनाह॥ आयुरितित्रिभिः॥ असौसूर्यउद्यन्नुदयंप्राप्नुवन्नस्तंयन्तिरोधानंप्राप्नुवन्निम्लोचन्नित्यर्थः
उत्तमश्लोकस्यभगवतोवार्त्तयाकथयायत्क्षणोनीतः योक्षणोनीतः तस्यर्तेतंक्षणंविनाआयुर्हरतिसतुक्षणोनहृतःसफलइत्यर्थः ॥१९॥

ननु जीवनमेव तरूणामायुषः फलमस्तु नेत्याह। तरव इति। उत्पत्तिनाशमध्यस्थितिर्जीवनं ननु तेषां श्वासो नास्तीति नेत्याह। भस्त्रा इति। चर्मकोशा न श्वसंति किं वा
पुमर्थं न निःसारयंति किम्। ननु नासामाहारादिकं नास्तीति नेत्याह। ग्रामपशवः अपरे आयुर्व्यर्थं कुर्वंतश्च न खादंति नाश्नंति न मेहंति न रेतः सिंचंति
मैथुनं कुर्वंतीत्यर्थः॥१८॥ विड्वराहः ग्रामशूकरः॥१९॥ बिल इति। उरुक्रमस्य भगवतो विक्रमान् यः पापात्मा न शृण्वतः अशृण्वतो नरस्य ये क
र्णपुटे ते बिले इव यथा रंध्रे। हे सूत उरुगायगाथाः मंगलकथाः न चेदुपगायति तस्य जिह्वा असती दुष्टा दार्दुरिकी मंडूकजिह्वेव॥२०॥ यदि मुकुंदं

नरवः किं न जीवंति भस्त्राः किं न श्वसंत्युत। न खादंति न मेहंति किं ग्रामपशवोऽपरे॥१८॥ श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः
पशुः॥ न यत्कर्णपथोपेतो जातु नाम गदाग्रजः॥१९॥ बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य॥ जिह्वास
ती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः॥२०॥ भारः परं पट्टकिरीटजुष्टमप्युत्तमांगं न नमेन्मुकुंदम्॥ शावौ करौ
नो कुरुतः सपर्यां हरेर्लसत्कांचनकंकणौ वा॥२१॥ बर्हायिते ते नयने नराणां लिंगानि विष्णोर्न निरीक्षतो ये॥ पादौ नृणां
तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ॥२२॥

न नमेच्चेन्नमस्कुर्याच्चेदुत्तमांगं शिरः। पट्टकिरीटजुष्टं पट्टेन वस्त्रोष्णीषेण कि
रीटेन वा जुष्टमपि परं केवलं भारः। हरेः सपर्यां पूजां नो कुरुतः। न कुर्वतश्चेत्तौ करौ हस्तौ चलसंतौ कांचनकंकणौ यद्यपि स्तस्तथापि तावपि शा
वौ शवसंबंधिनाविव अमंगलावित्यर्थः॥२१॥ विष्णोर्लिंगानि मूर्तीः न निरीक्षतश्चेत्ते नयने बर्हायिते मयूरपिच्छनेत्रतुल्ये क्षेत्राणि श्री
रंगादीनि नानुव्रजतश्चेत्तौ नृणां पादौ द्रुमजन्मभाजौ द्रुमजन्म भजतः इति तथा वृक्षमूलतुल्यावित्यर्थः॥२२॥ ॥ ॥ ॥

भा.द्वि.टी. भागवतांघ्रिरेणुंजातुकदाचिदपियस्तुमर्त्योमनुष्यः॥नाभिलषेन्नाभितोनस्पृशेन्नधारयेत्सजीवन्नेवशवःजीवन्नपिशवतुल्यः॥श्रीविष्णुपद्याःश्रीविष्णु
॥२०॥ पदलग्नायाःतुलस्याःगंधंयस्तुमनुजोनवेदाभिप्रायेणनाभिनंदेदित्यर्थः॥सश्वसन्जीवप्राणयुक्तोपिशवःशवतुल्यः॥२३॥गृह्यमाणैःस्मरण
कीर्तनादिभिर्गृह्यमाणैर्भगवन्नामभिर्यदीयंहृदयंनविक्रियेतविकारंनप्राप्नुयात्॥अथमुखेविकारःनेत्रेजलमानंदाश्रुविंदवःगात्रेषु
देहेषुहर्षःरोमांचश्चनस्यात्तद्धृदयमश्मसारंकाष्ठायसंवर्त्ततेनिश्चये॥यदामनोविकारोभवत्तदाआनंदाश्रुःरोमांचश्चस्यादित्यर्थः॥२४॥

जीवच्छवोभागवतांघ्रिरेणुंनजातुमर्त्योभिलषेतयस्तु॥श्रीविष्णुपद्यामनुजस्तुलस्याःश्वसन्छवोयस्तुनवेदगंधम्॥२३॥तद
श्मसारंहृदयंबतेदंयद्गृह्यमाणैर्हरिनामधेयैः॥नविक्रियेताथयदाविकारोनेत्रेजलंगात्ररुहेषुहर्षः॥२४॥अथाभिधे
ह्यंगमनोनुकूलंप्रभाषसेभागवतप्रधानः॥यदाहवैयासकिरात्मविद्याविशारदोनृपतिंसाधुपृष्टः॥२५॥इतिश्रीम
तृ. द्भागवतेमहापुराणेद्वितीयस्कंधेशौनकवाक्यंनामतृतीयोऽध्यायः॥३॥सूतउवाच॥वैयासकेरितिवचस्तत्त्वनिश्चयमात्मनः॥
उपधार्यमतिंकृष्णेऔत्तरेयःसतींव्यधात्॥१॥आत्मजायासुतागारपशुद्रविणबंधुषु॥राज्येचाविकलेनित्यंविरूढांममतांजहौ

भागवतप्रधानस्त्वंमनसोनुकूलंप्रियंभाषसे॥अथोऽतःआत्मविद्यायांविशारदः॥निपुणःवैयासकिःश्रीशुकःपृष्टःसन्नृपतिंप्रतियदाहतदभि
धेहीत्यन्वयः॥२५॥इतिद्वितीयेतृतीयः॥३॥एवमापृष्टःसूतोराज्ञःप्रश्नंकथयितुंनस्यप्राक्तनींस्थितिमाह॥वैयासकेरिति॥वैयासकेःश्रीशुकस्यात्म
नः॥तत्त्वनिश्चयंयथावस्थितस्वरूपनिश्चयकंवचःइत्युक्तप्रकारेणोपधार्यश्रुत्वौत्तरेयःउत्तरापुत्रःराजाश्रीकृष्णेसतींमतिंव्यधात्करो
त्॥१॥किंच॥आत्मेति॥आत्मादेहःद्रविणंधनमात्मादिषुअविकलेनिरुपद्रवेराज्येचनिरूढांनित्यरूढांममतांस्वत्वाभिमतिंतत्याज॥२॥ ॥२०॥

हे सत्तमाः शौनकादयः इममेव हरिकथालक्षणमेवार्थं पप्रच्छ मां प्रति यत्पृच्छथ यूयम् । कथंभूतः पप्रच्छ श्रीकृष्णानुभावश्रवणे श्रीकृष्णली
लाश्रवणे श्रद्दधानः ॥ अत एव महायशाः ॥ ३ ॥ संस्थां मृत्युं विज्ञाय ज्ञात्वा त्रैवर्गिकं धर्मार्थकामसाधनं कर्म संन्यस्य त्यक्त्वा भगवति वासुदेवे स्वा
त्मभावं स्वस्यात्मत्वं ममात्मा वासुदेव इति बुद्धिविशेषं परं दृढं गतः प्राप्त इत्यर्थः ॥ एवंविधः परीक्षित् पप्रच्छेति पूर्वेणान्वयः ॥ ४ ॥ स्वबुभुत्सितमव
तारयितुं मुनिवचोऽभिनंदति । समीचीनमिति । हे ब्रह्मन्ननघ मह्यं हरेः कथाः कथयतः सर्वज्ञस्य तव वचः समीचीनं यतस्तमोऽज्ञानं विशी

पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः ॥ कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ॥ ३ ॥ संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गिकं
च यत् ॥ वासुदेवे भगवति ह्यात्मभावं दृढं गतः ॥ ४ ॥ राजोवाच ॥ समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ ॥ तमो विशीर्यते मह्यं
हरेः कथयतः कथाः ॥ ५ ॥ भूय एव विवित्सामि भगवानात्ममायया ॥ यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ॥ ६ ॥ यथा
गोपायति विभुर्यथा संयच्छते पुनः ॥ यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ॥ ७ ॥ आत्मानं क्रीडयन् क्रीडन् करोति
विकरोति च ॥ ८ ॥

र्यते नश्यति ॥ ५ ॥ बुभुत्सितं पृच्छति । भूय इति । भूयः पुनः विवित्सामि वेदितुमिच्छामि ॥ अधीश्वरैर्ब्रह्मादिभिर्दुर्विभाव्यमप्रतर्क्यं
इदं विश्वं यथा सृजति ॥ ६ ॥ यथा गोपायति रक्षति । यथा पुनः संयच्छति संहरति पुरुशक्तिरनंतशक्तिः परः पुमान् परमपुरुषः ॥ यां यां ब्रह्मादि
रूपां शक्तिं शरीरं उपाश्रित्याधिष्ठाय ॥ ७ ॥ आत्मानं ब्रह्मरुद्रादिभेदेन स्वात्मानं क्रीडयन् सृष्ट्यादिव्यापारविशेषमभिनिविष्टं कुर्वन् स्वयं क्रीड
न्नियमादिव्यापारं कुर्वन् करोति स्वयमेव तत्तदन्तरात्मतया सृष्ट्यादिव्यापारं करोति विकरोति विविधं करोति ॥ ८ ॥ ॥ ॥ ॥

उपसंहरतिइयंजगद्व्यापाररूपाक्रीडास्वातंत्र्यमम्लानंतुबालादीनामिवकर्ममम्लेत्यभिप्रायः॥ हेभगवन्नद्भुतकर्मणःविस्मयनीयव्यापारस्यहरेःविचे
ष्टितंकविभिर्ज्ञानाधिकैरपिदुर्विभाव्यमप्रतर्क्यमिवाभातिप्रतीयते॥८॥ अन्यदपिपृच्छति॥ यथेति॥ स्वयमेकःजन्मभिरवतारैर्भूरिशःकर्माणि
चेष्टितानिकुर्वन्प्रकृतेर्गुणान्सत्वादीन्युगपदपिवाक्रमशः॥ यथाबिभर्त्ति अत्रयथासृजतीतिनिमित्तोपादानाधिकरणानांप्रश्नः॥ यथागो
पायतीत्यनेनरक्षितुःस्वस्यकिंस्वरूपाद्याविवरक्षणेपिजीवांतर्यामित्वेनाथवास्वावतारेणेवरक्षणमितिप्रश्नः॥ यथासंयच्छतइत्यनेनसं
यमाधिकरणप्रश्नःनारदीयानांप्रश्नानांतत्रैवावतरिष्यमाणत्वात्॥ यथागुणांस्त्वित्यनेनभगवदवतारस्यगुणत्रयात्मकत्वमथवात्रया

नूनंभगवतोब्रह्मन्हरेरद्भुतकर्मणः॥ दुर्विभाव्यमिवाभातिकविभिश्चापिचेष्टितम्॥९॥ यथागुणांस्तुप्रकृतेर्युगपत्क्रमशो
पिवा॥ बिभर्त्तिभूरिशस्त्वेकःकुर्वन्कर्माणिजन्मभिः॥१०॥ विचिकित्सितमेतन्मेब्रवीतुभगवान्यथा॥ शाब्देब्रह्मणिनि
ष्णातंपरस्मिंश्चभगवान्खलु॥११॥ सूतउवाच॥ इत्युपामंत्रितोराज्ञागुणानुकथनेहरेः॥ हृषीकेशमनुस्मृत्यप्रतिवक्तुं
प्रचक्रमे॥१२॥ णामेव॥ अन्यतमगुणात्मकत्वमथवाऽप्राकृतत्वमेवेतिप्रश्नः॥ अत्रयद्यपिनतृतीयपक्षःप्रश्नारूढःतथापिप्रष्टुरभिप्रे
तः॥ तस्यैवसिद्धांतकोटित्वात्॥१०॥ विचिकित्सितंएतन्मेब्रवीतुइति मममविचिकित्सितंविचारितुमिष्टंभगवान्भवान्यथावद्ब्रवीतु॥ त्वमेवक
थयितुंसमर्थइत्याह॥ शाब्देब्रह्मणिशब्दब्रह्मात्मकेब्रह्मणिनिष्णातःपरिनिष्ठितःकृत्स्नशास्त्रार्थवित्॥ परस्मिंश्चब्रह्मणिनिष्णातः
खल्वित्यन्वयः॥ अनेनपरब्रह्मविषययोगजन्यज्ञानसंपत्तिरुक्ता॥११॥ हरेर्गुणानुकथनइत्युक्तप्रकारेणोपामंत्रितःप्रार्थितःहृ
षीकेशंभगवंतंसर्वेंद्रियनियंतारमनुस्मृत्यप्रवक्तुंदेवतागुरुनमस्कारादिरूपमुपक्रमंकृतवान्॥१२॥

नदेवाहत्र्योदशभिः। नमइति। परस्मै प्रकृतिपुरुषविलक्षणाय पुरुषाय। तत्रहेतुः भूयसे स्वरूपतोगुणतश्चांतर्बहिश्च व्याप्यवर्त्तमानाय तद्देवद
र्शयति सतः॥ प्रपंचस्य उद्भव उत्पत्तिः स्थानं पालनं निरोधः संहारः तएवलीला तयागृहीतशक्तित्रितयाय गृहीतहिरण्यगर्भस्वावतार प्रोक
रूपशक्तित्रितयं येनतस्मै॥ अनेनवैलक्षण्यमुक्तं। भूयस्त्वमाह। अंतर्भवायांतरात्मने अनेनसर्वस्य स्वव्याप्यत्वात्तदपेक्षयास्वस्यव्यापकंत्व
मुक्तं अनुपलभ्यं वर्त्म यस्यतस्मै वर्त्मशब्दः गंतव्यमार्गपरोप्यत्रोपासनारूपज्ञानविषयीभूतभगवत्स्वरूपरूपादिपरः उपचारात्॥ अनेनप्र
कृतकरणागोचरत्वमुक्तं इदमपिवैलक्षण्यपादकं॥१२॥ अनुपलभ्यवर्त्मत्वे अनुपास्यत्वंस्यादित्यत आह॥ भूयोनमइति॥ सद्वृजिनच्छिदे

सुवृत्ताय च॥ नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया॥ गृहीतशक्तित्रितयाय देहिनामंतर्भवायानुपल
भ्यवर्त्मने॥१३॥ भूयोनमः सद्वृजिनच्छिदेसतामसंभवायाखिलसत्वमूर्त्तये॥ पुंसांपुनः पारमहंस्यआश्रमेव्यवस्थि
तानामनुमृग्यदाशुषे॥१४॥
सतांपापच्छिदे असतांदुष्कृतामसंभवाय विनाशायाखिलसत्वमूर्त्तये अखिलं पूर्णसत्वमेवमूर्त्तिर्यस्यतस्मै उपात्त
पूर्णसत्वदेहायेत्यर्थः॥ स्वतोनिर्द्वंद्वत्वेपि सोलभ्यातिशयेनसाधुपरित्राणायदुष्कृतविना॥ शादिकुर्वन् अखिलमनुजनयनविषयतांरा
मकृष्णादिरूपेणागतइत्यर्थः॥ प्रकृतिपुरुषविलक्षणत्वात्सर्वजगत्कारणत्वाद्दांतत्वादिगुणवत्वाच्चमुमुक्षुपास्यत्वमोक्षप्रदत्वेर
वाह॥ पारमहंस्ये परमहंसानांसंबंधिनि॥ आश्रमेचतुर्थाश्रम इत्यर्थः॥ तस्मिन्व्यवस्थितानां इदंमुमुक्षूणामात्रोपलक्षणम्॥ परमहंर
सानांप्रायेणमुमुक्षुत्वात्तदाश्रमनिर्देशः ब्रह्मविद्यांगत्वेनतत्त्वाश्रमप्रयुक्तधर्मानुष्ठानपराणामनुमृग्यपदाशुषे अनुमृग्योलभ्यमिदे
र्थः तस्यदाम्यशोदानशीलाय एवंभूताय भूयोनमइति॥१५॥

सोत्यन्तविशिष्टमेवनमस्करोति॥नमइति॥सात्वतांयदूनाम्ऋषभायश्रेष्ठायाश्रितवात्सल्यातिरेकात्सात्वतश्रेष्ठत्वेनावतीर्णायेत्यर्थः॥एवंभूतोपि
कुयोगिनांदुर्लभएवेत्याह॥विदूरकाष्ठायेति॥कुयोगिनांकुत्सितयोगिनांभगवद्भक्तिरहितयोगनिष्ठानांविदूरकाष्ठायविदूरंदूरतरमेवकाष्ठादि
कंयस्यतस्मैकुयोगिभिर्यस्यदिगपिदुर्ज्ञेया॥तथाविधायेत्यर्थः॥तदेववैषम्यप्रतीतावपिनिर्दोषत्वायाचिन्त्यैश्वर्यमाह॥निरस्तइति॥स्वराध
सास्वतेजसानिरस्तसाम्यमतिशयश्चयस्यतेनतेजसाउपलक्षितेस्वधाम्निस्वमहिम्निप्रतिष्ठितइतिश्रुत्युक्तरीत्यास्वप्रतिष्ठेस्वयंज्योति
षिरंस्यतेरममाणायतेतुभ्यंनमोनमोस्तु॥तत्रगुणविशिष्टाकारोद्देशेननमस्कृतःपौनःपुन्यंनिःसमाभ्यधिकस्वकीयतेजसोपलक्षिते

नमोनमस्तेस्त्वृषभायसात्वतांविदूरकाष्ठायमुहुःकुयोगिनां॥निरस्तसाम्यातिशयेनराधसास्वधामनिब्रह्मणिरंस्यतेनमः॥१५
यत्कीर्तनंयत्स्मरणंयदीक्षणंयद्वन्दनंयच्छ्रवणंयदर्हणं॥लोकस्यसद्योविधुनोतिकल्मषंतस्मैसुभद्रश्रवसेनमोनमः॥१६
विचक्षणायच्चरणोपसादनात्संगंव्युदस्योभयतोन्तरात्मनः॥विन्दन्तिहिब्रह्मगतिंगतक्लमास्तस्मैसुभद्रश्रवसेनमोनमः॥१७

स्वस्मिन्नेवरममाणस्यनकिंचिदपिवैषम्येणप्रयोजनमिति॥नहिकल्पद्रुमस्यभजतामभीष्टानददतोवैषम्यमितिवक्तुंयुक्तम्॥१५॥यतएव
विचित्रैश्वर्यवत्वेनवैषम्यमतएवतत्कीर्तनस्मरणादेःसमस्तदुरितनिवर्तकत्वमित्याह॥यत्कीर्तनमिति॥ईक्षणमर्चाविग्रहादिनिरीक्षण
मर्हणंपूजनं॥यत्कीर्तनादिकंकीर्तनादिनिष्ठस्यलोकस्यकश्मलंदुरितंविधुनोतिसद्योविनाशयति॥तस्मैसुभद्रश्रवसेसुभद्रंसुमंगलंश्रवः
कीर्तिःयस्यतस्मैनमः॥१६॥नकेवलंश्रवणादिभिर्दुरितनिवृत्तिरेवकीर्तनादिभिर्विशुद्धेनात्मनापरिपूर्णभक्तियोगतस्तेब्रह्मप्राप्नुवंतीत्याह
विचक्षणाइति॥यच्चरणोपसादनाद्यच्चरणयोरुपसत्तेःभजनादित्यर्थः॥तस्मादन्तरात्मनोमनसःउभयतः॥इहामुत्रचसंगंव्युदस्यगतक्लमा ॥२२॥

मा: निवृत्तसंसारिकतापत्रयाः ब्रह्मगतिं परमं प्राप्यं विंदंति प्राप्नुवंति हीति प्रसिद्धिं द्योतयति॥ ब्रह्मविदाप्नोति परमिति श्रुतिप्रसिद्धः तस्मै सुभद्रश्र
वसे नमो नमः इत्यर्थः॥१७॥ भक्तिमत्तानां सर्वाण्यपि साधनानि फलानीत्याह॥ तपस्विन इति॥ तपस्विनः कृच्छ्रचांद्रायणादितपोनिष्ठाः मनस्वि
नः मन आदीन्द्रियविग्रहपराः मंत्रविदः मंत्रजापपराः सुमंगलाः सदाचारपराः एते सर्वे तप आदि यदर्पणं यस्मिन् भगवति समर्पि
तं यदुपासनं मंत्रे नानुष्ठानं विनेति यावत्॥ क्षेमं तत्तप आदेः परमफलं न विंदंति न लभंते॥ यद्यपि यत्किंचिद्दुरितनिवृत्त्यादिरूपं फल
माप्नुवंति तथापि नाक्षय्यं फलमाप्नुवंति भक्तियोगांगत्वेन तप आदि कुर्वाणास्तु निरतिशयं फलं प्राप्नुवंतीत्यभिप्रायः॥१८॥ किंव

तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः॥ क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः॥१८
किरातहूणांध्रपुलिंदपुल्कसा आभीरकंका यवनाः खसादयः॥ येन्ये च पापा यदुपाश्रयाश्रयाः शुध्यंति तस्मै प्रभविष्णवे नमः
॥१९

क्तव्यं भागवता आत्मानं विशोध्य ब्रह्म प्राप्नुवंति भागवताश्रिता हीनजातीया अपि प्राप्नुवंतीत्याह॥ किरातेति॥ किरातादयो हीनजातयः
अन्ये च ये पापाः पापजातयः यदुपाश्रयाश्रयाः॥ यं परमपुरुषमुपाश्रिताय॥ दुपाश्रया भागवतास्तदाश्रया भागवताश्रिताः शुध्यंति
॥ असंभावनाशंकां परिहरति॥ प्रभविष्णवे प्रभवनशीलाय पूर्वोक्ततप आदीनां फलप्रदायेत्यर्थः॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरे
व चेति॥ भगवद्वचनात्सर्वकर्मफलप्रदत्वेन सर्वसाधनानां तत्समर्पणमेव युक्तमिति भावः॥१९॥ एतदेवोपपादयति॥ स एष इति
एव॥ आत्मा परमात्मा आत्मवतां केवलयोगनिष्ठानामधीश्वरः योगफलप्रदः त्रयीमयः पूर्वभागोक्तकर्माराध्यो यस्तत्फलप्रदश्च

र्थः॥ धर्ममयः स्मार्त्तदानादिधर्माराध्यः तत्फलदइत्यर्थः॥ तपोमयउपनिषद्भागोक्तोपासनात्मकज्ञानमयः तज्ज्ञानप्राचुर्यवेद्यस्तत्फलदइत्यर्थः
तत्तद्देवतानांतत्तत्फलदातृत्वश्रवणात्कथंतस्यैवसर्वकर्माराध्यत्वमित्यतआह॥ गतव्यलीकैर्गतदोषैरजशंकरादिभिर्ब्रह्मरुद्रादिभिर्वितर्क्य
लिंगः निश्चेतुमशक्यलिंगोलक्षणंचिन्हंयस्यसः॥ ब्रह्मादयोपियदीयंलक्षणंवितर्कयंतितथाभूतः॥ तेषामप्यंतरात्मत्वेनउपास्यएवतत्तद्ब्रह्मादि
रूपेणफलदइतिहृदयम्॥ एवंविधंभगवन्तमात्मनःसमस्तप्रार्थयति॥ भगवानिति॥ अनेनदेवताविशेषश्चविवक्षितः॥२०॥ सर्वपालकत्व
मनुसन्दधानआह॥ श्रियइति॥ श्रियःलक्ष्म्याःपतिःभर्त्तेत्यर्थः॥ यज्ञपतिःवैदिककर्ममर्यादापालकः प्रजापतिराब्रह्मस्तंबपर्यंतप्रजापाल

सएव आत्मात्मवतामधीश्वरस्त्रयीमयोधर्ममयस्तपोमयः॥ गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगोभगवान्प्रसीदतां॥ श्रियःपतिर्यज्ञपतिःप्रजापतिर्धियांपतिर्लोकपतिर्धरापतिः॥ पतिर्गतिश्चांधकवृष्णिसात्वतांप्रसीदतांमेभगवान्सतांपतिः॥२१॥

कः॥ धियांध्यानानांपतिः॥ उपासनानांपतिस्तन्मर्यादापालकः॥ यज्ञपतिर्धियांपतिरितिभागद्वयाभिप्रायेणोक्तं॥ लोकपतिःसमस्तभुवनांनां
तदंतर्गतानांचपालकाभिप्रायेणलोकपतिःप्रजापतिरितिचोक्तं॥ धरापतिःभूर्लोकपालःधरायाःलोकांतर्गतत्वेपिधर्मवाहुल्यात्पृथ
गुक्तिः॥ रामकृष्णादिरूपेणभूर्लोकेवतीर्यदुष्कृतविनाशंकुर्वन्विशेषेणमर्यादापालकइत्यर्थः॥ अवतारप्रयोजनमाह॥ पतिरिति॥ अंध
कादयोयादवप्रभेदाः॥ तेषामक्रूरोद्धवादीनांपतिर्गतिश्चपालकःप्राप्यश्च॥ पतिर्गतिश्चेत्युभयोपादानेनसाधुपरित्राणमेवावतारकृत्यं
दुष्कृतविनाशनंत्वानुषंगिकमितिव्यंजितं नकेवलंस्वकुलीनानामेवसतांपतिःकिंतन्येषामपिसतामित्याह॥ सतांपतिःगतिश्चेत्यनुष ॥२२॥
ज्यते॥ एवंविधोभगवान्मेमह्यंप्रसीदतु॥२१॥

ज्ञानप्रदत्वेन सतां पतित्वमेव व्यक्तीकुर्वन् तत्प्रसादं प्रार्थयति ॥ यदिति द्वाभ्यां ॥ यस्यांघ्रेरभिध्यानमेव समाधिस्तेन धौतया शोधितया धिया आत्म
नः तत्वं याथात्म्यं कवयः स्वयं पश्यंति जानंति ॥ अन्ये भक्ष्य यथारुच यथामतिरूकप्रतिभावं वदंति च उपदिशंति चेत्यर्थः ॥ स भगवान्मुकुंदो मे
मह्यं प्रसीदताम् ॥ २२ ॥ किंच प्रचोदितेति ॥ पुराकल्पादौ अजस्य ब्रह्मणः ॥ हृदि स्मृतिं सृष्टिविषयां स्मृतिं वितन्वता विस्तारयता ॥ येन परमात्मना
प्रचोदिता सरस्वती त्रयीरूपा स्वलक्षणा स्वरविशेषादि ॥ स्वामाधारणाचिह्नवती आस्यतः मुखतः प्रादुरभूत्प्रादुर्भूतवती स प्रचोदयिता ऋषी
णां ज्ञानप्रदानां ऋषभः श्रेष्ठः मे प्रसीदताम् ॥ २३ ॥ इदानीं भगवानेव स्ववाचां प्रतिपाद्यः स्यादिति प्रार्थयते ॥ भूतैरिति ॥ स भगवानेव वचांसि

यदंघ्र्यनुध्यानसमाधिधौतया धियानुपश्यंति हि तत्वमात्मनः ॥ वदंति चैतत्कवयो यथारुचं स मे मुकुंदो भगवान्प्रसीदताम् ॥ २२ ॥
प्रचोदिता येन पुरा सरस्वती वितन्वताऽजस्य सतीं स्मृतिं हृदि ॥ स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदतां
॥ २३ ॥ भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः ॥ भुंक्ते गुणान्षोडश षोडशात्मकः सोलंकृषीष्ट भगवान्वचांसि मे ॥
॥ २४ ॥

अलंकृषीष्ट अलंकारोतु प्रतिपाद्यः स्यादित्यर्थः ॥ वचांस भगवत्प्रतिपादनमेव ह्यलंकारः ॥ यथोक्तं तद्वाग्विसर्गो जनताघविप्लव इत्यादि
ननु भवतो च्चार्यमाणानां नानाविधपदार्थानां कथं स एव प्रतिपाद्यः स्यादित्यत आह ॥ महद्भिर्भूतैर्महदादिपृथिव्यंतैर्भूतैरिमाः पुरः पुराणि
शरीराणि निर्माय विभुः स्वयं ततः क्लीडांतर्यापि न स्वभावः ॥ अमूषु आसु पुरीषु शेते ॥ अत एव पुरुषपुरिशयनात्पुरुषशब्दवाच्यः ॥ अवतिष्ठ
न केवलं शेते किंतु लीलारसमनुभवतीत्याह ॥ षोडश गुणान् शब्दादिविषयान्पंच पंच वागादिव्यापारान् प्राणादिवायुवृत्तीः पंच एकं मनः इ
सो गुणं संकल्पादि गुणान् षोडश गुणांस्त्वयं षोडशात्मकः ॥ एकादशेंद्रिय पंचभूतात्मभूतः भुंक्ते लीलारसमनुभवतीत्यर्थः ॥ जीवांतर्यामिले

श्री-द्वि-टी-

॥ २४॥

नगुणानन्तरं तामगवतागुणग्रहणं लीलारसः। जीवस्यतु कर्मायत्तभोग इति भावः॥ एवं च देवादिनामरूपाणां परमात्मपर्यन्तत्वान्नतास्मसर्वं वच
सां प्रतिष्ठा यत्र प्राप्नुवन्तीति स्मायेन मद्वचसां स एव विषयः स्यादिति युक्ता प्रार्थना॥ २४॥ एवं भगवंतं नमस्कृत्याथ स्वगुरुं पितरं च व्यासं नमस्करोति
आसमापिबासुदेवाय वेधसे सर्वज्ञाय सौम्याः तच्छिष्याः ज्ञानमयं यन्मुखाम्बुरुहासवं यन्मुखाम्भोजे यो मकरंदः तं
पपुः तस्मै नमः इत्यन्वयः॥ २५॥ एवं गुरुदेवं तेन नमस्कृत्य प्रकृतप्रश्नस्य उत्तरमवतारयितुं तत्संप्रदायित्वस्य नारदहिरण्यगर्भयोः
प्रश्नस्योत्तरे संवादयति॥ एतदिति॥ त्वया यत्पृष्टमेतदेवानुपृच्छते नारदाय वेदः यस्य गर्भः अतः स्वयः स वेदगर्भः चतुर्मुखः अभ्यधात्॥

नमस्तस्मै भगवते वासुदेवाय वेधसे॥ पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहासवम्॥ २५॥ एतदेवात्मभू राजन्नारदाय विपृच्छते॥
वेदगर्भोऽभ्यधात्साक्षाद्यदाह हरिरात्मनः॥ २६॥ इति श्रीमद्भागवते महापुराणे द्वितीयस्कंधे श्रीशुककृतमंगलाचरणवर्णनं नाम च
तुर्थोऽध्यायः॥ ४॥ नारद उवाच॥ देवदेव नमस्तेस्तु भूतभावन पूर्वज॥ तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनम्॥ १॥ यद्रू
पं यदधिष्ठानं यतः सृष्टमिदं प्रभो॥ यत्संस्थं यत्परं यच्च तत्तत्त्वं वद तत्त्वतः॥ २॥ किमित्यत आह हरिर्भगवानात्मनः स्वस्मै यदाह॥
भगवांश्चतुर्मुखाय यदाह स च नारदाय तदेवाहं तदेवाहं भवते अभ्यधास्यामीत्यभिप्रायः॥ २६॥ इति श्रीवीरराघवद्वितीयस्कंधटीकायां च
तुर्थः॥ ४॥ नारदाय विपृच्छते वेदगर्भोऽभ्यधादित्युक्तं तत्र नारदप्रश्नमाह॥ देवदेवेति हे देवेति हे देवदेव हे भूतभावन भूतस्रष्टः अत
एव हे पूर्वज आत्मतत्त्वस्य निदर्शनं तत्प्रकाशकं यज्ज्ञानं तद्विजानीहि॥ अंतर्भावितणिजर्थः॥ विशेषेण ज्ञापयेत्यर्थः॥ १॥ इदं कार्यं
जगद्यद्रूपं यदात्मकमित्यर्थः॥ अयं निमित्तप्रश्नः॥ यतः सृष्टं यत उपादानभूतात्सृष्टं यदुपादानकमिति यावत्॥ यदधिष्ठानं यत्संस्थं ॥ २४॥

यत्परमिति च बहुव्रीहिः॥ यः आधारो यस्मिन्नधिष्ठानं यदाधारकमित्याधारप्रश्नः॥ यस्मिन्संस्थालयः अस्य तत्संस्थं अयं लयाधारप्रश्नः॥
यत्परं य आत्मा यस्मात्परो विलक्षणः तद्यत्परं यदधीनमित्यर्थः॥ यच्च यदस्य नस्यदुपकरणत्वादिकमस्मिन तत्त्वं याथात्म्यं तत्त्वतो वदेत्यर्थः॥
२॥ न जानामीति न वक्तव्यं इत्याह॥ सर्वमिति॥ यत्पृष्टं तदेतत्सर्वं भवान्वेद जानाति॥ कुत इत्यत आह॥ भूतभव्यभवत्प्रभुः॥ भूतभवीष्यद्वर्त्त
मानकालीनकृत्स्नवस्तुजातस्य प्रभुरत्याद्रकः किंच तव त्वया विश्वं जगत् विज्ञानेन भगवत्प्रसादलब्धज्ञानेनावसितं निश्चितं करा
स्यामलकवत्॥ एवं जगद्विषयः प्रश्नः कृतः॥ २॥ आत्मा तावदिदं त्वामेव त्वं कथयेत्याह॥ यद्विज्ञान इति॥ यस्मिन्विषये तव विज्ञान

सर्वं ह्येतद्भवान्वेद भूतभव्यभवत्प्रभुः॥ करामलकवद्विश्वं विज्ञानावसितं तव॥ ३॥ यद्विज्ञानो यदाधारो य
त्परस्त्वं यदात्मकः॥ एकः सृजसि भूतानि भूतैरेवात्ममायया॥ ४॥ आत्मन्भावयसे तानि न पराभावयन्॥
स्वयम्॥ आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः॥ ५॥

मस्तीति सप्तमीबहुव्रीहिः॥ यतो विज्ञानं यस्य यद्विज्ञानस्त्वं वि
ज्ञानद इति यदाधारः आधारो यस्य सः कस्त्व वाश्रययः॥ यदात्मकः य आत्मा यस्य सः कस्त्वदात्मेत्यर्थः॥ ममतु त्वमेव स्वतंत्रः परमे
श्वर इति भासितयस्मरणेन तु परशंकया पृच्छामीत्याह॥ साहं स्वतुर्भिः एक असहायः आत्ममायया आत्मनः संकल्पेन भूतैः पृ
थिव्यादिभूतैर्भूतानि देवादीनि भूतानि सृजसीति विशेषः॥ ४॥ तानि सृष्टानि भूतान्यात्मन्यात्मनि स्वस्मिन्निति अर्थः॥ स्वयं न पराभा
वयन्त्वा त्वा न परिभवमप्रापयन्॥ अमोघवांछ इत्यर्थः॥ भावयसे पालयसि ऊर्णनाभिः॥ सूत्रनाभिः कीटविशेषः स्वदेहात्मनः
शक्तिं प्रकृतिमवष्टभ्याक्लमः अस्पृष्टश्रमः सृजसि पासि संहरसीत्यर्थः॥ ५॥

भा. द्वि. टी.

॥२५॥

एतदेवोपपादयति ॥ नाहमिति ॥ अहं त्वस्मिन्कारणविषये परमुत्कृष्टमवरं निकृष्टं समं मध्यमं देवादिनामद्विपत्स्यादिरूपं शुक्लादिगुणैर्भाव्यं सम
दसदात्मकं किंचिदपि वस्त्वन्यतो न वेद ॥ किंतु त्वत्त एव जानामीत्यर्थः ॥ यद्वा ॥ अस्मिन्कार्ये विश्वे नामरूपाभ्यां सत्त्वादिगुणैश्चोपलक्षितत्वेन नि-
ग्राह्यं चेतनात्मकं किंचिदपि वस्तु इदमनेन सममिदं निकृष्टमिदमुत्कृष्टमिति न जानामीत्यर्थः ॥ ६ ॥ यस्मात्त्वमित्यादिप्रश्नः कुतः प्रस-
क्त इत्यत्राह ॥ स इति घोरं इतरैश्चर्तुमशक्यं महत्तपः स भवान्जगत्स्रष्टा भवान् भगवानिति ॥ पराशंकां तदन्तदापूज्यत्वमित्यर्थः ॥ अचर-

नाहं वेद परं ह्यस्मिन्नापरं न समं विभो ॥ नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः ॥ ६ ॥ स भवानचरद्घोरं
यत्तपः सुसमाहितः ॥ तेन खेदयसे नस्त्वं परशंकां प्रयच्छसि ॥ ७ ॥ एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्व-
र ॥ विजानीहि यथैवेदमहं बुध्येनुशासितः ॥ ८ ॥ ब्रह्मोवाच ॥ सम्यक्कारुणिकस्येदं वत्स ते विचिकि-
त्सितम् ॥ यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ॥ ९ ॥

दाचरति कृतवान् ॥ तेन तपश्चरणेन किमस्मादपि परमस्ती-
ति शंकां प्रयच्छसि ततस्त्वं नः खेदयसे परशंकाप्रदानेन चित्तविक्षेपं जनयसीत्यर्थः ॥ ७ ॥ प्रश्नमुपसंहरति ॥ एतदिति ॥ हे सर्व-
ज्ञ सकलेश्वर त्वयानुशासितः शिक्षितोहं इदं भवतोपदेक्ष्यमाणं यथैव बुध्ये जाने तथैतत्सर्वं पृच्छतो मह्यं विजानीहि विशेष-
ण ज्ञापय ॥ ८ ॥ अथ ब्रह्मा यथाप्रश्नमुत्तरयिष्यंस्तावत्प्रश्नमभिनंदति ॥ सम्यगिति ॥ हे वत्स पुत्र कारुणिकस्य मयि कृपणावतः
ते त्वया इदं सम्यग्विचिकित्सितं ज्ञातुमिष्टं ॥ कुत इत्यत आह ॥ यद्यस्मादहं भगवद्वीर्यदर्शने भगवत्प्रभावज्ञापनरूपे धर्मे प्रवर्तितः

द्वि

॥२५॥

अभिमतार्थं जिघृक्षया प्रश्नं विविनक्ति ॥ नानृतमिति ॥ भो नारद मां प्रति यथा प्रब्रवीषि ॥ एकः सृजसि भूतानीति आदिना यत्पृष्ठसि तच्चापि
न तव त्वदीयं वचः नानृतम् अतीव नासमं किंतु मत्तः परं भगवंतम् अज्ञात्वा ब्रवीषीति ॥ अज्ञान हेतुमाह ॥ मम एतावत्त्वं एतावन्महिमत्वं यतः
परमकारणाद्भवति तं मत्तः परमज्ञात्वा ब्रवीषीत्यर्थः ॥ १० ॥ तर्हि कोसावीश्वर इत्यपेक्षायां भक्त्या नमस्कुरिष्यन्नाह ॥ येनेति ॥ अर्कादयो
भगवत्तेजसा रोचितं विश्वं तत्तेजोलेशमुपजीव्य स्वयं रोचयतीति स्वात्मानमभिमन्यते एवमहमपीत्यर्थः ॥ न तत्र सूर्यो भातीति श्रुतिरत्र

नानृतं तव तच्चापि यथा मां प्रब्रवीषि भो ॥ अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥ १० ॥
येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहं ॥ यथार्कोग्निर्यथा सोमो यथार्क्षग्रहतारकाः ॥ ११ ॥
तस्मै नमो भगवते वासुदेवाय धीमही ॥ यन्मायया दुर्जयया मां वदंति जगद्गुरुम् ॥ १२ ॥
विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया ॥ विमोहिता विकत्थंते ममाहमिति दुर्धियः ॥ १३ ॥

नुसंधेया ॥ ११ ॥ तस्मै वासुदेवाय नमो धीमहि नमः कुर्महे ॥ यद्वा ॥ धीमहीत्यत्र तमिति शेषः जेतुमशक्यया यस्य भगवतो मायया मां जगद्गुरुं वदंति
ब्रह्माद्याः सकलाः देवा मनुष्याः पशवस्तयाविस्मृता यामहावत्तेमोहाधतमसा इति न्यायेन मायया मोहिता मां जगद्गुरुं वदंति न तु तत्वविद
इत्यर्थः ॥ १२ ॥ इतरे यां मायया दुर्जयत्वं भगवतस्तत्संस्पर्शं चाह ॥ विलज्जमानयेति ॥ यस्य भगवत ईक्षापथे दृष्टिपथे स्थातुं विलज्जमानया तस्मि
न्कार्यमकुर्वंत्या मुया मायया विमोहिताः संतो ममाहमिति दुर्द्धियः विकत्थंते ॥ १३ ॥

विकल्पनमेवाह । द्रव्यमिति । द्रव्यं पृथिव्यादि भूतमेव कारणं इति केचित् । कर्मैव कारणमिति केचित् । काल इत्येके स्वभाव इत्यपरे । कर्माधीनत्वाज्जी
व एव कारणमित्यपरे । एवं यन्मायया मोहिता विकल्पयन्ते इत्यर्थः । एवं तैः स्वतंत्रतयाभिमताः पदार्थाः । भगवदधीना इत्याह । वासुदेवात्परा इ
ति । द्रव्यप्रमुख्यादिष्वर्थेषु वासुदेवात्परोऽन्यो अर्थो नास्ति यथा वासुदेवात्परो नास्ति न द्वह तदात्मकमतत्परं तत्र च नास्तीत्युक्तं वक्ष्यमाणेषु
त्र चित्तम् । १४ । एतदेवोपपादयति । नारायणपरा इति । वेदाः नारायणः परं कारणं येषां तेन तथोक्ताः । तस्य वा एतस्य महतो भूतस्य नि
श्वसितमेतदृग्वेद इत्यादिश्रुतेः । यद्वा नारायणः परं प्रतिपाद्यं येषां तेन तथोक्ताः । सर्वे वेदा यत्पदमामनन्तीति श्रुतेः । देवा इङ्गादयः नाराय

द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्वतः ॥ १४ ॥
नारायणपरा वेदा देवा नारायणाङ्गजाः । नारायणपरा लोका नारायणपरा मखाः ॥ १५ ॥
नारायणपरो योगो नारायणपरं तप । नारायणपरं ज्ञानं नारायणपरा गतिः ॥ १६ ॥

णस्याङ्गाज्जाता नारायणशरीरभूता इत्यपि विवक्षितं चन्द्रमा मनसो जातः स आत्माङ्गान्यन्या देवता इत्यादिश्रुतेः । लोकाः नारायणः परः स्वामी
येषां तेन तथोक्ताः । मखाः क्रतवः नारायणपराः नारायणः परः आराध्यो येषां तेन तथोक्ताः । १५ । योगो विवेकादिजन्यः उपासनात्मको योगो ना
रायणपरः । नारायणः परो ध्येयो यस्य स तथोक्तः । तपः विद्याङ्गभूतं कर्म नारायणपरं नारायणः पर्यवसानभूमिर्यस्य तत्तथोक्तम् । ज्ञानं
शास्त्रजन्यज्ञानं । योगस्य पूर्वमुक्तेः । तदपि नारायणः परो ध्येयो यस्य तथोक्तम् । गतिर्योगफलमर्चिरादिका सापि नारायणः परा गत्या यस्याः

एवं सर्वं तदधीनमिति कथनेनाहं वेदपरं तस्मिन्नित्यं शास्यो न्तरमुक्तं भवति तर्हि त्वं किं करोषीत्यपेक्षायामाह ॥ तस्येति ॥ अखिलात्मनः स
र्वान्तर्यामिणः ॥ अभिध्यातुः सर्वज्ञस्येशस्य सर्वं स्ववशीकृत्य नियंतुः कूटस्थस्य निर्विकारस्येक्षयैव संकल्परूपज्ञानेनैव सृष्टोऽहं तेन र
चोदितः सृज्यं सृजामीत्यन्वयः स तु प्रयोजको हं तु प्रयोज्य इति भावः ॥ १७ ॥ ननु कुतोयं नियोजकभावः कुतो वा तस्य सर्वज्ञत्वादयो धर्मा :
स्तस्य तु न च परीताद्यपेक्षायां ॥ मायीश्वरत्वमायावश्यत्वाभ्यामित्याह ॥ सत्वमिति ॥ निर्गुणस्य हेयगुणरहितस्य कल्याणगुणानां सम
नंतरमेवोक्तत्वाद्धि मायोपाधिकेन भगवतो मायया प्रकृतिद्वारा स्थितिसर्गनिरोधेषु निमित्तेषु स्थित्याद्यर्थं इत्यर्थः ॥ सत्वादयस्त्रयो गुर

तस्याभिध्यातुरीशस्य कूटस्थस्याखिलात्मनः ॥ सृज्यं सृजामि सृष्टोहमीक्षयैवाभिचोदितः ॥ १७ ॥
सत्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः ॥ स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥ १८ ॥
कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः ॥ बध्नंति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥ १९ ॥

णगृहीताः ॥ स्वनियाम्यत्वेन परिगृहीताः सृष्टिस्थितिसंहाररूपलीलापरिकरत्वेन सत्वादय ईश्वरेण परिगृहीता इत्यभिप्रायः ॥ १८ ॥
एवं गुणानामीश्वरलीलापरिकरत्वमुक्त्वा जीवबंधनत्वमाह । कार्येति ॥ कार्यं शरीरं कारणमिंद्रियं ताभ्यां कर्तृत्वेन निमित्तेन पुण्यपापपनि र
ष्पादनार्थं गुणाः सत्वादयः स्वरूपतो व्ययं मायिनं मायावश्यं संबंधमात्रेण नित्यं पुरुषजीवं बध्नंतीत्यन्वयः गुणान्विशिनष्टि ॥ द्रव्येति
मोहनप्रकाशनस्ववर्तनस्वभावाः द्रव्यशब्दस्य मोहनवाचित्वं परिशेष्यादवगम्यते ॥ अत एवास्मिन्नध्याये बहुशः प्रयोगाश्च सत्वं
रजस्तम इति गुणाः प्रकृतिसंभवाः निबध्नंति महाबाहो देहे देहिनमव्ययम् । तत्र सत्वं निर्मलत्वात्प्रकाशकमनामयं ॥ सुखसंगेन बर

प्रीतिज्ञानसंगेन चानघ। रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवम्। तन्निबध्नाति कौंतेय कर्मसंगेन देहिनम्॥ तमस्त्वज्ञानजं विद्धि मोहनं सर्वदे
हिनां। प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारतेति। गीतावचनान्यत्र स्मारितानि॥१९॥ एवं गुणानां जीवबंधकत्वमुक्तमथ स्वलीलापरिकरी
कृतमायः परमेश्वरः सर्वेषां मम चेश्वरः स्मात्॥ स इति। लिंगैः सत्वादिगुणैः शरीरभूतप्रकृतिस्थैरुपलक्षितः स्वलक्षितगतिः स्वल
क्षितास्वकृतेर्गतिर्यस्य स तथोक्तः। न तु तदादर्शितपथ्यानाविति चह्मन्यदर्शितमार्गः सत्य एषः॥ एवंविधैश्वर्यसंपन्नो भगवान्हे ब्रह्मंस्त्वादृ
सर्वेषां मम चेश्वरः नियंता॥२०॥ एवमेकः सृजति भूतानीति प्रश्नस्योत्तरमुक्त्वा यद्रूपमित्यादिः प्रश्नस्योत्तरं वदंस्तावत्सृष्टिप्रका
रमाह। कालमिति॥ मायेशो मायाधिपतिः स्वमायामायया स्वसंकल्पेन यदाद्भूतेया प्रकृत्या विबुभुषुः प्रकृतिद्वारा नानाना

स एष भगवान्लिंगैस्त्रिभिरेभिरधोक्षजः॥ स्वलक्षितगतिर्ब्रह्मन्सर्वेषां मम चेश्वरः॥२०॥ कालं कर्म स्वभावं च मायेशो मायया
स्वया॥ आत्मन्यदृच्छया प्राप्तं विबुभूषुरुपाददे॥२१॥ कालाद्गुणव्यतिकरात्परिणामस्वभावतः॥ कर्मणो जन्म महतः पुरुषाधिष्ठि
तादभूत्॥२२॥

नारूपभाग्भवितुमिच्छुर्यदृच्छयाऽहेतुकमपरप्रेर्यो कर्मपरवशः॥ आत्मन्यात्मनि प्राप्तं संगतं युक्तं कालं कर्म स्वभावं
चोपाददे॥ कालो गुणवैषम्यरूपगुणक्षोभहेतुः कर्म जीवादृष्टं स्वभावः प्रकृतेः। परिणामस्वभावः एतेषामुपादानं नाम स्वस्वकार्येष्वनु
व्यापारणं॥२१॥ कालकर्मस्वभावोपादानफलं दर्शयन्महतः सृष्टिमाह। कालादिति। कालाद्धेतुभूताद्गुणव्यतिकरात्कालकृतगुणवैष
म्यादित्यर्थः॥ परिणामस्वभावतः प्रकृतेः परिणामस्वभावात्कर्मणो जीवादृष्टाच्च हेतोः परमपुरुषाधिष्ठिताद्व्यक्तान्महतो महतत्व
स्य जन्मोत्पत्तिरभूदित्यर्थः॥ तदधिष्ठितं तद्दाहितं स्वकार्यजननसामर्थ्यवत्वं॥ अत्राव्यक्तादित्यध्याहारः॥ पुरुषाधिष्ठितत्वाच्चाव्यक्त। ॥२७॥

नुग्रहेण चेतितः प्रोक्तात् ॥ व्यतिकरः मिश्रणं समानां गुणानां विषमत्वापत्तिः ॥ यद्वा गुणानां व्यतिकरो यस्मिन्निति बहुव्रीहिः अव्यक्तादिमर्थः ॥ २२ ॥
महतो ऽहंकारोत्पत्तिमाह ॥ महतस्त्विति ॥ विक्रियमाणाद्रजःसत्वोपबृंहितात् महतः द्रव्यज्ञानक्रियात्मकः मोहनप्रकाशनप्रवर्त्तनस्वभावः त
मःप्रधानः तमोगुणप्रधानः अभवत् ॥ महतस्त्रिगुणात्मकत्वेपि क्रियाशक्तिज्ञानशक्तिप्रधानत्वाद्रजःसत्वोपबृंहितादित्युक्तं एवमहंकार
स्य तमः ॥ कार्यप्रधानत्वात्तमःप्रधान इत्युक्तिः ॥ अतएवाहंकारकार्येषु तामसं स्वरूपं राजसं सात्विकं चाल्पमेवं महत्कार्येषु तामसमल्पत
रितरद्भूयं वक्ष्यतीति मंतव्यम् ॥ २२ ॥ तमःप्रधानस्य किं नामधेयमित्यत आह ॥ स इति ॥ तस्यैव त्रैविध्यमाह ॥ विकुर्वन् रूपान्तरं गच्छन्नहं

महतस्तु विकुर्वाणाद्रजःसत्वोपबृंहितात् ॥ तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः ॥ २३ ॥ सो ऽहंकार इति प्रोक्तो विकुर्व
न्समभूत्त्रिधा ॥ वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ॥ २४ ॥ द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो ॥ २४ ॥ तामसा
दपि भूतादेर्विकुर्वाणादभून्नभः ॥ तस्य मात्रा गुणः शब्दो लिंगं यद्द्रष्टृदृश्ययोः ॥ २५ ॥

कारस्त्रिधा समभूत्समपद्यत ॥ यद्भिदा यस्याहंकार
स्य भिदा वैकारिकस्तैजसश्च तामसश्चेति सात्विकराजसतामसाहंकाराणां क्रमेण नामानि ॥ तेषां प्रतिनियतस्वभावानाह ॥ द्रव्यशक्तिरिति ॥
प्रातिलोम्येन त्रयाणां स्वभावप्रदर्शनम् ॥ द्रव्यशक्तिः विसृष्टमहाभूताख्यद्रव्योत्पादने शक्तिः सामर्थ्यं यस्य स तथोक्तः ॥ सात्विकाहंकारानुग्राह
कत्वरूपा या क्रिया तस्यां शक्तिर्यस्य स तथोक्तः ॥ प्रवर्त्तनमेव हि रजःकार्यं ज्ञानशक्तिः शब्दादिविषयज्ञानसाधनेन्द्रियोत्पादने शक्तिर्यस्य
स तथोक्तः ॥ एकादशानामिंद्रियाणां सात्विकाहंकारकार्यत्वाद्राजसस्य तु तदनुग्राहकत्वात् ॥ २४ ॥ एवमहंकारस्य त्रैविध्यमुक्त्वा अथ तामसाहं

कारात्क्रमादितन्मात्रक्रमेणाकाशादिभूतसृष्टिमाह ॥

भा॰ द्वि॰ टी॰

॥२८॥

नाममसादिति॥ मत्तादिरिति नाममसाहंकारस्यैव नामांतरं विक्रियमाणद्वतादिना मकान्नाममसाहंकारान्नभ अभूत् शब्दद्वारा नभः उत्पद्यतेत्यर्थः
एवमेवस्पर्शादिष्वपिद्रष्टव्यम्॥ एतदेव शब्दस्वभावं कथयन्नुपपादयति॥ लिंगमिति॥ तस्य नभसो मात्रा सूक्ष्मं रूपगुणव्यावर्तकोऽ
साधारणो धर्मश्च यः शब्दः सोप्यभूदित्यर्थः॥ यद्वा॥ तस्य नभसः मात्रा गुणः असाधारणगुणः॥ शब्दस्य लक्षणं द्रष्टृदृश्ययोरात्मनो
लिंगं प्रमाणं यत्स शब्द इत्यर्थः॥ शब्दो हि शास्त्रात्मना आत्मानात्मनोः प्रमाणं॥ यद्वा हस्तत्र कारः शास्त्रयोनित्वादिति॥ यदिति नपुंस
कत्वं लिंगापेक्षया॥ २५॥ विकुर्वाणद्रूपांतरं गच्छतः नभसः स्पर्शगुणोऽनिलो वायुरभूत्॥ स्पर्शतन्मात्रद्वाराभूदित्यर्थः॥ परान्वयात्का

नभसोऽथ विकुर्वाणादभूत्स्पर्शगुणोऽनिलः॥ परान्वयाच्छब्दवांश्च प्राणः ओजः सहो बलं॥ २६॥ वायोरपि विकुर्वाणात्कालकर्म
स्वभावतः॥ उदपद्यत तेजो वै रूपवत्स्पर्शशब्दवत्॥ २७॥ तेजसस्तु विकुर्वाणादासीदंभो रसात्मकम्॥ रूपवत्स्पर्शवच्चांभो घो
षवच्च परान्वयात्॥ २८॥ विशेषस्तु विकुर्वाणादंभसो गंधवानभूत्॥ परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः॥ २९॥

रणान्नभोनुवृत्तेः शब्दवांश्च वायुरित्यर्थः॥ सस्पर्शस्य वायोर्लक्षणमाह॥ प्राण अवस्थाविशेषोपपन्नो वायुर्हि प्राणः॥ ओजः सहो बल
मिति धर्मिप्रधानो निर्देशः॥ ओज आदिविशिष्ट इत्यर्थः॥ ओजः प्रवृत्तिशक्तिः सहो वेगं बलं धारणसामर्थ्यं॥ ओजः सहो बलानी
द्रियमनःशरीराणां पाटवानि तेषां हेतुरिति किंचित्॥ २६॥ कालकर्मस्वभावतो विकुर्वाणाद्वयो रूपवत्॥ कारणभूताकाशवायुगुणा
नुवृत्तेः स्पर्शशब्दवच्च तेज उत्पद्यत॥ कालकर्मस्वभाव इति सर्वत्रानुसंधेयं॥ २७॥ विक्रियमाणात्तेजसः रसात्मकं परान्वयाद्रूपस्प
र्शशब्दवच्चांभ आसीत्॥ घोषशब्दवत्॥ २८॥ अथ विकुर्वाणाद् अंभसो गंधवान् परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितश्च विशेषः पृ

॥२८॥

सर्वेषामिंद्रियाणां सात्विकाहंकाराद्युत्पत्तिमाह ॥ वैकारिकादिति वैकारिकनाम्नः सात्विहंकाराद्दिगादयः श्रोत्राद्यधिष्ठानदेवताः ताभिरधिष्ठिता
नींद्रियाणि मनश्च जज्ञिरे इत्यर्थः ॥ अग्निर्वाग्भूत्वेत्यादिवद्दिग्धिष्ठा अधिष्ठेययोरभेदोपचारात् सामानाधिकरण्यं देवा वैकारिका इत्यु
क्तं ॥ देवतागण इति ॥ दिशश्च वातश्चार्कश्च प्रचेताश्चाश्विनौ चेते पंच श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः ॥ वह्निश्चेंद्रश्चोपेंद्रश्च
मित्रश्च कश्च प्रजापतिः ॥ एते पंच वाक्पाणिपादपायूपस्थानामधिष्ठातारः ॥ मनसस्त्वधिष्ठाता चंद्रमाः एभिर्दशभिरधिष्ठितानि श्रो
त्रादीनि ज्ञानानीत्यभिप्रायः ॥ ३० ॥ तैजसाहंकारकार्यमाह ॥ तैजसात्तैजससंबंधिनः राजसाहंकारानुगृहीतात्सात्विकाहंकारादित्यर्थः

वैकारिकान्मनो जज्ञे देवा वैकारिका दश ॥ दिग्वातार्कप्रचेतोऽश्विवह्नीं
द्रोपेंद्रमित्रकाः ॥ ३० ॥ तैजसात्तु विकुर्वाणादिंद्रियाणि दशाभवन् ॥ ३१ ॥

अन्यथा पूर्वग्रंथव्याघातात् पूर्वग्रंथेभिमानिदेवतासृष्टिरिति चेन्न इंद्रियैर्विना देवतादेहारंभायोगाच्चतुर्मुखसृष्टत्वेनात्र व
र्ण्यमानानामादित्येंद्रादीनामेडसृष्टेः ॥ प्राकृतसृष्ट्ययोगाच्च न चासृष्टानामेवाधिष्ठातृत्वमप्यनुपपन्नमिति वाच्यं ॥ परमाका
शस्थानां भगवत्संकल्पानुगृहीतानामधिष्ठातृत्वोपपत्तेः ॥ कोयं परमाकाश इति चेद्वैकुंठाख्यो लोकः ॥ अत एव दृष्टं चतुःषोड
शपंचशक्तिभिरिति ॥ वक्ष्यते ॥ न च परमाकाशस्थाभिरेवाधिष्ठानोपपत्तेश्चतुर्मुखकर्तृकादिगादिसृष्टिर्व्यर्थेति वाच्यं ॥ वाह्यें
द्रियाधिष्ठानार्थं दिगादिसृष्टेरावश्यकत्वात् ॥ अतः परमाकाशसंस्थे वेत्यवगंतव्यम् ॥ अत एवैभिराधिष्ठातृभिः परमात्मानं प्रति

क्रियमाणास्तुतिरप्युपपद्यते अन्यथांऽशोऽस्मनंतरं स्वस्यमाणानामेषामंशोऽस्मत्तेः पूर्वमभावात्तत्कर्तृकास्तुतिरनुपपन्नास्यात् ननु एषां सर्वेंद्रिया
धिष्ठातृत्वे तर्हि इंद्रियाणां के अधिष्ठातार इति चेदुच्यते तर्हि इंद्रियाणामपि दिशादीनामधिष्ठातारः संत्येव। एकैकमिंद्रियं तत्वधिष्ठातृभूतमवतिष्ठ
ते। न च तत्स्वपरनिर्वाहकत्वन्यायेन स्वेनैव वायपरमात्मना वाधिष्ठीयते इति नातवस्थाप्रसंगः इति॥ यद्वा॥ तैजसात्विति पक्षांतरोक्तिः॥३१॥ पक्षद्व
यस्याविरोधमाह॥ ज्ञानशक्तिरिति॥ प्राणप्रादइंद्रियपरं ज्ञानशक्तिः। प्राणः ज्ञानेंद्रियगणः क्रियाशक्तिश्च प्राणः कर्मेंद्रियगणः बुद्धिर्मनः
करणचतुष्टयं च तैजसः राजसाहंकारान्वितसामग्रीप्रसूतं ज्ञानकर्मेंद्रियाणामंतःकरणस्य स्वकार्यप्रवृत्तिमत्वात्तत्कारणेनापि रजोगु
णान्वितेनापि भवितव्यमित्येतत्तात्पर्यकत्वात्तैजसत्ववादस्य सर्वेंद्रियाणां राजसाहंकारानुगृहीतसात्विकाहंकारकार्यत्वमेवेति न पक्षद्व
ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणस्तु तैजसौ। श्रोत्रं त्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्रांघ्रिपायवः॥३२॥ यदैते संगता भावा भूतेंद्रिय
मनोगुणाः। यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम॥३३॥ तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः। सदसत्वमुपादाय चोभयं स
यविरोधस्स्मर्यः॥ एवंभूतादेरपींद्रियभूतसृष्टिं वक्तुमाह तैजसादिति वैदिकत्वं इंद्रियाणि गणयति॥ श्रोत्रमिति॥ ससृजुर्ह्यदः॥३४॥
दोः पाणिः मेढ्रमुपस्थः कर्मसत्वं न विवक्षितं॥३२॥ यदेति॥ यदैते भूतानींद्रियाणि मनश्चैतेषां गुणाः तन्मात्राणि विषयाः शब्दादयः एते स
र्वे संहताः अमिलिताः॥ आसन् तत एव यदायतनं सत्व ब्रह्मांडस्य भगवच्छरीरस्य निर्माणे हे ब्रह्मवित्तम न शेकुर्नाशकुर्वन्॥३३॥ तदा भगव
च्छक्त्या चोदिताः प्रेरिताः संहत्य पंचीकरणप्रकारेण परस्परं मिलिता सदसत्वं सत्वं पंचीकरणेन स्थूलत्वं असत्वं सूक्ष्मत्वं चोभयमनुभ
यं पूर्वोक्तकालकर्मस्वभावांश्च उपादाय अदः ब्रह्मांडं ससृजुः॥ यद्वा॥ अनुभयमित्यदः शब्दनिर्दिष्टब्रह्मांडविशेषणम्॥ अनुभयं कार्यका

रमाभावानन्वितमंडंब्रह्मांडंसमस्तजुरिमर्थः। कार्यमप्यंडंह्याकाशकार्यंवायुवन्नतत्वांतरंनचतत्वांतरारंभकमतस्तत्वांतरारंभकमनस्तत्वांतरंत
याकार्यंतत्वांतरापेक्षयाकारणंचनभवतीत्यनुभयंब्रह्मांडमुक्तम्॥ अत्रचतुर्मुखोत्पत्त्यादिकमग्रेत्रविस्तरेणवक्ष्यमाणमत्राप्यर्थसिद्धि
मनुसंधेयम्॥ ३४॥ वर्षपूगसहस्रांतेप्रलयकालावसानेइत्यर्थः॥ अनयानक्रमेणविहरंतनत्नवुद्बुदवत्सममितिविरोधात्। जीवःदे
बाद्यपेक्षयासममहिपुरुषब्रह्मास्यजीवशरीरकःपरमपुरुषःकालकर्मस्वभावाश्रितःसन्नजीवमचेतनमुदकेशयमंडंब्रह्मांडम
वर्षपूगसहस्रांतेनतदंडमुदकेशयम्॥ कालकर्मस्वभावस्थोजीवोजीवमजीवयत्॥ ३५॥ सएषपुरुषस्तस्मादंडंनिर्भिद्यनिर्गतः
॥ सहस्रोर्वंघ्रिबाहुक्षिःसहस्राननशीर्षवान्॥ ३६॥ यस्येहावयवैर्लोकान्कल्पयंतिमनीषिणः॥ कट्याद्भिरधःसप्तसप्तो
र्ध्वंजघनादिभिः॥ ३७॥
जीवयचेतयतिस्म॥ अन्योदकेशयमित्यनेनांडस्यैः॥ सर्वंगर्भोदकसंज्ञकास्थिरर्थसिद्धानुसंधेयाः परोत्तानि
हैंशस्चतुर्मुखांतरसामान्याभिप्रायः॥ ३५॥ सएवपुरुषश्चतुर्मुखरूपेणोपस्थितःपरमपुरुषः॥ अंडंनिर्भिद्यतस्मान्निर्गतः अंडभेदनावकाश
लाभादनुपरुद्धसंचारादिमानभूदित्यर्थः॥ चतुर्मुखस्यभगवदात्मकत्वंसामानाधिकरण्येनाह॥ सहस्रेति। यश्चतुर्मुखशरीरकत्वेनावस्
स्थितःसएवसहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्। सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं। सर्वतःश्रुतिमल्लोकइत्यादिनोक्तेः
सर्वतःपाणिपादादिकार्यकर्तापरमपुरुषइत्यर्थः॥ ३६॥ यस्यसर्वतःपाणिपादादिकार्यकर्तुर्वैराजपुरुषस्यावयवैःपादतलाद्यवय
वैर्लोकान्पातालादीन्मनीषिणउपासकाःकल्पयंति॥ लोकानवयवत्वेनरचयंतीत्यर्थः। तत्रावयवप्रभवाणांतदवयवत्वेनोपास

वेपुक्तं ॥ तस्वपवैलोंकरचनामाह ॥ कद्यादिभिरिति ॥ कटितटमूलयोः पश्चाद्भागः जघनं पुरोभाग अधः सप्तलोकानतलादीनूर्ध्वं भूरादीन्स
प्तकल्पयंतीत्यन्वयः ॥ ३७ ॥ वर्णानां तद्विभूतित्वाय चतुर्मुखरूपेणावस्थितान्तत उत्पत्तिं दर्शयति ॥ पुरुषस्येति ॥ ब्रह्मब्राह्मणः मुखमिति कार्य
कारणयोरभेदविवक्षयोक्तं वाहूद्वइति वृत्तत्वं क्षत्रियः ॥ ३८ ॥ इदानीमुपासनार्थं लोककल्पनाभेदं दर्शयंश्चतुर्दशलोकपक्षमाह ॥ चतुष्टये
नभूर्लोकः पातालमारभ्य पद्भ्यां कटिपर्यंताभ्यां कल्पितः ॥ भुवर्लोकः नाभितः नाभिमारभ्य स्तनद्वयात् ॥ हृदयं कामेत्ताकारं तदूर्ध्वं भागाः

पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ॥ ऊरोर्वैश्यो भगवतः पद्भ्यां शूद्रो अभ्यजायत ॥ ३८ ॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नार
भितः ॥ हृदा स्वर्लोक उरसा महर्लोको महात्मनः ॥ ३९ ॥ ग्रीवायां जनलोकोऽस्य तपोलोकः स्तनद्वयात् ॥ मूर्द्धभिः सत्यलोकस्तु
ब्रह्मलोकः सनातनः ॥ ४० ॥ तत्कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः ॥ जानुभ्यां सुतलं शुद्धं जंघाभ्यां तु रसातलम् ॥ ४१ ॥
महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलम् ॥ पातालं पादतलत इति लोकमयः पुमान् ॥ ४२ ॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लो
कोऽस्य नाभितः ॥ स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ॥ ४३ ॥ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां वैया
सिक्यां द्वितीयस्कंधे पंचमोऽध्यायः ॥ ५ ॥ उरः ब्रह्मलोकः सनातन इति सत्यलोकविशेषणं ॥ सनातनत्वं च भूराद्यपेक्षया यद्वा ब्रह्मलो
को वैकुंठाख्यलोकः सनातनः न तु सृज्यप्रपंचान्तर्वतीत्यर्थः ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ इदानीं संग्रहेण लोकत्रयकल्पनामाह ॥ भूर्लोकः क
ल्पित इति ॥ पादतलमारभ्य नाभितः भूर्लोकः नाभिमारभ्य मूर्धतः भुवर्लोकः कल्पितः अतलादीनां भूवादिष्वंतर्भावात् ॥ ४३ ॥
इति श्रीभागवते महापुराणे टीकायां द्वितीयस्कंधे पंचमोऽध्यायः ॥ ५ ॥

एवंकृत्स्नप्रपंचस्यमहदादिक्रमेणास्रष्टस्यवैराजविभूतित्वमभिधायतत्रदेवपुरुषस्यतत्संवादेनदृढीकुर्वन्नस्यरूपमित्यादेरुत्तरमाह॥वाचइति॥वाचो
गिंद्रियस्यतदधिष्ठातृदेवताभूताग्नेश्चभगवन्मुखंस्थानमाश्रयःगायत्र्युष्णिग्बृहतीपंक्तिजगतीत्रिष्टुबनुष्टुभांसप्तानांछंदसांसप्तधातवःत्व
गादिसप्तधातुस्थानीयाभगवद्विग्रहावयवाःस्थानं।हव्यंदेवानामन्नं॥कव्यंपितॄणाममृतंतदुभयशेषंमनुष्याणां।एषामन्नानांसर्वस्यम
धुरादेः।षड्विधस्यचकारादरस्यतदाहिरसनेंद्रियस्यतदधिष्ठातुर्वरुणस्यचतस्यजिह्वास्थानं।एवंसर्वत्रानुक्रमुन्नेयम्॥१सर्वासूनामस्मदादि
प्राणानांवायोश्चतस्यनाम्नोनासारंध्रेपरमायनेउत्तमेस्थाने॥औषधीनामश्विनोर्मोदप्रमोदयोश्चतद्घ्राणेंद्रियंस्थानंमोदःअनुकूलवस्तुद

ब्रह्मोवाच॥ वाचोवह्नेर्मुखंक्षेत्रंछंदसांसप्तधातवः॥हव्यकव्यामृतान्नानांजिह्वासर्वरसस्यच॥१॥सर्वासूनांचवायोश्चतन्नासे
परमायने॥अश्विनोरोषधीनांचघ्राणोमोदप्रमोदयोः॥२॥रूपाणांतेजसांचक्षुर्दिवःसूर्यस्यचाक्षिणी॥कर्णौदिशांचतीर्थानां
श्रोत्रमाकाशशब्दयोः॥३॥तद्गात्रंवस्तुसाराणांसौभगस्यचभाजनं॥त्वगस्यस्पर्शवायोश्चसर्वमेधस्यचैवहि॥४॥

र्शनजसुखविशेषः॥प्रमोदस्त्वनुकूलवस्तुनःस्वीयत्वबुद्धिजसुखविशेषइतिभेदः॥२॥रूपाणांशुक्लादीनांतेजसांरूपप्रकाशकानांच
चक्षुःतच्चक्षुरिंद्रियस्थानंदिवःसूर्यस्यचाक्षिणीतन्नेत्रगोलकौस्थानम्।सर्वत्रषष्ठ्यंतनिर्दिष्टानांप्रथमांतनिर्दिष्टंक्षेत्रंद्रष्टव्यं
दिशांतीर्थानांनानत्कर्णौकर्णविलेस्थानमाकाशशब्दयोस्तच्छ्रोत्रं॥३॥वस्तूनांयेसाराःशास्तेषांसौभाग्यस्पृहणीयतायाश्चतद्गात्रंतच्छ
रीरंभाजनंस्थानं॥स्पर्शवायोःसर्वमेधस्यसमस्तयज्ञस्यचास्यत्वक्स्थानम्॥४॥ ॥ ॥ ॥ ॥ ॥

उद्भिज्जजातीनां सर्ववृक्षाणां येवृक्षैर्यज्ञः संभृतः साधितः तेषामेवतत्रोमाणि स्थानं । शिलालोहाभ्रविद्युतामस्य केशश्मश्रुनखानि स्थानं न
खानिशिलालोहस्थानम अभ्रविद्युतौः केशश्मश्रूणीतिविवेकः क्षेमकर्मणां रक्षाकारीणां लोकपालानां इंद्रादीनां तद्बाहवः स्थानम् ॥५॥ भूर्भु
वः स्वरिति षष्ठीबहुवचनांतम । भूरादीनां त्रयाणां लोकानां विक्रमस्यस्य विधपादविन्यासः स्थानम । क्षेमस्य प्राप्तरक्षणस्य शरणस्य चा
निष्ठनिवारणस्य सर्वेषां कामानां वरस्य श्रेष्ठस्यापि हरेश्चरणं पार आस्पदं आश्रयः ॥६॥ अपां वीर्यस्य शुक्रस्य सर्गस्य सृष्टेः पर्ज

रोमाण्युद्भिज्जजातीनां यैर्वा यज्ञस्तु संभृतः ॥ केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युताम् ॥५॥ बाहवो लोकपालानां
प्रायशः क्षेमकर्मणां ॥ विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य च ॥६॥ सर्वकामवरस्यापि हरेश्चरण आस्पदं ॥ अपां
वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः ॥७॥ पुंसः शिश्न उपस्थस्तु प्रजात्यानंदनिर्वृतेः ॥ पायुर्यमस्य मित्रस्य परिमोक्षस्य ना
रद ॥८॥ हिंसाया निर्ऋतेर्मृत्योर्निरयस्य गुदः स्मृतः ॥ पराभूतेरधर्मस्य तमसश्चापि पश्चिमः ॥९॥ नाड्यो नदनदीनां तु गो
त्राणामस्थिसंहतिः ॥ अव्यक्तरससिंधूनां भूतानां निधनस्य च ॥१०॥

न्यस्य प्रजापतेश्च पुंसो भगवतः शिश्न उपस्थेंद्रियाधिष्ठान
मास्पदमित्यर्थः । प्रजात्यानंदः संतानार्थसंभोगस्तेन या निर्वृत्तिस्तापहानिस्तस्यास्तु उपस्थेंद्रियमाश्रयः ॥७॥ यमस्य मित्रस्य परिमोक्षस्य
मलत्यागस्य च तस्य पाय्विंद्रियमाश्रयः ॥८। हिंसादीनां तद्गुदः । आश्रयः पायुरिंद्रियं गुदमधिष्ठानं । पराभूतेरलक्ष्म्याः अधर्मस्य तामसस्या
पि पश्चिमः ॥ तस्य पृष्ठभाग आश्रयः ॥९। नदनदीनां तन्नाड्यः स्थानं गोत्राणां गिरीणां तदस्थिसंघः स्थानं अव्यक्तं प्रधानं रसोन्नादि रसः सिंधु वः समुद्राः तेषां भूतानां निधनस्य लयस्य च तदुदरं स्थानं विदितम् ॥१०॥

मनसः सर्वदेहिमनस्तत्वस्य पुंस ईश्वरस्य यद्धृदयं तत्पदं स्थानं ॥ धर्मस्य मम चतुर्मुखस्य तुभ्यं तव कुमाराणां सनकादीनां भवस्य रुद्रस्य ॥११॥ विज्ञानस्य
चितत्वस्य महतत्वस्य परस्य भगवतः ॥ आत्मांतःकरणं परायणं श्रेष्ठं स्थानं एवं परमात्मनो जातं कृत्स्नं जगत् तद्विभूतिभूतं न च्छरीरत्वेन ततो न र
विविक्तमित्युक्तं एतदेव पुरुषसूक्तार्थकथनेन प्रपंचयति । तत्र सहस्रशीर्षेत्यर्द्धर्चस्य ब्राह्मणोऽस्य मुखमासीदित्यादेश्चार्थः पूर्वाध्याये कथितः
पुरुष एवेदं सर्वमित्यस्यार्थमाह । अहमित्यादिभिः सार्द्धैस्त्रिभिः अहं चतुर्मुखः भवान्नारदः भवो रुद्रः अग्रजाः मुनयः सनकादयः ॥१२॥१३

उदरं विदितं पुंसो हृदयं मनसः पदं । धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च ॥११॥ विज्ञानस्य च सत्वस्य परस्यात्मा परायणम् ॥
अहं भवान् भवश्चैव य इमे मुनयोऽग्रजाः ॥१२॥ सुरासुरनरा नागाः खगा मृगसरीसृपाः ॥ गंधर्वाप्सरसो यक्षा रक्षोभूतगणोर
गाः ॥१३॥ पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः ॥ अन्ये च विविधा जीवा जलस्थलनभौकसः ॥१४॥ ग्रहर्क्षकेतवस्ता
रास्तडितस्तनयित्नवः । सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत् ॥१५॥

विद्याध्रा विद्याधराः जलं स्थलं नभश्चौकांसि स्थानानि येषां
ते जलस्थलनभौकसः इति संधिरार्षः ॥१४॥ ग्रहाः सूर्यादयः ऋक्षाणि नक्षत्राणि तारा अपि नक्षत्रस्यैव भिन्ना तडितः विद्युतः स्तनयित्नवो मे
घाः ॥ गर्जितानि वा किं बहुनायं च कालत्रयवर्ति कृत्स्नं वस्तुजातं शरीरकत्वाद् पुरुषशरीरभूतं स्वतंत्रं वस्तु नास्तीत्यर्थः ॥ नामरूपविभागानर्हा
निरस्य प्रकृतिपुरुषकालशरीरकस्य परमपुरुषस्यैव विभक्तनामरूपप्रकृतिपुरुषशरीरकपरमात्मात्मकजगदाकारेणावस्थानादि
यमैक्योपदेशः उपपन्नः सर्वत्र वेदांतेष्वेवमेव ह्येकं सर्वं खल्विदं ब्रह्म अयमात्मा ब्रह्म तत्त्वमसीत्यादिभिरुपदिश्यते ॥१५॥ ॥

भा॰द्वि॰टी॰ पुरुषएवेदमितिसामानाधिकरण्यस्यव्याप्तिनिबंधनत्वमाह। तेनेति॥ अयोनिष्ठावितस्त्यंतेनाभ्यामुपरितिष्ठति। हृदयंतद्विजानीयाद्विश्वस्यायतनंम
॥३२॥ हदितिश्रुत्युक्तदिशानाभ्याउपरिवितस्तिपरिछिन्नप्रदेशांतेस्थितं। हृदयमधितिष्ठतातेनपरमात्मनेदंविश्वमावृतंव्याप्तं। असौहृदयांतर्वर्त्तीप्रा
णःपरमात्मास्वधिष्ण्यंस्वावासस्थानंशरीरंप्रतपनंतर्व्याप्ताप्रशासनाधीनंकुर्वन्वहिश्चस्वधिष्ण्याद्वहिरपिवस्तुजातंप्रशासनाधीनंयु
थाकरोति॥१६॥ एवंविराजंविराट्शब्दवाच्यानिरुद्धकार्यंप्रपंचंप्रशासनाधीनंकुर्वन्नंतर्वहिश्चप्रशासनाधीनंकरोतीत्यर्थः॥ अत्रकार्येकार
णोपचारादिराट्शब्दःब्रह्मांडपरः। एतेनापरिछिन्नत्वप्रतिपादकंसभूमिंविश्वतोवृत्वेत्यर्द्धंचव्याख्यातंभवति। सपरमात्माभूमिंब्रह्मांडरूपं

तेनेदमावृतंविश्वंवितस्तिमधितिष्ठति। स्वधिष्ण्यंप्रतपन्प्राणोवहिश्चप्रतपत्यसौ॥१६॥
एवंविराजंप्रतपंतर्वहिःपुमान्। सोमृतस्याभयस्येशोमर्त्यमन्नंयदत्यगात्॥१७॥

प्रपंचंविश्वतःसर्वतःकृत्वाव्याप्यभूमिंदशांगुलमात्रमतिक्रम्यस्थितः। अत्यतिष्ठद्दशांगुलमित्याधिक्यमात्रंविवक्षितंनप्रमाणं॥ अनुपयोगादपरिछिन्न
त्वाच्चेतितस्यार्थः। जीवांतरात्मत्वेनवसतोपिपरस्यात्मोकृत्वंमोक्षप्रदत्वंचप्रतिपादयत्। उतामृतत्वस्येशानइत्यस्यार्थमाह॥ सइति॥ नविद्यतेभयंयस्मात
स्यामृतस्यमोक्षस्येशःप्रदातायस्मात्मर्त्यमन्नंभोग्यंकर्मफलमत्यगादतिक्रम्यस्थितः॥ अनश्नन्नन्योअभिचाकशीतिश्रुत्युक्तरीत्य
ाऽसंभावितकर्मफलसंबंधत्वात्परमात्मामोक्षदइत्यर्थः। श्रुतावन्नेनेतिव्यत्ययेनद्वितीयार्थेतृतीया॥१७॥ ॥ ॥ ॥ ॥ ॥३२॥

शरीरं न समवस्थितिर्जीवं वैलक्षण्यं चानुपपन्नमित्याशंकायां एतावानस्य महिमेत्यस्यार्थमाह ॥ महिमेति ॥ पुरुषस्य कृत्स्नचिदचिदात्मकप्रपंचांतर्बहिर्व्या
प्य सर्वं स्वप्रशासनाधीनं कुर्वतः परमात्मन एष महिमा अमृतस्येशानरूपमहिमा दुरत्ययः ॥ अपारः कृत्स्नप्रपंचात्मकत्वेनावस्थितस्यापि प्रपं
चगतदोषासंस्पर्शित्वमघृतेशित्वं चैतेनदनुपपद्यमानमपि तस्य महिम्ना उपपद्यते इत्यभिप्रायः ॥ अपारमहिमत्वमेव प्रतिपादयति ॥ पादोस्य वि
श्वा भूतानीति वाक्यस्यार्थमाह ॥ पादेष्विति ॥ निरस्तत्रेति स्थितयो भूरादयो लोकास्ते पादा इव पादाः अंशा यस्य समस्थितिपादस्तस्य पादेष्वंशभूतेषु र
लोकेषु सर्वभूतानि देवादि चतुर्विधभूतानि विदुः ॥ एतेन मंत्रेपि पादोस्य विश्वा भूतानीति सामानाधिकरण्यमधिष्ठानाधिष्ठेययोरभेदविवक्ष
या पाद इत्येकवचनं च सामान्याभिप्रायेणेति व्याख्यातं भवति ॥ १८ ॥ बद्धमुक्तयोरसांकर्येण प्राप्यस्थानानां तद्भिन्नतित्वप्रतिपादकस्य त्रिपाद

महिमैष ततो ब्रह्मन्पुरुषस्य दुरत्ययः ॥ पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः ॥ १८ ॥
अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्द्धसु ॥ पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः ॥ १९ ॥

दस्यामृतं दिवीत्यादेरर्थमाह ॥ अमृतमिति ॥ असौ स्वरस्य संबंधि त्रिपात्रिविधममृतमस्त्यमुष्य दिवि प्रकृतिमंडलाद्बहिरिति श्रुत्यर्थः ॥ अत्र
त्रिपात्त्वोक्तत्रिविधत्वं दर्शयन्नाह ॥ अमृतं मरणादिविकारराहित्यमभयं तत्कार्यभयराहित्यं क्षेममिष्टप्राप्तिरूपरक्षणमिति प्रायानंदरूपमा
यामिति अर्थः अपहतपाप्मत्वादिगुणाष्टकाविर्भावरूपमुक्तैश्वर्यकोटित्रयेण संगृहीतं अमृतमिति विजरविमृत्युप्रादार्थ उक्तः क्षेममिति स
त्यकामत्वाद्यनुवृत्तिरुक्ता अभयमित्यपहतविशोकादिपदार्थ उक्तः पाप्मा हि भयहेतुः अभयमिति शोकादिसर्वदुःखप्रदर्शनं ॥ एवं त्रिमू
र्ध्नि त्रिविधं मुक्तैश्वर्यमदृहित्वं परिशिष्टादिमर्थः ॥ तमसः परस्तादिति वल्लीलाविभूतेः परस्तादमृतं क्षेममभयं चाधायि निहितमित्यर्थः ॥ मू

भा.द्वि.टी. ईक्षितिपादेउपरिशब्दवैमानेषुत्रिषुपादेष्वित्यर्थः॥ तदेभ्योमुक्तानांजीवानांबहुत्वेनतत्प्राप्यस्थानानंत्यंउभयोस्तद्भिन्नत्वंबद्धानामात्मीयत्वंयत्प्राप्यस्थानंत
स्यापितद्भिन्नत्वंचप्रतिपादयंस्त्रिपादूर्ध्वमित्यादेरर्थमाह॥ पादाइति। त्रयःपादायस्यसत्रिपात्पुरुषः। ऊर्ध्वंप्रकृतिप्राकृतेभ्यउपरिष्टादुदैदुदयंगतः
॥३३॥ त्रिलोकोपान्तदिव्यमंगलविग्रहःसमस्तनित्यमुक्तभोग्यआस्तइत्यर्थः॥ अत्रपादशब्दःपादवदंशत्वेनावस्थितमुक्तानांतत्प्राप्यस्थानस्यभोगानाहएवं
चत्रयःपादाःमुक्तजीववर्गस्यतत्प्राप्यस्थानस्यचभागाविभक्तित्वेनयस्यचभागादिभक्तित्वेनयस्यसत्रिपाद्बद्धजीवतत्स्थानानांत्रिभागत्वकथनं
अनंतत्वतात्पर्यकम्॥ अस्यपरमपुरुषस्यपादःविभूतिभूतएकोभागः॥ इहप्रकृतिमंडलेऽभवद्बद्धाःतत्प्राप्यस्थानानिचैकांशेनस्थितोजगत
स्यायुतायुतांशेनैककलांशांशोविश्वंविचित्रंचिदचिन्मिश्रंविभागवृत्तमित्युक्तप्रकारेणतद्भिन्नमेकदेशइतिस्फुटमर्थः॥ एतदेवव्याचष्टेपादाइति

अन्तस्त्रिलोक्यास्त्वपरोगृहमेधोऽबृहद्व्रतः॥ सृतीविचक्रमेविष्वङ्साशनानशनेउभे॥ पदविद्याचविद्याचपुरुषस्तुभ
याश्रयः॥२०॥

त्रयःपादास्तुबहिःप्रकृतिप्राकृतेभ्योबहिरासन् येतस्यपादास्तेऽप्रजानांजन्मरहितानांमुक्तानामाश्रमाःप्राप्यइत्यर्थः॥१९॥ ए
कस्यबहिष्ठत्वमाह॥ अन्तइति॥ अपरःसांसारिकत्रैवर्णिकवर्गप्राप्यस्थानरूपःपादःबृहद्व्रतःकर्मवश्यःउपचारात्प्राप्यप्राप्तृधर्मव्यपदेशःएवम
परमहिमत्वमुपपाद्यप्रसंगाद्बुभुक्षूणांचभगवल्लीलाविभूतित्रिपाद्विभूतिगतिहेतुमार्गद्वयप्रतिपादकंततोविष्वङ्ङितिवाक्यंव्याचष्टेसृती
तिविविधंसुष्ठुअंचतीतिविष्वङ्ततःसृतीधूमाद्यर्चिरादिमार्गौविचक्रमेआक्रमदाक्रांतवानित्यर्थः। कथंभूतेसृतीसाशनानशनेअशनंभोगः
भोगार्थंतत्सद्भावाभ्यांमार्गयोःसाशनानशनत्वे॥ साशनानशनलक्षणमार्गद्वयप्राप्त्युपायमाहयदितियद्यत्रविद्यामार्गद्वयमध्येअविद्याकर्म
संज्ञान्यमाद्युक्तेःकर्मरूपाविद्याधूमादिमार्गप्राप्त्युपायभूताएकाविद्याधर्मादिमार्गप्राप्त्युपायभूताएकाविद्या॥ अर्चिरादिप्राप्त्युपायभूताप ॥३३॥

रमात्मोपासनरूपाऽपरा पुरुषो जीवस्तूभयाश्रयः साधनद्वयनिष्ठः तं विद्याकर्मणी समन्वारभेते इति श्रुतेः समन्वारभेते संगते इत्यर्थः ॥२०॥ एवं मुमुक्षु
मुमुक्ष्वधिकारिभेदेन ज्ञानत्वमार्गद्वयं तदुपायं चोक्त्वाथ भगवतः स्वविभूतिभूतप्रपंचाकारेण परिमाणं तत्रत्यदोषासंस्पर्शित्वं च प्रतिपादयं
तस्माद्विराडजायतेत्यादिवाक्यं व्याचष्टे यस्मादिति विराडंडकारणभूतो विराट्पुरुषो निरुद्धः अंडादिति ल्यब्लोपे पंचमी यस्मात्स्वशरीर
भूतात्प्रधानाद्यदंडं सृष्ट्यात्स्वयमपि भूतेंद्रियगुणात्मकः देवादिव्यष्टिप्रपंचरूपो जज्ञे । तदंडरूपं द्रव्यमत्यगात्तत्रापरिच्छिन्नः वहिरमपिर
व्याप्तवानित्यर्थः ॥ तत्र दृष्टांतः आश्रयाद्घटपटादिपदार्थजातात्स्वोभिः किरणैरादित्य इवात्यगात् । वेदांतेषु सत्कार्यवादस्याभिहितत्वात्कारण
भूतो विराडेव व्यष्टिरूपेण जज्ञे सूक्ष्मचिदचिच्छरीरको भगवानेव स्थूलचिदचिच्छरीरको जातः जातत्वं स्वस्वशरीरभूतचेतनाचेतनग

यस्मादंडं विराड् जज्ञे भूतेंद्रियगुणात्मकः ॥ तद्द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन् ॥२१॥

तद्दोषैरस्पृष्टः स्वकार्यभूतं कृत्स्नप्रपंचमंतर्बहिश्च व्याप्यास्थित इत्यर्थः ॥ नामरूपविभागानर्हसूक्ष्मप्रकृतिपुरुषशरीरकस्य परमपुरुषस्य
जगदुपादानत्वमवस्थाश्रयत्वरूपत्वात्प्रकृतिपुरुषेश्वराणां त्रयाणामप्यवस्थाश्रयत्वमस्त्येव ॥ तत्राचेतनस्यावस्थाश्रयत्वं स्वरूपान्य
थाभावरूपं चेतनस्य तु स्वभावान्यथाभावरूपं ईश्वरस्य तु कार्यावस्थचेतनाचेतननियंतृत्वरूपं न हि कारणावस्थचेतनाचेतननियमनाम
भिन्नमिति वक्तुं शक्यं किं चेश्वरस्य सप्रकारकावस्थाश्रयत्वमस्त्येव एवमसांकर्येणावस्थानां प्रतिपन्नत्वाच्छुक्लनीलादिमत्त्वादयः पटैव्योक्त्यादे
हत्वान्तरे गतत्वचेतनगता धर्मा अन्तवपरिणामित्वादयस्तत्रैवावतिष्ठंते न परमात्मानं स्पृशंति परमात्मा तु स्वयं निरस्तनिखिलदोषोऽनवधि
कातिशयासंख्येयकल्याणगुणगणः स्वशरीरभूतचेतनाचेतनगतस्वपर्यंतनामरूपनिवहिकः कारणावस्थकार्यावस्थचेतनाचेतनशरीरकत्वे

भा.टि.टी.

॥२४॥

नवद्वाचिभिःशब्दैरभिधीयमानःसर्ववस्तुसमानाधिकृतोवतिष्ठतइत्ययंमंत्रसंग्रहः॥अमर्थस्तुतस्मात्परमप्रस्तुतकारणपुरुषाद्विराडनिरुद्धो
जज्ञेऽवतीर्णःविराजोऽनिरुद्धाद्वैराजोब्रह्मांडशरीरकःपुरुषोजज्ञेजातश्चसवैराज्ञःभूमिविश्वंपश्चादुपरिष्टादधःअंतश्चात्यरिच्यततदि
त्त्वणोआप्तवानित्यर्थः॥२१॥नन्वेवंपुरुषएवचेत्सर्वंतर्हियज्ञस्यतत्साधनानांचापृथग्भावाद्यज्ञैःपुरुषाराधनंनसिद्धेदित्याशंक्यतत्सुरिह
रायपत्पुरुषेत्यादिमंत्रार्थसंग्रहंदर्शयतियदेति।महात्मनः॥अस्यविराडरूपान्निरुद्धस्यनाभौभवंनाभ्यंतथाभूतान्नलिनात्कमलादहंचतु
र्मुखःयदाआसमभुवंतदापुरुषावयवाद्विनायज्ञसंभारानन्यानियज्ञसाधनानिनाविदंनापश्यम्॥२१॥तेषुपुरुषावयवेषुयज्ञस्यसाधना

यदास्यनाभ्यान्नलिनादहमासंमहात्मनः॥नाविदंयज्ञसंभारान्पुरुषावयवादृते॥२१॥तेषुयज्ञस्यपशवःसवनस्पतयः
कुशाः॥इदंचदेवयजनंकालश्चोरुगुणान्वितः॥२२॥वस्तून्योषधयःस्नेहारसलोहमृदोजलं॥ऋचोयजूंषिसामानि
चातुर्होत्रंचसत्तम॥२३॥नामधेयानिमंत्राश्चदक्षिणाश्चव्रतानिच॥देवतानुक्रमःकल्पःसंकल्पस्तंत्रमेवच॥२४॥

न्यासमन्वितिविशेषः।तान्याहपशवइति॥वनस्पतयोयूपादयः।देवयजनंदेवाइज्यंतेस्मिन्नितिदेवयजनंयागभूमिः।इदंचेतिवचनाद्यज्ञार्हस्थानेउप
विष्टःकथयतीतिगम्यते॥बहुगुणान्वितःकालोवसंतादिः॥२२॥वस्तूनिपुरोडाशादीनितदर्थाओषधयःव्रीह्यादयःस्नेहआज्यादिःरसःसोमादि
रसःलोहःसुवर्णादिःकपालादीनि॥चातुर्होत्रंचतुर्होतृप्राद्वाच्यमेवंप्रकाश्यंकर्महेसत्तमसतांश्रेष्ठ॥२३॥नामधेयानिज्योतिःष्टोमादीनिक्र
गादीनामृक्त्वान्मंत्राः।स्वाहाकारादयः।व्रतंपयोभक्षणादिकं।देवतानुक्रमःदेवतानामनुक्रमःउद्देशः।यद्वा।देवेतिपृथक्पदं।साचअनुक्र ॥३४॥
मःअनुपाठःआनुपूर्वीवा।कल्पःप्रयोगविधिः।संकल्पःकर्तव्यावसायः।तंत्रंक्रियाकलापः॥२४॥

नतयोविसृष्टमाद्याः मनवः देवताध्यानानि ॥ स्वाकर्तृत्वविषयात्वरा ॥ प्रायश्चित्तं वैकल्यसमाधानं समर्पणं देवतां प्रति हविषोर्पणम् ॥ मयापुरुषावयवैः
संभारा यज्ञसाधनानि संभृताः संपादितानि ॥ २४ ॥ इत्थं संभृताः संपादिताः संभारा येन सोहं तमेव पुरुषं नियंतारं यज्ञं विष्णुं तेनैव यज्ञेनैवायजं ईश्वरान् र
स्मि ॥ अनेन यज्ञेन यज्ञमयजंतेतिमंत्रार्थ उक्तः ॥ २६ ॥ तेन देवा अयजंतेत्यस्यार्थं सप्रपंचं दर्शयति ॥ ततइति ॥ ब्राह्मणोततवभ्रातरः मरीच्यादयो नव प्र
जापतयस्सुसमाहितचित्ताः व्यक्तं इंद्रादिरूपेणाव्यक्तं स्वतः पुरुषं परमपुरुषं यमयजन्निष्टवंतः ॥ २७ ॥ ततइति ॥ कालेस्वे स्वे कालेऽवसरे मन्वाद
यः क्रतुभिर्विभुं विष्णुं ईजिरे इत्यर्थः ॥ २८ ॥ एवं यद्रूपमिमादि प्रश्नानां पुरुषसूक्तसंवादेनोत्तराण्यभिधाय यदधिष्ठानमिति तत्प्रश्नोत्तरार्थमुपसंहर
न्नतयोप्रतयश्चैव प्रायश्चित्तं समर्पणं ॥ पुरुषावयवैरेतैः संभारास्संभृता मया ॥ २४ ॥ इति संभृतसंभारः पुरुषावयवैरहं
॥ तमेव पुरुषं यज्ञं तेनैवायजमीश्वरम् ॥ २५ ॥ ततस्ते भ्रातर इमे प्रजानांपतयो नव ॥ अयजन्व्यक्तमव्यक्तं पुरुषं सुसमार
हिताः ॥ २६ ॥ ततश्च मनवः काले ईजिरे ऋषयोऽपरे ॥ पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुम् ॥ २७ ॥ नारायणे भगवति
तदिदं विश्वमाहितम् ॥ गृहीतमायोरुगुणः सर्गादावगुणः स्वतः ॥ २८ ॥ ति ॥ नारायणइति ॥ आहितमवस्थितं एवं स्वस्मिन्नेव सू
क्ष्मरूपेणावस्थितं विश्वं स्वशरीरभूतेनेन मयासृजति रुद्ररूपेण हरति पुरुषरूपेणानुपातिसुपसंहरति ॥ गृहीतेत्यादि ॥ स्वत अगुणः सत्वादिगुणर
हितः प्रथमगात्मस्वरूपे हि स्वतः सत्वादिरहितमगुणोप्यहं गृहीतामायया उरवो गुणाः ॥ येन तथाभूतः सर्गादौ तन्नियुक्तानन्नियोजसऽसन्स्रजामिह
रोरुद्रः ॥ तद्वशः ॥ तदधीनः ॥ विश्वं हरति पुरुषरूपेण स्वावताररूपेण पाति ॥ अत्र तन्नियुक्तस्तद्वश इत्यनेन ब्रह्मरुद्रयोर्नियाम्यत्वं प्रतीतिः पुरुषरूप
णोस्वनतद्प्रतीतेश्च सर्वसंहारे ब्रह्मरुद्राख्यजीवांतर्यामितेन करोति पालनं तु स्वयमेव करोतीति वेदितव्यं अतस्त्रिशक्तिधृक्सृष्टिस्थितिसं

भा॰द्वि॰टी॰

॥३५॥

३०। यद्रूपमिमादिप्रश्नानां यदात्मकत्वमादिप्रश्नानां च सामान्येनोत्तरं यदुक्तं वासुदेवात्परो ब्रह्मन्नन्यो वार्थोऽस्ति तत्त्वत इति पुरुषएवेदं सर्वमिति श्रुत्याद्वत
इदं तीर्थं तेनोपसंहरति ॥ इतीति ॥ हे तात इदं विश्वं प्रति यथा अनुपृच्छसि विश्वविषयप्रश्नं करोषि तस्य प्रश्नस्योत्तरं चेतनाचेतनात्मकं कृत्स्नं जगत् किंचि
दपि भगवतः ॥ अन्यन्न भवतीति न भाव्यं नानुसंधेयमिति ते तुभ्यमभिहितं कथितमित्यर्थः ॥३१॥ यदुक्तमेतावत्त्वं यतो हि मेत मविज्ञाय मा मीश्वरं प्रब्रवी
षीति तदुपपादयितुमुपसंहरति ॥ न भारतीति ॥ मे भारती वाङ्मृषा मिथ्या न दृश्यते ॥ मे मनसो गतिः वृत्तिः न मृषा हृषीकाणि इंद्रियाणि । असत्पथे सदि
षये न पतंति न प्रवर्त्तंते यस्मान्मया औत्कंठ्यं आशानदुता हृदयेन हरिर्धृतः ध्यातः अंग हे नारद अतो मे वाङ्मनइंद्रियाणां वृत्तयः सत्यार्थाः न तु मर

सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः ॥ विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥३०॥ इति तेऽभिहितं तात यथेदमनुपृ
च्छसि ॥ नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकम् ॥३१॥ न भारती मेऽङ्ग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः ॥ न
मे हृषीकाणि पतंत्यसत्पथे यन्मे हृदौत्कंठ्यवता धृतो हरिः ॥३२॥ सोऽहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवंदितः
पतिः ॥ आस्थाय योगं निपुणं समाहितस्तं नाध्यगच्छं यत आत्मसंभवः ॥३३॥ त्वभावेनेत्यर्थः ॥३२॥ अतो ममापि ज्ञानप्रद्योमहद्विं(

तत्स्वरूपस्वभावः सर्वेश्वरो मत्तोऽन्योऽस्तीत्याह ॥ सोऽहमिति ॥ समाम्नायमयः समाम्नायप्रचुरः तपोमयः तपःप्रचुरः विद्यातपोभ्यां सर्वोत्कृष्ट इत्यर्थः
प्रजापतीनां मरीच्यादीनामभिवंदितः तैर्नमस्कृतस्तेषां पतिश्चात्मनः परमात्मनः संभव उत्पत्तिः तत्कृपालब्धज्ञानसंपन्नोऽहं समाहितः । सन्निपुणं नि
र्विघ्नं योगं समास्थाय यः स्वमायया विभवं स्वयं गतस्तं परमात्मानं नाध्यगच्छं स्वरूपतो गुणतश्चैतावानिति न ज्ञातवान् ॥३३॥ ॥ ॥ ॥

॥३५॥

अनंतस्य त्वचरणं प्रति केवलं नतोस्मि कथंभूतं चरणं समीयुषां शरणागतानां भवच्छिदं संसृतिनिवर्त्तकं स्वस्त्ययनं मंगलानामाश्रयं सुमंगलं सुसेव्यम्
अनवगमे दृष्टांतः । यथेति ॥ होघास्य ग्रीय द्रुग्रीह रणापचनमः स्वदृष्टांतः दुःस्पर्शः पाणिना वायुरिति महाभारतोक्तेः स्वमायाविभवं स्वयं गत न इत्यने
नयवतिकां गत इति वदस्मात् ॥ पल्लभ्मत्वमुक्तं तनुर्मया वश्यपत्वम् ॥ आत्ममायाविभवेनात्मानुपलभ्मत्वं गत इत्यर्थः । एवंविधपरमात्मानमुक्त्वा विधो
प्यहमेव नाध्यगच्छमन्ये नाधिगच्छंतीति किमु वक्तव्यमित्याह ॥ अथेति ॥ अपरे जीवाः कुतो हेतोर्विदुरित्यर्थः ॥ ३५ ॥ एतदेवोपपादयति । नेति । यूयमि
ति ॥ सनकाद्यभिप्रायेण बहुवचननिर्देशः ॥ वामदेवो नाम कश्चिद्दृषिः शंकरो वा न चाहं न च शंकरश्च जानंतीति श्रीवैस्णवीय चतुर्मुखवाक्यान

नतोस्म्यहं तत्त्वचरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमंगलं ॥ यो ह्यात्ममायाविभवं स्व पर्यगाद्यथा नभः स्वांतमथापरे
कुतः ॥ ३५ ॥ नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुतापरे सुराः ॥ तन्मायया मोहितबुद्धियस्त्विदं विनिर्मितं स्वात्म
समं विचक्ष्महे ॥ ३६ ॥ यस्यावतारकर्माणि गायंति ह्यस्मदादयः ॥ न यं विदंति तत्त्वेन तस्मै भगवते नमः ॥ ३७ ॥

गतं ॥ यदृतां यस्य परमात्मन ऋतां सम्यां गतिं स्वरूपं यथा यावस्थितिम् ॥ तत्त्वफ्रतिं इति पाठांतरं ॥ अस्मदादयो न विदुः कैमुत्यन्यायेनाह किमुतेति । कुतो न
विदुरित्यत आह ॥ तन्माययेति ॥ तस्य भगवतो मायया ॥ दैवी ह्येषा गुणमयीत्युक्तविधमायया मोहिता बुद्धिर्येषां ते । तन्मायामोहितबुद्धित्वादेतेन विदुरित्य
र्थः ॥ तर्हि किं विदुरित्यत आह तेनैव विनिर्मितमिदमचेतनं शरीरं ॥ स्वात्मसममात्मानं देहाकारं मन्यामह इत्यर्थः । देहात्मविभागमप्यजानतां कथंप
रमात्मावेदनमिति भावः ॥ ३६ ॥ तर्हि मायातरणोपाय इत्यत आह ॥ यस्य भगवतोऽवताराणां कर्माणि चेष्टितान्यस्मदादयश्चतुर्मुखादयो गायंति
यं तत्त्वेन याथात्म्येन न विंदंति न जानंति किं तु तस्मै भगवते नमस्कुर्वंति ॥ तस्य गुणकर्मानुकीर्त्तनमेव मायातरणोपाय इत्यभिप्राय ॥ ३७ ॥

के॰वतारः कानिचेष्टितानि च यदनुकीर्तनेनमायांतरंतीत्याशंकायांभवतारांस्तत्कर्माणि च वक्ष्यन्नद्रूपमित्यादिप्रश्नानांउत्तराण्युपसंहरति । सएषइति ।
अजःकर्माधीनजन्मरहितः । सएष आद्यःकारणभूतःपरमपुरुषःकल्पेकल्पेप्रतिकल्पमात्मन्येवाधारे आत्मनापरमात्मभूतेनात्मानंउपादानमात्मै
वकर्तासृजतिसंयच्छतिसंहरतिपातिच ॥ ३७ ॥ ननुयंजगद्व्यापारोभगवतःकिंकर्माधीनइत्याशंक्यनेत्याह ॥ विष्णुद्वमिति ॥ पुण्यपापद्रूपकर्मरहितमतो
नजगद्व्यापारःकर्माधीनइत्यर्थः ॥ एवंचकर्माधीनव्यापारजीवस्वरूपाद्वैलक्षण्यमुक्तंभवति जीवविलक्षणंचेत्तर्हिंजडमित्यतआह ॥ केवलं
ज्ञानंक्वचिदप्यजडमित्यर्थः । तर्हिंकिंघटपटाद्याकारवृत्तिज्ञानमित्यतआह प्रत्यक्स्वस्मैभासमानंननुजीवोप्येवंरूपोऽतआह ॥ सम्यगवस्थि

तमाप आद्यः पुरुषः कल्पेकल्पेसृजत्यजः ॥ आत्मात्मन्यात्मनात्मानंसंयच्छतिचपातिच ॥ ३८ ॥ विष्णुद्वंकेवलंज्ञानंप्रत्यक्
सम्यगवस्थितम् । सत्यंपूर्णमनाद्यंतंनिर्गुणंनित्यमव्ययम् ॥ ३९ ॥ ऋषेविंदंतिमुनयःप्रशांतात्मेंद्रियाशयाः ॥ यदा
नरैवासतर्कैस्तिरोधीयेतविप्लुतम् ॥ ४० ॥
तं अर्थांतरानपेक्षस्थितंजीवस्तुपरमात्मधर्मइत्यभिप्रायः ॥ अस्मानपिचेतनाचेतनविलक्षण
णाकारानाह । सत्यंस्वरूपतोधर्मतश्चनिर्विकारमनेनस्वरूपतोविकार्यचेतनद्रव्यंस्वभावतोविकारीचेतनश्चव्यावृत्तः ॥ पूर्णमव्याप्तसमस्तका
लंनिर्गुणंसत्वादिगुणरहितमनाद्यंतंउत्पत्तिनाशरहितमतएवानित्यंकालाद्यवच्छिन्नंअव्ययसमाभ्यधिकरहितम् । एतेयथासंभवंचेतनाचेतनम
व्यावर्तकत्वेनानुसंधेयाः ॥ ३९ ॥ अत्रविद्वदनुभवंप्रमाणयति ॥ ऋषइति हे ऋषेनारदआत्मात्मंतःकरणमाशयोवासनाप्रशांताआत्मेंद्रिया
शयायेषांतेकवयः ॥ उक्तविधपरमात्मस्वरूपंजानंति । कवयःसमीचीनतर्कैर्विविच्यतत्स्वरूपंचेतनाचेतनविलक्षणंशोधयंतिकुतर्कैर्दुर्ज्ञेयत्व
माह ॥ असतर्कैरसतामेवतर्कैर्वाहेतुवादैर्यथाविप्लुतंउपद्रुतंस्यात्तदातिरोधीयतेत्यर्थः ॥ ४० ॥

अथावतारांस्तत्कर्माणि च विवक्षुरादिमवतारमाह ॥ आद्य इति ॥ पुरुषः विराट् पुरुषः परस्य विष्णोरवतार इत्यर्थः ॥ आद्यत्वं मात्स्यकौर्माद्यपेक्षया ॥ अस्य
विभूतीराह कालादयो हि भिः कालादयः रूपवतः स्वरूपमित्युत्तरेणान्वयः रूपवत अकर्मकृतनरूपस्य स्वरूपं स्वीयं रूपं शरीरं कालादयस्तन्नियामव
णं रूपविभूतिरिति पर्यन्तं तं कालादीनां परं या यात्म्यमित्यर्थः ॥ स्वभावः प्रकृतिगतपरिणामस्वभावः सदसच्चेतनमचेतनं स्थूलसूक्ष्मं वा ॥ द्रव्यं पृथिव्याद
दिः विकारो महदहंकारादिः गुणाः सत्वादि ॥ इंद्रियाणि ज्ञानकर्मात्मकानि विराडंतरिक्षं स्वराट् स्वर्गः ॥ अयं लोको वै सम्राडंतरिक्षं विराट् स्व
तं ॥ स्वराडसौ स्वेतो लोक इत्युक्तेः ॥ स्थास्नु स्थावरं चरिष्णु जंगमम् ॥ भूम्नः भूमवतो भगवतः ॥ ४२ ॥ किंच बहुना संक्षेपेणाप्यशक्यमित्याह ॥ अहमिति

अद्योवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च ॥ द्रव्यं विकारो गुण इंद्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्न
४२ ॥ अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च ॥ भूर्लोकपाला भुवर्लोकपालाः स्वर्लोकपालास्तललोकपालाः ॥ ४२ ॥

अहं ब्रह्मा भवो रुद्रः यज्ञो विष्णुः यद्यप्यर्थविभूतिमध्ये पठितः ॥ तथापि न विभूतिरर्थांतराभावात् ॥ पालनाधिकृतविष्ण्ववतारगतपाल
नानुगुणां यत्सामर्थ्यं तस्य विभूतित्वद्योतनाय यज्ञोपि विभूतिषु पठितः ॥ विभूतित्वं नाम नियामकत्वं सर्वभूतानां प्रवर्तनरूपं नियमनमा
त्मतयावस्थानात् ॥ आत्मा हि नाम शरीरस्य सर्वात्मना धारणे नियंता शेषी च भगवतः ॥ स्वविभूतिभूतेषु सर्वेष्वात्मतयावस्थानमेव क्वचि
त्तत्तच्छब्दसामानाधिकरण्यनिर्देशहेतुः भगवत आत्मतयावस्थिते हि सर्वे शब्दाः तस्मिन्नेव पर्यवस्यंति ॥ यथा देवमनुष्यपक्षिवृक्षादयः
शब्दाः शरीराणि प्रतिपादयंतस्तदात्मनि पर्यवस्यंति ॥ दक्षादयो ये इमे प्रजेशाः भवदादयो नारदप्रभृतयः सनकादयः लोकपालाः पक्षिश्रे

भा॰टि॰टी॰ गंधर्वादीनामीशमउरगाः सर्पाः नागाः गजाः यक्षादीनां येनाथाः रक्षोरगेति संधिरार्षः ॥ ऋषीणां पितॄणां ये श्रेष्ठाः दैत्यादितिपुत्राः तेषां इंद्राः ॥ ४३ ॥ अन्ये च ये र
॥ ३७ ॥ प्रेतादीनामधीशाः ॥ ४४ ॥ किं बहुनायदिति ॥ यत्किंचिद्भगवद्दादित्तत्सर्वं रूपंवतः स्वरूपमित्यन्वयः । भगावद्वैश्वर्यवन्महस्वत्तेजस्वदोजस्वदुत्साहवत्स
हस्वद्वेगवद्धैर्यवद्बलवत ॥ धारणसामर्थ्यवत ॥ क्षमावत्सहनवत ॥ श्रीः शोभाह्रीर्लज्जाविभूतिर्नियाम्यवर्गः ॥ आत्मा बुद्धिस्तद्युक्तं अद्भुताणिमद्भुत
शादवा चंगतत्सर्वं रूपवतः ॥ प्रशंसायामनुप् अकुमंक्रतः स्वेच्छोपात्तदिव्यमंगलास्पदविग्रहस्यभगवतो विराट्पुरुषस्यस्वीया विभूतिरित्यर्थः ।

गंधर्वविद्याधरचारणेशाये यक्षरक्षोरगनागनाथाः ॥ देवा ऋषीणामृषभाः पितॄणां दैत्येंद्रसिद्धेश्वरदानवेंद्राः ॥ ४३ ॥ अन्ये
च ये प्रेतपिशाचभूतकूष्मांडयादोमृगपक्ष्यधीशाः ॥ ४४ ॥ यत्किंचिल्लोके भगवन्महस्वदोजःसहस्वद्बलवत्क्षमावत ॥ श्री
ह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परंरूपवतः स्वरूपम् ॥ ४५ ॥ प्राधान्यतो यानृष आमनंति लीलावतारान्पुरुषस्य भूम्नः ॥
आपीयतां कर्णकषायशोषाननुक्रमिष्ये त इमान्सुपेशान् ॥ ४६ ॥ इति श्रीभागवते द्वितीयस्कंधे षष्ठोध्यायः ॥ ६ ॥ ब्रह्मोवाच
॥ यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्क्रौडीं तनुं सकलयज्ञमयीमनंतः ॥ अंतर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्र
धरो ददार ॥ १ ॥

४५ ॥ अवतारगणमानंत्यात्तत्र प्रसिद्धान्वक्ष्यामीत्याह ॥ प्राधान्यत इति ॥ असत्कथाश्रवणैः ये कर्णयोः कषायाः मलाः ॥ तान् शोषयंती
ति तथा तान्सुपेशान्सुंदरान् ॥ हे ऋषे वदंति मुनय इति शेषः ऋषय इति पाठे ऋषयो वदंतीत्यन्वयः ॥ तान्नतेनुभ्यमनुक्रमिष्ये क्रमेण वर्णयिष्यामि । तद
नुक्रमेणामनंत त्वया आपीयतां इति शास्त्रं तं ॥ आपिवतां कर्णकषायशोषानित्यर्थः ॥ ४६ ॥ इति द्वितीये षष्ठः ॥ ६ ॥ एवं प्रतिज्ञाया वतारांस्तत्कर्माणि तन्नत्रयो ॥ ३७ ॥
जनानि न द्रष्टुं प्राह ॥ यत्रेत्यादिना ॥ यत्र यदा काले क्षितितलोद्धरणार्थं समस्तयज्ञावयवां क्रोडीं वाराहीं तनुं बिभ्रत्तत्तद्युतीनंतो परिछिन्नस्वरूपस्वभा

वैभगवान्नृसिंहरूपं नर्महार्थं वै समुद्रस्यांतः ॥ उपागतं समागतं हिरण्याक्ष इति प्रसिद्धमादिदैत्यं दितेः प्रथमंपुत्रं दंष्ट्राग्रविदारितवान् ॥ तत्र दृष्टांतः ॥ वज्रधर इंद्रः
अद्रिंभित्वेत्यर्थः ॥ १ ॥ सुयज्ञावतारमाह ॥ जात इति रुचेः ॥ प्रजापतेः आकूत्यास्तद्भार्याया आकूतेः स्नुः सुयज्ञो नाम जातः स च स्वभार्यायां दक्षिणायां
यमाख्यगुणायुक्तान्यासीन्देवानित्यर्थः ॥ यज्ञस्य दक्षिणायां तु पुत्रा द्वादश जज्ञिरे ॥ यामा इति समाख्याता इति वचनात् ॥ तद्भार्यायाः आकूतेः स्
नुः स एवेंद्रः सन्नार्तिं यदा अहरत्तदा पूर्वं सुयज्ञ इत्युक्तो पश्चान्मातामहेन मनुना हरिरित्युक्तः ॥ अनेन देवोत्साहनं लोकत्रयार्तिहरणं च
कर्मद्वयं दर्शितं ॥ एवं सर्वत्रावतार ॥ तत्कर्मचेत्त्रयं ॥ २ ॥ कपिलावतारमाह ॥ जज्ञ इति ॥ कर्दमप्रजापतेर्गृहे तद्भार्यायां देवहूत्यां हे द्विज नारद नवभिः

जातो रुचेरजनयत्सुयमान्सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायां ॥ लोकत्रयस्य महतीमहरद्यदार्तिं स्वायंभुवेन मनुना हरिरित्यनूक्तः
२ ॥ जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ॥ ऊचे ययात्मशमलं गुणसंगपंकमस्मिन्विधूय कपिलस्य ग
तिं प्रपेदे ॥ ३ ॥ अत्रेरपत्यमभिकांक्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान्स दत्तः ॥ यत्पादपंकजपरागपवित्रदेहा योगर्द्धिमापुरुभयीं यदु
हैहयाद्याः ॥ ४ ॥

सहजन्ते जातः स च स्वमात्रे आत्मगतिमात्मज्ञानं मोक्षमार्गं वा उक्तवान् ॥ यया आत्मगत्या सा देवहूतिरात्मशमलं मलिनीकर
णमस्मिन्देहे जातं गुणसंगपंकं गुणत्रयसंग एव पंकः ॥ तं विधूय कपिलस्य गतिं कपिलोक्तगतिं प्राप्तवती ॥ ३ ॥ दत्तात्रेयावतारमाह ॥ अत्रेरिति ॥ अपत्यं पु
त्रमभिकांक्षतो भिकांक्षमाणादत्रेः तुष्टः सन् अहमेव तुभ्यं दत्त इति यद्यत ॥ आह ततः स भगवान्नाम्ना दत्त इति जातः स्वभक्तेभ्यो योगैश्वर्यदानं
तच्चरित्रं दर्शयति ॥ यस्य पादपंकजयोः परागस्तेन पवित्रिताः ॥ देहा येषां ते हैहयाद्याः सहस्रार्जुनप्रभृतयः यदवश्च ॥ दत्तात्रेयादुभयीमैहिकामा
मुष्मिकीं योगर्द्धिं योगैश्वर्यमणिमाद्यैश्वर्यरूपामैहिकीं मुक्तिरूपामामुष्मिकीं च योगर्द्धिमापुः प्रापुः उभसिद्धे ॥ यदवा यदुर्ययातिपुत्र इति ॥ ४ ॥

भा॰ द्वि॰ टी॰ कुमारावतारमाह तप्तमिति ॥ नानाविधलोकानां स्रष्टुमिच्छया मे मया यत्तपस्तप्तम् ॥ तस्मात्स्वतपसः महाभयसः हेतोः सहरिरादौसनात् ॥ दीर्घ आर्षः स
॥ ३८ ॥ नआमकः कथंभूतः चतुःसनः चतुर्थः सनः सनकोयस्य सचतुःसन् ॥ अभूत्सनातनसनंदनौ द्वितीयतृतीयौ अभूतामित्यभिप्रायः यद्वा चतुःसनः च
त्वारः सनशब्दा नाम सु यस्य स चतुःसनः अस्मिन्पक्षे आदौ कल्पादौ सन इति तयो विशेषणं समस्तं विडिताहि समर्थः ॥ यद्वा तपस इति षष्ठ्यंतम् ॥ तपसः स
नात्समर्पणादिहि सर्वैः पुरा सने ॥ सचजातो हरिः पूर्वकल्पसंप्लवे प्रलये विनष्टं विच्छिन्नसंप्रदायं आत्मतत्त्वं इहास्मिन्कल्पे सम्यग्जगाद उक्तवान्
सम्यक्त्वं दर्शयति ॥ यदुदितमात्रमेव मुनयः ॥ आत्मन्यात्मनि मनश्चितमुनयः साक्षाद्दपश्यन् ॥ यद्वा यदुदितमेवात्मनि नित्यं मुनयः ॥ अचक्षत

तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोऽभूत् ॥ प्राक्कल्पसंप्लवविनष्टमिहात्मतत्त्वं सम्यग्जगाद मुनयो यदचक्षता
त्मन् ॥ ५ ॥ धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति प्रथितप्रभावः ॥ दृष्ट्वात्मनो भगवतो नियमावलोपं देव्यस्त्वनंगपृतना
घटितुं न शेकुः ॥ ६ ॥ कामं दहंति कृतिनो ननु रोषदृष्ट्या रोषं दहंतमुतते न दहंत्यसह्यं ॥ सोयं यदंतरमलं निविशन्बिभेति कामः कथं
नु पुनरस्य मनः श्रयेत ॥ ७ ॥

अमेभ्योपुत्रकवंतइत्यर्थः ॥ ५ ॥ नरनारायणावतारमाह ॥ धर्मस्येति ॥ धर्मस्य पत्न्यां ॥ दक्षदुहितरि मूर्तिसंज्ञायां
नारायणो नर इति मूर्तिद्वयेन स हरिरनिष्टजातः ॥ कथंभूतः स्वः असाधारणः तपःप्रभावो यस्य सः ॥ यद्वा ॥ स्वविषयकं यत्तपस्तत्प्रभावो यस्य सः उप
शांतरभावात् प्रभावमेवाह ॥ अनंगपृतनाः मन्मथसेनारूपाः देव्यः अप्सरसः आत्मनः परमात्मनो भगवतः ॥ अनियमावलोपं नियमालोपाभावं दृष्ट्वा
घटितुं स्ववशीकर्तुं न शक्नुवंतः ॥ ६ ॥ किंच ॥ काममिति ॥ रोषदृष्ट्या कामं दहंति ते रोषं स्वात्मानं दहंतमसह्यं सोढुमशक्यं न दहंति नाभिभवंति ॥ किंतु तेनै ॥ ३८ ॥

वाभिप्रायेतेरत्यर्थः। सोयंरोषः यदंतरं यस्य भगवतो मनः प्रतिप्रविशन्त्वं विभेतिप्रवेष्टिमधिकं विभ्मतीत्यर्थः ॥ अस्य मनः कामः मन्मथः। कथंतुष्यये तनक
यमपीत्यर्थः ॥ कामनेत्राप्यजेयंरोषंजितवतोमनः कामः कथंप्रश्रयेदित्यर्थः ॥ ७ ॥ चरित्रेणैवकमप्यवतारंसूचयति ॥ विद्ध इति ॥ राज्ञउत्तानपादस्यं
त अंतिकेमातुः सपत्न्याः सुरुचेः उदितान्येववाक्यान्येवपत्रिणोबाणास्तैर्विद्धः ताडितवालोपिसन्तपसेतपश्चर्तुंवनानियोध्रुवोगतः ॥ तस्मैगत
वतेध्रुवायप्रगणतेस्तुवतेप्रसन्नोयोहरिः ॥ ध्रुवगतिंस्थापियदं अदात्सोप्येकोऽवतारः इत्यर्थः ध्रुवगतिंविशिनष्टि ॥ यद्दुपरियद्ध्रुवगतेरुप
रिअधः अधस्ताच्चदिव्यामुनयः सप्तर्षिप्रभृतयः स्तुवंतिध्रुवगतिप्रभावंप्रशंसंतीत्यर्थः ॥ ८ ॥ पृथ्ववतारमाह ॥ यइति ॥ यः पृथुऋषिभिरर

विद्धः सपत्न्युदितपत्रिभिरंतिराज्ञोबालोपिसन्नुपगतस्तपसेवनानि ॥ तस्मा अदाद्ध्रुवगतिंगृणतेप्रसन्नोदि
व्याःस्तुवंतिमुनयोयदुपर्यधस्तात् ॥ ८ ॥ यद्वेनमुत्पथगतंद्विजवाक्यवज्रविप्लुष्टपौरुषभगंनिरयेपतंतम् ॥
त्रात्वार्थितोजगतिपुत्रपदंचलेभेदुग्धावसूनिवसुधासकलानियेन ॥ ९ ॥

र्थितः वेनंत्रात्वाजगतिपुत्रपदंलेभेसोप्ये
कोवतारइत्यर्थः ॥ पुत्रपदंपुन्नाम्नोनरकाद्यस्मात्पितरंत्रायतेसुतः तस्मात्पुत्रइतिप्रोक्तः स्वयमेवस्वयंभुवेतिश्रुत्यन्तिस्मरणात् ॥ पद्वाख्या
नरकात्पितरंवेनंसंरत्सपुत्रपदंवाच्यतांप्राप्तवानित्यर्थः। कथंभूतंवेनंनिरयेनरकेपतंतं तत्कुतः द्विजानांमुनीनांशापवाक्यमेववज्रंतेनर
विप्लुष्टंविशेषेणदग्धंपौरुषंभगमैश्वर्यंचयस्यतंद्विजशापःकुतइत्यतआह ॥ उत्पथगतमसन्मार्गवर्तिनं। एतद्वाख्यानंचतुर्थेस्फुटम्
एतस्यैवचरित्रांतरमाह ॥ येनपृथुनावसुधाभूमिः सर्वाणिचसम्यग्जादिद्रव्याणिदुग्धाऽदुह्यत ॥ दुहधातुर्द्विकर्मकः ॥ ९ ॥ ॥

ऋषभावतारमाह॥ नाभेरिति॥ यच्चास्य पारमहंस्यं पारमहंसप्राप्यं पदं स्वरूपं ऋषयो वेदा आमनंति तिनरसौ हरिः कपिलादिवत्स्वांशेन ऋषभाख्यो राजा नाभेरा
ग्नीध्रपुत्रात्सुदेव्याः सनुतममेरुदेव्याः एवं सुदेवीत्यपि संज्ञायो जातो ऋषभः जडवद्योगचर्यां चचार तत्र हेतुः समदृक् सर्वस्यापि स्वात्मकत्वेन समदर्शी
न तस्यात्मकत्वेन व्यावर्तयति॥ स्वस्थः स्वे महिम्नि प्रतिष्ठितः इति श्रुतेः स्वस्मिन्नेव स्थितः न त्वात्मांतर्वीर्यैः जडयोगचर्यां चचरणे हेत्वंतरमाह॥ प्रशांत
करणः प्रशांतेंद्रियः॥ न तु नः परिमुक्तसंगः परितः शब्दादिषु मुक्तः त्यक्तः संग आसंगो येन सः॥ १०॥ हयग्रीवावतारमाह॥ सत्रइति॥ स एव साक्षा
द्भगवान्मम सत्रे मखे॥ सत्रे हयशीर्ष आस॥ सकर्ण भूतः तपनीयं सुवर्णं तद्वद्वर्णो यस्य॥ छंदोमयः वेदमयः वेदोत्पादकत्वेन न तन्मचुरइत्यर्थः॥ मख

नाभेरसावृषभ आस सुदेवीसूनुर्यो वै चचार समदृग्जडयोगचर्यां॥ यत्पारमहंस्यमृषयः पदमामनंति स्वस्थः प्रशांतकरणः परिमु
क्तसंगः॥ १०॥ सत्रे ममास भगवान् हयशीर्ष एव साक्षात्स यज्ञपुरुषस्तपनीयवर्णः॥ छंदोमयो मखमयोऽखिलदेवतात्मा वाचो बभूवु
रुशतीः श्वसतोस्य नस्तः॥ ११॥ मत्स्यो युगांतसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः॥ विस्रंसितानुरुभये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान्॥ १२॥

मयः यज्ञाराधः अखिलदेवतानामात्मा स आत्मा अंगान्यन्या देवता इति श्रुतेः श्वस
तः तस्य हयग्रीवस्य नस्तः नासिकातः उशतीः शुद्धाः वाचः वेदवाचः बभूवुः॥ नस्य हवा एतस्य महतो भूतस्य निःश्वसितमेतदृग्वेद इति श्रुतेः वेदानां तद्धि
हितानां कर्मणां तदाराध्यदेवतानां तत्त्व वर्तकत्वं तदाराध्यत्वं तदात्मकत्वाद्युक्तानि इति॥ ११॥ मत्स्यावतारमाह॥ मत्स्य इति॥ मत्स्यो भाविनो वैवस्वतेन मनुनो
पलब्धः दृष्टः क्षोणीमयः आगामिसृष्ट्युपयोगिपार्थिवद्रव्यमयः॥ पार्थिवद्रव्याश्रय इत्यर्थः॥ अत एव निखिलजीवनिकायानां समस्तजीवसमूहा
नां निकेतः निलयः मे मम मुखाद्विस्रंसितान्वेदमार्गान्वैदिकप्रमाणान्याद्यायुसमर्प्य मह्यमिति शेषः॥ वेदरूपप्रमाणप्रदानमेवास्यावतारस्य कृत्यं तत्र उरुभ

ये अतिभयंकरे युगांतसलिले विजहार विहृतवान्॥ हे ति
हर्षे॥ एतद्व्याख्यानमस्मेस्मरण॥ १२॥

कूर्मावतारमाह ॥ क्षीरोदधाविति ॥ क्षीरसमुद्रेऽमृतलब्धयेऽमृतलाभार्थममरदानवयूथपानांसुरासुरश्रेष्ठानां उन्मथ्नतांमथनंकुर्वतांसतामादिदेवोभग
वान्कच्छपवपुः धृतकूर्मतनुः पृष्ठेनपृष्ठभागेनगोत्रंमंदरपर्वतंविदधारविधृतवान् ॥ कथंभूतोविदधारनिद्राक्षणः निद्रायाःक्षणः अवसर
उत्सवोयस्यसः अद्रिपरिवर्तकषाणकंडूः अद्रेर्मंदरस्यपरिवर्त्तैःपरिभ्रमणावकषाणंकषणंयस्यांसाऽद्रिपरिवर्तकषाणातथाविधाकंडुःकंर
डूतिर्यस्यसनयोक्तः कषाणाइतिदीर्घआर्षः मंदरभ्रमणसंघर्षितकंडूरित्यर्थः ॥ १३ ॥ नृसिंहावतारमाह ॥ त्रैविष्टपेति ॥ त्रिविष्टपेस्वर्गेभवाः
त्रैविष्टपादेवास्तेषांउरुभयंतद्धरतीतित्रैविष्टपोरुभयहृ हरंतथाविधंनृसिंहरूपंकृत्वाकथंभूतंभ्रमंत्योभ्रुकुट्योदंष्ट्राश्चयस्मिंस्तथाभूतंकरा

क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धयआदिदेवः ॥ पृष्ठेनकच्छपवपुर्विदधारगोत्रंनिद्राक्षणोद्रिपरिवर्तकषाणकं
डूः ॥ १३ ॥ त्रैविष्टपोरुभयहासनृसिंहरूपंकृत्वाभ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रं ॥ दैत्येंद्रमाशुगदयाभिपतंतमारादूरौनिपात्यविददारन
खैःस्फुरंतम ॥ १४ ॥ अंतःसरस्युरुबलेनपदेगृहीतोग्राहेणयूथपतिरंबुजहस्तआर्त्तः ॥ आहेदमादिपुरुषाखिललोकनाथतीर्थ
श्रवःश्रवणमंगलनामधेयः ॥ १५ ॥

लंभयंकरंवक्त्रंयस्मिंस्तथाविधंतदारात्समीपेआशुशीघ्रंगदयाउपलक्षितंअभिमुखमा
पतंतंदैत्येंद्रंहिरण्यकशिपुंस्वोरौस्वस्योरौनिपात्यपातयित्वानखैर्विददारविदारितवान् ॥ स्फुरंतंपरितोगच्छंतं भयहासनृसिंहरूपमितिपाठेहासे
नैवसर्वभयनिवर्तकमित्यर्थः ॥ १४ ॥ हरिसंज्ञावतारमाह ॥ अंतरितिद्वाभ्यां यूथपतिःगजयूथस्यपतिःगजेंद्रः अंतःसरसिसरोमध्येउरुब
लेनाधिकबलेनग्राहेणमकरेणपदेगृहीतः । अतएवार्त्तःदुःखितःअंबुजंहस्तेयस्यसधृतांबुजोधृतहस्तःसन्निदमाह । किमित्यतआह । हेआदिपुरुष
कारणपुरुषहेतीर्थश्रवःतीर्थंविशुद्धंश्रवःकीर्तिर्यस्यसःतत्संबुधौहेतीर्थश्रवः । हेश्रवणमंगलनामधेयश्रवणेनैवमंगलंकल्याणंसंपा

॥ २८ ॥

तच्छ्रुत्वा गजेंद्रस्य वचः श्रुत्वा शरणार्थिनं शरणार्थिनं हस्ते शुंडायां प्रगृह्य भगवान् कृपया तस्माद् ग्राहाद् उज्जहार उद्धृतवान् किं कृत्वा चक्रेण सुदर्शनेन नक्रस्य
वदनं विनिपाट्य विदार्य कथंभूतो भगवतां मतंगानां पक्षिणां राजा गरुडः तस्य भुजयोरधिरूढः आरूढः चक्रायुधधरः अप्रमेयः अपरिच्छिन्न
स्वरूपस्वभावः ॥ १६ ॥ वामनावतारमाह ॥ ज्यायानिति ॥ अदितेः सुतानां द्वादशादित्यानां मध्ये ऽधियज्ञः यज्ञाधिपतिर्भगवान् अवरजः कनीयान
पि गुणैर्ज्यायान् श्रेष्ठः गुणेनैवाह यद्यतः ॥ इमान् लोकान् विचक्रमे पादविन्यासैः क्रांतवान् ॥ अथ प्रतिश्रुतानंतरमेव ॥ तत्र हेतुः ॥ बलेश्चक्रव
र्तिनः ॥ सकाशाद् भूमिं क्ष्मां वाचमनेन रूपेणेति शेषः ॥ वामनेन रूपेणेति शेषः ॥ वामनेन रूपेण जगृहे गृहीतवान् ॥ नन्वीश्वरः स्वयं दुर्बलव

श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः ॥ चक्रेण नक्रवदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान्कृपयो
ज्जहार ॥ १६ ॥ ज्यायान्गुणैरवरजोप्यदितेः सुतानां लोकान्विचक्रम इमान्यदथाधियज्ञः ॥ क्ष्मां वामनेन जगृहे त्रिपदच्छलेन याच
ञामृते पथि चरन्प्रभुभिर्न चाल्यः ॥ १७ ॥ नार्थो बलेरयमुरुक्रमपादशौचमापः शिखाधृतवतो विबुधाधिपत्यम् ॥ यो वै प्रतिश्रु
तमृते न चिकीर्षदन्यदात्मानमंग शिरसा हरयेभिमेने ॥ १८ ॥

किमिति तथा चक्रे तत्राह ॥ पंचाम्रते याञ्चां विना पथि चरन् धर्ममार्गे प्रवर्त्त
मानः प्रभुभिस्समर्थैरपि न चाल्यः ऐश्वर्याच्च भ्रंशनीयः इत्यर्थः ॥ १७ ॥ ननु तर्हि पंच यापि चालनमनुचितमेवेत्याशंक्य प्रभुत्वस्य बलेर्लौकिकस्वीयैश्व
र्यभ्रंशादप्येवेत्याशयेनाह ॥ नार्थ इति ॥ उरुक्रमस्य विस्तृत विस्तृत पादविन्यासस्य हरेः पादक्षालनं प्रसुपयुक्ता आपाः आ अप इति छेदः ॥ आसमंता
च्छिखायां मूर्ध्नि धृतवतः ॥ यदा सप्तम्या आर्षो लुक विबुधाधिपत्यं नार्थः ॥ न सदृशं प्रयोजनमित्यर्थः ॥ एतदेवोपपादयति ॥ यो बलिः प्रतिश्रुतमृते प्र
तिज्ञातार्थं विना ऽन्यत् चिकीर्षत् कर्तुं नैच्छद् अडभाव आर्षः किंतु स्वात्मानं अंगहे नारद हरये शिरसा ऽभिमेने भगवच्छेषभूतमात्मानं हरये समर्पित ॥ ५० ॥

वानभ्रंशेणवारितःशक्तोपिश्रमयाकर्तुंनैछत्किंतुतृतीयपादपूरणार्थमात्मानमपिशिरसासमर्पितवानित्यर्थः॥१८॥हंसावतारमाह।तुभ्यमितिभृशं
विवृद्धभावेनप्रवृद्धेनहेतुनात्वयापरिपृष्टःसाकल्येनपृष्टोभगवान्हंसरूपेणेतिशेषः।योगमनभिसंहितकर्मफलकर्मयोगंज्ञानंभागवतंसाधनसम्प
त्कानुगृहीतंभगवदुपासनात्मकंज्ञानमात्मसुप्रज्ञानविविक्तात्मसुयतत्वंयाथात्म्यंतस्यदीपवत्प्रकाशकंज्ञानयोगंचसाधुयथातेतुभ्यमुवाच।एत
दाख्यानमेकादशस्कंधेप्रदेवहंसोक्तयोगादिकंवासुदेवशरणावहनांजन्मनामंतइत्युक्तरीत्याउपायत्वेनवासुदेवंशरणंगताःअंजसासु

तुभ्यंचनारदभृशंभगवान्विवृद्धभावेनसाधुपरितुष्टउवाचयोगं॥ज्ञानंचभागवतमात्मसुतत्वदीपंयद्वासुदेवशर
णाविदुरंजसैव॥१९॥चक्रंचदिक्ष्वविहितंदशसुस्वतेजोमन्वंतरेषुमनुवंशधरोविभर्त्ति॥दुष्टेषुराजसुदमंव्य
दधात्सुकीर्त्तिंसत्येत्रिपृष्टउशतींप्रथयंश्चरित्रैः॥२०॥धन्वंतरिश्चभगवान्स्वयमेवकीर्त्तिर्नाम्नानृणांपुरुरु
जांरुजआशुहंति॥यज्ञेचभागममृतायुरवावरुंधआयुष्यवेदमनुशास्त्यवतीर्यलोके॥२१॥ खेनविदुः।हंसो

क्तमेवज्ञात्वानुतिष्ठंतीत्यर्थः॥१९॥तत्तन्मन्वंतरेषुदशसुदिक्ष्वप्रतिहतमनभिभाव्यंस्वतेजःस्वप्रतापोपबृंहितंचक्रमाज्ञारूपंचक्रंविभर्त्ति
किंचदुष्टेषुगर्वितेषुराजसुदमंदंडंव्यदधाद्धृतवान्कथंभूतःसन्त्रिपृष्टस्तृतीयस्यांदिविसत्येसत्यलोकेस्वचरित्रैःउशतींकमनीयांकीर्त्तिंप्रथय
न्विस्तारयन्व्यदधादित्यर्थः॥२०॥धन्वंतर्यवतारमाह॥धन्वंतरिरिति॥भगवान्लोकेधन्वंतरिरूपेणावतीर्यपुरुरुजांभूरिदुःखानांमहारोगिणां
स्वनाम्नैवरुजःरोगान्हंति।कथंभूतःस्वयमेवकीर्त्तिःइतिकीर्त्यतिशयोक्तिः।अमृतंमरणाभावमायुर्यस्मात्तंसरुद्धंपूर्वंदैत्यैःप्रतिषिद्धंयज्ञेभाग
मवापलेभेआयुर्विषयवेदंचानुशास्त्रप्रवर्त्तयति॥२१॥

भा.टि.टी.

॥५९॥

परशुरामावतारमाह ॥ क्षत्रमिति ॥ विधिनादैवेन क्षत्रयायमसवेऽपभ्रंतं समर्पितं ब्रह्मधुग्ब्राह्मणेभ्यो द्रुह्यतीति तथा अतः ऊर्जितस्य कः पंथा
वेदमार्गो येन अतएव नरकार्तिं नारकदुःखं लिप्सुलब्धुमिच्छु एवंभूतमवनेः कंटकतुल्यं क्षत्रं ॥ क्षत्रियकुलमसौ महात्मा भार्गवराम रूपो हरि
रुधारपरश्वधेन दीर्घनीक्ष्णधारेण परशुना त्रिःसप्तकृत्वएकविंशतिवारं उग्रवीर्यः असह्यवीर्यः सन्नुद्धंति उत्पाटयति ॥ २२ ॥ रामावतार
माह ॥ अस्मदिति ॥ अस्मदनुग्रहे सुमुख अस्मदनवरविरोधेनावतीर्ण इति भावः कलेशः प्रकृतिपुरुषयोरधिपतिः कलया भरतादिरूप

क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुर्जितपथं नरकार्तिलिप्सु ॥ उद्धंत्यसावविनिकंटकमुग्रवीर्यस्त्रिःसप्तकृत्व
उरुधारपरश्वधेन ॥ २२ ॥ अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे ॥ तिष्ठन्वनं सदयितानु
जआविवेश यस्मिन्विरुध्य दशकंधर आर्तिमार्छत ॥ २३ ॥ यस्मा अदादुदधिरूढभयांगवेपो मार्गं सपद्यरिपुरं ह
रवदिधक्षोः ॥ दूरे सुहृन्मथितरोषसुशोणदृष्ट्या तातप्यमाननमकरोरगनक्रचक्रः ॥ २४ ॥

यासईक्ष्वाकुकुलेवतीर्य गुरोर्द
शरथस्य पितुर्निदेशे आज्ञायां तिष्ठन्नाज्ञां पालयन्नित्यर्थः । सदयितानुजः सीतालक्ष्मणाभ्यां सहितः वनं दंडकाख्यमाविशदित्येष यस्मिन्रामेः
विरुध्य विरोधं कृत्वा दशकंधरो रावणः आर्तिं नाशमार्छत्प्राप्तः ॥ २३ ॥ यस्मै श्रीरामाय उदधिः समुद्रः मार्गमदादत्तवान् ॥ कथंभूतो ऽदात्तसप
दि शीघ्रं हरोतद्रः यथा त्रिपुरं दिधक्षुर्हरस्तथा लंकां दिधक्षोः तस्मा च्छ्रीरामाद्रूढभयांगवेपः ऊढः प्राप्तः भयेन यस्य तेनांगे वे
पः कंपो यस्य सः दूरे वर्तमानासु हृत्सीता तया निमित्तभूतया मथितः क्षुभितः योरोषस्तेन सुशोणा दृष्टिः श्रीरामसंबंधिनी तया तातप्यमा

नमकराणां उरगाणां नक्राणां च चक्रे समूहो यस्मि
न्स एवंभूतोब्धिः मार्गमदादित्यर्थः ॥ २४ ॥

॥ ५९ ॥

विं वपुर्देहो वागस्य वक्षस्थलस्पर्शेन रुग्णाः भग्ना ये महेंद्रस्यैरावतस्य दंतास्तैर्विडंबिताः स्वधवलिम्ना धवलीकृताः ततश्च दिक्षु पतितैः वक्ष
स्थुलितमुरगहंत चूर्णैः प्रकाशिता इत्यर्थः ॥ एवंभूता याः ककुभः दिशस्तासां योजयस्तेन रूढः उत्पन्नः यो हासः अहो मत्समः कोऽप्यस्तीति गर्वे
णाप्त हासस्तं सैन्यमध्ये उत्कर्षेण चरतो दारहर्तुरावणस्यासुभिः सह सद्यः शीघ्रं विनेष्यति कैः धनुषो विस्फूर्जितैः विशेषेण स्फुरितैः शरैरि
त्यर्थः ॥ २५ ॥ कृष्णावतारमाह ॥ भूमेरिति ॥ सुरेतरा असुरसंपन्ना राजानस्तेषां वरूथैः सैन्यैर्विमर्दिताया भारेण पीडिताया भूमेः क्लेशव्यया
य भारापहारायेत्यर्थः ॥ सितकृष्णकेशः भगवान्कलया बलभद्रेण साकं जातः अवतीर्णः सितकृष्णौ केशौ यस्य सः ॥ शोभार्थं हि भगवतासि

वक्षःस्थलस्पर्शरुग्णमहेंद्रवाहदंतैर्विडंबितककुब्जुष ऊढहासं ॥ सद्योऽसुभिः सह विनेष्यति दारहर्तुर्विस्फूर्जितैर्धनुष उच्चरतो
ऽधिसैन्ये ॥ २५ ॥ भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः ॥ जातः करिष्यति जनानुपलक्ष्य
मार्गः कर्माणि चात्ममहिमोपनिबंधनानि ॥ २६ ॥

तकृष्णकेशौ धृतौ अविकारित्वेन वयःपरिणामासंभवात् ॥ यत्तु विष्णुपुराणे । उक्तहा
रात्मनः केशौ सितकृष्णौ नयामुने इति ॥ भारतेपि ॥ स चापि केशौ हरिरुच्चजर्हे एकं शुक्लं चैकमपरं चापि कृष्णं ॥ तौ चापि केशौ विशतां यदूनां
कुले स्त्रियौ रोहिणीं देवकीं च तयोरेको बलभद्रो बभूव योऽसौ श्वेतस्तस्य केशः कृष्णो द्वितीयः केशवः स बभूव केशो योऽसौ वर्णितः कृष्णवर्ण
इति ॥ तत्तु न केशमात्रावताराभिप्रायं किंतु भूभारावतारणरूपं कार्यं कियदेतन्मत्केशावपि कर्तुं शक्ताविति द्योतनार्थं रामकेशवयोर्वर्णसूचना
र्थं च केशोद्धरणमिति अन्यथा तत्रैव पूर्वापरविरोधापत्तेः कृष्णस्तु भगवान्स्वयमित्येतद्विरोधाच्च जातश्च भगवान् जनैरनुपलक्ष्यः मार्गो

गतिर्यस्य सः तथाभूतः आत्मनः स्वस्य महिमा उपनिबध्यते ऽभिधीयते यैस्तानि स्वमहात्म्यप्रकाशकानित्यर्थः ॥ कर्माणि चेष्टितानि करिष्यतइ
ति ॥ २६ ॥ कर्माणां परमेश्वरत्वप्रकाशकत्वमेव प्रपंचयति नवभिः तोकेन बालेन सता उलूकिकायाः पूतनायाः जीवहरणं यत् पूतना उलूक
रूपेणागतेति पुराणांतरप्रसिद्धिः त्रैमासिकस्य त्रिमासवयस्कस्य पदा पादेन प्राक् शकटरूपेणागतस्यासुरस्य नभविष्यमनीश्वरत्वेन तत्सर्वम
नुपपन्नमित्यर्थः ॥ २७ ॥ किंच व्रजे वषन् विषतोयपितान् विषजलस्य पीतं पानं येषां तान् समुत्थाप्य अनुग्रहदृष्टिः कृपादृष्टिः तस्या वृष्ट्या

तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोपवृत्तः ॥ यद्रिंगतांतरगतेन दिविस्पृशोर्वा उन्मूलनं त्वि
तरथार्जुनयोर्न भाव्यम् ॥ २७ ॥ यद्वै व्रजे व्रजपशून्विषतोयपीतान्पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या तच्छुद्धयेति
विषवीर्यविलोलजिह्वमुच्चाटयिष्यदुरगं विहरन्ह्रदिन्याम् ॥ २८ ॥ तत्कर्म दिव्यमिव यन्निशि निःशयानं दावा
ग्निना शुचिवने परिदह्यमाने । उन्नेष्यति व्रजमतोवसितांतकालं नेत्रे पिधाप्य सबलोनधिगम्यवीर्यः ॥ २९ ॥

सुधावर्षेण जीवयदिति यत् ह्रदिन्यां यमुनायां विहरन् तच्छुद्धये ह्रदिन्या निर्विषत्वायातिविषवीर्येण विलोला जिह्वा यस्य तं उरगं कालीयाख्यं
सर्पमुच्चाटयिष्यत् पलायिष्यदिति यत् ॥ २८ ॥ तदपि कर्म दिव्यमिवामानुषमिवेति लौकिकोक्तिः किंच दावाग्निना शुचिवने शुष्कवने परिदह्य
मानेसति अतो दावाग्नेर्हेतोः अवसितो निश्चितो निसिरान्तो निःशयानं नितरां स्वपंतं व्रजं नेत्रे पिधाप्य पिहिते कारयित्वा ॥ अनेन व्रजस्या
संचारोपशमसूचितं बलभद्रेण सहितः ॥ अनधिगम्यवीर्यः अनधिगम्यं दुर्विज्ञेयं वीर्यं यस्य सः तथाभूतः अग्निं पीत्वा व्रजमुद्धरिष्यतीत्यर्थः ॥ २९ ॥ ॥ ५२ ॥

किं च गृहीतेति ॥ अमुष्य श्रीकृष्णस्य माता यशोदा यद्दृढपबंधं बंधनसाधनं सुल्वं मुंजादिनिर्मितरज्जु गृहीतग्रहीष्यति ॥ ननु कुल्वममुष्य श्रीकृष्णस्यो
दरे न माति न व्याप्नोन पर्याप्तमित्यर्थः किं च जृंभतोस्य भगवतो वदने मुखे भुवनानि चतुर्दशभुवनानि संवीक्ष्य दृष्ट्वा गोपी यशोदा शंकितम
नाः किमिदमिति शंकितनचित्ता सती पश्चात्पतिबोधिता ज्ञापितैश्वर्यासीदिति यत्तच्चकमेदि वं इवेति पूर्वेणान्वयः ॥ ३० ॥ अपि च वरुण
स्य पाशा यद्वंधनं तस्मान्नंदं स्वपितरं मोचयिष्यति ॥ मयस्य सूनुना व्योमासुरेण विलेषु पिहितान् निरोधापितान् गोपांश्च मोक्ष्यतीत्यर्थः किं

गृहीतं यद्दृढपबंधममुष्य माता शुल्वं सुतस्य न तु तन्वदमुष्य माति ॥ यज्जृंभतोस्य वदने भुवनानि गोपी संवीक्ष्य शंकि
तमनाः प्रतिबोधितासीत् ॥ ३० ॥ नंदं च मोक्ष्यति भयाद्वरुणस्य पाशाद्गोपान् बिलेषु पिहितान्मयसूनुना च ॥ अह्न्याहृ
तं निशि शयानमतिश्रमेण लोकं विकुंठमुपनेष्यति गोकुलं स्म ॥ ३१ ॥ गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेऽभिव
र्षति पशुस्वकृपया रिरक्षुः ॥ धर्तोच्छिलींध्रमिव सप्तदिनानि सप्तवर्षो महीध्रमनघैककरे सलीलम् ॥ ३२ ॥

वाह्नि दिवसे इतिश्रमेण हृतं व्यापारग्रस्तं निशि शयानं गोकुलं गोकुलवासिजनं दृष्ट्वा तेषु स्वानुवृत्तिजनितकृपया विकुंठनिस्सं लोकं निरतिशा
यानंदं लोकं उपनेष्यति प्रापयिष्यतीत्यर्थः स्मेत्याश्चर्ये ॥ ३१ ॥ गोपैरिति ॥ मखे इंद्रयागे प्रतिहते सति मखविप्लवाय गोवर्द्धनपर्वतयागनाशा
र्थं देवे इंद्रेभिवर्षति सति पशुस्वकृपया रिरक्षुः रक्षितुमिच्छुः सप्तवर्षाणि वयो यस्य तथाभूतः अनघैककरे ऽनघेऽघरहिते एकस्मिन्नेव

करे अनघेति नारदसंवादः धर्मं वा सलीलं यथा तथा महीध्रं गोवर्द्धनाख्यमद्रिं सप्तदिनानि उच्छिलींध्रं इव धर्त्ता धरिष्यति उच्छिलींध्रं उत्तंछत्राकं ॥ २२
क्रीडन्निति ॥ निशाकरश्चंद्रः तस्य रश्मिभिर्गौर्यां धवलायां रात्रौ वने क्रीडन् विहरन् कलानि मधुराणि पदानि यस्मिंस्तद्गायत् तद्दीर्घमूर्छितमा
ऽलापविशेषयुक्तं गीतं तेन उद्दीपितः स्मरः काम एव रुक् रोगो यासां तासां व्रजं विभ्रतीति व्रजभृतः गोपाः तेषां वधूनां गोपीनां हर्त्तुं श्वैरयतो
धनदानुगस्य कुवेरभृत्यस्य शंखचूडाख्यस्य शिरो हरिष्यति ॥ २३ ॥ ये चेति ॥ ये च प्रलंबादयः ते सर्वे हरिणा हेतुभूतेन नतद्वीयं हरिसंबंधि अ
दर्शनं प्राप्तेंद्रियाविषयं वैकुंठनिलयं लोकं यास्यंति ॥ अलंनद्वर्णनेन तच्चेष्टितानामनंतत्वान्न वर्णने मम सामर्थ्यमस्तीति भावः ख

क्रीडन्वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्छितेन ॥ उद्दीपितस्मररुजां व्रजभृद्वधूनां हर्त्तुर्हरिष्य
ति शिरो धनदानुगस्य ॥ २३ ॥ ये च प्रलंबखरदुर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौंड्रकाद्याः ॥ अन्ये च शाल्वकपिब
ल्वलदंतवक्रसप्तोक्षशंवरविदूरथरुक्मिमुख्याः ॥ २४ ॥ ये वा मृधे समितिशालिन आत्तचापाः कांबोजमत्स्यकुरुकेक
यसृंजयाद्याः ॥ यास्यंत्यदर्शनमलंबलभीमपार्थव्याजाह्वयेन हरिणा निलयं तदीयम् ॥ २५ ॥ खरो धेनुकः दर्दुरो वकः इभः कु
वलयापीडः कुजो नरः कपिर्द्विविदः सप्तोक्षाणः वल्विवहीः ॥ २४ ॥ ये वा मृधे युद्धे वा आत्तचापाः धृतधन्वानो राजानः समितिशालिनः समितौ संग्रा
मे शालंते श्लाघंते इति समितिशालिनः कांबोजादिदेशाधिपतयः ननु प्रलंबादयो बलभद्रेण हताः ॥ कांबोजादयो भीमार्जुनादिभिः शंवरः प्र
द्युम्नेन यवनो मुचुकुंदेन न तु हरिणा तत्राह ॥ बलभीमपार्थ इति ॥ व्याजाः कपटान्याह्वयानामानि यस्य तेन बलभीमादिरूपेण च स एव हरिः
सर्वसंहर्त्तेत्यर्थः सप्तोक्षाणस्तु तेन दमिताः कालांतरे यास्यंतीति भावः ॥ एतच्च सर्वमपि कर्म दिव्यमिव तच्चाप्ययानमात्रमिति पूर्वेणान्वयः

आसावतारमाह॥ कालेनमीलितधियांसंकुचितबुद्धीनांलोकमल्पमायुर्येषांते॥तेषांनॄणांस्वनिगमःस्वकृतोवेदःवताहोदूरपारःदु
र्गमइत्यवमृश्यविचार्यसत्यवत्यामाविर्हितः॥आविर्भूतःसहरिरनुयुगंयुगानुरूपंवेदद्रुमंविटपशःशाखाभेदेनविभजिष्यतिवि
भक्तंकरिष्यति॥३६॥बुद्धावतारमाह॥देवद्विषामिति॥निगमवर्त्मनिवैदिकमार्गेनिष्ठितानांमयेनरचिताभिःकल्पिताभिरदृश्यतूर्भि
रत्यसवेगाभिःपूर्भिःपुरीभिर्घ्नतांनाशयतांदेवद्विषांमतिविमोहः॥मतिप्रलोभोयस्मात्तन्मतिप्रलंभंमतिविमोहंचतन्मतिप्रलोभं

॥०॥ कालेनमीलितधियामवमृश्यनॄणांस्तोकायुषांस्वनिगमोवतदूरपारः॥आविर्हितस्त्वनुयुगंसहिसत्यवत्यांवे
दद्रुमंविटपशोविभजिष्यतिस्म॥३६॥देवद्विषांनिगमवर्त्मनिविष्ठितानांपूर्भिर्मयेनविहिताभिरदृश्यतूर्भिः॥लोका
न्घ्नतांमतिविमोहमतिप्रलोभंवेषंविधायवहुभाष्यतऔपधर्म्यं॥३७॥यर्ह्यालयेष्वपिसतांनहरेःकथाःस्युःपाष
ण्डिनोद्विजजनावृषलानृदेवाः॥स्वाहास्वधावषडितिस्मगिरोनयत्रशास्ताभविष्यतिकलेर्भगवान्युगांते॥३८॥

भंमतिविमोहकंचेत्यर्थःएवंभूतंपाखंवेषंविधायविचरन्औपधर्म्यंधर्माभासंपाषंडधर्मंस्वार्थेष्यञ्वहुअधिकंभाष्यतभाषिष्यत॥३७॥
कल्क्यवतारमाह॥यर्हीति॥सतामप्यालयेषुगृहेषुयर्हियदाहरेःकथानःस्युर्द्विजजनाःत्रैवर्णिकाःपाषंडिनःस्युःनृदेवाःराजानःवृष
लाःशूद्राःस्युर्तथायत्रत्रैवर्णिकालयेषुस्वाहास्वधावषडितिगिरःवाचःनस्युः॥स्वाहावषडित्यनेनदेवंकर्मोपलक्ष्यतेस्वधेतिपित्र्यंतदायु
गांतेकलियुगांतेभगवानकलेःशास्ताभविष्यतित्यर्थःकल्क्यवतारेणेतिशेषः॥३८॥

अत्र च त्रुप्रनारद संवादात्प्राचो वराहादयो ऽवताराः मन्वंतराश्च भूताश्च भूतवा विनः धन्वंतरि परशुरामो ता कालिको श्रीरामादयस्तु भा
विनः तत्र तु क्वचिद्भूतादि निर्देशः आर्ष इति द्रष्टव्यं अत्रेदं तत्त्वं भगवतो ऽवताराः द्विविधाः अनुप्रवेशावताराः स्वेन रूपेणावताराश्चेति॥
अकर्मदेहे तुल्या विशेषादुभयत्रावतारशब्दप्रयोगः तथा न स्वरूपमपि द्विविधं प्रकृति प्राकृतवस्तुजातमेकं शुद्धसत्त्वमयमपरं चेति॥ तत्र षो
डशकलात्मके तेंद्रियाभिमानि देवताश्रयं पौरुषं रूपं तदनिरुद्धरूपं तमेव सहस्रशीर्षेत्यादि श्रुतिः आद्योवतारः पुरुषः परस्येत्यादि सूच्यते अनु
प्रवेशावतारो नाम जीवेषु स्वस्यानुप्रवेशेन स्वीयज्ञानशक्त्यादीनामन्यतमाभिव्यंजनं सर्वांशावतार इति कथ्यते॥ स च गोणः शान्त आवे

सर्गे तपो ऽहमृषयो नव ये प्रजेशाः स्थाने च धर्ममखमन्वमरावनीशाः॥ अंते
त्वधर्महरमन्युवशासुराद्या मायाविभूतय इमाः पुरुशक्तिभाजः॥ ४४॥

शश्चेत्यनेकधा उक्तेष्वेवावतारेषु वराह नारायण ध्रुवानुग्राहक हयग्रीव मत्स्य कूर्म नृसिंह वामन श्रीराम श्रीकृष्ण कल्क्यवताराः स्वेन रूपे
णावताराः इतरे त्वनुप्रवेशावताराः इति ज्ञातव्यं किंच सृष्ट्यादिकार्यभेदेन भगवतो विभूतिराह॥ सर्ग इति॥ तपः पूर्वं जगत्पर्यालोचनं॥ अहं ब्र
ह्मा प्रजेशाः प्रजापतयो नव ऋषयः मरीच्यादयः मायाविभूतयः विस्मयनीयाः भगवन्नियाम्यवर्गाः स्थाने पालने धर्म अमरव अवि मनुः र
क्षितेत्यन्मत्वात् क्रतु पालनानुरूपं सामर्थ्यं मख शब्देन विवक्षितं मनव अमराश्चेंद्रादयः अवनीशा अभूपा एते स्थाने भगवन्नियाम्यव
र्गाः॥ अंते संहारे अधर्मश्च हरश्च रुद्रः मन्युवशाश्च सर्पा आसुराद्याश्च॥ पुरुशक्तिभाजः॥ अपरिमितैश्वर्यशक्तिधारिणो भगवतो इमाः माया

भगवदवतारांस्तच्चेष्टितानि च साकल्येनाभिधातुं न कोप्यलमित्याह ॥ विष्णोरिति ॥ यः कविर्बुद्धिमाननुतान् अनुरूपः पार्थिवान् पृथिवीसंबंधीनि र
जांसि विममे गणितवान् तस्यापि को नु विष्णोर्वीर्यगणनां कर्तुमर्हतीति नार्हतीत्यर्थः ॥ य भगवानस्मादस्खलनाप्रतिहतस्रूम्येन स्वरभसा
स्वपादविन्यासवेगेन ऊर्ध्वं धिकं कंपमानात्सहनात तत्त्वनिवासस्थानात् स्वबलतः प्राणिनो निशाम्य दृष्ट्वेत्यर्थः त्रिपृष्ठं सत्यलोकं चस्कंभ स्तंभया
मास ॥ श्रुतावपि यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगाय इति तस्यायमर्थः त्रेधा त्रिप्रकारेण विचक्रमाण पादविन्यासं कुर्वा
णः य उरुगायो भगवान् नतिष्ठंतीति स्थाः देवाः सहस्य सधादेशः देवैः सहितमुत्तरं सत्यलोकं अस्कभायत् स्तब्धवानित्यर्थः ॥ प्रवोचं प्रवो

विष्णोर्नु वीर्यगणनां कतमोर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि ॥ चस्कंभ यः स्वरभसास्खलिता त्रिपृष्ठं य
स्मात्त्रिसाम्यसदनादुरुकंपमानात् ॥ ४० ॥ नांतं विदाम्यहममी मुनयोग्रजास्ते मायाबलस्य पुरुषस्य कुतोपरे ये
गायन्गुणान्दशशताननआदिदेवः शेषोधुनापि समवस्यति नास्य पारम् ॥ ४१ ॥ चेद्दित्यर्थः ॥ एवंविधसर्वशक्तेरप
रिच्छिन्नस्वरूपस्वभावस्य वीर्याणि साकल्येन वर्णयितुं कः प्रभवेदित्यर्थः ॥ ४० ॥ एवमवतारगुणप्रयोजनान्युक्त्वा नाहं न यूयमिति पूर्वप्र
स्तुतमुपसंहरति मायाबलस्याद्भुतस्य बलं सेना प्रकृतास्य परिकर इति वा पुरुषस्यांतं स्वरूपस्वभावयोरवधिं अहं चतुर्मुखः न विदामि ते अग्रजाः स
नकादयः न विदंत्यन्ये कुतो जानीयुः ॥ किं बहुना दशशतान्याननानि यस्य स दशशताननः सहस्रमुखः आदिदेवः शेषः द्विसहस्रजिह्वाभ्यां
नं गुणान्गायन्नद्याधुनापि अस्य भगवतः पारं न समवस्यति नावध्यवस्यति ॥ ४१ ॥

ननु कैरप्यविज्ञातस्वरूपस्य भावधिते कथं तद्‌ज्ञानेन मुच्येरन्नित्याशंक्यापरिच्छिन्नस्य वस्तुनोऽपरिच्छिन्नत्वेनैव ज्ञानं मुक्तिसाधनं न तु परिच्छिन्नत्वे
नैव ज्ञानं मुक्तिसाधनं न तु परिच्छिन्नत्वेन तस्मात्तथा ज्ञानरूपत्वात् ततः परमात्मस्वरूपमपरिच्छिन्नत्वेन जानंतो भजमाना मुच्यंत एवेत्याह ॥ ये
षामिति ॥ निर्व्यलीकं निरपराधं यथा तथा येषां सर्वात्मना उपायो ये यत्व वुध्या आश्रितपदः संश्रितः पदो यद्विभवेत्स एव भगवांस्तान्
दययेत ॥ भगवद्दयाविषयाः दुस्तरां तर्त्तुमशक्यां देवस्य विष्णोर्मायामतितरंति निःशेषं तरिष्यंति ॥ चकारात्तत्स्वरूपस्य भावाहिकमपि
यथावस्थितत्वेन जानंति ॥ एवं सर्वात्मना भगवत्प्रपन्नानामात्मसमं विचक्ष्महे ॥ इत्युक्तदेहात्मभ्रमोपि निवर्त्तत इत्याह ॥ नैषामिति

येषां स एव भगवान्दययेदनंतः सर्वात्मनाश्रितपदो यदि निर्व्यलीकम् ॥ ते दुस्तरामतितरंति च देवमायां नैषां ममाह
मिति धीः श्वसृगालभक्ष्ये ॥ ४२ ॥ वेदाहमंग परमस्य हि देवमायां यूयं भवश्च भगवानथ दैत्यवर्यः ॥ पत्नी मनोः स च
मनुश्च तदात्मजाश्च प्राचीनवर्हिरिभुरंग उत ध्रुवश्च ॥ ४३ ॥ इक्ष्वाकुरैलमुचकुंदविदेहगाधिरघ्वंवरीषसगरा गय
नाहुषाद्याः ॥ मंधात्रलर्कशतधन्वतरंतिदेवदेवव्रतो वलिरमूर्त्तरयो दिलीपः ॥ ४४ ॥ एषां सर्वात्मना भगवंतमाश्रिता
नां श्वसृगालानां भक्षणयोग्येपि कलेवरे ममाहमिति धीः ॥ अनात्मन्यात्मवुद्धिर्या अस्वे स्वमिति या मतिरिति स्थानोक्तधीः नास्तीत्यर्थः । ४२
किमेवंविधा भगवत्प्रपन्ना अपि संतीत्यत आह । वेदेति ॥ अंग हे नारद अहं वेद जानामि भगवंतमिति शेषः ॥ परमस्य भगवतो योगमायां
दैवीं ह्येषा गुणमयीत्युक्तप्रकारां स्वदेहेंद्रियादिरूपेण संयुज्यमानां विचित्रसर्गकरीं प्रकृतिं तरिष्यामीति शेषः । यूयमित्यादीनां विद्मेत्य
नितरंति वेत्युपरितनेनान्वयः यूयमिति सनकाद्यभिप्राय एव बहुवचननिर्देशः भवो रुद्रः भगवानिति विशेषणं रुद्रविशेषणं दैत्यव

विभीषणादयश्च वयं मुख्या येषां ते भगवद्दासादयः ॥ ४५ ॥ येते सर्वे विदंति परमात्मानं देवमायां देवस्य विष्णोर्नियाम्यां मतितरंति च । किंबहुना भागवत
संगेन तिर्यंचोपि तरिष्यंतीत्याह ॥ अद्भुताः क्रमाः पादविन्यासा यस्य स अद्भुतक्रमो भगवांस्त्रिविक्रमः स एव परायणं उत्कृष्टं आश्रयं प्रापकमाधार
श्च येषां ते च भागवतानां शीले शिक्षा वासना येषां ते न यथाभूता यदि भवेयुस्तर्हि तिर्यग्जना अपि तरंतीत्यनुषंगः श्रुतेर्थे धारणं येषां मनुष्याब्रा
ह्मणादयः तिरश्चां श्रुतार्थधारणापि नास्तीति ज्ञापनार्थमिदम् ॥ ब्राह्मणादयस्तरंतीति तत्र किमु वक्तव्यमित्यर्थः ॥ ४६ ॥ ननु कीदृशं तत्स्वरूपं य

सोमर्युतं कुशिवदेवहूत्यपिप्पलादाः सारस्वतोद्धवपराशरभूरिषेणाः ॥ येन्ये विभीषणहनूमदुपेंद्रदत्ताः पार्थार्ष्टिषेण
विदुरश्रुतदेववर्याः ॥ ४५ ॥ ते वै विदंत्यतितरंति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः ॥ यद्यद्भुतक्रमपरायण
शीलशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥ ४६ ॥ शश्वत्प्रशांतमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वं
शब्दो न यत्र पुरुकारकवान् क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना ॥ ४७ ॥

द्भवदादयो जानंतीत्यपेक्षायां तत्स्वरूपं चिदचि
द्विलक्षणत्वेन विशेषोऽध्यनस्वरूपानुचिंतनपरायणानां स्वर्गाद्यर्थानुष्ठानोपकरणत्याग आर्थिक इत्याह ॥ श्लोकद्वयेन शश्वदिति विशोकं दुःखा
संभिन्नमजस्रसुखं निरानंदमयं यद्ब्रह्मेति विदुः सत्यं ज्ञानमनंतं विज्ञानमानंदं विशोको विजर इत्यादयो वेदांता आमनंति तदेव परमस्य पुंसः
परमपुरुषस्य भगवतः परं स्वरूपमित्यर्थः ॥ ननु किं विशेषेण वेदांतवेद्यतं उच्यते न प्रमाणांतरविषयत्वमित्यत आह ॥ मायाजडात्मिका मायाऽभि
मुखेऽवस्थातुं इतिशेषः ॥ विलज्जमाना सती परैति तिरोधत्ते ॥ मायाकार्याणि मन आदींद्रियाणि तत्स्वरूपमवगंतुमसमर्थानीत्यभिप्रायः

भा·टि·
॥५६॥

नकेवलं त्वं लौकिकं प्रमाणाविषयत्वमेवास्यैवैदिकप्रमाणाभूतवेदैकदेशपूर्वभागाविषयत्वमपीत्याह ॥ आदइति ॥ पुरकारकः साध्यसाधनाद्यनेककार
कान्वितः क्रियार्थः क्रियाप्रतिपादकः शब्दः वेदपूर्वभागोपि यत्रस्वरूपेन सा शास्त्राद्बोधकइत्यर्थः ॥ सर्वैर्वेदा यत्पदमामनंतीति तु सर्वकर्माराध्यं
ब्रह्मस्वरूपमपर्यवसानवृत्या आमनंतीत्येतत्तात्पर्यकम् । तपांसि सर्वाणि च यद्वदंतीत्युक्तं । तपांसित पुः प्रधानाउपनिषद्भागावदंति साक्षा
द्बोधयंतीत्यर्थः ॥ ननु जीवस्यापि स्वरूपमजस्रसुखमेवेत्यत आह ॥ परमात्मतत्वमिति ॥ सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्मेति वाक्यप्र
सिद्धज्ञानेनाजस्रसुखस्यानंतत्वेन विशेषितत्वात् परिछिन्नदुःखासंभिन्ननित्यसुखस्वरूपत्वं परमात्मन एव स्वरूपमित्यर्थः ॥ ननु जीवव
दस्यापि कर्माधीनसुखदुःखसंबंधः स्यादिति शंकां वारयति ॥ शुद्धमिति ॥ अकर्मवश्यमित्यर्थः ॥ अत एव स दृढसत्तोऽश्विद्वचितोः परं विल
सत्वं ॥ अकर्मवश्यता कुत इत्यत आह ॥ समं इत्येकरूपमित्यर्थः ॥ चिदचिदंतर्यामित्वेनावस्थितस्यापि तत्तद्वगुणदोषासंस्पर्शादकर्मव
श्यतापपन्नेति भावः ॥ नन्वाम्लादिफलानां तत्तद्देशभेदेनाम्लमधुरादिरसवत्सुखापरपर्यायानुकूलज्ञानस्वरूपस्य ब्रह्मणः प्रदेश
भेदेन जडरूपता स्यादित्याशंकां वारयति ॥ प्रतिबोधमात्रमिति ॥ प्रतिबोध एव प्रतिबोधमात्रं मात्रचा क्वापि जडत्वव्यावृत्तिः ॥ विज्ञा
नघन एव प्रज्ञानघन एवेति श्रुतिः मोक्षप्रदत्वमप्यस्यासाधारणो धर्म इत्याह ॥ अभयं न विद्यते भयं यस्मात्तद् भयं संसारनिवर्त्तकं इ
त्यर्थः ॥ न कुतः शाम्यत्प्रशांतं प्राप्य वृत्त्यहाप्रशांतमशनायापिपासाधुर्मिषट्करहितमतस्तदुपासकानामपि शांतिसंपादकमिति ।
भावः परमसाम्यमुपैति । मम साधर्म्यमागता इति हि श्रुतिस्मृती ॥ ५ ॥ किंच ॥ यत एवं अत भगवत्स्वरूपचिंतने प्रयतमानाः सध्रङ्स
ह्रांचतीति सध्रङ् सहस्य सध्रादेशः ॥ जीवसहचरं मनः नियम्य यत्र उक्तस्वरूपे नियतं कृत्वाऽकर्त्तृहेति किं कृत्यते ऽछिद्यंते ऽनेने
संशया इति कर्तृज्ञानं ॥ छिद्यंते सर्वसंशया इति श्रुतेः ॥ कृतीछेदने ॥ तदितरकर्तृस्वर्गादिफलसाधनं कर्मेत्यर्थः ॥ तस्यहेतिं उपकर । ॥५६॥

करणं जह्युः॥ तत्र दृष्टांतः स्वराट्वर्षप्रदः इंद्रः निपानखनित्रमिव निनितरां पिबंत्यस्मिन्निति निपानं कूपः तस्य खनित्रं खननसाधनमिव स्व
र्गाद्यर्थानुष्ठानोपकरणमयो देवत्यजंतीत्यर्थः॥ ४८॥ ननु स्वर्गादिफलेप्सूनां तत्साधनोपकरणोपादानमावश्यकमित्यत आह॥ सइ
ति॥ भावस्वभावविहितस्य भावा॥ ब्राह्मणादिवर्णाश्रमादयः तेषां स्वभावोनानुगुणेन विहितस्य सतः कर्मणः प्रसिद्धिः फलप्रसिद्धि
र्यतः स भगवान् श्रेयसां स्वर्गादिफलानामपि विभुः प्रभुः तत्फलप्रदातेत्यर्थः॥ अंतरात्मतयाऽवस्थितस्य परमात्मन एव स्वर्गाद्य
र्थकर्मस्वपि प्रवर्तकत्वात् तदाराधकत्वात्तत्फलदत्वाच्च तद्भजनेनैवेप्सितस्वर्गादिफलस्यापि सिद्धेः कामिभिरपि स एव भजनीय इ

तं वै परं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकं॥ सध्र्यङ्नियम्य यतयो यमकर्तहेतिं जह्युः
स्वराडिव निपानखनित्रमिंद्रः॥ ४८॥ स श्रेयसामपि विभुर्भगवान्यतोस्य भावस्वभावविहितस्य सतः प्र
सिद्धिः देहे स्वधातुविगमेनुविशीर्यमाणे व्योमेव तत्र पुरुषो न विशीर्यतेऽजः॥ ४९॥

त्यर्थः॥ भगवतः सर्वांतर्या
मित्वे शरीरगतं चेतनाचेतनगतदोषसंस्पर्शमाशंक्याह॥ देहइति॥ स्वधातुविगमे स्वधातूनां स्वदेहारंभकभूतसूक्ष्माणां विगमे
वियोगे सत्यनुपश्चाद्विशीर्यमाणे देहे॥ तत्रस्थः पुरुषः परमपुरुषः गगनमिव न शीर्यते कुतः अजः कर्माधीनोत्पत्यादिरहितः अत्र देहे
शब्दः चेतनस्यापि प्रदर्शनार्थः॥ चिदचिद्गतदोषास्पृष्ट इत्यर्थः॥ अस्मिन्नध्याये जीवपरत्ववर्णनं तु शोभनं॥ कृत्स्नस्यास्य प्रकरणस्य
परमात्मपरत्वेन मध्ये जीवप्रशंसाया भावात् जीवस्यापि शरीरद्वारोत्पत्तिविनाशयोर्विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्ये

अध्यायत्रयार्थमुपसंहरति। सोयमिति हे तात। नारद सोयं पूर्वं प्रतिपादिताकारः विश्वभावनः विश्वकारणभूतः भगवान्ज्ञानशक्तिवलैश्वर्यादिसंप
न्नो वासुदेवः समासेन संग्रहेणानुक्रममभिहितः मयेति शेषः संग्रहमेवाह॥ यत्सदसच्चिदचिदात्मकं वस्त्वन्यदतदात्मकं स्वनिष्टमिव भाति तन्न हरेर्ना
न्यत्तदात्मकमेवेत्यर्थः॥ हरेर्नान्यन्तत्सदसच्चयदिति पाठे नान्यदन्यस्मात्सदसच्चयदिति पाठे त्वन्यस्मात्सदसत्वलक्षणादपि हरेः सदसदात्मकं ना
न्यत्किंतु तदात्मकमेवेत्यर्थः॥५०॥ स्वोक्तसंग्रहस्य प्रामाणिकत्वं कथयन्॥ त्वमप्येतत्प्रवर्त्तयेत्याह॥ इदमिति॥ भगवद्विभूतीनामयं संग्रह इ

सोहं तेभिहितस्तात भगवान्विश्वभावनः॥ समासेन हरेर्नान्यदन्यस्मात्सदसच्चयत्॥५०॥ इदं
भागवतं नाम यन्मे भगवतोदितम्॥ संग्रहोयं विभूतीनां त्वमेतद्विपुलीकुरु॥५१॥ यथाह
रौ भगवति नृणां भक्तिर्भविष्यति॥ सर्वात्मन्यखिलाधारे इति संकल्प्य वर्णय॥५२॥ त्व
जन्मननितुष्येत कृतेन भगवान्यदि॥ धर्मार्थकामैः किं तर्हि कार्यं सिध्यति नस्वरैः॥५३॥

ति यदिदं भागवतं भगवद्विषयत्वाद्भगवता प्रोक्तत्वाच्च भागवतनामकं मे मह्यं भगवतोदितं एतदिदं भागवतं त्वं विपुलीकुरु॥५१॥ वैपुल्य
प्रकारमाह यथेति॥ सर्वात्मनि सर्वान्तरात्मन्यत एव सर्वाधारे भगवति नृणां भक्तिर्यथा भविष्यति याहृश वर्णनेन भविष्यति तथा संकल्प्य
वर्णयेत्यर्थः॥५२॥ ननु त्रिवर्गोपयोगी यथा भवेत्तथा वर्णयेति तिकुन्नेच्यत इत्यत आह॥ त्वजन्मतीति॥ मनुष्यजन्मनि कृतेन साधनकलापे
न भगवान्न तुष्येत यदि तर्हि नश्वरैरेभिर्मादिभिः॥ किं कार्यं किं प्रयोजनं न किमपीत्यर्थः॥५३॥ ॥५७॥

धर्मस्य ह्यापवर्गस्येति। पूर्वोक्तरीत्या परस्य भगवद्भक्त्यानुयुज्यमानानामेव सा फलं केवलानां तु वैफल्यमन्वयव्यतिरेकाभ्यामाह॥ कृत इति। किंस्यादि
त्यर्थः पूर्वोत्तरार्द्धाभ्यां संबध्यते॥ अन्यपापिष्ठव्यभिचारिणी समस्तदुरितनिवर्तके उत्तमः श्लोकः स्तवः यस्य तस्मिन्नुत्तमश्लोके ऽधोक्षजे भक्ति
र्न चेद्वर्णाश्रमाचारादिभिः किं स्यान्न किमपीत्यर्थः॥५४॥ भगवद्भिन्नतिवर्णनादीनां फलमाह॥ मायामिति॥ अमुष्येश्वरस्य मायां प्रकृतिं जगत्स्र
ष्ट्यादिप्रकारं इत्यर्थः॥ वर्णयत अनुमोदतः श्रद्धया नित्यं शृण्वत एव तस्यात्मान्तःकरणं मायया मायागुणैस्तमआदिभिर्न मुह्यतीत्यर्थः॥५५॥ इति

कृतेन चोत्तमश्लोके चेद्भक्तिरनपायिनी॥ किं स्याद्वर्णाश्रमाचारदानहोमादिभिः कृतैः॥५४॥ मायां वर्णयतोमुष्य ईश्वर
स्यानुमोदतः॥ शृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति॥५५॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे सप्तमोऽध्यायः॥७॥
शौनक उवाच॥ ब्रह्मणा चोदितो ब्रह्मन् गुणाख्याने गुणस्य च॥ यस्मै यस्मै यथा प्राह नारदो देवदर्शनः॥१॥ एतद्वेदितुमिच्छामि तत्त्वं
वेदविदांवर॥ हरेरद्भुतवीर्यस्य कथा लोकसुमंगलाः॥२॥ कथयस्व महाभाग यथाहमखिलात्मनि॥ कृष्णे निवेश्य निःसं
गं मनस्त्यक्ष्ये कलेवरम्॥३॥

श्रीधरस्वामिलिखितायां श्रीमद्भागवतभावार्थदीपिकायां तृतीयस्कंधे सप्तमः॥७॥ तमेतद्विपुलीकुर्वित्युक्तं विपुलीकरणं राजा
पृच्छति॥ ब्रह्मणेति॥ हे ब्रह्मन्॥ पृथक देवदर्शनः परमात्मदर्शी नारदः॥ ब्रह्मणा चतुर्मुखेन गुणस्य सत्त्वादिमायाकृतगुणरहितस्य भगवतः गुणाख्याने
गुणानुकथने चोदितः प्रवर्तितः यस्मै यस्मै प्रश्नायेति शेषः। यद्वा पृष्टेनेति। यथा प्राह यादृशमित्यर्थः॥१॥ एतत्सारहेन विस्तरेण वर्णितं वेदितु
मिच्छामीति॥ तत्तस्माद्वेदविदांवर त्वमद्भुतवीर्यस्य हरेः लोकसुमंगलकराः कथाः कथयस्व॥२॥ हे महाभाग बुद्धिमत्सर्वान्तरात्मनि कृष्णे निः

संगं मनो निवेशय कलेवरं त्यजते। भगवत्कथाः शृण्वन्नेव तमेवावसाने स्मरन्देहं त्यजाम्यतः कथयस्वेत्यर्थः॥ ३॥ अल्पकालकथाश्रवणेन कथमव
साने स्मृतिः संपद्यते इत्यत आह। शृण्वत इति। भगवान्स्वचेष्टितं नित्यं श्रद्धया शृण्वतो गृणतः कथयतश्च पुंसः हृदये नातिदीर्घेण अल्पेन का
लेन विशति शृण्वतो गृणतश्च चित्तं तत्स्मरणप्रवणमेव भवतीत्यर्थः भगवतो हृदयप्रवेशफलमाह। प्रविष्ट इति॥ कर्णरंध्रेण कथा
श्रवणद्वारा स्वानां भक्तानां भावसरोरुहं हृदयकमलं प्रविष्टः श्रीकृष्णः हृदयगमलं रागादिरूपं मलं धुनोति निरस्यति। यथा शरदृतु
कालः सलिलस्य शमलं धुनोति तद्वदित्यर्थः॥ ५॥ ततश्च कृतार्थो भवतीत्याह॥ धौतात्मेति॥ धौतात्मा शुद्धमनाः पुरुषः कृष्णस्य पादं मूलं न

शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितं॥ कालेन नातिदीर्घेण भगवान्विशते हृदि॥ ४॥ प्रविष्टः कर्णरंध्रेण स्वानां भावसरो
रुहं॥ धुनोति शमलं कृष्णः सलिलस्य यथा शरत्॥ ५॥ धौतात्मा पुरुषः कृष्णपादमूलं न मुंचति। मुक्तसर्वपरिक्लेशः पां
थः स्वशरणं यथा॥ ६॥ यदधातुमतो ब्रह्मन्देहारंभोऽस्य धातुभिः॥ यदृच्छया हेतुना वा भवंतो जानते यथा॥ ७॥

मुंचति तदेव स्मरतीति भावः॥ कथं भूतोऽन मुंचति मुक्तः सर्वपरिक्लेशः मुक्ताः सर्वे रागद्वेषादयः परिक्लेशा येन स यथा पांथः प्रवासादागतः स्वश
रणं स्वगृहं न मुंचति न त्यजतीत्यर्थः॥ ६॥ एवं श्रवणौत्सुक्यमाविःकृत्वा ज्ञातानर्थान्पृथिव्यान्क्रमेण वक्ष्यमाणः तावत्संदिग्धानर्थान्पृच्छति॥ यदि
ति। हे ब्रह्मन् अधातुमतः स्वरूपतो भौतिकदेहहीनस्यास्य जीवस्य देहारंभः धातुभिरेवस्यादिति तज्ज्ञातमित्यर्थः॥ इदं तु संशयविषयमित्या
ह। स च देहारंभः किं यदृच्छया हेतुकः हेतुना वा सहेतुको वेत्यर्थः॥ एतद्भवंतो यथावज्जानते अतः कथयंत्विति शेषः योसावीश्वरः सोपि ॥ ५८॥
जीवदेहतुल्यदेहवान्प्रोक्तः अतस्तस्य को विशेषः॥ ७॥

यतस्तद्रजन्मायदेयदेशोऽत्र इत्यु अनेनत्याशयेन पृच्छति ॥ आसादितिसार्द्धेन लोकानां संस्थानविन्यासो यस्मिंस्तत्तदेवलक्षणम् ॥ स्वरूपं यस्य तज्जगदाका
रं यद्यविभिन्यर्थः ॥ त्रिलोक्यात्मकं पद्मं यस्योदरादासीत् यद्विभक्तः इयत्तावयवैः संपुरुषः लौकिकः पुरुषः यावान्यावत्प्रमाणस्तावत्परिमाण एवा
साबीश्वरः प्रोक्तः स्यात्परिच्छिन्नत्वेन प्रोक्तः स्यात्परिच्छिन्नत्वेन प्रोक्त इति भावः स्वसंस्थावयवानिव ॥ तज्जलानीतिवदयं निर्देशः स्वसंस्थानभू
तैरवयवैरनजीवत्संसारीपरिच्छिन्नस्तद्वदित्यर्थः ॥ अतोजीवपरयोर्विशेषः कथनीय इत्यर्थः ॥ ८ ॥ अन्यदपि पृच्छति ॥ अज इति ॥ भूतात्मा भूतानां
यष्टिभूतानां व्यष्टिभूतानामात्मा नियंता ॥ यदा ॥ स्वयं भूतारब्धदेहः नाभिपद्मसमुद्भवः अजो ब्रह्मा यदनुग्रहाद्यस्मान्निरुद्धस्यानुग्रहाद्भूतानि

आसीद्यदुदरात्पद्मं लोकसंस्थानलक्षणं यावानयं वै पुरुष इयत्तावयवैः पृथक् ॥ तावानसाविति प्रोक्तः स्वसंस्थावयवानिव ॥ ८ ॥
अजः सृजति भूतानि भूतात्मा यदनुग्रहात् ॥ ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः ॥ ९ ॥ स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः
॥ मुक्त्वात्ममायां मायेशः शेते सर्वगुहाशयः ॥ १० ॥ पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः ॥ लोकैरमुष्यावयवाः सपालैरिति
शुश्रुमः ॥ ११ ॥

व्यष्टिभूतानि सृजति येन चतुर्मुखेन तद्रूपं तद्धानिरुद्धरूपं ददृशे ॥ ९ ॥ स भगवान्विश्वस्थित्युद्भवाप्ययः विश्वस्थित्युद्भवाप्ययः विश्व
स्यस्थित्युद्भवाप्ययः विश्वस्य स्थित्युद्भवाप्यया यस्मात्तथाभूतः मायाया नियंता आत्ममायां मुक्त्वा प्रकृतीमतीत्य जगद्व्यापाराद्दुपरतः सर्वगुहाश्र
यः पूर्णषाड्गुण्यः यत्र शेते वसति तं देशं कथयस्वेत्यन्वयः ॥ १० ॥ यस्य महावयवैर्लोकान्कल्पयंति ॥ पातालमेतस्य हि पाद मूलमित्युभयथाश्रवणा
त्तस्य कल्पने हेतोपपत्तिमन्वानः ॥ आशंकते पुरुषेत्यादिना ॥ पुरुषावयवैरनिरुद्धाद्दुत्पन्नचतुर्मुखाख्यपुरुषावयवैः सपालाः शेषाः लोकाः पू
र्वकल्पिताः पूर्वस्मिन्कल्पे कल्पिताः इदानीमपि तथेति शुश्रुमइत्याह ॥ सपालैर्लोकैरमुष्य पुरुषस्यावयवाः कल्पिता इति शुश्रुम एवं च धाताय

भा॰ द्वि॰

॥५४१॥

अयात्रातान्थीन्वहून्रछति। यावानित्यादिना। कल्पोमहाकल्पः यावान्यावत्परिमाणकः विकल्प अवांतरकल्पकालभागः। यावान्भूतभ
भव्यभवदादिशब्दवाच्यः कालः यथानुमीयते अहःसंध्याद्यादिनेतिभावः सतः कार्यस्य देवपितृमनुष्यादेराायुर्मानं मायुः। परिमाणं यतद
पुदाहर्तुमर्हसित्यन्वयः॥१२॥श्रीकारामायनुजाय अणवीसूक्ष्मानिमेषरूपा बृहतीसंवत्सरादिरूपा यानुगतिः प्रवृत्तिर्लक्षते सापिकथनीयेत्यर्थः कर्मगतयः कर्मणः प्राप्यानिफलानि यावत्यः यावत्संख्याकायादृश्यः

यावान्कल्पोविकल्पोवा यथाकालोनुमीयते॥भूतभव्यभवच्छब्द आयुर्मानंचयत्सतः॥१२॥कालस्यानुगतिर्यातुलक्ष्य
तेणवीबृहत्यपि॥यावंत्यः कर्मगतयोयादृशीर्द्विजसत्तम॥१३॥यस्मिन्कर्मसमावायोयथायेनोपगृह्यते॥गुणानांगुणि
नांचैवपरिणाममभीप्सिताम॥१४॥भूपातालककुप्व्योमग्रहनक्षत्रभूभृता॥सरित्समुद्रद्वीपानांसंभवश्चैतदोकसां
॥१५॥प्रमाणमंडकोशस्यबाह्याभ्यंतरभेदतः॥महतांचानुचरितंवर्णाश्रमविनिश्चयः॥१६॥ यत्मकारकाः॥१३

हे द्विजसत्तम यस्मिन्देशे कर्मसमवायः। कर्मणां फलनिष्पादनं येनदेवादिभूतेन यथा उपगृह्यते यादृशं कर्मफलं प्राप्यते तच्चयकथ
येत्यर्थः। गुणानां सत्वादीनां गुणिनां च परिणाममहेतु गुणिनां च गुणमहेतु गुणीनां परिणामो देवादिशरीरपरिग्रहहेतुः। सविस्तरं परिणामं वक्तुम
र्हसीति॥१४॥ककुभः दिशः भूभृतः पर्वताः भूपातालादीनां संभवः एतानिभ्वादीनि निकेतनानि येषां तेषां प्राणिनां च संभवः यद्येति सर्वत्रानुषंगः।
१५॥अंडकोशस्य ब्रह्मांडस्य बाह्याभ्यंतरवस्तुनश्च प्रमाणमंडात्वाह्यवस्त्वावरणं। महतां भागवतानामनुचरित्रम्। वर्णानामाश्रमाणां च विनिश्चयस्त त्स्वरूपस्वभावेननिर्द्धारः॥१६॥

॥५४१॥

हरेराश्चर्यतममवतारानुचरितं च यत्तदपि युगानि युगस्वरूपं युगपरिमाणं युगे युगे प्रतियुगम्॥१७॥ यो धर्मः साधारणः मनुष्यमात्रसाधारणः सवि
शेषः॥ वर्णाश्रमविशेषनिबंधनरूपविशेषयुक्तः प्राणिनां तत्र व्यवहारो यज्जीविनां धर्मः व्यवहारनियमलक्षणः धर्मः राजर्षीणां प्रजापाल
नाधिकारिणां कृच्छ्रेष्वापत्सु जीविनां यो धर्मः॥१८॥ तत्त्वानां महदादीनां परिसंख्यानं संख्यालक्षणं स्वरूपं हेतुलक्षणं तत्त्वकारणलक्षणं पुरुषा
राधनविधिः परमपुरुषाराधनप्रकारः॥ आध्यात्मिकस्य प्रकृतिविविक्तात्मस्वरूपविषयस्य योगस्य ज्ञानयोगस्य प्रकारः॥१९॥ योगेश्वराणामै

अवतारानुचरितं यदाश्चर्यतमं हरेः॥ युगानि युगमानं च धर्मो यश्च युगे युगे॥१७॥ नृणां साधारणो धर्मः सविशेषश्च या
दृशः॥ वर्णानां राजर्षीणां च धर्मः कृच्छ्रेषु जीविनाम्॥१८॥ तत्त्वानां परिसंख्यानं लक्षणं हेतुलक्षणं॥ पुरुषाराधनविधिर्
योगस्याध्यात्मिकस्य च॥१९॥ योगैश्वर्यं गतिर्लिंगभंगश्च योगिनाम्॥ वेदोपवेदधर्माणामितिहासपुराणयोः॥२०॥
संप्लवः सर्वभूतानां विक्रमः प्रतिसंक्रमः॥ इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः॥२१॥ यश्चानुशायिनां सर्गः पाषं
डस्य च संभवः॥ आत्मनो बंधमोक्षौ च व्यवस्थानं स्वरूपतः॥२२॥ यथात्मतंत्रो भगवान्विक्रीडत्यात्ममायया॥ विसृज्य वा य
थामायामुदास्ते साक्षिवद्विभुः॥२३॥

श्वर्याण्यणिमादीनि तेषां गतिः स्वरूपं योगिनां लिंगभंगः शरीरपातः वेदा ऋग्वेदादयः तदुक्ता धर्माश्च ते
षामितिहासपुराणयोश्च गतिः॥२०॥ सर्वभूतानां संप्लवः अवांतरप्रलयः उत्पत्तिर्वा विविधः क्रमः विक्रमः स्थितिः संक्रमः संहारः महाप्रलयः॥ इ
ष्टं वैदिकं कर्म पूर्तं स्मार्तं त्रिवर्गस्य धर्मार्थकामानां विधिः प्रकारः॥२१॥ अनुशायिनां भुक्तशेषकर्मणां सह परलोकभ्रष्टानां सर्गः उत्पत्तिः प्र
कारः पाषंडस्य पाषंडधर्मस्य संभवः उत्पत्तिः आत्मनो जीवस्य बंधमोक्षप्रकारः स्वरूपतो व्यवस्थानं मुक्तिदशायामवस्थानं तत्प्रकार इत्य

पुनस्त्वमात्मानंविसृजस्वयथायेनप्रकारेणसात्विकात्मात्वादृक्पूर्ववदुदास्तेप्रलयेउदासीनआस्ते॥२३॥एतत्सर्वंचकारादृष्टमपिगुह्यंयत्।तच्चएरन्ते
प्रपन्नायचमेमह्यंहेभगवन्हेमहामतेतत्वतउदाहर्तुंउत्तरंवक्तुंत्वमर्हसि॥अर्हताद्योतकमिदंविशेषणद्वयंभगवन्महामतेइतिचउत्पत्तिंप्रल
यंचैवभूतानामागतिंगतिम्वेत्तिविद्यामविद्यांसवाच्योभगवानितिहिस्मर्यतेमहामतित्वंचत्रैकालिकवस्तुयाथात्म्यज्ञानवत्वम्॥२४॥यो
ग्यतामेवोपपादयति॥अत्रेति॥अत्रस्मदैश्वर्येषुभगवान्प्रमाणंसम्यग्ज्ञाताततश्चदृष्टान्तःआत्मनःभूःजातःपरमेष्ठीब्रह्मायथाप्रमाणंतद्वत्
ब्रह्मनारदव्याससक्रमेणसंप्रदायोपपत्तीत्याह॥पूर्वेषामपिपूर्वजैःकृतंपरेऽर्वाचअनुतिष्ठन्ति॥२५॥ननुतत्वानशनद्विजशापाभ्यांव्याकुल

सर्वमेतच्चभगवन्पृच्छतोमेनुपूर्वशः॥तत्वतोर्हस्युदाहर्तुंप्रपन्नायमहामुने॥२४॥अत्रप्रमाणंभगवान्परमेष्ठीयथात्मभूः॥
परेचेहानुतिष्ठन्तिपूर्वैःपूर्वजैःकृतम्॥२५॥नमेऽसवःपरायन्तिब्रह्मन्ननशनादमी॥पिबतोच्युतपीयूषमन्यत्रकुपिताद्
द्विजात्॥२६॥सूतउवाच॥सउपामन्त्रितोराज्ञाकथायामितिसत्पतेः॥ब्रह्मरातोभृशंप्रीतोविष्णुरातेनसंसदि॥२७॥प्राहभाग
वतंनामपुराणंब्रह्मसंमितम्॥ब्रह्मणेभगवत्प्रोक्तंब्रह्मकल्पउपागते॥२८॥ सकुतःश्रवणेनत्राह॥नमइति॥अत्रत्वत्सन्निधौअच्यु
तपीयूषमच्युतकीर्तनरूपममृतंपिबतोमेऽसवःप्राणाःकुपितात्द्विजादनशनादपिहेतोःनपरायन्तेनापगच्छन्तिनव्याकुलीभवन्तीत्यर्थः
२६॥सूतवाक्यमाह॥सइति॥इतित्थंसतांपतेर्भगवतःकथायांराज्ञाविष्णुरातेनपरीक्षितोपामन्त्रितः।प्रवर्त्तितोब्रह्मरातोब्रह्मविषयकंज्ञानंरा
तीतिब्रह्मरातःश्रीशुकःसभायां॥२७॥भागवतंनामपुराणंप्राह॥कथंभूतम्॥ब्रह्मसंमितंवेदतुल्यंपरंब्रह्मप्रापकंवाब्रह्मकल्पेसृष्ट्युपक्र
मेउपागतेप्राप्तेसतिब्रह्मणेचतुर्मुखायभगवताप्रोक्तंचेत्यर्थः॥२८॥ ॐनमोभगवतेवासुदेवाय॥ श्रीमतेरामानुजायनमः ॥ ॥५०॥

पांडूनां ऋषभः श्रेष्ठः परीक्षिद्यदनुपृच्छति अन्वपृच्छत्तत्सर्वमनुपृष्टं सर्वमानुपूर्व्येण प्रस्तावक्रमेण न प्रश्नक्रमेण व्याख्यातुं भागवताख्यानेनैव प्रश्ना
नामुत्तरं वक्तुमुपचक्रमे उपक्रांतवान् ॥ २४ ॥ इति द्वितीये ८मः ॥ ८ ॥ अथ राज्ञः प्रश्नानामुत्तरं वक्तुं भागवताख्यानमारभमाणस्तावज्जीवस्य दे
हादिभिः सहेतुको निर्हेतुको वेति प्रश्नस्य जीवदेहतुल्यपरिमाणवयत्वेन जीवतुल्यत्वप्रयुक्तभजनीयत्वामोक्षप्रदत्वप्रश्नस्य मुक्तात्ममायांशे
नेतं धदेशं कथयत्वेति प्रश्नस्योत्तरं नवमेध्यायेनोच्यते ॥ तत्र सहेतुकत्वनिर्हेतुकत्वप्रश्नस्योत्तरं वदन् त्रियादिभूतिविशिष्टस्य भगवतः का
लमायावश्यत्वाभावं वक्तुं संसारिचेतनानां कालमायावश्यत्वमाह ॥ आत्मेति ॥ अनुभवात्मनः अनुभवो ज्ञानं तद्रूपात्मा स्वरूपं यस्य तस्मा
त्परस्य देहादिभ्यो विलक्षणस्य जीवस्यार्थसंबंधः भोग्यभूतशब्दादिविषयेषु भोक्तृतया संबंधः ॥ आत्ममायां परमात्मनियाम्यां मा

यद्युमतीक्षिद्दृशभः पांडूनामनुपृच्छति ॥ आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे ॥ २५ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे प्रश्नव
र्णनं नाम अष्टमोऽध्यायः ॥ ८ ॥ आत्ममायामृते राजन्परस्यानुभवात्मनः ॥ न घटेतार्थसंबंधः स्वप्नद्रष्टुरिवांजसा ॥ १ ॥ बहुरूप इवा
भाति मायया बहुरूपया ॥ रममाणो गुणेष्वस्या ममाहमिति मन्यते ॥ २ ॥

यां प्रकृतिमृते विना अंजसा समीचीनेन न घटेत न संगच्छेत तत्र
दृष्टांतः स्वप्नद्रष्टुरिवेति यथा स्वप्नद्रष्टुः ॥ न तत्र रथा न रथयोगा न पंथानो भवंति ॥ अथ रथान् रथयोगान्पथः सृजते कामं पुरुषो निर्मिमाण इ
ति श्रुत्युक्तरथादिपदार्थसंबंधस्तदर्थं भगवन्माययामृते नोपपद्यते । तद्वदित्यर्थः ॥ प्रकृतितिरोहितस्वपररूपत्वात्प्राकृतेषु भोग्यबुद्धिरित्युक्तं भ
वति ॥ एवं च प्रकृत्या तिरोहितस्वपररूपत्वमेव देहारंभहेतुरिति सहेतुकत्वं निरस्तं भवति ॥ उक्तं विवृणोति ॥ बह्विति ॥ बहुरूपया विचित्रपरिणामि
न्या भगवन्मायया तिरोहितज्ञानानंदस्वरूपो जीवः । देवमनुष्याद्याकारमात्मन्यारोप्य बहुरूप इव भातीत्यर्थः ॥ अस्या मायाया गुणेषु सत्त्वादिगु

भा.द्वि. णाकार्येषु शब्दादिषु रममाणः शब्दादीन्भुंजमानो ममाहमिति मन्यतेऽहंकारममकाराभ्यां बद्धो भवतीत्यर्थः ॥२॥ जीवस्य प्रस्तावात्तद्व्यवस्थानं स्वरूपप
त इति जीवविषयप्रश्नानंतरस्योत्तरं वदन्स्वरूपसाक्षात्कारे सति शब्दादिप्रावण्यनिवृत्तिरित्याह ॥ यर्हीति ॥ यर्हि यदा मुक्तावित्यर्थः ॥ स्वा
॥५१॥ भाविके कालमाययोः परस्मिन्कालमायाकार्यासंस्पृष्टे महिम्नि अपहतपाप्मत्वादिसत्यसंकल्पपर्यंतगुणाष्टकलक्षणे परमात्मशेषत्वैकरसस्य स्वा
त्मनो महिम्नि ॥ यद्वा कालमाययोः परस्मिन्नियंतरि महिम्नि उक्तविधपरमात्ममहिम्नि उक्तं ॥ महिम्नो नियंतृत्वं महिमवत्वात् ॥ रमेत गतसंमोहः
निहत्वाहंकारममकारः ॥ तदोभयं प्रकृतिकालवश्यत्वं त्यक्त्वा हित्वा उदास्ते शब्दादिषु भोग्यत्वसिद्ध्यर्थं प्रवृत्तिशून्यो भवतीत्यर्थः ॥ अनेनाविर्भूतगु
णाष्टकविशिष्टत्वेनावस्थितिरेव स्वरूपतो व्यवस्थानं तादृशस्वरूपस्यापि स्वात्मन आत्मभूतनिरतिशयानंदपरब्रह्मानुभवः परब्रह्मशरीरम्

यर्हि वावं महिम्नि स्वे परस्मिन्कालमाययोः ॥ रमेत गतसंमोहस्त्यक्त्वोदास्ते तदोभयम् ॥३॥ आत्मतत्वविशुद्ध्यर्थं यदाह भगवान्नृ
तम् ॥ ब्रह्मणे दर्शयन्रूपमव्यलीकव्रतादृतः ॥४॥

न त्वेन स्वात्मानुभवो वा शब्दादिप्रावण्यनिवर्तक इति चोक्तं भवति ॥३॥ यच्चोक्तं भगव
तोपि जीववद्देहसंबंधाविशेषात्कथं तदजने भमुक्तिरिति तस्योत्तरं कालमायावश्यजीवस्य कर्माधीनः प्राकृतो देहः ईश्वरस्य त्वप्राकृतस्वे
च्छोपात्तदिव्यविग्रहवत्वमिमेवं वदन्कालमायावश्यजीवविलक्षणभगवत्स्वरूपविशोधनं कथं ज्ञायत इत्यत्राह ॥ आत्मतत्वेति ॥
अव्यलीकव्रतादृतः निर्दुष्टव्रतेन आदृतः आराधितः भगवान्ब्रह्मणे चतुर्मुखाय रूपमप्राकृतं स्वीयरूपं दर्शयन्नात्मतत्वविशुद्ध्यर्थं जी
वविलक्षणपरमात्मयाथात्म्यविशोधनार्थं ऋतं सत्यं यद्वचनमाह तद्वक्ष्यामीति शेषः ॥ अदर्शयद्रूपमिति पाठे यया दर्शयत तथाहेत्य
र्थः ॥४॥ ॥५१॥

आत्मतत्त्वविशोधकंभगवद्वाक्यमेवोपपादयितुमितिहासमाह॥सइति॥जगतांव्यष्टिभूतानांपरःप्रभुःगुरुरीश्वरोपदेष्टाचादिदेवःचतुर्मु
खःस्वधिष्ण्यंभगवन्नाभिपद्मरूपंस्थानमास्थायाधिष्ठानस्यान्वेषणायपूर्वंजलेनिमग्नःपश्चात्पराहृत्यस्वधिष्ण्येस्थित्वेत्यर्थः॥सिसृ
क्षयास्रष्टुमिच्छयाऐक्षतकथंस्रक्ष्यामीत्यालोचितवान्॥एवमीक्षमाणोब्रह्मायया दृष्ट्याप्रपंचनिर्माणविधिः॥जगद्रचनाप्रकारःभवेज्जाते
भवेत्अत्रसृष्टिविषयेसंमतांतांदृशंप्रज्ञांनाध्यगच्छन्नप्राप्तवान्॥५॥सचिंतयन्निति॥प्राज्ञाप्राप्त्युपायंचिंतयन्नेकदाचित्॥द्विर्गदितंद्वि

सआदिदेवोजगतांपरोगुरुःस्वधिष्ण्यमास्थायसिसृक्षयैक्षत॥तांनाध्यगच्छद्दृशमत्रसंमतांप्रपंचनिर्माणवि
धिर्ययाभवेत्॥५॥सचिंतयन्द्व्यक्षरमेकदांभस्युपाशृणोद्द्विर्गदितंवचोविभुः॥स्पर्शेषुयत्षोडशमेक
विंशंनिष्किंचनानांनृपयद्धनंविदुः॥६॥निशम्यतद्वक्तृदिदृक्षयादिशोविलोक्यतत्रान्यदपश्यमा
स्वधिष्ण्यमास्थायविमृश्यतद्धितंतपस्युपादिष्टइवादधेमनः॥७॥

रुक्तंद्व्यक्षरंवचः॥अंभसिजलेउपाशृणोत्उपसमीपेश्रुतवान्।तेऽक्षरेदर्शयति।कादयोमावसानाःस्पर्शास्तेषुयत्षोडशंतकारःयच्चैकविंशंयका
रः॥वक्तव्यविशेषप्रार्थनरूपमाह।हेनृपनिःकिंचनानांत्यक्तधनानांधनंयद्विदुः।येनतपोधनाइतिप्रसिद्धाः।तच्चद्विर्गदितंतपतपेति।लोण्मध्यम
पुरुषैकवचनंतस्यवीप्सायांसादरविधिरूपामन्त्रणमित्यर्थः॥निशम्येति॥तपतपेतिवचोनिशम्यश्रुत्वातस्यवचसोयोवक्तातस्यदिदृक्षया
द्रष्टुमिच्छयाततःप्रचलितःसन्दिशोविलोक्यतत्रदिक्ष्वन्यद्वक्तारमपश्यमानःपुनःस्वधिष्ण्यमास्थायतपसिउपादिष्टइवकेनचित्प्रमहे

भा॰द्वि॰

॥५२॥

दिव्यमिति। ततश्च सर्व्वस्याखिललोकानां तापनं प्रकाशं यस्मात्तथाभूतं तपः दिव्यं सहस्राब्दं देवमानेन सहस्रवर्षपर्य्यंतमतप्यत ॥ तपतां तपश्चरतां मध्ये
तपीयान्संततपःसंयुक्तः। अमोघदृष्टिः स्वचरितव्येतपस्यव्यर्था दृष्टिः संकल्परूपज्ञानं यस्य सः। जित अनिलः प्राणवायुरात्मा मनश्च येन सः
विजितान्युभयेंद्रियाणि ज्ञानकर्मात्मिकानि येन सः। एवंभूतोऽतप्यतेत्यर्थः। स्मेति प्रसिद्धौ ॥८॥ तस्मा इति ॥ सभाजितस्तपसा सम्यगाराधितो भ
गवान् ॥ एवमन्यद्यद्यस्मात्परमुत्कृष्टं नास्ति तथाभूतं लोकं तस्मै चतुर्मुखाय संदर्शयामास ॥ तमेव लोकं वर्णयति पंचभिः। अपेतसंक्लेशावि
मोहसाध्वसं संक्लेशा अविद्यादयः साध्वसं भयं व्यपेताः संक्लेशादयो यस्मात्तं स्वदृष्टवद्भिः स्वशरीरकं परमात्मानमनुभवद्भिः। विबुधैर्विशेषे

दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेंद्रियः ॥ अतप्यत स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहि
तः ॥८॥ तस्मै स्वलोकं भगवान्सभाजितः संदर्शयामास परं न यत्परम् ॥ व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैर
भिष्टुतं ॥ प्रवर्त्तते यत्र रजः तमस्तयोः सत्वं च मिश्रं न च कालविक्रमः ॥ न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरार्चि
ताः ॥१०

णबुध्यंते इति विबुधास्तान्नाधिकानित्यमुक्तास्तैरधिष्ठितं ॥९॥ क्लेशामोहाद्यभावमाह। प्रवर्त्तत इति ॥ रजस्तमसी तयोस्ताभ्यां मिश्रं
सत्वं च यत्र वैकुंठाख्यलोके न प्रवर्त्तते ॥ अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशा रजस्तमोविरहाद्रागद्वेषादिकं मोहनं च नास्ति तन
मिश्रसत्वाभावात्कदाचिदप्रकाशश्च नास्ति तस्माच्छुद्धसत्वमय इत्यर्थः। कालविक्रमः कालस्य यो विक्रमः परिणामहेतुत्वं तच्च नेत्यर्थः
माया सत्वरजस्तमआश्रया प्रकृतिः यत्र न अप्राकृतन इत्यर्थः अनेन लोकस्य मायाकल्पितत्वशंकार निरस्ता यत्र लोके सुरासुरैरर्चि
ता हरेरनुव्रता उपासका दृश्यंते इति शेषः ॥१०॥ ॥५२॥

कथंभूता इत्यपेक्षायां सारूप्यमाह ॥ श्यामेत्यादिना ॥ श्यामाश्चते ऽवदाता उज्ज्वलाश्च श्यामावदाताः शतपत्रलोचनाः पर्म्लायतेक्षणाः
पिशंगवस्त्राः पीतांबरधराः सुरुचः दीप्तिमंतः सुपेशसः । अतिसुकुमाराः उन्मिषंतः देदीप्यमानाः मणयो येषु तानि प्रवेकानि श्रेष्ठानि नि
ष्कानि कनकमयानि आभरणानि येषां ते सुवर्चसः अतिलावण्यवंतः ॥ १४ ॥ प्रवालादिवद्वर्चोवर्णो येषां परिस्फुरंति कुंडलानि मौलयः
मुकुटानि मालाश्च येषां संतीति तथाभूताः आर्ष इत्वत इति तपः करणात ॥ भ्राजिष्णुभिर्दैदीप्यमानाभिर्महात्मनां नित्यमुक्तानां प्रकाश
मानविमानपंक्तिभिर्यः लोकः परितो विराजते ॥ १५ ॥ विद्योतमान इति ॥ यश्च प्रमदोत्तमानां दिवः कांतयस्ताभिर्विद्योतमानस्तं संदर्शयामा

श्यामावदाताः शतपत्रलोचनाः पिशंगवस्त्राः सुरुचः सुपेशसः ॥ सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्च
सः ॥ १४ ॥ प्रवालवैदूर्यमृणालवर्चसः परिस्फुरत्कुंडलमौलिमालिनः ॥ भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलि
भिर्महात्मनाम् ॥ १५ ॥ विद्योतमानः प्रमदोत्तमाद्युभिः सविद्युदभ्रावलिभिर्यथा नभः ॥ श्रीर्यत्र रूपिण्युरुगायपादयोः करो
मानं बहुधा विभूतिभिः ॥ १६ ॥

सेति पूर्वेणान्वयः । तत्र ददर्शेत्युत्तरेणवान्वयः । तत्र दृष्टांतः विद्युद्भिः तडिद्भिः सहवर्तमानाः सविद्यु
तः अभ्राणां मेघानां मावलयः पंक्तयः ताभिर्नभो यथा विराजते तद्वदित्यर्थः ॥ विद्युत इव स्त्रियः अभ्रपंक्तय इव विमानानि नभ इव लो
कः श्रीर्महालक्ष्मीर्यत्र लोके रूपिणी प्रशस्तमूर्तिमती उरुगायस्य भगवतः पादयोर्मानं पूजां विभूतिभिः भूनीलादिभिः सह करोति
१६ ॥ कथंभूता करोति ॥ या श्रीः प्रेंखं दोलां श्रिता कुसुमाकरानुगैः शुककोकिलभृंगादिभिः विविधं गीयमाना स्वयं तु प्रियस्य भगवतः क
र्मगायती भवति सा श्रीमननं करोतीत्यर्थः ॥ य एवंभूतो लोकस्तत्र श्रियः पतिं ददर्शेत्यन्वयः कथंभूतं यज्ञपतिं तपआदियज्ञानां प्रवर्त

कुमाराद्यं फलप्रदं च जगत्पतिं विहरविहारात्मकजगतः शेषिणं अखिलानां सात्वतानां सत्वधर्मनिष्ठानां पतिं स्वलोकप्रापणेन रक्षकं सात्वतं
पंचरात्रम् ॥१४॥ सुनंदादिभिः स्वपार्षदश्रेष्ठैः परितः सेवितं विभुं सर्वांतरं भक्तेषु यः प्रसादोऽनुग्रहस्तस्मिन्नभिमुखं दृगासवं दृशि चक्षुष्या
सवोऽमृतं यस्य तं । यद्वा दृगासवमिव यस्यामृतकल्पकल्पकटाक्षं इत्यर्थः प्रसन्नहासमरुणलोचनमाननं यस्य तं ॥१५॥ वक्षसि स्थित
या श्रिया लक्षितं अलंकृतमित्यर्थः ॥ अध्यर्हणीयमाराधनीयं परमुत्कृष्टमासनं अधिष्ठितं चतुःषोडशपंचशक्तिभिः पंचविंशतित

प्रेंखं श्रिता या कुसुमाकरानुगैर्विगीयमाना प्रियकर्म गायती ॥ ददर्श तत्राखिलसात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिं
॥१४॥ सुनंदनंदप्रबलार्हणादिभिः स्वपार्षदमुख्यैः परिसेवितं विभुं भृत्यप्रसादाभिमुखं दृगासवं प्रसन्नहासारुणलोच
नाननम् ॥१५॥ किरीटिनं कुंडलिनं चतुर्भुजं पीतांबरं वक्षसि लक्षितं श्रिया ॥ अध्यर्हणीयासनमास्थितं विभुं वृतं चतुः
षोडशपंचशक्तिभिः ॥१६॥ युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन्रममाणमीश्वरम् ॥ तद्दर्शनाह्लादपरिप्लुतांतरो
हृष्यत्तनुः प्रेमभराश्रुलोचनः ॥१७॥

त्वाधिष्ठातृशक्तिभिः अस्त्रभूषणाध्यायोक्तप्रकारः स्मारितः ॥१६॥ भगैरैश्वर्यवीर्ययशःश्रीज्ञानवै
राग्याधिष्ठातृदेवताविशेषैः स्वैः स्वाभाविकैः शोभमानमित्यर्थः इतरत्र संसारिषु कर्मतारतम्यानुगुणमध्रुवैः संसारिष्वैश्वर्याद्यधिष्ठातृणाम
धिष्ठेयद्वाराऽध्रुवत्वं वा ध्यम ॥ एवंभूतैर्भगैर्युक्तं ॥ धामन् धामनि स्वे स्वकीये तेन च ज्ञेन रममाणं तथा एवेश्वरं नियंतारं ददर्शेत्यर्थः तद्दिति तस्य भगवतो
दर्शनेन य आल्हादः तेन परिप्लुतं संमग्नं ततो व्याप्तमंतरं हृदयं यस्य सः हृष्यत्तनुः पुलकिततनुः प्रेम्णो यो भरः पूरस्तेनाश्रूणि लोचनेषु यस्य ॥५३॥
स आनंदाश्रुमन्नयनः ॥१७॥

विश्वस्य कर्तुर्ब्रह्मणापारमहंसेन परमहंसैरनुष्ठेयेन यथा भक्तिमार्गेण यत्पदांबुजमधिगम्यते प्राप्यते तत् अस्य भगवतः पादांबुजं तन्नाम नमस्कृतवा
न् ॥ प्रजासर्गे प्रजासृष्टिरूपे कार्ये समुपस्थितं समुद्यतं निजशासनार्हणं स्वनियोगार्हं प्रीयमाणं स्वस्मिन्निरतिशयप्रीतिमंतं ब्रह्माणं करेहस्ते
स्पृशन्करं गृहीत्वेत्यर्थः ॥१८॥ प्रीतिमनाः तस्मिन्निरतिशयप्रीतियुक्तांतःकरणो भगवानीषत्स्मितेन मंदहासेन शोचिर्दीप्तिः शोभा यस्या
स्तया गिरा प्रियं यथा वभाषे भाषितवान् ॥१९॥ त्वयेति ॥ हे वेदगर्भ सिसृक्षया हेतुना चिरं भृतेन चीर्णेन तपसा साधनभूतेन त्वयाकर्त्राहं
न नाम पादांबुजमस्य विश्वसृज इत्यार महंसेन यथाधिगम्यते ॥ तं प्रीयमाणं समुपस्थितं कविं प्रजाविसर्गे निजशासनार्हणं
१८॥ बभाष ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन् ॥ कृतांजलिं प्रश्रयनम्रकंधरं विलोकयन्स्मेमहशास
मेधयन् ॥१९॥ श्रीभगवानुवाच ॥ त्वयाहं तोषितः सम्यग्वेदगर्भ सिसृक्षया ॥ चिरं भृतेन तपसा दुस्तोषः कूटयोगिनाम् ॥२०
वरं वरय भद्रं ते वरेशं माभिवांछितम् ॥ ब्रह्मन् श्रेयःपरिश्रामः पुंसां मद्दर्शनावधिः ॥२१॥ मनीषितानुभावोऽयं मम लोका
वलोकनम् ॥ यदुपश्रुत्य रहसि चकर्थ परमं तपः ॥२२॥
सधृक् सम्यक् तोषितः कूटयोगिनां दांभिकयोगिनां दुस्तोषः तोषयितुमश
क्योऽहं ॥२०॥ वरेशं वरप्रदं मां प्रत्यभिवांछितमभीष्टं वरं वरय ते तुभ्यं भद्रं मंगलमस्त्विति शेषः हे ब्रह्मन् पुंसां श्रेयःपरिश्रामः श्रेयसां फला
नां परिश्रामः साधनप्रयासः मद्दर्शनावधिर्मद्दर्शनामवधिर्यस्य सः ॥२१॥ मल्लोकदर्शनं मत्प्रसादादेवाभूदित्याह ॥ मनीषितेति ॥ लोक
स्य वैकुंठलोकस्यावलोकनमिति यं ममैव मनीषितानुभावः मत्संकल्पानुभाव इत्यर्थः ॥ अनुभावः प्रभावः ममैव तपोबलेन प्राप्तं लो
कावलोकनं इत्याशंकायां न वप्रदत्तेरेव मत्कृतत्वान्न तपः स्वातंत्र्यमित्याह रहसि यदुप श्रुत्य तप तपेति वचउपश्रुत्य परमं श्रेष्ठं तपश्च

तृ॰ स्कं॰ ॥२२॥

भा॰ द्वि॰

॥५४॥

तदपितथैवकर्मणिजगत्सर्गकर्मणिविमोहितेसमतिमयैवप्रत्याहितंत्वांप्रत्याभिमुख्येनउपदिष्टमतोममैवानुभावइतिभावः तपः प्रशंसतितपोमेप्रत्या
दिना ॥ २३ ॥ तपसैवसोतप्यततपस्यज्ञानमयंतपइत्यादिश्रुत्युक्तपूर्वजगदाकारपर्यालोचनरूपतपसैवेदंजगत्सृजामीति । तेनैवतपसाग्रसा
मिसंहरामिविभर्मिपालयामिविश्वंदुश्चरंतपःमेवीर्यप्रभावः ॥ २४ ॥ एवंभगवतानुगृहीतोब्रह्मास्वबुभुत्सितमर्थंइदंतस्मैनिवेदयति
भगवच्छितेति ॥ हेभगवन्सर्वभूतानांगुहांहृदयकुहरमवस्थितेनाधिष्ठितः ॥ अतएवाध्यक्षःसर्वेन्द्रियवृत्तिद्रष्टाऽतएवाप्रतिरुद्धेनप्रति
हतिशून्येनप्रज्ञानेनचिकीर्षितंसत्साज्ञारस्महादिपरंपरयावाकर्तुमिष्टंयद्यपिवेदजानासिहिहीतिप्रसिद्धौ ॥ २५ ॥ तथापिनाथमानस्य

प्रत्यादिष्टंमयातत्त्वत्वषिकर्मविमोहिते ॥ तपोमेहृदयंसाक्षादात्माहंतपसोनघ ॥ २३ ॥ सृजामितपसैवेदंग्रसामितपसापुनः । बिभ
र्मितपसाविश्वंवीर्यंमेदुश्चरंतपः ॥ २४ ॥ ब्रह्मोवाच ॥ भगवन्सर्वभूतानामध्यक्षोवस्थितोगुहाम् । वेदह्यप्रतिरुद्धेनप्रज्ञानेनचि
कीर्षितम् ॥ २५ ॥ तथापिनाथमानस्यनाथनाथयनाथितं ॥ परावरेयथारूपेजानीयांतेत्वरूपिणः ॥ २६ ॥ यथात्ममायायो
गेननानाशक्त्युपबृंहितम् । विलुम्पन्विसृजन्गृह्णन्बिभ्रदात्मानमात्मना ॥ २७ ॥ याचमानस्यहेनाथनाथितंप्राथितंनाथ
यप्रदय । नाथितमेवाह । परावरइति । परंहिव्यात्मस्वरूपमवरंरूपंविरचिदात्मकमरूपिणः । कर्मायतनप्राकृतरूपरहितस्यतेतवपरावरेरू
पेयथाजानीयांतथामनीषांबुद्धिंदेहीत्यन्वयः । २६ । द्वितीयंनाथितमाह । यथेति । नानाशक्त्युपबृंहितः । पराशक्तिर्विविधैवश्रूयतेस्वा
भाविकीज्ञानबलक्रियाचेतिश्रुत्युक्तज्ञानबलादिभिरुपबृंहितःयुक्तःद्वितीयंतपावेनानाशक्तिभिःपंचविंशतितत्त्वात्मिकशक्तिभिःउपबृं
हितमिवंजितंविश्वमात्ममायायोगेनस्वात्मनः । आश्वर्यशक्तियोगेनात्मनानिमित्तभूतेनात्मनाआत्मानंसूक्ष्मचिदचिद्विशिष्टंउपादा ॥५४॥

नंतदात्मानं स्वयमकुरुतेइति श्रुत्या आत्मानमित्युपादानत्वस्याकुरुतेति निमित्तत्वस्य चाभिधानादिलुं पन्निति स्त एैः पूर्वसंहारः ग्रस्तान्निति पश्चात्स।
संहारः विसृजन्त्सृष्टादिरूपेण विभ्रत्पुनः॥२७॥ अमोघसंकल्पः सत्यसंकल्पः त्वं ऊर्णनाभिर्यथा तंतून् ऊर्णते आच्छादयति सृजतिइति ऽतियावत्।
तद्वद्यथा क्रीडसि तथाहि विषयांस्तरणि विषयां मनीषां बुद्धिं हे माधव लक्ष्मीनाथ ममापि धेहि देहि पर्येत्यर्थः॥२८॥ अस्मदपि प्रार्थयते। भगवन्निति। हे भग
वन् शिक्षितं त्वया प्रकारेण शिरसि तत्प्रकारं प्रजासर्गमतंद्रितः अनलसः सन्करवाणि। एवमीहमानः कुर्वाणः यदनुग्रहाद्यस्य भगवतोनुग्रहान्न बध्ये

क्रीडस्यमोघसंकल्प ऊर्णनाभिर्यथोर्णुते। तथा तद्विषयां धेहि मनीषां मयि माधव॥२८॥ भगवन्शिक्षितमहंकरवाणि ह्यतंद्रि
तः। नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात्॥२९॥ यावत्सखा सख्युरिवेश ते कृतः प्रजाविसर्गे विभजामि भो जनम्॥ अ
विक्लवस्ते परिकर्मणि स्थितो मा मे समुन्नद्धमदोऽजमानिनः॥३०॥ श्रीभगवानुवाच॥ ज्ञानं परमगुह्यं मे यद्विज्ञानसम
न्वितम्। सरहस्यं तदंगं च गृहाण गदितं मया॥३१॥

यंवद्धोन भवेयं तथानुगृहाणेत्यर्थः॥२९॥ अपरं च प्रजाः सृजतो मे मदो मा भविता समाभू
दिति प्रार्थयते। यावदिति। भो हे भगवन् ते त्वया लौकिकस्य सख्युः सखेवाहं कृतः करस्पर्शादिना संमानितः प्रजाविसर्गे प्रजासर्गरूपे परिकर्मणि परिचर्या
यां अविक्लवः धीरः अव्याकुल एव यावज्जनं विभजामि उत्तममध्यमादिभेदेन सृजामि तावत्तत्परिचर्यावधि अजमानीनः जगत्स्रष्टारं मां मन्यमानस्य मे
मम समुन्नद्धमदः प्रभुत्वमदः मन्वस्य मा भूदित्यर्थः॥३०॥ एवं प्रार्थितो भगवान् तमनुगृह्णन् परावररूपप्रकाशकं चतुःश्लोक्यात्मकं भागवतं मा
ह। ज्ञानमिति। ज्ञानं प्राधान्येन ज्ञातव्यं भगवत्स्वरूपविषयकं ज्ञानं तदंगमप्रधानतया ज्ञातव्यं चिदचित्स्वरूपविषयं ज्ञानं मया गदितं सत्। मेमतः ग्र

भा॰ द्वि॰

॥५५॥

हाराः कथंभूतं ज्ञानं परमगुह्यमतिगोप्यं विज्ञानसमन्वितं विज्ञायतेनेनेति विज्ञानं शास्त्रं योगस्ताभ्यां सहितं सरहस्यं समंत्रकम् ॥३१॥ कात्स्न्येन त्वं गृहितग्र
हणेनाहं प्रसुप्तिमाशंकमानं प्रत्याह । यावानिति ॥ अहं सत्यं ज्ञानं यः सर्वज्ञः इत्यादिश्रुत्युक्तज्ञानगुणकोऽहं यावान्यत्परिमाणकः अपरिछिन्नः यथाभा
वः याहकस्वभावः स्वाभाविकी ज्ञानबलक्रिया चेत्युक्तसार्वज्ञ्यादिगुणकः यद्रूपगुणकर्मकः रूपं चिदचिद्वस्तु गुणास्तयोर्गुणाः स च सद्वारको भगवद्गुणाः
कामित्ववान् यो विमर्दीनिवत् कर्म जगद्व्यापारः चानिरूपगुणकर्माणि यस्य स बहुव्रीहिः । तथैव तत्त्वविज्ञानं मत्स्वरूपरूपगुणविभूतियाथात्म्यविज्ञा
नं मदनुग्रहात्मत्प्रसादाद्धेतोस्ते वा नस्तु भवतु ३२ यावानित्यस्यार्थमेव स्फुटयन्स्वाधात्म्यतया ज्ञातव्यपरशब्दोक्तं भगवत्स्वरूपमाह ॥ अहमिति ॥ सदसत्
ं चेतनाचेतनविलक्षणं यद्वस्तु तदहमेवासमभवमन्यत्त्वचिदचिद्विलक्षणं न भवत्सम्यक्सर्वं चिदचिदंतर्गतं ॥ अहमेव तद्विलक्षण इत्यर्थः ॥ अग्रेस्र

यावानहं यथाभावो यद्रूपगुणकर्मकः ॥ तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥३२॥ अहमेवासमेवाग्रे नान्यद्यत्सदसत्परं
॥ पश्चादहं यदेतच्च योवशिष्येत सोस्म्यहम् ॥३३॥

टीः प्राक् यद्यद्वस्तु पश्चात्सृष्टिकाले जातः त्वमेतत्कार्यजातं च तदप्यहम् । कार्यचिदचिद्रूपंप
श्चाहमित्यर्थः । संहारकाले यो वशिष्येत संहृयते सोप्यहमेवेत्यर्थः । प्रकृतिपुरुषविलक्षणस्तच्छरीरकश्चाहमेकवयएवसर्वज्ञः सर्वशक्तिः सर्वेश्वरः स्रष्टेः
प्रागविभक्तनामरूपसूक्ष्मप्रकृतिपुरुषशरीरकः सृष्टिकाले विभक्तनामरूपप्रकृतिपुरुषशरीरकः स्वपर्यंतनामरूप आसंसंहारविषयोप्यहमेवेत्यर्थः
एवं कारणावस्थायाम विभक्तनामरूपप्रकृतिशरीरकत्वेनावस्थितस्यापि परमात्मनः स्वशरीरभूतचेतनाचेतनगताज्ञत्वदुःखित्वकर्मवशत्वपरिणा
मित्वजडत्वादिभिर्विकारैर्जीवात्मनः तच्छरीरगतबालत्वयुवत्वस्थविरत्वादिभिरिवास्पर्शात् । चेतनाचेतनवैलक्षण्यमविहतमेवावतिष्ठते । कार्यत्वं कार
णत्वं च स्वशरीरभूतप्रकृतिपुरुषद्वारकोपपन्नमित्यन्यत्र भाष्यादिषु विस्तरेण द्रष्टव्यः ॥३३॥ ॥५५॥

तेनप्रतिरूपवमुक्तप्रकारेणसंप्रदिश्यतस्यपरमेष्ठिनः पश्यतः सतः तच्चतुर्मुखायप्रदर्शितंमात्मनःसंबंधिरूपंरूपात्मनातिरोभावयामास ॥३५॥ अंतर्वीहितस्तिरोधा
पितः इंद्रियार्थाः चक्षुरिंद्रियविषयः अस्यतत्तद्रूपंयेनतस्मैहरयेविहितः रचितः अंजलिर्येनसः सर्वभूतमयः सर्वभूतप्रचुरः स्वस्यमाणदेवादिभूतानि
सृष्टिस्थित्वेनभूतविषयकज्ञानप्रचुरइत्यर्थः ॥सब्रह्माइदंविश्वंपूर्ववत्सर्वकल्पवत्ससर्जी ॥३६॥ तदनंतरंपूर्वोक्तोब्रह्मनारदसंवादः ।प्रवृत्तइत्याह ॥प्रजाप
तिरितिपंचभिः ॥धर्मपतिर्भागवतधर्माणांप्रवर्तनेनगोप्ताप्रजापतिः ब्रह्माप्रजानांभद्रं मंगलमन्विच्छन् ॥विमृशन्नेवस्वार्थकाम्यास्वप्रयोजनेच्छानयाक
दाचिद्यमान्नियमांश्चान्वतिष्ठदनुष्ठितवानइत्यर्थः ॥४०॥ तमनुतिष्ठंतंपितरंरिकथादानांमरि आदिपुत्राणांमध्येप्रियतमोनारदः शीलादिभिः पर्यतो

अंतर्हितेंद्रियार्थायहरयेविहितांजलिः ॥सर्वभूतमयोविश्वंससर्जेदंसपूर्ववत् ॥३७॥ प्रजापतिर्धर्मपतिरेकदानियमान्यमान् ॥भद्रं
प्रजानामन्विच्छन्नातिष्ठत्स्वार्थकाम्यया ॥४०॥ तंनारदःप्रियतमोरिक्थादानामनुव्रतः ॥शुश्रूषमाणःशीलेनप्रश्रयेणदमेनच ॥४१
मायांविविदिषन्विष्णोर्मायेशस्यमहामुनिः ॥महाभागवतोराजन्पितरंपर्यतोषयत् ॥४२॥ तुष्टंनिशाम्यपितरंलोकानांप्रपितामहं
देवर्षिःपरिपप्रच्छभवान्यन्माऽनुपृच्छति ॥४३॥

षयदित्युत्तरेणान्वयः प्रियतमत्वमेवाह ॥अनुव्रतःपितरंसेवमानः शुश्रूषमाणःश्रोतुकामः शीले
नस्वस्वभावेनप्रश्रयरूपेणाविनयेनबाह्येंद्रियानयमनेनचचकाराद्दमेनांतरिंद्रियनिग्रहेणच ॥४१॥ मायामिति ॥किमिच्छन्मायाधिपस्यविष्णोर्मायांतन्नि
याम्याश्चर्यशक्तिंविविदिषुर्वेदितुमिच्छन् ॥४२॥ तुष्टमिति ॥लोकानांप्रपितामहंस्वस्यपितरंब्रह्माणंतुष्टंस्वपरिचर्ययासंतुष्टंनिशाम्यज्ञात्वादेवर्षि
र्नारदः भ वान्मांप्रतियदनुपृच्छसि अनुपृष्टवान्तदेवपरिपप्रच्छ ॥४३॥ तस्मैएवंवितेनारदायइदंभगवताचतुःश्लोक्यात्मनासंक्षेपेणउक्तंदश
लक्षणं उपदीनत्वाध्यायोक्तेदशभिर्विस्तृतंपुराणंचतुःश्लोक्यामपिसर्गादयोदशार्थाः संग्रहेणसूचिताः ॥तथाहि ॥अहमेवासमितिश्लोके

न्भगवतः। सृष्टिस्थितिसंहारकारणत्वोक्त्या आश्रयसर्गपोषणनिरोधानामुक्तिः अनेनैव सर्वकारणत्वरूपसर्वातिशायित्वोक्त्या वैकुण्ठविजयरूपस्थिति
रप्युक्ता पश्चादहं यदेतच्चेत्यनेन कार्यचिदचिद्रूपव्यष्टिसर्गस्यापि चतुर्मुखशरीरस्वकारणकत्वोक्त्या विसर्गोपि संग्रहीतः परस्परविविक्तत्वेन प्रकृति
पुरुषस्वरूपशोधके ऋतेर्थमितिश्लोके आत्मस्वरूपाप्रतीतिं दृष्टान्तयां मायास्वरूपप्रतीतिं कथनाद्दात्मस्वरूपाप्रतीतिमायाप्रतीत्यारनादिकर्मवासनायत्त
प्रतीतेः कर्मवासनारूपाऊतयोपि सूचिता। यथा महान्तीति भूतानीतिश्लोके सर्वान्तरात्मतया शशासितृत्वरूपपालकत्वेनैव पालनाधिकृतभगवदवतारक
थानां भगवदनुवर्तिमन्वादिकथानामपि सूचतेन मन्वन्तरेशानुकथे अपि सूचिते परमपुरुषशरीरप्रकृतिविलक्षणजीवस्वरूपशोधनेनैव प्रकृ

तस्मादिदं भागवतं पुराणं दशलक्षणम्। प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ॥४४॥ नारदः प्रा
ह मुनये सरस्वत्यास्तटे नृप। ध्यायते ब्रह्म परमं व्यासायामिततेजसे ॥४५॥ श्रीरामाय नमः ॥

निवृत्तिनिर्मुक्ताविर्भूतगुणा एकपरमात्मकस्वरूपेणावस्थितिरूपा मुक्तिरित्यपि सूचितम्। एवं दशार्थसंग्रहेण चतुःश्लोक्यामपि सूचिताः अ
तएवैतद्विवरणरूपेऽत्र दशस्कन्धात्मके पुराणे दशार्थानां प्रतिपादनमुपपद्यते। भूतकृद्ब्रह्मा प्रीतः प्राह ॥४४॥ सच नारदः सरस्वत्यास्तटे
परमं ब्रह्म ध्यायते ध्यानं कुर्वतेऽपरिमिततेजसे मुनये वेदशास्त्रार्थतत्त्वावगन्त्रे व्यासाय प्राह प्रोक्तवान्। व्यासस्तु मह्यं प्रोक्तवानित्येतत्तु अधी
तवान् द्वापरादौ पितुर्द्वैपायनादहमिति पूर्वमेवोक्तम् ॥४५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

एवं चिदचिद्विलक्षणस्य परमात्मनः स्वरूपमुक्तं। अथ यावदर्थशब्दोक्तं मंगलयाज्ञानयं चिदचिद्रूपमाह॥ ऋतेऽर्थमिति॥ अर्थं निरतिशयपुरुषार्थभूतं चित्तत्वमृते वि
नायाचिद्वस्तु प्रतीयेत प्रकृत्यनुसंधानवेलायामात्मस्वरूपेण यावत्प्रकाशत इत्यर्थः॥ आत्मनि चेतनस्वरूपे प्रतीयमाने॥ सा निशा पश्यतो मुनेरिति न्यायेन यदचे
तनं न प्रतीयेत तदात्मनः परमात्मनः मायां विद्यादित्यर्थः॥ अन्यतरस्य प्रकाशेनान्यतरस्याप्रकाशनं विरुद्धाकारत्वादित्यभिप्रेत्य तत्र दृष्टांतमाह। यथाभासो यथा
तम इति॥ भासो भासनम्॥ भासशब्दो बहुवचनांतो वा नहि तेजसि तमो भाति॥ न च तमसि तेजो भातीत्यर्थः॥ स्थूलत्वसूक्ष्मत्वनित्यानित्यजडत्वादिविरुद्धा
कारयोर्नामिश्रेन॥ ३४॥ एवं परस्परविलक्षणं चिदचित्स्वरूपमुक्तं॥ अथैतयोः स्वस्यानुप्रवेशेन तच्छासनरूपं पालनं तत्कृतदोषास्पर्शं चाह॥ यथेति भूता
न्याकाशवायुतेजांसि यथोच्चावचेषु नानाविधेषु भूतेषु भौतिकेषु घटादिषु प्रविष्टान्यप्रविष्टानीव घटादिगतभेदच्छेदनाद्यस्पृष्टत्वात्तथाहमपि तेषु चेत

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि॥ तद्विद्यादात्मनो मायां यथाभासो यथा तमः॥ ३४॥ यथा महान्ति भूतानि
भूतेषूच्चावचेष्वनु॥ प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम्॥ ३५॥

नाचेतनेष्वात्मतयानुप्रविष्टोऽपि तेषु न प्रविष्टः न तत्कृतदो
षैः स्पृष्ट इत्यर्थः। यद्वा परिच्छिन्नचेतनाचेतनवस्त्वनुप्रवेशेऽपि स्वस्यापरिच्छिन्नत्वं सदृष्टांतमाह॥ यथेति॥ अप्रविष्टानि बहिरपि संति तथांतर्बहिश्च तत्सर्वं
व्याप्येति प्रकारेण तेषु प्रविष्टोऽहं न तेष्वेव बहिरपि व्याप्त इत्यर्थः॥ ३५॥ एवमपरिच्छिन्नत्वप्रतिपादनेन यावानहमित्येतत्स्पष्टीकृतम्॥ अहमेवासमित्यत्र
जगत्कारणत्वनिर्देशाच्चिदचिच्चेतनाचेतनवैलक्षण्यप्रतिपादनसार्वज्ञसर्वशक्तित्वादिप्रतिपादनेन यथाभाव इत्येतत्स्पष्टीकृतम्॥ ऋतेऽर्थमित्यादिना परमात्म
शरीरभूतपरस्परविलक्षणचेतनाचेतनस्वरूपप्रतिपादनेन यद्रूप इत्येतत्स्पष्टीकृतं तथा तेष्वित्यनेन चेतनाचेतनयोः परमात्मशरीरत्वप्रतिपादनाच्छरीरगताः
धर्माः जीवात्मनः तच्छरीरगतबालत्वयुवत्वादयः इव मच्छरीरभूतचेतनद्वारा ममैव धर्मा इति प्रतीतेः यद्गुण इत्यपि व्यंजितम्॥ अहमेवासमित्यनेनास्पृ

भा॰ द्वि॰

॥४६॥

त्व पालन कृत्व संहर्तृत्वरूपजगद्व्यापाररूपकर्मप्रतिपादकत्वेन यत्कर्मेकरहस्यमभिव्यञ्जीकृतं । पुनश्च प्रकृतिपुरुषविलक्षणेश्वरस्वरूपसंग्रहेणैव सनत्तस्यैव जिज्ञा
स्यत्वमाह एतावदिति ॥ आत्मनः परमात्मनः तत्त्वं स्वरूपं जिज्ञासुना ज्ञातुमिच्छुना एतावदेव परस्परविविक्तस्वभावचिदचिदंतरात्मभूतभगवत्स्वरूपमे
वान्वयव्यतिरेकाभ्यामन्ययोगान्ययोगव्यवच्छेदाभ्यां जिज्ञास्यं इत्यर्थः । एवं जिज्ञास्यमेवेत्यन्वयः नान्यज्जिज्ञास्यमिति व्यतिरेकः यद्वाऽन्वयात्सद्भावाच्चिदचि
च्छरीरकपरमात्मन एव कार्यात्मना कारणात्मना च सद्भावाद्व्यतिरेकाच्चिदचिच्छरीरकपरमात्मातिरिक्तवस्तुत्वेन राभावादेवंभूतपरमात्मविज्ञानेन सर्ववि
ज्ञानाज्ञातत्वान राभावादेतावदेव जिज्ञास्यमेवेत्यर्थः प्राधान्येन ज्ञेयं भगवत्स्वरूपं चेतनं च तद्विभूतिभूतमिति तज्ज्ञानस्य भगवज्ज्ञानेनांतर्भावादात्मनस्त
त्वं इत्युक्तं संग्रहेण प्रकृतिपुरुषवैलक्षण्यमाह ॥ यत्स्यादिति । यदात्मनस्तत्त्वं मत्स्वरूपं सर्वदा स्यादिति सर्वदाच्याहृतिः । अचिदपि प्रतिक्षणपरिणामित्वेन

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ॥ अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ॥ ३६ ॥ एतन्मतं समातिष्ठ परमेण समाधिना ॥ भवान्कल्प
विकल्पेषु न विमुह्यति कर्हिचित् ॥ ३७ ॥ श्रीशुक उवाच । संप्रदिश्यैवमजनो जनानां परमेष्ठिनं ॥ पश्यतस्तस्य तद्रूपमात्मनो न्यरुणद्धरिः ॥ ३८

चित्त्वं बालत्वयूनत्वजरत्वाद्यवस्थासु सर्वदा वस्थानां मध्ये अस्मादितरेतरावस्थाप्राप्तभावात्सर्वदा नास्ति सर्वशब्दार्हत्वात् । सर्वत्रेति जीवव्यावृत्तिः
तस्याविकृतत्वेन सर्वदा स्यादिति वक्तुं शक्यत्वेऽपि वालाग्रशतभागस्यैवाद्युक्तप्रकारेण जीवस्वरूपस्याणुपरिमाणत्वेन सर्वत्र स्यादिति वक्तुमशक्यत्वात् एवमवि
कारित्वानन्तत्वकथनेन सत्यं ज्ञानमनंतं ब्रह्मेत्युक्तब्रह्मस्वरूपलक्षणमभिहितं भवति ॥ ३६ ॥ एवं परावरे यथारूपे जानीयां ते इत्यस्योत्तरमुक्तं नेहमानः प्रजासर्गं
बध्येयमित्यस्योत्तरमाह । एतदिति । परमेण समाधिना चित्तैकाग्र्येण एतन्मतं सम्यगनुतिष्ठ भवानिति संहाराद्यधिकर्तृत्वे तद्धाहेरमुपलक्षणं कल्पविकल्पेषु सृष्टिसंहा
रेषु कल्पः कल्पनं सृष्टिः विकल्पो विपरीतकल्पनं संहारः कर्हिचित्कदाचिदपि न मुह्यति । मदधीनत्वमनुसंधाय समुन्नद्धमदापहतो न भविष्यसीत्यर्थः । अनेन
नेवनद्धियां धेहि मनीषां इत्यस्याप्युत्तरमुक्तं भवति । ३७ । संप्रदिश्येति । अजनः कर्मायत्तोत्पत्तिशून्यः हरिर्भगवान् जनानां व्यष्टिभूतानां परमेष्ठिनं आधिपत्ये स्थि

एवं संप्रदायागतं श्रीभागवताख्यानेनैव त्वत्कृतप्रश्नानामुत्तराण्यभिधास्यामीत्याह ॥ यदुतेति ॥ इदं विश्वं वैराजात्वैराजाख्यान्निरुद्धस्रष्टाच्चतुर्मुखाद्यथा
आसीदिति यत्त्वयाऽहं पृष्टः । अजः सृजति भूतानि भूतात्मा यदनुग्रहादित्यादिना । तदुपाख्यास्ये भागवताख्यानेनोत्तरयाम्यन्यांश्च प्रश्नात्कालेऽस्मिन्नोपाख्यास्य
इत्यर्थः ॥ एवं यत्र शेते इत्यस्योत्तरमुक्तं भवति परमव्योमकथनादृष्टान्तत्वान्मुद्धसत्त्वमयलोकस्य परिग्रहकथनेनेश्वरस्य जीववद्देहानुभिर्देहारंभप्रश्नः प्रत्यु
क्तः । अन्यत्र व्याप्तिकथनात्सोपाधित्वमपि परिहृतं ॥ ४५ ॥ इति द्वितीये नवमः ॥ ९ ॥ अथ वैराजात्पुरुषादिदं यथासीत्तदुपाख्यास्ये इति प्रतिज्ञातं सम
ष्टिपुरुषचतुर्मुखावयवैर्देवादिसृष्टीरभिधास्यन्त्साधनपुराणं दशलक्षणं प्रोक्तं भगवतेति यत्तु तान् दशार्थानाह ॥ अत्रेति ॥ अस्मिन्पुराणे स

यदुत नाहं त्वया पृष्टो वैराजात्पुरुषादिदं ॥ यथापुरस्तादुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ॥ ४६ ॥ इति श्रीमद्भागवते द्वितीयस्कंधे श्री
नारायणचतुःश्लोकीभागवतप्रवृत्तिविवरणं नाम नवमोऽध्यायः ॥ ९ ॥ श्रीशुक उवाच ॥ अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः
॥ मन्वंतरेशानुकथा निरोधो मुक्तिराश्रयः ॥ १ ॥ दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् ॥ वर्णयंति महात्मानः श्रुते
नार्थेन चांजसा ॥ २ ॥ भूतमात्रेंद्रियधियां जन्म सर्ग उदाहृतः ॥ ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः ॥ ३ ॥

मीदृश्य आश्रयांता दशार्थाः प्रतिपाद्या इत्यर्थः मन्वंतरेशानुकथा मन्वंतरकथनं ईश्वरचेष्टाकथनं चेत्यर्थः ॥ १ ॥ नन्वेवं प्रतिपाद्यानां बहुत्वात्प्रति
पाद्यभेदाच्छास्त्रभेदः स्यादित्याशंक्याह ॥ दशमस्येति । इह पुराणे दशमस्याश्रयस्य परब्रह्मणः विशुद्ध्यर्थं शोधनार्थं सम्यक्प्रतिपत्त्यर्थं नवानां स
र्गादीनां लक्षणमंजसा मुख्येन महात्मानः । परापरया यान्त्यज्ञाः श्रुतेनार्थेन यथाश्रुतं वर्णयंति । एवं च दशमस्यैव प्राधान्यं तदर्थत्वेनेतरेषां प्र
तिपादनान्न शास्त्रभेद इत्यर्थः ॥ २ ॥ प्रत्येकं दशानां लक्षणमाह ॥ भूतेति । भूतान्याकाशादीनि मात्रास्तन्मात्राणि शब्दादीनि इंद्रियाणि ज्ञानकर्मभ
देंद्रियाणि धीशब्देनांतःकरणमत्र बुद्धिशब्दवाच्यमहत्तत्त्वपरः । महदादिपृथिव्यंतानामित्यर्थः ॥ एतेषां तत्त्वानां यज्जन्म उत्पत्तिः स सर्ग इत्युदाहृतः

भा.द्वि.

॥ ५८ ॥

ब्रह्मणः परस्माद्ब्रह्मणः प्रयोजकात्कर्तुः गुणानांसत्वरजस्तमसांवैषम्याद्धेतोः ॥ पौरुषस्य तु मुख्यसंबंधी प्रयोज्यचतुर्मुखकर्तृक इत्यर्थः ॥ एवंभूतः सर्गो विस
र्गः स्मृतः ॥ ३ ॥ वैकुंठविजयः वैकुंठस्य हरेः सर्वोत्कर्षः शत्रुविजयादिरूपः स्थितिः तस्य वैकुंठस्य योऽनुग्रहः ॥ जगद्रक्षणरूपः स पोषणमित्यर्थः ॥ सद्धर्मः स
तां वैकुंठेनानुगृहीतानां मन्वंतराधिपतीनां यो धर्मः स मन्वंतरानुकथ्यते कर्मवासनाः कर्मणः वासनाः संसाराः ऊतयउच्यंते ॥ क्रमस्त्वविवक्षितः ॥ ४ ॥ ईशानुक
थाः विस्तरेणेति ॥ अवतारेति ॥ हरेरवतारानुचरितं तदनुवर्तिनां पुंसां च नानाख्यानोपबृंहिताः ॥ विचित्रकथाभिर्युक्ताः । सत्कथाश्चेशानुकथा इत्यर्थः ॥ ५ ॥
निरोधलक्षणमाह ॥ निरोध इति ॥ अस्य जीवात्मनः सह शक्तिभिः कर्मशक्तिभिः सहानुशयनं सूक्ष्मावस्था प्रकृतिस्थितिर्निरोध इत्यर्थः ॥ मुक्तिलक्षणमाह
॥ मुक्तिरिति ॥ अन्यथाभावं देवादिरूपं हित्वा स्वरूपेण विर्भूतापहतपाप्मत्वादिगुणाष्टकविशिष्टेन रूपेणावस्थानमेव मुक्तिरित्यर्थः ॥ ६ ॥ आश्रयल

स्थितिर्वैकुंठविजयः पोषणं तदनुग्रहः ॥ मन्वंतराणि सद्धर्म ऊतयः कर्मवासनाः ॥ ४ ॥ अवतारानुचरितं हरेरस्यानुवर्तिनां
॥ पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः ॥ ५ ॥ निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः ॥ मुक्तिर्हित्वान्यथारूपं स्वरूपे
णव्यवस्थितिः ॥ ६ ॥ आभासश्च निरोधश्च यतश्चाध्यवसीयते ॥ स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥ ७ ॥ योऽध्यात्मिकोऽयं
पुरुषः सोऽसावेवाधिदैविकः ॥ यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिकः ॥ ८ ॥

क्षणमाह ॥ आभास इति ॥ आसमंताद्भासनमाभासः जगत
आविर्भावः निरोधः प्रलयश्च यतः । यस्मादध्यवसीयते ज्ञायते । प्रमाणेनावगम्यते ॥ आविर्भावतिरोभावजन्मनाशविकल्पवदित्युक्तेः । यच्च परब्रह्मादिशब्दैः
शब्द्यते ध्यवसीयते स आश्रय इत्यर्थः ॥ ७ ॥ अथाश्रयस्य परमात्मनः कारणत्वोपयुक्तसर्वज्ञत्वं वक्तुं ज्ञातृज्ञेयज्ञानकरणानां भगवदात्मकत्वमाह ॥ य इति
आत्मनि जीवे ज्ञातरि नियंतृतया वर्तमानो आध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः देवेषु ज्ञानचक्षुरादींद्रियाभिमानि आदित्यादिषु वर्तमानश्चैव उभय
विच्छेदः उभयविधो विच्छेदो भेदो यस्य स उभयविच्छेदः ज्ञातृज्ञानकरणविलक्षणो ज्ञेयः शब्दादिराकाशादिभूतेषु वर्तमानस्तत्र यः शब्दादिर्व्यंतरतया वर्तमा

नो यस आधिभौतिकः स्मृतः इत्यर्थः ज्ञानाकरणं शब्दादिज्ञे
यं च भगवदात्मकमित्यर्थः ॥ ८ ॥

॥ ५८ ॥

एवं त्रयाणां भगवदात्मकत्वमभिधाय तस्य सर्वज्ञतां वक्तुं जीवानामसर्वज्ञतामाह ॥ एकमिति ॥ यया एकतराभावे चक्षुरादिकरणाभावे एकं विषयं नोपलभामहे न साक्षात्क
र्महे चक्षुरादिकरणाभावे सन्निहितमपि विषयं न पश्यामः । ज्ञेयज्ञातृत्रिविधसन्निकर्षवस्तुपदार्थेषु करणाधीनज्ञाना नतु सूक्ष्मव्यवहितादिज्ञानवंतः नच
करणानपेक्षज्ञानाश्चेत्यर्थः ॥ परमात्मा तु कोटित्रयमसाक्षात्करोतीत्याह ॥ त्रितयमिति ॥ तत्र तदा त्रितयं ज्ञातृकरणज्ञेयानां भयं यो वेद स साक्षात्कुर्यात् स आत्मा आश्र
याश्रयः आधिदाश्रयः जीवस्याप्याश्रयः ॥ यथा रथस्यारेषु नेमिरर्पिता नाभावराः अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्राः प्राणेऽर्पिता इति श्रुतेः ॥ स्वाश्रयाश्रय
इति ॥ पावेस्तस्याप्याश्रयः अन्येषामप्याश्रय इत्यर्थः ॥ ९ ॥ एवमाश्रयपर्यंतानर्थानभिधाय यथासीत्तदुपाख्यास्य इति प्रतिज्ञातं चतुर्मुखसृष्टिप्रकारं वक्तुमा
रभते ॥ पुरुष इति ॥ पुरुषश्चतुर्मुखरूपी असौ परमात्मा आत्मनः । स्वस्यायनं स्थानमविच्छन्विमृशन्यतः स्वयं शुचिरतएव शुचीः सृष्टा अपः जलान्यस्रा

एकमेकतराभावे यदा नोपलभामहे ॥ त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥ ९ ॥ पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्ग
तः ॥ आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः ॥ १० ॥ तास्ववात्सीत्स्वसृष्टासु सहस्रं परिवत्सरान् ॥ तेन नारायणो नाम यदा
पः पुरुषोद्भवाः ॥ ११ ॥ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ॥ यदनुग्रहतः संति न संति यदुपेक्षया ॥ १२ ॥ क्षीत्स एवान् ॥ १० ॥ स्वसृ

ष्टासु तास्वसुसहस्रं परिवत्सरान् बहून्संवत्सरानवात्सीत् उवास ॥ एतदेव नारायणशब्दप्रवृत्तिनिमित्तमित्याह ॥ तेनेति ॥ यद्यस्मात्पुरुषोद्भवाः पुरुषात्परमपुरुषा
दुद्भवा उत्पन्नाः ॥ पुरुषादुद्भवो यासां इति वा नारा आपः ॥ अयनं यस्येति शेषः ॥ तेनेदं शास्त्रुत्पत्तिलक्षणावयववत्त्वेन निमित्तेन नारायणो नारायणशब्दवा
च्योऽभूदित्यर्थः ॥ नामेति स्मृत्यंतरप्रसिद्धिं द्योतयति तथाहि स्मर्यते ॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥ अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति
११ ॥ अस्यैव प्रभावमाह । द्रव्यमिति ॥ द्रव्यादयः यदनुग्रहतः संति स नारायणः इत्यन्वयः । द्रव्यं महदादि पृथिव्यंतं भूतवर्गः कर्म जीवादृष्टं कालः गुणवैष
म्यहेतुः स्वभावः प्रकृतेः परिणामस्वभावः यदनुग्रहतः यस्यानुग्रहतः संति यस्य उपेक्षया न संति द्रव्यादयो यत्संकल्पानुविधायिसत्तास्थितिप्रवृत्तिकाद

॥ १८ ॥ स्कं॰ २

भा०टी०

एवंभूतो नारायण एकः ॥ अविभक्तनामरूपसूक्ष्मचिदचिच्छरीरकत्वेनैकः नानात्वं देवमनुष्यादिरूपेण भवितुमिच्छन्योगः स्वात्मानुभवरूपो योगः स एव तल्
स्तं शय्यातस्मात्समुत्थितः देहं स्वशरीरभूतं हिरण्मयं रमणीयं वीर्यं चिदचिदात्मकं कारणद्रव्यं मायया चतुर्मुखरूपेण त्रिधाकरणज्ञानज्ञेयरूपेण व्यसृजत्
॥ पूर्व ॥ मायाशब्दस्तु गुणात्मजः प्रकृत्य चतुर्मुखपरः संकल्पपर्यवासंकल्पेन चतुर्मुखरूपी भूत्वा व्यसृजदित्यर्थः ॥१३॥ त्रैविध्यं विवृणोति ॥ अधिदैवमिति ॥ अधिदै
वं इन्द्रियाधिदेवताधिष्ठितः ॥ एकादशेन्द्रियरूपकरणवर्गः ॥ अध्यात्मं ज्ञातृवर्गः अधिभूतमिति पृथिव्यादिभूतस्यगंधादिज्ञेयवर्गः उक्त इति त्रिधा प्रभु
र्व्यसृजदित्यर्थः ॥ ज्ञातृसृष्टिर्नाम जीवानां तत्तद्देवादिदेहयोगसंपादनमेव ॥ तथाहि ॥ तेन येन जीवान् व्यसृजत् भूम्नामिति तो यशब्दोपलक्षितभूतसंघपु
रिणाम देवादिशरीरविशिष्टत्वेनाकारेणाविसृजे इत्यर्थः ॥ अथ संग्रहेणोक्तं देवादिव्यष्टिशरीरस्थानां प्राणेन्द्रियादीनां चतुर्मुखः शरीरस्थप्राणेन्द्रि

एकोनानात्वमन्विच्छन्योगतल्पात्समुत्थितः ॥ वीर्यं हिरण्मयं देवो मायया व्यसृजत्त्रिधा ॥१३॥ अधिदैवमथाध्यात्ममधिभूतमिति
प्रभुः ॥ अथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच्छृणु ॥१४॥ अंतःशरीर आकाशात्पुरुषस्य विचेष्टितः ॥ ओजः सहो बलं जज्ञे ततः प्रा
णो महानसुः ॥१५॥ अनुप्राणंति यं प्राणाः प्राणंतं सर्वजंतुषु ॥ अपानंतमपानंति नरदेवमिवानुगाः ॥१६॥ यादिसमष्टितउत्पत्तिप्र

कारं प्रतिपादयितुं प्रतिजानीते । अथेति । पौरुषं समष्टिपुरुषचतुर्मुखदेहगतं पुरुषाधिष्ठितं वा एकं समष्टिरूपेणैकं बीजं व्यष्टिकारणं द्रव्यं त्रिधाकारणभोक्तृविष
४४ यरूपेण देवादिव्यष्टीनां यानि रमिद्यत उद्पद्यत तच्छृणु इत्यर्थः । मत्त इति शेषः ॥१४॥ एवं प्रतिज्ञाय व्यष्टीन्द्रियसृष्टिविभागं वक्तुं इन्द्रियाश्रयप्राणव्यष्टिसृ
ष्टिमाह ॥ अंतरिति । पुरुषस्य चतुर्मुखस्य विचेष्टितः प्राणव्यापारं कुर्वतः चतुर्मुखे प्राणव्यापारं कुर्वति सतीत्यर्थः अंतःशरीरे तच्छरीरांतःस्थिताद् आकाशाद् आकाशकार्यवायुविशे
षात्प्राणाद् ओजः सहो बलं जज्ञे ओजः इन्द्रियसामर्थ्यं सहः वेगसामर्थ्यं बलं धारणसामर्थ्यमेते धर्मा अभवन्नित्यर्थः ॥ ततश्चतुर्मुखशरीरगतोजःसहोबलधर्मिप्राणात्मा
सूत्रः महान्मुख्यः असुः प्राणनहेतुः जज्ञे इतरेषां शरीरांतर्वर्त्ति प्राणा अभवन्नित्यर्थः प्राणा इत्येकवचनमार्षं जात्यभिप्रायं वा ॥१५॥ तस्य महत्त्वमेवाह । अनुप्राणंती
ति । प्राणा इन्द्रियाणि सर्वजंतुषु यं प्राणं प्राणंतं चेष्टां कुर्वंतमनु पश्चात् प्राणंति चेष्टां कुर्वंति । अपानंतं चेष्टां त्यजंतं प्राणमनु पश्चात्सर्वे प्राणाः अपानंति चेष्टां त्यजंति । नरदे
वं राजानमनुभृत्या इव सर्वाण्येवेन्द्रियाणि प्राणाधीनवृत्तीनीत्यर्थः । यद्वा व्यष्टिप्राणानां कारणस्वभावानुवर्तित्वमाह ॥ अन्वि

ति। यं चतुर्मुखशरीरस्थं समष्टिप्राणमनु अनुसृत्य स्वभावानुवर्तिनः। ओजःसहोबलानाम् अर्थे युक्ता एव व्यष्टिप्राणाः प्राणापानादिव्यापारं कुर्वंतीत्यर्थः॥ १६॥
अथ साधिष्ठानस्य सदैवतस्य सविषयस्य जिह्वेंद्रियस्योत्पत्तेर्मुखप्राणोत्पत्तिहेतुकत्वं सूचयन्नाह॥ प्राणेनेति॥ क्षिपता व्याप्रियमाणेन विभोश्चतुर्मुखस्या
न्तरा जाठराग्नेर्दीपिते क्षुत्तृट् क्षुत्तृड्दीत्वा जायते। जायतेत्यर्थः॥ ततः पिपासतः पातुमिच्छतः जक्षतः अत्तुमिच्छतः अश्नतः अश्नतीति वृत्त पंचम्यर्थे षष्ठी
वोध्या॥ प्राक् प्रथमं मुखं निरभिद्यत विभक्तमभूत् चतुर्मुखाद्यष्टिशरीरमुखानुसन्धानीत्यर्थः॥ १७॥ तालु अधिष्ठानं जिह्वेंद्रियं नानारसो विषयः वरु
णश्च देवता ज्ञातव्या॥ एवं सर्वत्राधिष्ठानं इंद्रियं देवता विषय इत्येतच्चतुष्टयमप्यनुक्रमपूर्वं मुखाद्यंगैर्विना जिह्वाया उत्पत्त्ययोगान्मुखोत्पत्तिरुक्ता
न त्वधिष्ठानतया॥ अधिष्ठानं तु तालु एव अनेन ज्ञातृसृष्टिरपर्याप्ता इत्युक्ता भवति॥ वागादींद्रियाश्रयमुखाद्यवयवसंघातात्मकदेवादिदेहयोग

प्राणेन क्षिपता क्षुत्तृडन्तरा जायते प्रभोः। पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत॥ १७॥ मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते। ततो
नानारसो जज्ञे जिह्वया योऽधिगम्यते॥ १८॥ विवक्षोर्मुखतो भूम्नो वह्निर्वाग्व्याहृतं तयोः। जले वै तस्य सुचिरं निरोधः समजायत॥ १९॥

कस्मेव हि ज्ञातृसृष्टिः तालु जिह्वास्थलं निर्भिन्नं व्यष्टिशरीरतालूत्पन्नमित्यर्थः॥ तत्र तालुनि जिह्वा नु उपजायते उपाजायतेत्यर्थः। नानारसः कट्वाम्लमधु
रतिक्तादिरसः जज्ञे जिह्वया यः नानारसः अधिगम्यते ज्ञायत इत्यर्थः॥ १८॥ वागुत्पत्तिमाह॥ विवक्षोर्वक्तुमिच्छोर्भूम्नो भगवतः मुखतः मुखाद्वह्निः
वागभिमानी देवता॥ वागिंद्रियं तयोरिंद्रियतदभिमानिदेवतयोर्व्यापाररूपं व्याहृतमुक्तिश्चाभूदित्यर्थः॥ एवं सर्वत्र ब्रह्मशरीरात्समष्टिभूताद्व्यष्टि
अवयवविशेषविभाग उच्यतेनेनवेदं चतुर्मुखसमष्टींद्रियोत्पत्तिमिति वक्तुं युक्तं॥ उपरिहस्तोत्पत्तिहेतुरिति हस्तद्वयोत्पत्तिकथनेन चतुर्मुखस्य द्विबाहुत्वाभा
वात्। देवादिशरीरस्य हस्तादिव्यष्टियुग्मविभागस्यासूचितत्वात्प्राणेंद्रियस्योत्पत्तिमाह॥ गलेइति॥ एतस्य ब्रह्मणः गलेकंठे सुचिरं कोर्थः वायोरिति
शेषः॥ वायोर्निरोधः समजायतेत्यर्थः॥ जले इति पाठेन भवतीत्यर्थान्वयः॥ १९॥

भा॰ टि॰ निरोधान्नभस्वति वायौ दोधूयति । अत्यंतं प्रचलति सति नासिके नासापुटे निरभिद्येताम् ॥ वायुव्यापारं कुर्वतो ब्रह्मणः शरीरे वायुपूरिते नासिके निरभिद्येतां । ब्र-
ह्मशरीरे वायोः तैर्भिन्नाभ्यां नासाविवराभ्यां घ्राणो भवतीत्यर्थः ॥ २० ॥ चक्षुरुत्पत्तिमाह ॥ यदेति ॥ यदा आत्मनि देहे निरालोकं अर्थाभावेऽव्ययीभावः । आलो-
॥ ६० ॥ काभावः आसीदिति शेषः ॥ तदा आत्मानं देहं चकारादन्यच्च वस्तु दिदृक्षतस्तस्य ब्रह्मणः अक्षिणी अधिष्ठाने निर्भिन्ने चक्षुरिंद्रियस्य व्यष्टियुग्मानुत्पन्नानी-
त्यर्थः ॥ चक्षुश्चेंद्रियं गुणग्रहं रूपगुणग्राहकं ॥ ज्योतिरादित्यश्चास्य श्चोतस्न मित्यर्थः ॥ स हि चक्षुरभिमानी आदित्यः स्वांशेन भित्वाऽक्षिणी प्राविशदिति श्रु- स्कं ५
तेः ॥ २१ ॥ श्रोत्रोत्पत्तिमाह ॥ बोध्यमानस्येति ॥ ऋषिभिर्वेदैः बोध्यमानस्य प्रबोध्यमानस्य तत्प्रबोधं ग्रहीतुमिच्छतः ॥ आत्मनो ब्रह्मणः कर्णौ अधिष्ठाने दिशः । श्रोत्रा-
भिमानिदेवता गुणग्रहः ॥ शब्दग्रहणहेतुः श्रोत्रमिंद्रियं निरभिद्यतेत्यर्थः ॥ श्रोत्रेंद्रियव्यष्टियुग्मास्य भवन्तीति भावः ॥ २२ ॥ त्वगिंद्रियव्युत्पत्तिमा-

नासिके निरभिद्येतां दोधूयति नभस्वति ॥ तत्र वायुर्गंधवहो घ्राणो नसि जिघृक्षतः ॥ २० ॥ यदात्मनि निरालोकमात्मानं च दिदृक्षतः ॥ निर्भि-
न्ने चाक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः ॥ २१ ॥ बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः ॥ कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्र-
हः ॥ २२ ॥ वस्तुनो मृदुकाठिन्यलघुगुर्वोष्णशीततां ॥ जिघृक्षतस्त्वग्निर्भिन्ना तस्यां रोममहीरुहाः ॥ २३ ॥

ह ॥ वस्तुन इति ॥ वस्तुनः द्रव्यस्य
मृदुत्वं काठिन्यं च लघुत्वं च गुरुत्वं च उष्णत्वं ईषदुष्णत्वं चानुष्णत्वं ग्रहणयोग्यता होष्णं इत्युक्तम् गुर्वुष्णेति पाठे यणादेशाभावः छांदसः शीततां च एतान् गु-
णान् जिघृक्षतः ग्रहीतुमिच्छतः त्वगिंद्रियव्यष्टिरुत्पन्ना इत्यर्थः । वस्तुनि हस्तेनानीतो लिंगेन लघुत्वगुरुत्वयोर्ज्ञानात्तयोरपि त्वगिंद्रियविषयत्वमिति ज्ञेयं र
भेदेऽयं बोधव्यं ॥ त्वगिंद्रियस्य स्थूलरूपबाह्याभ्यंतरचर्मणि स्थाने स्थानभेदाच्च कंडूः स्पर्शश्चेति विषयभेदः विषयभेदाच्च महीरुहाः वायुश्चेति
देवताद्वयं ॥ त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः ॥ अंशेन लोमभिः कंडूयैर्यस्मै प्रतिपद्यते । निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् । प्राणे-
नांशेन संस्पर्शं येनासौ प्रतिपद्यते इति तृतीये स्पष्टमभिधास्यमानत्वात् । एवं चैकमेव त्वगिंद्रियं बाह्यचर्मगतं लोमसु व्याप्तमोषधिदेवताकं कंडूग्राहकं । एतदे ॥ ६० ॥

वसंग्रहेणाह । तस्यामिति । तस्यां त्वचि त्वगिंद्रिये विभिन्नेन इधिष्ठानं रोमाणि ॥ अधिष्ठानदेवनामहीरुहा येभ्योत्पन्ना इत्यर्थः ॥ २३ ॥ अथ यस्पर्शग्रहणं तस्त्सैव त्व
गिंद्रियस्य वाय्वाधिष्ठितत्वमाह । तत्र चेति । तत्र च तत्रैव त्वगिंद्रिये वा नो वायुर्वृतः ॥ अधिष्ठितवान् । कथंभूतः त्वचास्वाधिष्ठेयत्वगिंद्रियेण साधनेनांतर्वहि
श्च लब्धगुणः लब्धः स्पर्शः गुणो येन स अंतर्बहिश्च स्पर्शसंपादक इत्यर्थः ॥ पाणिव्यष्टिसृष्टिमाह हस्ताविति नानाकर्म आदानादिकर्म चिकीर्षतः लब्धस्प
र्शकर्तुमिच्छतः तस्य ब्रह्मणः हस्तौ रुरुहतुः ब्रह्मगतहस्तसमष्टितः हस्तयुग्मव्यष्टयोऽभवन्नित्यर्थः ॥ अत्रस्थानेंद्रियाधिष्ठातृकर्माण्याह ॥ इतिस्तृतीये
स्पशा ॥ २४ ॥ तयोरिति ॥ तयोर्हस्तयोः स्थानभूतयोः बलवान्पाणींद्रियापरपर्यायबलसहितः इंद्रः अधिष्ठानमित्यर्थः उभयाश्रयं हस्तद्वयाश्रयमा
दानं कर्म किंत्विषयस्तु इंद्रियं हस्तद्वयगतत्वादादानमपि हस्तद्वयाश्रयमित्यर्थः । पादेंद्रियव्यष्टिसृष्टिमाह ॥ गतिमिति ॥ अभिकामिकामिच्छानुसा

तत्र चांतर्बहिर्वायुस्त्वचा लब्धगुणो वृतः ॥ हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया ॥ २४ ॥ तयोस्तु बलवानिंद्र आदानमुभयाश्र
यं ॥ गतिं जिगीषतः पादौ रुरुहातेऽभिकामिकाम् ॥ २५ ॥ पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः ॥ निरभिद्यत शिश्नो वै प्रजानंदा
मृतार्थिनः ॥ उपस्थ आसीत्कामानां प्रियं तदुभयाश्रयम् ॥ २६ ॥

रां गतिं जिगीषतः गंतुमिच्छतः ब्रह्मणः पादौ रुरुहाते निर्भिन्नावित्यर्थः
२५ ॥ अथ यस्थानेंद्रियादीन्याह । पद्भ्यामिति । यज्ञो विष्णुः यज्ञो वै विष्णुरिति श्रुतेः । यज्ञः स्वयमेव पद्भ्यां इंद्रियाणींद्रियस्य पादद्वयस्थत्वात्पद्भ्यामिति द्विवचन
निर्देशः । पद्भ्यां गतिसामर्थ्यापादक पादेंद्रियेण सह पादयोरधिष्ठितवानित्यर्थः ॥ नृभिः कर्मभिः गमनागमनादिभिः कर्मभिः हव्यं हविरर्थद्रव्यं क्रिय
ते संपाद्यत इत्यर्थः ॥ गमनादिकं कर्म हव्यं विषय इत्युक्तम् । उपस्थव्यष्टिसर्गमाह ॥ निरभिद्यतेति प्रजानंदामृतार्थिनः प्रजाः अपत्यमानंदो रतिः आनं
द हेतुत्वात्तस्याः ॥ ताभ्यां यदमृतममृततुल्यं सुखमर्थयतः । यद्वा प्रजाः रत्यानंदरूपममृतं चार्थयतः ब्रह्मणः समष्ट्युपस्थतः शिश्नः व्यष्ट्युपस्थस्थाने
निरभिद्यताभूदित्यर्थः शिश्नग्रहणं योषिल्लिंगस्याप्युपलक्षणं शिश्नः अधीष्ठानं उपस्थ इंद्रियं प्रजापतिरधिष्ठाता रतिः कर्म आनंदो विषयश्चा

भा॰ द्वि॰

॥६१॥ सीदिस्तुरंकमपुरूं कामादीनां स्त्रीसंभोगादीनां प्रियं सुखं उभयाश्रयं इंद्रियदेवताश्रयमित्यर्थः । यद्वा । उभयाश्रयं स्त्रीपुल्लिंगाश्रयं इत्यर्थः । इंद्रियतत्स्था
नाश्रयं इतिवा ॥२६॥ पायुव्यच्छुसृत्तिमाह । उत्सिसृक्षोरिति । धातुमलं भुक्तानामन्नादीनामसारांशं तस्य उत्सिसृक्षोर्गुदं पायोरिंद्रियस्थानं निरभिद्यत ततो गुद
नः पायुरिंद्रियं मित्रोधिष्ठाना वाभूत् । उत्सर्गस्त्यागः उभयात्मकः उभयाश्रयः इंद्रियतत्स्थानाश्रयो धातुमलत्याग इत्यर्थः ॥२७॥ एवं ज्ञानकर्मोभयेंद्रि
यव्यष्टिसृष्टिमभिधायान्यासामपि नाड्यादिसृष्टीनां उभयाश्रयं प्राणापानाश्रयं प्राणापानवायुवियोगमरणस्य पुराणांतर प्रसिद्धः ॥२८॥ आदि
त्सोरिति । अन्नपानानामादित्सोः संग्रहेच्छोः कुक्ष्यंत्रनाड्यः आसन्नभवन् । कुक्षिरधिष्ठानमंत्राण्यन्नसंग्रहे करणमिंद्रियस्थानीयानि नाड्यस्तु पा

उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम् । ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयं ॥२८॥ आसिसृप्सोः पुरः पुर्या नाभिद्वारमपा
नतः । तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयम् ॥२९॥ आदित्सोरन्नपानानामासन्कुक्ष्यंत्रनाडयः । नद्यः समुद्राश्च तयोस्तु
ष्टिः पुष्टिस्तदाश्रये ॥२९॥ निदिध्यासोरात्ममायां हृदयं निरभिद्यत । ततो मनस्ततश्चंद्रः संकल्पः काम एव च ॥३०॥ त्वक्च
र्ममांसरुधिरमेदोमज्जास्थिधातवः । भूम्यप्तेजोमयाः सप्त प्राणो व्योमांबुवायुभिः ॥३१॥

नसंग्रहे । तयोर्नाड्यंत्रवर्गयोः क्रमेण नद्यः
समुद्राश्च देवते । तुष्टिरलं बुद्धिः पुष्टिर्देहपोषणं तदाश्रये नदीसमुद्राश्रये । तस्मादिहेतुत्वात् ॥२९॥ मनोव्यष्टिसृष्टिमाह । निदिध्यासोरिति । आत्मनायां
स्वरूपतिरोधायकं प्रकृतिं निदिध्यासोर्निरूपयतः हृदयं कमलाकारमधिष्ठानं ततो मन इंद्रियं चंद्र अभिमानी संकल्पः मनोव्यापारश्चाभूदित्यर्थः
॥३०॥ एवं ब्रह्मशरीरात्मसमष्टिव्यष्ट्यवयवविशेषविभागमभिधाय तेषां सार्वभौतिकत्वेपि तद्भूतांशभूयस्त्वनिबंधनं तदात्मकत्वमाह । त्वगिति
॥ चर्मस्थूलमंतस्त्वक् तदुपरिस्थितं सूक्ष्मं चर्म त्वक् त्वगादयो स्थानाः द्वंद्वैकवद्भावेन निर्दिष्टाः ते सप्त धातवः भूम्यप्तेजोमयाः । प्राणस्तु व्योमांबु
वायुभिरारब्ध इति शेषः ॥३१॥ ॥६१॥

गुणात्मेति इंद्रियाणि गुणात्मकानि शब्दादिगुणग्रहस्वभावानि गुणाग्रहात्मकानि कथमित्यत आह। भूतादिरिति॥ अहंकारः तत्प्रभवाः। शब्दादयो गुणाः। इंद्रिया
ण्यपि तत्प्रभवत्वात् गुणात्मकान्येवेत्यभिप्रायः। मनः सर्वविकाराणां कामसंकल्पादीनामात्मा आश्रयः बुद्धिः विज्ञायतेऽनेनेति विज्ञानं महत्तत्वं तद्रूपिणी बुद्धिः
महान् बुद्धिलक्षणावचनात्॥ ३२॥ उपसंहरति। एतदिति। एतच्चेतनाचेतनात्मकं देवादिव्यष्टिवस्तुजातगर्भमेतच्च सैंद्रकटाहपरः। पृथिव्यप्तेजोवाय्वा
काशाहंकारमहदव्यक्तरूपैरष्टभिरावरणैर्बहिरावृतं भगवतः॥ स्थूलंरूपं तेतुभ्यं मया व्याहृतं समग्रमभिहितम्॥ ३३॥ ततो विलक्षणं रूपांतरमस्ती
त्याह॥ अतः इति॥ अयं श्लोको जीवपरः। अव्यक्तस्योक्तत्वादन्यथा पुनःसंख्यानुपपत्तेः अतः स्थूलरूपात्परं परत्वेनावस्थितं सूक्ष्मतरं वालाग्रशतभाग
स्मितिश्रुत्युक्तम्॥ मुक्तात्मस्वरूपं रूपांतरमपि भगवतोऽस्तीति शेषः। सूक्ष्मत्वं कुतः। अव्यक्तं चक्षुरादिभिर्नव्यज्यत इत्यव्यक्तं चक्षुराद्यग्राह्यं। तत्कुतः। निर्विशे

गुणात्मकानींद्रियाणि भूतादिप्रभवा गुणाः॥ मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी॥ ३२॥ एतद्भगवतो रूपं स्थूलं ते व्याहृतं म
याः॥ मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतम्॥ ३३॥ अतः परं सूक्ष्मतममव्यक्तं निर्विशेषणम्॥ अनादिमध्यनिधनं नित्यं वा
ङ्मनसः परं॥ ३४॥ अमुनी भगवद्रूपे मया ते अनुवर्णिते॥ उभे अपि न गृह्णंति मायासृष्टे विपश्चितः॥ ३५॥

षणं शब्दस्पर्शरूपादि
गुणाभावात् शब्दादिविशेषवद्धि चक्षुरादिग्राह्यमिति भावः। निर्विशेषत्वं कुतः। वाङ्मनःपरं देवमनुष्यादिबुद्धिशब्दागोचरं। तदपि कुतः। अनादिमध्यनिध
नं आदिरुत्पत्तिः निधनं विनाशः मध्यमुत्पत्तिनिधनयोरंतरालावस्था एतदवस्थात्रयशून्यमित्यर्थः। तदपि वा कुतः। नित्यं कालापरिच्छिन्नं कालपरिच्छिन्न
मेवास्यात्रयं भवतीति भावः॥ ३४॥ एवं प्रकृतिमंडलोत्तीर्णं मुक्तात्मस्वरूपं विशोध्य संसृष्टासंसृष्टयोरुभयोः। संसृष्टस्याविद्याविशिष्टत्वान्मुक्तस्वरूपस्यानि
ष्पन्नयोगिध्येयत्वात् योगयुक्तानां सानालंबनतया शुभाश्रयत्वं प्रतिषेधति। अमुनी इति। ते तुभ्यं ते मयाऽनुवर्णिते भगवतः अमुनी स्थूलसूक्ष्मे रूपे न गृह्
णंति नोपासते उपासका इति शेषः। उपासका उपास्यं शुभाश्रयत्वे न गृह्णंतीत्यर्थः। कुतः। विपश्चितः सर्वज्ञस्य ब्रह्मणो मायासृष्टे संकल्पसृष्टे भगवतः

भा॰ द्वि॰

॥६२॥

कल्पायतत्वादंधमसेत्त्वयोरित्यर्थः । मर्त्यस्य संसृष्टचेतनस्याविद्यावेष्टितत्वेनाशुद्धत्वान्मुक्तस्वरूपस्य स्वतः शुद्धिविरहाच्च नोपासनाविषयत्वं किं त्वादित्यवर्णं
पुरुषादिवेदांतसिद्धं परमात्मानो मूर्तं रूपमेवोपास्यमित्यर्थः ॥ तथा च शौनकेन चतुर्मुखसनकादीनां जगद्दंतर्वर्त्तिनामविद्यावेष्टितत्वेन शुभाश्रयतान
र्हता मुक्तवद्ब्रह्मणा मेवपश्यार्द्योगेनोद्भूतबोधानां स्वस्वरूपापन्नानां च स्वतः शुद्धिविरहाच्छुभाश्रयताप्रतिषेध उक्तः । आब्रह्मस्तंबपर्यंता जगदंतर्व्यवस्थि
ताः । प्राणिनः कर्मजनितसंसारवशवर्त्तिनः यतस्ततो न ते ध्यानिनामुपकारकाः । अविद्यांतर्गताः सर्वे ते हि संसारगोचराः । पश्चादुद्भूतबोधाश्च ध्याने
नैवोपकारकाः नैसर्गिको न वै बोधस्तेषामप्यन्यतो यतः । तस्मात्तदमलं ब्रह्म निसर्गादेव बोधवदित्यादिना प्राधान्येनोपास्यत्वनिषेधः भगवद्विग्रहं

स वाच्यवाचकतया भगवान् ब्रह्मरूपधृत् नामरूपक्रिया धत्ते सकर्माकर्मकः परः ॥ २६ ॥ प्रजापतीन् मनून् देवान् ऋषीन् पितृगणा
न् पृथक् । सिद्धचारणगंधर्वान् विद्याध्रासुरगुह्यकान् ॥ २७ ॥ किन्नराप्सरसो नागान् सर्पान् किंपुरुषोरगान् । मातॄ रक्षःपिशा
चांश्च भूतप्रेतविनायकान् ॥ २८ ॥ कूष्मांडोन्मादवेतालान् यातुधानान् ग्रहानपि । खगान् मृगान् पशून् वृक्षान् गिरीन् नृप सरी
सृपान् ॥ २९ ॥

नित्वेनोपासनं त्विष्टमेव ॥ २५ ॥ स्थूलस्य भगवद्रूपत्वमेवोपपादयितुं भगवत एव ब्रह्मादिरूपेण सृष्ट्यादिकमाह । स इति । भगवान् वाच्य
वाचकतया व्यवस्थितजगच्छरीरकत्वाद्वाच्यतया व्यवस्थितः ॥ आकाशशरीरकत्वाच्च वाचकाकाशगुणशब्दरूपेणावस्थितः ब्रह्मरूपधृत् । चतुर्मुख
रूपधृत्वा नामरूपक्रियाधत्ते ब्रह्मरूपधृदित्यनेन प्रागुक्तव्यष्टिश्चतुर्मुखशरीरकादिसमष्ट्यते । नामदेवादिनामरूपं देवादिरूपं क्रियास्तेषां कर्माणि धत्ते
स्वपर्यंतनामरूपक्रियाः व्याकरोतीत्यर्थः । यथा नामरूपं च भूतानां कर्मणां च प्रपंचनं । वेदशब्देभ्य एवादौ देवादीनां चकार स इति । कथंभूतो विध
ते ऽकर्मकः । अकर्मवश्यः सकर्मा संकल्पमात्रव्यापारकः ॥ २६ ॥ नामरूपक्रियाधानमेव प्रपंचयति । प्रजापतीनित्यादिना । द्वितीयांतानां धत्ते इत्यनेनान्वयः ॥६२॥
तत्र प्रजापत्यादिनामानि तद्वाच्यानि रूपाणि तत्कर्माणि च ज्ञेयानि ॥ पृथक् तदवांतरभेदेन । गिरीनित्यस्यानंतरं नृपेति संबोधनम् ॥ २७ ॥ २८ ॥ २९ ॥

चतुर्विधा जरायुजांडजस्वेदजोद्भिज्जरूपेण चतुर्विधाः पुमान्न देवो न नरो न पशुर्न च यादयः चतुर्विधो विभेदोयं इत्युक्तं देवादिरूपेण चतुर्विधाः ये च स्था
वरजंगमभेदेन द्विविधाः जलस्थलनभौकसो कांसियेषां तान् विधत्ते इति पूर्वेणान्वयः । नन्वेकरूपेणैव किं न धत्ते इत्यत आह । कुशलेत्यादिना । क
र्मणां सेत्रत्र पुण्यापुण्यरूपाणां कर्मणां परा प्राप्या गतयः फलानि । कुशला उत्तमाः अकुशलाः नीचाः मिश्राः मध्यमाः कर्मणां विचित्रत्वात्तत्फ
लानामपि वैचित्र्यमिति भावः ॥ ५० ॥ एतदेव प्रपंचयति ॥ सत्वमिति सार्द्धेन ॥ सत्वं सात्विककर्मफलरूपा देवत्वप्राप्तिरुत्तमा सुखप्राचुर्यात् । रजो
गतिर्मनुष्यता मिश्रा ॥ नारकशब्दः स्थावराद्युपलक्षकः ॥ तमोगतिर्नारकता नीचेत्यर्थः ॥ तत्रापि सात्विकराजसतामससुरनृनारकासु गतिष्वपि

द्विविधाश्चतुर्विधा येन्ये जलस्थलनभौकसः ॥ कुशलामध्यमामिश्राः कर्मणां गतयस्त्विमाः ॥ ५० ॥ सत्वं रजस्तम इति तिस्रः सु
रनृनारकाः ॥ तत्राप्येकैकशो राजन् भिद्यंते गतयस्त्रिधा ॥ यदैकैकतरोन्याभ्यां स्वभाव उपहन्यते ॥ ५१ ॥ स एवेदं जगद्धाता
भगवान् धर्मरूपधृक् ॥ पुष्णाति स्थापयन् विश्वं तिर्यङ्नरसुरात्मभिः ॥ ५२ ॥

यदैकैकतरः सात्विकादिः स्वभावः सात्विकादिः स्व
भावः इतराभ्यामवशिष्टाभ्यां स्वभावाभ्यां उपहन्यतेऽनुविध्यतेऽभिभूयत इत्यर्थः ॥ ५१ ॥ तदाह एकैकशः । एकैकं त्रिधा गतयो भिद्यंते यथा रजः प्रचु
रा एव नराः केचित्केवलरजःप्रचुराः केचित्सत्वप्रचुराः केचित्तमःप्रचुराः । एवं सात्विकतामसा अपि प्रत्येकं त्रिधेत्यर्थः । एतेन यावत्यः कर्मगत
यस्तस्याप्युत्तरमुक्तं भवति ॥ एवं ब्रह्मांतर्यामित्वेन स्रष्टृत्वमभिधाय सात्त्वात्पालयितृत्वमाह ॥ स इति ॥ जगद्धाता जगत्स्रष्टा स एव भगवान् तिर्य
ङ्नरसुरादिभिः ॥ तिर्यंचो वराहमीनकच्छपहंसादयः नरा रामकृष्णादयः सुरा वामनसुयज्ञादयः । एतैरवतारैरिदं विश्वं स्थापयन् पालयन् धर्मरू
पधृक् धर्मशरीरकः ॥ सन्पुष्णाति संवर्द्धयति ॥ ५२ ॥ रुद्रशरीरकत्वेन संहर्तृत्वमाह ॥ तत इति ॥ कालाग्निरुद्रात्मा कालाग्निरुद्र आत्मा शरीरं यस्य सः

कालाग्निरुद्रस्यात्मभूत इति वा स भगवानुपादानभूतात्स्वस्मात् यदिदं विश्वं तत्काले कल्पान्ते संनियच्छति संहरति अनिलो वायुर्मेघसमूहमिवेति दृष्टान्तः ॥४३॥ जगद्
व्यापारस्य जीववत्कर्मीयत्वमाशङ्क्य नेत्याह । इत्थमिति ॥ इत्थंभावेन प्रकृतत्वस्रष्टृत्वादिभावेन प्रयुक्तः भगवत्तमः ज्ञानादिपूर्णतमः । भगवान् कथि-
तः सम्यक्प्रतिपादितः । सूरयो ब्रह्मविदः इत्थंभावेन चिदचिद्रूपेण परं केवलं द्रष्टुं नार्हन्ति किंतु तद्विलक्षणत्वेन द्रष्टुमर्हन्ति भगवान् भगवत्तम इ-
ति विशेषणद्वयं जीववैलक्षण्यप्रतिपादकं जीवस्य भगवत्त्वात् व्यापारः । कर्मीयतः परमात्मनः कर्तृत्वं अकर्मीयत्वमिति भावः ॥४४॥ ननु स एव स्र-
ष्टा सच्चतुर्वर्गकर्त्री यो मामजमनादिं च । तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययमित्यादिना सृज्यत्वमसृज्यत्वं कर्तृत्वमकर्तृत्वं वावगम्यते ॥ तत्कथं घट-
त इत्याशङ्क्य विधिनिषेधयोर्विषयव्यवस्थां च दर्शयति ॥ नेति ॥ अस्य जगतः कर्मणि स्रष्टो यस्य परमात्मनः जन्मादिर्नानुविधीयते परमात्मनस्त्व-

ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः ॥ सन्नियच्छति कालेन घनानीकमिवानिलः ॥४३॥ इत्थंभावेन कथितो भगवान् भगवत्तमः ॥
नेत्थंभावेन हि परं द्रष्टुमर्हन्ति सूरयः ॥४४॥ नास्य कर्मणि जन्मादौ परस्यानुविधीयते ॥ कर्तृत्वप्रतिषेधार्थं माययारोपितं हि तत् ॥४५॥

रूपेण सृज्यः अपि तु सृज्यत्वं तत्तदात्मकतया तद्विशिष्टत्वात् सृज्य इत्युच्यते तस्मादजत्वं स्वरूपेण सृज्यत्वं तु सद्द्वारकमित्यविरोध इत्यर्थः । कर्तृत्वाकर्तृत्व-
विरोधं परिहरति कर्तृत्वमिति मायया प्रकृत्या जीवे व्यारोपितं प्राकृतकरणकलेवरसापेक्षं जीवगतकर्तृत्वं यत्तदेव प्रतिषेधार्थं प्रतिषेधः विष-
यपरः संकल्पमात्रेण कर्तृत्वं तु विधीयते इत्यविरोध इत्यर्थः ॥ कामाद्यनानुमानापेक्षेति प्रकृत्यधीनकर्तृत्वाभावो हि स्वविनतः । प्रतिषेधार्थमित्यत्रा-
र्थशब्दो विषयपरः ॥ अर्थं स्यादिविषये मोक्ष इति प्रसिद्धेः ॥ कर्मणि जन्मादौ परस्यानुविधीयते ॥ कर्तृत्वप्रतिषेधार्थमित्यपि पाठः ॥ तत्रायमर्थः । ननु
जीववद्विलक्षणत्वेन परं पश्यन्तीत्युक्तं कथमेतदुपपद्यते । जीववदस्यापि जन्मकर्मादिदर्शनादित्यत आह । नास्येति । अस्य चिदचिदात्मकप्रपंचस्य पर-
जन्मादौ कर्मणि च ॥ यद्वा । जन्मादिरूपे कर्मणि सत्यप्यनुसृत्य प्रपंचानुसारि जन्मादिकमित्यर्थः ॥ परस्य परमात्मनो न विधीयते प्रपंचवत्कर्मीयत्व ॥६३॥

जन्मादिकं परमा... ...पाद्यते। अजायमानो बहुधा विजायत इत्यादिवेदांतवाक्यैरिति शेषः। परमात्मनो जन्मादिकमकर्मीयतमिति कुतोव
गम्यत इत्यत आह। कर्तृत्वेत्यादि। हि यस्मात्तज्जन्मकर्मादिकं मायया स्वकीयसंकल्परूपज्ञानेन माया वयुनं ज्ञानमिति ज्ञानपर्यायोत्र मायाशब्दः। मायया
सततं वेधि प्राणिनां शुभाशुभमिति प्रयोगाच्च। कर्तृत्वप्रतिषेधार्थकमीयतत्र कर्तृत्वस्य प्रतिषेधाया रोपितं स्वस्मिन्निति शेषः। मदीयजन्मकर्मादिकं
जीववन्न कर्मीपत्त्रमिति प्रदर्शनाय त्वेद्दयैव स्वस्मिन् देवमानुषजन्मकर्मादिकमारोपितं गृहीतमित्यर्थः॥ तथा च भगवतैव गीयते॥ अजोपि सन्न
व्ययात्माभूतानामीश्वरोपि सन्न। प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममाययेति॥ ४६॥ पुरुषांडं विनिर्भिद्येत्यादिनोक्तमर्थमुपसंहरति॥ अयं त्विति। ब्रह्मणः
अयं कल्पः अवांतरकालविभागवानुदाहृतः दिङ्मात्रत्वेनोक्तः अस्मिन्कल्प इव कल्पांतरेपि सृष्टिरित्याह॥ विधिरिति॥ यत्र महाकल्पे प्राकृता महदा

अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः॥ विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः॥ ४७॥
परिमाणं च कालस्य कल्पलक्षणविग्रहम्॥ यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु॥ ४८॥

दिपृथिव्यंताः सर्गा वैकृताः पृथिव्यादिविकारैरारब्धाः सर्गाः इत्ययं विधिः प्रकारः॥ अन्यैर्महाकल्पादिभिः साधारणः समानः एतेन पुरुषावयवैर्लोक
काः सपालाः पूर्ववत्कल्पिता इत्यादिनोक्तावितः। धाता यथापूर्वमित्यादिश्रुतिविरोधः। परिहृतः पुरुषावयवानां लोकानां चोपासनार्थमिपत्वाद्वार
स्योपदेशे प्रतिकल्पं सृष्टेरैकरूप्ये विरोधाभावात्॥ ४७॥ वक्ष्यमाणं सविस्तरं प्रतिजानीते। परिमाणमिति॥ कालस्य परिमाणं सूक्ष्मं स्थूलं च परिमा
णं कल्पस्य लक्षणमियानेवंरूपं लक्षणं विग्रहमवांतरकल्पं मन्वंतरादिरूपं च यथा यथावत्पुरस्तात्तृतीयस्कंधे व्याख्यास्ये विस्तरेण कथ
यिष्ये। पाद्मं कल्पमथो कार्त्स्न्येन व्याख्यायमानं शृणु इत्यर्थः॥ ४८॥ एवं स्थिते शौनकः। इत्यभिव्याहृतं राजा निशम्य भरतर्षभ इत्यादिना स्वकृतस्य राज
कृतप्रश्नस्य वैयासकेरिति वचसा त्वनिष्ठ्य यमात्मन इत्यादिना सूतेनोक्तं शुकोक्तमुत्तरं श्रुत्वा पुनरपि राजकृतप्रश्नानामेव शुकोक्तान्युत्तराणि विदु

भा॰टि॰

॥ ६४ ॥

र मैत्रेयसंवादरूपेण श्रोतुकामः पृच्छति । यदाहेति त्रिभिः । हे सूत भागवतश्रेष्ठ ॥ भगवान् उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ॥ वेत्ति विद्यामवि
द्यां चेत्युक्तगुणसंपन्नः योसौ क्षत्ता विदुरः ॥ सुहृदस्त्यजांस्त्यक्तुमशक्यान् बंधून् त्यक्त्वा भुवः पृथिव्याः संबंधीनि तीर्थानि चचार ॥ ४९ ॥ कुत्रेति ॥ तस्य वि
दुरस्य कौषारवेर्मैत्रेयस्य च कुत्र प्रदेशे अध्यात्मसंमतः ॥ अध्यात्मवित्संमतः संवादः अभूत् पृष्टः ॥ विदुरेण पृष्टः स भगवान्मैत्रेयः तस्मै विदुर
राय ॥ यद्वा ॥ यद्वेव तत्त्वमुवाच तत् त्वं ब्रूहीत्युत्तरेणान्वयः ॥ ५० ॥ ब्रूहीति ॥ तदिदं तत्त्वं सौम्य हे सूत विदुरस्य विचेष्टितं बंधुत्यागे निमित्तं यत् तदपि

शौनक उवाच । यत्राह भगवान्सूत क्षत्ता भागवतोत्तमः ॥ चचार तीर्थानि भुवस्त्यक्त्वा बंधून् सुदुस्त्य
जान् ॥ ४९ ॥ कुत्र कौशारवेस्तस्य संवादोऽध्यात्मसंमतः ॥ यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वमुवाच ह ॥ ५० ॥
ब्रूहि नस्तदिदं सौम्य विदुरस्य विचेष्टितम् ॥ बंधुत्यागनिमित्तं च तथैवागतवान्पुनः ॥ ५१ ॥ सूत उवाच
राज्ञा परीक्षिता पृष्टो यदवोचन्महामुनिः ॥ तद्वोऽभिधास्ये शृणुत राज्ञः प्रश्नानुसारतः ॥ ५२ ॥

पुनः यथा येन प्रकारेणागतवान् तं प्रकारं च नोऽस्मभ्यं ब्रूहीत्यर्थः ॥ ५१ ॥ सूत तस्तु भवत्पृष्टमेव राज्ञा श्रीशुकं प्रति पृष्टमतः । शुकोक्तिरेव भवदीयप्रश्नस्याप्युत्तरमि
त्याह ॥ राज्ञेति ॥ परीक्षिता राज्ञा आसमंतात् पृष्टो महामुनिः श्रीशुकः यन्मैत्रेयोक्तमवोचत् तदेव राजप्रश्नानुसारतः राजप्रश्नानुक्रमेण वः युष्मभ्यमभिधास्ये
कथयिष्ये शृण [illegible] ॥ [illegible] इत्यमिति शेषः ॥ ५२ ॥ • ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ६४ ॥

भा॰द्वि॰

॥ ६५ ॥

इति श्रीवत्सान्वयपयःपारावाराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोःसुतेन तच्चरणकमलपरिचर्याप्रसन्नतत्सुक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासे
न श्रीवीरराघवविदुषा विलिखितायां श्रीमद्भागवतचंद्रचंद्रिकायांततीयस्कंधे टीपीकायां दशमोऽध्यायः॥१०॥ श्रीमते रामानुजाय नमः॥ श्रीवेंकटेशाय नमः

इति श्रीमद्भागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां द्वितीयस्कंधे दशलक्षणवर्णनं नाम
दशमोऽध्यायः॥१०॥ समाप्तोयं द्वितीयस्कंधः॥ श्रीमते रामानुजाय नमः॥ श्रीः

मिति कार्तिक सुदी॥२॥ दोज कों पुस्तक श्रीमद्भागवत की श्रीवृंदावन मे धीरसमीर के पास श्रीरामकृष्ण महंत की कुंज मे मंगलराम
मिश्र ने लिखी पुज्य श्री श्री श्री श्री श्री स्वामीजी महाराज जी नाभेवारे जी वैष्णव बलिरामदासजी के मधे लिखी संवत् १९०५॥ ॥
ग्रंथश्लोकमूल॥५२५॥ टीका॥२५५०॥ समग्र॥३०७५॥

॥ ६५ ॥

॥ द्वितीयस्कंधपत्रसंख्या ॥ ६७ ॥ पत्रसमग्र ॥

यद्यपि केचिदिदं पुराणं शुककर्तृकमिति वदंति ॥ यद्यपि चोपनिषज्ज्ञानोपबृंहणपरेषु तत्रापि सात्विकतया प्रसक्तेष्वनुगुणार्थतया च प्रबले
षु प्रबंधेषु वासिष्ठपौत्रप्रसक्तस्य शुकस्याभीष्टतमपंचमश्रुतिप्रवर्तकभगवदंशपाराशर्यतनयपरमऋषिप्रणीतं पुराणं श्रीमद्भागवतमशेषजगत्
प्रथितं परमनिःश्रेयसाभ्यर्थिभिरत्यंतमुपादेयं ॥ यथा पाद्मे अंबरीषं प्रति गौतमेनोक्तं । अंबरीष शुकप्रोक्तं नित्यं भागवतं सदा । पठस्व स्वमुखे
नापि यदीच्छसि भवक्षयमिति । श्रीव्यासार्यसूक्तेष्वपि शुककर्तृकत्वमवगम्यते । तथापि तत्प्रणीतमित्यस्य प्रवर्तितमित्यर्थः ॥ पाराशर्यस्य
कृतेति विशेषः । तेनेत्यस्य तदित्यादि ॥ अन्यथैतत्पुराणस्य बहुवचोविरोधापत्तेः ॥ तथाहि । तावदस्मिन्नेव ग्रंथे तृतीयाध्याये । उत्तमश्लोकचरि
तं चकार भगवानृषिः । निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् । तदिदं ग्राहयामास सुतमात्मवतां वरं ॥ इति व्यासकर्तृकत्वं स्पष्टं प्रतीय
ते । तथा श्रीनारदस्याज्ञयैतत्पुराणनिर्माणं । तस्मिन्नेव स्कंधे स्पष्टीभविष्यति । अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे । लोकस्याजानतो
विद्वांश्चक्रे सात्वतसंहितामिति ॥ तथा द्वितीये प्रथमेऽध्याये ॥ इदं भागवतं नाम पुराणं ब्रह्मसंमितं । अधीतवान्द्वापरादौ पितुर्द्वैपायनादहमि
ति शुकोक्तेरपि तदवगम्यते । तथा नवमे द्वाविंशेऽध्याये । यस्यां पराशरात्साक्षादवतीर्णो हरेः कला ॥ वेदगुप्तो मुनिः कृष्णो यतोऽहमिदमध्यगा
म । हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणः ॥ मह्यं पुत्राय शांताय परं गुह्यमिदं जगाविति शुकोक्तेश्च तदवगम्यते ॥ उदाहृतव्यासार्य
श्रीसूक्तिगतहेतुभिरेवास्य पुराणरत्नस्य प्रामाण्यमत एवोपादेयत्वं च स्पष्टमवगम्यत इति ॥ न तत्रास्माभिः कार्यो यत्नः । पुराणांतरसंवादाच्चैतद
नंतरमेव स्फुटीभविष्यति । अत्र गायत्र्युपक्रमत्वं प्रतीयते ॥ धीमहीतिशब्दतः परांतैरर्थतश्च तदुपक्रमत्वप्रत्यभिज्ञानात् । गायत्र्युपक्रमत्वं
चास्य स्कांदे पुराणे उत्तरखंडे । ग्रंथोऽष्टादशसाहस्रो द्वादशस्कंधसंमितः ॥ हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥ गायत्र्या च समारंभो यत्र

भा०प्र०
२

भागवतंविदुरिति॥तथाचोक्तंमात्स्ये॥आरभ्ययत्रगायत्रींवर्ण्यतेधर्मविस्तरः।वृत्रासुरवधश्चापियच्चभागवतंविदुरिति।तत्रजन्माद्यस्ययत
इतिजगत्कारणत्वप्रतिपादनेनतदर्थकंसवितृशब्दार्थउक्तः॥वेदांतप्रसिद्धिंद्योतयतायतइतिपदेनतच्छब्दार्थश्चसूचितः।सूर्यइत्यनेन
वरेण्यशब्दार्थउक्तः॥उक्तंहिसर्वज्ञैःसावित्रीविवरणे।वरैर्नेयंवरेण्यंवराध्यातारईरिताइति।तेनइत्यादिनादेवशब्दार्थउक्तः॥द्योतनःसर्वभावा
नांद्योतमानःस्वयंतदा॥अज्ञानमखिलंतुद्यन्नितितल्लोक्तं।द्यन्खंडयन्।दोऽवखंडने॥द्योतनःप्रकाशकः॥जन्मादीत्यनेनचदेवशब्दार्थउ
क्तः॥जगद्व्यापारोहितत्वलीलाधाम्नेत्यादिनाभर्गशब्दार्थउक्तः।भर्गस्तेजःसमाख्यातं॥भर्जेयत्याखिलंकश्मितिचतत्रयुक्तं।स्वराट्स्वतंत्रःप्रेर
कत्वेनधीप्रचोदनंद्योतनंधियोधीवृत्तिकाश्चेशः प्रेरणंतुप्रचोदनंइतिहितत्रोक्तं॥एवंप्रदर्शितनयागायत्र्युपक्रमत्वसिद्धिः॥अथपदानि
योज्यंते।प्रबंधस्यवेदांतार्थोपबृंहणरूपतांदर्शितांद्योतयति॥जन्मादीति।यतोवाइमानिभूतानिजायंतइतिवेदांतार्थप्रत्यभिज्ञानात्।शा
रीरकार्थसंग्रहत्वाच्चद्योतयति।शारीरकद्वितीयसूत्रस्यैवादावुपादानात्।श्रुत्यर्थप्रत्यभिज्ञानादेवपरंधीमहीत्यत्रब्रह्मेत्यध्याहारोबोध्यः
अस्याखिलस्यविचित्रमयस्यजगतोयतोजन्मादितंसत्यंपरंब्रह्मधीमहीत्यन्वयः॥कारणंतुध्येयइतिश्रुतेरितिभावः।एवमन्येषामपियच्छब्दानां
जन्मादीतितद्गुणसंविज्ञानोबहुव्रीहिः।जन्मस्थितिलयं॥अन्यपदार्थः॥अतएवनपुंसकमेकवचनत्वं।अतद्गुणसंविज्ञानबहुव्रीहित्वे
सृष्टिकारणत्वासिद्धिः॥तथास्थितिलययोरेवान्यपदार्थत्वेनजन्मादिशब्दस्यद्विवचनांतत्वे॥ईदूदेद्द्विवचनमितिप्रगृह्यसंज्ञायासंध्यभा
वप्रसंगः।तद्गुणसंविज्ञानबहुव्रीहित्वपक्षेपिजन्मादित्रयाणांसमुदितानामन्यपदार्थत्वेजन्मादिशब्दस्यबहुवचनांतत्वापत्तिः।जन्मन
एवान्यपदार्थत्वेसमस्यमानपदार्थत्वविरुद्धं।जन्मप्रसेवतस्यादित्वानुपपत्तिश्च।अतोजन्मस्थितिलयसमाहारमन्यपदार्थंविवक्षितत्वात् २

जन्मादीति । तद्गुणसंविज्ञानबहुव्रीहिः प्रयुक्तः । तस्यान्यपदार्थस्य गुणविशेषणानि समस्यमानपदार्था इति यावत् । तेषां समित्येकीकारे संवि
ज्ञानं विशेष्यभूतान्यपदार्थो तद्भावेन ज्ञानं । यस्माद्बहुव्रीहेर्लंबकर्णो गत इत्यादिः । स तद्गुणसंविज्ञानो बहुव्रीहिः ॥ तद्विपरीतश्चित्रगुरित्या
दिस्त्वतद्गुणसंविज्ञानः । यतो जन्मादीति तद्धीमहीत्यनेन जन्मादिकारणत्वं ब्रह्मणो लक्षणं विवक्षितं । यतो वा इमानीत्यादिश्रुतौ प्रतिवाक्यं
तद्ब्रह्मेत्यनुक्तेरनेकलक्षणवैयर्थ्याच्च जन्मादिसमुदाय एकं लक्षणं न तु जन्मकारणत्वं स्थितिकारणत्वं लयकारणत्वं चेत्यनेकलक्षणं ।
अत्र सत्यं परं ब्रह्म धीमहीत्येतावन्मात्रोक्तौ ब्रह्मशब्दस्य बृहत्वमहदादिशब्दपर्यायत्वाभिधानेन प्रकृतिजीवादिपरत्वस्यापि संभवात् । तेषा

श्रीमन्नारायणो जयति ॥ जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकव
ये मुह्यन्ति यत्सूरयः । तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धी
महि ॥१॥

मेवात्र ध्येयत्वं प्रसक्तं तद्व्युदासायात्र ध्येयस्य ब्रह्मणो निरतिशयबृहत्वं स्वरूपगुणबृहत्वं तदेव ब्रह्मशब्दप्रवृत्तिनिमित्तं । प्रकृत्या
दिषु ब्रह्मशब्दप्रयोगस्त्वौपचारिकश्चेति वक्तुमत्र लक्षणमुच्यते ॥ तत्र चैकेनैव समुदायलक्षणेन ध्येयस्य ब्रह्मणो निरतिशयबृहत्वलाभात् त
एव प्रकृत्यादिव्युदासान्नानेकलक्षणत्वं । अन्यथा सृष्टिकारणत्वमात्रात् तदनुकूलज्ञानशक्त्यादिलाभेपि स्थित्याद्यनुकूलज्ञानशक्त्याद्यला
भेन निरतिशयबृहत्वासिद्धिः । न च त्रितयोक्तावपि मोचकत्वोपयोगिज्ञानशक्त्याद्यलाभ इति वाच्यं । मोक्षस्य स्थितिलयान्यतरान्तर्भूतत्वेन
तत्कारणत्वेनैव तल्लाभात् ॥ स्थितिर्नाम अनिष्टपरिहारपूर्वकेष्टप्रापणरूपा मोचकत्वं च तादृशमेव ॥ यद्वायं मोक्षस्यात्यंतिकनाशरू

ब्र०सू० २ पञ्चमः। तर्हि ल्यप्यां तद्भूतः। यतः इति हेतौ पंचमी॥ ननु जनिकर्तुः प्रकृतिरित्यपादानसंज्ञायां पंचमी। तथा सति स्थितिविलययोरनन्वयः स्यात्
जनिकर्तुः प्रकृतिरिति सूत्रे हि प्रकृतिशब्द उपादानकारणवाची। जायमानस्योपादानकारणमपादानसंज्ञकं इति तत्सूत्रार्थात्। अत्र तत्सूत्रवि
हितापादानसंज्ञानिमित्तपंचम्यभ्युपगमे जन्मकारणत्वस्य लक्षणत्वलाभेप्यादिशब्दग्राह्यस्थितिलयकारणत्वस्य लक्षणत्वालाभात्। तयोरन
न्वयः स्फुट एव। हेत्वर्थपंचम्यां तु हेतुत्वस्य निमित्तोपादानसाधारण्यात्तदन्वय उपपन्नः। तत्र भाव्यवस्थाविशेषवतः प्रागवस्थायोगित्वमुपादा
नत्वं॥ निमित्तत्वं नाम कर्तृत्वं। एवं चात्र जगज्जन्मादीन्प्रत्युपादानत्वनिमित्तत्वरूपोभयकारणत्वं ब्रह्मणो लक्षणं विवक्षितं॥ ननु लोके मृत्कुलालयो
र्विभिन्नयोरेवोपादानत्वनिमित्तत्वदर्शनात्कथमेकस्योभयविधकारणत्वमित्यत आह। अन्वयादितरतश्चार्थेष्विति॥ अर्थेषु कार्यभूतेषु देव
मनुष्यादिष्वन्वयादनुवृत्तेरुपादानत्वं॥ इतरतो व्यतिरेकादनन्वयात् प्रकृतिपुरुषाद्यां विलक्षणत्वेन तन्नियंतृतया पृथगेवावस्थानात्
निमित्तत्वं चैकस्यैव ब्रह्मण उपपन्नमित्यर्थः॥ कुलालस्यासर्वशक्तेर्घटादिषु मृत्कार्येष्वनन्वयान्नोपादानत्वं॥ अत्र चेतनाया मृदस्तु व्यति
रेकाभावान्न निमित्तत्वं ब्रह्मणस्तु प्रत्यक्षादिप्रमाणांतरानवगतस्य केवलवेदांतैकसमधिगम्यस्य चिदचिद्विलक्षणस्योभयविधकारणत्वो
पयुक्तसार्वज्ञसर्वशक्तियुक्तस्यान्वयव्यतिरेकयोर्वेदांतेभ्योवगतत्वादुभयविधकारणत्वोपपत्तिरिति भावः। वेदांताश्च सर्वं खल्विदं ब्रह्म ऐ
तदात्म्यमिदं सर्वं॥ अयमात्मा ब्रह्म तत्त्वमसीत्यादयोऽन्वयप्रतिपादकाः। तदैक्षत यः पृथिव्यां तिष्ठन् पृथिव्या अंतरो यं पृथिवी न वेद यस्य
पृथिवी शरीरं यः पृथिवीमंतरो यमयति॥ य आत्मनि तिष्ठन्नात्मनोंतरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमंतरो यमयतीत्याद्या व्यति
रेकप्रतिपादकाः॥ यद्येवंविधानामुभयविधकारणत्वनिर्वाहकान्वयव्यतिरेकप्रतिपादकानामुभयविधकारणत्वप्रतिपादकानां। सदेव सो
म्येदमग्र आसीदेकमेवाद्वितीयं॥ तदैक्षत बहु स्यां प्रजायेय सन्मूलाः सोम्येमाः सर्वाः प्रजा इत्यादीनां च वेदांतानां ब्रह्मणि प्रतिपादकतयान्व २

यात्। अर्थेषु इतरतोऽनन्वयात्॥ प्रकृतिपुरुषादिषूभयविधकारणत्वप्रतिपादकत्वेनान्वयाभावाच्च। ब्रह्मैवोभयविधकारणमित्यर्थः। यथा
ब्रह्मस्वरूपगुणादिकं शास्त्रैकसमधिगम्यं तदुभयविधं कारणत्वं ब्रह्मण्येव शास्त्रेभ्योऽवगतं न तु प्रकृत्यादिष्विति भावः। अस्मिन्नु पक्षेऽन्वयादित्य
नेन समन्वयाध्यायप्रथमपादार्थ उक्तः॥ इतरतः इत्यनेन त्रिपाद्यर्थः॥ ब्रह्मकारणमेव ब्रह्मैव कारणमित्ययोगान्ययोगव्यवच्छेदेन कारणत्वा
दिसमन्वयाध्याये समर्थितं॥ पूर्वव्याख्याने त्वतुष्ट्यनुवृत्तिभ्यां उपादानत्वनिमित्तत्वनिर्वाहकाभ्यां तदुभयविधकारणत्वे समसाधिते अ
र्थादेव प्रकृत्यादीनां कारणत्वसिद्धेरयोगान्ययोगव्यवच्छेदावर्थे वेदितव्यसिद्धतः॥ यद्वा समन्वयादुभयविधकारणत्वस्य ब्रह्मण्येव संग
तेरर्थेषु प्रकृत्यादिषु इतरतोऽसंगतेश्च ब्रह्मण एव कारणत्वमित्यर्थः॥ एकमेवाद्वितीयमित्यनेन हि कृत्स्नस्य जगत एकमेवोभयविधकारणम
वगतं॥ तत्र प्रकृत्यादिषूभयविधकारणत्वोपयुक्तसर्वज्ञत्वसर्वशक्तित्वाद्यभावस्य ब्रह्मणि तद्भावस्य च श्रुतिभ्य एव यः सर्वज्ञः सर्ववित्। स
त्यकामः सत्यसंकल्पः॥ परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च। ज्ञाज्ञौ द्वावजावीशानीशौ। अजामेकां लोहितशुक्ल
कृष्णामित्यादिभ्योऽवगमादुभयविधकारणं ब्रह्मैवेति भावः॥ अस्मिन्नु पक्षे सार्वज्ञसर्वशक्तित्वादिगुणप्रतिपादकत्वेन वेदान्तानां ब्रह्मण्य
न्वयात् तस्मिन्नुभयविधकारणत्वोपपत्तिः॥ तदुपपत्तेश्च जन्मादिकारणत्वस्य लक्षणत्वसिद्धिरवगन्तव्या। अस्मिन्नपि पक्षे अयोगान्ययो
गव्यवच्छेदौ ग्राह्यौ॥ यद्वा ब्रह्म न लक्षणेन प्रतिपत्तव्यं अनुमानेनाप्यवगन्तुं शक्यत्वात्। अप्राप्ते हि शास्त्रमर्थवत्। शास्त्रैकप्रमाणत्वेऽपि त
स्मिन्प्रवृत्तिनिवृत्त्युभयराहित्ये अपुरुषार्थस्वरूपेण वेदान्तानां बोधकत्वेनान्वयः। पुरुषार्थपर्यवसानासंभवान्न शास्त्रं प्रमाणमित्यत
आह॥ अन्वयादितरतश्चार्थेष्विति॥ अत्रान्वयादित्यनेन समन्वयाधिकरणसिद्धान्तार्थ उक्तः॥ शास्त्रयोन्याधिकरणार्थस्त्वर्थो दत्र वि

भा० टी०
५

वक्षितः। शास्त्रयोनित्वाधिकरणाक्षेपपरिहाररूपत्वेन लक्षणकथनेनैव तदाक्षेपपरिहारयोरप्यत्र विवक्षितत्वप्रतीतेः। समन्वयाधिकरणं तु
शास्त्रयोनित्वाधिकरणाक्षेपपरिहाररूपमिति तदन्वयादित्यनेन प्रदर्शितं॥ अयं भावः॥ सत्तावदनुमानगम्यं ब्रह्म तस्यासंभवात्। यद्यपि घटा
दिवत्। सावयवत्वादिना जगतः कार्यत्वमनुमीयते॥ कार्यं च तदभिज्ञकर्तृकमित्यनभिज्ञजीवव्यतिरिक्तः। कृत्स्नजगन्निर्माणचतुर ईश्व
रोनुमातुं शक्यते। तथापि लाघवात्कार्यत्वादिहेतुनाऽनुमीयमानो यः कश्चित्कर्ता जीव एव स्यात्तस्य दृष्टत्वात्। तेन जीवकर्तृत्वे लाघवमी
श्वरकर्तृत्वे गौरवमिति नेश्वरसिद्धिः। ननु जीवानामल्पज्ञत्वात्कथं महीधराद्यर्थकर्तृकत्वमिति चेन्न तत्तद्विलक्षणपुण्यविशेषोपचितश
क्तिविशेषाणां विश्वामित्रादीनामेव तत्संभवात्॥ अस्त्वेकस्मिन्नंडे विश्वामित्रोन्यत्र सनातनीति चेन्न। अन्यत्राप्यन्यस्य विद्यमानत्वा
द्द्वजिरवंता योगिनः कल्पिताः॥ सर्वज्ञाः सर्वशक्तयश्चेति॥ तैरेव तत्र तत्र विश्वसृष्टिः प्रवर्ततां किमनेन नित्यज्ञानचिकीर्षाप्रयत्नवत्तया
विजातीयतयापरिकल्पितेन॥ तथा चान्यथासिद्धिदूषितानि कार्यत्वाद्यनुमानानि ईश्वरमनुमातुं न प्रभवंति। तर्हि सर्वं कार्यमेव कर्तृकं
कार्यत्वादिति साधयाम इति चेत्तर्ह्यनेककर्तृकेषु घटपटादिषु व्यभिचारः॥ अन्यथासिद्धिर्वा नह्येककर्तृकत्वाभावे कोपि विरोधः स्यात्
अनेककर्तृकं न भवति। कार्यत्वादिहेतुकेप्ययमेव दोषः॥ तस्मादनुमानानामनेकदोषदुष्टत्वाद्वेदांतवाक्यानामप्राप्तत्वलक्षणं तात्प
र्यलिंगमस्त्येवेति लक्षणमुपपन्नमिति॥ नापि प्रवृत्तिनिवृत्त्यन्वयविरहिणो ब्रह्मणः पुरुषार्थरूपत्वात्तत्र न पुरुषार्थपर्यवसायिनां वे
दांतानां च तात्पर्यमिति वाच्यं॥ अन्वयाद्वेदांतानां निरतिशयपुरुषार्थरूपे ब्रह्मणि तत्स्वरूपरूपादितात्पर्यकतयान्वयादितरतस्तद्व्य
तिरिक्ते क्षयिष्णुपुरुषार्थाभावेषु। एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्यादिभिः प्रतिषेधाच्च॥ तत्र शास्त्रप्रमाणमेवेति। ब्रह्मणः पुरुषा ५

तावदीश्वरप्रधानयोः। स्वरूपभेदः सर्वसिद्धांतसंप्रतिपन्नः तथा जीवेश्वरयोरपि॥ क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव ए
कः। प्रधानक्षेत्रज्ञपतिर्गुणेशः। स कारणं करणाधिपाधिपो। न चास्य कश्चिज्जनिता न चाधिपः। पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवम
च्युतं। ज्ञाज्ञौ द्वावजावीशानीशौ। नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्॥ भोक्ता भोग्यं प्रेरितारं च मत्वा। द्व
योरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति। पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति॥ अजामेकां लोहितशु
क्लकृष्णामित्यादिभिः श्रुतिभिः स्वरूपस्वभावभेदः आवितः॥ एवं स्वरूपतः स्वभावतश्चात्यंतविलक्षणयोः कार्यकारणोभयाव ए
स्थयोः प्रकृतिपुरुषयोः परमात्मानं प्रतिशरीरत्वं॥ यः पृथिव्यां तिष्ठन् य आत्मनि तिष्ठन्॥ योऽव्यक्तमंतरे संचरन् यस्याव्यक्तं शरीरं योऽक्षर
मंतरे संचरन् यस्याक्षरं शरीरमित्यादिभिः। आवितं॥ एवं सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः॥ परमपुरुष एव कार्यावस्थ।
कारणावस्थजगद्रूपेणावस्थित इतीममर्थं ज्ञापयितुं काश्चन श्रुतयः॥ कार्यावस्थं कारणावस्थं च जगत्स एवेत्याहुः॥ सदेव सौम्येद
मग्र आसीदेकमेवाद्वितीयं॥ तदैक्षत बहु स्यां प्रजायेयेति स तपोऽतप्यत॥ स तपस्तप्त्वा इदं सर्वमसृजतेत्यारभ्य सत्यं चानृतं च सत्यमभवदित्या
द्याः॥ तदेवं भोक्तृभोग्यनियंतृत्वेन विभक्तस्वभावान् प्रतिपाद्य भोग्यगतमुत्पत्त्यादिकं भोक्तरि जीवे प्रतिषिध्य तस्य नित्यतां च प्रतिपाद्य
भोग्यभूतप्रधानगतमुत्पत्त्यादिकं भोक्तृगतं वा पुरुषार्थाश्रयत्वं नियंतरि प्रतिषिध्य तस्य नियंतृत्वं निरवद्यत्वं सर्वदा सर्वज्ञत्वं सत्यसंक
ल्पत्वं करणाधिपत्वं विश्वस्य पतित्वं च प्रतिपाद्य सर्वावस्थावस्थितयोश्चिदचितोस्तं प्रतिशरीरित्वं तस्य चात्मत्वं प्रतिपादितं॥ अतः
सर्वदा चिदचिद्वस्तुशरीरतया तत्प्रकारं ब्रह्म तत्कदाचित्स्वस्माद्विभक्तव्यपदेशानर्हमिति सूक्ष्मदशापन्नचिदचिद्वस्तुशरीरं तिष्ठति। त

तत्तेजोऽसृजतेत्यारभ्य सन्मूलाः सोम्येमाः सर्वाः प्रजाः। सदायतनाः सत्प्रतिष्ठाः ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति। तथा सोऽकामयत बहु स्यां प्रजायेयेति × ५

कारणावस्थं ब्रह्म कदाचित्स्वविभक्तनामरूपस्थूलचिदचिद्वस्तुशरीरं कार्यावस्थं । तत्र कारणावस्थस्य कार्यावस्थापत्तावचिदंशस्य का
रणावस्थायां शब्दादिविहीनस्य भोग्यत्वाय शब्दादिमत्तया स्वरूपान्यथाभावरूपविकारो भवति । चिदंशस्य च संकुचितज्ञानस्य च कर्मफल
विशेषभोक्तृत्वाय ॥ तदनुरूपज्ञानसंकोचविकाशात्मकस्वभावान्यथाभावरूपविकारो भवति ॥ उभयप्रकारविशिष्टे नियन्त्र्यंशे तदव
स्थातदुभयविशिष्टतारूपविकारो भवति । कारणावस्थायाः अवस्थान्तरापत्तिरूपो विकारः । प्रकारद्वयप्रकारिणि च समानः । अत एकैक
स्यावस्थान्तरापत्तिरूपविकारापेक्षया येनाश्रुतं श्रुतमित्येकज्ञानेन सर्वविज्ञानं प्रतिज्ञाय मृदादिदृष्टान्तो यथा सोम्यैकेनेत्यादिना दर्शि
तः । ईदृशज्ञानसंकोचविकासकरतन्नदेहसंबंधवियोगाभिप्राया जीवस्योत्पत्तिमरणवादिन्यः प्रजापतिः प्रजा असृजतेत्याद्याः श्रुतयः
अचिदंशवत्स्वरूपान्यथाभावाभावाभिप्राया उत्पत्तिप्रतिषेधवादिन्यो । नित्यत्ववादिन्यश्च न जायते म्रियते इत्याद्याः । नित्यो नित्यानामि
त्याद्याश्च श्रुतयः । स्वरूपान्यथाज्ञानसंकोचविकासरूपोभयविधानिष्टविकाराभिप्राया निष्क्रियं निष्कलं । स वा एष महानज आत्माऽज
रोऽमृतो ब्रह्म नित्यो नित्यानामित्याद्याः परमात्मविषयाः श्रुतयः ॥ अतः स्थूलसूक्ष्मचिदचिद्वस्तुशरीरकं ब्रह्मैव कार्यं कारणं चेति ब्र
ह्मोपादानं जगत् । सूक्ष्मचिदचिद्वस्तुशरीरकं ब्रह्मैव कारणमिति ब्रह्मोपादानत्वेऽपि संघातस्योपादानत्वेन चिदचितोर्ब्रह्मणश्च स्वभा
वासंकरोऽप्युपपन्नतरः । यथा शुक्लकृष्णरक्ततंतुसंघातोपादानत्वेऽपि चित्रपटस्य तत्तत्तंतुप्रदेश एव तत्तच्छौक्ल्यादिसंबंध इति कार्यावा
स्थायामपि न सर्वत्र वर्णसंकरः । तथा चिदचिदीश्वरसंघातोपादानत्वेऽपि जगतः कार्यावस्थायामपि भोक्तृत्वभोग्यत्वनियंतृत्वाद्यसं
करः ॥ इयांस्तु विशेषः ॥ तंतूनां पृथक्स्थितियोग्यानामेव पुरुषेच्छया कदाचित्संहतानां कारणत्वं कार्यत्वं च इह तु चिदचितोः सर्वावस्थ

योः । परमपुरुषशरीरकत्वेन तत्प्रकारतयैव पदार्थत्वात् तत्प्रकारः परमपुरुषः सर्वज्ञः सर्वेशश्चाप्य इति स्वभावभेदस्तदसंकरश्च दृष्टान्तदार्ष्टा
न्तिकयोस्तुल्यः । एवं च समष्टिपरस्य ब्रह्मणः कार्यानुप्रवेशेऽपि स्वरूपान्यथाभावाद् विकृतत्वमुपपन्नतरं । स्थूलावस्थस्य नामरूपविभागविभ
क्तस्य चिदचिद्वस्तुन आत्मतयावस्थानात् कार्यत्वमुपपन्नतरं ॥ अवस्थान्तरापत्तिरेव हि कार्यतेति सर्वमनवद्यमिति तत्र जन्मादीत्यादिना
जगदुपादानत्वं सूक्ष्मचिदचिद्विशिष्टब्रह्मत्वमिति एतेन स्त्यादिना दृढत्वं तेन निमित्तकारणत्वं विशेष्यभूतशुद्धस्वरूपनिष्ठमिति च सूचितं शा
स्त्रप्रवर्तनस्थिरत्वकरणनामरूपव्याकरणत्रिसर्गस्रष्टृत्वादेर्विशेष्यनिष्ठत्वप्रतीतेः । एवमेकस्यैव ब्रह्मणो विशिष्टाकारेण जगदुपादानत्वं शु
द्धस्वरूपेण निमित्तकारणत्वं चेत्युभयविधकारणत्वं समर्थितं ॥ एवं च जन्मादिकारणत्वं विशिष्टब्रह्मणो विशेषणभूतलक्षणं विशुद्धस्व
रूपस्य तूपलक्षणतया लक्षणमित्यवगन्तव्यं ॥ तस्य शुद्धस्वरूपनिष्ठत्वाभावस्य यत्र त्रिसर्गो मृषेत्यनेनावगतत्वात् ॥ न च तदनिष्ठस्य कथं
लक्षणत्वं । तदसाधारणधर्मस्यैव लक्षणत्वादिति वाच्यं ॥ इतरव्यावृत्तवस्तुप्रत्यापकत्वस्यैवात्रोपलक्षणत्वेन विवक्षितत्वात् । जगत्का
रणत्वस्य शुद्धस्वरूपनिष्ठस्यापि तदुपलक्षणतया सकलेतरव्यावृत्तत्वेन ब्रह्मप्रत्यापकत्वसंभवात् ॥ न च तस्य शुद्धस्वरूपोपलक्षणकत्वमपि
न संभवति । तस्य तदवृत्तित्वादिति वाच्यं ॥ तटस्थस्यापि शाखाग्रत्वस्य चंद्रोपलक्षकत्वदर्शनात् ॥ विशेष्यनिष्ठत्वानिष्ठत्वाभ्यां विशेषण
त्वोपलक्षणयोर्भेदः ॥ ततश्च कारणत्वस्य ब्रह्मनिष्ठतया विशेषणत्वं । प्रपंचगतजन्मादेस्तु ब्रह्मस्वरूपानिष्ठतयोपलक्षणत्वमिति विभा
वनीयं ॥ यत्र त्रिसर्गोऽमृषेत्यनेनोपादानत्वप्रयुक्ता विकृतदोषो निवारितः ॥ अथ चेतनगतं भ्रान्त्यादिकमन्यच्च सर्वमवद्यं नेति वदन् ॥
चिदचिद्व्यावृत्तं ब्रह्मस्वरूपं शोधयन् विशिनष्टि । धाम्नेति । ननु जगज्जन्मादिकारणत्वलक्षणेनैव सकलेतरवस्तुव्यावृत्तिसिद्धेः किमनेन

यत्नेनेति वेदान्तगङ्गजन्मादिकारणत्वैरकारणव्यावृत्तिसिद्धावपि जीवजडजातीयत्वशंकास्यादेव। कंबुग्रीवादिमत्त्वरूपसंस्थानविशेषवत्त्वा
दिना पटादिव्यावृत्तस्य घटादेर्गन्धवत्त्वादिना मृज्जातीयत्वदर्शनात्॥ अत्रापि देवदत्तभावेन तच्छंकानिवृत्तिदर्शनात्॥ अतस्तन्निवृत्त्यर्थं धामेत्या
दिविशेषणानि॥ ननु संस्थापनविशेषो हि घटं पटादिभ्य एव व्यावर्तयति न तु पृथिवीमात्रात्। पटस्यापि पृथिवीत्वात्। एवं च संस्थाना
दिकं येभ्यः पटादिभ्यो व्यावर्तयति तद्विजातीयत्वमपि तेनैव सिद्धं॥ अत्र वादेरपि पृथिवीमात्रव्यावर्तकाद्गन्धवत्त्वादेर्हि पृथिवीवैजात्यं
यस्मात्पृथिवीजातीयात्संस्थानादिना वैजात्यं न सिद्ध्यति। तस्माद्व्यावर्तकत्वमपि संस्थानादेर्नास्ति प्रकृते तु कारणत्वं जीवादिभ्यो ब्रह्म
व्यावर्तयतीति कथं तेनाकारणेभ्यो जीवादिभ्यो वैजात्यं तदन्तर्भावयोग्यत्वरूपं न सिद्ध्येत्॥ तदनिष्टजातीयोग्यत्वं तु धाम्ना निरस्तकुहक
त्वादिना लक्षणान्तरेणापि न सिद्ध्यति कारणत्ववन्निरुपाधिकधामनिरस्तकुहकत्वादेरप्यजातिरूपत्वात्। तस्माद्धामनिरस्तकुहक
त्वादिवत्कारणत्वमपि स्वेतरसर्वव्यावर्तकमिति चेदुच्यते। वैजात्यं हि तद्वृत्तिधर्मयोगराहित्यं। तच्च व्यावृत्तिबोधककारणत्वबलान्न सि
द्ध्यति॥ न ह्यहं धर्मिभेदग्राहकस्सामग्र्येव तद्धर्माभावग्राहिका किंतु। सूक्ष्मचिदचिद्विशिष्टस्य ब्रह्मणो लक्षणमिदं जगज्जन्मादिकारणत्व
मिति॥ ततो विशिष्टस्येतरव्यावृत्तितद्वैजात्यसिद्धावपि केवलविशेष्यस्य विशेषणभूतचिदचित्साजात्यशंकायां तद्वारणार्थं निरस्तकु
हकादिकं स्वरूपलक्षणं। वस्तुतस्तु यतो वेत्यादिश्रुत्या ब्रह्मण्युपादानत्वस्यावगमात्॥ तस्य च मृदादेरिव विकारादेर्दोषसहचरितत्वा
दर्शनाद्ब्रह्मण्यपि तत्प्रसक्तेर्दोषशंकावारणार्थं निरुपाधिकधामनिरस्तकुहकत्वादिविशेषणत्रयमिति न तद्वैयर्थ्यशंकेति॥ अत्र धाम्ने
त्यादिविशेषणत्रयेण सत्यं ज्ञानमनन्तमिति श्रुत्युक्तं विशेषणत्रयं प्रत्यभिज्ञाप्यते॥ धामपदेन ज्ञानपदस्य परपदेनाधिक्यवाचिनानंत ८

परस्य सत्यपदेन तस्य च प्रत्यभिज्ञानात् ॥ धाम्ना तेजसा नित्यासंकुचितज्ञानरूपेण स्वेन स्वाभाविकेन निरुपाधिकेनेति यावत् । निरस्तं कुहकं वंचक
विषयं वस्त्विति यावत् । तद्यस्य तं नित्यनिरुपाधिकासंकुचितधर्मभूतज्ञानेनानवगतवस्तुरहितमित्यर्थः ॥ अनेन मुक्तजीवा व्यावृत्ताः ॥ तेषां मु
क्तिदशायां असंकुचितज्ञानत्वेपि तस्य परमात्मप्रसादायत्तत्वेन सोपाधिकत्वात् ॥ बद्धदशायामभावेन नित्यत्वाभावाच्च । सत्यपदं निरुपाधिक
सत्तायोगिकं परमपुरुषमाह ॥ तेन विकारास्पदमचेतनं तत्संसृष्टचेतनश्च व्यावृत्तः । नामांतरभजनार्हावस्थांतरयोगेन तयोर्निरुपाधि
कसत्तायोगरहितत्वात् ॥ परशब्दोधिकवाची संख्यानप्रमाणादपरिच्छिन्नाधिक्यपरः अनंतमित्यर्थः ॥ आनंत्यं चात्र देशकालवस्तुपरिच्छेद
रहितस्वरूपं तच्च सगुणत्वात् स्वरूपस्य स्वरूपेण गुणैश्चाभिप्रेतं ॥ अनेन पूर्वपदद्वयव्यावृत्तकोटिद्वयविलक्षणाः सातिशयस्वरूपस्वगुण
नित्यसिद्धा व्यावर्तकत्वात् ॥ सत्यादिवाक्यस्यात्र प्रत्यभिज्ञानादेव विशेष्यसमर्पकं ब्रह्मपदमध्याह्रियते ॥ एवं च जगज्जन्मादिनालक्षणे
नावगतस्वरूपं ब्रह्म सकलेतरवस्तुविजातीयमिति लब्धं । तत्र देशपरिच्छेदो नाम सर्वदेशावर्तित्वरूपः इदमत्र भवत्यत्र तु न भवतीत्येवं
विधः । कालपरिच्छेदस्त्विदमिदानीं भवति ॥ इदानीं तु न भवतीत्येवंविधः । वस्तुपरिच्छेदो नाम सर्ववस्तुसामानाधिकरण्याभावः ॥ सापेक्षयो
त्कृष्टवस्तुसद्भावो वा तदभावो वस्तुपरिच्छेदराहित्यं । तत्राद्ये वस्तुपरिच्छेदराहित्यं ब्रह्मस्वरूपस्यैव न तु तद्गुणानां तत्स्वरूपस्य सर्ववस्तुशरीर
कत्वेन सर्ववस्तुसामानाधिकरण्ये सत्वेपि तद्गुणानामसंभावात् ॥ द्वितीये तद्गुणानामपि तत्संभवति । ब्रह्मगुणापेक्षयोत्कृष्टगुणानामभा
वादिति विवेकः ॥ सामानाधिकरण्यं च द्विविधं ॥ शब्दसामानाधिकरण्यमर्थसामानाधिकरण्यं चेति । तत्र शब्दसामानाधिकरण्यं नाम भि
न्नप्रवृत्तिनिमित्तानां एकस्मिन् विशेष्ये पर्यवसानं अभिधानमित्यर्थः ॥ यथा नीलोत्पलशब्दयोः अर्थसामानाधिकरण्यं तु । भिन्नार्था

भा०प्र०
८

नामैकस्मिन्नर्थे वृत्तिः। यथा नीलत्वोत्पलत्वादीनां॥ अत्र विशेष्यसमर्पणायाध्याहृतो ब्रह्मशब्दः। स्वभावतो निरस्तनिखिलदोषमनव
धिकातिशयासंख्येयकल्याणगुणगणं पुरुषोत्तममाह॥ तथा चाभाषि भगवद्भिः श्रीरामानुजमुनिभिः। ब्रह्मशब्देन च स्वभावतो निरस्तनि
खिलदोषोऽनवधिकातिशयासंख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयते बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः बृहत्त्वं च स्वरूपेण गुणैश्च य
त्रानवधिकातिशयं सोऽस्य मुख्योऽर्थ इति॥ तत्र स्वरूपेण गुणैश्च निरतिशयबृहत्त्वं ब्रह्मशब्दप्रवृत्तिनिमित्तं स्वभाव इत्यादिविशेषणद्वयं तु ब्र
ह्मशब्दस्य पुरुषोत्तमपरत्वप्रतिपादनोपयोगितयोक्तं। ननु प्रवृत्तिनिमित्ततया। बृहत्त्वस्य निरतिशयत्वं नामानंत्यं। ननु बृंहति बृंहयति
तस्मादुच्यते। परं ब्रह्म बृहत्त्वाद्बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयते इति। श्रुतिस्मृतिभ्यां बृहत्त्वबृंहणत्वे। उभे च प्रवृत्तिनिमित्ततयावगते कथ
मिह बृहत्त्वमात्रं प्रवृत्तिनिमित्तमुच्यते॥ गुणतो बृहत्त्वे बृंहणत्वस्यांतर्गतत्वादिति भावः॥ स चानंत्याय कल्प्यत इति श्रुतिप्रसिद्धं सक
लसंकोचनिवृत्तिपूर्वकनिरवधिकज्ञानविकासरूपानंत्यावहत्वं हि बृंहणत्वं। तद्धि सकलहेयप्रत्यनीकत्वज्ञानातिकारुण्यादिमोक्षप्रद
त्वौपयिकगुणवत्त्वं ब्रह्मशब्दश्च योगनिरूढिभ्यां च श्रीनिवासमभिधत्ते॥ तथा च स्मर्यते श्रीमति गारुडे पुराणे। वेदे भूरिप्रयोगाच्च
गुणयोगाच्च शार्ङ्गिणि॥ तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने॥ इत्यारभ्य यस्मिन् प्रयुज्यमाने तु गुणयोगः सुपुष्कलः। तत्रैव मुख्यवृ
त्तोऽयमन्यत्रोह्योपचारत इति॥ अनेन जगत्कारणभूतवस्तुविशेषजिज्ञासायां देवताविशेषावगमश्च सिद्धः। उक्तप्रकारेण सर्वविलक्ष
लं॥ श्रियः पतिं धीमहि उपासिषीमहीत्यर्थः॥ धियां कुर्यात्स्मेति विग्रहे धीशब्दात्तत्करोतीति णिचीष्ठवद्भावात्प्रकृत्यैकाजिति। प्रकृति
भावादिलोपाभावे तस्मादाशिषि लिङि। णिचश्चेत्यात्मनेपदे आगमशास्त्रस्यानित्यत्वादार्षत्वाद्वा सीयुटोरभावे णेरनिटीति णि। ८

अथ विषयप्रयोजनसंबंधाधिकारिरूपमनुबंधचतुष्टयमाह द्वितीयश्लोकेन ॥ धर्मः प्रोज्झितकैतव इत्यादिना । विषयो नाम प्रधानप्रतिपाद्यव
स्तुरूपः स चात्र धर्मः सोपि साध्यः सिद्धश्चेति द्विविधः ॥ सिद्धरूपे वस्तुनि धर्मशब्दप्रयोगो महाभारते दृष्टः ॥ यथा ये च वेदविदो विप्रा ये चाध्यात्म-
विदो जनाः ॥ ते वदंति महात्मानं कृष्णं धर्मं सनातनमिति ॥ तथा भिक्षुकेऽप्यालौकिकत्वे सति श्रेयः साधनत्वं धर्मशब्दप्रवृत्तिनिमित्तं मन्वानैः सिद्धरू-
पेपि धर्मशब्दः प्रयुक्तः । द्रव्य क्रियागुणादीनां धर्मत्वं स्थापयिष्यते ॥ तेषामैंद्रियकत्वेपि न तद्रूप्येण धर्मतेति ॥ तत्र सिद्धधर्मः परमात्मा ।
अमृतस्यैव सेतुरित्यादि शास्त्रेण तस्यालौकिकत्वे सति श्रेयः साधनत्वावगमात् ॥ साध्यधर्मस्तु परमात्माराधनात्मिका भक्तिः । तत्र सतामि

धर्मः प्रोज्झितकैतवोत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं ॥ श्रीमद्भागव
ते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ २ ॥ ॥

त्यनेन साध्यधर्म उच्यते ॥ वेद्यमित्यादिना तापत्रयोन्मूलनमित्यंतेन सिद्धधर्मः ॥ ईश्वर इत्यादिना प्रयोजनमुच्यते ॥ तच्चापि द्विविधं । व्यवहि
तमव्यवहितं चेति ॥ तत्राय तेन हृदीश्वरावस्थापनमव्यवहितं फलं तापत्रयनिवृत्तिस्तु भगवदनुभवपरंपरया व्यवहितं फलं संबंधोऽपि
द्विविधः ॥ साध्यसाधनभावरूपः । प्रतिपाद्यप्रतिपादकभावरूपश्चेति । तत्र प्रयोजनेनास्य साध्यसाधनभावरूपः । विषयेणास्य प्रतिपाद्य
प्रतिपादकभावरूपश्चार्थो विवक्षितः ॥ एवमिमाधयितु प्रतिपित्सुरूपो मुमुक्षुरधिकारी येनो विवक्षितो वेदितव्यः । तत्र साध्यधर्ममा
ह ॥ धर्मइति ॥ अत्रास्मिन् पुराणे प्रोज्झितकैतवः परमो निर्मत्सराणां सतां धर्मः साध्यतयोच्यत इत्यर्थः ॥ कैतवं वंचनं प्रोज्झितं नितरां १०

लोपेच धीमहीतिरूपं। वदतो पासनध्यानानुस्मृतिचिंतास्मृतिभक्त्यादिशब्दपर्यायस्य धीशब्दस्य ध्यानमर्थः। लिङःस्त्वलम्पलिङाशिष्या
श्याशीः॥ अनेनाशीर्नमस्क्रियावस्तुनिर्देशो वेत्यभियुक्तोक्ताशीश्च कृता भवति॥ अत्रोक्तविशेषविशिष्टस्य ब्रह्मणो धातुः स्वस्मादु
त्कृष्टत्वाद्वागमात् प्रह्वीभावाद्वा गमात्मनमस्क्रियापि कृता भवति॥ पूर्ववद्विप्रतिपाद्यार्थरूपवस्तुसंग्रहश्च जन्माद्यस्येत्यादिना वितिमयर
त्वं तेन कृतः पुरस्तादेव दर्शितः॥ यत्र त्रिसर्गोऽमृषेत्यनेन प्रकृतिपुरुषगतदोषप्रसंगपरिहारपरेण जीवदोषकीर्तनपरतात्पर्यप्र
थपदार्थः॥ तेन सत्यमित्यादिविशेषणेन च उभयलिंगपादार्थश्च निर्दिष्टः धाम्ना निरस्तकुहकाद्यनेकगुणविशिष्टब्रह्मणो ध्येयत्वो
क्त्या गुणोपसंहारपादार्थश्च सूचितः। धीमहीत्युक्त्योपासनस्यानेकसाधनत्वापेक्षत्वप्रसिद्ध्या अंगपादार्थश्च सूचितः॥ अध्याहृतब्रह्म
त्यशब्दप्रवृत्तिनिमित्तभूतबृहत्त्वांतर्भूतबृंहणत्वेनाभिप्रेते तुरीयफलाध्यायार्थश्च सूचितः॥ एवमभियुक्ताभिमतं त्रिविधं मंग
लं मनसापि कर्तुमशक्यमपि शिष्यशिक्षायै ग्रंथादौ शब्दतोऽपि कृतमित्यवगंतव्यम्। यत्र त्रिसर्गोऽमृषा धाम्नेत्यादिना परमित्यंतेन
निरस्तनिखिलदोषत्वकल्याणगुणाकरत्वकीर्तनात्सगुणनिर्गुणश्रुत्योर्विषयभेदश्च दर्शितः॥ १॥ श्रीमते रामानुजाय नमः

भा॰प्र॰
११

त्सर्यमभिप्रेतं । अत्रात्मात्मकप्रधानादीनामप्रामाणिकत्वात् । इतरविशेषणद्वयेनतुदोषद्वयशान्तोपस्नुतपरिमितत्वप्रददेवतांतर
व्यावृत्तिः ॥ एवंमोक्षसाधनधर्मस्तत्समाराध्यपरदेवताचास्यप्रबंधस्यविषयइत्युक्तं ॥ यतएवेदमीदृशविशिष्टविषयकमतएवनशा
स्त्रांतरैः प्रयोजनमस्तीत्याह किंवापरैरिति ॥ अपरैः शास्त्रजालैः किंवा न किंचिदपि प्रयोजनमस्तीत्यर्थः ॥ अथप्रयोजनमाह । ईश्व
रःस्याद्विना ॥ शुश्रूषुभिः श्रवणेच्छामात्रवद्भिः । अतएवतत् क्षणात् कृतिभिर्धन्यैः । सद्यः एतत्पुराणश्रवणानंतरमेवहृदीश्वरोऽव
रुध्यते ॥ श्रुतिपथेन हृदयंप्रविशतीत्यर्थः ॥ यत्नेनचित्तेविनिवेशयेतिन्यायेनदुर्ग्रहस्येश्वरस्यायत्नेनहृदयावस्थानमप्यवहितंफलं
तापत्रयनिवृत्तिश्चभगवदनुभवपरंपरयाफलमित्युक्तंभवति ॥ प्रयोजनेनसाध्यसाधनभावरूपः । विषयेणप्रतिपाद्यप्रतिपादक
भावरूपश्चसंबंधोधिकारीचार्थसिद्धइतिपुरस्तादेवोक्तम् ॥२॥

११

स्यक्तं कैतवं यस्मिन्॥ अनेन विप्रलिप्सामूलवाह्यागमोक्तचैत्यवंदनादिव्यावृत्तिः॥ निर्मत्सराणां सतामिति संबंधसामान्ये षष्ठी। निर्म
त्सराणां सतां संबंधी धर्मो न साध्यतयोच्यत इत्यर्थः॥ संबंधश्चानुष्ठेयानुष्ठातृभावरूपः॥ निर्मत्सराणां सतां धर्म इत्यनेन वेदोक्ताभिचा
रादिव्यावृत्तिः॥ अभिचारादयो हि मत्सरादिमतामनुष्ठेयाः। परमः सर्वोत्कृष्टः॥ अनेन क्षुद्रफलप्रदकाम्यकर्मव्यावृत्तिः। यद्वा मत्सर
शब्दः कामादीनां प्रदर्शनार्थः। शमदमाद्युपेतानां मुमुक्षूणां धर्मः। अनेन स्वर्गाद्यर्थकर्मव्यावृत्तिः। परमः। सर्वेषामेव धर्माणां उत्तमो
वै स्वधर्मो विधिरित्युक्तप्रकारेण भगवत्संतोषैकफलत्वात्परमः॥ एवं साध्यधर्मरूपो विषय उक्तः। अथ वैवंधर्मोत्सेकप्रयोजनसाध्य।
धर्मस्समाराध्यमेतत्पुराणप्रवेद्यं परब्रह्मात्मकं सिद्धधर्मरूपं विषयमाह वेद्यमिति सतामित्येतत्काकाक्षिन्यायादत्रापि संबध्यते। अ
त्रास्मिन्महामुनिकृते श्रीमद्भागवताख्ये पुराणे। अत्रान्वयमिदं नाम॥ भागवतः स्वरूपरूपगुणविभूतिप्रतिपादकत्वेन भगवत इदं भा
गवतमिति व्युत्पत्तेः॥ सतां वेद्यं वस्तु वास्तवं शिवं तापत्रयोन्मूलनं॥ वास्तवत्वादिगुणविशिष्टमित्यन्वयः। महामुनिना श्रीबादराय
णेन कृते॥ मुनेर्मुहत्वमत्रासंभाव्यमानपौरुषेयदोषग्रंथापौरुषेयप्रत्यक्षश्रुतिवाक्येन सहैवाच व्यासः पाराशर्य्य इत्यनेनाप्तत्वमत
याश्वावितत्वरूपं विवक्षितं। अनेनास्य पुराणस्य वक्तृवैलक्षण्यं सिद्धं। अत एव प्रमाणतमत्वं च॥ इतरदेवतानामसद्गुणारोपेण स्तोत।
व्यत्वान्नास्त्यर्थो वास्तवमित्युक्तं॥ वस्तुनो भावो वास्तवं पुत्रादिवन्नारायणनां तद्गुणादिभ्यो णित्यण्॥ ततो मत्वर्थीयो च्॥ इतरदेवता
नामसद्गुण स्वाभाविकधर्मयुक्तमित्यर्थः॥ शिवदं मंगलदं॥ साक्षादानंदप्रदं। अनेनेष्टप्रापकत्वमुक्तं॥ तापत्रयोन्मूलनं। आध्या
त्मिकादितापत्रयोच्छित्तिकरं। अनेनानिष्टनिवर्तकत्वमुक्तं॥ यद्वा। वास्तवशब्देन शास्त्रांतराभ्युपेतात्ब्रह्मात्मकत्वं तत्र प्रधानादेर्वैल

एवंविषयप्रयोजनकथनेपि प्रामाण्यनिश्चयं विना श्रवणं नोपपद्यतेऽत्याशंक्य वेदांतमूलत्वं वदन् चेतनानभिमुखयति तृतीयश्लोकेन
निगमकल्पतरोरित्यादिना। हे रसिका रसज्ञाः। भावुकाः। भगवत्संशीलनपराः। निगमो वेदः। स एव कल्पतरुस्तस्य फलं फलरूपमिदं श्री
भागवतं पुराणं। आलयमामरणं पुनः पुनः। पिबत। निगमस्य कल्पतरुत्वनिरूपणं धर्मार्थकाममोक्षपुरुषार्थचतुष्टयतत्साधनोपबोध
नद्वारा धर्मादिफलजनकत्वात्। भागवतस्य तत्फलत्वनिरूपणं निगमसारांशरूपत्वात्॥ स्वादुतेत्यनुक्तापि वक्तेतिवदतेतत्सूचयति। आ
म्रादिफले विवानुपादेयोंशस्त्वग्बीजादिरूपः कल्पतरुफले नास्ति॥ किंतु केवलं पेयः कृत्स्नो रस एव सन्नपि वा त्वग्बीजादिरप्युपादे

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं॥ पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि
भावुकाः॥३॥

यं एवमस्मिन्नपि पुराणे नानुपादेयांशो विद्यते। पितु सर्वोप्युपादेय एवेति॥ निगमद्रुमफलत्वं चास्य पुराणस्य स्वप्रधानप्रतिपाद्यनिर
तिशयानंत ब्रह्मानंद साधनभूतभक्तिद्वारावगंतव्यं॥ एवममृतद्रवसंयुतमित्यादीन्यपि विशेषणानि। निगमद्रुमफलत्वे स्वर्गादितत्सा
धनावबोधिवेदपूर्वभागोपबृंहणात्मककल्पसूत्रादेरप्यस्तीति तद्व्युदासायाह। अमृतद्रवसंयुतमिति। अमृतं मोक्षः मुक्तिः। कैवल्य
निर्वाणश्रेयो निःश्रेयसामृतमिति मुक्त्यादिशब्दपर्यायत्वस्मरणात्॥ स एव द्रवः सारांशस्तेन संयुतं रसं रसवत्॥ गुण वचनेभ्यो मतुपो।

भा॰प्र॰ त्तुगिरः इत्युक्तेः। मम त्वदनुभवानंदद्रवेन भक्तिरूपत्वं सिद्धं भक्तिर्नाम स्नेहपूर्वमनुध्यानं। भक्तिरित्यभिधीयत इति स्मरणात्। प्रीतिम
२२ ज्ञावत्स्मरणे। फलमत्र सम्यग्ज्ञानात्मकं विवक्षितं॥ शुकमुखाद्गलितमस्तु त्वेवं फलं शुकाख्यपक्षिमुखपातितं सुग्रहं स्यात्तद्वदेवद्र
दशात्वाग्रगलंज्ञानफे फलं शुकमुखसंबंधात्सुलभमित्यर्थः॥ यद्वा॥ सुपर्णो सयुजा सखाया समानं वृक्षं परिषस्वजाते इति श्रुत्यनु
सारेण वादरायणेः शुकाख्यपक्षिवत्स्वरूपेण। आलयादिति पाठे आमरणादित्यर्थः॥ निगमद्रुमफलस्वरूपेण वेदमूलत्वं शुकमु
खाद्गलितमित्यनेन केवलनिवृत्तधर्मपरायणास्वादितत्वं ~~अविसं~~ते प्रतीत्या शिष्टपरिगृहीतत्वमत एव प्रामाण्यं मुमुक्षुभिरतीवोपा
देयत्वं चेत्यादि फलितं। यद्यप्येतत्प्रबंधनिर्माणोपक्रमदशायामस्य शुकमुखास्वादितत्वं न विद्यते तथापि भविष्यदभिप्रायेण त्रै
कालज्ञस्य निर्मातुरेवमुक्तिः॥३॥

तदेवमनुष्ठितत्रिविधमंगलः प्रदर्शितानुबंधचतुष्टयश्चामाएपो भगवान्बादरायणिः त्रैकालज्ञस्य स्वचिकीर्षितस्य वेदांतार्थोपबृं
हणरूपस्य पुराणस्य परीक्षिच्छौनकशुकसूतादिप्रश्नप्रतिवक्तृप्रश्नोत्तरमुखेन भाविनीं प्रवृत्तिमालोच्य तत्र प्रश्नोत्तरारूपान् श्लोकान्स्वय।
मेव तत्र तत्र निर्मित्सुस्तावदुपोद्घातरूपेऽस्मिन्प्रथमस्कंधे प्रश्नप्रष्टुः परीक्षितः। प्रतिवक्तुः। शुकस्य चैकत्र समावेशं प्रतिवक्तुः शुकस्य
समागमं परीक्षितः प्रश्नोद्योगहेतुं प्रायोपवेशं तन्निमित्तविप्रशापं च विवक्षुः। प्रायोपवेशात्प्राक्तनं जन्मावधिकं परीक्षितं वृत्तांतं ततः प्रा
क्तनं तस्य वादि वृत्तांतं तथैव तत्प्रबंधकर्तुः। स्वस्यैव तन्निमित्तदर्शनसमागतदेवर्षिसंवादेन तदाज्ञयैवैतत्प्रबंधनिर्माणं च शौनकस्य

नैमिषेनिमिषःक्षेत्रे ऋषयः शौनकादयः॥ सत्रं स्वर्गाय लोकाय सहस्रसममासत॥४॥

तत्प्रश्नोत्तरमुखेन विवक्षुस्तावच्छौनकादीनां प्रश्नप्रकारं वक्तुं तदुपोद्घातमाह॥ नैमिष इति। अत्र केचिच्छौनकादिप्रश्नरूपाः श्लोका।
स्तदर्वाचीनेनिर्मितायात्र तत्र तत्र निबधाः। परीक्षिदादिप्रश्नादिरूपास्तु सूतेनेति वदंति तदसारं। त्रैकालज्ञस्य प्रबंधप्रवक्तुरेव तन्निर्मा-
णोपपत्तेः। नहि सद्विद्यानंदवक्त्री प्रवर्तनेन विद्यादिषु श्वेतकेतुर्हारुणेय आहतं ह पितोवाचाश्वेतकेतो गुरुर्वै वारुणिं वारुणं पितरमु
पससार अधीहि भगवो ब्रह्मेति। प्रतर्दनो ह वै दैवोदासिरिंद्रस्य प्रियं धामोपजगामेत्यादीनां प्रश्नोत्तररूपाणां श्रौतवचसामाधुनिक

तत्वं कृतं ॥ ननु वेदे कर्तुरभावादेव प्रश्नोत्तररूपेण प्रतिपिपादयिषितानर्थान्प्रतिपादयति ॥ अत्र पौरुषेयेत्यकर्तृकाणामपि
वचसां संदर्भस्तत्र तेनैव न दोषावह इति चेन्न ॥ एवमपि कृत्स्नप्रबंधस्यैककर्तृकत्वासिद्धेः ॥ कृत्स्नस्य पुराणप्रपंचस्य प्रश्नोत्तररूपत्वेन
कानि ग्रंथकर्तुर्वचांसि कानि चैतेषामिति विभागस्याशक्यत्वाच्च ॥ तस्माद्यथोक्तमेव युक्तं ॥ शौनक आदिर्येषां ते मुनयः ॥ ब्रह्मणा
विसृष्टस्य चक्रस्य नेमिः शीर्यते कुंठीभवति ॥ यत्रेति तन्निमिषं तदेव नैमिषं ॥ तच्च वायुपुराणे प्रसिद्धं ॥ नैमिशा इति पाठे निविशंत्यत्र
महर्षय इति निविशं ॥ तदेव नैमिशं इत्यन्वर्थं नाम नैमिषारण्ये ऽनिमिषक्षेत्रे भगवत्सान्निध्यवतीति भावः ॥ स्वर्गाय लोकाय स्वर्गो निर
तिशयानंदः ॥ तादृशो लोकः ॥ परमपदं तस्मै तत्प्राप्तये तत्साधनं ॥ तत्साधनं सत्रं सहस्रसमं सहस्रसंवत्सरमाससततानुष्ठितवंतः ॥ स्वर्गो लो
कोत्र परमपदमेव ॥ अनंते स्वर्गे लोके ऽतद्ध्येप्रतितिष्ठतीति ॥ ये स्वर्गे लोके ऽमृतत्वं भजंत इति श्रुत्यनुरोधेनास्य निर्देशात् ॥ अन्यथा
र शौनकादय इति न घटते ॥ दृष्टाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय इति वदतः परमभागवतस्य शौनकस्य प्रसिद्धस्वर्गार्थ
त्वे तायोगात् ॥ ऋत्विज एव यत्र यजमानास्तत्सत्रं ॥ यद्यात्मनां शब्देन भगवत्कृपणात्मकं ब्रह्मसत्रं विवक्षितं तथा च तद्धारणं वक्ष्यति द
शमे श्रुतिगीतायां ॥ तत्संसारणं वक्ष्यति ॥ तुल्यश्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः ॥ अपि चक्रुः प्रवचनमेकं शुश्रूषवो ऽपरे इति ॥ अ
त्रवासी नादीर्घसत्रेणेति वक्ष्यमाणोपपत्तिः ॥ ४ ॥

तष्ठति। ते शौनकादयो मुनयः। कदाचित्प्रातः कृतहुताग्नयः। हुते सत्यर्थे कः॥ हुतेन होमार्हद्रव्येण पयः सर्पिरादिना साधनेन हुता अग्नयः आ
हवनीयादयो यैस्तथाभूताः। सत्कृतं यथोचितं बहुमतमासीनमुपविष्टं च सूतमिदं वक्ष्यमाणमादरादादरपूर्वकं पप्रच्छुः॥५॥ प्रश्नमेवाह
त्वयेत्यादिना यावदध्यायसमाप्तिः। तावद्युष्माभिः पृष्टोऽहं वक्तुं नाहं समर्थ इत्याशङ्कां निराकुर्वन्त आहुः। त्वयेति। हेऽनघ शास्त्रार्थो
ज्ञाननिमित्तकर्मरूपपापरहित ज्ञातिप्रयुक्तावमत्वरूपाघरहितेति वा। त्वयेतिहाससहितानि सर्वे पुराणानि। उत अपि च यानि धर्म

त एकदा तु मुनयः प्रातर्हुतहुताग्नयः॥ सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात्॥५॥ ऋषय ऊचुः॥ त्वया खलु पुराणा
नि सेतिहासानि चानघ॥ आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत॥६॥ यानि वेदविदां श्रेष्ठो भगवान्बादराय
णः॥ अन्ये च मुनयः परावरविदो विदुः॥७॥

स्क०३

शास्त्राणि मानवादीनि तानि सर्वाण्यधीतान्याख्यातानि च॥६॥ कानि तानि पुराणधर्मशास्त्राणीत्यत आहुः। यानीति। वेदविदां स्वल्पतो
१ नुष्ठानपर्यन्तार्थज्ञश्च विदन्तीति तथा तेषां मध्ये श्रेष्ठो भगवान्बादरायणः॥ तथाविधा अन्ये च मुनयः पराशरादयो मन्वादयश्च॥ परावरविदः
परं परमात्मतत्त्वमवरं प्रकृतिपुरुषौ तद्विदः। तत्त्वत्रययाथात्म्यविदः॥ यानि पुराणानि धर्मशास्त्राणि विदुस्तान्यधीतान्याख्यातानि चेति पूर्वे
णान्वयः। वेदविच्छ्रेष्ठो बादरायणोऽन्ये च मुनयो यानि विदुरित्यनेन स्मृतीतिहासपुराणानां वेदमूलत्वं। अत एव प्रामाण्यं च दर्शितं॥७॥

भा० प्र०
२५

नन्वपशूद्राधिकरणन्यायेनानधिकृतशारीरकोहं इतिहासपुराणाध्ययनजायातप्रतीतिमान् कथं भवत्प्रश्नस्योत्तरं वक्तुं प्रभुरितीमांशं
कांवारयंतमाहुः॥ वेत्थेति॥ हे सौम्य सदनुग्रहात्सतो व्यासस्यानुग्रहाद्धेतोस्तत्सर्वमितिहासपुराणादिप्रधानप्रतिपाद्यं वस्तु तत्त्वतः त्वं वे
त्थ जानासि॥ अनधिकृतशारीरकोपि त्वं सदनुग्रहादितिहासपुराणाद्यर्थरूपं वस्तु यथावद्वेत्सि न स्वापाततः इति भावः॥ सदनुग्रहादपि
कथं शारीरकाध्ययनेन निर्णेतव्यं वस्तु तत्त्वमहं विद्यामित्याहुः॥ ब्रूयुरिति॥ स्निग्धस्यानुरक्तस्य त्वादृशस्य शिष्यस्य गुरवो वादरायणाद

वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात्॥ ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत॥८॥
तत्र तत्रांजसायुष्मन् भवता यद्विनिश्चितं॥ पुंसामेकांततः श्रेयस्तन्नः शंसितुमर्हसि॥९॥

यो गुह्यमपि ब्रूयुः। शारीरकमुखेनानुक्तं केवलमुपदिशेयुरिति भावः॥८॥ एवं तस्य प्रतिवचनसामर्थ्यमाविष्कृत्यं पृष्टव्यं पृच्छंति। तत्रेति
हे आयुष्मन् पुंसामेकांततो नियमेन निरतिशयं श्रेयः किं॥ यतः साधनाच्छ्रेयो भवेत् भवता तत्र तत्र पुराणादिषु निश्चितं निर्णीतं॥ नोऽ
स्मभ्यं शंसितुं प्रस्तोतुमर्हसि। एवमुक्तसाधनभूतो धर्मः पृष्टः किं निरतिशयश्रेयः॥ को वा तत्साधनभूतो धर्म इति प्रश्नार्थः॥९॥ ॥ ॥ २५

अथ त्रिवर्गसाधनानामश्रोतव्यत्वं सूचयंतस्तन्निष्टानां दौर्भाग्यं तैः श्रोतव्यानां बहुत्वं चवदंतः। सर्वशास्त्रार्थसारभूतं मुक्तिसाधनमेव पृ
छंति। प्रायेणेति सार्द्धाभ्यां॥ हे सभ्यास्मिन् कलौ युगे जना मानवाः प्रायेणाल्पायुषः॥ अनियतशतवर्षायुषः॥ अनेन कृतादियुगेष्विव
यथेष्टभोगानंतरं मुमुक्षो दयाभव उक्तः॥ मंदा मंदप्रवृत्तयः॥ सुमंदमतयः॥ नितरां मंदबुद्धय उपद्रुताः॥ तापत्रयवर्गत्रयतद्भ्यां

प्रायेणाल्पायुषः साधो कलावस्मिन् युगे जनाः
मंदाः सुमंदमतयो मंदभाग्या ह्युपद्रुताः॥१०॥

मिति शेषः॥ सुमंदमतय इत्यनेन कटिति श्रेयस्तत्साधनानवगमः। सूचितः॥ मंदा इत्यनेन श्रेयःसाधनोपसंहारासामर्थ्यं सूचितम्
उपद्रुता इत्यनेन कृविश्रेयः साधनो द्योगस्यानेकांतरायविहतत्वं॥ अतएव ते जना मंदभाग्या दुर्भगा इत्यर्थः॥१०॥ ५॥ ॥

ह्यियस्मादुपकुर्वन्नतएवैते विभागशः स्वस्वापेक्षितधर्मादिसाधनभेदेनश्रोतव्यानिभूरिकर्माण्यायासबहुलानिकर्माणिबहूनिसंतीतिपौं
डरीकवाजपेयादिभेदेनश्रोतव्यानिभूरिकर्माणि~~तानि बहूनि कर्माणि बहूनि संती~~तीतियतएवमतोऽत्रश्रोतव्येषुमध्येयत्सारमनिष्टनिव
र्तकमिष्टप्रापकंसारंसाधनंतन्मीमया स्वल्पयाधियासमधिकसद्धोद्युतमिवोधस्यश्रद्दधानानोस्माकंब्रूहि ।। सारंविशिनष्टि । येनेति । येनसारे
णात्माचित्तंसंप्रसीदतिरागादिभिरकलुषंस्यात्तत्सारंब्रूहीत्यन्वयः ।। प्रायेणेत्यल्पायुरादिभिः प्रत्येकंसंबध्यते ।। प्रायेणमंदाःस्वल्पादिनातेन
मनुष्याणांसहस्रेषुकश्चिद्यततिसिद्धयेइतिभगवद्वचनात् ।। सारितः ।। येनात्मासंप्रसीदतीत्यनेनात्मप्रसादार्थमेवतावन्मुमुक्षुभिर्वर्तित
व्यं ।। सतिचात्मप्रसादे । प्रसादेसर्वदुःखानांहानिरस्योपजायते ।। प्रसन्नचेतसोह्याशुबुद्धिःपर्यवतिष्ठतेइत्युक्तरीत्यादुःखहान्यादिरर्थादेवभव

भूरीणिभूरिकर्माणिश्रोतव्यानिविभागशः । अतःसाधोत्रयत्सारंसमुद्धृत्यमनीषया ।। ब्रूहिनःश्रद्दधानानांयेनात्मासंप्रसी
दति ।। ११ ।।

तीतिसूचितं । यद्वा । येनसारभूतेनसाधनेनात्मासंप्रसीदतिप्रसन्नोभवतीत्यर्थः । एवंचकिमलभ्यंभगवतिप्रसन्नेश्रीनिकेतनइतिवक्ष्यमाण
रीत्याततःसर्वंसंपद्यतएवेतिभावः ।। भूरीणिश्रोतव्यानिविभागशःसंति ।। तत्रसारंब्रूहीत्यनेनभूरिकर्माणिनश्रोतव्यानिप्रतीयते ।। यद्यपिक
र्माण्यपिफलद्वाराहानायस्वरूपेणोपादानायचश्रोतव्यान्येव ।। अत्यत्यथासांसारिकफलनिर्वेदासंभवेननिःश्रेयःसाधनावबोधाद्यात्मश
त्रुशुश्रूषाद्याएवासंभवान्परमात्मोपासनस्यानभिसंहितफलकर्मोपकार्यत्वज्ञानाभावप्रसंगाच्च । तथाप्येकयैवोक्त्यासर्वाणिफलत
स्त्याज्यान्युपासनांगतयायथाशक्त्यनुष्ठेयान्येतावदेवश्रोतव्यंमुमुक्षुभिःप्रायेणैवमुक्तं ।। ११ ।। ।।। ।।।। ।।।। २५

एवंमुक्तिसाधनं पृष्ट्वाऽथ तदनुग्राहकेषु प्रधानतमं श्रवणं कीर्तनं विष्णोः स्मरणमित्यादिषु प्रथमोपात्तं भागवच्चरित्रश्रवणं चिकीर्षु
वस्तत्रापि साधकपरित्राणायावतीर्णस्य श्रीकृष्णावतारचरितं पृच्छंति॥ सूत इत्यादिषड्भिः। हे सूत तुभ्यं भद्रं कल्याणमस्तु। सात्व
तां भक्तानां पतिः। पाता वा पिता भगवान् वसुदेवस्य च अपादानस्य संबंधविवक्षया षष्ठी। वसुदेवात्तज्जायायां देवक्यां यस्य चिकीर्षया यत्
कर्म कर्तुमिच्छया जातोऽवतीर्णः॥ तत्सर्वं त्वं जानासीति॥ १२॥ तस्माद्वक्तुमर्हसीत्याहुः॥ तदिति॥ तच्छ्रीकृष्णचरितं श्रोतुमिच्छतां नोऽ

सूत जानासि भद्रं ते भगवान् सात्वतां पतिः। देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया॥ १२॥
तन्नः शुश्रूषमाणानामर्हस्यंगानुवर्णितुं॥ यस्यावतारो भूतानां क्षेमाय च भवाय च॥ १३॥

स्माकं वर्णितुमंग हे सूत अर्हसीति॥ अर्हसीत्यनेन सदनुगृहीतः। कार्त्स्न्येन तच्चरित्रवेदी त्वं वक्तुं प्रभुरिति सूचितं॥ महोपकर्तृत्वात्तदव
तारचरित्रमवश्यं शुश्रूषितव्यमित्यभिप्रायेण तदवतारं विशिंषंति॥ यस्येति॥ यस्य भगवतोऽवतारः॥ श्रीकृष्णरूपः भूतानां विभवा
य योगापरपर्यायाभ्युदयाय क्षेमाय तत्पालनाय च। भक्तानामित्यनुक्त्वा भूतानामिति वदतामयमभिप्रायः। शत्रूणामपि दमनपू
र्वकमपवर्गदायित्वेन महोपकर्तेति किमु वक्तव्यं॥ तदवतारो भूतानां योगक्षेमार्थ इति॥ १३॥

भा०प्र०
२६

यतस्तन्नाम्नैवानिष्टपरिहारेष्टप्रापणे इत्यममेवेत्यभिप्रायेण नामप्रभावमाहुः। आपन्न इति। घोरां गर्भजन्मजरामरणादिरूपां संसृ
तिमापन्नः प्राप्तः॥ पुमान् शत्रुरपि विवशो पारवश्येनापीत्यर्थः॥ यस्य श्रीकृष्णस्य यच्छब्दानां को वा भगवतस्तस्येत्युत्तरत्रान्वयः
नाम गृणन्नुच्चरन् देहावसान इति शेषः॥ ततः संसृतेः सद्य एव विमुच्येत मुक्तो भवेत्॥ कथं पारवश्येनाप्युच्चारणमात्रेणापि शत्रुर
पि मुच्येतेत्यत्रोच्चारणं विशिनष्टि॥ यद्बिभेति स्वयं भव इति यन्नामोच्चारणं प्रति भवः संसारः स्वयं बिभेति॥ भयमिति पाठेपि जन्मम
रणादिभयहेतुत्वाद्भव एव भयशब्देन विवक्षितः॥ देहावसानिकालिकभगवन्नामोच्चारणस्याव्यवधानेन मुक्तिसाधनत्वमितरका

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्॥ ततः सद्यो विमुच्येत यद्बिभेति स्वयंभवः॥१४॥ यत्पादसंश्रयाः सू
त मुनयः प्रशमायनाः॥ सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापोनुसेवया॥१५॥

लिकस्य तु कर्मज्ञानयोगादिवद्भक्तियोगानुग्रा
हकत्वेन तद्द्वारेति विवेकः॥ एतच्च षष्ठे अजामिलोपाख्याने प्रपंचयिष्यते॥१४॥ आस्तां तावदवताराणां कथा नाममाहात्म्यं तदीयानां मा
हात्म्यमेव वाङ्मनसागोचरमित्यभिप्रायेणाहुः॥ यदिति॥ हे सूत यस्य भगवतः पादसंश्रयाः पादावेव प्राप्यत्वेन प्रापकत्वेन संश्रयो येषां ते
इति तथा॥ मुनयस्तत्पदारविंदमननशीलाः॥ प्रशमायनाः॥ प्रशमादिगुणानामाश्रयाः॥ तदीयाः स्पृष्टाः पादयोरिति शेषः॥ पादस्पर्शमा
त्रेणापीति भावः॥ सद्य एव पुनंति स्पृष्टानिति शेषः॥ एवं पादसंबंधिन्याः स्वर्धुन्या गंगाया आपोप्यनुसेवया स्नानपानादिरूपया सेव
यापुनंति॥ स्वर्धुन्यास्त्वनुसेवया पुनंति मुनयस्तदीयास्तूपस्पर्शमात्रेणापि पुनंतीति केचिद्व्याचक्षते॥ यथा स्वर्धुन्यापोनुसेवया पुनं
तितथा मुनयोप्युपस्पृष्टाः पुनंतीति दृष्टांतो वाभिप्रेतः॥१५॥

२६

उक्तैरन्यैश्च गुणैः सत्त्वविशोधकत्वं चरित्रमवश्यमात्मशुद्धिमिच्छद्भिः श्रोतव्यमित्यभिप्रायेणाह कोवेति। तस्योक्तविधस्य पुण्यः शृण्वतां
वदतां च पुण्यावहः श्लोकश्च तत इति श्लोको यशो यस्य। अतएव स चासावीड्यं सुसंकर्म चरित्रं यस्य तस्य भगवतो यशः कलिमलापहं
कलिप्रयुक्तपापहं विचित्तशुद्धिकामः को वा पुमान्न शृणुयात् सर्वैरपि शृणुयादेवेत्यर्थः॥१६॥ अतो लीलया न तु कर्मणेति भावः। का-

को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः॥ शुद्धिकामो न शृणुयाद्यशः कलिमलापहं॥१७॥
तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः॥ ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः॥१८॥

लाः। मूर्तीरवतारांतररूपा दधतस्तस्योदाराणि विपुलानि सूरिभिर्नारदपराशरपाराशर्यादिभिः परिगीतानि च कर्माणि चास्तानि श्र-
द्दधानां नोऽस्माकं ब्रूहीति। लीलयेत्यनेनावताराणामकर्ममूलत्वमुक्तं। कलाः विदधत इत्यनेन श्रीकृष्णस्यावतारित्वं प्रतीत्यान्यपा-
र्णावतारत्वं सूचितं॥ तेनैवावतारांतरकथाप्रश्नश्च कृत इत्यर्थः॥१७॥

भा० प्र०
२७

लीलयेत्यनेनावताराणामकर्ममूलत्वमुक्तं ॥ अथावतारचेष्टितानामकर्ममूलत्वं वदंतः कार्त्स्न्येन तदवतारचरित्राणि पृच्छंति । अ-
थेति । हे धीमन्नात्ममायया आत्मनः स्वस्य मायया ऐश्वर्यशक्तियुक्तेन ॥ ऐश्वर्यत्वं मायाशब्दप्रवृत्तिनिमित्तं संकल्परूपज्ञानेन वा ।
माया वयुनं ज्ञानमिति नैघंटुकाः ॥ मायया सततं वेत्ति प्राणिनां च शुभाशुभमिति ज्ञानेऽभियुक्तप्रयोगः । स्वैरं यथा तथा लीलाश्चे-
ष्टा विदधतः । कुर्वत ईश्वरस्य सर्वनियंतुर्हरेराश्रितदुरितहरस्य भगवतः शुभाः शृण्वतां वदतां च शुभावहाः अवतारकथाः । अथ का-
र्त्स्न्येनाख्याहि कथय ॥ मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथो अथेति नैघंटुकाः ॥ आत्ममायया स्वैरं लीला विदधत इत्यनेन देवमनु-

अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः ॥ लीला विदधतः स्वैरमीश्वरस्यात्ममायया ॥ १८ ॥
वयं तु न वितृप्याम उत्तमश्लोकविक्रमे ॥ यच्छृण्वतां रसज्ञानां भवेत्स्वादु पदे पदे ॥ १९ ॥ ॥ ॥

ष्यादिजातीयानामवतारचेष्टानामात्मीयसंकल्पमूलत्वमकर्मवश्यत्वप्रयुक्तत्वं सूचितं ॥ १८ ॥ न वयमीदृशीनां श्रुता एव भगवद-
वतारकथा भवद्भिरलं तृप्ताः किमर्थं पृच्छते त्यत्राहुः ॥ वयं यदुत्तमश्लोकाचरितं शृण्वतामपि रसज्ञानां पदे पदे क्षणे पुनः पुनर्वा स्वादु
स्वादुरुचिजनकं भवति पूर्वपूर्वश्रवणापेक्षयोत्तरश्रवणे तीव्ररुचिकरमेव भवतीति ॥ श्रुतमपि पुनः पुनर्नवं नवमेव भवतीति भा-
वः ॥ यच्छृण्वतां तत्पदे पदे स्वादु ॥ तस्मादुत्तमश्लोकविक्रमेन वितृप्याम इत्यन्वयः ॥ १९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ २७

सुक्तं चैतदित्यभिप्रायेणाहुः। कृतवानिति। कपटमानवः। छद्ममानवः। मनुष्यवत्प्रतीयमान इत्यर्थः॥ एवमपि भगवान्षा
ड्गुण्यः। तथापि गूढः। तत्त्वतो यमीश्वर इति केनापि न ज्ञातः। केशवः। क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनां। आवां तवांगसंभूतौ त
स्मात्केशवानिति रुद्रनिरुक्तकेशवपदप्रवृत्तिनिमित्ताश्रयः। श्रीकृष्णो बलरामेण सहितः। अतिमर्त्यानि अतिमानुषाणि
मनुष्यैः कर्तुमशक्यानीति यावत्॥ वीर्याणि चेष्टितानि कृतवानेवेति प्रसिद्धिः॥ मानुषाणि हि कर्माणि सहस्रशो भानि पुनः पुनः शु
श्रूषां जनयेयुः॥ भगवद्वीर्याण्यतिमानुषत्वादिलक्षणविषयत्वादेव स्वविषयां शुश्रूषामप्युत्तरोत्तराधिकां विलक्षणां जनयंतीति

कृतवान्किल वीर्याणि सहरामेण केशवः॥ अतिमर्त्यानि भगवान्गूढः कपटमानवः॥२०॥ कलिमा
गतमाज्ञाय क्षेत्रेस्मिन्वैष्णवे वयं॥ आसीना दीर्घसत्रेण कथायां सक्षणा हरेः॥२१॥

त्वं किमु वक्तमित्यर्थः॥ अतस्तत्र न वितृप्याम इति भावः॥ अतो भगवत्कर्मश्रवणेश्रद्धालूनां नो तानि कथयेत्यर्थः॥२०॥ ननु भग
वद्वीर्याणि बहूनि महता कालेन श्रोतव्यानि भवतां तु नित्यं तपश्चरतां कोऽवसर इत्याहुः। कलिमिति॥ कलिं तपोविघ्नकरं कलियु
गमागतं प्रवृत्तं विज्ञायाल्पत्वाद्वयमुपायांतरेण कलिं जेतुमशक्ताः। हरेः। कलिकृतदोषहरस्य भगवतः कथायां निमित्तभूतायां कथा
श्रवणार्थमित्यर्थः॥ सक्षणाः सावसराः लब्धावसरा इति यावत्॥ अस्मिन्वैष्णवे विष्णोः संबंधिनि तत्सान्निध्यवति क्षेत्रे नैमिषा
ख्ये दीर्घसत्रेण सहस्रवत्सरपर्यंतेन ब्रह्मसत्रेण अध्ययनेन वसतीति वद्ध्येत्वर्थे तृतीया। दीर्घसत्रार्थमित्यर्थः। आसीना उपवि

१६ स्कं प्रथम

भा० प्र०
१८

किंच । पुंसां सत्वहरं तपश्चादिसारहरं मत एव दुस्तरं उपायांतरैस्तर्तुं जेतुमशक्यं कलिं निस्तितीर्षतां तर्तुमिच्छतां नोऽस्माकं कर्णधार इव त्वं धात्रा ईश्वरेण संदर्शितः ॥ उपायत्वेनेति शेषः । दैववशादिदं संपन्नमिति भावः । २२ । स्ववर्णाश्रमधर्मैर्णैव कलिं तरतः । किं हरिकथाश्रवणेनेनेति इमां शंकां निराकुर्वंतः । प्रश्नमुपसंहरंति । ब्रूहीति । ब्रह्मण्ये ब्रह्मण्यकुलेसाधुः । ब्रह्मण्यः तस्मिन् ॥ धर्मवर्मणि धर्मस्य वर्मवत् कवचवत्पालके योगेश्वरे भक्तियोगाराध्ये श्रीकृष्णे ऽधुना स्वां काष्ठामभि

त्वं नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षतां ॥ कलिं सत्वहरं पुंसां कर्णधार इवार्णवं ॥ २२ ॥ ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि ॥ स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥ २३ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे प्रथमोऽध्यायः ॥ १ ॥ श्रीमते रामानुजाय नमः

यो प्रकर्षेः स्वां दिशं वा वैकुंठलोकमिति यावत् ॥ उपेते गते सति धर्मः । वर्णाश्रमानुकूलः ॥ कं कृष्णादन्यं कं शरणं रक्षितारं गतः ग
हेन्नकमपीत्यर्थः ॥ रक्षकनाधर्मगोप्तुरभावात् ॥ कलिनाभिभूतो धर्मस्तं जेतुमप्रभुः ॥ अतः केवलं कलिघ्नं भगवच्चरितमेव ब्रू १८
हीत्यर्थः ॥ २३ ॥ इति प्रथमे प्रथमः ॥ १ ॥

एवं संपृष्टैः निःश्रेयससाधनं तदनुग्राहकमाध्यात्मिकं श्रीकृष्णचरित्रं सूतः शौनकादीनां प्रश्नानभिनंद्य तेषामुत्तररूपं श्रीभागवताख्यं पुराणमाहेत्याह द्वादशाध्यायीं ॥ इतीति ॥ अथ श्रीसूत उवाच ॥ इति संप्रश्नसंहृष्ट इति श्लोकचितुष्टयो व्यासेनैव संगतः ॥ इतीत्यादि श्लोकस्य सूतोक्तित्वाभावात् तदर्थं प्रवृत्तं चेमित्यादिर्हि सूतोक्तिरतस्ततः ॥ अंगेष्व सूत उवाचेति पठितुं युक्तं इह तु श्री व्यास उवाचेति ॥ इतीत्थं विप्राणां शौनकादीनां संप्रश्नैः संहृष्टो रोमहर्षणिः ॥ रोमहर्षणस्यापत्यं पुमान् सूतः तेषां विप्राणां वचः प्रश्नात्मकं वचः प्रतिपूज्या

व्यास उवाच ॥ इति संप्रश्नसंहृष्टो विप्राणां रोमहर्ष
णिः ॥ प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे ॥ १ ॥

भिनंद्य प्रतिवक्तुं प्रतिवचनरूपं पुराणमिदं वक्तुं उपचक्रमे ॥ आरेभे ॥ विप्राणामित्यनेन सापेक्षस्यापि संप्रश्नशब्दस्य नित्यसापेक्षत्वाद्वा वृत्त्वाद्वा समासः ॥ तेषां विप्राणां वचः प्रतिपूज्येति वान्वयः ॥ संप्रश्नसंहृष्ट इति पाठांतरं ॥ तदा समीचीनः प्रश्नो यस्य तस्मै प्रतिवचनाय संहृष्टं प्रत्युत्तरं वक्तुं हृष्ट इत्यर्थः ॥ यद्वा ॥ विप्राणामित्यस्य वचइत्यनेनैवान्वयः ॥ संशोभनाः प्रश्ना येषां तैः शौनकादिभिः संहृष्ट इत्या
र्थः ॥ १ ॥

भा०प्र० अस्मान्नात्मतुन्तररूपमिदं पुराणं शुश्रावयिषुरन्यैरपि श्रावयितव्यमित्येवं कार्यमिति सूचयितुं एतत्पुराणप्रथमप्रवर्तकत्वरूपमहोपकर्तृत्वा
१८ दात्स्वगुरुं शुकं नमस्कारात्मकं वर्णनात्मकं मंगलमाचरतीति सूतः॥ यं प्रव्रजंतमिति द्वाभ्यां॥ द्वैपायनः श्रीव्यासः॥ विरहकातरः
सन् यं पुत्रेत्याजुहावाहूतवान्॥ तदा तन्मयतया तरवोऽभिनेदुः तं सर्वभूतहृदयं मुनिमानतोऽस्मीत्यन्वयः॥ कथंभूतं प्रव्रजंतं देवपैत्र्या
दीन् परित्यज्य व्रजंतं॥ अनुपेतं॥ उपेतरहितमसहायमित्यर्थः॥ अपेतं कृत्यं यस्मात्तं कर्तव्यांशरहितं निष्प्रब्रह्मोपासनत्वात् कृत
कृत्यमिति भावः॥ प्रव्रजंतमित्यनेन देहानुबंधित्यागउक्तः॥ अनेन ममताराहित्यं फलितं॥ अनुपेतमित्यनेनासहायत्वमुक्तं अ

सूत उवाच॥ यं प्रव्रजंतमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव॥ पुत्रेति तन्मयतया तरवोऽभिनेदु
स्तं सर्वभूतहृदयं मुनिमानतोऽस्मि॥ २॥

न देहपोषकसहायांतरराहित्यं सूचितं॥ तेन च देहात्मधर्मरूपाहंकारराहित्यं फलितं॥ द्वैपायनो विरहकातर आजुहावेत्यनेन द्वैपायना
दप्यतिशयितज्ञानवत्त्वं सूचितं॥ यद्यपि पुत्रेत्यस्य दूरादाह्वानविषयवाक्यत्वात्॥ दूराद्धूते चेति प्लुतत्वे प्राप्ते॥ प्लुतत्वे प्रगृह्या अचि नि
त्यमिति प्रकृतिभावे च सति संधिर्दुर्लभस्तथापि गुरोरनृतः ऽसत्र प्राचामिति योगविभज्य सर्वस्य प्लुतस्य वैकल्पिकत्वाभ्युपगमात्॥ अ
प्लुतवदुपस्थिते परस्य चेति सूत्रः॥ सर्वः प्लुतः साहसमनिच्छता विभाषा कर्तव्य इति महाभाष्यकारोक्तेश्च प्लुताभावपक्षे संधिः सुलभ एवे
ति बोध्यं॥ साहसं प्लुतस्य त्यागस्तदनिच्छता शास्त्रमनुरुंधानेनेत्यर्थ इति हरदत्तो व्याख्यादिति केचित्॥ वस्तुतस्त्वितिशब्दस्यैव वाक्या १८

तत्वेन पुत्रशब्देनुतत्प्रसंगएव नास्ति ॥ अनुकार्यस्य पुत्रशब्दस्य संबोधनविषयत्वे पुत्रानुकरणस्य तस्य तदभावाच्च । तन्मयेत्यत्र मयट् प्राचुर्ये
संबंधमात्रे वा तत्प्राचुर्येतया तत्संबंधितया वा तरवोभिनेदुः । शुकात्मकावयवं इत्येवंरूपेण प्रतिदध्वनुरित्यर्थः ॥ तत्प्राचुर्यं च तद्रूपणांशुकेन
ज्ञानव्याप्त्याधिष्ठितत्वात् तरवग्तत्वं ॥ संबंधमात्रे मयट् पक्षेपि ज्ञानद्वाराधिष्ठेयभावरूप एव संबंधो वबोध्यः ॥ स्वरूपेण तद्धिष्ठत्वासंभवा
त् एषो श्वेतात्मा ॥ आराग्रमात्रो ह्यवरोपि दृष्ट इत्यादिभिः । श्रुतिभिर्जीवस्वरूपस्याणुत्वावगमात् ॥ तत्स्वरूपेणानेकाधिष्ठत्वासंभवात्
श्री यद्यपि धर्मभूतस्यापि सचानंत्याय कल्पते इत्यादिश्रुतिभिर्मुक्तिदशायामेवानंत्यबधगतं ॥ तथापि शुकस्य परिनिष्पन्नब्रह्मोपासन
त्वेन मुक्तनामिव निवृत्तज्ञानसंकोचककर्मरूपावरणत्वाद परिछिन्नधर्मभूतज्ञानद्वाराऽनेकतद्धिष्ठात्त्वमुक्तं ॥ यत एव तन्मयत
या तरवोभिनेदुरत एव सर्वभूतहृदयं । सर्वभूतानां हृदयं यतेगच्छति ज्ञानद्वारा व्याप्नोतीति सर्वभूतहृदयस्तं ॥ अयगताविति धातुः
यद्वा ॥ सर्वभूतानां हृदयं ॥ यस्य ज्ञानद्वारा व्याप्यं स सर्वभूतहृदयस्तं ॥ यद्वा ॥ हृदयशब्देन धर्मभूतंज्ञानं लक्ष्यते ॥ हृदयस्य ज्ञानस्याहृद्ववर्था
त् ॥ सर्वभूतेषु हृदयं धर्मभूतं ज्ञानमधिष्ठानं यस्य सस्तं मुनिं स्वात्मपरमात्मयाथात्म्यमननशीलं श्रीशुकमिति विशेष्यमध्याहार्यं
ज्ञानतइतिकर्तरि क्तः ॥ नमस्कृतवानस्मीत्यर्थः ॥ २ ॥

यइति ॥ यः करुणया पुराणगुह्यं विशेषणं विशेष्येण बहुलमिति बहुलग्रहणात् । विशेष्यस्यापि पुराणशब्दस्य पूर्वनिपातः ॥ यद्वा पुरा
णगतं गुह्यमाह तं मुनीनामपि गुरुं व्याससूनुमुपयामि शरणं व्रजामि । पुराणं कथंभूतं स्वानुभावं स्वेनैशुकेनानुभावं कर्मणि घञ् ॥ अयमम
नुभूतमित्यर्थः ॥ अखिलानां श्रुतीनां सारो यस्मिन्प्रतिपाद्यस्तत्तथा वेदपूर्वभागार्थभूतकर्मणामप्युत्रपुराणे भगवदाराधनरूपता

यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोंधं
संसारिणां करुणयाह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनां ॥ ३ ॥

यात्रैव प्रतिपादनादखिलश्रुतिसारमित्युक्तं । एवं स्वतुल्याधिकपुराणांतररहितं । अध्यात्मदीपं । आत्मनाधीतमध्यात्ममिति विभक्त्यर्थे
ऽव्ययीभावः ॥ स्वाध्यात्मपरमात्मयाथात्म्यप्रकाशने दीपतुल्यमित्यर्थः ॥ अतितितीर्षतां संसृतिं तर्तुमिच्छारहितानामपि संसारिणां तमोंधं
तमः संसृतिरुचिजनकमज्ञानमंधयति तिरोधापयति निवर्तयतीति तथा ॥ ३ ॥

एवं श्रावयिष्यन्नादौ महोपकर्तुर्बादरायणेर्नमस्कारात्मकं मंगलमनुष्ठितमिति सूचितं॥ न केवलं बादरायणेरेव नमस्कार्य्यः अपि त्वन्येपि ना
रायणादयः इत्यभिप्रायेणाह। नारायणमिति॥ नारायणादीन्नमस्कृत्य ततो जयमुदीरयेत् कथयेत् श्रावयेदिति यावत्॥ जयमित्यस्यैव पुरा
णस्यान्वर्थं नामांतरं अखिलदुरितजयविनाभूतत्वाज्जयमिति॥ तत्र नरनारायणयोर्बदर्याश्रमवासिनो भगवदवतारभूतयोः। यो वै भा
रतवर्षेस्मिन् क्षेमाय स्वस्तये नृणां। धर्मज्ञानशमोपेतमाकल्पादास्थितस्तपः। इति वक्ष्यमाणरीत्या शिष्याचार्यरूपेण स्वानुष्ठानद्वाराखिल
धर्मप्रवर्तकत्वेन नारदादिमुखेनाखिलाध्यात्मशास्त्रप्रवर्तकत्वेन चतुर्णामपि गुरुत्वेन च महोपकर्तृत्वात्तन्नमस्कृतिरवश्यं कार्येति भावः॥
वागधिष्ठातृदेवतात्वात्सरस्वती नमस्कार्येत्यभिप्रायेण सरस्वतीमित्युक्तं। देवस्य चतुर्मुखस्य स्त्री देवी तां पुंयोगादाख्यायामिति ङीष्। अ

नारायणं नमस्कृत्य नरं चैव नरोत्तमं। देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥४॥

त्र सरस्वत्याश्चतुर्मुखसंबंधप्रत्यायकदेवीत्वविशेषणेन चतुर्मुखनमस्कृतिरपि कार्येति सूचितं। चतुर्मुखो हि। अनिरुद्धाख्यभगवत्तुरीयव्यू
हनाभिकमलसंभूतत्वात्तपस्तोषितानिरुद्धोपदिष्टभागवतचतुःश्लोकीं कृत्स्नैतत्पुराणनिदानभूतां नारदायोपदिदेश। अतः सोपि महा
नुपकर्तैव गुरुश्चेति नमस्कार्य्य इत्यभिप्रायः। अनेनैवानिरुद्धनारदयोरपि नमस्कार्यत्वमर्थसिद्धं वेदितव्यं॥ अनिरुद्धाच्चतुःश्लोक्यधि
गमो नारदाय तदुपदेशश्च द्वितीये स्पष्टीभविष्यति। नारदाच्चतुःश्लोकीमधिगम्य कार्त्स्न्येनैतत्पुराणनिर्मातृत्वेनोपकर्तृत्वं मत्वा व्यासो न
मस्कार्य्य इत्यभिप्रायेण व्यासमित्युक्तं॥ तत्रायं क्रमो विवक्षितः। तावन्नमस्कार्य्यः शुकस्ततो व्यासस्ततो नारदस्ततः सरस्वती तद्भर्ता ततो

श्रीः। श्रीमद्भागवतटीका। अ

भा० प्र०
२१

तदेवं मंगलाचारं कृत्वा नानाविधं च प्रथमतात्मनां । जपतां गुरुकृतां नित्यं विनिपातो न विद्यत ऽस्तु कृतीत्या कृताद्दैवतोपासनात्मकमंगलत्वा
त्तत्प्रश्नमभिनंदति ॥ मुनयेति ॥ हे मुनयः भवद्भिः साधु यथा भवति तथा ॥ लोकमंगलमिति प्रश्नसाधुत्वे हेतुः ॥ लोकविषयत्वात्प्र
श्नः साधुरित्यर्थः ॥ कथं प्रश्नस्य लोकमंगलविषयत्वं इत्यत आह । यत्कृत इति कृष्णसंप्रश्नः ॥ यदिति ॥ यद्यस्मात् कृष्णविषयकः संप्रश्नः कृ

मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमंगलं ॥ यत्कृतः कृष्णसंप्रश्नः येनात्मा सुप्रसीदति ॥ ५ ॥

तमंगलानां च मंगलं इत्युक्तरीत्या निरतिशयमंगलस्वरूपकृष्णविषयकसंप्रश्नः कृतस्ततो लोकमंगलमहं पृष्ट इत्यर्थः । कृष्णसंप्रश्नस्य
लोकमंगलविषयत्वमेवोपपादयति ॥ येनेति ॥ येन कृष्णेन तद्विषयकप्रश्नेन वा हेतुना आत्मा चित्तं सुष्ठु प्रसन्नं भवति प्रश्नोत्तराभ्यां सत्स्वरू
पगुणविभूतिः । कृष्णो नु संहृद्विवक्षितागतमालिन्यमपनयति ॥ चित्तप्रसादादेव लोकानां सर्वाणि मंगलानि सुलभान्येवेति भावः । ५ । २१

तत्र यत्तावत्पृष्टं भवता यद्विनिश्चितं पुंसामेकांततः श्रेयस्तन्नः शंसितुमर्हसीति ॥ किं निरतिशयं श्रेयः को वा तत्साधनभूतो धर्मश्चेष
तदन्यत्त्वपि स्वजन्म इति तत्र गर्भजरामरणाद्यनर्थरूपसंसृतिनिवृत्तिपूर्वकब्रह्मानंदानुभवात्मको मोक्ष एव निरतिशयं श्रेयः ॥ तत्साधन
भूतधर्मश्च परब्रह्मोपासनात्मिका विजातीयप्रत्ययांतराव्यवहिता प्रत्यक्षिता यत्नाप्रीत्यात्मिका तद्भक्तिरेव तन्निष्पत्तिश्चानभिसंहित।
फलैर्वर्णाश्रमधर्मैर्ज्ञानयोगशमदमादिभिः सत्संगादिस्यादिश्रवणाद्या च भगवद्गुणश्रवणादिरुचिजननद्वारा भवतीति वक्तुं तावद्धा-
क्रियोगाद्युग्राहक एव वर्णाश्रमप्रयुक्तो धर्मः । श्रेयस्तदन्यस्त्वभिसंहितफलः पुनः संसृतिहेतुत्वेनानर्थावह इत्याह । स वा इति त्रिभिः

स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ॥ अहैतुक्यप्रतिहता ययात्मा सुप्रसीदति ॥६॥

यतोऽनभिसंहितफलाद्धर्माद्वर्णाश्रमाद्यनुष्ठितात्पुंसामधोक्षजे भक्तिर्भवति । स एव धर्मः पर उत्कृष्टः ॥ भक्तिमपि विशिनष्टि । अहैतु
क्यफलोपाधिरहिता ॥ अप्रतिहता अंतरायानुपहता ॥ अव्यवहितेति पाठांतरं ॥ तदा विजातीयप्रत्ययांतराव्यवहिता । यया भक्त्या आ
त्मा सुप्रसीदति । पूर्वोक्तभक्तिरुत्तरभक्तिप्रकर्षोपयिकमनोनैर्मल्यहेतुरित्यर्थः ॥ यद्वा । यया आत्मा सुप्रसीदतीत्यनेन प्रीत्यात्मकत्वमुच्य
ते । अनुकूलज्ञानेनैव चित्तप्रसादः प्रतिकूलेन तु चित्तविक्षेप एव अनुकूलज्ञानमेव ह्यानंदः सुखं प्रीतिश्चेति पर्यायांतरैरुच्यते । अव्य
वहितेत्यनेन तैलधारावदविच्छिन्नस्मृतिसंतानरूपत्वमुक्तम् ॥६॥

नन्वपवर्गहेतुत्वमुक्तं शब्दादिविषयासक्तमनसः कामेनापि मध्ये मध्ये विषयांतरानुध्यानव्यवहितत्वप्रसंगादिति शंकां निराकुर्वन्नुक्तम
क्रमेव विशेषणांतरमाह ॥ वासुदेव इति ॥ भगवति षाड्गुण्यपरिपूर्णे वासुदेवे प्रयोजितो भक्तियोगः वैराग्यमाशु जनयति । सर्वज्ञात्मत्वे समस्तं च
वशत्वैवेवयतः । ततः स वासुदेवेति विद्वद्भिः परिगीयत इति निरुक्तवासुदेवशब्देन सर्वांतरात्मत्वं सर्वाधारत्वं भगवच्छब्देन षाड्गुण्यपूर्तिं श्चोक्ता
सर्वांतरात्मकत्वेन च निरतिशयप्रियत्वं लब्धं ॥ आत्मैव हि निरतिशयप्रियः । एवमनेन पदद्वयेन शब्दादिलौकिकविषयेभ्यो वैलक्षण्यम

वासुदेवे भगवति भक्तियोगः प्रयोजितः
जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकं ॥७॥

भिप्रेतं । एवंविधविषयस्य विलक्षणत्वादेव तदनुध्यानरूपो भक्तियोगः शब्दादिविषयेषु नासक्तिरूपं वैराग्यमाशु जनयति ॥ कस्मिंश्चि
द्विषये विलक्षणे ॥ अनुरागातिशयस्य विषयांतरवैतृष्ण्यावहत्वदर्शनात् ॥ तस्माद्भक्तियोगनिष्ठमनसः शनैर्विषयांतरवैतृष्ण्य
स्याशरीरेणोदयात् द्विषयानुध्यानाव्यवहितत्वं भक्तेः संपत्स्यत एवेति भावः । तथा यदहैतुकं ॥ नाहं वेदैर्न तपसा इत्युक्तरीत्या भक्तिव्याति
रिक्तहेतुत्वं तरालभ्यं ज्ञानं साक्षात्कारात्मकं तच्च जनयति ॥ अनेन भक्तेः साक्षात्कारात्मकत्वविशेषणमुक्तं ॥७॥ ॥ ॥ ॥ २३

तदेवं श्लोकद्वयेनोक्तविधभक्त्यानुग्राहक एवानभिसंहितफलवर्णाश्रमयुक्तधर्मः श्रेष्ठ इत्युक्तं अथास्य धर्मस्य भगवद्गुणश्रवणादिरुचि।
जननद्वारा भक्तियोगानुग्राहकत्वं वदन्ननभिसंहितफलसंहितधर्मस्य श्रमफलकत्वमाह। धर्म इत्येकेन। यः सम्यगनुष्ठितोपि धर्मः पुंसां विष्व

धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः
नोत्पादयेद्यदि रतिं श्रम एव हि केवलम् ॥ ८ ॥

क्सेनस्य भगवतः। कथासु रतिं रुचिं यदि नोत्पादयेत्तर्हि स धर्मः केवलश्रम एव फलक एव संसृतिरूपानर्थावह एवेत्यर्थः। रतिं नोत्पादये
दित्यनेन रत्येकप्रयोजनतयानुष्ठितो धर्मः परमैहिकामुष्मिकफलार्थस्तु श्रमफलक इति प्रतीतेः। फलानभिसंध्यभिसंधिभ्यां धर्मस्यो

भा॰ टी॰ तदेवमनभिसंहितफलो भगवद्गुणश्रवणादिरुचिजननद्वारा भक्तियोगानुग्राहक एव धर्मः परो न्यस्तु श्रमफलकः इत्युक्तं ॥ अथोक्तविधधर्मानुग्रा
२२ हकभगवद्भक्तियोगसाधनमोक्षस्यैव नित्यनिरतिशयपुरुषार्थत्वमिति दर्शयितुं धर्मार्थकामानां स्वतः पुरुषार्थत्वं धर्मस्यार्थार्थत्वमर्थस्य कामार्थत्वं।
कामस्येंद्रियतर्पणार्थत्वमिंद्रियतर्पणस्य जीवनस्य पुनर्धर्मार्थत्वं इत्यादिरूपां चक्रवत्परिवृत्तिं लौकिकाभिमतां निरस्य धर्मादीनामपि परंपरया निर
तिशयपुरुषार्थरूपमोक्षसाधनभक्तियोगानुग्राहकत्वमाह ॥ धर्मस्येति त्रिभिः ॥ तत्र धर्मस्य फलमर्थः । अर्थस्य फलं कामः कामफलमिंद्रियतृप्ति
रिति लौकिकानां मतं । तत्र धर्मफलत्वमर्थस्य निरस्यति । धर्मस्येत्यर्द्धेन ॥ आपवर्ग्यस्य अपवर्गसाधनस्य अनभिसंहितफलत्वेन परंपरया निरति

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते ॥ नार्थस्य धर्मैकांतस्य कामो लाभाय हि स्मृतः ॥ ९ ॥

शयपुरुषार्थरूपमोक्षसाधनो भविष्यतो धर्मस्यार्थाय प्रयोजनाय अर्थः । धनं न प्रकल्पते । धनं धर्मस्य फलं न भवतीत्यर्थः ॥ धर्मस्यार्थफलकत्वरू
पलौकिकमतानुवादेनैव स्वतः पुरुषार्थत्वमपि निरस्तं वेदितव्यं । एवमुत्तरत्रापि द्रष्टव्यं ॥ एकस्यैव दानयागादिरूपस्य धर्मस्य फलाभिसंधानमभि
संधिरूपाकारभेदेनोत्कृष्टापकृष्टफलसाधनत्वेऽवगते सति तन्नानभिसंहितफलत्वरूपाकारानादरेण सहेतरपुरुषार्थरूपार्थत्ववादरूपं लौकि
कानां मतममीवाबादरणीयमिति भावः ॥ अर्थकामस्यार्थफलत्वं निरस्यति ॥ नार्थस्येति । धर्मैकांतस्य धर्मैकप्रयोजनस्यार्थस्य [illegible] वित्तस्य ला
भाय प्रयोजनाय कामो न स्मृतः । अर्थस्य प्रयोजनं न कामो भवतीत्यर्थः ॥ अत्र कामशब्देन काम्यत इति काम इति व्युत्पत्त्या अन्नपानादिरुच्यते । ९ २२

अथ कामस्येंद्रियतृप्तिफलकत्वं निरस्यति कामस्येति यावताऽन्नपानादिना कामेन काम्यमानेन वस्तुना जीवति॥ तावतोऽन्नादेर्भोग्यवस्तुनः
लाभः फलं नेंद्रियतृप्तिः॥ किं देहधारणमेवान्नपानादिकामफलमित्यर्थः॥ अथ जीवनस्य पुनर्धर्मार्थत्वं निरस्यति। जीवस्य जीवनस्य प्रयोजनं त-
त्त्वजिज्ञासैव न तु इह लोके यः कर्मभिः साध्यो धर्मः सोऽर्थः प्रयोजनं॥ अत्र धर्मार्थकामजीवानां क्रमेणार्थकामेंद्रियतृप्तिधर्मार्थत्वं निरस्य तेषां
क्रमेणापवर्गधर्मदेहधारणमात्रतत्त्वजिज्ञासार्थत्वं उक्तमित्ययं भावः॥ सति वित्ते तेनानभिसंहितफलं धर्मं संपाद्य तेन धर्मेणापवर्गसाधनभूतं भक्ति-

कामस्य नेंद्रियप्रीतिर्लाभो जीवेत यावता॥ जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः॥१०॥
वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं॥ ब्रह्मेति भगवानिति शब्द्यते॥११॥ ॥ ॥

परमात्मेति

योगमनुकुर्यात्॥ सति तु कामे तेन देहधारणमात्रोपयुक्तेन देहं धृत्वा तेन देहेन भजनीयतत्त्वजिज्ञासा कार्येति॥१०॥ जीवस्य प्रयोजनं तत्त्वजिज्ञासे-
त्युक्तं॥ किं तत्त्वं यज्जिज्ञासितव्यं इत्यत आह॥ वदंतीति॥ यज्ज्ञानं ज्ञानस्वरूपं ज्ञानानुगुणकं च। अद्वयं खलु तुल्याभ्यधिकवस्त्वंतररहितमवयवभे-
दरहितं वा जात्यादिभेदरहितं वा ब्रह्मपरमात्मभगवच्छब्दाभिहितं तदेव तत्त्वमिति तत्त्वविदो वदंति॥ ब्रह्मपरमात्मभगवच्छब्दाः सामान्यविशेष
प्राशप्रयुक्ताः॥ एवं प्रयुंजानस्य सदाकाशादिशब्दवदविकारेणैवाभ्युगता भगवत्स्वराइत्यभिप्रायः॥११॥

एवं परधर्मादि वर्गस्यापि परंपरयाऽपवर्गसाधनत्वं प्रसंगाद्वज्ञनीयवस्तुस्वरूपं चोक्तं ॥ अथ यद्विवक्षितं मोक्ष एव निरतिशयं श्रेयस्तत्साधनं तु भ
क्तिरेव तल्लिप्सितिष्ठ वर्णाश्रमधर्मज्ञानयोगशमादिभिरिति तदुपपादयति । तदित्यादिभिः सार्द्धैर्दशभिः ॥ तत्तस्माद्भक्तियोगानुग्राहकस्यैव
धर्मस्य परत्वात्त्रिवर्गस्यापि परंपरयापवर्गार्थत्वात्तदपवर्गातिरिक्तनिरतिशयपुरुषार्थाभावाच्चेत्यर्थः ॥ श्रुतं यज्ञादिकर्म तस्य कृतत्वात्तया वेदेश्रु
तत्वात्तेन गृहीतयानुगृहीतया ज्ञानवैराग्याभ्यां युक्तया भक्त्या आत्मनि जीवात्मन्यंतरात्मतया स्थितं ब्रह्मादिशब्दवाच्यं भगवंतं श्रद्दधाना मुनयः
पश्यंति । हे मुनयः इति संबोधनं वा ॥ तदा श्रद्दधाना ये ते एवंविधया भक्त्या पश्यंति । ज्ञानशब्देन प्रत्यगात्मयाथात्म्यज्ञानयोगो विवक्षितः । वैराग्यं

तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया ॥ पश्यंत्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया ॥ १२ ॥

विषयांतरेषु वैतृष्ण्यं तेन शमदमादिसंग्रहः ॥ एभिरंगैरुपकृतया भक्त्या आत्मनि स्थितं परमात्मानं पश्यंति साक्षात्कुर्वंतीत्यनेन भक्तेरेव
परमात्मदर्शनसमनंतरभाविमोक्षसाधनत्वमुक्तं ॥ कर्मयोगज्ञानयोगयोः शमादीनां च भक्तियोगानुग्राहकत्वं च । भिद्यते हृदयग्रंथिरि-
त्युत्तानंतरश्लोकानुवादिना वक्ष्यमाणश्लोकेन च मोक्षस्य दर्शनानंतरभावित्वमवगतं ॥ एवं च भक्त्या पश्यंतीत्याद्दर्शनरूपापन्नाया भक्तेरव्यव
धानेन मोक्षसाधनत्वमित्यभिप्रायः ॥ १२ ॥ २५

अतएवाहात इत्यनेन वर्णाश्रमधर्मस्य भक्तियोगानुग्राहकत्वमुक्तं धर्मः स्वनुष्ठितः पुंसामित्यादिना धर्मस्य भक्तियोगानुग्रहप्रकारउक्तः इदा
नीमन्यथापि तदनुग्रहप्रकारं दर्शयति ॥ अत इति । यतो भक्तेरेव साक्षान्मुक्तिसाधनत्वमतो हे द्विजश्रेष्ठाः । पुंभिर्वर्णाश्रमविभागशः अव
स्थितस्येति शेषः ॥ तद्वर्णाश्रमानुगुणस्येत्यर्थः । वर्णादिभेदेनावस्थितैः पुंभिरिति वा ॥ सम्यगनुष्ठितस्य यज्ञदानादिरूपस्य संसिद्धिः फलं ह
रितोषणमेव । अयं भावः । स्वनुष्ठितो धर्मो भक्तियोगप्रतिबंधनिवृत्त्यनुकूलसंकल्पहेतुर्हरितोषः ॥ ततश्च भक्तियोगसंपत्तिप्रतिबंधपा
पत्ततो भक्तियोगनिष्पत्तिरिति ॥ यद्वा । हरिस्तुष्यते येनानुध्यानेन तद्धरितोषणं ॥ तदेव धर्मस्य स्वनुष्ठितस्य संसिद्धिः फलं । भक्तियोगो

अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः ॥ स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणं ॥ १३ ॥

त्पत्तिप्रतिबंधकनिरसनद्वारा हरितोषहेतुर्भक्तियोगनिष्पत्तिरेव धर्मस्य फलमित्यर्थः । अन्यथा धर्मेण पापमपनुदतीति । अविद्यया मृत्युं तीर्त्वे
त्यादिश्रुतेर्धर्मस्य भक्तियोगोत्पत्तिप्रतिबंधकपापनिरासकत्ववदस्या विरोधापत्तेः ॥ धर्मस्यैव हरितोषफलकत्वे भक्तेर्वैयर्थ्यापत्तेश्च । ननु ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेर्जुनेति भक्तियोगस्यैव सर्वदुरितनिवर्तकत्वस्मरणात् ॥ भक्तियोगवद्धर्मस्यापि हरितोषहेतुत्वमेव तु ।
क्तमिति चेन्न । प्रापकप्रतिबंधकं प्राप्तिप्रतिबंधकं चेति द्विविधं दुरितं । तत्र प्रापकस्य भक्तियोगस्योत्पत्तिप्रतिबंधकं दुरितं तद्धर्मोपनोद्यं । ए
वं धर्मनिरस्तप्रतिबंधके भगवत्प्रापके भक्तियोगे निष्पन्ने तेन यद्भगवत्प्राप्तिप्रतिबंधकं दुरितं तदपनोद्यते तदभिप्रापकाणि ज्ञानाग्निरि

भा० प्र०
२५

एवं वर्णाश्रमधर्मस्य भक्तियोगोपकारस्तत्प्रकारश्च भक्तियोगप्रतिबंधनिरसनेन भगवद्गुणादिश्रवणरुचिजननद्वारा चेति द्विधा संदर्शितः
अथ तुल्यन्यायतया भगवद्गुणस्वरूपादिश्रवणादीनामपि भक्तियोगोपकारकत्वमुपकारप्रकारंच वक्तुं तेषामवश्यकर्तव्यतां तावदाह तस्मा
दिति द्वाभ्यां तस्माद्धर्मस्य भक्तियोगानुग्राहकत्वतत्प्रकारदर्शनादेवतुल्यन्यायतया भगवद्भक्तियोगोपकारकत्वेन सात्वतां भक्तानां पति
र्भगवानेकैवैकाग्रेण मनसा नित्यदा श्रोतव्यः कीर्तितव्यः। ध्येयः। स्मर्तव्यः। पूज्यश्च। ध्यानमत्र श्रुतार्थप्रतिष्ठापनात्मकं मननापरपर्यायं

तस्मादेकेन मनसा भगवान्सात्वतांपतिः॥ श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा॥१४॥
यदनुध्यासिना युक्ताः कर्मग्रंथिनिबंधनं॥ छिंदंति कोविदास्तस्य कर्मग्रंथिनिबंधनं॥१५॥

स्मरणं विवक्षितं॥ भक्त्यात्मकस्य ध्यानस्य श्रवणाद्यनंतरभावित्वं हि वक्ष्यते॥१४॥ यस्य भगवतोनुध्या। अनुध्यानं भक्तिः सैवासिः खड्गस्ते
नयुक्ताः सहिताः। कुशलाः कर्मैव ग्रंथिस्तद्रूपं निबंधनं बंधनं छिंदंति॥ कर्मणो ग्रंथित्वरूपणं ग्रंथिवद्दुर्मोच्यत्वात् दुर्विमोच्येन कर्मणा
निबध्यतइति निबंधनं कर्मायतः संसारस्तच्छिंदंतिरतिवा॥ तस्य कथासु रतिं कोवा पुमान्नकुर्यात्सर्वोपि कुर्यादेवेत्यर्थः। यस्य भक्तिरन
र्थोवहसंसृतिनिरासहेतुस्तस्य महोपकर्तुर्भक्तियोगस्यानुग्राहकतया तत्कथासु रतिं। सर्वोपि जनः कुर्यादेवेत्यर्थः॥१५॥॥ ॥ २५

यद्यपि धर्मः स्वनुष्ठितः पुंसां रति धर्मस्य वासुदेवकथारुचिजननद्वारा भक्तियोगानुग्राहकत्वोक्तौ कथारुचिजनकमप्युक्तमेव भवति। तथा
पि न साक्षादेव धर्मः कथारतिहेतुरपितु सत्संगादिद्वारा हेतं तरेण चेत्याह। शुश्रूषोरिति॥ श्रोतुमिच्छोः। स्वधर्मनिरस्तशुश्रूषाप्रतिबंधक
स्येत्यर्थः॥ श्रद्दधानस्य पुंसः वासुदेवकथायां रुचिः हे विप्राः। महतां सेवया पुण्यतीर्थानां गंगादीनां निषेवणाच्च भवति। श्रवणादीनां भ
क्तियोगोपकारप्रकारं दर्शयति॥ शृण्वतामिति द्वाभ्यां। पुण्यं शृण्वतां कीर्तयतां च पुण्यावहं श्रवणं कीर्तनं च यस्य स कृष्णः। स्वकथाः शृ

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः॥ स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात्॥१६॥
शृण्वतां स्वकथाः कृष्णः पुण्यश्रवणकीर्तनः॥ हृद्यंतःस्थो ह्यभद्राणि विधुनोति सुहृत्सतां॥१७॥
नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया॥ भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी॥१८॥ ॥१८॥१८॥

ण्वतां सतां साधूनां हृद्यंतःस्थितः सन्नभद्राणि भक्तियोगोत्पत्तिप्रतिबंधकानि दुरितानि विधुनोति। सुहृदिति। हेतुगर्भमिदं सुहृत्वाद्धुनो।
तीत्यर्थः॥१७॥ ततः किमत आह॥ नष्टप्रायेष्विति॥ नित्यं भागवतानां सतां सेवया तत्सेवापूर्वकभगवद्गुणश्रवणेनेत्यर्थः। अभद्रेषु नष्ट।
प्रायेषु सत्सु उत्तमश्लोके भगवति नैष्ठिकी दृढा भक्तिर्भवति॥ नष्टप्रायेष्विति प्रायग्रहणेन भक्तियोगापनोद्यं प्रारब्धप्रतिबंधकमुत्तरपूर्वाघ
रूपं तच्च शिष्यत इति सूचितं॥ एवं तुल्यन्यायतया स्वधर्मेणाप्युपायोत्पत्तिप्रतिबंधकमात्रमेव निरस्यत इति सम्यगुक्तं प्राक्॥१८॥ ॥ ॥

भा०प्र०
२६
कथमभद्रेषु नष्टेष्वपि भक्तिर्भवतीत्यत आह । तदेति ॥ नृणां सततं महत्सेवैव धर्मस्तदा ऽभद्रेषु नष्टेषु तन्मूलाः चित्तविक्षेपावरणहेतवो रजा-
स्तमसोर्भावाः धर्माः कार्यभूता इति यावत् । ये कामलोभादयः संति । आदिशब्दग्राह्याः क्रोधमोहादयस्ते सर्वे नश्यंति ॥ नष्टेषु च रजस्तमो-
भावेषु एतैः रजस्तमोभावैरनाविद्धमविक्षिप्तमविमूढं चात एव सत्वे रजस्तमोभ्यामनभिभूते सत्वे सत्वगुणे स्थितं सत्वप्रधानं स्थिरं सद्धि सत

तदा रजस्तमोभावाः कामलोभादयश्च ये ॥ चेत एतैरनाविद्धं स्थितं सत्वे प्रसीदति ॥१९॥
एवं प्रसन्नमनसो भगवद्भक्तियोगतः ॥ भगवत्तत्वविज्ञानं मुक्तसंगस्य जायते ॥२०॥

तियावत्प्रसीदति । प्रसन्ने च चेतसि नैष्ठिकी भक्तिरप्यु भवतीति भावः ॥१९॥ तदेवाह ॥ एवमिति । एवमुक्तरीत्या प्रसन्नं मनो यस्य तस्य विर-
क्तस्य पुंसः ॥ नैष्ठिकी भक्तिर्भवतीति शेषः ॥ तस्माच्च भक्तियोगाद्भगवत्तत्वं विज्ञानं भगवत्स्वरूपगुणयाथात्म्यसाक्षात्कारात्मकं ज्ञानं जाय-
ते हृष्टस्यनंतरोक्तेः । तच्च ज्ञानं परमभक्तेः फलं ॥ भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ॥ ज्ञातुं द्रष्टुं च तत्वेन प्रवेष्टुं च परंतपेति वचनात् ॥२० २६

एवंसाक्षात्कारपर्यंतंभगवद्भक्तियोगसाध्यंफलमाह॥ भिद्यतइति॥ आत्मनिपरमात्मनीश्वरेभगवतिदृष्टएवदृष्टमात्रेसत्येवास्यद्रष्टुःपुंसः
सर्वकर्माणिभगवत्प्राप्तिप्रतिबंधकानिउत्तरपूर्वाघरूपाणिक्षीयंतेनश्यंत्यतएवतन्मूलकाःसर्वेसंशयाःनश्यंति॥ सर्वशब्देनान्यथा
ज्ञानविपरीतज्ञानाज्ञानसंग्रहः॥ एवंतन्मूलकोहृदयग्रंथिवदनिर्मोच्योऽहंममाभिमानोभिद्यते॥ समूलासंसृतिर्निवर्ततेवल्लिहतो

भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः॥ क्षीयंतेचास्यकर्माणिदृष्टएवात्मनीश्वरे॥२१॥
अतोवैकवयोनित्यंभक्तिंपरमयामुदा॥ वासुदेवेभगवतिकुर्वंत्यात्मप्रसादिनीं॥२२॥

चब्रह्मप्राप्तिस्तदनुभवश्चायत्नसिद्धइतिभावः॥२१॥ उक्तार्थस्यानुष्ठानंदर्शयति॥ अतइति॥ यतोमोक्षएवंनिरतिशयपुरुषार्थस्तत्साधनं
तुभक्तिरेवातःकवयोनिरतिशयश्रेयस्तत्साधनाभिज्ञाःपरमयामुदाभगवतिवासुदेवेभक्तिमात्मप्रसादिनींकुर्वंति॥ आत्मप्रसादि
नींभक्तिंकुर्वंतीत्यनेनारब्धभक्तियोगस्यचित्तप्रसादेपिशनैःशनैःभक्तियोगादेवभवतीतिसूचितं॥२२॥

भा०प्र० ननु सत्वादिकारणेषु ब्रह्मरुद्रादिदेवेषु सत्सु कथं वासुदेवभक्तिरेव मोक्षायोच्यते इति शंकायामाह ॥ सत्वमित्यादिना यावदध्यायसमाप्तिः । तत्र भ
२७ गवान्वासुदेवः हिरण्यगर्भरुद्राभ्यां जीवशरीरकतया स्वावताररूपेण च जगदुत्पत्तिस्थितिलयकारणभूतस्तत्र साक्षाद्वासुदेवभक्तिरेव मोक्षोपाया-
भूतान्तःशरीरभूतहिरण्यगर्भादिभक्तिस्तु ॥ यो यो यां यां तनुं भक्त इत्याद्युक्तरीत्या स्वर्गलोकादिप्राप्त्युपायः ॥ यद्यपि हिरण्यगर्भादिजीवशरीरा-
कतया तद्रूपेणावस्थितः । परमात्मैव तथापि कर्तृत्वभोक्तृत्वादिकं जीवगतमेव न तु परमात्मगतं ॥ न हि शरीरगतधर्माणां शरीरिणि प्रसक्तिरित्य-
यमर्थोऽत्र प्रतिपाद्यते ॥ सत्वमिति ॥ सत्वादयस्त्रयः । प्रकृतेर्गुणाः । प्रकृतेरिति सावधारणं विवक्षितं ॥ प्रकृतेरेव गुणा न तु जीवस्येत्यर्थः ॥ तैः सत्वा-
दिभिर्युक्तः । परः पुरुषः परमपुरुषः । योगश्च शरीरात्मभावरूपो विवक्षितः । एकः सृष्टेः प्रागिति शेषः ॥ सदेव सौम्येदमग्र आसीदित्यादिश्रुत-

सत्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ॥ स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु स-
त्वतनोर्नृणां स्युः ॥ २३ ॥

श्रुतेः । एकत्वं च कार्यदशावस्थनामरूपविभागप्रयुक्तबहुत्वप्रतिसंबंधिनामरूपविभागाभावप्रयुक्तविभागानर्हसूक्ष्मचिदचिच्छरीरकत्वं सृष्टेः
प्राक् नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकतयैक एव सन्नित्यर्थः ॥ अस्य स्थूलचिदचिदात्मकस्य जगतः । स्थित्यादये स्थितिसृष्टिलयार्थं ॥
स्थितिप्राथम्यं भगवत्प्राधान्यविवक्षया परमपुरुष एव ब्रह्मरुद्ररूपेण तन्मध्ये स्वावताररूपेण स्थितिसृष्ट्यादिकृद्धरिविरिंचिहरेति संज्ञा ब्रह्म-
विष्णुरुद्रसंज्ञाः इति शब्दः प्रकारार्थः । तेन रूपसंग्रहः । हर्यादिरूपाणि तद्वाचकानि हर्यादिनामानि च धत्ते बिभर्ति । तत्र सत्वं तनुः शरीरमा- २७
धिष्ठेयं यस्य तस्मात्सत्वप्रवर्तकाद्विष्णोरेव नृणां भजतां श्रेयांसि ज्ञानेन निष्पत्तिभवनिवृत्तिपरप्राप्तिरूपाणि स्युः खलु । सर्वकारणत्वात्स-

वैस्मात्परत्वात् सम्यक्ज्ञानवद्धकसत्वप्रवर्तकत्वाच्च वासुदेवभक्तिरेव मोक्षप्रदेत्यर्थः। नन्वेक एव हर्यादिसंज्ञा धत्ते त्वयेन हर्यादिनां पर
स्परं संज्ञाभेद एव न वस्तुभेद इति प्रतीत्या त्रयाणामैक्यमेव द्रष्टव्यं॥ तथा च श्रूयते॥ ब्रह्मा नारायणः शिवश्च नारायण इति। स्मर्यते च ब्रह्मा
नारायणात्मको सौ कल्पादौ भगवान् यथा॥ प्रजाः ससर्ज भगवान् ब्रह्मा नारायणात्मकः॥ ततः स भगवान् विष्णुरुद्ररूपधरो व्ययः। ततः
कालाग्निरुद्रो सौ भूत्वा सर्वहारो हरिः॥ सर्गस्थित्यंतकारिणीं ब्रह्मविष्णुशिवात्मिकां। संज्ञां संयाति भगवानेक एव जनार्दन इति। तथा
श्च वासुदेवस्य सर्वस्मात्परत्वं नोपपद्यते॥ किंचैक एव हर्यादिसंज्ञां धत्त इत्यनेन हर्यादिभ्यः परं तत्वमस्तीत्यवगम्यते। युक्तं चैतत्। अत एव वि
ष्णुर्मन्वादयः कालः॥ यस्मिन् ब्रह्मविष्णुरुद्रेंद्राः। सर्वे संप्रसूयंते तेनेदं पूर्णं पुरुषेण सर्वं ततो यदुत्तरतरं तदरूपमनामयं यएतद्विष्णुरमृता
स्ते भवंति विष्णोरपि परत्वं विभूतित्वं ततउत्पत्तिः पुरुषशब्दनिर्दिष्टनारायणातिरिक्ततत्वस्य मोक्षहेतुत्वमित्यादि किं सर्वं श्रूयमाणं संगच्छ
ते॥ किंचामृतस्यैष सेतुरिति सेतुवद्भगवतो न्यप्रापकत्वोक्तेश्च त्रिमृत्युत्तीर्णमेव जगत्कारणमिति नारायणस्य न परत्वं नापि तद्भजनान्मुक्ति
कारणं तु ध्येयमिति श्रुतिविरोधश्च संगादिति चेदत्रोच्यते॥ न तावत्त्रिमूर्त्यैक्यमुपपन्नं। नारायणाद्ब्रह्मा जायते॥ नारायणाद्रुद्रो जायते ना
रायणाद्द्वादशादित्या रुद्राः वसवः सर्वाणि छंदांसि। नारायणादेव समुत्पद्यंते॥ एको ह वै नारायण आसीन्न ब्रह्मा नेशानः॥ एको ह वै ना
रायण आसीन्न ब्रह्मा न चेशंकरः॥ स मुनिर्भूत्वा समचिंतयत्॥ तत एते व्यजायंत विश्वो हिरण्यगर्भो ग्निर्यमवरुणरुद्रेंद्राः॥ यन्नाभिपद्मादभव
न्महद् महात्मा प्रजापतिः॥ तत्र ब्रह्मा चतुर्मुखो जायते सो ग्रे भूतानां मृत्युमसृजत॥ अहं त्रिशिरस्कं त्रिपादं खंडपरशुं॥ ब्रह्मणः पुत्राय ज्येष्ठाय
ब्रह्मादक्षादयः कालस्तथैवाखिलजंतवः॥ विभूतयो हरेरेता जगतः सृष्टिहेतवः॥ रुद्रः कालांतकाद्याश्च समस्ताश्चैव जंतवः॥ चतुर्विधा

भा० प्र० श्चते सर्वे जना रेन विभूतयः ॥ आद्यो [illegible] नारायणो देवस्तस्माद्ब्रह्मा ततो भवः ॥ परो नारायणो देवस्तस्माज्जातश्चतुर्मुखः ॥ तस्माद्रुद्रोऽभवद्देवी क
२८ इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनां ॥ आवां तदंगसंभूतौ तस्मात्केशवनामभाक् ॥ तवांतरात्मा मम च ये चान्ये देहिसंज्ञिताः ॥ सर्वेषां साक्षिभूतोऽसौ
न ग्राह्यः केनचित्क्वचित् ॥ एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ ॥ तदादर्शितपंथानौ सृष्टिसंहारकारकौ ॥ विष्णुरात्मा भगवतो भवस्या
मिततेजसः ॥ सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते ॥ हरो हरति तद्दश इत्यादिश्रुतिभ्यः ब्रह्मरुद्रयोः । परमपुरुषसृज्यत्वतद्विभूतित्वतद्
देवमत्वतत्समादायत्तज्ञानवत्त्वतच्छरीरत्वादिधर्माणां तदैक्यविरुद्धानामवगतत्वात् ॥ ब्रह्मा नारायणः । शिवश्च नारायण इत्यादिना सामा
नाधिकरण्यस्य च सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते ॥ हरो हरति तद्दश इति प्रमाणांतरानुगुण्येनांतरात्मतयाप्याहत्यधिकरणन्यायेन
शरीरवाचिनां शरीरपर्यंतमैक्येनाप्युपपत्तेः ॥ वक्ष्यमाणावगतभेदस्य निर्वाहासंभवाच्च ॥ नापि नारायणादुत्तीर्णोलत्वांतरमस्ति ॥ विश्वमेवेदं
विश्वस्तद्विश्वमुपजीवति ॥ पतिं विश्वस्यात्मेश्वरं ॥ यमंतः समुद्रे कवयो वयंति ॥ न तस्येशे कश्चन तस्य नाम महद्यशः परात्परं यन्महतो महांतं
न तत्समश्चाप्यधिकश्च दृश्यते ॥ अग्निरवमो देवानां विष्णुः परमः ॥ मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ॥ आभूतसंप्लवे प्राप्ते प्रलीने प्रकृ
तौ महान् ॥ एकस्तिष्ठति विश्वात्मा स तु नारायणः स्मृतः ॥ न परः पुंडरीकाक्षाद्दृश्यते पुरुषर्षभ ॥ परं हि पुंडरीकाक्षान्न भूतो न भविष्यति ॥ न वि
ष्णोः परमो देवो विद्यते नृपसत्तम ॥ न वासुदेवात्परमस्ति दैवतं न वासुदेवं प्रणिपत्य सीदति ॥ देशतः कालतो व्याप्तिर्महत्त्वं तथैव च ॥ हरेर्वि
भूतिमात्रं तु केवलं संप्रभाषितं ॥ न देवः केशवात्परः । राजाधिराजः सर्वेषां विष्णुर्ब्रह्ममयो महान् ॥ परः पराणां सकलानां न यत्र क्लेशादयः
संति परावरेशे इत्यादिभिर्वक्तुभिः प्रमाणैः । विष्णोः सर्वाधिकत्वप्रदर्शनपूर्वकं तदधिकदेवतांतरनिषेधात् ॥ ब्रह्मविष्णुरुद्रेंद्रास्ते सर्वे संप्रस् २८

यंतरस्य श्रुतिविरोधः स्यान्निरवद्यस्वरूपास्य संकल्पमूलोच्यते ननु ब्रह्मरुद्रादीनामिव कर्ममूलाकारणवाक्येष्वेकस्यैव कृत्स्नजगत्कारणत्वावग
मात् । त्रयाणां समुच्चित्य कारणत्वानुपपत्तेः ॥ कारणत्वोपास्यत्वबोधकवाक्यगतानां शिवशंभ्वादिसामान्यशब्दानां छागपशुन्यायेन विशे
षवाचिना नारायणशब्दार्थपर्यवसानोपपत्तेः ॥ अचितः सर्वकारणत्वानुपपद्यतेरीक्षणाद्यर्थविरोधाच्च । रुद्रादीनां अपहतपाप्मा वा ।
अहमस्मीत्यादिना कार्यत्वकर्मवश्यत्वादिश्रवणात् वासुदेवादिपदवाच्यस्य कुत्रापि कर्मवश्यत्वाश्रवणात् । तदुक्तं तेश्च । अजायमानो बहु
धा विजायत इत्यस्य बलात्स्वपत्व श्रवणात् ॥ अजायमाने इति कर्मायत्तोत्पत्तिनिषेधाच्च कर्ममूलस्यापोहितत्वाच्चेतरोत्पत्तेस्तथापवादकाभावा
च्चतो यदुत्तरमित्यनेन किमुच्यते तच्चेदुच्यते ॥ त्रिमूर्तिमध्ये रक्षकत्वेनावतीर्णस्य नारायणस्य ॥ अस्येशाना जगतो विष्णुपत्नी इत्यादिना
श्रुतस्याः श्रियः संभूतत्वात्पूर्वोक्तवाक्योक्तं महापुरुषत्वं । वेदाहमेतमित्यनेनैव वाक्येन प्रत्यभिज्ञाप्य तस्य श्रियःपतित्वमहापुरुषत्वादि
श्रवणात्तमेव सर्वोत्तरं महापुरुषं यस्मात्परं नापरमस्ति किंचित् ॥ यस्मान्नाणीयो न ज्यायोस्ति कश्चित् ॥ वृक्ष इव स्तब्धो तिष्ठत्येकस्तेनेदं पूर्णं पु
रुषेण सर्वमिति प्रत्यभिज्ञाप्योपरि च सर्वानन शिरोग्रीवः । सर्वभूतगुहाशयः । सर्वव्यापी च भगवानिति सहस्रशीर्षत्वादिधर्मान् प्रत्यभिज्ञाप्या
नयोर्वाक्ययोर्मध्ये प्रयुक्तस्य ततो यदुत्तरमिति वाक्यस्य संदंशन्यायेन नारायणपरत्वस्यावश्यकत्वात्ततःशब्दस्य शब्दतोर्थतश्च प्रत्यभिज्ञापि
तत हेतुपरामर्शत्वस्यैव न्याय्यत्वादन्यथा यस्मात्पुरुषात्परं व्यतिरिक्तं परमुत्कृष्टं नास्तीति । पूर्ववाक्येनोक्तं पुरुषमेव परामृश्य तद्व्यतिरिक्त
स्योत्तरत्वप्रतिपादने पूर्वापरव्याघातप्रसंगाच्च ॥ ततउक्तहेतुभ्यः । यत्पुरुषशब्दवाच्यं तत्त्वं तदेवोत्तरंतत्त्वमिति । अमृतस्यैष सेतुरित्यनेनापि
विष्णोर्नेतृत्वोत्तरप्रापकत्वमुच्यते ॥ अपि तु स्वप्राप्तौ स्वयमेव हेतुरिति दिक् ॥ २२ ॥ ॥।॥ ॥।॥ ॥।॥ ॥।॥ ॥॥

भा०प्र० ननु प्रकृतिगुणत्वे न समा वेति कथं सत्वं मोक्षहेतुः। कथमितरौ गुणौ तद्धेतू सर्वं मध्यमोक्षहेतुर्नेवास्मादिति शंकायां दृष्टांतेन गुणानां वै
२९ षम्यमुपपादयति। पार्थिवादिति॥ दारुणो निर्पंचमी॥ पार्थिवात्पृथिवीपरिणामरूपाद्दारुणः काष्ठात्तावद्धूमः उत्पद्यते॥ तस्माद्धूमाद
नंतरमित्य[ध्या]क्रियते॥ धूमो ह्यग्नेः पूर्वमुत्पद्यते॥ तस्माद्धूमादनंतरमग्निरुत्पद्यते। सच त्रयीमयः॥ यथा पार्थिवदारूत्पन्नत्वाविशेषेपि धूमो
न प्रकाशकः॥ नवस्वर्गसिद्धौ पयिकः। अग्निस्तु प्रकाशकः॥ त्रयीप्रतिपाद्यत्रेतारूपेण स्वर्गप्रदश्चेति॥ तयोर्दृष्टादृष्टकार्यवैषम्यसिद्धिः। एवं सुपु

पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः॥ तमसस्तु रजस्तस्मात्सत्वं यद्ब्रह्मदर्शनं॥२४॥
भेजिरे मुनयोथाग्रे भगवंतमधोक्षजं॥ सत्वं विशुद्धं क्षेमाय कल्पंते येनु तानिह॥२५॥

षस्य पुरुषस्य तमोगुणानंतरं रजः। तदनंतरं मनसो नाविलत्वहेतुर्यत्सत्वं तदेव ब्रह्मदर्शनमिति कार्यवैचित्र्योपपत्तिरित्यर्थः॥२४॥ यतः सत्वस्यैव ब्र
ह्मदर्शनत्वं यतश्च सत्वप्रवर्तकाद्धरेरेव नृणां श्रेयांसि तत एव सत्वतनुं विष्णुमेव मुनयो भजन्तिस्माह॥ भेजिर इति॥ अथ तस्मात् अग्रे पूर्वकाले मुन
यः विशुद्धं रजस्तमोभ्यामननुविद्धं सत्वं सत्वशारीरकं तत्प्रवर्तकं भगवंतमधोक्षजं भेजिरे उपासांचक्रिरे॥ एवमिहत्वान्मुनीननुसरंति ये जना उ
पासत इत्यर्थः॥ ते क्षेमाय कल्पंते श्रेयो युक्ता भवंतीत्यर्थः॥ रजस्तमः प्रधानो ब्रह्मरुद्रौ भजंतस्तु न कल्पंतेऽपि हे तव तत्फलभाजो भवंतीति २९

अथ केचिद्रुद्राद्युपासकाः। अपि दृश्यंते सर्वेपि विष्णुमेव किं न भजंत इति शंकायामुपासकानां स्वस्वगुणानुसारेणोपास्यदेवताविषयको
पासनारुचिर्जायतेऽस्मादाह॥ मुमुक्षव इति द्वाभ्यां। मुमुक्षवः। सत्वगुणप्रधानाः। अनसूयवः। घोररूपान् भूतपतीन् रुद्रादीन् तमःप्रधानान्
हित्वा शांताः॥ शुद्धसत्वप्रवर्तका नारायणस्य कलाः अवतारा भजंति। अनसूयव इत्यनेन विष्णुभक्तानां देवतांतरेषु तदुपासकेषु वाऽसूया
हितत्वं देवतांतरभक्तानां तु विष्णौ तत्परेषु वाऽसूयावत्त्वं चास्तीति सूचितं। २६॥ रजस्तमःस्वभावास्तु जनाः समशीलान् रजस्तमःस्वभावान् पितृ

मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ॥ नारायणकलाः शांता भजंति ह्यनसूयवः॥२६॥
रजस्तमःप्रकृतयः समशीला भजंति वै॥ पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः॥२७॥

भूतेशान् रुद्रादीन् प्रजेशादीन् हिरण्यगर्भादीन्। आदिशब्देन संकीर्णदेवताः सरस्वतीप्रभृतीश्च॥ प्रेतान् भूतपतींश्चान्ये यजंते तामसाज
नास्तत्तुल्यान् भजंति। कथंभूताः श्रीः संपच्चैश्वर्यमाधिपत्यं च प्रजाः पुत्रादयश्च ताः ईप्संत्याप्तुमिच्छंतीति तथाभूताः। अनेन विष्णुभक्तानाम
नन्यप्रयोजनत्वमनंतस्थिरफलप्राप्तिरन्येषां त्वं नवत्तत्फलप्राप्तिश्चेति सूचितं।२७॥

भा० प्र०
३०

अथ सर्वे वेदा यत्पदमामनंति तपांसि सर्वाणि च यद्वदंति । अपूर्वं तं वृद्धधामजातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः । तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चंद्र-
माः । वेदैश्च सर्वैरहमेव वेद्यः । यो यो यां यां तनुं भक्तः सुकृतीत्यादि भागद्वयात्मकवेदवेद्यश्चतुर्मुखरुद्रादिशरीरकस्तदंतर्यामितया तदवच्छिन्नेष्वग्न्यादिफ-
लस्य वासुदेव एवेत्यभिप्रायेणाह । वासुदेवपरा इति द्वाभ्यां । वेदाः पूर्वोत्तरभागद्वयात्मका वेदाः । वासुदेवपराः वासुदेवः परस्तात्पर्यभूमिर्येषां तथा-
भूताः । नन्वग्न्यादिदेवतोद्देशपूर्वकयागदानहोमादिकर्मप्रतिपादपूर्वभागस्य कथं वासुदेवपरत्वमित्यत आह । वासुदेवपरा मखा इति । मखा अग्न्या-
दिदेवतापूजात्मका यागाः ते वासुदेवपराः वासुदेवः परः प्रधानतया आराध्यो येषां तथाभूताः । अग्न्यादिशरीरकतया तद्रूपो वासुदेव एव मखैराराध्य
इत्यर्थः ॥ केवलमग्न्यादिदेवतापूजामात्रत्वाभिमानेन ये मखानतुतिष्ठंति तेषामपि तत्सन्निहितं । तैरविज्ञातोऽपि वासुदेवोऽग्न्याद्यंतर्यामितयाराधि-

वासुदेवपरा वेदा वासुदेवपरा मखाः ॥ वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥ २८ ॥

तः श्रेयो यच्छतीति भावः ॥ एवमाराधितोऽनंतवत्फलं प्रयच्छतीति भावः ॥ तथा चोक्तं । अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ॥ न तु मामभिजानंति तत्त्वेना-
तश्च्यवंति ते इति ॥ एवं तुल्यन्यायतया वेदांतेषु क्वचित्क्वचित्कालाग्निरुद्रोपनिषत्तदर्दनविद्यादिषु रुद्रेंद्राद्युपासनात्मका योगा अपि रुद्रादि-
शरीरकवासुदेवविषया इत्याह ॥ वासुदेवपरा योगा इति ॥ वासुदेवः परो विषयो येषां त इत्यर्थः । आपाततो वेदांतेषु विहिता योगा वासुदेवविषया-
एव स्मर्यंते । क्वचिदापाततो रुद्रादिविषयत्वेन प्रतीयमाना अपि तत्तत्कारणगतैर्लिंगै रुद्रादिषु संभाव्यमानैस्तच्छरीरकवासुदेवविषयत्वेने-
व निश्चीयंते । एवं निखिलनिगमवेद्यो वासुदेव एवेत्युक्तं ॥ अथ तत्पूर्वभागोपबृंहणात्मकतन्मूलकस्मृत्यादिप्रतिपाद्याः । स्मार्तक्रियाराध्यश्चे-
स एवेत्याह ॥ वासुदेवपराः क्रिया इति ॥ क्रियाः स्मार्त्यः । श्रौतानां तु मखा इत्युक्तत्वात्पूर्ववदर्थः ॥ २९ ॥ ३०

अथ वेदांतार्थोपबृंहणार्थं तथा प्रहलकपिलाद्यागमोक्तप्रकृतिपुरुषविषयकज्ञानमपि प्रकृतिपुरुषशरीरकपरमात्मविषयकमेवेत्याह । वासुदे
वपरं ज्ञानमिति । ज्ञाने प्रकृतिपुरुषविषयकं वासुदेवविषयकं विशेषणबुद्धिशेष्ययोर्विशेष्यपर्यंतत्वादित्यर्थः । कपिलादिभिस्तु तथा वक्तुमि
तिभावः । तथा वेदांतार्थोपबृंहणपरं मन्वादिस्मृत्युक्तं कृच्छ्रचांद्रायणानशनादितपश्च वासुदेवाराधनरूपमित्याह । वासुदेवपरं तप इति । किंव
हुना । सर्वे वैदिकाः स्मार्ताश्च धर्मास्तत्फलानि गतयश्च वासुदेवाधीना इत्याह ॥ वासुदेवपरो धर्मो वासुदेवपरा गतिरिति ॥ २९ ॥ कथं वेदादीनां वासुदेव
परत्वमित्याशंक्याह तदात्मानं स्वयमकुरुत सुकृरीत्या सूक्ष्मचिदचिद्विशिष्टं स्वात्मानं जगद्रूपेण परिणमय्य तत्तद्रूपेण वासुदेवस्यैवावस्था
नाद्वासुदेवात्मकत्वस्वभावादित्याह ॥ स इति द्वाभ्यां । अग्रे सृष्टेः प्राक् स एव वासुदेव एव नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकतयावस्थि

वासुदेवपरं ज्ञानं वासुदेवपरं तपः ॥ वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥ २९ ॥ स एवेदं ससर्जाग्रे भगवानात्ममायया ।
सदसद्रूपया चासौ गुणमय्यागुणो विभुः ॥ ३० ॥

तदित्यर्थः । एवकारेण तच्छेषपरामर्शभागवद्वाचकवासुदेवशब्दावयवार्थेन चेदं लब्धं यथा
दं परिदृश्यमानं जगदग्रे सृष्टेः प्राक् स एवासीदित्यध्याहारः । सदेव सोम्येदमग्र आसीदिति श्रुत्यालक्षमाणात् । एवं चेदं इत्यनेन नामरूपविभा
गमिलं जगन्निर्दिश्य तस्य वासुदेवरूपेणावस्थानोक्त्या विपदादिवत्त्वं तरव्यावर्तकैवकारप्रयोगे न च प्रकृतिपुरुषयोरेव विधानादीउभावपि
तिस्मृत्यनुरोधाद्वान्यथा न कर्मविभागादिति चेन्न विभागादित्वादित्युक्तन्यायेनाकृताभ्यागमकृतविप्रणाशादिदोषप्रसंगाच्च सूक्ष्मचिदचि
द्विशिष्टं लब्धं । सृष्टेः प्रागेवमवस्थितो भगवानात्मनः स्वस्य मायया स्वशरीरभूतया गुणमय्या सत्त्वादिगुणप्रचुरतया सदसद्रूपया महदादि
पृथिव्यंतकार्यकारणरूपेण परिणममानया विभुर्व्यापकः सदसद्वेत्यपंतरात्मतयानुप्रविष्ट इत्यर्थः । अथाप्यगुणः व्याप्यतद्गुणैरसं

॥ ३९ ॥

भा० प्र०
३१ एवं समष्टिव्यष्ट्यवस्थाद्विदंतर्यामितया तत्कारणतया च तद्रूपेणावस्थानमुक्तं । अथोभयावस्थप्रकृतिसंसृष्टजीवशरीरकतया तदंतरात्मत
यातद्रूपेण वासुदेवस्यैकावस्थितिमाह् ॥ तयेति । तया त्ममायया यापि विलसिते सुरचितेषु गुणेषु दरिदृश्यमानेषु गुणशशैला ह्यणिकः । गुणैः कार्य
भूतशशादिस्तंबपर्यंतेष्विति त्यर्थः ॥ विज्ञानेन जीवो वा विज्ञानं यज्ञं तनुते यज्ञात्मनि तिष्ठन्यो विज्ञाने तिष्ठतिश्रुतिप्रयोगात् ॥ तेन विजृंभितः विशिष्टः
तच्छरीरक इत्यर्थः ॥ यस्य विज्ञानं शरीरं इतिश्रुतेः ॥ यद्वा विज्ञानरूपेण विजृंभितः ॥ भासमानः ॥ तच्छरीरतया तदंतरात्मतया च तद्रूपेण प्रका

तया विलसितेष्वेषु गुणेषु गुणवानिव । अंतः प्रविष्ट आभाति विज्ञानेन विजृंभितः ॥ ३१ ॥

शमान इत्यर्थः । अंतः प्रविष्टः जीवद्वारा देवादिशरीरेष्वनुप्रविष्टः जीवद्वारा देव गुणवानिव साक्षाद्देवादिशरीरतच्छरीरकजीवगतधर्मवा
निवाभाति । इव शब्दस्यायमभिप्रायः । काशिन्यवानयो विभाति नृसिंहरूपी भगवांश्चेत इत्यत्र काशिन्यश्चेत्यादिवच्छरीरभूतजीवेहेयसंबंधः ३१
न तु शरीरिणि वासुदेवे इति ॥ तथा तस्यैकस्यैव देवादिशरीरभेदेनानेकधावस्थितिश्चेति ॥ ३१ ॥ ॥ ॥ ॥ ॥

एतदेव दृष्टांतमुखेनोपपादयति ॥ यथेति ॥ अभिव्यक्तिस्थानमात्रं योनिशब्देनोक्तं न तूपादानं न हि प्रकृतिर्जीवस्योपादानं न वा वह्नेर्दार्वु
पादानं किंतु निमित्तं ॥ अथ मेरापः अग्नः पृथ्वीति हि सृष्टिक्रमः । यथा दारुभ्यो वह्निरवहितः व्यतिरिक्त एवाभिव्यक्त एव वा सन् स्वयोनिषु
स्वाभिव्यक्तिस्थलेषु दारुषु नानेवानेकधेव भाति ज्वलति । अग्नित्वस्यैकरूपत्वेपि तार्णपार्णदारवादिभेदवान् भाति एवं प्रकृतिपरिणा
मरूपदेहेष्वभिव्यक्तो जीवो ज्ञानानंदरूपत्वेनैकरूपो देवोहं मनुष्योहमिति देवादिभेदभिन्नो भातीत्यर्थः । पुमथ्राशो जीववाची । तच्छरीरपर
मात्मपर्यंतः पुमान् विश्वात्मा जीवशरीरकः सर्वेश्वर एव अत्र देवादिरूपेण नानाभातीत्यर्थः । दारुषु भूतेष्विति दृष्टांतदार्ष्टांतिकयोरधि

यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु । नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ॥ ३२ ॥

शेषवद्रूत्वोक्त्या यथा कृस्वत्वस्थूलत्ववक्रत्वादिभेदश्च दारुगत एव नाग्निगतः ॥ तथा देवहात्ज्ञत्व दुःखित्वादिभेदोपि न विश्वात्मगतः । किंतु दे
वादिशरीरदारुभेदस्य जनित तच्छरीरक जीवगत इति सूचितं ॥ वह्निर्विश्वात्मेत्येकत्वनिर्देशेनाग्निवद्विश्वात्मनोपि सर्वत्रावस्थितस्य स्वरूपतः
स्वभावतो नावस्थांतरापत्तिरिति सूचितं ॥ द्यांस्तु विशेषः ॥ दारुषु अग्निः साक्षादभिव्यक्तो नाना भाति । दार्ष्टांतिके जीवद्वारा देवादिरूपेण नाना
भातीति जीवविशिष्टदेवादिशरीराणामेवाधिष्ठेयत्वा त ॥ ३२ ॥

भा०टी० ३२

यथा विश्वात्मनः स्वशरीरभूतप्रकृतिपुरुषद्वारा देवादिरूपेण नानाभानं॥ एवं सुखदुःखादिभोक्तृत्वं तन्निमित्तं कर्तृत्वं च स्वशरीरभूतजी
वद्वारैव स्वतस्तु तदुभयरहित इत्याह॥ असाविति॥ असौ विश्वात्मा गुणमयैः सत्वादिगुणपरिणामरूपत्वेन तन्मयैर्भूतसूक्ष्मादिरूपैर्भावैः
पदार्थैस्तत्र भूतानि पृथिव्यादीनि सूक्ष्माणि गंधादीनीन्द्रियाणि श्रोत्रादीनि। ज्ञानेन्द्रियाणि वागादीनि कर्मेन्द्रियाणि पादादीनि आत्मांतः
करणं जीवो वा एभिः स्वेनैव कर्त्रा निर्मितेषु भूतेषु देवादिषु निर्विष्टः॥ जीवद्वारानुप्रविष्टः॥ तद्गुणान् पृथिव्यादिभूतगुणान् गंधादीन् विष
यान् भुंक्ते जीवद्वारा विषयान् भुंक्ते न तु स्वत इत्यर्थः॥ भोक्तृत्वसमव्याप्तं कर्तृत्वमप्यत्र विवक्षितं॥ जीवद्वारा गुणमयगुणरूपाणि कर्माणि
च करोतीत्यर्थः॥ अत्र विश्वात्मेत्युच्यमानं भोक्तृत्वं कर्तृत्वं च प्रयोजककर्तृत्वं विवक्षितं॥ ३२॥ यद्वा॥ सत्वं रजस्तम इति प्रकृतेर्गुणाः स्तैरित्या।

असौ गुणमयैर्भावैर्भूतसूक्ष्मेंद्रियात्मभिः॥ स्वनिर्मितेषु निर्विष्टो भुंक्ते भूतेषु तद्गुणान्॥ ३२॥

दिना सर्वकारणात्परमपुरुषाद्देवोपास्यमानान्नृणां श्रेयांसि कारणत्वेनोपास्यत्वमोक्षत्वादीनां कारणं तु ध्येयः। अमूर्तैस्येषु तेतु रित्या।
दिप्रमाणैरेकं निरस्तत्वावगमात्॥ ननु प्रत्यक्षरुद्रादिभ्यः तेषां कर्मवश्यत्वसुखदुःखादिभोक्तृत्वादिनोपासकतुल्यत्वादि सूचितं। अथ तदुप
पादनाय सर्वजीवानां परमपुरुषसृष्टकर्मानुगुणकरणकलेवरादिसंबंधं तत्प्रयुक्तं कर्तृत्वं भोक्तृत्वमेषां कर्मवश्यत्वमप्रयुक्तत्वेनोपाधिकत्वं
स्वभावतस्तु ज्ञानैकाकारत्वं चेत्याह॥ सएवेत्यादिचतुर्भिः यथोक्तएवार्थः॥ तयेति॥ तया आत्ममायया विलसितेषु रचितेषु गुणेषु गु
णकार्येषु ब्रह्मादिशरीरेष्वंतः प्रविष्टो जीव इति शेषः॥ पुमानिव तस्योत्कर्षापकर्षो वा विज्ञानेन स्वधर्मभूतज्ञानेन विजृंभितः देह ३२

मात्मत्वेनाभिमन्यमान इत्यर्थः ॥ गुणवानिव देवत्वादिधर्मवानिवाभाति । देवोहं मनुष्योहं स्थूलोहमित्यभिमन्यत इत्यर्थः । इवशब्देन वस्तु
तो देहविलक्षणस्तज्जन्यधर्मैरस्पृष्ट एवेति सूच्यते ॥ ३१ ॥ तदेव दृष्टांतेनोपपादयति यथेति ॥ यथैक एव वह्निः स्वयोनिषु स्वाभिव्यक्ति
स्थानेषु तृणपर्णादिषु अभिव्यक्तो नानेव भाति तार्णत्वपार्णत्वादिभेदेन भवति । इवशब्देन वस्तुतो वह्नित्वेन रूपेणैक एव । एवं विश्वात्मा
विश्वात्मा विश्वस्य चेतनाचेतनजातस्यात्मा पुमान् जीवोपि भूतेषु देवादिशरीरेषु नानेव भाति देवोहं मनुष्योहमित्यादिरूपेण नाना भाति व
स्तुतो ज्ञानैकाकारेणैकरूप एवेत्यर्थः । पुमानिति जात्यभिप्रायक एकत्वनिर्देशः । एकात्मा हि सुसंपन्नः सुषुप्तं कुरुते प्रज्ञो इत्यत्रत्वग्नी ।
हिशरीरवत् । एवं च जीवैकत्वभ्रमो न कार्य्यः । दृष्टांतेपि वह्नित्वेनैकत्वेपि तद्व्यक्तीनां भेदोभिप्रेतः ॥ न चैवमेकैकस्य देवादिशरीरस्थस्य युगपा
न्नानाप्रतिभानाभाव इति वाच्यं ॥ एकैक एव जीवः क्रमेण देवमनुष्यादिशरीरेषु पारदृश्यमानः । देवोहं मनुष्योहमित्याभातीत्येवम
भिप्रायात् ॥ न हि दृष्टांतेपि तार्णस्य वह्नेः पार्णत्वेन भानमस्ति ॥ ३२ ॥ असौ जीवः । गुणमयैः सत्वादिगुणत्रयात्मकभगवन्मायापरि
णामरूपैः पृथिव्यादिभूतगंधादितन्मात्रज्ञानेन्द्रियकर्मेन्द्रियांतःकरणैर्भावैः पदार्थैः । स्वनिर्मितेषु स्वकर्मानुसारेण निर्मितेषु भू
तेषु देवादिशरीरेषु निविष्टः गुणान् शब्दादिविषयान् भुंक्ते । तन्निमित्तानि कर्माणि च पुण्यापुण्यरूपाणि करोतीति च विवक्षितं वेदि
तव्यम् । यद्वा तयाविलसितेष्वित्यादिभिः केवलं परमात्मैव प्रतिपाद्यते तदा विज्ञातेत्यस्य संकल्परूपज्ञानेनेत्यर्थः ॥ पुमान्परम
पुरुषः । गुणान् भुंक्ते इत्यस्य लीलारसरूपान् गुणान् भुंक्ते इत्यर्थः ॥ ३३ ॥ ॥ ॥ ॥

तदेवंपुंसामेकांततःश्रेयस्तन्नोशंसितुमर्हसीत्यस्योत्तरमुक्तं।अथयत्सूतजानासिभद्रंते इत्यादिनाश्रीकृष्णावतारंतच्चरित्रंतदितरा
वतारतच्चरित्रादिकंचपृष्टं।तत्रश्रीकृष्णावतारंतच्चरित्रादिकंविशिष्यदशमैकादशस्कंधाभ्यांसर्वावतारांस्तच्चरित्राणिचविशि
ष्यतत्रतत्रतृतीयादिषुविवक्षुस्तावत्समासतःसर्वावतारसाधारणंप्रयोजनमाह॥भावयतीति।एषसर्वेश्वरोलोकस्रष्टृत्वेनलोका

भावयत्येषसत्त्वेनलोकान्वैलोकभावनः॥लीलावतारानुरतोदेवतिर्यङ्नरादि
षु॥३४॥इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेतृतीयोध्यायः॥३॥ ॥ ॥

न्भावयन्कर्मवश्यान्श्चेतनानुज्जीवयितुंसत्त्वेनोपलक्षितःशुद्धसत्त्वमूर्तिःतिर्यङ्नरसुरादिषुलीलावतारेष्वनुरतोभवतिभावय
तीतिपाठे।लोकभावनोलोकस्रष्टा।एषसर्वेश्वरःतिर्यगादिषुमत्स्यादिषुयेलीलायाअवतारास्तेष्वनुरतःलीलावतारेभक्तेष्वनुरतो
वासत्त्वेनलोकान्भावयतित्रायतिसाधुपरित्राणायमत्स्याद्यवतारंधत्तइत्यर्थः॥३४॥इतिप्रथमेद्वितीयः॥२॥ ॥ ॥ ३३

तदेवं प्रथमेऽध्याये प्रश्नाः कृताः । द्वितीये तु सर्वप्रवर्तकभगवद्भक्तेरेव मोक्षप्रदत्वाद्भगवदीयप्रबंध एव श्रोतव्य इति स्थापितमवतारप्रयोजनं च
चोपक्षिप्तं ॥ अथ भगवदवतारविशेषतच्चरितानि विस्तरेणोपरि विवक्षन्सूतो भगवतोऽनेकेऽवताराः संतीति प्रतिपादयते तृतीयाध्या
ये जगृहे इत्यादिना ॥ तत्रावताराश्च द्विविधाः ॥ अनुप्रवेशावताराः स्वेन रूपेणावताराश्चेति ॥ अत्र कर्महेतुत्वाविशेषादुभयत्रावतारशब्दप्रयोगः
कृतः । द्विविधानपि तान्वक्तुं तदुपयोगित्वेन प्रथमं चेतनमिश्रं प्रकृतिप्राकृतजातमेकं शुद्धसत्त्वमयं परं चेति रूपद्वयं भगवतोऽस्तीति

सूत उवाच ॥ जगृहे पौरुषं रूपं भगवान्महदादिभिः ॥ संभूतं षोडशकलमादौ लोकसिसृक्षया ॥ १

विवक्षन्पूर्वं प्रकृतप्राकृतात्मरूपपरिग्रहः जगृहे इति ॥ पुरुषस्ते ब्रह्मात्मसंबंधि पौरुषं तन्मिश्रमित्यर्थः ॥ एकादशेंद्रियपंचभूता
त्मकाः । षोडश कला यस्मिंस्तत्तथा महदादिभिः संभूतं रूपमंडकारणं समष्टितत्त्वजातमिह रूपशब्देन विवक्षितं । समुदायस्य मह
दादिभिः संपाद्यत्वान्महदादिभिः संभूतमित्युक्तं । लोकसिसृक्षया जगृहे ब्रह्मांडांतर्वर्तिकार्यजातसिसृक्षया रूपं जगृहे इत्यर्थः ॥१॥

न्वेषत्वात्सर्वथाऽप्यलं रूपमाह । यस्येति । प्रथमस्य यस्येति शब्दस्य योऽर्थः । स तदा इति तच्छब्देन परामृश्यते ॥ द्वितीयं तु यस्येति पदं चतुर्मुखपरं । चतुर्मुख
शरीरादि देवमनुष्यादि सृष्टिः पुराणांतरेषु दृष्टा ॥ यस्यावयवसंस्थानैर्यच्छरीरावयवपरिणामैर्देवमनुष्यादिलोकविस्तरः । स ब्रह्मा विश्वस
र्जां मरीच्यादीनां पतिः । यस्यांभसि शयानस्य योगनिद्रां वितन्वतः ॥ अनिरुद्धस्य नाभीह्रदांबुजादासीत्तद्भगवतो रूपमूर्जितं विशुद्धसत्वमय
मिति श्लोकद्वयस्यैकं वाक्यं ॥ एतस्य रूपस्य ज्ञानहेतुत्वमपरिच्छेद्यत्वं सर्वावतारनिदानत्वं चाह । पश्यंतीति सार्द्धे । यद्वा जगद्व्यापि श्लो
कानामेवमर्थः ॥ अजड एव तु प्रवेशरूपेण स्वेन रूपेण च द्विविधेऽवतारे तत्र प्रथमस्य देवादिष्वनुप्रवेशरूपतात्तत्र चक्र व्यांशभावात्स्वेन रू

यस्यांभसि शयानस्य योगनिद्रां वितन्वतः ॥ नाभीह्रदांबुजादासीद्ब्रह्मा विश्वसृजां पतिः ॥ २ ॥ यस्यावयवसंस्था
नैः कल्पितो लोकविस्तरः ॥ तद्वै भगवतो रूपं विशुद्धं सत्वमूर्जितम् ॥ ३ ॥ पश्यंत्यदो रूपमदभ्रचक्षुषा सहस्रपादो
रुभुजाननाद्भुतम् ॥ सहस्रमूर्द्धश्रवणाक्षिनासिकं सहस्रमौल्यंबरकुंडलोल्लसत् ॥ ४ ॥

पेणावतरो पर्यायोऽपि दिव्यमंगलविग्रहयोग उच्यते । यस्यानिरुद्धस्याऽवयवसंस्थानैः शरीरभूतप्रकृत्येकदेशपरिणामैर्लोकविस्तरः क
ल्पितस्तस्य भगवतो रूपं शुद्धसत्वमयमूर्जितमुत्कृष्टमित्यर्थः ॥ ३ ॥ पश्यंतीति ॥ अरदेतदनिरुद्धाख्यं रूपमदभ्रचक्षुषाऽनल्पज्ञानेन
मनसा पश्यंति । मनसा तु विशुद्धेन दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरित्याद्युक्तरीत्या योगपरिशुद्धमनसा पश्यंतीत्यर्थः । प्र
त्येकं सहस्रसंख्याकैः पादादिभिरद्भुतं तथा प्रत्येकं सहस्रं मूर्द्धादयो यस्मिंस्तत् । तत्र श्रवणं श्रोत्रं । सहस्रेण मौलिभिः किरीटैरंबरैर्वस्त्रैश्च

एतत् निरुपाख्यं रूपं नानाविधानामवताराणां निदानं मूलकारणं बीजं कृत्स्नजगद्बीजभूतं कृत्स्नजगत्स्रष्टृचतुर्मुखोत्पत्तिस्थानत्वादिति भा
वः। अव्ययमपक्षयविकाररहितमनेनाप्राकृतत्वमुक्तं। यस्येति। यस्य भगवतो निरुद्धस्यांशांशे [illegible] न शरीरभूतचिदचित्तत्वैकदेशेन देवाद
यः सृज्यंते ॥५॥ स देवः परमपुरुषः ब्रह्मा चतुर्मुखशरीरकः सन् प्रथमं कौमारं सर्गं सनत्कुमारादिसर्गमास्थितः। सनकादिरूपेणावतीर्ण इ
त्यर्थः॥ अखंडितं निर्विघ्नं ब्रह्मचर्यं मूर्द्धरेतस्कत्वोपेतं भगवदुपासनं चकार ते च कुमाराः प्रथमावताररूपाः। प्रथममिति विशेषणाद्विती।
यमित्यनंतरोक्तेष्वेऽमे च कुमारा अनुप्रवेशावताररूपा तथा चतुर्मुखोपि ब्रह्मरूपधरः ब्रह्मा नारायणात्मकः इत्यादिभिस्तत्स्थादिकालेत

एतन्नानावताराणां निधानं बीजमव्ययं। यस्यांशांशेन सृज्यंते देवतिर्यङ्नरादयः ॥५॥ स एव प्रथमं देवः कौमारं स
र्गमास्थितः॥ चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितं ॥६॥

हात्मकतया योगिभिश्चिंत्यत्ववचनात्। भगवतांशेनकेन च आब्रह्म
स्तंबपर्यंता जगदंतर्व्वर्तिव स्थिताः। प्राणिनः कर्मजनिताः संसारपरिवर्तिनः। यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः। अविद्यांतर्गताः
सर्वे ते हि संसारगोचराः। पश्चादुद्भूतबोधास्ते ध्याने नैवोपकारकाः। नैसर्गिको न वै बोधस्तेषामप्यन्यतो यतः इति चतुर्मुखसनकादीनां ज
गदंतर्वर्तिनामविद्यावेष्टितत्वेन शुभाश्रयत्वानर्हतामुक्त्वा वक्ष्यमाणानामेव सतां पश्चाद्योगेनोद्भूतबोधानां स्वस्वरूपापन्नानां सत्त्वतः शुद्धिविर
हेण मुमुक्षूपास्यत्वनिषेधात्। सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते इति श्रीजन्मरहस्यवचनेनाकार्थ्याचेतदेवं सनकादयः भगवद
नुप्रवेशावताराः प्रथममश्वेत्युक्तं भवति। ब्रह्मचर्यं चचारेत्यवतारप्रयोजनमुक्तमेवमुत्तरत्रापि द्रष्टव्यं॥६॥ ॥ ॥ ॥ ॥

भा० प्र०
३५

अथ वराहावतारमाह । द्वितीयमिति । अस्य जगतः भवायाभ्युदयाय रसातलगतां महीं पृथ्वीमुद्धरिष्यन् यज्ञेशो भगवान् द्वितीयं सौकरं वारा
हं वपुराधत्त जगृहे वराहो द्वितीयावतार इत्यर्थः ॥ अयं च स्वेन रूपेणावतारः यज्ञेश इत्यनेन यज्ञाराध्यत्वं तत्फलदत्वं तच्छरीरकत्वं चोक्तेः वपुरु
पादत्तेति वपुर्मात्रपरिग्रहोक्तेः अस्य भवायेति केवलसाधुपरित्राणार्थत्वसूचनाच्च ॥७॥ नारदावतारमाह । तृतीयमिति ॥ तृतीयं वपुरुपाद
त्तमृषिसर्गः ऋषिरूपजन्मेत्यर्थः ॥ तत्र तृतीयेवतारे स भगवान् देवर्षित्वं नारदरूपत्वमापद्य नारदाख्यं जीवनमनुप्रविश्येत्यर्थः । सात्वतं तंत्रं

द्वितीयं तु भवायास्य रसातलगतां महीम् ॥ उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ॥७॥ तृतीयमृषिसर्गं वै देवर्षित्व
मुपेत्य सः ॥ तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ॥८॥ तुर्ये धर्मकलासर्गे नरनारायणावृषी ॥ भूत्वात्मोपशमोपेत
मकरोद्दुश्चरं तपः ॥९॥ पंचमः कपिलो नाम सिद्धेशः कालविप्लुतं ॥ प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम् ॥१०॥

पंचरात्रशास्त्रमाचष्ट प्रोवाच प्रवर्तयामासेत्यर्थः ॥ तंत्रं विशिनष्टि । यतस्तंत्रात् कर्मणां निवृत्तधर्मवतां नैष्कर्म्यं प्रवृत्तिधर्मविरहं प्रवृत्तिधर्मा
णामकर्तव्यतावगम्यत इति ॥८॥ तुर्य इति । धर्मकलासर्गे धर्मात्पितुः कलासर्गे देहजन्मरूपे तत्सर्गे चतुर्थावतारे नरनारायणाख्यावृषी ।
भूत्वात्मोपशमः ॥ इंद्रियनिग्रहः । तेनोपेतं दुश्चरं इतरैश्चरितुमशक्यं तपश्चकार ॥९॥ पंचम इति । पंचमोवतारः कपिलो नाम कपिलाख्यः
सिद्धानामात्मयाथात्म्यानुसंधानयोगे नसिद्धानां स्वस्वरूपाप्तानामीशः कालेन प्रवर्तयितृरहितेन कालेन विप्लुतं तिरोहितं सांख्यम्
कथंभूतं तत्त्वानां प्रकृतिमहदादीनां ग्रामः कलापस्तस्य विनिर्णयो याथात्म्यनिर्णयो यस्मात्तथाभूतं आसुरये प्रोवाच । आसुरिर्नाम सिद्धेषु

प्रधानतत्त्वसं ॥१०॥

३५

षष्ठमिति॥ अत्रेः प्रजापतेरपत्यत्वं प्रतिवृतः। मम पुत्रो भवेत्यत्रिणा वृत इत्यर्थः॥ अनसूययाऽत्रेर्भार्यया प्राप्तः तस्याः पुत्रो दत्तात्रेयाख्यो
भूत्वेत्यर्थः॥ अलर्काय प्रह्लादादिभ्यश्चान्वीक्षिकीमध्यात्मविद्यामूचिवान् तं षष्ठमवतारं विद्यादिति यत्तच्छब्दाध्याहारेणान्वयः॥ षष्ठं षष्ठ
रूपं वित्तिवा॥११॥ ततेति॥ ततः सप्तमेवतारे रुचेस्तज्जायायामाकूत्यामजायत स च यज्ञ इति प्रसिद्धः॥ स यज्ञः यामश्चाद्यो येषां तैः सुरगणैः
सह स्वायंभुवमन्वंतरमपात्पालयामास॥१२॥ अष्टमेवतारे उरुक्रमो भगवान्नाभेः स्वायंभुवपौत्रस्य भार्यायां मेरुदेव्यां जातः। स च ऋ-

षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोनसूयया॥ आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान्॥११॥ ततः सप्तम आकूत्यां
रुचेर्यज्ञोभ्यजायत॥ स यामाद्यैः सुरगणैरपात्स्वायंभुवांतरं॥ अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः। दर्शयन्वर्त्म
धीराणां सर्वाश्रमनमस्कृतं॥१३॥ ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः। दुग्धेमामोषधीर्विप्रास्तेनायं स उश
त्तमः॥१४॥

षभाख्यः। धीराणां योगीश्वराणां वर्त्मानुष्ठेयं धर्ममार्गं दर्शयन् प्रदर्शयितुं जात इत्यर्थः॥ वर्त्म विशिनष्टि॥ सर्वैराश्रमैराश्रमस्थैर्नमस्कृतं
पूजितं स्वाश्रमधर्मवर्त्मभ्यः उत्कृष्टमिति भावः॥१३॥ ऋषिभिरिति हुंकारैर्वेनं हतवद्भिः॥ ऋषिभिर्याचितः। जगत्पालनार्थं याचितो भग-
वान्नवमं पार्थिवं पृथोः संबंधि वपुर्भेजे प्राप्तः॥ अत्रेनानुप्रविष्टं पृथ्व्यास्वजीवानुप्रवेशेन पृथुरूपेणावतीर्ण इत्यर्थः॥ हे विप्राः शौन-
कादयः। स इमां पृथ्वीं गोरूपं धृतवतीं ओषधीर्दुग्धवदुदोह॥ अत्र उभावप्यार्षः यतो दुग्ध तेन कारणेन स पृथुरुशत्तमः सर्वेषामिष्टमो वभूवेत्य-

[illegible]

भा० प्र०
२६

रूपमिति। चाक्षुषांतरं चाक्षुषमन्वंतरं तत्रयः संप्लवः। तस्मिन्स भगवान् मात्स्यं दशमं रूपं जगृहे। अवतारप्रयोजनमाह नाव्येति। वै
वस्वतं मनुं वैवस्वतेमनुरूपेण जनिष्यमाणं सत्यव्रतं महीमय्यां पृथ्वीरूपायां नाव्यारोप्यापात् ररक्ष। १५। सुरेति। एकादशे अवतारे विभुर्भ
गवान् सुरासुराणामुदधिं मथ्नतामर्थे मथ्नतां सतां कमठरूपेण पृष्ठे मंदराख्यमचलं दध्रे धृतवान्। १६। द्वादशमं वपुस्तु धान्वंतरं धन्वंतराख्य
मी वा तु प्रवेशरूपमित्यर्थः॥ त्रयोदशमं रूपं तु यन्मोहिन्याख्ययोऽन्यानसुरान्मोहयन्सुरानमृतमपाययत्॥ तदेव मोहिनीरूपं त्रयो

रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे॥ नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुं॥ १५॥ सुरासुराणामुदधिं मथ्नतां
मंदराचलं॥ दध्रे कमठरूपेण पृष्ठ एकादशे विभुः॥ १६॥ धान्वंतरं द्वादशमं त्रयोदशममेव च। अपाययत्सुरान
न्यान्मोहिन्या मोहयन् स्त्रिया। १७। चतुर्दशं नारसिंहं बिभ्रद्दैत्येंद्रमूर्जितं॥ ददार करजैर्वक्षस्येरकां कटकृद्यथा
॥ १८॥ पंचदशं वामनकं कृत्वागादध्वरं बलेः॥ पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपम्॥ १९॥ ॥ ॥

दशमित्यर्थः॥ १७। नारसिंहं चतुर्दशं रूपं बिभ्रदूर्जितं बलिष्ठं दैत्येंद्रं हिरण्यकशिपुं वक्षसि करजैर्नखैर्ददार यथा कटकृत् तृणकारस्तृणकं एरकां
त्यर्थः। तृणविशेषानविदारयति तद्वत्। १८॥ वामनकं वामनाख्यं पंचदशं वपुः कृत्वाऽध्वरं बलेरध्वरं यज्ञवाटमगात् जगाम। प्रयोजनमा
ह॥ त्रिविष्टपं प्रत्यादित्सुः पुनरिन्द्राय दातुमिच्छुः पदत्रयं पदत्रयव्याजेन त्रिलोकीं याचमानः। याचिष्यमाणोऽध्वरमगादित्यन्वयः। १९ २६

गेनोपासनमुक्तानुभवश्चमुन्नितं प्राप्नोतित्रपगच्छंतिग्राहयंति चाविभागेन दृष्टत्वादितिचातोयथोक्तएवार्थः अतोभगवतः सर्वात्मकत्वात्तवै
षम्यमस्तीमर्थः सुरलिंगिनोरनुकूलवेषयोर्युवयोः सुरलिंगिभ्यामित्यर्थः॥ किंवुत्मादितंरागद्वेषरहितेस्मिन् देशे किंभवद्भ्यामस्मनिवारण
वुमत्रिः कृता॥ नह्यत्रेदृशाद्युमत्रिसंभवः अस्मदेशस्य उदरभेदिउन् अपि अरमल्पंभेदांतरंवैषम्यमितियावत्॥ अयमप्यंतरनिमित्तमित्य
र्थः॥ एवंविधंभयंयतः कारणाद्धवगम्यतेनादृशीद्युमत्रिः किंकृतेत्यर्थः॥ यद्यायथान्यस्यरोगादेरुदरभेदयुक्तंभयंभवतितथास्य
हरेत्ताद्दृग्भयंयेनकारणेनसुरवेषधारिणोर्युवयोर्विशेषोत्पादितंतत्किंनकिंचित्यर्थः॥३३॥ तत्तस्मादमुष्यपरमस्यसमाभ्यधिकर

नह्यामुष्यपरमस्याविकुंठभर्तुः कर्तुंप्रकृष्टमिहधीमहिमंदधीभ्यां लोकानितोव्रजतमंतरभावदृष्ट्यापापीयसस्त्रयइमेरिप
वोस्ययत्र ॥३४॥

हितस्याविकुंठभर्तुर्वैकुंठनाथस्यसमंदबुद्धिभ्यांवांयुवाभ्यांवैकुंठनायसंवंधिभ्यांयुवाभ्यांकर्तुंयत्प्रकृष्टंयुक्तंतद्धीमहिविचारयामकिंतदि
तिचेन्नइतः लोकाल्लोकान्व्रजतंगच्छतंकान्लोकानित्यत्राहुः अंतरभावदृष्ट्यापरकीयस्वकीयेपसद्भावदृष्ट्यापापीयसः त्रयःकाम
क्रोधलोभरूपाऽरियवः यत्रयेषुलोकेषुभवंतितान्व्रजतमित्यर्थः॥ यद्दिभवदभिप्रायेणावयंनापराधिनयुवामेवापराधिनौततोव्र
जतमित्याशयः अस्मासुवायउचितोधिक्रियतांसदंडोयेनागसोवयमयुष्महिकिल्बिषेणेतिवक्ष्यमाणत्वात्॥ ननुसमहात्मासुदुर्लभइ
तिभगवतागीतत्वात्कथंवित्यसिद्धानांप्राप्यानुभवः तेहिसदासमस्तहेयरहिताः नित्यासंकुचितज्ञानैश्वर्यादिगुणाश्चनित्यज्ञान ॥१०३॥

नन्वस्त्वयं लोक एवंविधः ॥ नाप्यत्रासः कश्चित्कुहकः तथापि भवता मंतः प्रवेशो भगवतो निषिद्ध इति मत्वा वा स्मामहस्त्वत्राह ॥ नहीति ॥ समस्तविश्वं
कुक्षौ यस्य तस्मिन् भगवत्यंतरमयमतः प्रवेशयोग्यो नायमित्येतदंतरं वैषम्यं न ह्यस्तीत्यर्थः समस्तकुक्षाविति विशेषणेन भगवतास्वोदरे
निवेश्यमानं जगद्भवद्भ्यां किं निवारितमित्यभिप्रेतं भगवत्यंतराभावमेवाह यत्र यस्मिन्नात्मनि आत्मानं जीवात्मानं नभसि महाकाशे नभः
घटाकाशमिव धीराः योगिनः पश्यंति ॥ अयमर्थः व्यक्तिद्वये नानुसंदधतदित्यर्थः ॥ अत्राविभागेन साम्ये एव न भेदः दृष्टांतः ननु ताद्रात्म्यं दृष्टांते प्या
काशप्रदेशानां पार्थिवानां घटपटादीनां इव तादात्म्यासंभवाद्दाकाशस्य प्रदेशभेदानभ्युपगमे घटादेर्विभुत्वप्राकाशस्याल्पत्वं वा प्रसज्ये
तः ते नापि किं घटादेः कृत्स्नाकाशेन संबंधः उतप्रदेशभेदेन पूर्वस्मिन् पक्षे घटादेर्विभुत्वमाकाशस्याल्पपरिमाणत्वं वा ॥ द्वितीये तु प्रदेश
नद्यंतरं भगवतीह समस्तकुक्षावात्मानमात्मनि नभो नभसीव धीर ॥ पश्यंति यत्र युवयोः सुरलिंगिनोः किं समुत्पादितम्युदरभे
दिभयं यतोऽस्य ॥ २३ ॥ भेदांगीकार एव वेदांतिभिर्नभसो निरपवादोऽयं सिद्धांतितः वेदांतेषु तस्यांशभेदेन पंचीकरणोपदेशभेदेन पंची
करणोपदेशाकदेशांहेशेन वायुत्वेन परिणामवात्तादुत्पत्तिप्रलयदर्शनाच्च ॥ अतएव घटध्वंसे यथाकाशो न भिन्नो नभसा तथा ब्रह्मण
हेयविध्वंसे विख्यातत्वेन तथा पुमानिति शौनकवचनमपि नभस्यंशभेदाभिप्रायेण जीवस्य परस्मादात्मनः औपाधिकवैषम्यविरहे दृ
ष्टांतः समर्थं एव परं वेदितव्यं यथाग्निरग्नौ संक्षिप्तः समानत्वमनुव्रजेदिति तत्रैव साम्ये दृष्टांताभिधानात् ॥ तस्माज्जीवात्मनः परमात्मानं प्रति शरीर
वाच्छरीरस्य व्यक्तिद्वैतेकस्वाभाव्याज्जीवपरयोरंतरं वैषम्ये पि ज्ञानैकाकारत्वेन साम्याच्चाविभाग एव न भेदः दृष्टांतः अतएव स्यविभा

भा.स्कं. उक्तिमेवाह त्रिभिः कइति । उच्चैर्महत्या भगवत्पारिचर्यया इहास्मिन्वैकुंठलोके एतत्प्राप्येमं लोकं प्राप्येत्यर्थः निवसतां तत्कर्मणां तत्समानधर्मिणां मध्ये
को वां विषमः स्वभावः इह वसतां विषमस्वभावो नुपपन्न इत्यर्थः ननु द्वारपालयोरावयोरयं धर्म एव नूतनपुरातनप्रतिनिरोधाव न्यथास्माभिः कृ
॥१०२॥ इंडर्पेनाप्रवेशिस्या शंकायामाहुस्तस्मिन्निति । प्रशांताः पुरुषा यस्मिन्नगतो विग्रहः कलहो यस्मात्तस्मिन् ल्लोके वा क्वापि ष्य विवादादिदोषरहिते स्मि

मुन ॥ उ. कोवामिहैत्य भगवत्परिचर्ययोच्चैस्तद्धर्मिणां निवस
सतां विषमः स्वभावः । तस्मिन्प्रशांतपुरुषे गतविग्रहे वां को
वात्मवत्कुहकयोः परिशंकनीयम् ॥ ३२ ॥ श्रीरामायन० ॥

ल्लोके आत्मवदावामिवान्योपि कश्चित्कुटिलः प्रविशेदित्येवं परिशंकनीयः कुहकयोः कुटिलचित्तयोर्वां युवयोः को वास्ति यदि परिशंक
नीयः तादृशः । कश्चित्कुटिलोत्रास्ति चेदयं शंकनीया निवारणीयाश्च ॥ अन्यथा प्रभो ईशापातायतिश्च यतश्च खलु प्राकृतवाक्या
दृष्यविवादादिदोषरहितोयं देशः अतइयमाशंकानुपपन्नेत्यर्थः ॥ ३२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥१०२॥

ह्यासीति ॥ ततयोर्द्वयोर्मिषतोः पश्यतोः सतोः तावनादृत्य दृष्टोवयः पूर्वोद्वारः कनकवज्रमयकपाटिकायाः यथा निर्विविशुः तथा सप्तमायां
द्वारि निर्विविशुरित्यर्थः ॥ अघृष्टैर्वेत्रोकारणमाह यद्यस्मात्ते मुनयः अविषमया समया समया विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनी शु॰
के विधया स्वदृष्ट्या विगताभिशंका अतएव सर्वत्राविहता अनिवारिताश्चरंतीति पाठे मुनयः सर्वत्राविहताश्चरंतीति विविशुरेका॰
न्वयः ॥ २९ ॥ तानिति ॥ भगवत्प्रतिकूलशीलौ तौ देवौ वातरशनान् नग्नान्वृद्धानपि दृशा ईर्ष्ययशः पंचवर्षबालकवदवस्थितान् विदितमात्म

द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वा पूर्वा यथा पुरटवज्रकपाटिकाया ॥ सर्वत्र तेविषमया मुनयः स्वदृष्ट्या विश्वंच
रंत्यविहता विगताभिशंका ॥ २९ ॥ तान्वीक्ष्य वातरशनांश्चतुरः कुमारान्वृद्धान्दशार्द्धवयसो विदितात्मतत्त्वान्
वेत्रेण चास्खलयतामतदर्हणांस्तौ तेजो विहस्य भगवत्प्रतिकूलशीलौ ॥ ३० ॥ ताभ्यां मिषत्स्वनिमिषेषु निषि
ध्यमानाः स्वर्हत्तमा ह्यपि हरेः प्रतिहारपाभ्यां ऊचुः सुहृत्तमदिदृक्षितभंग ईषत्कामानुजेन सहसा त उपप्लुताक्षा

यायात्म्य ये ते तान्मुनीन्वीक्ष्य तेजः ॥ तेषां प्रभावं विहस्य अहो त्वापि भवतां धार्ष्ट्यं इति ॥ ३० ॥ हरेर्भगवतः प्रतिहारपाभ्यां देवाभ्यामनिमिषेषु दे
वेषु मिषत्सु पश्यत्सु सत्सु अर्हत्तमाः स्वयं पूज्या अपि निषिध्यमाना निवारणेन परिभूताः अतएव सुहृत्तमो भगवांस्तस्य दिदृक्षितं दर्श
नेच्छा तस्य भंगेनेषत्कामानुजोल्पक्रोधः तेन सहसा उपप्लुता व्याकुलान्याकुलानि व्याप्तान्यक्षीणि येषां तथाभूताः संत ऊचुः ॥ ३१ ॥

भा.तृ.
॥१०१॥

एवंवैकुंठनिलयमनुवर्णयानंतरकथांप्रस्तौति॥ तदितिमुनयःसनकादयःतदुक्तविधंवैकुंठनिलयंयोगमायाबलेनाणिमाद्यैश्वर्यबलेनउपे
त्यप्राप्याथकार्त्स्न्येनपरांउत्कृष्टांमुदंसंतोषमापुःप्रापुःकथंभूतंविकुंठंअपूर्वमदृष्टपूर्वंविबुधाग्र्याःदेवश्रेष्ठास्तेषांविमानैःशोचिःप्रकाशोयस्
स्मिन्॥ विचित्रमद्भुतंदिव्यममानुषंभुवनैःएकंप्राधान्येनवंद्यंवहुमतंयत्॥ तत्रहेतुःविश्वगुरुणाभगवताऽधिकृतमधिकृतमधिष्ठितम्॥२६॥
तस्मिन्वैकुंठेषट्कक्षाःप्राकारद्वाराणिअतीत्यातिक्रम्यासज्जमानाः॥भगवद्दिदृक्षत्वरयाततदद्भुतदर्शनेआसक्तिमकुर्वाणाःमुनयः

तद्विश्वगुर्वधिकृतंभुवनैकवंद्यंदिव्यंविचित्रविबुधाग्र्यविमानशोचिः आपुः॥ परांमुदमपूर्वमुपेत्ययोगमा
याबलेनमुनयस्तदथोविकुंठम्॥२६॥तस्मिन्नतीत्यमुनयःषडसज्जमानाःकक्षाःसमानवयसावथसप्तमा
यांदेवावचक्षतगृहीतगदौपरार्ध्यकेयूरकुंडलकिरीटविटंकवेषौ॥२७॥मत्तद्विरेफवनमालिक
यानिवीतौविन्यस्तयासितचतुष्टयबाहुमध्ये वक्त्रंभ्रुवाकुटिलयास्फुटनिर्गमाभ्यांरक्तेक्षणेनचमनाग्रभ
संदधानौ॥२८॥

सनकादयः॥ अथानंतरंसप्तमायांकक्षायांदेवावचक्षतदृष्टवंतःकथंभूतौदेवौसमानवयोययोस्तौगृहीतेग
देयाभ्यांतौपरार्ध्यैःश्रेष्ठैःकेयूरादिभिःविटंकोरुचिरःवेषोययोस्तौदेवाविति॥२७॥पुनस्तावेववर्णयतिअसितेनीलंयद्बाहुचतुष्टयंतस्य
मध्येविन्यस्तयामत्ताःद्विरेफाःभ्रमरायस्यांतयावनमालयानिवीतौवनमालांकंठालंबिनीकृतवंतौइत्यर्थः॥ किंचकुटिलयाभ्रुवास्फुटौ
विकसितौयौनिर्गमौश्वासमार्गौनासापुटेताभ्यांचरक्तेक्षणेनरक्तनेत्रेणचमनागीषद्रभसंउग्रंययाभवतितथावक्त्रंदधानौदेवौ॥२८ ॥१०१॥

प्रसंगाःतानेवार्थकामपरानस्मान्नशोचति॥यइति॥येहतभाग्याअभ्यर्थितांप्रार्थनीयांनृगतिंमनुष्यजन्मप्रपन्नाःनप्राप्ताःअतएवभगवतआ
राधनंसंसिद्धिसाधनंभजनंनवितरंतिनकुर्वंति किंत्वमनुष्यभगवतः॥विततयामाययातेहतभाग्याःसंमोहिताभवंतिवतेतिखेदे यद्यातत्व
ज्ञानंसहधर्मयत्रयस्मिन्मनुष्यजन्मनियन्मनुष्यसाध्यंतादृशीनृगतिंप्रपन्नाः॥भगवतआराधनंनकुर्वंतिकिंत्वस्यमाययासंमोहि
ताएवेत्यर्थः॥अस्मिन्पक्षेऽभ्यर्थितामपिनोऽस्मत्त्वन अस्माभिरभ्यर्थनीयांनृगतिमित्यर्थः॥२४॥एवंभगवत्कथादिषुविमुखानांतन्नो

येऽभ्यर्थितामपिचनोनृगतिंप्रपन्नाज्ञानंचतत्वविषयंसहधर्मयत्र॥नाराधनंभगवतोवितरंत्यमुष्यसंमोहि
ताविततयावतमाययाते॥२४॥यच्चव्रजंत्यनिमिषामृषभानुवृत्त्यादूरेयमाह्युपरिनःस्पृहणीयशीलाः
भर्तुर्मिथःसुयशसःकथनानुरागवैक्लव्यबाष्पकलयापुलकीकृतांगाः॥२५॥

काप्राप्तिमभिधीयतान्यानु
शोच्यतत्कथाश्रवणपराणांचितैस्तल्लोकस्यप्राप्यत्वमाह॥यच्चेति॥यद्वैकुंठनिलयमनिमिषांदेवानांऋषभःश्रेष्ठोभगवान्तस्यानुवृ
त्त्याभक्त्याव्रजंति॥कथंभूताव्रजंतियमाद्युचितसन्नस्पृहणीयशीलाःदूरेचिरकालेनयमाद्युचितश्लाघ्यशीलाःदूरेयमाद्युपरितःस्पृ
हणीयशीलाइत्यपिपाठः तत्रउपरिस्थितंयद्वैकुंठनिलयंव्रजंति॥कथंभूताःनअस्माभिरपिस्पृहणीयंश्लाघनीयंशीलंयेषांतेदूरेचि
रकालेनयमःयमोपलक्षितःशमदमादिगुणोयेषांतेकिंचभर्तुर्हरेःसुयशसःमिथःपरस्परंकथनेनयोनुरागस्तेनयद्वैक्लव्यमधार
र्ह्यतेनयाबाष्पकलातयापुलकीकृतंउद्दंचितरोमअंगंशरीरंयेषांतेव्रजंतीत्यर्थः॥२५॥

वापीष्विति । अंगहेदेवाः यच्छ्रीर्लोके श्रीः । भगवतोच्छेषितं चुंबितं इत्यमतामन्यत । किंकुर्वती किं कृत्वा विद्रुममयानि तटानि यासां तासु अमला
निर्मला अमृततुल्या आपो यासु तासु वापीषु निजवने स्वकीयक्रीडावने प्रेष्याभिः स्वकीयपरिचारिकाभिः स्त्रीभिरन्विता तुलसीभिरीशं भगवं
तमभ्यर्चंती पूजयंती नहीरके प्रतिबिंबितं स्वलकं शोभना अलका चूर्णकुंतला यस्य उन्नता नासिका यस्य तत्स्ववक्त्रं वीक्ष्य दृष्ट्वा निरतिशय
यविमलासु वापीनामप्सु तुलसीभिरीशमर्चयंती लक्ष्मीरुदकसमीपे स्वमुखं विधाय तत्र प्रतिबिंबितं स्वमुखं मनुसंधाया हे भगवन्मन्मुखं
चुंबतीति मेने इत्यर्थः अनेन लक्ष्म्या मोऽप्यभ्यस्यते ॥२२॥ पुनः कथंभूतं तं वैकुंठस्थानमित्यत्राह । यद्वैकुंठं न निलयं ते न व्रजंति नाप्नुवंति के

वापीषु विद्रुमतटास्वमलामृताप्सु प्रेष्यान्विता निजवने तुलसीभिरीशं । अभ्यर्चती स्वलकमुन्नसमीक्ष्य व
क्त्रमुच्छेषितं भगवतेत्यमतांगयच्छ्रीः ॥२२॥ यन्न व्रजंत्यघभिदो रचनानुवादाच्छृण्वंति येऽन्यविषयाः कु
कथा मतिघ्नीः । यास्तु श्रुता हतभगैर्नृभिरात्तसारास्तांस्तान्क्षिपंत्यशरणेषु तमःसु हंत ॥२३॥

न इत्यत्राह अघं पापं भिनत्ति निरस्यतीत्यघभिद्धरिस्तस्मादन्यविषयाः । अर्थकामादिविषयाः अतएव रचनानुवादात् रच्यंते संपाद्यंते ऽनये
ति रचनाउपायस्तस्या अनुवादादनुकीर्त्तनात्स्वसंपादनोपायबोधकदंडनीतिकामतंत्राद्यनुकीर्त्तनान्मतिघ्नीः बुद्धिभ्रंशावाराकुकथा येष्ट
ण्वंतीति इत्यर्थः पुनः कुकथा एव विशिनष्टि । यास्तु कुकथाः हतभगैर्निर्भाग्यैर्भिर्नृभिः श्रुताः अतएव आत्तसाराः आत्तः स्वीकृतः सारः ॥टी ३॥
आत्तसारो पुण्यं याभिरेवंभूताः सैस्तस्तान श्रोतॄनशरणेषु निरालंबेषु तमस्सु नरकेषु क्षिपंति पातयंति ॥२३॥ ॥१००॥

एवंविधः श्रेयसवनमपवर्गं पुनस्तमवलोकं वर्णयति ॥ यदिति ॥ यद्वैकुंठनिलयं भक्तानां विमानैः संकुलं व्याप्तं कथंभूतैर्विमानैर्हरेर्भगवतः पदयो
ः पादयोर्या आनतिः ॥ प्रकाभावः ॥ अनेन ततस्तु विकामभक्तिर्लभ्यते ॥ आनतिमात्रदृष्टैर्न कर्मयोगादिभिः प्राप्तैरित्यर्थः वैदूर्यादीनां विकारैर्येषां
यदि मानाख्यातानां कृष्णात्मनां हृदंतिकटिनता नियासाम् ॥ स्मितेन शोभीनि मुखानि यासां ता अपि स्त्रियः उरुमपाद्यैः परिहासांता अपि स्त्रि
यः उरुमपाद्यैः परिहासादिभिः रजः रजोगुणोत्समुद्भवकामं न ता दधुर्न जनयामासुः कृष्णात्मनामिति हेतुगर्भं विशेषणं कृष्णे भगवत्येव निहित
चित्तत्वात्कामं नादधुरित्यर्थः ॥२०॥ श्रीः लक्ष्मीरूपिणी मत्रिंमती हरिसमप्रनियं वैकुंठलोकस्य भगवद्वेश्मनि लीलांबुजेन लीलार्थं धते

यत्संकुलं हरिपदानतिमात्रदृष्टैर्वैडूर्यमारकतहेममयैर्विमानैः ॥ येषां बृहत्कटितटाः स्मितशोभिमुख्यः कृष्णात्मनां न रज आ
दधुरुत्स्मयाद्यैः ॥२०॥ श्रीरूपिणी क्वणयती चरणारविंदं लीलांबुजेन हरिसद्मनि मुक्तदोषा ॥ संलक्ष्यते स्फटिककुड्य उपे
तहेम्नि संमार्जतीव यदनुग्रहणेन यत्न ॥२१॥ नकमलेन संमार्जनं कुर्वती संलक्ष्यते इव ॥ कथंभूता श्रीः चरणारविंदं क्वणय
ती नूपुरेण शब्दयंती मुक्तो दोषो ऽनित्यत्वरूपो यया सा यद्वा मुक्तदोषेति लीलांबुजविशेषणम् मुक्तः प्रसारितो दोः भुजो यस्मिंस्तेनेति कथंभूते
वेश्मनि स्फटिकमयानि कुड्यानि यस्मिंस्तस्मिन् उपेतहेम्नि शोभार्थं मध्ये तत्र उपेतं संयुक्तं हेम सुवर्णं यस्मिन्निति ॥ पुनः श्रियं विशिनष्टि यदनुग्र
हणे यस्याः श्रियः अनुग्रहे निमित्ते श्रीरस्मास्वनुग्रहं कुर्यादिति बुध्या अन्येषां ब्रह्मादीनां यत्नः ॥ आराधनरूपो यत्नः ॥ स्यादित्यर्थः ॥ यद्यपि भ
गवद्वेश्मनि संमार्जनीतिरजो नास्त्येव तथापि स्वर्णपट्टिकालांछितस्फटिकमयभित्तिभागेषु प्रतिलग्नतामती तत्रैवं लक्ष्यते इवाभदिति भाव

त्रिभागेषु हेमचूर्णोरिवली [illegible] मभित्ति ॥२१॥ पंचमपंक्तौ त्रुटिः ५॥

॥ ९८ ॥

भा॰ह॰ किमुततद्वनस्थानां पुरुषाणां गुणानुभवासक्तिरितियतस्तिरश्चांतस्यारानां भगवत्परतामाह॥पारावतादयः॥शकुनिविशेषाः अन्यभृताः
॥९९॥ कोकिलाः दात्यूहाश्चातकाः वर्हिणोमयूराः पारावतादीनां यः कोलाहलः कलः कलः भृंगाधिपे भृंगश्रेष्ठे हरिकथामिव उच्चैर्गीयमानो
गानंकुर्वतिसत्यचिरमात्रंक्षणमात्रंविरमतेसममाप्तोभवति॥वनस्थाः पारावतादयः कोलाहलं कुर्वंतो भृंगध्वनिमाश्रुत्य किमयंभृं
गराजोहरिकथांगायतीतिवयंश्रवणंकुर्मह इत्यभिप्रायेणस्वकोलाहलंत्यक्त्वाक्षणमात्रंभृंगध्वनिमेवोपश्रृण्वंतीत्यर्थः॥१८॥व

पारावतान्यभृतसारसचक्रवाकदात्यूहहंसशुकतित्तिरवर्हिणांयः॥कोलाहलोविरमते
चिरमात्रमुच्चैर्भृंगाधिपेहरिकथामिवगायमाने॥१८॥मंदारकुंदकुरवोत्पलचंपकार्ण
पुन्नागनागवकुलांवुजपारिजाताः॥गंधेर्चितेतुलसिकाभरणेनतस्यायस्मिंस्तपः सुमनसोवहु
मानयंति॥१९॥

तत्स्थानां स्थावराणामपि भगवत्परतामाह॥मंदारपारिजातौ सुरतरुविशेषौ कुंदोतिमुक्तलताः कुरवस्तिलकवृक्षविशेषः॥उत्पलंरात्रविका
सि अंवुजंदिवाकासि॥नागोनागकेशरः॥अर्णाः पुष्पवृक्षविशेषः मंदारादयः सुमनसः सुगंधाः अपि तुलसिकाभरणेन भगवतातस्या
:तुलस्यागंधेर्चितेसंमानितेसतियस्मिन्वनेतस्यास्तुलस्याः तपः वहुमानयंति॥तद्वनस्थाः पारिजातादयोमाद्दशेषुसुगंधिषुसुगंधिपुष्पे
षुसत्स्वपितुलस्याः ग्लंकृतोभगवान्तुलसीमेववमनुते॥अहोतुलस्या आभरणेनभगवद्दामरागंदृष्ट्वातस्यास्तुलस्यास्तपोमहत्सुराकृत ॥९९॥
मितिवहुमानयंतीत्यर्थः॥१९॥

यत्र च वैकुंठे शब्दगोचरः शास्त्रैकप्रमाणकः भगवान्षाड्गुण्यपूर्णः ॥ आद्यः परमकारणभूतः वृषः श्रेष्ठः पुमान्परमपुरुषः विरजं रजोगुणेनाननु
विद्धं सत्वं शुद्धसत्वमयं देहं विष्टभ्य धृत्वा स्वानां नः स्वकीयानस्मान्मृडयन्सुखयन्नास्ते ॥१५॥ यत्र श्रीवैकुंठे निःश्रेयसं नाम निःश्रेयसाख्यं व
नमस्ति ॥ कथंभूतं सर्वर्तुश्रीभिः सर्वेषु ऋतुषु याः श्रीः पुष्पादिसंपत्तयो येषां तैः कामदुघैरभीष्टानि वर्षद्भिर्द्रुमैर्विभ्राजमानं मूर्त्तिमत्कैवल्य
मिव स्थितम् ॥१६॥ पुनस्तमेव वर्णयति त्रिभिः वैमानिकाः ॥ विमानरूढाः सललनाः सस्त्रीकाः यत्र नैःश्रेयसे वने लोकभर्त्तुर्भगवतो लोकानां

यत्र चाद्यः पुमानास्ते भगवाञ्छब्दगोचरः ॥ सत्वं विष्टभ्य विरजं स्वानां नो मृडयन्वृषः ॥१५॥ य
त्र नैःश्रेयसं नाम वनं कामदुघैर्द्रुमैः ॥ सर्वर्तुश्रीभिर्विभ्राजत्कैवल्यमिव मूर्त्तिमत् ॥१६॥
वैमानिकाः सललनाश्चरितानि यत्र गायंति लोकशमलक्षपणानि भर्त्तुः ॥ अंतर्जले ऽ
नुविकसन्मधुमाधवीनां गंधेन पिंडितधियोप्यनिलं क्षिपंतः ॥१७॥ यानि शमलानि पापानि क्षपयंति

निरस्यंतीति तथा चरित्राणि गायंति कथंभूताः संतो गायंति ॥ अंतर्जले ऽनुविकसद्नुस्यंदमानं मधुमकरंदो यासां माधवीनां वासंतिकमा
धवीपुष्पाणां गंधेन पिंडिताः अंतरिताधीर्येषां तथाभूता अपि अनिलं तमापकं वायुं क्षिपंतः तिरस्कुर्वंतः चरितानि गायंतीत्यर्थः अनेन
भोग्यभोगोपकरणभोगस्थानसंनिध्येपि तद्नादरेण तल्लोकस्थानां भगवद्गुणानुभवएव निरतिशयाभिलाषः सूचितः ॥१७॥

भा.त्र.
॥५९८॥

तेसनत्कादयः एकदा एकस्मिन् काले ऽमलात्मनः ॥ शुद्धसत्वमयदिव्यमंगलविग्रहस्य वैकुंठस्याप्रतिहतैश्वर्यस्य भगवतः वैकुंठस्य संबंधिनि
लयस्थानं प्रति ॥ कथंभूतं सर्वलोकनमस्कृतं सर्वलोकैरर्वाचीनैर्लोकवासिभिर्नमस्कृतं पर्युगतवंतः तत्र वैकुंठनिलयमिति विष्णुलोक
उपरिस्थानमुच्यते न तु नित्यविभूतिः अष्टमस्कंधे वैकुंठः कल्पितो येन लोको लोकनमस्कृत इति वक्ष्यमाणत्वात् ॥ ब्रह्मणापि समाधिगम्य
स्य परमाकाशस्य प्रकृतियुक्तैर्गंतुमशक्यत्वात् ॥ स्वचूडामणिमात्मधिष्ण्येति स्वर्गलोकचूडामणित्वेन वक्ष्यमाणत्वाच्च ॥ कैवल्यमिव म
र्तिं महदिति वक्ष्यमाणत्वेन भक्तियाप्यप्रमितत्वाभावावगमाच्च वैकुंठशब्दवाच्यत्वं च विकुंठस्य भगवतः स्थानत्वादुपपन्नमिति विज्ञेय

त एकदा भगवतो वैकुंठस्यामलात्मनः ॥ ययुर्वैकुंठनिलयं सर्वलोकनमस्कृतम् ॥१३॥ वसंति यत्र पु
रुषाः सर्वे वैकुंठमूर्तयः ॥ येऽनिमित्तनिमित्तेन धर्मेणाराधयन् हरिम् ॥१४॥ ये ॥१३॥ तमेव वैकुंठं वर्ण

यति ॥ वसंतीत्यादि द्वाभ्यां ॥ यत्र वैकुंठे अनिमित्तनिमित्तेन अनिमित्तं फलमनिमित्तमप्रवर्तकं निमित्तं फलं यस्मिन् कामादिनिमित्तरहितेने
त्यर्थः धर्मेण हरिमाराधन्त्वाराधितवंतः ये पुरुषा वसंति ते सर्वे वैकुंठस्य भगवतः मूर्तिराकारो येषां ते तथोक्ताः ॥ आराधयन् वसंतीत्य
नेन विष्णुलोकवासिनामपि भगवदुपासकत्वमुक्तं धर्मध्रुवाद्यास्तिष्ठंति यत्र ते लोकसाक्षिण इत्यादिना गोकार्थ्यात् पूर्वमाराध्येह गत्य वसंती
त्यर्थोपि न विरोधः ॥ न त्वकामेन धर्मेण भगवंतमाराधयतां नित्यविभूतिरेव प्राप्यान्त्वसाधनं तर्वर्ति वैकुंठलोकः स कथं तत एव कुतश्चिन्म
थमंति ॥ विभूतिमनवाप्येमं वैकुंठमागम्य तत्र भगवदनुभवेन निरस्तप्रतिबंधाः कल्पांते ततो नित्यविभूतिगमिष्यंतीत्यतो न विरोधः अन्वय

वैमानीयं च काणानं तद्विम्ब गुर्वधित मित्युत्तरत्रान्वयः ॥१५॥
॥५९८॥

यस्यतववाचावेदात्मिकयासर्वाःप्रजास्तंत्यादाम्न्यागावइवयंत्रिताः ॥ बद्धाः आयत्तास्त्वदधीनाःसन्तःबलिंत्वांहरंतिकुर्वंतितस्मैमुख्यायश्रेष्ठा
यतेनमः ॥ अनेनस्वसंबंधिनांस्वनिदेशवर्त्तिनामस्माकंपरिभवोनुचितइतिसूचितंभवति ॥८॥ एवंनमस्कृत्यस्वाभीप्सितंप्रार्थयतेसत्वमिति
हेभूमन्त्सउक्तोविधत्स्वतमसाःहोरात्रविभागाभावेनलुप्तानिकर्माणियेषामस्माकंशंसुखंविधत्स्वकुरुआपन्नानापद्गतान्त्रोस्मान्अ
दभ्राःअनल्पादयायस्यास्तयादृष्ट्याईक्षणेनरक्षितुंद्रष्टुमर्हसि ॥९॥ ननुकिमिदानींभवतांव्यसनमुपस्थितमित्यत्राहुःएषइतिहेदेव

यस्यवाचाप्रजाःसर्वागावस्तंत्येवयंत्रिताः ॥ हरंतिबलिमायत्तास्तस्मैमुख्यायतेनमः ॥८॥ सत्वंविधत्स्वशंभूमंस्तम
सालुप्तकर्मणां ॥ अदभ्रदययादृष्ट्याआपन्नानर्हसीक्षितुं ॥९॥ एषदेवदितेर्गर्भओजःकाश्यपमर्पितम्
दिशस्तिमिरयन्सर्वावर्द्धतेग्निरिवैधसि ॥१०॥ मैत्रेयउवाच ॥ सप्रहस्यमहाबाहोभगवान्शब्दगोचरः ॥ प्रत्याचष्टा
त्मभूर्देवान्प्रीणन्रुचिरयागिरा ॥११॥ ब्रह्मोवाच ॥ मानसामेसुतायुष्मत्पूर्वजाःसनकादयः ॥ चेरुर्विहायसा
लोकांल्लोकेषुविगतस्पृहा ॥१२॥ दितेर्गर्भेऽर्पितंनिहितंकाश्यपंकश्यपसंबंध्योजःवीर्यंसर्वादिशस्तिमिरयन्नंधीकुर्वन्नेधसिदारुणि
वचेऽग्निरिवैधनेवर्द्धते ॥१०॥ एवंहेदेवाःकोत्रत्रातास्माहेत्याहमुनिःसइति ॥ शब्दगोचरःवेदवेद्यः ॥ सभगवान्स्वभूर्ब्रह्माप्रहस्यविहस्यहेमहा
बाहोविदुरमधुरयागिराप्रीणयंस्तर्पयन्देवान्प्रत्याचष्टउक्तवान् ॥११॥ उक्तिमेवाहमानसाइत्यारभ्याध्यायशेषेण हेमहानसाःमनःसमुत्प
न्नाःयुष्मदपेक्षयापूर्वंजाताःसनकादयःलोकेषुविगतस्पृहाविषयाभिलाषोयेषांतेनयोक्ताअपिलोकान्विहायसानभोमार्गेणाचेरुःसं

[illegible] ॥४१॥

भा.द.
॥९०॥

स्वामणोलोकनाथानांशिखामणेपरेषामपरेषामस्मदपेक्षयापूर्वेषामर्वाचीनानांचभावविदभिप्रायज्ञोऽसिइति ॥४॥ एवंपरमात्मावेशाव
तारत्वेनब्रह्मशरीरकपरमात्मरूपस्यानस्यसर्वज्ञतामभिधायपुनस्तद्रूपातदंशैर्विशिष्टत्वेननमस्कुर्वंति ॥ नमइतितेतुभ्यंनमः कथंभू
तायतेव्यक्तयोनयेव्यक्तंकार्यावस्थंजगत्तस्ययोनयेकारणायनाहमव्यक्तयोनिः किंतुपरमात्मेत्यत्राह ॥ गृहीतगुणभेदायगुणाना
भेदः ॥ रजोगुणायस्यसगुणभेदः ब्रह्मागृहीतः शरीरत्वेनगुणभेदः रजोगुणप्रधानः ब्रह्मायेनतस्मैरजोगुणप्रधानब्रह्मशरीरक
परमात्मायोजगत्स्रष्टासत्वमेवेत्यर्थः नेदंत्वद्रूपेणावस्थानंपरमात्मनोकर्मायत्तमित्याह ॥ माययासंकल्परूपज्ञानेनैवइदंब्र

नमोविज्ञानवीर्यायमाययेदमुपेयुषे ॥ गृहीतगुणभेदायनमस्तेव्यक्तयोनये ॥५॥ येत्वानन्येनभा
वेनभावयंत्यात्मभावनम् ॥ आत्मनिप्रोतभुवनंपरंसदसदात्मकम् ॥६॥ तेषांसुपक्वयोगा
नांजितश्वासेंद्रियात्मनाम् ॥ लब्धयुष्मत्प्रसादानांनकुतश्चित्पराभवः ॥७॥
ह्मरव्यंशरीरंउपेयुषेगताय

एतदुपपादकत्वेनविशिनष्टिविज्ञानवीर्यायेतिविज्ञानएववीर्यंबलंयस्यतस्मै ॥५॥ एवंविधस्यतवप्रजानांतन्निर्देशवर्तिनामस्माक
मन्यैःपरिभवोनुचितइतिसूचयंतोनमस्कुर्वंतित्रिभिः येत्विति ॥ आत्मनोजीवान्देवमनुष्यादिरूपेणभावयतीत्यात्मभावनस्तं
मात्मनिस्वात्मन्येवप्रोतंसंदर्भितंभुवनंयेनतं अतएवसदसदात्मकंकार्यकारणरूपंवस्तुताभ्यांपरंविलक्षणंत्वांयेऽनन्येनाव्यभिचारे
णभावेनभक्त्याभावयंत्युपासते ॥६॥ तेषांकथंभूतानांजितश्वासेंद्रियात्मनांजिताश्वासाःप्राणाइंद्रियाणिज्ञानकर्मोभयेंद्रियाणिपा

मात्रः कं रागं च ये सेवां शमगवसुपक्वयोगः भक्तियोगो येषां तेषामतः वल
स्वः पुष्पकामाः भवदपुरः ये सेवां कुतश्चित्पराभवो नास्ति ॥ ७ ॥
॥ ९० ॥

इति श्रीधरे चतुर्दशः ॥ १४ ॥ एवं देवर्षिब्रह्मसंवादरूपेतिहासो यो ज्ञानरूपं इतिहासांतरं प्रस्तुतेदानीं ब्रह्मनारदसंवादं प्रस्तोतुं तावद्देवानां ब्रह्मणः संनिधावुप
संनिहेतुं वर्हवत्र त्रनिमित्तिहासं वर्णयिष्यमाणेतिहासेन संगमयति मैत्रेयः प्राजापत्यमिति ॥ परेषां तेजो हरतीति तथा प्रजापतेः कश्यपस्य वं धितेजो वीर्यं दिति
रसुराईनाहिंद्राच्छंकमाना इंद्रः कदाचित्किं कुर्यादिति शंकमाना सती शतं वर्षाणि दधार गर्भं धृतवतीत्यर्थः ॥ १ ॥ तेन गर्भतेजसा हतालोके नीरस्तसूर्यादिप्र
काशे हतौजसा हतप्रभाः लोकपाला दिशां ध्वांतेनांधतमसेन व्यतिकरं व्यामिश्रं इयं पूर्वा दिगियं पश्चिमेति ज्ञानाभावं विश्वसृजे चतुर्मुखायन्यवे

इति श्रीभागवते तृतीयस्कंधे दि ग धा णं चतुर्दशोध्यायः ॥ १४ ॥ मैत्रेय उवाच ॥ प्राजापत्यं तु तत्तेजः परतेजोह
नं दितिः ॥ दधार वर्षाणि शतं शंकमाना सुरार्दनात् ॥ १ ॥ लोके तेन हतालोके लोकपाला हतौजसः ॥ न्यवेदयन्विश्वसृजे ध्वां
तव्यतिकरं दिशां ॥ २ ॥ देवा ऊचुः ॥ तम एतद्विभो वेत्थ संविग्ना यद्वयं भृशं न ह्यव्यक्तं भगवतः कालेनास्पृष्टवर्त्म
नः ॥ ३ ॥ देवदेव जगद्धातर्लोकनाथशिखामणे ॥ परेषामपरेषां त्वं भूतानामसि भाववित् ॥ ४ ॥

इयन्न ब्रह्मसमीपमा
गत्य विज्ञापयामासुरित्यर्थः ॥ २ ॥ निवेदनमेवाह ॥ तं इति ॥ हे विभो ब्रह्मन्स्त्वमेवैतद्वेत्थ जानासि ॥ किं तदित्यत आहुः यद्यस्माद्वयं भृशं संविग्ना भीता
नत्वमेव वेत्थेत्यर्थः ॥ अहमपि त्वादृश एवातः कथं जानामीत्यत्राशंकायां परमात्मनः आवेशावतारत्वात्त्वं सर्वं जानासीत्यभिप्रेत्याह ॥ नहीति
कालेनास्पृष्टं वर्त्म ज्ञानं यस्य कालवशादसंकुचितज्ञानिनो भगवतः स्थितस्य नः करिष्यामि त्वां माविशत् प्रजापतेरित्युक्तेः ॥ तेन त्वयाऽव्यक्तमविदि
तं भगवच्छरीरभूतस्य ते न ह्यस्तीत्यर्थः ॥ ३ ॥ ननु देव विशेषयंति हे देवदेवेति देवानां इंद्रादीनामपि देव हे जगद्धातः जगन्निर्मातः लोकनाथशि

भा.टी.
॥ ५६ ॥

निरतिशयमाहात्म्यवाञ्छद्दयामृतयाऽनुभाविते संशोधिते आशये चित्ते वैकुंठभगवंतं निवेश्य पावस्यापन्नातद्भगवद्व्यतिरिक्तमेष्वयी
दिकं विहास्यति मक्ष्यति ॥ ४७ ॥ किंचालंपट: अलोलुप: शीलधर: सुखभाव: गुणानामाकर: परार्ध्यापरेषां ऋद्धि: समृद्धिस्तया हृ
ष्ट: परेषु दु:खितेषु सत्सु स्वयमपि व्यथित: दु:खित: नभूतो न जात: शत्रुर्यस्य सोऽभूतशत्रु: जगत: ॥ शोकं हरतीति तथा ॥ नत्र हृ
ष्टान: नैदाघिकं निदाघो ग्रीष्मकाल: तत्र भवं तापं उडुराजश्चंद्र इव यो हरतीति ॥ ४८ ॥ किंच तव पौत्र: श्रीललनाललामं श्री: लक्ष्मी
रेव ललना तस्या ललामं भूषणं ॥ भर्त्तानामपरंनार्याभूषणादपिभूषणं इत्युक्तरीत्या भूषणभूतं श्रिय: पतिम् ॥ अंत: स्वहृदये क

अलंपट: शीलधरो गुणाकरो हृष्ट: परर्द्धा व्यथितो दु:खितेषु ॥ अभूतशत्रुर्जगत: शोकहर्त्ता नैदाघिकं तापमिव
उडुराज: ॥ ४८ ॥ अंतर्बहिश्चामलमब्जनेत्रं स्वपूरुषेच्छानुगृहीतरूपं ॥ पौत्रस्तव श्रीललनाललामं द्रष्टा स्फुरत्कुंडलमं
डिताननं ॥ ४९ ॥ मैत्रेय उवाच ॥ श्रुत्वा भागवतं पौत्रममोदत दितिर्भृशम् ॥ पुत्रयोश्च वधं कृष्णाद्विदित्वासीन्महामना:
॥ ५० ॥

मलमध्ये बहिश्च दृश्यते कथंभूतं श्रीललनाललामं स्फुरती ये कुंडले ताभ्यां मंडितं भूषितमाननं मुखं यस्य तं ॥ कुंडलयो: स्रोत्रालंकारत्वे
पि गंडस्थलादिषु तत्प्रतिफलनवशात्मुखस्यापि शोभातिरिक्ता ते ॥ स्वपुरुषा: स्वभक्तास्तेषां इच्छानुरूपं गृहीतमंगीकृतदिव्यशरीरं येन तं
आब्जनेत्रं कमलनेत्रमममलं निरस्तहेयगुणम् ॥ ४९ ॥ दितिकश्यपयो: प्रश्नोत्तरे निगमयति ॥ श्रुत्वेति ॥ दितिर्भागवतं पौत्रं जनिष्यमाणं
श्रुत्वा भृशममोदत जहर्ष ॥ कृष्णाद्भगवत: पुत्रयोर्वधं भाविनं विदित्वा ज्ञात्वा महामना: हरिणा सह युद्धेन पुत्रयोर्मरणे कीर्त्ति: स्यादिति

एवमुक्तोनुविराह॥ कृतेत्यादि सप्तभिः कृतो यो ऽपराधः तेन शोकः तस्माद्यो ऽनुतापः तेन सद्यः प्रत्यवमर्शनाद्युक्तायुक्तविचाराद्भगवति परः सपुरुषे ऽदृसमा
नाच्च भवे हरेः सद्यापात्परा च्च हेतोः॥४३॥ पुत्राणामार्षत्वाद्बहुवचनं पुत्रयोर्मध्ये एकस्य हिरण्यकशिपोः एकः पुत्रः सतां मतः प्रह्लादः पुत्रः भवि
ता भविष्यति॥ तमेव वर्णयति॥ गास्यंतीसार्द्धैः॥ पंचभिः यस्य तत्पौत्रस्य पृशः भगवद्यशसा समं सह सदृशं वा गास्यंति॥ यच्छुद्धस्य स वा इ
नुवर्त्तान्वयः॥४४॥ किंच यस्य तस्यैव त्वस्य शीलमनुवर्त्तितुं निर्वैरादिभिर्गुणैरात्मानमंतःकरणं साधवो॥ भावयिष्यंति शोधयिष्यंते तत्र दृ

श्रीशुक उवाच॥ कृतशोकानुतापेन सद्यः प्रत्यवमर्शनात्॥ भगवत्युरुमानाच्च भवे मय्यपि चादरात्॥४३॥ पुत्रस्यैव तु पुत्रा
णां भवितैकः सतां मतः॥ गास्यंति यद्यशः शुद्धं भगवद्यशसा समं॥४४॥ योगैर्हेमेव दुर्वर्णं भावयिष्यंति साधवः
॥ निर्वैरादिभिरात्मानं यच्छीलमनुवर्त्तितुं॥४५॥ यत्प्रसादादिदं विश्वं प्रसीदति यदात्मकम्॥ स स्वदृग्भगवान्य
स्य तोष्यते ऽनन्यया दृशा॥४६॥ स वै महाभागवतो महात्मा महानुभावो महतां महिष्ठः॥ प्रवृद्धभक्त्या ह्यनुभाविताश
ये निवेश्य वैकुंठमतद्विहास्यति॥४७॥ ष्टांतः॥ योगैः क्षारादिसंयोगैः॥ दुर्वर्णं हेमसुवर्णमिव॥४५॥ किंच यत्प्रसादाद्भगवतः प्रसादाद्धेतु
भूतात् इदं विश्वं प्रसीदति भगवदनुग्रहविषये॥ कृत्स्नं विश्वमपि प्रसादमेव कुर्यादित्यर्थः॥ यदात्मकं भगवानेवात्मा यस्य तद्विश्वं यद्भगवदा
त्मकं स्वस्वदृक करणनिरपेक्षं सर्वं साक्षात्कुर्वाण इत्यर्थः भगवान् यस्य तस्यैव त्वस्यानन्यया ऽव्यभिचारिण्या दृशा भक्त्या तोष्यते संतोषं प्राप्नोति
॥४६॥ स वैत्वस्यो च्चः महाभागवतः निरतिशयभगवद्भक्तः महानुभावः महात्मा निर्मलांतःकरणः महतां महात्मवतामपि मध्ये महीष्ठः

भा·तृ· प्राणिनां हन्यमानानां सताम् ॥ कथंभूतानां दीनानां कृपणानाम् अकृतागसः अपराधो यैस्तेषाम् ॥ स्त्रीणां च निगृह्यमाणानां सतीनां महात्मसु
कोपितेषु सत्सु ॥ ३९ ॥ तदा क्रुद्धो रोषितः विश्वेश्वरः लोकं भावयति सुखयतीति लोकभावनो सो भगवान् अवतीर्य वराहनरसिंहाभ्यामा
॥ ८५ ॥ विर्भूय हनिष्यतीति तत्र दृष्टांतः अद्रीन् पर्वतान् वज्रायुधधरः इंद्रः यथेति ॥ ४० ॥ एवमुक्ते पुनर्दितिराह द्वाभ्यां सुनाभं चक्रं तेनोदारः सुंदरो
बाहुर्यस्य तेन भगवता साक्षात् मम पुत्रयोर्वधम् आशासे ऽनुमन्ये ॥ किंतु हे प्रभो क्रुद्धाद्ब्राह्मणान्नानुमन्ये कोपितेषु महत्सु चेत्युक्तत्वात्

प्राणिनां हन्यमानानां दीनानामकृतागसां ॥ स्त्रीणां निगृह्यमाणानां कोपितेषु महत्सु च ॥ ३९ ॥ तदा विश्वे
श्वरः क्रुद्धो भगवांल्लोकभावनः ॥ हनिष्यत्यवतीर्यासौ यथाद्रीञ्छतपर्वधृक् ॥ ४० ॥ वधं भगवता
साक्षात्सुनाभोदारबाहुना ॥ आशासे पुत्रयोर्मह्यं मा क्रुद्धाद्ब्राह्मणात्प्रभो ॥ ४१ ॥ न ब्रह्मदंडदग्ध
स्य न भूतभयदस्य च ॥ नारकाश्चानुगृह्णंति यां यां योनिमसौ गतः ॥ ४२ ॥

कोपिताद्ब्राह्मणाद्वधमाशं
कमाना एव प्रार्थयते क्रुद्धान्माभूदिति ॥ ४१ ॥ ननु ब्राह्मणाद्धन्यतो वा कुतश्चिद्वधस्तत्र को विशेष इत्यत्राह ॥ नेति ॥ ब्रह्मदंड
दग्धस्य ब्रह्मणशापहतस्य भूतानां भयसंपादकस्य च नारकाः ॥ अपि नरकवासिनोपि नानुगृह्णंत्यनुग्रहं न कुर्वंति ॥ नरका
वासिनो हि सर्वस्मै लोकाय दुःखं माभूदिति मन्यंते तेप्येतयोः कृपां न कुर्वंति इत्यतोतिपापिनौ ब्रह्मदंडदग्धभूतभयदौ इत्यर्थः ॥ ८५ ॥
किं च यां यां योनिमसौ ब्रह्मदंडदग्धो लोकभयदश्च गतः प्राप्तो भवति तत्रस्था अपि नानुगृह्णंतीत्यर्थः ॥ ४२ ॥

एवस्वाभिप्रेतमावेद्यनमस्कुर्वंतीरुद्रंप्रसादयति ॥ नमइतिद्वाभ्यांरुद्रायनमः ॥ कथंभूतायमहतेदेवायमहादेवायेत्यर्थः विश्वसंहर्त्त्वादिरुद्राद्यपे
क्षयामहत्वंद्विविधंतत्र उग्रायउग्ररूपिणेमीढुषेसकामेषुफलसेचनकर्त्रे ॥ यद्वारेतःसेकक्षमायनिष्कामेषुशिवायवस्तुतोन्यस्तदंडायसं
सारमन्यवे ॥ ३४ ॥ सइति ॥ भामोभगिनीभर्त्ताउरुरनुग्रहोयस्यसउमायाःपतिर्भगवान्देवोरुद्रःव्याधस्याप्यनुकंप्यानांदयनीयानांस्त्रीणांनो
ऽस्माकंप्रसीदतांप्रसन्नोभूयात् ॥ ३५ ॥ एवमाभाषंतीकश्यपःप्रत्याहमैत्रेयःस्वगर्भस्यलोक्यालोकनीयाआशिषम्शुभमाशंसानांप्रवेपती

नमोरुद्रायमहतेदेवायोग्रायमीढुषे ॥ शिवायन्यस्तदंडायधृतदंडायमन्यवे ॥ ३४ ॥ सनःप्रसीदतांभामोभगवानुर्वनुग्रह
व्याधस्याप्यनुकंप्यानांस्त्रीणांदेवःसतीपतिः ॥ ३५ ॥ मैत्रेयउवाच ॥ स्वगर्भस्याशिषंलोक्यामाशंसानांप्रवेपती ॥ निहृ
तसंध्यानियमोभार्यामाहप्रजापति ॥ ३६ ॥ कश्यपउवाच ॥ अप्रायत्यादात्मनस्तेदोषान्मौहूर्तिकादुत ॥ तन्नियोगा
तिचारेणवालानांचातिहेलनात् ॥ ३७ ॥ भविष्यतस्तवाभद्रावभद्रेजावराधमौ ॥ लोकान्सपालांस्त्रींश्चंडौमुहुराक्रंद
यिष्यतः ॥ ३८ ॥

३६ भार्यांनिहृतःसंध्यायांयोनियमःसयस्यसःप्रजापतिःकश्यपआहउवाचैवं॥मेवाहचतुर्भिस्ते आत्मनःचित्तस्याप्रायत्या
दशुद्धिभावात्मौहूर्तिकान्संध्यामुहूर्तकालंसंबंधिनोदोषात्उतापिममनियोगःआज्ञातस्यातिचारोऽतिक्रमःतेनदेवानांरुद्रादीनां
हेलनादवज्ञानादपिच ॥ ३७ ॥ अभद्रौलोकामंगलकरावतएवजाठराधमौपुत्राधमौहेअभद्रेतवभविष्यतःजावरयोरभद्रत्वमेवविशदय
तिलोकानितिसार्द्धेनचंडौउदग्रौसपालान्लोकपालैःसहितान्त्रीन्लोकान्मुहुःपुनःपुनराक्रंदयिष्यतःरोदयिष्यतइत्यर्थः ॥ ३८ ॥

भा॰ तृ॰

॥ ८५४ ॥

स कश्यपः भार्याया दितेः विकर्मणि संध्यायां प्रतिसिद्धे रतिकर्मणि तं निर्बंधं वासोग्रहणरूपं विदित्वा दृष्टादिष्टाय दैवरूपेश्वराय नत्वा तया भार्य
या सह रहसि एकांते उपविवेश ॥ उपविवेशेत्यनेन मैथुनं लक्ष्यते ॥ ३० ॥ अथोपवेशानंतरं सलिलमुपस्पृश्य सलिले स्नात्वेत्यर्थः प्राणा
नायम्य नियम्य वाग्यतः धृतमौनः विरजं निर्विकारं ज्योतिः ज्ञानस्वरूपं सनातनं नित्यं ब्रह्म ध्यायन् अत्र विरजशब्देन सत्त्वपदार्थः
ज्योतिः शब्देन ज्ञानपदार्थः सनातनशब्देनानंतपदस्यार्थः स्फुरितः विरजशब्देन रजः कार्यविकाररहितस्य ज्योतिः शब्देन प्रका

स विदित्वाथ भार्यायास्तं निर्बंधं विकर्मणि ॥ नत्वा दिष्टाय रहसि तयाथोपविवेश ह ॥ ३० ॥ अथोपस्पृश्य सलि
लं प्राणानायम्य वाग्यतः ॥ ध्यायन्जजाप विरजं ब्रह्म ज्योतिः सनातनम् ॥ ३१ ॥ दितिस्तु व्रीडिता ते
न कर्मावद्येन भारत ॥ उपसंगम्य विप्रर्षिमधोमुख्यभ्यभाषत ॥ ३२ ॥ दितिरुवाच ॥ न मे गर्भमिमं ब्र
ह्मन्भूतानामृषभोवधीत् ॥ रुद्रः पतिर्हि भूतानां यस्याकरवमंहसम् ॥ ३३ ॥ शरूपत्वस्य सनातनशब्देन का

लपरिच्छेदराहित्यस्य चोक्तत्वात् ॥ जजाप एवंविधब्रह्मप्रतिपादकं प्रणवं जजापेत्यर्थः ॥ ३१ ॥ अथाध्यायशेषो दितिकश्यपयोरुत्तरप्रत्युत्तर
रूपेण प्रवृत्तस्तत्तावद्दितिरुवाचेत्याह ॥ दितिरिति ॥ तेन कर्मावद्येन कर्मदोषेण व्रीडिता लज्जिता दितिः हे भारत विदुर उपसंगम्य समी
पे आगत्याधोमुखी सती विप्रर्षिं कश्यपं प्रत्यभाषत उक्तवती ॥ ३२ ॥ भाषणमेवाह मेति हे ब्रह्मन् कश्यप भूतानामृषभः पतिः रुद्रः मे मम ग
र्भं मावधीत् नाहन्याद्धि यस्माद्भूतानां रुद्रः पतिस्ततः तस्य रुद्रस्याहमपराधमहमकरवं कृतवत्यतो मावधीदित्यर्थः ॥ ३३ ॥ ॥ ८५४ ॥

एवमन्वयव्यतिरेकाभ्यां न चरित्रमनिंद्यमित्युक्तम् तस्यापि॥ साच चर्या विडंबनमात्रमेवेत्याह॥ ब्रह्मादयो यत्कृतसेतुपाला इत्याद्युक्तिः रुद्रप्रशंसा
द्योतिनी ब्रह्मादयस्त्रय इति अतद्गुणसंविज्ञानो बहुव्रीहिः चित्रगुमानयेतिवत्॥ ब्राह्मणोर्वाचीना इत्यर्थः अन्यथा पूर्वापरविरोधात्॥ ब्रह्मणः
स्तुत्वं तदुक्तं नामधेयत्वं च प्रागुक्तं तेन ब्रह्मणो नमस्कार्यत्वं च वक्ष्यते ऽतो यथोक्त एवार्थः यद्वा ब्रह्मादयः पुलस्त्यपुलहमरीच्यादयः नव
ब्रह्माण इत्येते पुराणे निश्चयं गता इति तेषां ब्रह्मशब्दवाच्यत्वावगमात् यद्वा रुद्रशरीरकपरमात्मदृष्ट्येदमुक्तमित्यवगंतव्यम्॥ ब्रह्मा
दयो येन रुद्रेण कृताः सेतवः मर्यादास्ताम्पालयंतीति तनयाइदं विश्वं यत्कारणं यो रुद्रः कारणं यस्य तदिति बहुव्रीहिः विश्वं यत्कारण

ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं च माया॥ आज्ञाकरी तस्य पिशाचचर्या अहो विभूम्नश्चरितं विडंबनं॥२८॥ मैत्रेय उवाच॥ सैवं संविदिते भर्त्रा मन्मथोन्मथितेंद्रिया जग्राह वासो ब्रह्मर्षेर्वृषलीव गतत्रपा॥२९॥

मित्यर्थः रुद्रस्य विश्वसंहर्तृत्वात्तदभिप्रायेण विश्वं यत्कारणमित्युक्तं॥ माया च यस्याज्ञाकरी मायाहंकृतिस्तत्कार्यत्वात् यस्याज्ञाकरी अधिष्ठातृत्वात्तस्य विभूम्नो महीयसो रुद्रस्य पिशाचचर्यारू
पं चरितं विडंबनमनुकारमेव॥ अहो इत्याश्चर्ये॥ स्वतएवविधस्य महीयसः पिशाचचर्यानुकरणमाश्चर्यमित्यर्थः॥२८॥ एवमुक्ताहदिति
सतः किमकरोदित्यत आह॥ सेति॥ भर्त्रा कश्यपेनैवमुक्तप्रकारेण संविदिते ज्ञापिते सति मन्मथेन उन्मथितान्यानींद्रियाणि यस्याः सा
अतएव वृषलीव त्रपेव गतत्रया निर्लज्जा सती विप्रर्षेः कश्यपस्य वासो वस्त्रं जग्राह वासोग्रहीत्वा विचकर्षेत्यर्थः॥२९॥

ननु ब्रह्मज्ञाने कथं पिशाचवच्चरतोऽस्य चेरस्मात् किमाशंक्यते इत्यत्राह ॥ यस्येति ॥ यस्य रुद्रस्यानवद्यं निर्दुष्टमाचरितं मनीषिणः ॥ अविद्यायाः पटलं
मावरणं विभिन्नवः भेत्तुमिच्छवः ज्ञानार्थिन इत्यर्थः गृणंति कीर्तयंति ॥ आरोग्यं भास्करादिच्छेत् यदिच्छेत् हुताशनात् ॥ शंकराज्ज्ञानमन्विच्छेन्मोक्ष
मिच्छेज्जनार्दनादिति स्मृतेः तत्तत्फलविशेषार्थिभिरुपास्यत्वात्केवलं ज्ञानार्थिभिस्तच्चरितमुपादेयं इति न पिशाचवच्चरतीति सन्निंदनीयं नीयइति
भावः तर्हि किमर्थं स पिशाचवच्चरति तत्राह ॥ स्वयं निरस्तसाम्यातिशयोपि निरस्तं साम्यमतिशयश्च यस्मात्तथाभूतोपि सतां गतिः ॥ ज्ञानोपा
यः सन्पिशाचचर्यां चरति स्वोपासकैरपि जिज्ञासुभिरेवं वर्तितव्यमिति तच्छिक्षार्थं पिशाचचर्यां चरतीति भावः तथा च श्रुतिः यथाक्र

यस्यानवद्याचरितं मनीषिणो गृणंत्यविद्यापटलं विभित्सवः ॥ निरस्तसाम्यातिशयोपि यः स्वयं पि
शाचचर्यामचरद्गतिः सतां ॥ २८ ॥ हसंति यस्याचरितं हि दुर्भगाः स्वात्मन्नरतस्याविदुषः सम
वीहितम् ॥ यैर्वस्त्रमाल्याभरणानुलेपनैः श्वभोजनं स्वात्मतयोपलालितम् ॥ २९ ॥

तुरस्मिंल्लोके पुरुषो भवतीति निरस्तसाम्यातिशयत्वं च ज्ञानप्रदत्वेवेदितव्यं प्रकरणत्वात् ॥ यद्वेतत्सर्वं रुद्रशरीरकपरमात्मद्दृष्ट्योक्तमिति वेद
दितव्यम् ॥ २८ ॥ एवमन्वयमुखेन मच्चरित्रस्यापि तस्यानिंद्यत्वमुक्त्वा व्यतिरेकमुखेनाप्याह हसंतीति ॥ स्वात्मनि रतस्य स्वात्मानुभवैकनिष्ठस्य
समीहितं चेष्टितमविदुषः आर्षत्वाच्छांदसमयेनक्तिनीया ॥ अविद्वांसः यस्य रुद्रस्याचरितं हसंति निंदंति ते नु दुर्भगाः ॥ के ते विद्वांसः ॥ एतस्याचरितं
हसंतीत्यत्राह ॥ यैः कर्तृभिः वस्त्रादिभिः करणैः श्वभोजनं शुनां भोज्यं स्वशरीरं स्वात्मतया स्वात्माभिमतत्वेनोपलालितं ॥ अयं देह एवात्मेति बुद्ध्या दे

किंच ॥ श्मशानेषु यच्चक्रं अनिलः वात्या तेन यो धूलिस्तेन धूम्रा विशीर्णा विक्षिप्ता विद्योता विद्योतमाना श्रिया जटाः तासां कलापः समूहो यस्य सः भ
स्मनावगुंठः अवलिप्तः अमलः रुक्मवद्देहो यस्य सः देवः रुद्रः त्रिभिर्नेत्रैरिति शेषः पश्यति सर्वं साक्षात्करोति तस्य दर्शनाविषयप्रदेशो नास्तीति
भावः पश्यतु देवस्तथापि तमनादृत्य प्रवर्त्ते इत्यत्राह ॥ स तु रुद्रस्ते देवरः त्वद्भगिन्या उमायाः पतिरित्यर्थः ॥ ननु पतिभ्रातृत्वं तद्दर्शं भवान् ॥ क
श्यपाद्धिमगिरिपुत्रः ननु ब्रह्मपुत्रः स्वजनत्वादादरणीय इति भावः ॥ यद्वा एकस्य जामातरः परस्परं भ्रातर इति व्यवहारः तेन हेतुना देवर इ
त्युक्तं ॥ २४ ॥ यदि हि स्वजनत्वादादरणीयस्तर्हि तत एव स्वजनानामस्माकं सर्वं क्षमेतैव रुद्र इत्यत्राह ॥ नेति ॥ यस्य रुद्रस्य स्वजनः परः ॥ अस्वज

श्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योतजटाकलापः ॥ भस्मावगुंठामलरुक्मदेहो देव
स्त्रिभिः पश्यति देवरस्ते ॥ २४ ॥ न यस्य लोके स्वजनः परो वा नादृतो नोत कश्चिद्विगर्ह्यः
वयं अतो यच्चरणापविद्धामाशास्महे जांबवतमुक्तभोगाम् ॥ २५ ॥ ॥ ॥ ॥

नो वा लोके नास्ति नाप्यनीवादरणाविषयः कश्चिद्विगर्ह्यः ॥ निंद्योपि नेनास्त्येव प्राकृतस्य हि विषमदृष्टेः स्वर्थापेक्षिणः स्वजनादिविभा
गः अस्य तु समदृष्टेरुपेक्षितसांसारिकलोकवद्विभक्तेनैस्वजनादिविभागोस्तीति भावः ॥ एतदेवाह वयमिति सांसारिकाभिप्रायेणैव यमित्यु
क्तं तत्वदर्शिनोपि स्वस्य तन्मंडलस्थत्वादयं संसारिणः ॥ लोकाः यस्य रुद्रस्य चरणाभ्यामपविद्धां निर्मोल्यवद्दूरतः परित्यक्ताम् ॥ तेन भुक्त
भोगाम् जांमायां तन्मयां विभूतिं अतैर्नानाविधैश्वर्यसाधनैराशास्महे प्रार्थयामहे ॥ २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भा॰त॰

॥ ए९२ ॥

नामुक्त्वा विघ्नोपकर्त्री त्वां कार्त्स्न्येन नानुकर्त्तं प्रत्युपकर्त्तं हे गरहे स्वरि पुरुषायुषापि वा न प्रभवः न समर्थाः त्वमस्मेपि गुणग्रथ्नव गुणैः कांतिगुणैः
गुणग्रदर्शिनं इति या वत् ॥ तेपि पूर्णेनाघ्यायुषावा प्रश्चाद्य जन्मांतरैरपि न प्रभवं इत्युक्तं ॥ २० ॥ अथापि त्वद्रुपासनानुरूपेण उपकर्त्तुमशक्यत्वेपि
ते प्रजात्से प्रजननाय पुत्रोत्पत्तये इति यावत् ॥ यः कामः तमेनं कामममलं पर्याप्तं करवाणि यथाहं ते मां प्रति त्वं नाति प्रशंसं च ॥ नीमः वसित याकर
वाणि एवं किं तु मुहूर्तं मुहूर्तं कालं प्रतिपालय प्रतीक्षस्व ॥ २१ ॥ किमर्थं मुहूर्तं प्रतीक्षणं इत्याशंकायां तस्य मुहूर्तस्य रसमनुपयुक्ततां कथयति

नवयं प्रभवस्त्वां त्वामनुकर्तुं गरहे स्वरि ॥ अप्यायुषा वा कार्त्स्न्येन ये चान्ये गुणगृध्नवः ॥ २० ॥ अथापि काममेतं ते
प्रजात्यै करवाण्यलम् ॥ यथा मां नातिवोचंति मुहूर्तं प्रतिपालय ॥ २१ ॥ एषा घोरतमा वेला घोराणां घोरदर्शना
चरंति यस्यां भूतानि भूतेशानुचराणि ह ॥ २२ ॥ एतस्यां साधिसंध्यायां भगवान् भूतभावनः ॥ परीतो भूतप
र्षद्भिर्वृषेणाटति भूतराट् ॥ २३ ॥

एषेति ॥ एषा वेला घोरतमा उग्रतमा घोराणामपि घोरदर्शना घोरदृश्यतइति तथा ॥ यस्यां संध्या
वेलायां भुतेशो रुद्रस्तस्यानुचराणि भूतानि प्रमथाख्यभूतानि चरंति संचरंत्यतोऽपि नापमवत्सरइति भावः ॥ २२ ॥ चरंति चेद्भूतानि
तर्हि तत्संचारविषयप्रदेशो वर्जनीय इत्यत्राह ॥ एतस्यामिति ॥ हे साध्वि एतस्यां संध्यायां भूतभावनो भूतानां सर्वजीवानां भावयति सु
खमिति तथा भगवान् भूतराट् रुद्रः भूतपरिषद्भिः प्रथमगणैः परीतः परिवेष्टितः वृषेण स्ववाहनभूतेन वृषभेण नंदिकेश्वरे
ण सहाटति चरति ॥ २३ ॥ ॥ ए९२ ॥

उक्तिमेवाह एवत इत्यादिना ब्रह्मा इयोयत्नेन सेतुपालादिसंतेन अत्र संध्याकालक्षेपाय भार्या प्रशस्तेति ॥ एषत इति पंचभिः हे भीरु यद्दिक्षुमि
तिप्रियं प्रीति विषयं नेतुमहं विधास्यामिक रिष्यामि तस्मात् तादृशाया भार्यायाः काममभिलषितं को न कुर्यात्सर्वोपि कुर्यात् एवेत्यर्थः कीदृशी
चासौ यस्याः काम सर्वैः कुर्यादित्यत्राह ॥ त्रिद्विरिति ॥ यतः यस्याः यस्याः शकाशात् त्रैवर्गिकी धर्मार्थकामरूपा सिद्धिः फलं भवेदित्यर्थः ॥ १६॥
यदं परया तुरीयपुरुषार्थे पि भार्यातः सिध्यतीत्याह ॥ कलत्रवा भार्यावानुरूपः स्वाश्रमेणासर्वाश्रमानितरान् त्रीनाश्रमानुपादायोपजीव्य स
र्वाश्रमोपकारको गृहस्थाश्रम इति भावः व्यसनं इंद्रियाणां विषयप्रावण्यरूपं दुःखमेवार्णवस्तत्प्रमेतितरति ॥ तत्र दृष्टांतः जलयाने
केरयप उवाच ॥ एषते हं विधास्यामि प्रियं भीरु यदिच्छसि ॥ तस्याः कामं न कः कुर्यात्सिद्धिस्त्रैवर्गिकी यतः ॥ १६॥ सर्वा
श्रमानुपादाय स्वाश्रमेण कलत्रवान् ॥ व्यसनार्णवमत्येति जलयानैर्यथार्णवम् ॥ १७॥ यामाहुरात्मनो ह्यर्धं श्रेयस्काम
स्य मानिनि ॥ यस्यां स्वधुरमध्यस्य पुमांश्चरति विज्वरः ॥ १८॥ यामाश्रित्येंद्रियारातीन्दुर्जयानितराश्रमैः ॥ वयं जयेम हेलाभि
र्दस्यून्दुर्गपतिर्यथा ॥ १९॥
र्णवमिवार्णवं समुद्रं यथेति ॥ इंद्रियजयादिद्वारा तुरीयपुरुषार्थसाधनभूतायामीत्यर्थः ॥ १७॥ यामिति श्रेयस्का
मस्य स्वर्गापवर्गाख्यश्रेयस्कामस्यात्मनो बुद्धिमिमनेन स्वर्गापवर्गसाधनेषु द्वयोः सहाधिकारित्वं सूच्यते ॥ यच्छद्वानां तां त्वामिति तृतीय श्लोके
स्थित च्छदेनान्वयः ॥ यस्यामपि तस्यां स्वस्य धुरं दृष्टकर्मभारं दृष्टादृष्टकर्मभारं अध्यस्य निक्षिप्य विज्वरः निश्चिंतः पुमान्चरति ॥ १८॥ यो पत्नीमा
धा२ श्रित्येतराश्रमैर्ब्रह्मचर्याश्रमैर्दुर्जयान् जेतुमशक्यानिंद्रियाण्येवारातयः शत्रवस्तान्हेलाभिर्लीलाभिर्वयं जयेम तत्र दृष्टांतः दुर्गपतिर्दस्यून्

भा.र.
॥९१॥

यदस्यां जायते पुनरिति श्रुतिप्रसिद्धिं द्योतयति॥ इदमेव तद्दृहमानं यत्स्वभार्यायां पतिः प्रजारूपेण जायते इति भावः॥११॥ किंच पुरा पूर्वकाले योऽस्मा
कं पिता दुहितृवत्सलः पुत्रीषु वात्सल्यवान् दक्षः अस्मान् प्रति पृथक् प्रत्येकं हे वत्से कं वरं वृणीते इत्यपृच्छत्॥१२॥ स संतानं भावयति वर्द्धयतीति संतान
भावनो दक्षः आत्मजानां दुहितॄणां न॥ भावमभिप्रायं विदित्वा ज्ञात्वा तासामात्मजानां मध्ये या सा तत्तत्शीलं स्वभावमनुव्रताः ता अस्मान् त्रयोदश अददत्
त्रयोदशानामप्यस्माकं त्वयि भावसाम्येऽपि तत्र वैषम्याचरणमनुचितमित्यभिप्रायः॥१३॥ अथ तत्र हे काश्यप हे कल्याण मंगलरूप मे मम का

पुरा पिता नो भगवान् दक्षो दुहितृवत्सलः॥ कं वृणीत वरं वत्सा इत्यपृच्छत नः पृथक्॥१२॥ स विदित्वा
त्मजानां नो भावं संतानभावनः॥ त्रयोदशाददत्तासां यास्ते शीलमनुव्रताः॥१३॥ अथ मे कुरु कल्याण
काममेकं जविल्लोचन॥ आर्तोपसर्पणं भूमन्नमोघं हि महीयसि॥१४॥ मैत्रेय उवाच॥ इति तां वीरमा
रीचः कृपणां बहुभाषिणीम्॥ प्रत्याहानुनयन् वाचा प्रवृद्धानंगकश्मलाम्॥१५॥ म अभिलषितं कुरु हे कं

लोचन हे भूमन् महत्तम॥ महीयसि महत्तरे पुरुषे आर्तानामुपसर्पणं अनुष्ठितं अमोघं भवति॥१४॥ एवमुक्तः काश्यपः किमाहेत्यत्रा
ह॥ इतीति॥ इत्युक्तरीत्या बहुभाषिणीं कृपणां दीनां दितिं प्रति वीरो मारीचः जितेंद्रियः कान्यपः प्रवृद्धोऽनंगः कामस्तेन कश्मलो मोहो
यस्यास्तां वाचाऽनुनयन् सांत्वयन् प्रत्याह प्रत्युवाच॥१५॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ ॥९१॥

तमेव इतिहासं प्रस्तोष्यन् तदुपोद्घातरूपमितिहासं प्रस्तौति ॥ दितिरित्यादिना ॥ दक्षस्यापत्यं स्त्री दाक्षायणी दितिः दितिनाम्नी हेतुना ततः मरीचं मरीचेः
पुत्रं कश्यपं पतिं भर्त्तारं स्वयमपत्यं कामयमाना हृच्छयः कामः तेन पीडिता अत एवं संध्यायां चकमे कामितवतीत्यर्थः ॥ ७ ॥ कथंभूतं चकमे इत्य
त आह ॥ हुत्वेति ॥ यजुषां यज्ञानां पतिं पुरुषं परमपुरुषमग्निजिह्वमग्निशरीरकं हुत्वा अर्के सूर्ये निम्लोचति अस्तं गच्छति सति अग्न्यागारे अग्निहो
त्रशालायामासीनमुपविष्टं समाहितचित्तं च ॥ ८ ॥ तदुक्तिमेवाह ॥ एष इत्यादिना ॥ एष मे कुर्वि त्सते न हे विद्वन् कांक्ष्यपात्वं उपात्तं शरशरासनं धनु
र्येन स एवं कामः त्वत्कृते त्वदर्थं सामसहं गतस्यर्थे दीनां कृपणां मां विक्रम्य दुनोति परितापयति पीडयति वा ॥ अत्र दृष्टान्तः रंभां कदलीम

दितिर्दाक्षायणी क्षत्तर्मारीचं कश्यपं पतिं ॥ अपत्यकामा चकमे संध्यायां हृच्छयार्दिता ॥ ७ ॥ हुत्वाग्निजिह्वं पयसा पुरुषं यजुषां
पतिं ॥ निम्लोचत्यर्क आसीनमग्न्यागारे समाहितं ॥ ८ ॥ दितिरुवाच ॥ एष मां त्वत्कृते विद्वन्काम आत्तशरासनः ॥ दुनोति दीनां
विक्रम्य रंभामिव मतंगजः ॥ ९ ॥ तद्भवान् दह्यमानायां सपत्नीनां समृद्धिभिः ॥ प्रजावतीनां भद्रं ते मय्यायुंक्तामनुग्र
हम् ॥ १० ॥ भर्त्तर्याप्तोरुमानानां लोकानाविशते यशः ॥ पतिर्भवद्विधो यासां प्रजया ह्यनुजायते ॥ ११ ॥ मतंगजो गज इवेति

॥ ९ ॥ तत्तस्मात्प्रजावतीनां सपत्नीनां समृद्धिभिः दह्यमानायां मयि भवाननुग्रहमनुकंपां कुर्यात् ते तुभ्यं भद्रं मंगलमस्तु ॥ १० ॥ भर्त्तरि भर्त्तुः सकाशा
द्विभक्तिव्यत्यय आर्षः आप्तोरुमानानां प्राप्तबहुमानानां स्त्रीणां यशः लोकानपि आविशते लोकेषु विस्तृतं भवतीत्यर्थः ॥ कीदृशां तदुरमा
नमित्यपेक्षायां तद्विशदयति ॥ भवद्विधः भवादृशः पतिर्भर्त्ता यासां मादृशां स्त्रीणां प्रजया प्रजारूपेणानुजायते ॥ हि शब्दः तज्जाया भवति

संक्षेपतः ॥ तत्कथाश्रवणेन नष्टविमलमनस्समुद्धृतं हस्तद्वयमेकीकृत्य उद्धतः अंजलिः परमामुद्राख्यातिप्रं देवप्रसादिनी मुद्रा विधेये नत्वा विदुरः पप्रच्छ एष वा
न ॥ १ ॥ प्रश्नप्रकारमेवाह द्वाभ्यां ॥ तेनेति ॥ श्रुतोपजीवनेन प्रश्नावतारद्योतनाय उक्तमनुवदन् पृच्छति विदुरः तेनेति हे मुनिश्रेष्ठ मैत्रेय तेनैव येन भूमिरुद्धृ
ता तेनैव यज्ञशरीरेण हरिणा आदिवराहेण आदिदैत्यो दैत्यानां प्रथमः वराहकल्पस्यापेक्षया प्रथमम चविवृत्तिं हिरण्याक्षः हतः आदिवराहेण
निहित इत्यनुशुश्रुम श्रुतवन्तो वयम् ॥ २ ॥ प्रश्नं पृच्छति ॥ तस्येति ॥ स्वदंष्ट्राग्रेण क्षौणीं भूमिं लीलया उद्धरतस्तस्यादिवराहस्य हिरण्याक्षस्य च मृधः
युद्धं कस्माद्धेतोरभूत् किं तत्सुदृढमिमित्तमित्यर्थः ॥ ३ ॥ एवमापृष्टो मैत्रेयः सविस्तरं तत्कथां प्रस्तोष्यन् तावत्प्रश्नमभिनन्दति साधिति द्वाभ्यां हे वीर त्वया

विदुर उवाच ॥ तेनैव तु मुनिश्रेष्ठ हरिणा यज्ञमूर्तिना ॥ आदिदैत्यो हिरण्याक्षो हत इत्यनुशुश्रुम ॥ २ ॥ तस्य चोद्धरतः क्षौणीं स्वदंष्ट्रा
ग्रेण लीलया ॥ दैत्यराजस्य च ब्रह्मन् कस्माद्धेतोरभून्मृधः ॥ ३ ॥ मैत्रेय उवाच ॥ साधु वीर त्वया पृष्टमवतारकथां हरेः ॥ यत्त्वं
पृच्छसि मर्त्यानां मृत्युपाशविशातनीं ॥ ४ ॥ ययोत्तानपदः पुत्रो मुनिना गीतयार्भकः ॥ मृत्योः कृत्वैव मूर्ध्न्यङ्घ्रिमारुरो
ह हरेः पदं ॥ ५ ॥ अथात्रापीतिहासोऽयं श्रुतो मे वर्णितः पुरा ॥ ब्रह्मणा देवदेवेन देवानामनुपृच्छताम् ॥ ६ ॥

साधु पृष्टं साधु त्वं कुतः मर्त्यानां मरणशीलानां मृत्युपाशं विशातयति मोचयतीति मृत्युविपाशातनीं तां हरेरवतारकथां त्वं पृच्छसि ॥ ४ ॥ यया मुनिना
नारदेन यया भगवत्कथया उत्तानपदः पुत्रोऽर्भकः ध्रुवः मृत्योर्मूर्ध्नि अङ्घ्रिं कृत्वा पादं विन्यस्य हरेः पदं स्थानं प्रति ध्रुवगतिमारुरोह आरूढवान् ॥ ६
हृष्टो भगवत्कथाप्रश्नः साधिति पृष्टमित्यभिप्रायः ॥ ५ ॥ एवं प्रश्नमभिनन्द्य हिरण्याक्षस्य हन्तारं वक्ष्यन् तस्य सांप्रदायिकत्वमाह ॥ अथेत्यनु हे विदुर अत्रा
पि त्वया पृष्टेऽर्थेऽपि अयं इतिहासः मे मया श्रुतः कुतः इत्यपेक्षायामाह ॥ देवानामपि देवेन ब्रह्मणा चतुर्मुखेनानुपृच्छतां देवानां पुरा पूर्वकाले वर्णितः

॥ ९० ॥

किं तस्मादेवेत्यत आह ॥ न तेषामिति ॥ सकलाशिषां सर्वपुरुषार्थानां प्रभौ दातरि तस्मिन्भगवति प्रसन्ने सति दुर्लभं दुर्लभ्यं किमस्ति किमपि नास्तीत्यर्थः ॥ अतो
लवात्मभिः तुच्छाभिः ताभिराशीर्भिरलं यद्यपि सुलभास्तथापि न प्रार्थनीया इति भावः । न चैतावता तत्तद्भजनस्य विफलत्वं शंकनीयमित्याह ॥ अनन्य
दृष्ट्या एकांतभक्त्या स्वात्मशरीरकवुद्ध्येत्यर्थः ॥ भजतां निजतां गुहाशयः हृदये कुहरे निविष्टः ॥ परः परमपुरुषः ॥ स्वयं परां निरतिशयां स्वगतिं स्व
प्राप्तिं विधत्ते संपादयति ॥ ५० ॥ अतो निरतिशयपुरुषार्थसाधनभूतां कर्णरसायनां पवित्रां कथां शृण्वत्तरेतरं विना को नाम तृप्येदित्याह ॥ क
इति ॥ पुरुषार्थानां धर्मादीनां सारं चेतीति तथा ॥ धर्मस्याप्यपवर्गस्य नार्थोर्थायोपकल्प्यत इति प्रथमस्कंधोक्तरीत्या पुरुषार्थसाराभिज्ञः को ना

तस्मिन्प्रसन्ने सकलाशिषां प्रभौ किं दुर्लभं ताभिरलं लवात्मभिः ॥ अनन्यदृष्ट्या भजतां गुहाशयः स्वयं विधत्ते स्वगतिं परः परां
५० ॥ को नाम लोके पुरुषार्थसारवित्पुराकथानां भगवत्कथासुधां ॥ आपीय कर्णांजलिभिर्भवापहामहो विरज्येत विना
नरेतरं ॥ ५१ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे ए व्यह णां मत्रयोदशोध्यायः ॥ १३ ॥ श्रीशुक उवाच ॥ निशम्य
कौषारविणोपवर्णितां हरेः कथां कारणसूकरात्मनः ॥ पुनः पप्रच्छ तमुद्यतांजलिर्न चातितृप्तो विदुरो धृतव्रतः ॥ १ ॥

मपुराकथानां पूर्वश्रुतानां मध्ये भगवत्कथैव सुधा तां कर्णावेवांजलयः तैरापीय समंतात्पीत्वा किंभूतां भगवत्कथासुधां भवापहां संसारनिवर्तनीं नरे
तरं पशुं विना कः विरज्येत न कोपि विरक्तो भवेदित्यर्थः अहो इति भगवच्चरित्रस्यात्याश्चर्यद्योतकमव्ययं ॥ ५१ ॥ इति तृतीये त्रयोदशः ॥ १३ ॥ एवं संग्र
हेण श्रुतवराहचरितो विदुरः पुनस्तच्चरित्रांतर्भूतहिरण्याक्षवधवृत्तांतविस्तरवुभुत्सया पृच्छतीत्याह भगवान् शुकः निशम्येति ॥ कौषारविणा
मैत्रेयेणोपवर्णितां कारणसूकरात्मनो हरेः कथां निशम्य श्रुत्वा धृतव्रतः ॥ धृतं व्रतं भगवत्कथाशुश्रूषारूपं व्रतं येन स अत एव न चातितृप्तः

भा.त.

॥८९॥

एवंकृतार्थंतांदिदृक्षाप्यप्रकृतंभगवत्कर्मणोऽचिंत्यत्वंव्यतिरेकमुखेनवदंतःतस्यभगवतोनुग्रहंप्रार्थयंते॥सर्वाइति॥अपारकर्मणःजगत्स्रष्टा
धुनेनआपारस्तत्ववकर्मणांपारमवधिंयःईषतेकांक्षतिज्ञातुमिच्छतीत्यर्थःसवैभ्रष्टमतिः॥अपाराणांकर्मणांपारंजिज्ञासुर्बुद्धिहीनइत्यर्थः
हेभगवन्नस्मात्तवयायोगमायातस्यांवधीनाविचित्रसर्गकारिणीशक्तिस्तस्यायेगुणाःसत्वादयस्तेषांयोगेनसंबंधेनमोहितंसमस्तंविश्वंश
मविशिष्टंसुखंयथाभवतितथेतिक्रियाविशेषणंवाविधेहिकुरु॥४६॥एवंस्तुतःप्रार्थितोभवान्किंकृतवानित्यत्राहइतीति तैर्ब्रह्मवा
दिभिःवेदतुल्यवाक्यानिभाषद्भिर्मुनिभिर्मरीच्यादिभिरित्युक्तप्रकारेणउपस्थीयमानःसमीपस्थैःस्तूयमानःअवितारक्षिताभगवान्स्व

सवैवतभ्रष्टमतिस्तवैषतेयःकर्मणांपारमपारकर्मणः॥यद्योगमायागुणयोगमोहितंविश्वंसमस्तंभगवन्विधेहिशं॥४६॥
मैत्रेयउवाच॥इत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः॥सलिलेस्वखुराक्रांतउपाधत्तावितावनीम्॥४७॥सइत्थंभग
वानुर्वींविष्वक्सेनःप्रजापतिः॥रसायाल्लीलयोन्नीतामप्सुन्यस्यययौहरिः॥४८॥यएवमेतांहरिमेधसोह
रेःकथांसुभद्रांकथनीयमायिनः॥शृण्वीतभक्त्याश्रवयेतवोशतींजनार्दनोऽस्याशुहृदिप्रसीदति॥४९॥

स्वखुराक्रांतेसलिलेःवर्नीभूमिंउपाधत्तस्थापयामासेत्यर्थःस्वखुराक्रांतइत्यनेनविग्रहस्यानुत्तत्वंसूच्यते॥४७॥वराहावतारकथाउ
पसंहरति॥सइति॥प्रजापतिःप्रजानांसंरक्षकःभगवान्पूर्णोषड्गुणोविष्वक्सेनःसवराहःहरिर्लीलयाक्रीडयारसायाःसकाशादुन्नीतांमु
धृतांउर्वींभूमिमप्सुन्यस्यप्रतिष्ठाप्ययथावंतर्दधेइत्यर्थः॥४८॥एतत्कथाश्रवणफलमाह॥यइति॥वर्णनीयाश्चर्यशक्तिमतःहरिमेधसः
यद्विषयामेधाहरतिसंसारंतस्यहरेः॥भगवतोवराहस्यसुभद्रांसुमंगलांउसतींकमनीयांपविचित्रांएवमुक्तप्रकारेणयः॥शृणुवीतशृणुया

तंश्रावयेतवातस्यहृदिजनार्दनःआशुप्रसीदति ॥४९॥

॥८९॥

ताभिप्रेतं विज्ञापयंतो नमस्कुर्वंति ॥ सतस्थुषां सस्थावराणां जगतां जंगमानां लोकाय यस्या पत्न्यार्थं तव पत्नीं जगतां मातरमेनां भूमिं संस्थापय
प्रतिष्ठापय यतस्त्वं जगतां पितासि पालको जनकश्चासि एवं सति त्वस्थिताः संतो वयं तव यापि त्वा सहास्मै मात्रे नमसा विधेम नमस्कारिष्या
म नमस्कारिणः परिचरेमेति स्वतेजोधारणशक्तिं याज्ञिका मंत्रतोग्निमरणाविव मंथनकाष्ठे इव यस्यां भूमावधाः निहितवानसि ॥४२
एवं स्वाभिप्रेतं विज्ञाप्य स्वकृतार्थतामाविष्करिष्यंतः तस्य भगवतो नत्वा विविधविचित्रश्लोकैः स्तुवकमैं तरेरचिंत्यमित्याहुः कइतिहे
प्रभो अन्यतमइतरः साकृतः कः पुरुषस्तव रसातलं प्रतिगताया भुवः उद्विवर्हणं उद्धरणं श्रद्दधीत इदमिति चिंतयितुमुत्सहेत अस्या

संस्थापयैनां जगतां सतस्थुषां लोकाय पत्नीमसि मातरं पिता ॥ विधेम चास्यै नमसा सह त्वया यस्यां स्वतेजोग्निमिवारणावधाः ॥४३॥
कः श्रद्दधीतान्यतमस्तव प्रभो रसां गताया भुव उद्विवर्हणं ॥ न विस्मयोसौ त्वयि विश्वविस्मये यो माययेदं ससृजेऽतिविस्मयं ॥४४॥
विधुन्वता वेदमयं निजं वपुर्जनस्तपः सत्यनिवासिनो वयं ॥ सटाशिखोद्धूतशिवांबुविंदुभिर्विमृज्यमाना भृशमीश पाविताः ॥

श्चर्यं तेन कोपि निर्वक्तुं प्रभवेदित्यर्थः ॥ त्वयि पुनरसौ विस्मयो न भवति यतो विश्वविस्मयः विश्वे सर्वे विस्मयाय यस्मिन् विश्वस्य विस्मयो वा यस्मि
न्स विस्मयः एवंभूतो यो भगवान्स्वस्य मायया आश्चर्यशक्त्या अतिविस्मयमत्याश्चर्यमिदं जगत्ससृजे सृष्टवान् अचिंत्यविचित्रसंनिवेशं
जगत्सृजतस्तव तत्तवेदं भुव उद्विवर्हणं कियदाश्चर्यकरमितिभावः ॥४४॥ स्वकृतार्थतामाविः कुर्वंति विधुन्वतेति हे ईश वेदमयं नि
जं वपुः शरीरं वितन्वता कंपयता त्वया कर्त्रा सटानां शिखाभिरग्रैरुद्धूता उच्चलिताः ते च ते शिवांबुविंदवः तैः करणैर्विमृज्यमानाः जन

स्तपः सत्यनिवासिनो वयं पाविताः पवित्रीकृताः कृ
तार्था अभूमेति भावः ॥४५॥

भा.टी.
॥८८॥

रूपं ज्ञानं यस्मात्तस्मै अन्यपदार्थप्रधानबहुव्रीहिबलात्तस्य संबंधसामान्यस्य प्रसादयितृत्वप्रसादनीयत्वरूपविशेषे पर्यवसानं ततश्च वैराग्या
दिनिष्पाद्यध्रुवानुस्मृत्यात्मकं ज्ञानं यस्मात्स इत्युक्तेषां चिद्गुक्तिरस्मेषामप्युपलक्षणार्था एवं चानेन विवेकादिसाधनसम्पन्नकांतर्भूतवि
मोक उच्यते ॥ भक्तिशब्देन च क्रिया आत्मजयशब्देनानुदर्पः यं च केषांचिद्गुक्तिरस्मेषामप्युपलक्षणार्था ॥ एवं चानेन विवेकादिसाधनसम्पन्न
कोनुनिष्पाद्यभगवत्प्रसादहेतुभूतध्रुवानुस्मृतिबोधकस्योत्तरभागस्य भगवत्परत्वसिद्धिः विद्यागुरवइत्यनेनन्यासविद्याप्रतिपाद
कोत्तरभागैकदेशानुदृष्टपदं हरणानामपि तत्परत्वमुक्तं ॥ विधीगुरवेन्यासविद्याप्रवर्तितइत्यर्थः न्यासविद्याप्रवर्तितत्वं भगवद्वराह
रामकृष्णावतारेषु वराहपुराण श्रीरामायणश्रीभागवद्गीतादिषु प्रसिद्धम् ॥ अत्रापि गुणभेदविशिष्टाकारभेदात्त्वमसोढित्
रंष्ट्राग्रकोट्या भगवंस्त्वया धृता विराजते भूधर भूः सभूधरा ॥ यथा वनान्निःसरतोदता धृतामतंगजेंद्रस्य सपंकपद्मिनी
॥४१॥ त्रयीमयं रूपमिदं च सौकरं भूमंडलेनाथ दता धृतेन ते ॥ चकास्ति शृंगोढघनेन भूयसा कुलाचलेंद्रस्य यथैव विभ्रम
॥४२॥
कि एवं भागद्वयात्मकवेदवेद्यं भगवंतं नमस्कृत्य स्वाभीष्टं विज्ञापयिष्यंतः प्रकृतवराहावतारचरित्रं तदवतारसौष्ठवं च विज्ञापयंति
द्वाभ्यां ॥ दंष्ट्राग्रेति हे भगवन् त्वया कर्त्रा दंष्ट्राग्रकोट्याकरणेन सभूधरा सपर्वता भूर्मही धृता सती विराजते हे भूधर भूधरैः तत्र दृष्टांतः यथैव
नाज्जलान्निःसरतःनिर्गच्छतःमतंगजेंद्रस्य गजश्रेष्ठस्य दताग्रेण धृता पंकयुक्तपद्मिनी विराजते तद्वदित्यर्थः अभूतोपमेयं न हि क्वचिदपि
पद्मिनीगजदंतेनोद्धृता दृष्टा ॥४१॥ त्रयीमयमिति ॥ हे नाथ दताग्रेण धृतेन भूमंडलेन तेतव इदं त्रयीमयं मवयवत्वेन रूपितवेदविहितकर्म
प्रचुरमिदं सौकरं रूपं च काश्ति शोभते ॥ अत्र दृष्टांतः भूयसा विपुलेन शृंगोढघनेन शृंगेणोढो धृतो घनो मेघस्तेन कुलाचलेंद्रस्य कुलाचल

॥८८॥

द्रप्रयोगात्तत्स्वयज्ञरूप ॥ क्रतुरनुष्ठेयं कर्म यस्माराधनं स सर्वयज्ञ इत्यर्थः ॥ इष्टिर्यजमानमनुष्ठानं तद्देवत्वं धनं मध्यकायप्रवेशो यस्य स त्वं इत्यर्थः
शर्ध ॥ एवं मंगद्वयात्मकवेदपूर्वभागविहितयज्ञतद्गानि सुमत्वेन प्रहृतं भगवद्वाहतन्त्ववयवत्वेन रूपयित्वा भगवतो भागद्वयात्म
कवेदनतुरूपं हृहणरूपत्वर्निवेद्यतापतिपिपादयिषया पूर्वभागोदितयज्ञतद्देवयवानां भगवच्छरीरतां नद्धारा धनरूपतां उत्तरभागोदितन्या
सोपासनानां चतस्माद्देतुत्वेन तस्मापि भागस्य भगवत्परतां च वदंतो नमस्कुर्वंति ॥ नमो नमस्ते ॥ तेनु मंनमो नमः आदराद्विरुक्तिः यद्वा
पूर्वभागवेद्यत्वनद्रूपं हृं हरणवेद्यत्वरूपगुणमेव विशिष्टाकारभेदान्तरपेक्षया नमस्तो द्विरुक्तिः कथंभूताय ते क्रियात्मने क्रैया आत्मा श
रीरं यस्य तस्मै ॥ यद्वा क्रियाया आत्मा तस्मै इत्यर्थः ॥ अनेन तस्मात् ज्ञानादीनां क्रियात्मत्वमुक्तं सर्वक्रतवे सर्वक्रतुशरीरायेत्यर्थः ॥ अनेन
नमो नमस्तेऽखिलमंत्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने ॥ वैराग्यभक्त्यात्मजयानुभावितज्ञानाय विद्यागुरवे नमो नमः
श्रोन यज्ञात्मत्वमुक्तं यज्ञसाधनानामपि तदात्मकत्वमुच्यते ॥ अखिलं मंत्रदेवताप्रकाशिकानि वेदवाक्यानि देवता उद्देश्यविशेषा इंद्रादयो द्र
व्याणि आज्यदधिपयसोमादीनि अखिलानि मंत्रदेवताद्रव्याणि यस्य तस्मै अखिलमंत्रादिशरीरायेत्यर्थः तत्र मंत्रप्रकाशितत्वं तद्द्रव्यदेवता
विष्याद्ययागहोमादिक्रियाबोधकपूर्वभागशरीरत्वाच्च कृत्स्नस्य शरीरपर्यंतत्वन्यायेन भगवत्परत्वमुक्तं भवति यज्ञानां भगवच्छरीर
त्वं बृहदारण्यके माध्यंदिनपाठे यस्यात्मा शरीरमित्यारभ्य यस्य यज्ञाः शरीरमिति श्रुतं गुणक्रियाणामपि शरीरत्वमाश्रयद्वारेणोपपन्नमि
त्यभिप्रेतं ॥ एवं पूर्वभागस्य भगवत्परत्वमुक्तं अथोत्तरभागस्य तत्परत्वं वक्तुं तं विशिनष्टि वैराग्येति वैराग्यं शब्दादिविषयेष्वनासक्तिः
भक्तिः श्रवणकीर्तनस्मरणार्चनवंदनादिरूपा साधनभक्तिः आत्मयोऽन्तःकरणजयः एतैरनुभावितं निष्पादितं ज्ञानं ध्रुवानुस्मृति

इति हृदये ॥ आस्यमंत्रिषु चातुर्होत्रं चतुर्होतृशब्दवाच्यमंत्रवेद्यकर्म ॥३६॥ स्रुक जुहूः तुंडं मुखाग्रे आसीत् स्रुव इतरहवीनासिकयोरासीत् इत्यनुषं-
गः ॥ एवमुत्तरत्रापि इड्डा इहविर्भक्षणपात्रं उदरे चमसाः सोमपात्राणि च तत्र चमसः कर्णरंध्रे आसन् प्राशित्रं ब्रह्मभागपात्रं आस्ये मुखे आसीत् ग्रहाः
ग्रसने ग्रस्यंतेऽनेनेति ग्रसनं मुखांतर्वर्त्ति छिद्रं तस्मिन्नासन् हे भगवन् यत् अग्निहोत्रं नामकं कर्म तत्ते तव चर्वणं भक्षणमासीत् ॥३७॥ दीक्षा
दीक्षणीयेष्टिः ॥ तवानुजन्म वारंवारमभिव्यक्तिः ॥ उपसदः उपसदाख्या इष्टयः तव शिरोधरं ग्रीवा प्रायणीय ॥ आरंभेष्टिः उदयनीयः
अवसानेष्टिः प्रायणोदयनीयेदंष्ट्रे यस्य सः वीरः प्रवर्ग्यः ॥ महावीरः जिह्वा आसीत् सभ्यो होमरहितोऽग्निः अवसथ्यं औपासनाग्निः तयोर्द्वंद्वे

स्रुक्तुंडं आसीत्स्रुव ईश नासयोरिडोदरे चमसाः कर्णरंध्रे ॥ प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रं
॥३७॥ दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः ॥ जिह्वाप्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चितयोऽसवो
हि ते ॥३८॥ सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देह धातव ॥ सत्राणि सर्वाणि शरीरसंधिस्त्वं सर्वयज्ञक्र-
तुरिष्टिबंधनः ॥३९॥

बंधनः क्रतोः ॥ क्रतुरूपस्य तव शीर्षकं शिरः चितयः इष्टकाबंधनविशेषाः तेन तवासवः प्राणाः ॥३८॥ सोमस्तव रेतः
सवनानि प्रातःसवनादीनि तवावस्थितिः अवस्थानं बाल्याद्यवस्था वा ॥ संस्थाविभेदाः अग्निष्टोमोऽत्यग्निष्टोम उक्थ्य षोडशी वाजपेयातिरात्रो
आप्तोर्यामः इति सप्त संस्थाभेदास्तव देह धातवः त्वङ्मांसादि सप्तधातवः सत्राणि बहुयजमानकानि कर्माणि सर्वाणि ते तव शरीरसंधयः
त्वं सर्वयज्ञक्रतुः सोमपायज्ञाः सः सोमपाः क्रतवः तद्रूपस्त्वमित्यर्थः यद्वा यज्ञरूपः क्रतुः क्रतुशब्दो मुख्येयमात्रपरः उपासतेष्वपि क्रतुश

रूपस्याप्राकृतत्वं तदनुक्त्वा यज्ञभावनत्वमेव प्रपंचयति रूपमिति चतुर्भिः हे देव यदध्वरात्मकं तव रूपं तद्दुष्कृतात्मनामघमलिनं आत्मा मनो येषाम्
योगिनां दुर्दर्शनं दर्शनाविषयम् ॥ प्राकृतं हि रूपं प्राकृतं मनोग्राह्यं इदं तु रूपं दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरित्यादिश्रुत्युक्तविध
यायोगसंस्कृतमनोग्राह्यत्वादप्राकृतमित्यर्थः ननु योगिभिरपि तादृशत्वेन भगवतो विभवरूपं दृश्यत एव न तूच्यते दुष्कृतात्मनां दुर्दर्शमिति उच्यते
नह्ययोगिनो भगवतो विभवरूपमप्राकृतं पंचोपनिषन्मयं स्वेच्छयैवोपात्तमिति यथावज्जानंति किंतु तिर्यगादिजातीयं प्राकृतमित्येव जानं
ति अतो न विरोधः अत्र यज्ञांगानां छंद आदीनाम् ॥ भगवदवयवत्वेनानुसंधानरूपदहरोपासनविधानार्थं पूर्वोक्तयज्ञभावनत्वं यदध्वरा
त्मकं इत्यनूद्यते ॥ इदं छंद आदीनां भगवत्त्वगादित्वरूपणं दहरोपासनार्थमेव नाम ब्रह्मेत्यादिवत् ॥ न हि कालत्रयवर्त्तिनां छंद आदीनां य

रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव यदध्वरात्मकं ॥ छंदांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्वंघ्रिषु चातुर्होत्रम् ॥ ३६

ज्ञानां संधानस्य तात्कालिकभगवद्देहत्वानुसंभवः सर्वशरीरकत्वात् ॥ यज्ञावयवानामपि तदंगत्वकथनं संभवति ॥ तथापि प्राकृतानां
यज्ञावयवानामप्राकृतत्वावयवत्वासंभव एवास्य सर्वशरीरकत्वेन यज्ञावयवानां तच्छरीरकत्वेपि प्रत्येकमेव यज्ञावयवानां तच्छरीर
त्वानेषां तच्छरीरावयवत्वकीर्तनमनुपपन्नमेव ॥ तस्माद्दहरोपासनविधानमेवेति मंतव्यं ॥ अतश्छंदांसि त्वचि बर्हिःरोमसु इत्यादि
क्वचिद्व्यतिरेकनिर्देशः क्वचिदग्निहोत्रं च वर्णा उपसद्दाः शिरोधरं इत्यभेदनिर्देशश्चोपपन्नं ॥ यस्य तव त्वचि छंदांसि गायत्रीत्रिष्टुवादीनि
नियज्ञांगानि छंदस्यमस्ति संयकष्टक्रियापविपरिणामेनान्वयः रोमसु बर्हिः कुशाः बर्हिरोमस्विति अत्र आर्षत्वात् इलोपः ईति दीर्घाभावः

भा.स्क.
॥८६॥

उपस्थानप्रकारमेवाह ॥ जितमित्यादिना हे अजित नेत्वया जितं सर्वोत्कर्षेणैव वर्तितम् ॥ जितं जितमिति संभ्रमादीप्सा हे यज्ञभावन यज्ञैर्भाव्यते सं
भावयते इति तत्संबुद्धिः यज्ञाराध्येत्यर्थः ॥ यद्वा यज्ञाज्ञावयति निवर्तयतीति तथा यज्ञाधिपते इत्यर्थः यद्वा यज्ञैर्विभाव्यते ऽवयवत्वेनो
पाय ज्ञानयत्वेनोपासनात् ॥ अत एव हि तु नरत्रयज्ञावयवाञ्छंद आदीनवयवत्वेन कल्पयित्वास्तु निर्व्यज्यते त्रयी वेदमयी वेदत्रयी विहि
तयज्ञमयत्वेनोपासनानाराधनत्वात्रयीमयत्वं तत्वां ज्ञेयं ॥ स्वां स्वकीयां तनुं परिधुन्वते परितः सर्वतः कंपयते तुभ्यं नमः वहुषु कल्मा

ऋषय ऊचुः ॥ जितं जितं तेजित यज्ञभावन त्रयीं तनुं स्वां परिधून्वते नमः ॥ यद्रोमगर्तेषु नि
लिल्युरध्वयस्तस्मै नमः कारणसूकराय ते ॥३५॥ ॥ ॥ ॥

नगुणेषु सत्सु किं विशेषणं तनुं परिधुन्वनमेव प्रथमं स्तुयत इत्यत्राह ॥ यद्रोमेति यस्यां तन्वां रोमाणि तेषां गर्तेषु रंध्रेषु अध्वयः समुद्रा
निलिल्युः लीना बभूवुः ततः इयमत्माश्चर्यमिति तदेव प्रथमं स्तूयत इति भावः अत एव कारणसूकराय जगत्कारणभूताया ग्राहृतस्सू
कररूपिणे ॥ यद्वा कारणानि स्रुवादि यज्ञोपकरणानि निमित्तानि यस्य सूकररूपधारिण इत्यर्थः ॥ नहि मायाकृतसूकरस्येत्थं सामर्थ्यं इष्टमित्यभिप्रायः ॥८६॥
एवंभूताय तस्मै नमः ॥३५॥

यस्मस्परं हूष्याविलग्नां महीं उध्दस्स भगवान् रसायाः सकाशादुत्थितः संरुरुचे ॥ तत्राप्यंमसिगदया आपतंतं गदामुद्यम्यागछंतं रुंधानं
प्रति वध्रं तमसह्यः ॥ विक्रमो यस्य तमारिं हैत्यं हिरण्याक्षं सुनाभेन संपादितः उज्वलः ॥ स चासौ तीव्रमन्युश्च भगवान्मृगराट् सिंह इव भमि
वगजेंद्र वली लया जघान हतवान् ॥ यथा गजेंद्रः जगतीवप्रविभिद्दन् रुणगंडतुंडो भवति ॥ न हत्तस्परक्तः एवं पंकक्तिनांकितो गंडो तुं
रवरं हूयोध्दस महीं निमग्ना स उत्थितः संरुरुचे रसायाः ॥ तत्रापि दैत्यं गदया पतंतं सुनाभसंदीपिततीव्रमन्युः
३२ ॥ जघान रुंधानमुसह्यविक्रमं सलीलयेभं मृगराडिवांभसि ॥ तद्रक्तपंकांकितगंडतुंडो यथा गजेंद्रो
जगतीं विभिंदन् ॥ ३३ ॥ तमालनीलं सितदंतकोट्या क्ष्मामुत्क्षिपंतं गजलीलयांग ॥ प्रज्ञाय बद्धांज
लयोनुवाकैर्विरिंचिमुख्या उपतस्थुरीशम् ॥ ३४ ॥
डैं च यस्य स जघाने ति पूर्वेणान्वयः ॥ ३३ ॥ तमालवल्लीलं सितदंतकोट्या दंष्ट्राग्रेण क्ष्मां महीं गजस्येव लीलया क्षिपंतं उद्धरंतं हे भ
गवंतं प्रज्ञाय आलक्ष्य अंग हे विदुर विरिंचिप्रमुखा बद्धांजलयः संतः ॥ अनुवाकैर्वेदसूक्तैस्तं ईशं वराहरूपं तस्यास समीपे स्थित्वा
ऽभिष्टुवुरित्यर्थः ॥ १४ ॥

दंष्ट्रे यस्य सः॥ ईक्षानिरीक्षणमेव ज्योतिरालोको यस्य सः प्रकाशमानने त्रद्युतिः सद्यः महीध्रः महाउद्ई त्रीभगवान् बभासे॥२८॥ किंच घ्राणेनेति॥ क्रोडाप
देशः वराहरूपः स्वयमध्वरांगोपि पशुरिवाघ्राणेन पृथ्व्याः पदवीं विजिघ्रन्नन्वेषयन्निसर्थः करालेभयंकरेदंष्ट्रे यस्य तथाभूतोऽप्यकराल
दृग्भ्यां सौम्यदृष्टिभ्यां गृणतः स्तोतृन्विप्रानुद्वीक्ष्य वीक्ष्यकुर्ध्वं वीक्ष्यकं समुद्रजलमविशत्॥२९॥ तद्धानींतनं समुद्रध्वनिं उत्प्रेक्ष्यते॥ सइति॥ स
उदन्वान्समुद्रः वज्रकूटोवज्रपर्वतः तद्वद्दृढंगं यस्य भगवतस्तस्य निपातवेगेन विशीर्णा विलंठिताकुक्षिर्यस्य सः॥ अत एवार्त्त एव स्तनयन्शब्दकुर्व
न् भोयज्ञेश्वर मांपाहि माभिधीत्येवं चुक्रोश॥ आर्त्तसादृश्यमाह उत्सृष्टाः प्रसारिताः दीर्घा ऊर्मय एव भुजास्तैर्विशिष्टः॥३०॥ जलप्रविष्टा

घ्राणेन पृथ्व्याः पदवीं विजिघ्रन्क्रोडापदेशः स्वयमध्वरांगः॥ करालदंष्ट्रोऽप्यकरालदृग्भ्यामुद्वीक्ष्य विप्रान्
गृणतोऽविशत्कं॥२९॥ स वज्रकूटांगनिपातवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान्॥ उत्सृष्टदीर्घोर्मिभुजैर
िवार्त्तश्चुक्रोश यज्ञेश्वर पाहि मेति॥३०॥ खुरैः क्षुरप्रैर्दरयंस्तदाप उत्पारपारं त्रिपरू रसायां॥ ददर्श गां त
त्र सुषुप्सुरग्रे यां जीवधानीं स्वयमभ्यधत्त॥३१॥ भगवान्किमकरोदित्यत्राह॥ खुरेति॥ त्रिपरूः त्रीणि परूंषि सवनात्मकानि पर्वाणि
यस्य सः यद्वा त्रीणि परूंषि रेखा ककुत्स्थले यस्य सः उत्पारपारं उत्पारश्चासौ पारश्च उत्पारः उद्वेलइव पारमति क्रांतः पारः संस्तरान्पारयितांचे
सर्थः उत्पारंदतिद्विता यांतोपि पापः तद्वाउत्पारपारं दरयन्निति क्रियाविशेषणत्वेन योज्यम्॥ उत्पाराणां पारश्च न्यानामपीपारमवसानं यथाभ
वतितथाऽपजलानिखुरैस्तदाददरयविदलयन्विलोडयन्॥ कथंभूतैः खुरैः क्षुरप्रैः क्षुरप्रायैः रसायां रसातलेगांभूमिं ददर्श॥ कथंभूतां गा
मग्रेप्रलये समये न तत्रास्वप्तुः शिशयिषुः सन्जीवधानीं जीवाधीयंतेऽस्यांतां प्राणपाश्रयभूतां यां गां स्वयमभ्यधत्ताभिमुखेन दधारजठरेधृ

॥ तृतीयस्कंधे टी० ॥
॥८५॥

निशम्येति ॥ मायामयस्तूकरस्याश्चर्यमयस्तुरस्तकरतनोर्घुर्घुरितं तज्ज्ञानीयानुकाररूपघुर्घुरितध्वनिं निशम्य ते जनस्तपःसत्यलोकनिवा
सिनः जनस्तपस्सत्यत्वसुडागम आर्षः मुनयः कथंभूतं घुर्घुरितं स्वखेदक्षयिष्णु स्वेषां स्वसंबंधिनां यः खेदः तं क्षपयतीति तच्छीलं आ
मीयुः स्वनिरसनस्वभावं ते मुनयः पवित्रैस्त्रिभिः ऋग्यजुःसामभिर्मंत्रैः अगृणन्स्तोत्रं चक्रुः ॥ ते इति पुनरुक्तिः प्रसिद्धिख्यापनाय
२६ ॥ तेषामिति ॥ वेदवितानमूर्तिः वेदैर्वितन्यत इति वेदवितानः यज्ञः स एव मूर्तिर्यस्य स भगवान् तेषां मरीच्यादीनामात्मनो ये गु

निशम्य ते घुर्घुरितं स्वखेदक्षयिष्णु मायामयसूकरस्य ॥ जनस्तपःसत्यनिवासिनस्ते त्रिभिः पवित्रैर्मु
नयोऽगृणन्स्म ॥ २६ ॥ तेषां सतां वेदवितानमूर्तिर्ब्रह्मावधार्यात्मगुणानुवादम् ॥ विनद्य भूयो विबुधोद
याय गजेंद्रलीलो जलमाविवेश ॥ २७ ॥ उत्क्षिप्तवालः खचरः कठोरः सटाविधुन्वन्खररोमशत्वक् ॥ खुराह
ताभ्रः सितदंष्ट्र ईक्षाज्योतिर्बभासे भगवान्महीध्रः ॥ २८ ॥

णाः कल्याणगुणाःताननुवदंतीति न ब्रह्म वेदमवधार्य ॥ श्रुत्वा
भूयः पुनः विनद्य घुर्घुरितं कृत्वा विबुधानां ब्रह्मादीनामुदयाय श्रेयसे जलमाविवेश कथंभूतः गजेंद्रस्येव लीला यस्य सः ॥ २७ ॥ पुनः
कथंभूतो विवेशेत्यपेक्षायामाह ॥ उत्क्षिप्त इति द्वाभ्यां वाराहं विशिनष्टि उत्क्षिप्तवालः पुच्छं येन सः खचरः ॥ आकाशचारी कठो
रः कठिनः सटाः कंठधरास्थाः केसरान् तान् विधुन्वन् खराणि रोमाणि यस्यास्त्वक् सा त्वग्यस्य सः खुरैराहतान्यभ्राणि येन सः सिते

भा.टी. ततोमरीचिप्रमुखैर्विप्रैः॥ पुत्रैः कुमारैः सनकादिभिः मनुना सह तत्सौकरं वाराहरूपं दृष्टवन्तो मे वाश्चर्यं न तु भगवतो वराहस्येति तैः सह किमिति हास्यं दिवि
॥ ८४॥ भवं दिव्यं परव्योमनिलयं शुद्धसत्वमयं परब्रह्मसूकरः॥ व्याजः प्रवेषेपस्यतदेवमवस्थितं॥ किंशब्दो विचारद्योतकः मे मम नासाया इदं ईश्वरा
हरूपं विनिःसृतं विनिर्गतमहो बताश्चर्यं॥ २२॥ अंगुष्ठस्य शिरः ऊर्द्ध्वपर्वदेशमात्राणां यस्य सः प्रथमं दृष्टः पश्चात्क्षणेन गंडशिलासम
मः अमलपाषाणमात्रो हृष्टः यज्ञो वै विष्णुरिति श्रुतेः मे मनः खेदयति निजरूपतिरोधानेन मोहयन्नेष भगवानपि स्विदेव वराहमूर्तिर्भगवा

मरीचिप्रमुखैर्विप्रैः कुमारैर्मनुना सह॥ दृष्ट्वा तत्सौकरं रूपं तर्कयामास चित्रधा॥ किमेतत्सौकरव्याजं सत्त्वं दिव्य
मवस्थितं॥ अहो बताश्चर्यमिदं नासाया मे विनिःसृतम्॥ २२॥ दृष्टोंगुष्ठशिरोमात्रः क्षणाद्गंडशिलासमः॥
अपि स्विद्भगवानेष यज्ञो मे खेदयन्मनः॥ २३॥ इति मीमांसतस्तस्य ब्रह्मणः सह सूनुभिः॥ भगवान्यज्ञपु
रुषो जगर्जागेंद्रसन्निभः॥ २४॥ ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान्॥ स्वगर्जितेन ककुभः प्रति
स्वनयता विभुः॥ २५॥ नपिस्विन॥ अपिस्विच्छब्दः संभावनायां भगवान्स्यादित्यर्थः॥ २३॥ तर्कमुपसंहरन्नाह ततो भगवत आश्चर्यं स
यहेणाह॥ इतीत्यादिना यावदध्यायसमाप्ति दशसु श्लोकेषु इत्थं सूनुभिर्मन्वादिभिः सह तस्य ब्रह्मणो मीमांसतः तर्कयतः सतः अगेंद्रसंनिभः
गिरीन्द्रसदृशो भगवान्यज्ञः पुरुषः जगर्जा गर्जितं॥ २४॥ ब्रह्माणमिति विभुर्हरिर्वराहः ककुभः दिशः प्रतिस्वनयता प्रतिध्वनियुक्ताः ॥ ८४॥
कुर्वता स्वगर्जितेन ब्रह्माणं तांश्च द्विजोत्तमान्मरीच्यादीन् हर्षयामास॥ २५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

चिंतामेवप्रपंचयति॥पीतमिति॥सर्वंकृत्स्नंकंजलंमयापीतंततःपृथिवीचनिवेशितास्थानतोहेवासुराहीन्सृजाःमेममसृजतःसतःवार्भिःजलैः
प्लाव्यमानामज्जमानारसांरसातलंगताप्राप्ता॥१७॥अथानंतरंसर्गेयोजितैःप्रयुक्तैरस्माभिःकिमनुष्ठेयंकिंविधेयं॥यस्यभगवतोहृदयात्संकर
स्मादहंमासमुद्भूवंसईशोमेभगवान्विदधातुअनुष्ठेयंसंपादयतु॥१८॥चिंतांनिगमयन्वराहावतारंप्रस्तौति॥इतीति॥इत्युरीत्याभिः
ध्यायत॥चिंतयतोब्रह्मणोनासाविवरान्नासिकाविवराद्वराहतोकः॥वराहपोत॥अंगुष्ठपरिमाणःप्रातिपदिकार्थेतसिःनिरगान्नि

पीतंमयाजलंसर्वंपृथिवीचनिवेशिता॥स्रजतोमेक्षितिर्वार्भिःप्लाव्यमानारसांगता॥१७॥अथात्रकिमनुष्ठेय
मस्माभिःसर्गयोजितैः॥यस्याहंहृदयादासंसईशोविदधातुमे॥कर्तव्यंकरुणासिंधुःसर्वलोकाभयंकरः
१८॥इत्यभिध्यायतोनासाविवरात्सहसानघ॥वराहतोकोनिरगादंगुष्ठपरिमाणतः॥१९॥तस्याभिपश्यतः
खस्थःक्षणेनकिलभारत॥गजमात्रःप्रववृधेतदद्भुतमिवाभवत्॥२०॥

गतोऽभूत्हेऽनघविदुरनचानेनचतुर्मुख
रावद्वराहरूपोभवदितिशंकनीयंतर्कयामाससचित्रधाकिमेतत्सौकरव्याजंसत्वंदिव्यमितिचतुर्मुखेनाप्यज्ञायमानतयाविचारितत्वोक्तेः
१९॥तस्यब्रह्मणःअभिपश्यतःसतःसःक्षोवराहःखस्थःआकाशेस्थितःसन्क्षणेनगजमात्रःगजपरिमाणःप्रववृधे॥२०॥त
दुत्मत्रिमकाशारोहणंवृद्धिश्चेतिगतत्सपश्यतामाश्चर्यमेवाभूत्॥इवशब्देनपश्यतामेवाश्चर्यंनतुभगवतोवराहस्येतिसूचितं॥२०

इदमेव मह्यं शुश्रूषणं स्यात् इत्येतेनावयवयो भगवानपि तुष्यतीत्याह ॥ परमिति हे नृप प्रजारक्षया भगवान् हृषीकेशो विभुः प्रजाभर्तुस्ते प्रजाभर्तृ
तुष्यतीत्यर्थः प्रजारक्षयेति वान्वयः अनुतुष्यति संतुष्टो भवति ॥ १२ ॥ किं भगवत्संतोषेणेत्यत्राह ॥ येषामिति ॥ यज्ञलिंगो यज्ञलिंगो यज्ञमूर्तिः
सनातनो भगवान्येषां न तुष्टः तेषां श्रमः अपार्थायनिः प्रयोजनाय भवतीत्यर्थः ॥ यद्यतः ॥ आत्मा भगवान्स्वयं नादृतः उपेक्षित इति याव
त ॥ १३ ॥ एवमुक्तो मनुः किमुवाचेत्यत्राह ॥ आदेशेहमिति ॥ अमीवसूदन पापनाशन भगवतस्तवादेशे आज्ञायां वर्ते यत्किंतु हे प्रभो प्रजानां मम

परं शुश्रूषणं मह्यं स्यात्प्रजारक्षया नृप ॥ भगवांस्ते प्रजाभर्तुर्हृषीकेशोनुतुष्यति ॥ १२ ॥ येषां न तुष्टो भगवान्यज्ञलिं॰
गो जनार्दनः ॥ तेषां श्रमो ह्यपार्थाय यदात्मा नादृतः स्वयम् ॥ १३ ॥ मनुरुवाच आदेशेहं भगवतो वर्तेयामीवसूदन
स्थानं त्विहानुजानीहि प्रजानां मम च प्रभो ॥ १४ ॥ यदोकः सर्वभूतानां मही मग्ना महांभसि ॥ अस्या उद्धरणे यत्नो दे
व देव्या विधीयताम् ॥ १५ ॥ मैत्रेय उवाच ॥ परमेष्ठी त्वपां मध्ये तथा सन्नामवेक्ष्य गां ॥ कथमेनां समुन्नेष्य इति दध्यौ॰
धिया चिरम् ॥ १६ ॥

च इहास्मिन्लोके स्थानं निवासस्थानमनुजानीहि अनुज्ञापय प्रदर्शयेत्यर्थः ॥ १४ ॥ ननु मही रेव सर्वभूतानां स्थानं क
थमुच्यते स्थानमनुजानीहीति तत्राह ॥ यदिति ॥ सर्वसत्वानां सर्वभूतानां यदोकः स्थानं स्थानं भूता मही भूमि ॥ महांभसि सहति जले मग्ना
अंतर्गता आसीदतोस्या हे देव्या भूमेरुद्धरणे प्रयत्नः हे देव विधीयतां क्रियताम् ॥ १५ ॥ एवमुक्तो ब्रह्मा किमकरोदित्यत्राह ॥ परमेष्ठी ब्रह्मा त
दा अपां मध्ये आसन्नां निमग्नां गां मवेक्ष्य ज्ञात्वा एनां भूमिमहं कथं समुन्नेष्ये उद्धरिष्यामीति धिया विरं दध्यौ चिंतयामास ॥ १६ ॥

त्वमिति सर्वेषां भूतानां त्वमेक एव पिता जन्मकृद्वृत्तिदः पोषकश्च ॥ अतो यद्यप्यस्मापेक्षा नास्ति तथाप्यस्माकं ते शुश्रूषा परिचर्या केन कर्मणा भवे
त्तद्विधेहीत्यनुसंधेयम्णान्वयः ॥ ७ ॥ तद्विति हे ईश त्वमस्म आत्मशक्तिषु मच्छक्ति विषयेषु कर्मसु मध्ये केन कर्मणा ते परिचर्या भवेदित्यनुषंगः इदं क
र्तव्यमिति कथयेति भावः ॥ यत्कर्म कृत्वा इहास्मिन् लोके विषकसर्वतः ॥ यशो भवेदत्रामुत्र परलोके गतिश्च भवेत्तदिति ॥ ८ ॥ एवमनुना
दशोक्तस्याह ॥ प्रीत इति ॥ हे तात तु भम महं प्रीतः हे क्षितीश्वर वायुवाभ्यां स्वस्ति स्तादृयात ॥ कुत एतत्राह यद्यस्मान्निर्व्यलीके न निर्दुष्टेन हृदा

मनुरुवाच ॥ त्वमेकः सर्वभूतानां जन्मकृद्वृत्तिदः पिता ॥ अथापि नः प्रजानां ते शुश्रूषा केन भावयेत् ॥ ७ ॥ तद्विधे
हि नमस्तुभ्यं कर्मस्वीड्यात्मशक्तिषु ॥ यत्कृत्वेह यशो विष्वग्गमुत्र भवेद्गतिः ॥ ८ ॥ ब्रह्मोवाच ॥ प्रीतस्तुभ्यमहं तात
स्वस्ति स्ताभ्यां क्षितीश्वर ॥ यन्निर्व्यलीकेन हृदा शाधि मेत्यात्मनार्पितम् ॥ ९ ॥ एतावत्यात्मजैर्वीर कार्या ह्यपचि
तिर्गुरौ ॥ शक्त्याप्रमत्तैर्गृह्येत सादरं गतमत्सरैः ॥ १० ॥ स त्वमस्यामपत्यानि सदृशान्यात्मनो गुणैः ॥ उत्पाद्य
शासधर्मेण गां यज्ञैः पुरुषं यज ॥ ११ ॥ मनसा मां शाधि अनुशिक्षयेत्यर्पितम् ॥ आवेदितम् ॥ ९ ॥ हे वीर गुरौ पितर्यात्मजैः पुत्रै
रेतावत्यपचितिः पूजा कर्तव्या ॥ किं पर्यालमत्राह ॥ शक्त्येति ॥ अप्रमत्तैर्निर्मत्सरैः शक्त्या शक्त्यनुरूपेण सादरं गृह्येत आज्ञेति शेषः ॥ य
था शक्ति पितुराज्ञा ग्राह्येत्येतावत्येवापचितिरित्यर्थः ॥ १० ॥ तर्हि का वा पितुस्तवाज्ञा या मया कर्तव्या वोध्यतेत्राह ॥ स त्वमिति ॥ स मच्छरी
रोत्पन्नस्त्वमस्यां स्वमहिष्याम् ॥ आत्मनस्तव गुणैः स्वसदृशान्यपत्यानि उत्पाद्य गां भूमिं धर्मेण शास अनुशिक्षय यज्ञैः पुरुषं परमपुरुषं य

गणपति ॥११॥

भा॰ द॰
॥ ८२ ॥

यन्मेमम ध्रुवं ब्रूहि कथय यहि यस्मात्सौमनः विष्वक्सेनाश्रयः विष्वक्सेनो हरिरेवाश्रयो यस्य स तथोक्तः ॥ भगवद्भक्तत्वात्तच्चरित्रमेव श्रवणं श्रोतव्यमि
तिनञ्चरितं एष्टव्यमेवेति भावः ॥ ३ ॥ नन्वेवं तर्हि साक्षाद्भगवच्चरित्रमेव पृष्टव्यं किं भागवतचरितानुप्रश्नेनेत्याशंक्याह ॥ श्रुतस्येति ॥ सुचिर
श्रमस्य सुचिरं श्रमो यस्मिंस्तस्य चिरकालश्रमार्जितस्य पुंसां श्रुतस्याध्ययनस्यार्थः प्रयोजनं सूरिभिर्विद्वद्भिरयमेवेतीडितः स्तुतः किं तन्नय
त्सूरिभिरीडितमिमं चाह ॥ येषां हृदयेषु मुकुंदपादारविंदमुपास्यते तेषां भागवतानां गुणानां श्रवणमिति यत्तदित्यर्थः भगवद्गुणवद्भागव

श्रुतस्य पुंसां सुचिरश्रमस्य नन्वंजसा सूरिभिरीडितोऽर्थः ॥ यत्तद्गुणानुश्रवणं मुकुंदपादारविंदं हृदयेषु येषां
॥ ४ ॥ श्रुक उवाच ॥ इति ब्रुवाणं विदुरं विनीतं सहस्रशीर्ष्णश्चरणोपधानम् ॥ प्रहृष्टरोमा भगवत्कथायां प्र
णीयमानो मुनिरभ्यचष्ट ॥ ५ ॥ मैत्रेय उवाच ॥ यदा स्वभार्यया साकं जातः स्वायंभुवो मनुः ॥ प्रांजलिः प्रणतश्चे
दं वेदगर्भमभाषत ॥ ६ ॥

नगुणा अपि श्रोतव्या रेवेत्यभिप्रायः ॥ ४ ॥ एवं वैदुरिकं प्रश्नमाश्रुत्य मुनिरभ्यभाषतेत्याह श्रुक ॥ इतीति
उक्तप्रकारेण ब्रुवाणं हृष्टं तं विनीतं विनयादिसंपन्नं सहस्रशीर्ष्णः परमपुरुषस्य ॥ सहस्रशीर्षा पुरुष इति श्रुतेः चरणोपधीयेतेऽस्मिन्निति
ति चरणोपधानं भगवत्पादपीठं भगवत्प्रियो सौ विदुरः ॥ अतस्तस्य शिरसउपरि भगवान्स्वपादौ प्रसारयतीत्यर्थः एवंभूतं विदुरं प्रति मु
निर्मैत्रेयोऽभ्यचष्ट अभ्यभाषत कथंभूतः भगवत्कथायां प्रणीयमानः प्रवर्त्यमानः ॥ अत एव प्रहृष्टानि उद्दंचितानि रोमाणि यस्य स
तथोक्तः ॥ ५ ॥ अभिभाषणप्रकारमेवाह ॥ यदेत्यादिना ॥ यदा स्वभार्यया शतरूपासह स्वायंभुवो मनुरुत्पन्नः तदायं मनुः प्रणतः नम्रोऽभू

॥ ८२ ॥

रुचयेस आख्याय मुनये प्रयच्छ माकूतिं कर्दमाय मध्यमां देवहूतिं दक्षाय प्रसूतिम् यदाहृतवान् यतः याभ्यः ॥ आकूत्यादिभ्यः उत्पन्नाभिः ह्यत्र तं ज
गदापूरितं बहुसंतानं करोः कन्या इत्यर्थः ॥५५॥ इति तृतीये द्वादशः ॥१२॥ एवमतीताध्याये ते सहजातेर्मनोर्जन्मनित च्चतच्च संग्रहेणाभिहि
तं स्वायंभुवः स्वराट् महात्मन इति विशेषणस्य चितन च्चरितविस्तारि विविक्तस्याविदुरः पृच्छतीत्याह शुकः निशाम्येति ॥ वदतः गदतो मुन
मैत्रेयस्य पुण्यतमां वाचं निशम्य श्रुत्वा हे नृप राजन् कौरव्यो विदुरः वासुदेवकथायामादृतः कर्त्तेरिक्तः ॥ आदरेणायुक्तः भूयः पुनः प

आकूतिं रुचये प्रादात् कर्दमाय तु मध्यमाम् ॥ दक्षायादात् प्रसूतिं च यत आपूरितं जगत् ॥५५॥ इति श्रीमद्भागव
ते महापुराणे तृतीयस्कंधे द्वादशोध्यायः ॥१२॥ शुक उवाच ॥ निशम्य वाचं वदतो मुनेः पुण्यतमां नृप ॥ भूयः
पप्रच्छ कौरव्यो वासुदेवकथादृतः ॥१॥ विदुर उवाच ॥ स वै स्वायंभुवः सम्राट् प्रियः पुत्रः स्वयंभुवः ॥ प्रतिल
भ्य प्रियां पत्नीं किं चकार ततो मुने ॥२॥ चरितं तस्य राजर्षेरादिराजस्य सत्तम ॥ ब्रूहि मे श्रद्दधानस्य विष्वक्सेना
श्रयो ह्यसौ ॥३॥

प्रष्टुरेव वान ॥१॥ विदुर प्रश्नप्रकारमेवाह स वा इति त्रिभिः स्वयंभुवः ब्रह्मणः प्रियः पुत्राणां मध्ये प्रियः निरतिश
यप्रीतिविषय इति भावः सम्राट् सार्वभौमः स्वायंभुवो मनुः प्रियां पत्नीं शतरूपां प्रतिलभ्य लब्ध्वा ततः किमकरोद्धे मुने मैत्रेय ॥२॥ सत्तम
तु सर्गं विहाय किमिति मनुचरितं पृच्छसीत्याशंक्य निराकुर्वन्नपृच्छति चरितमिति हे सत्तम अधिराजस्य तस्य राजर्षेर्मनोश्चरितं श्रद्दधाना

भा० तृ०

॥ ८१ ॥

शात्प्रजा न दैधं तेन वर्द्धते ॥ तत्र दद्भुतमहो आश्चर्यं खलु अत्र प्रजावृद्धौ दैवं विघातकं प्रतिबंधकं नूनं निश्चयम ॥ ५० ॥ एवं युक्तकृतः उचित
चिंतनरूपं युक्तं कुर्वतः दैवं दैवानुकूल्यं चापेक्षतः ॥ अपेक्षमाणस्य कस्य ब्रह्मणो रूपं द्वेधाऽभूत् प्राक्तनेरूपे सत्येव द्वितीयं रूपमभूत्स्यात्क
नेन सतेन सह द्वे रूपे अभूतामित्यभिप्रेत्य द्विधाऽभूदित्युक्तं ॥ इदं रूपस्य द्विधाभवनं देवासुरादिसृष्टेऽप्यभावत्वलोलुपत्वादिभावग्रहणं वत्सभा
वग्रहणं वत्सभावग्रहणं किंतु तस्य शरीरमेव द्विधाऽभूत तमिमावेदयितुं विशिनष्टि ॥ यत्कायमिति ॥ यद्रूपं कायं शरीरमभिचक्षते व्याहरं

एवं युक्तकृतस्तस्य दैवं चापेक्षतस्तदा ॥ कस्य रूपमभूद्द्वेधा यत्कायमभिचक्षते ॥ ५१ ॥ ताभ्यां रूपविभागाभ्यां मि
थुनं समपद्यत ॥ यस्तु तत्र पुमान्सोऽभून्मनुः स्वायंभुवः स्वराट् ॥ ५२ ॥ स्त्री यासीच्छतरूपाख्या महिष्यस्य महा
त्मनः ॥ तदा मिथुनधर्मेण प्रजा ह्येधांबभूविरे ॥ ५३ ॥ स चापि शतरूपायां पंचापत्यान्यजीजनत् ॥ प्रियव्र
तोत्तानपादौ तिस्रः कन्याश्च भारत ॥ आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम ॥ ५४ ॥ ति ॥ ५१ ॥ ताभ्यां रूपस्य

विभागाभ्यां विभक्ताभ्यां रूपाभ्यामित्यर्थः ॥ मिथुनं स्त्रीपुंसात्मकं द्वंद्वमभूदित्यर्थः तत्र मिथुने यः पुमान्स मनुः स्वायंभुवमन्वाख्यः स्वराट् सा
र्वभौमोऽभूत ॥ ५२ ॥ या स्त्री साऽस्य महात्मनः महाबुद्धेः स्वायंभुवमनोः महिषी भार्या शतरूपाख्याऽभूत् ततः प्रभृति किमासीज्जातश्च मनु
ः किमकरोदित्यत आह तदेत्यादि यावदध्यायपरिसमाप्तिः तदा मनुशतरूपाप्रादुर्भावप्रभृतिकाले मैथुनधर्मेण प्रजाएधांबभूविरे वर्द्धनेस्म
र्थः ॥ ५३ ॥ स चापि स्वायंभुवो मनुरपि शतरूपायां स्वभार्यायामपत्यानि पंचाजीजनत् जनयामास ॥ अपत्यशब्दस्य साधारणत्वात् तत्र स्त्रीपुं

॥ ८१ ॥

एवंवर्णानामुत्पत्तिमभिधायायत्तस्मादेतद्ब्रह्मनामरूपमन्नंचजायतइतिश्रुत्युक्तरीत्याशब्दार्थरूपप्रपंचात्मकेब्रह्मणि अर्थरूपस्यब्रह्मणोदेवादिरूपेण
यथाविततत्वमेवंब्रह्मणउत्पन्नाकारादिवर्णसंघातात्मकशब्दब्रह्मणोपिविततत्वमस्तीत्याहशब्देत्यादिनाशब्दात्मकंब्रह्म आत्मशरीरंयस्यतस्मा
च्छब्दब्रह्माभिव्यक्तिस्थानत्वात्तच्छरीरत्वाच्छब्दब्रह्मापितच्छरीरमेवेत्यभिप्रायेणब्रह्मात्मनः इत्युक्तं॥ व्यक्ताव्यक्तात्मनःचतुर्मुखशरीरेपिच
तुर्विंशतितत्वसंभवाद्व्यक्ताव्यक्तात्म एवंभूताच्चतुर्मुखात्हेतोस्तत्परः अर्थात्मकादन्यः ब्रह्माशब्दात्मकः ब्रह्मापिविततः श्रुतिस्मृतीतिहा
सादिरूपेणप्रकृतिप्रत्ययपदवाक्यादिरूपेणतत्तद्भाषारूपेणचविस्तृतः नानाशक्त्युपबृंहितः अत्रशक्तिशब्देनार्थोपमानसामर्थ्यरू

शब्दब्रह्मात्मनस्तात व्यक्ताव्यक्तात्मनः परः ॥ ब्रह्मावभाति विततो नानाशक्त्युपबृंहितः ॥४८॥ ततोपरामुपादाय सस
र्गाय मनो दधे ॥ ऋषीणां भूरिवीर्याणामपि सर्गमविस्तृतम् ॥ ज्ञात्वा तद्धृदये भूयश्चिंतयामास कौरव ॥४९॥
अहो अद्भुतमेतन्मे व्यापृतस्यापि नित्यदा ॥ न ह्येधंते प्रजा नूनं दैवमत्र विघातकम् ॥५०॥ पाभिधात्वलक्षणगो
णादिरूपा गृह्यन्ते ॥ नानाशक्तिभिरभिधादिभिरुपबृंहितः ॥४८॥ ततः वर्णस्वरसर्गानंतरं किमकरोदित्यत आह ॥ तत इत्यर्द्धेन ॥ ततः शब्दब्रह्मात्मक
त्वात् ॥ अपरां तनुं उपादाय स्वीकृत्य सृष्ट्यर्थं मनो दधे मनसा चिंतयदित्यर्थः के यमपरा तनुः कीदृशा वा चिंतेत्यपेक्षायामृषीणामित्यादिना
स्त्रीयामीदित्यं तेन प्रपंचयति ॥ तावच्चिंताप्रकारमाह ॥ ऋषीणामिति भूरिवीर्यं प्रजननसामर्थ्यं येषां तेषां ऋषीणामपि सर्गमविस्तृतं ज्ञात्वा
न दृष्ट्वा तद्धृदये सर्गं हृदये भूयश्चिंतयामास ॥ किमित्यत आह ॥ अहो इति ॥ नित्यदा सर्वदा व्यापृतस्यापि प्रजासर्गे व्यापारं कुर्वतोपि मे मम सकार

नयादीनां पूर्वोत्पत्तिक्रमेणोत्पत्तिमाह ॥ आत्मानात्मविवेकविद्यामोक्षफला त्रयी कर्मविद्या स्वर्गादिफला वार्त्ता कृष्यादिरूपा जीवनफला दंडनीतिरर्थपरा
अथ व्याहृतीनां क्रममाह ॥ एवमिति ॥ एवं पूर्वादिमुखक्रमेणैव व्याहृतयश्चासन्नित्यर्थः भूर्भुवः स्वरिति व्यस्तास्तिस्रो व्याहृतयः समस्ता चतुर्थी व्याहृ
तिः तयाहात्मर्ल्लयतः एवं व्याहृतयः प्रोक्ताव्यस्ताः समस्ताः इति ॥ यद्वा महा इति चतुर्थी व्याहृतिः तथा च श्रुतिः भूर्भुवः स्वरिति वा एतास्तिस्रो व्याहृतयस्ता
सामु ह स्मैतां चतुर्थीं महा च मस्यः प्रवेदयते मह इति श्रुतेश्चतुर्थी मह इति व्याहृतिः एवं मुख्यो मन्त्राणां पूर्वादिमुखक्रममभिधायान्येभ्योप्यंगे
आन्वीक्षिकी त्रयी वार्त्ता दंडनीतिस्तथैव च ॥ एवं व्याहृतयश्चासन् प्रणवो ह्यस्य हृत्स्वतः ॥४४॥ तस्योष्णिगासील्लोमभ्यो गायत्री
च त्वचो विभोः ॥ त्रिष्टुम्मांसात्स्नुतोऽनुष्टुब्जगत्यस्थ्नः प्रजापतेः ॥४५॥ मज्जायाः पंक्तिरुत्पन्ना बृहती प्राणतोऽभवत् स्पर्शस्त
स्याभवज्जीवः स्वरो देह उदाहृतः ॥४६॥ ऊष्माणमिंद्रियाण्याहुरंतस्था बलमात्मनः स्वराः सप्त विहारेण भवंति स्म प्रजापतेः ॥
भ्यो ऽन्येषामुत्पत्तिमाह प्रणव इत्यादिना हृदतः हृदयाकाशात्प्रणव आस ॥४४॥ ब्रह्मणः लोमभ्यः उष्णिगाख्यं छंदः आसीत् अक्षराणामिय
ता छंदः ॥ ४५ ॥ विभोर्ब्रह्मणः त्वचा गायत्री छंदः मांसात् त्रिष्टुप् छंदः स्नुतः स्नायोरनुष्टुप् छंदः प्रजापतेर्ब्रह्मणः अस्थ्नो जगती छंदः आ
सीत् ॥ मज्जायाः पंक्तिरुत्पन्ना प्राणतः बृहती छंदोऽभवत् ब्रह्मणः जीवः स्पर्शः कारणे कार्योपचारः एवमग्रेऽपि देहः स्वरः देहात्स्वर उत्पन्नः
४६ ॥ इंद्रियाणीन्द्रियेभ्य ऊष्माणः आत्मनो ब्रह्मणः ॥ बलमंतस्तस्मान्नेऽतस्थ उत्पन्ना इत्यर्थः कादयो मावसाना स्पर्शाः अचः स्वराः शषसहा ऊष्माण
ः यरलवा अंतस्था इति वैयाकरणोक्तरीत्या स्पर्शादयः शब्दाः ॥ प्रयुक्ताः प्रजापति विहारेण क्रीडया सप्त स्वराः षड्जर्षभगांधारमध्यमपंच
मधैवतनिषादाभवंतिस्माभवतीत्यर्थः ॥४७॥

कारतद्वृत्तयो या आश्रमैः ॥ सहजाता इत्यपेक्षायां वृत्तीर्वदंस्तासामवांतरभेदानाह द्वाभ्यां ॥ सावित्रं ब्रह्मचर्यं स्त्रीसंगविहीनं त्रिरूपं उ
पनयनादारभ्य गायत्र्यध्ययनस्य त्रिरात्रं प्राजापत्यं व्रतान्याचरतः संवत्सरांतं ब्राह्मं वेदग्रहणांतं बृहन्नैष्ठिकं एतान् ब्रह्मचर्याश्रम
वृत्तयः वार्ता ॥ अनिषिद्धकृष्यादिवृत्तिः संचयो यावज्जीवनं इज्जीवनं वृत्तिः शालीनमयाचितवृत्तिः शिलकणिकाद्यर्जनं उंछः क
णशः आदानं उभयमेका वृत्तिः एकवचनमार्षं ॥ समाहारद्वंद्वे तु पुंस्त्वमार्षं वेदितव्यं ॥ एता गृहे गृहाश्रमे वृत्तय इत्यर्थः ॥ ४२ ॥ च

सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा ॥ वार्ता संचयशालीनशिलोंछ इति वै गृहे ॥ ४२ ॥
वैखानसा वालखिल्यौदुंबराः फेनपा वने ॥ न्यासे कुटीचकः पूर्वं बह्वोदो हंसनिष्क्रियौ ॥ ४३ ॥

तुर्विधा वनस्थस्याह ॥ वैखानसा अकृष्टपच्याशिनः वालखिल्याः नवेन प्राप्ते पुराणत्यागिनः ॥ उदुंबराः प्रातरुत्थाय यां दिशं प्र
पश्यति तत आहृतैः फलादिभिर्जीवंतः फेनपाः स्वयं जीर्णाशिनः वने वनवासिन इत्यर्थः तुर्याश्रमाणामपि चातुर्विध्यमाह
न्यासे इति ॥ कुटीचकः स्वाश्रमधर्मप्रधानः बहूदकः कर्मोपसर्जनीकृतज्ञानप्रधानः हंसो ज्ञानाभ्यासनिष्ठः निष्क्रियः परमहं
सः प्राप्ततत्त्वः प्रवृत्तिधर्महीनत्वान्निष्क्रिय इत्युक्तं न तु निवृत्तिरप्यनेनोच्यते विद्याङ्गत्वेन तस्यावश्यमनुवर्तनीयत्वात् ॥ न्यासे
एते संन्यासाश्रमे स्थिताः ॥ ४३ ॥

भा.स.

॥७९॥

कर्मतंत्रक्रममाह॥ षोडश्युक्थाविति॥ षोडश्युक्थनाद्दौ षोडश्युक्थनामकसंस्थानविशिष्टकर्मपरौ पुरीषीचयनः अग्निष्टुदग्निष्टोमः
आप्तोर्यामश्चातिरात्रश्चैतौ कर्मविशेषौ गोसवेन सहितं सगोसवं वाजपेयं षोडश्युक्थौ पूर्ववक्त्रात् पुरीष्यग्निष्टुतौ दक्षिणमुखाद् आप्तोर्या
मातिरात्रौ पश्चिममुखाद्गोसववाजपेयावुत्तरतः॥ असृजदिति सर्वत्र॥ ४०॥ धर्मस्य पादानामाश्रमाणां च क्रममाह॥ विद्येति॥ विद्यादाना
दीनि धर्मस्य चत्वारि पदानि॥ ब्रह्मचर्यादयः चत्वारः॥ आश्रमाश्च यथासंख्यं वृत्तिभिः सह पूर्वादिभ्यो मुखेभ्यः असृजत्॥ ननु तपःस

षोडश्युक्थौ पूर्ववक्त्रात्पुरीष्यग्निष्टुतावथ॥ आप्तोर्यामातिरात्रौ च वाजपेयं सगोसवम्॥ ४०॥
विद्या दानं तपः सत्यं धर्मस्येति पदानि च॥ आश्रमाश्च यथासंख्यमसृजत्सह वृत्तिभिः॥ ४१॥

त्यं दयाशौचमिति प्रथमस्कंधे दयाशौचयोः पादत्वं कीर्तितं॥ अत्र तु विद्यादानयोरिति विरोधः॥ मैवं॥ दयाशौचयोर्विद्यादानश
कार्यत्वात्कारणशब्दः॥ कार्ये उपचर्यतयोक्तमित्यविरोधात्॥ शौचं हीवरज्ञानकार्यं क्षेत्रज्ञस्येश्वरतज्ज्ञानाद्विशुद्धिः परमा मतेति स्मृ
तेः सर्वभूताभयप्रदानस्य कलां नार्हंति षोडशीमिति पूर्वोक्तरीत्या दययैव भूताभयप्रदानमतो न विरोधः॥ ४१॥ श्री ॥ ग

॥७९॥
रा

एवं स्वयमेव वेदादीनां सर्गे सिद्धे तेषां मध्ये कस्य कस्मान्मुखादुत्पत्तिरिति जिज्ञासया पृच्छति विदुरः स वा इति ॥ विश्वसृजां प्रजापतीनां ईशः पतिः
स ब्रह्मा वेदादीनसृजदिति ज्ञातमस्माभिः इदं तु न ज्ञायते ॥ देवः ब्रह्मा येन येन यद्यदसृजदिति हे तपोधन मैत्रेय तन्मह्यं ब्रूहि विवद ३६
एवं स पृष्टो मुनिः क्रमेण पूर्वादिभ्यो मुखेभ्यः ऋगादीनसृजदित्याह ॥ ऋगित्यादि पूर्वादिभिर्मुखैर्मुखेभ्यः चातुर्होत्रक्रममाह शास्त्रमिति श
स्त्रमप्रगीतमन्त्रस्तोत्रं तन्न होत्रकर्तव्यत्वेन होत्रमित्युच्यते इत्यादि ॥ आध्वर्यवं स्तुतिस्तोमं स्तुतिः संगीतरूपं स्तोमं तदर्थमृक्समुदायं

विदुर उवाच ॥ स वै विश्वसृजामीशो वेदादीन्मुखतोऽसृजत् ॥ यद्यद्येनासृजद्देवस्तन्मे ब्रूहि तपोधन ॥ ३६ ॥ मैत्रेय उवाच ॥ ऋ
ग्यजुःसामाथर्वाख्यान्वेदान्पूर्वादिभिर्मुखैः ॥ शास्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात्क्रमात् ॥ ३७ ॥ आयुर्वेदं
धनुर्वेदं गान्धर्वं वेदमात्मनः ॥ स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः ॥ ३८ ॥ इतिहासपुराणानि पंचमं वे
दमीश्वरः ॥ सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥ ३९ ॥

त्रिवृत्सोमो भवतीत्यादि विहितं तदिज्या तत्प्रयोज्यत्वेनोद्गात्रमि
त्युच्यते स्तुतये स्तोममिति चतुर्थी समासः प्रायश्चित्तं ब्रह्मणः प्रयोज्यं एतानि चत्वारि क्रमादिति पूर्वादिमुखेभ्यो व्यधादसृजत् ॥ ३७ ॥ उपवे
दक्रममाह ॥ आयुर्वेदमिति ॥ स्थापत्यं शिल्पि ॥ ३८ ॥ इतिहासाश्च पुराणानि च तेषां समाहारः पंचमं वेदाख्यमितिहासपुराणम् सर्वद
र्शनः सर्वज्ञः ईश्वरो ब्रह्मा सर्वेभ्यो मुखेभ्यः ससृजे ॥ ३९ ॥ ॥

एवं पितरं प्रबोध्य तमेव तस्मा इद्धर्मानिवर्त्तयितुं भगवानेव समर्थः नान्य उपायोस्तीति तस्मै नमस्कुर्वंस्तस्मै विज्ञापयामासुरित्याह ॥ तस्मादितितस्मै भगवते न
मः यो भगवानात्मस्थमात्मनामरूपविभागानर्हं सूक्ष्मदशापन्नमास्थितं चेतनात्मकं इदं तु जगत्स्वेन शोचिषा संकल्परूपज्ञानेन व्यंजयामास विभक्तनाम
रूपापन्नत्वेन व्यक्तमकरोत ॥ सकृत्स्नजगत्कारणभूतः परमात्मा धर्ममधर्मान्निवृत्तिरूपं धर्मं पातुं रक्षितुमर्हतीति ॥ ३२ ॥ एवमुक्तवत्सु पुत्रेषु पिता किम
करोदित्यत आह ॥ स इति ॥ इत्यमुक्तरीत्या पुरः अग्रे ग्रणतः ॥ भाषमाणान्प्रजापतीन्सुतान् दृष्ट्वा प्रजापतीनां मरीच्यादीनां पतिर्ब्रह्मा व्रीडितः लज्जितः त

तस्मै नमो भगवते य इदं स्वेन रोचिषा ॥ आत्मस्थं व्यंजयामास स धर्मं पातुमर्हति ॥ ३२ ॥ मैत्रेय उवाच ॥ स इत्थं गृणतः पुत्रान्
पुरो दृष्ट्वा प्रजापतीन् ॥ प्रजापतिपतिस्तन्वं तत्याज व्रीडितस्तदा ॥ ३३ ॥ तां दिशो जगृहुर्घोरां नीहारं यद्विदुस्तमः ॥ कदा
चिद्ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मुखात् ॥ कथं स्रक्ष्याम्यहं लोकान्समवेतान्यथापुरा ॥ ३४ ॥ चातुर्होत्रं कर्मतंत्रमुप
वेदनयैः सह ॥ धर्मस्य पादाश्चत्वारस्तथैवाश्रमवृत्तयः ॥ ३५ ॥
दा तन्वं तनुं तत्याज त्यक्तवान् ॥ ३३ ॥ तां मुक्तां घोरां तनुं दिशः ॥ जगृ
हुः गृहीतवत्यः कुत एतज्ज्ञायते इत्यत आह यत्यक्तां तनुमेव तमेव तमो नीहारं विदुः जानीयुः अत्र तनुत्यागो नाम कामुकत्वभावत्याग एव तद्ग्रहणं नाम
तज्ञावग्रहणमेव ॥ तनुशब्देन निर्दिष्टस्तु तनुवद्विशेषणतया वेदितव्यः ॥ ३३ ॥ तनुत्यागानंतरं ब्रह्मा किमकरोदित्यत आह ॥ कदाचिदिति समवेतान्सं
गतान् लोकान्यथा पुरा पूर्वकल्पवत ॥ कथमहं स्रक्ष्यामीति कदाचिद्ध्यायतः स्रष्टुः चतुर्मुखाच्चतुर्मुखेभ्यः वेदा ऋगादय आसन्नाविर्भूता ॥ ३४
चातुर्होत्रं चतुर्णां होतॄणां कर्मतंत्रं यज्ञविस्तारः उपवेदा आयुर्वेदादयः ते च न्याया अन्ये तैः सह धर्मस्य चत्वारः पादाः तपः सत्यं दया शौचमिति प्र

छायायाःदेहच्छायायाःकर्दमःकथंभूतःदेवहूत्याःस्वायंभुवमनुकन्यायाःपतिःप्रभुःजितेंद्रियःअवांतरकथांप्रस्तोतुंउपसंहरति॥मनसोदेहतश्चेद
वमुक्तरीत्याविश्वकृतःब्रह्मणःसकाशाज्जगज्जज्ञे॥२७॥वाक्प्रसंगादवांतरकथांप्रस्तौतिवाचमित्यादिनातांदिशिदिशोजजरहुरित्संतेनग्रंथेन
स्वयंभूर्ब्रह्मास्वदुहितरंतन्वींस्त्रीरूपांमनश्चित्तंहरंतींस्वयमकामयमानंवाचंवागधिष्ठापिनींदेवतांस्वयंसकामःचकमेऐच्छदितिनोऽस्मा
भिःश्रुतम्॥२८॥अधर्मेदुहितृकामनारूपेप्रसवात्मकेकर्मणिकृतोत्पन्नामतिर्यस्यतंपितरंब्रह्माणंविलोक्यमरीचिप्रमुखतनयाःपुत्राःमु

कायायाःकर्दमोजज्ञेदेवहूत्याःपतिःप्रभुः॥मनसोदेहतश्चेदंजज्ञेविश्वकृतोजगत्॥२७॥वाचंदुहितरंतन्वीं
स्वयंभूर्हरतींमनः॥अकामांचकमेक्षत्तःसकामइतिनःश्रुतम्॥२८॥तमधर्मेकृतमतिंविलोक्यपितरंसु
ताः॥मरीचिमुख्याऋषयोविस्रंभात्प्रत्यबोधयन्॥२९॥मरीच्यादयऊचुः॥नैतत्पूर्वैःकृतंत्वद्यनकरिष्यंति
चापरे यत्त्वंदुहितरंगच्छेरनिगृह्यांगजंप्रभुः॥३०॥तेजीयसामपिह्येतन्नसुश्लोक्यंजगद्गुरोः॥यद्वृत्तमनुति
ष्ठन्वैलोकःक्षेमायकल्पते॥३१॥मयःविस्रंभादितिविश्वासाधिक्यात्पितरंप्रत्यबोधयन्ज्ञापितवंतः॥२९॥प्रबोधनप्रकारमेवा
ह नैतदिति पूर्वैरेतन्नकृतमद्यतुनकुर्वंतिअपरेभाविनोलोकाःनकरिष्यंति॥किंतदित्यतआह॥स्वयंप्रभुःधर्ममर्यादापालनसमर्थस्त्वमंगजं
काममनिगृह्यस्वांदुहितरंगच्छेरितियत्॥३०॥तेजीयसामस्माकमेतन्नप्रसवायकरमतआह॥तेजीयसामितिहेजगद्गुरुजगन्मर्यादापालकते
जीयसांतेजिष्ठानामप्येतन्नसुश्लोक्यंनश्लाघ्यं॥कुतःहियस्मात्तेषांश्रेष्ठानामाचारंवृत्तमनुतिष्ठन्लोकःजनःक्षेमायकुशलायकल्पते त

अथ रुद्रोत्पत्त्यनंतरं पुनः सर्गः ध्यायतश्चिंतयतः दशपुत्राः ॥ प्रजज्ञिरे जाताः ॥ ध्यायतः कथंभूतस्य भगवच्छक्तियुक्तस्य भगवतो या श
क्तिर्लोकरचनासामर्थ्यं तेन युक्तस्य पुत्रान् विशिनष्टि लोकसंतानहेतवः लोकसंततिवृद्धिकराः ॥२१॥ के ते दशपुत्राः कः कस्माज्जातस्तत्र
आह ॥ मरीचिरित्यादि त्रिभिः ॥२२॥ भृगुस्त्वचि त्वच इत्यर्थः मेर्गो भृगुर्जात इत्यर्थः करात्कस्मात् ॥२३॥ नाभितः नाभेः कर्णयोः ॥ कर्णाभ्यां पुलस्त्य

अथाभिध्यायतः सर्गं दशपुत्राः प्रजज्ञिरे ॥ भगवच्छक्तियुक्तस्य लोकसंतानहेतवः ॥२१॥ मरीचिरत्र्यंगिरसौ पुल
स्त्यः पुलहः क्रतुः ॥ भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः ॥२२॥ उत्संगान्नारदो जज्ञे दक्षोंगुष्ठात्स्वयंभुवः
प्राणाद्वसिष्ठः संजातो भृगुस्त्वचि कराक्रतुः ॥२३॥ पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयोर्ऋषिः ॥ अंगिरा
मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत् ॥२४॥ धर्मः स्तनाद्दक्षिणतो यत्र नारायणः स्वयम् ॥ अधर्मः पृष्ठतो य
स्मान्मृत्युर्लोकभयंकरः ॥२५॥ हृदि कामो भ्रुवः क्रोधो लोभश्चाधरदच्छदात् ॥ आस्याद्वाक् सिंधवो मेढ्रान्निरृ
तिः पायोरघाश्रयः ॥२६॥

ऋषिर्जातः मुखतः मुखात् अक्ष्णः नेत्रात् अत्रिर्जातः ॥२४॥ धर्म इति ॥ पुनः सर्गं ध्यायत इत्यनुषंगः दक्षिणतस्त
नात् धर्मो जातः ॥ कथंभूतः यत्र धर्मे नारायणः स्वयं स्थितः तत्र अधिष्ठाता इत्यर्थः ॥ धर्मस्य प्रभुरच्युत इति वचनात् ॥ पृष्ठतः ॥ अधर्मः ज
ज्ञे कथंभूतः यस्मात् यत्र अधर्मे लोकभयंकरो मृत्युस्तिष्ठति ॥ मृत्युरधर्मदेवत इत्यर्थः ॥२५॥ इति हृदयात्कामः भ्रुवोर्मध्यात्क्रोधः अ
धरदच्छदात् अधरोष्ठात् लोभः आस्यान्मुखतः वाक् वागधिष्ठात्री देवता ॥ मेढ्रात् सिंधवः पायोर्गुदात् अघाश्रयः पापाश्रयः पापाधिष्ठ

तदेवाह ॥ अलमिति त्रिभिः ॥ हे सुरोत्तम मह ईदृशीभिः स्वतुल्याभिः सृष्टाभिः उल्बणैश्चक्षुभिर्मया सह दिशो दहंतीभिः प्रजाभिरलं मा सृजेत्यर्थः
१७ ॥ अतस्तप आतिष्ठ चरते भद्रमस्तु तपः कथंभूतं सर्वेषां भूतानां सुखमावहतीति तथोक्तं तपः प्रशंसति तपसेति सा इदं भवान् त्वं वि
श्वं यथापूर्वं तपसैव स्रक्ष्यसीत्यर्थः ॥ १८ ॥ तपसैव पुमानंजसा सुखेन भगवंतं विंदते प्राप्नोति ॥ कथंभूतमधोक्षजमधः कृतेंद्रियव्यापारं ॥
निरस्तप्राकृतेंद्रियव्यापारमित्यर्थः ॥ सर्वभूतगुहावासं सर्वेषां भूतानां कल्याणगुणानां चावासमाश्रयं ॥ अत्राधोक्षजशब्देनाप्राकृते

अलं प्रजाभिः सृष्टाभिः ईदृशीभिः सुरोत्तम ॥ मया सह दहंतीभिर्दिशश्चक्षुभिरुल्बणैः ॥ १७ ॥ तप आतिष्ठ भद्रं ते
सर्वभूतसुखावहम् ॥ तपसैव यथापूर्वं स्रष्टा विश्वमिदं भवान् ॥ १८ ॥ तपसैव परं ज्योतिर्भगवंतमधोक्षजं
सर्वभूतगुहावासमंजसा विंदते पुमान् ॥ १९ ॥ मैत्रेय उवाच ॥ एवमात्मभुवादिष्टः परिक्रम्य गिरां पतिम् ॥
बाढमित्यमुमामंत्र्य विवेश तपसे वनम् ॥ २० ॥

द्रियासन्नव्यापारत द्विषयसंपत्तिः सूच्यते तथा हि श्रूयते सर्वकर्मा सर्वका
मः सर्वगंधः सर्वरस इत्यनेन भोग्यतातिशयः सूच्यते ॥ गुणशब्देन प्राप्त्यौपयिकाः ॥ ज्ञानशक्त्यादयः ॥ कल्याणगुणा विवक्षिताः भग
वच्छब्देन प्राप्यविशेषनिर्देशः ॥ गुहावासशब्देन तदुपासनस्य स्वस्वरूपानुगुणत्वं व्यज्यते ॥ १९ ॥ एवमादिष्टो रुद्रः किमकरोदित्यत्राह
एवमिति ॥ आत्मभुवा ब्रह्मणा एवमुक्तप्रकारेणादिष्टः गिरांपतिं ब्रह्माणं परिक्रम्य प्रदक्षिणीकृत्यामुं गिरांपतिं बाढमित्यामंत्र्य भग
वदाज्ञामंगीकरोमीत्युक्त्वा इत्यर्थः तपसे तपश्चर्तुं वनमरण्यं विवेश प्रविष्टवान् ॥ २० ॥

भा.तृ.

१६

मरोदीः रोदनमकार्षीः ततः रोदनान्निमित्तात् रुद्र इतिनाम्नाप्रजाः त्वामभिधास्यंत्यभिवक्ष्यंतीत्यर्थः ॥ १० ॥ स्थानकरणमाह ॥ हृदीन्यादिना ॥ अहंकारा
धिदेवतात्वेनरुद्रस्य हृदंस्यत्वं नत्वं नरात्मनया ॥ असुः प्राणः रुद्रादीनिस्थानानामग्रेपूर्वमेवतेनवार्थेमयाकृतानि ॥ ११ ॥ एकादशस्थानस्यस्यपुनः स्था
नभेदानाह ॥ मन्युरिति ॥ धीप्रभृतयः रुद्राणाः नाएकादशहेरुद्रतेस्त्रियः प्रकल्प्यः ॥ १२ ॥ सयोषणः सस्त्रीकः ॥ एतानिनामानिस्थानानिचगृहा

यद्गोदीः सुरश्रेष्ठ सोद्वेग इव बालक ॥ ततस्त्वामभिधास्यंति नाम्ना रुद्र इति प्रजाः ॥ १० ॥ हृदिंद्रियाण्यसुर्व्योम वा
युरग्निर्जलं मही ॥ सूर्यश्चंद्रस्तपश्चैव स्थानान्यग्रे कृतानि ते ॥ ११ ॥ मन्युर्मनुर्महेशानो महांछिव ऋतध्वजः
उग्ररेता भवः कालो वामदेवो धृतव्रतः ॥ १२ ॥ धीर्वृत्तिरुशनोमा च नियुत्सर्पिरिलांबिका ॥ इरावती सुधा
दीक्षा रुद्राण्यो रुद्र ते स्त्रियः ॥ १३ ॥ गृहाणैतानि नामानि स्थानानि च सयोषणः ॥ एभिः सृज प्रजा बह्वीः प्रजा
नामसि यत्पतिः ॥ १४ ॥ इत्यादिष्टः स गुरुणा भगवान्नीललोहितः ॥ सत्त्वाकृतिस्वभावेन ससर्जात्मसमाः प्रजाः
॥ १५ ॥ रुद्राणां रुद्रसृष्टानां समंताद्ग्रसतां जगत् ॥ निशाम्यासंख्यशो यूथान्प्रजापतिरशंकत ॥ १६ ॥

णएभिः स्थानैर्नामभिश्चयुक्तः ॥ त्वमाभिः स्त्रीभिः बह्वीः प्रजाः सृजः यत्प्रजासर्गात्त्वमपिप्रजानांपतिरसिभवसि ॥ १४ ॥ गुरुणापित्राभगवान्नुत्प
त्तिप्रत्ययादिज्ञानवान्नीललोहितः कुमार इति उक्तप्रकारेणादिष्टः आज्ञापितः सत्त्वाकृतिस्वभावेनसमाकृतिर्यस्यतेनसात्विकेनस्वभावे
नात्मसमाः प्रजाः ससर्ज ॥ १५ ॥ रुद्रेणनीललोहितकुमारेणसृष्टानांरुद्राणां ॥ कथंभूतानांजगद्विश्वंसमंताद्ग्रसतांयूथान्संधानसंख्यशः

॥ १६ ॥

स्वभूर्ब्रह्मा तान्सनकादीन्पुत्रान्बभाषे ॥ भाषणमेवाह हे पुत्रकाः प्रजाः सृजत इति ते सनकादयः मोक्षधर्माणः निवृत्तिधर्मनिष्ठाः वासुदेवः पर
मयनं प्राप्यं प्रापकमाधारश्च येषां तेन योकाः संतो नैच्छन् पित्रानुज्ञातां सृष्टिं कर्तुं नैच्छन्नित्यर्थः ॥५॥ सः ब्रह्मा प्रत्याख्यातमनंगीकृतमनुशास
नमाज्ञा यैस्तैः सुतैः ॥ एवमवध्यातः अवज्ञातः दुर्विषहं दुःसहं जातमुत्पन्नं क्रोधं नियंतुं उपचक्रमे उपक्रांतवान् ॥६॥ धिया बुद्ध्या निगृह्यमा
णोऽपि विनिगृह्यमाणोपि तन्मन्युः स चासौ मन्युः क्रोधः प्रजापतेर्ब्रह्मणः भ्रुवोर्मध्यान्नीललोहितः कुमारः अजायत निगृह्यमाणोप्यनिगृही
तान्बभाषे स्वभूः पुत्रान्प्रजाः सृजत पुत्रकाः ॥ तन्नैच्छन्मोक्षधर्माणो वासुदेवपरायणाः ॥५॥ सोवध्यातः सुतैरेवं प्रत्याख्यातानु
शासनैः ॥ क्रोधं दुर्विषहं जातं नियंतुमुपचक्रमे ॥६॥ धिया निगृह्यमाणोपि भ्रुवोर्मध्यात्प्रजापतेः ॥ सद्योऽजायत तन्मन्युः कुमा
रो नीललोहितः ॥७॥ स वै रुरोद देवानां पूर्वजो भगवान्भवः ॥ नामानि कुरु मे धातः स्थानानि च जगद्गुरो ॥८॥ इति तस्य व
चः पाद्मो भगवान्परिपालयन् ॥ अभ्यधाद्भद्रया वाचा मा रोदीस्तत्करोमि ते ॥९॥ तं भ्रूमध्यमागत्य तस्मान्नी
ललोहितकुमारकुमाररूपेण जायते इत्यर्थः ॥७॥ कोसौ नीललोहितः भ्रुवोर्मध्याज्जातः स किमकरोदित्यत आह स वा इत्यादि नारायणमात्मभुवा
आदिष्टः परिक्रम्य गिरांपतिमिसंतेन देवानां पूर्वजो भगवान्भवः सदाशिवः स च जातो रुरोद ॥ रोदनप्रकारमाह ॥ नामानीति ॥८॥
मा रोदीः रोदनं मा कुरु ते तव तद्वांछितं करोमीति ॥९॥ नामकरणमेवाह ॥ यदिति हे सुरश्रेष्ठ सोद्वेगः भयसहितो बालक इव यद्यस्मात्त्व

भा.तृ.टी

॥ ७५ ॥

प्रथममज्ञानपंचपर्वसृष्टिमाह ॥ ससर्जेति ॥ अग्रेव्यष्टिसृष्ट्यादौ आदिकृद्ब्रह्मांऽधतामिस्रादीनिससर्ज एता अज्ञानवृत्तयः वृक्षगुल्मलतावीरु-
त्तृणगतपंचपर्वाज्ञानवृत्तयः तमोमोहादयइतिकेचित् जाग्रत्स्वप्नसुषुप्तिमूर्छामरणेष्वज्ञानवृत्तयइत्यपरे ॥ पातंजलोक्ता अविद्यास्मिता
रागद्वेषाभिनिवेशाइत्यन्ये ॥ तथैवोक्तं वैष्णवे तमोविवेकोमोहःस्यादंतःकरणविभ्रमः महामोहस्तुविज्ञेयोग्राम्यभोगसुखैषणा मरणं ह्यंधता-
मिस्रस्तामिस्रःक्रोधउच्यते ॥ अविद्यापंचपर्वैषाप्रादुर्भूतामहात्मनइतितमःस्वरूपाप्रकाशक ॥ १ ॥ मोहोदेहादिष्वहंबुद्धिः महामोहोवि-

ससर्जाग्रेंऽधतामिस्रमथतामिस्रमादिकृत ॥ महामोहंचमोहंचतमश्चाज्ञानवृत्तयः ॥ २ ॥ दृष्ट्वापापीयसीं
सृष्टिंनात्मानंबह्वमन्यत ॥ भगवद्ध्यानपूतेनमनसान्यांस्ततोऽसृजत् ॥ ३ ॥ सनकंचसनंदंचसनात
नमथात्मभूः ॥ सनत्कुमारंचमुनिभिः सक्रियानूर्द्धरेतसः ॥ ४ ॥

षयभोगेच्छा ॥ ३ ॥ तामिस्रस्तत्प्रतिरोधेक्रोधः ॥ ४
अंधतामिस्रस्तन्नाशेहमेवविनष्टोस्मीतिबुद्धिः उभयग्राहिणश्चैतज्ज्ञानेऽज्ञानमानिनः अहंकृता अहंमाना अवेदिनः इतिविशेषणाउ-
क्ता ज्ञानवृत्तयाइतिकेचित् अवेदिनस्वरूपानभिज्ञाः अहंकृतादेहेहंबुद्धिमंतः अहंमानाःस्वतंत्राभिमानवंतः अन्यत्स्फुटम् ॥ २ ॥ पापीय-
सीमज्ञानवृत्तीनांनिरयसाधनत्वेनपापीयस्त्वंसृष्टिंदृष्ट्वा आत्मानंपापीयः ॥ स्रष्टारंस्वात्मानंनबह्वमन्यतनुसमीचीनममन्यतेत्यर्थः ॥ त-
नआत्मनोबहुमानानंतरंभगवतोध्यानेनपूतंयन्मनस्तेनान्यानसृजत् ॥ ३ ॥ तानाहसनकंचेति ॥ आत्मभूर्ब्रह्मासनकादीन्मुनीन्प्रभाष्य
यसंशीलनपरान्सक्रियानिवृत्तिधर्मपरायणान् ऊर्ध्वरेतसः जितेंद्रियानसृजत् ॥ ४ ॥ ॥ ७५ ॥

स्वतत्वमेवाहविकारैरितित्रिभिःशब्दादिविषयाःपंचवागादिव्यापाराःपंचप्राणादिवायुवृत्तयःपंचएकोमनोविकारःसंकल्पादिः॥एतैःषोडशभि
र्विकारैर्युक्तःविशेषादिभिःपृथ्वीदिभिःपृथिव्यप्तेजोवाय्वाकाशाहंकारमहत्प्रकृतिभिःकथंभूतैःविशेषादिभिर्दशोत्तराधिकैर्दशगुण
युक्तैरुत्तरमधिकैर्वहिरावृतःपंचाशत्कोटिविस्तृतोऽयमंडकोशः॥४०॥यत्रमूलप्रकृतौप्रविष्टःपरमाणुवद्दृश्यते॥एवंविधाश्चान्येऽंडराश
यःकोटिशःप्रविष्टाःपरमाणुवद्दृश्यंते॥४१॥तत्सर्वेषांकारणानांमहदादीनामपिकारणंमूलंप्रधानंमहात्मनः॥पुरुषस्यविष्णोर्धामशरी

विकारैःसहितोयुक्तैर्विशेषादिभिरावृतः॥अंडकोशोवहिरयंपंचाशत्कोटिविस्तृतः॥४०॥दशोत्तराधि
कैर्यत्रप्रविष्टःपरमाणुवत्॥लक्ष्यंतेऽतर्गताश्चान्येकोटिशोह्यंडराशयः॥४१॥तदाहुरक्षरंब्रह्मस
र्वकारणकारणम्॥विष्णोर्धामपरंसाक्षात्पुरुषस्यमहात्मनः॥४२॥इतिश्रीमद्भागवतेमहापुराणेतृ
तीयस्कंधेका स्व प र्णा एकादशोध्यायः॥११॥इतितेवर्णितःक्षत्तःकालाख्यःपरमात्मनः॥महिमा
वेदगर्भोथयथास्राक्षीत्तन्निबोधमे॥१॥

रमाहुरित्यन्वयः॥यस्माव्यक्तंशरीरमितिश्रुतेः॥एवमचिंत्यविविधविभवमूलप्रकृति
शरीरकस्यपरमात्मनः॥कथंकालःप्रभुःस्यादित्यभिप्रायः॥४२॥इतितृतीयेस्कंधेएकादशः॥११॥एवंकालरूपंसप्रपंचमभिधायप्रकृतमनु
सर्गमेवविशेषेणप्रतिपादयिष्यंस्तमेवानुसर्गकथनंक्षत्तकथनपूर्वकंप्रतिजानीते॥इतीतिहेक्षत्तःपरमात्मनःकालाख्योमहिमातेतु
भ्यंस्तुतःप्रकारेणवर्णितः॥अथानंतरंवेदगर्भःब्रह्मायथाऽस्राक्षीत्तत्प्रकारंवर्ण्यमानंमेमत्तःनिबोधशृणु॥१॥

भा-तृ-टी-

॥७४॥

तस्यैव च पूर्वपरार्द्धस्यान्ते यं कल्पं पाद्ममित्याचक्षते मनीषिण इति स कल्पोऽभूत् ॥ तस्य पाद्माख्यत्वनिमित्तमाह ॥ यत् यत्र कल्पे हरेर्भगवतो विरु
द्धस्य नाभिरेव सरस्तस्माल्लोकसरोरुहं भुवनकोशात्मकं कमलमासीदुद्गतं ॥३६॥ द्वितीयस्यापि द्वितीयपरार्द्धस्याप्ययं कल्पः कोऽसौ
इत्यत आह ॥ वाराह इति विख्यातः प्रसिद्धः अन्वर्थतायाः निमित्तमाह यत्र यस्मिन्कल्पे हरिः सूकररूपेणासीत् ॥३७॥ ननु चतुर्मुखपर्यंतानां का
लकालत्वमुक्तं न तु परमात्मनोपि किं कालकालत्वमस्तीत्याशंक्य नेत्याह ॥ काल इत्यादिना द्विपरार्द्धाख्योऽयं कालः अनादेर्भगवतो निमेष इ
वावतिष्ठतीत्यर्थः ॥ निमेष इत्युक्ते कालपरिच्छिन्नत्वं स्यादित्याशंक्य उपचर्यत इत्युक्तं ॥ अनादित्वात् न तस्य कालत्वमित्यभिप्रायेणानादे

तस्यैव चान्ते कल्पोऽभूद्यं पाद्ममभिचक्षते ॥ यद्धरेर्नाभिसरस आसील्लोकसरोरुहम् ॥३६॥ अयं तु कथितः कल्पो
द्वितीयस्यापि भारत ॥ वाराह इति विख्यातो यत्रासीच्छूकरो हरिः ॥३७॥ कालोऽयं द्विपरार्द्धाख्यो निमेष उपचर्यते
अव्याकृतस्यानंतस्य ह्यनादेर्जगदात्मनः ॥३८ कालोऽयं परमाण्वादिर्द्विपरार्द्धान्त ईश्वरः ॥ नैवेशितुं प्रभुर्भूम्न
ईश्वरो धाममानिनाम् ॥३९॥

रित्युक्तम् ॥ अनादेरपि हिरण्यगर्भादिवत्तत्र तस्य कालपरिच्छिन्नता त्वयाभिहितात तद्वत्परस्यापि स्त
स्यादित्यत आह अव्याकृतस्य प्राकृतनामरूपरहितस्य हिरण्यगर्भादीनां प्राकृतनामरूपभाक्त्वेनादिमत्त्वमित्यभिप्रायः कथं तस्य नामरूपरा
हित्यं उपादानकारणत्वेन नामरूपभाक्त्वस्यावर्जनीयत्वादित तया नामरूपनिर्वोढत्वेनोपादानत्वेपि स्वतो नामरूपभाक्त्वाभावात् ॥३८
काल इति ॥ परमाण्वादिर्द्विपरार्द्धान्तोऽयं कालात्मा य ईश्वरः ईश्वरशरीरत्वेन न नियामकत्वात्कालः ॥ अन्येषां धाममानिनां उज्ज्वलं मन्यमानानां ॥७४॥
ब्रह्मरुद्रादीनामीश्वरः प्रभुरपि ईशितुः स्वेशितुर्भूम्नः त्रिविधपरिच्छेदरहितस्य भगवतो न प्रभुः न समर्थः ॥३९॥

एवं त्रिलोक्यपिधानमभिधाय तस्मिन्प्रलये भगवतोवस्थानमाह ॥ तस्मिन्सलिले अंतः मध्ये ऽनंतः शेष एवासनं यस्य सो हरिः योगः स्वानु
भवरूपः ॥ स एव निद्रा तया मीलिते अक्षिणी यस्य स जनालयैर्जनलोक आलयो येषां तैः स्तूयमानः आस्ते ॥ ३२ ॥ एवं त्रैलोक्यबहिष्ठानामायुःप
रिमाणमभिधाय तैर्वै निरयात्वात्तस्यात्मनस्य परमात्मन इत्युक्तरीत्या ब्रह्मभुवनांतानां हेयत्वमाख्यातुं ब्रह्मापुरुषोप्यपेक्षयमाह ॥ कालस्य गत्या
परमाण्वादिसंवत्सरांतरूपगत्योपलक्षितैः ॥ एवंविधैः पूर्वोक्तपरिच्छिन्नैरहोरात्रैर्ब्रह्मणः परमाणिनामायुषः परमधिकं वयः शतं स्वमा
नेन संवत्सरशतात्मकं यत्तदायुस्तदपि अपक्षितमिवापक्षीणमिवेत्यर्थः इवशब्देन किंचिद्ब्रह्मायुरपक्षीणं किंचिदवशिष्टमिति सूच्यते
अंतः स तस्मिन्सलिले आस्तेऽनंतासनो हरिः ॥ योगनिद्रानिमीलाक्षः स्तूयमानो जनालयैः ॥ ३२ ॥ एवंविधैरहो
रात्रैः कालगत्योपलक्षितैः ॥ अपक्षितमिवास्यापि परमायुर्वयःशतम् ॥ ३३ ॥ यदर्द्धमायुषस्तस्य परार्द्धमभिधीयते
पूर्वः परार्द्धोऽपक्रांतो ह्यपरोऽद्य प्रवर्त्तते ॥ ३४ ॥ पूर्वस्यादौ परार्द्धस्य ब्राह्मो नाम महानभूत् ॥ कल्पो यत्राभवद्ब्रह्मा
शब्दब्रह्मेति यं विदुः ॥ ३५ ॥ ३३ ॥ अनंतो हरिरत्रातात्मायया तत्र कियदपक्षीणं कियदवशिष्टमित्यत्राह ॥ यदिति ॥ तस्य ब्रह्मणो यदायुरुक्तं स्वमा
नेन संवत्सरशतात्मकं तस्यायुषः ॥ अर्द्धं परार्द्धमिति कथ्यते तस्माद्द्विपरार्द्धात्मकस्यायुषः पूर्वः परार्द्धोऽपक्रांतः अपगतः ॥ अपर उत्तरप
रार्द्धः स्याद्यंतयोः कल्पयोरुत्तरपरार्द्धस्य कल्पस्य चान्वर्थानि नामान्याह पूर्वस्येत्यादिभिस्त्रिभिः श्लोकैः पूर्वस्य परार्द्धस्यादौ ब्राह्मो नाम ब्रा
ह्माख्यो महाकल्पः अभूत ॥ नाम्नोन्वर्थतां वदन्महत्त्वं चाह यत्र पूर्वपरार्द्धाद्यकल्पे ब्रह्माऽभवदिदमेवान्वर्थतानिमित्तं कोसौ ब्रह्मा यस्तं वं
धात्मकत्वस्य ब्राह्मत्वमत आह ॥ यं शब्दब्रह्मेति वेदमयं इति विदुः इदमेव हि महत्त्वे निमित्तं यस्य परब्रह्मतदुपासनतद्द्वारा धर्मप्रकाशकवेदम

पद्मगर्भस्तुतिर्नाम ॥ ६ ॥

एवं दिनगतां स्थितिमभिधाय रात्रिगतां स्थितिमाख्यातुमुपाक्रमते ॥ नमोमात्रामिति ॥ अतो भगवतो रक्षकत्वविहतिरित्यभिप्रायस्त्वर्थः
प्रतिसंरुद्धः निवृत्तः क्रमो व्यापारो यस्य सः कालेनानुगतमनुप्रविष्टमशेषं यस्य सः कालोप्येनमनुसरतीत्यर्थः ॥ ब्रह्मा दिनात्यये दिनांते तू-
ष्णीमास्ते उपविशति ॥ २८ ॥ अनुगताशेषत्वमेव विशदयति ॥ तमेवेति ॥ तमेवानुगतं कालमेवानुपश्चाद्भूरादयः त्रयो लोका अपि धीय-
ते तिरोहिता भवंतीत्यर्थः कथमपिधीयंते इत्यत आह ॥ निशायामनुवृत्तायां प्रवर्त्तमानायां सत्यां निर्मुक्ताः शशी चंद्रः भास्करश्च याभ-
वंति यया तो विनेत्यर्थः ॥ अपिधीयते न दृश्यंतीत्यर्थः ॥ २९ ॥ पुनस्तमेवापिधानप्रकारमाह ॥ त्रिलोक्यामिति द्वाभ्यां ॥ शक्त्या भगवच्छक्ति-

नमोमात्रामुपादाय प्रतिसंरुद्धविक्रमः ॥ कालेनानुगताशेष आस्ते तूष्णीं दिनात्यये ॥ २८ ॥ तमेवान्वपिधीयंते
लोका भूरादयस्त्रयः ॥ निशायामनुवृत्तायां निर्मुक्तशशिभास्करम् ॥ २९ ॥ त्रिलोक्यां दह्यमानायां शक्त्या सं-
कर्षणाग्निना ॥ यांत्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः ॥ ३० ॥ तावत्त्रिभुवनं सद्यः कल्पांतैधितसिंधवः
॥ प्लावयंत्युत्कटाटोपचंडवातेरिर्मयः ॥ ३१ ॥ श्रीरामः

रूपेण संकर्षणाग्निना संकर्षणमुखोद्भूतरुद्रागणाग्निना
त्रिलोक्यां दह्यमानायां सत्यां तस्याग्नेरूष्मणा ऽर्दिताः महर्लोकवासिनो भृग्वादयः तस्माल्लोकाज्जनलोकं पालयतिम् ॥ ३० ॥ तावत्तदा
संकर्षणाग्निना दग्धं त्रिभुवनं कल्पांते एधिताः प्रवृद्धाः सिंधवः उत्कट आटोपः क्षोभः येषां ते च ते चंडवातेरितोर्मयश्च सद्यः याव-
यंति संप्लावयंति ॥ ३१ ॥

मन्वायुःपरिमाणमाह स्वं स्वमिति। साधिकां किंचिदधिकां युगानामेकसप्ततिं स्वं स्वं कालं मनुर्भुङ्क्तेऽनुभवतीत्यर्थः ॥२४॥ मन्वंतरगतानां स्थितिमाह
मन्वंतरेष्विति। मन्वन्तराणि मन्वंतराणि पूर्वपूर्वमनुमारभ्य उत्तरोत्तरमनुपर्यंतमध्यकालस्तेषु मनवः मनुवंश्याः पृथिवीपालका राजान
ऋषयः सुराश्च सुरेशाः इंद्रादयः ताननुवर्तंते ये ते सर्वे युगपत्संभवंति त्रिलोकीं परिपालयंतीत्यर्थः ॥२५॥ अथैवं त्रैलोक्यवर्हिष्ठमानमि
तद्दिनकालावधिं स्वसर्गस्य दैनंदिनसर्गत्वं वदन्मन्वादिभिर्द्वारभूतैर्भगवानेव विश्वमवति न तु मन्वादयः स्वयमवितार इत्याह एष इति

स्वं स्वं कालं मनुर्भुङ्क्ते साधिकं ह्येकसप्ततिं ॥२४॥ मन्वंतरेषु मनवस्तद्वंश्या ऋषयः सुराः। भवंति चैव युगपत्सु
रेशाश्चानु ये च तान् ॥२५॥ एष दैनंदिनः सर्गो ब्राह्मस्त्रैलोक्यवर्तनः। तिर्यङ्नृपितृदेवानां संभवो यत्र क
र्मभिः ॥२६॥ मन्वंतरेषु भगवान्बिभ्रत्सत्वं स्वमूर्तिभिः। मन्वादिभिरिदं विश्वमवत्युदितपौरुषः ॥२७॥

ब्रह्मणश्चतुर्मुखकर्तृकः एष दैनंदिनः दिने दिने क्रियमाणो यः सर्गः स एष दैनंदिनसर्गः। कथंभूतः त्रैलोक्यवर्तनः त्रैलोक्यस्य वर्तनं वृत्ति
र्यस्मिन्नस्तीति त्रैलोक्यवर्तनः वर्द्धन इति पाठांतरं तत्र त्रैलोक्यं वर्द्धयतीति तथा। तत्र यस्मिन् दैनंदिने सर्गे तिरश्चां नृणां पितॄणां दे
वानां कर्मभिः पुण्यपापरूपैः संभवोत्पत्तिर्भवति ॥२६॥ मन्वंतरेषु भगवान्स्वमूर्तिभिः सत्वं शुद्धसत्वं बिभ्रच्छुद्धसत्वमयमूर्तिं बिभ्राण इत्य
र्थः ॥ उदितपौरुषः आविष्कृतपुरुषाकारः मन्वादिभिर्द्वारभूतैरिदं विश्वमवति। अतो भगवतो रक्षकत्वं विहितमित्यभिप्रायः ॥२७॥

ननु सर्वसंध्यांशस्यैव पुरित्वउननाभ्यामंतरेणमध्यस्यैवेति संशयं निराकुर्वन् चतुर्युगेषु तत्तद्वर्णाश्रमधर्माणामवश्यकर्त्तव्यत्वमाह॥ संध्यांश
योरितिशतसंख्ययोः शतानिसंख्याप्रयोः संध्यांशयोरंतरेणमध्येयः कालः तमेवकालंयुगमिति॥ युगज्ञाःआहुरित्यर्थः॥ यत्रयुगेधर्मःनि
त्यनैमित्तिककाम्यकर्मभेदेनत्रिविधोपिविधीयतेकर्तव्यत्वेनवोध्यतेइत्यर्थः॥२०॥ कृते चतुष्पदोधर्मस्यानुवृत्तिषुतत्संकोचंचाह॥ धर्म
इति कृतेयुगेमनुजान् चतुष्पाद्धर्मोनुवर्त्ततेऽन्येषुत्रेतादिषुएकेनपादेनवर्द्धिताऽधर्मेणहेतुनाधर्मःवेत्स्यपगतइतीत्यर्थः॥२१॥ अथ

संध्यंशयोरंतरेणयःकालःशतसंख्ययोः॥ तमेवाहुर्युगंतज्ज्ञायत्रधर्मोविधीयते॥२०॥ धर्मश्च
तुष्पान्मनुजान्कृतेसमनुवर्त्तते॥ सएवान्येष्वधर्मेणव्येतिपादेनवर्द्धता॥२१॥ त्रैलोक्या
युगसाहस्रंवहिराब्रह्मणोदिनम्॥ तावत्येवनिशातातयन्निमीलतिविश्वसृक्॥२२॥
निशावसानआरब्धोलोककल्पोनुवर्त्तते॥ यावद्दिनंभगवतोमनून्भुंजंश्चतुर्दश॥२३॥

त्रैलोक्याद्वहिष्ठानांदिनपरिमाणमाह॥ त्रैलोक्याद्वहिःस्थितानामाब्रह्मणःब्रह्मपर्यंतानांसर्वेषांयुगसहस्रंदिनमहरित्यर्थः हेतातविदुर
तावतीरात्रिःदिनयन्त्रैरिमिनायुगसहस्रमितारात्रिःयद्यस्यांरात्रौविश्वसृग्ब्रह्मानिमीलतिस्वपिति॥२२॥ वहिष्ठानामहोरात्रगतानांस्थि
तिमाह॥ निशावसानइत्यादिना अंतःसलिलतस्मिन्नेसंतेन॥ निशायारात्रेरवसानेऽत्ययेनिशायामपगतायामित्यर्थः॥ आरब्धोयोलोक ॥७२॥
कल्पःकल्पादभिन्नोलोकःयद्वाकल्पनंकल्पःसर्गइत्यर्थः चतुर्दशमनून्भुंजन्पाशिश्छिंदन्भगवतोब्रह्मणोयावद्दिनमनुवर्त्ततइत्यर्थः

अहंन जानामीति मा वोचइत्याह॥ भगवानिति॥ भगवद्दात्मकस्य गतिं वेद जानाति ननु हे मैत्रेय निश्चये वा कथमहंजानीयां इत्यत्र आह॥ धीरा भवादृ शा ज्ञानिनः॥ योगराद्धेन योगसिद्धेन चक्षुषा विश्वं जगदपि चक्षते पश्यंति योगिप्रत्यक्षाविषयं न किंचिदस्तीत्यर्थः॥१७॥ एवमापृष्टो मुनिस्त्रैलो क्यवृद्धिरहितानां मा चतुर्मुखानां सर्वेषां युगसाहस्रदिनपरिमाणम॥ एवंविधपक्षपुत्ररात्रिशतादिनात्मकवर्षशतमायुःपरिमाणमि ति कथयितुं तावद्युगपरिमाणं युगांशसंध्यापरिणं युगस्वरूपयुगेषु धर्मानुवृत्तिं तारतम्यं चाह॥ चतुर्भिः त्रिभिः॥ युगपरिमाणमाह कृतं इति॥ कृतादि चतुर्युगं सावधानमवधीयत इत्यवधानं संध्यांशाभ्यां तत्सहितं चतुर्युगं दिव्यैर्देवमानमितैर्द्वादशसहस्रैर्वर्षैर्निरूपि

भगवान्वेद कालस्य गतिं भगवतो ननु॥ विश्वं विचक्षते धीरा योगराद्धेन चक्षुषा॥१७॥ मैत्रेय उवाच॥ कृतं त्रे ता द्वापरं च कलिश्चेति चतुर्युगम॥ दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितम॥१८॥ चत्वारि त्रीणि द्वे चै कं कृतादिषु यथाक्रमम॥ संख्यातानि सहस्राणि द्विगुणानि शतानि च॥१९॥

तं॥१८॥ अपि च कृतादि षु यथाक्रमं चत्वारि त्रीणि द्वे चैकं चेति सहस्राणि संख्यातानि एतानि तु द्विगुणसंख्यानीत्यर्थः॥ अयमर्थः॥ तावत्कृतयुगस्य देव माने न चत्वारि सहस्राणि संध्यासंध्यांशयोश्च चत्वारि चत्वारि शतानि इत्थमष्टौ शतान्यष्टशतोत्तरचतुःसहस्रवत्सराः ससंध्यांशस्य कृतयुगस्य परिमाणं॥ त्रेतायाः षट्शतोत्तरत्रिसाहस्रवर्षपरिमितः॥ द्वापरस्य तु ससंध्यांशस्य चतुःशतोत्तरद्विसहस्रवर्षाणि॥ कले स्तु ससंध्यांशस्य द्विशतोत्तरैकसहस्रवर्षपरिमितिः युगस्यादौ संध्या युगांते संध्यांशः सहस्राणामुपरि उक्तानि शतानि क्रमेण तत्संध्या

प्रायोः परिमाणं संध्यांशकसमा॥१६॥

भा.त.टी.
॥७१॥

उक्तस्यैव सर्वात्मक कालचक्रस्य सूर्यादिगतिभेदेन नामभेदमाह ॥ संवत्सर इत्येकेन ॥ आदित्यगत्या संवत्सरः ॥ बृहस्पतिगत्या परिवत्सरः ॥ त्रिंशद्दिवसैर्मासैरादि
त्यगतिविशेषादिडावत्सरः चांद्रन क्षत्रगतिभ्यामनुवत्सर वत्सरावित्येवं प्रभाष्यते कथ्यते ॥१४॥ एवं सूक्ष्मत्वेन स्थूलत्वेन सर्वस्यावच्छेदकत्वेन स्वरूपं निरू
प्योक्तविध कालशरीरकस्यात्मनः सूर्यात्मनः परमात्मनः ॥ उपासनकालस्तत्वमिच्छद्भिः कर्त्तव्यमित्याह ॥ यइति ॥ भूतानि भिनत्तीति भूतभेदः भूतविका
रहेतुः स परमात्मा कालाख्यया स्वशक्त्या स्वतत्वात् सृज्यानां कर्मशक्तीः परिणमयन् पुंसो जीवस्याभ्रामभ्रमो मोहस्तन्निवृत्तये तत्तत्कालानुष्ठेयधर्मविषयं
मोहं निवर्त्तयितुमित्यर्थः क्रतुभिः साध्यं यज्ञगुणमयं सत्वादिगुणभेदेन त्रिगुणात्मकं फलं वितन्वन् विस्तारयन् दिव्यंतरिक्षे धावति ॥ सूर्यांतर्वर्ती भूत्वा

संवत्सरः परिवत्सर इडावत्सर एव च ॥ अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते ॥१४॥ यः सृज्यशक्तिमुरुधोच्छ्व
सयन्स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः ॥ कालाख्यया गुणमयं क्रतुभिर्वितन्वंस्तस्मै बलिं हरत वत्स
रपंचकाय ॥१५॥ विदुर उवाच ॥ पितृदेवमनुष्याणामायुः परमिदं स्मृतं ॥ परेषां गतिमाचक्ष्व ये स्युः कल्पाद्बहिर्विदः
॥१६॥

पर्यटति ॥ तस्मै सूर्यशरीरकाय वत्सरपंचकाय पूर्वोक्तसंवत्सरादिपंचकात्मने बलिं हरत पूजां कुरुतेत्यर्थः ॥१५॥ एवं कालस्वरूपे आयुःप
रिमाणे कालस्य नियंतुः सूर्यांतरस्योपासने च कर्त्तव्येऽभिहिते पितॄणां तदहर्निशि दिवि अयने हानि प्राहुः संवत्सरशतं नराणां परमायुर्निरूपितमिति त्रैर
लोक्यांतर्वर्त्तिनां एव पितृदेवमनुष्याणामायुः परिमाणं कथितं त्रैलोक्याद्बहिर्भूतानां तु कियदायुः परिमाणमिति बुभुत्सया पृच्छति विदुर ॥ पितृदे
वमनुष्याणां परमायुरिदं स्वस्वमानेन वर्षशतं स्मृतं परेषां गतिमायुर्मानमाचक्ष्व ते के इत्यत आह ॥ कल्पात्कल्पावस्था त्रैलोक्या बहिर्ये षु ॥ संतीति

विदुरः तेषामिमपृष्टे ॥ विरहादितिपाकांतं ॥ नत्तकल्पानांबहि
भूतानांतमितिकायास्तत्र्यर्थः ॥१२६॥
॥७१॥

प्रस्थं तं निमज्जनावच्छिन्नः कालः नाडिकेति समुदयार्थः ॥ अत्र पलत्रितयोराधिक्ये शीघ्रं निमज्जेदल्पत्वे च विलंबेनेति पलघटिकयोर्नियमः
र्थः ॥ चत्वारश्चत्वारः अष्टावित्यर्थः ॥ अष्टौ यामाः मर्त्यानां उभे आह ॥ अहोरात्रः पंचदशाहान्यहोरात्रात्मकान्यहानि शुक्लः कृष्णश्च पक्षः पंचद
शाहानि शुक्लपक्षः पुनः पंचदशाहानि कृष्णः पक्ष इत्यर्थः ॥१०॥ हे मानद रविद्वरतयोः शुक्लकृष्णयोः पक्षयोः समुच्चयः समुदायः एको मासः न्दर
सामित्यनुषंगः पितॄणां विशेषमाह पितॄणामिति तत्पूर्वोक्तो मासः पितॄणामहर्निशमहोरात्रः यत्तदोर नियमेनोद्देश्यविधेययोर्मतरलिंगत्वा
त्तहितिनपुंसकनिर्देशः तैः पूर्वोक्तैर्मासैर्नृणां ऋतुः षण्मासास्त्वयनं इत्युच्यते तच्चायनं दक्षिणोत्तरभेदेन विविधम् ॥ षण्मासा दक्षिणायन

यामाश्चत्वारो मर्त्यानामहनी उभे ॥ पक्षः पंचदशाहानि शुक्लः कृष्णश्च मानद ॥१०॥ तयोः समुच्चयो मासः पितॄणां
तदहर्निशः ॥ द्वौता ऋतुः षडयनं दक्षिणं चोत्तरं दिवि ॥११॥ अयने वाहनी प्राहुर्वत्सरो द्वादश स्मृतः ॥ संवत्सरश
तं नॄणां परमायुर्निरूपितम् ॥१२॥ ग्रहर्क्षताराचक्रस्थः परमाणवाहिना जगत् ॥ संवत्सरावसानेन पर्येति निमि
षो विभुः ॥१३॥

पुनः षण्मासा उत्तरायणं ॥११॥ देवानां विशेषमाह ॥ अयने दक्षिणोत्तरायने दिवि स्वर्गेऽहनी प्राहुः देवानामहर्निशमित्यर्थः
द्वादश पूर्वोक्ताः मासा द्वादशा वत्सरः स्मृतः प्रसंगान्नृणामायुः परिमाणमप्याह संवत्सरशतमिति ॥ स्पष्टोऽर्थः नृणामित्युपलक्षणमन्येषामपि स्व
स्वमानेन शतसंवत्सरमायुर्भवतीत्यर्थः ॥१२॥ अनेन क्रमेणास्सूर्यो नित्यमायुः क्षिपतीत्याह ॥ ग्रहर्क्षेति ॥ अनिमिषः नित्यजागरूकः विभुः स
र्वः ग्रहर्क्षताराचक्रस्थः ग्रहाश्चंद्रादयः षण्मासाश्चादीनि ताराः अन्यापि नक्षत्राणि तदुपलक्षितं यत्कालचक्रं तत्स्थितः जगद्द्वादशराश्यात्म
कं भुवनकोशं परमाणवाहिना संवत्सरांतेन कालेन पर्येति पर्यटति ॥१३॥

भा.टी.टी. लवत्रयं निमेषस्त्स्याह ॥ निमेष इति ॥ शतभागस्तु वेधः स्यादिति स्मृत शतशब्दोऽनेकवाची ॥ तथा सति निमेषशतभागस्य सहस्रांशः ॥ त्रुटोऽन्यपतर
स्याप्ययुत भागांशो ऽर्भवस्तु प्रचयोन्नृणां इति निशेषानकवचैनैकार्थ्यं स्यात् इदृशकालविभागः कथमवगम्यत इति चेत् एक त्रुटिर्विद्युद्याहिलो
॥७०॥ कारयोनकयोजनं व्याप्नुवंति ॥ एक त्रुटौ अरिमिर यस्यानेकयोजनमतिश्च समर्थ्यते तत्रैकयोजनेपि प्रदेशे समुदिताः केशाः सर्षपाश्चनश
क्याः संख्यातुं ततश्च केशादिवत्परिमितदेशव्याप्त्यवच्छिन्नाः ॥ कालावयवा एकक्षणावत्सतिपन्ना अप्यसंख्येयाः संतीत्युपपन्नमेवतेन
त्रयो निमिषाः एकः क्षणः स्यात् ॥ पंचक्षणान्काष्ठां विदुः काष्ठाः पंचदश एककालघुतालघुतारव्यः कालः ॥ ७ ॥ पंचदश लघुनि एका नाडि

निमेषस्त्रिलवो ज्ञेय आम्नातास्ते त्रयः क्षणः ॥ क्षणान्पंच विदुः काष्ठां लघुत्वा दश पंच च ॥ ७ ॥ लघूनि वै समाम्ना
ता दश पंच च नाडिका ॥ ते द्वे मुहूर्त्तः प्रहरः षट्यामः सप्त वा नृणाम् ॥ ८ ॥ द्वादशार्द्धपलोन्मानं चतुर्भिश्चतुरं
गुलैः ॥ स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजलप्लुतम् ॥ ९ ॥ कासाम्नाताः द्वे ते नाडिके एको मुहूर्त्तः ॥ षट् नाडिकाः सप्त वा प्रहरः स एव या
मो दिनस्य रात्रेश्च तुर्यो भागः ह्रासे षट् वृद्धौ सप्त संध्यामुहूर्त्तद्वयं विनेति ज्ञातव्यम् ॥ तत्रापि नियमार्थो वा शब्दः ॥ नृणामित्यनेन मनुष्यमानमु
क्तं ॥ ८ ॥ प्रसहं तद्देशानां गणयितुमशक्यत्वान्नाडिकामानं ज्ञापयितुं प्रस्थलक्षणमाह द्वादशार्द्धेति ॥ द्वादशार्द्धपलोन्मानं उन्मीयतेऽनेनेत्युन्मा
नं पात्रं तच्च द्वादशार्द्धपलमर्द्धाधिकद्वादशपलपरिमितताम्ररचितम् ॥ षट्पलताम्ररचितमित्येके ॥ पंचगुंजामाषैः तैश्चतुरंगुलायामुपशाला
कारूपेण रचितैः कृतमलच्छिद्रं तेन च्छिद्रेण प्रस्थपरिच्छिन्नजलभरणयोग्यत्वात्प्रस्थशब्दवाच्यं पात्रं जले प्लुतं स्थापितं यावता कालेन निमज्ज ॥७०॥
ति सा नाडिकेत्यर्थः ॥ माषचतुष्टयमितस्वर्णकृतचतुरंगुलसूच्याकृतच्छिद्रमर्द्धाधिकद्वादशपरिमितं प्रस्थपरिमितजलरेणोर्वनिमज्जत्यात्र

एवमपचकर्षप्रकर्षउपपाद्य अवांतरकालविशेषावछेदकावस्थाः प्रतिपादयति ॥ अणुर्द्वावित्यादिना द्वौताद्दृतुः षडयनं दक्षिणं चोत्तरं दिवी
त्यंतेन ॥ अणुरित्यादिना वैशेषकप्रक्रियोक्तिः किंतु तैरभ्युपगतवस्तुपरिभाषितानां शब्दानां कालावयवेषु प्रयोगस्तं परमाणवादिना
संवत्सरावसानेनेति वक्ष्यते ॥ द्वाभ्यां परमाणुभ्यामणुरित्येकः कालः स्यादित्यर्थः त्रिभिरणुभिस्त्रसरेणुरित्येकः कालः स्यात् ॥ त्रसरे
णुसंज्ञकान्कालान्स्वैर्ज्ञानां कालानामत्यंतसूक्ष्मतयातदवछेदकयत्नस्याशक्यत्वात्त्रसरेणुसंज्ञककालस्यावछेदकमाह

अणुर्द्वौ परमाणुस्यात्त्रसरेणुस्त्रिभिस्मृतः ॥ जालार्करश्म्यवगतः खमेवानुपतन्नगात् ॥५॥
त्रसरेणुत्रिकंभुंक्तेयः कालः सत्रुटिः स्मृतः ॥ शतभागस्तुवेधः स्यात्तैस्त्रिभिस्तुलवः स्मृतः ॥६॥

जालार्केति ॥ जालकरंध्रनिष्क्रांतादित्यरश्मिषु दृश्यः खमाकाशमेवानुपतन्नगात् न भूमिमनुपतन्नुपांशुरर्थः सत्रसरेणुः कालइ
त्यन्वयः अवछेद्यस्य कालस्यावछेदकपांशुरूपपदार्थस्य चोपचारात्सामानाधिकरण्यं जालार्करश्म्यवगतपांशोरीषत्स्यंदना
वछिन्नः कालः त्रसरेणुसंज्ञ इत्यर्थः ॥५॥ त्रसरेणुसंज्ञककालांशत्रिकं भुंक्ते प्राप्नोति यः कालः सत्रुटिरित्यर्थः त्रसरेणुकालत्र
यं त्रुटिरित्युक्तं भवति सात्रुटिः वेधाख्यस्य कालस्य शतः भागः शतगुणः कालः एषः यत्र वेधावछिन्नः ॥ त्रिभिस्तैः वेधैर्लवाख्यः का
लस्मृतः इत्यर्थः ॥६॥

भा.तृ.टी.
६९

अनेकः कार्यावस्थामप्राप्तः असंयुतः समुदायावस्थां चाप्राप्तः अत एव सदा कार्यसमुदायावस्थयोरपगमेऽप्यस्ति स परमाणुर्विज्ञेयः नृणां यतः
कालापकर्षादैक्यभ्रमः ईदृशं समस्तं विभागमज्ञात्वाऽनेकेषु कालांशेष्वेकः काल इति भ्रमं तीतमर्थः ॥१॥ एवमपकर्षकाष्ठाभिहिता ॥ अथ प्रकर्षका-
ष्ठमाह ॥ सत इति ॥ यस्य कार्यस्य चरमोंशः परमाणुस्तथैव सतः कार्यावस्थयावस्थितस्य स्वरूपावस्थितस्य विकारांतररहितस्य पदार्थस्य य-
त्कैवल्यं केवलं स्वरूपं स एव परममहान्निरतिशयप्रकर्षः तमेव विशिनष्टि ॥ अविशेषः पुनः प्रकर्षांतररहितः निरंतरः स्वसमवेतानार-
हीनभेदावयवः ॥२॥ कालपरिच्छेद्ये पदार्थे उपपादिते प्रकर्षापकर्षकाष्ठे प्रतिदिशति ॥ एवमिति द्वाभ्यां ॥ एवं परिच्छेद्यप्रकर्षापकर्षका-

सत एव पदार्थस्य स्वरूपावस्थितस्य यत् ॥ कैवल्यं परममहानविशेषो निरंतरः ॥२॥ एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये
च सत्तम ॥ संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः ॥३॥ स कालः परमाणुर्वै यो भुंक्ते परमाणुतां ॥ सतोऽविशेषभुग्यस्तु स
कालः परमो महान् ॥४॥

तावत्कालोऽपि सौक्ष्म्ये परमाण्वादिरूपे प्रकर्षे च संस्थानभुक्त्याऽवच्छेद्यार्थगतावस्थाविशेषसंयोगलक्षणया ॥ पदा-
र्थावच्छेदकाणुत्वाद्यवस्थानविशेषसंयोगलक्षणया भुक्त्याऽनुमितः कथंभूतः भगवान् भगवद्रूपात्मकः स्वयमव्यक्तः व्यक्तभुग्विभुः व्यक्तवस्तुपरिणा-
महेतुः ॥३॥ अतिदिष्टामेवापकर्षकाष्ठामुपपादयति ॥ स इत्यर्द्धेन ॥ परमाणुतामसम्यक्तां यः कालो भुंक्ते भजति स कालः परमाणुर्ज्ञेयः प्रकर्षकाष्ठमाह
सत इत्यर्द्धेन ॥ सतः निरतिशयसमस्तावस्थायावस्थितस्य सर्वस्य योऽविशेषः निरतिशयस्थूलसंवत्सरात्मकत्वं विशेषणं तं भजतीति विशेषभुग्यः स प-
रमो महान्निरतिशयप्रकर्ष इत्यर्थः संवत्सरात्मकत्वमेव हि कालस्योत्सं द्विपरार्द्धत्वं ॥ तस्यैव संवत्सरस्यायुगमन्वंतरानुक्रमेण भवतीति ततस्थौ-
ल्यं ॥४॥ ६९

नन्वप्रतिकल्पमिंद्रादयोभिन्नाउ तैनतत्कल्पस्थानामेवजीवानामिंद्रत्वाद्यैश्वर्यप्राप्तंपुनःपुनःकल्पांतरेनुवृत्तिरितिसंशयंनिराकुर्वन्नाह देवासुराद
यइतिहेक्षतः नामरूपाभ्यां इंद्रादिनाम्नासहस्राक्षत्वादिरूपेणास्मिन्कल्पेयेसुरादयःप्रकीर्तिताःतएवमन्वंतरे आसन्नित्यर्थः यद्वायद्देवानी देवा
सुरादयः तएवमन्वंतरांतरेनामांतररूपांतराभ्यांउपलक्षिता आसन्नित्यर्थः अन्यथाप्रतिमन्वंतरपृथक्करणपराणस्यचनविरोधात्
अनेनवश्लोकेनेंद्राद्यैश्वर्यवतामादित्वंपुनरावृत्तिश्चज्ञायते॥३१॥ इतितृतीयेदशमोध्यायः॥ १०॥ एवंकालस्यसृष्टिमुक्त्वाकालस्वरूपंस्थ्योल्यसौ
क्ष्म्यरूपंप्रकर्षापकर्षनिरूपयति॥चरमइतिश्लोकद्वयेन ननुकालपरिच्छेद्यवस्तुनःप्रकर्षापकर्षनिरूपणंकिमर्थंप्रक्रान्तत्वादितिचेन्न
कालोह्यत्रपरमाण्वादिसंवत्सरांतःस्थूलसूक्ष्मरूपःसूर्यगत्यालक्ष्यतेयत्रसूर्योयावत्परमाणुमतिक्रामतितावान्कालःपरमाणुः

देवासुरादयोनामरूपाभ्यांयेप्रकीर्तिताः॥अस्मिन्कल्पेनएवासन्क्षत्तर्मन्वंतरांतरे॥३१॥इतिश्रीमद्भागवतेतृ
तीयस्कंधेपाधर्गेर्णेनामदशमोध्यायः॥१०॥चरमःसद्विशेषाणामनेकोऽसंयुतःसदा॥परमाणुःस
विज्ञेयोनृणामैक्यभ्रमोयतः॥१

यावत्तावद्द्वादशराश्यात्मकंभुवनकोशमतिक्रामतिसपरममहान्संवत्सरात्मकःएवंचसूर्यगति
विषयदेशप्रकर्षापकर्षनिरूपणमंतरेणसूर्यगत्यनुमेयकालप्रकर्षापकर्षनिरूपणायोगात्॥युक्तंतावत्कालकालस्यवस्तुनःनिरतिशय२
स्थौल्यसौक्ष्म्यनिरूपणं॥तत्रप्रथमंकालपरिच्छेद्यस्यनिरतिशयसौक्ष्म्यरूपापकर्षकाष्ठामाह॥चरमइत्येकेन॥केचिदिमंश्लोकंवैशेषिको
क्तपरमाणुसद्भावपरमाहुःतदयुक्तंवेदोपबृंहणपरेप्रबंधेपरमाणुसद्भावाभ्युपगमासंभवात्परमाण्वादिसंवत्सरावसानेनेतिवक्ष्य२
माणत्वाच्चसद्विशेषाणांसतःकार्यसविशेषाणामंशानांयश्चरमोंत्यांशः॥अन्त्यःयस्यपुनरंशोनास्तिसइत्यर्थःतमेवविशिनष्टि

भा.तृ.टी.
॥ ६८ ॥

कथितमवतारविधाभिप्रायेणादेशेनुपसंहार इत्यविरोधः हे विदुर विश्वसृजा चतुर्मुखरूपेण केवलेन स्वात्मना च कृता एते दश सर्गास्तेतु
भ्यमाख्याताः कथिताः सर्गाश्चैवानुसर्गाश्च मन्वंतराणि चेति चतुर्मुखः स्रष्टेः पूर्वापरेषु सृष्टेषु सर्गेषु कथितेष्वनंतरसृष्टेषु मनुम
न्वंतरेषूत्तरग्रंथे वर्णनावसरानकार्या संगतिविशेषेणानाप्यपि कथयिष्यामीत्याह अतः परमिति ॥ अतः सर्ववस्तुपरिच्छेदककालरूपकथना
नंतरं मन्वंतराणि च प्रवक्ष्यामि ॥ २८ ॥ पुरुषस्तूपादानमात्मानं लीलया सृजतीत्युपक्रांतमेकस्यैव ब्रह्मणः उपादानत्वं निमित्त
त्वं चोपसंहरति ॥ एवमिति कल्पादिषु स्रष्टा आत्मभूः हरिश्चतुर्मुखशरीरको हरिः रजोवृतश्चतुर्मुखद्वारा रजउद्रेकः अमोघसंक
ल्प इत्यनेनैव लोकपरिदृष्टनिमित्तोपादानभूतमृत्कुलालभेदन्यायस्यात्रानवकाश उक्तः ॥ कुलालस्यासर्वशक्तित्वान्नोपादानत्वं मृद इत्वज्ञत्वा

एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः ॥ सृजत्यमोघसंकल्प आत्मैवात्मानमात्मनः ॥ २९ ॥
गुणव्यत्यययोगात्तस्मिन्मायावित्वादधीशितुः ॥ पौर्वापर्यं चेच्छंति सृष्टेन घांयथाभ्रमे ॥ ३० ॥

त्वं निमित्तत्वं च तदुभयोः प्रतिपन्नत्वाच्च कर्त्रंतरकर्मांतरकरणांतराद्यपेक्षेति भावः ॥ २९ ॥ उक्तनवविधसर्गाणां मध्ये अंड
सृष्टिर्युगपच्चत्वाकाशादीनामिव क्रमेणेत्याह ॥ गुणव्यत्यय इति ॥ गुणव्यतिकरात्मके एतस्मिन्नंडे पौर्वापर्यं नेच्छंति ॥ सृष्टेर्महदादि
तत्त्वेत्र अंडसृष्टिर्युगपत्त्वाकाशादीनामिव क्रमेणेत्यादिरप्यर्थः ॥ तत्कुतः अधीशितुरधीशस्य प्रभुः ॥ परमात्मनो मायावित्वात्
आश्चर्यशक्त्युपेतत्वादंडसृष्टिर्युगपदेवेत्यर्थः ॥ नन्वाकाशादिष्वपि योगपद्यं शक्यम् ॥ आकाशाद्वायुर्वायोरग्निरित्यादिविरोधा
त् ॥ युगपदुत्पत्तौ दृष्टांतमाह ॥ नघामिति भ्रमशब्दः आवर्त्तबुद्बुदादिपरः न घांभ्रमत आवर्त्तबुद्बुदादेर्यथा युगपदेवोत्पत्तिस्तथेत्य

॥ ० ॥ श्री ॥
॥ ६८ ॥

अथनवमंसर्गमाह॥अर्वागिति॥अधः स्रोतः गतिराहारोवायस्यसः अर्वाकस्रोतः इस्वत्वमार्षं॥हे क्षतः नृणामर्वाक्स्रोतोयः सर्गः सएकविधः
नतुखगादीनामिवनानाविधः सनवमः सर्गः अर्वाक्स्रोतइतिक्रियाविशेषणंवाऽर्वाक्स्रोतोयथाभवतितथा॥योनृणांसर्गः इति॥नृणांसा
धारणंलक्षणमाह॥रजोधिकाइतिरजः प्रचुरा अतएवकर्मपराः॥२५॥त्रयएतेवैकृताएवनतुकौमारवदुभयात्मकाइत्यर्थः हेवस
र्गस्यादित्रिकंइत्यंतमेकान्वयं॥प्राकृतेषुयोदेवसर्गः प्रसंगाद्वैकारिकोभिहितः सचवैकृतांतर्भूतएवेत्यर्थः हेसत्तमः विदुरवैकृतदे

अर्वाक्स्रोतस्तुनवमः क्षत्तरेकविधोनृणां॥रजोधिकाः कर्मपराःदुःखेचसुखमानिनः॥२५॥वैकृतास्त्रयएवै
तेदेवसर्गश्चसत्तमः॥वैकारिकस्तुयः प्रोक्तः कौमारस्तूभयात्मकः॥२६॥देवसर्गश्चाष्टविधोविबुधाः
पितरोसुराः॥गंधर्वाप्सरसः सिद्धायक्षरक्षांसिचारणाः॥भूतप्रेतपिशाचाश्चविद्याध्राः किन्नरादयः
२७॥दशैतेविदुराख्याताः सर्गास्तेविश्वसृक्कृताः॥अतः परंप्रवक्ष्यामिवंशान्मन्वंतराणिच॥२८॥

वसर्गांतर्भूतकौमारसर्गस्योभयात्मकत्वमाह॥कौमारस्त्विति॥वैकृतसर्गांतर्भूतकौमारसर्गस्यप्राकृतत्वंकथमितिचेत्कुमाराणांमहाहवेव
ब्रह्मणःसृष्टत्वात्प्राकृतांतर्भावः कुमारेष्वंतर्भूतोनीललोहितस्तुसनकादिभिः सहस्रष्टोपिप्रतिसंकल्पंसृज्यतेतस्तस्यवैकृतत्वमित्युभ
यात्मकत्वमित्यभिप्रायात्॥२६॥देवसर्गस्याष्टविधत्वंप्रतिजानन्तद्भेदानाह॥देवसर्गइतिसार्द्धेन॥विबुधाः पितरश्चैककोटिः कर्माराध्य
त्वात्॥असुरास्तुएककोटिः गंधर्वाश्चैककोटिः॥सिद्धाएकः यक्षरक्षांस्येकः॥भूतः प्रेतपिशाचाएकः किन्नरादयइत्यादिशब्देनाश्वमुखकिं
पुरुषादयश्चकिंनरा आदयोयेषांविद्याधराएककोटिः॥एवमष्टविधत्वमित्यर्थः॥२७॥अनुक्रांता
न्सर्गान्निगमयति॥दशेतिसर्गानवविधस्तुपक्रमे

तिर्यक्सर्गस्याष्टमत्वं कथयन्नुक्तस्याष्टाविंशतिविधत्वमाह ॥ तिरश्चामिति ॥ तिरश्चां तिर्यग्गच्छतां यः सोऽष्टमः स च पुनरष्टविंशद्विधो मतः तेषां
साधारणमाह ॥ अविदा इति ॥ स्वस्तनाद्यतनश्वस्तनादिज्ञानशून्याः भूरितमसः केवलाहारनिद्रामैथुनभयमात्रनिष्ठाः घ्राणज्ञाः घ्रा
णेनैवेष्टमर्थं जानंतीति घ्राणज्ञाः गंधेन गावः पश्यंतीति वृत्त हृद्यवेदिनः हृन्मतसुखाद्यनभिज्ञाः दीर्घानुसंधानरहिता इति भावः
तथा च श्रुतिः अथापरेषां पशूनामशनापिपासो एवज्ञानं न वदंति न विज्ञातं पश्यंति न विदुः श्वस्तनं न लोकालोकाविति ॥२०॥ अष्टा

तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः ॥ अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः ॥२०॥ गौरजो महिषः
कृष्णः शूकरो गवयो रुरुः ॥ द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ॥२१॥ खरोऽश्वोऽश्वतरो गौरः शरभ
श्चमरी तथा ॥ एते चैकशफाः क्षत्तः शृणु पंचनखान्पशून् ॥२२॥ श्वा सृगालो वृको व्याघ्रो मार्जारः शशशल्ल
कौ ॥ सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः ॥२३॥ कंकगृध्रवटश्येनभासभल्लूकबर्हिणः ॥ हंससारसचक्रा
ह्वकाकोलूकादयः खगाः ॥२४

विंशतिभेदानाह ॥ गौरिति ॥ गवादयः उष्ट्रांताः ॥ द्विशफाः द्विनखाः ॥ नवैव संतीत्यर्थः हे सत्तम वि
दुरः ॥२१॥ खरादयश्चमर्यंता एकशफाः षट् ॥२२॥ श्वादयो गोधांताः पंचनखाः द्वादश ॥ मिलितभूचराः सप्तविंशतिः मकरादयो जल
चराः ॥२३॥ कंकादयः खगाः भूचरभेदेनैकीकृत्य संगृहीताः एवमष्टाविंशतिभेदाः मकरादिषु स्वजातिविशेषभिन्नेष्वप्यभूचरत्वेने
कत्वं बोध्यं गवादिषु पविष्टो रुरुगौरो मृगविशेषो ॥ छन्दःसाम्येन पशवश्चेमे इति निर्देशः एवमन्यत्रापि द्रष्टव्यं ॥२४॥ ॥६७॥

नच चिंतं विविधविचित्ररचनया प्रयासः ॥ अमस्याशंकांमुनिराह ॥ रजोभाज इति ॥ चतुर्मुखशरीरत्वाद्रजोभाजः ॥ रजउद्रिक्तस्य भ
गवतो हरिमेधसः मेधया बुध्या हरति सांसारिकक्लेशमिति हरिमेधाः यद्विषयकबुद्धिः संसारक्लेशान्हरति स हरिमेधास्तस्य च तेन तस्य
हरेरियं सृष्टिर्लीला न तु तस्याः क्लेश इत्यर्थः ॥ वैकृतप्राणानुक्रमिष्यन् तेषां स्थावरसर्गस्य पूर्वानुक्रांतप्राकृतसर्गसमीपेक्षया सप्तमत्वमाह
सप्तम इति ॥ तस्थुषां स्थावराणां यो मुख्यः सर्गः सप्तमः स च पुनः षड्विधः इत्यर्थः तस्य मुख्यत्वं मुखमिव प्रथमं कृत्वाद्वर्गनव्यम्

रजोभाजो भगवतो लीलेयं हरिमेधसः ॥ सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः ॥ १८ ॥
वनस्पत्योषधिलतात्वक्सारा वीरुधो द्रुमाः ॥ उत्स्रोतसस्तमःप्राया अंतःस्पर्शा विशेषिणः ॥ १९ ॥

स्थावराणां षड्विधत्वमेवाह ॥ वनस्पतीत्यादि ॥ अपुष्पाः फलितो वनस्पतयः ओषधयः फलपाकांताः लता आरोहणापेक्षाः त्वक्साराः कदली
वेण्वादयः वीरुधः ॥ गुल्मरूपाः द्रुमाः पुष्पफलाः तेषां साधारणलक्षणमाह ॥ उत्स्रोतस इति गतेराहाराद्वा ॥ ग निम्नस्रन्ना आहारस्रन्ना वा ॥ त
मःप्राया अव्यक्तचैतन्या अंतःस्पर्शा विशेषिण इत्येकं पदम् ॥ अंतःस्पर्शाः शीतोष्णादिसुखदुःखदाः स्पर्शा येषां ते ऽविशेषिणश्च र
बाह्यविशेषास्तेऽविशेषिणश्च बाह्यविशेषानभिज्ञाश्च ॥ अंतर्गतानेव स्पर्शान्जानंति न तु बाह्यानित्यर्थः ॥ १९ ॥ ॥ ॥

भा॰ स॰ टी॰

॥ ६६ ॥

तैजसस्यवैकारिकभूतादेरनुग्राहकत्वेनस्वतइंद्रियोत्पादकत्वस्यद्वितीयेनिरस्तत्वात् ॥ १६ ॥ षष्ठस्त्विति ॥ तामसःतमःशब्देनप्रकृतिमंडलात्म?
कमंडमुच्यते ॥ आदित्यवर्णंतमसः ॥ परस्तादित्यादौतमःशब्देनप्रकृतिमंडलात्मविधानात्तद्विषयःसर्गस्तामसःषष्ठ ॥ तमेवविशिनष्टि अ
बुद्धिकृतःप्रभोरिति ॥ प्रभोश्चतुर्मुखस्याबुद्धिकृतःतदंतर्यामिपरमात्मसंकल्पकृतइत्यर्थः ॥ तामसस्याबुद्धिकृतत्वकथनंपूर्वेषामप्युप
लक्षणम् ॥ षण्णामपिचतुर्मुखस्येष्टेःप्राक्तनत्वेनचतुर्मुखबुद्धिपूर्वकत्वाभावात् षष्ठस्तुतमसःसर्गइतिपठित्वाबुद्धिजीवानामावर
णंविक्षेपश्चतांकरोतीत्यबुद्धिकृतस्यतमसःपंचपर्वणायःसर्गःसषष्ठइत्यर्थवर्णनंत्वयुक्तम् ॥ विष्णुपुराणेस्थावरादिसृष्टेःचतुर्मु
खबुद्धिकृतत्वप्रदर्शनेइहापितदैकार्थ्यस्यमाप्यत्वाच्चतुर्मुखस्याबुद्धिकृतत्वमेवेष्टव्यम् ॥ ननुस्थावरादिव्यष्टेरबुद्धिपूर्वकत्वमु

षष्ठस्तुतमसःसर्गोयस्त्वबुद्धिकृतःप्रभोः ॥ षडिमेप्राकृताःसर्गावैकृतानपिमेशृणु ॥ १७ ॥ छ ॥

ॐश्रीविष्णुपुराणेइहप्राकृतानांषण्णांसर्गाणांबुद्धिकृतत्वंकथमुक्तमितिचेदुच्यते ॥ साधकामनुष्यादिव्यतिरिक्तानांसृष्टेरबुद्धिपूर्विकेतिभगव
तःपराशरस्याभिप्रायःस्थावरतिरश्चांयज्ञोपकरणत्वादेवानांकर्माराध्यमनुष्यवद्यज्ञोपयिकत्वमस्तीतिस्थावरादिसृष्टेरपिबुद्धिपूर्विके
तिभगवतोद्वैपायनस्याभिप्रायःअतोनविरोधःननुचतुर्मुखस्येष्टेष्वेवस्थावरेषुनरबुद्धिकृतत्वंबुद्धिकृतत्वंचपरस्परविरुद्धमयंकथ
मुपपद्यतइतिचेद्यज्ञानुपयुक्तस्थावराभिप्रायकत्वात्पराशरोक्तेःयज्ञानुपयुक्तेचतुर्मुखस्यासिसृक्षाया ॥ अभावेपितदंतर्यामिपरमात्म
संकल्पादेवतत्सृष्ट्युपपत्तेःप्राकृतसर्गान्निगमय्यन्वैकृतसर्गविभागमवतारयति इमेषट्प्राकृताःसर्गाः ॥ अनुक्रमितादृतिशेषःमेम
त्तःवैकृतानपिसर्गाननुक्रमिष्यमाणान्शृणु ॥ १७ ॥ छ ॥ छ

॥ ६६ ॥

भूतसर्गस्तृतीयस्तदेवोपपादयति॥ तन्मात्रद्रव्यशक्तिमानिति। तन्मात्राणि शब्दादीनि पंच द्रव्याणि आकाशादीनि पंच तान्येव शक्तयोऽस्य संतीति
तद्वान्॥ तन्मात्रद्रव्याणां भगवच्छक्तिशब्देनोक्तिः यथा परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्॥ यस्य पृथिवी शरीरमित्यादि तद्वत् तत्र च शब्दशक्त्या
दिशब्दाः पर्याया इति पुरस्तादेवोक्तम्॥ अत्र मतुप्प्रत्ययेनान्तर्गतसंबंधसामान्यं विषयविषयिभावरूपसंबंधविशेषे पर्यवसन्नं यथा गायेसु
क्ते गोशब्दस्य विवक्षितप्रकृतगोव्यक्तिविशेषपर्यवसानं तथा चायमर्थः भगवच्छरीरभूततन्मात्रद्रव्यविषयकः सर्गस्तृतीय इति॥ तन्मा
त्रद्रव्यशक्तिमानिति पाठे तु तृतीयो भूतसर्गो द्विविधः तन्मात्रः शब्दादिः तन्मात्रसर्गः द्रव्यशक्तिमान् द्रव्यशक्तिविषयश्चेति समासव्यासरू
पेण व्याख्येयं ज्ञानकर्मक्रियात्मकः ज्ञानकर्मेंद्रियविषयः यस्त्विंद्रियसर्गः स चतुर्थ इत्यर्थः वैकारिकः सत्वोद्रिक्तः देवसर्गः इंद्रियाभिमा

भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान्॥ चतुर्थ ऐंद्रियः सर्गो यस्तु ज्ञानक्रियात्मकः॥ वैकारिको देवसर्गः पंचमो

निदेवतादिर्देवसर्गो यः पंचमः यन्मयं मनः यद्वैकारिकाहंकार्यं मनः वैकारिकवैकारिकाहंकारोद्रिक्तो देवसर्गः॥ यन्मयं मनः॥ १६
इंद्रियाभिमानि पंचमः सर्गः यद्यपींद्रियाभिमानिदेवतानां सर्गस्यांडसृष्ट्यनंतरं चतुर्मुखकर्तृत्वेन न वैकारिकाहंकारसर्गांतर्भावः
अत एव वैकृतास्त्रय एवैते देवसर्गश्च सत्तमेति देवसर्वस्य वैकृतत्ववक्ष्यते तथापींद्रियप्रसंगाद्बुद्धिस्थानयनेषां कथनं तु वैकारिकत्व
विवक्षया सर्वेषामिंद्रियाणां वैकारिकाहंकारादेवउत्पत्तेर्दिगादिदेवताधिष्ठेयश्रोत्रादींद्रियोत्पत्त्यभिप्रायेण वा देवसर्ग इत्युक्तम्॥ ननु स
र्वेंद्रियाणां वैकारिकत्वे कथं चतुर्थस्त्विंद्रियसर्गः॥ यस्तु ज्ञानक्रियात्मकः॥ इति पंचमसर्गानंतरभावेन चतुर्थसर्गत्वकथनमिति चेन्न
आंतरिंद्रियत्वबाह्येंद्रियत्वरूपवैधर्म्येण मनः सर्वेंद्रियवर्गयोः॥ पृथग्गणनात् न चैतावतेंद्रियाणामवैकारिकत्वशंका कार्या॥

भा.त.टी.

॥६५॥

तोद्रव्यस्यनिमित्तत्वात्॥ तथा चवेदस्तवंदवः नहेतवः क्षयंनिस्तं जगन्मुनिवराखिलम्॥ आविर्भावतिरोभावजन्मनाशविकल्पवदिति॥ एवं सर्वस्या
पिपरिच्छेदः कालः सामान्यतः कालस्वरूपमस्मुक्तं भवति॥१३॥ एवं कालकाल्यवस्तुसृष्टिमनूद्याथतत्सर्गभेदान्प्रलयभेदांश्च कालादीननुवद
तिसर्गइत्यादिनाद्वाभ्यां शौनेविदुरेसंतेन॥ तस्य कालकाल्यस्य वस्तुनः प्राकृतो वैकृतश्च यः उभयात्मकः सर्गः स नवविधः आद्यो महत्सर्गः द्विती
यस्त्वहंकारसर्गः भूतसर्गस्तृतीयः इंद्रियसर्गश्चतुर्थः मनःसर्गः पंचमः अंधसर्गः षष्ठः एते षट्सर्गाः प्राकृताः तस्थुषां सर्गः सप्तमः तिर
श्चामष्टमः सर्गः नराणां सर्गो नवमः एते त्रयो वैकृताः॥ मिलित्वा नवविधइत्यर्थः अथ प्रलयान्विभजति कालेनईन॥ अस्य कालकाल्यस्य

सर्गो नवविधस्तस्य प्राकृतो वैकृतश्च यः॥ कालद्रव्यगुणैरस्य त्रिविधप्रतिसंक्रमः॥१४॥ आद्यस्तु महतः स
र्गो गुणवैषम्यमात्मनः॥ द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः॥१५॥ ॥ ॥

प्रतिसंक्रमः प्रलयः कालद्रव्यगुणैस्त्रिविधः कालेनास्मिन्कालेस्य मृतिरिति नियतेन कालेन प्रलये नित्यप्रलयाख्यः कालिक एकः द्रव्यैः
णासंकर्षणमुखाग्न्यादिना प्रलयो नैमित्तिकप्रलयाख्यः द्रव्यप्रलयो द्वितीयः गुणैः सत्वादिभिः साम्यावस्थेजातः प्राकृतप्रलयाख्यस्तृतीयः॥१४
नवविधानेव सर्गान्प्रपंचयति॥ आद्यइत्यादिना अर्वाकस्रोतस्तु नवम इत्यंतेन॥ आत्मनः कार्योन्मुखप्रकृतिपुरुषशरीरकात्परमात्मनः सका
शाद्गुणवैषम्यकृतो महत्तत्वसर्गः आद्यो वैषम्य॥ यतगुणात्रयात्मकप्रकृतिविकारविशेषो महत्सर्गः प्रथम इत्यर्थः॥ अहमः अहंकारस्य
द्रव्यज्ञानक्रियोदयः द्रव्यं भूतपंचकं ज्ञानक्रियाशब्दाभ्यां ज्ञानकर्मेंद्रियोक्तिर्मनस्तन्मात्राणि चोक्तानि॥ एतेयत्रयस्मादहमः उत्पन्नास्तस्याह

॥६५॥

एकस्यैव ब्रह्मणः स्थिरचिदचिद्विशिष्टस्यावस्थाभेदेन कार्यकारणभावं प्रतिपादयन्सृष्टेः प्रागवस्थानमाह ॥ विश्वमिति ॥ विश्वं ब्रह्मैतमनेन सर्वं
खल्विदं ब्रह्मेति श्रुतिस्मारिता अत्र च सामानाधिकरण्येन निर्देशः कार्यकारणभावनिबंधन इति भाष्ये प्रपंचितः ॥ एवं च विश्वाकारं
ब्रह्मतन्नामत्वं प्रकृतित्वावस्थामात्रविशिष्टं संस्थितं सदृक्तं तत्तु महदाद्यवस्थाविशिष्टं विष्णुमायया भगवत्संकल्पेन यत्कार्यावस्थायां स्थूल
चिदचिद्विशिष्टं ब्रह्म विश्वाकारं तत्संहारविषयस्वकीयसंकल्पेन प्रकृतित्वावस्थामात्राविशेषिततेनोपसंहृतमित्यर्थः ॥ एकस्यैव मृद्द्र
व्यस्य कालभेदेन पिंडत्वघटत्वाद्यवस्थाद्वययोगेन कार्यकारणभाववदेकस्यैव ब्रह्मणः स्थिरचिदचिद्विशिष्टस्य स्थौल्यसौक्ष्म्यावस्था
भ्यां कार्यकारणभाव उपपन्नः तन्निबंधन एव मृद्द्रव्यं घट इत्यादिवत्सामानाधिकरण्यनिर्देश इत्यभिप्रायः प्रलयेपि कालस्याविद्यमा

विश्वं वैतद्यतन्नात्वं संस्थितं विष्णुमायया ॥ ईश्वरेणापरिच्छिन्नकालेनाव्यक्तमूर्त्तिना ॥ १२ ॥ यथेदानीं तथा चाग्रे पश्चाद
प्येतदीदृशम् ॥ १३ ॥

ईश्वरेणेति ॥ कालेन विनाशरूपायोगात्स्यैश्वरत्वं ईश्वरशरीरत्वादात्मनस्येश्वरत्वव्यपदेशः कालस्येश्वरशरीरत्व
मेतस्य वा अक्षरस्य प्रशासने गार्गि मुहूर्ता अहोरात्राण्यर्द्धमासा मासा ऋतवः संवत्सरा विधृतास्तिष्ठंतीत्यादिश्रवणात् ॥ यावत्सत्तं स्वप्रकाश नियतव्यस्वस्वभा
वत्वमेव हि शरीरत्वं अत एव शरीरशरीरिभावेन सामानाधिकरण्यनिर्देश उपपन्नः अव्यक्तमूर्त्तिना प्रत्यक्षेणानवज्ञात इत्यव्यक्तमूर्त्तिः रूपं
यस्मात्तेनानुमेयेन कालेन परिच्छिन्नं प्रलयदशायां सूक्ष्मचिदचिद्विशिष्टं कालपरिच्छिन्नं सदेवावस्थितमित्यर्थः ॥ १२ ॥ सृष्टिसंहारदशासु सर्व
त्र कालस्यानुगतिमाहार्द्धेन ॥ यथेति ॥ इदानीं सृष्टिदशायां यथा सर्वं कालपरिच्छिन्नं तथाग्रे सृष्टेः प्राक् प्रलये पश्चादपि भाविप्रलय
सृष्ट्योरपि एतज्जगदीदृशं कालपरिच्छिन्नमेवेत्यर्थः ॥ न च कालपरिच्छिन्नत्वेनानित्यत्वं शक्यं ॥ अवस्थानां कालपरिच्छिन्नत्वेप्यवस्थाव

भा.तृ.टी. इत्यन्यादित्वेनकथितंवीक्ष्यकालाख्यंभगवच्छरीरंहेब्रह्मन्नोऽस्माकंयथावद्वर्णयहेप्रभोवर्णयितुंत्वंसमर्थःइत्यभिप्रायःकिंकालःकल्पउताकल्पः
॥६७॥ किंवानस्यस्थूलंसूक्ष्मंचरूपमित्यादियथावद्वर्णयेत्यभिप्रायः॥१०॥एवमापृष्टोमुनिःकालस्वरूपंवक्तुंतावत्कालकाल्यवस्तुसृष्टिमनुवदति
गुणेत्यादिनायावदध्यायसमाप्ति॥तत्रप्रथमंपरमात्मनएवकर्तृत्वंकारणत्वंकार्यतांचाह॥गुणव्यतिकर॥परिणामोयस्यतद्गुणव्यतिकरं
प्रधानंतदाकारोरूपंशरीरंयस्यसतथोक्तः॥निर्विशेषःपृथिव्यादिरहितः॥अप्रतिष्ठितःकारणांतररहितइत्यर्थःकार्याणांहिकारणे

मैत्रेय उवाच॥ गुणव्यतिकराकारोनिर्विशेषोऽप्रतिष्ठितः
पुरुषस्तदुपादानमात्मानंलीलयाऽसृजत् ॥११॥

प्रतिष्ठाप्रलयस्तदभावात्कारणांतररहितत्वंफलितम्॥एवंविधःपरमपुरुषःतदुपादानंउपादानभूतंयस्येतिबहुव्रीहिःउपादा
नभूतेनतेनप्रधानेनविशिष्टमात्मानंजगद्रूपेणासृजदित्यर्थःअत्रगुणव्यतिकराकारःसृजतीत्यनेनचेतनयोर्नियंतुःपरमपुरु
षस्यनिष्कृष्टस्यनिमित्तत्वंतदुपादानमात्मानमित्यनेनप्रकृतिपुरुषकालविशिष्टत्वाकारणोपादानत्वंचोक्तंभवति॥तथाचश्रू
यते तदात्मानंस्वयमकुरुतेति॥सत्त्रितंच॥मात्राक्षोभयाम्नानादिति ॥११॥ छ ॥ छ ॥ छ ॥ छ ॥६७॥

पद्मेति॥ भगवत्कर्मचोदितः भगवता करणीये कर्मणि चोदितो नियुक्तः सन् तं पद्मकोशमाविश्याधिष्ठाय तमेवैकं पद्मकोशं व्यभांक्षीद्विभाजत उरुधा बहुधा विभागं विवृणवन् केन क्रमेण मुकुलेन कथं त्रिलोकीसृष्टिरिति संभावनां निवारयितुं तस्य विशालतामाह॥ भाव्यं चतुर्दशलोकात्मना भवितुं योग्यमतोनेन त्रिलोकीकरणं न चित्रमित्यर्थः॥ त्रिधा देवादिभोक्तृरूपेण शब्दादिभोग्यरूपेण ज्ञानकर्मेन्द्रियात्मककरणरूपेण तेषु च त्रिधा भाव्यं व्यभांक्षीदित्यर्थः॥ ८॥ कृत्स्नं जगदेतत्कमलान्तर्भूतमित्याह॥ एतावानिति॥ जीवलोकस्य कार्यवर्गस्य संस्थाभेदः संनिवेशविशेषः एतावान् द्विभक्तभोक्तृभोग्यभोगोपकरणभोगस्थानानां तद्गतत्वं पंचात्मकः पद्मकोशः उक्त इत्यर्थः॥ ननु परमेष्ठिनः तत्स्थानस्य च कार्यवर्गान्तर्गतत्वात्स्वयं सृष्टिः त्रिलोकीवत्किं न स्यादित्याशंकां निरस्यति॥ अनिमित्तं निष्कामस्य धर्मस्यासौ परमेष्ठी विपाकः परमेष्ठी

पद्मकोशं तदाविश्य भगवत्कर्मचोदितः॥ एकं व्यभांक्षीदुरुधा त्रिधा भाव्यं द्विसप्तधा॥ ८॥ एतावान्जीवलोकस्य
संस्थाभेदः समाहृतः॥ धर्मस्य ह्यनिमित्तस्य विपाकः परमेष्ठ्यसौ॥ ९॥ विदुर उवाच॥ यदात्थ बहुरूपस्य हरेरद्भुतकर्मणः
कालाख्यं लक्षणं ब्रह्मन्यथा वर्णय नः प्रभो॥ १०॥

ति परमेष्ठिलोकोप्युच्यते तेन तस्याधिष्ठितत्वात्॥ यद्वा॥ भावप्रधानो निर्देशः परमेष्ठित्वमित्यर्थः॥ नन्वनिमित्तधर्मस्य मुक्तिरेव फलं न तु परमेष्ठित्वं तल्लोकप्राप्तिर्वा मैवं तेन ब्रह्मलोके तु पर्यन्तकाले परास्तस्तान्यपि पश्यन् सर्वे ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिब्रह्मणस्तत्रस्थानां च द्विपरार्द्धावसाने प्रायशो मुक्त्यभिधानात्॥ एवं जगन्निर्माणप्रकारे संग्रहेणाभिहिते विदुरस्तत्कालकृतवीर्येणकंपितमिति प्रलयेपि कालसत्त्वाबाधानेन नित्यतापातप्रतीतेस्तन्नित्यत्वजिज्ञासया तत्स्वरूपं पृच्छति॥ यदिति॥ विरचितात्मकप्रपंचरूपस्याद्भुतकर्मणः अचिंत्यव्यापारस्य हरेः संबंधि यत्कालाख्यं लक्षणं रूपमात्थ उक्तवान् तत्कालकृतवीर्येणकंपितं

एवमापृष्टो मैत्रेयः स्मृति प्रीत भगवदनुगृहीत चतुर्मुखस्य नाभिकंजस्य मता हात्मिकं कर्म संग्रहेणाह ॥ विरिंचोपीत्यादि षड्भिः भगवान्षाड्गुण्यपूर्णः अजः जन्म क्षयादि विकाररहितः यदाह ॥ भूयस्त्वं तप आतिष्ठ विद्यां चैव मदाश्रयां इति यदाह तथा विरिंचोपि ब्रह्माप्यात्मनि परमात्मन्यात्मानं मनः आवेश्य स्थिरीकृत्य दिव्यं दिव्यमानमितवर्षशतं वत्सरशतं तत तपश्चक्रे चकार ॥४॥ तद्वित्यादि श्लोकद्वयमेकान्वयं अब्जसंभवो ब्रह्मा यदधिष्ठितः यद्धत पद्ममधिष्ठाय स्थितः कर्तरि क्तः तत्पद्ममम्भश्च विलोक्य कथंभूतं पद्ममंभश्च तत्कालकृतवी

विरिंचोपि तथा चक्रे दिव्यं वर्षशतं तपः ॥ आत्मन्यात्मानमावेश्य यदाह भगवानजः ॥४॥ तद्विलो
क्याब्जसंभवो वायुना यदधिष्ठितः ॥ पद्ममंभश्च तत्कालकृतवीर्येण कम्पितम् ॥५॥ तपसा ह्ये
धमानेन विद्यया चात्मसंस्थया ॥ विवृद्धविज्ञानबलो न्यपाद्वायुं सहाम्भसा ॥६॥ तद्विलोक्य
वियद्व्यापि पुष्करं यदधिष्ठितः ॥ अनेन लोकान्प्राग्लीनान्कल्पितास्मीत्यचिंतयत् ॥७॥

र्येण तेन प्रलयकालेन कृतवीर्येण उत्पन्नव्यापारेण वायुना कंपितं तत्पद्ममंभश्च ॥५॥ एधमानेन उत्तरोत्तरप्रवृद्धेन तपसा कर्मयोगेनात्मसंस्थया परमात्मविषयया विद्यया उपासनया च प्रवृद्धं विज्ञानं विविधसृष्टिविषयज्ञानमेव बलं यस्य तथाभूतः ॥ अंभसा सह वायुमपात् लीनवान् निसर्थः ॥६॥ सवायुमंभसा ॥ पानानंतरं कर्माह ॥ तद्विति यदधिष्ठितः यत्पद्ममधिष्ठाय स्थितः तद्वियद्व्याप्यंतरिक्षव्याप्य सुन्नतमित्यभिप्रायः पद्मं पुष्करं विलोक्यानेन पुष्करेण प्राग्लीनान्सूर्वकल्पांते लीनाल्लोकान्कल्पितास्मि स्रक्ष्यामीत्यचिंतयच्चिंतित

यत्त्वविस्पष्टमेलोकाः सविकाशं समासत इत्यादिना कृतप्रश्नोत्तरशुश्रूषया विदुरः पृच्छति ॥ अंतर्हित इति ॥ अत्र प्रश्नोत्तरयोः क्रमस्त्वविव
क्षितः भगवति षाड्गुण्यपूर्णे ब्रह्माणमनुगृह्यांतर्धानं गते सति लोकानां पितामहः ब्रह्मा प्रभुर्वशीकृतेंद्रियः सृष्टीनां प्रभुः स्वामीति वा
देहिकीर्देहजा ॥ मानसीः संकल्पजाश्च प्रजाः कतिधाः ससर्ज सृष्टवान् ॥ १ ॥ ये त्वेति हे भगवन्मैत्रेय ये मे मयाग्रे चान्ये पृष्टाः तान्संशयविशेषान्
छान्त्रस्त्रानानुपूर्वेणैकैकशः ततप्रश्नक्रमानुसारेणोत्तरेषु तस्यादर्शनात् ॥ अद्धा तत्त्वेन वद स्वउत्तरं कथयेति वा ॥ हे ब्रह्मवित्तम ब्रह्म

विदुर उवाच ॥ अंतर्हिते भगवति ब्रह्मा लोकपितामहः ॥ प्रजाः ससर्ज कतिधा दैहिकीर्मानसीर्विभुः ॥ १ ॥
ये च मे भगवन्पृष्टास्त्वय्यर्था बहुवित्तम ॥ तान्वदस्वानुपूर्व्येण छिंधि नः सर्वसंशयान् ॥ २ ॥ श्रीशुक उ
वाच ॥ एवं संचोदितस्तेन क्षत्त्रा कौषारवो मुनिः ॥ प्रीतः प्रत्याह तान्प्रश्नान् हृदिस्थानथ भारत ॥ ३ ॥

विदग्रेसरनोऽस्माकं सर्वसंशयान् छिंधि छिद्यते सर्वसंशया इति श्रुतत्वात् ॥ स्वपरसंशयछेदनं ब्रह्मविदस्तव युक्तमिति अभिप्रायेणाब्र
ह्मवित्तमेत्युक्तम् ॥ २ ॥ एवमुक्तप्रकारेण तेन क्षत्त्रा विदुरेण संचोदितः उत्तरदाने प्रवर्त्तितः कौषारवः मैत्रेयः मुनिः प्रीतः निरति
शयभगवद्भक्तिजनकप्रश्नविशेषणस्वयं निरतिशयप्रीतियुक्तः हे भारत राजन् हृदिस्थान्तानप्रश्नान्प्रत्याह प्रत्यभाषत उत्तर
यामासेत्यर्थः हृदिस्थानित्यनेन प्रतप्रश्नास्तेनाविस्मृता इत्यभिप्रायः ॥ ३ ॥

ण तदेवसहेतुकमुपपादयति ॥ आहमिति ॥ हे धातः ब्रह्मन् आत्मनां जीवानां अहमात्मा अंतः प्रविश्य प्रशंसकोनधारकः अतएव प्रेयसामपि प्री
तिविषयाणामपि मध्ये प्रेष्ठः निरतिशयप्रीतिविषयस्त्रस्थितः यः संबंधात् सर्वेंद्रियवशमात्तिनस्य प्रियतमत्वं के मुख्यन्यायसिद्धं अत आ
त्मत्वात् प्रेष्ठत्वाच्च मय्येव रतिं भक्तिं कुर्यात् प्रियः प्रियत्वेन परिगृहीतो देहादिरपि यत्कृते यदर्थं प्रियः मद्भक्तिरेव जन्मनो लाभ इत्यर्थः ॥ ४२
मदनुग्रहविषयतया कृतार्थस्त्वं महाज्ञारूपजगत्सर्वं कुर्वित्याह ॥ सर्ववेदमयेनेति ॥ आत्मात्मयोनिना आत्मनां जीवानामात्मा परमात्मा
यस्य योनिः कारणं तेन मद्दत्तेनेत्यर्थः सर्ववेदमयेन मदुपदिष्टसर्ववेदप्रचुरेणात्मनाज्ञानेन ॥ आत्मशब्दो हि मतिवाची मद्दत्तेन

अहमात्मात्मनां धातः प्रेष्ठः सन्प्रेयसामपि ॥ अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः ॥ ४२ ॥ सर्ववेदमयेनेदमात्म
नात्मात्मयोनिना ॥ प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते ॥ ४३ ॥ मैत्रेय उवाच ॥ तस्मा एवं जगत्स्रष्ट्रे प्रधानपुरुषेश्व
रः ॥ व्यज्येदं स्वेन रूपेण कंजनाभस्तिरोदधे ॥ ४४ ॥ इति श्रीमद्भागवते तृतीयस्कंधे नवमोध्यायः ॥ ९ ॥ ॥ छ

ज्ञानेनेत्यर्थः ॥ इदं जगदंतर्गताः प्रजाः हे धातः यथापूर्वं पूर्वकल्पवत्सृज ॥ कथमवस्थिताः प्रजाः याश्च याहि प्रजाः मय्यनुशेरते उपसंहृ
तास्तिष्ठंति ताः सृजेत्यर्थः ॥ ४३ ॥ संवादमुपसंहरति ॥ तस्मा इति ॥ प्रधानपुरुषेश्वरः प्रकृतिपुरुषयोर्नियंता कंजनाभः जगदात्मकं पद्म
नाभौ यस्य स एवं भूतो भगवान् तस्मै जगत्स्रष्ट्रे ब्रह्मणे इदं जगन्निर्माणप्रकारादिकं व्यज्य ज्ञापयित्वा स्वेन रूपेण तिरोदधे स्वकी
यदिव्यमंगलविग्रहं तिरोहितं कृतवानित्यर्थः ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे नवमोध्यायः ॥ ९ ॥ एवं भगवन्नाभिकृ ॥ ९२ ॥
मलसमुद्भूत चतुर्मुखकृतस्तुतिप्रकारे स्तुतप्रीतभगवदनुग्रहे च चतुर्मुखविषयेभिहिते ॥

मद्विषयायां१

किंच यद्विचिकित्सायां अस्तिह्युध स्मादिह किंचनेतदधिष्ठितं यत्र सतानुभाव्यमित्येवंरूपायां विचारणायां निमित्तभूतायां सलिले पुष्करस्य मूलं
नालेन मार्गेण विचिन्वते ऽन्वेषते तुभ्यं मे मया आत्मविग्रहः बहिर्दर्शितः ॥ ३७ ॥ किंच अंग हे ब्रह्मन् मत्कथाभ्युदयांकितं मत्कथैवाभ्युदयः
तेनांकितं मद्विषयकं स्तोत्रं चकर्थ कृतवानसीति यत् । यद्वा यद्वा यच्च ते तव तपसि निष्ठा चेति यद्द्वेतत्सर्वं स एष मदनुग्रहः ॥ ३८ ॥ सर्वं समदनुग्रह१
कारितत्वात् तुभ्यमहं प्रसन्नोऽहमित्याह प्रीतोहमिति । यद्गुणमयं कल्याणगुणप्रचुरं निर्गुणं हेयगुणरहितं मां मां अनुवर्णयन् त्वं लोकानां विजये

तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितोऽबहिः । नालेन सलिले मूलं पुष्करस्य विचिन्वतः ॥ ३७ ॥ यच्चकर्थांग मत्स्तोत्रं मत्कथाभ्युदयांकितम् । यद्वा तपसि ते निष्ठा स एष मदनुग्रहः ॥ ३८ ॥ प्रीतोहमस्तु भद्रं ते लोकानां विजयेच्छया । यदस्तौषीर्गुणमयं निर्गुणं मानुवर्णयन् ॥ ३९ ॥ य एतेन पुमान्नित्यं स्तुत्वा स्तोत्रेण मां भजेत् । तस्याशु संप्रसीदेयं सर्वकामवरेश्वरः ॥ ४० ॥ पूर्तेन तपसा यज्ञैर्दानैर्योगसमाधिना । राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविन्मतम् ॥ ४१ ॥

च्छयासर्गेच्छया ऽस्तोषीः स्तुतवान् । अतो ऽहं प्रीतोस्मि निरतिशयप्रीतियुक्तोस्मि
ते तुभ्यं भद्रमस्त्वित्यर्थः न वप्रीन इति वक्तव्यमित्यर्थः ॥ ३९ ॥ य इति । एतेन भगवत्कृतेन स्तोत्रेण मुपानरः नित्यं स्तुत्वा मां भजेत् तस्य पुंसो ऽप्या-
श्वहं सर्वेषां काम्यमानानां वराणां ईश्वरः दाता संप्रसीदेयं प्रसन्नो भवामि न त्र किमु वक्तव्यमित्याशय ॥ ४० ॥ मत्प्रीतेरधिकमन्यच्छ्रे-
यो नास्तीत्याह । पूर्तेन मार्तं पूर्वादिभिः राद्धं सिद्धं निःश्रेयसकरं राज्येद्रतिपाद्यैः राज्यं निःश्रेयसं च मत्प्रीतिः यज्ञादिजन्य मत्प्रीतिनिबंधनो

भोगमोक्षाविमर्शः इति तत्त्वविदां मतं भवति ॥ ४१ ॥

भा.त.टी.
॥६७॥

नामसक्तमेवमभवानिकुतएतदत आह॥मदनुग्रहवर्षीयानवलवत्तरइत्यर्थः॥व्यासंगांतरात्संकल्पापित्वच्चेतोमत्स्वरूपरूपगुणविभूत्यनुसंधा
नासक्तमेवस्यादित्यनुगृहीतामित्यर्थः॥अनेनतस्मिन्स्वविक्रममिदंसृजतोपिचेतोयुंजीतेतितेनैवविज्ञापितमनुगृहीतंभवति॥३४
अनुग्रहस्यवर्षीयस्त्वमेवदर्शयति॥ऋषिमिति॥आद्योभवमाद्यंऋषिंमत्स्वरूपरूपगुणविभूतिप्रतिपादकक्रांत्मवेदराशिद्रष्टारंत्वां
पापीयान्वंधकःरजोगुणःनवध्नातिनसंसारप्रापयति॥कुतः यस्मान्मदनुग्रहात्प्रजाःसंसृजतोपितेमनःमयिनिवद्धंनितरामासक्तं॥इ
॥एवमनुग्रहस्यवर्षीयस्त्वंप्रदर्श्यस्वरूपादिविषयकंज्ञानमविषयकंतत्ववनंचैत्येनत्सर्वंमदनुग्रहादेवसंपन्नमित्याह॥ज्ञातइ
तित्रिभिः देहिनांदेहासक्तानाममभक्तानामित्यर्थः॥दुर्विज्ञेयोपिदुःखेनापिज्ञातुमशक्योप्यहमद्याधुनाभवताज्ञातःयथावत्स्वरूपगु

ऋषिमाद्यंनवध्नातिपापीयांस्त्वांरजोगुणः॥यन्मनोमयिनिर्वद्धंप्रजाःसंसृजतोपिते ॥३५॥ज्ञातोहंभ
वतात्वद्यदुर्विज्ञेयोदेहिदेहिनाम्॥यन्मांत्वंमन्यसेयुक्तंभूतेंद्रियगुणात्मभिः ॥३६॥ श्रीरामः

णविभूतिविशिष्टत्वेनज्ञातःमयाज्ञातइतिकथंज्ञापतइत्यत आह॥यद्यस्मात्त्वंभूतेंद्रियगुणात्मभिःभूतानिपृथिव्यादीनिगुणाःसत्वाद
यः॥आत्मामनःप्राकृतैर्भूतादिभिरयुक्तंमांमन्यसे॥सर्वकर्मासर्वकामःसर्वगंधःसर्वरसइत्यादिश्रुत्युक्तरीत्याःप्राकृतमयुक्तंयंचोप
निषन्मयभूतेंद्रियादियुक्तंमन्यसइत्यर्थः॥रूपयदेतद्वबोधरसोदयेनेत्यादिनेत्यादिनानवेवप्रतियाहनात॥यद्वायुक्तमित्येवछेदः
आत्मानोजीवाः॥भूतादिभिस्त्वेतनैरात्मभिश्चेतनैश्चाविषयमांममसेमच्छेष्यतयामच्छरीरतयामत्सृज्यपाल्यसंहार्यतयाचचे
तनविशिष्टंमांसर्वज्ञत्वमसत्यसंकल्पत्वसत्यकामत्वप्रकृतिपुरुषविलक्षणत्वाद्यनंतानाकारविशिष्टंमन्यसइत्यर्थः ॥३६॥ ॥६७॥

इदमेवं कृत्स्नचिदचिद्विलक्षणत्वेन तदंतर्यामितया चोपासनं कर्मशमनं च यथाविद्यामित्यर्थं मुक्त्युपायोपीत्याह ॥ यदात्विति ॥ दारुष्वग्नि
मिव सर्वभूतेषु स्थितं मां लोकः पदानु प्रतिचक्षीत पश्येत् ॥ दारुष्वग्निमिवेति दृष्टांतसामर्थ्याद्विलक्षणयोगोभिप्रेतः कौटिल्यदैर्घ्यादि
धर्मा हि दारुगता न त्वग्निगताः एवं कृत्स्नचिदचिदंतरात्मतयावस्थिते परमात्मनि चेतनाचेतनगतकर्मवश्यत्वसृज्यत्वपाल्यत्वनियाम्यत्व
शरीरादयो न संगच्छंतीत्यभिप्रायः तदैव प्रकृतिपुरुषविलक्षणतयात्मतया च दर्शनानंतरमेव कश्मलं दुःखं मोहं वा जह्यात् ॥ ३१
एवं सर्वात्मब्रह्मोपासनस्य मुक्तिसाधनत्वमभिधाय ब्रह्मशरीरतया च स्वात्मोपासनमपि तत्साधनमित्याह ॥ यदेति ॥ भूतानि पृथिव्या
दीनि इंद्रियाणि ज्ञानकर्माभयेंद्रियाणि आशया वासना अंतःकरणानि तैर्विरहितं तत्संभवे सति तज्ज्ञावासंभवादेभ्यः विलक्षणमित्यर्थः

यदा तु सर्वभूतेषु दारुष्वग्निमिव स्थितम् ॥ प्रतिचक्षीत मां लोको जह्यात्तर्ह्येव कश्मलं ॥ ३२ ॥ यदा रहितमात्मानं भूतेंद्रियगुणा
शयैः ॥ स्वरूपेण मयोपेतं पश्यन्स्वाराज्यमृच्छति ॥ ३३ ॥ नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः ॥ नात्मावसीदत्यस्मिंस्ते
स्वरूपेण सत्यं ज्ञानमनंतं इति श्रुत्युक्तस्वरूपेण मया आत्मना धारकेण उपेतं व्याप्तम् ॥ आत्मस्वं धार्यं आ ॥ वर्षीयान्मदनुग्रहः ॥ ३४
त्मानं जीवात्मानं पश्यन्नुदासीनः स्वाराज्यमकर्मवश्यत्वमृच्छति प्राप्नोतीत्यर्थः ॥ ३३ ॥ ननु वस्तु सर्वात्मकब्रह्मोपासनब्रह्मशरीरभूतस्वात्मोपास
नयोर्मुक्तिसाधनत्वमेवमपि कथं मे सृष्टिरूपव्यापारांतरासक्तस्य सर्वात्मकब्रह्मानुसंधानं स्यादिति शोचंतमनुगृह्णाति ॥ नानेति ॥ हि ना
नाकर्मणां जीवसंबंधिनामनादिपुण्यपापरूपकर्मणां वितानेन विस्तारेण नादितत्कर्मवासनानुसारेण बह्वीर्बहुविधाः विचित्रा इत्यर्थः
प्रजा देवतिर्यङ्मनुष्यस्थावरादिरूपाः सिसृक्षतः ते तवात्मा चित्तं नावसीदति न मोहं प्राप्नोति किंतु मत्स्वरूपरूपगुणविभवानुसंधा

वचनमेवाहमेति ॥ हे वेदगर्भ ब्रह्मन् त्वं ह्रीं विषयादत्कृतपारवश्यं मा गाः मा प्राप्नुहि ॥ किंतु सर्गे सृष्टौ उद्यमं प्रयत्नमावह कुरु भवान्यन्ते तेनैव
मे इदं शमनुसृष्टानादित्यादिना प्रार्थ्यते तदग्रे पूर्वमेव मया आपादितं संपादितम् ॥ २९ ॥ तर्हि कथमहं सृष्टिप्रकारं न जानामीमत आह ॥ भ
यः पुनः तपः कर्मयोगं मदाश्रयां मद्विषयां च ॥ विद्यां उपासनां तत्रैव ज्ञानयोगोपि विद्याशब्देन विवक्षितः ॥ आतिष्ठ कुरु ताभ्यां तपोवि
द्याभ्यां मंतर्हृदि हृदयकमलमध्ये हे ब्रह्मन्ननाहृतान् लोकान् यथावद्द्रक्ष्यसि ॥ ३० ॥ ततः यथावल्लोकदर्शनानंतरं मद्भक्तियुक्तः समाहित

श्रीभगवानुवाच ॥ मा वेदगर्भ गास्तंद्रीं सर्गे उद्यममावह ॥ तन्मयापादितं ह्यग्रे यन्मां प्रार्थयते भ
वान् ॥ २९ ॥ भूयस्त्वं तप आतिष्ठ विद्यां चैव मदाश्रयाम् ॥ ताभ्यामन्तर्हृदि ब्रह्मन्लोका
न्द्रक्ष्यस्यपावृतान् ॥ ३० ॥ तत आत्मनि लोके च भक्तियुक्तः समाहितः ॥ द्रष्टासि मां ततं
ब्रह्मन्मयि लोकांस्त्वमात्मनः ॥ ३१ ॥

चित्तस्त्वमात्मनि स्वस्मिन्लोके च सर्वचेतनाचेतनात्मके जगति च ततं व्याप्तं
तया व्याप्तवतीति समानाधिकरण्यं ॥ आत्मन इति पाठे आत्मनो जीवादित्यर्थः ॥ यद्वात्मनो मम लोकान् शरीरभूतांल्लोकान् ॥ यद्वात्म
नः मत्तः प्रसृतांल्लोकान्मयि यथावद्द्रष्टासि द्रष्टुमर्हसीत्यर्थः सर्वचेतनाचेतनांतर्यामिणं धारकं मां मद्व्याप्यान् धार्यान् लो
कांश्च परं पश्यसीत्यर्थः ॥ सर्वात्मकब्रह्मसाक्षात्कारेणामोक्षनिवर्तत इत्यभिप्रायः ॥ ३१ ॥ ॥ ७ ॥ ॥ ७

अथाभिमुख्येन तत्संभाषणं प्रार्थितस्य सर्वस्य निदानभूतं प्रार्थयते । स इति । अदभ्रकरुणः अतत्स्वरूपः पुराणः पुरुषः सोसौ भगवान्वि
वृद्धप्रेमस्मितेन विवृद्धः प्रेमा यस्मिन् तथाभूते नास्मितेन नयनांबुरुहं विजृंभन्नुल्लासयन्विकासयन्निति यावत् विश्वस्य विजयाय उद्भ
वाय च कामादसुरनुग्रहाय चोत्थाय माध्व्या मधुरया गिरा नः विषादं खेदमपनतान्निराकुर्यात् ॥२५॥ स्तुतिमुपसंहरति । स्वसंभवमिति
स्वसंभवो यस्मात्तं भगवंतं तपोविद्यासमाधिभिः कर्मज्ञानभक्तिभिः श्लाघ्य निशाम्य दृष्ट्वा एवं उक्तप्रकारेण यावन्मनोवचः स्वमनो

सोसावदभ्रकरुणो भगवान्विवृद्धप्रेमस्मितेन नयनांबुरुहं विजृंभन् ॥ उत्थाय विश्वविजयाय च नो विषादं मा
ध्व्या गिरापनयतात्पुरुषः पुराणः ॥२५॥ मैत्रेय उवाच ॥ स्वसंभवं निशाम्यैवं तपोविद्यासमाधिभिः ॥ यावन्मनोव
चः स्तुत्वा विरराम स खिन्नवत् ॥२६॥ अथाभिप्रेतमन्वीक्ष्य ब्रह्मणो मधुसूदनः ॥ विषण्णचेतसं तेन कल्पव्यति
करांभसा ॥२७॥ लोकसंस्थानविज्ञान आत्मनः परिखिद्यतः ॥ तमाहागाधया वाचा कश्मलं शमयन्निव ॥ २८

वागनुसारेण स्वयथाशक्ति स्तुत्वा न तु साकल्येन समर्थः इषुक्षयान्निवर्त्तंते नांतरिक्षं क्षितिक्षयात् । मतिक्षयान्निवर्त्तंते न गोविंदगुणक्षयादिति
॥ आत्मनः वचनात् । खिन्नवत् क्लांतवद्विरराम ॥२६॥ स्वस्य लोकसंस्थानविषये परिखिद्यतः कल्पव्यतिकरांभसा विषण्णचेतसः ब्रह्मणो हिरण्य
गर्भस्याभिप्रेतमन्वीक्ष्य मधुसूदनस्तु ब्रह्माणमगाधया गंभीरया वाचा कश्मलं मोहं शमयन्निवाह उवाचेति द्वयोरन्वयः ॥२७॥२८

ननु विश्वसर्जनधर्म एव सृष्टृत्वं स्वबंधकारी विश्वसृष्ट्युपयुक्तां प्रज्ञां प्रार्थयितुं नार्हसीत्याशंक्यानिराकुर्वन्नन्यदपि प्रार्थयते एष इति एष भगवान्प्रपन्नवरदः आ
त्मशक्त्या आत्मनः स्वस्याह यथा तद्विशेषणभूतया लक्ष्म्या साकं गृहीता अपरिमिताः गुणाः स्वाभाविकसर्वज्ञत्वापहतपाप्मत्वादयः ज्ञानशक्त्यादय
श्च गुणा येषु तथाभूता अवतारा यस्य यद्यत्करिष्यति यच्चेदेवमनुष्यतिर्यगादिसजातीयचेष्टितं करोति तस्मिन्कर्मणि मे चेतः चित्तं युंजीत तन्नरवतारगुणक
र्मानुभवयुक्तं स्यात् कथंभूतस्यापि मे स्वविक्रमं स्वस्य तव विक्रमं प्रबोधोदयस्मिन्निदं विश्वं सृजतोपि मे चेतः त्वद्गुणकर्मानुभवयुक्तं स्याद्यथा भवेत्तथानु
गृहाणेत्यर्थः किं गुणकर्मानुभवान्न शक्तिप्रार्थनेनेति शंक्यानिराशयन्यथावद्दुरितनिवर्तकगुणकर्मानुभवाशक्त्या कर्मशमलं संसृतिहेतुभूत

एष प्रपन्नवरदो रमयात्मशक्त्या यद्यत्करिष्यति गृहीतगुणावतारः ॥ तस्मिन्स्वविक्रममिदं सृजतोपि चेतो युंजीत
कर्मशमलं च यथा विजह्यां ॥ २३ ॥ नाभीह्रदादिह सतोंभसि यस्य पुंसो विज्ञानशक्तिरहमासमनंतशक्तेः
रूपं विचित्रमिदमस्य विवृण्वतो मे मा रीरिषीष्ट निगमस्य गिरां विसर्गः ॥ २४ ॥

मनादिपुरुषस्य पद्मालिंग्यं विजह्यां त्यजेयम् भवदनुग्रहेण त्वदवतारगुणकर्माण्यनुभवंस्त्वद्विभूतिभूतजगत्कर्तृत्वे कैंकर्यवेषेण सृजतो मे त्वत्कैंकर्यं
प्रार्थनायुक्तमिति भावः २३ एवं सृष्ट्यौपयिकीं प्रज्ञाममनसत्त्वदवतारगुणकर्मासक्तिं च प्रार्थ्याथ तत्स्वरूपगुणविभूतिंपारकवेदाणिप्रविस्मरणं प्रार्थ
यते नाभीह्रदादिति इहास्मिन्नुदके सतः शयानस्य यस्यानंतशक्तेः परिच्छिन्नज्ञानबलक्रियाशक्तेः पुंसः पद्मनाभीह्रदाद्विज्ञानशक्तिर्विज्ञानं र
शक्तिरेव यस्य सिद्धविशेषणां यस्य सः ज्ञानगुणकोहमासं जातः अस्य भगवतस्तव विचित्रमद्भुतरूपं शरीरं इदं विवृतं विस्तात्मकं जगद्विस्तारयतो मे नि
गमस्य वेदस्य गिरां वेदावयवभूतानां वाचां विसर्गः प्रसरः उच्चारणमिति यावत् मा रीरिषीष्ट मा क्षीणः स्यात्तदनुगृहाणेत्यर्थः २४ ॥५९॥

किंचयस्यनाभिपद्ममेवभवनंतस्मात्लोकत्रयोपकरणः॥लोकत्रयमुपकरणंयस्यसतथात्रैलोक्यपतिरित्यर्थः॥एवंभूतोहंयदनुग्रहेणयस्यभगव
तोनुग्रहेणासमाविरभवं॥तस्मैउदरस्थभवायउदरस्थः॥भवःकार्यवर्गोयस्यतस्मैयोगनिद्रावसानेविकसन्नलिनवदीक्षणंयस्यतस्मैनमइत
र्थः॥२१॥एवंस्तुवामनीषितानिप्रार्थयतेसइतिचतुर्भिःसमस्तजगतांचेतनाचेतनानामात्मा अतएवसुहृत्सोयंभगवान्मेनसत्वेनज्ञानेनसृष्ट

यन्नाभिपद्मभवनादहमासमीड्यलोकत्रयोपकरणोयदनुग्रहेण॥तस्मैनमस्तउदरस्थभवाययो
गनिद्रावसानविकसन्नलिनेक्षणाय॥२१॥सोयंसमस्तजगतांसुहृदेकआत्मासत्वेनयन्मृड
यतेभगवान्भगेन तेनैवमेदृशमनुस्पृशताद्यथाहंस्रक्ष्यामिपूर्ववदिदंप्रणतप्रियोसौ॥२२॥

सत्वमयविग्रहेणवाभगेनैश्वर्येणचविश्वंमृडयतेसुखयतितेनैवैश्वर्येणमेदृशंप्रज्ञानमनुस्पृशतात्योजयतात्ददतादितियावत्यथाइ
दंविश्वंपूर्ववत्कल्पवत्स्रक्ष्यामिसृष्टिक्षमोपयिकींप्रज्ञामनुस्पृशतादित्यर्थः॥प्रार्थनायानैष्फल्यशंकांवारयति॥असौसमस्तसुहृत्सर्वांतर्यामी
भगवान्प्रणतेषुप्रियःनिरतिशयप्रीतियुक्तःप्रियोहिज्ञानिनोमर्थःमहंसचममप्रियइतिगीतत्वात्प्रणतप्रियत्वात्प्रणतार्थितार्थत्वपरिहान
हीक्षितदमभिप्रायः॥२२॥

ऽर्थः स्वयं कथंभूतोपि निरस्तनिरतिशयानंदस्वरूपानुभवेनैव कदाचिदप्यस्पृष्टवैषयिकसुखोपि रेमे तिर्यगादिसजातीयचेष्टितं तं निकुर्वन् रेमे ॥ तिर्य
 स्ववतारानाह कूर्मवराहहंसादयः मनुष्येषु रामनृसिंहादयः विबुधेषु वामनादयः ॥ एवं संकल्पेनैव स्वस्वभावमजहद्देवत ॥ तद्योनिष्ववतीर्यत
त्तत्सजातीयरिव चेष्टितानि कुर्वंश्च क्रीडेदवमालाकारगुहशबरीप्रमुखानन्तवधिकदयासौहार्दगर्भानुरागभावलोकनालापादस्तद्दानेनाप्या
ययत्सर्वकालमनुप्तनयनविषतांप्राप्तानीत्यभिप्रायः ॥ एवंभूताय भगवते पुरुषोत्तमाय त्रिविधचेतनाचेतनविलक्षणाय ते नमः ॥ १९ ॥ एवं स्व
रूपगुणविभूतिविशिष्टं भगवंतं नमस्कृत्य यस्वमन्नीषितं विजिज्ञापयिषुस्तात्कालिकं परिदृश्यमानमनिरुद्धरूपं प्रस्तुवन्नमस्करोति द्वाभ्यां

यो विद्ययानुपहतोपि दशार्धवृत्त्या निद्रामुवाह जठरीकृतलोकयात्रः ॥ अंतर्जले
हिकशिपुस्पर्शानुकूलां भीमोर्मिमालिनि जनस्य सुखं विवृण्वन् ॥ २० ॥

दशार्धं पंचवृत्तयो यस्याः सा तया तामिस्रांधतामिस्रमोहमहामोहतमोरूपाः पंचाविद्यावृत्तयः वृक्षगुल्मलतावीरुत्तृणगताः पंचपर्वीत्या
न वृत्तयः तमोमोहादयइति केचित् जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणोपरशान्तवृत्तयइति केचित् ॥ एवंभूतयाऽविद्यया निद्राहेतुभूतयाऽनु
पहतोप्यनभिभूतोपि योगनिद्रामुवाह स्वीकृतवान् तस्मै नमस्त्वित्युत्तरेणान्वयः कथंभूतः उवाह जठरीकृतलोकयात्रः उदरे निवेशितजगत्ता
तः ॥ अहिरनंतः एवं कशिपुः शय्या तस्याः स्पर्शः सुखः अनुकूलो यस्यास्तां निद्रां भीमानां भीषणानामूर्मीणां माला विद्यंते यस्मिन्नन्तर्जले निद्राणस्याविवेकिनो
जनस्य निद्रासुखमीदृशमिति विवृण्वन् प्रदर्शयन्निवेत्यर्थः ॥ २० ॥

दृशमेवार्थं स्वदृष्टांतेन द्रढयति यस्मादिति॥ यस्मात् धिष्ण्यं द्विपरार्द्धकालस्थानं सत्याख्यो लोकं॥ कथंभूतं सकललोकनमस्कृतं सकलैरर्वाचीनलोकैर्नम॰
स्कृतं तं समासितमध्यासित॥ आरुरोहाहं यस्मात्कालशरीरकर्त्वतः बिभेमि॥ भीषास्मात् पवन इत्युक्तरीत्या त्वदधीनः स्वाधिकारे प्रमत्तोऽहमयीदमधि॰
ष्ण्यं द्विपरार्द्धावसाने विनंक्ष्यतीति बिभेमि॥ भीतः सन्नयं त्वामेवावरुरुत्समानः अवरोद्धुमिच्छन् प्रभुरि समर्थः बहुसवः बहवः सवास्तद्द्वाराधनरूपा॰
यागा यस्य सः एवंभूतस्तपस्तेपे चकार तेनैव पाकं पचतीतिवन्निर्देशः तस्मै भगवते ऽधिमुखाय सुखफलप्रदात्रे च नमः अहं हि सर्वयज्ञानां भोक्ता च
प्रभुरेव चेति गीतत्वात्॥ विमुखायेति पाठांतरं तदात्मसहायेत्यर्थः॥१८॥ एवं नमः परस्मादित्यादिना परत्वभक्तानुग्राहकत्वविशिष्टं भगवंतं नत्व

यस्माद्बिभेम्यहमपि द्विपरार्द्धधिष्ण्यमध्यासितः सकललोकनमस्कृतं यत्॥ तेपे तपो बहुसवोऽवरुरुत्स
मानस्तस्मै नमो भगवतेऽधिमुखाय तुभ्यं॥ १८॥ तिर्यङ्मनुष्यविबुधादिषु जीवयोनिष्वात्मेच्छयात्म
कृतसेतुपरीप्सयाय॥ रेमे निरस्तविषयोऽप्यवरुद्धदेहस्तस्मै नमो भगवते पुरुषोत्तमाय॥ १९॥

नत्वा परत्वप्रयुक्तेश्वरत्वनिर्वाहकं सौशील्यसौलभ्यगुणविशिष्टं नमस्करोति॥ तिर्यगित्यादिना॥ शौशील्यं हि महतो मंदैः सह नीरंध्रेण संश्लेषस्व॰
भावत्वं सौलभ्यं च मनसो वाङ्मनसागोचरस्य सकलमनुजनयनविषयतां गतत्वं॥ एतद्द्वयं तत्पादपद्मत्वापादकमवतारकथनेनोपपादयति
तिर्यगादिषु जीवयोनिष्वात्मेच्छया आत्मीयसंकल्पेनैव न तु कर्मणेत्यर्थः॥ अवरुद्धदेहः स्वीकृतमर्त्यशरीरो रेमे किमर्थमात्मकृतसेतुपरीप्सवाय स्व॰
कृतमर्यादानां पारीप्सवाय उन्मज्जनाय रक्षणायेत्यर्थः परीप्सयेति पाठे अध्ययनेन वसतीतिवद्धेत्वर्थे तृतीया॥ परीप्सया परिरक्षा तदर्थमिम

भा.तृ. त्यादनेनानुगृह्णातीत्यर्थः यद्वाविकर्मनिरतः प्रमत्तः इत्येवच्छेदः अत्रव्यतिरेकमुखेन भक्त्यानुग्राहकत्वमाह विकर्मसुखरूपानन्तु
॥५७॥ बंधिषद्दं ममाभिमानगर्भेषु वैषयिकसुखसाधनेषु निरतः त्वदाराधनरूपेतु कर्मणि योलोकः प्रमत्तः तस्याभक्तलोकस्य जीविता

यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै ॥१७॥

शां जीवनेच्छां कालशरीरकोपोभगवान् छिनत्ति तस्मै अनिमिषाय कालरूपिणे नमः अनेन भक्तानुग्राहकत्वमर्थसिद्धं स्वानु
रूपकर्मभिराराधितोभगवानुपासकानां निर्हेतुकयेनिरतिशयमोक्षाख्यफलं प्रयच्छतीत्युक्तम् १७ ॥५७॥

एवमहं मत्तमधः शाखमित्याहित्वा निरूपीनद्दृष्टं भगवंतमाकारांतरेण दृष्ट्वा रूपं ममस्तु मसम्प्रहृतं तस्य भक्तानुग्राहकत्वमेवाह लोकइ
तियो भगवान्त्वदुदिते वेदात्मिकया वाचा त्वया गदिते भगवदाराधनरूपे स्वे स्ववर्णाश्रमोचिते कुशले क्षेमकर्मणि यो यं लो
कः अप्रमत्तप्रमादरहितः अविकर्मनिरतः विकर्मासक्तकर्म अतन्निरतश्च भवति ॥ तस्य लोकस्य जीवीनाशां संसारश्च द्या

लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययंत्वदुदिते भवदर्चने स्वे ॥

सद्यः अचिरेण छिन्नति ॥ कुतः बलवान्सर्वशक्तित्वादित्यर्थः ॥ तस्मै सर्वशक्तये ऽनिमिषाय वैराग्योत्पादनावसरापेक्षाय
भगवते तुभ्यं नमोस्तु नात्र ॥ अनभिसंहितफलस्ववर्णाश्रमोचितधर्मैराराधयतां सांसारिकधर्मश्रद्धां विधुन्वन्वैराग्याद

भा.टी.

॥५६॥

कजित्वानुतिष्ठ(?)श्रयासंघटते इममभिप्रयंतस्त्वदवतारगुणकर्मणामनुवचनस्मतन्मात्प्युपायतामाविष्कुर्वन्शरणं व्रजति यस्येति यस्य तवावतारगुणकर्म
णां विडंवनान्यनुकरणानि नामानि देवकीनंदन दाशरथे सर्वज्ञ भक्तवत्सल गोवर्द्धनधर कंसारे रावणांतक इत्यादीन्यसुविगमे प्राणोत्क्रमण
काले विवशाः परवशाः अपि ये नराः समुच्चारयंति ॥ ते नेकजन्मार्जितसमस्तं पुण्यपापरूपं संगमसाचिरेणाहित्वा विधूय याहृतं निरस्तावरणं ऋतं
ब्रह्म संयांति प्राप्नुवंति तमजं कर्मायनोत्स्मादिरहितं त्वां शरणं उपायं प्रपद्ये अध्यवस्यामि ॥ अनेन भक्त्यासुविगमानुस्मरणाद्दीनां तत्रसन्निमात्रहेतु
त्वं उपायत्वं तु भगवत्प्रणवेनमभिप्रेतं तया च श्रूयते ॥ अस्तं तस्यैषसेतुरिति सेतुः प्रापकः ॥ स्वकीयावतारगुणकर्मप्रतिपादकनामाद्यनुस्मर
णादिनानाविस्तारेपु स्थित्यनुजिघृक्षयैव भगवतो जगद्व्यापारः इति भावः ॥ १५ ॥ भवतु भगवद्गुणकीर्त्तनादेस्तन्मात्प्युपायत्वमथापि सष्ट्यादिव्यापार
यो वा अहं च गिरिशश्च विभुः स्वयं च स्थित्युद्भवप्रलयहेतव आत्ममूलं ॥ भित्वा त्रिपाद्ववृध एक उरुप्ररोहस्तस्मै नमो भगवते भुव
नद्रुमाय ॥ १६ ॥
णां चतुर्मुखादिकर्तृकत्वश्रवणात्कथं विष्णोरुद्भवस्थितिलयेषु निमित्तलीलाप्रसाये स्मुक्तमत आह य इति प्रथम
मेकः अविभक्तनामरूपः स्थित्युद्भवप्रलयानां हेतवः कर्त्तारः स्वयं विभुर्भगवानहं ब्रह्मा गिरिशो रुद्रश्च यो वै भगवानेवेत्यर्थः हिरण्यगर्भरुद्र
तन्मध्ये वर्त्यवतारुरूपवानित्यर्थः स्वयमिमनेन स्थितिं स्वावताररूपेण स्पृष्टिसंहारौ ब्रह्मरुद्राख्यजीवांतःप्रवेशेन करोतीति द्योतितं सृष्टिः त
तः ॥ करिष्यामीति स्मरणात ॥ स्थित्युद्भवप्रलयहेतव इति चतुर्थ्यंतं वा भावप्रधानीतिनिर्देशः स्थित्यादिकर्त्तृत्वाय हिरण्यगर्भरुद्रस्वावतारतया
भवतेत्यर्थः ॥ आत्ममूलमात्मैव मूलं यस्य तदात्ममूलकार्यमित्यर्थः एवंभूतं हि त्रिपान्नित्यविभूतिमत्वात्तीत्यभिवेन्यपिपावेऽयमेवार्थः ॥ पदार
स्थित्यादिहेतुभूततत्त्ववतारादिरूपेणत्रियात्रिस्कंधः आत्ममूलं प्रधानं भित्वा महदादिसमष्टिप्रभृतिव्यष्टिपर्यंतपरिणामयउरुप्ररोहः देवति
र्यङ्मनुष्यस्थावरादिरूपाः शाखोपशाखाः पत्रपुष्पफलादयो यस्य स एवंभूतो यः प्रववृधे तस्मै भुवनद्रुमाय भुवनाकारद्रुमाय भगवते नमः

॥५६॥

एवमनभिसंहितफलकर्मयोगस्य भगवदाराधनरूपस्याक्षयफलसाधनत्वमभिधाय तस्मै एव प्रकृतिविविक्तात्मयाथात्म्यज्ञानपूर्वकानुष्ठेयत्व
मुभयोरपि भगवदुपासनत्वस्य च कारणविषयत्वं चाभिप्रयन्नमस्करोति ॥ शश्वदिति ॥ शश्वत्सदा स्वरूपमहसैव प्रकृतिविविक्तात्मस्वरूपया
याथात्म्यज्ञानेनैव निरस्तभेदः देवमनुष्यादिभेदः ॥ मोहात् देहात्मभ्रमस्तं चात्मभ्रमादिनिमित्तमज्ञानम् ॥ आदिशब्देन तत्प्रयुक्तशोकादयो विव
क्षिताः निरस्ता भेदादयो येषां योगिनां तेषां सैव बोधः ॥ स्वस्वरूपविषयकं ज्ञानं धिषणा भगवदुपासनात्मिका बुद्धिः एते स्वप्राप्त्युपायभूते
यस्य तस्मै प्रकृतिविविक्तरूपया याथात्म्यज्ञाननिरस्तभेदमोहप्रभृतिसांसारिकधर्मयोग्युपहतज्ञानयोगकर्मयोगांगकोपासनाविषयभूता

शश्वत्स्वरूपमहसैव निरस्तभेदमोहाय बोधधिषणाय नमः परस्मै ॥ विश्वोद्भवस्थितिलयेषु निमित्तलीलारासाय ते नम इद
ं कृमेश्वराय ॥१४॥ यस्यावतारगुणकर्मविडंबनानि नामानि येऽसुविगमे विवशा गृणन्ति ते नैकजन्मशमलं सहसै
व हित्वा संयान्त्यपावृतमृतं तमजं प्रपद्ये ॥१५॥ येतमर्थः ॥ यद्वा चतुष्पतपादे स्वस्वरूपाविर्भावेन स्वस्मिन्नसंस्पृष्टदेवमनुष्यादिभेदरू
पमोहाय अंतरात्मतयावस्थितस्याप्यनात्मगतदोषास्पृष्टायेत्यर्थः ॥ अत एव परस्मिन्प्रकृतिपुरुषविलक्षणाय तत्र हेतुः विश्वस्य ज
गतः स्थितिलयेषु निमित्तभूता या लीला क्रीडा तस्या रागो रसो यस्य तस्मै ईश्वराय नियंत्रे प्रकृतिपुरुषयोरसंभावितस्वलीलैव प्रयोजनजग
द्व्यापारायेत्यर्थः ॥ अनेन प्रकृतिपुरुषविलक्षणयानन्नियंतृजगत्कारणविषयकोपासनमेव मुक्तिसाधनमित्यभिप्रेतम् ॥ एवंभूताय तेतु
भ्यं नमस्कृमहे वयम ॥१४॥ ननु परिपूर्णस्याप्तसमस्तकामस्य लीलार्थमपि जगद्व्यापारो नोपपद्यत इत्याशंक्य भवभयाभितप्तसांसारि

ततोनृपतिर्युधिष्ठिरोहिरण्यांश्ववरान्कामान्यथायोग्यंयथाभिलाषंचकामंप्रादादृषिभ्यःप्रायच्छत्सतीर्थविद्दानपात्रविद्राजाप्रजाती
र्थेपौत्रोत्पत्तिनिमित्तदानकालेस्वन्नंमृष्टमन्नंचविप्रेभ्यःप्रादात्॥१४॥हिरण्यादिभिस्तुष्टाब्राह्मणास्तंप्रश्रयेणविनयेनावनतंनम्रंराजा
नमूचुः॥१५॥तद्देवाह॥एषहीतिसार्द्धद्वयेन॥पूरूणांभवतांप्रजातंतौप्रजासंतानेनिमित्तेशुक्लेगर्भपिंडेसंस्थामुपेयुषिसतिहियस्मादेषो
जातः॥अप्रतिघातेनप्रतिहतिरहितेनदैवेनप्रभविष्णुनासमर्थीभवनशीलेनविष्णुनावोऽनुग्रहार्थायरातोदत्तः॥१६॥तस्माद्विष्णुना

हिरण्यंगांमहींग्रामान्हस्त्यश्वान्नृपतिर्वरान्॥प्रादात्स्वन्नंचविप्रेभ्यःप्रजातीर्थेसतीर्थवित्॥१४॥तमूचुर्ब्राह्म
णास्तुष्टाराजानंप्रश्रयान्वितं॥एषह्यस्मिन्प्रजातंतौपुरूणांपौरवर्षभ॥१५॥दैवेनाप्रतिघातेनशुक्लेसंस्थामुपेयुषि
रातोवोऽनुग्रहार्थायविष्णुनाप्रभविष्णुना॥१६॥तस्मान्नाम्नाविष्णुरातइतिलोकेबृहच्छ्रवाः॥भविष्यतिनसंदेहोम
हाभागवतोमहान्॥१७॥युधिष्ठिरउवाच॥अप्येषवंश्यान्राजर्षीन्पुण्यश्लोकान्महात्मनः॥अनुवर्तितास्विद्यशसा
साधुवादेनसत्तमाः॥१८॥

रातत्वरूपान्नामहेतुनिमित्तान्नाम्नावाचकेनलोकेविष्णुरातइतिप्रसिद्धोबृहच्छ्रवाविपुलकीर्तिर्गुणैर्महान्महाभागवतश्चभविष्य
तिनात्रसंदेहः॥१७॥विप्रैरेवमुक्तोयुधिष्ठिरःतस्यभाविनोगुणान्बुभुत्सुःपृच्छति॥अपिस्विदित्येतद्वयंसमुदितंप्रश्नद्योतकं॥हेसत्तमाः॥ए
षजातःशिशुःसाधुवादेनसाधूनांउपदेशेनहेतुनामहात्मनःपुण्यश्लोकान्वंश्यान्राजर्षीन्पांड्वादीन्यशसानुवर्तितास्विदनुवर्तिष्य
तिकिं॥पांड्वादिवद्यशस्वीभविष्यतीतिप्रश्नः॥साधूनांवादोयस्मिन्विषयभूतेतेनयशसाऽनुवर्तितास्विदितिनवान्वयः॥१८॥ ॥ ॥॥

श्रीमंतः हतत्वादिगुणैः शोभावंतो दीर्घाश्चाजानुलंबिनश्चत्वारो बाहवो यस्य। तापेन निर्मली कृतकांचनमये कुंडले यस्य। क्षतजे रक्ते गृही-
तो यस्य। गदापाणौ यस्य तं। उल्कस्यांगारस्येवाभा यस्याः स्तां गदां मुहुर्मुहुः परितः सर्वतः दिशो भ्रामयंतं आत्मानं धारकं॥९॥ गोपतिः सूर्य
इव नीहारं स्वगदया ब्रह्मास्त्रतेजो विधमंतं नाशयंतं तं संनिकर्षे स्थितं इममेवंविधं पुरुषं कोसाविति पर्यैक्षत पर्यालोचितवान्। यतः पर्यैक्ष-
त ततएव प्रकृति निमित्तात्परीक्षितइत्यस्य प्रसिद्धिरिति भावः॥१०॥ तत् ब्रह्मास्त्रतेजो विधूय निरस्य अपरिमेयात्मा अपरिच्छिन्नस्वरूपस्वभा-

श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुंडलं॥ क्षतजाक्षं गदापाणिमात्मनः सर्वतो दिशं॥ परिभ्रमंतमुल्काभां भ्रामयंतं
गदां मुहुः॥९॥ अस्त्रतेजः स्वगदया नीहारमिव गोपतिः। विधमंतं सन्निकर्षे पर्यैक्षत क इत्यसौ॥१०॥ विधूय त-
दमेयात्मा भगवान् धर्मगुब्विभुः॥ मिषतो दशमासस्य तत्रैवांतर्दधे हरिः॥११॥ ततः सर्वगुणोदर्के सानुकूलग्र-
होदये। जज्ञे वंशधरः पांडोर्भूयः पांडुरिवौजसा॥१२॥ तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः॥ जातकं कारया-
मास वाचयित्वा च मंगलं॥१३॥

वः। धर्मगोप्ता विभुर्भगवान् हरिर्दशमेमासि तस्य गर्भस्य शिशोर्मिषतः पश्यतः सतस्तत्रैवांतर्हितवान्॥११॥ ततः सर्वगुणोदर्के सर्वगुणा-
धिके। तदेवाह। सानुकूलग्रहोदये आनुकूल्येन सहितानां ग्रहाणां भृग्वंगिरादीनामुदयो यस्मिन् लग्न इति विशेष्यमध्याहर्तव्यं। सानु-
कूला ग्रहा यस्मिन् उदये लग्ने वा पांडोर्वंशधरः वंशवर्द्धनः पुनरोजसा पांडुरिव पांडुसदृशो जज्ञे॥१२॥ ततः प्रीतं हृष्टं मनो यस्य स राजा
युधिष्ठिरः धौम्यकृपादिभिर्विप्रैः सुमंगलं स्वाशिषं वाचयित्वा जातकं जातकर्म कारयामास॥१३॥

भा०प्र० १०० परीक्षितो जन्मप्रकारं वक्तुं तावत्तादात्मिकं युधिष्ठिरावस्थानं माह । अपीपलदिति त्रिभिः । अपीपलत् अपालयत् । कथंभूतः । कृष्णस्य पादयोरनुसे
वया अनुध्यानेन हेतुना सर्वेभ्यः । निर्गता स्पृहा यस्य तथाभूतः कृष्णपादानुसेवकत्वान्निःस्पृहः सन्नित्यर्थः ॥४॥ तत्सेवया स्पृहाभावहेतुत्वमे
व स्पष्टयन्नाह । संपद इति द्वाभ्यां । यथा क्षुधितस्याशनयायुक्तस्य पुंसः स्रक्चंदनादयो न मुदमावहंति किं त्वशनमेव तथा हे द्विज ये संप
दादयः । ते ते कामाः सुरस्पार्हाः । सुराणामपि स्पृहणीया अपि मुकुंद एव मनो यस्य तस्य राज्ञो युधिष्ठिरस्य मुदमधिजह्रुः किं संपादितवंतः ।
न संपादितवंत एवेत्यर्थः । तत्र संपदो भोग्यभोगोपकरणादिसमृद्धयः । क्रतवः स्वर्गादिसुखसाधनान्यश्वमेधादीनि लोकाः कर्मदा जनाः

सूत उवाच ॥ अपीपलद्धर्मराजः पितृवद्रंजयन्प्रजाः ॥ निःस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया ॥४॥ संपदः क्रत
वो लोका महिषी भ्रातरो मही । जंबूद्वीपाधिपत्यं च यशश्च त्रिदिवं गतं ॥५॥ किं ते कामाः सुरस्पार्हा मुकुंदमनसो द्वि
जाः ॥ अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ॥६॥ मातुर्गर्भगतो वीरः स तदा भृगुनंदन ॥ ददर्श पुरुषं कंचिद्दह्यमानो
स्त्रतेजसा ॥७॥ अंगुष्ठमात्रममलं स्फुरत्पुरटमौलिनं ॥ अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतं ॥८॥ ॥

महिष्यः पत्न्यः भ्रातरो दिग्विजयिनो भीमादयः । मही निष्कंटकी पृथ्वी त्रिदिवं गतं त्रिदिवपर्यंतं व्याप्तं यशश्च ॥५॥६॥ अथ परीक्षितो
जन्म वक्तुं तावत्तस्य मातुरुदरावस्थानदशामाह ॥ मातुरिति सार्द्धैः पंचभिः । हे भृगुनंदन वीर । उत्तरातनयः मातुर्गर्भगतः उदरगतः ब्र
ह्मास्त्रतेजसा दह्यमानः कंचित्पुरुषं ददर्श ॥७॥ कथंभूतं अंगुष्ठपरिमितमात्रोऽत्यल्पो देहो यस्य । न विद्यते मलं देहजं यस्य । स्फुरत्पुरटो हिर १२०
ण्मयो मौलिः किरीटं यस्य ॥ अपीच्यं हृष्टपुष्टांगतया स्पृहणीयं दर्शनं यस्य तडिदिव वासो वस्त्रं यस्य ॥ आश्रितान्न च्यावयतीति तथा ॥८

यद्यपि परीक्षिज्जन्मकर्मादिकं पुरस्तादेव पृष्टं यद्यपि च तद्वक्ष्यमेव तदुपोद्घातरूपोऽयं वचः ॥ किमकार्षीत्तत इति प्रकृतप्रश्नस्योत्तरं चाश्रुतं । एवं
वोत्तरा पुनस्तत्त्वश्रानुपपत्तिः ॥ तथापि किमकार्षीत्तत इति पृष्टस्य राज्यशासनानंतरभाविनो युधिष्ठिरवृत्तांतस्य परीक्षिज्जन्मानंतरमेव तच्छ्रु।
श्रुतत्वात्स्वयमेवाहृष्टणो ऊर्भवैराद्युः कुरुतं तत इति प्रक्रम्य परीक्षितो मातापितरौ तावद्दोषं पृच्छति शौनकः ॥ अश्वत्थाम्नेति । अश्वत्थाम्नोपसृ-
ष्टेन प्रयुक्तेन उर्वधिकं दुस्सहं प्रभूतं वा तेजो यस्य प्रयुक्तेन तेन ब्रह्मशीर्ष्णा ब्रह्मशिरो नामकेनास्त्रेण तावदुत्तराया गर्भो हतः ॥ ततः पुनरीशेन कृ-
ष्णेनाजीवितः इत्युक्तानुवादः ॥ १ ॥ तत उपरितनं तस्योत्तरातनयस्य महात्मनः ॥ यज्जन्मादि तदिदं हे महाबुद्धे श्रोतुमिच्छामि । निधनं मरणं यथै-

शौनक उवाच ॥ अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा ॥ उत्तराया हतो गर्भ ईशेनाजीवितः पुनः ॥ १ ॥ तस्य जन्म
महाबुद्धेः कर्माणि च महात्मनः ॥ निधनं च यथैवासीत्स प्रेत्य गतवान्यथा ॥ २ ॥ तदिदं श्रोतुमिच्छामि गदितुं यदि
मन्यसे ॥ ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः ॥ ३ ॥

वासीत्स प्रेत्य मृत्वा यथा गतवान् यां गतिं प्राप्तवान् । तदिदमित्यन्वयः ॥ २ ॥ यदि गदितुं मन्यसे वक्तुमिष्टं योग्यं च मन्यसे चेत्तर्हि श्रद्दधानानां
नोऽस्माकं ब्रूहि ॥ कुतो वस्तज्जन्मादिशुश्रूषा श्रद्धा वभूवेत्यतस्तं विशिनष्टि । यस्य परीक्षितः शुको ज्ञानं परमात्मयाथात्म्यज्ञानमदादुपदि-
ष्टवान् महाभागवतत्वात्तज्जन्मादिशुश्रूषा न सममभवदिति भावः ॥ अत्र जन्मैव प्राधान्येन पृच्छ्यते । तस्य कर्मादिकं तु युधिष्ठिरादिवृत्तांता-
नंतरकालिकत्वात्तद्वृत्तानंतरमेव विशेषतः पृष्टव्यमपि जन्मकालिकजातकद्वारा सामान्यतो बुभुत्सुना जन्मनो सहोपात्तं । अत एवो-
त्तरेऽपि जातकद्वारैव तत्कर्मादिकं प्रदर्श्यत इत्यवगंतव्यं ॥ ३ ॥

एवंविधं तं यत्स्त्रीवश्यं मन्यते सोऽज्ञस्तस्याह। तमिति। मनुजं व्यापृण्वानं मनुजवच्चेष्टमानं मनुष्यभावेन स्वमायात्मानमाच्छादयंतमित्यर्थः। वस्तु
तो निःसंगमपि संगिनमिव भासमानं तमिमं भगवंतं यो लोकोऽज्ञ आत्मौपम्येन स्वतुल्येन मन्यते सोऽयं लोकः। अत्र हेतुरबुधः नितरामज्ञः ३७
अथ विषयैरनाकृष्टत्वमीश्वरस्य नाश्चर्यमित्यभिप्रायेणेश्वरत्वं निर्वक्ति। एतदिति। प्रकृतिस्थोऽपि मूलप्रकृतिव्यापकोऽपि तद्गुणैः स
त्वादिभिरात्मस्थैर्जीवगतैरविद्याश्रितै रागद्वेषादिभिश्च गुणैः सदा न युज्यते इति यदेतदेवेश्वरस्येशनमित्यन्वयः। सदेस्यनेनयुक्त्याहृत्तिं
तर्हि पूर्वं तैर्युक्तः। हेयगुणस्पर्शोदाहरणमाह यथेति। तदाश्रया ईशाश्रया बुद्धिस्तज्ज्ञानं यथा सत्वादिभिर्न युज्यते। न हि स्वाभाविकी ज्ञानबल

तमयं मन्यते लोको ह्यसंगमपि संगिनं॥ आत्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुधः॥३७॥ एतदीशनमीशस्य प्रकृ
तिस्थोऽपि तद्गुणैः॥ न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया॥३८॥ तं मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः॥ अप्रमाण
विदो भर्तुरीश्वरं मतयो यथा॥३९॥ इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे भगवत्प्रभाववर्णनं नामैकादशोऽध्यायः॥

क्रिया चेत्युक्तविधं स्वतः सर्वगतस्य ज्ञानं सत्वरजस्तमोऽन्वयाधीनस्य तस्य ह्ययुक्तं। स एवं सर्वप्रकारेण चिरविगतहेय इति यत्तदेवाहि। ई
श्वरस्येश्वरत्वमित्यर्थः॥३८॥ यथैवमज्ञो लोकस्तमुक्तविधमीश्वरमात्मतुल्यं मन्यते। तथा स्त्रियोऽप्यज्ञानादात्मवश्यममन्यतेत्याह। तमिति
संसारिणामिंद्रियप्रसूता मतयो यथेश्वरं न जानंति किंतु मोहादन्यथा मेनिरे। एवंभूतास्ताश्चाबलाः स्त्रियोऽपि तं भगवंतं रहः स्त्रैणं स्त्रीसमूह
मनुव्रजंतं स्त्रीसमूहानुवर्तिनं मेनिरे॥ तत्र हेतुः। भर्तुरप्रमाणविदः॥ प्रमीयत इति प्रमाणं स्वरूपं तत्स्वरूपमजानंत्यः ३९॥ इति प्रथमे एका

अथो परितनं रमां तं संगृह्य विक्लवरुरूक्तं हृत्तां तं समासतोनुवदति ॥ एवमिति । क्षितेर्भूमेर्भारस्य जन्म येभ्यः । अक्षौहिणीभिः परि
वृत्तं परिव्याप्तं तेजः शौर्यं येषां तेषां नृपाणां कौरवाणां पांडवानां च मिथः वैरं श्वसनो वायुरनलमग्निं इव विधाय वर्द्धयित्वा स्वयं निरायुधः
एव तेषां मिथो वधेन वधाद्धेतु उपरतः । उपरामं उपसंहृतवान् । स एष इत्युत्तरेणान्वयः । स्वयं निरायुध एव सन् तेषां मिथो वधं कारयन्नयः
स्वयं तूष्णीमवस्थित इत्यर्थः । अथ ॥ स एष इति ॥ स एषः । स्वमायया स्वात्मीयसंकल्पेऽस्मिन्नरलोकेऽवतीर्णो भगवान् स्त्रिय एवारन्ना ॥

एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसां ॥ विधाय वैरं श्वसनो यथानलं मिथो वधेनोपरतो नि
रायुधः ॥ ३४ ॥ स एष नरलोकेस्मिन्नवतीर्णः स्वमायया ॥ रेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा ॥ ३५ ॥ उद्दामभाव
पिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनोपि यासां ॥ संमुह्य चापमजहात्प्रमदोत्तमास्ता यस्येंद्रियं वि
मथितुं कुहकैर्न शेकुः ॥ ३६ ॥

निलेषां कूटस्थे समुदाये स्थितः रेमे चिक्रीडे यथा प्राकृतः स्त्रीवश्यस्तद्वत् ॥ प्राकृतो यथेत्यने
न स्त्रीवश्यत्वानुकारमात्रमेव न तु परमार्थतस्तद्वस्तीति सूचितं ॥ अथ तदेव व्यंजयितुं विशिनष्टि । उद्दामेति । ताः प्रमदोत्तमाः कु
हकैर्वंचनोपायैर्यस्येंद्रियं प्रमथितुं न शेकुः । न प्रभववतमपीत्युत्तरेणान्वयः । सुतरां पारवश्यापादनाभावसूचनाय प्रमदोत्तमा वि
शिनष्टि । यासामुद्दामभावादिभिर्निहितः सन्मदनोपि संमुह्य मोहं प्राप्य स्वयं धनुरजहात्तत्याज ताः प्रमदोत्तमा इत्यन्वयः । उ
द्दाम उदारो गाधऽस्लियावत् । भावोऽभिप्रायस्तेन पिशुनः । चित्ताकर्षसूचकः । अमलः सुंदरश्च हासस्तेन च व्रीडापूर्वकावलोकनेन

श्री० भ०
१५८

तमिति । दुरंतोऽगाधो भावः स्नेहो यासां ताः पत्न्यः समागतिमात्मजैर्दृष्टिभिरंतरात्मना च परिरेभे आलिंगितवत्यः ॥ शरीरपरिरंभस्यार
हः कालिकृत्वा तेन सा ह्राद्या च अक्रूरपितृपुत्रैः प्रद्युम्नादिपुत्रद्वारेणेत्यभिप्रायेण पुत्रैरित्युक्तं ॥ मनसा चक्षुषा च समंसा ह्रादेर्वचकृरित्य
भिप्रायेणांतरात्मना दृष्टिभिश्चेत्युक्तं । हे भृगुवर्य्य विलज्जतीनां तासामत एव नेत्रयोरंबु निरुद्धमपि विक्लववाद्रधाष्टीद्रस्रवत्
३२ ॥ ब्रूते इति: सा कमामनाशयाद्गुनस्युस्तस्यात्मजैरित्यादिना च तासां तद्विरहासहिष्णुत्वं सूचितं ॥ तदेवोपपादयति ॥ यद्यपीति

तमात्मजैर्दृष्टिभिरंतरात्मना दुरंतभावाः परिरेभिरे पतिं ॥ निरुद्धमप्यास्रवदंबु नेत्रयोर्विलज्जतीनां भृगु
वर्य्य वैक्लवात् ॥ ३१ ॥ यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्यांघ्रियुगं नवं नवं ॥ पदे पदे का विरमेत तत्
पदाच्चलापि यच्छ्रीर्न जहाति कर्हिचित् ॥ ३२ ॥

यद्यप्यसौ भगवान् कृष्णस्तासां पार्श्वगतः रहोगतश्च तथापि तस्यांघ्रियुगं तासां नवं नव एवाभूत् ॥ यतस्तत्सदा तस्य पादारविं
दात् का विरमेत विश्लिष्य अवस्थातुमुत्सहेत न कापीत्यर्थः ॥ तदेव द्रढयितुं विशिनष्टि ॥ चलाचला श्रीर्लक्ष्मीरपि कदापि यत्
यदंघ्रिं न जहाति तत्पदात् का विरमेतेत्यन्वयः ॥ तदापीति पाठांतरं ॥ तत्र यद्यपि यदापि पार्श्वगतो रहोगतश्च तदापि तस्यां
घ्रियुगं नवं नवं किं पुनः ॥ कदाचिदंतेन नवं नवं इति ॥ कैमुत्यन्यायसिद्धमिति भावः ॥ उत्तरार्द्धं तु यथाश्रुतार्थमेव ॥ ३२ ॥ ॥ १५८

ततस्तु पित्रोर्देवकीवसुदेवयोर्गृहं प्रविष्टो भगवान्मातृभिर्देवकीरोहिण्यादिभिः परिष्वक्त आलिंगितः देवकीप्रमुखा मातृर्मुदा शिरसा मनसा ववंदे ॥२८॥ ता देवक्यादयः पुत्रं कृष्णमंकमारोप्य स्नेहेन स्नुतौ प्रस्नवंतौ पयोधरौ स्तनौ यासां ॥ हर्षेण विकलित आत्मा मनो यासां तथाभूता नेत्रजलैरानंदवाष्पैः सिषिचुः ॥२९॥ स भवनं स्वगृहं प्राविशत्कथंभूतं । सर्वे कामाः काम्यमाना भोग्यभोगोपकरणरूपा । नास्यो यस्मिंस्तत् उत्तमं यस्मात् ॥ यत्र पत्नीनां षोडश सहस्राणि प्रासादास्तथाभूतं ॥३०॥ तदा प्रोष्य प्रवासं कृत्वा गृहानुपागतं ।

प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ॥ ववंदे शिरसा सप्त देवकीप्रमुखा मुदा ॥२८॥ तां पुत्रमंकमारोप्य स्नेहस्नुतपयोधराः ॥ हर्षविकलितात्मानं सिषिचुर्नेत्रजैर्जलैः ॥२९॥ अथाविशत्स्वभवनं सर्वकाममनुत्तमं प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ॥३०॥ पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्सवाः ॥ उत्तस्थुरारात्सहसासनाशयात्साकं व्रतैर्व्रीडितलोचनाननाः ॥३१॥

प्रियं दृष्ट्वा विलोक्य पत्न्यः रुक्मिण्यादयः संजातो मनसि महानुत्सवो हर्षो यासां ॥ व्रीडिते लोचने येषु तान्याननानि यासां तथाभूता व्रतैः सहासनाशयात्सहसा आशु उत्तस्थुः ॥ तत्र व्रतेभ्यः उत्थानं नाम भर्त्रागमनार्थे व्रतत्यागः । आसनादुत्थानं प्रसिद्धं ॥ आशयादिभिः आशयादुत्थानं दिदृक्षौत्कंठ्यत्यागः । दर्शनस्य जाततत्वात् ॥३१॥

भा० प्र०
८७

उचिता चैषा वृत्तिरित्यभिप्रायेणाह । श्रिय इति ॥ यस्येत्यस्य उरो मुखबाहुपदांबुजैः प्रत्येकमन्वयः । यस्योरः श्रियो निवासः स्थानं उ
रोल्लावण्यानुभवाय तदेव वासमाश्रितवाश्रितवती श्रीरित्यभिप्रायः । यस्य मुखं दृशां पश्यज्जनचक्षुषां पानपात्रं तल्लावण्यरसपानपात्रं
यस्य च बाहवो लोकपालानां पानपात्रं तल्लावण्यरसपानपात्रं ॥ यस्य च पदांबुजं सारंगाणां सारंगच्छंतो सारग्राहिणां मुनीनां तल्लाव
ण्यपानपात्रं ॥ सारंगाणां यतीनामिति सारंगाः सारतमार्थवक्तार इति वा ॥ तमच्युतं नित्यं निरीक्ष्यमाणानामपि दृशो न वितृप्यंतीति युक्तमेवेत्य
र्थः । २६ । सितेति । पथि सितातपत्रं व्यजने चंते ताभ्यामुपस्कृतः ॥ सितातपत्रेण छत्रेण व्यजनाभ्यां चवीज्यमानः इत्यर्थः ॥ पिशंगे वाससी यस्य स

श्रियो निवासो यस्योरः पानपात्रं मुखं दृशां ॥ बाहवो लोकपालानां सारंगाणां पदांबुजं ॥ २६ ॥ सिता
तपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि ॥ पिशंगवासा वनमालया बभौ घनो यथार्को
डुपचापवैद्युतैः ॥ २७ ॥

भगवान्वनमालया बभौ ॥ कथं यथार्कादिभिः युगपत्समुदितैः घनो नीलांबुदस्तद्वत् ॥ अभूतोपमैवा न ह्यर्कोडुपयोः सहा
वस्थानमस्ति ॥ तत्रार्कादिस्थानीया मुकुटवनमालावस्त्रभूषणादयः ॥ विष्णुदेववैद्युतउडुपश्चंद्रः । यद्वा उडुपग्रहणं गुरुशुक्रयोर १
प्येवानक्षत्राणामप्युपलक्षणं ॥ तत्रोडुपस्थानीयं सितातपत्रं गुरुशुक्रस्थानीये व्यजने नक्षत्रस्थानीयानि प्रसूनानि । इंद्रमणि ८
स्थानीया वनमाला ॥ विद्युत्स्थानीयं पिशंगवस्त्रं । अर्कस्थानीयं तु मुकुटमिति । सितातपत्राद्युपस्कृतत्वादिविशेषणसामर्थ्या

८७

नटादयोऽद्भुतानि उत्तमश्लोकस्य भगवतश्चरितानि जगुः । तत्र नटा अभिनेतारः । नर्तकाः स्त्रीणां नृत्यशिक्षकाः । गंधर्वा गायकाः सूताः पौ
राणिकाः मागधा वंशावलिपाठकाः ॥ वंदिनः मंगलवादिनः ॥ स्तोत्रपाठकाश्च ॥२०॥ तत्र भगवान् यथाविधि नमस्कारालिंगनकरस्पर्शस्मि
तावलोकनादिभिर्यथायोग्यं वसुदेवादिभिरुपसंगम्य सर्वेषां पौराणमनुवर्तिनां भृत्यानां च मानमादधे सन्मानं चकार । विभुर्भगवान्
श्वपाकपर्यंतेभ्यः चतुर्थ्यंतमिदं । आश्वास्योपच्छंद्याभिमतैर्वरैर्मानमादधे इत्यन्वयः ॥२१॥२२॥ स्वयं च सदारैर्गुरुभिः स्थविरैर्वृद्धैर्विप्रैरन्यै

नटनर्तकगांधर्वाः सूतमागधवंदिनः ॥ गायंति चोत्तमश्लोकचरितान्यद्भुतानि च ॥२०॥ भगवांस्तत्र बंधूनां पौ
राणमनुवर्तिनां ॥ यथाविध्युपसंगम्य सर्वेषां मानमादधे ॥२१॥ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः ॥ आ
श्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः ॥२२॥ स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि ॥ आशीर्भिर्युज्यमानोऽन्यै
र्वंदिनश्चाविशत्पुरं ॥२३॥ राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः ॥ हर्म्याण्यारुरुहुर्विप्र तदीक्षणमहोत्सवाः
॥२४॥ नित्यं निरीक्षमाणानां यदपि द्वारकौकसां ॥ न वितृप्यंति हि दृशः श्रियो धामांगमच्युतं ॥२५॥

वंदिभिश्च कर्तृभिराशीर्भिर्युज्यमानः पुरमाविशत् ॥२३॥ द्वारकाया राजमार्गं कृष्णे गते सति तत्र तत्र स्त्रियः तस्य कृष्णस्येक्षणे
महानुत्सवो हर्षो यासां ताः हे विप्र हर्म्याण्यारोरुहुः नित्यं निरीक्षमाणानामपि द्वारकौकसां द्वारकास्थो लोकः स्थानं यासां तासां स्त्री
णां दृशो न वितृप्यंति । तस्मात्तदीक्षणमहोत्सवा हर्म्याण्यारुरुहुरित्यर्थः ॥२४॥ तत्र श्रीशब्देनात्र हेतुः प्रसिद्धिर्द्योत्यते ॥२५॥ ॥

भा० प्र०
८६

प्रतिद्वारं दध्यादिभिर्जलपूर्णकुंभैः पूजाद्रव्यैः धूपदीपैश्चालंकृतां एवंभूतां पुरमिति पूर्वेणान्वयः ॥१५॥ प्रष्ठं निरतिशयप्रेम्नागतं भ
गवंतमायांतं निशम्याकर्ण्य महामना वसुदेवः ॥ अक्रूरादयश्च ॥१६॥ प्रकृष्टो हर्षस्तस्य वेगेन उत्कंठेन उच्छ्वसितानि विसृष्टानि त्य
क्तानि शयनादीनि यैस्तथाभूताः संतः ॥१७॥ वारणेंद्रं गजेंद्रं पुरस्कृत्य पुरोवस्थाप्य ससुमंगलैः । स्वस्तिवाचनसहितैर्ब्रा

द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः ॥ अलंकृतां पूर्णकुंभैर्बलिभिर्धूपदीपकैः ॥१५॥ निशम्य प्रेष्ठमायांतं
वसुदेवो महामनाः ॥ अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥ प्रद्युम्नश्चारुदेष्णश्च सांबो जांबवतीसुतः ॥
प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः ॥१७॥ वारणेंद्रं पुरस्कृत्य ब्राह्मणैः ससुमंगलैः । शंखतूर्यनिनादेन ब्र
ह्मघोषेण चादृताः ॥१८॥ प्रत्युज्जग्मू रथैर्हृष्टाः । प्रणयागतसाध्वसाः ॥ वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्
सुकाः ॥ लसत्कुंडलनिर्भातकपोलवदनश्रियः ॥१९॥

ह्मणानां शंखानां तूर्याणां च निनादेन ब्रह्मघोषेण वेदघोषेण च महादृताः ॥ आदरयुक्ताः ॥१८॥ हे ब्रह्मन् प्रणयेन हेतुना आगतं साध्वसं भयं
येषां तथाभूताः संतो रथैर्गमनसाधनैः प्रत्युज्जग्मुरभिमुखं ययुः ॥ तथा वारमुख्याः गणिकाश्रेष्ठाश्च लसद्भ्यां कुंडलाभ्यां निर्भातौ
कपोलौ येषु तेषां वदनानां श्रीः शोभा यासां ताः तद्दिदृक्षुः या यानैर्गमनसाधनैः प्रत्युज्जग्मुः ॥१९॥ ॥ ॥ ॥ ८६

इतीत्थं प्रजानामुदीरितावाचाः ॥ श्रएवानोभक्तवत्सलोभगवानवलोकनेनानुग्रहं वितन्वन्पुरंप्रविशत् पुरःशब्देयंनतुपुरस्तात्‌ः॥१०
कथंभूतांपुरंमध्वादयोयादवांतरविशेषाः । तैरात्मतुल्यवलैः॥कस्तुल्यवलैर्नागैः॥काद्रवेयादिभिर्भोगवतीमिवगुप्तांरक्षितां
भोगवतीनामनागानांपुरी॥११॥सर्वर्तुषुसुखावहात्सर्वेतुषुयः सर्वोविभवाःपुष्पपुष्पादिसमृद्धिर्येषांतेपुण्याःहृद्याश्चमंदारयारि
जातादयः । लतालयदर्शस्तनयाश्चाश्रमाश्चयेषुतैरुद्यानोपवनारामैर्वृत्तानांपद्माकराणांश्रीःशोभायस्यां॥तत्रोद्यानंराज्ञांक्रीडास्थानं

मूलउवाच ॥ इतिचोदीरितावाचःप्रजानांभक्तवत्सलः॥श्रएवानोनुग्रहंदृष्ट्यावितन्वन्प्राविशत्पुरीं॥१०॥मधु
भोजदशार्हार्हकुकुरांधकवृष्णिभिः॥आत्मतुल्यवलैर्गुप्तांनागैर्भोगवतीमिव॥११॥सर्वर्तुसर्वविभवपुण्यवृक्ष
लताश्रमैः॥उद्यानोपवनारामैर्वृतांपद्माकरश्रियं॥१२॥गोपुरद्वारमार्गेषुकृतकौतुकतोरणां॥चित्रध्वज
पताकाग्रैरंतःप्रतिहतातपां॥१३॥संमार्जितमहामार्गरथ्यापणकचत्वरां॥सिक्तांगंधजलैरुप्तांफलपुष्पाक्ष
तांकुरैः॥१४॥

उपवनंवनंसमीपस्थं आरामः।लतकः॥१२॥गोपुराकाराणांमार्गेषुकृतानिकौतुकानिमंगलार्थानितोरणानियस्यां
ध्वजाश्चपताकाश्चताभिर्निर्मितानियस्यां॥चित्राणांध्वजानांपताकानांचाग्रैःप्रतिहतोनिरस्तआतपोयस्यां॥१३॥संमार्जितामहामार्गादि
योयस्यां॥महामार्गाराजवीथ्यःरथ्याउपवीथ्यः॥आपणिकानिवणिजांक्रयविक्रयादिगृहाणिचत्वराणजाग्रादिशालाःगंधोद

श्रीभागवतटीका॰ स्कं १० उ

भा० प्र०
८५

सुहृन्नेत्याह भवायेति हेविश्वभावनविश्वंजगत्भावयतिसत्तास्थितिप्रवृत्तिमत्करोतीतितथाभूतस्त्वंनोस्माकंभवायाभ्युदयायच।मातापिताभ्रा
तानिवासःशरणंसुहृद्गतिर्नारायणतंदेवतानांपरमंचदैवतंपतिंपतीनांपरस्तात्।नतस्यकश्चित्पतिरस्तिलोकेनचेशितानैवचतस्यलिंगंयो
वैवेदांश्चप्रहिणोतिइत्यादिश्रुत्यर्थमनुसंधायोक्तं॥त्वमेवमातेत्यादि।लौकिकस्तुबंधुरेकएवत्वंतुसर्वविधबंधुरितिभावः।यस्यतवानुवृ
त्त्यासेवयाकृतिनःकृतकृत्याबभूविम॥सत्वंनोभवायभवेत्यन्वयः॥७॥अहोइति।भगवतात्वयावयमहोसनाथाःस्मनिरतिशयसुखप्रद

भवायनस्त्वंभवविश्वभावनत्वमेवमाताथसुहृत्पतिःपिता॥त्वंसद्गुरुर्नःपरमंचदैवतंयस्यानुवृत्त्याकृतिनोबभू
विम॥७॥अहोसनाथाभवतास्मयद्वयंत्रैविष्टपानामपिदूरदर्शनं॥प्रेमस्मितस्निग्धनिरीक्षणाननंपश्येमरूपं
तवसर्वसौभगं॥८॥यर्ह्यंबुजाक्षापससारभोभवान्कुरून्मधून्वाथसुहृद्दिदृक्षया॥तत्राब्दकोटिप्रतिमःक्षणो
भवेद्रविंविनाक्ष्णोरिवनस्तवाच्युत॥९॥

नाथवंतोबभूमि:।कुतः यद्यस्मात्तवरूपंपश्यामः।कथंभूतं।त्रैविष्टपानांदेवानामपिदूरदर्शनंदुर्दर्शनं प्रेमपूर्वस्मितस्निग्धेसानुरागेईक्षणे
चयस्मिन्तत्तच्चाननंयस्यतत्सौभगंसुंदरं॥८॥भोअंबुजाक्षभवान्सुहृद्दिदृक्षया।यदा।कुरून्मधून्वाजनपदानपससारजगाम।तत्रतदाहेअ
च्युतनोस्माकंत्वामपश्यतांरवेर्विनारविंविनाक्ष्णोःक्षणःकालोऽब्दकोटिप्रतिमः।संवत्सरकोटीकालतुल्योभवेत्॥९॥श्रीमतेरामायनमः ८५

जगतो भयं येभ्यः तेषां भयमावहतीति तथा तं निनदमुपश्रुत्य सर्वाः प्रजा भर्तुर्भगवतो दर्शने लालसाः आसक्तचित्ताः प्रत्युज्जग्मुः ॥३॥ तत्राहृ
ताः आदरयुक्ताः । रवेर्दीपमिवात्मानं जगत्त्वे प्रकाशयतः प्रकाशं तरानपेक्षस्य सूर्यस्य दीपमिव उपनीतः बलिः पूजार्थद्रव्यं याभिस्ताः ॥४
प्रीत्युत्फुल्लाननाः विकसितानि मुखाम्बुजानि यासां तथाभूताः । प्रजा हर्षेण गद्गदया कुंठितया गिरा तं प्रोचुः । रविदृष्टान्ताभिप्रेतं व्यंजयन्नू विशि
नष्टि । निजलाभेन नित्यनिरवधिकस्वानंदानुभवलाभेन पूर्णकाममवाप्तसमस्तकाममात्मारामं स्वानुभवैकनिष्ठं वल्पनपेक्षमिति भावः

तमुपश्रुत्य निनदं जगद्भयभयावहं ॥ प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः ॥३॥ तत्रोपनीतबलयो रवेर्दीपमि
वादृताः ॥ आत्मारामं पूर्णकामं निजलाभेन नित्यदा ॥४॥ प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा । पितरं सर्वसुहृ
दमवितारमिवार्भकाः ॥५॥ प्रजा ऊचुः ॥ नताः स्म ते नाथ तवांघ्रिपंकजं विरिंचिवैरिंच्यसुरेंद्रवंदितं ॥ परायणं क्षेम
मिहेच्छतां परं न यत्र कालः प्रभवेत्परः प्रभुः ॥६॥

केकमिवोचुः । सर्वेषु पुत्रेषु सुहृदं सौहार्दयुक्तं पितरं रक्षयितारमर्भकाः शिशवः पुत्रा इव ॥५॥ उक्तमेवाह । नताइति चतुर्भिः हे नाथ तवांघ्रिपंकजं ।
प्रति नताः स्म । कथंभूतं विरिंचिना ब्रह्मणा । वैरिंच्यैः सनकादिभिः सुरेंद्रादिभिश्च वंदितं नमस्कृतं इह हे हे मंतिः श्रेयमिच्छतां परमुत्कृष्टं परायणं क्षे
मसाधनभूतं । परमिति क्षेमविशेषणं वा यत्र पदारविंदे परेषां ब्रह्मादीनामपि प्रभुस्तानपि वशी कुर्वन्नु कालोपि न प्रभवेन्न समर्थो भवेत् । य
द्वा यद्यपि विषयेषु परः प्रभुः कालोपि न प्रभवेत् तस्य तव पदांबुजमिति वान्वयः । सर्वस्य वशी । सर्वस्येशानः । न तस्येशे कश्चनेत्यादिश्रुत्यर्थोत्रा

भा०प्र०
८५४

३४ । तत्रैवैतत्तद्देशस्थैस्तत्रतत्रप्रत्युद्यतं शिरस्याधायाभिमुखमानीतमर्हणं पूजासाधनं यस्य तथाभूतः यावदानर्त्तानुपागतस्तावद्विष्टः
सूर्यः गोभिः किरणैरास्तिष्टीति श्रुत्यतेः ॥ पश्चाद्दिशं प्रतिसायं भेजे प्राप्तः । गोभूमिं गतश्च उदकं गतश्च सायमस्तं प्रविशतीति श्रुतेः ॥३६॥ इति
प्रथमे दशमः ॥१०॥ स भगवान् स्वृद्धान् समृद्धान् स्वकानानर्त्तान् जनपदानुपव्रज्य तत्रत्यानां विषादं स्वविश्लेषजं शमयन्निव दरवरं शंखश्रे

मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् । आनर्त्तान् भार्गवोपागाच्छ्रान्तवाहो मनाग्विभुः ३५ तत्र तत्र ह तत्रत्यैर्ह
रिः प्रत्युद्यतार्हणः । सायं भेजे दिशं पश्चाद्गविष्ठो गां गतस्तदा ॥३६॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे दशमो
ध्यायः ॥१०॥ सूत उवाच । आनर्त्तान्स उपव्रज्य स्वृद्धान् जनपदान् स्वकान् ॥ दध्मौ दरवरं तेषां विषादं शमयन्निव ॥१॥ स
उच्चकाशे धवलोदरो दरोप्युरुक्रमस्याधरशोणशोणिमा ॥ दाध्मायमानः करकंजसंपुटे यथाब्जखंडे कलहंस
उत्स्वनः ॥२॥

ष्ठं पांचजन्यं दध्मौ ॥ ध्वनयामास ॥१॥ तदा सोदरो ध्मायमानो दरवरः । स्वतो धवलमुदरं यस्य तथाभूतोपि दामोदरस्य भगवतोधरशोणेन
शोणिमा यस्य सः भगवत्करकमलयोः । संपुटउच्चकाशे नितरां चकार यथाऽब्जखंडेरक्तकमलसमूहे उत्स्वनो उच्चैः स्वनो यस्य स हंस स्तद्वत्
॥२॥ ८५४

एताः सर्वा निरस्तं शौचं पवित्रता येन ॥ अत्रवाप्तं पेशलं मार्दवं येन तथाभूतमपि स्त्री लंपटं केवलं साधयथा तथा कुर्वते कुर्वतीवतस्त्याश्चर्य्यं ॥ त
देवदर्शयितुं विशिषंति ॥ यासां स्त्रीणां गृहात्स्यतिजेन्मभरणा क्लेशा द्दृत्तणकर्त्ता पुष्करलोचनः कमलनयनः श्रीकृष्णः ॥ कदाचिदपिनापैति
नत्यजति ॥ कथंभूतः सन् अत्राहृतिभिः ॥ हेहंकिमिति एहीत्यादिरोकांनैः हृदिस्पृशन् हृदयंगमः सन् सोयं श्रीकृष्णयातीत्यर्थः ॥ ३० ॥ वदंतीनां
जल्पंतीनां पुरयोषितामेवं विधागिरः ॥ उक्तीः सस्मितेन निरीक्षणेने वाभिनंदन्स हरिर्ययौ ॥ ३१ तदाऽजातशत्रुः ॥ परेभ्यः शत्रुभ्यः शंकितः स्नेहा

एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बतसाधुकुर्वते ॥ यासांगृहात्पुष्करलोचनः पतिर्नजात्वपैत्याहृतिभिर्हृदिस्पृ
शन् ॥ ३० ॥ स ॥ त ॥ उ ॥ वा ॥ च ॥ एवंविधागदीनां सगिरः पुरयोषितां ॥ निरीक्षणेनाभिनंदन्सस्मितेनययौ हरिः ॥ ३१ ॥ अजातश
त्रुः पृतनांगोपीथाय मधुद्विषः परेभ्यः शंकितः स्नेहात्प्रायुंक्त चतुरंगिणीम् ॥ ३२ ॥ अथ दूरागतान् शौरिः कौरवान् वि
रहातुरान् ॥ संनिवर्त्य दृढं स्निग्धान् प्रायात्स्वनगरीं प्रियैः ॥ ३३ कुरुजांगलपांचालान् शूरसेनान्सयामुनान् ॥ ब्रह्मावर्तं
कुरुक्षेत्रं मत्स्यान्सारस्वतानथ ॥ ३४ ॥

न्मधुद्विषः श्रीकृष्णगोपीथायरक्षणाय चतुरंगिणीं हस्त्यश्वरथपदातिरूपोंएयं
गान्यस्याः संतीति तथा तां सेनां प्रायुंक्त समयुंक्त ॥ ३२ ॥ अथ विरहेण विश्लेषेणातुरान् दुःखितान्अत एवदूरमागता कौरवान् युधिष्टिरादीन् दृढं
स्निग्धमनुरागो येषां तान सम्यक्स्तान्तेन निवर्त्य प्रियैः सहनगरीं द्वारिकां प्रायात् प्रययौ ॥ ३३ ॥ कुर्वादिमरुधन्वांतान् देशानतिक्रम्य ततः सोवी
राभीरयोः परान् पश्चाद्वस्थितानानर्त्तान् द्वारकासन्नजनपदान् विभुर्हरिः श्रीकृष्णः उपागात् ॥ कथंभूतः हेभार्गव मनागीषत्खिन्नोवाहा

प

भा॰द॰टी॰ ॥ ३९६ ॥

नूनमिति। अस्य कर्तरि षष्ठी। अनेन कृष्णेन गृहीताः। पाणयो यासां ताभिः कर्त्रीभिः। व्रतैरुपवासादिभिः। स्नानैः। पुष्पजलानां हुतैर्होमैरादि
शब्देन दानादिभिश्च। व्रतादीनां समाहारद्वंद्वे नैकत्वं। एभिः साधनैर्नूनमीश्वरः समर्चितः। पूर्वजन्मनीति शेषः। कुत एतदनुमीयते इत्य
तो विशिंषंति। या अस्य गृहीतपाणयः स्त्रियः। हे सखि। अधरामृतं मुहुर्मुहुः पिबंति। अनाराधितेश्वराणामेतद्दुर्लभमिति भावः। कस्या
धरामृतं यस्मिन्नाशयो मनो यासां ता व्रजस्त्रियः संमुमुहुः। तस्य श्रीकृष्णस्याधरामृतमित्यन्वयः॥२५॥ या इति। या इत्यस्यैता इत्युत्त

नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः॥ पिबंति याः सख्यधरामृ
तं मुहुर्व्रजस्त्रियः संमुमुहुर्यदाशयाः॥२६॥ या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्य
प्रमुखान्हि शुष्मिणः॥ प्रद्युम्नसांबांबसुतादयोऽपरा याश्चाहृता भौमवधे सहस्रशः
॥२७॥

रेणान्वयः॥ शुष्मिणो मत्तान् चैद्यप्रमुखान्॥ शिशुपालप्रभृतीन् स्वयंवरे प्रमथ्य प्रमथनपूर्वकं विजित्य वीर्यमेव शुल्कमुपायने
न देयं द्रव्यं तेन याश्चाहृताः॥ प्रद्युम्नसांबप्रसवादयः स्त्रियः। तत्र प्रद्युम्नप्रसवा रुक्मिणी। सांबप्रसवा जांबवती। आदिशब्देन सत्य
भामादिसंग्रहः। तथापरा अन्याश्च याः स्त्रियो भौमवधे नरकासुरवधे सहस्रशः षोडशसहस्रसंख्याकास्ताहृताः॥२७॥ ॥ ८३

यतो भगवानुक्तविधः । श्रीमन्नारायण एव श्रीकृष्णरूपेण यदुकुले ऽवतीर्य्य मधुवने विहृत्य द्वारकामधिवसन् प्रजाः पालयन्नष्टभिर्महि
षीभिरन्याभिश्च विहरतो यदुकुलमधुवनद्वारिकामहिष्यादीनां भाग्यं तच्चैतावदिति वाचा मनसा चावगंतुमशक्यमित्यभिप्रायेण
जल्पंति । अहो इत्यादिभिः षड्भिः मधोर्वनं मलं नितरां पुण्यतमं ॥ कुतः यद्यस्मात्पुंसां सात्वतानामृषभो नायकः । श्रियो लक्ष्म्याः पतिः
एष भगवान् श्रीकृष्णः ॥ स्वजन्मना यदुकुलं चंक्रमणेन पुनः पुनः संचारेण मधुवनं चांचति प्रशस्तं करोतीत्यर्थः ॥ २६ ॥ अहो बतेति

अहो अलं श्लाघ्यतमं यदोः कुलमहो अलं पुण्यतमं मधोर्वनम् ॥ यदेष पुंसामृषभः श्रियः
पतिः स्वजन्मना चंक्रमणेन चांचति ॥ २६ ॥ अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्य
यशस्करी भुवः । पश्यंति नित्यं यदनुग्रहेषितं स्मितावलोकं स्वपतिं स्म यत्प्रजाः ॥ २७ ॥

कुशस्थली द्वारिका स्वर्यशसः कर्मणि षष्ठी । स्वर्लोकयशसस्तिरस्करी भुवो भूमेः पुण्यं यशश्च करोत्यावहतीति तथा ॥ तदेव व्यंजयि
तुं विशिंषयत्प्रजाः । यद्यस्यां कुशस्थल्यां प्रजा यद्यस्मादनुग्रहेणेषितमधिवसितवसंतं स्मितयुक्तो ऽवलोको यस्य तं स्वपतिमात्मना
यकं नित्यं पश्यंति स्म यदनुग्रहार्थं यत्प्रजाविषयकानुग्रहार्थं उषितमिति वान्वयः ॥ २७ ॥ ॥ ॥ ॥ ॥

भा० प्र०
८२

सइति। हे सखि गुह्येषु वेदान्तेषु गुह्ये विविक्तिविशेषणादेवादिभिर्वेदांतगुह्यरूपस्वरूपगुणयाथात्म्योपदेष्टृभिश्चानुगीयमाना सती। विष्णु
कथा यस्य स एक एव सन्नात्मनः स्वस्य लीलया लीलार्थं जगत्सृजत्यवति रक्षत्यत्ति संहरति। तत्र जगति न सज्जते जगदन्तरात्मतया स्थित
स्तज्जन्तदोषैर्न सज्जते च न पश्यत्यपातीति वा स एवायं कृष्णः ॥२४॥ नन्वेवंविधश्चेत्तर्हि किमर्थं यादवान्यतमरूपेणावतिष्ठत इत्याशंकायां दुःकृ
तविनाशाय साधुपरित्राणाय प्रतियुगमवतीर्य्यावतीर्य्याधर्मनैवंरूपेणावतीर्णं इत्यादिरूपेण जल्पन्ति। यदे। यदा तमोधियो नृपाः। तमो

सवा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः। य एक ईशो जगदात्मली
लया सृजत्यवत्यत्ति न तत्र सज्जते ॥२४॥ यदा ह्यधर्मेण तमोधियो नृपा जीवन्ति तत्रै
ष हि सत्वतः किल। धत्ते भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगे युगे ॥२५॥

गुणप्रधाना इति वा पाठः। तत्र तामसा अन्नत एवाधर्मेण जीवन्ति तदैष उक्तविधो भगवान्भवाय दुःकृद्विनाशपूर्वकं साधूनामभ्युदयाय सत्वतः शु
द्धसत्वमयानि रूपाणि युगे युगे दधद्विभ्राणः। भगमैश्वर्य्यं सत्यं वाचिकं ऋतं पुण्यं कर्म दयां यशश्च धत्ते। स्वाभाविकैर्धर्मैरनौपाधिकैरत एव तिष्ठत
एवेत्यर्थः। ऋतमाशः पुण्यं वाचि। एवं पुण्यस्य कर्मणोऽङ्गत्वाञ्जवादितीत्यत्र एवमनृतादात्मानं जुगुप्सेदिति पुण्यप्रतियोगित्वेनानृतशब्दप्रयोगात्

श्री

८२

सएवभूयइति यएकोद्वितीयस्सभूत्वाभूयः निजवीर्यचोदितां वहुस्यामित्यादिस्वसंकल्पप्रेरितांस्वजीवमायांस्वशेषभूतजीवतिरोधायि
कांप्रकृतिंविकृतिंप्रतिसिसृक्षतींस्रष्टुमुन्मुखीमनुससार ॥ अंतरात्मतयाप्रविश्यनामरूपेव्याकरोदित्यर्थः। कथंभूतः। अनात्मरूपात्मनि
नविद्यतेनामरूपेयस्यतस्मिन्नात्मनिजीवेनामरूपेविधित्समानश्चिकीर्षुः। शास्त्रकृद्वेदप्रवर्तकोयः। सएवायंश्रीकृष्णः वर्ततइत्यर्थः

सएवभूयोनिजवीर्यचोदितांस्वजीवमायांप्रकृतिंसिसृक्षतीं॥ अनामरूपात्मनिरू
पनामनीविधित्समानोनुससारशास्त्रकृत् ॥२२॥ सवाअयंयत्पदमत्रसूरयोजितेंद्रि
यानिर्जितमातरिश्वनः॥ पश्यंतिभक्त्युत्कलितामलात्मनानन्वेषसत्वंपरिमार्ष्टुम
र्हति ॥२३॥

२२ सवाइति। निर्जितानींद्रियाणिअंतर्वाह्यानियैर्निर्जितः मातरिश्वाप्राणोयैस्तेसूरयः भक्त्योत्कलितंसंयुक्तमतएवामलंचेतस्तेनय
स्यपदंस्वरूपंपश्यंति। योयंचसत्वमंतःकरणंपरिमार्ष्टुंशोधयितुमर्हति। सएवायंकृष्णः ॥२३॥ ॥ ॥ ॥ ॥

भा० प्र०
८८९

उत्तमश्लोके कृष्णे एव चेतांसि यासां तासां कौरवेंद्रपुरस्त्रीणामन्योन्यं सर्वेषां श्रुतीनां मनोहरः सुखकरः श्रोत्राणि मनांसि च हरति वशीकरोतीति तथा वा
संजल्पः संवादश्चासीत्॥२०॥ संजल्पमेवाह। स वै किलेत्यादिभिर्दशभिः। तावत्प्रलयदशायां कृष्णजगदुपादानत्वेन निमित्तत्वेन च य एक एवावस्थितः यत
एतत्तो बहु स्यां प्रजायेय नाम रूपे व्याकरवाणीति संकल्पपूर्वकं नामरूपव्याकर्ता यश्च तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः। यो ब्रह्मा
णं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इति वेदाविः कर्तृत्वेन तत्प्रवर्तकत्वेन च प्रसिद्धः यश्च मुमुक्षुभिर्ध्येयो दृश्यश्च वेदांतवेद्यस्वरूपस्व
भावः॥ यश्च जगत्सर्गस्थितिलयलीलः॥ स एवायं कृष्ण इति जल्पंति चतुर्भिः॥ अग्निशिखा प्रलयदशायां गुणेभ्यः सत्वादिगुणेभ्यो न्मेषादग्रेः पूर्वं सुप्तश्रा

अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसां॥ कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः॥२०॥ स्त्रिय ऊचुः॥ स वै किलायं
पुरुषो द्वितीयो य एक आसीदविशेष आत्मनि॥ अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्ति
षु॥२१॥

क्तिषु सतीषु कर्मरूपशक्तिषु सुप्तासु फलप्रदानाय प्रवृत्तास्वित्यर्थः॥ आत्मनि स्वस्मिन् जगदात्मनि सूक्ष्मचिदचिद्रूपअंगत्शरीरके। कार्यदशायां
जगदंतरात्मनीति॥ ईश्वरे नियंतरि निमीलितात्मन्॥ आत्मा मतिः। निवृत्तसर्गादिसंकल्पे स्वस्मिन्नविशेषे सति विशेषाः॥ पृथिव्यादिभूतानि म
हदाद्या विशेषांता इति प्रयोगात्॥ तच्च प्रदर्शनार्थं कार्यवर्गरहिते सति नामरूपविभागरहिते सतीति वा एको द्वितीयः॥ एकश्चाविभक्तचिदचि
च्छरीरकत्वेयैकः। उपादानभूतश्च विभक्तनामरूपता त्युपादानता अद्वितीयः निमित्तांतररहितः॥ एक इत्यनेनोपादानत्वोक्त्या निमित्तस्ये
वशीस्थत्वाद् द्वितीय इत्यनेन निमित्तांतरनिषेधः। एवंविधो य आसीत्स एवायं किल श्रीकृष्णः इत्यन्वयः॥२१॥ ॥ ॥ ॥ ॥ ८८२

तदा बांधवाः कुंती प्रभृतयः स्त्रियः । अगाराद्गृहाद्देवकीसुते निर्याति निर्याते सत्यभद्रं न स्यादिति बुध्या स्नेहोत्कंठ्या प्रेमपूर्वकानुध्यानादुत्कल
द्विबाष्पं न्यरुधत् । १४ मृदंगादयः समं युगपन्नेदुर्दध्वनुः ।१५ कुरूणां नार्य्यः कृष्णं द्रष्टुमिच्छवः प्रासादशिखरारूढाः प्रेमादीन्यासां संतीति तथा ।
धुंधुर्मर्दली गोमुखश्चाद्यश्च । प्रेमादिपूर्वकमीक्षणं यासां तास्तादृशीर्वा ॥ कृष्णे कुसुमैर्ववृषुः ॥ प्रियः प्रीतिविषयो गुडाकेशोऽर्जुनः प्रियतमस्य कृष्णस्य
सितातपत्रं श्वेतछत्रं जग्राह । कथंभूतं मुक्तानां दामभिर्विभूषितं रत्नमयो दंडो यस्य तत् ॥१७॥ उद्धवः सात्यकिश्चोभौ परमश्रेष्ठेऽद्भुते च व्यजने जगृ

न्यरुधन्नुत्कलं बाष्पमौत्कंठ्याद्देवकीसुते ॥ निर्यात्यगारान्नोभद्रमिति स्याद्बांधवस्त्रियः ॥१४॥ मृदंगशंखभेर्यश्च वी
णापणवगोमुखाः ॥ धुंधुर्यानकघंटाद्या नेदुर्दुंदुभयस्तथा ॥१५॥ प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया ववृ
षुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः ॥१६॥ सितातपत्रं जग्राह मुक्तादामविभूषितं ॥ रत्नदंडं गुडाकेशः प्रीतः प्रिय
तमस्य ह ॥१७॥ उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते ॥ विकीर्यमाणः कुसुमै रेजे मधुपतिः पथि ॥१८॥ अश्रूयंताशिषः
सत्यास्तत्र तत्र द्विजेरिताः ॥ नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः ॥१९॥

हतुः । पथि कुसुमैर्विकीर्यमाणो मधुपतिर्यदुपतिर्यदुनामैव माधव इतिनामांतरं तच्च नवमे स्फुटीभविष्यति रेजे रराज ॥१८॥ निर्गुणस्य सत्वादिप्राकृ
तगुणरहितस्य गुणात्मनः । ज्ञानादिषाड्गुण्यस्वभावस्य सत्वादयो न संति श्रोतेऽजो वलेश्वर्येत्यादिवचनात् । नानुरूपाः । अवाप्तसमस्तकामत्वात् अ
नुरूपाः । भक्तिस्नेहेरितत्वात् । तत्र तत्र द्विजेरिता अतएव सत्या आशिषः अश्रूयंत ॥१९॥

भा०प्र०
१/०

किमकार्षीत्ततस्तस्य श्रोतुं विवक्षितस्य पूर्वं प्रस्तुतस्य निवृत्तप्रयाणस्य भगवतो वृत्तांतमाह उषित्वेत्यादिना । यावदेकादशाध्यायसमाप्तिः ॥ सुहृदां यु
धिष्ठिरादीनां विशोकाय स्वसुः स्वभगिन्याः सुभद्रायाः प्रियकाम्यया च हास्तिनपुरे कतिपयान्मासानुषित्वाऽवस्थाय ॥७॥ तं युधिष्ठिरमा
मंत्र्य पृष्ट्वा तेनाभ्यनुज्ञातस्तं परिष्वज्याभिवाद्य च । कैश्चिन्न्यूनवयस्कैः परिष्वक्तः । अन्यैरालिंगितोऽभिवादितश्च हरिः । श्रीकृष्णो रथमारुरोह
॥८॥ तदा सुभद्राप्रभृतयः । विमुह्यंत्यो मोहिताः । शार्ङ्गधन्वनः । श्रीकृष्णस्य विरहं विश्लेषं न सेहिरे नासहंत । मत्स्यसुता सत्यवती ॥९॥१०॥ युक्तं

उषित्वा हास्तिनपुरे मासान्कतिपयान्हरिः ॥ सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ॥७॥ आमंत्र्य चाभ्यनुज्ञा
तः परिष्वज्याभिवाद्य तं । आरुरोह रथं कैश्चित्परिष्वक्तोभिवादितः ॥८॥ सुभद्रा द्रौपदी कुंती विराटतनया तथा । गांधारी
धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ॥९॥ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः । न सेहिरे विमुह्यंतो विरहं शार्ङ्गधन्व
नः ॥१०॥ सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः । कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनं ॥११॥ तस्मिन्न्यस्तधियः पार्थाः
सहेरन्विरहं कथं । दर्शनस्पर्शसंलापशयनासनभोजनैः ॥१२॥ सर्वे ते निमिषैरक्षैस्तमनुद्रुतचेतसः । वीक्षंतः स्नेहसं
बद्धा विचेलुस्तत्र तत्र ह ॥१३॥

चैतदित्यभिप्रायेणाह सत्संगादिति द्वाभ्यां । सतां साधूनां संगाद्धेतोर्मुक्तः दुःसंगो दुरात्मसंगो येन स बुधः पुमान् यस्य रोचनं रुचिरं कीर्त्यमानं यश एव सकृदा
कर्ण्य हातुं नोत्सहते ॥११॥ तस्मिन्भगवति कृष्णे दर्शनादिभिर्निहिता धीर्येषां ते पार्थाः तस्य विरहं कथं सहेरन् न सहेरन्नेवेत्यर्थः ॥१२॥ ते पार्थादयः सर्वे स्नेहा
श्च संबंधश्च तयोः समाहारः तस्मात्स्नेहाच्छरीरसंबंधाच्चानुद्रुतमनुसृतं चेतो येषां तथाभूताः संतोऽनिमिषैर्निमिषरहितैरनन्यपरैरक्षैरक्षिभिः अक्षद्भृश

दृगिंद्रियवाच्यमो चित्त्याचक्षुःपरः । तमेवं वीक्षंतः । तत्र तत्र चेलुः
परिबभ्रमुः ॥१३॥

१/०

द्वितीयप्रश्नस्योत्तरमाह। निशम्येति चतुर्भिः॥ भीष्मोक्तमच्युतोक्तं च निशम्य प्रवृत्तेनानुप्रतिष्ठितेन विज्ञानेन देहात्मविवेकादिरूपेण विधूतः विभ्र। मो देहात्मादिभ्रमो यस्य। अनुजैर्भीमादिभिरनुवर्तितो युधिष्ठिरः इंद्र इवाच्युत एवाश्रयो यस्य। अच्युतमाश्रयते सेवते भजत इति वा तथाभूतः परिध्युपांतां दिगंतावधि चतुःसमुद्रांतां पृथिवीं शशास॥३॥ अजातशत्रौ राज्ञि सति तत्कामम् इत्यादि पूर्वश्लोकद्वयेप्यपकर्षणीयं॥ अजातशत्रौ युधिष्ठिरे राज्ञि सति पर्जन्यः कामं यथेष्टं ववर्ष। सर्वान् कामान् दोग्धि पूरयतीति तथा मही अभूत्॥ गावः पयसा क्षीरेण ऊधस्वती हृष्टवत्यः। ते

निशम्य भीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः। शशास गामिंद्र इवाजिताश्रयः परिध्युपांतामनुवर्तितोनुजैः॥३॥ कामं ववर्ष पर्जन्यः सर्वकामदुघा मही। सिषिचुः स्म व्रजान् गावः पयसोधस्वतीर्मुदा॥४॥ नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः। फलंत्योषधयः सर्वाः काममन्वृतु तस्य वै॥५॥ नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः॥ अजातशत्रावभवन् जंतूनां राज्ञि कर्हिचित्॥६॥

स्वव्रजमतुष्ट॥ ऊधस्वसः इत्यर्थः॥ मुदा व्रजान् व्रजस्थान् प्रतिसिषिचुः॥ क्षीरं दुदुहुः॥४॥ तस्य युधिष्ठिरस्य संबंधिन्यः नद्यादयः। स्वधर्मान्नतस्य। ऋतुरिति शेषः॥ वनस्पतिभिः। वीरुद्भिश्च सहिताः। सर्वा ओषधश्च अन्वृतु ऋतौ ऋतौ फलं फलंति। वफलुः।५। अजातशत्रौ राज्ञि सति जंतूनां प्राणिनां कदाचिद् व्याधयो मानसिका व्याधयो देहिकाश्च क्लेशा। तानेवाह। दैवभूतात्महेतवः॥ आधिदैविकाः। आधिभौतिका आध्यात्मिकाः। नाभवन्॥६॥

ततः पित्रा धृतराष्ट्रेणानुज्ञातो वासुदेवेन भगवतानुमोदितश्च विभुर्युधिष्ठिरः पित्रादिक्रमप्राप्तं राज्यं धर्मेण चकार शशास ॥४९॥ इति प्रथमे नव-
मः ॥९॥ धर्मेण राज्यं चकारेत्युक्तं तदेव विस्तरतो वक्तुं शुकानुवादपूर्वकं पृच्छति शौनकः । हत्वेति ॥ स्वरिक्थस्पृधः । स्वदायलिप्सून् स्पृहइ-
ति पाठेऽपि स एवार्थः हकारस्य धकार आर्षः ॥ अत एवाततायिनो दुर्योधनादीन् हत्वा प्रत्यवरुद्धं प्रत्यधिगतं प्रतिप्राप्तं भोजनं राज्यं येन । स धा-
र्मभृतां वरिष्ठो युधिष्ठिरः ॥ गाविष्ठिर इति पाठे गवि वचसि स्थिरो युधिष्ठिरः ॥ अनुजैर्भीमादिभिः सह कथं प्रवृत्तः ॥ राजशासन इति शेषः । ततो

पित्रा चानुमतो राजा वासुदेवानुमोदितः ॥ चकार राज्यं धर्मेण पितृपैतामहं विभुः ॥४९॥ इति श्रीभागवते महापुराणे
प्रथमस्कंधे नवमोऽध्यायः ॥९॥ शौनक उवाच ॥ हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः ॥ स-
हानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकारषीत्ततः ॥१॥ सूत उवाच ॥ वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोह-
यित्वा भवभावनो हरिः ॥ निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह ॥२॥ ॥ ॥ ॥

राजशासनानंतरं किमकार्षीदिति प्रश्नद्वयं । रेफविश्लेषश्चार्षः ॥१॥ तत्र तावत्कथं प्रवृत्त इति प्रश्नस्योत्तरं विवक्षुस्तदुपोद्घाततया भगवतः कृत-
कृत्यत्वमाह ॥ वंशमिति । वंशदवाग्निना वेणुवनसंघर्षणजदवाग्नितुल्येन कुलकलहेन दग्धं विनष्टं कुरोर्वंशं संरोहयित्वा परीक्षिद्रूपेणोत्पा-
दयित्वा भवभावनः भवो जगत्तं भावयति वर्धयति भवभावनः हेतुगर्भमिदं भवभावनत्वात्संरोहयिता हरिरीश्वरः श्रीकृष्णो युधिष्ठिरं निजरा-
ज्ये निवेशयित्वा प्रीतमना बभूव ॥ कृतकृत्यत्वादिति भावः ॥२॥ ८९

इत्थं भगवति कृष्णे परमात्मनि मनोवाग्दृष्टीनां वृत्तिभिर्व्यापारैरात्मानं प्रत्यगात्मानमावेश्य तेन संयुक्तमनुसंधायेत्यर्थः । सम्भीष्मोऽन्तःश्वासोऽं
तर्लीनः प्राणवायुर्यस्य तथाभूत उपारमच्छरीरं विहायार्चिरादिगत्या परमपुरुषं प्राप्त इत्यर्थः ॥ ४३ ॥ तदा भीष्मं निष्कले निर्दोषे ब्रह्मणि संपद्यमा
नं सर्वोपाधिविधूननपूर्वकं ब्रह्म प्राप्नुवंतं प्रत्यभिज्ञाय सर्वे तत्रस्थास्तूष्णीं बभूवुर्यथा दिनात्यये रात्रौ वयांसि पक्षिणस्तद्वत् ॥ ४४ ॥ तत्र तदा देवै
र्मानवैश्च वादिता दुंदुभयो नेदुः दध्वनुः । साधवो भगवतां शशंसुः अहो भीष्मस्य भाग्यं माहात्म्यं चानितरसाधारणमिति तुष्टुवुः । राज्ञां पुष्पवृष्टयः

सूत उवाच ॥ कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः । आत्मन्यात्मानमावेश्य सोऽन्तःश्वास उपारमत् ॥ ४३ ॥ संपद्यमान
माज्ञाय भीष्मं ब्रह्मणि निष्कले ॥ सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ॥ ४४ ॥ तत्र दुंदुभयो नेदुर्देवमानववादिताः
शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ॥ ४५ ॥ तस्य निर्हरणादीनि संपरेतस्य भार्गव । युधिष्ठिरः कारयित्वा
मुहूर्तं दुःखितोऽभवत् ॥ ४६ ॥ तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः ततस्ते कृष्णहृदयाः स्वाश्रमान् प्रययुः पुनः
॥ ४७ ॥ ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयं पितरं सांत्वयामास गांधारीं च तपस्विनीं ॥ ४८ ॥

स्वाङ्कुपरिदेशात्सेतुः पतितवत्यः ॥ ४५ हे भार्गव संपरेतस्य लोकं प्राप्तस्य भीष्मस्य निर्हरणादीनि दाहादिकर्माणि कारयित्वा युधिष्ठिरो मुहूर्तं दुःखि
तो बभूव ॥ ४६ ॥ तथा मुनयो हृष्टाः कृष्णं तस्य कृष्णस्य गुह्यं स्वरूपरूपयाथात्म्यं वेदांतवेद्यं तत्प्रकाशकैर्नामभिस्तुष्टुवुः ॥ ततस्ते मुनयः कृष्णहृ
दयं येषां ते तथाभूताः ॥ पुनराश्रमान् प्रययुः ॥ ४७ ततः कृष्णेन सहितो युधिष्ठिरो हास्तिनपुरं गत्वा पितरं धृतराष्ट्रं तपस्विनीं पतिव्रतां गांधारीं च सां

॥ ८२ ॥

नतथात्वमित्यनेनसूत्रेणांबुदर्पणादिषुयथासूर्यमुखादयोगृह्यंतेनतथापृथिव्यादिषुस्थानेषुपरमात्मागृह्यते।अंबुवादिषुहिसूर्यादयोभ्रांत्यातत्र
स्थाऽवगृह्यंतेनपरमार्थतस्तत्रस्थाऽहेतुयः।पृथिव्यांतिष्ठन्यस्यात्मानितिश्रुतिस्त्वेवमादिनापरमार्थतएवपरमात्मापृथिव्यादिषुस्थितोगृह्यते।
अतः।सूर्यादेरंबुदर्पणादिप्रयुक्तदोषाननुषंगस्तत्रतत्रस्थित्यभावादेवातोनतथात्वंदार्ष्टांतिकस्यनदृष्टांततुल्यत्वंइतिपरिचोद्यवृद्धिह्रासभाक्त्व
मित्यादिसूत्रेणपृथिव्यादिस्थानांतर्भावात्स्थानिनः।परब्रह्मणः।स्वरूपतोगुणतश्चपृथिव्यादिस्थानगतवृद्धिह्रासादिदोषभाक्त्वमात्रंसूर्यादि।
दृष्टांतेननिरस्यते।कथमित्यमवगम्यते॥उभयसामंजस्यादेवंउभयदृष्टांतसामंजस्यादेवमितिनिश्चीयते॥आकाशमेकंहियथाघटादिषुपृथग्
भवत्॥जलाधारेष्विवांशुमानितिदोषवत्त्वनेकत्ववस्थितोवस्थितस्यास्याकाशस्यवस्तुतोनवस्थितस्यांशुमयस्यदृष्टांतस्योपादानंहिपरमात्म
नः॥पृथिव्यादिगतदोषभाक्त्वनिवर्तमात्रेप्रतिपाद्येसमंजसंभवति॥घटकारकादिषुवृद्धिह्रासभांक्षुपृथक्पृथक्त्वंयुज्यमानमप्याकाशंवृद्धि
ह्रासादिदोषैर्नस्पृश्यते॥यथाजलाधारेषुविषमेषुदृश्यमानोप्यंशुमांस्तत्कृतवृद्धिह्रासादिभिर्नस्पृश्यते।तथायंपरमात्मापृथिव्यादिषुना।
नाकारेष्वचेतनेषुचेतनेषुचस्थितः॥तत्कृतवृद्धिह्रासादिदोषैरसंस्पृष्टः॥सर्वत्रवर्तमानोप्येकएवास्पृष्टदोषगंधकल्याणगुण।करवयथा।
जलादिषुवस्तुतोनवस्थितस्याप्यंशुमतोहेत्वभावाज्जलादिदोषाननभिषंगस्तथापृथिव्यादिष्ववस्थितस्यापिपरमात्मनोदोषप्रत्यनीका
कारतयादोषहेत्वभावान्नदोषगंधइतिभावितं॥३२॥

अथ सर्वांतरात्मानमनुसंधाय तदुक्तविधं भगवंतं प्राप्तोस्मीत्याह। तमिमिति। तं उक्तविधमात्मना भगवतास्वेनैव तत्तत्कर्मानुरूपं कल्पितानां देह
भाजां हृदि हृदि प्रतिहृदयं वस्तुत एकमेव प्रतिदृशं नैकधावस्थितमर्कं सूर्यमिव धिष्ठितमधिष्ठितं समधिगतोस्मि कथंभूतः विधूतभेदमोहः
अद्वैत्यात्मकत्वात्तेन वस्तुभेदज्ञानात्मको मोहः एकरूपे आत्मनि देवमनुष्यादिभेदमोहश्च यस्य तथाभूतः। यथा दिविस्थः। सूर्यः एक एव सन्
प्रतिदृशं दृष्टावारिगतेनापि नयनेनाभिमुखं तत्वादौ भासमानः। जलादिगतवृद्धिह्रासादिदोषागोचरः। व्याप्यवस्तुगतदोषसंगरहितोऽर्क
मिव। हृदिहृदिधिष्ठितमिति दृष्टांततात्पर्यं॥ अन्यथाऽकदृष्टांतो न घटते ऽतो यं निर्दोषत्वे दृष्टांतः। वृद्धिह्रासभाक्त्वमंतर्भावाद् उभयसामंजस्या

तमिममहमजं शरीरभाजां हृदि हृदिधिष्टितकल्पितकल्पितानां। प्रतिदृशमिवनैकधार्कमेकं समधिगतोस्मि
विधूतभेदमोहः॥४२॥

देवर्षीणां चैतिहि स्तुतिं। तत्र हि न स्थानतोऽपि परस्योभयलिंगमित्यनेन पृथिव्यादिषु अंतरात्मतयावस्थितस्यापि परमात्मनो निखिलनि
रस्तदोषत्वसमस्तकल्याणगुणाकरत्वरूपोभयलिंगं अवगणत्पृथिव्यादिगतदोषसंस्पर्शाभावमभिधाय अत एव उपमा सूर्याकाशादि
वदेतदित्यनेन यतो नानाविधेषु स्थानेषु स्थितस्यापि परस्य ब्रह्मणो न तत्प्रयुक्तदोषभाक्त्वमपि तत एव जलदर्पणादिप्रतिबिंबितसूर्या
दिवत्परमात्मा तत्र तत्रावस्थितोऽपि निर्दोष इति शास्त्रे रूपा क्रियते। आकाशमेकं हि यथा घटादिषु पृथग्भवेत्तथात्मैको ह्यनेकस्थो ज
लधारेष्विवांशुमान्॥ एक एव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचंद्रवदित्यभिधाय पुनरंबुवदग्रहणात्तु

न केवलं तन्निरीक्ष्य मुक्ते हता एव स्वरूपं गताः। अपि तु तत्कामेन तमनुवर्तमाना अपीत्याशयेनाह। ललितेति। ललितया सुंदरया गत्या विलासेन वल्गुहासेन सुंदरतरहासेन मंदस्मितेन प्रणयनिरीक्षणेन च कल्पितमूर्ध्वाधिकं मानं बहुमानं यासां ता गोपवध्वः उन्मदेनांधाः कामेनांधाः स्वपरविवेकरहिताः॥ कृष्णमात्मानं मन्यमाना इत्यर्थः॥ अत एव भगवत्कृतं भगवतश्चेष्टितं शतनानिरासादिकमितियावत्। अनुकृतवत्यः। अनुकुर्वत्यः सत्यः। एतच्च स्फुटीभविष्यति। यस्य प्रकृतिं स्वभावं साधर्म्यमगमन् किलेति प्रसिद्धिर्द्योत्यते। तस्मिन्भगवति रतिरस्त्विति श

ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः। कृतमनुकृतवत्य उन्मदांधाः प्रकृतिमगन्किल यस्य गोपवध्वः॥४०॥ मुनिगणनृपवर्यसंकुलेंऽतःसदसि युधिष्ठिरराजसूय एषां। अर्हणमुपपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा॥४१॥

षेणान्वयः॥४०॥ युधिष्ठिरराजसूयसभास्थं रूपमनुसंधाय तस्यैव चक्षुर्विषयतां प्रार्थयते। मुनीति। हे युधिष्ठिरराजसूये मुनीनां गणैर्नृपश्रेष्ठैश्च संकुलेंऽतः सदसि सभामध्ये य एषां युधिष्ठिरहृत मुनिगणाद्यभिमतं चार्हणमग्रपूजादिकमुपपेदे प्राप्तः। एष ईक्षणीयो मदंतरात्मा श्रीकृष्णः मम दृशिगोचरो दृष्टिविषयः सन्नाविर्भवतु यावत्तनुत्यागं भवति इति भावः। यद्वा आविरात्मा प्रकाशस्वरूपः। दृशिगोचरोऽस्त्विति संबन्धः॥४१॥ ८७

विधां मया त्वस्यो पर्योधावस्थितरूपमनुसंधानस्तमेव तस्मात्सुपायमध्यवस्यति। स्वनिगममित्यादि श्लोकमेकान्वयं। आततायिनः प्रहरतो मे
मम तावच्छितैर्विशिखैर्बाणैर्हतस्ताडितोऽतएव विशीर्णः शिथिलो दंशः कवचो यस्य सः॥ क्षतजेन रुधिरेण परिप्लुतः। व्याप्तगात्रः सन् स्वनिगममप्यु
पेक्ष्य न शस्त्रं ग्रहीष्यामीति स्वप्रतिज्ञामपहायायुधं ग्राहयामीत्येवं विधां मत्प्रतिज्ञामृतां सत्यां कर्तुं स्वप्रतिज्ञामुपेक्ष्य मत्प्रतिज्ञामेव यथार्थामेव कर्तुमित्यर्थः
रथस्थस्सन् ततोऽवप्लुतः। धृतः रथचरणः सुदर्शनाख्यं चक्रं येन। चलंती गौर्भूमिर्यस्मात् भूमिं चालयन्। गतं गच्छदुत्तरीयं यस्य सः। इभं गजं हन्तुं हरिः सिं
हइव तथा मद्वधार्थं मभिससार। मदभिमुखमागतवान्। स मुकुंदो भगवान् मम गतिः। स्वप्राप्त्युपायो भवतु॥ ३७॥ ३८॥ सारथ्यदशावस्थितं रूपम

स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः॥ धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हंतुमिभं गतोत्तरी
यः॥ ३७॥ शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे॥ प्रसभमभिससार मद्वधार्थं स भव
तु मे भगवान् गतिर्मुकुंदः॥ ३८॥ विजयरथकुटुंब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये॥ भगवति रतिरस्तु मे मु
मूर्षोर्यमिह निरीक्ष्य हता गताः स्वरूपम्॥ ३९॥

नुसंधाय तस्मिन् रतिर्दार्ढ्यं प्रार्थ्यते॥ विजयेति॥ विजयस्यार्जुनस्य रथः कुटुंबः कुटुंबवद्रक्षणीयो यस्य। आत्तं तोत्रं वेत्रं येन धृता हया
नामश्वानां रश्मयः प्रग्रहा येन तस्मिन्॥ तच्छ्रिया तोत्रहयरश्मिग्रहणजशोभया ईक्षणीये ऽतीव द्रष्टुमर्हे च भगवति मुमूर्षोर्मर्तुमुद्यत
स्य मम रतिरस्तु॥ इह युद्धे यं निरीक्ष्य ये हतास्ते च स्वरूपं स्वाभाविकं रूपमपहतपाप्मत्वादिगुणाष्टकविशिष्टं रूपं मुक्तिमिति यावत्। गताः
प्राप्ताः। तस्मिन् भगवतीत्यन्वयः सरूपमिति पाठे समानरूपं साधर्म्यमिति यावत्॥ ३९॥ ॥॥ ॥॥॥ ॥॥॥ ॥॥॥ ॥॥

भा०प्र० ८६

युद्धदशावस्थितमनुसंधाय प्रार्थयते युधीति । कृष्णे भगवति ममात्मा मनः अस्तु दृढं भवतु । तिष्ठतु । कथं भूते युधि युद्धे तुरगरजोभिरश्वशफोत्थित
रजोभिर्विधूम्रैर्विधूसरैः । विष्वग्विलंबमानैः कचैरलकैः सुललितैः अवद्भिः श्रमवारिभिः श्रमस्वेदबिंदुभिश्चालंकृतमास्यं यस्य निशितैः शरैः
र्विभिद्यमानात्वग्यस्यात एव विलसत्‌ स्वतेजेन विलसत्कवचो यस्मिं स्तत्‌ ॥ ३४ ॥ युद्धप्रारंभदशावस्थं रूपमनुसंधाय प्रार्थयते । सपदि युद्धप्रारंभसम
ये सख्युरर्जुनस्य वचः सेनयोरुभयोर्मध्ये रथं स्थापय मे ऽच्युतेति । यावदेतान्निरीक्षेहं योद्धुकामान । वस्थितान्‌ इत्यादि रूपं वचो निशम्य निजपरयोः

युधितुरगरजो विधूम्रविष्वक्कचविलुलितश्रमवार्यलंकृतास्ये । ममनिशितशरैर्विभिद्यमानत्वचिविलसत्कवचेस्तुकृष्णआत्मा ॥ ३
४ ॥ सपदिसखिवचो निशम्यमध्ये निजपरयोर्बलयोरथंनिवेश्य । स्थितवतिपरसैनिकायुरक्ष्णा हृतवतिपार्थस
खेरतिर्ममास्तु ॥ ३५ ॥ व्यवहितपृतनामुखंनिरीक्ष्यस्वजनवधाद्विमुखस्यदोषबुद्ध्या । कुमतिमहरदात्मविद्य
यायश्चरणरतिः परमस्यतस्यमेस्तुः ॥ ३६ ॥

पांडवकौरवयोर्बलयोर्मध्ये रथं निवेश्य स्थापयित्वा स्थितवति । अक्ष्णा वदृष्टिमात्रेणैव परसैनिकानां दुर्योधनादीनामायुर्हृतवति । पार्थस्यार्जुन
स्य सखा तस्मिन्मम रतिरस्तु ॥ ३५ ॥ गीतोपदेशवदुपदेशावस्थं रूपमनुसंधाय प्रार्थयते ॥ व्यवहितेति ॥ व्यवहितायाना तिदूरस्थायाः पृतनायाः श
त्रुसेनायाः मुखं पुरोभागमवलोक्य दोषवशात्स्वजनवधाद्विमुखस्यार्जुनस्येति विशेष्यमध्याहर्तव्यं ॥ कुमतिं दृष्ट्वेत्यादिना तेनैवाविःकृतां बंधु
हत्यापापमाशंकमानां कुमतिमात्मविद्यया गीतोपदेशेनोपहृतवान्‌ ॥ तस्य परमस्य । परा मा यस्मात्स परमः । सर्वाभ्यधिकस्य भगवतश्चरणे

८६

स्तुतिमेवाह । स्तीत्यादिभिरेकादशभिः ॥ तावत्परमव्योमस्थं वेदान्तवेद्यं दिव्यात्मस्वरूपं प्रकृतावताररूपं तत्प्रयोजनं चानुसंधाय तस्मिन्स्वमति
दार्ढ्यं प्रार्थयते इति वक्ष्यमाणप्रकारेण मम मतिर्भगवति वितृष्णाऽनलं तु द्विरहिता मत्या उपकल्पिता प्रतिष्ठिता भवतु । यद्वा इति हेतौ मतिर्वितृष्णा इ
ति यस्मात्तस्माद्भगवत्युपकल्पिता भवत्वित्यर्थः ॥ कथंभूतो सात्वतानां यादवानां पुंगवे श्रेष्ठे भागवतानां नायके वा ॥ विभूम्नि विलक्षणे भूम्नि वा ना
दिभ्यः प्राणाशद्वाच्या ज्ञी वाच्चे विलक्षणेऽपरिच्छिन्ने भूमन्नुशब्दवाच्य इत्यर्थः । भूमा त्वेव विजिज्ञासितव्यः । यो वै भूमा तत्सुखं । नाल्पे सुखमस्ती

भीष्म उवाच ॥ इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि स्वसुखमुपगते क्वचिद्विहर्तुं प्र
कृतिमुपेयुषि यद्भवप्रवाहः ॥ ३२ ॥ त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने ॥ वपुरलककु
लावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ॥ ३३ ॥

ति हि श्रूयते । तदाह । स्वसुखमुपगत इति ॥ स्वं स्वाभाविकं सुखं उपगतवत्यपरिच्छिन्नस्वाभाविकानंदशालिनीत्यर्थः । क्वचिद्देशे विहर्तुं प्रकृतिं विग्र
हमुपेयुषि यद्भवप्रवाहः संसारप्रवाहो भवति । यत्संकल्पमूलहेत्वज्ञानां संसारप्रवृत्तिस्तस्मिन्नित्यर्थः ॥ ३२ ॥ प्रकृतं तद्रूपमनुभूय मतिदार्ढ्यं प्रार्थय
ते त्रिभुवनकमनं । त्रिभुवनकमनीयं त्रिभुवनसुंदरमिति यावत् ॥ तद्वपुर्दधाने विजयसखेऽर्जुनसखे श्रीकृष्णेऽनवद्या निर्दुष्टाऽनन्यप्रयोजने ति
यावत् । मम रतिरनुरागोऽस्तु । कथंभूतं वपुस्तमालस्येव वर्णो नीलो यस्य । रवेः करः किरणसमुदाय इव गौरं वरं चांबरं यस्मिन् ॥ अलककुलैः । कुंतल
जालैरावृतमाननाब्जं यस्य तथाभूतम् ॥ ३३ ॥

करोतीति मत्तैरैरविज्ञातचेष्टतपश्चरति कथंभूतं उपचिताश्चदृढा धर्मो ययो येन तदुपचितधर्मज्ञानवैराग्यैश्वर्य्ययोगोपरमं आत्मोपलंभनमात्मा उपलभ्यते
नेनेति वा क्रियते येनता दात्मोपलंभनं नमात्मा उपलभ्यते मा ना क्रियते येनता दात्मोपलंभनं ततः कर्मधारयतत्र धर्मः कर्मयोगज्ञानमात्मयाथात्म्यज्ञानं वैरा
ग्यं मनोनिग्रहः ऐश्वर्य्यमणिमादीनि योगः प्राणजयतउपरमो वाह्येंद्रियजयः किमर्थमेवमनीश्वरवत्तपश्चरतीत्यत्राह ९ ॥ आत्मवतामनुग्रहायात्म
वतां अनुग्रहीतुमुपशमशीलवरणं वैविधं तपकुर्वन्नित्येवं शीलतया तानतुग्रहीतुमतियावत् आत्मवतस्त्वनुग्रहे तस्य हरूपेव कारणमित्याशयेनाह अनुकंपये
ति तस्मीन्नारायणो भगवान्प्रादुरपश्यत्नारदः वर्णाश्रमवतीर्भिर्वर्णाश्रमधर्मानुवर्तिनिभिः भारतीतिभिर्नरनरवर्षवासिनीभिः प्रजाभिः सह सांख्य
मात्मयाथात्म्यज्ञानयोगः योगो ऽगवर्णाश्रमोचितं पंचमहायज्ञादिरूपः कर्मयोगो ताभ्यां भगवत्प्रोक्ताभ्यां भगवता गीताचार्येण प्रोक्ताभ्यां अप्रोच्यान

तं भगवान्नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां सांख्ययोगाभ्यां भगवदनुभावोपवर्णनं सावर्णेरु
पदेक्ष्यमाणः परमभक्तिभावेनोपसरति इदं चाभिगृणाति ॥१०॥ ॐ नमो भगवते उपशमशीलायोपरतानात्म्याय नमोऽकिं
चनवित्ताय ऋषिऋषभाय नरनारायणाय परमहंसपरमगुरवे आत्मारामाधिपतये नमो नम इति ॥११॥ ब्धसीतासमिचरित्वमित्यारभ्य

राधाने निहिता सांख्ये बुद्धिर्योगे त्विमां शृणु इत्यारभ्य चोक्ताभ्यां गीताभ्यां चेदवचनादित्वादेवभुक्तं परमभक्तिभावेन परमभक्तिरूपेण भावेनाभिप्रायेणउपस
रतिअनुवर्तते कर्मयोगज्ञानयोगाभ्यामनुगृहीतनिरतिशयभक्तियोगेनानुवर्ततेत्यर्थः कथंभूतः भावतो भवः उपवर्णयते येन चरित्रेण तद्भगवदनुभवोपवर्ण
नं तस्याचरात्र्यां सावर्णेर्मनोरुपदेक्ष्यमाणः इदमुदाहरति ॥१०॥ मंत्रमाह ॥ ॐ भगवच्छब्दार्थो पूर्ववत् परमं निरतिशयं शीलं स्वभावो यस्य तस्मै शोपशील्याय वि
शिष्टायेत्यर्थः ॥ महतामंवः सद्भनीरं द्वेषेण शंसे सर्वभावत्वं सोपशीलम्य अयमायय यणमो कर्यापादको गुणाः ॥ इदं वा तत्स्य सो लभ्यस्वामित्वानामप्यात्म
वणमोकार्याया दकानागुपलक्षणं ॥ उपरतानात्म्यायानात्मा देहेंद्रियादि तस्य भावः प्रकारः धर्मः अशनादि षड्र्मिवर्गः उपरतं निरस्तमनात्म्यं यस्मा
य नमः तस्मै अकिंचनवित्तायनास्ति किंचनाप्राप्यं येषां ते अकिंचनाः निष्कामाः भक्तास्तेषां वित्ताय निधये नरनारायणरूपेणावतीर्णाय परमहंसाय प

रतत्कर्षोमान भवति हंसो जीवो यस्मात् पृषोदरादित्वात् तमाश्रयभूतस्वः ॥ यद्वा ॥ हंति निरस्यति निखिलानर्थान् दोषानिति हंसः पृषोदरादित्वात् साधुः भवेच्
गोवासालं भस्मतु प्रामसनिकोस्मरणात् परमश्चासौ हंसश्च इति कर्मधारयः परमः निरतिशयकल्याणगुणगणः हंसो निरस्तनिखिलदोषः तस्मै परमगुरवे नि
रतिशयहितोपदेष्ट्रे स्वात्मारामाय नित्यायासंकुचितापरिच्छिन्नानंदरूपस्वात्मानुभवपरायाधिपतये नृतानामधिपतये एष भूताधिपतिरित्यस्य वचनात् ॥
नमस्कारास्यास्य गुणभेदाभिव्यापक ॥ ११ ॥ इदं वक्ष्यमाणं श्लोकचतुष्टयं स्तुतिरूपं गायति प्रवर्त्तीत्यर्थः ॥ यद्वा ॥ इदं वक्ष्यमाणं गुणजातं गायति निजा वस्त्नाग
त्कारणं चिदचिद्विलक्षणं निरस्तनिखिलदोषं निःसमाभ्यधिकं सर्वज्ञं नमस्करोति कर्त्तेति ॥ अस्य कृत्स्नस्य चिदचिदात्मकस्य जगतः सृष्ट्यादौ कर्त्तापि
यो न बध्यते नाभिमन्यते ॥ चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययं इति भगवदुक्तेः ॥ यद्वा कृत्स्नजगत्स्रष्टारमात्म ।
नं तद्गुणकर्मस्त देवमनुष्यादिपादपतारतम्येन कर्त्तारं न मन्यते ॥ सृज्यानां देवादिपदार्थानां देवत्वमनुष्यत्वादिनानाविसर्गकर्मणोऽपि सृज्यगणकीनामेव

गायति चैवं कर्त्तास्य सर्गादिषु यो न बध्यते न हन्यते देहगतोऽपि दैहिकैः ॥ द्रष्टुर्न दृग्यस्य गुणैर्विदूष्यते तस्मै नमोऽसक्तविविक्त
साक्षिणे ॥ १२ ॥

गुणकर्मणां प्रधानकारणत्वादात्मानं गुणकर्मानुगुणकर्त्ता रं मन्यते न तु साक्षाद्देवविचित्र्यप्रतिहेतुं मन्यत इत्यर्थः ॥ न यो देहंगतोऽपि स्वं
तरात्मा तया देवादिदेहस्थोऽपि दैहिकैर्द्वंद्वसंबंधप्रयुक्तैः सुखदुःखादिभिर्योन हन्यते नाभिभूयते ॥ एवं द्रष्टुर्जीवस्य यद्दृश्यमचेतनं प्रधानं तस्य गुणैः
सत्त्वादिभिर्योन दृश्यते न संकुचितज्ञानो भवति कर्तृत्वेऽपि मोहाभावात् ॥ देहस्थत्वेऽपि दुःखाभावात् त्रिगुणात्मकप्रधानशरीरकत्वेऽपि गुणकृतज्ञान
संकोचाभावाच्च ज्ञानेऽखिलदृश्यप्रभुकं द्रष्टृ जीवस्य गुणैः संसारित्वादिभिर्दूष्यते यस्य गुणो जीवादिभिर्न दूष्यत इति वा यो जनाः एवं चिदचिद्विलक्षणप्रभु
के ॥ अतएवासक्तो रागादिरहितो विविक्तो मदीयत्वतुल्याधिकद्वितीयवस्तुरहितः साक्षी सर्वस्य चेतनाचेतनात्मकस्य जगतः द्रष्टा चेत्यसक्तविवि
क्तसाक्षी तस्मै ते नमः ॥ कर्त्तास्य सर्गादिषु यो न बध्यते इत्यपि पाठः ॥ तत्रास्य जगतः सर्गादौ सृष्टिस्थितिलयेषु कर्त्तापि न बध्यते संसारी भवति परमात्माय ।
त्कर्त्ता स्वकर्मायत्तमोक्षसंगात्वानां जगत्सर्गादौ निरपेक्षकर्त्तापि न बध्यते जगद्व्यापारस्य लीलारूपत्वे सुखदुःखादिफलभोगार्थत्वाभावात् तत्रासक्तत्वम ।

वादिति भावः ॥ तथा देहगतोपि दैहिकैः देहसंबंधप्रयुक्तैः सुखदुःखादिभिर्न दह्यते नाभिद्रवतो न भवति कुतः विविक्तत्वान्निरस्तनिखिलदोषतया समस्तक
ल्याणगुणाकरतया च जीववत् पर्यंतेभ्यो देहेंद्रियादिभ्यो विलक्षणत्वाद्विलक्षणस्वस्वरूपावलोकनप्रीतत्वादिति भावः ॥ तथा च शारीरकं सूत्रं नस्था
नतोपि परस्योभयलिंगं सर्वत्र हीति ॥ सर्वत्रावस्थानतोपि न परस्य ब्रह्मणोपुरुषार्थगंधः संभवति कुतः सर्वत्र श्रुतिस्मृतिषु परं ब्रह्मोभयलिंगं उभ
यलक्षणं निरस्तनिखिलदोषमनंतकल्याणगुणाकरमधीयत इति तदर्थः ॥ अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोपिपासः सत्यकामः सत्यसंक
ल्पः इत्यादयः श्रुतयः समस्तकल्याणगुणात्मकोसौ स्वशक्तिलेशाद्धृतभूतसर्गः परः पराणां सकला न यत्र क्लेशादयः संति परावरेशे इत्यादयः स्मृतयः
अयं भावः जीवस्य कर्मवश्यत्वात् न तु कर्मानुगुणेन तत्तद्दुःखसंबंधः पुरुषार्थविरोधी जीवस्य परस्य तु ब्रह्मणः स्वाधीनसर्वसंबंधस्तत्तद्विचित्रनियमनरूप
लीलारसायैव स्यादिति दिक् ॥ तथा च श्रुतिः ॥ तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योभिचाकशीतीति तथा द्वयोः स्वस्वकर्मानुगुणज्ञानानाश्रयस्य
नतेनाहि पुरुजास्तेषां सत्यानां सतामप्यनंतमपि धानमिति स्वकरीत्या कर्मणातिरोहितज्ञानस्य जीवस्य यदपं कर्मीय तत्दर्शनविषयं यत्त्वधानेन
स्य गुणैः रजआदिभिर्न दह्यते न तु गुणपरवशो न भवति कुतः साक्षित्वात्साक्षाद्दृष्टृत्वात् साक्षाद्द्रष्टरि संज्ञायां इति साक्षिशब्दो व्युत्पादितः ॥ साक्षिशब्दो वय
वहारादन्यथा रुद्याच भगवत्येव मुख्यवृत्तः अव्ययः पुरुषः साक्षीति ॥ भगवन्नामसहस्रपाठात् ॥ अतः संज्ञायामित्यस्य न विरोधः ॥ द्रष्टुरिति द
र्शनार्थेयं यथा द्रष्टा दृश्यगुणैर्न दह्यते तथा साक्षी परमात्मा न दह्यत इति अयं भावः ॥ जीवस्य स्वकर्मानुगुणमेव द्रष्टृदर्शनं न तु साक्षात्साकल्येनेति गु
णोद्भवगुणं परमात्मनस्तु निरुपाधिकं साक्षात् द्रष्टृतया यात्म्यदर्शनमिति न गुणपरवशता किं तु गुणानामेव परमात्मवश्यतेति एवं भूताय असक्तस्सा
क्षिणे नमस्ते इत्यर्थः ॥ १२ ॥ एवं जीवपरयोर्वैयात्म्यदत्वात् तत्त्वात्यंतिकत्वे उक्ते इदानीं जीवस्य हेयनिरसनोपायो देवाद्यनासक्त्या परमात्मनः तव भक्तिरेव
सेव्यया च तु सुखेनमहं मे मिहितेत्याह ॥ इदं हीति ॥ हे योगेश्वर हिरण्यगर्भाद्योगे यस्त्रिपुणं कोशलं जगदत तदिदमेव किं तदित्यत्राह ॥ कुतः दुः
कलेवरः उपचितशरीरः कलेवरमाहुः तदनुबंधिनामप्युपलक्षकः उपचिततदेहानुबंधी उपमानभावास्त्वमति अंतकाले अंतकालपर्यंतं भक्त्या ध्या
नयोगेन त्वयि मनो धारयेत् स्थिरं कुर्यादिति यत् ॥ १३ ॥ एवं देहाद्युपेत्य यापरमात्मभक्तिरेव जीवस्यानर्थपरिहारिणीत्युक्तं ॥ इदानीमुक्तविधभक्ति

भा. पं. यदितस्य केवलशास्त्राध्ययनादिप्रयासो निष्फलः इत्याह यदेति ॥ ऐहिकेष्वपत्यपुत्रान्नादिष्वामुष्मिकेषु स्वर्गादिषु कामेषु लंपटः आसक्तः सुतादिषु विषयेषु
८१ चिंतयन् तेषामनपायोये यं चिंतयन्नित्यर्थः ॥ विद्वानधीतशास्त्रोपि कुत्सितस्य कलेवरस्यात्ययान्मृत्योः नूं केन विभीवयात् ॥ तस्य यो यत्नः शास्त्राध्ययनादि
रूपः स केवलं श्रम एव निष्फलः श्रमणाभीतस्य शास्त्रश्रमो निष्फल इत्यर्थः ॥ १२ ॥ यतो विदुषोपीयमेव दशा ततस्मात्त्वं नो हे अधोक्षज त्वमेव नो योगवि
धेहि संपादय तत्प्रसादादेव नो योगसिद्धिरिति भावः ॥ ईदृशं योगं त्वयि स्वभावं निरुपाधिकं कामाद्युपहतमिति यावत् येन योगेन वयं त्वन्मायया नः कृत
मिदं हि योगेश्वरयोगनैपुणं हिरण्यगर्भो भगवान् जगाद यत् ॥ यदंतकाले त्वयि निर्गुणे मनो भक्त्या दधीतोज्झितदुःकलेवरः
१३ ॥ यथैहिकामुष्मिककामलंपटः सुतेषु दारेषु धनेषु चिंतयन् ॥ शंकेत विद्वान् कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव
केवलं ॥ १४ ॥ तन्नः प्रभो त्वं कुकलेवरार्पितां त्वन्माययाहं ममतामधोक्षज ॥ भिंद्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः
स्वभावमिति ॥ १५ ॥ भारतेप्यस्मिन्वर्षे सरिच्छैलाः संति बहवः मलयो मंगलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः स
ह्यो देवगिरिः ऋष्यमूकः श्रीशैलो वेंकटो महेंद्रो वारिधारो विंध्यः शुक्तिमान् ऋक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो
रैवतकः ककुभो नीलो गोकामुख इंद्रकीलः कामगिरिरिति चान्ये च शतशः सहस्रशः शैलाः तेषां नितंबप्रभवा नदा नद्य
श्चासंख्याताः ॥ १६ ॥ मिते कलेवरेर्पितामाहितां सुदुर्भिदां उपायांतरैः सर्वदा त्यक्तुमशक्यामहं ममतामहंकारः ममकाररूपामविद्यामाशु
भिंद्याम यच्छेदः तत्प्रसादाद्यत्र त्वद्भक्तियोग एव नान्यन्निवर्तकः इति भावः ॥ १५ ॥ एवं भारते उपास्यभगवद्रूपादिकमुक्तं ॥ अथास्मिन्नेव वर्षे प्राधान्येन उप
लक्षणमात्रत्वेन नदीश्चाह ॥ तत्र प्रथमं पर्वतान्संख्यादेशाह भारतेप्यस्मिन्नेवर्षांतरेष्वप्युक्ताः पर्वता नद्यश्च संति तासु चिंतं सरिच्छैलाश्च सरिच्छैलाः
बहवः संति तान् शैलानुद्दिशति मलयइत्यादिना कामगिरिरित्यंतेन अन्ये च बहवः संतीत्याह ॥ अन्ये च शतशः सहस्रशः शैलाः संतीत्यत्र प्रसंगात् न
दीर्वक्तुमारभते तेषामुत्पत्तिस्थानं प्रभावं चाह ॥ तेषामिति तेषां शैलानां नितंबेभ्यः तटेभ्यः प्रभवाः संभूताः नदाः प्रायेण पश्चिमाभिमुख्याः नद्योऽभिमुख्यास्त्वसं

रामः
८१

गतास्तां नद्दीनां आपोजलानि भारतस्यः भरतवर्षस्याः प्रजाः कर्मपूर्वसवर्णाद्दीर्घीभाव आर्षः नामभिरेव पुनंतिनामभिरेवप वित्रयंतिहि॥ गंगागंगेतिचा ब्रू
यद्योजनानां शतैरपि मुच्यते सर्वपापेभ्यो विष्णुलोकं सगच्छत्याद्यभियुक्तस्मरणमत्रानुसंधेयं यद्वा आपनामभिरेव पुनंति प्रजास्ता आपः प्रजा आत्मनादेहेनापिस्प
र्शनीयत्वाभारतस्यः प्रजा वर्षस्य पुण्यादयः नामभिरेव प्रजाः पुनंतिनामतः॥ आपः प्रजा आत्मनादेहेनापिस्पर्शंतीत्यन्वयः॥ नदीरुद्दिशति चंद्रमसेत्यादिना
विभक्तेत्यत्तेन सिंधुः शोणश्च नदावित्याह सिंधुः शोणश्च नदावितिकावेर्याः एषाक्त्वात्कृतहृदे इतिनदीत्वं तरघरश्गोवलीवर्दन्यायात् गंगानुप्रवृद्धि प्रपंचितैतस्य
तासां नाम्नां पो भारत्यः प्रजा नामभिरेव पुनंती नामात्मना चोपस्पृशंति चंद्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावे
री वेणी पयस्विनी शर्करावर्ता तुंगभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती
सिंधुरंधः शोणश्च नदौ महानदी वेदस्मृतिः॥ ऋषिकुल्या त्रिसामा कौशिकी मंदाकिनी यमुना सरस्वती दृषद्वती गोमती
सरयूरोधवती सप्तवती सुषोमा शतद्रुश्चंद्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः॥ १८॥ अस्मिन्नेव वर्षे पुरु
षैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्ये
व सर्वेषां विधीयंते यथावर्णविधानमपवर्गश्चापि भवति॥ योसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमा
त्मनि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रंथिरंधनद्वारेण यदा हि महापुरुषपुरुषप्रसं
यत्रानुकेभिर्वोध्यं॥ १९॥ अस्य भारतवर्षस्य प्राशस्त्यप्रतिपादनपरानभियुक्तैर्गीतान् श्लोकान् वक्तुं तत्र सप्राशस्त्ये कारणमाह॥ अस्मिन्नेवेत्यादिना प्रसंग॥ ग:१८
इत्यंतेनाद्येन अस्मिन्नेव वर्षे भारते लब्धं जन्मविप्रादिजन्म यैस्तैः पुरुषैः शुक्ललोहितकृष्णवर्णेन सत्वरजस्तमोगुणकल्पितकुशलाकुशलमिश्ररूपेण स्व
रब्धेन स्वकृतेन कर्मणा बह्व्यः दिव्यादिगतयः तत्र शुक्लकर्मणा दिव्यगतिः रजःकर्मणा मनुष्यलोकगतिः तामसकर्मणा नारकगतिः तथाच भगवता
गीतं ऊर्ध्वं गच्छंति सत्वस्था मध्ये तिष्ठंति राजसाः जघन्यगुणवृत्तिस्था अधोगच्छंति तामसाः इतिश्च आपि तत्रीये उक्तं आत्यंतिकेन सत्वेन दिवं देवाः प्रप

भा॰ पु॰ दिरेश्वरांशः स्वभावेनेत्यादिना एवं दिव्यादिगतयश्चात्मन स्वस्य विधीयंते संपाद्यंते ॥ इयस्मात्सर्वा एव गतयः आनुपूर्व्येण कर्मानुसारेण सर्वेषां भ
८२ वंति सर्वेषामविशेषेण त्रैगुणरूपत्वमस्त्वाद्गुणा मांका सोत्कासादिभिः कृतानि कर्माणि दिव्यादिगतीः सर्वाः सर्वेषामापादयंतीत्यर्थः ॥ एवमस्मिन्नेव
वर्षे यथावर्णविधानं यस्य ब्रह्मणस्तत्क्रियादेः यद्विधानं शमो दमस्तपः शौचं क्षांतिरार्जवमेव च ॥ ज्ञानविज्ञानमास्तिक्यं ब्रह्मस्वभावजं शौर्यं तेजो धृति
र्दाक्ष्यं युद्धे चाप्यपलायनं दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजमित्यादि ॥ विधानं एवं नलशुश्रूषापंच महायज्ञादिरूपविधानं च तदनतिक्रमेण य
थावर्णविधानेऽस्मनाभिसंहितफलस्य स्ववर्णाश्रमोचितकर्मानुष्ठानानुगृहीतभक्तियोगेनेत्यर्थः ॥ अपवर्गो मोक्षश्च भवति एतच्चात्र वर्षे मोक्षसा
धनत्वेन वक्ष्यमाणानुष्ठानसंभवाभिप्रायेणोक्तं ॥ न त्वन्यत्रापवर्गसाधनधर्मानुष्ठानासंभवाभिप्रायेण तदुपर्यपि बादरायणः संभवादित्युपरितनस्लो
केष्वपि ब्रह्मविद्याधिकारस्य भगवता बादरायणेनैव सूचितत्वात् ॥ सत्रे तदुपर्यपि पातिरस्यकादिवर्षाणामप्युपलक्षणं न तु यथा वर्णविधानं कथं
पवर्गो भवति को वा स्वस्ववर्णाश्रमोचितो धर्मः सत्त्वादपवर्गसाधनं उत कस्यचिदनुग्रहात् कः अनुग्राहकश्चेत्को वा अनुग्राह्यः कथं वानुग्राहकः
अनुग्राह्यश्च कीदृशः अनुग्राह्यविषयश्च कीदृश इत्याशंक्याह ॥ योसाविति ॥ यदा स्वविद्याभगवत्पिरं धनद्वारेण विद्याक्षरणपापात्मकं कर्म भक्तियो
गोऽस्यानि विनिबद्धात्मकर्मेतं वेधनद्वारेण तत्त्विरमनद्वारेण महापुरुषो भगवान् तस्मिन्नत्र संगो भवति तदा यथाविधानमपवर्गश्च भवतीत्यन्वयः
धर्मेणाप्यपवर्गप्रदः ॥ कदायेक्रमेभिः पक्वे ततो ज्ञानं प्रवर्तते इति स्मृतिः स्मृत्युक्तरीत्या स्वस्ववर्णोचितानभिसंहितफलकर्मानुष्ठानेमाविद्याग्रंपि
निरसनं तद्द्वारेण महापुरुषे प्रसंगः प्रकृष्टसंगः ॥ विज्ञातो यथा स्यात्तथान्तरात्मवतो ध्यानरूपो मनोव्यापारो भवति तदापवर्गो भवतीत्यर्थः ॥ अविद्या
प्राक्तोत्र पुण्यपापात्मककर्मपरः तदेव कर्म अविद्यायामस्तु तीत्वा विद्ययामृतमश्नुते इत्याजसोपि मुवक्तन्य ज्ञानज्ञानमपाश्रयः ब्रह्मविद्यामधिष्ठाय
तत्तुमृत्युमविद्यायामिमारि पूरस्तु शब्देनाभिधीयते अविद्ययामृत्युमित्यादावविद्याशब्देनाभिसंहितफलं वर्णाश्रमोचितकर्मोच्यते विद्येत्यरदम
पास्यत्वेनोपायत्वाच्च वर्णाविरोधीति अत्राविद्याशब्दस्याभिनीयोत्र यथावर्णविधनशब्दः तत्र तु मृत्युपाद्स्यानीयोत्राविद्याशब्दः ॥ अविद्याशब्दो हि वि एमः
द्याकर्मेत्यर्थे कर्ममात्रे वर्तमानो यथोचितं क्वचिदभिसंहितफलं वर्णाश्रमोचितं विहितं कर्माभिदधाति क्वचिद्वर्णकर्मेति विवेकः ॥ महापुरु ८२

भक्तांगं विशिनष्टि नानागतिः स्वर्गनरकादिगतिस्तन्निमित्तो न भवतीत्यनागतिनिमित्तस्वर्गादिगतिनिवारकमोक्षसाधनमिति भावः निमित्ताविद्या
नन्ष्याप्तिपावेनानागतिनिमित्तेति हेतुः स्वर्गनरकादिनानागतिनिमित्तभूताया विद्यायास्तद्रूपो योगं प्रापितस्य रंधनद्वारेणेत्यर्थः गं पिशब्देनाविद्याया
स्तमोचनीयत्वमभिप्रेतं न विद्यते न्यदेहिकामुष्मिकरूपं निमित्तं फलं यस्य सः अनन्यनिमित्तः निष्कामः इत्यर्थः स चासौ भक्तिलक्षणो भक्तिरूपश्चेति कर्मधा
रयः एवं यदाहि इत्यस्योत्तरमुक्तं ॥ वर्णाश्रमधर्मस्य भक्तियोगानुग्राहकत्वेन तत्स्वीकारस्योक्तः ॥ अविद्याग्रंथिरंधनद्वारेणेत्यनेन महापुरुषप्रसंग इ
त्यनेनानुग्राह्यत्वोक्तः अनन्यनिमित्तेन भक्तियोगलक्षण इत्यनेनानुग्राह्याकारस्योक्ता महापुरुषपुरुषप्रसंग इति पाठे महापुरुषाणां प्रकृष्टः संगो
यस्य स तथा भक्तियोगलक्षण इत्यर्थः ॥ तथानुग्राह्यविषयं महापुरुष इत्यनेनाभिप्रेतं दर्शयति सर्वभूतात्मनीत्यादिना ॥ यद्यपि सर्वभूतात्मशब्दवासुदेवा
त्मशब्दयोरुक्तः स्यार्थैतावतापि देवताविशेषनिर्देशार्थं यद्विषया वासुदेव इत्युक्तं ॥ वासुदेवशब्दावयवार्थप्रदर्शनाय सर्वात्मनीत्युक्तं इत्यतो न पौनरुक्त्यं
भक्तियोगविषयं विदधिविलक्षणत्वेन विशिष्टं अनात्म्ये इति ॥ आत्मनो भावप्रकारः स्वरूपं कल्पितविशेषशरीरं आत्म्यं ततो न्यस्मिन्सर्वकं जीवने स
हि ॥ अनिरुक्ते देवमनुष्यादिनामरूपाभ्याम निरुक्तो अनात्म्य इत्येवेत नव्याप्तिः अनिरुक्त इति वक्तुं जीवव्याप्तिः ॥ सत्तर्हि किमुक्तं जीवनेत्याह ॥ अ
निलयते आधारान्तरानपेक्षाय अनेन मुक्तजीवव्यावृत्तिः तेषां हि भगवानाधारः ब्रह्मन्नयायकत्यनेन ब्रह्मणोदिप्रतिष्ठाहमित्युक्तत्वात् ॥ अत्र ब्रह्म
प्राद्यो मुक्तजीवपरश्चेद्विद्यात् ॥ सत्तर्हि नित्यसिद्धः नेत्याह परमात्मनीति ॥ अक्षरशब्दवाच्याभ्यां मुक्तनित्यसिद्धाभ्यां उत्तरशब्दवाच्यावत्वेतनाद्व
योप्यवेतनगतिः परमात्मा द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥ इ
त्तस्मिन्नित्यर्थः एवं विधे भगवति षाड्गुण्यपरिपूर्णे निरस्तनिखिलदोषे योसावनन्यनिमित्तभक्तियोगलक्षण इत्यन्वयः ॥ २५ ॥ एवं स्वर्गापवर्गसाध
नत्वेन कृविधधर्मानुष्ठानोपयुक्तप्रदेशत्वात् सर्ववर्षश्रेष्ठस्य अस्यैतस्य प्राशस्त्यप्रतिपादनपरान् श्लोकानवक्तुं येषां अविगीततां दर्शयति रा
न देववाक्यमिति ॥ एतदेव प्राशस्त्यं गायन्ति देवा इति श्लोकः ॥ श्लोकानेवाह अहो इत्यादिना ॥ अमीषां मे भक्तिकर्तुं संबंधविवक्षया षष्ठी ॥ किं शोभनं सुकृ
तमकारि अहो अपिस्वित ॥ किंस्वयं प्रसाधनं विनैव हरिर्भगवान् प्रसन्नः ॥ किन्नु इति प्रायः सुकृतमेव ममभिकृतं किं वा स्वयमेवैषां भगवान् प्रसन्नः

भा.पं.
२३

पर्वरूपस्यवर्षस्यइक्षणत्वाद्विति वितर्कयति कस्मैस्यन्वाइद्ये यैर्गीर्भिः भारताजिरे भरतवर्षांगणे भारतप्रदेशइत्यर्थः ॥ एवं भारताजिरस्य तत्रापि नरजन्मनश्च
श्लाघास्पदत्वमुक्तं तच्चकारणं मुकुंदसेवौपयिकमित्युक्तं ॥ १९ ॥ वर्षांतरस्थानां लोकांतरस्थानां मनुष्याणां भगवत्सेवानुपयुक्तं पदं तान्निंदंति त्रिभिः किमिति ॥ क्र
त्वेवापि कर्तुमशक्यैः क्रतुभिस्तपोरूपैः व्रतैः तपःसहितैर्वा व्रतैः तपः कृच्छ्रचांद्रायणादिरूपं व्रतं ध्यानजपत्यागादिकं दानं पात्रे श्रद्धया त्यागस्तत्कं कृत्वा
दिविजितां साध्येन फल्गुना स्वल्पस्थिरफलेन यद्यज्ञपेन स्वर्गप्राप्त्यावा किं नकिंचित्फलं कृतः यत्र स्वर्गादौ प्राप्ते नारायणस्य पादपंकजस्य स्मृतिर्नास्ति
प्रत्युत निविशयेतादिदियाणां उत्सवात् सुखात् स्मृतिः प्रणष्टा नत्तत्र श्रद्धिकेंद्रियोत्सवरावभगवद्भगवत्सेवाविरोधीति भावः ॥ २० ॥ कल्पायुर्येषां तन भैवज
यात देवा हि देवा गायंति अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः ॥ यैर्जन्म लब्धं नृषु भारताजिरे मुकुंदसेवौ
पयिकं स्पृहा हि नः ॥ १९ ॥ किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना ॥ न यत्र नारायणपादपंकजस्मृतिः प्रमु
ष्टातिशयेंद्रियोत्सवात् ॥ २० ॥ कल्पायुषां स्थानजयात्पुनर्भवात् क्षणायुषां भारतभूजयो वरः क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य सं
यान्त्यभयं पदं हरेः ॥ २१ ॥ न यत्र वैकुंठकथासुधापगा न साधवो भागवतास्तदाश्रयाः ॥ न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोपि न वै स सेव्यतां
स्थयस्य तस्मात्स्थानजयाद् पभिततनलोकप्राप्तेश्च कल्पायुभाक्सुखोपभिलोका पेक्षयेत्यर्थः ॥ क्षणायुषामपि येषां तेषां भारतभूजयभारतवर्षप्राप्तिजिजयेजय २२
उत्कर्षप्राप्तिः ऊर्ध्वस्थानेषु सुखलोकेषु प्राप्यपेक्षया भारतवर्षे जन्मलाभरूपोत्कर्षप्राप्तिरूपो जय वरः श्रेष्ठ इत्यर्थः भारतभूजयस्य श्रेष्ठे हेतुमाह ॥ क्षणस्थिरेण मर्त्येन न
श्वरायी लेनपारीरेण कृतं क्रियाजातं संन्यस्य भगवति समर्प्य मनस्विनः प्रशस्तमनसः भगवदुपासकाः संतः हरेरभयं न विद्यते भयं कालकृतं जन्मजरामरणादि यस्मि
स्तेयाभिमत तत्पदं स्थानं प्राप्य वैकुंठरूपं यांति कल्पायुषस्तु कल्पांतरे पुनर्भवमेव यांतीत्यर्थः ॥ २१ ॥ अतो यत्र वैकुंठस्य भगवतः कथारूपाः सुधापगा अमृतनद्यो
न संति तदाश्रया भगवत्कथामृतनदीसेवापराः साधवः साध्वंतोलसत्तालन्निता ॥ भागवताश्च न संति यत्र च महांतो नित्यपदः मासः संवत्सरायणादुत्सवा येषां तेय
ज्ञेशमखाः यज्ञेशस्य भगवतस्त्रर्हिसर्वेषु यज्ञानां भोक्ता च प्रभुरेव चेति भगवदुक्तेः इष्टा एवं वक्रधाजातं नायमानं विश्वं बिभर्तीति भुवनस्य नाभिरिति ह्यश्रुतेश्च तस्यम

त्वाश्चाराधनरूपा यज्ञाः न संति सुरेशस्य ब्रह्मणो लोकोपि न सेव्यतां प्राप्य
तां मयाति प्राप्यो न भवतीत्यर्थः २२
२३

प्राप्तामिति॥ इहास्मिन्भारते वर्षे ये च जंतवो जीवाः नृजातिं मनुष्यजन्म प्राप्ताः॥ कथंभूताद्व्यक्रियाज्ञानकलापसंभृतां द्रव्यं भूतपंचकं क्रिया कर्मेंद्रियाणि ज्ञानं ज्ञा-
नेंद्रियाणि च एतेषां कलापेन संघातेन च संभृतां पूर्णां भगवद्गुणकीर्तनार्चनपरक्रमणगुणश्रवणविग्रहावलोकनसमर्पितफलस्याघ्राणेनोपयु-
क्तस्य गंगाश्चवासोल्लेकारवदनो हस्तौ पादौ जनादिरूपसर्वविधभगवत्सेवोपयुक्तज्ञानकर्मेंद्रियतदाश्रयभूतसंघातपूर्णामित्यर्थः॥ एवंविधां नृजातिं प्रा-
प्ता अपि यद्यपुनर्भवाय मुक्तये न यतेरन्न यत्नं कुर्युस्ते हि भूयः पुनः वनौकाः वने स्थिता ओकाः शकुंता इव ओकः शकुंतपशू ताविति कोशः उचस-
मवाये इत्यस्माद्धातोः कप्रत्यये गुणः कुत्वं च ओकाः उचकः इत्येते गणनिपात्यते कप्रत्ययश्च घञर्थे किरः क इत्यधिकारे घञर्थे कविधानमिति
वचनेन घञ्यपि घञप्येतद्रूपसिद्धिः स्याद्यावदन्तोदात्तः ओकं इदं निपातनं॥ घजि सतु जित्स्वरेणाद्युदात्तः स्यात्॥ दिवौकसः जलौकस इत्येवमादौ तु अप्रत्यये
प्राप्ता नृजातिं त्विह ये च जंतवो ज्ञानक्रियाद्रव्यकलापसंभृतां॥ न वै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यांति बंधनं
२३॥ यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं विधिमंत्रवस्तुतः॥ एकः पृथङ्नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमा-
शिषां प्रभुः॥२४॥ सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः स्वयं विधत्ते भजतामनिच्छतामिच्छापिधानं निजपादपल्लवं॥२५
अगाद्यावदुक्तमिति वृद्धवचनात् एवं द्रष्टव्यं यथा शकुंता लुब्धकान्मुक्ता अपि पुनर्यदि तत्रैव प्रमत्ताः विहरंति तर्हि पुनर्बध्यंते तद्वत्॥२३॥ अहो भारतवा-
सिनां भाग्यमित्याह यैः भारतवासिभिर्नरैः बर्हिषि यज्ञे श्रद्धया विधिना प्रकारेण मंत्रेण वस्तुतस्तद्रूपसेडायागादिभेदेन च एवं देवतोद्देशेन त्यक्तं तथा भागशः
अग्नये त्वा जुष्टं निर्वपामीत्येवं भागशो निरुप्तं च हविः॥ अग्नींद्रादिरूपेणैक एव स्थितः॥ पृथङ्नामभिरग्नींद्रादिनामभिराहूतः आहुत इति दीर्घाभावश्छांदसः
पूर्णः स्वतो वाप्तसमस्तकामोऽपि विजिघ्रन्सोपि गृह्णीतिया वत तद्धविर्गृह्णातीत्यर्थः पूर्णः किमर्थं गृह्णातीति तत्राह॥ आशिषां प्रभुरिति यत आशिषां फलानां प्र-
भुर्दाता अतो यद्दहमाशिषः प्रदातुं तद्धविराधनं परिगृह्णातीत्यर्थः तदुक्तं भगवता। ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमिति॥२४॥ आशिषां प्रभुरित्य-
नेन धर्मादिचतुर्विधपुरुषार्थेषु भुक्तिर्भगवान् भारते वर्षे आराध्य इत्युक्तं तत्रापि केवलमुमुक्षुत्वमेव विशिष्टमिति अर्थितस्तत्पुरुषार्थे बुभिः प्रार्थितः सन् भ-

गवानर्थितं तेषां वांछितं पुरुषार्थं दिशति ददातीति सत्यं ॥ तत्रापि नैवार्थदः न परमपुरुषार्थदः अचिरात्स्वपुरुषार्थदो न तु नित्यनिरतिशयमोक्षरूपपुरुषार्थदो
भवतीत्यर्थः यद्यस्मादर्थितो न पुरुषार्थोऽतः स्वपनरीक्ष्यं यस्य पिता याचिता एवमितरपुरुषार्थस्यानित्यतया याचकत्वानिवृत्तेः स्वदरिद्रत्वप्रकंच ॥ तथा च वक्तव्यस्यैका
देशो दरिद्रो यत्स्वसंतुष्ट इत्येकादेशो ज्ञेः ॥ अयाचितानिष्ठतामुपेत्य त्वामेव पुरुषार्थानां मोक्षांतमभीष्टं ददात्यत आह ॥ अनिच्छतामकामयमानानां भजतां जनानां
इच्छापिधानमिच्छायाः पिधानमाच्छादकं स्वकीयं पादपल्लवं स्वयमेव विधत्ते समस्तपुरुषार्थरूपं स्वात्मानमेव ददातीत्यर्थः ॥२५॥ एवं भारते मुमुक्षून्स्तुत्या
पि स्वमनीषितमाविष्कुर्वंतस्तमेव भारतं प्रार्थयंति यदीति नः अस्माकं तस्य स्विष्टस्य सम्यग्यजनस्य सूक्तस्य वचनस्य स्वर्गसुखावशेषितं स्वर्गसुखेन
वशेषितं तेषां स्वाभिः कृतेन वा गादिरूपस्वर्गादिसुखं संपाद्य किंचिच्छोभनं सुकृतमुपभुक्तावशिष्टमस्ति चेद्यदा तर्हि तेनास्माचिरतेन शोभनेन कर्मणा नो

यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनं ॥ तेनाजनाभे स्मृतिमज्जन्म नः स्याद्वर्षे हरिर्यद्भजतां शं त
नोति ॥२६॥ श्रीशुक उवाच ॥ जंबूद्वीपस्य राजन्नुपद्वीपानष्टौ हैक उपदिशंति सगरात्मजैरश्वान्वेषण इमां महीं परितो नि
खनद्भिरुपकल्पितान् ॥२७॥ तद्यथा स्वर्णप्रस्थश्चंद्रशुक्ल आवर्तनो रमणको मंदरहरिणः पांचजन्यः सिंहलो लंकेति ॥२८॥
एवं तव भारतोत्तम जंबूद्वीपवर्षविभागो यथोपदेशमुपवर्णित इति ॥२९॥ स्माकं अजनाभे भारते वर्षे भगवद्विषयकस्मृतिम

ज्जन्म नः स्यात्तत्र जन्मन्येव भगवद्विषयकस्मृतिसंभवात् संभावितस्मृतिमात्रजीवजन्मना किं स्यादित्यत्राह ॥ यतः ॥ स्मरति वर्णाश्रमजनता हरिः शं सु
खं मोक्षरूपं सुखं तनोतीति ददातीत्यर्थः ॥२६॥ एवं नवखंडात्मकं जंबूद्वीपं समस्यानं सपर्वतनदीसवर्णाश्रमधर्मं वर्णयन् तज्जंबूपवर्णपीपजंबूद्वीपस्योपद्वी
पानष्टौ आह जंबूद्वीपस्येति ॥ हे राजन् एके अभियुक्ता अष्टौ जंबूद्वीपस्योपद्वीपान् उपदिशंति ते जंबूद्वीपान्नविप्रकृष्टास्तस्य रथचरणनेमिना परिखीकृता इत्याह ॥
सगरात्मजैः यागीयाश्वस्यान्वेषणसमये इमां जंबूद्वीपात्मिकां पृथ्वीं तत्र निखनद्भिरवदारयद्भिरुपकल्पिताः ॥२७॥ तेषामष्टानां प्रतिजानाति तद्यथेति ॥ तानुद्दि
शति स्वर्णप्रस्थ इत्यादिना ॥२८॥ एवं सोपद्वीपं जंबूद्वीपमुपवर्ण्योपसंहरति एवमिति ॥ हे भारतोत्तम जंबूद्वीपस्य ये वर्षा इलावृतादयस्तेषां विभागो यथो

इति श्रीभा॰ पंचमे एकोनविंशः ॥१९॥ एवं जंबूद्वीपः सप्रपंचमुपवर्णितः ॥ अथ प्लक्षादीनां द्वीपानामुपवर्णनं प्रतिजानीते श्रीशुकः अतः अतः परं इति प्लक्षादीनां येवर्षा
तेषां विभागः प्रमाणं परिमाणं लक्षणं तेषु वसतामायुरिंद्रियौजः सहो बलबुद्धिविक्रमादीनां स्वभावतो वर्द्धकत्वरूपं संस्थानमतितरां सधारणाकारः राभिरु
पवर्ण्यते ॥१॥ तावत्प्लक्षद्वीपमुपवर्णयति जंबूद्वीप इत्यादिना ॥ जंबाख्येनेत्यंतं दृष्टांतापेक्षया जंबूद्वीपो यावद्विस्तारः लक्षयोजनविशालता वर्त्तालक्षयोज
नविस्तीर्णेन क्षारोदधिना लवणसमुद्रेण परितो वेष्टितः आवृतः यथा च मेरुर्द्वीपमध्यस्थो जंबाख्येन द्वीपेन परिवेष्टितः इत्यन्वयः ॥ तथा लवणोदधिरपि त
तः लवणोदधेर्द्विगुणविशालेन द्विलक्षयोजनविस्तीर्णेन प्लक्षाख्येन परितः अभितः दिक्षु आवृतो जंबूद्वीपस्यायमत्र ॥२॥ साकल्येन दृष्टत्वात् अप्रसिद्धत्वा

इति श्रीभागवते महापुराणे पंचमस्कंधे एकोनविंशोऽध्यायः ॥१९॥ श्रीशुक उवाच ॥ अतः परं प्लक्षादीनां प्रमाणलक्षण
संस्थानतो वर्षविभाग उपवर्ण्यते ॥१॥ जंबूद्वीपोऽयं यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जंबा
ख्येन लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन प्लक्षो जंबूप्रमाणो द्वीपाख्या
करो हिरण्मय उत्थितो यत्राग्निरुपास्ते ॥ सप्तजिह्वस्तस्याधिपतिः ॥ प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्तवर्षाणि विभज्य सप्त
वर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम ॥२॥ तद्दृष्टांतरमाह ॥ यथा परिखा बाह्योपवनेन परिक्षिप्ते
ति क्षिप्तः परिणामेनानुषंगः ॥२॥ द्वीपमध्यस्थः प्लक्षो वृक्षः जंबूप्रमाणः जंबूवृक्षतुल्यो द्वीपस्य आख्यातिराख्यानं यत ॥ प्लक्ष इति नामधेयं तत्करश्चाप
रश्च हिरण्मयः प्रकाशश्च उच्छ्रित ऊर्द्ध्वस्थित यत्र यस्मिन् प्लक्षवृक्षे सप्तजिह्वाः ज्वाला यस्य ताहृशोऽग्निरुपास्ते तिष्ठति तस्य द्वीपस्याधिपतिः
त्वनेन चिरं तद्द्वीपाधिपत्यं कृत्वा निर्वृतिं गमयते प्रियव्रतस्यात्मज आग्नीध्रानुज इध्मजिह्वः तं स्वद्वीपं सीमाबंधनेन सप्तवर्षात्मकं विभज्य सप्तानां वर्षा
णां नामानि येषां तेभ्यः पुत्रेभ्यः सप्त वर्षाणि आकलय्य समर्प्य स्वयमात्मयोगेन भगवदुपासनात्मकभक्तियोगेनोपरराम उपरतः संसारान्मुक्तोऽभूदित्यर्थः
॥२॥ पुत्रनामान्येव वर्षाणि निर्दिशति ॥ शिवमित्यादिना ॥ तान्यत्रानाकलय्येति पूर्वेणान्वयः ॥ छायते पर्वतेषु गिरयो नद्यश्च सप्त सप्त तेषामभिज्ञाताः प्रसिद्धाः

भा॰ पं॰ श्चामनित्यर्थः॥ तावत्स्वंतान्नामभिर्निर्दिशति मणिकूट इति॥ मेघमाल इत्यं तेन एते एव वर्षाणां मर्यादागिरयः स्त्याद सेतुशैला इति॥ नदीर्निर्दिशति नाम
८५ भिः अरुणेत्यादिना विप्रं भरेत्यं तेन इतिप्राहेन तेरे वंनामभि सत्रनत्रशिवदिवर्षस्य वक्षियंत इति स्त्यते नदी विप्रानहि मह्वानद्य इति स्वच्छत्वप वित्र
त्वविस्मरतत्वादिमहाप्ररामध्यास्त्यर्थः॥ ४॥ पुन सा एवनद्यादिविपिवंसेषु प्लक्षद्वीपवर्षेषु चतुरो वर्णान्नामभिर्निर्दिशन्नेषामायुः प्रमाणं उपास्यं चाह।
यासामिति॥ यासामरुणादिनदीनां जलस्योपस्पर्शेन स्नानपानादिना विधूतरजस्तमस्त्वेषां ते चत्वारो वर्णा हंसादिसंज्ञाः ब्राह्मणादिसंज्ञास्थानीया इह।

पिवं यवसं सुभद्रं शांतं क्षेमममृतमभयमिति वर्षाणि तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः मणिकूटो वज्रकूट इंद्रसेनो
ज्योतिष्मान्सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः अरुणा नृम्णांगिरसी सावित्री सुप्रभाता ऋतंभरा सत्यंभरे।
ति महानद्यः॥ ४॥ यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतंगोर्ध्वायनसत्यांगसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो वि
बुधोपमसंदर्शनप्रजननाः॥ स्वर्गद्वारं त्रय्या विद्यया भगवंतं त्रयीमयं सूर्यमात्मानं यजंते॥

सादिसंज्ञाः सहस्रं वर्षाण्यायुरेषां ते तथा विबुधोपमं संदर्शनं सौंदर्यं येषां तानि प्रजननान्यपत्यानि येषां एवंभूताः संतः त्रय्या विद्यया वेदवि
हितया वेदोक्तकर्मयोगादिभिः तन्मूलस्वरूपया व्याकृतमार्गैस्त्रयपायोग्यं त्रयीमयं ऋग्यजुरादिवेदप्रवर्तकत्वात् तदध्यापयितृत्वात् स्वर्गतिपा
दकत्वाच्च तत्वाद्वयर्थं वोध्यं स्वर्यं स्तत्र्यं शारीरकमात्मानं परमात्मानं यजंते आराधयंति॥ ५॥ तेषां जप्यमानमंत्रमाह

वक्ष्यति ॥ प्रपन्नस्य पुरातनस्यानादेर्जगत्कारणस्येति यावत् सत्यस्य निर्विकारस्य प्रदस्येत्यनेन समष्टिजीवव्यावृत्तिः तस्यासादित्वात् सत्यस्येत्य
नेन अध्यवस्य चेतनाव्यावृत्तिः तयोर्विकारित्वात् कृतस्य निरतिशयसुकृतफलस्य धर्मार्थपर्वाचीनसुकृतफलप्रदस्येत्यर्थः कृतस्य तदधीनत्व
रूपचारात् तदभेदेन निर्देशः कृतशब्दो हि सुकृतफलपरः कृतं पिबंतौ सुकृतस्य लोके इति श्रौतप्रयोगात् ॥ यद्वा कृतशब्दः पूरणस्य कर्मणो वाच
कत्वादुपचारात्तदंतरात्मतया तत्कारयितरि प्रयुज्यते पूरणस्य कर्मणः कारयितुरित्यर्थः ॥ तत्कारयितृत्वं श्रुतेः एष एव साधु कर्म कारयति यमुन्निनीष
तीति कृतशब्दो हि पूरणस्य कर्मणोपि वाचकः य याः पूरणकर्मणो दूराऽऽधोवातीति पूरणं कर्मप्रकृत्यततत्वात् इति संबंधिनो पूरणस्य कर्मणा एवमन्तादात्म
तं जगत्पदेस्य नतशब्देन निर्देशः पूरणस्य कर्मणः कृतशब्दो वाचकः स्यवगम्यते तथास्तस्य च मत्स्यो भवेत्यमरतमत्स्यशब्दावपि वंधमोक्षवाचकौ उप

पवनस्य विष्णोरूपं यत्तस्य त्यस्यर्तस्य च ब्रह्मणः अमृतस्य च मत्स्यो भव सूर्यमात्मानमा महीति ॥ ६ ॥ प्लक्षादिषु पंचसु पुरु
षाणामायुर्भिर्द्विजमोजः महोबलं बुद्धिर्विक्रम गतिस्तवेषा मौत्पतिकासिद्धिरविशेषेण वर्तते ॥ ७ ॥ प्लक्षः स्वसमानेनेक्षु
रसोदेनावृतो यथा तथा द्वीपो विशालः शाल्मली द्विगुणाविशालः समानेन सुरोदेनावृतः परितः के ॥ ८ ॥

चागतद्वतो प्रयुक्तो भगवतस्तु बंधमोक्षहेतुत्वं च स्मृतं संसारमोक्षस्थितिबंधहेतुरिति ॥ उतामृतस्य ज्ञानोपदत्वे नातिरोहतीति च एवंभूतस्य विष्णो
विष्णोर्यद्रूपं शरीरं स्वतंत्रतस्यार्थमात्मनं जीवा विशेषममी मर्हे शरणं व्रजेम ॥ प्रतर्दनविद्यान्यायेनात्र सर्वजीवशरीरकपरमात्मोपासनमुक्तं भवत्यव
गंतव्यं ॥ ६ ॥ प्लक्षादिषु पंचद्वीपेषु अन्यविषयेषु सामान्येन सर्वेषां पुरुषाणां त्रेतायुगादिरूपा सिद्धिरौत्पत्तिकी जन्मसिद्धा वर्तते ॥ अत्रेदमवगंतव्यं मानसो
त्तरगिरेर्मंडलाकारत्वात् केरतेषु प्लक्षादिषु पंचद्वीपेषु वर्षाद्रिपतिषु गेरखाकाराः ततस्तयातो विस्तरशः अन्यथा सप्तभिः सप्तवर्षाणां विभागासंतवाच्यो
वेसप्तवर्षपराणे वर्षाणां प्रवृत्तिर्दिक्कमेणोक्तेष्वेति ॥ ७ ॥ एवं प्लक्षद्वीपः सवर्षपर्वतनदीसवर्णोपमनपुरुषउपवर्णितः अथ तद्द्वैगुण्येन शाल्मलीद्वीपम
नुवर्णयति प्लक्षद्वीप इत्यादि प्लक्षद्वीपः समानेन स्वतुल्यविशालेनेक्षुरसोदेन द्विलक्षयोजनविशालेनावृतस्तथा शाल्मलीद्वीपो द्विगुणविशालः स्व

भा.पं. द्वीपाप्येतस्माच्चतुर्लक्षयोजनविशाल इत्यर्थः समानेन चतुर्लक्षयोजनविशालेन सुरोदेनाभितो वृतेनाकारेण वृतः परिवेष्टितः ॥७॥ यत्र द्वीपे शाल्मली ।
८६ प्लक्षद्वीपसमानो विस्तारो यस्याः शाल्मल्यां वाव किलेत्याद्यो निपातसमुदाय प्रसिद्धिद्योतकः छंदस्तुतः छंदोभिः सुपर्णोसि गरुत्मान् त्रिवृत्ते शिरो गाय
त्रं चक्षुस्तोमः आत्मा साम ते तनूर्वामदेव्यं बृहद्रथंतरे पक्षौ यज्ञायज्ञीयं पुच्छं छंदांस्यंगानि धिष्णियाः शफा यजूंषि नामेत्यादिभिः छंदोवयवत्वेन
स्तुतत्वमिति छंदस्तुतः ॥ आधेयत्वात् कर्मणि षष्ठी पतत्त्रिराजस्य छंदःसामतंत्रेरेयनारूपपरिणामात्मकानां गायत्र्यादीनां तच्चक्षुराद्यवयवत्वं तेषां तच्चक्षुराद्यव
यवत्वं हृद्युपासनविधानमित्यवगंतव्यं यद्वा छंदः सुपर्णोसीत्यादिरूपं स्तोत्रं यस्य गायत्र्याद्यवयवकत्वेन स्तावकं यस्येत्यर्थः एवंभूतस्य पतत्त्रि
राजस्य पक्षिराजस्य गरुत्मतः सोपर्णोस्य विलयनं नीडमाहुः द्विपस्थितमतिपोषः सा शाल्मली द्वीपहूतये हूतिर्व्यवहारः शाल्मलीद्वीप इति व्यवह ।

यत्र वै शाल्मली प्लक्षायामा यस्यां वाव किल निलयमाहुर्भगवतः छंदस्तुतः पतत्त्रिराजस्य सा द्वीपहूतये उपलक्ष्य
ते ॥९॥ तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यः तन्नामानि सप्त वर्षाणि व्यभजत् ॥१०॥ सुरोच
नः सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनमविज्ञातमिति ॥ तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः सुरसः शतशृं
गो वामदेवः कुंदः मुकुंदः पुष्पवर्षः सहस्रश्रुतिरिति ॥ अनुमतिः सिनीवाली सरस्वती कुहू रजनी नंदा राकेति ॥११॥

रायेत्यर्थः उपलक्ष्यते उपलक्षितं दृश्यते इत्यर्थः ॥९॥ तस्य द्वीपस्य शाल्मलस्याधिपतिश्चिरकृताधिपत्यो यज्ञबाहुः प्रियव्रतस्यात्मजः सप्तभ्यः
स्वसुतेभ्यः तन्नामानि स्वपुत्रतन्नामानि सप्त वर्षाणि व्यभजत् विभज्यादित्यर्थः ॥१०॥ पुत्राणां वर्षाणां च साधारणानि नामानि वर्षाणि निर्दिशति सु
रोचनमित्यादिना तेषु सुरोचनादिषु वर्षेषु शैलाः सप्त नद्यश्च सप्तैवमभिज्ञाताः प्रसिद्धाः अस्येव शैला नद्यश्च सप्त इत्यर्थः तावत्सप्तशैलानाह
सुरस इत्यादिना सप्त शैलाः मर्यादागिरयः नदीराह अनुमतिरित्यादिना तद्वर्षपुरुषाणां चतुर्द्धा विभेदे विभागं वर्णेति तेषां आराध्यं भगवद्रूपं
जप्यमानमंत्रमाह तद्वर्षेत्यादिना श्रुतधरादिपद्वादशाख्यानानामानि येषां ते वेदमयं देवप्रवर्तकं भगवदात्मकं सोमाख्यं सोमाख्यमात्मानं ८६

जीवशेषं वेदेन वेदोक्तेन तन्मूलसमस्ताध्वकेन स्वस्ववर्णोचितस्वधर्मेण यजंते आराधयंति ॥ १२ ॥ स्वगोभिः स्वकिरणैः शुक्लकृष्णयोः पक्षयोः पितृदेवेभ्यो
धमन्नं शुक्लपक्षे देवेभ्यः कृष्णपितृभ्यः स्वांशैर्विभजन् स्वगोभिरिंद्रस्य शुक्लकृष्णस्य पक्षविभाजकत्वाभावेऽपि तत्काले पितृआदीनां स्वधास्वाहा प्रवर्तकं
हाविर्होममेव तस्मादिति भावः पक्षरावपितृआदीनामप्यमी का पौर्णमास्य विभागेन प्रदायपिताः तो नोऽस्माकं सर्वासां प्रजानां राजचंद्र सोम अमृतमस्तु
तु स्वकरात्विति यावत् तत्र एवं शाल्मलीद्वीपउपवर्णितः अथ पेतद्द्वीपं तेन कुशद्वीपमनुवर्णयतिराम्वमिति यथा पूर्वः शाल्मलः तथा कुशद्वीपोऽपि सुरोदधे
र्बहिः द्विगुणमानेनाष्टलक्षयोजनविशालेन घृतोदधिना परिवेष्टितः स्वयमप्यष्टलक्षयोजनविशालयस्मिन् कुशद्वीपे द्वीपस्य व्यपदेशकर अपरेम्पि

तद्वर्षपुरुषाः श्रुतधरवीर्यधरवसुंधरइषंधरसंज्ञा भगवंतं वेदमयं सोममात्मानं वेदेन यजंते ॥ १२ ॥ स्वगोभिः पितृदेवेभ्यो
विभजन् कृष्णशुक्लयोः ॥ अंधः प्रजानां सर्वासां राजा सोमन आस्त्विति ॥ १३ ॥ एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृ
तोदेन यथापूर्वः कुशद्वीपो यस्मिन् कुशस्तंबो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराज
यति ॥ १४ ॥ तद्द्वीपपतिः प्रैयव्रतो राजन् हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत
वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तवामदेवनामभ्यः ॥ १५ ॥ तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्तैव

विपकाशवकुशलः देवेन भगवता ब्रह्मणा निर्मितः स्वशिष्पाणां स्वावयवानां कोमलतरणानां रोचिषा दिशो दशापि विराजयति प्रकाशयति ॥ १४ ॥ तस्य कुश॰
द्वीपस्याधिपतिः हिरण्यरेता नाम प्रियव्रतस्य पुत्रः स्वीयं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो वस्वादिवर्षनामभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत तपसा युक्तो
ऽभवदित्यर्थः वर्षनामान्यस्य सप्तपुत्राणां विशिष्टानि वसुवस्वादीनां वसुदानादीनां नामतरे तत्रयोगरूढः तेषां वर्षेषु तत्तुल्यनामसु सीमागिरयः सप्त तथा नद्यश्च सप्तैव
प्रवृ ॥ १५ ॥ शैलान्निर्दिशति चक्र इत्यादिना सेतुसीमामर्यादागिरयः ॥ नदीशाहरसकुल्येत्यादिना ॥ नदीर्द्विपिनष्टि महानद्य इति ॥ पुनर्नदीरेव विशिनष्टि

भा० पं०
८७ तद्द्वीपस्थानां पुरुषाणां चतुर्धा वर्णविभागं तेषामुपास्यं भगवद्रूपं जप्यमानं मंत्रं चाह यासामिति । यासां रसकुल्यादिनदीनां पयोभिः जलैः विधूतमलाः कु
शद्वीपनिवासिनः स्नाने येषां ते कुशलकोविदादिसंज्ञाः जातवेदसरूपिणं जातवेदा एव जातवेदसः ॥ प्रज्ञादित्वात्स्वार्थिको ण प्रत्ययः स अग्निरेव रूपं शरीरं
जातवेदसरूपं तदस्यास्तीति तथा तं भगवंतं कर्मनैपुण्येन यजंते आराधयंति ॥१६॥ हे जातवेदस्त्वं साक्षात्परस्य ब्रह्मणो मितदीपोमितत्कृद्रूपभृतोसीत्यर्थः
तथा हव्यवाडसि हव्यं द्रव्यादीनां भगवदात्मकानां यज्ञियं द्रव्यं वहति प्रापयतीति द्रव्यं तयोर्निरितं भगवंतं प्रतीतिनि पाहिततोसीत्यर्थः ॥ अतो देवानां पुरुषस
वकेम्ब्रवतुम्यंगः कपिलश्चित्ररथो देवानीक ऊर्ध्वरेता द्रविण इति रसकुल्या मधुकुल्या मित्रविंदा श्रुतविंदा देव
गर्भा घृतच्युता मंत्रमालेति ॥ यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुलकसंज्ञा भगवंतं जातवेदःस्व
रूपिणं कर्मकौशलेन यजंते ॥१६॥ परस्य ब्रह्मणः साक्षाज्जातवेदोसि हव्यवाट् देवानां पुरुषांगानां यज्ञेन पुरुषं
यजेति ॥१७॥ तथा घृतोदाद्बहिः क्रौंचद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परित उपक्लृप्तो वृतो यथा कुशद्वीपो घृतोदेन यस्मिन्क्रौं
चो नाम पर्वतराजो द्वीपनामनिर्वर्तक आस्ते ॥१८॥ परमपुरुषस्यांगानां शरीरभूतानां सत्त्वात्मांगानां स्मादेवताइतिश्रुते रात्मशब्द
वाच्यतिसंबंधिरूपांगशरीरमेवं भूतानामिंद्रादीनां संबंधितां यज्ञेन भगवदात्मकं द्रव्याराधनमतेनयज्ञेन तदंतरात्मानं परमपुरुषं यज्ञआराधयतत्त्वमिति
जनयन्ननं गेभ्यः समर्पितहविरागेन समर्पयेत्यर्थः ॥१७॥ ततः द्वीपद्वयातेन क्रौंचद्वीपमनुवर्णयति ॥ यथावदिति ॥ यथा कुशद्वीपः घृतोदेन स्वसमवि
शालेन वेष्टितस्तथा क्रौंचद्वीपो द्विगुणः क्रौंचद्वीपोपि द्विगुणः कुशद्वीपाद्द्विगुणः षोडशलक्षयोजनविशालस्तत्समानेन षोडशलक्षयोजनवि
शालेन दधिमंडोदेनमापितदधिसमानोदकेन समुद्रेणाभितउपक्लृप्तः परिवृतः यस्मिन्क्रौंचद्वीपे द्वीपस्य नाम क्रौंच इति संज्ञानिर्वर्तकः क्रौंचो ना
म पर्वतश्रेष्ठ आस्ते ॥१८॥ क्रौंचं पर्वतं विशिनष्टि यदिति ॥ २ स्कं ५
८७

योसौ क्रौंचो गिरिः पूर्वं गुहस्य कार्त्तिकेयस्य प्रहरणेनायुधेनायुधेन उन्मथितनितंबकुंजानिचयस्तथापि सन् ततः पश्चाद् दधिमंडोदेनासिच्यमानः दधि
मंडोदेलीनः पश्चाद्भगवता वरुणेनाभिगुप्तः अभयप्रदानेनाभिरक्षितः निरस्तभयो बभूव ॥१९॥ तस्मिन्नपि क्रौंचद्वीपे प्रियव्रतात्मजो घृतपृष्ठो
नामाधिपतिः सप्तधा वर्षाणि विभज्य तेषु पुत्रतुल्यनामसु सप्तसु वर्षेषु रिक्थादानदायान् सप्तपुत्रान् वर्षाणामधिपतीन्निवेश्य प्रतिष्ठाप्य स्व
यं परमकल्याणानि रतिशायमंगलरूपं यशो यस्य तस्यात्मभूतस्य स्वान्तरात्मनो भगवतः हरेश्चरणारविंदे जगाम भक्त्याश्रितः ॥२०॥ घृतपृ

योसौ गुहप्रहरणोन्मथितनितंबकुंजोपि क्षीरोदेनाभिषिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥१९॥ तस्मि
न्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वद्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान्वर्षपान्निवेश्य स्वयं
भगवान्भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविंदमुपजगाम ॥२०॥ आमो मधुरुहो मेघपृष्ठः सु
धामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः ॥२१॥ शुक्लो वर्द्धमा
नो भोजन उपबर्हिणो नंदो नंदनः सर्वतोभद्र इति अभया अमृतौघा आर्यका तीर्थवती रूपवती पवित्रवती शुक्लेति ॥२२
यासामंभः पवित्रममलमुपयुंजानाः पुरुषऋषभद्रविणदेवकसंज्ञा वर्षपुरुषा आपोमयं देवमपां पूर्णेनांजलिना यजंते

ष्ठसुतानाह ॥ आमो घस्यादि तेषामामोघादीनां यानि वर्षाणि आमोघादीनि तेषां गिरयो मर्यादागिरयः सप्त तथा नद्यः सप्तैवाभिज्ञाताः ॥ अन्ये ॥ २३
वर्तंते नासां संतीति भावः ॥२१॥ गिरीनाह शुक्ल इत्यादि नदीराह अभयेत्यादिना ॥२२॥ ताविशिषं स्ववर्षस्थानां चतुर्णां वर्णानां विभागं भजनीयं भगवद्रूपं
मंत्रं चाह ॥ यासामभ्यादीनां निर्मलं पवित्रमंभो उपयुंजानाः स्नानाद्युपयुक्तं कुर्वाणा ऋषभादिचतुर्वर्णनामानि पुरुषाः ॥ आपोमयमप्शरीरकं देवं
भगवंतं पूर्णेनापामंजलिना जलांजलिना आराधयंत्यपो दिवदावेनेति भावः ॥२३॥ हे आपः स्वयं पुरुषस्य भगवतो वीर्यशक्तिरूपाः तद्दृष्टपक ॥

सिद्धविप्रोषणान्तेतातिद्धराख्यत्रेताऽतियावत्स्यः भवेषु॥ तथावभृत्स्वऽतिलोकत्रयं पुनंतयः पवित्रयंत्यस्येत्यनुषंगः यतएवमतस्पशातामनीवद्याः पाप
नराः आत्मनोऽवपरमात्मनउत्पन्नाः तादृष्यात्स्पशातमितिशेषः नो स्मास्मनंतु भगवत्यइत्यर्थः आत्मना भवऽतिमावे आत्मना देहेन स्पशातामनीवृद्धी
पुष्मात्स्पशतांनो स्माकं भवेकेनाप्युनंतीत्यर्थः॥२४॥ एवंपूर्वांत्तेन शाकद्वीपमनुवर्णयति एवंयथाक्रौंचस्तथेत्यर्थः दधिमंडोदात्परतः वहिरुप॥ वेशि
तः द्विगुणितः शाकद्वीपः द्वात्रिंशल्लक्षयोजनविशालः समानेन द्वात्रिंशल्लक्षयोजनविशालेन क्षीरोदधिना परिवेष्टितः यस्मिन् शाकद्वीपे शाकाख्यो महीरु

आपः पुरुषवीर्याः स्थ पुनंतीर्नेदं भुवः तानः पुनीतामीवघ्नीः स्पशतामात्मना भुव इति॥२४॥ एवं पुरस्तात्क्षीरोदात्प
रितउपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः॥ समानेन दधिमंडोदेन परीतः यस्मिन्हि शाको नाम महीरुहः स्व
क्षेत्रव्यपदेशको यस्य ह महासुरभिगंधस्तं द्वीपमनुवासयति॥२५॥ तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः सो
पि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान्पुरोजवमनोजवपवमानधूम्रानीकचित्ररेफबहुरूपविश्वधा
रसंज्ञान्निधाप्याधिपतीन्स्वयं भगवत्यनंत आवेशितमतिस्तपोवनं प्रविवेश॥२६॥ एतेषां वर्षमर्यादागिरयो नद्यश्च
सप्त सप्तैव॥ ईशान उरुशृंगो बलभद्रः शतकेशरः॥ सहस्रस्रोतो देवपालो महानस इति॥ अनघाश्चायुर्दा उभय

हः स्वक्षेत्रस्य व्यपदेशः नामनिवर्तकः आत्मऽतिशेषः तं विशिनष्टि यस्येति यस्य शाकस्य ह दृश्यमहासुरभिगंधः निरतिशयसुगंधः तेन तं
शाकद्वीपमनुवासयति सुरभिकरोति॥२५॥ तस्यापि शाकद्वीपस्याप्यधिपतिः मेधातिथिर्नाम प्रियव्रतात्मज एव सोपि पुत्रतुल्यनामानि वर्षाणि विभ
ज्य तेषु वर्षेषु आत्मजान्पुरोजवादिसंज्ञान्निधाय प्रतिष्ठाप्य स्वयमनंते परिच्छिन्नानंदस्वरूपे भगवत्यावेशिता निहिता मतिर्येन तादृशः सन् तपोवनं तपसो यो ग.म:
ग्यं वनं प्रविवेश तपसा सिद्धो भवदित्यर्थः॥२६॥ अथ शाकद्वीपवर्षविभागं पुत्रनामपूर्वकं पर्वतान्नदीश्चाह एतेषामिति॥ तेषु पुरोजवादिषु व ८८

षु सप्तसीम्यपर्वतस्थानत्वात्सप्तैवासन् पर्वतान् नदीश्चाह ईशानमुग्रं ग इति स्वनयोरेताभ्यां गद्याभ्यां तद्वर्षस्याभ्यां पुरुषा ऋतव्रतादि चतुर्वर्णात्मकाः वाय्वात्मकं
वायुशरीरकं भगवंतं प्रश्नस्तु माधिना निरतिशयध्यानयोगेन वायुशरीरकं परमं त्मांतः ॥ प्रविश्य सत्यप्राणरूपेणांतः प्रविष्टः सन्नात्मनः स्वस्य चिह्नभूता
भिः पंचभिः प्राणापानादिभिर्वृत्तिभिः यः प्राणेन प्राणिति नोपानेनापानीति इत्यादिश्रुतिः भूतानि बिभर्ति स साक्षादीश्वरोंऽतः प्रविश्य नियंतानः अस्मान्पा
तु यस्य प्राणशरीरकस्य भगवतः वशे इदं जगद्वर्तते भगवतो वायुशरीरकत्वारंतर्यामी स्वरसामानाधिकरण्यं ॥२८॥ अथ पुष्करद्वीपमनुवर्णयति एवमि
ति ॥ क्षीरोदधेः परस्तात्पुष्करद्वीपः ततः शाकद्वीपाद्द्विगुणायामः द्विगुणविशालः चतुःषष्टिलक्षयोजनविशालः समंततस्तस्मात्कार्दिशाउपकल्पितः ॥ इ

स्पृष्टिरपराजिता पंचपदी सहस्रस्रुतिर्निजधृतिरिति ॥ तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवंतं वाय्वा
त्मकं प्राणायामविधूतरजस्तमसः परमसमाधिना यजंते ॥२७॥ अंतः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः ॥ अंतर्यामी
श्वरः साक्षात्पातु नो यद्वशे स्फुटमिति ॥२८॥ एवमेव दधिमंडोदात्परतः पुष्करद्वीपस्ततो द्विगुणायामः समंततः उपक॰
ल्पितः समानेन स्वादूदकेन समुद्रेण बहिरावृतो यस्मिन् बृहत्पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं भगवत
कमलासनस्याध्यासनं परिकल्पितं ॥२९॥ तद्द्वीपमध्ये मानसोत्तरनामैक एवार्वाचीनपराचीनवर्षयोर्मर्यादाचलो॰

स्वरेणातिशेषः ॥ एवं ॥ द्विपचतुरप्यवरणानेमिनेति शेषः ॥ स्वसमानविशालेन चतुःषष्टिलक्षयोजनविस्तारेण स्वादोदकेन स्वादोदकसमुद्रेण बहिः स
मंततः आवृतेन परिवृतः यस्मिन् पुष्करद्वीपे बृहद्विपुलं पुष्करं कमलं ज्वलनशिखावदमलानां प्रकाशमानानां कनकपत्राणामयुतानामयुतान्
यस्य तद्भगवतः कमलासनस्य चतुर्मुखस्याध्यासनं परिकल्पितं तत्कर्णिकामध्यगतेन तद्वर्षस्याः पुरुषाः चतुर्मुखमुपासत इत्यर्थः ॥ अस्मिन्द्वीपम
र्यादागिरिर्मानसोत्तरनामाल्पकएकमाह तत्तद्द्वीपमध्य इति पुष्करद्वीपमध्ये एकएव मानसोत्तराख्योऽयुतयोजनानि उच्छ्रायश्चोन्नतस्तमायामो विस्तार

भा० प ८९

स्वयमस्य म॥ स्वर्वीथ्यां न पराग्वान योरंतर्वर्तितया देवीतिकोऽवर्षयोर्मध्ये दागिरि॥ यत्र मानसोत्तरे गिरौ च तस्य दिक्षु इंद्रादयो देवीयानतेषामिंद्राग्नि
वरुणकुबेराणां लोकपालानां पुराणि संति॥ ३०॥ यस्य मानसोत्तरगिरेः उपरि स्थितैः इंद्रादिलोकपालपुराणामुपरि मेरुं परिक्रमत परितो भ्रमतः स्व
र्यस्य रथस्य चक्रं संवत्सरात्मकं देवानां महोरात्राभ्यां उत्तरायणदक्षिणायनाभ्यां स्वावयवाभ्यां चक्रवत् लौकिकरथचक्रवत् परिभ्रमति॥ ३१॥
तस्य पुष्करद्वीपस्याधिपतिर्वीतिहोत्रः स्याः प्रियव्रतात्मजः तस्य वीतिहोत्रस्यात्मजौ पुत्रौ रमणधातकौ रमणधातकयोर्वर्षयोः
पतीकृत्य स्वयं स्वपूर्वजवदेव भगवदाराधनरूपकर्मशील एवास्ते आसीदित्यर्थः॥ ३२॥ तस्य पुष्करद्वीपवर्षपुरुषाः

पुरतो मानसोत्तरो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिंद्रादीनां॥ ३०॥ यदुपरिष्टात्सूर्यरथस्य
मेरुं परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति॥ ३१॥ तद्द्वीपस्याधिपतिः प्रैयव्रतो वीति
होत्रो नामैतस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स स्वयं पूर्वजवद्भगवत्कर्मशील एवास्ते॥ ३२॥
तद्वर्षपुरुषा भगवंतं ब्रह्मरूपिणं सकर्मकेण कर्मणाराधयंतीदं चोदाहरंति॥ ३३॥ ब्रह्मरूपिणं मंतुर्ब्रह्मशरीरकं
भगवंतं कर्मणा कर्मयोगविशिष्टेन कर्मणा मनोव्यापाररूपेण भगवदुपासनयोगेन कर्मशब्दो हि मनोव्यापाररूपोपासनयोगेऽपि वर्तते प्रका
शादिवद्बद्धैश्चर्यप्रकाशकर्मणापि भासादिति सोत्रप्रयोगात्॥ प्रकाशादिवत् ज्ञानानंदादिस्वरूपवन्मतौ मतं तंप्रपं च विशिष्टतया अपि ब्रह्मण
आत्मत्वेयोर्यप्रतीयते तत्त्वं तत्त्वमस्येव ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेत्यादि ब्रह्मस्वरूपं तत्प्रकाशानंदादिवच्चतेषां वामदेवादीनां
मनोवृत्तात्मकेन कर्मणा उपासनाद्युपलभ्यते तेन ब्रह्मात्मत्वसमाराधनाभ्यां ते यां तत्तौ मतौ दिनाद्विशिष्टत्वमप्यविशेषणापत्तौ यतेरिति तद्वर्षे तथा च
वाचकैः प्रसिद्धमतो मानवमेरुमजातितापारारजैः कर्मदोषैर्यैरितिस्थावरतानरइति भगवतामनन्तादिमारम्भैः कर्मदोषैरिति मनोव्यापारकर्म

पाद्वयकः अकर्मणा इति पाठे अकर्मणो बंधनिरासकं

८९

र्णाश्रमवर्णोचितकर्मणेत्यर्थः ॥ २३ ॥ भेदेन वर्णादिमभेदेनोपलक्षितो जनः पुरुषाः परस्य लिंगं शरीरं तं यद्वा ब्रह्मवेदस्तदेव लिंगं ज्ञापकं
यस्य तद्ब्रह्मलिंगं वेदावबोध्यं कर्ममयं सर्वं जगत्सर्वात्मकं कर्मप्रचुरं स्वर्गादि तत्र जनता ब्रह्मपरमात्मनो लिंगं शरीरमर्चयेदाराध
येत कथमद्वैतमिति क्रियाविशेषणं देवमनुष्यादिकार्यवर्गे प्रति ब्रह्मणः समष्टिरूपत्वात्कार्यकारणयोरभेदाध्यवसायाद्वैतं य
था भवति तथा वेदयेदित्यर्थः पंचं तु स्वरूपं केवलवेदावबोध्ये अपि सर्वात्मककर्मप्रचुरं ब्रह्मणः परस्य शरीरं तमद्वैतं यथा तथा
वेदयेदिति यावत् तथैकांतमित्यपि क्रियाविशेषणं एकांतमव्यभिचरितं यथा तथा वेदयेदिति तस्मै भगवते हिरण्यगर्भाय ते नमः ॥ २४ ॥ एवं
पुष्करद्वीपं वर्णयित्वा पात्मकं मंडलमनुवर्णयन्नतः परमनुवर्णयति तत इति ॥ ततः शुद्धोदात्परस्ताद्बहिर्लोकालोकाख्यः पर्वत स्था

पवन्नकर्ममयं लिंगं ब्रह्मलिंगं जनोऽर्चयेत ॥ एकांतमद्वयं शांतं तस्मै भगवते नम इति ॥ २४ ॥ ततः परस्ताल्लो-
कालोकनामाचलो लोकालोकयोरंतराले परित उपक्षिप्तः ॥ २५ ॥ यावन्मानसोत्तरमेर्वोरंतरं तावती
भूमिः कांचन्यन्यादर्शतलोपमा यस्यां प्रहितः पदार्थो न कथंचित्पुनः प्रत्युपलभ्यते ॥ २६ ॥

लेऽन्ति शेषः ॥ तस्य लोकालोक इति नाम्नि प्रवृत्तिनिमित्तमाह यतो लोकालोकयोरंतराले मध्ये उपकल्पितः ॥ २५ ॥ नन्वत्र ततः परस्तादित्युक्तं
तद्देव किं पर्यंतात्तरोत्स्यापेक्षया तदंतर्वर्तिनीं भूमिमाह ॥ मानसोत्तरमेर्वोरंतरामध्ये यावती भूमिरुक्तमेरोर्मध्यादारभ्य मानसोत्तरप
र्यंतमार्द्धसप्तलक्षोत्तरसार्द्धकोटियोजनपरिमिता भूमिरास्ते तावती भूमिः शुद्धोदात्परतोऽस्तीत्यर्थः ॥ ततोऽन्याप्येकोनचत्वारिंशल्लक्षोत्तरा
ष्टकोटियोजनमितां भूमिमाह ॥ कांचनीति ॥ कांचनी स्वर्णमयी आदर्शतलोपमा दर्पणोदरतुल्या निर्जना भूमिर्लोकालोकशुद्धोदयो
रंतराले वर्ततेत्यर्थः ॥ नन्वत्र कोऽविशिष्टः यस्यालोकान्तरालवर्तिस्थां मार्द्धसप्तलक्षोत्तरसार्द्धकोटियोजनात्मिकां मानसशुद्धोद्ध

भा. पं.
८०

छायायाम्अपेपरत्वादिच्छमानायांएकोनचत्वारिंशत्लक्षोत्तरासष्टकोटिपरिमितायांभूम्यांनिहितःकश्चित्पदार्थःप्रतनोपिलभ्यतेदर्पणोदरस्थ
त्यत्वात्तस्मात्प्रतिभावःनहिदर्पणोदरेनिहितमाधादितिध्वनाति॥३६॥लोकालोकाख्यमाह॥तस्माल्लोकालोकपर्वतावहिर्भिर्मध्येसप्तमेत्वेन
तुभिःपरिकृतारहितान्त्रासीदुमिरित्यनुषंगः॥अलोकान्वभिरास्ते इत्यर्थः॥ इदमेवहिपर्वतस्यलोकालोकसमाख्यायांनिमित्तमित्याह
लोकेत्यादिना॥ स्वपर्यन्तायाअन्तर्भूम्यालोकशब्दवाच्यत्वात्तस्माद्वाह्यायाअलोकशब्दवाच्यत्वाच्चोभयोरंतरालवर्तिनानेनपर्वतेन
स्थितिघातरालवर्तित्वेनधर्मेणहेतुनास्वस्मिन्लोकालोकइतिसमाख्यावस्थाप्यतेअवहितसमाख्योयंपर्वतोभवतीत्यर्थः॥ पर्वतं

तस्मात्सर्वमत्र परिहृतामीतं लोकालोक इति समाख्या ह्यनेनाचलेन लोकालोकस्यान्तर्वर्तिनावस्थाप्य
ते स लोकत्रयान्ते परित ईश्वरेण विहितो यस्मात्सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वा
चीनांस्त्रीँल्लोकानावितन्वाना न कदाचित्पराचीना भवितुमुत्सहन्ते तावदुन्नहनायामः॥ ३८॥

विशिनष्टिसइतिसलोकालोकःभूरादिलोकत्रयमंतरमंतरगतंयस्यतस्मिन्विषयेईश्वरेणपरिहृताकारेणनिहितइत्यर्थः॥गर्भस्थलोक
त्रयत्वेनलोकालोकयोर्मर्यादात्वेनचेश्वरेणायमचलोनिहितइत्यर्थः॥३७॥तत्तदेवप्रपंचयतियस्मादितिसूर्यप्रभृतीनांध्रुवपर्यंत
नांज्योतिर्गणानांगभस्तयोमरीचयःत्रिलोकान्भूरादीनवांचीनानधःस्थानवितन्वानाःसमंतात्प्रकाशयंतोयस्माल्लोकालोक
पर्वतरूपात्प्रतिबंधात्कदाचिदपिपराचीनापरितोव्याप्ताःपर्वताद्वहिःप्रकाशमानाभवितुंनोत्सहंतेनशक्नुवंतितावदुन्नहन
मौन्नत्यंतदनुरूपश्चायामोविस्तारश्चयस्यसःध्रुवादप्युन्नतत्वात्गर्भस्थत्रिलोकीत्वाच्चलोकालोकयोर्मर्यादारूपःइत्यस्यापर्वताद्
हिःसूर्यादिप्रकाशाभावाद्योकालोकअलोकत्वान्नलोकःअलोकरहितोऽलोकइतिचलोकालोकयोरुभयोःप्रवृत्तिनिमित्तमुक्तम्

८०

तावदुत्त्वहनायामस्त्वक्रमो लोकस्य कियद्योजनपरिमितमित्यपेक्षायां तदर्धं तस्य कृत्स्नभूमंडलपरिमितकल्पनापेक्षत्वात्तत्परिमाणमाह एतावा
नेति लोकस्य कृत्स्नभूमंडलस्य विन्यासः संस्थानमानादिभिरेतावानिति पंचाशत्कोटियोजनपरिमित इति कविभिर्भूमंडलयाथात्म्यविद्भिः ।
चिंतितः सम्यग्ज्ञातः पर्वतस्योन्नत्यविस्तारादि सप्तविंशति ॥ पंचाशत्कोटियोजनविस्तृतस्य भूगोलस्य चतुरीयो भागः सार्धद्वादशकोटियोजना
त्मकः तत्परिमितोन्नत्यवान् तदनुगुणायामश्चेत्यर्थः ॥३८॥ तस्य लोकालोकस्य गिरेरुपरिष्टाच्चतसृष्वाशासु पूर्वादिषु दिक्षु अखिलजगद्गु
एतावांल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिंतितः कविभिः स तु पंचाशत्कोटिगणितस्य भूगोलकस्य तुरीयभागो
ऽयं लोकालोकाचलः ॥३९॥ तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाखिलजगद्गुरुणाधिनिवेशिता ये द्विरदपतय ऋ
षभः ॥ पुष्करचूडो वामनोऽपराजित इति सकललोकस्थितिहेतवः ॥४०॥ तेषां स्वविभूतीनां लोकपालानां च विविध
वीर्योपबृंहणाय भगवान् परममहापुरुषो महाविभूतिपतिरंतर्याम्यात्मनो विशुद्धसत्त्वं धर्मज्ञानवैराग्यैश्वर्याद्य
ष्टमहासिद्ध्युपलक्षणं विष्वक्सेनादिभिः स्वपार्षदप्रवरैः परिवारितो निजवरायुधोपशोभितैर्निजभुजदंडैः संधारयमाण
स्तस्मिन्गिरिवरे समंतात्सकललोकस्वस्तय आस्ते ॥ आकल्पमेवं वेषं गतो भगवानात्मयोगमायाविर
चितविविधलोकयात्रागोपीथाय ॥४१॥ रुणात्मयोनिना ब्रह्मणा ऋषभादिसंज्ञाश्चत्वारो द्विरदपतयः गजश्रेष्ठा येऽधिनिवे
शितास्ते सकललोकानां स्थितिहेतवः देवे तवः आस्ते ॥४०॥ तेषां द्विरदपतीनां स्वांशभूतानां इंद्रादिलोकपालानां च नानाविधसामर्थ्या
भिवृद्धये सकललोकस्वस्तये भगवानास्ते तस्मिन्नेवं ते आस्ते इत्यन्वयः कथंभूतः परमः सर्वोत्कृष्टः निरतिशयकल्याणगुणाश्रयः पु

भा.पं. षः विभर्तीति व्याधिपतिम् सर्वोत्तरात्मा आत्मनः स्वस्य पद्धिशुद्धं सर्वं तत्त्वधारणाय प्रमाणशुद्धसत्वमयाकर्मवपंप्रदिव्यमंगलविघ्नहं विघ्नाणांस्य
४१ षैः कथं तत्त्वशुद्धमतं धर्मो दयः उपलक्षणानि दर्शनसाधनानि यस्य तद्धर्मोच्छ्रपलक्षणं तत्र धर्मो वर्णाश्रमोचितकर्मयोगः ज्ञानं प्रकृ
तिविविक्तात्मज्ञानयोगः वैराग्यमंतर्वाह्येंद्रियनियमनः ऐश्वर्यं दयन्त्यष्टौ सिद्धयः अणिमाद्या योगसिद्धयः एभिरुपलक्षते कर्मयोग
ज्ञानयोगात् उत्पद्यते नाणिमाद्यष्टैश्वर्यसिद्धिपर्यंतेनापास्मनेनोपलक्षमित्यर्थः स्वपार्षदैः श्रेष्ठैर्विष्वक्सेनप्रमुखैः परिवृतः स्वकी
यैः स्वैः श्रेष्ठैः कान्तिनिरायुधैः रूपप्रधानितादाषः अजा देहाकारास्ते रूपलक्षितः तस्मिन्लोकालोके गिरिवरे सर्वत्र सकलजगतां स्वस्तय
स्थातेत्यर्थः ॥ कियत्कालमात्मस्यत्राह आकल्पमिति ॥ एवं भगवानात्ममायया विरचितो विविधो यो लोकः तस्य यात्रा जीवनं तस्या
गोपीथाय रक्षणाय आकल्पमेवं मंते वेवं लीलया शास्त्रे आस्तेत्यर्थः एवं जंबूद्वीपादीनां परिमाणकथनेन शुद्धोदधिपर्यंतस्य मंडलस्य मेरोर्म
ध्यस्य मध्यादारभ्याभितः शुद्धोदधिपर्यंतमनुगमने पंचशतसहस्राधिकत्रिपंचाशत्कोटियोजनात्मकं परिमाणमुक्तं भव
ति ॥ तथा चोक्तमन्यत्रापि कोटिद्वयं त्रिपंचाशल्लक्षाणां च ततः परं पंचाशच्च सहस्राणि सप्तद्वीपाः ससागराः ततो हेममयी भूमिर्दश कोटयो
वरामनंतेदेवानां क्रीडनायो यस्मालोकालोकस्ततः परं इति एवं शुद्धोदधेर्बाह्यया या कांचनी भूमिर्गर्भे मेरुतायापरिमाणमपि यावन्मानसोत्तर
मेरवोरंतरा तावती भूमिरित्यनेन सार्द्धसप्तलक्षोत्तरसार्द्धकोटियोजनात्मकमुक्तं पंचचप्याद्यपि न मेरुविशिष्यपरिमाणं नोक्तं तथापि कृत्स्न
मंडलस्य पंचाशत्कोटियोजनपरिमितत्वोक्तेस्तत्र सप्तद्वीपससागरात्मकस्य परिमाणोक्तेर्लोकस्य लोकसमानपरिमाणस्य च स्मरणा
त्वाच्च ततो हेममयी भूमिर्दश कोट्य इति वचनोत्तरार्द्धाच्च परिशेषाद् एकोनचत्वारिंशल्लक्षोत्तराष्टकोटियोजनात्मकं परिमाणं वेदित
व्यं ॥ हेममयभूमेर्दशकोटियोजनपरिमितत्वकथनं पूर्वोक्तसार्द्धसप्तलक्षोत्तरसार्द्धकोटियोजनसंख्याया पूर्वोक्तभूम्या सह किंचिदनमत्ता
प्यभिप्रायेणेति द्रष्टव्यं ॥ ४१ ॥ एवं लोकालोकपर्यंतस्य लोकस्य मेरोरारभ्य सार्द्धद्वादशकोटियोजनपरिमाणमुक्तं । अथ लोकपरिमाण ४१

णमाह अथेति॥ नन्वहे राजन् तेन लोकालोकांतर्वर्तिन परिमाणकथनेन लोकालोकाद्बहिर्वाह्योदेशस्तस्य लोकस्य परिमाणमपि आख्यातं अलोको
पि लोकेनतुल्यपरिमाणं सार्द्धद्वादशकोटियोजनपरिमाणमित्यर्थः॥ अत्रेदमवगंतव्यं पंचाशत्कोटियोजनात्मकभूमंडले मेरुर्मध्ये वर्तते तस्मा
दारभ्य चतुर्दिक्षु अर्द्धाभिमितिपर्यंतं सजगमनेन पंचविंशतिकोटियोजनानि भवंति दक्षिणाद्भिमितिमारभ्योत्तरभित्तिपर्यंतं सजुगमनेन पंचाशत्को
टियोजनानि भवंति एवं पश्चिमतः आरभ्य पूर्वभित्तिपर्यंतेपि द्रष्टव्यं तत्र मेरोरारभ्य आभिमितिपर्यंतं पंचविंशतिकोटियोजनात्मके भागे जंबूद्वीपवि
भाग पंचाशत्सहस्रयोजनात्मकः ततो लवणोदध्यादयः समुद्राः सप्त द्वीपाः सप्त पूर्वोक्तयोजनपरिमाणा एवं पंचाशत्सहस्रोत्तरपंचाशल्लक्षा
धिककोटिद्वययोजनपरिमिता मध्ये सप्तसागरसप्तद्वीपात्मिका भूमिः शुद्धोदधेर्बाह्यभूमिः सार्द्धसप्तलक्षोत्तरसार्द्धकोटियोजनपरिमिता बाह्य ४२८
आदर्शो भूमिरेकोनचत्वारिंशल्लक्षोत्तराष्टकोटियोजनपरिमितासंकस्यप्रगणनाया सार्द्धद्वादशकोटियोजनानि भवंति ततो लोकालोकात्
अयमनुद्योतविस्तार ॥ तेन च लोकपरिमाणं च आख्यातं यद्बहिर्लोकालोकाचलात्ततः परस्ताद्योगेश्वरगतिं विशुद्धामुत्स
परलोकभूमिः सार्द्धद्वादशकोटिपरिमितेति तत्र न लोकानां संचार इति आह ततः परस्तादिति ततो लोकालोकाद्बहिर्विशुद्धां योगप्रभावसिद्धां
योगेश्वराणां एव गतिः संचारः उदाहरंति कथयंति वस्तुतस्तत्र शुद्धोदधेः परस्तात्कांचनभूम्यतिरिक्ता भूमिर्नैव वर्तते परतो वा किंतु कांचनस्यैव भूमे
र्देहमानसोत्तरस्य अस्य भूपरिमाणं गम्यते अतएव हि प्रोक्तं वै सर्वे पुराणेष्वाद्यः दकस्य पुरतः दृश्यते लोकसंस्थितिः द्विगुणा कांचनी भूमिः सर्वजंतु
विवर्जितेति कांचनभूमिस्तु लोकात् ततः अतएव हि कांचनभूमिस्तु दशकोट्यावराननेइति वचनांतरमप्युपपन्नं तत्रायमर्थः॥ अथ यालोकप
रिमाणमाह॥ अथेति ननु यावतविस्तारः लोकालोकपर्यंतावर्तिनो भूमंडलस्य विस्तारः कथित इति शेषः एतेनांतर्वर्तितः परिमाणकथने
नालोकस्य लोकालोकपर्यंतावाह्यवर्तिनोपि परिमाणमाख्यातं कथितं पंचाशत्कोटियोजनपरिमिते भूमंडले लोकालोकांतर्वर्तिनो विस्तारे

कथितेव शिष्टमलोकस्य परिमाणमपि कथितं प्राप्तमेवेत्यर्थः ॥ अत्रेदमवगंतव्यं पंचाशत्कोटियोजनपरिमितं भूमंडलं मेरोर्मूलमध्यादारभ्य
मितपर्यंतं समुद्रोत्तुंगोलपर्यंतं विभजनीयं एवं विभक्ता सप्तवारो भागा अत्यल्पमूला विपुलाग्रा भागास्त्रिकोणाकारा भवंति यथा मेरोरारभ्य लवणो
दधिविभक्ता भागा तत्रैकस्मिन्भागे मेरोरारभ्यांडभित्तिपर्यंतं मनुगमने पंचविंशतिकोटियोजनानि भवंति तेषामेव भागानामाद्यंतभागयोः
समीकरणेन गणनायां सार्द्धद्वादशकोटियोजनानि भवंति यथा च मेरोरारभ्याऽलवणोदधिपर्यंते एवं चतुर्थभागेषु मेरोरारभ्यऋजुगमनेन पं
चाशत्सहस्रयोजनानि समीकारेण गणनायां तु पंचविंशतिसहस्रयोजनानि भवंति तेषु चतुर्थभागेषु एकैकस्मिन्भागे मेरुमूलादारभ्य
ऋजुगमनेन शुद्धोदधिपर्यंतं पंचाधिकसहस्राधिकत्रिपंचाशल्लक्षोत्तरकोटिद्वययोजनात्मकः शुद्धोदादारभ्य लोकालोकपर्यंतं सार्द्ध
सप्तलक्षोत्तरसार्द्धकोटियोजनपरिमितं लोकालोकादारभ्यांडभित्तिपर्यंतं लोकभागः एकोनचत्वारिंशल्लक्षाधिकाष्टकोटियोजनपरिमि
तमिति त्वा सार्द्धद्वादशकोटियोजनात्मकैकैको भागो भवति चतुर्णां भागानां मेलने ऽंडभित्तेर्दैर्घ्यं तत्रारभ्योत्तरभित्तिपर्यंतमृजुगमने पंचाश
त्कोटियोजनानि भवंति एवं पाताल्यमंडभित्तिमारभ्योर्ध्वभित्तिपर्यंतं गमने पातितवोर्ध्वनागानां समीकारेण गणनायां त्वस्मदेवपरिमाणं भ
वतीति अयमप्यपरो विशेषः सार्द्धद्वादशकोट्यात्मकेष्वेकैकस्मिन्भागे योयं शुद्धोदधिपर्यंतः पंचाशत्सहस्राधिकपंचाशल्लक्षोत्तरके ।
टिद्वययोजनपरिमित एकैको भागस्तस्मिन्नपि भागे मेरोर्मूलादारभ्यऋजुगमनेन लवणोदधिपर्यंतो जंबूद्वीपविभागः पंचाशत्सहस्र
योजनपरिमितः ततो लवणोदधिभागोपि ऋजुगमनेन लक्षयोजनपरिमितः ततः प्लक्षद्वीपो द्विलक्षयोजनात्मकः ततः इक्षुरससमुद्रोपि
द्विलक्षयोजनात्मकः एवं ततः शाल्मलादयो द्वीपाः सुरोदादयश्च समुद्राः चतुर्लक्षादिरूपयथोक्तपरिमाणा एव वेदितव्याः एवं शुद्धो
दधिपर्यंतं सकलस्य गणनायां पंचाधिकसहस्राधिकत्रिपंचाशल्लक्षोत्तरकोटिद्वययोजनात्मकोऽकसंख्यासंपन्नो भवतीति ततः कांचनी
भूमिः सार्द्धसप्तलक्षोत्तरसार्द्धकोटियोजनपरिमिता ततो द्विगुणा कांचनी भूमिरिति तु यच्छ्रीविष्णुपुराणवचनं पूर्वोक्तं शुद्धोदधिपर्यंतया भूम्या ५२

सहस्रमस्ववितिलक्षन्यूनाद्विगुणोस्येवतात्पर्यकं दशकोटय इति वचनांतरं तु लोकादारभ्य पुनर्लोकालोकपर्यंतमनुगमनेन चतुर्दशलक्षोत्तरद
शकोटियोजनपरिमितावनिर्भवतीत्येतदभिप्रायकं द्विगुणत्वदशकोटित्वकथनं न्यूनाधिकभागाविवक्षयेत्यतो न विरोध इति । ततो लोका
लोकाचलः ततोंधकारभूमिः सा च पारिशेष्यादष्टाशीतिकोटियोजनपरिमिता एवं च मेरोरारभ्य पंचविंशतिकोटियोजनानि भवंतीति द्रष्टव्यं
४२ । एवं मेरोर्मध्यस्य मर्यादीकृत्य भूमंडलस्य परिमाणमुक्तं । अथ ब्रह्मांडस्य कियत्परिमाणं कावावधिकृत्य परिमातव्यमित्यपेक्षायामा
ह अंडमध्यगत इति । अंडमध्यगत अंडमध्ये स्थितः सूर्यः यथा भूमंडलस्य मध्ये मेरुः स्थितः तद्वदित्यर्थः किं तन्मध्यं यत्र स्थितः सूर्यस्तत्र
ह द्यावाभूम्योर्यदंतरमिति द्यावाभूम्योरूर्ध्वाधःकपालयोर्यदंतरं मध्यस्थानमित्यर्थः । अनेन सूर्यमवधीकृत्यांडस्य परिमाणं का
अंडमध्यगतः सूर्यो द्यावाभूम्योर्यदंतरं । सूर्यांडगोलयोर्मध्ये कोट्यः स्युः पंचविंशतिः ॥४३॥ मृतेंड एष एतस्मि
न्यदभूत्ततो मार्तंड इति व्यपदेशः । हिरण्यगर्भ इति यद्धिरण्यांडसमुद्भवः ॥४४॥ सूर्येण हि विभज्यंते दिशः खं
द्यौर्मही भिदा । स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः ॥४५॥ यदुक्तं भवति सूर्यांडगोलयोः सूर्यांडान्त्यो मध्ये पंचविंश
तिकोटयः स्युरित्यर्थः सूर्यमवधीकृत्यांडभित्तिपर्यंतमूर्ध्वमधस्तात्सार्धेतस्य पंचविंशतिकोटियोजनानि भवंतीत्यर्थः ॥४३॥ अंडप्रसंगात्
सूर्यं चतुर्विधाख्यानामंडस्यैवंधा रेवमार्तंडहिरण्यगर्भादिनामवत्त्वमित्याह मृतेंड इति । मृते अचेतने एतस्मिन्नंडे यत स्थितः ततोसौ सूर्यो मार्तं
ड उच्यते मृते वेतदंडे च मृतांडे मृतांडे भवः मार्तंडः शकंध्वादित्वात्पररूपे मार्तंड इत्यपि साधु यद्यस्माद्धिरण्ये हिरण्मये समुद्भवो यस्य स ब्रह्मा
हिरण्यगर्भः उच्यते हिरण्यांडस्य गर्भे वर्तमानत्वाद्धिरण्यगर्भ इत्युच्यते अस्यार्थः यद्वा हिरण्यगर्भ इति सूर्यस्यैव क्वचिद्व्यपदेशान्निर्वाहार्थो ।
मेवमुक्तं ॥४४॥ यदुक्तमंडपरिमाणे सूर्यस्यावधित्वं तदेव नकेवलं किंतु दिगादिविभागेप्यवधित्वं सूर्यस्यास्तीत्याह सूर्येणेति दिशः खं द्यौर्द

भा.पं. भागवद्भिर्वा एवं मीमांसमानस्तदेवं सोमकोऽसौ मिश्रतलादानि चमर्वेशः कृत्स्नस्य सूर्येणैव विभज्यन्ते तत्रापि तत्र सूर्यः ॥ ४५ ॥ न केवलं दिग्गादिवि
५२ भागकरावसूर्य किंतु देवादीनां चक्षुरिन्द्रियाधिष्ठाता चेत्याह देवेति ॥ आत्मा भगवदात्मकः सूर्यः देवादीनां सर्वेषां जीवनिकायानां ॥
जीवसमूहानां दृशीश्वरः दर्शनाधिष्ठाता अंगानां स्थावराणां वा ऊर्ध्वं चक्षुरिन्द्रियस्थानमित्यर्थः तस्य सद्भावाच्च चक्षुरिन्द्रियाधिष्ठातृत्वमप्य
तं ॥ ४६ ॥ इति श्रीमद्भागवते पंचमस्कंधे टीकायां विंशोऽध्यायः ॥ २० ॥ एवं कृत्स्नस्य भूमंडलस्य सन्निवेशं तत्परिमाणं चाभिधायाथ दिवो मंडलपरिमाणं सूर्यगतिं च विवक्षुर्वे
त्स्यमानाख्यानस्याप्येतत्प्राप्तुत्तमत्र वर्ण्यते त्रिरध्यायेऽरताः एतावानेवेति ॥ भूमंडलस्य सन्निवेशः संस्थानं प्रमाणादिभिरेतावानेव पंचाशत्
देवतिर्यङ्मनुष्याणां सरीसृपसवीरुधां ॥ सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥ ४६ ॥ इति श्री भागवते म
हापुराणे पंचमस्कंधे विंशतितमोऽध्यायः ॥ २० ॥ श्रीशुक उवाच ॥ एतावानेव भूवलयस्य संनिवेशः प्रमाणलक्ष
णतो व्याख्यातः ॥ १ ॥ एतेन हि दिवो मंडलमानं तद्विद उपदिशंति ॥ यथा द्विदलयोर्निष्पावादीनां ते ॥ १ ॥ १ ॥ १ ॥

कोटियोजनपरिमितएव नास्माभिरावकारेणउक्ताधिकपरिमाणमावृत्तिवत्समानमवतारयति ॥ एतेन भूमंडलपरिमाणेन दि
वो मंडलस्यापि मानं परिमाणं तद्विद्वः ॥ दिवो मंडलमपि पंचाशत्कोटियोजनपरिमितमित्येवोपदिशंतीति कथयतीत्यर्थः कथमन्यस्य परि
माणकथनेनान्यस्यापि परिमाणं ज्ञातुं शक्यमित्यपेक्षायां दृष्टांतमाह यथा द्विदलयोर्निष्पावादीनामिति निष्पावो गोधूमादिधान्या
नि चूर्णीयितुं शिलास्थिमिनिर्मितो वेदलात्मकः पाषाणविशेषवाच्यद्वयदलविशिष्टो धान्यविशेषो वा निष्पद्यते सूर्यादिभिरिति निष्पा
व मितस्यो पूलो शितिघञ् निष्पावप्रभृतीनां द्वयोर्दलयोर्मध्ये वा स्थितस्य दलस्य परिमाणे कथिते चपरीतेन दलमपि तत्वस्य राम:
परिमाणमिति कथितो भवतीति तथेत्यर्थः ॥ १ ॥ अत्र दिवो मंडलं भुवो मंडलेन तुल्यपरिमाणं किं तद्भूमंडलद्युमंडलयोर्मध्ये प ५२

अभिस्थितं तत्र्यैनववीहृत्स्य परिच्छेदं कार्यं॥ स्वकं तथाहृतयोऽशितितयोर्भूमंडलद्युमंडलयोरंतरेण मध्यें तारस्त्रैलोक्यप्रक्षिप्तं तीत्यप्रपंचः॥ क
र्य भूतत्वतदुभयसंधितं ताभ्यां भूमंडलद्युमंडलाभ्यां उभयतः अधऊर्ध्वं सम्यक् संधितं संलग्नं संहृष्टमित्यर्थः यस्यांतरिक्षस्य मध्यगतमध्ये
स्थितो भगवान् तपतांपतिस्तापकर्तृणां पतिरग्न्यादीनां मध्ये पतिश्रेष्ठः तपनः सूर्य आतपेन त्रिलोकीं भूर्भुवः सुवस्त्यामिकां प्रतपति प्र
काशयति आत्मनः स्वस्य भासा प्रकाशया त्रिलोकीमवभासयति स्वस्वकर्मणि प्रवृत्तां करोतीत्यर्थः॥२॥ किमयं सूर्य एकत्रैव
स्थितस्तां त्रिलोकीं प्रतपत्यवभासयति उतास्वेव यथा घटन्नेव तर्हि सदैकरूपेण वर्तते उत कदाचित्त्वरया कदाचिच्छनैः कदाचित्समं किं
वा श्वमेवादि इति॥ अथवा अधः आहोस्विदूर्ध्वतः केषु स्थानेषु चरति कथं वा तत्र गतिकृतो भवत्यहोरात्रपरिमाणविभाग इत्याद्युपेलायामह
ते अंतरेणांतरिक्षं तदुभयसंधितं॥ यन्मध्यगतो भगवांस्तपतां पतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभा
सयत्यात्मभासा॥ स एष उदगयनदक्षिणायनवैषुवत्संज्ञाभिर्मांद्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोह
णसमानस्थानेषु यथासवनमभिपद्यमानो मकरादिषु राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते॥३॥
यदा यस्मिन्नंतरिक्षमध्यगतसूर्य उदगयनादिसंज्ञाभिर्मांद्यादिगतिभिरारोहणादिस्थानेषु यथाकालमारोहणादिकमभिपद्यमानः मकरादि
षु राशिषु वर्तमानः अहानि रात्रिश्च दीर्घह्रस्वसमानानि धत्ते कुरुते मार्गेऽस्य अत्यापन्नावतव्यपीति मंडलयोरंतरं तयोरारोह
णावरोहाभ्यां भानोः सूक्ष्मा गतिरिति श्रीवैष्णवपुराणोक्तरीत्यापोषामहर्तारात्म्यं यत्तन्मध्यवहिर्वलयत्रयाकारे अप्यतिपातकुंडलो
कारे रेखामयपञ्चवासिंरवक दक्षिणावर्ते कुंडलीभूतसर्पाकारे भगवद्रात्मके शिशुमाराख्ये कालचक्रे क्षिप्तिरस्य होरणावरोहणसमप
स्थाने वृत्तवलयवाद्यवलयमध्यमवलयेष्वपि उदगयनादिसंज्ञाभिर्मांद्यादिगतिभिर्यथासवनमीश्वरादिष्टकालमनतिक्रम्याभिपद्यम
नय्यारोहणमकरादिषु राशिषु मासस्य मकाराद्याकारे रेखामयमंडलेषु चंद्रात्रामिश्रवतया चरत्नहरादीनकृत्वानि दीर्घाणि समानानि च

आ.पं.
५४

कुरुतेतत्र वृद्धिर्वेलयादंतर्वेलयगमनमारोहणंतदेवोदगयनमारोहे चचिरगतिमार्गस्य राशिकृतत्वमुक्तत्वादंतर्वेलयाद्बहिर्वेलयगमनम
वरोहणंतदेवदक्षिणायनंअवरोहे चद्रुतगतिर्गतिमार्गस्य राशीनामल्पायत्वात्समवस्थाशाहूनि दिवसमध्यमवलये गमनंसमवस्थि
तिस्तदेवविषुवस्थितिः तत्रसमगतिमार्गस्यराशीकृतस्यसाम्यात् आरोहणादिकंध्रुवेणमुच्यमानोनपुरारस्मिन्युगेनतुतस्यैववाद्यतः
प्रवृत्तेमतेमंडलानिवेति आरोहणोचिरगत्यैवादिनवृद्धिरात्रिक्षासस्रवत्ति ॥ अवरोहणोद्रुतगमनेक्रांतिक्रामरात्रिवृद्धिस्समवस्थित
वाहोरात्रस्यसाम्यमितिभेदः ॥ एतदेवप्रतिपादयितुंतावत्कासुराशिषुचरत्यहोरात्रस्यसाम्याधिकंविधत्तेगतिशंकायांमरात्रिक्ष
तसाम्याधिक्यविभागमाहयदेति ॥ यदावृषभादिषुवृषभअश्विन्यादियोसांतामुत्तवृषभमिथुनककर्कटकसिंहकन्यासुराशिषुपंचसुयदाच
रतितदाहान्येववर्द्धंतेनतुरात्रयइत्यर्थः ॥ यदापिवृषभमिथुनयोरेवान्त्योवृद्धिःकर्कटादिषुक्षासः ॥ तथापिरात्र्यपेक्षयाधिकत्वाद्वर्द्धंत

यदावृषभादिषुपंचसुराशिषुचरतितदाहान्येववर्द्धंतेक्रमतिचमासिमास्येकैकाघटिकारात्रिषु ॥ ० ॥

इत्युक्तंक्रमतिचेतिमासिमासिरात्रिषुएकैकाघटिकाक्रमतिवाहासुएकैकाघटिकावर्द्धतेचेत्यर्थः ॥ वृश्चिकधनुर्मकरकुं
भराशिषुपंचसुवर्त्ततेचरतितदाहोरात्राणिविपर्ययाणिरात्रयोवर्द्धंतेहानिक्रमंतीत्यर्थः पूर्ववदिनापेक्षयात्रक्षासोबोध्यः अत्रा
प्येकैकाघटिकारात्रिषुवर्द्धतेहक्रमतिइत्यनुगंतव्यम्इदंस्थूलदृष्ट्योक्तंवृद्धिहासयोःप्रतिमासवैषम्यात् ॥ अपतातिर्विकंवृश्चिक
मकरादयावद्दिनदिवाणायवपर्यंतमहानिवर्द्धंतेरात्रयोक्रमंतितततूत्तरायणपर्यंतवहानिक्रमंतिरात्रयोवर्द्धंतेत्यर्थः ॥ एतदेव
प्रपंचितंप्राक्वैलवेअयनेस्यातरस्यादोमकरंयातिभास्करःततःकुंभंवमीनंचराशिराशेरनंतरंद्विजत्रिषुएतेषुचवनुकेषुततोवैषुव
तंगतिप्रयातिसविताकुर्वन्रात्रंततःसमंततोरात्रिःहसंपयातिवर्द्धतेउदिनदिनंततमेषमिथुनस्यांतेपरांकाष्टामुपागतःराशिकर्के ५४

रर्के ऽप्याक्रान्ते दक्षिणायने कुलालचक्रपर्यंतो यथाशीघ्रं प्रवर्तते अतिवेगतया कालवायुवेगगतिश्चरन् तस्मात्स्वल्पेनापि तु काले
नाल्पेन गच्छति ॥ त्रयोदशाहःशनिः पोषान्मुक्ते दक्षिणायने त्रयोदशार्द्धमलानां क्रमसमाचरते ततो द्विजमुक्तैर्नक्षत्राणि वदन्ति नक्षत्रमध्यादशेश्चरन्
कुलालचक्रमध्यस्थो यथा मंदं प्रवर्तते तथोदगयने सूर्यः सर्पते मंदविक्रमः तस्माद्दीर्घेण कालेन भूमिमल्पां च गच्छति अष्टादशमुहूर्तेऽहन्
रायणं प्राप्य मध्येऽहो भवति तत्रापि चरते मंदविक्रमः त्रयोदशार्द्धमह्नां वै कक्षाणां चरते रविः मुहूर्तैस्तावदृक्षाणि रात्रौ द्वादशभिश्चरन् ॥ अ
तो मंदतरं नाभ्यां चक्रं भ्रमति वै यथा कुलालचक्रनाभिस्तु यथा तत्रैव वर्तते ध्रुवस्तथा हि मैत्रेय सततैव परिवर्तते उभयोः काष्ठयोर्मध्ये
गतो मंडलानि तु दिवा नक्तं च सूर्यस्य मंदा शीघ्रा च वै गतिः ॥ एकप्रमाणमेवैष मार्गं याति दिवाकरः अहोरात्रेण यो भुंक्ते समस्ता राशयो
द्विज षडेव राशीन् यो भुंक्ते रात्रावन्यांश्च षट् दिवा राशिप्रमाणजनिता दीर्घह्रस्वात्मना ततः तथा निशायां राशीनां प्रमाणेन लघुदीर्घे
यदा वृश्चिकादिषु पंचसु वर्तते तदा अहोरात्राणि विपर्ययाणि भवंति यावद्दक्षिणायनमहानि वर्द्धंते यावदुद
यनं रात्रयः ॥ ४ ॥ एवं नव कोटय एकपंचाशल्लक्षाणि च योजनानां मानसोत्तरगिरिपरिवर्तनस्य पादप्रान्ते ॥ ४
ता दिनानां ते दीर्घह्रस्वत्वं तन्नागेनैव वजायते उत्तरे प्रक्रमे पश्चाद्यानि प्रिमंदा गतिर्दिवा दक्षिणायने सैव विपरीता विवस्वाय दा मेषतुल
यो वर्तते तदा अहोरात्राणि समानानि भवंति इत्यनेनोत्तरायणे मेषमासे साम्यमहोरात्रस्य दक्षिणायने तु लमासे साम्यमित्युक्तं ॥ एतदे
व स्पष्टीकृत्य वेष्टुकं ॥ तुलामेषगते ॥ भानुसमरात्रिदिने तु तत् इति एवं सूर्यस्य मंदाद्गतिभिरहोरात्रपरिमाणविभाग उक्तः ॥ अथाहोरात्रप
रिमाणविभाग उक्तः अथाहोरात्रविभागात्परिमाणविभागो यथा पर्यंमानसोत्तरमेरू परि भ्रमतां सूर्येण कतियोजनानि परिभ्रमिता
नि भवंति इत्यपेक्षायामाह एवं चेति ॥ एवं मंदाद्गतिभिर्मानसोत्तरगिरिपरिवर्तमानस्य मानसोत्तरगिरिशेपरिवर्तमानस्य योजनानां ते
न परिभ्रमणमानां योजनानां नवकोटय एकपंचाशल्लक्षाणि चेत्युपदिशंति इत्यस्यार्थः ॥ अथोदयास्तमयादिस्वरूपं विवक्षुस्तत्प्रोदा

श्री॰पं॰ तस्मिन्मानसोत्तरगिरौ मेरोः पूर्वस्मात्पूर्वस्मिन्दिशि देवधानी नाम पुरी दक्षिणदिशि नाम्नी संयमनी पुरी पश्चिमे वारुणीं नाम वरुणाधिष्ठि
१५ तां निम्लोचनीं नाम उत्तरतः सौम्यां सोमाधिष्ठातां विभावरीं नाम पुरीं उपदिशं तानि पूर्वेशान्त्वयः॥ ऐंद्रीमिति इंद्राधिष्ठितां इंद्रेण रक्ष
माणामित्यर्थः तथा याम्यामिति यमेन पाल्यमानामिति ज्ञेयं त्र्ययोदयादिकमाह तास्विति॥ तासु देवधान्यादिचतसृषु पुरीषु चतु
र्दिशं चतुर्दिक्षु समयविशेषेण कालविशेषेण भूतानां मंडलस्थानां प्रवृत्तिनिवृत्तिनिमित्तानि व्यापारतदभावनिमित्तानि
उदयादीनि भवंति तत्र मध्याह्नानि प्रवृत्तिनिमित्तानि उदयादीनि प्रवृत्तिनिमित्तानि निशीथादीनि निवृत्तिनिमित्तानि तदा भूतानां सुप्तत्वादिति विवेकः
श्रीदिग्वासस्थैर्वर्णितं रात्रे भीमगाविवक्षितं मेरोश्चतुर्दिशमित्यस्याः पंभावः यानि मेरोर्दक्षिणतस्तानि तेषामैंद्रीमारभ्य पूर्वोदयोदिक्प्रातःक्रमेण

तस्मिन्नैंद्र्यां पुर्यां पूर्वस्यां मेरोर्देवधानीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चाद्वारुणीं निम्लोचनीं नामोत्तर
तः सौम्यां विभावरीं नाम ॥ ९ ॥ तासूदयमध्याह्नास्तमनिशीथानीति भूतानां प्रवृत्तिनिवृत्तिनिमित्तानि समय
विशेषेण मेरोश्चतुर्दिशं तत्रस्थानां दिवसमध्यंगत एव सदादित्यस्तपति सव्येनाचलं दक्षिणेन करोति ॥ ७ ॥

उदयादयश्चत्वारो भवंति॥ यानि पश्चिमतस्तेषां याम्यामारभ्य यान्युत्तरतस्तेषां वारुणीमारभ्य यानि पूर्ववत्तस्तेषां सौम्यामारभ्येति ज्ञेयमिति मेरो
स्थितानां तु नो दयादिकमस्तीत्याह तत्रस्थानामिति॥ तत्रस्थानामिति मेरोस्थितानां भूतानां आदित्यः दिवसमध्यगत एव मध्याह्नगत एव सदा
विदधानः आपादयन् तपति प्रकाशयते किंच॥ सर्वेषां ग्रहाणां पवर्गाणां मेरुं उत्तरं करोति ॥ स्यादिह सव्येनेति श्लोकादित्यं प्रपश्यतां सव्येन स्थितं मेरुमादित्य
स्य दक्षिणभागे स्थितं करोति दृश्यपेः यत्र यत्र यद्यदस्यादित्यस्यैव तत्र तत्र प्राचात्यस्य च वामतो मेरुस्तिष्ठतीति भाव समयविशेषेरित्यस्यायमभिप्रायः
उदयास्तमने चैवं सर्वकालं तु सुमेरवे दिशान्वयोषां सुचतयामैत्रेयाविदिशासु च येषं त्रेदप्रतेभास्वान्स तेषामुदयस्मृतः तिरोभावं च यत्रेति तत्रैवा श्रमः
तमनं रवेर्वैवास्तमनं के स्यनोदयमस्तं वेदा ततत्त्वदयास्तमनाख्यं हि दर्शनादर्शनं रवेः प्राकारादीनां पुरेति हन्यस्य शास्त्रे पश्चाद्वरत्वयं विकोशरणस्यस्त्रा नको ० १५

गात्रदेपरेतथास्तिविसुवराशेकरीत्यादक्षिणावर्तप्रवाहस्य वायुनाभ्रममाणज्योतिश्चक्रवशादतिदूरतोभूतं लग्नस्यैव कालविशेषे दर्शनामुद
यः श्रीकाशमारूढस्यैव दर्शनं नमध्याह्नं भूमिप्रविष्टस्यैव दर्शनमस्तमयतनोतिदूरगमनेनिमिषाप्य इति कालविशेषकृताविर्भावादिकमेवोदयादिक
मितिरवभुम्यो वा रापप्रातरुदेतिश्चापमायं प्रविशतिरितिश्रोत अ वद्वारोपि समुद्रतीरस्थदृष्टिकृतमानसोतरेभ्रमतोरवेरप्युदयो संभावा
दितिभावः ॥ ७ ॥ पूर्वोक्तमप्युदयास्तमनादेर्नियमं दर्शयति यत्रोदेतीत्यादिना यत्र लंकायामित्यादिपुरे उदेति उदयं प्राप्नोति दृष्टो भवतीति यावत् तस्य उदय
स्थानस्य समानसूत्रनिपाते वा रुणपं निम्लोचत्यस्तं गच्छति नतियेगदर्शनं प्राप्नोतीत्यर्थः यत्र हि याम्यादौ पुरी स्पंदेनाभितपति स्वेदोन्नतमेनाभि

प्रत्योदेति तस्य हि समानसूत्रनिपाते न निम्लोचति ॥ यत्र क्वचन स्पंदेनाभितपति तस्य हि समानसूत्रनिपाते
प्रस्वापयाति तत्रगतं न पश्यतीपुंतमनत्र परे परत्र ॥ ८ ॥ पश्चाद्वैंद्र्याः पृथ्व्याः प्रचलते पंचदश घटिकाभिर्याम्यो
न पादकोटिद्वयं योजनानां सार्द्धद्वादशलक्षाणि साधिकानि वोपयाति ॥ ९ ॥ एवं ततो वारुणी सौम्या मैंद्री च पु
नस्तथान्ये च मद्राः सोमाद्यो नदत्तैः समद्रज्योतिश्चक्रे समनमप्युद्यंति समहवा निम्लोचंति ॥ १० ॥

तियतिमध्याह्नात्स्य
तो भवतीयावत् ॥ तथ भगवान स्वर्यस्तस्य समानसूत्रनिपाते स्पृनाधिक देशे सौम्यादौ पुरेस्थितेप्रस्वापयति याम्यदिक्स्थितानामर्द्धरात्रं करोति
त्यर्थः यथा याम्यादिदिक्स्थिताः स्त्रलंगतं सूर्यं स्वयुपश्यरन तेतत्रगत सौम्यादिमातंनपश्यति एवं याम्यादिपुरीपुरीषु उदयादिनियमो द्रष्टव्यः ॥ ८ ॥
यावत्सुउदयादिद्रशानियमउक्तः ॥ स्तयेंद्रादिपुर्योः याम्यादिपुरी किंयता कालेन कति योजनानि गच्छतीति पंत्वायामाह यदैतियदा ऐंद्र्याः पुर्याः
प्रचलति निष्क्रांतो भवति तदा पंचदश घटिकात्मकेन कालेन त्रैराशिकगणितेन योजनानां सार्द्धद्वादशलक्षाणि साधिकानि पंचविंशतिसह
स्राधिकानि सपादकोटिद्वयं पंचविंशतिसहस्राधिक कोटिद्वयं चातिक्रम्येति शेषः याम्यां पुरी उपयाति ॥ ९ ॥ एवं ततो याम्यया प्रचलति एवमुक्तक

भा.पं.
२६

लेनउक्तयोजनानि वारुणीं प्रतीं गच्छति एवमन्यत्रापि योज्यं एवं सूर्यस्योदयास्तमयादिस्वरूपं तद्देशनियमं कालपरिमाणं योजनपरिमाणं चा
भिधायाथसोमादीनामपिग्रहगणानामुदयादिकमाह तत्रचेति ॥ ज्योतिषचक्रेण तारागणेन सह वर्त्तमाना अन्ये सोमादयो ग्रहा अपि नक्षत्रै रश्मि
भ्याशिभिः सह तथा सूर्यवद्दिङ्मुखादिपरिवर्त्तनमनुभवन्त्युद्यन्ति अस्तं गच्छन्ति उदयं प्राप्नुवंति महेवनिम्लोचत्यस्तं प्राप्नुवंतीत्यर्थः यद्यपि वस्तुतः
सूर्यस्यापि नक्षत्रैः सहैव उदयास्तमयौ तथापि तस्योहित्वादर्शनात्सोमादीनामेव तत्साहित्यमुक्तं इति भावः ॥२०॥ पंचदशघटिकाभिः सपादको
टिद्वयं साधिकानि सार्द्धद्वादशलक्षाणि योजनानि याति गच्छतीत्युक्तं ॥ तत्रैकैकेन मुहूर्त्तेन कति योजनानि गच्छतीत्यपेक्षायामाह एवमिति ॥ त्र
यीमयस्त्रय्युपास्यत्वात् एकं वेदरूपेणोपास्यः सौरो रथः एकमुहूर्त्तेनाष्टशताधिकचतुस्त्रिंशल्लक्षयोजनानि चतसृषु देवधान्यादिषु पुरीषु परिस्थि

एवं मुहूर्त्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्त्तते पुरीषु
यस्यैकं चक्रं द्वादशारं षण्णेमि त्रिणाभि संवत्सरात्मकं समामनंति ॥२१॥ तस्याक्षो मेरोर्मूर्द्धनि कृतोत्तरभा
गो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयंत्रचक्रवद्भ्रमन्मानसोत्तरगिरौ परिभ्रमति ॥२२॥

कोसौ सौरो रथः एकेन मुहूर्त्तेन यः परिक्रमते तत्राह यस्येति सौरो रथ यस्यैकं चक्रं संवत्सरात्मकं समामनंत्युपासते च कं विशिनष्टि द्वादशमासा अराय
स्य षट् ऋतवो नेमयो यस्य त्रीणि चातुर्मास्यानि नाभयो यस्य तदमष्युपासनार्थमेवोक्तं ग्रामाद्यादिरूपेण संवत्सरेण रूपेण चोपास्यमानमित्य
र्थः ॥२१॥ सौरो रथः परिवर्त्तत इत्युक्तं स किं निरवलंब एव परिभ्रमतीत्यत्र विशिनष्टि तस्येति यस्य रथस्याक्षो मेरोर्मूर्द्धनि कृतमूलः अवरुद्धो
ष्वोपश्चिम्यात् तत्स्थिता या परिवर्त्तते राच्छिद्रितो योत्तरस्यत्रापि परपरयोमानसोत्तरे कृतेतरभागः मानसोत्तरगिरौ संलग्नो द्वितीयपरिवाद्युवदष्टमोक्षो
त्तरभागः वासुनानिवद्धेतरभागः अस्यायुतार्द्धमात्रो धुर्यत्वाभ्यंतान्मानसोत्तरगिरेर्मेरोश्चतुरशीतियोजनोच्छ्रायत्वात् अततत्स्य साम्याउपपत्तेको

२६

नभागो यो तं सतरविरथचक्रं तैलयंत्रवन्मानसोत्तरगिरौ परिभ्रमति ॥१२॥ तस्मिन्नक्षे चक्रस्थाने कृतमूलः निर्विष्ट पूर्वभागः द्वितीयोऽ
क्षः ध्रुवमोदः मेरुमानसोत्तरायतः साईसप्तलक्षोत्तरसार्द्धकोटियोजनप्रमाणः तस्य तुर्यमानेन सार्द्धसप्तत्रिंशल्लक्षसहस्राधिकैकोनचत्वारिंश
ल्लक्षयोजनमानेन संमितः परिमितः ध्रुवे कृतः वायुपाशेन बद्ध उपरिभागो यस्य तथाभूतः तं निदर्शयति तैलयंत्राक्षवत् ॥ तैलयंत्राक्षस्य सं
तेन ज्ञातव्यम् इत्यर्थः ॥१२॥ तेन योजिता सप्त हयाः गायत्र्यादिनाः छंदोनामानः देवं द्योतमानमादित्यं वहंति गतप्रदेशं प्रापयंतीत्यर्थः ॥ अ
थ नामानि निरुक्तौ वेदसंबुद्ध्या रोतज्ञातानि हयाः सप्तसंज्ञा छंदांसि तेषां नामानि गायत्री च बृहत्युष्णिक् जगती त्रिष्टुवेव च अनुष्टुप् पंक्तिरित्यु
क्तः छंदांसि हरयो रवेरिति एको वा द्विः सुमंगलस्त्यादिवत् सप्तनामानः स्युच्यते तथा चैकरूपा गायत्र्यादिसप्तनामानोऽश्वा वहंतीति नवे

तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुर्यमानेन संमितस्तैलयंत्राक्षवद् ध्रुवे कृतोपरिभागः ॥१३॥ रथनीडस्तु षट्
त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावान् रविरथयुगो यत्र हयाश्छंदोनामानः सप्तारुणयोजिता ॥
वहंति देवमादित्यं ॥१४॥ पुरस्तात्सवितुररुणः पश्चाच्च नियुक्तः सौत्ये कर्मणि किलास्ते तथा वालखिल्या ऋ॥

थनेकोऽश्वो वहति सप्तनामेति प्रतिविशेष इति चेदुच्यते ॥ एकस्त्वनेकरूपेणोच्यते अश्व इति जात्यभिप्रायकत्वनिर्देशः एको द्वौ हि
सुमंगलस्त्यादिवत् सप्तनामेत्यादि सप्तनामानः स्युच्यते तथा चैकरूपा गायत्र्यादिसप्तनामानोऽश्वा वहंतीति इत्यर्थः ॥ उपर्वहणा ॥ उ
सारणादेव हि प्रत्यर्थनिर्णय इति तेषां गायत्र्यादिनामकत्वं तदुपासनार्थमुक्तं ॥१४॥ अरुणयोजिता देवं वहंतीत्युक्तं कुत्र स्थितोऽश्वान्
योजयति इत्यत आह पुरस्तादिति ॥ सवितुः पुरस्तात् अरःस्थितोऽरुणः सौत्ये अश्वयोजनरूपे कर्मण्यास्ते इत्यर्थः पुरस्तात्स्थितोऽश्वान्योजयति
इत्यत आह ॥ पुरस्तादिति ॥ सवितुः पुरस्तात् अरःस्थितोऽरुणः सौत्ये अश्वयोजनरूपे कर्मण्यास्ते इत्यर्थः पुरस्तात्स्थितोऽपि किं तु सवितुरभिमु

भा० ५
५०

तोवतंतेत्याद्दुपरत्नाद्वु नियुक्तपरत्नात्स्थितोपिवत्स्वडुमुखस्थात्तेयद्वायत्सूर्यस्यपुरस्तस्यैवपश्चिमत्वादित्युक्तंएवंवालिखिल्याऋषयोपि
वाङ्गुष्ठमहस्त्रसंख्याता अंगुष्ठपर्वमात्रास्तास्वयेस्यपुरतोरथेस्थिताःसूक्तवाकावाकउक्तिसूक्तरूपोवाकःसूक्तंवाकनस्मेतुभाषितरूपोत
येसंलक्तत्वेस्तितयावत नियुक्ताःस्वादिष्टाःसततस्पूर्यंसंस्तुवंति॥१५॥तथान्येऋष्यादयसप्तगणाएकैकशःचतुर्दशचतुर्दशद्वंद्वशःसासेमासेम
सेएषस्वात्मानंभिरादित्यंसउपासत इत्यन्वयःतत्रग्रामणयोयक्षाःकर्णपरेततमादित्यमात्मानंसर्वैःपादिग्विभात्वादात्मानभगवदात्मकत्वा
दात्मानंमासमेदभिन्नानामानंकर्णपरेततःपृथकनामानःपरस्परविलक्षणानामानएषपकर्माणिरासीवेसवेपंचितानिस्तुवंतिऋषयस्त

ऋषयोंगुष्ठपर्वमात्राः षष्टिसहस्राणिपुरतःसूक्तवाकायनियुक्ताःसंस्तुवंति॥१५॥तथान्येऋषयोगंधर्वाप्सर
सोनागाग्रामण्योयातुधानादेवाइत्येकैकशोगणाःसप्तचतुर्दशमासिमासिभगवंतंसूर्यमात्मानंएकपृथक्
नामानःपृथक्कर्मभिर्द्वंद्वशःउपासते॥१६॥लक्षोत्तरसार्द्धनवकोटियोजनपरिमंडलंभूवलयस्यक्षणेनसगव्यूत्त
रंद्विसहस्रयोजनानिसभुंक्ते॥१७॥

वेगंधर्वैर्गीयतेपुरस्नृत्यंत्यप्सरसोपयांतिनस्य चातुर्निशाचराःवहंतिपन्नगायक्षैःक्रियतेभीष
संस्तवःवालिखिल्याःसत्वैवेनपरिमार्यसदासततसत्यादिनायद्यप्यत्रमासिचतुर्दशचतुर्दशउपासतइतिश्रुतीयेतुग्रावेसवेतुसप्तसप्तेतुतथा
दिसततदाधिष्ठितादेवैराष्ट्रित्योमुनिभिस्तयागंधर्वैरप्सरोभिःस्वग्रामण्ययक्षाराक्षसैःधाताकृतस्थलीवेववासुलस्त्योवासुकिस्तथारथकृत्स्ना
मयावोतिस्तवंमरुत्स्वेवमसमःएतेवसंतिवैचित्रेमधुमासेसदेवहिमेवेस्पंदनेमानोमसप्तमासाधिकारिणःअर्यमापुलहस्चैवरथौजाः
पुंजिकस्थलीःप्रहेतिकच्छनीरस्वनारदस्वरथेचरंःमाधवेनिवसंत्येतेषुकसंज्ञेनिबोधमेमित्रात्रिस्तक्षकौकस्तपौरुषेयोपसेनकाःमहासथ
स्वनस्वैवमेवेयेतेवसंतिवैस्त्यादितथाप्येकैकस्मिन्मासाधिकारिणोगणाप्रधानमतःसप्तवेलवैकाप्यताइत्यतोनविरोधःपूर्वोमानमोततंय
१६

तीस्कंकं कतिकियता कालेन कतियोजनानि गच्छतीत्यश्क्तमेव मुहूर्त्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानीति कदाचिल्लक्षोनक
तियोजनानि गच्छतीत्यश्चाह चलोनत्रिंशन्नितिनवकोट्येकपंचाशल्लक्षयोजनपरिमितं सूर्येण परिभ्राम्यमाणं भूमंडलं तस्यैतस्य भूवलय
स्य कोटिद्वयोधिक सार्द्धयोजनानि स्पर्द्धः क्षणेन कालेन भुंक्ते गच्छतीत्यर्थः ॥१७॥ इति पंचमे एकविंशतितमः ॥२१॥ पूर्वमादित्यो नक्षत्राभिमु
खं मेरुं कराशिषु राशिषु चरतीत्युक्तं तथा मेरुं ध्रुवं च परिवर्त्तत इति चोक्तं तदिदं गतिद्वयं युगपदेकस्याघटमानमुक्तानुवादपूर्वकं स
गच्छति राजा ॥ यदेतदिति ॥ यदेतदादित्यवर्णितमित्यंतेन मुक्तानुवादः अमुष्येत्यादिना प्रश्नः भगवता त्वे यायदत्तद्रूप वर्णितं केतन्मेरुं ध्रु
वं च प्रदक्षिणेन परिक्रमतो भगवतोऽस्यादित्यस्य पुनः राशीनामभिमुखं न तत्राभिमुखं वतयाराशिषु प्रचलनं इत्येतत् द्वयं विरुद्धममुष्य

॥ इति श्रीभागवते महापुराणे पंचमस्कंधे एकविंशोध्यायः ॥२१॥ राजोवाच ॥ यदेतद्भगवत आ
दित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रामतो राशीनामभिमुखं प्रचलितं चाप्रदक्षिणं भगवतोपवर्णितम
मुष्य वयं कथमनुमिमीमहीति ॥१॥ स होवाच यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपी·

तद्येस्य कथमनुमीमहे कथमुपपन्नं भवतीति विश्वस्यामइत्यर्थः ॥१॥ एवमापृष्टो बादरायणिराह स्मेति स होवाचेति श्रीशुको किमाह ॥ य
थेत्यादिना राशिपृष्ठतरे चोपलभ्यमानत्वादित्यंतेन विरुद्धमप्येकस्य गतिद्वयं उपपन्नमिति सदृष्टांतमाह ॥ यथेति ॥ भ्रमता कुलालचक्रे
ण सह भ्रमतां कुलालचक्राश्रयाणां पिपीलिकादीनां गतिरन्यैव दृश्यते दृष्टांतेपि कथं तत्राह प्रदेशांतरे चक्रस्यैव प्रदेशांतरे चक्र
स्यैव उपलभ्यमानत्वात् पिपीलिकादीनां इत्यन्वयः यदि गतिरनगत्या तर्हि प्रदेशांतरेणोपलभ्येरन् अतः यत्पलंभात् गतिरन्यैवेत्यर्थः
एवं दृष्टांते प्रदर्शितं गतिद्वयं दार्ष्टांतिके माव्यति एवमिति एवं नक्षत्रराशिभिरुपलक्षितेन विराजमानेन नक्षत्रादीनामव

भा० पं० स्थाभावात्तदाश्रयं कालचक्रं स्वनुमापयन्नित्यभिप्रायेणाह उपलक्षितेनेत्युक्तं मेरुध्रुवं च प्रदक्षिणेन परिभ्रमता कालचक्रेण शिशुमारेणाप
५८ रिभ्रमतां तदाश्रयाणां कालचक्राश्रयाणां सूर्यादीनां ग्रहाणां नक्षत्राभिमुखत्वं तत्प्रयाणे पिपुरहितगतिरन्या उपपद्यते एवं कृतं नक्षत्रांतरे
रथांतरे चोपलभ्यमानत्वादित्यन्वयः ॥२॥ एवं प्रश्नस्योत्तरमभिधायाप्य सूर्यरूपेणावस्थितस्य भगवतस्तत्त्वं गृणीष्य मध्यमो राध्यत्वं स्वग
त्या संवत्सरस्य त्रयुम्मासपक्षदिवानक्तादिरूपेण कालविभाजकत्वं चाह स इति ॥ भगवानादिपुरुषः जगत्कारणं स तेन नारायणेनैव स
सूर्यरूपेणावस्थितः अथ यदादित्योऽहिरण्मयः पुरुषो दृश्यत इत्यत्र मतिः सूर्यस्य भगवदात्मकत्वश्रवणान्न शरीरात्मभावविति
लिकादीनां गतिरन्यैव प्रदेशांतरेष्वप्युपलभ्यमानत्वात् एवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं
मेरुं च प्रदक्षिणेन परिधावता सह परिधावमानानां तदाश्रयाणां सूर्यादीनां गतिरन्यैव नक्षत्रांतरे राश्यंतरे चोप
लभ्यमानत्वात् ॥२॥ स एष भगवानादिपुरुष एव साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मवि
शुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसंतादिष्वृतुषु यथोपजोषमृतुगुणा
न्विदधाति ॥३॥ एवंभूतं स एष नारायण इति समानाधिकरणेनैवमादित्यवर्णो भगवान्नारायणो लोकानां स्वस्तये त्रयीमयं तं कालनियमेन क
र्मणो विशुद्धेर्याथातुल्यस्य निमित्तं साधुलक्षणा यमात्मानं द्वादशधा विभज्य वसंतादिषु षट्सु ऋतुषु यथोपजोषं यथाकर्मभोगमृतुगुणान् शीतातपवातान्
वर्षादीन्विदधाति करोतीत्यन्वयः तत्र द्वादशधाविभागो नामादित्यस्य चक्रे प्रतिमासमृतुगणविधानोपयुक्तकर्मकल्परूपस्थानेनानुप्रवेशः मा
सि मासि रविविशेषोपसत्तृत्वान्तमिदानीं त्रयीमयी विष्णुशक्तिः स्वस्थानं करोति वै विष्णुशक्तिरवस्थानं सदादित्ये करोति सा न केवलं रवेः शक्तिर्वै
ष्णवी सा त्रयीमयी एवं सात्त्विकी शक्तिर्वैष्णवी या त्रयीमयी ॥ अतः स त्रिगतापेतं भास्वंतमधितिष्ठतीति ५८

द्यावापृथिव्योस्थितः ज्योतिश्चक्रलादानीतिखरश्मिभिः ततः समस्तजगतां वामं नयति वाखिलं इति श्रीवैस्नवपुराणोक्तेः त्रयीमयत्वं नाम श्रात्रेयेण त्रय्या
तद्रूपत्वं तदपि चोक्तं तत्रैव ऋचस्तपंति पूर्वाह्णे मध्याह्ने च यजूंषि च बृहद्रथंतरादीनि सामान्यह्नःक्षये रवेः अंगमेषा त्रयी विष्णोः ऋग्यजुःसाम
संज्ञितेति कर्मत्वतो विदधातीति वेदेन तज्ज्ञैः कविभिश्च विजिज्ञास्यमानः वेदैर्वेद्यमानः कविभिरुपास्यमान इत्यर्थः ॥ तत देवो यथापादयति तमभि
ति ॥ तमेतमिति तमादित्यरूपेणावस्थितं भगवंतं इह लोके पुरुषा वर्णाश्रमाचारानुवर्तिनः त्रय्या विद्यया पाश्रद्धया यजंतः त्रय्या यजनमेव प्रपंचयति
उच्चावचैः कर्मभिरिति योगवितानैः स्वातिउच्चावचैर्नानाविधैराम्नातैर्दिकोः कर्मभिर्यज्ञादिभिः योगवितानैः उपासनविस्तारैश्च आम्नातैः श्रि
ति पूर्वोत्तराभ्यां संबंधः तेन वैदिके रूपासके प्रत्यर्थः यजंत आराधयंतो ञ्जसा सुखेन श्रेयश्चाप्नुयः स्वर्गमोक्षादिरूपं समधिगच्छंतीत्युक्तं

तमेतमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमाचारानुपथा उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्च श्रद्धया य
जंतोंजसा श्रेयः समधिगच्छंति ॥ ६ ॥ अथ स एष आत्मा लोकानां द्यावापृथिव्योरंतरेण नभोवलय
स्य कालचक्रगतो द्वादश मासान् भुंक्ते राशिसंज्ञान् संवत्सरावयवान् मासः पक्षद्वयं दिवा नक्तं चेति सपादर्क्षद्वयमुपदिशंति ॥ ७ ॥

तीत्यर्थः ॥ ६ ॥ अथ पुनर्लोकानामंतरात्मा भगवानेव आदित्यरूपेणावस्थितो द्यावापृथिव्योर्मध्ये यन्नभोवलयमंतरिक्षं तस्य मध्ये यत्कालच
क्रं शिशुमारं कालचक्रं स्यमेषादिराशिषु नक्षत्राभिमुखं चरतीत्यर्थः द्वादशमासान् भुंक्ते संवत्सरावयवमात्मा मासाख्यान् द्वादश भुंक्ते उभय
तिमकरादिषु राशिषु द्वादशस्वादित्येषु चरत्सु मेषसुखाद्द्वयमासा भवंतीत्यर्थः यानेवादित्यो द्वादश संवत्सरावयवान् भुंक्ते तानेव राशि
संज्ञान् अपरिताद्विशिषं चरतीति निमित्त मासादिसंज्ञा येषां तान् संवत्सरावयवान् मासादीनां भेदेन वदंति तत्र चांद्रेणमानेन मासः पक्षद्वयमि
ति वदंति तेषामेव चित्रादिना नक्षत्रकपौर्णमासीयुक्तत्वाच्चैत्रादिसंज्ञा भवेति सौरेणमानेन सपादमहानक्षत्रद्वयमिति वदंति पित्र्येणमा

पंचमस्कंधटीका

भा॰पं॰ णतत्रद्वादशभागात्मकस्यसंवत्सरस्यषष्ठ्याषष्ठ्यात्मकेनषष्ठमंशंराशिद्वयंभुंजीतचरेत्तस्मादित्यइतिकर्तृपदंअध्याहार्यंसवैतावान्कालऋतुरात्र
९९ तेनचसंवत्सरस्यषष्ठोंशइत्यर्थः॥ अथसंवत्सरस्ययावताषण्मासात्मकेनार्द्धेनकालेननभोवीथ्यांकार्त्स्न्येचक्रस्यराशिषट्केप्रचलतितंकालम
यनमाचक्षतेयावताकालेनमकरादिषट्केसंचरितंभवतितावंतंकालमयनमाचक्षतेइत्यर्थः॥ अथचद्यावापृथिव्योर्मंडलाभ्यांसहसंहितन
क्षितिपाद्यः यावन्नभोमंडलंद्वादशराश्यात्मकंकार्त्स्न्येनयावताकालेनाद्यनवयात्मकेनभुंजीतद्वादशराश्यात्मकंकृत्स्नंनभोमंडलंनामंदा
दिगतिभिर्यावताकालेनसंचरितंभवतितंकालंसंवत्सरादिकमितिसमामनंतीत्यर्थः॥ अत्रेदमवधेयंपदार्थक्रमप्राप्तिपादिसमकोतिमवेतितस्
यावतास्षष्ठमंशंभुंजीतसवैऋतुरित्युपदिश्यतेसंवत्सरावयवः॥ अथयावतार्द्धेननभोवीथ्यांप्रचरतितंकालमय
नमाचक्षते॥ अथचयावन्नभोमंडलंसहद्यावापृथिव्योर्मंडलाभ्यांकार्त्स्न्येनसहभुंजीततंकालंसंवत्सरंपरिवत्सर
मिडावत्सरमनुवत्सरंवत्सरमितिभानोर्मांद्यशैघ्र्यसमगतिभिःसमामनंति॥ एवंचंद्रमाअर्कगभस्तिभ्यःउपरि
ष्टाल्लक्षयोजनतउपलभ्यमानोऽर्कस्यसंवत्सरभुक्तिंपक्षाभ्यांमासभुक्तिंसपादर्क्षाभ्यांदिनेनैवपक्षभुक्तिमग्रचारीद्रुततरगमनोभुंक्ते
सौरचांद्रमसयोर्यद्रूपक्रमोभवतिसंवत्सरःसौरमानेनवर्षेषट्दिनानिवर्द्धंतेचांद्रमानेषट्कंक्षीयंतेइतिद्वादशदिनमवधानादुभयोरप्यपक्षाद्भवो
भवति॥ एवंपंचवर्षाणिगच्छंतितिस्रःस्वधिकमासोभवतःततश्चषष्ठःसंवत्सरोभवतितदेवमवांतरभेदेनसंवत्सरपरिवत्सरेडावत्सरानुव
त्सरादिक्रमेणसमामनंतीति॥ एवंसूर्यस्यगतिभेदस्तत्कृतःकालविभागश्चोक्तः अथसोमर्क्षचक्रादिनांस्थानानिगतिभेदानूतत्कृतंश्लो
कत्रयमाह्निकापंचाह॥ एवमित्यादिनायावदध्यायंअर्कगभस्तिभ्योमंडलरूपेभ्यःलक्षयोजनतःउपरिष्टादुपलभ्यमानःद्रुततरगमनोतरभव
समनेचरत्यतस्यचारोमन्दअर्कस्ययावत्संवत्सरभुक्तिःसंवत्सरेणद्वादशराशिसंचारात्मिकाभुक्तिःतांपक्षाभ्यांरावभुक्तंकरोतिएवमर्कस्ययामास

र्वाग्मनेनैवमासेनसंवत्सरभुक्तिमुहूर्त्तात्मककालेनैतियावत्तत्तद्भुक्तिदिनेनैवत्रिंशन्मुहूर्त्तात्मककालेनैवकरोतीत्यर्थः ॥७॥ अथचहेराजन्नापूर्यमाणा
भिःशुक्लपक्षीयमाणाभिःकृष्णपक्षेकलाभिःविभक्ताभ्यांपूर्वपक्षापरपक्षाभ्यांशुक्लकृष्णपक्षाभ्यांपितृमनुष्याणामहोरात्राणिपाहोरात्रात्मकमेकंदिनंकु
र्वाणःसर्वेषांजीवसमूहानांप्राणःप्राणाप्यायनकरःअन्नतएवजीवःजीवयतीतिजीवनहेतुःएवंसत्तेएकमेकंनक्षत्रंत्रिंशतामुहूर्त्तैर्भुंक्तेषोडश
कलायस्यसषोडशकलःपुरुषःपूर्णःश्रीकोभगवान्मनोमयमनसोपिदेवतात्वात्अन्नमयओषधीशत्वात्अमृतमयःसर्वप्राणजीवनहेतुत्वात्देवादीनांयेप्राणा
स्तेषांमाप्यायनस्वभावत्वात्सर्वमयइतिवर्णयंतितत्स्वरूपज्ञाइतिशेषः ॥९॥ ततश्चंद्रमसउत्तस्योपरिष्टाद्विलक्षयोजनतःअभिजितासहाष्टाविंशतिर्नक्षत्र

अथचापूर्यमाणाभिश्चकलाभिरमराणांक्षीयमाणाभिश्चपितॄणामहोरात्राणिपूर्वपक्षापरपक्षाभ्यांवितन्वानः
सर्वजीवनिवहप्राणोजीवश्चैकमेकंनक्षत्रंत्रिंशतामुहूर्त्तैर्भुंक्ते ॥८॥ यएषषोडशकलःपुरुषोभगवान्मनोम
योन्नमयोमृतमयोदेवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधांप्राणाप्यायनशीलत्वात्सर्वमयइतिवर्णयंति ॥९॥
ततउपरिष्टाद्विलक्षयोजनतोनक्षत्राणिमेरुंदक्षिणेनैवकालायनईश्वरयोजितानिसहाभिजिताष्टाविंशतिः ॥१०॥
ततउपरिष्टादुशनाद्विलक्षयोजनतउपलभ्यतेपुरतःपश्चात्सहैवचार्कस्यशैघ्र्यमांद्यसाम्याभिर्गतिभिरर्कवच्चरति

णिभवंतीतियावत्प्रकृतिकालायनेकालचक्रेईश्वरेणांतरात्मत्वेनचोदितानिविशेषितानिमेरुंप्रदक्षिणेनैवनतुतेषांसव्यादिनचष्टपकन्यागतिरस्ती
त्यर्थःउत्तराषाढाश्रवणयोर्मध्यादिभिन्नामनत्तृत्रेकत्वविशेषेणष्टपककल्पितंतेनसहाष्टाविंशतिर्नक्षत्राणिभवंतीतियावच्चक्रतिश्रुतिभिन्नामनत्त
त्रपरिष्ठाद्दाक्षायणीनामिति ॥१०॥ ततोनक्षत्रमंडलाद्विलक्षयोजनतउपरिष्टाच्छुक्रःउपलभ्यतेसचार्कस्यपुरतःपश्चात्सहपुरतःसर्वगत्याभोस्माभौंन
वर्त्तेपश्चाद्भुंक्तेसहैवतुल्यमानेतुनक्षत्रेशैघ्र्यादिगतिभिरर्कंचरतीत्यर्थःलोकानांनित्यजातउकूलाएववर्तते ॥ यस्यशुक्रस्यचारेणकमप्रसनक्षत्रा

भा॰पं॰
१००

पतिक्रमेणाघायघशो वर्षं वृष्टिरनुमीयते तन मवृष्टिविघ्नं भग्न हो पप्रायमनवृष्टिर्विहंसंतं भनं य स्मान्हदीतन प्रथमायमीतित याउशन साप्तक्रेणेति प्रकारक
यनेनद्वीधावपिट्ठ यगतिरपि व्याख्यात इत्यर्थः सर्वस्य उरतः पश्चात्स वै त्रेवा घरतीति व्याख्यात गतिभावः ॥११॥ किंचिद्विशेषमाह तत इत्यादिना
ततशुक्रमंडलाद्विलक्षयोजनतत उपरि सोमस्य तो वुधः उपलभ्यमानः लोकानां प्रायेणाशुभ कृत् स्वकृत स्वशुभं दयमेव चाहयदाकार्यो ।
व्यतिरिच्यते केनामहदनवरा तितदा निघातः श्वन्नप्रायं मेघप्रावृर्यमाना वृष्टिरित्यादि रूपं भयमाशंसते सचयात ॥१२॥ ततो वधमंडलाद्विलक्षये
लोकानां नित्यसदानुकूलत एव प्रायेणा वर्षेपनचारेणानुमीयते स वृष्टिविघ्नं भग्नहोपशमः उशनश्चा व्याख्यातः ॥११॥ त
तउपरिद्वा द्विलक्षयोजनतो वुधः सोमसुत उपलभ्यमानः प्रायेणाशुभकृद्यदा कोव्यतिरिच्येत तदाति वाताभ्रप्राया
वृष्ट्यादिन्ध्यमाशंसते ॥१२॥ अतऊर्ध्वं मंगारकोपियोजनलक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकराशीन्
कादशान रूपं के यदि न वक्रेणाभिवर्तते प्रायेणाशुभग्रहो घशंसः ॥१३॥ ततउपरिष्टाद्विलक्षयोजनांतरगतो भगवान्बृ
हस्पतिरेकैकस्मिन्राशौ परिवत्सरं चरति यदि न वक्रः स्यात् प्रायेणानुकूलो ब्राह्मणकुलस्य ॥१४॥ जनउपरिष्टाद्द्वि
लक्ष उपलभ्यमानराकेकं राशिंपदाज्ञप्येतन्नक्षत्रैर्यदि न वक्रेणाभिवर्तते त्रिभिस्त्रिभिः पक्षैर्यदि न वक्रवस्यस्माद्भि भद्रादराशीनुक्रमेणानुकंजाति पूर्वे
णान्वयः श्वयप्रायेणाशुभग्रहोयमाः स च कोवेत्यर्थः यद्यपि दि न वक्रेणाभिवर्तते तदा घशंसोपि इत्यन्वयः ॥१३॥ ततोंगारकमंडलाद्विलक्षयो
जनानामंतरमुपरितनं उपरिभागं गतो भगवान् बृहस्पतिरेकैकस्मिन्राशौ परिवत्सरं परिचरति सोपि यदि न वक्रः स्यात्तर्हि ब्राह्मणकुलस्य श
यपोनुकूलस्ततो बृहस्पतिमंडलाद्योजनानां लक्षद्वयादुपरि शनैश्चर प्रतीयमान उपलभ्यमानः एकैकस्मिन्राशौ त्रिंशन्मासान्विलंबमानः सर्वे
षामेवानुकूलस्ततो नेवाद्द्वादशराशीन्स्तु पर्येति क्रमेण संचरति ना वहिः परिवत्सरैर्द्वादशजन्मादि राशिरूपवस्थानं सह चारितत्रिंशद्विंशन्मासानां गणा

१००

ततः शनैश्चरमंडलादुत्तरस्मादुपरिष्टादेकादशलक्षयोजनानामंतरे देशे सप्तर्षय उपलभ्यंते के ते ये कश्यपलोकानां शं सुखमेवानुभावयंतः संप्रस्थं
तः विष्णोर्यत्परं स्थानं परमं उत्कृष्टं ध्रुवं मंडलं तत्प्रदक्षिणाय यथा तथा परिक्रमंति परिभ्रमंति ॥ १६ ॥ इति श्रीपंचमे द्वादशः ॥ २२ ॥ एवं सूर्यादीनां गतिविशे
षात्तथा न विशेषावान्कार्यविशेषाभ्यां ज्ञात्वा ध्रुवस्य स्थानं व्यापारं चाह यथेति ॥ तस्मादृषिमंडलात्परतस्त्रयोदशलक्षयोजनानां परस्तात्त्वभि

तत उपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानः शनैश्चर एकैकस्मिन्राशौ त्रिंशत्त्रिंशन्मासान्विलंबमानः ॥ सर्वानेवा
नुपर्येति तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशांतिकरः ॥ १५ ॥ तत उत्तरस्मादृषय एकादशलक्षयोजनांतर उपलभ्यं
ते ॥ य एव लोकानां शमनुभावयंतो भगवतो विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रमंति ॥ १६ ॥ इति श्रीभागवते महापुरा
णे पंचमस्कंधे द्वाविंशतितमोऽध्यायः ॥ २ ॥ श्रीशुक उवाच ॥ अथ तस्मात्परतस्त्रयोदशलक्षयोजनांतरतो यत्तद्वि
ष्णोः परमं पदमभिवदंति यत्र ह महाभागवतो ध्रुव औत्तानपादिरग्निनेंद्रेण प्रजापतिना कश्यपेन धर्मेण च समकाल
युग्भिः सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्येहानुभाव उपवर्णितः ॥ १ ॥
स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवा

दं विष्णोः परमपदममिति विष्णोरभिव्यक्तिस्थानत्वात्परमं पदमित्युक्तं किं तत्परमं पदं तत्राह ॥ यत्रेति ॥ यत्र परमे पदे महाभागवतो औत्तानपादिरु
त्तानपादपुत्रः अग्न्यादिभिः सबहुमानं प्रदक्षिणतः क्रियमाण उपास्ते तिष्ठति तस्य ध्रुवस्यानुभावः प्रभावः उपवर्णितः चतुर्थस्कंधे इति शेषः ॥ १ ॥
स हि ध्रुवः भगवदात्मकेनानिमिषाव्यक्तवेगेन कालचक्रेण भ्राम्यमाणानां ग्रहाणां सूर्यादीनामश्विन्यादिनक्षत्राणां च सर्वेषां स्थाणुरिव निश्चितो

भा॰पं॰ ध्रुवभ्रमिवलेनैवईश्वरेणाविष्टंभत्वेनविहितिः स्थापितः प्राग्वत्सदाएकत्रैवावभासते ॥२॥ स्थाणुरिवावष्टंभः स्पेतदेवोपपादयति यथा मेढीस्तंभः त्रिभि
२०१ स्त्रिगुणितैः स्तैः संयोजिता वद्धा धान्यक्रमणपशवो वलीवर्दा मेढीस्तंभमवलंव्य स्वे स्वे मंडलानि पादविक्षेपस्थानानि चरंत्येवं नक्षत्रगणाः सूर्याद
यो महाग्रहा एतस्मिन् कालचक्रे अंतर्वहिर्योगेनापि योजिताः केचिदंतर्योजिताः केचिद्वहिर्योजिताः संतः ध्रुवमवलंव्यैव वायुना वायुपाशेनोदी
र्यमाणाः प्रेर्यमाणा आकल्पांतं परितः भ्रमंतः कर्मवशाद्वायुपाशावष्टब्धत्वात् क्वाप्यवलंवनाभावेपि न पतंतीति भावः ॥३॥ एतदेव दृष्टांतेन स्पष्टय

वष्टंभ ईश्वरेणा विहितः प्राग्वदवभासते ॥२॥ यथा मेढीस्तंभ आक्रमणपशवः संयोजितास्त्रिभिः ॥ सवनैर्यथा
स्थानं मंडलानि चरंत्येवं भगणा ग्रहादय एतस्मिन्नंतर्वहिर्योगेन कालचक्रे योजिता ध्रुवमेवावलंव्य वा
युनोदीर्यमाणा आकल्पांतं परिचंक्रमंति ॥३॥ नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्त
ते ॥ एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतंति ॥४॥ श्रीरामचंद्राय

ता नभसीति यथा मेघाः श्येनादयः पक्षिणश्च वायुनाधारवशाः कर्मसार्थयः कर्मसारथयः कर्मलंवाः नभसि परिवर्तंते न तु भुवि पतंति न तु
भुवि न पतंति एवं ज्योतिर्गणा अपि प्रकृतिपुरुषयोर्यः संवंधः कर्माधीनः ॥ तेनानुगृहीता न सत्त्वादिरूपतां प्राप्ता जीवा एव कर्माधीनप्र
कृतिसंवंधवशान्नक्षत्रादिशरीरभाजः तस्य पर्वः । अतएव कर्मनिर्मितया सा तागतयो येषामिति तथा केवलनभः ॥ संचारापादककर्माधीन
नभोपात्तगतयो भुवि न पतंति कर्मणां तत्परिणामानां चावैचित्र्यादग्नेरूर्ध्वं ज्वलनवद्वायोस्तिर्यग्गतिवन्नभसि भ्रमणं न व्यपतनं च । रा॰मा॰
उपपद्यत इति भावः ॥४॥ २०१

गवं ज्योतिर्गणानां कमीयत्वो नमस्संचारस्तत्र कः अयमवधिरस्य भगवतश्च शिशुमाराकारेणावस्थितत्वात्तदाश्रयाणां पतनशंकेव नास्तीत्यभिप्र
यन ज्योतिर्गणस्य शिशुमाराश्रयत्वं योगिनामुपासनेन संवादयति केचिदिति शिंशुमारसंस्थानस्य शिशुमारस्य शरीरस्य भगवतो वासुदेवस्य क
त्नविचित्रदात्मकजगद्व्यापारकस्य योगधारणायामुवासुदेवविषयकमननसमाधिरूपधारणायामेवेत ज्योतिरनीकं ज्योतिर्जालिके चिद्दे
देवा योगेपाभिनो वर्णयन्ति ज्योतिरनीकाश्रयं तिशिशुमारं भगवदात्मकमुपास्यबोधयतीत्यर्थः ॥ ज्योतिरनीकाश्रयशिशुमारं योगधारणायां वि
विषयीकुर्वन्तीति वार्थः ॥ ५ ॥ एतदेव प्रपंचयति यस्येत्यादिना ॥ यस्य भगवदात्मकस्य कुंडलीभूतदेहस्य सर्पवत्कुंडलीभूतो वलयीभूतो देहो
यस्य अवागधस्ताच्छिरो यस्य अवनेतोऽर्ध्वपुच्छस्येत्यवगम्यते तस्य शिशुमारस्य पुच्छाग्रे ध्रुव उपकल्पितः उपास्ययोगिभिरिति पोषाशिंशुमाराव
केचिदेतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयंति ॥ ५ ॥ यस्य पुच्छाग्रे
वाक्शिरसः कुंडलीभूतदेहस्य ध्रुव उपकल्पितः ॥ तस्य लांगूले प्रजापतिरग्निरिंद्रो धर्म इति पुच्छमूले धाता
विधाता च कट्यां सप्तर्षयः तस्य दक्षिणावर्तकुंडलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे नक्षत्राण्युपकल्प
यवेस्यत्र यस्यावस्थानं तदाश्रयत्वेन तस्यावयवस्योपासनं हतं केश्चित्तयैवाध्रुवापि कर्तव्यं तेषामवस्थितिं तत्र तत्र वक्ष्ये येत्यस्य पक्षश्रितिपा
द्यते पुच्छाग्रे हि ध्रुवो व्यवस्थितः ॥ तथा च श्रीवेसदेव पुराणे ऽत्रभानपादपुत्रः स्तन्तमाराध्य जरायतिस तारशिशुमारस्य ध्रुवः पुच्छे व्यव
स्थित इति तस्य शिशुमारस्य लांगूले पुच्छाग्रादधोभागे प्रजापत्यादयश्चत्वारो व्यवस्थिताश्चतः प्रजापत्यादयस्त्रयत्वेन लांगूलोपासन
कर्तव्यमित्यर्थः ॥ तत्र पुनस्तत्रापि प्रदर्श्य पुच्छस्य मूले धाताविधातावोपकल्पितः अत्यनुषंगः कट्यां सप्तर्षयस्तत्रापि प्रजापत्यादयश्चे
वंच व्यवस्थिताः लांगूले प्रजापतिः प्रजापतेरधस्तादग्निस्ततोऽधस्तादिंद्रः ततोऽप्यधो धर्मः इति तस्य दक्षिणावर्तकुंडलीभूतशरीरस्य द

भा॰ पं॰ क्षिणपार्श्वेयास्तुदग यननक्षत्राणपभिजिदादीनिपुनर्वस्वंतानि ॥ चतुर्दशाउपकल्पयंतिउपामतेयानिदक्षिणायननक्षत्राणिउष्याद्यान्युत्तरा
१०२ षाढांतानिचतानिवामपार्श्वेउपकल्पयंति ६ ॥ राततदेवस्यानविशेषणाविभज्यदर्शयतिदक्षिणोत्तरपार्श्वयोरवयवस्याम्यतावादाहयस्मै
कुंडलाकारःसर्पाकारःसंनिवेशोयस्यतस्यशिंशुमारस्यउभयोरपिपार्श्वयोर्येषावयवाःसमसंख्याभवंतितस्यपृष्ठेत्वजवीथिनामसर्प
स्यदक्षिणायनाख्यशीघ्रगतियोगाद्विशेषःउदयञ्चाकाशगंगानुकल्पिताञ्चादेरस्यादिनायुंजीतञ्जनुसंदधीतःभवतीत्यर्थः ॥ ७ ॥ स्था
यंतियथाशिंशुमारस्यकुंडलीभोगसंनिवेशस्यपार्श्वयोरुभयोरप्यवयवाःसमसंख्याभवंतिपृष्ठेत्वजवीथ्यञ्चा
काशगंगाचोदरतः ॥ ७ ॥ पुनर्वसुपुष्यौदक्षिणवामयोःश्रोण्योरार्द्राश्लेषेचदक्षिणवामयोःपश्चिमयोःपादयोः
अभिजिदुत्तराषाढेदक्षिणवामयोर्नासिकयोर्यथासंख्यंश्रवणपूर्वाषाढेदक्षिणवामयोर्लोचनयोः ॥ धनिष्ठा
मूलंचदक्षिणवामयोःकर्णयोःमघादीन्यष्टनक्षत्राणिदक्षिणायनानिवामपार्श्ववंक्रिषुयुंजीततथैवमृगशीर्षा
दीन्युदगयनानिदक्षिणपार्श्ववंक्रिषुप्रातिलोम्येनप्रतियुंजीतशतभिषाज्येष्ठेस्कंधयोर्दक्षिणवामयोर्न्यसे
त् ॥ उत्तराहनौयमःमुखेचांगारकःप्राणेस्थउपस्थेबृहस्पतिःककुदिचक्रस्यादित्योहृदयेनारायणोमनसिचं
द्रविशेषणाभयनकत्राणांस्थानविभागकल्पनामाह ॥ पुनर्वसुरित्यादिना ॥ पुनर्वसुरुदगयनांतस्थनक्षत्रंपुष्योदक्षिणायनस्याद्यंताउभौक्र
मेणदक्षिणवामयोःश्रोण्योरुकल्प्यौञ्जवरस्यादियंजीतानुसंधीतउत्तरायणनक्षत्रेष्वभिजिदाजिदाजिदादिषुपुनर्वस्वंतेषुपुनर्वसोरा
भिजिद्भुवणधनिष्ठादक्षिणश्रोणिपादनासिकालोचनकर्णनासिकास्थानेषुक्षेपाःमृगशीर्षरोहिणीकृत्तिकाभरण्यश्विनीरेवत राम॰
सुत्तराभाद्रपूर्वाभाद्रपादश्रवणेनक्षत्राणिदक्षिणपार्श्ववंक्तव्यानिशतभिषकदक्षिणस्कंधेदक्षिणायननक्षत्रेषुपुष्यस्तुमुत्तरायणा १०२

ङ्गेतेषु पृष्ठेवीथ रमाटाम ल्लारुद्यानि पंचनक्षत्राणि नापादानि मकालोचनकर्णास्थानेपुयोज्यानि मघादीन्युत्तराधांतानि क्रमेण सौमनक्षत्राणि वामपार्श्वयो
ज्यानि स्पेपारव्यंवामस्कंधेयो ज्यं हेतुः कपोलन्यातदेशः ख्रगस्यप्रमावपिनक्षत्ररूपेणावर्तते इत्यभिप्रायः॥ वृहस्पतिः ककुदिगलष्टष्ठे केतव इति वक्ष्ये वक्ष्ये
त्वाकारनक्षत्राणां तारामहानावा मिश्रायेण प्रथुकेशे पुस्पष्टं॥ ७॥ एवं प्रतिनियतस्थानम्नइतनक्षत्रतारामयं शिशुमारचक्रं निस्पमुपास्यमित्याह॥ एतदिति॥ एतदुहै
वरानहेसर्वदेवतामयं भगवतो विष्णोरूपेणारीरं शिशुमारचक्रं स्त्रहरहः संध्यां प्रयतसमाहिविचतो वाग्यतो मौनी सनि निरीक्षमाण उपतिष्ठनव दसमाणामंत्रेण
ज्ञ वात॥ ८॥ मंत्रमेवाहनम इति॥ ज्योतिर्षा लोकाय कालायनाय कालस्याप्रयभूताय कालचक्रस्वरूपायवास्त्र निमिषां त्रस्मादीनामपि पतये तेषामपि काल

त्रो नाभ्यामुशनाः स्तनयोरश्विनौ बुधः प्राणापानयोः राहुर्गले केतवः सर्वांगेषु रोमसु सर्वे तारागणाः॥ ७॥ एतदु हैव भग
वतो विष्णोः सर्वदेवतामयं रूपमहरहः संध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत॥ ८॥ नमो ज्योतिर्लोकाय काला
यनायानिमिषां पतये महापुरुषायाभिधीमहीति॥ ग्रहर्क्षतारामयमाधिदैविकं पापापहं मंत्रकृतां त्रिकालं नमस्यतः
स्मरतो वा त्रिकालं नश्येत तत्कालजमाशु पापं॥ ९॥ इति श्रीभागवते महापुराणे पंचमस्कंधे शिशुमारसंस्थानवर्णनो नाम त्र
योविंशोध्यायः॥ २३॥

वमयपत्वात महापुरुषायापरमपुरुषात्मने कायनमस्य अभिधीमहीति उक्तरूपमहापुरुषाध्यायमदुपस्थेयः॥ १०॥ एवं शिशुमाराकृतेर्भगवतो नुसंधाननमस्कारयोः
फलमाह ग्रहेति ग्रहर्क्षतारामयमाधिदैविकमधिदैवं वर्तमानं देवेभ्य उत्कृष्टं इत्यर्थः हरेरूपं शिशुमारं त्रिकालं नमस्यतः नमस्कुर्वतः स्मरतो वा त्रिका
लमंत्रकृतां उत्तमं त्रं जयतां वा तत्कालजं पापमाशु पापी नश्येत नष्टं भवेदित्यर्थः तत्कालजमित्यनेन तत्कृत भविष्यद्वर्तमानकालजं विवक्षितं॥ ११॥ इति
ष्या पंचमे त्रयोविंशः॥ २३॥ एवं सूर्योदारभ्य ध्रुवपर्यंतं दिवो मंडलसन्निवेशमनुवर्ण्य तेषां सूर्यादधस्तात् स्वर्भान्वादिमंडलमनुवर्णयति॥ अधस्तादित्या
दिवास्यर्यस्याधस्ताद्योजनानामयुते स्वर्भानुः राहुर्नक्षत्रवच्चरतीत्येके वदंतीति तं विशिनष्टि योसावितियो सौ स्वर्भानुर्भगवत्कृपयामरत्वं ग्रहत्वं चालभत तले

भा०पं० मेकेवलभागवतकृपयैवतस्यामरत्वादिहेतुः नतुतस्यतद्योग्यतास्तीत्याह ॥ हियतः सैंहिकेयः सिंहिकायाः पुत्रः राहुरसुराधमः अतदर्हः अमरत्वाद्यनर्हः किंत
१०३ स्यभगवत्कृपाविषयत्वोपपादकमित्यत्राह ॥ तस्येति ॥ तस्यराहोर्जन्मकर्माणिचउपरिष्टादष्टमस्कंधेवक्ष्यामनाथने स्पर्धितत्रैवस्फुटीभविष्यतिनाशवसर
इतिभावः ॥१॥ तस्यसंख्यादुपरागवान्स्वरूपंवक्तुमाह यददइति ॥ प्रतपतः तरणेः सूर्यस्ययददः प्रसिद्धंमंडलंतद्विस्तारतोयोजनायुतमयुतयोजनाविस्तृतमा
चक्षतेततः सूर्यमंडलादुपरितनसोममंडलंद्वादशसहस्रयोजनविस्तृतंसूर्यमंडलाद्बृहत्तराहोर्मंडलंतुत्रयोदशसहस्रयोजनविस्तृतमतः सूर्यसोमंड
लाभ्यांस्वर्भानोर्मंडलाभ्यांस्वर्भानोर्मंडलस्यविस्तृततयाकदाचित्सूर्यसोममंडलाच्छादकत्वंभवतीतिभावः ॥ यः स्वर्भानुरमृतव्यवधानात्कृदमृतपानदशायांपं

स्य भाग व तु वा व ॥ अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके योसावमरत्वंग्रहत्वंचालभत भगवदनु
कंपयास्वयमसुरापसदः सैंहिकेयोह्यतदर्हः ॥ तस्यतातजन्मकर्माणिचोपरिष्टाद्वक्ष्यामः ॥१॥ यददस्तरणेर्मंडलंप्रतप
तस्तद्विस्तरतोयोजनायुतमाचक्षतेद्वादशसहस्रंसोमस्यत्रयोदशसहस्रंराहोर्यः पर्वणितद्व्यवधानकृद्वैरानुबंधः सूर्याचंद्रम
सावभिधावति ॥२॥ तन्निशम्योभयत्रापिभगवतारक्षणायप्रयुक्तंसुदर्शनंनामभागवतंदयितमस्त्रंतत्तेजसादुर्विषहं
मुहुःपरिवर्तमानमभ्यवस्थितोमुहूर्तमुद्विजमानःचकितहृदयआरादेवनिवर्ततेतदुपरागमितिवदंतिलोकाः ॥३॥

तयोःसूर्यचंद्रमसोरभिधावतितावभिलक्ष्याभिमुखंगच्छतीत्यर्थः ॥२॥ तदभिधावनंनिशम्यद्वयोरुभयोरपिरक्षणायभगवतापरमपुरुषेणभागव
तेभगवद्भक्तेनवक्षितंसुदर्शनास्त्रमस्त्रंतत्तेजसादुर्विषहंदुःखेनापिसोढुमशक्यंमुहुर्मुहुः ॥ परिवर्तमानंप्रतिमुहूर्तमितिभ्रमंतत्तयावस्थितोराहुरुद्विज
मानोभयमापन्नश्चकितहृदयश्चंचलचित्त आरादेवदूराद्देवसमीपेतत्रदेवोपरागग्रहणमितिजनाःवदंतिधावतदशायायत्सुमंडलेसूर्यचंद्रमसोर्मं पं५:
डलाच्छादनंतद्देवग्रहणमितिजनाउपरागस्वरूपाभिज्ञावदंतीत्यर्थः तत्रउक्तक्रमस्थितिश्यामदर्शनात्समवेतसोनतुवस्तुतोग्रासोस्तीतिदशातस्यात ॥३॥ १०३

ततः स्वर्भानोरधस्तात्तावन्मात्रेऽयुतयोजनांतरे रावसिद्धाद्यनिततोधस्तात्सिद्धादिसदनेभ्योधस्तात्पद्मादीनांविहाराजिरविहारस्थानांमंतरि
संमद्ध्वीनवतीतेतस्मावधिनाइयावद्वायुः प्रधावतिमरुपांधावतितस्माप्यवधिमाह ॥ यावन्मेघानुपलभ्यंतरइति ॥ ततोयक्षादीनांविहारांतरि
क्षादधस्तात् छतयोजनांतरेलोपं पृथिवीमर्त्यलोकवर्तिते पृथिव्याउपरिमर्त्यलोकस्यावच्छिमाह ॥ यावद्धंसादयः पक्षिणो हंसा वलिनः उत्पततंयमस्याछंति
तावद्धलोकस्यसप्थेः ॥ ६ ॥ भूमंडलंतुसप्तपंचतुपवर्णितंप्राणिस्याहउपवर्णितंइति ॥ यद्भूमेः सन्निवेशोनावयवविन्यासेनावस्थानंतद्यथातद्रूपव
र्णितंरवेश्चक्रवन्मंडलाकारसम्मर्त्यपर्यंतोलोकसन्निवेशमध्युक्तः ॥ अथभूमेरधस्तान्मानालोकानांसन्निवेशमाह ॥ अवनेरपीत्यादिनाउत्तराध्यायंतिनग्रंथेः

ततोधस्तात्सिद्धचारणाविद्याधराणांसदनानितावन्मात्रएव ॥ ततोधस्ताद्यक्षरक्षःपिशाचप्रेतभूतगणानांविहा
राजिरंतरिक्षंयावद्वायुःप्रवातियावन्मेघाउपलभ्यंते ॥ ततोधस्तात्छतयोजनांतरइयंपृथिवीयावद्धंसभासश्येन
सुपर्णादयःपतत्रिप्रवराउत्पतंतीति ॥ ६ ॥ उपवर्णितंभूमेर्यथासन्निवेशावस्थानं ॥ अवनेरप्यधस्तात्सप्तभूविवरा
एकैकशोयोजनायुतांतरेणायामविस्तारेणोपक्लृप्ताः अतलंवितलंसुतलंतलातलंमहातलंरसातलंपातालमिति ॥ ७ ॥

तत्रावनेर्भूलोकादधस्तात्सप्तभूविवराभूम्यामेवविवराणिसंतीत्येकैकशोयोजनानामयुतंतेनांतरामध्येउच्छितंनावेक्षःउच्छायःश्रेणीत्यंयोजनायतांत
रोच्छ्रितंआयामदैर्घ्यंविस्तारःप्रायतपरिमितंतेषांसमाहारद्वंद्वेनयोजनायुतांतरोच्छ्रितायामविस्तारेणोपकल्पिताविवराणामद्भिप्रमयोजनायुता
च्छ्रिताःसप्ताविस्तृसमनामायामेविस्तारश्वायुतोयोजनपरिमितइत्यर्थःतारतम्येनावोपक्षिप्ताःभूलोकापेक्षयाविवरेषुभोगाधिक्यमस्तीत्यर्थःविवर
णामसप्तनिर्देशोतिश्चातलमित्यादिनापातालमित्यंतेनग्रंथेन ॥ ७ ॥ तारतम्येणोत्यनंतरेवसप्तवरसाधारणेनदर्शयति एतेष्वित्यादिनाअपातलइत्यंतः
प्रातःएतेषुनरास्तेभुविलस्वर्गेषुदैत्यादयोनिवसंतीत्यन्वयःकथंएतेषुस्वर्गादप्यधिकःकाममोगैश्वर्यानंदःरोंभूयर्थैसमृद्धसंतोषस्वभ

भा°पं° तिःसंपत्तिस्वविभूतिरोशोतय वर्गेस्वाधीराशावृस्वनित्यसापेक्षतात्समासः अमितःसुसमृद्धानि भवनान्यगाराणि नुधानानि क्रीडास्थानानि विहार
५·७ स्थानानि च येषु तत्र क्रीडा खेलनं विहारस्थानानि च येषु तत्र क्रीडा खेलनं विहारस्त्री संभोगः कथंभूताः नित्यप्रमुदिताश्चानुरक्ताः कलत्रादयो येषां।
मानयो भर्ता ॥७॥ किं वर्ण्यते महाराज येषु बिलस्वर्गेषु मायाविना सुरेण मयेन निर्मिता पुराणि चकासंतीत्यन्वयः कथंभूता नानाविधा ये मणिप्रवरा
स्तेषां प्रवेका उत्कृष्टास्तैर्विचित्रैर्भवनादिभिर्निर्मिता या विवरेश्वराणां महानागानां मैत्राः समलंकृताः कथंभूतैर्गेहोत्तमैर्नागास्त्वाश्रोरास्त्रमिथुनैर्भूताः पाराव
एतेषु हि बिलस्वर्गेषु स्वर्गादप्यधिककामभोगैश्वर्यानंदभूतिविभूतिभिः सुसमृद्धभवनोद्यानाक्रीडविहारेषु दैत्यदा
नवकाद्रवेया नित्यप्रमुदितानुरक्तकलत्रापत्यबंधुसुहृदनुचरा गृहपतय ईश्वरादप्यप्रतिहतकामा मायाविनोदा
निवसंति ॥७॥ येषु महाराज मयेन मायाविना विनिर्मिताः पुरो नानामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकार
गोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैः
समलंकृताश्चकासति ॥८॥ उद्यानानि चातितरां मनइंद्रियानंदिभिः कुसुमफलस्तवकसुभगकिसलयावनतरुचि
रविटपविटपिनां लतांगालिंगितानां श्रीभिः समिथुनविविधविहंगमजलाशयानाममलजलपूर्णानां झषकुलोल्ले
ताद्यपस्बैराकीर्णाः संकुलाः कृत्रिमा वेदिकादिरूपाः श्रमयोग्यास्तैः नानास्वनमिथुनैः निपावेनानास्वनत्वं मिथुनानाम्तयारामत्वनादि विशेषणं ॥८॥ तथा।
कनककेतकाभिर्लिंगितानां संश्लिष्टानां कुसुमस्तवकैः फलस्तवकैः सुंदरकिसलयैश्चावनतानाम्राह्वचिरा विटपाः शाखा येषां तेषां विटपिनां वृक्षाणां उ
द्यानानि क्रीडार्थानि मनसइंद्रियाणां चानंदनीनि राकारिणीभिः स्त्रीभिर्विवरे स्वस्त्रीभिरमलोकप्रियमिति पाधितानि श्रतिक्रांतानि येषु विवरेषु चका ए०मः
शंतीत्यन्वयः पुनः कैः स्वर्लोकश्रियमपि अतिशायिन्यश्च चकासंति आश्रमलैः स्वच्छैः जलैः पूर्णानां समिथुनानां चक्रवाकादिभिर्मिथुनैः सहितानां ये विविधा विहं १०८

णानेषां कुलं मम हंसस्य कोलाहलो गेयेषु तेषां जलाशयानां मंदं स्निग्धं यथा समदहंस्यो लंघनेन विदारेण क्षुभितं संचलितं यत्क्षीरं जलं तस्मिन् नयानि नीरजानि
येषां वनेषु केतनानि केतस्थानं येषां पदस्थि(?)रणमितिशेषः मा मध्यो(?) नाविधेह्निदारैराकुलाम धुरायेविविधाः स्वरादयः। स्वादिशब्देन गमनेक्षणादयो विवक्षिता
तैः कथमतेशिंद्रियाणामानंदजनकैः स्वर्गे भिरिति यावत् सचितनदाउत्कविटपिनां उक्तविधानां जलाशयानां मदड्डुंद्रियाणां शामिभिरिंद्रियोत्सावैस्वात्क्तविधा
नां पाविताणां वोत्काविद्धैः स्वरादिभिः स्वामरलोकस्त्रियामिनात्स्यद्यानानियेषु विवेषु चक्रामतीत्यर्थः॥९॥ यत्रहवाचयेषु द्विविवरेषु कालविभागैः कालावयवे
होरात्रादिभिर्नैवं ज्ञोपलक्ष्यते तत्रत्यानामापद्योनस्यस्वाद्धितिभावः॥ यत्रयेषु विवरेषु येमहांतो द्विप्रवराः सर्वे स्पष्टा तेषां येपिसोमरणायफणावाणाय:
घनक्षुभितनीरस्मारजकुमुदकुवलयकह्लारनीलोत्पललोहितशतपत्रादिवनेषु कृतनिकेतना नामेकविहाराकु
लमधुरविविधस्वनादिभिरिंद्रियोत्सवैरमललोकश्रियमतिशयितानि॥९॥ यत्रचहवावनभयमहोरात्रादिभिः काल
विभागैरुपलक्ष्यते॥ यत्र महाहिप्रवरशिरोमणयःसर्वं तमः प्रबाधंते॥१०॥ नवाएतेषु वसतां दिव्यौषधिरसरसायनान्नपा
नस्नानादिभिराधयोव्याधयोवलीपलितजरादयश्च देहवैवर्ण्यदौर्गंध्यस्वेदक्लमोग्लानिरिति वयोवस्थाश्च भवंति॥११॥
नहितेषांकल्याणानां प्रभवति कुतश्चनमत्युर्विनाभगवतेजसश्चक्रापदेशात्॥१२॥ तेमर्वे कृतनतमोंधकारं प्रवाधंते॥९॥
तेषु विवरेषु वसतामाधयोमनःपीडा व्याधयोरोगा वलितत्वगतोविकारः पलितंकेशेषु पौल्यं जरातद्भयमलमता जराव्यादिप्राद्वेनमाति भ्रंपाद्यस्विद्य
तेनयादेहस्यवैवर्ण्यं रूपांतरं दुर्गंधपूतिगंधः स्वेदः क्लमः श्रमः ग्लानिरनुत्साहः ततेवयोस्था प्रवृद्धिर्यौषधैः रसायननपानैर्दिव्यरशनस्नानादिभिःस्वभवंति
॥११॥ नयातेषांकिलास्याद्याकल्याणानां निर्ष्ठुःखानांकस्मादपिमृत्युर्नप्रभवतितान्मारयितुंसमर्थोनभवतीत्यर्थः॥ भवतीति पावेमृत्युमरणंकुतश्चिः
दपितेषांनास्तीत्यर्थः॥ तर्हिमरणेकिंतत्रादवितेति॥ चक्रापदेशाचक्रसंज्ञाद्भगवतेजसोस्वरूपाद्विना स्वस्वाधिनान्यस्मान्नमृत्युस्तदातस्मात्स्यैवे ८ हैम

भा॰ ५ तदेवाह यस्मिन्नु रूपे नास्त्वे विवरेषु प्रविष्टेष्वसुरवधूनां पुंसवनानि गर्भाः प्रायेण च क्रमाद्भयात्प्रस्रवंति पतंति अस्मेत्सस्यमपीत्यर्थः ॥ १३ ॥ एवं सामान्यतो
१०५ विवरानुपवर्ण्याथ विशेषेण विवर्णयिष्यन्नाद्यं विवरमनुवर्णयति अथेति ॥ अतलाख्ये विवरे मयपुत्रो बलो नामासुरो निवसति तं विशिनष्टि येने
ति येन बलेनैव सृष्टा षण्णवति संख्याका मायास्तासां मायानां मध्ये काश्चन माया अद्यापि केचिन्मायाविनो धारयंति ॥ १४ ॥ यस्य बलस्य विजृंभमा
णस्य मुखतः त्रयः स्त्रीगणा उदपद्यन्त गणानेवाह स्वैरिण्यः कामिन्यः पुंश्चल्य इति स्वैरिण्यो विरतास्तत्रापि पुंश्चल्यः ॥ १५ ॥ त्रिविधास्ता विशिनष्टि यावै
यातिस्वैरिण्यादयः स्त्रियो बिलायने विवरप्रविष्टं पुरुषं हाटकाख्येन रसेन रसायनेन साधयित्वा स्ववशीकृत्य बलायन इति पाठे तत्र प्रविष्टं पुरुषं

यस्मिन्प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयाद्देवस्य स्रवंति पतंति च ॥ १३ ॥ अथातलेमयपुत्रोऽसुरो बलो निवसति येन
ह वा इह सृष्टाः षण्णवतिर्मायाः काश्चनाद्यापि मायाविनो धारयंति ॥ १४ ॥ यस्य च जृंभमाणस्य मुखतस्त्रयः स्त्रीगणाः
२५ उदपद्यंत स्वैरिण्यः कामिन्यः पुंश्चल्य इति या वै बिलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन साधयित्वा स्वविलासाव
लोकानुरागस्मितसंलापोपगूहनादिभिः स्वैरं किल रमयंति ॥ १६ ॥ यस्मिन्नुपयुक्ते पुरुष ईश्वरोऽहं सिद्धोऽहमित्ययुत
महागजबलमात्मानमभिमन्यमानः कत्थते मदांध इव ॥ १७ ॥ ततोऽधस्ताद्वितले हरो भगवान्हाटकेश्वरः ॥ =०

रसेन बलायनं साधयित्वा संभोगसमर्थं स्वेनाधारणा विलासाय एवं कोयो वलोकनानुरागयुक्तं यस्मितं संलापो रहोभाषणं उपगूहनमालिंगनं एवमा
दिभिः स्वैरं रमयंति किल ॥ १६ ॥ हाटकाख्यं रसं विशिनष्टि यस्मिन्निति यस्मिन्रसे उपयुक्ते सेविते सति उपयोक्ता पुरुषः आत्मानमयुतमहागजव
लं मन्यमानो मदांध इवाहं ईश्वरः सिद्धोऽहं इति कत्थते श्लाघते ॥ १७ ॥ एवमतलाख्यो विवर उपवर्णोथ वितलं वर्णयंति ॥ ततोऽतलादधस्ताद्वितले वि राम:
वरे भगवान् हरो रुद्रो हाटकेश्वरः स्वपार्षदैर्भूतगणैर्वृषभगणैः परिवृतः प्रजापतिसर्गः ब्रह्मणा दिष्टः सर्गस्तस्योपबृंहणाय वृद्धये भवा १०५

वान्यासह मिथुनीभूयास्ते ॥१९॥ यदुक्तं हाटकेश्वर इति नाम तस्मिन्निमित्तमस्य दर्शयति यत इति भवानीभवयोर्मिथुनीभूतयोर्वीर्येण हाटिन्याख्या सरित्प्रवरा
प्रवृत्ता तस्माद्भवो हाटकस्य सुवर्णस्य उत्पादकत्वाद्धाटकेश्वर इति सूचिते इति भावः ननु हाटकिन्याख्यसरित्प्रवराया प्रभवत्वेपि न हाटकप्रभवत्वं तत्र
हि यत्र हाटकिन्याख्यसरित्प्रवरायां चित्रभानुरग्निर्न मातरिश्वना वायुना सम्यग्दीप्यमान ओजसा बलेनापिवद्धाटकिनीं पीतवान ॥१९॥ तेनाग्निना निष्ठ्यूतं त्य
क्तं यत्कं हाटकाख्यं सुवर्णं असुरेंद्राणां विवरवासिनां मवरोधेषु अंतःपुरेषु पुरुषाः पुरुषीभिः स्त्रीभिः सह भूषणेनाभरणेन ताभरणेन धारयंति भूषणानि
कारयित्वा धारयंतीति हाटकिन्याख्ययं ततो हाटकाख्यस्य सुवर्णस्य रूपेण परिणामात्तस्य वरो भवोपि हाटकेश्वर इति भावः ॥२०॥ अधस्तात्सुतलं वर्णयति तत इति

पार्षदभूतगणावृतः प्रजापतिसर्गोपबृंहणाय भवो भवान्यासह मिथुनीभूयास्ते यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम
भवयोर्वीर्येण यत्र चित्रभानुर्मातरिश्वना समिध्यमान ओजसा पिबति तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेनासु
रेंद्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयंति ॥२०॥ ततोधस्तात्सुतले उदारश्रवाः पुण्यश्लोको विरोचनात्मजो ब
लिर्भगवता महेंद्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा वटुवामनरूपेण पराक्षिप्तलोकत्रयो भग
वदनुकंपयैव पुनः प्रवेशितः ॥ इंद्रादिष्वविद्यमानया सुसमृद्धया श्रियाभिजुष्टः स्वधर्मेणाराधयंतमेव भगव

ततो वितलादधस्तात्सुतले विवरे उरुश्रवा विपुलकीर्तिः पुण्यश्लोकः स्मरतां पुण्यपादकयशं यत्र महाभागवताग्रगण्यः विरोचनस्यात्मजो ब
लिरद्यापि आस्ते इत्यन्वयः कथंभूतः महेंद्रस्य प्रियं कर्तुमिच्छता वामनमदितेः सकाशाद्भूत्वा वटुवामनरूपेण लब्धकायो देहो येन तेन भगवता आ
क्षिप्तं पराक्षिप्तमपहृतं लोकत्रयं यस्य स तथाभूतः पुनर्भगवतोनुकंपयैव सुतले विवरे प्रवेशितः ॥ इंद्रादीनामपि दुर्लभया सुसमृद्धया श्रियासंपदा
जुष्टः सेवितः अपगतसाध्वसः तमेव भगवंतं स्वधर्मेणाराधयन्नाराधयन् ॥२१॥ ततस्सर्वं संपत्समृद्धं सुतलाधिपत्यं तद्दानफलमिति नमंतव्यमित्या ह

भा०पं०
१०६

नोएवैतदिति ॥ यद्बिलनिलये विवरस्थाने ऐश्वर्यं तदेतद्भूमिदानस्य साक्षात्कारः फलं न भवत्येव कुतस्तस्य पेनायमेवंभूतस्य दानस्य साक्षादपवर्गहेतुत्वादित्याशयेनाह
भूमिदानं विशिनष्टि ॥ भगवतीत्यादि अशेषजीवनिकायानां ये जीवा भूताः प्रत्यगात्मानस्तेषामप्यात्मभूते परमात्मन्यंतःप्रविश्य धारके वासुदेवे तीर्थतमे पावन
तमे पात्र उपपन्ने सन्निधिं प्राप्ते सतीति तस्मिन्परयानिरुपाधिकया श्रद्धया कर्तव्यविषयात्वरया समाहितमनसा प्रीत्यं ते न तेन बलिना संप्रतिपादितस्य कृतस्य सा
क्षादपवर्गसाधनभूतस्य भगवतस्तीर्थतमत्वमेवोपपादयति यस्येति ॥ यस्य हि भगवतो नाम सकृदविवशोपि तत्पतनस्खलनादिषु वस्थानात्वापिगृणन्
न्तमाराधयन्नपगतसाध्वस आस्तेधुनापि ॥२४॥ नो एवैतत्साक्षात्कारो भूमिदानस्य यत्तद्भगवत्यशेषजीवनिकायानां
जीवभूतात्मभूते परमात्मनि वासुदेवे तीर्थतमे पात्र उपपन्ने परमया श्रद्धया परमादरसमाहितमनसा संप्रतिपादि
तस्य साक्षादपवर्गद्वारस्य यद्बिलनिलयैश्वर्यं यस्य ह वाव क्षुतपतनप्रस्खलनादिषु विवशः सकृन्नामाभिगृणन्पुरुषः
कर्मबंधनमंजसा विधुनोति ॥२५॥ यस्य हैव प्रतिबाधनं मुमुक्षवोऽन्यथैवोपलभंते तद्भगवतामात्मवतां सर्वेषामात्मन्यात्म
द आत्मतयैव ॥ न वै भगवान्नूनममुष्यानुजग्राह ॥ यदुत पुनरात्मानुस्मृतिमोषणं मायामयं भोगैश्वर्यमेवातनुतेति ॥२६॥
पुरुषः कर्मरूपं बंधनमंजसा सुखेन विधुनोतीति निरस्पृति सकृन्नामग्रहणमात्रेणापि समस्तवृजिननिरासे तेन नामवतो भगवतस्तीर्थतमत्वं कुमत्यजयमित्युक्तमितिभा
वः कर्मबंधं विशिनष्टि यस्य हैवेति ॥ यस्य हि कर्मबंधस्य प्रतिबाधनं निरसनोपायं मुमुक्षवो यथाकर्मयोगादिरूपेणोपलभंते जानंति तत्कर्मबंधनं मुमुक्षो
रितिपूर्वेणान्वयः ॥ प्रतिबाधनमिति पाठे प्रतिलोपसाधनं निरसनोपायमित्यर्थः यथा कर्मयोगादिकं भगवद्भक्तियोगोस्यतिबंधकप्राचीनकर्मबंधनिरसनद्वा
राभक्तियोगानुग्रहकत्वेन भक्तियोगद्वारांकत्वप्रवीतिराद्यनिवर्तकमेव नामस्मरणमपीत्यत्राभिप्रेतोर्थः ॥ अस्य पाभक्तियोगानर्थक्यापत्तेरित्यवगंतव्यं ॥ त
द्वंतातीर्थतमत्वे पामात्मनि भगवता नामात्मदे अस्यपर्यंतव दात्मे आत्मतमे निरतिशयप्रियतमे भवतीति विनिवृत्तस्य लोकत्रयस्य नबिलनियमने ऐश्वर्यं

नन्वपद्येत दानमपवर्गो वारं यदि वा वलिर्महाभागवतः यदि वा भगवानात्मसर्व्वस्यापवर्गमेव प्रदाय किं नानुजग्राहेत्यपेक्षायामभ्युपगतवारक्ष्वविद्ययावि
नाशयस्यानुभावमत्वादिनमपवर्गो दानेन तद्देवानुग्रह किंतु भ्युपगतवारक्ष्वफलनिलयनेऽस्वर्ग्यमेवाददादित्याह नवा इति ॥ भगवांस्तु प्ष्वबलेन निजगृहतदेवा
नुग्रहं कृतवान् आत्मानुस्मृतिपोषणं स्वविषयस्मृतिविघातकत्वमायया विलसितं भोगाढ्यरूपमैश्वर्य्यं नेभाविमितं वारोऽस्वर्य्यं विलनिलनयनैश्वर्य्यं तद्देवा
नुतेन दत्तवानित्यर्थः ॥ महाभागवत इत्यनेन भावदास्येतरानभिलाषित्वविवक्षितं न भस्य तद्देवस्पृहयितुमाहयदिति ॥ यत्तस्य सिद्धमिति वृन्समानामुवा
वेत्यन्वयः ॥ कथं भूतः अनधिगत अलक्ष्य अन्यः यां चेतरः उपायो यतनेन भगवता वलेर्भागवतत्वात् दंडनानं दत्वा उपायांतरभावादनधिगतान्योपायेनेत्युक्तं
एवं भूतेन भगवता यांचाव्याजेनागृहीतं स्वशरीरमात्रावशेषितं दुर्वारितस्वशरीरमात्रं यस्त्रोकत्रयं तत्यस्त तथा मृतः स्वव्यतिरिक्त भगवदपकृत लोकत्र

यत्तद्भगवतानधिगतान्योपायेन यांचाछलेनापहृतस्वशरीरावशेषितलोकत्रयो वरुणस्य पाशैश्च संप्रतिमुक्तो
गिरिदर्य्यां चापविद्ध इति होवाच ॥२४॥ नूनं वतायं भगवानर्थेषु न निष्णातो योऽसाविंद्रो यस्य सचिवो मंत्राय वृत एक
कांततो बृहस्पतिस्तमतिहाय स्वयमुपेंद्रेणात्मानमयाचत ॥ आत्मनश्चाशिषो नो एव तद्दास्यं ॥२५॥ यइत्यर्थः ॥ वरुणप

शैश्च प्रतिवद्धः प्रतिमुक्तापर्यन्यूनतापां वरुणपाशैः प्रतिवद्ध इत्यर्थः ॥ गिरिदर्यामपि विद्धः क्षिप्तोऽपि सन् ॥२४॥ उक्तिमेवाह नूनमिति ॥ वतेति खेदे भगवानविद्वान्
र्थस्याविदः पुरुषार्थेषु नूनं न निष्णातः न कुशलः पुरुषार्थेषु तारतम्यानभिज्ञ इत्यर्थः ॥ यस्यैकांतेन बृहस्पति सचिवः मंत्राय मंत्रायालोचनाय वृतः सोऽपि पुरुषा
र्थेषु न निष्णातः अनिष्णातत्वमेवाह तमिति ॥ यत तं पुरुषार्थरूपं भगवंतमतिहाय विहाय तद्दास्यमयाचतेत्यर्थः ॥ तमेव त्रयं पदं बृहस्पतिमतिहायेति वा उपेंद्र
णोऽप्यवरजरूपेणाप्यवामनेन दास्यभूतेनेंद्रायात्मानं आत्मनः स्वस्याशिषः लोकत्रयरूपा या आशिषस्त्रया वृत याचितवान् न तु तेन तस्य भगवतो दास्यमयाच
तेत्यर्थः ॥२५॥ अस्मिन्न्प्रमत्ते दास्यमेव याचितव्यं न त्वितरदस्य इत्याह ॥ अतितिंभीरं इसः निरतिशय गंभीरं वेगस्य कालस्य वयव मिदं मन्वंतरपरिवृतं मन्वं
तरपर्यंतवर्ति लोकत्रयं लोकत्रयाधिपत्यं कियदयत्स्यमेतदित्यर्थः ॥ अतस्तत्रयाचितव्यमिति भावः ॥ अतं इं पुरुषार्थे निष्णातः ॥२६॥ अस्मत्पितामह

भा॰ पं॰ कथं ज्ञायते कारणं पुरुषार्थेषु निरासत्तस्याहृदयस्येति ॥ अस्मत्पितामहः प्रह्लादो यस्य भगवतो नदास्यं दास्यमनुदास्यमेव वृतवान्किल न तु स्वपितुर्हिरण्यकशि-
१७ पोः संबंधि रोप्यं ऐश्वर्यं वरणहेतुं तस्याभिप्रायं प्रकाशयति यन्नतेति ॥ भगवता नरहरिणा स्वपितरि हिरण्यकशिपौ उपरते भगवता दीयमानमपि स्वपित्र्यं न वव्रे कु-
तः यद्यस्मात्परिमितं मिति परिमितत्वादित्यत्र न वव्रे उताकुतोभयं पदं वव्रे स्वपदे दीयमानं मुक्तिं याचितवानित्यर्थः ॥ भगवतः परमिति पाठे भगवतोऽन्यस्मि-
ति पित्र्यं न वव्रे इत्यर्थः ॥२७॥ मतिके वा गलत्सत्तोगतिं को वा तस्य प्रह्लादस्य पंथानमनुगंतुं शक्नोतीत्याह तस्येति ॥ को वा अमृदितो अनुपहतो कषायः कर्म-
बंधो येन परिहीणः अपगतः भगवदनुग्रहो यस्य तथाविधो अस्मद्विधो मादृशः पुमान् तस्य महानुभावस्य प्रह्लादस्यानुपंथं पंथानं उपजिगमिषति उपगंतुमि-
च्छतीति ॥२८॥ नन्वेवंभूतस्य बलेस्तत्तस्यैव चरितं विस्तरेणोच्यतां तत्राह ॥ तस्य बलेरनुचरितं उपरिष्टादष्टमे विस्तरिष्यते विस्तरेण कथयिष्यते इत्यर्थः
ऽतिगंभीरवयसः कालस्य मन्वंतरपरिवृत्तं कियल्लोकत्रयमिदं ॥२६॥ यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे न
तु स्वपित्र्यं यदुताकुतोभयं पदं दीयमानं भगवतः परमिति भगवतोपरते खलु स्वपितरि ॥२७॥ तस्य महानुभावस्यानुपथम
मृजितकषायः को वास्मद्विधः परिहीणभगवदनुग्रह उपजिगमिषतीति ॥२८॥ अथ तस्यानुचरितमुपरिष्टाद्विस्तरि-
ष्यते यस्य भगवान्स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठते ॥ निजजनानुकंपितहृदयो येनांगुष्ठेन पदा
दशकंधरो योजनायुतायुतं दिग्विजय उच्चाटितः ॥२९॥ कार्त्स्न्येन तत्प्रभावः केनापि वर्णयितुं न शक्य इत्यभिप्रायेणाह तत्रैव विशिनष्टि ॥ य-
स्येति ॥ यस्य बलेर्द्वारि भगवानवतिष्ठते कथंभूतः स्वयमखिलजगतां गुरुः ॥ अनेन द्वारपालकत्वाद्धीनता सूच्यते एवंभूतोऽप्याश्रितवात्सल्यवशो गदापाणिः सन्
गदापाणिनं भगवंतं विशिनष्टि येन गदापाणिना बलेर्द्वाःस्थेन भगवता कर्त्रा स्वांगुष्ठेन पदा पादाग्रवर्तिनांगुष्ठेन दिग्विजयसमये स्वसमीपमागतो द-
शकंधरो रावणो योजनायुतायुतानामयुतं उच्चाटितः ॥ उच्चाटनं प्रापितः ॥ दिग्विजयं कुर्वन् रावणः ॥ कदाचिद्बलेर्द्वारि विशन् द्वाःस्थेन गदाभृता भगवता राम:
वज्रदस्तः क्षिप्त इति श्रीरामायणादौ प्रसिद्धं ॥२९॥ एवं सुतलं वर्णयित्वा तलातलं वर्णयति ॥ १७

ततः सुतलादधस्तात्तलातले विवरे मयाख्यो दानवेंद्रः महीयते तलातलस्थैर्वैकुमन्यत इत्यपेक्षः ॥ कथंभूतः त्रपुरं त्रिपुराधिपतिर्भगवता त्रिलोक्याः शं सुखं कर्तुमिच्छता
भगवता त्रिपुरारिणा रुद्रेण निर्दग्धं पुरत्रयं यस्य तस्य पुरारेः प्रसादाल्लब्धं पदं तलातलाख्यं विवरं यस्य स मायाविनामाचार्यो मायातंत्रोपदेष्टा महादेवेन रुद्रेण परिरक्षि
तो विगतं सुदर्शनाद्भयं यस्य तथाभूतः सन् सुदर्शनेन किं महादेवेन परिरक्षितत्वाद्विगतसुदर्शनभयः इत्युक्तं ॥३०॥ अथ महातलमनुवर्णयंति तत इति ॥ ततः
तलातलादधस्तान्महातले विवरे नैकशिरसो ये सर्पास्ते सर्पा अनेकशिरसामित्यपेक्षः ॥ काद्रवेयाणां कद्रोरपत्यभूतानां सर्पाणां गणः क्रोधवशसंज्ञकोस्ति गणे
कांश्चित्प्रधानान्निर्दिशन्विशिनष्टि कुहकेत्यादिना कुहकादयः ॥ प्रधाना मुख्या ये सर्पास्ते महाभोगवंतः दीर्घकायाः महापुरुषस्य भगवतो वाहनभूतात्स

ततोधस्तात्तलातले मयो नाम दानवेंद्रस्त्रिपुराधिपतिर्भगवता त्रिपुरारिणा त्रिलोक्याः शं चिकीर्षुणा निर्दग्धस्वपुर
त्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते ॥३०॥ ततोधस्ता
न्महातले काद्रवेयाणां सर्पाणां नैकशिरसां क्रोधवशो नाम गणः कुहकतक्षककालियसुषेणादिप्रधाना महा
भोगवंतः पतत्त्रिराजाधिपतेः पुरुषवाहादनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृत्कुटुंबसंगेन क्वचित्प्रमत्ता विह
रंति ॥३१॥ ततोधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्र

त्त्रिराजानाम्न्यधिपतेर्गरुत्मतोऽनवरतं निरंतरमुद्विजमाना बिभ्यतः स्वकलत्रादिरूपकुटुंबासक्त्या प्रमत्तास्संतः क्वचिद्विहरंति ॥३१॥ अथ रसातलमनुवर्ण
यति ॥ ततो महातलादधस्ताद्रसातले विवरे दैतेयदानवाः दितेः पुत्राः दनुपुत्राश्च पणय इति प्रसिद्धा ये च निवातकवचाः कालकेया हिरण्यपुरवासिनश्च
ते त्रिविधा विबुधानां देवानां प्रत्यनीकाः प्रतिपक्षिणः उत्पत्त्यैव महौजसो बलिनो महासाहसिकाः सहसा दर्पेणाचरंतीति साहसिकाः तथा
भूताः संतः सर्वलोकेषु प्रसृतनाभो यस्य तस्य भगवतो हरेस्तेजसा सुदर्शनाख्येन प्रतिहतः बलावलेपः बलनिमित्तो गर्वो येषां ते अहय इव बिलेशया इव स

भा॰ पं॰ पदिव वसंति ॥ २९ ॥ तानेव विशिनष्टि य इति येवै पणयः इंद्रदूत्या सरमया देवशुन्या प्रयुक्ताभिर्मंत्रवर्णाभिर्नताभिर्वाग्भिरिंद्राद्बिभ्यति न यं प्राप्नुवंति गवां हि वेदि
१०८ कमात्मानं पणिभिरपहृतैर्निरुद्धां गां स्त्रन्वेष्टुं सरमा देवशुनी इंद्रेण प्रहिता संविविश तेषां पणयः प्राहुः किमिच्छंतीति सरमे इत्यादिना ॥ सा च संधिमनिच्छंतीं इंद्रस्तस्ति
रह वेकं तान्त्रिति धघोरा आह हताः इंद्रेण पणयः शयध्वमित्यादि तेन तत्कृताद्बिभ्यतीति ॥ ३० ॥ एवं रसातलमनुवर्ण्य पातालमनुवर्णयति तत इति ॥ ततो
स्मात्तलादधस्तात्पाताले विवरे नागलोकानां सर्परूपाणां जनानां पतयो वासुकिप्रमुखाः प्रधाना येषां ते शंखादयो महाभोगिनो फणिनः महाफणिनः

त्पनीका उत्पत्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिले
शया इव वसंति ॥ ये वै सरमयेंद्रदूत्या वाग्भिर्मंत्रवर्णाभिरिंद्राद्बिभ्यति ॥ ३० ॥ ततोधस्तात्पाताले नागलोक
पतयो वासुकिप्रमुखाः शंखकुलिकमहाशंखश्वेतधनंजयधृतराष्ट्रशंखचूडकंबलाश्वतरदेवदत्तादयो महाभोगि
नो महामर्षा निवसंति ॥ ३१ ॥ येषामु ह वै पंचसप्तदशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पाता
लविवरतिमिरनिकरं स्वरोचिषा विधमंति ॥ ३२ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे चतुर्विंशोध्यायः
२४ ॥ श्रीशुक उवाच ॥ तस्य मूलदेशे त्रिंशद्योजनसहस्रांतर आस्ते या वै कला भगवतस्तामसी समाख्यातानं

महान्मर्षः क्रोधो येषां महाक्रोधाः निवसंति ॥ ३१ ॥ तानेव विशिनष्टि येषामुह वै येषां हि पंचादिसंख्यानि शीर्षाणि येषां शीर्षाणि इति तत्क्रमेण शीर्षाणा
मित्यर्थः तेषां सर्पाणां फणानां फणासु स्त्राधारस्य संबंधमात्रविवक्षया षष्ठी विरचिता धृता ये महामणयो रोचिष्णवः सदाप्रकाशनशीलाः ते स्वरोचिषा पा
तालविवरं पातालं विवरसंबंधितमो जालं विधमंत्यपनुदंतीति ॥ ३२ ॥ इति पंचमे चतुर्विंशः ॥ २४ ॥ एवं पातालांतान्विवराननुवर्ण्याथ पातालपर्यंतस्य रामः
भूमंडलस्याधारकं रसायामले स्थितमनंतमनुवर्णयति पंचविंशे ततस्य पातालस्य मूलदेशे अधस्तात्त्रिंशद्योजनसहस्रांतरे आस्ते का सा या चास्ते तत्राह १०८

याबभाति॥अनंतइतिसमाख्याताषमिवानंतसंज्ञिकेत्यर्थः॥तामसीतामसाहंकाराधिष्ठात्रीयाभगवतःकलाअंशरूपासाऽस्त्यर्थः॥सैवसंकर्षणइत्युच्यतेत
त्राहममतारभतिसात्वतीयासंकर्षणप्रोक्तसात्वततन्त्रपंचरात्रनिष्ठाःप्रमतारउक्तभगवत्कलायाथात्म्यविदस्तमनंतंसंकर्षणइत्याचक्षतेकिमिदंसंकर्ष
णनामाश्वकर्णादिवत्केवलरूढंकिंवापंकजादिवद्योगरूढमित्यपेक्षायांयोगरूढमित्याहद्रष्टृदृश्ययोरिति॥यतोयमनंतद्रष्टृदृश्ययोर्ज्ञातृज्ञेययोःस
न्निकर्षणंसन्निकृष्यतेविषयोक्रियतेतेंद्रियार्थोऽनेनेतिसन्निकर्षणंअतींद्रियार्थविषयकज्ञानसाधनंस्वयंयथातींद्रियार्थविषयकज्ञानवानेव
मितरेषामप्यतींद्रियार्थविषयकज्ञानापादकइत्यर्थः॥यतएवमनंतस्ततस्तंसंकर्षणमित्याचक्षतेसंकर्षणत्वमेवस्पष्टयति॥अहमित्यभिमानलक्षणं

नइतिसात्वतीयाद्रष्टृदृश्ययोःसंकर्षणमहमित्यभिमानलक्षणंयंसंकर्षणमित्याचक्षते॥१॥यस्येदंक्षितिमंडलंभग
वतोऽनंतमूर्तेः॥सहस्रशिरसएकस्मिन्नेवशीर्षणिध्रियमाणंसिद्धार्थइवलक्ष्यते॥२॥यस्यहवाइदंकालेनोपसंजि
हीर्षतोऽमर्षविरचितरुचिरभ्रमद्भ्रुवोरंतरेणसांकर्षणोनामरुद्रएकादशव्यूहस्त्र्यक्षस्त्रिशिखंशूलमुत्तंभयन्नुदति
ष्ठत्॥३॥यस्यांघ्रिकमलारुणविशदनखमणिखंडमंडलेष्वहिपतयःसहसात्वतर्षभैः॥एकांतभक्तियोगेनावनमंतः

णमिति॥अहमिति।प्रतीयमानोऽतींद्रियोयोजीवस्तद्विषयकोयोऽभिमानः॥अहमितिप्रतीतिस्तस्यलक्ष्यतेऽनेनेतिलक्षणंकारणंहेतुरिति।यावज्जीववर्गाभिमा
निदेवतात्वात्तेषामहमितिबुद्धिप्रवृत्तिहेतुरित्यर्थः॥१॥एवमनंतशब्दोपितस्मिन्योगरूढइत्याहयस्येतियच्छब्दानांसर्वभगवाननंतइत्युत्तरेणान्वयःयस्य
भगवतःसहस्रशिरसःअनंतमूर्तेरेकस्मिन्नेवशीर्षणिध्रियमाणंधार्यमाणंइदंकृत्स्नंभूमंडलंसिद्धार्थइवसर्षपइवदृश्यतेतेनापिपरिच्छिन्नत्वादनं
तइत्युच्यतेइतिभावः॥२॥यदुक्तंतामसीतितामसाहंकाराधिष्ठातृत्वंतत्प्रतिपादयतियस्येति।कालेनद्विपरार्धावसानरूपेणेदंकृत्स्नंजगत्संहर्तुमिच्छतःयस्य
संकर्षणाक्रोधेनविरचितेकुटिलीकृतेरुचिरेभ्रमंत्यौभ्रुवौतयोरंतरेणसंकर्षणाख्यएकादशानांव्यूहःगणाःकथंभूतस्त्र्यक्षस्त्रीण्यक्षीणियस्यसत्र्य

भा॰ पं॰ १५ तः भित्कशिवायस्मतादृस्यं स्थूलमूर्तं नयनन्तूर्ध्वं धारयन्नितिरुद्रुरुद्भवतामसाहंकारता मसाहंकाराधिष्ठातृत्वाज्जगत्संहर्तृतां मम रुद्रगणोत्पादकस्य यः ॥३॥ सु
भगात्वमाह्वयस्येति ॥ ब्रह्मादीनां पतयः सात्वतश्रेष्ठैः सहद्यस्य संकर्षणस्यांघ्रिकमलयुगले रुणविषदभ्रवारवमणयस्तेषां षंडस्तस्य मंडलेषु लक्कांतभक्तियोगे
नाभ्यमिचरितभक्तियोगेनावमनेतः प्रणमतः उक्तविधेषु नखमणिमंडलेषु प्रतिबिंबितानि स्वत्तिमनोहराणि परितः स्फुरतां कुंडलानां प्रभया मंडितानि गंड-
स्थलानि येषु तानि स्ववदनानि प्रमुदितं मनो येषां तादृशा संतः अरवं विलोकयंति खलु नूनं ॥४॥ तथा नागराजानां कुमार्यः आशिषः पुरुषार्थानां शासनाः
कामयमानाः यस्य संकर्षणस्य चारुभिः सुंदरैरंगैः दैर्वलयैश्च विलसिताः प्रकाशिता स्वते विशदा निर्मला विपुला दीर्घाः सुभगाः कोमलाश्च रुचिराः सुंद

स्ववदनानि परिस्फुरत्कुंडलप्रभामंडितगंडस्थलान्यतिमनोहराणि प्रमुदितमनसः खलु विलोकयंति ॥४॥ यस्यैव हि
नागराजकुमार्यः आशिष आशासानाश्चार्वंगवलयविलसितविपुलधवलसुभगरुचिरभुजरजतस्तंभेष्वगुरुचंदनकुंकु
मपंकानुलेपेनावलिंपमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितमद
विघूर्णितारुणकरुणावलोकनयनवदनारविंदं सव्रीडं किल विलोकयंति ॥५॥ स एव भगवाननंतोनंतगुणार्णव आदि
देव उपसंहृतामर्षरोषवेगो लोकानां स्वस्तय आस्ते ॥६॥ राज्ञभुजास्तान्येव रजतस्तंभास्तेष्वगरुकुंकुमचंदनानां पंकस्तस्यानुलेपस्तेनावलिंपम
लेपनं कुर्वाणास्तेषां भुजानामभिमर्शेन स्पर्शेनोन्मथितं हृदयं येन मकरध्वजस्य कामस्यावेशेन रुचिरं च ललितं च तस्मिन्नंतं यासां तथाभूताः शास्यः तस्य
संकर्षणस्यानुरागमदमुदितमदविघूर्णितारुणकरुणावलोकनयनवदनारविंदं सव्रीडं यथा तथा विलोकयंति स्वाभिमतेषु मदेन स्वानुभवजनितेनानुमुदितं
तन्मदेन घूर्णितं प्रचलितं च ईषदरुणं करुणावलोकनयने यस्मिन् तद्वदनारविंदमिति तस्यार्थः ॥५॥ स उक्तविधराय संकर्षणस्त्वनंतस्त्रिविधपरिच्छेदरहि-
तः अनंतकल्याणगुणार्णवः जगत्कारणत्वेन आदिदेवः स्वतेजसा दीप्यमानः उपसंहृतः अमर्षरोषयोर्वेगो संहारविषययोः सहन क्रोधयोर्वियोगो येन तथाभूतः लो- १९

कानां साधुजनानां स्वस्तये सुखाय आस्ते तिष्ठतीत्यर्थः ॥६॥

वनः कथंभूतः सुरादीनां गणैर्ध्यायमानः अनवरतं मदेन स्वानुभवजनितमदेन मुदितं च तत्सो विकृतविह्वललोचनः विकृतघूर्णिते विह्वले परवशे अवस्थिते लोचने
यस्य सः सुललितेन सुंदरेण भाषणेन गर्भेण मिलितेन उखरितामृतेन वचनामृतेन स्वपार्षदानां स्वविबुधयूथानां पतीन् आप्यायमानः हर्षयन् ॥ अपरिम्लानञ्चासौ
रागो रक्तिर्यस्यास्तस्याः नवतुलसिकाया आमोदेन गंधेन सुस्थया आमोदः मधुरूपः ॥ आसवः अर्थं तया समाहरस्तेन माद्यंतं मधुकराणां व्रातास्तेषां मधुरगीतेन
श्रीर्यस्यास्तां स्वां स्वसमाधरणे वैजयंत्याख्यां वनमालां दधदिति शेषः बिभर्तीत्यनेन वा अन्वयः नीलो वासः यस्य सः एकं कुंडलं यस्य सः हलस्य ककुदि पृष्ठे कृ
तोन्यस्तः सुभगः सुकुमारः सुंदरो भुजो येन सः एवंभूतो भगवान्संकर्षणः माहेंद्रः महेंद्रसंबंधी वारणेंद्रः ऐरावत इव उदारलीलायस्य सः कांचनीं स्वर्णमयीं

ध्यायमानः सुरासुरोरगसिद्धगंधर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरि
कामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रात
मधुरगीतश्रियं वैजयंतीं स्वां वनमालां नीलवासा एककुंडलो हलककुदि कृतसुभगसुंदरभुजो भगवान्माहेंद्रो वारणें
द्र इव कांचनीं कक्षामुदारलीलो बिभर्ति ॥ ७ ॥ य एष एवमनुश्रुतो ध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथित
मविद्यामयं हृदयग्रंथिं सत्वरजस्तमोमयमंतर्हृदयंगत आशु निर्भिनत्ति ॥ तस्यानुभावान्भगवान्स्वयंभुवो नारदः =

कक्षां वरत्रां बिभर्ति केव कांचनीमिव कक्षां वरत्राख्यां चर्ममयीं वध्रिकां नद्धीं वध्रीं वरत्रामित्यमरकोशः कामधेनुस्मृतान्त्याव तद्वभार्या योगपट्टिकाख्यानां स्वर्णमयीं बि
भर्तीत्यर्थः ॥ ७ ॥ एवं संकर्षणा उपवर्णितस्तदानीं उक्तविध उपास्यमान उपासकानां अंतर्हृदयंगतः प्रकृतिसंबंधे निरस्यतीत्याह य एष इति य एष भगवाननंतः ए
वमनुश्रुतः उक्तविधवेनगुरुमुखाच्छ्रुतः अभिध्यायमानः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्यर्थोऽत्र प्रत्यभिज्ञातः अंतःसामर्थ्याच्छ्रवणानंतरं मननमिति ल
ध्यते मुमुक्षूणां संसाराद्विमोक्तुमिच्छतामनादिकालप्रवृत्तिभिः कर्मवासनाभिः ग्रथितं संदर्भितमविद्यामयं देहात्मभ्रांतिस्वतंत्रात्मभ्रांतिरूपाज्ञानग्रंथिं

ना.पं. द्यमानुकानादिकालप्रवृत्तकर्मवासनामयविद्याग्रंथिरूपं संसारं इत्यर्थः ध्यानेन मुमुक्षूणामंतर्हृदये सन्निहितः आत्मभिन्नतिमितरानिरस्यतीत्यर्थः ॥७॥ तस्य भगवत

११० संकर्षणस्य महत्त्वमनुभावं प्रभावं तुंबुरुणा सह स्वयं मुखः प्रवीणो नारदो ब्रह्मणः सुमुखस्य सभायां संश्लोकयामास सवर्णयामास ॥८॥ स्वयमेतद्वर्णनेन स्वस्थान

धिकारः स्योत्तमायतत्स्वरूपस्य दुर्ज्ञेयत्वमभिप्रयन्कारणत्वेनतमुपलक्षयति उत्पत्तीति अस्य जगतः उत्पत्त्यादिहेतुभूताः सत्त्वाद्याः प्रकृतिगुणाः सत्त्वरजस्तमोगुणाः

कर्मोत्रावित्तिः रजः सत्त्वतमोगुणाः क्रमेण जगदुत्पत्त्यादिहेतुभूता यस्य भगवतः ईक्षया सिसृक्षया कल्प्याः समर्थादिसमर्था आसन् नवभूः गुणत्रयात्मिका

प्रकृतिस्वयमव्यक्तरूपा कार्योवगदेहेतुभूतापि स्वयमसमर्था सती यस्य सिसृक्षारूपेक्षया समर्थादिसमर्था भवतीत्यर्थः ॥ अनेन जगन्निमित्तकारणत्वमुक्तं तदेतत्त्व

प्रकृत्याभिमित्तत्वात्तस्य कर्तृत्वस्यान्यस्य भिन्नानातनिमित्तकारणत्वं नामस्वशरीरभूतप्रकृतिपुरुषकालानां स्वकार्याकारेण परिणामोपयुक्तप्रवर्तमानाप्रयत्ने

यथा कुलालादेः स्वकीयमृत्पिंडादेर्घटादेरूपपरिणामोपयुक्तप्रवर्तनाप्रयत्नं अथोपादानकारणत्वेनलक्षयति यद्रूपमिति ॥ आत्मन्नात्मनि स्वस्मिन्नेव देवा

महत्त्वं तुंबुरुणा सभायां ब्रह्मणः संश्लोकयामास ॥८॥ उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः सत्त्वाद्याः प्रकृति

गुणा यदीक्षयासन् यद्रूपं ध्रुवमकृतं यदेकमात्मन्नानाधात्कथमु ह वेद तस्य वर्त्म ॥९॥ स्मेरामवेद्वायतः

दिनामरूपाद्यभावादविभागेन स्थितं ध्रुवं नित्यं प्रकृतिपुरुषं चैव विध्वनाशाद्यभावविशिष्टत्वं गीतोक्तेः कारणावस्थायामेवं भूतं यद्रूपं प्रकृतिपुरुषात्मकं शरी

रं तत्तास्मरतानंतरमात्मनि नानाकृतं देवादिनामरूपविभागविभक्तं कृतमधो हृतवान् ॥ तस्य भगवतो वर्त्म स्वरूपं लोकविलक्षणं कथमु ह वेदनाद्दृशति शेष :

स्वकीयात्मन्यविभागेन स्थितमात्मनि नानाकृतं रूपमधादित्यनेनैकत्वे नानात्वे चात्मपर्यंत इति विज्ञायते इदमेव हितस्य उपादानत्वं यस्य प्रकृतिपुरुषगता देवा :

दिविभागस्यस्वशरीरभूतप्रकृतिपुरुषद्वारा आत्मपर्यंतत्वमिति ॥ यद्वा ॥ एवमेकत्वेनात्मनि स्थितं प्रथ्वात्ता नानाकृतमात्मन्यधादित्यन्वयः रधारणं वा तत्र्त :

प्रविप्रयप्रशामनेन ॥ स्वयमेव हि परमात्मनः कारणता कार्यता च ॥ यदविभक्तनामरूपप्रकृतिपुरुषनियमनं विभक्तनामरूपावस्थाप्रकृतिपुरुषनि राम:

यमनं चेति ज्ञातव्यं ॥९॥ यदाप्येवं दुर्ज्ञेयं स्वरूपं तथापि भक्तानुजिघृक्षयैवं संकर्षणं रूपं कृतवानिति कतिपयधर्मैर्वर्णयितुं शक्यत्याह ॥ = ११०

यन्निर्मीत ॥ यत्र यस्मिन्भगवतीदं परिदृश्यमानं सदसच्चिदात्मिकं जगद्विभातिस भगवान्लोस्माकं कृपया स्मासु कृपयेत्यर्थः ॥ संपुष्टं रजस्तमोभ्यामस्पृष्टं
यन्तुष्टं सत्वं तत्का लिंवभासरिद्धं नगलविग्रहेरूपेण धृतवानित्यर्थः ॥ भक्तानां नो नु ग्रहायैव निरतिशय कृपयामहीति मिमां वभारेति भावः ॥ कृपमेव ज्ञायतं इ
त्यतस्त्राह यदिति ॥ यद्यस्मान्नगपतिः मिंद्रः ऽवोदारवीर्योयवा ॥ मरुपतेः त्विषुंन गतिमगा त्रसादयो देवा तेषामधिपतिः तद्देवतानां परमं च दैवतं पतिं पतीनां
परमं परस्तादिति श्रुतेः त्र्यादीनामप्यन्वेषणीयः इति भावः ॥ अनेन परत्वं सूच्यते उदारवीर्यः जगत्कर्तृत्वादिसामर्थ्ययुक्तः एवं भूतोपि स्वजनानामस्माकं
सतां स्मादातुं गरहीतुं स्ववशीकर्तुं मितियावत ॥ अनवद्याम कर्मेति मितां लीलामहिपतिसात्वतर्षभनागराजकुमार्यादिसुरवाराध्यत्वसात्वतं त्रापुराणपतन्ने
मरस्वभरणादिरूपां लीलामादद्यपरिगृह्णीतवान्सात्वतं तंत्र प्रशेतस्तेवंमहत्वभारतेउक्तं सात्वतं विधिमास्थायगीतं संकर्षणेनयः अस्मात्म्भवसंते धर्मात्मनः स्वा

इति नेनः पुरुकृपयावभासमत्वं संपुष्टं सदसदिदं विभाति ॥ यत्र यशोलोकमलापहंतिरादेनवद्याममदातुं स्वजनमनोस्वर
रवीर्यः ॥ १० ॥ यन्नाममस्कृतमनुकीर्तयेदकस्मादार्तो वायदिपतितः प्रलंभनाद्वा ॥ हंत्यंहः सपदिनृणामशेषमन्यंकंशेषाद्भ
गवतस्त्राश्रयेन्मुमुक्षुः ॥ ११ ॥ ह इन्यापितमगुवत्सहस्त्रमूर्ध्नोभगोलंसगिरिसरित्समुद्रसत्वं ॥ अनंत्यादमितवि

संपुष्टः तपेति लीलामादद्य त्रनेन सौलभ्यं सूच्यते ॥ अनेनैव तदृशीनेमाहृशानामधिकार इति तात्पर्यः ॥ १० ॥ एवं परत्वसौलभ्ययोगः समाश्रयणीयताहे
तुरुक्तः ॥ अथ तामस्वभावपयालोचनया पिसरावसमाश्रयणीय इत्याह यन्नामेति आर्तः रोगादिपीडितः पतितः महापातकत्वपि यस्य भगवतोनंतस्य न
मयद्यातुकीर्तयेत अकस्मादालंभनाद्वा प्रस्थितात्वायस्यनामयदिपकृतं चवास्यादार्तेनपतितेनवातर्हि सएव पतितादिः स्वपातित्यादिभिर्विमुक्तः इतरेषां
नमपिनृणामात्मानं स्मरतामशेषमंहोदुरितं हंति अतमुमुक्षुः परं परस्याप्यशेषदुरितनिरसनत्वमनो नामधेयाच्छेयान्यं कमाश्रयेदित्यर्थः ॥ शेषयतिदुरि
तेभ्योवशेषयतिस्वाश्रितमितिनामत्रिके च नमंत्वामिश्चेतं ॥ ११ ॥ इत्थं तया निवर्ततेनोतरिवाविनितयानमतितयानिवर्तंनेनगोविंदगुणतयाक्षिप्यक्त
रास्याअवंतकल्याणगुणगणराशेरनंतस्यमा कल्येनकल्याणगुणगणानवर्णयितुं कः प्रभुरित्याशयेनाह मूर्ध्नेति गिरिभिः पर्वतैः सरिताम्स

ति: समुद्राः सभाजेनवः यस्मिंस्तद्भूमंडलं यस्य सहस्रशिरसोऽनंतस्य मूर्धन्यणुरिवार्पितं तत स्यानंतस्यापरिच्छिन्नस्यानंतस्यादिदेवैः तैरेरियं तया विदितः विक्रमः प्रकारो य
स्य तस्यानंतस्य वीर्याणि कस्या गणराशिरूपाणि सहस्रजिह्वोऽपि को वा गणयेदेतावंतीति गणनां करोतीति भावः ॥१२॥ किमिदं भूमंडलं कर्मवशाद्बिभर्ति
नेत्याह एवमिति एवंप्रभावः ॥ उरुविधा परिच्छिन्नप्रभावः । स्वतंत्र एवानंतः स्वानंतपदं पुष्कलप्रवृत्तिनिमित्ताप्रयं दुरंतमपारं वीर्यं बलं यस्य उरवो गुणास्ते
षामनुभावः प्रभावो यस्य स भगवान् रसायाः मूले स्थित आत्मतंत्रः स्वतंत्रः कर्मव्यपराव समनलीलया स्थितये वस्यानाय पालनायेति यावत् दृष्टिं विभर्ति ॥१३॥
उक्तमुपसंहरति एता इति कामान् कामयमानैः नरैरभिरुपगंतव्याः याश्चानात्वा कर्मानुसारेण स्वरेण सह गंतयः फलरूपा लोका इह तु ब्रह्मांडे एता एव तावत्य एव तास्ता
मे यथोपदेशं संप्रदायागतोपदेशमनतिक्रम्यानुवर्णिता ॥१४॥ एवमुक्तमुपसंहरन्राज्ञः प्रश्नमप्यावमर्षप्रदानाय उक्तागतयो नृभिः इत्यैः प्राप्यास्तिता पुन रूपसंहृ

कमनंतस्य नन्तः को वीर्याण्यधिगणयेत्सहस्रजिह्वः ॥१२॥ एवंप्रभावो भगवाननंतो दुरंतवीर्योरुगुणानुभावः ॥ मूले रसा
याः स्थित आत्मतंत्रो यो लीलया क्ष्मां स्थितये बिभर्ति ॥१३॥ एता ह्येवेह नृभिरुपगंतव्या गतयो यथाकर्मविनिर्मिता य
थोपदेशमनुवर्णिताः कामान्कामयमानैः ॥१४॥ एतावतीर्हि राजन्पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा वि
सदृशा यथाप्रश्नं व्याचख्ये किमन्यत्कथयामि इति ॥१५॥ इति श्रीपंचमस्कंधे पंचविंशः २५ राजो॰ महदेतद्वैचित्र्यं जीवलोकस्य
कथयामित १

एतावत्य इति हे राजन् पुंसः संसारिणः प्रवृत्तिरूपस्य सकामस्य धर्मस्य विपा कगतयः फलरूपा गतयः नानाविधा विसदृशाः सुखदुःखतारतम्ये
न उच्चावचाः एतावत्य एव ताः प्रश्नं यथाप्रश्नमाख्याता वर्णिता समपतिष्ठेषु ॥१५॥ इति श्रीपंचमः २५॥ प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतयः इत्यस्यैतासां पूर्णपे
न प्राप्यत्वोक्तेः केवलाः प्रसिद्धस्य स्वर्गलोकाः संति नरकाः इति सूचितं तानेवापि द्विधा व्यावहारिकापि लोके सुखदुःखयोः न्यूनाधिकभावलक्षणं वैचि
त्र्यमुच्चावचा विसदृशा इति तत्र कारणं पृच्छति राजा महदिति ॥ हे महर्षे त्वया यदेतद्वैचित्र्यं सुखदुःखयोर्न्यूनाधिकभावलक्षणं सर्वलोके प्रजावलोकस्य प्रवृ
त्तितलदृष्टं वैचित्र्यं कथमुपपद्यते को वा तत्र वैचित्र्ये हेतुरेकरूपेणानुष्ठितेन प्रवृत्त्याख्येन धर्मेण स्वर्गादिलोकान्प्राप्तेषु केषांचित्सुखमेव केषांचिद्दुः

खमेवान्येषां तु मिश्रमस्तीत्येतद्वैचित्र्ये किं कारणमिति प्रश्नार्थः

सर्वेषां नरादिलोकव्यापकधर्मस्य समानत्वेपि कर्तृवैचित्र्याच्छ्रद्धावैचित्र्याच्च सुखादिकफलवैचित्र्यमित्युत्तरमाह ॥ त्रिगुणत्वादिति ॥ कर्तुर्जीवस्य त्रिगुणत्वात्सत्वा
दिगुणत्रयप्रकृतत्वाच्छ्रद्धया सत्वादिगुणभेदभिन्नयाभिविधया श्रद्धया कर्मणां गतयः फलानि पृथग्विधाः सर्वाः आद्यादितारतम्येनिमित्ततारतम्येनैव भवंति
अत्रेदमवगंतव्यं न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः सत्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैरित्युक्तरीत्या सर्वेषां गुणत्रययोगे गुणानां कालोऽत्रादिरू
पेण परिणामे चाविशिष्टे सति प्राचीनकर्मवासनानुगुणगुणत्रयपरिणामवशात्सात्त्विकादिभेदेन धर्मस्य कर्त्तारो बुद्धयः श्रद्धाः तन्निमित्तानि कर्माणि च त्रिविधा
नि भवंते तेन यथा गीतं भगवता मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशु
चिः हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः विषादी दीर्घसूत्री च कर्ता तामस उच्यते प्रवृत्तिं च निवृत्तिं च का
र्याकार्ये भयाभये बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी यया धर्ममधर्मं च कार्यं चाकार्यमेव च अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ अधर्मं धर्ममिति या म

ऋषिरुवाच ॥ त्रिगुणत्वात्कर्तुः श्रद्धया कर्मगतयः पृथग्विधाः सर्वा राजन्सर्वस्य तारतम्येन भवंति ॥ २ ॥ अथेदानीं प्रतिभि
न्नत्वात्साधर्म्यस्य तथैव कर्तुः श्रद्धायाः वैसादृश्यात्कर्मफलं विसदृशं भवति ॥ ३ ॥ न्यते तामसावृता सर्वार्थान्विपरीतांश्च बुद्धिः सा

पार्थ तामसी त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा सात्त्विकी राजसी चैव तामसी चेति तां शृणु इत्यारभ्य यजंते सात्त्विका देवान्यक्षरक्षांसि राजसाः प्रेतान्भू
तगणांश्चान्ये यजंते तामसा जनाः इत्यंताद्ग्रंथात्त्रैविध्यमुक्तं सात्त्विका सात्त्विक्या श्रद्धया युक्तः नियतं संगरहितमरागद्वेषतः कृतं ॥ अफलप्रेप्सुना कर्म यत्तत्सा
त्विकमुच्यते ॥ यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः क्रियते बहुलायासं तद्राजसमुदाहृतं ॥ अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषं मोहादारभ्यते कर्म यत्तत्तामस
मुच्यते इत्येवं कथ्यते यः सात्त्विकः कर्ता सात्त्विकीभ्यां बुद्धिश्रद्धाभ्यां धर्ममनुतिष्ठमानं तत्सुखं मोक्षाख्यं तारतम्यरहितं प्राप्नोति यस्तु राजसो राजसीभ्यां बुद्धिश्रद्धाभ्यां
कर्मानुतिष्ठति स स्वर्गादिलोकान्नत्वा परिमितसुखं प्राप्नोति तत्रापि श्रद्धातारतम्यकृतं सुखतारतम्यमेव भवति यस्तु तामसस्तमसा नरकादिलोकान्प्राप्यापि केवलं
दुःखमेव प्राप्नोति नरकादिलोकव्यापकः प्रवर्तकोऽपि धर्मस्तु राजसतामसयोः कर्त्रोः समानो भवतीति ॥ २ ॥ एवं धर्मस्य कर्त्रादितारतम्यं धर्मे दृष्टांतेनाह यथेति

भा॰ पं॰ ११२ यथा धर्मस्य श्रद्धादितारतम्यनिमित्तं सुखरूपफलतारतम्यं तथा प्रतिषिद्धलक्षणस्य प्रतिसिद्धरूपस्याधर्मस्य कर्तुः श्रद्धायाः अधर्मनिमित्तश्रद्धायाः केवलता
मस्याः श्रद्धायाः वैसादृश्यात्तारतम्यात् कर्मफलं दुःखरूपं विसदृशं तरतमं भवति ॥ २ ॥ श्रद्धा वैसादृश्ये कारणं वदन् कर्मफलवैसादृश्यमेवोपपादयतीति ॥ अन
द्यविद्येति अविद्याकामप्राद्यः फलकामनापरः कर्मप्रवृत्तः तदासनापरः फलकामनायाः अज्ञानफलत्वात् ॥ यद्वा ॥ यागादिरविद्या तत्रस्थकामा नियानि काम्य
कर्माणि फलकामनया एवं कामनुतिष्ठतानि पापानि वासनारूपेणावस्थितानि तेषां वैसादृश्यादित्यनुषंगः तेषां नानात्वेनावस्थितत्वाद्वा वैसादृश्यं
ततः सृतयो गतयः फलरूपा दुःखभूमिरिति यावत् तत्परिणामलक्षणाः अविद्याकामकर्मपरिपाकस्वरूपाः सहस्रशः आनंत्येनावांतरनाम्येन च प्र
या ह्यनाद्यविद्याकृतकामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां प्राचुर्येणानुवर्णयिष्यामः ॥ ३ ॥
राजोवाच ॥ नरकानाम भगवन् किं देशविशेषाः अथवा बहिस्त्रिलोक्या आहोस्विदंतराल इति ॥ ४ ॥ ऋषिरुवाच
अंतराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भूमेरुपरिष्टाज्जलाद्यस्यामग्निष्वात्तादयः पितृगणाः दिशि
स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसंति ॥ ५ ॥ हंताश्रुत भावाभावं तावत्प्रश्नः एवमुक्ते सति तद्व्याख्यानस्येन च
कानां सृतयः तदनुभवस्थानानि च साकल्येन वर्णनीयानीति राज्ञः प्रश्नो योगमालोच्य केवलतमोगुणमूलकामनाद्यज्ञानप्रयुक्तकामकर्मरूपाणां प
पानामवांतरभेदानंत्यात्तत्फलरूपाणां दुःखानामनंतगतीनामानंत्यात्तदनुभवस्थानान्यपि बहूनि संतीति तेषां साकल्येन वर्णयितुमशक्यत्वात्तत्प्र
तेतद्दुःखरूपा गतीस्तत्स्थानानि च कानिचिद्वर्णयिष्यामीत्याह तासां प्राचुर्येणानुवर्णयिष्याम इति ॥ ३ ॥ एवमुक्ते राज्ञा कार्त्स्न्येन तद्दर्शनप्रयुक्तं विज्ञाया
धर्मफलभूतदुःखानुभवस्थानानि नरकाः किं भूतेरेव देशविशेषा उत त्रिलोक्याः बहिर्वर्तंते वा अंतराले कयोश्चिल्लोकयोरंतराले प्रदेशे इति नरकाद्
निरूपम भगवन् त्रिलोक्या बहिः ब्रह्मांडाद्बहिरावरणेषु वा ॥ ४ ॥ ब्रह्मांडाद्बहिर्वर्तते इत्याह अंतराल इति त्रिजगत्या ब्रह्मांडस्यांतराल एव गर्भ एव तत्रापि कस्यां
दिशि दक्षिणस्यां तत्रापि कुत्र अधस्ताद्भूमेः उपरिष्टाज्जलादुपरि वर्तंते इत्यर्थः ॥ ५ ॥ तां दिशं विशिनष्टि यस्यामित्यादिना अग्निष्वात्तादयः येन यस्यां दक्षिणस्यां दिशि अग्नि ११२

गोत्राणां समाधात्राशिषश्चाशासाना कुर्वाणाः एवपाकं पचन्तीति वह्निर्देवाः निवसंति ॥ ७ ॥ यत्र ह यस्यां हि दिशि पितृराजः पितॄणामधिपतिः वैवस्वतो यमः संपरेतेषु
मृतेषु स्वपुरुषैर्दूतैः स्वविषयं स्वदेशं प्रापितेषु जंतुषु जीवेषु अनुल्लंघितमनतिक्रांतं भगवतो नारायणस्य शासनं येन तथाभूतः सगणः स्वकीयदूतगण
सहितः यथाकर्मावद्यं दोषमवद्यं जुगुप्सितं कर्मैव कर्मावद्यं वक्तृलग्नहृणाद्विशेषस्य पूर्वनिपातः ॥ कर्मावद्यदोषमवद्यं जुगुप्सितं कर्मैव कर्मावद्यं वक्त्र
लग्नहृणाद्विशेषस्य पूर्वनिपातः ॥ यथाकर्मावद्यमिति पदत्रयं वा ॥ अवद्यं वेदशास्त्रजुगुप्सितं कर्म प्रतिषिद्धं हिंसादिकर्म यथा जंतुभिर्निबंधादिना यथा
कृतं तदनुसारेणैव दोषप्रवृत्तिर्दमं दंडं धारयति ॥ जुगुप्सितकर्मरूपदोषानुसारेणैव दंडयतीत्यर्थः ॥ ८ ॥ तत्र नरकाः कतीत्यपेक्षायां एके नरकानेकविंशति

यत्र ह वाव भगवान् पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैः जंतुषु संपरेतेषु यथाकर्मावद्यं दोषमेवानुल्लंघितभग
वच्छासनः सगणो दमं धारयति ॥ ५ ॥ तत्र हैके नरकानेकविंशतिं गणयंति ॥ अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामः
॥ ६ ॥ तामिस्रोंधतामिस्रो रौरवो महारौरवः कुंभीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमंधकूपः कृमिभोजनः संदंशस्तप्तसूर्
मिर्वज्रकंटकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिरयःपानमिति ॥ किंच ॥

गणयंतीत्याह ॥ तत्रेति ॥ केत इत्यपेक्षायां तान्नामरूपलक्षणैः क्रमेण गणयामीत्याह ॥ हे राजन्नतान्नरकान्नामादिभिः तेनुक्रमिष्यामः ॥ तत्र नामानि वाच
काः शब्दाः रूपाणि परस्परविलक्षणदुःखजनकत्वाकाराः ॥ लक्षणानि विज्ञानि तत्र हिंसादिकर्माणि यानि प्राणानिर्वेधादीनि तान्येव निर्वेधादिरूपचि
ह्नानि तैरभिरनुक्रमिष्यामः ॥ एभिः सह क्रमेण तान्वर्णयिष्यामः इत्यर्थः ॥ ६ ॥ तानेव क्रमेण गणयन्निर्दिशति तामिस्र इत्यादिना अयःपान इत्यंतेन गद्येन ॥ तत्र
वज्रकंटकशाल्मलीति एको नरकः तथा अवीचिमदिरित्येकः ॥ एवमेकविंशतिर्नरकाः भवंति ॥ केचित्तु अत्र कूचिवीजं तन्येषां सद्भाव इति ॥ एवं तानेवभि
दंशाति ॥ किंचेत्यादिना सूचीमुखमित्यंतेन ॥ एते सप्त पूर्वोक्तैः तामिस्रादिभिः सहाष्टाविंशतिर्भवंति ॥ एते नरकाविविधयातनानामनयः दुःखानुभवः भूमयः

श्लो॰ ७ ॥ ताश्चैकैकशः तदनुभवनिमित्तानि पापानि वर्णयंति ॥ यस्त्विह स्मादिनायावदध्यायसमाप्ति ॥ योजंतुरिहलोके परस्य वित्तादीन्यपहरति सहि यमदूतैरतिभयंक
रैः कालपाशेन यमपाशेन बद्धो बलात्तामिस्राख्ये नरके निपात्यते ॥ तामिस्रं विपिनाशितमिस्रप्रायेतमःप्रचुरे यत्र तामिस्रे निपात्यमानः ॥ जंतुरनशनापानदंडे
दंडताडनसंतर्जनादिभिर्यातनाभिः यात्यमानः पीड्यमानः कश्मलं दुःखमासादितः प्राप्त एकदैव मूर्छां प्राप्नोति ॥ तामिस्रप्राये ऽत्यंधकारे तामिस्रादिनामानि योगरूढा
नीति ज्ञापितं ॥ ८ ॥ एवमिति ॥ यथा तामिस्रे दुःखानुभवं अंधतामिस्रेपीत्यर्थः ॥ तदनुभवनिमित्तं पापमाह ॥ यस्त्विति ॥ यस्तु जंतुः पुरुषं पतिं वंचयित्वा तद्दारादीन्
आदिपदाद्वित्तापत्यादीभिर्वयोऽउपभुंक्ते सोपभुक्तान्कुरुते तस्यैवमेवेति पूर्वैशान्वयः ॥ तर्हि तामिस्रांधतामिस्रयोः को विशेष इत्यपेक्षायां तामिस्रात्ते विशिनष्टि

क्षारकर्दमो रक्षोगणभोजनः ॥ शूलप्रोतो दंदशूको वटनिरोधः पर्यावर्तनः सूचीमुखमित्यष्टाविंशतिर्नरका विविधय
यातनाभूमयः ॥ १० ॥ तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे
नरके बलान्निपात्यते ॥ अनशनानिपानदंडताडनसंतर्जनादिभिर्यातनाभिर्यात्यमानो जंतुर्यत्र कश्मलमासादित एकदैव
मूर्छामुपयाति तामिस्रप्राये ॥ ११ ॥ एवमेवांधतामिस्रे यस्तु वंचयित्वा पुरुषं दारादीनुपभुंक्ते ॥ यत्र शरीरी निपात्यमानो यातना
स्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति ॥ यथा वनस्पतिर्वृश्च्यमानमूलस्तस्मादंधतामिस्रं तमुपदिशंति ॥ १२ ॥ यस्त्विह वा ए
तदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुंबमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव

यत्रेति ॥ यत्रांधतामिस्रे शरीरी देही विनिपात्यमानः यातनाभिस्तीव्राभिः पीड्यमानः तीव्रवेदनया नष्टमतिर्यस्य नष्टा दृष्टिश्च यस्य तादृशो भवति ॥ वृश्च्यमानं छिद्यमा
नं मूलं यस्य तादृशो वनस्पतिर्यथा यतते दृष्टांतः अस्मात्कारणात्तमंधतामिस्रमित्युपदिशंतीत्यर्थः ॥ १२ ॥ रौरवानुभवनिमित्तं पापं तं वर्णयति ॥ यस्त्विह वा एतेति ॥ यस्तु
प्राणी इहलोके एतच्छरीरमहमेतदपत्यकलत्रादिकं ममेत्येवंरूपाभ्यामहंकारममकाराभ्यां केवलं भूतद्रोहेण स्वकुटुंबमेवानुदिनं प्रपुष्णाति इहलोके तत्कु

नपुर्वी च विते नाशुभेन पापेन रौरवाख्ये नरके निपतंति॥ अमुत्रा ते न निपतितेन सर्वेऽ इहलोके ये जंतवो यथा येन प्रकारेण विहिंसिता स्ते एव जंतवः रुरवः रुरुसंज्ञकु
जंतवो भूत्वा तेनैव प्रकारेण परत्र रौरवे नरके यमयातनामुपगतं तमेव विहिंसंति॥ यतस्तत्र गतं रुरवो हिंसंत्य तस्तं नरकं रौरवमित्याहुरित्यर्थः॥ के ते रुरवः यत्र गत
हिंसंतीत्यत आह॥ रुरुरिति॥ सर्पादप्यति क्रूरस्वभावस्य दारुणस्य सत्वजंतोः रुरुरिति अपदेशो व्यवहार इत्यर्थः॥१२॥ महारौरवमनुवर्णयति॥ एवमेवेति
यथा रौरवे निपतितं रौरवा हिंसंति तथा महारौरवे पीत्यर्थः॥ अथ मातया वै रौरवमहरणा एवं महारौरव इत्यर्थः॥ सा हश्यं च रुरुभिर्हिंसनेन स्यांतु तत्तो विशे
षमाह॥ यत्रेति॥ यत्र महारौरवे निपतितं पुरुषं देहिनं क्रव्यं निपतितं तस्य मांसमत्तं तीति क्रव्यादा स्तथा भूताः संतो रुरवः क्रव्येण निमित्तेन घातयंति निपति
तपुरुषस्यापि मांसं भक्षयंतीत्यर्थः॥ तं क्रव्येणेति विभक्तिव्यत्यय आर्षः॥ अन्यथा क्रव्यादिरवात्योर्नैत्यणो कतुर्णो स्वमेव निषेधात्॥ तेन तृतीया क्रव्येणेति
तदशुभेन रौरवे निपतंति॥ ये त्विह यथैवामुना विहिंसिता जंतवः परत्र यमयातनामुपगतं त एव रुरवो भूत्वा तथा तमेव वि
हिंसंति तस्माद्रौरवमित्याहुः॥ रुरुरिति सर्पादति क्रूरसत्वापदेशः॥१३॥ एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा
१४ नाम रुरवस्तं क्रव्येण घातयंति यः केवलं देहंभरः॥५॥ यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणत उपरंधयति तमपकरु
णं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुंभीपाके तप्ततैले उपरंधयंति॥१४॥ यस्त्विह पितृविप्रब्रह्मध्रुक् स काल
हिताय चास्मात् क्रव्येण निमित्तेन तं खादयंतीत्यर्थस्तु संगतः स्यात् क्रव्यादाः स्वनेनपोन रुतच्चात् यथा क्रव्यादाः क्रव्यादनस्वभावा अतएव क्रव्येण फलस्यैव हेतु
त्वविवक्षया तृतीया॥ क्रव्यार्थं तं खादयंति॥ खिदोनैवत्त वेषणानि च खादिरत्र दंसन परखादयंतीति तं दंशनात् इत्यर्थः॥ अनेन पूर्वोक्तनिर्बोह सूचितः॥१४॥ अथ कु
म्भीपाकं तदनुभव निमित्तं पापं च वर्णयति॥ यस्त्विति॥ यः केवलं देहंभरः शरीरपोषणमात्रपरः य इहलोके उग्रः क्रूरः पशून् पक्षिणः प्राणतः सजीवान् उपरंधयंति
पचति तमपकरुणं निष्कृतं पुरुषादै राक्षसैरपि विगर्हितममुत्र कुंभीपाके नरके यमानुचरास्तप्ततैले उपरंधयंति पचंति तत्तैलं कुंभ्यां पच्यंते यत्र स
कुंभीपाकः स्यात्॥ यथा पचेति विवक्षितः॥१५॥ अथ कालसूत्राख्यनरकानुभवनिमित्तं दुरितं तं च वर्णयति यस्त्विति॥ इहलोके पितृद्रंता ब्राह्मणद्रंता च स

भा०पं० कालसूत्राख्येनरके अयुतंयोजनानिपरितोमंडलंयस्यतत्तस्मिन्ताम्रविकारेस्थलेखलसमदेशेखलोनामधान्यानिवितुषीकर्तुंकृतकृत्रिमोविशेषः ॥ उपर्यध
११४ स्तादग्न्यर्काभ्यामधस्ताद्गिनाउपर्यर्केणचाभितप्यमानेऽभिनिवेशितःपरितःपातितःक्षुत्पिपासाभ्यामंतर्बहिश्चदह्यमानंशरीरंयस्यसः ॥ दह्यमानशब्दा
त्पूर्वंविसर्गः ॥ यद्वा ॥ शरीरशब्दबहिःशरीरंअंतर्बहिःशरीरंचबवःपंचम्येतिसमासेक्त्वेणवृस्मृत्युपसर्जनत्वात्पूर्वनिपातः ॥ अंतरावसमासविधानज्ञापक
बहिःशब्दयोःसंबंधसामान्येपंचम्यानवर्ततेति ॥ शरीरसंबंधिबहिःप्रदेशोऽत्यर्थः ॥ अंतःशब्देनसन्निधानाच्छरीरांतःप्रदेशएवउच्यते ॥ दह्यमानमंतःशरीरा
तःप्रदेशाबहिःशरीरेचयस्येत्यर्थः ॥ एवंभूतःताम्रमयेफलकेउपवेशनादिकरोति यद्वा चात्र हाहा हतोऽहमिति हा पर्यंतिग्रायेना ॥ एवंयावंतियशोःरोमा

सूत्रसंज्ञके नरके अयुतयोजनपरिमंडले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानेऽभिनिवेशितः क्षुत्पिपा
साभ्यां च दह्यमानांतर्बहिःशरीर आस्ते शेते चेष्टते अवतिष्ठति परिधावति च यावंति पशुरोमाणि तावद्वर्षसहस्राणि
१६ ॥ यस्त्विह वै निजवेदपथादनापद्यपगतः पाखंडं चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरंति ॥ तत्र हासावितस्त
तो धावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वांगो हा हतोऽस्मीति परमया वेदनया मूर्छितः ०

णि तावत्संख्यानि वर्षाणि सहस्राणि तत्रास्ते इत्यर्थः ॥ एवं भवयातनादुःखानुभवः कालः सूच्यते ज्ञायते यस्मिन् स कालसूत्र इत्येवयथार्थोऽभिप्रेतः ॥ १६ ॥ एवंक
मप्रवेशसन्निधायापापासिपत्रवनंनरकंतत्प्राप्तिनिमित्तंचवर्णयति ॥ यस्त्विहवाइति यस्तुदेहीनिजवेदपथात्स्ववर्णाश्रमोचिताद्वेदविहिताद्धर्मादनपद्युपगतः
अतिक्रांतःअनापदेअदेशकालवैपरीत्यपुत्रकारोगादिनिमित्ताशक्तिःअनापद्यपगतःइत्यनेनापदिस्वधर्मत्यागोनदोषावहइतिसूचितं ॥ पाखंडमवैदिक
मस्मांतेचकेवलंस्वमनीषयाकल्पितंमतमेवकुपथंकल्पितंमार्गमाश्रमधर्मंउपगतस्तंवेद्विनमसिपत्रवनाख्यंनरकंप्रवेश्यप्रविष्टंकृत्वाकशयाप्रहरंति
यमभटाइतिशेषः ॥ कशाहिंनाम्नामध्यादीनानारचितुंनिर्मितोदंडाकारोरज्जुविशेषः ॥ एवंकशयाताडितस्तत्रासिपत्रवनेआसमंतादितस्ततोधावमानःतीर रामः
वंडसहमानोऽद्भुतस्मात्उभयतोधारैःपार्श्वद्वयेपिधारायुक्तैःखड्गस्यत्वेकस्मिन्नेवपार्श्वेधारामितस्तुभयतोधारैरित्यर्थः ॥ तालवनस्यासिपत्रैःखड्गसदृशैः ११४

भा. पं.
२२९

कथमिति॥ पंकाभिराकुर्वन्नंडकोशमं विशिनष्टि॥ एतदिति॥ योंडकोशः त्रिलोकात्मकः पुराणेषु चतुर्दशधा चतुर्दशभुवनात्मकेन विकल्पितः विभेदितः उपगीयते अतला
दीनि भुवनानि भूर्लोके महदादीनि दिवि मंडले तेन भो अंतरिक्षमंडलेन सह त्रिलोकात्मकोंडकोशो गोत्रानुवर्णितः अवांतरभेदमाश्रित्य पुराणेषु तु तेषु चतुर्दशोपवर्ण्य
तेत्यर्थः॥ ३८॥ एतदंडकोशवर्णनश्रवणपठनादिकफलमनुवर्णयति॥ यत्तदिति महापुरुषस्य भगवतो नारायणस्य यत् स्थविष्ठं स्थूलतमं रूपमात्ममायागु
णमयं प्रकृतिगुणप्रचुरमनुवर्णितं तदादृतोपः तद्वर्णनरूपमिमं प्रबंधमादरेण पूर्वं कं यः पठति यः शृणोति श्रावयति वा सोयमेव परमात्मन उपगेयं उपनिष
त्प्रमाणैकसमधिगम्यमवेदत्वाद्याप नस्थभाव दिव्यमंगलविग्रहविशिष्टं दिव्यात्मस्वरूपमपि श्रद्धाभक्तिभ्यां विशुद्धा बुद्धिर्यस्य तथाभूतः सन्वेद स्थूलरूपज्ञानेन सूक्ष्मरूप
ज्ञानफलकमिति॥ स्थूलरूपज्ञानसंपादकमेतत्प्रबंधपठनादिकं परं परस्यात्मस्वरूपविषयकज्ञानफलकमित्यर्थः॥ ४०॥ स्थूलरूपज्ञानस्य सूक्ष्मरूपज्ञानसाधन

यत्तद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्ममायागुणमयमनुवर्णितमादृतः पठति शृणोति श्रावयति
स उपगेयं भगवतः परमात्मनो ग्राह्यमपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद॥ ३९॥ श्रुत्वा स्थूलं तथा सूक्ष्मं रूपं भगवतो यतिः स्थ
ले निर्जितमात्मानं शनैः सूक्ष्मं धिया नयेदिति॥ ४०॥ भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्था
गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम॥ ४१॥ इति श्रीभागवते पंचमस्कंधे नरकानुवर्णनाम

वनमेवाह स्थूलेति॥ भगवतः स्थूलसूक्ष्मे रूपे यथापूर्वं श्रुत्वा गुरुमुखात्पूर्वं स्थूलरूपे निर्जितमात्मानं चित्तं शनैः सूक्ष्मं धिया शुद्धया बुद्ध्या दिव्यात्मस्वरूपविषयकज्ञानात्मकधि
यावृत्तिविषयदिव्यात्मस्वरूपे नयेदित्यर्थः॥ एवं सति प्रपंचस्यापि भगवद्रूपत्वेनानुसंधितत्वात्क्वचिदपि व्यावृत्तिविषयमानं चित्तं भगवत्येव विशेष्यभूते अवस्थितं भवतीति तत्सा
धनत्वमिति भावः॥ ४१॥ किं तद्भगवतः स्थूलरूपं यद्धेयत्वेनोक्तं तेन यत्स्थूलरूपे वर्ण्यमानं वस्तु तन्मया प्रदर्शितं उपसंहरति॥ भूद्वीपेति॥ भूः सप्तद्वीपान्तरभेदानां द्वीपवर्षाणां भूमिप्रधानानां सरितां नद्य
नामद्रीणां तथा नभसोंतरिक्षस्य समुद्राणां पातालपर्यंतानां भूविवराणां दिशां नरकाणां भागणलोकस्य नक्षत्रगणलोकस्य ध्रुवमंडलस्य च॥ तच्छब्दस्य दीर्घत्वमार्षं॥ संस्था
विन्यासविशेषाः॥ हे नृप मया तव तुभ्यं गीताः कथिताः। एतद्देवमनुष्यादिभगणलोकपर्यंतं जगत्सकलजीवसमूहस्य धाम आश्रयभूतं भगवतः अद्भुतं विचित्रं स्थूलं वपुः आ
राधं भवतीत्यर्थः॥ ४१ षड्विंशोऽध्यायः २६
इति पंचमः॥ २६

भूतजं दुःखं व्याघ्रादिभौतिकं दुःखं कृपया येभ्यो भूतेभ्यः स्वस्य दुःखं तेष्वेव कृपया दैवमाधिदैविकं दुःखमिदं प्राप्त एव किमस्माभिर्विधेयमिति एवं मनःसमाधानेनात्म
जं देहजं आध्यात्मिकं दुःखं योगवीर्येण योगबलेन प्राणायामादिना निद्रां सत्त्वनिषेवया सात्त्विकाहारसेवनेन २४ रजस्तमश्च सत्त्वेन सात्त्विकाहाराद्युपजातसत्त्व
गुणवृद्ध्या सत्त्वमंतःकरणं उपशमेन हर्षाजननमुखेन एतदुक्तं कामादिरूपं सर्वं पुरुषो गुरौ भक्त्या त्वंजसा सुखेनैव जयेत् २५ गुरुभक्त्यभावे सर्वं कामादिजया
त्मकं व्यर्थमित्याह यस्येति साक्षाद्भगवत्याचार्यं मां विजानीयादित्युक्तरीत्या भगवदभिन्नत्वेन दर्शनीये ज्ञानमेव दीपस्तत्प्रदे महोपकर्तरि गुरौ यस्य तु सोम
र्त्यबुद्धिः सोपि मादृश एव कश्चिन्मर्त्य इति बुद्धिस्तस्य श्रुतमध्ययनं सर्वं कामादिजयं च कुंजरशौचतुल्यं यथा कुंजरस्नानं पुनर्धूलिप्रक्षेपेणाकृतमप्रकृ
तं तद्वदित्यर्थः २६ गुरोर्भगवत्त्वं श्रीकृष्णदृष्टान्तेनाह एष इति श्रीकृष्णः साक्षात्प्रतिपुरुषयोरीश्वरोऽत एव योगेश्वरैरस्मदादिभिः विमृग्यो ध्येयो

कृपया भूतजं दुःखं दैवं जह्यात्समाधिना आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया २४ रजस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च एतत्सर्वं गुरौ
भक्त्या पुरुषो ह्यंजसा जयेत् २५ यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ मर्त्यासद्धीः श्रुतं तस्य सर्वं कुंजरशौचवत् २६ एष वै भगवान्सा
क्षात्प्रधानपुरुषेश्वरः योगेश्वरैर्विमृग्यांघ्रिर्लोको यं मन्यते नरम् २७ षड्वर्गसंयमैकांताः सर्वा नियमचोदना तदंता यदि नो योगानावहे
युः श्रमावहाः २८

अंघ्री पादौ यस्य स भगवानेव नात्र संदेहः एवंभूतमपि यं श्रीकृष्णं नरं मन्यते तत्स्वरूपानभिज्ञो लोकस्तथा गुरुयाथात्म्यानभिज्ञस्तं नरं
मन्यते तद्याथात्म्यविदुस्साक्षाद्भगवंतं मन्यत इत्यर्थः २७ एवं गुरुभक्त्यभावे सर्वं विफलमित्युक्तं अथावश्यकानां सर्वेषां वर्णधर्माणामाश्रमधर्माणां चेंद्रि
यजयार्थत्वं तदभावे तद्वैयर्थ्यं इंद्रियपर्यंतानामपि तेषां भगवदुपासनात्मकयोगनिष्पादकत्वएव साफल्यमन्यथा वैफल्यं चाह षड्वर्गेति सर्वा नियम-
चोदना वर्णाश्रमानुगुणावश्यकधर्मनियमविधयः चोदनाशब्देन चोद्यमुपलक्ष्यते चोदिता धर्मा इत्यर्थः यद्वा नियमस्य चोदनाः वर्णाः येषु ते धर्माः
षड्वर्गः मनःपर्यंतषडिंद्रियवर्गः तस्य संयमो नियमः तदेकांताः तदेकप्रयोजना इत्यर्थः अन्यथा तेषां वैकल्यमेवेति भावः तदंताः षड्वर्गनियमपर्यं
ता अपि यदि योगान्योगावयवान् धारणाध्यानसमाधीन्नावहेयुर्न साधयेयुस्तर्हि केवलं श्रमावहा एवेत्यर्थः २८ एवमावश्यकधर्माणां इंद्रियजयद्वा
रा योगावहत्वाएव साफल्यमन्यथा केवलश्रमफलकत्वं चोक्तं मध्यवृत्ति धर्माणामपि योगप्रयोजकत्वाभावे वैयर्थ्यं प्रस्तुतानर्थावहत्वं तैः सहावश्यकानाम

७७ यथेति वार्त्तादयोऽर्था ह्येते जीवनस्य मे वा वार्त्ता अर्था यजनादयः यदा योगस्यार्थं न बिभ्रति योगानुष्ठानैकप्रयोजनं जीवनं बिभ्रति न पुष्णंति न कुर्वंति तदाऽनर्था
यैनेरर्थकाय भवेयुर सदर्थव्ययरूपानर्थाय भवेयुरिति वा तथा सतः वर्त्तमानस्य वार्त्तानर्थान योगैकप्रयोजनजीवनमात्रोपयुक्तान कुर्वतः पुरुषस्य पूर्त्ता
स्मार्त्तं कर्म इष्टं यागादिकं वैदिकं कर्म चानर्थकाय भवेयातां २९ अथेंद्रियजयपर्यंतस्ववर्णाश्रमधर्मकामादिजयनिष्ठस्य भगवद्भक्तियोगानुष्ठानप्रका
रमाह यश्चित्यादिना यः पुमान् चित्तस्य विजये यत्तः आयतो दक्षः स्यात् तर्हि निःसंगः स्वकृतकलत्रपुत्रादिसंगो परिग्रहः शरीरमात्रावशेषितः भिक्षुस्तुर्याश्र
मी भैक्ष्यात् भिक्षुधर्मत्वाच्चैकोऽसहायः विविक्तशरणः निर्जनदेशावस्थितः भैक्ष्यं भिक्षवा लब्धं मितं चाशनमन्नं यस्य भैक्ष्यं मितं चाश्नातीति वा कर्त्तरि ल्युः
३० शुचौ परिशुद्धे समेऽनिम्नोन्नते च देशे हे राजन्नात्मनः स्वस्यासनं चेलाजिनकुशोत्तरमित्युक्तविधया स्थाप्य स्थिरं चांचल्यरहितं सुखं च यथा भव

यथा वार्त्तादयो ह्यर्था योगस्यार्थं न बिभ्रति अनर्थाय भवेयुस्ते पूर्त्तमिष्टं तथासतः २९ यश्चित्तविजये यत्तः स्यान्निःसंगो परिग्रहः ए
को विविक्तशरणो भिक्षुर्भिक्षामिताशनः ३० देशे शुचौ समे राजन्संस्थाप्यासनमात्मनः स्थिरं सुखं समं तस्मिन्नासीतर्ज्वंग ओमिति ३१
प्राणायामो संनिरुंध्यात्पूरकुंभकरेचकैः यावन्मनस्त्यजेत्कामान्स्वनासाग्रनिरीक्षणः ३२ यतो यतो निःसरति मनः कामाहतं भ्रमत्
ततस्तत उपाहृत्य हृदि रुंध्याच्छनैर्बुधः ३३ ति तथा तस्मिन्नासने आसीत उपविशेत् ऋजुत्वगाः ऋज्ववक्रमंगे यस्य स ऋजुकायः सन्नोंइत्यनुसंदधदि
ति शेषः ३१ पूरकुंभकरेचकैः प्राणायामैर्वायुसंयमैः निरुंध्यात् दयानेन प्राणोऽभिमतो रेचकः प्राणेनापानाभिभावः पूरकः उभयोः समानः कुंभ
कः यावन्मनः कामान् शब्दादिविषयांस्त्यजेन्नानुसंदधीत तावत् स्वस्य नासाया अग्रे निरीक्षमाणः ईक्षणं कर्त्तरि ल्युः ३२ कामैः शब्दादिविषयध्यानैर्हतम्
विक्षिप्तं सत्मनो भ्रमच्चंचलं यतः यं यं विषयं निःसरति विषयीकरोति ततस्ततो विषयाज्जन्मन उपाकृत्य बुधस्तत्त्वज्ञः हृदि हृदयस्थे श्रीभगवान् येशनैः रुं
ध्यात् शुभाश्रये चिंताप्रवाहं कुर्यात् अत्र नियमो यस्य सिद्धः चित्तविजय इति नियम उक्तः स्थिरं सुखमासीनेत्यासनं नेन प्राणायामे नावित्यादिना प्राणायामः या
वन्मन इत्यादिना ततस्तत उपाकृत्येतेन प्रत्याहार उक्तः निरुंध्याच्छनैर्बुध इत्यनेन ध्यानधारणे उक्ते ३३ अथ समाधिमाह॥ ॥श्री॥ ॥ ७७

एवमितिद्वाभ्यां एवमनिशं अहरहः सर्वदा वाऽभ्यसतः तस्य यतेश्चित्तमल्पीयसैव कालेन निर्वाणं वह्निवृत्तिविनाशं याति अनिंधनवह्निवत् यथानिंधनः ज्वालाधूमा
दिरहितो दाह्यरहितोंगाररूपेणावशेषितो निस्तब्ध इत्यर्थः ३४ ननु विक्षिप्तं भवतीत्याह कामेति यद्यस्मात्कामादिभिः शब्दादिविषयानुध्यानादिभिरनाविद्धम
संक्रांतं प्रशांता अपगताः अखिला वृत्तयो व्यापारात्मका यस्य तादृशं चित्तमभूत् तस्मात् चित्तं ब्रह्मसुखस्पृष्टं ब्रह्मानुभवसुखाविष्टं सत्कर्हिचिदपि नैवोत्तिष्ठेत
स्वभावाद्यान्न प्रच्युतं भवति अयमेव समाधिर्यं ब्रह्मानुभवम न चित्तं नेति भावः ३५ एवमष्टांगयुक्तभगवद्भक्तियोगनिष्ठं तत्फलत्वेन त्रिवर्गकामयमानं यतिं
निंदति यइति त्रिवर्गस्य धर्मादेरावपनात् क्षेत्रभूतात् गृहात्प्रव्रज्य पुनः पुमांस्तान् धर्मादीनेव सेवेत स वै भिक्षुर्भिरयत्रयो निर्लज्जो वांताशी छर्दितान्नभक्षेउजी
ती न्नभक्षयितृतुल्यः यद्वा प्रव्रज्यापि पुनर्भोगासक्तं यतिं निंदति ३६ न चेदमघटितं दृष्टत्वादित्याह यैः परिव्राड्भिः पूर्वं स्वदेहः नात्मा स्मृत आत्मत्वेन न निश्चि

एवमभ्यसतश्चित्तं कालेनाल्पीयसा यतेः अनिशं तस्य निर्वाणं यात्यनिंधनवह्निवत् ३४ कामादिभिरनाविद्धं प्रशांताखिलवृ
त्ति यत् चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ३५ यः प्रव्रज्य गृहात्पूर्वं त्रिवर्गावपनात्पुनः यदि सेवेत तान्भिक्षुः स वै वां
ताश्यपत्रपः ३६ यैः स्वदेहः स्मृतोऽनात्मा मर्त्यो विट्कृमिभस्मसात् त एनमात्मसात्कृत्वा श्लाघयंति ह्यसत्तमाः ३७ गृहस्थ
स्य क्रियात्यागो व्रतत्यागो वटोरपि तपस्विनो ग्रामसेवा भिक्षोरिंद्रियलोलता ३८ आश्रमापसदा ह्येते खल्वाश्रमविडंबनाः
देवमायाविमूढांस्तानुपेक्षेतानुकंपया ३९ तितः किं त्वात्मनः व्यतिरिक्तो मर्त्यः मरणशीलः वह्निभिः भस्मसात् चांततः कृमिस्याद्यवस्थामापद्यमान
श्चितिनः त एव पुनस्तमेनं देहं एवात्मसात्कृत्वात्माभिन्नं कृत्वा श्लाघयंति हि केचिदसत्तमाः परिव्राज इत्यर्थः ३७ भोगासक्तयतिनिंदाप्रसंगात्तेन सहा
श्रमांतरस्थानपि स्वधर्मातित्यागिनो निंदति गृहस्थस्येति क्रियात्यागः स्ववर्णाश्रमोचितक्रियात्यागः वटोर्ब्रह्मचारिणो व्रतत्यागः गुरुकुलवासादिव्रतत्या
गः तपस्विनो वानप्रस्थस्य ग्रामसेवा पुनर्ग्रामवासः भिक्षोः संन्यासिनः इंद्रियलोलिताः ३८ एते आश्रमापसदा येषां गृहस्थादीनां चतुर्णां क्रियात्यागाद
यस्त एते आश्रमेषु आश्रमस्थेषु अपसदा निकृष्टा इत्यर्थः एते ह्याश्रमान्विडंबयंत्यनुकुर्वंति तितथा विडंबनमात्रमेवैषां न त्वाश्रमसिद्धिरित्यर्थः अत
स्तान् भगवन्मायया विमूढान् अनेन नित्यनिरतिशयानंदरूपपरमात्मप्राप्तिसाधनभूतं तदुपासनतदंगधर्मानुष्ठानोपयुक्तमनुष्यजन्मवर्णाश्रमादिरू
पसामग्रीं लब्ध्वापि ये स्वधर्मातित्यागिनस्तेनूनं देवमायामोहिता इत्युक्तं अनुकंपया ऽहो इमे उच्चयतिताः किं विधेयमित्येवमनुकंपापूर्वकचिंतयानानु

[illegible] ३४

CC-0 Shri Krishna Museum. An eGangotri-Vedic Bharat Inititative

स्वात्मपरमात्मतत्वज्ञस्य ब्रह्मानुभवसुखतृप्तस्य तु यतेरिंद्रियलौल्यमेवासंभावितं तस्य देवमायया मोहाभावादित्याह आत्मानमिति परं प्रकृतिपुरुषविलक्षणं
मात्मानं यद्वा आत्मानं परं परमपुरुषं च विजानीयात् स चेत् ज्ञानेन निर्धूतवासनः कस्य कामाय इष्टं संपन्नये लंपटः किमिच्छन् देहं पुष्णाति देहपोषणेन स्वात्मनः परमपु
रुषस्य चेष्टं संपद्यते न तस्य जन्मवेत्यर्थः यद्वा इच्छन् शब्दादिविषयान्कामयमानः कस्य स्वपरयोरन्यतरस्य कामाय इष्टार्थं देहं पुष्णाति किं न पुष्णात्येवेत्यर्थः कस्य
कामायेत्यनेन देहपोषणं न स्वात्मनो नापि परमात्मनश्च सुखाधायकं तयोः स्वत एव निरतिशयसुखरूपत्वादिति सूच्यते निरतिशयानंदपरमात्मोपासनात्मक
तदनुभवतृप्तो निरीहो देहपोषणजसुखार्थं न घतते एव किंतु परमात्मप्राप्तय एव यतत इति सूचितं देवमायाविमूढानित्यनेन परमानंदरूपपरमात्मप्राप्ति
साधनानुष्ठानोपयुक्तशरीरेंद्रियादिसामग्रीं लब्ध्वापि येन यतंते ते देवमायया विमूढा इति चोक्तं ४० न केवलं मयैव शरीरेंद्रियादेः परमात्मप्राप्तिसा

आत्मानं चेद्विजानीयात्परं ज्ञानधुताशयः किमिच्छन्कस्य
वा हेतोर्देहं पुष्णाति लंपटः ४० आहुः शरीरं रथमिंद्रियाणि
हयानभीषून्मन इंद्रियेशं वर्त्मानि मात्रा धिषणां च सूतं सत्वं
बृहद्बंधुरमीशसृष्टं ४१

धनानुष्ठानोपयुक्तसामग्रीत्वं उच्यते अपि तूपनिषद्वाक्यान्यप्यात्मानं रथिनं विद्धि शरीरं रथमेव च बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च इंद्रियाणि ह
यानाहुर्विषयांस्तेषु गोचरान् सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमित्यादीनि संसाराध्वनः पारं वैष्णवपदं प्रेप्सुं न मात्मानं रथित्वेन तच्छरीरादीनि रथर
थ्यांगत्वेन रूपयित्वा तत्तदाहुरित्याह आहुरिति शरीरादीन् रथादिभावेन रूपयंतस्तेषां परमात्मप्राप्तिसाधनानुष्ठानोपयुक्तसामग्रीत्वमभीष्टदेशप्रेप्सो
विजिगीषोश्च प्रसिद्धरथादीनां साधनत्वमित्याहुर्वेदांता इत्यर्थः शरीरं रथस्थानीयं इंद्रियाणि हयान् अश्वान् इंद्रियाणामश्वस्थानीयानां ईशं मुख्यं मनः
अभीषून् रश्मीन् रज्जूरिति यावत् मात्राः शब्दादीन् वर्त्मानि मार्गस्थानीयान् धिषणां बुद्धिं सूतं सारथिं सत्वं बलं बृहद्दृढं बंधुरं देहादीनां बंधनं॥
ईशसृष्टं इति यथायोग्यं विभक्तिविपरिणामेन शरीरादीनां विशेषणं ईशेन परमात्मना सृष्टं ईशसृष्टं ४१ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥

दशानां प्राणानां समाहारो दशप्राणं प्राणादिपंचकं नागकूर्मकृकलदेवदत्तधनंजयाख्योपप्राणपंचकात्मकमक्षमक्षस्थानीयं अधर्मधर्मौ पुण्यपापे चक्रे पु
ण्यपापात्मकयोः कर्मणो रथत्वरूपितशरीरप्रवृत्तिहेतुत्वात्तदायत्तत्वेन च चक्रत्वेन रूपणं अभिमानिनं देहाभिमानिनं जीवं रथिनमाहुः तस्य रथिनः प्रणवमोंकारं
धनुः पठंत्याहुः शरं तु जीवं परमात्मानं तु लक्ष्यं पठंति प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते अप्रमत्तेन वेधव्यं शरवत्तन्मयो भवेदिति ह्यथर्वणश्रुतेः विश
लक्ष्ययोः शरलक्ष्ययोरिव जीवपरयोः संबंधज्ञापनहेतुत्वात्प्रणवो धनुरुक्तं ४२ रथित्वेन रूपितजीवस्य वशरत्वेनारूप्यते तत्र जेतव्यानाह रागइति रागः शब्दा
दिविषयासक्तिः विद्वेषः तद्विरोधिविषया अप्रीतिः लोभोऽसंतोषः मोहः कार्याकार्याविवेकः भयमागामिदुःखदर्शनजं ज्ञानं मदो गर्वः मानो बहुमानः अपकारा
त्तिरस्कारः असूया गुणेषु दोषत्वविदोषाविष्कारः माया वंचनं हिंसा भूतद्रोहः मत्सरः परवृत्तद्रोहचिंता ४३ रजः क्रोधः स चामर्षः प्रमादो नवधानता एवमाद

अक्षं दशप्राणमधर्मधर्मौ चक्रेऽभिमानं रथिनं च जीवं धनुर्हि तस्य प्रणवं पठंति शरं तु जीवं टी॰
परमेव लक्ष्यं ४२ रागो द्वेषश्च लोभश्च शोकमोहो भयं मदः मानोऽवमानोऽसूया च माया पु॰ ३०
हिंसा च मत्सरः ४३ रजः प्रमादः क्षुन्निद्रा शत्रवस्त्वेवमादयः रजस्तमःप्रकृतयः सत्वप्रकृतयः टि॰

यः एतन्मध्ये तत्र यः शत्रवो जेतव्यास्तथा ते रजस्तमःप्रकृतयः क्वचित्सत्वप्रकृतयश्च रजस्तमसी प्रकृती कारणे येषां ते सत्वं प्रकृतिः कारणं येषां ते चेति बहुव्री
हिः रजस्तमसोरभ्यंतरमिश्रत्वे प्रकृतय इत्यर्थः ४४ तदेवं शरीरेंद्रियमनोविषयबुद्धिबलप्राणधर्माधर्मजीवाः रथं रथांगरथ्यादिभावेन परमात्मप्राप्त्यु
पायस्याध्वनानुष्ठानोपयुक्तत्वज्ञापनाय रूपिताः प्रणवजीवेशास्तु जीवपरयोः संबंधज्ञानजनकत्वपरमात्मैकशेषत्वप्राप्यत्वज्ञापनाय धनुः शरलक्ष्यभावेन रू
पिताः हेयत्वज्ञापनाय रागादयः शत्रुत्वेन रूपिताः अथ यस्यैते रथाद्यो वशे तिष्ठंति स एवाध्वनः पारं वैष्णवं पदमाप्नोतीति सोऽध्वनः परमाप्नोति तद्वि
ष्णोः परमं पदमिति श्रुतेरर्थमभिप्रायन्नरथ्यादिकमपि तु पेक्षेनेत्याह॥ ॥यावदिति यावच्छरीरं समीहितसाधनेदक्षं स्ववशं च तावदेव गरिष्ठानां महतां
चरणार्चनया लब्धं निशातं ज्ञानरूपं खड्गं दधद्भिः प्राणैः अस्तानिरस्ताः शत्रवो रागादयो येन अच्युतः स्वाश्रितान्न च्यावयतीत्यच्युतो भगवानेव बलं यस्य तादृश

७१॥ उपशांतः रागाद्यकलुषितचित्तः स्वाराज्यतुष्टः स्वराडुकर्मवश्यः तस्य भावः स्वाराज्यं मुक्तैश्वर्यं तेन तुष्टः अवश्यमच्युतः स्वाराज्यं दास्यतीति संतुष्ट इदं नृकायरथा
दिकं विजह्यादुपेक्षेत तेनुस्मरहरिहितो भवेदित्यर्थः इदमेतद्धि संसारिकं फलं वा विवक्षितं ४५ यदुक्तविधो न स्यात्तदा तस्यानर्थमाह नेति नो चेदुक्तविधो न भ
वेत्तदा प्रमत्तमिमं देहिनमसंतो बहिर्मुखा इंद्रियवाजिनः इंद्रियाण्येवाश्वाः सूतो बुद्धिश्चेति उत्पथं प्रवृत्तिमार्गं नीत्वा विषयरूपेषु दस्युषु निक्षिपंति ते विषयाख्या
दस्यवः हयैः सूतेन च सह वर्त्तमानममुं प्रमत्तं देहिनमुर्वधिकं मृत्युभयं यस्मिन्नंधे तमस्यंधतामिस्रनरकतुल्ये संसारकूपे क्षिपंति ४६ तदेवं वर्णाश्रमधर्मान्
दनुज्ञाय भक्तियोगप्रधारीरिंद्रियादीनां तदनुष्ठानोपयुक्तत्वं तैरनुष्ठितेन वर्णाश्रमधर्मानुगृहीतेन भक्तियोगेन स्वाराज्यप्राप्तिं सांसारिकफललिप्सयानुष्ठितानां

यावन्नृकायरथमात्मवशोपकल्पं धत्ते गरिष्ठचरणार्चनया निशातं ज्ञानासिमच्युतबलो दधदस्तशत्रुः स्वाराज्यतुष्टउपशांत
इदं विजह्यात् ४५ नो चेत्प्रमत्तमसदिंद्रियवाजिसूता नीत्वोत्पथं विषयदस्युषु निक्षिपंति ते दस्यवः सहयसूतममुं तमोंऽधे सं
सारकूप उरुमृत्युभये क्षिपंति ४६ प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकं आवर्त्तते प्रवृत्तेन निवृत्तेनाश्नुतेऽमृतं ४७ हिंस्रं द्रव्य
मयं काम्यमग्निहोत्राद्यशांतिदं दर्शश्च पौर्णमासश्च चातुर्मास्यं पशुः सुतः ४८ ॥ ॥ ॥ ॥ ॥ ॥

नु धर्माणां संस्तुतिरूपानर्थावहत्वं चाभिधाय यतेषामेव धर्माणामिष्टापूर्त्तभेदेन द्वैविध्यं सांसारिकफलसाधनत्वेन कृतानां प्रवृत्तिकर्माख्यत्वं पुनरावृत्ति
हेतुत्वं उपासनानुग्रहकृतया कृतानां तु निवृत्तकर्माख्यत्वं तस्या पुनरावृत्तिहेतुत्वं चाह प्रवृत्तं इति वैदिकं वेदविहितं कर्म प्रवृत्तं निवृत्तमिति द्विविधं तत्र प्रवृ
त्तेन कर्मणा आवर्त्तते फलानुभावाय लोकांतरं प्राप्य तदनुभूय अवशिष्टेन कर्मणा ततः पुनरिहावर्त्तते निवृत्तेन त्वमृतमश्नुते तत्फलरूपमच्युतं मुक्तिं प्राप्य त
तः पुनर्नावर्त्तते ४७ प्रवृत्तनिवृत्तभेदभिन्नस्य वैदिकस्यैव कर्मणस्तत्स्वरूपमिष्टसंज्ञकत्वं च वक्तुं तद्विशिष्टस्तदवांतरभेदान्दर्शयति हिंस्रमिति अ
ग्निहोत्रनामधेयकं कर्मादिर्यस्य तदग्निहोत्रादि आदिशब्दग्राह्यान्दर्शयति दर्शश्चेति दर्शादयः शब्दाः कर्मनामामाधेयानि पशुः पशुयागः सुतः सो

भाग. स्कं. ७
७१

हुतं वैश्वदेवं प्रहुतं बलिहरणं तदेतत्सर्वं वैदिकं कर्म इष्टमित्याख्यं यद्येतदेव कर्म हिंस्रद्रव्यमयं हिंसाविषयद्रव्यप्रचुरं हिंस्रमिति पाठे पश्वादिहिंसागर्भं पुरोडाशादिद्रव्यप्रचुरं च
काम्यं स्वर्गादिकामाधिप्रशंसितं पूर्वोक्तरागाद्यनिवृत्तिदेस्यात्तदा प्रवृत्ताख्यमकाम्यं प्रांदं स्यात्तदा निवृत्ताख्यमित्यर्थः अथ पूर्तसंज्ञकं कर्माह पूर्तमिति देवालयादिनिर्माणरूपक
र्म पूर्तं आजीव्यमाजीविका ४९ तत्र प्रवृत्तिधर्मपरायणस्य त्रैवर्णिकस्य तत्फलानुभवाय लोकान्तरारोहणमार्गं फलानुभवावसाने ततः पुनरवरोहणमार्गमेवं संचरतो भूतसू
क्ष्मपरिष्वक्तत्वं चाह द्रव्येत्यादिना सार्द्धद्वयेन निषेकादिश्मशानान्तैर्गर्भाधानादिश्मशानान्तैः संस्कारैः संस्कृतो द्विजस्त्रैवर्णिकः इष्टापूर्तदत्तकारी देहत्यागानन्तरं द्रव्यसू
क्ष्मविपाकः द्रव्याणां पृथिव्यादिभूतानां सूक्ष्मा विपाकाः सूक्ष्मावस्थाः यस्य सूक्ष्मावस्थपृथिव्यादिभूतयुक्तः भूतसूक्ष्मपरिष्वक्त इति यावत् हे क्ष्मेश पृथिवीपते
धूमादयः शब्दाः तदभिमानिदेवतापराः तत्र अपक्षयः अपरपक्षः अयनं दक्षिणं दक्षिणायनं सोमश्चन्द्र इति शब्दः प्रत्येकमन्वेति धूम इति रात्रिरिति तानेके

एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च पूर्तं सुरालयारामकूपाजीव्यादिलक्षणं ४९ द्रव्यसूक्ष्मविपाकश्च धूमो
रात्रिरपक्षयः अयनं दक्षिणं सोमो दर्श ओषधिवीरुधः ५० अन्नं रेत इति क्ष्मेश पितृयाणं पुनर्भवः एकैक
शोनानुपूर्वं भूत्वा भूत्वेह जायते ५१ निषेकादिश्मशानान्तैः संस्कारैः संस्कृतो द्विजः ५२ ॥ ॥श्री॥ ॥

कशः आनुपूर्वेण भूत्वा भूत्वा प्राप्यावाप्येति भवतिरत्र प्राप्त्यर्थः आप्य प्राप्येत्यर्थः धूमादिक्रमेण चंद्रं प्राप्य तत्र अमृतमयशरीरयुक्त इष्टादिकर्मफलमनुभूय ततः दर्श
दर्शस्य चंद्रकलाक्षयहेतुत्वादिनां दर्शशब्देन चंद्रं प्राप्तस्यामृतमयशरीरनाशो लक्ष्यते विनष्टामृतमयशरीर इत्यर्थः चंद्रमसः स्थानात्क्रमेणौषध्यादीन्प्राप्य प्राप्येह लोके
जायते एतच्च पितृयाणं पुनर्भवहेतुरित्यर्थः यद्वा चंद्रपर्यंतं पितृयानं ततो रेतः पर्यंतं पुनर्भवयानं इत्यर्थः तत्र दक्षिणायनसोमयोर्मध्ये पितृलोक आकाशश्च द्रष्टव्यः॥
उषधेः पूर्वं क्रमेणाकाशवायुधूमाभ्रमेघवर्षाणि द्रष्टव्यानि तत्रारोहणं धूमरात्र्यपरपक्षदक्षिणायनषण्मासपितृलोकाकाशचंद्रक्रमेणावरोहणं तु चंद्रमसः स्थाना
काशवायुधूमाभ्रमेघवर्षौषधिवीरुदन्नतरान्नरेतः क्रमेणेत्यर्थः तथा च श्रूयते छांदोग्ये अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवति धूमाद्रात्रिं
रात्रेरपरपक्षमपरपक्षाद्यान् षडुदक्षिणेति मासांस्तान्नैते संवत्सरमभिप्राप्नुवंति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चंद्रमसमेष सोमो राजा तद्देवा

८० नामन्नं तं देवा भक्षयंति तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तंते यथैतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो
भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा जायंते ऽतो वै खलु निष्प्रपतनं तरं यो यो ह्यन्नमत्ति यो यो रेतः सिंचति तद्भूय एव भवति तद्य इह रमणीयचरणा अभ्याशो ह यत्ते र
मणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं वा चंडालयोनिं वेति
तत्रारोहणदशायां धूमाद्यभिमानिदेवतालोकगमनमेव धूमादिभावो ऽवरोहणे त्वाकाशवायुधूमाभ्रमेघतन्नावो नाम तत्संसर्गकृततत्सादृश्यापत्तिरेव ततस्वाभाव्यापत्तिरूपप
त्तेरिति शारीरकन्यायात् व्रीह्यादिभावो नाम जीवांतराधिष्ठितव्रीह्यादिसंश्लेषमात्रं अन्याधिष्ठिते पूर्ववदभिलापादिति न्यायात् एवं वान्वयः द्रव्यसूक्ष्मविपाक इति द्रव्य
सूक्ष्मविपाकादय इत्येते सोमपर्यंताः पितृयाणं दर्शादयो रेतःपर्यंताः पुनर्भवः गर्भाधानादिश्मशानांतैः संस्कृत इष्टादिकारी आनुपूर्व्या क्रमेण भूत्वा भूत्वा यस्त्यादिन्या

इंद्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति इंद्रियाणि मनस्यूर्मौ वाचि वैकारिकं मनः ५२
वाचं वर्णसमाम्नाये तमोंकारे स्वरे न्यसेत् ॐकारं बिंदुनादे तं तं तु प्राणे महत्यमुं ५३ ॥श्री॥

यथाप्राप्य पुनरिह जायते इति ४९ ५० ५१ अथापुनर्भवं देवयानं वक्तुं तेन जिगमिषोर्निवृत्तधर्मनिष्ठस्य तावत्तत्समनुसंधानमाह द्वाभ्यां इंद्रियेष्विति ज्ञानदीपे
षु चक्षुरादींद्रियेषु क्रियायज्ञान् कर्मेंद्रियव्यापारान् जुह्वति देवयानेन जिगमिषव इति शेषः चक्षुरादिभिर्ज्ञानेंद्रियैः पाणिपादादिकर्मेंद्रियाणि नियच्छेयु
रित्यर्थः इंद्रियाणि चक्षुरादीनि ज्ञानेंद्रियाणि संकल्पादिरूपोर्मिवर्तिमनसि जुह्वति मनसा तानि नियच्छेयुरित्यर्थः वैकारिकं सत्त्वात्मकं वाचि शास्त्रात्मिका
यां मनः मनस उत्थास्व प्रवृत्तिं निरुंध्यादित्यर्थः ५२ वाचं वर्णसमाम्नाये पंचाशदक्षरात्मिकामनुसंदधीरन् वर्णसमाम्नायमोंकारेंऽतर्गतं विदुः तमोंका
रं बिंदुनादे तत्तुर्यमात्रायां बिंदुनादं च प्राणे प्राणसहचारिणि मकारवाच्ये जीवे वाचकत्वेनांतर्भावयेयुः अमुं जीवं महति महदात्मनि परब्रह्मणि समर्प
येयुरित्यर्थः ५३ मुमुक्षोरनुसंधानप्रकार उक्तः अथ तस्य गतिहेतुभूतमर्चिरादिमार्गं श्लोकतो दर्शयति॥ ॥श्री॥ ॥ ॥श्री॥ ॥ ८०

अग्निरिति अग्न्यादिशब्दास्तदभिमानिदेवतापराः अत्र न क्रमविवक्षा श्रौतक्रमविरोधात् नहि सूर्यो ग्नेरनंतरं दिवसादिभ्यः पूर्वं श्रूयते किंत्वेसंघइत्यं विदुर्ये चेमे रण्ये श्रद्धा तप इत्यु
पासते तेर्चिषमभिसंभवंत्यर्चिषो हरह्न आपूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पुरुषो मानवः स ए
तान्ब्रह्म गमयत्येष देवलोकः पंथा इति अत्र संवत्सरादनंतरं वायुं विद्युतो श्रूयते नंतरं वरुणेंद्रौ च जानीयात् कौषीतकी ब्राह्मणे एतं देवयानं पंथानमापद्याग्निलोकमा
गच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इंद्रलोकं स प्रजापतिलोकं इति श्रवणात् स्वराट् इत्यत्र मानवः प्रजापतिर्वा अयं च सकलश्रुत्यविशेधेन निर्णीतः क्र
मो वरदगुरुभिरभिहितः अग्निरहः सितपक्षानुदगयनाब्दमरुदर्केंदून् अपि वैद्युतवरुणेंद्रप्रजापतीनातिवाहिकानाहुरिति पूर्वान्होराकाचानधीनशास्त्वांतरे धामंत
व्यौ उत्तरमुत्तरायणे एवमुक्तप्राप्यभगवल्लोकमार्गो दर्शितः तत्र प्राप्तस्य भगवतश्चतुर्व्यूहविशिष्टतामाह विश्व इति यथा सर्वज्ञसंहितायां सृष्टिस्थित्यंतकारिणः शक्त
यस्तत्र ऊर्जिता इत्युपक्रम्याकारशक्तिर्विश्वाख्या उकाराख्यानु तैजसी मकारशक्तिः प्राज्ञाख्याना सांरूपं पुनः सृष्ट्यिवित्यादिना जाग्रदाद्यवस्थान्वयादिकमुक्त्वा एतास्ति

अग्निः सूर्यो दिवा प्राह्नः शुक्लो रक्तोत्तरं स्वराट्
विश्वो थ तैजसः प्राज्ञस्तुर्य आत्मा समन्वयात् ५४
देवयानमिदं प्राहुर्भूत्वा भूत्वानुपूर्वशः आत्म
याज्युपशांतात्मा ह्यात्मस्थो न निवर्तते ५५

स्रोदशास्ति स्रोदशास्ति स्त्वः शक्तीसंश्रीणयंति ता अनिरुद्धादिरूपास्ताः सो तु शक्तिं विचिंतयेत् अर्द्धमात्राधियादिव्याप्तकाशार्थप्रकाशिका वासुदेवमयीं शक्तिं विद्धि तामनुय
स्तनामित्युक्तं अतस्स्थूधिष्ठाता जाग्रदवस्थानिर्वाहको निरुद्धो विश्वः स्थित्यधिष्ठाता स्वप्ननिर्वाहकः प्रद्युम्नस्तैजसः संहृतिशक्त्यधिष्ठाता सुषुप्तिनिर्वाहकः संकर्षणः प्राज्ञः
एते चाकारोकारमकारवाच्याः सर्वकारणभूतः सर्वशक्तिर्मोक्षप्रदः प्रणवार्द्धमात्रवाच्यो वासुदेवस्तुर्यश्चतुर्थमात्रासहितप्रणवस्य पूर्वमनुसंधेयत यथा प्रकृतत्वादेवंतस्यार्थः
फलदशायां प्राप्यते यो क्तः इदं प्रदर्शनार्थं मुक्तैः परव्यूहविभवादि सर्वत्रावस्थाविशिष्टो भगवान्मुक्तप्राप्य इत्यर्थः समन्वयात्सर्वेषां व्यूहादीनां प्राप्यांतर्भावत्वादित्यर्थः ५४
इदं देवयानं प्राहुर्वेदांता इति शेषः आत्मयाजी परमात्मोपासकः अनुपूर्वशः क्रमेणार्चिरादीन्प्राप्य उपशांतः निःशेषनिवृत्तः आत्मा प्रकृतिर्यस्य तादृशः परमात्मनि स्थित आ
क्षेमतया स्थित आत्मन्याविर्भूतापहतपाप्मत्वादिगुणाष्टकयुक्ते ब्रह्मात्मके स्वस्वरूपे स्थित उक्तविधब्रह्मशेषत्वेनात्मानमनुभवंतीत्यर्थः पुनस्ततो न निवर्तते एवं देवयान

पथ्य गो भूत्वा न निवर्तते जन्ममरणादिकं तद्धेतुभूतपुनरावृत्तिं च न
प्राप्नोतीत्यर्थः ५५ नैते सृती पार्थ जानन्योगी मुह्यति कश्चन तस्मा
त्सर्वेषु कालेषु योगयुक्तो भवार्जुनेति भगवदुमार्गद्वयचिंताफ
लमाह॥

८१ य एत इति यः पुमान्मुमुक्षुर्वेदनिर्मिते वेदबोधिने पितृदेवानां यानेवर्त्मनी देवयानपितृयाने शास्त्रात्मकेन चक्षुषा वेद सोपि पुमान्न मुह्यति जनस्थोपीति पाठे देहस्थो
पि इत्यर्थः स्वानुष्ठितभगवद्भक्तियोगेन मोहं न प्राप्नोतीत्यर्थः ५६ अथ प्राप्यतया प्रकृतस्य भगवतः सर्वात्मकत्वमाह आदाविति सृष्ट्यादौ अंते प्रलये च मध्ये स्थानां
जनानां अंतर्बहिश्च सद्वर्तमानः किंच यत्परावरं उत्कृष्टापकृष्टं वा तत्रोत्कृष्टमाह ज्ञानं ज्ञानात्मकं जीवस्वरूपं ज्ञेयं तच्चिद्वस्तुपरं वचो नाम वाच्यं रूपं नामरूपात्मकं
चिदचिदात्मकं सर्वं वस्त्वित्यर्थः तमो मूलप्रकृतिर्ज्योतिः समष्टिजीवश्चेत्येतत्सर्वं साक्षादयमेव परमात्मैव परमात्मकमेवेत्यर्थः ५७ एवं सर्वात्मकत्वमभिधायतस्यै
व प्राप्यत्वव्रत्तणोविशतिशायपुरुषार्थत्वज्ञापनायप्राकृतदेहस्य तदनुभाव्यशब्दादिविषयाणां चापुरुषार्थत्वमाह अवाधित इति आभासोदृश्यो देहः स अवाधि
तोपि नष्टोप्यनुवर्त्तमानोपि अवस्तुतयाऽपुरुषार्थतया स्मृतः एवं शब्दार्थरूपेण विकल्पितमैंद्रियवस्तुजातमप्यवस्त्वपुरुषार्थं यद्वा अहंकारं अहंकारगोचरं श

य एते पितृदेवानामयने वेदनिर्मिते शास्त्रेण चक्षुषा वेद जनस्थोपि न मुह्यति ५६ आदावंते जनानां सद्बहिरंतः परावरं ज्ञानं ज्ञे
यं वचो वाच्यं तमो ज्योतिस्त्वयं स्वयं ५७ अवाधितोपि ह्याभासो यथावस्तुतया स्मृतः दुर्घटत्वादैंद्रियकं तद्वदर्थविकल्पितं ५८ क्षि
त्यादीनामिहार्थानां छाया न कतमापि हि न संघातो विकारो वा न पृथङ्नान्वितो मृषा ५९ ॥ ॥ ॥श्री॥ ॥ ॥

रीरं यथाऽनित्यं हेयं तथा ममकारगोचरः शब्दादिरपुरुषार्थः नास्थिरः तस्मान्नित्यपुरुषार्थतया दुर्घटत्वादित्यर्थः यद्वा आभासः स्वप्नदेहः स तदानीमनिवृत्तोपि प्रबोधवेलायाम
वस्तुतया नात्मतयो स्मृतः जात्यादिविकल्पितजाग्रच्छरीरमपि तद्वदनात्मा आत्मधर्माणां नित्यत्वादीनां तत्र दुर्घटत्वादित्यर्थः ५८ शरीरस्य सर्वत्र सर्वकाले सर्वास्मिन्नात्मना
त्मानं विना स्थित्यभावाभावाच्छरीरमप्यात्मा स्यादिति शंकानिरासार्थमाह क्षित्यादीनामिति पृथिव्यादिपरिणामरूपाणां छाया संघातादिष्वर्थेषु न कतरापि संघातविका
रपृथग्भूतपायावदद्रव्यभाविषु न कश्चितेदपीत्यर्थः तदेवविवृणोति न संघात इति वृक्षसंघातो न छाया नापि वृक्षविकारः नापि वृक्षात्पृथक् वृक्षं हित्वास्यात् न यो
गः नान्वितः न विनाभूतः यावद्वृक्षसनाकं नान्वितो पृथगभिप्रायः पुल्लिंगनिर्देशः मृषा अनित्याः एवं शरीरमप्यात्मानं विनास्थित्यभावात् तत्प्रतिछायास दृशं न चा
त्मसंघातः शरीरं न चात्मविकारः न चात्मानं हित्वा तिष्ठति न यावदात्मभावी अनित्यत्वादतो नात्मा शरीरमित्यर्थः ५९ ॥ + ॥श्रीरामचंद्रायनमोनमः॥ + ॥ ८१

शरीरस्यानित्यत्वादात्मप्रतिवृत्त्यर्थं ननुत्वस्यापेक्षु पृथिव्यादिष्वनित्यत्वमुपपादयति धातव इति पृथिव्यादयो धातवः अवयवित्वात्संघातरूपत्वात्तन्मात्रावय
वैर्विना नस्युरवयवविनाशे संघातो नश्यतीत्यर्थः संघातरूपत्वमेवप्रतिपादयति असतीति यतोवयवसंघातरूपोवयवी अतएवावयविन्यसति विनष्टे ततोव
यवोऽसंतेवावयवानुपलभ्यमानेऽवयवा एव धातवो नस्युरुपलभ्यंतएवमवयवित्वादनित्यः शरीरं नित्यात्मा न भवतीत्यर्थः ६० नहि स्थूलोहमिति प्रतीतिः क
थमित्यपेक्षायां भ्रांतिरित्याह स्यादिति तत्रसंसर्गनिमित्ता भ्रांतिरिति प्रतिपन्नार्थं सादृश्यनिमित्तत्वं प्रतिक्षिपति स्यादिति द्वयोरप्यर्थयोर्ज्ञानादिगुणविकल्पे
सतिकस्यविद्वस्तुनः केनचित्सादृश्यं भ्रमभेदनिमित्तं स्याद्देहात्मनोस्तुसमानजातिगुणाभावात्सादृश्यमनुपपन्नं उष्णंजलमितिसंसर्गभ्रमइत्यर्थसिद्धमेव
मात्मविषयकज्ञानाभावेपिजानामिनजानामीतिविभागप्रतिपत्तौ दृष्टांतमाह जाग्रत्स्वप्नौ इति कश्चित्तुसर्ववेलायामेवसुप्तंप्रबुद्धंचात्मानंपश्यतियदा
प्रबुध्यतेतदास्वप्नद्रष्टुप्रबोधोनवासवइतिबुध्यते एवमनात्मविदांसंसारिणांकदाचिदहंजानामीतिज्ञानंनिषेधश्चात्मयाथात्म्यज्ञानाननुगुणएवत्यावे

धातवोऽवयवित्वाच्च तन्मात्रावयवैर्विना नस्युर्ह्यसत्त्ववयविन्यसन्नवयवोऽततः ६०
स्यात्सादृश्यभ्रमस्तावद्विकल्पेसति वस्तुनः जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता ६१

वम्भवत इति विधिनिषेधता विधिनिषेधता विधिनिषेधौ स्वप्ने हि स्वापप्रबोधवत्तुल्यावित्यर्थः संसारिणामात्मज्ञानाभावाद्बाह्यार्थविषयज्ञानमप्यज्ञा
नतुल्यमित्युक्तं भवति यथात ज्ञानमज्ञानमनोन्यदुक्तमिति शास्त्रविरुद्धार्थविषयज्ञानं भ्रांतिरित्ययं ज्ञानिनां नास्तीत्याह भावाद्वैतमिति यद्वा एवं
देहविलक्षणात्मज्ञानिनामपि यावत्स्थूलोहं ब्राह्मणोहमिति देहात्मभ्रमानुवृत्तिराप्रयाणं तावद्विधिनिषेधात्मशास्त्रंवश्यपतेत्याह जाग्रत्स्वप्नाविति
यथा स्वप्ने जाग्रत्त्वस्वापौ स्वापजाग्रत्त्वभावस्य स्वप्नपर्यंतादेव प्रबुद्धस्य तु तावुभौ निवर्तेते तद्वदित्यर्थः ६१ एवं यावद्देहात्मभ्रमानुवृत्तिस्तावद्विधि
निषेधनात्स्थूलोहं ब्राह्मणोहमिति प्रतीते देहात्मनोरभेदे भ्रममूलकत्वेन प्रतिषिद्धे किमेवमेव सर्वमद्वैतं भ्रमविषमुत किंस्वित्त्वमिति विषयम
त्तात्याशंकायां यावद्ध्यास्त्रानुमतमद्वैतं तत्स्यभविषयं तन्मुमुक्षोरनुसंधेयं एवेति वक्तुं तदनुमतं दर्शयन् तदनुसंधानस्य भ्रममूलकद्वैतत्वयनि
रासकत्वमाह ॥

८२ भावाद्वैतमिति यथा देहात्मनोर्भेदः शास्त्रानुमतो नुसंधेयः तथा भावाद्वैतादिरूपं त्रिविधमद्वैतमात्मनः स्वस्य वर्तयन् यद्वा आत्मनो मनसो वर्तयन् मनसि
प्रतिष्ठितं कुर्वन् स्वप्नवस्थानि यावत् ६१ मुनिः परमात्मोपासकः स्वानुभूत्या देहविलक्षणब्रह्मात्मकत्वात्मयाथात्म्यानुभवेन त्रीन् स्वप्नान् भावाद्वैतं कर्माद्वैत
द्रव्याद्वैतज्ञानानिश्चमात्मकानि धुनुते निरस्यति ६२ भावाद्वैतादिस्वरूपं विवृण्वन् त्रिविधमपि तिसृभिः श्लोकत्रयेण विवृणोति कार्येति तत्रोपादानस्य च का
र्यस्य चानन्यत्वपरं भावाद्वैतविषयः श्लोकः यत्कार्यकारणयोर्वस्तुनोरैक्यदर्शनं तद्भावाद्वैतं कार्यकारणयोरैक्ये पटतंतुवदिति दृष्टांतः यथा तंतूनां एवस्य
तिर्यग्विशेषसंयोगात्मकरूपात्मकावस्थांतरमपि पटावस्थत्वमिति पटस्तंतुभ्यो नान्यस्तथा तत्त्वं जगच्चिदात्मकं सूक्ष्मचिदचिद्विशिष्टाद् ब्रह्मणो नन्य
दित्यतद्भावाद्वैतं भावयोः कार्यकारणवस्तुनोरद्वैतं अवस्तुत्वाद्विकल्पस्येत्यनेन भावाद्वैतं निरस्यति विकल्पस्योपादानातिरिक्तद्रव्यकल्पनरूपाज्ञानस्याव
स्तुत्वादसत्त्वात् भावयोर्द्वैतं किंत्वद्वैतमेवेत्यर्थः एवमसत्कार्यवादश्च निरस्तः ६३ क्रियाद्वैतं विवृणोति यदिति हे पार्थ साक्षात्परे ब्रह्म

भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं तथात्मनः वर्तयन् स्वानुभूत्येह त्रीन् स्वप्नान् धुनुते मुनिः ६२ कार्यकारणवस्त्वैक्यदर्शनं पटतंतुवत्
अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते ६३ यद्ब्रह्मणि परे साक्षात्सर्वकर्मसमर्पणं मनोवाक्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते
६४ आत्मजायासुतादीनामन्येषां सर्वदेहिनां यत्स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते ६५

णि मत्कारणत्रयेण सर्वकर्मणां समर्पणं तत्क्रियाणामद्वैतं भगवदाराधनत्वेन सर्वकर्मणामेकफलाच्छेदः क्रियाद्वैतमनेन कर्मणामीश्वरप्रीति
मन्यफलत्वात् भेदेन फलवत्त्वभ्रमो निरस्तः ६४ द्रव्याद्वैतं विवृणोति आत्मेति अर्थशब्दो धनपरः कामशब्दः कामस्रक्चंदनादिभोग्यवस्तुविष
यः स च योग्योपकरणभोगस्थानादिप्रदर्शनार्थः यदर्थकामयोरात्मजायादिसर्वदेहिनामैक्यं तद्द्रव्याद्वैतं चित्तगृहक्षेत्रपात्रस्रक्चंदनादीनामा
त्मजायाद्यनभोक्तृवर्गसाधारणत्वद्रव्याद्द्रव्याद्वैतमित्यर्थः एतेन गृहादीनां स्वासाधारणत्वभ्रमो निरस्तः यद्वा द्रव्ययोश्चिदचिद्द्रव्ययोरद्वैतं दर्श
यति आत्मजायेति आत्मादीनां सर्वदेहिनां जीवानां ज्ञानैकाकारत्वेनैकरूपेणादर्शनं चिदद्वैतं प्रकाराद्वैतं अर्थकामादीनां सर्वेषामचित्प
रिणामरूपत्वेन दर्शनमचिदद्वैतं एवं प्रशांतिशरीरं जीवानामन्याकारभ्रमः अर्थकामादीनामचिदन्यपरिणामरूपत्वभ्रमश्च निरस्तः नाना
द्वैतमिति पाठे प्येवंविधदर्शनं ज्ञानाद्वैतमित्यर्थः ६५ न केवलं त्रिविधमेवाद्वैतमनुसंधेयमपि त्वन्यदपि शास्त्रानुमतं चेत्तदपीत्याह॥ ॥ ८२

यदिति हे नृप येन शास्त्रेण यस्य पुंसः यस्य वस्तुनः यतो यस्मात् पुनः सकाशाद्द्वैतमनिषिद्धं किंत्वनुमतं स पुमान् तेनानुसंधीयमानेनेति शेषः तदनुसंधानपूर्वक
कार्याणि कर्तव्यानीहेत तत्तु यदि न्यैः प्रमाणैः प्रतिषिद्धं पुनर्व्यतिरेतो यमनायद्दिन विपद्यते आपत्संसारो यतस्तस्यां ज्ञाननिष्ठायां वर्तमानः यथा वाचारंभण
विकारो नामधेयं व्यवसायात्मिका बुद्धिरेकेह कुरुनंदनेत्यादिशास्त्रेणाभावाद्वैतादिकं प्रतिपाद्यते न तथा प्रकाराद्वैतप्रकार्यद्वैतगुरुदेवताद्वैतादिकमपि शा
स्त्रैः प्रतिपाद्यते ऽतितदप्युपादेयमेवेत्यभिप्रायेणायं श्लोकः प्रवृत्तः तत्र प्रकार्यद्वैतं सर्वं खल्विदं ब्रह्मेत्यादि ब्रह्मप्रकारेषु सामानाधिकरण्येन ब्रह्माद्वै
तप्रतिपादनात्सामानाधिकरण्यस्य प्रकारभेदविशिष्टैकार्थैकत्वपरत्वाच्च ब्रह्माद्वैतमेव प्रकार्यद्वैतं नित्यो नित्यानां चेतनश्चेतनानां इत्यादिश्रुतिभिर्जीव
स्वरूपभेदप्रतिपादनेन स्वरूपेणाभेदानुपपत्तेः बद्धमुक्तादिव्यवस्थानुपपत्तेः सुखादिव्यवस्थानुपपत्तेश्च ब्रह्मचिज्जीवैकत्वप्रतिपादनं प्रकारैक्याभिप्रा
यकमेवेति न द्वैतप्रकाराद्वैतं आचार्यं मां विजानीयादाचार्यदेवो भवः आचार्यः स हरिः साक्षाच्चररूपी न संशयः इत्यादिभिर्गुरुदेवतादीनामद्वैतप्र

यद्यस्य वानिषिद्धं स्याद्येन यत्र यतो नृप सतेहेत कार्याणि नरो नान्यैरनापदि ६६ एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः गृहेप्यस्य
गतिं यायाद्राजंस्तद्भक्तिभाङ्नरः ६७ यथा हि यूयं नृपदेव दुस्त्यजादापद्गणादुत्तरतात्मनः प्रभो यत्पादपंकेरुहसेवया भवानहार्षीन्नि
र्जितदिग्गजः क्रतून् ६८

तिपाद्यत एव ६६ यस्त्वहं गृहस्थ एतां पदवीं विधिनैव चांजसा यायाद्देवरूपेवर्तिति तस्योत्तरमुक्तं उपसंहरति एतैरिति हे राजन् वेदोक्तैरिति वेदशब्द
स्तन्मूलकस्मृतिपुराणादीनामपि प्रदर्शनार्थः आदिभिरुक्तैः कर्तव्यत्वेनोक्तैरेतैर्भीवाद्वैतानुसंधानादिभिरन्यैर्देहात्मजीवेश्वरादिभेदानुसंधानैः स्व
स्ववर्णाश्रमोचितकर्मभिश्च तस्य भगवतो भक्तिभक्तिं कुर्वन् गृहेपि जनः गृहस्थोपि जोस्य श्रीकृष्णस्य गतिं प्राप्नुयादित्यर्थः ६७ मादृशो गृहमूढ
धीरित्यत्रेनाभिप्रेतांस्त्वस्य मुक्तिदौर्लभ्यशंकां निरस्यायेन निराकरिष्यमाणस्ताच्छ्रीकृष्णसेवयैव नरिष्यसीत्याह यथा यूयमिति हे नृप देव यथा प्रभोः
सर्वप्राकृतेशात्मनोंतरात्मनः श्रीकृष्णदेवस्तेतोपि दुस्त्यजादापद्गणादुत्तरत अद्भुमाव आर्षः यथा च भवान्स्य श्रीकृष्णस्य पादपंकजयोः से
वयाहेतुना तथा निर्जिता दिग्गजना दिक्पालानाहृत्य सन्महर्षिभिः सह क्रतूनकार्षीदिति शेषः तथा तस्यैव सेवया मोक्ष्यस इत्यध्याहारः ६८
लब्धतदीयसेवामात्रेणाहेतुना मादृशानां मुक्तिर्भवेत् किं पुनः साक्षाल्लब्धतत्सेवानां भवादृशानामिति प्रतिपादनार्थं स्वपूर्वजन्मवृत्तांतमाह॥ ॥

८२ भावाद्वैतमिति यथा देहात्मनोर्भेदः शास्त्रानुमतो ऽनुसंधेयः तथा भावाद्वैतादिरूपं त्रिविधमद्वैतमात्मनः स्वस्य वर्तयन् यद्वा आत्मनो मनसो वर्तयन् मनसि
प्रतिष्ठितं कुर्वन्नध्यवस्यन्निति यावत् इह मुनिः परमात्मोपासकः स्वानुभूत्या देहविलक्षणब्रह्मात्मकस्वात्मयाथात्म्यानुभवेन त्रीन् स्वप्नान् भावाद्वैत. कर्माद्वैत
द्रव्याद्वैतज्ञानाविभ्रमात्मकानि धुनुते निरस्यति ६२ भावाद्वैतादिस्वरूपं विवृण्वन् त्रिविधभ्रांतिनिरासं श्लोकत्रयेण विवृणोति कार्येति तत्रोपादानस्य चका
र्यस्य चानन्यत्वपरो भावाद्वैतविषयः श्लोकः यत्कार्यकारणयोर्वस्तुनोरैक्यदर्शनं तद्भावाद्वैतं कार्यकारणयोरैक्ये पटतंतुवदिति दृष्टांतः यथा तंतूनां एवव्य
तिरेकेण विशेषभाजां नामरूपात्मकावस्थांतरं मम पटावस्थत्वमिति पटस्य तेभ्यो ऽनन्यत्वं तद्वत्त्वं जगच्चिदात्मकं सूक्ष्मचिदचिद्विशिष्टाद्ब्रह्मणोऽनन्य
दित्येतज्ज्ञानं वा द्वैतभावयोः कार्यकारणवस्तुनोरद्वैतं अवस्तुत्वाद्विकल्पस्येत्यनेन भावाद्वैतं निरस्यति विकल्पस्योपादानातिरिक्तद्रव्यकल्पनरूपाज्ञानस्याव
स्तुत्वाद्वस्तुस्वरूपत्वात् भावयोर्द्वैतं किं त्वद्वैतमेवेत्यर्थः एवमसत्कार्यवादभ्रमो निरस्तः ६३ क्रियाद्वैतं विवृणोति यदिति हे पार्थ साक्षात्परे ब्रह्म

भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं तथात्मनः वर्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः ६२ कार्यकारणवस्त्वैक्यमर्शनं पटतंतुवत्
अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते ६३ यद्ब्रह्मणि परे साक्षात्सर्वकर्मसमर्पणं मनोवाक्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते
६४ आत्मजायासुतादीनामन्येषां सर्वदेहिनां यत्स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते ६५

णि यत्कारणत्रयेण सर्वकर्मणां समर्पणं तत् क्रियाणामद्वैतं भगवदाराधनत्वे सर्वकर्मणामेकफलावच्छेदः क्रियाद्वैतमनेन कर्मणामीश्वरप्रीति
मनपेक्ष्य स्वातंत्र्येण फलवत्त्वभ्रमो निरस्तः ६४ द्रव्याद्वैतं विवृणोति आत्मेति अर्थशब्दो धनपरः कामशब्दः कामस्रक्चंदनादिभोग्यवस्तुविष
यः स च योग्योपकरणभोग्यस्थानादिप्रदर्शनार्थः यदर्थकामयोरात्मजायादिसर्वदेहिनामैक्यं तद्द्रव्याद्वैतं चित्तगृहक्षेत्रपात्रस्रक्चंदनादीनामा
त्मजायाद्युपभोग्यवर्गसाधारणत्वदृष्ट्या द्रव्याद्वैतमित्यर्थः एतेन गृहादीनां स्वाधारणत्वभ्रमो निरस्तः यद्वा द्रव्ययोश्चिदचिद्द्रव्ययोरद्वैतं दर्श
यति आत्मजायेति आत्मादीनां सर्वदेहिनां जीवानां ज्ञानैकाकारत्वेनैकरूपेण दर्शनं चिदद्वैतं प्रकाराद्वैतं अर्थकामादीनां सर्वेषामचित्प
रिणामरूपत्वेन दर्शनमचिदद्वैतं एवं प्रकृतिशरीरं जीवानामन्याकारभ्रमः अर्थकामादीनामचिदन्यपरिणामरूपत्वभ्रमश्च निरस्तः नाना
द्वैतमिति पाठे ऽप्येवंविधदर्शनं ज्ञानाद्वैतमित्यर्थः ६५ न केवलं त्रिविधमेवाद्वैतमनुसंधेयमपि त्वन्यदपि शास्त्रानुमतं चेत्तदपीत्याह॥ ः ॥ ८२

यदिति हे नृप येन शास्त्रेण यस्य पुंसः यस्य वस्तुनः यतो यस्मात् वस्तुनः सकाशाद् द्वैतमनिर्विद्धं किं त्वनुमतं स पुमान् तेनानुसंधीयमाने नेति शेषः तदनुसंधानपूर्वकं
कार्याणि कर्त्तव्यानी द्वैतं कुर्याद् यैः प्राप्तव्य प्रतिबिंबस्तु न कुर्यात् यतो यन्मनाय द्विनिवियघते आपत्संसारो यतस्तस्याज्ञाननिष्ठया वर्त्तमानः यथा वा चारंभणं
विकारो नामधेयं व्यवसायात्मिका बुद्धिरेकेह कुरुनंदनेत्यादि शास्त्रेणाभावाद्वैतादिकं प्रतिपाद्यते तत्राप्रकारा द्वैत प्रकार्य द्वैत गुरु देवताद्वैतादिकमपि शा
स्त्रैः प्रतिपाद्यते ऽतितदप्युपादेयमेवेत्यभिप्रायेणाय यं श्लोकः प्रवृत्तः तत्र प्रकार्य द्वैतं सर्वं खल्विदं ब्रह्मेत्यादि ब्रह्मप्रकरणे वुसामानाधिकरण्येन ब्रह्माद्वै
त प्रतिपादनात्सामानाधिकरण्यस्य प्रकारभेदविशिष्टप्रकारैकत्वपरत्वाच्च ब्रह्माद्वैतमेव प्रकार्यद्वैतं नित्यो नित्यानां चेतनश्चेतनानामित्यादि श्रुतिभिर्जीव
स्वरूपभेदप्रतिपादनेन स्वरूपेणाभेदानुपपत्तेः बद्धमुक्तादिव्यवस्थानुपपत्तेः सुखादिव्यवस्थानुपपत्तेश्च चिज्जीवैकत्वप्रतिपादनं प्रकारैक्याभिप्रा
यकमेवेति निर्द्वैतप्रकाराद्वैतं आचार्यं मां विजानीयादाचार्य देवो भव आचार्यः सहरिः साक्षाच्चररूपी न संशयः इत्यादिभिर्गुरुदेवतादीनामद्वैतं प्र

यद्यस्य वानिर्विद्धं स्याद्येन यत्र यतो नृप सतेहेत कार्याणि नरो नान्यैरनापदि ६६ एतैरन्यैश्च वेदोक्तैर्वर्त्तमानः स्वकर्मभिः गृहेप्यस्य
गतिं यायाद्राजंस्तद्भक्तिमान्नरः ६७ यथा हि यूयं नृपदेव दुस्त्यजादापद्गणादुत्तरतात्मनः प्रभो यत्पादपंकेरुहसेवया भवानहार्षीन्नि
र्जितदिग्गजः क्रतून् ६८

तिपाद्यत एव ६६ यत्त्वं गृहस्थस्तां पदवीं विधिनयेन चांजसा यायादेव कस्ये वद्भूहीति तत्स्योत्तरमुक्तं उपसंहरति एतैरिति हे राजन् वेदोक्तैरिति वेदशब्द
स्तन्मूलकस्मृतिपुराणादीनामपि प्रदर्शनार्थः वेदादिभिरुक्तैः कर्त्तव्यत्वेनोक्तैरेतैर्भागवद्वैतानुसंधानादिभिरन्यैर्देहात्मजीवेश्वरादिभेदानुसंधानैः स्व
स्ववर्णाश्रमोचितकर्मभिश्च तत्स्य भगवतो भक्तिमान् भक्तिं कुर्वन् गृहे स्थितो जनः गृहस्थोपि जो स्य श्रीकृष्णस्य गतिं प्राप्नुयादित्यर्थः ६७ मादृशो गृहस्थ
श्रीरित्यत्र नाभिप्रेतं स्वस्य मुक्तिदोर्लभ्यं शंकांविभिन्नमोपि च निराकरिष्यमाणस्तान् श्रीकृष्णसेवये वनरिष्यसीत्याह यथेति हे नृप देवयधाप्रभोः
सर्वशक्ते रामनोंतरात्मनः श्रीकृष्णदेव हेतो यूयं दुस्त्यजादापद्गणाद्दुस्तरतत्त्वादभाव आर्षः यथा च भवान्स्य श्रीकृष्णस्य पादपंकजयोः से
वयाहेतुभूतया निर्जिता दिग्गजना दिक्पाला येन तादृशः सन्महद्भिर्विभिः सह क्रतून कार्षीदिति शेषः तथा तत्सेवसेव यामोक्ष्यस इत्यध्याहारः ६८
लब्धतदीयसेवामात्रेणाहेतुना मादृशानां मुक्तिः संभवेत किं पुनः साक्षाल्लब्धतत्सेवानां भवादृशानामिति प्रतिपादनार्थं स्वपूर्वजन्मवृत्तांतमाह॥ ॥

 अहमिति अतीतेब्रह्मकल्पेपूर्वजन्मन्यहं नाम्नोपबर्हणइतिप्रसिद्धःकश्चिद्गंधर्वआसमहं आत्मानंविशिनष्टि गंधर्वाणांसुसंमतः ६९ रूपादिभिःप्रियदर्शनः
प्रियंयथाभवतितथाद्दृश्यतइति तथारूपंसौंदर्यं पेशलंसौकुमार्यंदृष्टिचित्तापहारित्वंमाधुर्यं सौगंध्यंस्रक्चंदनादिगंधवत्त्वंरूपादिभिः प्रियदर्शनं
नंयस्येतिवा स्त्रीणांनित्यंसदाप्रियतमःमत्तःपुरवधिकेलंपटः ७० एवंभूतोहंस्थितः तत्रैकदादेवसत्रेहरिगुणानुभवात्मकब्रह्मसत्रेविश्वसृग्भिःप्र
जापतिभिः हरिकथागायनेनिमित्तेनदर्पमत्सरसंगणाउपहूताः ७१ तथाहमपितज्गंधर्वाकाणांजानन्स्त्रीभिःपरिवृत्तःगायन्हरीतगाथ्यागायन्॥

अहंपुराभवंकश्चिद्गंधर्वउपबर्हणः नाम्नातीतेब्रह्मकल्पेगंधर्वाणांसुसंमतः ६९ रूपपेशलमाधुर्यसौगंध्यप्रियदर्शनः
स्त्रीणांप्रीयतमोनित्यंमत्तस्तुपुरलंपटः ७० एकदादेवसत्रेतुहरिगाथोपगायने उपहूताविश्वसृग्भिर्गंधर्वाप्सरसांगणाः
७१ अहंचगायंस्तद्विद्वान्स्त्रीभिःपरिवृतोगतः ज्ञात्वाविश्वसृजस्तन्मेहेलनंशेपुरोजसा ७२ याहित्वंशूद्रतामाशुनष्ट
श्रीःकृतहेलनः तावद्दास्यामहंजज्ञेतत्रापिब्रह्मवादिनां शुश्रूषयानुषंगेणप्राप्तोहंब्रह्मपुत्रतां ७३ धर्मस्तेगृहमेधी ३० ७
योवर्णितःपापनाशनः गृहस्थोयेनपदवींमंतेसंन्यासिनामियात् ७४

तत्रगतः आगायन्निति पाठेऽगायन्नेवगतइत्यर्थः ततमेममहेलनमपराधंज्ञात्वाविश्वसृजउजसातपोबलेनशेपुः ७२ शापमेवाह याहीति कृतंहेलनंयेन
सत्वंनष्टाश्रीर्गंधर्वश्रोभायस्यसतादृशः आशुशूद्रत्वंयाहि शूद्रयोनिंप्राप्नुहीति तदाहंदास्यांशूद्रायांजज्ञेजातःतत्रापिशूद्रजन्मन्यपिब्रह्मवादिनांशुश्रूषयाऽ
नुषंगेणतत्संगेनचहेतुनाऽस्मिन्कल्पे ब्रह्मणश्चतुर्मुखस्यपुत्रतांप्राप्तः ७३ अध्यायद्वयोक्तमुपसंहरन्तदुक्तवर्णितदनुष्ठानफलमाह धर्मइति तुभ्यंगृहमे
धीयोधर्मोवर्णितः कथंभूतः पापनाशनः येनगृहमेधीयेनधर्मेणश्रुतेनानुष्ठितेनचगृहस्थःसंन्यासिनांभगवतिसंन्यस्तात्मनांपदवींमुक्तिरूपामियात् ८३

तदा तस्मिन्प्रियश्रवसि लब्धरुचेर्येन तस्य मम हे महामते प्रियश्रवसि मतिरस्खलिता स्थिरा बभूव। अस्खलितां मतिं विशिनष्टि। ययाऽमत्या परे ब्र
ह्मणि परब्रह्मस्वरूपे मयि वर्तमानमेतत्सदसत्कार्यकारणात्मकं जगत् स्वमायया स्वसंबंधिन्या प्रकृत्या कल्पितं निष्पादितं न तु स्वतः इत्यर्थः पश्ये दृ
ष्टवानस्मि। तद्यथा ·रे पुनेभिरर्पिता नाभावाः अनर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्राः प्राणेऽर्पिताः। जीवभूतां महाबाहो ययेदं धार्यते जग
दित्युक्तप्रकारेण प्रकृतिश्चेतनधार्य्या चेतनः। परमात्मधार्य्य इति देहात्मभेदमात्मपरमात्मसंबंधं च ज्ञातवानस्मीत्यर्थः। २७ इत्थं शरत्प्रावृषि

तस्मिंस्तदा लब्धरुचेर्महामुने प्रियश्रवस्यस्खलिता मतिर्मम। ययाहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्मणि
कल्पितं परे। २७ इत्थं शरत्प्रावृषिकावृतू हरेर्विशृण्वतो मेऽनुसवं यशोऽमलं। संकीर्त्यमानं मुनिभिर्महात्मभि
र्भक्तिः प्रवृत्तात्मरजस्तमोपहा। २८ तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः। श्रद्दधानस्य बालस्य दांतस्यानुचर
स्य च। २९ ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितं। अन्ववोचन्गमिष्यंतः कृपया दीनवत्सलाः। ३०।।।।

कौ शरत्प्रावृषौ ऋतू। अनुसवं ममलं महात्मभिर्मुनिभिः। संकीर्त्यमानं हरेर्यशो विशृण्वतो मम आत्मनि ये रजस्तमसी तयोरपहर्त्री भक्तिः प्र
वृत्ताऽऽसीत्। २८ तस्य प्रभृते भक्तेरनुरक्तस्य बालस्यापि प्रश्रितस्य विनीतस्य हतमेनः पापं यस्य श्रद्धायुक्तस्य दांतस्य जितेंद्रियस्यानुवर्त्तमा
नो मे मह्यं। २९ यद्भगवता साक्षादुदितं ज्ञानं तद्गंतमिष्यंतः गंतुमुद्यता दीनवत्सलाः। योगिनः। कृपया चान्ववोचन्नुपदिदिशुरित्यर्थः। ३०

ततः किमतस्त्राह तेमय्यीति। यद्यपि ते योगिनस्तुल्यदर्शनाः समदर्शिनस्तथापि मय्येवं रूपां चक्रुः। कृपाकरणे हेतुं वदन्नात्मानं विशिनष्टि अर्भके बाले। अपापेतं त्यक्तमखिलं चापलं जैह्म्यादिकं येन। अधृतक्रीडनके इति च्छेदः। अधृतान्यपरिगृहीतानि क्रीडनकानि बालक्रीडासाधनानि भावे वा ल्युट्। क्रीडा वा येन। अनुवर्तिनि अनुकूले शुश्रूषमाणे तदनुशासनं शुश्रूषा पूर्वकं सेवां कुर्वत्यल्पभाषिणि मितभाषिणि॥२४॥ कृपाफलं वदन्नात्मानं विशिनष्टि उच्छिष्टेति। द्विजैर्योगिभिरनुमोदितः तैर्दत्तानुज्ञः उच्छिष्टलेपान्भुक्तावशिष्टान्नादीन् सकृद्भुंजे स्म भुक्तवानस्मि। तेन भो

ते मय्यपेताखिलचापलेर्भके दांतेऽधृतक्रीडनकेऽनुवर्तिनि॥ चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि॥२४॥ उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुंजे तदपास्तकिल्बिषः॥ एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायते॥२५॥ तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनोहराः॥ ताः श्रद्धया मेनुपदं विशृण्वतः प्रियश्रवस्यंग ममाभवद्रुचिः॥२६॥

जनापास्तानि किल्बिषाणि भागवतधर्मरुचिप्रतिबंधकानि यस्य तथाभूतः अभवं एवं भागवतशुश्रूषणे प्रवृत्तस्यात एव विशुद्धं भागवतधर्मरुचिप्रतिबंधरहितं चेतो यस्य तस्य मम तद्धर्म एवात्मन्यंतःकरणे रुचिः प्रजायत॥२५॥ तत्रात्मरुचौ जातायां सत्यामन्वहमनुदिनं कृष्णस्य भगवतः कथाः प्रगायतां कथयतां योगिनामनुग्रहेण मनोहरा मनोज्ञाः कथाः अशृणवं श्रुतवानस्मि॥ ताः कृष्णकथा अनुपदं त्रिकालं श्रद्धया विशृण्वतो मम॥ अंग महे व्यास प्रियं श्रवो यशः तृप्तिर्यस्य तस्मिन् भगवति रतिरनुरागो मम अभूत्॥२६॥

भा०प्र० ५७ ननु महानुभावाभ्युदयाधिगणनामात्रेण कथं कृतकृत्यत्वं कथंतरां मसंतोषनिवृत्तिश्चेत्यत आह। इदमिति। उत्तमश्लोकस्य गुणानामनुव
र्णनमिति यत्तदिदमेव कृतार्थी भवितुमिच्छतः पुंसः संबंधिनां तपआदीनामविच्युतश्चावनरहितः प्रतिहतिरहितोर्थः। प्रयोजनं कविभिर्नि
रतिशयप्रयोजनयाथात्म्यविद्भिर्निरूपितः॥ तत्र तपो नस्नानादि मंत्रजपो वा। श्रुतमध्ययनं। स्विष्टं यागादि पूर्तं वापीकूपतटाकखननादि
बुद्धिर्ज्ञानं दत्तं दानं। भारतादेरतिविस्तरत्वात्तत्र सारग्रहणं जलधिमथनात्सुधाकल्पमविचक्षणैर्दुष्करं तस्मान्मुमुक्षूणामतीव सेव्यं। सारमु
र्थजातं संकल्प्य दर्शयन् एतावत्कर्तव्यमित्युक्तं भवति। उत्तमश्लोकगुणानुमित्यत्र वर्णनं श्रवणस्याप्युपलक्षणं। तपआदीननुतिष्ठतः पुं

इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य पूर्तस्य च बुद्धिदत्तयोः॥ अविच्युतोर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणा
नुवर्णनं॥२२॥ अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनाम्॥ निरूपितो बालक एव योगिनां शुश्रू
षणे प्रावृषि निर्विविक्षताम्॥२३॥

सोऽयद्यत्तमश्लोकगुणानुवर्णनं श्रवणयोरुचिर्जायेत। तदैव तेषां साफल्यमन्यथा तु तपआदी
नां वैयर्थ्यमेवेत्युक्तं॥२२॥ ननु भगवद्गुणवर्णनादेरपि तपआदितत्क्रियारूपत्वेन स्वतः पुरुषाराधनत्वादविच्युतार्थत्वमस्येति वेति वक्तुं तत्रा
दृष्टांततया स्वस्य पौर्वदेहिकं वृत्तांतमाह। अहमित्यादिना। यावदध्यायसमाप्तिः। हे मुने पुरा पूर्वस्मिन् कल्पेऽतीतभवे जन्मन्यहं कस्याश्चिद्वेदवा
दिनां दास्याः अभवं पुत्रोऽभवमित्यर्थः। वेदवादिनां गृहेषु प्रावृषि वर्षतौ निर्विविक्षतां नितरां वेष्टुं प्रवेष्टुमिच्छतां चातुर्मास्यदीक्षां प्रवेष्टुमि
च्छतां योगिनां संन्यासिनां शुश्रूषणार्थं बालक एव सन्नहं वेदवादिभिर्निरूपितः नियोजितोऽस्मीत्यर्थः॥२३॥ ॥॥॥ ॥॥ ॥॥ ५७

वाहंजानामीतिमावोचइतिवक्तुं त्वमात्मानंभगवदंशसंजातंजानीहीत्याह। त्वमिति॥ अमोघदृक्। अमोघंसत्यंसर्वंयथावस्थ
स्थपश्यतीत्यमोघदृक् त्वंपरस्यपुंसः। परमपुरुषस्यपरमात्मनः कलामंशमजंकर्माधतोत्पत्तिरहितमथापिजगतः शिवायहितायः
स्वेच्छयाजातमात्मानमात्मानास्वयमेवावेहि। कलाशब्दस्यनित्यस्त्रीत्वात्स्त्रीपुंसयोरपिविशेषणविशेष्यभावउपपन्नः य

त्वमात्मनात्मानमवेह्यमोघदृक्परस्यपुंसः परमात्मनः क
लां॥ अजंप्रजातंजगतः शिवायतन्महानभ्युदयोधिगण्यतां
॥२१॥

यतोऽमोघदृक्भगवदंशसंभूतश्चततस्मादेवंएतेनतयामहानुभावस्यभगवतोभ्युदयः जन्मकर्मगुणादीनामप्युपलक्षणंमि
दंजन्मकर्मगुणादिरधिगण्यतांकथ्यतांप्रवर्ध्यतामितियावत्॥ एवंचेत्कृतकृत्यस्सतवात्मन्यलंतोषोनिःशेषंनिवर्ततइतिभा
वः॥२१॥

भा० द्वि०
५६

ननु तर्हि के ते भगवद्गुणा ये मया वर्णनीया अत्यपेक्षायां तेषामानंत्यात्त्वमयापदेष्टुं साकल्येन त्वया वर्णयितुं नाशक्याः । किंतु संग्रहे
ण तान्दर्शयामीत्याह । इदमिति । यतोऽयस्माज्जगत्स्थितिसंहारसर्गाः प्रवर्तंते । स भगवानिदं विश्वं एवमपीतर इव इतर एव यथा तथै
चैवमितीवशब्दस्याप्येवशब्दपर्यायत्वानुशासनात् ॥ विश्वाभिन्नोपि विश्वविलक्षण इत्यर्थः । यत इति । जन्माद्यस्य यत इत्यत्रैवा
हैतौ पंचमी भगवानिदमित्यनेन सर्वं खल्विदं ब्रह्म तज्जलानिति श्रुत्यर्थोभिप्रेतः । एवं जगदुपादानत्वजगन्निमित्तत्वतदुभयाहि

इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसंभवाः
तद्धि स्वयं वेद भवांस्तथापि वै प्रादेशमात्रं भवतः प्रदर्शितं ॥ २० ॥

न्नसर्वशक्तित्वसर्वज्ञत्वस्थानकारणत्वादिन्नसर्वान्तरात्मत्वचिदचिद्विशिष्टत्वतन्मूलकजगदभिन्नत्वजगद्विशेष्यत्वतन्मूलकत्वद्विल
क्षणकारणत्वादिन्नोपास्यत्वमोक्षप्रदत्वादयो गुणाः । सामर्थ्यादत्र फलिताः । एवमादयस्त्वया वर्णनीया इति भावः तद्धित्थं गुणादि
जातं भवानत्स्व यमात्मनावेद तथापि मम मया भवतः प्रादेशमात्रं प्रदेश एव प्रादेशः । स्वार्थे प्रादेश एव प्रादेशमात्रं गुणानामेकदेश
मात्रमेव प्रदर्शितं । यद्यपि जगदुपादानत्वादीनत्वादीनां भगवद्गुणानामानंत्यं भवान् जानासि एव तथापि इष्टेन मया दिङ्मात्रं प्रदर्शि ५६

यत्रक्ववाभद्रमभूत् त्वमुष्य किमितिकाक्षोभत्वचितमभिप्रायं सिंहावलोकनन्यायेन विवृणोति ॥ नवाइति । अंग हे बादरायण मुकुंदसेवी
मुकुंदभक्तोजनः कदाचिद्दपि कथंचिद्दपि संसृतिं नाव्रजेत् । किंतु ततोमुच्येत एवेत्यर्थः । इदं निष्पन्नभक्तियोनिष्टपुरुषाभिप्रायकं तस्य
तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति श्रुतेः । अनिष्पन्नपि भक्तियोगेपि जनः अन्यवत् केवलकाम्यकर्मिवन्न संसृतिं व्रजेत् । नहिक
ल्याणकृत्कश्चिद्दिरित्याद्युक्तरीत्या कर्मिविलक्षणमेव प्राप्नोतीति भावः ॥ तदेव विशदयति ॥ स्मरन्निति ॥ मुकुंदांघ्र्युपगूहनं । गुहसं

न वै जनो जातु कथंचनाव्रजेन्मुकुंदसेव्यन्यवदंग संसृतिम् ।
स्मरन्मुकुंदांघ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो जनः ॥१९॥

वरणमिति धातुः । मुकुंदांघ्र्योस्संवरणं सम्यग्वरणं प्रपदनमिति यावत् । तत्स्मरन् पौर्वदैहिकं स्मरन्नित्यर्थः । तत्पुनर्विहातुं त्यक्तुं नेच्छेत्
कुतः । यतोयतो मुकुंदसेवी जनः रसग्रहः । रसो वै रसः । रसं ह्येवायं लब्ध्वानंदी भवतीत्युक्तरीत्या निरतिशयानंदात्मकरसरूपपरमात्म
नः गृहीतवानित्यर्थः ॥ तथा चोक्तं भगवता । तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं । यतते च ततो भूयः सं सिद्धौ कुरुनंदन । पूर्वाभ्यासे
न तेनैव ह्रियते ह्यवशोपि स इत्यादिना ॥१९॥

एवं भगवद्भक्तिस्वधर्मयोः शास्त्रद्वयगर्भाभ्यागमे ते प्रतिपादिते अथ तत्फलयोरुपायांतरालभ्यत्वं लभ्यत्वे च वदन्नुपायांतरालभ्यसुखसाध
नोपयुक्तमेव स्वहितं कार्यमित्याह । तस्यैवेति । उपरिब्रह्मलोकादिषु अधः पातालादिषु भ्रमतां जीवानां यत्सुखं ब्रह्मानंदानुभवात्मकं ।
नलभ्यते । तस्यैव हेतोः यत्सुखसाधनोपयुक्तोपायप्रदर्शनार्थमेव कोविदो निपुणबुद्धिस्तादृशो यतेत । एवं चेद्भूतहितकारित्वनान्यथेति
भावः । तत्सुखं वैषयिकसुखं तु सर्वत्र उपर्यधश्च गभीररंहसा दुर्लक्ष्यवेगेन कर्मणोप्युपलक्षणमिदं भ्रमतामित्यनुषंगः । कालेन तद्दुःख।

तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः ॥ तल्ल
भ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा ॥१८॥ ॥

षितेन प्राचीनेन कर्मणा च भ्रमतां जायमानानां जनानामित्यर्थः ॥ अन्यत उपायांतरादेव कालकर्मादिरूपाद्यथा लभ्यते दुःखवत् यथा दुःखं त
द्वत् । अप्रार्थितमपि दुःखं कालकर्मादिहेत्वंतरेण प्रयत्नमंतरेणैव भवति । तद्वैषयिकसुखमपीत्यर्थः ॥ यद्वा भक्तिसाध्यं नैश्रेयससुखा-
त्पाक्षत पूर्वत्वदुःखासंभिन्नत्वज्ञापनाय भक्तिव्यतिरिक्तोपायांतरसाध्यस्य सर्वस्यापि दुःखमिश्रत्वमाह ॥ तदिति । अन्यतः अनभिसंहि
तफलफलवर्णाश्रमोधर्मोपकृतभगवद्भक्तिव्यतिरिक्तोपायाद्यत्सुखं महता कालेन सर्वत्र लभ्यते तद्दुःखवत् दुःखमिश्रमेव दुःखासंभि ५५

यदुक्तं कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्मेति कर्मणोऽभद्रगर्भत्वं भगवद्भक्तियोगस्य शश्वद्भद्रगर्भत्वं च तदुभयमुपपादयति
त्यक्त्वेति । पतेदिति । शारीरपातोक्तिः ईश्वरे न वार्पितं स्वधर्मं स्वसमीहितफलसाधनं धर्मं त्यक्त्वा हरेश्चरणांबुजं भजन्जनो यतः सन्न
पक्वः । अपक्वकषायः । पतेन्म्रियेत यदि । अमुष्य यत्र क्वापि किमभद्रं भविष्यति न किंचिदपीत्यर्थः । नहि कल्याणकृत्कश्चिद्दुर्ग
तिं तात गच्छति । प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ॥ शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ अथवा योगिनामेव

त्यक्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि ॥ यत्र
क्व वाभद्रमभूदमुष्य किं को वार्थ आप्तोऽभजतां स्वधर्मतः ॥१७॥

कुले भवति धीमतामिति भगवदुक्तेरिति भावः । अभजतामिति छेदः ॥ हरेश्चरणांबुजमभजतां । यद्वा स्वधर्मत इति सार्वविभक्तिकस्तसिः
स्वधर्ममभजतां स्वधर्ममनुष्ठितां ॥ कर्तरि षष्ठीयं को वार्थः । आप्तः । आप्तः । न कोपीत्यर्थः । ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्
त्यलोकं विशंतीति भगवदुक्तेः ॥ अंतवदेवास्य तद्भवति ॥ तद्यथेह कर्मचितो लोकः क्षीयते । एवमेवामुत्र पुण्यचितो लोकः क्षीयते
प्लवा ह्येते अदृढा यज्ञरूपा इत्यादिश्रुतेश्चेति भावः ॥१७॥

भा० प्र०
५४

नन्वेकं कृत्स्नं विज्ञो न जानाति तु नाम कृत्स्नं वित्तु ममाभिप्रायं जानात्येवेत्यत आह ॥ विचक्षणेति । यद्यप्यस्य विभोर्भगवतः अनंतपारस्य कृ
ष्णस्य चेष्टितं सर्वथापारं चेष्टितं विचक्षणः निपुणबुद्धिर्निवृत्तिधर्मरतः । निवृत्तधर्मनिष्ठतया सुखं यथा तथा वेदितुमर्हति । निवृत्तधर्म
निष्ठो भगवद्देवं वाभिज्ञोऽतुल्यं भक्तिभावः । तथापि गुणैः रजआदिगुणमूलकै रागादिभिः प्रवर्तमानस्यानात्मनः आत्मज्ञानरहि
तस्य जनस्य विभोश्चेष्टितं दर्शय प्रबंधनिर्माणेन वर्णयेत्यर्थः ॥ आसनं नामाज्ञापनरूपं । तत्रार्थकामयोः क्वचिदपि हेयत्वा

विचक्षणोऽस्यार्हति वेदितुं विभोरनंतपारस्य निवृत्तितः सुखं
प्रवर्तमानस्य गुणैरनात्मनस्ततो भवान्दर्शय चेष्टितं विभोः ॥ १६ ॥

द्युक्तावपि विचक्षणो जानात्येव ॥ अतस्त्वं प्रतिक्वचिदप्यर्थकामयोर्हेयत्वं ज्ञापनं यथार्थमेव ॥ अविचक्षणं त्वदभिप्रायानभिज्ञं प्रा
प्यपि तथार्थमेवातो विचक्षणजनस्यापि सुखप्रतिपत्तये ॥ अर्थकामयोर्हेयत्वं भगवच्चेष्टितज्ञानस्य निरतिशयपुरुषार्थसाधन
त्वं च विपुलप्रबंधनिर्माणेन दर्शयेति भावः ॥ १६ ॥

भूतहिताचरणाद्धर्मे प्रवृत्तस्त्वमहितमेव कृतवानसीत्याह। जुगुप्सितमिति। स्वभावरक्तस्येत्यस्यार्थकामयोरित्यादिरर्थकामयोः स्वभाव
त एव रक्तस्य जनस्य धर्मकृते ऽर्थकामसाधनधर्मार्थमनुशासतः भारतनिर्माणद्वारा बोधयतस्तव।यं महान् व्यतिक्रमः। चिकीर्षिता
विपरीतानुष्ठानरूपश्चापतितः। भूतहितं चिकीर्षितमधुना तद्विपरीतमेव कृतमित्ययं महान् व्यतिक्रमे इत्यर्थः। अथवेदं जुगुप्सितं निं
दितं कृतं। स्वभावत एवार्थकामपारवश्यमूलकतापत्रयाभिहतं जनं प्रति पुनरर्थकामसाधनमेवानुतिष्ठेत्यनुशासनं निंदितमि

जुगुप्सितं धर्मकृतेऽनुशासतः॥ स्वभावरक्तस्य महान् व्यतिक्रमः
यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः॥ १५॥

त्यर्थः॥ ननु मयैवमनुशासने कृतेपि स्वरूप्यनुसाराच्छ्रोको निःश्रेयससाधन एव प्रवर्ततां भारतेपि क्वचिदर्थकामयोर्हेयत्वेनोक्त
त्वात्तदो यस्त्वेतत्राह॥ यद्वाक्यतेति। पारक्त्वन्वेदिनस्तवतोऽर्वाचीनोऽकृत्स्नवित्तुनः॥ यस्य तव वाक्यादर्थकामसाधनमेव धर्म इति
स्थितः॥ अर्थकामावेव निरतिशयपुरुषार्थौ तत्साधनमेव निरतिशयधर्मस्त्यध्यवसाययुक्तः॥ तस्य त्रिवर्गस्य निवारणं न मन्यते
तथा त्रिवर्गस्य विस्तरेण प्रतिपादितत्वात्त्रिवर्गस्य निवारणं त्वदभिप्रेतमिति जनो न जानातीत्यर्थः॥ १५॥ ॥॥ ॥॥ ॥

एवंचेत्वदात्मन्यसंतोषोनिवर्तेतेनान्यथेत्याह। अतइति। अतोन्यथोरुक्रमचेष्टाकथनादन्यथावैपरीत्येनतत्कृतरूपनामभिः पृथग्दृ
शः। पृथग्भूतान्संबंधरहितानर्थान्विवक्षतः वर्णयतस्तावत्तएवदुःखितामतिः कदाचिदपिक्वचिदपिपदकिंचिदप्यास्पदंव्याकुलिता
मितिस्थावन्नलभ्यतेप्रस्तुतव्याकुलैवभवतीत्यर्थः। यद्वा। ततोऽन्यथायत्किंचनविवक्षसेचेन्नानाविधार्थदर्शितस्तेमतिः। क्वापितत्कृ
तरूपनामभिः कृतेतिभावेक्तः। कर्मेत्यर्थः॥तस्योरुक्रमस्यकर्मरूपनामभिः हेतुरास्पदंप्रतिष्ठांनलभेतबुद्धेरव्याकुलत्वंनामभ
गवत्कर्मरूपनामतो वरत्वंतन्नसिध्यतीत्यर्थः॥यथावातेनवायुनाहतोन्मथितानौरास्पदंनलभतेतद्वत्। यद्वा। ततःउरुक्रमा।

अतोन्यथाकिंचनयद्विवक्षतः पृथग्दृशस्तत्कृतरूपनामभिः॥नकुत्रचित्क्वापिचदुःस्थितामतिर्ल
भेतवाताहतनौरिवास्पदम्॥१४॥

दन्यथाऽस्वत्वेनउरुक्रमानात्मकत्वेनाब्रह्मात्मकस्वतंत्रवस्तुत्वेनेतियावत्। यत्किंचनवस्तुविवक्षतः वर्णयितुमिच्छतः अतएवतत्
कृतैः देवमनुष्यादिरूपनामभिर्हेतुभिः पृथग्दृशउरुक्रमकृतैः नवातएवदुःस्थितामतिः। क्वापिकर्हिचिदप्यास्पदंनलभेत यत्
किंचनविवक्षितंचेतउरुक्रमात्मकतयातद्विभूतित्वेनैववर्णयन्नूचेत्तवमतिः सुस्थासत्यास्पदंलभते। अतदात्मकतयास्वतंत्रव
स्तुत्वेनवर्णयितुमुद्युक्तंचेत्तर्हितएवपृथग्दृष्टेस्तवदुःस्थितासतीमतिरास्पदंनलभतइत्यर्थः॥प्राधान्येनोरुक्रमचेष्टितंवर्णनीयं
तत्प्रसंगादपियत्किंचिद्वस्तुवर्णयितुमिष्टंतदपितद्विभूतितयेववर्णनीयं। एवंचेन्मतिरव्याकुलाऽन्यथात्वव्याकुलाभवतीतिभा स्कं० १ ५३

तदेवं लोकहितार्थं प्रवृत्तस्य तव केवलत्रिवर्गतत्साधननिरूपणमनुचितमित्युक्तं भवति यतः त्रैवर्गिककर्मणोऽनर्थं गर्भत्वं। अत
स्त्वमखिलानिष्टपरिहारेण प्रायेण भागवद्भक्तियोगनिष्पादकतच्चेष्टितज्ञानजनकं प्रबंधं कुर्विंत्याह। अहो इति हे महाभाग भगमत्र
भागवद्दर्शनभूतत्वमखिलनिगमद्रष्टत्वं च भवान्सत्यरतः सत्यं भूतहितं तस्मिन्नूरतः। न केवलं सत्यरत एवापि त्वमोघदृक् सत्वमूलममोघ
मवितथं पश्यतीति तथाभूतहिताचरणाय यद्वदीदं तत्त्वस्यार्थः॥ कथमेवमहं ज्ञायतो विशिनष्टि। शुचिश्रवा॥ शुचि विशुद्धं श्रवः लो।

अहो महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः॥ उरुक्रमस्याखिलबंधमु
क्तये समाधिनानुस्मर तद्विचेष्टितं॥१३॥

कहितार्थं मवनीर्णो व्यासः ऽस्ये वं विधाप्रथायस्य सः। हेतुगर्भाण्येतानि विशेषणानि एवं विधनस्यानर्थगर्भ वर्गिकनिरूपणमनुष्टि
तमितिभावः॥ उक्तविधस्त्वमुरुक्रमस्य उरव विपुला क्रमा पादविन्यासा त्रिलोकीलंघका यस्य तस्य भगवतो यद्विचेष्टितं तदेवतृणा
मखिलानां बंधानां गर्भजन्ममरणादिरूपाणां मुक्तये बंधेभ्यो मुक्तयेवा। समाधिनानुस्मर सम्यगालोचनपूर्वकं प्रबंधानेत्यर्थः॥१३॥

भा०प्र० ननुधर्मादितत्साधनानामपिपुरुषाभिलषितत्वेनहितत्वात्तन्निराकरणमप्यर्थंवदेवेत्याशंक्यां विषमिश्रपयः प्रशंसातुल्यंतन्नि
५२ रूपणमित्यभिप्रायेणैश्वर्य्यकैवल्यतत्साधनानां पुरुषार्थत्वतत्साधनत्वप्रतिक्षिपति।नैष्कर्म्यमिति।निर्गतंकर्मनिःकर्मैववनैष्कर्म्यस्वा
र्थेष्यञ्।।कर्मणोवहिर्भूतंकर्मेतरत् आत्मयाथात्म्योपासनात्मकज्ञानमित्यर्थः।तन्निरंजनंरागद्वेषाद्यंजनरहितंरागादिभिरनुपप्लु
तमप्यच्युतस्यभगवतोभावेनभक्तियोगेनवर्जितंचेद्ज्ञानानामध्येमलवद्धीनंमतःतएवनशोभते।यद्वानैष्कर्म्यनिरंजनंज्ञानमप्यच्युता
भाववर्जितंचेन्नालंशोभतेनातीवशोभतइत्यर्थः।।सर्वेच्यवनधर्माणःप्रतिबुद्धलुमोहभागितिकेवलिनोपिपुनःच्यवनधर्माणो

नैष्कर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलंनिरंजनं।।कुतःपुनःशश्वदभद्रमीश्वरेनचार्पितंकर्मयदप्य
कारणं।।१२।।

त्वावकैवल्यस्यनपुरुषार्थत्वंनापितत्साधनयोगस्यपुरुषार्थसाधनमितिभावः।।यतोनैष्कर्म्यंज्ञानयोगमेवनशोभते।कुतःपुनस्त
त्कर्मशोभते।।किंयत्तत्कर्मईश्वरेनचार्पितमनर्पितममिसंहितार्थकामादिफलमच्युतभाववर्जितंचेत्यर्थः।अतएवशाश्वत्सदाफला
नुभवदशायांअनुष्ठानदशायांचाभद्रंदुःखंयस्मिंस्तदनुष्ठानदशायामभद्रत्वंकायक्लेशात्यावहत्वेनदुष्टमेवफलदशायामपिपुनः
पतनभयवत्त्वात्कयाऽभद्रत्वमवगंतव्यं।यदप्यकारणंनिष्कामकर्माप्यच्युतभाववर्जितंचेन्नशोभते।।अयमर्थः।।ज्ञानयोगः।कर्मयोगश्च ५२
भगवद्भक्तिवर्जितोनशोभते काम्यंकर्मनशोभतेइतिकैमुत्यन्यायसिद्धमिति।।१२।। ।।।। ।।।। ।।।। ।।।।

तदेवंभगवद्यशोनंकितप्रबंधस्यशब्दतोर्थतश्चित्रपदस्यापिभागवतानुपादेयत्वमुक्तं। अथतदंकितस्यवैचित्र्यरहितस्यापिसुतरांशब्दतो
र्थतश्चदुष्टस्याप्यतीवतदुपादेयत्वमाह॥ तदिति। प्रतिश्लोकमबद्धवत्यपिशब्दतोर्थतश्चदोषवत्यपियस्मिन्प्रबंधेऽनंतस्यभगवतोय
शसांकितानिचिह्नितानिभगवद्गुणप्रख्यापकानिनामानिनारायणवासुदेवकृष्णादिनामानिदृश्यंतेइतिशेषः॥ तद्वाग्विसर्गः। सएववा
कृतश्चिद्रूपः प्रबंधः। जनताजनानांसमूहःग्रामजनबंधुभ्यस्तलितिसमूहार्थेतल्प्रत्ययः तलंतंस्त्रियामितिस्त्रीत्वं॥ तस्याअघंपापं
विप्लावयतिनाशयतीतिविप्लवः॥ अत्रभीवितप्यर्थात्प्लवेः पचादित्वादच्॥ यद्वाभावेऋदोरबित्यप्। जनतायाअघस्यविप्लवोना

तद्वाग्विसर्गोजनताघविप्लवोयस्मिन्प्रतिश्लोकमबद्धवत्यपि॥ नामान्यनंतस्ययशोंकितानि
यच्छृण्वंतिगायंतिगृणंतिसाधवः॥११॥

शोयस्मात्तथा॥ अतएवभगवतोपादत्तइतिवदन्विशिनष्टि॥ यच्छृण्वंतीति। यद्वाग्विसर्गंसाधवःशृण्वंतिश्रावयितृसद्भावे।
गृणंतिकथयंतिश्रोतृसद्भावेतदुभयाभावेकेवलंस्वयंगायंति॥ सामान्याल्पेप्रायेणयत्तदितिचनपुंसकनिर्देशः॥ शब्ददोषोनामा
नुपस्थाप्यार्थाभिप्रायेणप्रयोगः। यथास्वस्यस्यद्वानिधनानिप्रायेणप्रयोगः अर्थदोषोनामानुपस्थापकः शब्दोपस्थाप्यत्वंय
थात्वामीययोःस्वत्वादोपस्थापस्थाप्यत्वं॥ तदेवंत्रिवर्गतत्साधनप्रतिपादकंप्रबंधंभागवतानुपादेयंनिंदित्वाभगवद्यशःप्रतिपा

भा०स्कं०
५१

प्रायशाद्यामित्रेतं व्याचष्टे । यथेति हे मुनिवर्य धर्मादयः धर्मार्थकामास्त्र्योर्थाः पुरुषार्थाः यथा स्वसाधनैरनुकीर्तिता भारते इति शेषः । त
था वासुदेवस्य महिमा ते त्वया नानुवर्णितः ॥९॥ एवं तदुक्तेर्हितमेवासंतोषहेतुं दृष्ट्वा कृत्या र्थः प्रियाः परमहंसानां त एव त्वयाच्युतप्रिया
इति । तदुक्तेर्हितमेव हृष्टीकर्तुं भगवतधर्मप्रतिपादकस्य प्रबंधस्य परमहंसैरनादरणीयत्वमित्याह । नेति । तच्चित्राणि पदानि यस्मि
न् । स्वयथैव चित्रस्याप्युपलक्षणमेतदेवंविधमपि यद्वचः वाक्यं प्रबंध इति यावत् पवित्रं श्रेष्ठं एवं तां वदंतां च पवित्रत्वापादकं हरेर्यशः
कश्चिदपि न प्रगृहीत । नोपादरीत चेत्प्रगृणीते तिपाठे न वदेत चेत् प्रबंधयितृगतं वदनं प्रबंधे आरोप्य न प्रगृणीते त्युक्तं ॥ यद्वा यश्चि

यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तितः ॥ न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥९॥ न तद्वचश्चित्रपदं हरेर्य
शो जगत्पवित्रं प्रगृणीत कर्हिचित् ॥ तद्वायसं तीर्थमुशंति मानसा न यत्र हंसा निरमंत्युशिक्क्षयाः ॥१०॥ ॥ ॥

त्रपदमपि वचस्तत्र हरेर्यशो न प्रगृणीत चेत्प्रबंधकर्त्रेति शेषः ॥ तद्वाचः प्रबंधं वायसं तीर्थमुशंति वायसतीर्थतुल्यं इच्छंति ॥ तीर्थे वि
शिं च लिक्षो फलमाह ॥ यत्र वायसे तीर्थे मानसा हंसा उशिकक्षयाः कमनीयनिलासाः न निरमंति । मानसाख्यसरोवरकमनीयनिवा
सस्थाने विहारिणो मानसहंसा यथा वायसं तीर्थं उच्छिष्टपात्रादिपुनरथ्योदकयुक्तं क्षेत्रे वायससंचारयोग्यं उशंती छंति मन्यंते तिया
वत् । यत्र न निरमंति न नितरां रमंते क्षणमात्रमपि न तत्रावतिष्ठंते त्यर्थः । तथोशिक्कमनीयं निरतिशयप्रियं ब्रह्मैव क्षयमाश्रयो येषां
मानसाः ॥ मनसे मे मानसा ब्रह्मानंदानुंदी भाविकाहंस विशुद्धांतःकरणाः परमहंसे तियावत्तद्वचः वायसं तीर्थं मुशंति ॥ वायसे तुल्या
नां कानामनुभवयोग्यं मन्यंते यत्र न निरमंति । मादियेते न तत्र कलेरक्षा श्रेष्ठं एवं ती त्यर्थः ॥ उशिक्षयेति पाठे उशन्शेवधारणे पाठेर ५१

एतदेवोपपादयन्नसंतोषनिमित्तं वदेत्याह । त्वमिति । त्वमर्क इव त्रिलोकीं पर्यटन् बहिस्थवस्तुद्रष्टा वायुरिवांतश्चरः प्राणव्याप्त्या सर्वे
षामंतश्चरन्नात्मसाक्षी । आत्मनोंतःकरणस्य साक्षी द्रष्टा कृतार्थ एवेत्यर्थः ॥ अतः परावरे च तयोः समाहारस्तस्मिन् ब्रह्मणि परे ब्रह्म
णि परे ब्रह्मणि तदावेदके वेदाख्ये ब्रह्मणि च विषये धर्मतो नियतधर्मैः व्रतैः कांडव्रतादिभिश्च स्नातस्य पारंगतस्य समाप्तधर्मव्रतस्येत्य
र्थः । अलं द्रष्टुं समर्थेलं । यद्यप्यूनम संतोषरूपमलं विचक्ष्व । न्यूनशब्दस्य हेतावुपचारात् वर्तते न्यूनहेतुं विचक्ष्व ॥ चक्षिर्दर्शनेपि वर्ततेप
र्यालोचयेत्यर्थः ॥ अलं द्रष्टुं समर्थत्वं यद्यप्यूनमिति भावप्रधानो निर्देशः ॥ अलमधिकं न्यूनं न्यूनत्वं विचक्ष्व । अथवा चक्षिर्भाषणार्थ एव
न्यूनताहेतुं विचक्ष्वेत्यर्थः ॥ इत्थं प्रचोदित आह भगवान्नारदः । यावदध्यायसमाप्ति ॥७॥ किं वा भागवता धर्मा न प्रायेण निरूपिता इति

त्वं पर्यटन्नर्क इव त्रिलोकीमंतश्चरो वायुरिवात्मसाक्षी ॥ परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनमलं विचक्ष्व ॥७॥
नारद उवाच भवतानुदितप्रायं यशो भगवतोऽमलं ॥ येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलं ॥८॥

तदुक्तमेवेति मेव तावदसंतोषहेतुमाह । भवतेति द्वाभ्यां ॥ अमलं शुद्धमेव तां वदतां चाखिलकुरितापहं भगवतो यशः । भवतानुदितप्रायं
प्रायेणावर्णितमित्यर्थः ॥ प्रायग्रहणेन भारते प्रासंगिकतयाऽप्राधान्येन भगवद्यशः क्वचित्क्वचिदुदितं न तु कृत्स्नप्रबंधास्तु तेन प्राधान्ये
नचोदितमिति सूच्यते । येन भगवद्यशोऽनुवर्णितेनैवासौ तवात्मा न तुष्येत । असौ तवात्मा भगवान्वा न तुष्येत । भगवदपरितोषेपि सति
तन्नियाम्यं त्वदीयमंतःकरणमपि न तुष्यत्येवेति भावः । यद्वा । येनैव कारणेन न तुष्येतासौ तवात्मा भगवान्वा तत्कारणं किमिति चेत्तत्खि
लं न्यूनं तद्दर्शनमेव भगवद्दर्शनमेव भगवत्स्वरूपगुणविभूतियाथात्म्यज्ञानपूर्वकं प्राधान्येन तद्वर्णनाभाव एवेति मन्य इत्यर्थः ॥८॥

किंच जिज्ञासितमिति ॥ यत्सनातनमनादिनिधनाविच्छिन्नसंप्रदायं ब्रह्म वेदस्तमधीतं जिज्ञासितं च तदर्थस्तद्विवक्षितः विचारितमि
त्येवापूर्वोत्तरमीमांसयो प्रणायनपणायनाभ्यामिति भावः ॥ तथाप्येवं कृतकृत्योपि त्वमकृतार्थ इवाकृतकृत्य इव हे प्रभो शोचसि शोच
न्निवलक्ष्यस इत्यर्थः ॥ ४ ॥ एवमापृष्टः आह व्यासः ॥ अस्तीत्यादि त्रिभिः ॥ त्वयोक्तं सर्वमिदं जिज्ञासितं सुसंपन्नमित्यादिनोक्तं ममा
स्त्येव तथाप्ययमात्मा न परितुष्यते ॥ तस्यासंतोषस्य मूलं निमित्तमव्यक्तं न मया ज्ञातं ॥ अतस्त्वामेवागाधबोधमपारज्ञानं सर्वज्ञ
मितियावत् ॥ आत्मभवो ब्रह्मा तस्यात्मनः शरीरादुद्भूतं पृच्छामहे ॥ ५ ॥ नाहं जानामीति मा वोच इत्यभिप्रायेणाह । स वा इति । सैवज्ञा

जिज्ञासितमधीतं च ब्रह्म यत्तत्सनातनं ॥ तथापि शोचस्यात्मानमकृतार्थ इव प्रभो ॥ ४ ॥ श्री वेदव्यास उवाच ॥ अ
स्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे ॥ तन्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वात्मभवात्मभूतं
॥ ५ ॥ स वै भवान्वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः ॥ परावरेशो मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसंगः ॥ ६

तिनाम यत्रणीभंवान्न समस्तं गुह्यं रहस्यं नामंतर्गतं वेद जानाति ॥ कुतः यद्यस्मात्त्वया पुराणः पुरुषः सर्वजगत्कारणभूतः सर्वज्ञः पर
मपुरुष उपासितः ॥ कथं परमपुरुषोपासनमात्रेणाहं जानियामि सत्राह ॥ परावरेशः ॥ परे ब्रह्मादयो ऽवरे यस्मात्स चासावीशः सर्वनियं
ता भगवान् मनसैव संकल्पमात्रेणैव विश्वं सृजत्यवत्यत्ति संहरति च ॥ अथापि गुणैः सत्वादिभिर्न सज्जत इत्यनुषंगः ॥ स्वसंकल्प
कृतजगदुदयविभवलयलीलस्य सर्वनियंतुः सर्वप्राण्यंतर्गतवस्तुवेदित्वाद्यथाक्रतुरस्मिंल्लोके पुरुषो भवतीति न्यायेनेश्वरव

[illegible]विदितमिति भावः ॥ ६ ॥

तमागतमभिज्ञाय चिह्नैर्नारदमुनिं कृत्वा सहसा त्वरया विधिवत्सजयामास ॥ कथंभूतं सुरैः पूजितं पूज्यमानं । मतिबुद्धिपूजार्थेभ्यश्चेतिव
तैमानेकं ॥ ३४ ॥ इति प्रथमे चतुर्थः ॥ ४ ॥ अथ यथावत्पूजानंतरं सुखमासीनः बृहच्छ्रवः कीर्तिर्यस्य वीणापाणौ यस्य स देवर्षिर्नारदः स्म
यन्निव व्यासं तस्या । आसीनमुपविष्टं विप्रर्षिं व्यासं प्राह । १ । तदेवाह । पाराशर्येति त्रिभिः ॥ आसंतोषमालस्याह । कच्चिदिति । इह प्रश्ने । हे पारा

तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः ॥ पूजयामास विधिवन्नारदं सुरपूजितं ॥ ३३ ॥ इति श्रीभागवते
महापुराणे प्रथमस्कंधे चतुर्थोध्यायः ॥ ४ ॥ सूत उवाच ॥ अथ तं सुखमासीनं उपासीनं बृहच्छ्रवाः
देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव ॥ १ ॥ नारद उवाच ॥ पाराशर्य महाभाग भवतः कच्चिदा
त्मना ॥ परितुष्यति शारीर आत्मा मानस एव वा ॥ २ ॥ जिज्ञासितं सुसंपन्नमपि ते महदद्भुतम् ॥ कृतवा
न्भारतं यस्त्वं सर्वार्थपरिबृंहितं ॥ ३ ॥

शर्य ॥ हे महाभागवत भवा त्मना स्वयं शारीर आत्मा देहेन्द्रियः । मानसः मनः संबंधी मनःकरणकः समनस्क इति यावत् । परितुष्यत्येव । न पा
रितुष्यत्येव हि किंचिदिति ॥ २ ॥ ते त्वया जिज्ञासितं ज्ञातुमिष्टं सर्वं सुसंपन्नमपि । अपि शब्दः प्रश्नद्योतकः । ज्ञातमेव हीत्यर्थः । पदार्थगतौ गत्यर्थो
बुध्यर्थाः । उपबृंहितं येन तदिति ॥ अतएव महद्विपुलं अत्यद्भुतं शास्त्रतोर्थतश्च चित्रं भारतं कृतवानतः सुसंपन्नं जिज्ञासितमिति भावः

तथाप्येवमपि वर्तेतेति दैह्ये मे मम दैह्यः। देहस्थः विभुः प्रभुरात्मा प्रत्यगात्मा आत्मनांतःकरणेन सह। यद्वा दैह्यो विभुरात्मांतःकरणे
मात्मनात्मस्वरूपं ब्रह्मवर्चसि कृतस्वाध्यायनिमित्ते तेजसि। समासांतविधेरनित्यत्वा ब्रह्महस्तिभ्यां वर्चस इत्यत्र भावः। उत्तमः सुष्ठुतमो
प्यसंपन्न इवासंपूर्ण इवाभाति। असत्तम इति पाठे ब्रह्मवर्चस्य संपन्न इव ब्रह्मवर्चसरहित इवाभाति॥ यद्वा सत्तमः। असज्जनतम इवा
भातितद्वत्॥३०॥ एवं वितर्क्य स्वस्य दर्शितादसंतोषहेतुमुत्प्रेक्षते॥ किं वेति॥ यतो भागवतधर्माः प्रायशो मया न निरूपिताः ततो वासौ

तथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः॥ असंपन्न इवाभाति ब्रह्मवर्चस्य सत्तमः॥३०॥ किं वा भागवता ध
र्मा न प्रायेण निरूपिताः॥ प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः॥३१॥ तस्यैवं खिलमात्मानं मन्यमानस्य
खिद्यतः॥ कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतम्॥३२॥

किमसंतोषः। पारिशेष्यादस्यैव भागवतधर्मानिरूपणमेवासंतोषहेतुर्भवितुमर्हतीत्यभिप्रायेण निरूपणस्यासंतोषहेतुत्वमुपपा
दयति॥ प्रिया इति॥ सेवं निरात्मनि भगवति प्रीते सति हि तत्क्रियामस्य मनस्तोषः। स च भगवान्भागवतेषु तुष्टेषु सत्सु स्वयं तुष्यति। तेषां च
संतोषहेतव स्त एव धर्माः एवं तदनिरूपणादुचित एवासंतोष इति भावः। प्रायेणेत्येन क्वचित्क्वचिदेव भारते भागवतधर्मनिरूपणमिति
सूचितं॥३१॥ एवमित्यमात्मानं खिलं न्यूनं मन्यमानस्यात एव खिद्यतस्तस्य कृष्णस्य व्यासस्य प्रागुदाहृतं पूर्वमुक्तं सरस्वतीतीरस्थमा

प्रथमस्कंधे नारदागमनं नाम चतुर्थोऽध्यायः॥४॥

कृपया भारतमाख्यानं कृतं। एवं सर्वात्मकेन प्रकारेणापि भूतानां लोकानां श्रेयसि निमित्ते सदाप्रवृत्तस्यापि बादरायणस्य हृदयं मनो य
दा नातुष्यन्नजहर्ष। ततस्तदा नातीव प्रसीदत् प्रसन्नं हृदयं यस्य तथाभूतः शुचौ पवित्रे देशे सरस्वत्यास्तटे विविक्ते निर्जने देशे स्थि
तः वितर्कयन्नसंतोषहेतुः को वेति विचारयन् इदं स्वगतं वक्ष्यमाणमुवाच च। २७। तदेवाह। धृतव्रतेनेत्यादि चतुर्भिः। धृतं व्रतं छंदो

इति भारतमाख्यानं कृपया मुनिना कृतं॥ एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः॥ २६॥ सर्वात्मकेनापि यदा नातु
ष्यद्धृदयं ततः॥ नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ॥ २७॥ वितर्कयन् विविक्तस्थ इदं चोवाच धर्मवित्॥ ध
तव्रतेन हि मया छंदांसि गुरवोग्नयः॥ मानिता निर्व्यलीकेन गृहीतं चानुशासनं॥ २८॥ भारतव्यपदेशेन ह्याम्ना
यार्थश्च दर्शितः॥ दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत॥ २९॥

गुर्वग्निसेवोपलक्षं येन तेन मया छंदांसि छंदोधिदेवता निगुरवोग्नयश्च निर्व्यलीकेन निष्कपटभावेन मानिताः पूजिताः इत्यावत्। छं
दोग्न्यादीनामनुशासनं गृहीतं कृतं च। २८। किंच। भारतव्यपदेशेन भारताख्यानेनाम्नायानां वेदानामर्थश्च दर्शितः। भारतं विशिनष्टि
यत्र भारते स्त्रीशूद्रादिभिरपि धर्मो दृश्यते स्वसापेक्षित श्रेयः साधनः स्वानुरूपो धर्मो दृश्यतेऽवगम्यते॥ २९॥ ॥ ॥

भा०प्र०
४८

एवमथर्वांगिरसामित्यत्रापि तेषां निस्नातः। दारुणोपसंहारणः। सुमंतुर्नाममुनिरासीत्॥ अथर्वाख्यानमंगिरांसि तेषामिति। इतिहासानां पुराणानां
च निस्नातस्तु मम सूतस्य पिता लोमहर्षणः॥ सर्व एवैते भगवतो व्यासस्यानुग्रहादेव निस्नाता बभूवुरित्यर्थतो द्रष्टव्यं॥ ततस्त एते पैलादयः स्वं
स्वं वेदं शिष्यैः प्रशिष्यैः शिष्याणामपि शिष्यैस्तेषामपि शिष्यैश्च शिष्यादिद्वारेत्यर्थः॥ अनेकधा व्यस्यन्। व्यभांक्षुरित्यर्थः॥ ततस्ते वेदाः शा
खिनो भवन् व्यस्तशाखाश्च भवंस्तत्र ऋग्वेद एकविंशति शाखाभेदं प्राप्तः यजुर्वेदस्तु एकशतधा सामवेदस्तु सहस्रधा। आथर्वणस्तु नवधेति वि

अथर्वांगिरसामासीत्सुमंतुर्दारुणो मुनिः॥ इतिहासपुराणानां पिता मे रोमहर्षणः॥ २२ त एत ऋषयो वेदं स्वं स्वं व्यस्यन्न
नेकधा॥ शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन्॥ २३॥ त एव वेदा दुर्मेधैर्धार्यंते पुरुषैर्यथा। एवं चकार भगवान्
व्यासः कृपणवत्सलः॥ २४॥ स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा॥ कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह॥ २५॥ ॥

वेकः। किमर्थमेवमात्मना शिष्यादिमुखेन च व्यभांक्षीदित्यपेक्षायां प्रयोजनं दर्शयन् व्यासनाम निर्वक्ति। त इति दुर्मेधैरल्पप्रज्ञैः पुरुषैस्त एते
वेदा यथा धार्यंते। यथासंनिवेशितेषु धार्यंते एवं तथा चकार भगवान् श्रीव्यासस्तत्र हेतुः कृपणेषु वत्सलः वात्सल्ययुक्तः॥ यतो वेदान् व्यस्य
त् व्यभांक्षीत्तत एव व्यास इति प्रसिद्धो बभूवेति भावः॥ २४। एवं कृतवता मुनिना व्यासेन स्त्रीणां च द्विजबंधूनां त्रैवर्णिकानां च श्रुतिगोचरा श्रवण
विषया त्रयी ऋगादिभिन्नो वेदः न भवति। अध्ययनस्योपनयनांगकत्वादुपनयनस्य च त्रैवर्णिकारितत्वात् स्त्रीशूद्रादीनां वेदाध्ययनयोग्यताना ४८
स्ति। अतएव कर्मश्रेयसि वैदिककर्मसाध्ये श्रेयसि मूढानां पुरुषार्थचतुष्टयतत्साधनविषयकज्ञानविधुराणामन्यथा श्रेयो न भवेदित्यं तु

अत एव बहुदुर्भगान् भाग्यहीनान् मुनिः परमात्मयाथात्म्यमननशीलः । अत एवामोघदृक् अवितथसंकल्पः । दिव्येन चक्षुषा योगपरिशुद्धेन
मनसा सर्वेषां वर्णानामाश्रमाणां च हितं दध्यौ चिंतितवान् चिंता शुद्धैकं चकारेत्यर्थः ॥१८॥ तदेवाह प्रजानां त्रैवर्गिकानां संबंधितां
श्रेयः साधनतयाऽनुष्ठेयं वैदिकं वेदपूर्वभागबोध्यमत एव विशुद्धं भ्रमविप्रलंभादिपुरुषदोषास्पृष्टविधिबोधितं । चातुर्होत्रं चातुर्होत्रा
दिवाच्यमंत्रप्रकाश्यं कर्म वीक्ष्य प्रजानामनुष्ठेयमालोच्य तावद्यज्ञानां संतत्यै कर्तव्ययज्ञकलापविषयकबोधार्थं तद्बोधकं पूर्वमेक
रूपेणावस्थितं वेदं ऋग्यजुःसामाथर्वभेदेन चतुर्विधं विदधे व्यभांक्षीत् ॥१९॥ चातुर्विध्येन विधानमेव दर्शयति ॥ ऋगिति ॥ ऋगाद्याश्चत्वा

दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा । सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक् ॥१८॥ चातुर्होत्रं कर्म शुद्धं प्रजानां वी
क्ष्य वैदिकं । व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधं ॥१९॥ ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः ॥ इतिहासपुराणं च पं
चमो वेद उच्यते ॥२०॥ तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः । वैशंपायन एवैको निष्णातो यजुषामुत ॥२१॥

ते वेदा उद्धृताः

रि श्रीभूतवेदराशेरुद्धृत्य संनिवेशविशेषेण योजिताः इत्यर्थः । तथा इतिहासपुराणानि च उद्धृतानीत्यनुषंगः । कालेन विलुप्तानि मात्स्यादि
पुराणानीतिहासाश्चोद्धृता इत्यर्थः ॥ इतिहासं पुराणानि च विशिनष्टि पंचमो वेद उच्यते । पंचमवेदत्वेन प्रसिध्यंत इत्यर्थः ॥ तत्र ऋगादीनामध्ये
ऋग्वेदधरः पैलः । अध्ययनपूर्वकमृग्वेदं पैलो मुनिर्दधारेत्यर्थः ॥ कविर्विद्वान् । जैमिनिस्तु सामगः । अध्ययनपूर्वकमृगाधाराणि सामानि
जगावित्यर्थः ॥ वैशंपायन एक एव ऋषिर्यजुषां निष्णातः पारंगतः मतः स्मृतः । अवांतरभेदाभिप्रायेण यजुषामित्युक्तम् ॥२१॥ ॥

नमंतीति । शत्रवः स्वात्मनः स्वस्य शिवायात्मनां योगक्षेमाय धनान्यानीयादाय समर्प्येत्यर्थः । यस्य परीक्षित पादनिकेतं पादरूपी गृहं न ।
मंति हे सूताश्चर्यं स वीरः परीक्षिद्युवा सन्नपि दुस्त्यजां ॥ श्रियमधिराट् श्रियमसुभिः प्राणैः सहोत्स्रष्टुं त्यक्तुमैषत ऐच्छत् ॥ अहो आश्चर्या
श्चर्यमेतत् ॥१०॥ ननु महाभागवतं प्राकुरिति स्वयैवोक्त्वा भागवतानां च देहतदनुबंधिषु विरक्तेः स्वाभाविकत्वात्तेन तदाश्चर्यमित्यत
आह । शिवायेति । यद्यपि भागवता विरक्ताः स्युस्तथापि उत्तमश्लोको भगवानेव परमयनं प्राप्यः प्रापकमाधारश्च येषां ते जना भागवता
नात्मार्थं जीवंति । किंतु लोकस्य शिवाय मंगलाय भूतये श्रियै भवाय तस्या उत्तरोत्तरोदयाय च जीवंति ॥ एवं पराश्रयं परैर्लोकैः शि

नमंति यत्पादनिकेतमात्मनः शिवाय हानीय धनानि शत्रवः । कथं स वीरः श्रियमंग दुस्त्यजां युवैषतोत्स्रष्टुमहो
महासुभिः ॥१०॥ शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः । जीवंति नात्मार्थमसौ पराश्र
यं मुमोच निर्विद्य कुतः कलेवरम् ॥११॥ तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन । मन्ये त्वां विषये वाचां स्नातमन्य
त्र छांदसात् ॥१२॥

वाद्यर्थमाश्रयणीयं परोपकारकमित्यर्थः । कलेवरं कुतो हेतोर्निर्विद्य हेयं मत्वा मुमोच तत्याज ॥११॥ प्र
श्नमुपसंहरति ॥ तदिति ॥ नोऽस्माभिः । पृष्टस्त्वं देतत्स्पष्टं सर्वं सम्यगाचक्ष्वाख्याहि । यदपि किंचनापृष्टमस्ति तदपि समाचक्ष्व यदसीति पा
मेयद्यस्मात्स्पष्टत्वं ततः पृष्टं तदेतत्सर्वमन्यदपि किंचित्समाचक्ष्व । त्वामन्यत्र छांदसाद्वेदवाक्यं विना वाचामितिहासपुराणादिरूपाणां
विषये स्नातं पारंगतमधि । कृतं वा मन्ये । वेदवाक्यव्यतिरिक्ते इतिहासपुराणादिश्रवणे त्वामेवाधिकाधिकारिणं व्यासानुगृहीत रोमह

भा०टी० एवमापृष्टः सूतः कस्मिन्युगे प्रवृत्तेयमित्यादिप्रश्नान्प्रति विवक्षुस्तावदुपोद्घातरूपं जन्मप्रभृत्येतत्पुराणोद्योगावधिकं श्रीव्यासचरि
४७ त्रं तदनुप्रष्टं श्रीनारदवृत्तांतं चाह द्वापरइत्यादिना यावदध्यायसमाप्ति ॥ द्वापरे युगे समनुप्राप्ते तत्रापि तृतीये ऽस्य युगस्य पर्याये ऽवसाने परा
शरादृषेर्वासव्यां उपरिचरवसुवीर्यजातायां सत्यवत्यां हरेः कलयांऽशेन योगी श्रीव्यासो जातः जज्ञे । १४ ॥ स व्यासः कदाचित्सरस्वत्यां नद्यां शुचि
पवित्रं जलमुपस्पृश्याचम्येदं नित्यकर्मोपलक्षणं रविमंडले उदिते सति एकोऽसहायः विविक्ते निर्जने देशे आसीन उपविवेश । १५ ॥ ऋषि

सूत उवाच ॥ द्वापरे समनुप्राप्ते तृतीये युगपर्यये ॥ जातः पराशराद्योगी वासव्यां कलया हरेः । १४ । स कदाचित्सरस्वत्या उप
स्पृश्य जलं शुचिः ॥ विविक्त एक आसीन उदिते रविमंडले । १५ । परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा । युगधर्मव्यतिकरं प्रा
प्तं भुवि युगे युगे ॥ १६ ॥ भौतिकानां च भूतानां शक्तिह्रासं च तत्कृतं ॥ अश्रद्दधानान्निःसत्वान्दुर्मेधान्ह्रसितायुषः ॥ १७ ॥

निखिलनिगमद्रष्टा परावरज्ञः । प्रकृतिपुरुषेश्वररूपो कृष्णपरतत्त्वयाथात्म्यदर्शी स व्यासः । अव्यक्तं रंहः वेगो यस्य तेन दुर्निरीक्ष्यवे
गेन कालेन हेतुना भुवि भूलोके प्रतियुगं प्राप्तं धर्मव्यतिकरं धर्मव्यत्यासं कृतादियुगक्रमेण प्राप्तं धर्मस्य वृद्धिह्रासादिकमित्यर्थः । १६ । तथा त
त्कृतं धर्मव्यतिकरकृतं भौतिकानामाकाशादिभूतपरिणामरूपाणां देवादिशरीराणां भूतानां तत्संसृष्टानां जीवानां च शक्तिह्रासं शक्तित्र
यं च तथा जनानभिवीक्ष्य । कथंभूतान् अश्रद्दधानान् अश्रद्धां कुर्वाणान् स्वस्ववर्णाश्रमानुगुणधर्मानुष्ठानविषयकत्वरारहितान्निःसत्वा
न् दुर्बलान्सत्वामपि श्रद्धायां दुर्बलान्सत्यपि सत्वे दुर्मेधान् ह्रसितं संकुचितमायुर्येषां तान् अनुष्ठानोपयुक्तज्ञानायुर्रहितान् । १७ ॥॥॥ ४७

भा॰ प्र॰ कथं वा पांडवेयस्य राजर्षेः परीक्षितो मुनिना शुकेन सह संवादः संबभूव ॥ संवादं विशिनष्टि यत्र संवादे एषा सात्वती सात्वत्यतिसुखयती
५६ तिसात्वरमात्मा सात्वतः सुखवाच्यो सौ ज्ञातो हैतु मत्तत्वं नाम सत्स्वरूपविधिना तु सर्गोक्तिं प्रविदेत्यादिना शास्त्रस्य याभावप्रहो स्त्विस्या
दिति श्रुत्यतेः संप्रति पाद्यत यास्यामस्ति सात्वती मनुष्यु गिबाइडपु ॥ श्रुतिः श्रुतितुल्याप्रवृत्ता ॥७॥ संवादस्याभावेनांव्यंजय
न्नाह ॥ स इति ॥ स महायोगी शुकः गृहमेधिनां गृहाश्रमिणां गृहेषु गोदोहनमात्रं ॥ यावता कालेन गौर्दुह्यते तावंतं कालमवेक्षते प्र

कथं वा पांडवेयस्य राजर्षेर्मुनिना सह ॥ संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः ॥७॥ स गोदोहनमात्रं हि गृहेषु गृहमेधि
नां ॥ अवेक्षते महाभाग तीर्थीकुर्वंस्तदाश्रमः ॥८॥ अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमं ॥ तस्य जन्म महाश्चर्यं
कर्माणि च गृणीहि नः ॥९॥ स सम्राट् कस्य वा हेतोः पांडूनां मानवर्द्धनः ॥ प्रायोपविष्टो गंगायामनादृत्याधिराट्श्रि
यं ॥१०॥

तीक्षते नाधिकमित्यर्थः ॥ विरक्तत्वादिति भावः ॥ कथमवेक्षते तेषां गृहमेधिनामाश्रमं तीर्थीकुर्वन्पवित्रीकर्तुमि
त्यर्थः ॥८॥ अन्यच्च पृच्छति ॥ अभिमन्युसुतमिति ॥ हे सूत अभिमन्योः सुतं परीक्षितं महाभागवतं प्राहुः ॥ अतस्तस्य महाश्चर्यं
जन्म कर्माणि च नोऽस्माकं गृणीहि कथय ॥९॥ स इति ॥ पांडूनां पांडुवंशजानां मानं प्राशस्त्यं वर्द्धयतीति वर्द्धनः ॥ नंद्यादित्वात्कर्तरि ५६
ल्युः ॥ सम्राट् सार्वभौमः ॥ परीक्षित् कस्य हेतोः ॥ कस्माद्धेतोरधिराट्श्रियमधिराज्यसंपदमनादृत्य गंगायां प्रायोपविष्टः ॥१०॥ ॥

तस्य ज्ञानाधिक्यमेव व्यंजयितुं किंचिदितिहासमाह। दृष्ट्वेत्यनेन। कदाचित्किल देवस्त्रियः। नग्ना जले विहरंत्यः। पुरतो गच्छंतं शुकमालो।
क्य वाससांसि न परिदधुस्ततः पृष्ठतो अनुयांतं व्यासमालोक्य तु ह्रिया परिदधुः॥ तदिदं चित्रमवलोक्य व्यासो पृच्छत् शुकमवलोक्यापि वा
ससांसि किं न परिधत्त। मां त्ववलोक्य परिधत्थेति तदा ता ऊचुः॥ तव तु स्त्रीपुरुषविवेकोस्ति॥ तस्य तु परमात्मनिष्ठैकमनसस्तद्व्यति
रिक्तज्ञानाभावेन स्त्रीपुंविभागो नास्ति॥ अतस्त्वमवलोक्यापि लज्जारहिता न परिदधाम त्वां त्ववलोक्य परिदधीमेति सोयमर्थो व्य

दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रम्॥ तद्वीक्ष्य पृच्छति मुनौ जग
दुस्तवास्ति स्त्रीपुंभिदा न तु सुतस्य विविक्तदृष्टेः॥५॥ कथमालक्षितः पौरैः संप्राप्तः कुरुजांगला।
न्॥ उन्मत्तमूकजडवद्विचरन् गजसाह्वये॥६॥

ते॥ आत्मजमनुयांतमनग्नमपि ऋषिं व्यासं दृष्ट्वा देव्यो देवानां स्त्रियः। ह्रिया लज्जया परिदधुः। वासांसीति शेषः॥ सुतस्य नग्नस्यापि द
र्शनेन परिदधुः। तद्विचित्रं वीक्ष्य मुनौ व्यासे पृच्छति सति जगदुः। देव्य इत्यनुषंगः॥ किमिति तव स्त्रीपुंभिदा स्त्रीपुंसभेदोस्ति त्वत्सुतस्य
तु नास्ति॥ तत्र हेतुः। विविक्ता प्रकृतिपुरुषविलक्षणे परमात्मन्येव दृष्टिर्यस्य तथाभूतत्वात्तद्दर्शनेनास्माकं लज्जा न बभूवेति॥५॥ एवंभूतं
सतं कुरुजांगलांश्च उन्मत्तवन्मूकवज्जडवच्च विचरन् कथं वा गजसाह्वये हास्तिनाख्ये पुरे संप्राप्तः। कथं च पौरैर्जनैरालक्षितः। दृ

प्रशान्ता गवाश्वादयः। पशवो मांसं व्यमात्मनां सव्यपार्श्वस्थां कुर्वन्त्यपरे प्रशान्ताः खरमहिष्यादयः नुदक्षिणं कुर्वंति हेतुरुषव्याघ्रमम वाहा
नुगजाश्वादी नरुदन्तो रोदनं कुर्वाणान्वलक्षये ॥२४॥ अयमुलूको गृत्सो ऽर्द्धतः। तदन्दनिश्चकरः। सच प्रत्युलूकश्च। तदभिमुखमन्यश्च उलूका
वेतौ अनिद्रो निद्रारहितौ कुकानैः। ककुभस्त्येवंविधे कौने: श्रेष्ठः क्षितितच्छुशानुकरः। इमं देशं शून्यमिच्छतः। सूचयतः ॥२५॥ दिशो धूम्राः परि
धयश्च दृश्यंते प्रतिशोषः। अद्रिभिः सह भूः पृथ्वी कंपते ॥ सर्वाऽपनुभिर्मेघैः कालिकैः सह महान्निर्घातो ऽशनिनिर्घातश्चासीत् ॥२६॥ खरः कवि

शान्ताः कुर्वंति मां सव्यं दक्षिणं पशवो परे। वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम ॥२४॥ मृत्युदूतः कपोतो यमुलूकः कंपयन्
मनः। प्रत्युलूकश्च कुकानैरनिद्रौ शून्यमिच्छतः ॥२५॥ धूम्रा दिशः परिधयः। कंपते भूः सहाद्रिभिः ॥ निर्घातश्च महानासी
त्साकं वल्लनयित्नुभिः ॥२६॥ वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः ॥ अमृग्वर्षति जलदा वीभत्समिव सर्वतः ॥२७॥ सूर्यं
हतप्रभं पश्य ग्रहमर्दं मिथो दिवि ॥ ससंकुलैर्भूतगणैर्ज्वलिते इव रोदसी ॥२८॥ नद्यो नदाश्च क्षुभिताः सरांसि च मनांसि
च ॥ न ज्वलत्यग्निराज्येन कालोऽयं किं विधास्यति ॥२९॥

नः स्पर्शो यस्य स वायुर्धूलिना तमः। विसृजन् विशेषेण सृजन् वाति
जलदा मेघाः। सर्वतो वीभत्समिवासृग्रुधिरं वमंति मुंचंति ॥२७॥ हताप्रभा यस्य तथाभूतं सूर्यं पश्य दिवि ग्रहाणां मर्द्दं गिरादीनां परस्परं विमर्द
कलहं पश्य ॥ सनितरां संकुलैर्भूतानां पिशाचानां गणैः रोदसीत्यव्ययं द्यावापृथिव्योर्वर्तते। ज्वलिते इव दृश्येते ॥२८॥ तदा प्राक् स्रोतसः स
रांसि भूतानां मनांसि च क्षुभिताः। संचलिता भवंति शुष्का भवंतीति वा ॥ अग्निराहवनीयादिराज्येन ज्वलत्ययं कालः किं दुःखं विधास्यसहे

विवाहपटलः ॥५५॥

भा० प्र०
११४

वत्साः स्तनं स्तन्यं न पिबंति। मातरश्च वत्सान् प्रति न दुह्यंति स्तन्यमिति शेषः॥ गावः अश्रूणि मुखे यासां ताः रुदंति व्रजे गोष्टे ऋषभा न हृष्यंति॥२०॥ दैवतानि देवप्रतिमाः॥ रुदंतीव स्विद्यंति गात्रप्रस्वेदं मुचंति उच्चलंतीव उत्पतंतीव दृश्यंते॥२१॥ पुरादीनामाश्रयाः इमे जनपदा देशाः ग्रामाश्च भ्रष्टश्रीयेभ्यः॥ निर्गत आनंदो येभ्यः॥ तथाभूता दृश्यंते॥ नोऽस्माकं किमघं दुःखं दर्शयिष्यंति वयं तु न विद्म इति। भावः॥२२॥ इदं त्वहं तु ज्ञापयामीत्याह मन्य इति। एतैर्महोत्पातैरिदं त्वहं मन्ये उज्ञापयामि॥ किमनन्यपुरुषश्रीभिर्न विद्यते ऽन्यपुरुषेषु

न पिबंति स्तनं वत्सा न दुह्यंति च मातरः॥ रुदंत्यश्रुमुखा गावो न हृष्यंत्यृषभा व्रजे॥२०॥ दैवतानि रुदंतीव स्विद्यंती वो च्चलंति च॥२१॥ इमे जनपदा ग्रामाः पुरोद्यानकराश्रमाः॥ भ्रष्टश्रियो निरानंदाः किमघं दर्शयंति नः॥२२॥ मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः॥ अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा॥२३॥ सूत उवाच॥ इति चिंतयतस्तस्य दृष्टारिष्टेन चेतसा॥ राज्ञः प्रत्यागमद्ब्रह्मन् यदुपुर्याः कपिध्वजः॥२३॥

श्रीर्येषु तैरन्यपुरुषेषु असंभावितकांतिभिर्भगवतः श्रीकृष्णस्य पदैः पादविन्यासैर्हीना रहिता॥ अतएव गतं सौभगं सौंदर्यं यस्यां तथाभूता भूः पृथ्वी नूनं भविष्यतीति॥२३॥ इत्थं दृष्टानि ज्ञातान्यरिष्टानि येन तेन चेतसा राज्ञो युधिष्ठिरस्य चिंतयतः सतः हे ब्रह्मन् कपिध्वजोऽर्जुनः यदुपुर्याः द्वारकायाः प्रत्यागमत॥ आगतवान्॥२३॥ ११४

तमागतं पादयोर्निपतितमनुजमर्जुनं नृपो युधिष्ठिरः विलोक्योद्विग्नं भीतं हृदयं यस्य तथाभूतं नारदोक्तं संस्मरन्सुहृदां मध्ये पृच्छति स्माऽपृ
च्छत्। कथंभूतं॥ यथापूर्वं वदनवस्थितमातुरं दुःखितमधोवदनमवाङ्मुखं नयनाब्जयोरश्रुबिंदून्सृजंतं मुंचंतं विछायं विगतकांतिं।
२४ २५॥ प्रश्नमेवाह॥ कच्चिदित्यादिना यावदध्यायसमाप्ति॥ कच्चिदितीष्टप्रश्नद्योतकमव्ययं॥ तावत्सामान्यतः सर्वानिष्टान्बंधून्
पृच्छति॥ कच्चिदिति॥ मध्वादयो यादवांतरविशेषाः॥ तच्चैनवमेस्फुटं॥ नोस्माकं स्वजना बंधवः॥ आनर्तपुर्यां द्वारकायां सुखं यथा।
तथा आसते कच्चिदासते किं॥ तत्वमदिष्टमिति कच्चिच्छब्दं प्रयुंजानस्येति भावः। एवमुत्तरत्रापि द्रष्टव्यं॥ २६॥ अथोक्तविधार्जुनदर्शने

तं पादयोर्निपतितमयथापूर्वमातुरं॥ अधोवदनमब्बिंदून्सृजंतं नयनाब्जयोः॥ २४॥ विलोक्योद्विग्नहृदयो वि
च्छायमनुजं नृपः॥ पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितं। २५। युधिष्ठिर उवाच॥ कच्चिदानर्तपुर्यां नः स्वजनाः सु
खमासते॥ मधुभोजदशार्हार्हाः सात्वतांधकवृष्णयः॥ २६॥ शूरो मातामहः कच्चित्स्वस्त्यास्ते वाथ मारिषः॥ मा
तुलः सानुजः कच्चित्कुशल्यानकदुंदुभिः॥ २७॥

नेकृष्णनिर्याणं संभाव्य तच्छ्रवणजो विषादः। पश्चादेव भवत्विति
भिप्रायेण नानावंधूनशेषविशेषेण पृच्छेति॥ शूर इत्यादिना॥ अस्माकं मातामहः शूरः॥ हे पार्थ हे मारिष॥ सविसर्गपाठे शूरविशेष
णं। मारिषशब्दः॥ श्रेष्ठपर्यायः॥ स्वस्ति यथास्ते कच्चित्तथा नो मातुलश्चानकदुंदुभिर्वसुदेवः। सानुजः। कुशली कुशलमस्या २४
स्तीति तथाभूतश्चास्ते कच्चित्॥ वसुदेवस्यानुजास्तु देवभागो देवश्रवा आनकः। संजयः श्यामकः कंकः शमिको वत्सरो वृकश्चेति हर

भा॰ प्र॰ ११५ मत्तेति। स्वसारः उग्रसेनस्येति शेषः सप्त भगिन्यः। तस्यानकदुंदुभेः पत्न्यः। मातुलान्यः॥ अस्मन्मातुलस्य वसुदेवस्य स्त्रियः॥ इंद्रमवशर्वहृदे
त्यानुगागमेङीषि च मातुलानीति द्राशे वसुत्यादितः॥ आत्मजैः सहिताः स्नुषाभिः सुतभार्याभिः सहिता देवकीप्रभृतयः देवा शांति
देवोपदेवा च श्रीदेवा देवरक्षिता सहदेवाख्याः स्वयं क्षेमं यथा आसते कच्चित्। २८॥ असत् दुरात्मा कंसः पुत्रो यस्य स आहुकः उग्र
सेनो राजा जीवति कच्चित्॥ आस्याहुकस्याथवानुजो देवकश्च जीवति कच्चिदित्यन्वयः॥ हृदीकस्य श्वफल्कस्य सुतो क्रूरः। जयंतगद

सप्त स्वसारस्तत्स्वस्रो मातुलान्यः सहात्मजाः॥ आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयं। २७। कच्चिद्राजाहुको जी
वत्यसत्पुत्रोस्य चानुजः॥ हृदीकः ससुतो क्रूरो जयंतगदसारणाः॥ आसते कुशलं कच्चिद्ये च शत्रुजिदादयः॥ २
९॥ कच्चिदास्ते सुखं रामो भगवान्सात्वतां पतिः॥ ३०॥ प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः। गंभीररयोऽनि
रुद्धो वर्द्धते भगवानुत। ३१। सुषेणश्चारुदेष्णश्च सांबो जांबवतीसुतः॥ अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः
॥३२॥

यो ये च शत्रुजिदादयो वसुदेवपुत्राः ते सर्वे कुशलमासते कच्चित्। आस्याहुकस्य चानुजो देवकश्च जीवति कच्चित्। २९। सात्वतां भक्तानां प
तिः। सात्वतशब्दो भक्तवाचकः॥ सात्वतशास्त्रस्य यादववाचक इति विवेकः॥ भगवान् बलरामः सुखमास्ते कच्चित्। ३०। अथ श्रीकृष्ण
पुत्रानपृच्छति॥ सर्ववृष्णीनां महारथः। प्रद्युम्नमास्ते कच्चित्। तथा भगवाननगंभीरवेगो निरुद्धश्च वर्द्धते॥ ३१॥ जांबवतीसुत इति सां
बस्य विशेषणं॥ सुषेणादयः॥ अन्ये च ऋषभादयः। कार्ष्णिप्रवराः श्रीकृष्णसुतश्रेष्ठाः। सुपुत्रा अपि सुखमासत इत्युपरिष्टादन्व ११५

तथैवशौरेर्भगवतोनुचराः श्रुतदेवोद्धवादयः येचान्येसात्वतर्षभाः यादवश्रेष्ठाः सुनंदादयः ॥३३॥ हलधरामभुजावेवाश्रयो येषांते
सर्वेपिस्वस्त्यासते ॥ बद्धसौहृदाः तेसर्वेस्माकमपिकुशलंस्मरंतिकिंइत्यर्थः ॥३४॥ अथभगवतः कुशलंपृछति ॥ भगवान्कृष्णोपिपुरे
सुधर्मायांसुहृद्भिर्वृतः सुखमास्तेकच्चित ॥३५॥ ब्रह्मण्योभक्तवत्सलइतिविशेषणद्वयाभिप्रेतंपृछति ॥ मंगलायेतिलोकानांभक्त
जनानांमंगलाद्यर्थमनंतस्यसखः ॥ आद्यः पुमान्परमपुरुषः यदुकुलांभोधावास्तेकच्चित ॥ अनंतसखइत्यनेनबलरामसहिता।

तथैवानुचराः शौरेः श्रुतदेवोद्धवादयः ॥ सुनंदनंदशीर्षण्यायेचान्येसात्वतर्षभाः ॥३३॥ अपिस्वस्त्यासतेसर्वेरा
मकृष्णभुजाश्रयाः ॥ अपिस्मरंतिकुशलमस्माकंबद्धसौहृदाः ॥३४॥ भगवानपिगोविंदोब्रह्मण्योभक्तवत्सलः
कच्चित्पुरेसुधर्मायांसुखमास्तेसुहृद्वृतः ॥३५॥ मंगलायचलोकानांक्षेमायचभवायच ॥ आस्तेयदुकुलांभोधा
वाद्योनंतसखः पुमान् ॥३६॥ यद्बाहुदंडगुप्तायांस्वपुर्यांयदवोर्चिताः ॥ क्रीडंतिपरमानंदंमहापौरुषिकाइव
॥३६॥

आस्तेकिमितिपृष्टंभवति ॥ क्षेमोलब्धसुखपरिपालनं ॥ भवोयोगः सचालब्धसुखलाभरूपः तदुभयविधाप्मंगलायेत्यर्थः ॥३६॥
तदेवप्रपंचयति ॥ यद्बाहिति त्रिभिः ॥ यस्यकृष्णस्यभगवतोबाहुदंडगुप्तायांस्वपुर्यांद्वारकायामर्चिताः ॥ सर्वैर्लोकैर्बहुमताःया
दवः परमानंदंयथातथाक्रीडंति ॥ महापौरुषिकाइवपक्षाइव ॥३७॥

यस्य भगवतः पादयोः शुश्रूषणं परिचरणं मुख्यं कर्म तेन हेतुना सत्यभामादयः षोडशसहस्रयोषितः संख्ये युद्धे त्रिदशान् देवान् निर्जि-
त्येत्यर्थः। वज्रमायुधं यस्य स इंद्रो वल्लभः प्रियो यासां तासां शच्यादीनामुचिताः आशिषः अभीष्टार्थाः पारिजातादयः भगवताश्र-
हृता इति शेषः। तदित्यव्ययं सामान्याभिप्रायमेकत्वं नपुंसकत्वं वा तदाशिषः हरंति स्वीकुर्वंति ३७ यस्य भगवतो बाहुदंडः दंड एव
अभ्युदयो येषां ते तदनुजीविनः तद्भृत्या यदुप्रवीराः न विद्यते कुतोपि भयं येषां तथाभूताः संतः सुरसत्तमानामिंद्रादीनामुचितां ताम्

यत्पादशुश्रूषणमुख्यकर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः॥ निर्जित्य संख्ये त्रिदशांस्तदाशिषो हरंति वज्रायुध
वल्लभोचिताः॥ ३७॥ यद्बाहुदंडाभ्युदयानुजीविनो यदुप्रवीरा ह्यकुतोभया मुहुः॥ अधिक्रमंत्यंघ्रिभिराहृतां
बलात्सभां सुधर्मां सुरसत्तमोचितां॥ ३८॥ कच्चित्तेनामयं तात भ्रष्टतेजो विभासि मे॥ अलब्धमानो वज्ञातः किं वा
तात चिरोषितः॥ ४०॥ कच्चिन्नाभिहतोभावैः शब्दादिभिरमंगलैः॥ न दत्तमुक्तमर्थिभ्य आशया यत्प्रतिश्रुतं॥ ४१॥
कच्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियं। शरणोपसृतं सत्वं नात्याक्षीः शरणप्रदः॥ ४२॥ निर्जित्य बलादाहृतां सुधर्माख्यां
सभामंघ्रिभिर्मुहुर्मुहुरधिक्रमंति। ३८ तस्य निस्तेजस्कत्वादेहेतून् विकल्पयन् पृच्छति हे तात तवानामयमारोग्यं कच्चित् मे मम भ्रष्टतेजो
यस्मात्तथाभूतो विभासि लक्ष्यसे हे तात त्वं तत्र चिरमुषितः हेतुगर्भमिदं चिरमुषितत्वादलब्धमानं संमानं येन तथाभूतः किं। अर्थिभ्यः
यत्प्रतिश्रुतं दास्यामीति प्रतिज्ञातं तत्तेभ्यः किं वा न दत्तं ४१ ब्राह्मणादीनन्यं शरणोपसृतं शरणागतं जंतुं शरणप्रदः रक्षकस्त्वं नात्या।

अगम्यां स्त्रियं त्वं नागमः न गतवान् कच्चित् । गम्यामप्यसत्कृतां वा नागमः कच्चित् ॥ अथ न नु भवान् पथ्यनुत्तमैरधमैर्वीजनैः पराजितो वा किं
४२ ॥ संभोज्यान् सह भोक्तुं योग्यान् वृद्धान् बालकांश्च परिइत्यस्यार्थं वर्जनार्थः ॥ परित्यज्य स्वयं अभुंक्था ॥ अपि भुक्तवान् किं ॥ नोस्माकम्।
क्षमसत्यं किं विनिंदितं कर्म कृतवान् किं ॥ ४३ ॥ हृदयेन हृदयंगमेन निसंप्रियतमेनात्मवंधुना श्रीकृष्णेन रहितः । अत एव शून्योस्मि निरानं
दोस्मीति मन्यसे कच्चित् ॥ अन्यथा उक्तहेतूनामन्यतमस्याप्यभावे ते तव रुग्रोगः ॥ आधिर्न स्यात् ॥ यद्वा हृद्दीप्तिरन्यथा न प्रागेव नाल्पतः

कच्चित्त्वं नागमोगम्यां गम्यां वासत्कृतां स्त्रियं । पराजितो वाथ भवान्नोत्तमैर्नासमैः पथि ॥ ४२ ॥ अपि स्वित्पर्यभुंक्था-
स्त्वं संभोज्यान्वृद्धवालकान् ॥ जुगुप्सितं कर्म किंचित्कृतवान्नयदक्षमं ॥ ४३ ॥ कच्चित्प्रेष्ठतमेनाथ हृदयेनात्मवंध-
ना ॥ शून्योस्मि रहितो नित्यं मन्यसे तेन्यथा न रुक् ॥ ४४ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे चतुर्दशोध्यायः ॥ १४ ॥
सूत उवाच ॥ एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः ॥ नानाशंकास्पदं रूपं कृष्णविश्लेषकर्षितः ॥ १ ॥ ॥ ॥

केनचिदुक्तान्यतमेनहेतुना भवितव्यमित्यर्थः ॥ ४४ ॥ इति प्रथमे चतुर्दशे ॥ १४ ॥ एवमिति । कृष्णस्य भगवतः । सखा कृष्णोर्जुनो भ्रात्रा रा
ज्ञा युधिष्ठिरेण नानाविधानां शंकानामास्पदं निमित्तं रूपं तेजोहीनं स्वकीयं रूपं प्रविकल्पितः । कृष्णस्य भगवतो विश्लेषेण वियोगेन क
र्षितः ॥ १ ॥

तदि श्लेषजशोकेनशुष्यद्वदनं हृदयकमलं च यस्य सोऽत एव हतप्रभा यस्य तथाभूतः। तमेव विभुं श्रीकृष्णमभिध्यायन्प्रतिभाषितुं प्रति वक्तुं नाशक्नोत्स्वशशाक ॥ २ ॥ ततः कृच्छ्रेण महता प्रयत्नेन शुचः शोकात्संस्तम्भनेत्रयोर्नेत्रकोर्मौ पाणिपृष्ठी पाणिना परिमृज्य। यद्वा संस्तम्भमनइतिशेषः॥ नेत्रयोः शुचः शोकाश्रूणि पाणिभ्यां संमृज्य परोक्षेणापि समुन्नद्धः उत्कटः प्रणयः। स्नेहः श्रीकृष्णं प्रेमपूर्वकानुध्यानं। विरहादहल दशावातताभ्यां कातरश्चाधीरः॥ ३ ॥ वाष्पेण गद्गदयाकुंठीभूतया गिरा ऽग्रजं नृपतिं स्तौ स्वं वदन्समाणयारीत्याहेत्यन्वयः॥ क

शोकेनशुष्यद्वदनहृत्सरोजोहतप्रभः॥ विभुं तमेवानुध्यायन्नाशक्नोत्प्रतिभाषितुं॥ २ कृच्छ्रेणसंस्तभ्यशुचःपाणिना मृज्य नेत्रयोः॥ परोक्षेणसमुन्नद्धप्रणयौत्कण्ठ्यकातरः॥ ३॥ सख्यंमैत्रीं सौहृदं च सारथ्यादिषु संस्मरन्॥ नृपमग्रजमित्याह वाष्पगद्गदया गिरा॥ ४॥ अर्जुन उवाच॥ वंचितोऽहं महाराज हरिणा बंधुरूपिणा॥ येन मेऽपहृतं तेजो देवविस्मापनं महत्॥ ५॥

थं भूतः। सन्सारथ्यादिषु कर्मसु सख्यादीन्संस्मरन्॥ तत्र सौहृदं हितैषित्वं मित्रत्वं प्रियैषिता समानशीलत्वं नियोगादिकरणाई त्वं वा मैत्रत्वं ४॥ उक्तिमेवाह॥ वंचित इति त्रयोविंशत्या हे महाराजाहं बंधुरूपिणा बंधुरूपतां प्राप्तेन हरिणा स्वाश्रिता ति हरेण साक्षाद्भगवता वंचि तोऽस्मि रहितोऽस्मीत्यर्थः॥ येनेत्यादीनां यच्छब्दानां तेनाहमस्मि मुषितः पुरुषेण भूम्नेत्युपरिष्टादन्वयः। देवानामपि विस्मापनमाश्चर्यकरं यन्महन्मम तेजो येनापहृतं। हे वेति राज्ञः संबोधनं वा॥ ५॥ ११७

यस्य च भगवतः क्षणमात्रवियोगेनाप्यप्रियं दर्शनं यस्य तथाभूतो यं मत्स्य ध्वति लोको भवति । यथैव लोकः । देहः । उकृथेन प्राणेन रहितः मृतकः
शवः प्रोच्यते ॥ अपि शब्दाद् दर्शनयोग्यस्तु ते तद्वत् ॥ ६ ॥ यत्संश्रयादिति ॥ अस्मदीयशौर्यादिकं यद् धीनं तेन वंचितो स्मीति समुदायार्थः ॥ दु
परगेहे प्रेप्यवः स्वयंवराख्ये स्वयंवरप्रारंभे स्मरेण कामेन हेतुना दुष्टो मदो येषां तेषामुपागतानां राज्ञां तेजो मया यस्य भगवतः संश्रया
द्धेतोरपकृतं खलु ॥ तथा मत्स्याकृतेन समारोपितज्याकेन धनुषा मत्स्याकारो यंत्रविशेषश्चाभिहतः छिन्नः कृष्णाद्रौपदी चाभिगता लब्धा च

यस्य क्षण वियोगेन लोको ह्यप्रियदर्शनः ॥ उकृथेन रहिताप्येष मृतकः प्रोच्यते यथा ॥ ६ ॥ यत्संश्रयाद् द्रुपदगेहमुपागता
नां राज्ञां स्वयंवरमुखे स्मरदुर्मदानां ॥ तेजो हृतं खलु मयाभिहतश्च मत्स्यः सज्जीकृतेन धनुषाधिगता च कृष्णा ॥ ७ ॥ य
त्संनिधावहमु खांडवमग्नयेऽदामिंद्रं च सामरगणं तरसा विजित्य ॥ लब्धा सभा मयकृताद्भुतशिल्पमाया दिग्भ्योऽह
रन्नृपतयो बलिमध्वरे ते ॥ ८ ॥ ॥ ॥

७ ॥ यत्संनिधाविति ॥ यस्य भगवतः । संनिधौ हेतुभूते ऽमरगणैः सहितमिंद्रं जवेन विजित्य
खांडवाख्यं वनमहमग्नयेऽदां दत्तवानस्मि ॥ अहं उद इति छेदः ॥ उ शब्दः । निपातो विस्मयद्योतकः ॥ अस्याश्चर्यमेवंविधं कर्म कृतवानस्मी
ति भावः ॥ तथा मयकृता मयेन निर्मिता अद्भुतान्याश्चर्यकृतानि शिल्पानि प्रतिमादीनि माया । अन्यान्यप्याश्चर्याणि यस्यां सभायां लब्धा
अद्भुतानि शिल्पानि पाणिपादादिनैपुण्यानि यासु तामाया आश्चर्यरूपाः प्रतिमादयो यस्यामिति वा ॥ तथा यत्संनिधौ ते ते वाध्वरे ऽश्वमे
धे नृपतयो बलिमुपाहृत्वा हृत्य समर्पयामासः ॥ ८ ॥

तवानुजो मम भार्यो(?) ग्रजः॥ गजायुतस्य सत्त्वं बलं तत्तुल्यं वीर्यं च यस्य स भीमः तं च मखार्थं यज्ञार्थं। यस्य भगवतः संज्ञया हेतोर्नृपस्य जरा
संधस्य शिरोंघ्रिमिति प्रापणं गत्वा तस्माद्धरदेवैर्वक्रोपि शिरोंघ्री वाहनं तेन नृपेण कृतान् पारत्वतोमिमो चिताः। संतायत्न ग्रमस्य रुद्रस्य भै
रवस्य वा मखाय मखार्थं सं मृते धनं तवाध्वरे बलिं करमनयन्नानीतवंतः। नृपाणां शिरस्सु अंघ्रिर्यस्य तं जरासंधमिति वा॥८॥ पन्न्याश्
ति॥ तव पन्न्याद्रौपद्या॥ अभिमखं राजसूयाख्ये यज्ञे॥ विभक्त्यर्थेऽव्ययीभावः लक्षः कारिणो यो महाभिषेकः। तेन श्लाघिष्टमत्यंतं श्लाघ्यं
चारुसुंदरं धम्मिल्लं विकीर्यं विक्षिप्य येर्दुःशासनादिभिर्दुःशासनादिभिः। स्पृष्टं तेषां स्त्रियः स्त्रीः हता भर्तारं ईशापतयो यासां ताश्च।

यत्तेजसा नृपशिरोंघ्रिमहन्मखार्थमार्योनुजस्तव गजायुतसत्त्ववीर्यः॥ तेनाहृताः प्रमथनाथमखाय भूपा यन्मो
चितास्तदनयन्बलिमध्वरे ते॥ ७॥ पत्न्यास्तवाधिमखक्लृप्तमहाभिषेकश्लाघिष्ठचारुकबरं कितवैः सभायां
स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्या येस्तत्स्त्रियो कृतहतेशविमुक्तकेशाः॥ १०। यो नो जुगोप वनमेत्य दुरं
तकृच्छ्राद्दुर्वाससोरिविहितादयुताग्रभुक् यः॥ शाकान्नशिष्टमुपभुज्य यतस्त्रिलोकीं तृप्ताममंस्त सलिले विनि
मग्नसंघाः॥ ११॥

विमुक्ताः केशा यासां ताश्च तथाभूताः। यो कृतं कृतवान्स तवानुजो नृपशिरोंघ्रिमहन्निति पूर्वेणान्वयः। कथं
भूता याः पद्याः पादयोर्दुःशासनस्य भगवतो वा तस्य वा पादयोः पतिताः॥ अश्रूणि मुखे यस्यास्तथाभूता याः॥ १०॥ यो न इति। यो ऽयु
ताग्रभुग्युतेन विप्राणामयुतेन सहाग्रे भुंक्ते इति तथा ऽयुतस्याग्रो वा॥ तस्मादरिणा दुर्योधनेन विहितात् दुर्वाससः हेतोरागतात् दुरंतकृ
च्छ्रादपारसंकटाद्यो भगवान्नोस्मान् शाकात्मकान्नावशिष्टलेशमुपभुज्य भुक्त्वा जुगोप। यतः शाकावशिष्टमुपभुक्तवतो भगवतो हे

म

ष्या चान्यत्र कथा सूच्यते ॥ दुर्वासा मुनिवर्योथ दुर्योधनगृहं गतः ॥ तं राजा पूजयामास सार्घ्यपाद्यासनादिभिः । निमंत्रयामास सतं भोजना
य नराधिपः । तं वाढमिति चामंत्र्य कृत्वा नित्यादिकाः क्रियाः ॥ बुभुजेत्वं च कुरुगुणान्त्रात्मजैः सह धर्मवित् ॥ अब्रवीच्च स राजानं भुक्त्वा तुष्टम
ना मुनिः ॥ वरं वरय भद्रं ते वरदोस्मि नराधिप ॥ ~~तं वाढमिति चामंत्र्य कृत्वा नित्यादिकाः क्रियाः~~ ॥ याचयामास्य द्य किमहं वरमेतं मुनीश्वरं
इति चिंतां समापन्नो राजा दुर्योधनस्तदा ॥ मुहूर्तं चिंतयित्वाथ प्रतिपेदे मनोगतं ॥ वनवासं गता ये तु पांडवाः शंसितव्रताः । तेषा
मस्य मुनेः शापजं तत्त्वेयं त्वं वान्नृप । मद्गृहे भुक्तसदृशं यदा वांछति भोजनं ॥ तत्तदा तु शक्नुवंति ते वने क्लेशभागिनः ॥ तदा कोपप
रीतात्मा शापं दास्यत्यसंशयं ॥ इत्येवं दुरभिप्रायो वरं वव्रे सुदारुणं ॥ वने मे भ्रातरः संति पांडवाः दुःखभागिनः ॥ भोक्तव्येत गृहे ग
त्वा मद्गृहे भुक्तवान्यथा ॥ तथेति मुनिरुक्त्वाथ गत्वा याचत भोजनं ॥ अयुतब्राह्मणाग्रे मां भोजयाशु युधिष्ठिर । श्रुत्वैतद्वचनं राजा ।
हृदि संजातवेपथुः ॥ भुक्तं स्माभिरधुना शिष्टमन्नं न विद्यते ॥ तथानब्राह्मणा संति सामग्री च कदाचन ॥ यद्यहं न ददाम्यन्नं शापं दा
स्यति कोपतः । तथाप्येनं निमंत्र्यैवमुपायं मृगये धुना ॥ इत्येवमनसा ध्यायन्राजा मुनिमथाब्रवीत् ॥ भगवन्नित्य कर्मादि कृत्वा
स्नानादिकमेव च ॥ शीघ्रमागमनं कार्यं सिद्धं सर्वं तथा मम ॥ ततोमित्यनुज्ञाप्य स्नातुं चाशु विवेश ह ॥ तत्राघमर्षणं कुर्वन्नस्थात
द्गत्य निष्फलं ॥ एतस्मिन्नेव काले तु भगवान्यदुनंदनः ॥ आजगाम कुरुश्रेष्ठ संनिधौ क्लेशनाशनः ॥ विषण्णवदनान्दृष्ट्वा पांडवान्मधु
सूदनः ॥ उवाच राजन् किं दीर्घं ध्यायसे क्लेशभागिनः ॥ सोस्मै न्यवेदयत्सर्वं मुनेरागमनादिकं ॥ श्रुत्वैतद्भगवान्कृष्णस्तु दुर्योधन चेष्टितं
श्रुत्वोवाच विशिष्टं तदन्नं किंकिंचित् दत्सि वै ॥ शाकमात्रावशिष्टो मे पाकस्त्वब्रवीन्नृपः । उवाच भगवान्शिष्टं शाकमानीयतामिति ष्या.

नीतं भक्षयामास राज्ञो दुःखोपशांतये दुर्वासास्तु मुनिर्मेने तृ
प्तं स्थावरजंगमं ॥ इत्यादिकथा वर्तते ॥ २१ ॥

यत्तेजसेति। यस्य भगवतस्तेजसा मयाहितेन हेतुना भगवान् शूलपाणिः शंभुः किरातरूपो युद्धे विस्मापितः। मयेति शेषः। विस्मयं प्रा
पितः स च गिरिशो रुद्रः॥ मे मह्यं स्वं पाशुपतास्त्रं ददौ तथाप्यन्ये च शक्राद्यो विस्मापिता इत्यर्थः॥ तथाहममुनैवाधुना तेजोहीनेन
कलेवरेण देहेन महेंद्रस्य भवने महदासनस्यार्द्धं प्राप्तः। इंद्रासनस्यार्द्धमधिष्ठितवानस्मीत्यर्थः। महदिति पृथक्पदं। अन्यथा आत्महतः
स्यात्वापत्तेः॥ आर्षत्वात्तदभावे महत्यासनेऽस्य त्वयम्न्वेतुं शक्यं॥ १२॥ तत्रैव महेंद्रभवने विहरतो मम गांडीवलक्षणं गांडीवेन सह

यत्तेजसा च भगवान्युधि शूलपाणिर्विस्मापितः सगिरिशोऽस्त्रमदान्निजं मे। अन्येऽपि चाहममुनैव कलेव
रेण प्राप्तो महेंद्रभवने महदासनार्द्धं॥ १२॥ तत्रैव मे विहरतो भुजदंडयुग्मं गांडीवलक्षणमरातिवधाय देवाः
सेंद्राः श्रिताः यदनुभावितमाजमीढ तेनाहमद्य मुषितः पुरुषेण भूम्ना॥ १३॥

लक्ष्यत इति तथा॥ येन भगवताऽनुभावितं प्रभावं प्रापितं नीतं भुजदंडयोर्युग्मं सेंद्रा देवा अरातिवधाय कालकेयनिवातकवचाद्या
सुरवधार्थं श्रिताः। सहायत्वेनाश्रिताः॥ हे आजमीढ तेन भूम्नाऽपरिमितानंदरूपेण परमपुरुषेण श्रीकृष्णेनाहं मुषितोऽस्मि वंचितोऽ ११९
स्मि मां विहाय स्वलोकं जगामेत्यर्थः॥ १३॥

यदुक्तं धवरति । यत्तुरहानामध्याहृत तत्तुरवतालुवंति हस्त्यं ममसाधवस्येत्यनेनान्वयः । योभगवान् वांधवोयस्यसोहमेकएवावतीर्यमवा
ग्रीमत्तं बलं यस्य तमनंतपारं निरवधितं । कुरूणां कुलरूपमब्धिरथेन साधनेनततरे तीर्णवानस्मि ॥ अर्थत्वात्फलभजत्रपाश्चेत्से त्वाभ्यास
लोपाभावः ॥ आत्मनेपदं च ॥ तथायदुक्तं धवेनमयापरेषां शत्रूणां वहुधनं प्रत्याहृतं ॥ तथा तेषां शिरोभ्यः । तेजस्पदं तेजसः पदमाश्रयं मणिम
यं मल्पाल्पकं च धनं प्रत्याहृतं ॥ ध्व ॥ यष्टि । हेविभो ॥ अस्मत्प्राणा मनल्पवीर्याणां वहूनां राजन्यश्रेष्ठानां रथजालैः मंडितासु भीष्मादीनां

यद्बांधवः कुरुबलाब्धिमनंतपारमेको रथेन ततरेहमतीर्यसत्वं । प्रत्याहृतं बहुधनं च मया परेषां तेजस्पदं मणिमयं
च हृतं शिरोभ्यः ॥१४॥ यो भीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्यरथमंडलमंडितासु ॥ अग्रेचरो मम विभो रथ
यूथपानामायुर्मनांसि च दृशा सह ओज आर्छत् ॥१५॥ यद्दोःषु मां प्रणिहितं गुरुभीष्मकर्णनप्तृत्रिगर्तशल्यसैंध
वबाल्हिकाद्यैः । अस्त्राण्यमोघमहिमानि निरूपितानि नोपस्पृशुर्नृहरिदासमिवासुराणि ॥१६॥

सेनासु यो भगवान् ममाग्रेचरः अवस्थितः । दृशा दृष्टिमात्रेण रथयूथपानामोजसा सहितमायुर्मनांसि चाछत् हृतवान् । तेनाहं मुषितोस्मी
ति संबंधः ॥१५॥ यद्दोःषु मति । यस्य भगवतो दोःषु बाहुषु प्रणिहितं प्रणिधापितं तत्वयेति शेषः । तथा यद्भुजैककर्णत्वेन कृतं मामित्यर्थः । गु
रुद्रोणः । तत्प्रभृतिभिर्निरूपितानि प्रयुक्तान्यप्रतिहतमहिमान्यस्त्राणि नोपस्पृशन् यथा । आसुराण्यसुरेण कशिपुना कारितान्यस्त्र
तादीनि । नृसिंहदासं प्रल्हादं नास्पृशंस्तद्वत् ॥१६॥

भा०प्र० १२० सौत्यइति ॥ यस्य भगवतः पादपद्मं भव्याः साधवो भवाय मुक्तये भजंति ॥ यश्चात्मदश्चात्मपर्यंतवदान्यः ॥ यश्चात्मदो वलदत्यक एको वहूनां ॥
यो विदधाति कामान् इति श्रुतेः ॥ ईश्वरः सर्वनियंता कुवुद्धिना मेमया सौत्ये सारथ्ये निमित्ते वृतः ॥ श्रान्तैर्वाहैः सहितमतएव भुविष्ठमपि मां य
स्य भगवतः ॥ प्रभावेन निरस्तं विमोहितं चित्तं येषां ते नृपा न प्राहरन् महत्त्ववंतः ॥ १७ ॥ नर्माणीति ॥ हे नरदेव तस्य माधवस्य श्रीकृष्णस्य उदारेण रु-
चिरेण च स्मितेन शोभितानि नर्माणि परिहासवाक्यानि हे पार्थेत्यादिरूपाणि संवोधनात्मकानि च स्मरतो मम हृदयं लुठंति छिंदंति ॥ १८

सौत्ये वृतः कुमतिनात्मद ईश्वरो मे यत्पादपद्ममभवाय भजंति भव्याः ॥ मां श्रांतवाहमरयो रथिनो भुविष्ठं न प्राहर
न्यदनुभावनिरस्तचित्ताः ॥ १७ ॥ नर्माण्युदाररुचिरस्मितशोभितानि हे पार्थ हेर्जुन सखे कुरुनंदनेति ॥ संजल्पितानि
नरदेव हृदिस्पृशानि स्मर्तुर्लुठंति हृदयं मम माधवस्य ॥ १८ ॥ शय्यासनाटनविकत्थनभोजनादिष्वैक्याद्वयस्य ऋतवा
मानिति विप्रलब्धः ॥ सख्युः सखेव पितृवत्तनयस्य सर्वं सेहे महान्महितया कुमतेरघं मे ॥ १९ ॥ ॥ ॥

शय्येति ॥ शय्यादिष्वपारे ऐक्यं साधारण्यं साम्यमिति यावत् ॥ तेन न विद्यते द्वयं द्वैविध्यमन्यत्तस्य व्यापारांतरं यस्य तस्य कुमतेर्मे मम सख्यु
रघं सखेव तनयस्याघं पितृवत्यितेवेविधिप्रकारेण विप्रलब्धोऽधिक्षिप्तो ऋतमुमान् भवोदे वास्तवान् धनवानिति वत् ॥ देवानां स्वामी स्व
र्थः ॥ महामहितया महिममहिमत्वात् ॥ महान्महितयेति पाठे ॥ महिता माहात्म्यं तेन महान् सर्वमघमपराधं सेहे सोढवान् ॥ ऋतवानिति ऋतं १२०
सत्यं वाचिकं काकुगर्भं विवक्षितं ॥ हंस सत्यवादी किलेत्येवमादिरूपेण विप्रलब्धोपीत्यर्थः ॥ १९ ॥ ॥ ॥ ॥

सोहमिति | सहोक्या द्वयोर्हे हे नृपेंद्र सख्या मित्रेण प्रियेण निरतिशयप्रीतिविषयेण | हृदयते गछतीति हृदयः | अय गताविति धातुः | हृदयं
गमेन सुहृदा हितैषिणा पुरुषोत्तमेन शून्यो रहितः || अंग हे राजन् लब्धनिउरुक्रमस्य श्रीकृष्णस्य परिग्रहं कलत्रमंडलं रक्षन् गोपैरप्यसद्भिर्दुर्जे
नैरबलेव योषिदिव निर्जितोस्मीति || २० || २१ || तद्दिति | येभवता सहावस्थाने तद्दशायां धनुरादयस्त एवाश्वनापि रथी चाहं स एवाश्वनोपि य
तो येभ्यो धनुरादिभ्यो नृपतयः श्रानमंति | विशिष्टे रथिनं मां मन्यंते इत्यर्थः || यद्यप्येवं तथापि तत्सर्वं धनुरादिकं ईश्वरिकं श्रीकृष्णरहितं

सोहं नृपेंद्र रहितः पुरुषोत्तमेन सख्या प्रियेण सुहृदा हृदयेन शून्यः || अध्वन्युरुक्रमपरिग्रहमंग रक्षन् गोपैरसद्भिरब
लेव विनिर्जितोस्मि || २० || [redacted]
| तद्वै धनुस्त इषवः स रथो हयास्ते सोहं रथी नृपतयो यत आनमंति | सर्वं क्षणेन तदभूदसदीशरिक्तं भस्मन्हुतं
कुहकराद्धमिवोप्तमूष्यां || २१ || राजंस्त्वयाभिपृष्टानां सुहृदां नः सुहृत्पुरे || विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः || २२

सत्त्वहृतेनासरससत्यायमभूत् || यथा भस्मनि हुतं यथा च कुहकराद्धं दोषवत् विप्रस्य राधस्य धनं दानादिसत्कारः | यथा चोप्यामूषरभूमा
वुप्तं बीजं तद्वत् || २२ || हे राजन् सुहृत्पुरे द्वारकायां त्वयाभिपृष्टानां नोस्माकं सुहृदां मध्ये चतुःपंचावशेषिताः चत्वारः पंचवावशिष्टाः | अ
न्ये तु सर्वे विनष्टा इत्यर्थः || तत्र हेतुं वदन् विशिनष्टि || विप्राणामृषीणां शापेन विमोहितचित्तानां || २२ || || || ||

वारुणीं मदिरां सुरां पीत्वा तेनोन्मथितं विभ्रांतं चेतो येषां ॥ अत एवान्योन्यमजानतां इव मिथो मुष्टिभिर्निघ्नतां । २३ । तन्मिथो निहननमपि प्रा-
यश ईश्वरस्य कृष्णस्य विचेष्टितमेतत्संकल्पमूलकमेवेति भावः ॥ तदेव सदृष्टांतमाह । यद्यथा यत्संकल्पान्मिथो भूतानि भावयंति वर्द्धयामा-
सुः ॥ तथा तत्संकल्पादेव मिथो निघ्नंति स्म निजघ्नुः ॥ २४ ॥ युक्तं चैतत्तस्य भूभारावतारावतारिणः स्वस्याभिप्रायेण स्वयमुदासीन एव सन् भारं सं-
जहारेत्याह ॥ जलौकसामिति द्वाभ्यां ॥ तत्र विवक्षितार्थे पद्योगितया दृष्टांतमाह । जले जलौकसां मत्स्यादीनां मध्ये यथाऽणीयसः सू-

वारुणीं मदिरां पीत्वा मदोन्मथितचेतसां ॥ अजानतामिवान्योन्यं चतुःपंचावशेषिताः ॥ २३ ॥ प्रायेणैतद्भगवत ईश्वरस्य
विचेष्टितं । मिथो निघ्नंति भूतानि भावयंति च यन्मिथः ॥ २४ ॥ जलौकसां जले यद्वन्महांतोदंत्यणीयसः ॥ दुर्बलान्बलि-
नो राजन्महांतो बलिनस्तथा ॥ २५ ॥ एवं बलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः ॥ यदून्यदुभिरन्योन्यं भूभारान्संजहार ह
॥ २६ ॥ देशकालार्थयुक्तानि हृत्तापोपशमानि च । हरंति स्मरतश्चित्तं गोविंदाभिहितानि मे ॥ २७ ॥

क्ष्मान्जलौकसो म-
हांतस्त्वग्रदंति भक्षयंति । यथा च दुर्बलान्बलिनो घ्नंति ॥ यथा च हे राजन्महांतो बलिनश्च ते मिथो निघ्नंति ॥ २५ ॥ एवं विभुर्बलिष्ठैर्म-
हद्भिश्च यदुभिरितरान्दुर्बलानन्यांश्च भूतान् ततोन्योन्यं यदुभिर्यदूनेव मिथो भुवो भाररूपान्संजहार हृतवान् ॥ २६ ॥ देशकालार्थैः दे-
शकालानुगुणकर्तव्यप्रयोजनैर्युक्तानि तत्तत्काल एव तां हृदयगतदुःखोपशमानि गोविंदस्याभिहितानि भावेक्तः भा-
षणानि गीतादिरूपाणि स्मरतो मम चित्तं हरति ॥ २७ ॥

इत्यभिनिगाढेन। परेणासौ हार्देन कृष्णस्य पादसरोरुहं चिंतयार्जुनस्य तत एव विमला शांता रागाद्यकलुषिता च मतिर्बभूव। २८। वासुदेवस्यांघ्र्यो

रनुध्यानेन परिबृंहितं वर्द्धितं रंह्यो वेगः श्रावणं यस्यास्तया वासुदेवभक्त्या ऽ विच्छिन्नस्मृतिसंतानरूपया प्रीत्यात्मिकया निर्मथिता निरस्ता अ

शेषाः कषायाः कषायवद्दुर्मोच्या रागादयो यस्याः। सा धिषणा बुद्धिर्यस्य सोऽर्जुनः॥२९॥ संग्राममूर्द्धनि युद्धारंभे यद्भगवता गीतं गीतोपनिष

सूत उवाच॥ एवं चिंतयतो जिष्णोः कृष्णपादसरोरुहं॥ सौहार्देनातिगाढेन शांतासीद्विमला मतिः॥ वासुदेवांघ्र्यनुध्यानपरिबृंहितरंहसा भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुनः॥२९॥ गीतं भगवता ज्ञानं यत्तत्संग्राममूर्द्धनि॥ कालकर्मतमोरुद्धं पुनरध्यगमद्विभुः॥३०॥।।

द्रूपेणोपदिष्टं ज्ञानं स्वात्मपरमात्मतत्त्वाभिसाधनादिया याथात्म्यगोचरं ज्ञानं तन्महता कालेन कर्मणा तमोगुणेन चावरुद्धं तिरोहितमपि विभु

सन्त्वावधारणसमर्थः॥ अत्र निर्मथिताशेषकषायत्वं हेतुः पुनरध्यगमदध्यवस्यत्॥३०॥।। ।।।। ।।।। ।।।

भा॰ प्र॰ १२२ ब्रह्मसंपत्त्या परब्रह्मगतो गमर्थानुबध्यर्था ब्रह्मविषयकसम्यक्ज्ञानेन त्वर्जुनस्तदानीमुक्तः तेनोपलक्षितः। यद्वा तेन हेतुना छिन्नद्वैतसं
शयः। आत्मनि देहगतदेवादिभेदभ्रमरहित ब्रह्मज्ञानेन संछिन्नदेवादिभेदभ्रमरहितत्वतिगीतोपनिषत्पूर्वषट्कोक्तबुद्ध्युन्मेषः ब्र
ह्मसंपत्त्येति मध्यमषट्कार्थज्ञानोपयुक्तः॥ यद्वा ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः॥ ब्रह्मज्ञानेन संछिन्नदेवादिद्वैतस्वनिष्ठद्वैतसंशय
इत्यर्थः। अलिंगत्वादिति स्थूलदेहविरहानुसंधानमुक्तं॥ लीनप्रकृतिनैर्गुण्यादिनष्टसूक्ष्मप्रकृतितया गुणत्रयविरहात्तदनुसंधाना।

विशोको ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः॥ लीनप्रकृतिनैर्गुण्यादलिंगत्वादसंभवः॥ ३१॥ निशम्य भगवन्मार्गं
संस्थां यदुकुलस्य च॥ स्वःपथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः॥ ३२॥ पृथाप्यनुश्रुत्य धनंजयोदितं नाशं य
दूनां भगवद्गतिं च तां॥ एकांतभक्त्या भगवत्यधोक्षजे निवेशितात्मोपरराम संसृतेः॥ ३३॥ ॥ ॥ ॥

दित्यर्थः। देहत्वर्तमानत्वादर्जुनस्यासंभवः। अत एव पुनर्जन्मरहितः॥ ततोऽविशोकोऽभवदित्यर्थः। विशोकग्रहणमपहतपाप्मत्वादिगुणाष्ट
कयुक्तस्वरूपोपलक्षणं॥ ३१॥ भगवतो मार्गं स्वलोकगमनप्रकारं यदुकुलसंस्थामंतं नाशं चेति यावत् तच्छ्रुत्वा युधिष्ठिरः। निभृतात्मा समा
हितचित्तः। स्वःपथाय स्वः शब्दः सुखपरः॥ निरतिशयसुखरूपलोकमार्गाय मतिं चक्रे॥ ३२॥ अर्जुनोदितं यदूनां नाशं तां भगवतो गतिं च १२२
श्रुत्वा कुंत्यपि भगवत्यधोक्षजेऽनन्यप्रयोजनया भक्त्या निवेशित आत्मा मनो यया तथाभूता संसृतेरुपराम विरक्ता बभूव॥ ३३॥ ॥

भगवन्मार्गमिति भगवद्गतिमित्यनेन चोक्ता भगवतः स्वलोकं प्रतिगतिः ॥ किं कृत्वा स्वतनुत्यागपूर्विकाद्भुततयैवेति शौनकाभिप्रेतं ।
विशदयति । ययेति ॥ अजो भगवान् यया तन्वा भुवो भारमहरत्तां तनुं विजहौ । मनुष्यसंस्थानं विजहौ ॥ स्वासाधारणया चतुर्भुजादिमत्या
तन्वावतीर्य पित्रोः प्रार्थनायां मनुष्यसंस्थानसंस्थितां तनुं भूभारमपनेतुं जग्राह ॥ तां तनुं तिरोधाय स्वासाधारणतन्वा जगामेत्यर्थः
मनुष्यसंस्थानस्य भूभारापनोदनोपाधिकत्वेन यावदुपाधितत्संस्थापनायनोद्यमपनुद्य स्वासाधारणयैव जगामेति भावः ॥ मनु
ष्यसंस्थानेनैव किं न जगामेत्याकांक्षायां तत्र दृष्टांतमुखेनोत्तरमाह ॥ यथा कंटकविद्धचरणः पुमान् यावन्नरस्यापनोदकं कंटकांत

ययाहरद्भुवो भारं तां तनुं विजहावजः ॥ कंटकं कंटकेनेव द्वयं चापीशितुः समं ॥ ३४ ॥

रं परिगृह्णीते ॥ नरस्यापनुद्य ततोपनुत्तमापनोदकमपि कंटकद्वयं जहाति तद्वदीशितुर्भगवतः । द्वयमपि सममपनोद्यं दुष्टतत्तच्छरी
रजालमपनोदकं मनुष्यसंस्थानं चोभयमपि समं हातव्यत्वेन सममपनोदकशरीरस्यापि यावदुपाधिधार्यत्वादिति भावः ईशि
तुरुभयमित्यनेन दुष्कृच्छरीरेष्वंतः प्रविश्य नियंतुर्भगवतः ॥ तान्यपि शरीराणि भगवत एव स्वस्येवेति सूचितं ॥ कंटकदृष्टांते
नैतदभिप्रेतं यथोभयोः । कंटकयोः । कंटकत्वमविशिष्टमेवमुभयोरपि शरीरयोः । स्वशरीरत्वमविशिष्टमिति ॥ ३४ ॥ ॥

भा॰प्र इदमेवप्रसिद्धंदृष्टांतांतरेणाप्याह। यथेति। यथानटोनाट्येउपयुक्तानिवेशांतराणिपरिगृह्यनाट्यानंतरंस्वेनरूपेणैवावतिष्ठते
१२३ तथाभगवानपितत्प्रयोजनायमत्स्यादिरूपाणियावत्प्रयोजनंधत्तेतदंतेपुनर्जह्याद्धित्वास्वकीयरूपेणैवावतस्थे। तथाये
नशरीरेणभूभारः। क्षपितोनिरस्तः। तत्कलेवरंजहौनतुतिरोधायस्वासाधारणेनैवजगामेत्यर्थः॥२५॥यदेति। श्रोतव्याःसत्याःक

यथामत्स्यादिरूपाणिधत्तेजह्याद्यथानटः॥भूभारःक्षपितोयेनजहौतच्चकलेवरं॥३५॥यदामुकुंदो
भगवानिमांमहींजहौस्वतन्वाश्रवणीयसत्कथः॥तदाहरेवाप्रतिबुद्धचेतसामभद्रहेतुःकलिरन्ववर्तत
॥३६॥युधिष्ठिरस्तत्परिसर्पणंबुधःपुरेचराष्ट्रेचगृहेतदात्मनि विभाव्यलोभानृतजिह्महिंसनाद्यधर्मचक्रंग
मनायपर्यधात्॥३७॥स्वराट्पौत्रंविनयिनमात्मनःसुसमंगुणैः। तोयनीव्याःपतिंभूमेरभ्यषिंचद्गजाह्वये
॥३८॥ ॥३९॥ मथुरायां

थाःयस्यसभगवान्मुकुंदः। स्वतन्वास्वासाधारणदिव्यमंगलविग्रहोपेतः। महींयदायस्मिन्नहनिजहौतदहरेवतस्मि
न्नहन्येवाविवेकिनामभद्रहेतुरशुभहेतुःकलिरववर्तत॥३६॥ततोयुधिष्ठिरःपुरेराष्ट्रेगृहेचात्मनिजनानांदेहेषुचतस्यकलेःप
रिसर्पणमनुवर्तनंबुधः। जानन्तन्मूलकंलोभाद्यधर्माणांचक्रंजालमवलोक्यगमनायगृहान्निर्गमनायपर्यधात्परिहितउ
द्युक्तोवभूवेत्यर्थः॥३७॥ततःस्वराट्राजायुधिष्ठिरः। गुणैरात्मनःस्वस्यसमंतुल्यंविनयिनंचपौत्रंपरीक्षितंहास्तिनपुरेतोयनी १२३
व्याःसमुद्रमेखलायाभूमेःपतिमभ्योषिंचदभिषिक्तवान्॥विनिमयमात्मनोनवयमितिपाठेविनिमयार्हंसदृशमनवमनू

तथा मथुरायां वज्राख्यं यदुकुलकुमारं शूरसेनाख्यजनपदानां पतिमभ्यषिंचत् ।। ततः प्राजापत्यां प्रजापतिदेवताकां इष्टिं निरूप्य कृत्वा
ईश्वरो युधिष्ठिरो ग्नीनाहवनीयादीनपिबत् आत्मन्यारोपितवान् ।।३८।। तत्र स्वगृह एव तत्सर्वं दुकूलादिकं वाचं जुहावेत्यन्वयः
कथंभूतः निर्ममः देहाद्यनुबंधिषु स्वकीयत्वाभिमानरहितः ।। निरहंकारः देहात्मभ्रमरहितः संछिन्नान्यशेषाणि बंधनानि प्रा-
कृत्यादीनि येन तथाभूतः प्रकृत्यादिमोक्षमनुसंहितवानित्यर्थः ।। तत्प्रकारमाह वाचमित्यादिना ।। वाचं वागादिकर्मज्ञानोभये-
न्द्रियव्यापारं मनसि जुहाव मनोधीनममन्यत ।। मनस इंद्रियप्रकृतित्वाभावादयमेवार्थः ।। तन्मनः प्राणे जुहाव । मनः प्रवृत्तिप्रा-

मथुरायां तथा वज्रं शूरसेनपतिं ततः । प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः ।।३९।। विसृज्य तत्र तत्सर्वं दुकू-
लवलयादिकं । निर्ममो निरहंकारः संछिन्नाशेषबंधनः ।।४०।। वाचं जुहाव मनसि तत्प्राण इतरे च तं । मृत्यावप
पानं सोत्सर्गं तं पंचत्वे ह्यजोहवीत् ।।४१।।

णाधीनां मेने ।। तथा प्राणसंचारादिषु दर्शनात् तत एव हितस्य मुख्यप्राणत्वं
प्राणादीनां लयानुसंधानप्रकारमाह ।। इतरे च तं मृत्यावपानं सोत्सर्गमिति ।। तं प्राणमितरे इतरस्मिन्नपाने तं सोत्सर्गमपानमुदान
इति शेषः । उत्सर्गः शरीरोद्वृत्तिः पंचकप्रदर्शनार्थः ।। स्वस्ववृत्तिविशिष्टानामेव तेषु तेषु लयमनुसंहितवानित्यर्थः ।। ततस्तमुदानं मृत्यौ
मृत्युसंज्ञके समाने तं समानं पंचत्वे कारणे वायावित्यर्थः ।। अवस्थाविशेषवायुर्हि प्राणः ।। न वायुमात्रं स चैको पि प्राणनादिवृत्ति
पंचकविधः । अतो वृत्तिपंचकनिरोधेन प्राणस्य तत्कारणे वायौ लयानुसंधानप्रकार उक्तः ।।४१।।

भा०प्र० एवमिंद्रियवर्गमात्मनतद्वृत्तिनिरोधानुसंधानमुक्तं ॥ अथवायुनासहितानिपंचभूतानींद्रियगणमहंकारं कार्यमितितदुभयंत्रि
१२४ त्वे सात्विकराजसतामसरूपत्रिविधाहंकारेजुहावेत्यर्थः ॥ सर्वंत्वत्प्रत्ययस्वार्थिकयथायथमिंद्रियाणां सात्विकाहंकारेलयः
एकत्वे भूतानांतामसइतिविवेकः ॥ तच्चाहंकारत्रयं एकस्मिन्प्रकृतितत्वेमहत्तत्वद्वाराजुहावेत्यर्थः ॥ सर्वंवागादिप्रकृत्यंतमात्मनि
जीवेजुहवीच्चेतनाद्यचेतनाप्रवृत्तिः ॥ अतएवमुक्तं ॥ नहिजीवः प्रकृतेरुपादानं ॥ आत्मानंजीवमव्ययेब्रह्मण्यजुहोत् ॥ जीव

त्वेहुत्वाचपंचत्वंतच्चैकत्वेजुहोत्यतु ॥ सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ॥ ४२ ॥ चीरवासानिराहा
रोबद्धवाङ्मुक्तमूर्द्धजः ॥ दर्शयन्नात्मनोरूपंजडोन्मत्तपिशाचवत् ॥ ४३ ॥ अनवेक्षमाणोनिरगादशृ
ण्वन्बधिरोयथा ॥ उदीचींप्रविवेशाशांगतपूर्वांमहात्मभिः ॥ हृदिब्रह्मपरंध्यायन्नावर्त्तेतयतोगतः

सर्वत्याधीनवृत्तित्वात्तस्मिंस्तंसमर्पितवानित्यर्थः ॥ ४२ ॥ ततश्चीरंवल्कलंवासोवस्त्रंयस्यसनिराहारः ॥ बद्धवाङ्मौनी ॥ वि ॥ ४४ ॥
क्षिप्तामूर्द्धजाकेशायेन [illegible] नसः ॥ जडादिवदात्मनः ॥ स्वस्वरूपमाकारंदर्शयन्लोकस्येतिशेषः ॥ ४३ ॥ यथाबधिरस्तद्वदशृण्वन्नंधा
इवानवेक्षमाणः । निरगाद्गृहादितिशेषः ॥ पूर्वंगता । गतपूर्वा ॥ यतोयांगतः । पुनर्ननिवर्त्तेत ॥ तांमहात्मभिर्विरक्तैः गतपूर्वामुदीचींदि १२४
शंहृदिपरंब्रह्मध्यायन्प्रविवेश ॥ ४४ ॥

तं युधिष्ठिरमनु तस्य तेऽनुभ्रातरः। सर्वे कृतनिश्चयाः। गमनाय कृतो निश्चयो यैस्ते कृतविवेका वा निर्जग्मुः॥ ते भ्रातरः युधिष्ठिरस्यो वा अ
धर्ममित्रं यस्य तेन कलिना स्पृष्टाः प्रजाः भुवि दृष्ट्वा॥ ४५॥ असाधु कृतास्तुच्छी कृताः सर्वे अर्था देहतदनुबंध्यास्पदो यैस्तथाभूताः आ
यं त्मनो देहस्यात्यंतिकं मरणं ज्ञात्वा भगवच्चरणांबुजं मनसा धारयामासुः युधिष्ठिरादयः॥ ४६॥ तस्य वैकुंठपदांबुजस्य ध्यानेनोद्रिक्तया
भक्त्या विशुद्धा धिषणा बुद्धिर्येषां ते॥ नारायणपदाख्ये परमपुरुषे एकांता गतिर्मतिर्येषां॥ मतैरैक्यं नाम विजातीयप्रत्ययाव्य

सर्वे तमनुनिर्जग्मुर्भ्रातरः कृतनिश्चयाः॥ कलिनाधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि॥ ४५॥ ते साधुकृतसर्वार्था
ज्ञात्वात्यंतिकमात्मनः॥ मनसा धारयामासुर्वैकुंठचरणांबुजं॥ ४६॥ तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे॥ त
स्मिन्नारायणपदे एकांतमतयो गतिं॥ ४७॥ अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः॥ विधूतकल्मषाः स्थानं विर
जेनात्मनैव हि॥ ४८॥

वधानां॥ विषयेषु शब्दादिषु प्रवण आत्मा मनो येषां तैरसद्भिर्दुरात्मभिः दुःखेनाप्यवाप्तुमशक्यां गतिं मुक्त्यात्मिकामवापुः॥ तदेवो
पपादयति॥ विधूतानि निरस्तानि कल्मषाणि भगवत्प्राप्तिप्रतिबंधकानि पूर्वोत्तराघानि येषां ते विरजेन रजस्तमोरहितेनात्मना स्व
रूपेण स्थानं श्रीनारायणस्य पदमवापुरित्यनुषंगः॥ ४७॥ ४८॥

भा० प्र०
१२५

विदुरोपि केंचित्कालं तीर्थान्यटित्वा पांडवादीनां गतिमाकर्ण्यात्मवान् भगवति समाहितचित्तः । प्रभासे देहं परित्यज्य कृष्णावेशेन कृ-
ष्णसमाधानेन तच्चित्तः । कृष्णैकविषयकचित्तः । पितृभिः । पितृदेवताभिः सह स्वयं स्वस्थानं ययौ ॥ पुनर्यम एव भूत्वा स्वकं लोकं ययावि-
त्यर्थः । कृष्णोपदेशा इति पाठे यदुकुलसंहाराय यत्र श्रीकृष्णः प्रविष्टस्तस्मिन् देशे प्रभासे इत्यर्थः ॥ पुनरधः पतनाभावात्पांडवादी-
नां मुक्तत्वे कथनं ॥ ते हि प्रारब्धकर्मावसाने विमोक्ष्यंत एवातो न विरोधः ॥ ४९ ॥ तदा द्रौपद्यपि पतीनामनपेक्षतामाज्ञाय ज्ञात्वा वा ।

विदुरोपि परित्यज्य प्रभासे देहमात्मवान् ॥ कृष्णावेशेन तच्चित्तः पितृभिः स्वक्षयं ययौ ॥ ४९ ॥ द्रौपदी च तदाज्ञाय
पतीनामनपेक्षतां ॥ वासुदेवे भगवति ह्येकांतमतिराप तं ॥ ५० ॥ यः श्रद्धयैतद्भगवत्प्रियाणां पांडोः सुतानामि-
ति संप्रयाणं ॥ शृणोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिं ॥ ५१ ॥ इति श्रीभागवते महापुराणे
प्रथमस्कंधे पंचदशोध्यायः ॥ १५ ॥

सुदेवे भगवति एकांता विजातीयप्रत्ययांतराव्यवहिता मतिर्यस्यास्तथाभूता तं वासुदेवमवाप ॥ ५० ॥ श्रीकृष्णादीनां प्रयाणश्रव-
णादिफलमाह । य इति ॥ इतीत्थं नितरां स्वस्त्ययनं शुभ एव तां पवतां च शुभावहं पवित्रं च भगवतः प्रयाणं पांडोः सुतानां संप्रयाणं च यः
पुमान् श्रद्धया शृणोति स हरौ भक्तिं लब्ध्वा सिद्धिं मुक्तिमुपैति ॥ ५१ ॥ इति प्रथमे पंचदशः ॥ १५ ॥ ॥ ॥ ॥ ॥ ॥

१२५

तदेवं संप्रस्थानं पांडुपुत्राणां वक्ष्ये कृष्णकथोदयमिति प्रतिप्रतिज्ञातं पांडुपुत्रसंस्थानं परीक्षिज्जन्मोपेतं उपपाद्य परीक्षितः । कर्माणि परी
क्षितो यद्राजर्षेर्जन्मकर्मविलापनमिति प्रतिज्ञातानि वर्णयति । तत्र तज्जन्म पांडवपुत्रवृत्तांतरावांतर्भाव्याभिहितं । विलापनं द्वादशे स्कंधे
वक्ष्यति ॥ इतः पंचतुरध्याय्या कर्माणि वर्ण्यंते इति विवेकः ॥ तत्र स इति । ततः पितृनिर्गमनानंतरं महांतो गुणा यस्य स परीक्षित हे द्विजसू
त्यां जन्मदिने जातककोविदाः । विप्राः यथा समादिशन् तथैव द्विजवर्यशिक्षया महाभागवतः सन्महीं शशास पालयामास ॥ २ ॥ स परीक्षि

सूत उवाच ॥ ततः परीक्षिद्द्विजवर्यशिक्षया महीं महाभागवतः शशास ह । यथा हि सूत्यामभिजातकोविदाः समादिश
न्विप्र महद्गुणस्तथा ॥ १ ॥ स उत्तरस्य तनयामुपयेम इरावतीं ॥ जनमेजयादींश्चतुरस्तस्यामुत्पादयन्सुतान् ॥ २ ॥ आजहा
राश्वमेधांस्त्रीन्गंगायां भूरिदक्षिणान् ॥ शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः ॥ ३ ॥ निजग्राहौजसा वीरः कलिं दिग्विजये
क्वचित् नृपलिंगधरं शूद्रं घ्नंतं गोमिथुनं पदा ॥ ४ ॥

उत्तरस्य मातुलस्य तनयामिरावतीमुपयेमे उद्वाह ॥ ततस्तस्यामिरावत्यां जन
मेजयादींश्चतुरः सुतानुदपादयत् ॥ अत्राडभाव आर्षः ॥ आगमशास्त्रस्यानित्यत्वाद्वा ॥ ३ ॥ शारद्वतं गुरुं कृपं गुरुं कृत्वा हत्वा गंगायां गंगाती
रे त्रीनश्वमेधानाजहार ॥ यत्र येषु अश्वमेधेषु देवा इंद्रादयः अक्षिगोचरा बभूवुः ॥ तथाविधानाजहारेत्यर्थः ॥ ३ ॥ कदाचिद्दिग्विजये निमित्ते व
रन् वीरः परीक्षित् क्वचिद्देशे यदा पादेन गोमिथुनं स्त्रीपुंसयोर्गोवृषयुग्मं घ्नंतं ताडयंतं शूद्रमपि नृपचिह्नधरं कलिमोजसा पराभिभवसाम
र्थ्यात्मकेन निजग्राह निगृहीतवान् ॥ ४ ॥

भा० प्र०
१२६

तत्र लब्धप्रश्नावसरः पृच्छति शौनकः कस्य हेतोरिति। नृपः परीक्षित् दिग्विजये कस्माद्धेतोः कलिं निजग्राहेत्येकः प्रश्नः। यो गां पदाहनत्तमगाउ
सौ नृपचिह्नधारी शूद्रः कइत्यपरः। यद्यपि नृपलिंगधरं शूद्रं कलिमिति सामानाधिकरण्येन निर्दिष्टो नैव कलिरेव नृदेवचिह्नधृक् शूद्र इति।
ज्ञात एवेति प्रश्नानुपपत्तिस्तथापि कइत्यस्य किंगुण कइत्यभिप्रायः। अतः प्रश्नोपपत्तिः ५। तत्कलिनिग्रहादिकं केवलमस्माभिः पृष्टं इदे
ववर्णय किं हे महात्मन् यदि विष्णुकथाश्रयं भगवत्कथोपेतं। अथ वास्य विष्णोः पदांबुजमकरंदास्वादिनां साधूनां कथाश्रयं स्यात्तर्हि

शौनक उवाच। कस्य हेतोर्निजग्राह कलिं दिग्विजये नृप। नृदेवचिह्नधृक् शूद्रः कोऽसौ गां यः पदाहनत् ॥५॥
तत्कथ्यतां महाभाग यदि विष्णुकथाश्रयं। अथ वास्य पदांभोजमकरंदलिहां सतां ॥६॥ किमन्यैरसदालापै
रायुषो यदसद्व्ययः। क्षुद्रायुषां नृणामंग मर्त्यानामृतमिच्छतां ॥७॥

कथ्यतां ॥६॥ तत्र हेतुं वदन् विष्णुतद्भक्तकथानामाश्रयाणामश्रोतव्यत्वमवर्णनीयत्वं चाह। किमन्यैरिति। अंग हे सूत यद्येभ्य आयुषो
ऽसद्व्ययः। निरर्थकः क्षयो भवति तैः क्षुद्रायुषामल्पायुषामृतं कर्मफलमिच्छतां मर्त्यानां मरणशीलानां नृणां संबंधिभिरन्यैर्विष्णुतद्भक्त
जनाकथानाश्रयैरत एवासद्भिरालापैः किं वर्णितैर्वा न किंचित्प्रयोजनं। किंतु केवलमायुर्व्यय एवेति भावः। यद्वा। ऋतं सत्यं परं ब्र
ह्म इच्छतां तत्प्राप्तिं कामयमानानां मरणशीलानामल्पायुषां नृणामस्माकमन्यैरसदालापैः किं न किं न किंचित्प्रयोजनमपि यतो येभ्यः

श्रीभागवतटीकायां प्रथमस्कंधे ॥१॥ १२७

ननु तु नश्चायुष्मां मर्त्यानामस्माकं यावत्तत्समष्टवर्णेन श्रवणं जीवनमप्यवसातुं शक्यमित्यत्राह । इहेति ॥ इहैव निमिषक्षेत्रे शामित्रकर्मणि सत्रक
र्मणि । शामित्रहरः पशुसंज्ञपयितृत्ववाची । शमयिता च भगवानस्त्विति श्रुतेः सचेह पापापनोदकभगवद्गुणानुभवितृपरः ॥ तत्संबंधे कर्मणि
भगवद्गुणात्मकश्रवणमत्र इत्यर्थः ॥ भगवान्मृत्युराहूतः ॥ स चांतको यावदिहास्ति तावदत्र न कश्चिन्म्रियते न मरणमेति ॥७॥ किमर्थमाहूतः इ
त्यत्राह । एतदर्थमिति ॥ एतदर्थमत्राविस्थितानामस्माकं मरणाभावार्थमेव हि परमर्षिभिर्भगवान्मृत्युराहूतः । इत्यर्थः । मृत्यर्थः मृत्युरपि त्वया ॥
पारं विलंब्य भगवद्गुणश्रवणायेह न किंचिदपि हन्यादित्यभिप्रायेणाहूत इति भावः ॥ तत्कथ्यतां महाभाग इत्यादिश्लोकद्वयेन विस्तु तज्ञ

यस्मिन्प्रीते कृतं सर्वमिष्टापूर्तादिकं भवेत

इहोपहूतो भगवान्मृत्युः शामित्रकर्मणि ॥ न कश्चिन्म्रियते तावद्यावदास्त इहांतकः ॥७॥ एतदर्थं हि भगवानाहू
तः परमर्षिभिः ॥ अहो नृलोके पीयेत हरिलीलामृतं वचः ॥८॥ मंदस्य मंदप्रज्ञस्य वयो मंदायुषश्च वै ॥ निद्रया ह्रिय
ते नक्तं दिवा च व्यर्थकर्मभिः ॥९॥

कं श्रवणस्यैवावर्णनीयत्वं श्रोतव्यत्वं चोक्तं तदेव सहेतुकमुपपादयति ॥ अहो इति सार्द्धेन । नृ
लोके हरेर्लीला यस्मिन्नुत्तिपाद्यास्तद्धरिलीलं तदमृततुल्यं वचः ॥ पीयेत पातव्यं श्रोतव्यमिति यावत् । ये पिबंति तानभिनंदति ॥ अहो इ
ति तेषां भाग्यमेतावदिति वक्तुमशक्यमिति भावः ॥८॥ कुतः ॥ यद्यस्मान्मंदस्य मंदचेष्टस्य ॥ मंदा प्रज्ञा तु बुद्धिर्यस्य ॥ मंदमल्पमायुर्यस्य
तस्य हरिलीलामृतं । हरिलीलामृतैव वचोऽमृतमेव ततो वयः कौमारादि केवलं नक्तं रात्रौ निद्रया ह्रियते हृस्यते ॥ दिवाऽहनि तु व्यर्थैः पुरु
षार्थशून्यैः । कर्मभिः । सांसारिकैर्मभिः ह्रियते ॥ हरिलीलामृतं वचः । पिबतस्तु वयः सफलमिति भावः ॥ ॥९॥ ॥ ॥
क

भा०प्र० इत्थमाहुत्थः स हेतुकं कलिनिग्रहादिकं वर्णयति। सूतः यदेत्यादिना यावत्सप्तदशाध्यायसमाप्ति॥ यदा परीक्षित् दिग्विजयार्थं गतः। कुरुजांगले
१२७ जनपदे वसन्निजचक्रेणाध्वा ज्ञात्वा चक्रे एव वर्तिते उशिते देशे वा प्रविष्टं कलिं तत्स्वदेश रूपासस्यं तमप्रियां वार्त्तां निशम्याकर्ण्य ततः संयुगे युद्धे
शौडिः प्रवीणो राजा शरासनं धनुरादरे जग्राह। निजचक्रवर्तिते कुरुजांगले वसन्निति वान्वयः॥११॥ ततः सुष्ठु अलंकृतं श्यामैस्तुरंगैः संयोजि

सूत उवाच। यदा परीक्षित्कुरुजांगलेवसन्कलिं प्रविष्टं निजचक्रवर्तिते॥ निशम्य वार्त्तामनतिप्रियां ततः शरासनं संयु
गशौण्डिराददे॥११॥ स्वलंकृतं श्यामतुरंगयोजितं रथं मृगेंद्रध्वजमाश्रितः पुरात्॥ वृतो रथाश्वद्विपपत्तियुक्तया स्वसेन।
यादिग्विजयाय निर्गतः॥१२॥ भद्राश्वकेतुमालं च भारतं चोत्तरान्कुरून्॥ किंपुरुषादीनि सर्वाणि विजित्य जगृहे बलिं
॥१३॥ तत्र तत्रोपशृण्वानः स्वपूर्वेषां महात्मनां॥ प्रगीयमानं च यशः कृष्णमाहात्म्यसूचकं॥१४॥ आत्मानं च परित्रात
मश्वत्थाम्नोऽस्त्रतेजसः॥ स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे॥१५॥

तं मृगेंद्रः सिंहोंकितो ध्वजो यस्मिंस्तं रथमाश्रितोधिष्ठितः। रथादिचतुरंगयुक्तया सेनया परिवृतो दिग्विजयाय निर्गतः॥ कुरुजांगला
दिक्षितिशेष॥१२॥ भद्राश्वादिवर्षाणि निर्जित्य बलिं करं जगृहे॥१३॥ तत्र तत्र देशेषु स्वपूर्वेषां युधिष्ठिरादीनां महात्मनां कृष्णस्य भग
वतो माहात्म्यसूचकं प्रगीयमानं यशः॥१४॥ अश्वत्थाम्नो ब्रह्मास्त्रतेजसा परित्रातमात्मानं च वृष्णीनां पार्थानां च केशवे कृष्णे स्नेहमनु १२७
रागं च तथा तेषां तस्मिन्भक्तिं चोपशृण्वन्॥१५॥

नितांहृष्टः प्रीत्या उत्फुल्लं मिते लोचने यस्य स महामनाः उदारबुद्धिर्वदान्यो राजा तेभ्यः श्रावयितृभ्यः । महाधनानि बहुमूल्यवस्त्राणि वासांसि हारान्सु

कण्ठाहारांश्च ददौ ॥१६॥ स्निग्धेष्वनुरक्तेषु पांडुषु युधिष्ठिरादिषु विह्वलोः श्रीकृष्णस्य सारथ्यादिकं जगत्कृतं प्रणामं च स्मृत्वेति शेषः ॥ नृपतिः । परीक्षि

द्विष्णोश्चरणारविंदे भक्तिं करोति स्म चकारेत्यर्थः ॥ तत्र सारथ्यं प्रसिद्धं पारिषदं सभ्यत्वं सेवनं भृत्यकर्म दौत्यकृतकर्म वीरासनानुगमनं द्वपास

नाधिष्ठितं प्रत्यनुवर्तनं स्तवनं स्तुतिकर्म प्रणामो नमस्कारः । विष्णुकर्तृत्वान्पांडुषु विषयानेतान्स्मृत्वेत्यर्थः ॥१७॥ तस्य परीक्षितः । पूर्वं पांडु

तेभ्यः परमसंतुष्टः प्रीत्युज्जृंभितलोचनः ॥ महाधनानि वासांसि ददौ हारान्महामनाः ॥१६॥ सारथ्यपारषदसेवनसख्यदौत्यवी

रासनानुगमनस्तवनप्रणामं ॥ स्निग्धेषु पांडुषु जगत्प्रणतिं च विष्णोर्भक्तिं करोति नृपतिश्चरणारविंदे ॥१७॥ तस्यैवं वर्तमा

नस्य पूर्वेषां वृत्तिमन्वहं ॥ नातिदूरे किलाश्चर्यं यदासीत्तन्निबोध मे ॥१८॥ धर्मः पदैकेन चरन् विच्छायामुपलभ्य गां । पृच्छति स्मा

श्रुवदनां विवत्सामिव मातरं ॥१९॥ धर्म उवाच ॥ कच्चिद्भद्रेऽनामयमात्मनस्ते विच्छायासि म्लायतेषन्मुखेन । आलक्षये भवतीमं

तराधिं दूरे बंधुं शोचसि कंचनांब ॥२०॥

धिष्ठिरादीनां वृत्तिमन्वहं वर्तमानस्य सतः । तस्य नातिदूरे सन्निकृष्टदेशे यन्महदाश्चर्यमासीत्तत्कथ

यिष्यतो मे मत्तः निबोध श्रृणु । १८ । धर्मः धर्माधिदेवो वृषरूपधरः ॥ एकेन पदेन चरन् विच्छायां निस्तेजस्कां गां गोरूपधरां वत्सरहितां मातरमिवाश्रू

णि वदने यस्यास्तां पृच्छति स्मापृच्छत् । १९ ॥ प्रश्नमेवाह । कच्चिदित्यादिभिः षड्भिः । हे भद्रे तवात्मनः देहस्यानामयमारोग्यमस्ति कच्चित् । ईषन्म्ला

यताईषत्समुपगतेन मुखेन विच्छायानिस्तेजस्का भवसि । अहं तु भवतीं त्वां अंतराधिः हृदयमध्ये आधिः क्लेशो यस्यास्तथाभूतामालक्षये ज्ञाना।

भा०प्र० किंवा ॥ पादैस्त्रिभिर्न्यूनं एकः पदो यस्य तं मां प्रति शोचसि ॥ उत वृषलैः शूद्रप्रायै राजभिर्भोक्ष्यमाणां स्वात्मानं प्रत्येव शोचसि । अहो स्वि
१२८ त् हृतः सुरेभ्यः ॥ यज्ञीयहविर्भागो येषां तान् देवान् प्रति उत स्वित् मघवती इन्द्रेऽवर्षति सति दुर्भिक्षपीडिता प्रजाः प्रति ॥ २१ ॥ यद्वा हे ऊर्वि पुरुषा
दैः राक्षसैरिव नृशंसैः रात्ती नृपीडितान् वालकानरक्ष्यमाणान्स्त्रियः स्त्रीः प्रति शोचसि किं । ब्रह्मकुले कुकर्मणि दुष्टे ते सति देवस्या-
विलोः संवं विनीवा चेत्त्रयं प्रति ॥ उत राजकुलेऽब्रह्मण्ये ब्राह्मणेषसाक्षनिसति कुलाग्र्यान् ब्राह्मणान् प्रति ॥ २२ ॥ किंवा कलिनोपसृष्टान्

पादैर्न्यूनं शोचसि मैकपादमात्मानं वा वृषलैर्भोक्ष्यमाणं ॥ अहो सुरादीन् हृतयज्ञभागान् प्रजा उत स्विन्मघवत्यव-
र्षति ॥ २१ ॥ अरक्ष्यमाणाः स्त्रिय ऊर्वि बालान् शोचस्यथो पुरुषादैरिवार्तान् ॥ वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये
राजकुले कुलाग्र्यान् ॥ २२ ॥ किं क्षत्रबंधून् कलिनोपसृष्टान् राष्ट्राणि वा तैरवरोपितानि ॥ इतस्ततो वाशनपानवास-
स्नानव्यवायोन्मुखजीवलोकं ॥ २३ ॥ यद्वांब ते भूरिभरावतारकृतावतारस्य हरेर्धरित्रि ॥ अंतर्हितस्य स्मरती विसृष्टा
कर्माणि निर्वाणविलंबितानि ॥ २४ ॥

क्षत्रियोपमान् प्रति ॥ यद्वा तैः क्षत्रबंधुभिरवरोपितानि राष्ट्राणि प्रति । उत इतस्ततः
निषिद्धदेशे जनेषु अशनाद्युन्मुखमशनाद्यभिलाषिणं जीवलोकं प्रति ॥ २३ ॥ यद्वा । हे अंब हे धरित्रि त्वं भूरिभारस्यावतारायापहर
णाय कृतः ॥ अवतारो येन तस्य हरेरंतर्हितस्य श्रीकृष्णस्य हरेरिति कर्तरि षष्ठी । तेन विसृष्टा त्यक्ता सती तस्य कर्माणि चेष्टितानि नि
र्वाणविलंबितानि स्मरती त्वं शोचसि । निर्वाणे मोक्षे विशेषेण लंबितानि संनिहितानि साक्षात्कृतानीति यावत् । यद्वा निर्वाणं सुखं वि १२८

हे वसुंधरे तवाधेर्मूलमिदमुपस्थितं मह्यमाचक्ष्वाख्याहि। येन त्वं विकर्षिता कृशत्वं प्रापितासि तस्या आधेर्मूलमित्यर्थः। हे अंब सुरैरपि बहुमंतव्यं तव
सौभगं स्पृहणीयं सौंदर्यं बलिनामपि बलीयसा कालेन किं वापहृतं ॥२५॥ एवमुक्ता धरण्याह भवानित्यादि दृशोभिः ॥ तन्ममाधिमूलं सर्वं नूनं भ
वान्वेद जानात्येव कुतः यद्यस्मात् धर्माननुपृच्छसि। अजानतो धर्मप्रश्नो ह्युपपन्न इति भावः। अथापि किं तदिति चेद्येन कारणेन त्वं लोकानां सुख
हैश्चतुर्भिः पादैर्वर्तसे ऽवर्तथाः। अधुना कारणेन विनैकपादेन वर्तसे तदेव ममाप्याधिमूलमित्यर्थः ॥२६॥ कारणविशेषजिज्ञासायां तदुप
पादयति। सत्यमित्यादि पंचभिः। सत्यादयो ऽन्ये चत्वे कुवहवो महत्वमिच्छद्भिर्जनैः प्रार्थनीया गुणाः नित्याः कदाचिदपि यस्मिन्न वियंति न।

इदं ममाचक्ष्व तवाधिमूलं वसुंधरे येन विकर्षितासि ॥ कालेन वा ते बलिनां बलीयसा सुरार्चितं किं हृतमंब सौभगं
॥२५॥ धरण्युवाच ॥ भवान्हि वेद तत्सर्वं यन्मां धर्मानुपृच्छसि ॥ चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः ॥२६॥ सत्यं शौचं दया
क्षांतिस्त्यागः संतोष आर्जवं। शमो दमस्तपः। साम्यं तितिक्षोपरतिः श्रुतं ॥२७॥

भवंति। तेन गुणानां पात्रेण मुख्याश्रयेण श्रीनिवासेन श्रीकृष्णेन साम्प्रतमधुना रहितमत एव पाप्मना पापेन कलिना ईक्षितं लोकं प्रत्यहं
शोचामीत्यन्वयः ॥ तत्र सत्यमृतं हितत्वं वा विवेकं वा ॥ शौचं हेयप्रतिभटत्वं ॥ दया परदुःखासहिष्णुत्वं। सहिष्णुता त्यागः अनादरः पूर्णका
मत्वप्रयुक्तः ॥ वक्ष्यात्र वक्ष्यते ॥ सर्वमिदमभ्यासतो वा कल्पनार इति। आत्मपर्यंतवदान्यत्वं वा त्यागः संतोषः कर्हिचिदपि क्लेशराहित्यं।
आर्जवं मनोवाक्कायानामैक्यरूपं शमो मनोनिग्रहः। दमो बाह्येंद्रियनिग्रहः। तपः आलोचनं जगद्व्यापारो पयुक्तं। साम्यमरिमित्रा
दिराहित्यं। तितिक्षा द्वंद्वाप्रतिहतत्वं। उपरतिर्हर्षा व्यापारोपरतिः। श्रुतं सर्वशास्त्रार्थयाथात्म्यवित्त्वं ॥२७॥

भी॰ प्र॰ १२९ ज्ञानमाश्रितानिष्टपरिहारेष्टप्रापणोपयुक्तं । विरक्तिर्विषयेषु येषु निःस्पृहत्वं विषपानादृष्टवित्तत्वं वा । ऐश्वर्यं व्यतिरिक्तसर्वनियंतृत्वं शौर्यं
युद्धेषु वैमुख्यं तेजो धृष्यता बलं प्रसिद्धं स्मृतिः । सत्स्वपि विपुलेष्वहं प्रजापतीनां च सर्वेषामीश्वरः प्रभुः । मम विस्मुरचिंत्यात्मेति ब्रह्मवचनं
उपकारविशेषस्मरणं स्वातंत्र्यमन्यानपेक्षत्वं कौशलं नैपुण्यं कांतिः । न तत्र सूर्यो भातीति श्रुत्युक्तविधा दीप्तिः धैर्यं वीर्यं तत्त्वयुद्धेष्वग-
हदवप्रवेशसामर्थ्यं मार्दवमक्रूरत्वं । स्वातंत्र्यं सौभगं कांतिरिति पाठे सौभगं स्पृहणीयत्वं ॥२८॥ प्रागल्भ्यं सभासु धार्ष्ट्यं ॥ प्रश्रयो महत्सु विन-

ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः ॥ स्वातंत्र्यं कौशलं कांतिर्धैर्यं मार्दवमेव च ॥२८॥ प्रागल्भ्यं प्रश्रयः शीलं
सहओजो बलं भगः ॥ गांभीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानो नहंकृतिः ॥२९॥ एते चान्ये च भगवन्नित्या यत्र महा-
गुणाः । प्रार्थ्या महत्त्वमिच्छद्भिर्न वियंति स्म कर्हिचित् ॥३०॥ तेनाहं गुणपात्रेण श्रीनिवासेन सांप्रतं ॥ शोचामि रहितं
लोकं पाप्मना कलिनेक्षितं ॥३१॥ आत्मानं चानुशोचामि भवंतं चामरोत्तमं ॥ देवान्पितॄनृषीन्साधून्सर्वान्वर्णां-
स्तथाश्रमान् ॥३२॥

यः । शीलं सद्वृत्तिः सहः प्राणस्य स्वाभाविकसामर्थ्यं । ओजः शत्रादिजनितं बलं धारणसामर्थ्यं । भगो ज्ञानाद्युत्कर्षः गांभीर्यं दुरवगाह्या-
भिप्रायत्वं । स्थैर्यं क्रोधनिमित्ते ऽविकारः । आस्तिक्यं शास्त्रार्थविश्वासः । कीर्तिर्यशः । मानः पूजार्हता नहंकृतिर्देहात्माभिमानरा- १२९
हित्यं ॥२९॥३०॥ श्रीयते ब्रह्मादिभिरिति श्रीः लक्ष्मीस्तस्याः निवासः श्रीनिवासः तेनेत्यभिमतं ॥३१॥ आत्मानं मां भवंतं चानुशोचामी

तदेव विशदयति । ब्रह्मादय इति । चतुर्मुखप्रभृतयः अस्याः अपांगमोक्षः । ईषत्तिर्यग्वेशप्रसारस्तद्विषयत्वमात्मानं कामयमानाः वहुतिथं
वहुकालं तपः समचरन् चक्रुः । सा श्रीरपि कमलवनं स्वनिवासं विहाय भगवंतमेव प्रपन्ना च यस्य पादयोः । सौभगं सौंदर्य्यमेवालं नितरां भज
ते सेवते ॥ ३३ ॥ तस्य भगवतः अब्जादीनां केतूनां चिह्नानां केतैराश्रयभूतैः पदैः पादविन्यासैरलंकृतमंगं यस्याः साहं ततः अत एव विभूतिं
लक्ष्मीमप्युपलभ्य त्वयाप्येवं भाग्यं न लब्धं इत्यधिक्षिप्य । विभूतिं सर्वसमृद्धिं प्राप्येति वा । त्रीनपि लोकानत्यरोचे । त्रिलोकीमतिक्रम्य तेजो

ब्रह्मादयो वहुतिथं यदपांगमोक्षकामास्तपः समचरन् भगवत्प्रपन्नाः । सा श्रीः स्ववासमरविंदवनं विहाय यत्पादसौभ
गमलं भजतेऽनुरक्ता ॥ ३३ ॥ तस्याहमब्जकुलिशांकुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलंकृतांगी । त्रीनत्यरोच उप
लभ्य ततो विभूतिं लोकान्स मां व्यसृजदुत्स्मयंतीं तदंते ॥ ३४ ॥ यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानु
दमात्मतंत्रः । त्वां दुःस्थमूनपदमात्मनि पौरुषेण संपादयन्यदुषु रम्यमविभ्रदंगम् ॥ ३५ ॥ ॥ ॥ ॥

प्याधिकं दीप्तिमत्यस्मि । एवमुत्स्मयंतीं गर्वितां मां स भगवान् तदंते अवतारप्रयोजनांते व्यसृजत्तत्याज ॥ ३४ ॥ यो वा इति । ममातीवभार
रूपमसुरवंशेऽसुरसंपद्युक्ते वंशे जातानां राज्ञामक्षौहिणीनां शतमपा॥नुदत् दूरमपनीतवान् तथापि आत्मतंत्रः स्वतंत्रः ऊनपदं न्यूनपदं
पादत्रयं यस्य तमत एव दुःस्थं दुःखितं त्वामात्मनि स्वस्मिन् पौरुषं सामर्थ्यं तेन संपादयन् पादचतुष्टयसंपन्नं कर्तुमिव यदुषु रमणी
यमंगं शरीरमविभ्रद्धृतवान् ॥ ३५ ॥

भा०प्र० यश्च प्रेमपूर्वकावलोकेन रुचिरेण सुंदरेण स्मितेन सुंदरैर्भाषणैश्च मक्षमानिनीनां यादवस्त्रीणां स्थैर्यं इतरावश्यं तं सम्यक् हृतवान् ॥ य
१३० स्याङ्घ्रिभ्यां विटंकितायाः अलंकृतायाः मम रोमोत्सवो रोमोद्गमो बभूव । तस्य पुरुषोत्तमस्य श्रीकृष्णस्य विरहं का वा मादृशी सहेत न का
पीत्यर्थः ॥ ३१ ॥ इत्थं तयोः पृथिवीधर्मयोः कथयतोर्मिथः संभाषमाणयोः सतोः । तदा परीक्षिन्नाम राजर्षिः । प्राचीसरस्वतीं प्रभासतीं
र्थं प्राप्तः गतः ॥ ३२ ॥ इति प्रथमे षोडशः ॥ १६ ॥ तत्रेति । तत्र प्राच्यां सरस्वत्यां पूर्वोक्तमनाथवद्धन्यमानं गोमिथुनं नृपस्येव लांछनानि यस्य

का वा सहेत विरहं पुरुषोत्तमस्य प्रेमावलोकरुचिरस्मितवल्गुजल्पैः ॥ स्थैर्यं समानमहरन्मक्षमानिनीनां रोमोत्सवो म
मयद्यदङ्घ्रिविटंकितायाः ॥ ३१ ॥ सूत उवाच ॥ तयोरेवं कथयतोः पृथिवीधर्मयोस्तदा ॥ परीक्षिन्नाम राजर्षिः प्राप्तः प्राचीं
सरस्वतीं ॥ ३२ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे षोडशोऽध्यायः ॥ १६ ॥ सूत उवाच । तत्र गोमिथुनं राजा हन्यमानमना
नाथवत् ॥ १ ॥ वृषं मृणालधवलं मेहंतमिव बिभ्यतं । वेपमानं पदैकेन सीदंतं शूद्रताडितं ॥ २ ॥ गां च धर्मदुघां दीनां भृशं
शूद्रपदाहतां ॥ विवत्सामश्रुवदनां क्षामां यवसमिच्छतीं ॥ ३ ॥

दंडो हस्तो यस्य तं वृषलं च राजा परीक्षिद्ददर्श ॥ १ ॥ तत्र गोमिथुने
पुमांसं विशिनष्टि ॥ वृषमिति । वृषं मृणालधवलं मेहंतमिव मूत्रं मुंचंतमिव बिभ्यतमुद्विजंतं एकेन पादेन कंपमानं शूद्रेण ताडितमतः
सीदंतं क्लिश्यंतं ॥ २ ॥ स्त्रियं विशिनष्टि गामिति । धर्मदुघां घृतपयोरूपहविर्द्वारेण द्रव्यदोग्ध्रीं शूद्रस्य पादेन ताडितामत एव भृशं दीनां वत्स
रहितामश्रुसहितं वदनं यस्यास्तां क्षामां कृशां यवसं तृणं इच्छतीं कामयमानां च चकार । वृषलं च पप्रच्छेत्यन्वयः ॥ ३ ॥

कार्तस्वराः स्वर्णमयाः परिच्छदाः । परिकरा यस्मिंस्तं रथमारूढः समारोपितं सज्जीकृतं कार्मुकं धनुर्येन स परीक्षिन्मेघगर्जितवद्गंभीरया गिरा ।
गिरा पप्रच्छ ॥४॥ प्रश्नमेवाह । कस्त्वमित्यादि त्रिभिरेकादशभिः । तावद्वृषलं प्रति प्रश्नमाह । द्वाभ्यां । कस्त्वं त्वं कः इति प्रश्नः ॥ किमर्थं पृच्छसीत्यत्राह
अहमेव शरणं रक्षिता यस्य तस्मिन्नस्मिंल्लोके बली सन् त्वमबलान्बलाद्धंस्यतः पृच्छामीति भावः ॥ नृपोऽहमित्यत्राह ॥ नटवद्वेषेण नरदेवो
सि कर्मणा तु द्विजः शूद्रः ॥५॥ गांडीवधन्वनार्जुनेन सह श्रीकृष्णे दूरं स्वलोकं प्रति गते सति त्वमेव शोकार्हो न हीनून्रहसि प्रहरन्वधमर्हसि ॥

पप्रच्छ रथमारूढः कार्तस्वरपरिच्छदं ॥ मेघगंभीरया वाचा समारोपितकार्मुकः ॥४॥ परीक्षिदुवाच ॥ कस्त्वं मच्छरणे लोके ब
लाद्धंस्यबलान्बली ॥ नरदेवोसि वेषेण नटवत्कर्मणाऽद्विजः ॥५॥ कस्त्वं कृष्णे गते दूरं सह गांडीवधन्वना ॥ शोच्योऽस्यशो
च्यान्रहसि प्रहरन्वधमर्हसि ॥६॥ त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन् ॥ वृषरूपेण किं कश्चिद्देवो नः परिखेदयन् ॥
॥७॥ न जातु कौरवेंद्राणां दोर्दंडपरिरंभिते ॥ भूतलेऽनुपतंत्यस्मिन्विना ते प्राणिनां शुचः ॥८॥

अतः शोच्योऽसि स्वजनैरिति शेषः ॥६॥ अथ वृषं पृच्छति ॥ त्वमिति ॥ हे मृणालधवल पादैस्त्रिभिर्न्यूनः पदैकेन चरन् त्वं वा कः ॥ नो
ऽस्मान् वृषरूपेण परिखेदयन् किं वा कश्चिद्देवः ॥७॥ कौरवेंद्राणां दोर्दंडपरिरंभिते आश्लिष्टे पालिते इति यावत् ॥ अस्मिन्भूतले वि
ना ते त्वां विना केषांचिदपि प्राणिनां शुचः शोकाश्रुबिंदवः कदाचिदपि न पतंति ॥८॥

भा० प्र० हेसौरभेयमाशुचः शोकंमाकार्षीः तेतववृषलादस्माच्छूद्राद्भयंव्येतुनश्यतु॥ गांमांब्रवीःसपत्न्याहमेवेति। हेऽम्बत्वंखलानांदुरात्मनांशास्तरि
२३१ दंडधरेमयितिष्ठतिसतित्वंमारोदीः। रोदनंमाकार्षीः तेतवभद्रंसुखमेवभविष्यति॥९॥ हेसाध्वि यस्यराष्ट्रेदुरात्मभिः सर्वाप्रजास्त्रस्यंते वि
भ्यति। असाधुभिरिति करणत्वविवक्षयातृतीयाप्युक्ताऽनेनभीत्रार्थानामित्यपादानत्वं। तस्यमत्तस्यराज्ञः॥ कीर्त्यादयोनश्यंति भगो

मासौरभेयात्रशुचोव्येतुतेवृषलाद्भयं॥ मारोदीरंबभद्रंतेखलानांमयिशास्तरि॥९॥ यस्यराष्ट्रेप्रजाः सर्वास्त्रस्यंतेसा
ध्व्यसाधुभिः॥ तस्यमत्तस्यनश्यंतिकीर्तिरायुर्भगोगतिः॥१०॥ एषराज्ञः परोधर्मोह्यार्तानामार्तिनिग्रहः॥ अतएनंव
धिष्यामिभूतद्रुहमसत्तमं॥११॥ कोऽवृश्चत्तवपादांस्त्रीन्सौरभेयचतुष्पदः॥ माभूवंस्त्वादृशाराष्ट्रेराज्ञांकृष्णानुव
र्तिनां॥१२॥ आख्याहिवृषभद्रंवः साधूनामकृतागसां॥ आत्मवैरूप्यकर्तारंपार्थानांकीर्तिदूषणं॥१३॥

भाग्यंगतिः पुण्यलोकगतिः॥१०॥ आर्तानांदुःखितानामार्तिपरिहारइतियदेषराज्ञांपरउत्कृष्टोधर्मः यतएवमत्तः। भूतद्रोहकारिणः।
मतएवासत्तममेनंवधिष्यामि॥११॥ पुनर्हर्षंउक्त्वाश्वासयति॥ कइति सार्द्धैश्चतुर्भिः॥ हेसौरभेयचतुष्पदः। तवत्रीन्पादान्कोऽवृश्च
दछिनत्कृष्णानुवर्तिनांराज्ञामस्माकंराष्ट्रेत्वादृशादुःखितामाभूवन्नसंतु॥१२॥ हेवृषवः भद्रमेवभविष्यति। किंत्वकृतागसांनिरप
राधिनांसाधूनांयुष्माकमात्मवैरूप्यकारिणंपार्थानांकीर्तिंदूषयतीतितथातमाख्याहि॥१३॥ २३१

यस्त्वनागसि निरपराधे जने द्रोहं युंजन्नास्ते तस्य सर्वतः सर्वत्र मत्तः भयं भविष्यति ॥१४॥ योऽनागःसु जनेषु निरंकुशः । उत्पथः सन्नागस्कृ
द्द्रोहकृद्भवति तस्य साक्षाद् अमर्त्यस्य देवस्यापि अंगदयुक्तं भुजमाहर्तास्मि आहरिष्यमाणोऽस्मि ॥१५॥ स्वधर्मस्थानां पालनमेव राज्ञः परमो धर्मः
कथंभूतस्येह लोकेऽनापद्युत्पथान् दुर्वृत्तानन्यानसाधून् शासतः दंडयतः अनापद्युत्पथानित्यनेनापदि कुर्वंतीति न दोषावहेति सूचि
तं ॥१६॥ एवमुक्तवंतमाह वृषः । एतदिति त्रिभिः ॥ तावद्वचोऽभिनंदति ॥ एतदिति ॥ पांडुवंशजानां युष्माकमेतदार्तानामभयं यस्मात्तद्वचो

जनेऽनागस्यघं युंजन्सर्वतोऽस्य च मद्भयं ॥ साधूनां भद्रमेव स्यादसाधुदमने कृते ॥१५॥ अनागःस्विह भूतेषु य आ
गस्कृन्निरंकुशः ॥ आहर्तास्मि भुजं साक्षादमर्त्यस्यापि सांगदं ।१५। राज्ञो हि परमो धर्मः स्वधर्मस्थानुपालनं । शासतो
न्यान्यथाशास्त्रमनापद्युत्पथानिह ॥१६। धर्म उवाच ॥ एतद्वः पांडवानां युक्तमार्त्ताभयं वचः ॥ येषां गुणगणैः कृष्णो दौ
त्यादौ भगवान्कृतः ।१७। न वयं क्लेशबीजानि यतः स्युः पुरुषर्षभ ॥ पुरुषं तं विजानीमो वाक्यभेदविमोहिताः ॥

युक्तमेव । पांडवेयान्विशिनष्टि । येषां पांडवानां गुणगणैर्हेतुभिर्भगवान् कृष्णो दौत्यादौ कर्मणि कृतः दौत्यादिकर्मार्थं वृत इत्यर्थः
येषामिति कर्तरि षष्ठी यैः कृत इत्यर्थः ॥ एवंविधगुणगणाश्रयाणामेतद्वचो युक्तमेवेति भावः ।१७। कोऽहमस्मि इति यत्पृष्टं तत्रोत्तरमाह
हे पुरुषर्षभ यस्मात्पुंसः क्लेशबीजानि दुःखकारणानि स्युस्तं पुरुषं वयं न जानीमः ॥ तत्र हेतुं वदन्नात्मनो विशिनष्टि । वाक्यभेदविमो
हिताः । क्लेशकारणानि वदतां वाक्यभेदैर्नानाविधवाक्यै
विमोहिताः ॥१८॥

वाक्यभेदानेवदर्शयति । केचिदिति सार्द्धेन । क्लेशकारणवादिनां मध्ये केचिदेवं वैवदंत्येवंविधो विकल्प एव वमनं वसनवल्गिणीत
व्यामोहपादकं येषां तथाभूताः । आत्मनः स्वस्यात्मानमेव क्लेशकारणमाहुः ॥ अन्ये तु दैवमपरे तु कर्म प्राकृतं दुष्कृतं इतरे तु स्वभावं परे
तु प्रभुं । तत्र दैवं जीवादृष्टं । स्वभावः प्रकृतेपरिणामस्वभावः । प्रभुरीश्वरः ॥१८॥ केचित्त्वप्रतर्क्यात्तर्कागोचराद् अनिर्देश्याद् वक्तुमशक्यात्क
स्माच्चित्कारणादित्याहुः । इतीत्थं केष्वपि निश्चयः । नेत्यध्याहारः । यद्वा स्वस्वाभिमानानुसारेणैव निश्चयः । इत्यर्थः । तत्रैवं क्लेशकारणे

केचिद्विकल्पवसना आहुरात्मानमात्मनः ॥ दैवमन्ये परे कर्म स्वभावमपरे प्रभुं ॥१९॥ अप्रतर्क्यादनिर्देश्यादि
ति केष्वपि निश्चयः ॥ अत्रानुरूपं राजर्षे विमृश स्वमनीषया ॥२०॥ सूत उवाच । एवं धर्मे प्रवदति स सम्राड्द्विज
सत्तम ॥ समाहितेन मनसा विखेदः पर्यचष्ट तं ॥२१॥

तु विकल्पेषु हे राजर्षे यदनुरूपं प्रकृतक्लेशानुगुणं तत्स्वमनीषया स्वस्यया धिया विमृश स्वविचारय ॥२०॥ इत्थं धर्मे प्रवदति सा-
ति । हे द्विजसत्तमाः ॥ सम्राट् सार्वभौमः । परीक्षित् विगतखेदः ॥ समाहितेन मनसा तं धर्मस्याभिप्रायं प्रत्याचष्ट । चष्टिर्दर्शनेपि
वर्तते ॥ दृष्टवालोच्य निर्णीतवानित्यर्थः ॥२१॥

निर्णीतमेव तदभिप्रायं प्रत्याह । धर्ममित्यादिभिः षड्भिः ॥ तत्र क्लेशवीजावहे पुरुषे संनिहितेपि यदुक्तं क्लेशवीजानि यतः स्युस्तं पुरुषं
नजानीमइति तत्रत्तदभिप्रायं निर्णीतमाह ॥ धर्ममिति । हे धर्मज्ञ साक्षात्त्वं वृषरूपधृक् धर्म एवासि । अत एवापद्यपि पुरुषं तं न विजानी
मइति धर्ममेव ब्रवीषि । अधर्मकारिणि पुरुषे संनिहिते यद्धर्मसूचकं वचस्तद्धर्ममेवेत्यर्थः । कुतः । यद्यस्मादधर्मकृतोऽधर्मकारिणः
स्थानं प्राप्यं स्थानं यत्सूचकस्यापि धर्मसूचकस्यापि तत्स्थानं भवेत्पतिति तत्पतितः स्युक्तो पतिष्यतीति शास्त्रादितिभावः ॥ २२ ॥ अथ
विद्वान्सम्मनीषये निर्यदुक्तं तदभिप्रायमाह । अथवेति । देवमायया ईश्वरसंकल्पस्य मायायाश्च पुनं ज्ञानं इति ज्ञानं पर्यायोत्र माया शब्दः मा
परीक्षित्उवाच ॥ धर्मं ब्रवीषि धर्मज्ञ धर्मोसि वृषरूपधृक् ॥ यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत् ॥ २२ ॥ अथवा देव
मायाया नूनं गतिरगोचरा ॥ चेतसो वचसश्चापि भूतानामिति निश्चयः ॥ २३ ॥ तपः शौचं दया सत्यमिति पादाः प्रकी
र्तिताः ॥ अधर्मांशैस्त्रयो भग्नाः स्मयसंगमदैस्तव ॥ २४ ॥
यया सततं वेच्मि प्राणिनां च शुभाशुभमिति प्रयोगाच्च । गतिर्भूतानां चेतसो
वचसश्चागोचरी अविषयमूते तिवा निश्चयः ॥ नजानीमइति विमृश्य स्वतिचवदता तया पापकृदिति सूचनमधर्म ईश्वरसंकल्पश्च वादर्शि
तमित्यर्थः ॥ २३ ॥ धर्मोसीत्येनेन त्वं साक्षाद्धर्माधिदेवता एवेत्युक्तं । यत एव मत एव तव पादा अपि न लौकिकवृषभपादसजातीया अपि तु
विशिष्टा एवेति वदंस्तद्यंजकान् दर्शयति । तप इति । धर्माधिदेवस्य तव पादास्तपआदयश्चत्वारः प्रकीर्तिताः । तत्र त्रयः पादाः अधर्म
स्यांशैः त्रिभिः स्मयादिभिर्भग्नाः । तत्र स्वस्मिन्नुत्कर्षधीः स्मयः सच तपोनाशहेतुः । संगः शौचविरोधी मदो दयाविरोधी चित्तविकारः विवे

भा॰प्र॰ अधर्मस्य फलं तद्विकीर्षितं च निश्चित्याह इदानीमिति । हे धर्म यत्तव तुरीयं पादं सत्यं तद्यतो निवर्तयेत् । यस्माद्धेतोर्निष्पाद्येत तद्दिदा

१३३ नीमनृतेनैधितः प्रवृत्तो यमधर्मरूपः कलिर्जिघृक्षति गृहीतुमिच्छति । तपश्चादीनां क्रमेण निवर्तकाः स्मयसंगमदानृतानाम भावाः

सत्यपि हि तपश्चादीनि स्मयादिभिर्व्यज्यंते । २५ । अथ गां तत्क्लेशहेतुं च निश्चित्याह । इयमिति द्वाभ्यां इयं गौः सा साध्वी पृथ्वी भगवता

श्रीकृष्णेन न्यासितोपनीतः । उरुभरो यस्याः सा तथाभूता श्रीमद्भिः श्रा दिचिन्हैः श्री शोभा येषामस्तीति तैस्तस्य भगवतः पादन्यासैः

इदानीं धर्म पादस्ते सत्यं निर्वर्तयेद्यतः ॥ तं जिघृक्षत्यधर्मोयमनृतेनैधितः कलिः ॥ २५ ॥ इयं च भूर्भगवता न्या

सितोरुभरा सती ॥ श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका ॥ २६ ॥ शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिता धना

अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यंति मामिति ॥ २७ ॥ सूत उवाच ॥ इति धर्मं महीं चैव सांत्वयित्वा महारथः ॥ निशात

मादद खड्गं कलयेऽधर्महेतवे ॥ २८ ॥ तं जिघांसुमभिप्रेत्य विहाय नृपलांछनं ॥ तत्पादमूलं शिरसा समगाद्भयविह्वलः

॥ २९ ॥

सर्वत्र कृतं कौतुकं उत्सवो यस्याः सा बभूव । २६ । अधुना तु भगवतोज्झिता सती सा साध्वी भूः तत एव भाग्यहीनेवाब्रह्म

ण्या ब्रह्मकुलासाधवः । नृपव्याजा नृपवेषमात्रधराः शूद्रा मां भोक्ष्यंतीति हेतोरश्रूणां कला बिंदवो यस्यास्तथाभूता शोचति । २७ ।

इतीत्थं धर्मं महीं च सांत्वयित्वा महारथः परीक्षिदधर्महेतवे कलये तद्वधार्थं निशातं तीक्ष्णं खड्गं प्राददे उद्धृतवान् ॥ २८ । तं परीक्षितं

जिघांसुं हंतुमिच्छुमभिप्रेत्यालक्ष्य कलिर्नृपलांछनानि किरीटादीनि विहायापनीय भयेन विह्वलगात्रः शिरसा तस्य परीक्षितः पा १३३

पादयोः पतितं कलिं वीरो दीनवत्सलः ॥ शरण्यमर्हः शरण्यः श्लोक्यः प्रशस्यो राजा कृपया नावधीत् न हतवान् ॥ किंतु हसन्निवेदंवच
माह ॥ ३० ॥ तदेवाह ॥ नेत्यादिभिश्चतुर्भिः ॥ गुडाकेशयशोधराणां मर्जुनकीर्तिवर्द्धनानां ॥ अस्माकं संनिधाविति शेषः ॥ बद्धांजलेस्तेत
व किंचिदपि भयं नास्ति ॥ किमस्मदीये क्षेत्रे कथंचन भवता न वर्तितव्यं ॥ कुतः यतस्त्वमधर्मस्य बंधुः ॥ ३१ ॥ तदेव प्रपंचयति
त्वामिति ॥ नरदेवानां देहेषु वर्तमानं त्वामनुसृत्य यमधर्मसमुदायः कोसावधर्मपूगस्तत्राह ॥ लोभ इति ॥ अनार्य्यं शाठ्यमंहः ॥ पा

पतितं पादयोर्वीरः कृपया दीनवत्सलः ॥ शरण्यो नावधीच्छ्लोक्य आह चेदं हसन्निव ॥ ३० ॥ परीक्षिदुवाच ॥ न
ते गुडाकेशयशोधराणां बद्धांजलेर्वै भयमस्ति किंचित् ॥ न वर्तितव्यं भवता कथंचन क्षेत्रे मदीये त्वमधर्मबं
धुः ॥ ३१ ॥ त्वां वर्तमानं नरदेवदेहेष्वनुप्रवृत्तोयमधर्मपूगः ॥ लोभोनृतं चौर्य्यमनार्य्यमंहो ज्येष्ठा च माया कलह
श्च दंभः ॥ ३२ ॥ न वर्तितव्यं तदधर्मबंधो धर्मेण सत्येन च वर्तितव्ये ॥ ब्रह्मावर्ते यत्र यजंति यज्ञैर्यज्ञेश्वरं यज्ञवितान
विज्ञाः ॥ ३३ ॥

पं ज्येष्ठाः लक्ष्मीः ॥ मायाकरणकार्यं रागद्वेषादिकं अपकृष्टो वाद दंभो वंचनं ॥ ३२ ॥ तत्तस्मादेऽधर्मबंधो धर्मेण सत्येन च व
र्तितव्येऽस्मिन् ब्रह्मावर्ते क्षेत्रे त्वया न वर्तितव्यं ॥ सरस्वती दृषद्वत्योर्देवनद्योर्यदंतरं तद्ब्रह्मावर्तं तथा यत्र यज्ञवितानविज्ञाः ॥ यज्ञानुष्ठा
नकोविदाः ॥ यज्ञैर्यज्ञेश्वरं परमपुरुषमाराधयंति तत्र ब्रह्मावर्ते न वर्तितव्यं भवते त्यर्थः ॥ ३३ ॥ ॥ ॥ ॥ ॥ ॥

भा०प्र०
१३५

सइति । सउक्तविधप्रभाव एष परीक्षिदेतर्ह्यधुनाऽनतिकाले विप्रकृष्टकाले वनं विविक्षिता प्रवेष्टुमिच्छता पितामहेन राज्ञा युधिष्ठिरे
णोपन्यस्तं प्रदत्तं पार्थिवसार्वभौमस्यौचितं सिंहासनमध्यास्ते । वर्तमानसामीप्ये वर्तमानवद्वेति भूते लट् ॥ ४३ । कौरवश्रेष्ठः श्रिया
सार्वभौमश्रियोऽत्रसत्प्रकाशमानो विपुलकीर्तिश्चक्रवर्ती चक्रभूमंडलं वर्तयति पालयतीति तथाभूतः राजर्षिर्महाराजः परीक्षि
द्गजाह्वये पुरेऽधुना वर्तमानसन्निकृष्टभूतकालेऽआस्तेऽआस्त ॥ ४४ । न केवलमुक्त एव तस्य प्रभावः । किं त्वित्थंभूतान्येव प्रभावाय ।

स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितं ॥ पितामहेनोपन्यस्तं राज्ञारण्यं विविक्षता । ४३ । आस्तेऽधुना स राजर्षिः
कौरवेंद्रश्रियोल्लसन् ॥ गजाह्वये महाभागश्चक्रवर्ती बृहच्छ्रवाः । ४४ । इत्थंभूतानुभावोयमभिमन्युसुतो नृ
पः । यस्य पालयतः क्षौणीं यूयं सत्राय दीक्षिताः ॥ ४५ । इति श्रीभागवते महापुराणे प्रथमस्कंधे सप्तदशोऽध्यायः ॥ १७ ॥
सूत उवाच । यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः । अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः ॥ १ ॥

स्य तथाभूतो यमभि
मन्योः सुतो नृपः परीक्षित् । अतएवाधुना तस्याभावेपि तद्भयात्कलेरत्र देशप्रवेशाभावादेव भवतामिदं सर्वत्र प्रवर्तत इत्याह । यस्येति
यस्य परीक्षितः क्षौणीं पालयतः । अत्रापि वर्तमानसामीप्ये भूते लटः शत्रादेशः पालितवतः सतः अपनीतेपि घनसारे तत्पेटिकायां त
द्वासनानुवृत्तिवत्तदा चक्रानुवृत्तेरेव हेतोर्यूयं सत्राय कृतसंकल्पा वर्तते अन्यथा कलिनाभिभूतं सत्रमिदं नाप्रावर्तते त्यर्थः ॥ ४५ । इति
प्रथमे सप्तदशः ॥ १७ ॥ अथैतत्स्कंधेऽपि पृच्छिषामु बोधयितुं पारीक्षितमवशिष्टं वृत्तांतं समासतो वदन्नुपसंहरति यइति दशभिः योवैय

रीक्षिन्मातुरुदरे द्रौण्यस्त्रेण विप्लुष्टो दग्धोऽप्यद्भुतकर्म
णः कृष्णस्य भगवतोऽनुग्रहान्न मृतः ॥ १ ॥
१३५

यश्च ब्रह्मकोपेन ब्रह्मशापात्मकेन उत्थितात्समुपस्थितात्प्राणानां विप्लवो नाशो यस्मात् उरुभयं यस्मात्तत्तक्षकान्न संमुमोह न प्राप्तः ना।
विभेदित्यर्थः। कथंभूतः॥ भगवत्येवार्पितः आशयोंतःकरणं येन तथाभूतः सन्॥२॥ स राजा सर्वतः सर्वत्र देहतदनुबंध्यादिषु संग
मुत्सृज्य वैयासकेः शुकस्य शिष्यो भूत्वा विज्ञातेऽजिते भगवति संस्थितिर्निष्ठा यस्य सः॥ स्वकलेवरं गंगायां जहौ तत्याज मोहाभा
वमेव सहेतुकमुपपादयति। नेति। उत्तमस्य भगवतो वार्ता येषां न भयं मोहो वास्तीत्यर्थः॥ किमुत उत्तमश्लोकस्य कथामृतं जुष

ब्रह्मकोपोत्थिताद्यस्तु तक्षकात्प्राणविप्लवात्॥ न संमुमोहोरुभयाद्भगवत्यर्पिताशयः॥२॥ उत्सृज्य सर्वतः
संगं विज्ञाताजितसंस्थितिः। वैयासकेर्जहौ शिष्यो गंगायां स्वकलेवरं॥३॥ नोत्तमश्लोकवार्तानां जुषतां तत्कथा
मृतं। स्यात्संभ्रमोऽतकालेपि स्मरतां तत्पदांबुजं॥४॥ तावत्कलिर्न प्रभवेत्प्रविष्टोपीह सर्वतः। यावदीशो महानु
र्व्यामाभिमन्यव एकराट्। ५। यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गां॥ तदैवेहानुवृत्तोसावधर्मप्रभवः कलिः

तां सेवमानानां तत्पदांबुजं स्मरतां अंतकालेपि संभ्रम एव स्यात्॥४॥ सिंहावलोकनन्यायेन यस्य पालयतः ह्रोली मित्यनेनाभिप्रेतं
उपपादयति॥ तावदिति॥ इह लोके सर्वत्र प्रविष्टोपि कलिर्यावदुर्व्यामभिमन्युसुत एकराट् स्वतुल्यराजांतररहित ईश्वरो क्षिपतिर्बे
भूव तदाज्ञा वाध्यावदनुवृत्ता बभूव तावत्कलिर्न प्रभवेन्न समर्थो बभूव॥५॥ कदा प्रविष्ट इत्यत्राह॥ यस्मिन्नहनि यर्ह्येव क्षणे भगवा
न् कृष्णो गां भूमिमुत्ससर्ज तत्याज तस्मिन्नेवाहनि क्षणे चासावधर्मप्रभवः। कलिरनुप्रवृत्तः। प्रविष्टो बभूव॥६॥ ॥

भा० प्र० १ ननु कलिं कुतो न हतवानित्यत्राह । नेति सम्राट् सार्वभौमः । परीक्षित् कलिं नानुद्वेष्टि तन्मारणपर्यंतं द्वेषं न कृतवानित्यर्थः । वर्तमानसामीप्ये ल

१३६ ट् । कुतः यतः सारंग इव भृंगवत्सारभुक् सारानुभविता सारग्राहीति यावत् ॥ सारंगो यथा कमलगतं सारं मकरंदं गृह्णाति न तु तन्नाशयति

तद्वत्कलिगतसारग्राहित्वान्न तं जघानेत्यर्थः । कोऽसौ तद्गतसारः । यद्विधयत्युक्तं नानुद्वेष्टीत्यत्राह । कुशलानीति । यद्यस्मिन् कलौ कृतानि

भगवन्नामकीर्तनादिरूपाणि पुण्यकर्माण्याशु सिध्यंति । भगवत्प्राप्तिमावहंति ॥ इतराण्यकुशलकर्माणि पापानीति यावत् ॥ तान्याशु

नानुद्वेष्टि कलिं सम्राट् सारंग इव सारभुक् ॥ कुशलान्याशु सिध्यंति नेतराणि कृतानि यत् ॥७॥ किं नु बालेषु शूरेण कलि

ना धीरभीरुणा ॥ अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्तते ॥८॥ उपवर्णितमेतद्वः पुण्यं पारीक्षितं मया ॥ वासुदेव।

कथोपेतमाख्यानं यदपृच्छत ॥९॥

न सिध्यंति ॥ न फलदानि भवंति । एतत्सारंगं नानुद्वेष्यने नकृतादियुगेषु कुशलानां चिरेण फलदत्वमितरेषां त्वाश्विति सूचितं ॥७॥ ननु क

लिनाभिभूतैर्जनैः ॥ कुशलानि न कृतान्येव स्युः ॥ ये नाशु सिध्येयुरित्यत्राह ॥ किं न्विति बालेषु विषयाभूतेषु शूरेण धीरेषु विवेकिषु तु भी

रुणा कलिना किं नु कृतं स्यान्न कोऽप्यनर्थः कृतः स्यादित्यर्थः ॥ तदेव दृष्टांतेन दर्शयन् विशिनष्टि ॥ यः कलिरवीषु वृक इवाप्रमत्ते तेषे

व जनेषु सत्तो वर्तते ॥८॥ यद्यूयं मां पृच्छथ । तदेतद्वासुदेवस्य कथोपेतमतएव शृण्वतां वदतां च पुण्यावहमेतत्पारीक्षितसंबंधाख्यानं । १३६

पिपृच्छिषासु बोधयितुं एवंसाकल्येनैभगकथानांश्रोतव्यतामाह॥ याइति। कथनीयान्युरूणि बहूनि कर्माणि चेष्टितानि यस्य तस्य भगवतो
गुणाः कर्माणि चाश्रया विषया यासां ताः। कथास्ता मुमुक्षुभिः। पुंभिः। संसेव्याः॥१०॥ तत्कृष्णज्ञानलिप्सुः पृच्छति शौनकः सूतेति सत्रिभिः। ताव
कृत्स्नमरणोद्यनंतदुःखावहदुःसहसंहृतिहत्पण्डाणातिशयानंदरूपपरब्रह्मप्राप्तिहेतुं तत्कथामृतं पाययंतं महोपकारित्वं सूतमा
शास्ते॥ सूतेति। हे सूत हे सौम्य त्वं शाश्वतीः समाः। वत्सरान् जीव। कालाध्वनोरत्यंतसंयोग इति द्वितीया॥ कुत एवमाशास्त इत्यत्र तं विशिनष्टि
× यदुकृष्णस्य यद्वतः संगं विज्ञाताजित संस्थितिः वैयासके जैहे शिष्यः शुकोपदिष्टे तत्पुराणे ज्ञानेन मुक्तो बभूवेति तद्ध्यैयासकेरुपदिष्टं पुण्यश्रवणद्वारा॥३॥

यायाः कथाभगवतः कथनीयोरुकर्मणः॥ गुणकर्माश्रयाः पुंभिः संसेव्यास्ता मुमुक्षुभिः॥१०॥ शौनक उवाच॥ सूत
त जीव समाः सौम्य शाश्वती विशदं यशः॥ यस्त्वं शंससि कृष्णस्य मर्त्यानाममृतं हि नः॥११॥ कर्मण्यस्मिन्ननाश्वासे धू
मधूम्रात्मनां भवान्॥ आपाययति गोविंदपादपद्मासवं मधु॥१२॥

यस्त्वं कृष्णस्य विपुलं विषदममृततुल्यं यशो मर्त्यानां नोऽस्मभ्यं शंससि कथयसि॥ अतो हर्षाभिशयादाशास्त इति भावः॥११॥ तदेव व्यन
क्ति कर्माणीति॥ अनाश्वासेऽविश्वसनीये निर्भये निर्भयत्वनिमित्तेऽस्मिन् यज्ञादिकर्मणि निष्ठानामिति शेषः॥ धूमधूम्रात्मनामज्ञाना
वृतमनसां॥ यद्वा॥ धूमेन यज्ञीयेन धूम्र आत्मा शरीरं येषां केवलकर्मजडानामिति भावः॥ भवान् गोविंदस्य पादपद्मयोरासवममृतं म
धुमधुरं पाययति॥१२॥

भा०प्र० यत एवमत एव स्वर्गमोक्षादयोऽपि न भगवत्संगिसंगलेशेनापि तुल्या इत्यभिप्रायेणाहुः। तुलयामेति। भगवत्संगिनः। त्वादृशस्य यः संगः त
१३७ स्य लवेन लेशमात्रेणापि स्वर्गमपुनर्भवं मोक्षं चापि न तुलयाम न तुल्यं मन्यामहे इत्यर्थः। यतस्तेन स्वर्गमोक्षावेव न तुलयाम। किंपुनर्म
र्त्यानामाशिषोऽर्थकामादीन्न तुलयामेति। १३। न च श्रुतभगवद्गुणकर्म वक्तिं इच्छसि। तत्राह। क इति। महत्तमानामेकांतं परमुख्यं परा
यनं प्राप्यः। प्रापकश्चाधारश्च ईयतेऽस्मिन्नयनं। ईयंत्यनेनेत्ययनं। ईयंत्यस्मिन्निति त्रिधा व्युत्पन्नानामयनशब्दानां तंत्रेण निर्देशात्तस्य भ

तुलयाम लवेनापि न स्वर्गं नापुनर्भवं। भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः। १३। को नाम तृप्येद्रसवित्कथायां म
हत्तमैकांतपरायणस्य। नांतं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः। १४। तन्नो भवान्वै भगवत्प्रधा
नो महत्तमैकांतपरायणस्य। हरेरुदारं चरितं विशुद्धं शुश्रूषतां नो वितनोतु विद्वन्। १५।

गवतः कथायां विषयभूता
यां रसज्ञश्चेत्को नाम पुमान् न तृप्येत न कोपीत्यर्थः। ननु श्रुतानामेव भगवद्गुणानां कर्मणां पुनः श्रवणेन को वा रसो निष्पद्यते इत्याशं
कां निराकुर्वन् भगवंतं विशिनष्टि। यस्य गुणस्य हेयगुणरहितस्व गुणानामंतमवधिं रुद्रचतुर्मुखादयो योगेश्वरा अपि न जग्मुः। श्रु
तानामपि गुणकर्मणामानंत्यात् श्रुतानामपि नास्वादयमानानां न कोपि तृप्येदिति भावः। १४। यत एवमतो महत्तमैकांतपरायणस्य १३७
हरेरुदारं विपुलमाचरितं चेष्टितं विशुद्धं शृण्वतां वदतां च विशुद्धावहं भगवानेव प्रधानो मुख्यः श्रेयो यस्य स भगवान् हे विद्वन् भगव
द्गुणस्य हरेरुदारास्यामिज्ञ श्रोतुमिच्छतां नोऽस्माकं वितनोतु विस्तारयतु इति यावत्। १५।

भा. र.

॥१७४॥

एवंप्रकृतिविलक्षणेन तत्संसरणे आत्मस्वरूपे कार्यकारणभावेनावस्थिते प्रकृतिस्वरूपे चाभिहिते येन तयोरेव संसरणयोः प्रकृतिपु
रुषयोः कार्यावस्थाः शुश्रूषतीः पृच्छति देवहूतिरिहे पुरुषोत्तम प्रकृतेः कार्यावस्था प्रधानस्य तथा पुरुषस्यापि कार्यावस्थस्य ब्रह्मा
त्मकस्य ॥ कथंभूतयोरस्य जगतः कारयोः ॥ कार्यावस्थायाः पूर्वं कृत्स्नजगत्कारणत्वेन नामरूपविभागानर्हसूक्ष्मदशापन्नस्याभ
गवच्छरीरत्वेनावस्थितयोः लक्षणं स्वरूपं ब्रूहि ॥ ब्रह्मात्मकयोः प्रकृतिपुरुषयोः कार्यभेदान्वययेत्यर्थः ॥ सदसच्चयदात्म
कारणान्नताः पितावहयः ॥ कथंभूताः पुत्रादय स्वयं प्रकृतिपुरुषात्मकनयोर्लक्षणं ब्रूहीत्यर्थः ॥ नहि केवलप्रकृतेः ॥ केव

देवहूतिरुवाच ॥ प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम ॥ ब्रूहि कारणयोरस्य सदसच्च यदात्मकम् ॥ ९ ॥
कपिल उवाच ॥ यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् ॥ प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ॥ १० ॥

लात्मकस्वरूपस्य चापि न्युत्तत्वात् ॥ अतउभयात्मकतु सदसदिति चिदचित्समुदायरूपविश्वं चाविवक्षितम् ॥ ९ ॥ एवं प्र
श्ने ब्रह्मात्मप्रकृतिपुरुषकार्यावस्थाः सप्रपंचमुपपादयिष्यन्नादौ प्रकृतेः कारणावस्था कार्यावस्था च संग्रहेणाह ॥ यदि
ति यत्प्रधानं तदेव प्रकृतिं प्राहुरित्यन्वयः किं तत्प्रधानमविशेषं कारणावस्थायां पृथिव्यादिविशेषकारणावस्थायाः ॥ पृथिव्या
दिविशेषरहितमत एवाव्यक्तं नामरूपविभागानर्हं त्रिगुणं सत्वादिगुणात्मकं इत्यनेन जीवपरमात्मवैलक्षण्यमुक्तं ॥ नि ॥१७४॥
त्यमित्यनेन महदाद्यवस्थानामनित्यत्वेमवस्थावतो द्रव्यमनित्यत्वमुक्तं एवं प्रकृतेः कारणावस्थोक्ता ॥ कार्यावस्थामाह विशेषा

तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिरिति अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधं विविधाश्च
पृथक्चेष्टा दैवं चैवात्र पंचमं इति ॥ दैवमीश्वरः अधिष्ठानादिदैवपर्यंतसापेक्षत्वेसत्यात्मनः कर्तृत्वे य आत्मानमेव केवलं कर्त्तारं म
न्यते स पश्यतीत्यर्थः अतः कर्त्रधिकरणे पुरुषस्याधिष्ठेयभूतस्वशरीराधिष्ठातृत्वरूपकर्तृत्वमुच्यते प्रकृतेः क्रियमाणानीत्यादौ
तु सांसारिकव्यापाराश्रयत्वरूपकर्तृत्वं प्रकृतिसंसर्गकृतं न स्वरूपप्रयुक्तमित्युच्यते इत्यतो न तदधिकरणे विरोध इति ॥ अलम
तिविस्तरेण ॥ ७ ॥ एवं दैवसांसारिकवृत्तिषु कर्तृत्वं प्रकृतिसंसर्गकृतमिति विशदयन् सांसारिकप्रवृत्तिष्वपि स्वशरीराधिष्ठातृत्वरू
पकर्तृत्वाश्रयत्वात्मनि फलसुखदुःखाश्रयत्वमात्मन एवेत्याह ॥ कार्येति ॥ कार्यं शरीरं कारणानि समनस्कानीन्द्रियाणि तेषां कर्तृ

कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परं ८

त्वे वहिर्गमनागमनादिक्रियाकारित्वे प्रकृतिं पुरुषाधिष्ठितां शरीराकारेण परिणतां प्रकृतिं कारणं हेतुं विदुः पुरुषाधिष्ठितशरीराका
रपरिणतप्रकृत्याश्रया भोगसाधनभूताः क्रिया इत्यर्थः पुरुषस्य स्वाधिष्ठातृत्वमेव तदपेक्षया धिकं कर्त्ता शास्त्रार्थवत्वादित्यादिषु
कं शरीराधिष्ठानरूपं प्रयत्नहेतुत्वमेव हि पुरुषस्य कर्तृत्वं ॥ अत एव सुखदुःखानां पुरुषाधिष्ठानशरीराकारपरिणतप्रकृतिहे
तुकव्यापारजन्यसुखदुःखानां भोक्तृत्वे प्रकृतेः शरीरात्परं तदधिष्ठातारं पुरुषमात्मानं कारणं विदुः स्वशरीराधिष्ठानप्रयत्ना
श्रयत्वात्तदधिष्ठेयहेतुकक्रियाफलसुखदुःखाश्रयमित्यर्थः ॥ ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भा.टी.

॥१०३॥

यते॥ तथाहि कवच्चीपुमजायते म्रियते इत्यादिना जन्मजरामरणादिकं सर्वं प्रकृतिधर्मं प्रतिषिध्य हननादिषु क्रियासु कर्त्तृत्वमतिषिध्यते
हंता चेन्मन्यते हंतुं हतश्चेन्मन्यते हतं ते॥ उभौ तौ न विजानीतो नायं हंति न हन्यते इति हंतारमात्मानं जानात्यात्मानमीत्यर्थः॥ तथा च भगवता
स्वयमेव॥ जीवस्याकर्त्तृस्वरूपं कर्त्तृत्वमभिमानं तु व्यामोह इत्युच्यते॥ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः॥ अहंकारविमूढा
त्मा कर्त्ताहमिति मन्यते नान्यं गुणेभ्यः कर्त्तारं यदा द्रष्टानुपश्यति॥ कार्यकारणकर्त्तृत्वे हेतुः प्रकृतिरुच्यते पुरुषः सुखदुःखानां भोक्तृत्वे
हेतुरुच्यते इति॥ अतः पुरुषस्य भोक्तृत्वमेव प्रकृतेरेव कर्त्तृत्वं॥ एवं कृत्वा शास्त्रार्थवत्वादिसूत्राधिकरणविरोधः तत्रात्मैव कर्त्ता न
गुणा इत्युच्यते॥ तथाहि॥ यजेत स्वर्गकामः मुमुक्षुर्ब्रह्मोपासीतेत्येवमादीनि॥ शास्त्राणि स्वर्गमोक्षादिफलस्य भोक्तारमेव कर्त्तृत्वे
नियुंजते॥ न ह्यचेतनस्य कर्त्तृत्वेऽसौ नियम्यते शासनाच्च शास्त्रं शासनं च प्रवर्त्तनं शास्त्रस्य प्रवर्त्तकत्वं बोधजननद्वारेण अ
चेतनं च प्रधानं न बोधयितुं शक्यं॥ अतः शास्त्राणामर्थवत्वं भोक्तुश्चेतनस्यैव कर्त्तृत्वे भवेत्॥ न तु कृत्स्नं शास्त्रफलं प्रयोक्तरीति कथमयं
विरोधः परिहरणीय इति चेदत्रोच्यते॥ कर्त्रधिकरणे हि शारीराधिष्ठानत्वमात्मन एवोच्यते॥ हंता चेदित्यात्मनो नित्यत्वाद्धननाद्यभाव
उक्तः प्रकृतेः क्रियमाणानीति गीतायां च सांसारिकप्रवृत्तिषु जीवस्य कर्त्तृत्वान्वयव्यतिरेकाभ्यां सत्वरजस्तमोगुणसंसर्गकृतान स्वरूप
प्रयुक्तो निर्गुणानामेव कर्त्तृत्वं इत्युच्यते न हि सांसारिकप्रवृत्तिषु कर्त्तृत्वं गुणसंसर्गकृतमित्येतावन्मात्रकथनेन स्वतः कृत्स्नस्य यत्स्वरू
पकर्त्तृत्वं प्रतिषिध्यते॥ तथा च तत्रैव कारणं गुणसंगोऽस्य सदसद्योनिजन्मसु इति सांसारिकप्रवृत्तिषु कर्त्तृत्वं गुणसंसर्गकृतमित्य ॥१०३॥
भिहितं न त्वेव चात्मनः॥ कर्त्तृत्वमभ्युपेत्य उच्यते शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः

तस्य आत्मायोगात्तेन भ्रस्वरूपप्रकाशतिरोधानस्वरूपनाशप्रसंगेः॥ मैवं न स्वरूपभूतज्ञानस्य तिरोधानमुच्यते॥ अपि तु धर्मभूतज्ञानस्यैव ननु धर्मभू
तज्ञानस्याधिवा तिरोधानमशक्यमाश्रयणीयं तिरोधानं च कर्मरूपाविद्यायाः प्रकाशोमसंप्रतिबंधो वा विद्यमानप्रकाशनिवृत्तिर्वेति कोटिद्वय
मेवद्विसंभावितम् उभयथापि पिनिवेनाभिमतधर्मभूतज्ञानस्यापि विनाशप्रसंगइति चेदुच्यते॥ आत्मधर्मभूतस्य चैतन्यस्य स्वाभाविकस्या
पि कर्मणापारमार्थिकं संकोचं विकासं चाभ्युपगच्छामः तत्र देवादिशरीरमात्माधिष्ठानस्फुरणमपेक्षात्वाद्धर्मिस्वरूपं स्वयंप्रकाशरूपमधिष्ठान
तया स्फुरति नात्र ज्ञानांतरापेक्षा जडत्वात्॥ जडत्वाद्विषयत्वाद्देहज्ञानांतरापेक्षा एवं धर्मिस्वरूपानश्रमविरोधिनो नित्यत्वाणुत्वाद्याकाराः तेज्ञा
नांतराद्येयो इति तिरोधानाद्रूमडपपद्यंते निधाने च प्रकाशश्च न ज्ञानस्वरूपमेपि तु प्रसुराख्यो धर्मभूतज्ञानस्य तस्य धर्मः प्रकाशः प्रका
शरूपता भावसंकोचः भावस्यैवाभावसंकोचः भावस्यैवाभावात्संकोचाभावः प्रसरः सएव तिरोधाननिंद इति न निंद्यतिः न च त्रिः न च तद्दाश्र
मः एवं च सति ज्ञानं धर्मिस्वरूपं च नित्यं ज्ञानधर्मभूतस्यैव प्रकाशत्वात्तद्भावस्य संकोचत्वात्प्रसराख्यप्रकाशनिवृत्तिः रूपा तिरोधानमुप
पद्यते॥ निर्विशेषप्रकाशरूपात्मवादे तु प्रकाशस्य वात्मरूपत्वात्तद्भावस्य संकोचत्वात्प्रसराख्यप्रकाशनिवृत्तिरूपतिरोधानमुपपद्यते नि॥
र्विशेषप्रकाशरूपात्मतत्र धर्मांतरानभ्युपगमात्तिरोधाने स्वरूपनाशो दुःपरिहरः न च तत्तानस्या ज्ञानं तराश्रयत्वं न दृष्टमिति चेत्तत्किंआश्र
इत स्मृत्यानाद्युः ज्ञानस्य कस्य चिद्धर्मत्वे नैवदृष्टत्वात्तस्य स्वतंत्रवस्तुत्वमनुपपन्नमनोज्ञानरूप आत्मा कस्य चिद्धर्मः स्यात् स्मृत्या चेत्तन्नैव ज्ञानस्य ज्ञा
नाश्रयत्वमपि प्रतिपाद्यते॥ तथा च श्रुतिः कर्ता बोधो विज्ञानात्मेति॥ नन्वत्र प्रकृतेः पुमान् कर्म सु क्रियमाणेपु गुणै रात्मनि मम्यतइत्यनेन स्वय
मकं॥ वेसन् प्रमगात्माः चेतनानां गुणानां कर्तृत्वमात्मन्यध्यवस्यतीत्य वगमनेयुक्तं चेन्नरात्मनो ह्य कर्तृत्वगुणानामेव कर्तृत्वं मध्यात्मशास्त्रेषु श्रू

भा.टी. प्रकृतेर्गुणैः कर्म्मसु क्रियमाणेषु तत्तानि कर्म्माणि आत्मनि मन्यते तानि स्वकर्तृकाणीति मन्यत इत्यर्थः सांसारिकप्रवृत्तिष्वस्य कर्तृता सत्वरजस्त
॥१७२॥ मोगुणसंसर्गकृता न स्वरूपप्रयुक्तेति भावः ॥ ६ ॥ तत्र सत्वरजस्तमोगुणसंसर्गकृतात्कर्तृत्वादस्य जीवस्य संसृतिर्बंधः संसाररूपो बंधः
तत्तत्कर्तृत्वप्रयुक्तमेव पारतंत्र्यं कर्मवश्यत्वं च भवति न तु स्वरूपप्रयुक्तमिति भावः स्वरूपप्रयुक्तत्वाभावमेव विशदयितुं तस्य मुक्ता
वस्थामवस्थितं प्रकृतिवियुक्तं स्वरूपं विशिनष्टि अकर्तुरिति न तत्र पन्नाश्रयत्वं निषेध्यते किंतु गमनादिसांसारिकप्रवृत्तिरहितस्येत्य
र्थः ॥ तत्र हेतुरीशस्याकर्मवश्यस्य साक्षिणः ज्ञानाश्रयस्य ज्ञानगुणकस्येत्यर्थः साक्षाद्द्रष्टत्वमेव हि साक्षित्वं ॥ साक्षाद्द्रष्टरि संज्ञायामिति
पाणिनानुशासनात् ॥ अनेन ज्ञानगुणकत्वमुक्तं ज्ञानस्वरूपत्वमाह निर्वृतात्मन इति ॥ निर्वृत्तं निर्वृतिः भावे क्तः आनंदस्वरूपस्येत्यर्थः

नरस्य संसृतिर्बंधः पारतंत्र्यं च तत्कृतम् ॥ भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ॥ ७ ॥

तथा च श्रुतिः विज्ञानघन एवायं इति ॥ अनुकूलज्ञानमेवानंदः ईदृशस्येत्यनेनाकर्मवश्यत्वोक्त्याऽनादिगुणपापुण्याकर्मतिरोहितापहत
पाप्मत्वादिस्वाभाविकगुणाष्टकस्य मुक्तिदशायां तिरोधाननिवृत्त्याविर्भावः सूच्यते ॥ अनेन ज्ञानगुणकत्वज्ञानस्वरूपत्वापहतपाप्मत्वादि
गुणाष्टकविशिष्टं प्रकृतिवियुक्तं प्रत्यगात्मस्वरूपमित्युक्तम् ॥ अत्रायमर्थोनुसंधेयः जीवात्मनः स्वयमसंकुचितापरिच्छिन्ननिर्मल
ज्ञानस्वरूपाः ॥ संतः कर्मरूपाविद्यावेष्टिताः तत्तत्कर्मानुरूपज्ञानसंकोचमापन्ना ब्रह्मादिस्तंबपर्यंतविचित्रदेहेषु प्रविष्टास्तत्तद्देहोचित
ज्ञानप्रसरास्तत्तद्देहात्माभिमानिनस्तदुचितकर्माणि कुर्वाणास्तदनुगुणसुखदुःखोपभोगरूपसंसारप्रवाहं प्रतिपद्यंते तेन तु ज्ञानस्व ॥१७२॥
रूप आत्मा स्वयंप्रकाशोप्यतस्य देवादिस्वमात्माभिमाने स्वरूपप्रकाशतिरोधानमवश्यमाश्रयणीयं स्वरूपप्रकाशे सत्यात्मन्याकाशं

सोपपन्नेष्वनापि तृतीयः द्विचेद्रष्टान्तस्य लीलात्वाभिद्धेः स्वयमप्राप्तस्य मुत्पाद्य तस्य चेत्तमोर्गीकारेण लीलयापरत्नमोहपतीति चेन्नत्वन्मतेऽप्यात्मांविनापरदृशिनायोगात्पर
दृशिनेऽसंभवति ॥ तेषां स्वानन्यत्वज्ञानाञ्च निर्विशेषस्य मात्रस्य ब्रह्मणो निर्विशेषत्वादेव न लीलासंभवः ईश्वरस्य तु सर्वज्ञत्वेन जीवान्
स्वानन्यत्वेन च जानतो जन्ममरणादि निवर्त्तनेन नरकपालनादिव्यापारेण लीला भवितुमर्हति तस्मान्निखिलहेयप्रत्यनीकानंतकल्याणगुण
महोदधेरीश्वरस्य लीलोपकरणभूतयातच्चियाम्यया मायया तच्चियाम्यस्य तच्छरीरभूतस्यानादित्वाद्युक्तधर्मस्य प्रत्यगात्मनः परमार्थ
भूतेश्वरलीलारूपगकृष्यादिव्यापारनिवृत्त्येभिरनेन श्लोकेन प्रतिपाद्यत इत्यभ्युपगंतव्यं भगवल्लीलापापदृष्टया उपगतामभ्युपद्यते
सपन्वेतुं शक्यं तदा लीलयेति अध्ययनेन वसतीति वत्फलस्यैवविवक्षया हेतुत्वेन विवक्षया हेतुत्तृतीया लीलया भगवल्लीलार

गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः ॥ विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ॥ ५ ॥ एवं प
राभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् ॥ कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ॥ ६ ॥ ॥

सन्निहितमर्थं यदृच्छयाप्राप्तां कैवल्यप्रदभगवत्संकल्पेन उपगतां प्राप्तामित्यर्थः ॥ ४ ॥ अस्तु प्रकृतेभिपरिकर्तृत्वादेः ॥ किमायातमित्याशंकायामभि
पतितहेतुकस्वस्वरूपतिरोधानकृतमोहनिमित्तत्वादिकमिति वक्तुं प्रकृतेः सत्त्वमिषुक्तस्वस्थावस्थाप्रतिसंवेधिस्थूलावस्थां वदन्नत
याप्रकृत्याप्रत्यगात्मनः स्वस्वरूपतिरोधानेन मोहमाह गुणैरिति ॥ विचित्रा देवमनुष्यादिरूपेण बहुविधाः सरूपाः सर्वासां प्रकृतिपरि
णामरूपत्वेन एकरूपाः प्रजा गुणैः सत्त्वादिभिः सृजतीं कार्यदशायां सृष्टिं विलोक्य तया गुहया ज्ञानतिरोधायिन्या सद्यः स मुमुहेतर
सां स्वानन्यतावुद्धिमकरोदित्यर्थः ॥ ५ ॥ एवं पराभिध्यानेन प्रकृत्या तिरोहितस्वस्वरूपविस्मरणपूर्वकप्रकृतिचिंतनेन पुमान् जीवः

एवं प्रकृतिविलक्षणमात्मस्वरूपं विशेष्यैवंविधस्यतस्य कथं कर्तृत्वभोक्तृत्वादिकमित्याशंकायां प्रकृतिसंसर्गकृतं कर्तृत्वादिवैशिष्ट्यमित्युक्तं प्र
कृतिसंसर्गप्रकारमाह ॥ स इति स एष उक्तलक्षणः विभुर्निरतिशयमहत्त्वेन सर्वव्यापनसमर्थः प्रत्यगात्मा सूक्ष्मां नामरूपविभागानर्हं
निरतिशयसूक्ष्मदशामापन्नामित्यर्थः ॥ अनेन जगदाद्याविति सामर्थ्योल्लभते तेन दैवप्रकृतेः सूक्ष्मदशापन्नत्वात् ॥ देवीं देवस्य विष्णोर्लीला
यीमत एव लीलया देवसंबंधि परमार्थं लीलयाहेतुभूतया पराभिध्यानेनेनिवृक्ष्यमाणत्वाद्देवीमितियुक्तत्वाच्च यदृच्छयैवोपगतां प्रा
प्तां जीवस्य प्रकृतिसंबंधस्य सहजत्वाभावात्कदाचित्कामित्यर्थः गुणमयीं सत्त्वादिगुणप्रचुरां मायामभ्यपद्यत ॥ अत्र केचिदावरणविक्षे
पात्मिकाभेदेन प्रकृतिं द्वेधा विभज्य पुरुषमपि जीवेश्वररूपेण द्वेधा विभज्य एकस्य प्रकृत्यविवेकेन संसार इतरस्य प्रकृतिं स्ववशीकुर्वतः

स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः ॥ यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥ ४ ॥ छ

सृष्ट्यादिव्यापारस्तत्र प्रकृत्यविवेकेन यः संसरत्यावरणशक्त्यातिरोहितस्ततः संसारप्रकारमनेन श्लोकेनोच्यते इति व्याचक्षते तदर
युक्तं ॥ नित्यविद्याप्रत्यनीकस्वप्रकाशरूपस्य प्रकृत्यविवेकानुपपत्तेः स्वलीलारूपसृष्ट्यादिव्यापारनिवृत्तये आवरणशक्त्याह्यतीति
चेन्न विकल्पासहत्वात् किं भ्रांतिहेतुर्लीला उत भ्रांतिकार्यं उत भ्रांतिरेव नाद्यः लीलया स्वस्य भ्रमसंपादनानुपपन्नः बहु स्यामिति सं
कल्पेन हीश्वरो लीलारूपं सृष्ट्यादि करोतीति न द्वयुक्तं न हि कश्चिद्भ्रांतः स्यामिति संकल्प्य भ्राम्यति किं चेश्वरः सर्वज्ञश्चेत्स्वानर्थरूपसं
सारं न प्रवर्तयेदज्ञश्चेत्सर्वज्ञत्वश्रुतिविरोधः विवेकनिष्पादनेन स्वानर्थपरिहाराय सृजतीति चेत्तथापि लीलात्वमनुपपन्नम्
न हि दृष्टप्रयोजनमौषधादिनयनप्रवृत्तिर्लीला भवति न द्वितीयः प्रथमसंकल्पस्य लीलात्वानुपपत्तेः नद्वदेवोत्तरत्रापि लीलामंतरेण ॥१०१॥

यैनं स्थूलसूक्ष्मशरीरात्मकं विश्वं व्याप्तं येनैनमेकवचननिर्देशः एकोऽग्निः सुसंपन्नः सुपुरंकृतनेत्रज्ञा इति वज्ञात्मभिप्रायकृतः अनेन देवा
दिशरीराणामाप्यत्वमात्मनो व्यापकत्वं निरतिशयसूक्ष्मत्वं चोक्तम् ॥ ३ ॥ अत एव व्यापकत्वान्निरतिशयसूक्ष्मत्वं चोदनादित्वाद्देहादिवि
लक्षणत्वाच्च देहाच्च देहादीनामुपाधिभिरुत्पत्तिविनाशादिविकारादिभिर्देहादिरूपैरुपाधिभिर्वा स न जायते न म्रियते न नश्यति ननु

न जायते न म्रियते देहाद्युपाधिभिः ॥ निमि
तैर्देहाद्यैर्यथा स्वप्नदृष्टा न नश्यति ॥ ४ ॥

देवोऽहं मनुष्योऽयं देवोऽयं मनुष्योऽहं स्थूलोऽहमिति स्वस्य परेषां देहात्मनोरभेदेनैव प्रतीतेः कथं देहादिभिः सह न जननादिरात्मन
इत्यत्राह निमित्तैः पुण्यपापरूपैः देवोऽहं स्थूलोऽहमित्यादिरारोपितदेहधर्मा अतो न देहादिभिः ॥ सह न जननादिरित्यर्थः ॥ एतदेव दृ
ष्टांतेन स्पष्टयति यथेति ॥ यथा स्वप्नदृष्टा स्वप्नपदार्थनाशेऽपि न नश्यति एवं जाग्रदाद्यवस्थादृष्टा देहादिनाशेऽपि न नश्यतीत्यर्थः ॥ ४ ॥

श्री.ह.

॥१७०॥

विवेकेन भगवदुपासनद्वाराविच्युत इति भावः॥१॥ यत्साक्षात्सुकृतपापभूतं ज्ञानं तदपि वक्ष्यामीत्याह ज्ञानमिति॥ आत्मदर्शनमात्मा परमपुरुषः
दृश्यते तेसाक्षात्क्रियते नेनेत्यात्मदर्शनं यज्ज्ञानं पुरुषस्य मुमुक्षोर्निःश्रेयसाय मोक्षायाहुः॥ वेदान्तास्तदाश्च नज्ञानहृदयग्रंथिभेदेन अज्ञाननिव
र्तकेनेतुभ्यं यद्यानेन वहृदयग्रंथिभेदेनं वर्णय॥२॥ तावत्प्रकृतिविलक्षणात्मस्वरूपं तावत्क्रोधनादिरिति द्वाभ्याम् पुरुषोजीव॥ तस्यस्वरूप
निरूपनिरूपकधर्मद्वयमाह॥ स्वयंज्योतिस्वयंप्रकाशः यः स्वात्मानमन्यांश्च प्रकाशयति तत्स्वयंज्योतिरित्युच्यते यथादीपादिस्तद्रूपमपि
स्वयंज्योतिः॥ नहि तद्देववत्किंजडस्वरूपइमत आह प्रसग्धामा स्वस्मैभासमानस्वपराकं एतदेवजडत्वं॥ प्रत्यक्त्वस्मैप्रकाशमानं धाम
स्वरूपं यस्य सः अनेन पराग्धामदीपादिभ्यो जडेभ्यो वैलक्षण्यमस्याज्ञानस्वरूपत्वंसिद्धं॥ स्वयंज्योतिरित्यनेन ज्ञानगुणकत्वसिद्धिः

ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनम॥ यदाहुर्वर्णयेतत्ते हृदयग्रंथिभेदनम॥२॥ अनादिरात्मा पुरुषो नि
र्गुणः प्रकृतेः परः॥ प्रत्यग्धामा स्वयंज्योतिर्विश्वंयेन समन्वितम॥३॥ तेन स्वपरप्रकाशकत्वमुच्यते॥ न च यथादीपादि

स्तु रेणुपरिमितत्तेजोरूप एकदेशस्य स्वाश्रयकसिद्धधर्मभूतया प्रकाशयति स्वधर्मभूतप्रभामनपेक्षैव स्वयमपि प्रकाशते तद्वत्प्रकाश
तेन तद्धात्मापि स्वधर्मभूतज्ञानेनान्यान्प्रकाशयति स्वधर्मभूतज्ञाननिरपेक्षमेव स्वयमपि प्रकाशते इति विद्युच्यते॥ एतावांस्तु विशेषः परा
ग्धामादीपादिस्वमात्मानमन्यांश्च परस्मै प्रकाशयति॥ आत्मा तु प्रत्यक्तोन स्वात्मानमन्यांश्च स्वस्मा एव प्रकाशयति॥ प्रकाशोनामव्यव
हारानुगुण्यापादनं एवं च स्वयंप्रकाशत्वं दीपादिष्वात्मनि चाविशिष्टं प्रत्यग्धामत्वं स्वात्मन्येवासाधारणमिति ज्ञानगुणकं ज्ञानस्वरूपं चेति
जडादिलक्षणमात्मस्वरूपमिति फलितं तदेवाह॥ प्रकृतेः प्रकृतिपरिणामरूपाच्छरीरेंद्रियमनःप्राणादेः परः स्वरूपत आसंतवि ॥१७०॥
लक्षणः अतएव निर्गुणः प्राकृतसत्वादिगुणरहितः न यथा प्राप्तात्मा शरीरं तत्र प्रवेशेन तद्धारकः येनात्मस्वरूपेण विश्वमाब्रह्मस्तंवप

मद्भक्त्या देवमोक्षसंभवमसंसारं प्रमाणयति ॥ ज्ञानेति ॥ तस्माद्योगिनो मद्रूपासकाज्ज्ञानवैराग्याभ्यां ज्ञानयोगविवेकादिसाधनप्राप्ताभ्यां युक्तेन मद्भ
क्तियोगेन क्षेमाय नित्यनिरतिशयानंदरूपमदनुभवात्मकक्षेमाय अकुतोभयं कुतश्चिद्भयरहितं मत्पादमूलं मेवप्रविशंति भजंते प्राप्नुवंती
तिवा ॥ ४३ ॥ अल्लोकमर्वशास्त्राणामित्या येनउक्तं वक्ष्यमाणं च कृत्स्नशास्त्रार्थं सुखग्राहणाय संगृह्य निर्दिशति । एतावानिति । तीव्रेणांतर
रायानुपहतेन भक्तियोगेन मनश्चित्तं मय्यर्पितं सत् ॥ तत्रैव स्थिरं तं निश्चलं भवति इत्येतावानेवानेवास्मिन्प्रकृतिमंडले पुंसां बद्धजीवा
नां निःश्रेयसोदयः परमपुरुषार्थोत्कर्षः ॥ ४४ इति तृतीये पंचविंशोध्यायः ॥ २५ ॥ एवमुक्त्युपायमुक्तं भगवद्भक्तियोगं प्रस्तुत्य तस्य जगत्

ज्ञानवैराग्ययुक्तेन मद्भक्तियोगेन योगिनः ॥ क्षेमाय पादमूलं मे प्रविशंत्यकुतोभयं ॥ ४३ ॥ एतावानेव लोकेस्मिन्पुंसां नि
:श्रेयसोदयः ॥ तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरम् ॥ ४४ ॥ इति श्रीभागवते तृतीयस्कंधे पंचविंशोध्यायः ॥ २५
श्रीभगवानुवाच ॥ अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं पृथक् ॥ यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः ॥ १ ॥

कारणविषयत्वस्य कारत्वं तु ध्येय इति सुमेवोक्तत्वात्तज्जनीयस्य भगवतः सृष्ट्यादिव्यापारान्विवक्षुस्तस्य क्षणभक्तस्य सृष्ट्यादिकारणत्वं
प्रकृतिपुरुषकालशरीरकस्य प्रकृतिपुरुषादिशरीरशोधनमंतरेणातत्त्वरकस्य सृष्ट्यादिकारत्वकथनायोगात्प्रथमप्रकृत्यादिस्वरूप
शोधनं तद्विवेकस्य मुक्त्युपायत्वकथनपूर्वकं प्रतिजानीते । तत्त्वानां प्रकृतिपुरुषकालादीनां लक्षणं स्वरूपनिरूपनिरूपितस्वरूपप्रति
पन्नधर्मजातं च युगं संकरेणेनेनुभवं वक्ष्यामि । अप्रस्तुतप्रसंगाशंकां वारयति । यदिति यत्प्रकृत्यादितत्त्वानां लक्षणं विदित्वा पुरुषः ॥
मुमुक्षुः प्राकृतैर्गुणैः सत्त्वादिभिः सत्त्वादिगुणकार्यैर्नादिबंधकपुण्यपापरूपैः दुरितैरितिमर्थः विमुच्येत प्रकृत्यादिविवेकहेतुकहेयोपादेय

रहाश्चतानन्याश्च परिग्रहा रीचिस्तश्वनेषु ममतामयो ऽर्थः विश्वतोमुखं सर्वज्ञं मामेव सुतसखिगुरुत्वादिभावेनानन्यया विषयांतरविरक्त्या
या भक्त्या भजंत्याराधयंति तान्नाशस्मयोः संसारात्तिपारयेः संतेपारं नयामि पुनर्न संसारयामि एतन्मम निश्चिष्टमिति भावः॥४०॥ अनन्यये
त्यनेनेतरचिंतं देवतांतरभक्तेरमुक्तिसाधनत्वं वक्तुं देवतांतराणां क्षेत्रज्ञत्वात्कर्मवश्यत्वान्नाशित्वेषूह्यानुवर्तित्वात्तद्भजनान्मुक्तिरित्या
ह॥ नान्यत्रेति॥ सर्वभूतानां जीवानामात्मनः धारकस्य सर्वभूतानां धार्यत्वेन शरीरत्वमुक्तं प्रधानपुरुषयोः सर्वावस्थावस्थितचेत
नाचेतनयोरीश्वरादंतः प्रविश्य नियंतुरनेन कर्मायम सर्वावस्थावस्थितप्रधानपुरुषयोर्नियामकत्वमुक्तम्॥ मद्भगवत अहं चा

नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात्॥ आत्मनः सर्वभूतानां भयं तीव्रं निवर्त्तते॥ ४१॥ मद्भया
द्वाति वातोऽयं सूर्यस्तपति मद्भयात्॥ वर्षतींद्रो दहत्यग्निर्मृत्युश्चरति मद्भयात्॥ ४२॥

सो भगवांश्चतस्मान्मत्तोऽन्यत्र इत्यर्थः॥ अनेन स्वस्यैव मुक्तिप्रदत्वमितरेषां दुर्गतेनानुतारकत्वं च सूचितम्॥ अस्मत्त्रा
णस्मिन्नेसत्यमाने इतिशेषः तीव्रं दुःसहं भयं गर्भजन्मजरामरणादिसांसारिकं न निवर्त्तते॥४१॥ प्रधानपुरुषेश्वरादित्यने
न सूचितमितरेषां मावसपर्यंतक्षेत्रज्ञानां स्वनियाम्यत्वमाह॥ मद्भयादिति सार्द्धेन॥ वायुः सूर्यादयः सन्निर्दिष्टस्वस्वव्यापारा क ॥१६७॥
रणे मत्तस्तान महाभयनिमित्तदंडनमुद्भावयंतः स्वस्वव्यापारेषु जागरूकास्तिष्ठंतीत्यर्थः अत्र भीषास्माद्वातः पवत इत्यादिश्रु
त्यर्थ उक्तः॥४२॥

यमशाश्वतम्॥ नाप्नुवंति महात्मानः संसिद्धिं परमां गताः॥ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन॥ मामुपेत्य तु कौंतेय पुनर्जन्म न
विद्यते इति च॥ श्रुतिरपि॥ स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तत इत्यादिका॥ एतेन यदि परमपु
रुषायं त्वं मुक्तैश्वर्येनार्हितस्य स्वतंत्रत्वेन तत्संकल्पानुकूलस्य पुनरावृत्तिं राभावनाशंका परात्मा न हि परमपुरुषः सत्यसंकल्पः
अत्यर्थप्रियं ज्ञानिनं लब्ध्वा कदाचिदप्यावर्तयिष्यति य एवमाह॥ प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥ उदाराः सर्व एवै
ते ज्ञानी त्वात्मैव मे मतम्॥ आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्॥ बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्ये॥ वासुदेवः सर्वमि
ति स महात्मा सुदुर्लभः इति॥ ३८॥ नन्वपहतपाप्मत्वादेः सत्यसंकल्पत्वपर्यंतस्य गुणगणस्य प्रत्यगात्मनः स्वाभाविकस्यैवावि
इमं लोकं तथैवामुमात्मानमुभयायिनम्॥ आत्मानमनुये चेह ये रामः प्रशावोग्रहाः॥ ३९॥ विसृज्य सर्वानन्यां
श्च मामेवं विप्रस्थितो मुखं भजं मनन्यया भक्त्या तान्मृत्योरति पारये॥ ४०॥ भावः अतो न मुक्तैश्वर्ये परमपुरुषाय त्त्राभि
ति चेदुच्यते तस्य नयाविधत्वमेव परमपुरुषायतं तस्य नित्यस्थितिश्च तदायत्ता परमपुरुषस्यैतन्नित्यतायाति मेष्टत्वान्नित्यत
या वर्त्तत इति न कश्चिद्विरोधः॥ एवमेव परमपुरुषे भोगोपकरणस्य लीलोपकरणस्य च नित्यतया शास्त्रावगतस्य परमपुरु
षस्यानित्येष्टत्वाहेः वत्तयावस्थानमस्तीति शास्त्रादवगम्यते एतत्सर्वमभिप्रेत्याह द्वाभ्यां इमं लोकममुं लोके च विसृज्य प्रभाव
पि लोकौ हेयाविति निश्चित्यर्थः॥ उभौ लोकौ पात्यनेनेत्युभयायी तमात्मानं उभयलौकिकधर्मसाधनं देहमित्यर्थः॥ विसृज्य
तस्मिन्देहे आत्माभिमानं परित्यज्येत्यर्थः तथात्मानं देहमनुये ऽनुबंधिनः पुत्रकलत्रादयः ये च रापऽधनानि प्रशावो।

भा. तृ.

॥ १६८ ॥

अथार्चिरादिगत्यागमनानंतरं मममायया विसृष्टां विभूतिमाब्रह्मलोकपर्यंतभूतिं तयाऽनुप्रहृत्तं भक्तिमनुस्मरत्स्प्रहृत्तमष्टांगमणि॰
मावष्टप्रकारंरोऽप्यैश्वर्यं भागवतीं श्रियं मुक्तिं न स्पृहयंति ॥ भागवतीं श्रियमिति द्वयोस्तात्पर्यं यया भागवतीं श्रियं न स्पृहयंति तथा माया॰
विभूत्याद्यपि न स्पृहयंतीत्यर्थः कैमुत्यन्यायद्योतनार्थं वा ॥ भागवतीं श्रियमेव न स्पृहयंति किं मायाविभूत्यादीन् स्पृहयंतीति वक्तव्यमिति ॥ अ॰
थवा ब्रह्मांडांतर्भूतं न भगवल्लोकस्थश्रियमपि नेच्छंति किंतु ते परस्य प्रकृतिपुरुषविलक्षणस्य मे मम लोके नित्यविभूतावश्नुवते
प्राप्नुवंति च्चायि सुसातिशयसुखान् लोकान्नानुभवंति किंतु नित्यनिरतिशयसुखं मल्लोके प्राप्नुवंतीत्यर्थः ॥ ३७ ॥ ननु लोकत्वावि॰

अथो विभूतिं मममायया विसृष्टामैश्वर्यमष्टांगमनुप्रवृत्तम् ॥ श्रियं भागवतीं चास्पृहयंति भद्रां परस्य मे तेऽश्नुवते तु लोके ॥
३७ ॥ न कर्हिचिन्मत्पराः शांतरूपे नंक्ष्यंति नो मेऽनिमिषो लेढि हेतिः ॥ येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमि
ष्टम् ॥ ३८ ॥

शेषात्त्वल्लोकेऽपि वर्त्तमानानां भोग्यभोगोपकरणानां नाशः स्यान्न चाह ॥ नेति हे शांतरूपे यद्वा शांतरूपे शुद्धसत्वमयात्मके मल्लोके
मत्पराः मदनुभवहीना न भवंति मे मदीयः अनिमिषो हेतिः कालचक्रं न लेढि न ग्रसति न च हेतुं येषामिति ॥ येषां निरतिशय
प्रीतिविषय आत्माहं सुतवद्वत्सलो हविषयः सखेव विश्वासास्पदं गुरुरिव हितोपदेष्टा सुहृदिव हितकारी इष्टं दैवमिव पूज्यः
एवं सर्वभावेनोपासीनानहरहरनुष्ठीयमानवर्णाश्रमधर्मस्वधर्मानुग्रहीतमदुपासनरूपसमाराधनप्रीतोहं मद्धाम ॥ १६८ ॥
याम्यानुभवरूपां न प्रापय्य पुनर्नावर्तयामीति भगवतोभिप्रायः तथा च भगवता स्वयमेवोक्तं ॥ मामुपेत्य पुनर्जन्म दुःखाल॰

विवेशितानिप्रसन्नप्रसन्नयमभाजयंतः सम्यगनुमोदयंतः पौरुषप्रसंगजनितानंदसंप्लुताः संतः ममैकात्मताएकस्वभावतां म
मसमानगुणहृतां ममसाधर्म्यमागता इतिप्रचुच्यते॥ नस्पृहयंतिनेछंति॥ किंतुहे अंब संतममेमरुचिराणिसुंदराणिप्रसन्नानि
वक्त्रारुणलोचनानियेषुतानिदिव्यान्यमानुषाणिवरप्रदानि अभिमतार्थप्रदानिवराकेभ इतिशेषः रूपाणिदिव्यमंगल
शरीराणिपश्यंतिध्यायंतिरूपैः साकंसह वास्पृहणीयांवाचंमधुरुक्तिंवदंतिपरस्परंकथयंति॥३५॥ यद्यपिमुक्तिस्तैर्नप्रार्थ्य

पश्यंतितेमेरुचिराण्यंबसंतःप्रसन्नवक्त्रारुणलोचनानि॥ रूपाणिदि
व्यानिवरप्रदानिसाकंवाचंस्पृहणीयांवदंति॥३५॥ तैर्दर्शनीयावयवैरु
दारविलासहासेक्षितवामसूक्तैः॥ हृतात्मनोहृतप्राणांश्चभक्तिर
निच्छतोगतिमण्वींप्रयुंक्ते॥३६॥

तथापितेषामवश्यमनिच्छतामपिमुक्तिर्भवतीत्याह॥ तैरितिद्वाभ्यां॥ दर्श
नीयाअवयवायेषुतैः॥ विलासोलीलामंदहासयुक्तमीक्षणमवलोकनंवामसूक्तंमधुरभाषणंउदाराणिसुंदराणिविलासादीनि
येषुतैर्मद्रूपैः हृतमात्मामनोयेषांतानहृताःप्राणाःज्ञानकर्मेंद्रियाणियेषांतान् अनिच्छतःमुक्तिमप्रार्थ्यमानानपिभक्तिःपूर्वोक्ता
मद्भक्तिरण्वींसूक्ष्मामेकदीमित्यर्थः गतिमर्चिरादिप्रति अर्चिरादिगतेर्बहुभिरक्षुण्णत्वादण्वीमित्युक्तंप्रयुंक्तेप्रारब्धावसाने

षां लिंगानां ज्ञापकानां देवादिविहितानां स्वस्वदेवताधिष्ठितानां ज्ञानेंद्रियाणामित्यर्थः तथा आनुश्रविककर्मणामनुस्रमाविछिन्न
पाठपरंपरया श्रूयते इत्यनुश्रवो वेदः तद्विहितमानुश्रविकं कर्म येषां शास्त्रप्रसिद्धव्यापारानुष्ठानपराणां कर्मेंद्रियाणामित्यर्थः
तेषामुभयविधेंद्रियाणामेकाग्रस्य मनस्य सत्वे शुद्धसत्वमये भगवद्विग्रहे या स्वाभाविकी अनिमित्तफलाभिसंधिरहितेति या
वत् ॥ या वृत्तिः व्यापारः ॥३२॥ साऽनिमित्ता भागवती वंधिनी भक्तिरित्यर्थः उभयविधेंद्रियाणां मनस स्वसत्वे वृत्तिर्नाम श्रव
णकीर्तनस्मरणादिः ॥ अथ भक्तिं स्तौति सिद्धेः ऐश्वर्यकैवल्यादिसिद्धेः ॥ गरीयसी श्रेष्ठा निरतिशयानंदरूपभगवदनुभ

कपिल उवाच ॥ देवानां गुणलिंगानामानुश्रविककर्मणाम् ॥ सत्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥३२
अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ॥ जरयत्याशु या कोशं निगीर्णमनलो यथा ॥३३॥ नैकात्मतां
मे स्पृहयंति केचिन्मत्पादसेवाभिरता मदीहाः ॥ येऽन्योऽन्यतो भागवताः प्रसज्य सभाजयंते मम पौरुषाणि
॥३४॥

वफलसाधनत्वभावादिभावः सिद्धेर्गरीयस्त्वमेवाह या भागवती भक्तिः कोशमनादिपुण्यपापरूपं कर्मवासनाकोशं ज
रयति जीर्णं करोति नाशयतीति यावत् ॥ तत्र दृष्टांतः निगीर्णं भुक्तमन्नपानादि अनलो जठराग्निर्यथेति ॥३३॥ पुनर्भक्तिमेव
प्रस्तोतुं निरतिशयानंदरूपभगवदनुभवरूपभक्तियोगनिष्ठास्तत्साधर्म्यरूपमुक्तिं नेच्छंतीत्याह ॥ केचिन्मत्पादयोः सेवाया ॥१६७॥
मभिरता आमुक्तामप्येवं ईहा सर्वेंद्रियचेष्टा येषां ते भागवताः अन्योन्यतः परस्परं मम पौरुषाणि कल्याणगुणप्रकाशका

भवप्रवृत्तानिति ॥ अत्राह मितुपासकप्रश्नते पदं समंनेन प्राप्यप्रश्नः निर्वाणमिति प्राप्तिफलप्रश्नः अंजसेति विविघ्नातुपहतप्रश्नः ॥ २८ ॥
भयोहितः उक्तः सकीदृशः किंप्रकारः तस्यांगानि कति कतिसंख्याकानि ॥ यतो येभ्योंगेभ्यः तत्वस्यात्मतत्वस्यावबोधनं अवबुध्यते नेनेत्यव
बोधनं तस्य साक्षात्कारसाधनमुपासनं निवर्तत इत्यर्थः ॥ कीदृश इति प्रकारप्रश्नः कति चांगानि संगणनाप्रश्नः ॥ एवमर्थपंचकं पृष्टं भ
भवति ॥ २९ ॥ तदेतदुपायोपेयविरोधिफलस्वरूपे दुर्ज्ञेयं हे हरे योषाऽतएवमंदधीरहं भवदनुग्रहात्सुखं बुध्येय जानीयां ॥ तथा मेम
ह्यं जानीहि ज्ञापय ॥ ३० ॥ एवमापृष्टः कपिलो भगवद्भक्तियोगमवतारयास्तत्याह मैत्रेयः ॥ विदित्वेति ॥ कपिलमातुर्देवहूत्याः ॥ अ

यो योगो भगवद्बाणो निर्वाणात्मंस्त्वयोदितः ॥ कीदृशः कति चांगानि यतस्तत्वावबोधनम् ॥ २९ ॥ तदेतन्मे वि
जानीहि यथाहं मंदधीर्हरे ॥ सुखं बुध्येय दुर्बोधं योषा भवदनुग्रहात् ॥ ३० ॥ मैत्रेय उवाच ॥ विदित्वार्थं कपि
लो मातुरित्थं जातस्नेहो यत्र तन्वाभिजातः ॥ तत्वाम्नायं यत्प्रवदंति सांख्यं प्रोवाच वै भक्तिवितानयोगं ॥ ३१ ॥

र्थं भक्तिः योगादिरूपार्थं संबंधिसुश्रुषितं स्वरूपं विदित्वा जतस्नेहः तत्र हेतुः यत्र यस्यां तन्वा देहेन जातः तत्वाम्नायं तत्व
शास्त्रं सांख्यं तत्वसंख्यातेनात्मस्वरूपप्रकाशकं यद्वदंति तद्भक्तिवितानयोगं भक्तिविस्तररूपं योगं उवाच ॥ ३१ ॥ सविस्तरं
भक्तियोगं सप्तविंशाध्यायेन बोधयिष्यन् भजनीयस्य परस्य ब्रह्मणो महात्म्यसूचनाय जगत्सृष्ट्यादिलीलाः षड्विंशेन क
थयिष्यंस्तावद्भक्तियोगं संग्रहेण तत्स्वरूपकथनपूर्वकं प्रशंसति ॥ देवानामिति गुणलिंगानां गुणाः शब्दादिविषयाः ते

भा०स०
॥१९९॥

हेकत्वेनैव परंपरयासाधनत्वं इत्यभिप्रायेणगुणत्तेसेवादिभिर्मत्सेवनुक्तं इहावरुंधे इहजीवदशायामेवमुक्तिंलभतइतिजीवन्मुक्तिरिय
मुच्यतेइतिव्याख्यानकर्तृणांजीवन्मुक्तेरप्रामाणिकत्वात् ॥ तथाप्यापस्तंवेनसायुक्तिर्निरस्ता ॥ वेदानिमंलोकममुंचपरित्यज्यात्मान
मन्विच्छेन उद्देश्येसमप्रापणंतत्त्वाद्विप्रतिषिद्धम् ॥ बुद्धेचेतक्षेमप्रापणमिहैवनदुःखमुपलभेतएतेन परंव्याख्यानमिति ॥ कात्रेयं२
जीवन्मुक्तिः सशरीरस्यैवमोक्षइतिचेन्मातामेवंध्येतियदसंगतार्थमिदंयतः सशरीरत्वंवंधः ॥ असरीरत्वमेवमोक्षइति
चेन्मातामेवंध्येतियदसंगतार्थमिदंयतः सशरीरत्वंवंधः ॥ असरीतंनप्रियेस्पृशतेइत्यादिश्रुतिभिस्तैनैवोपपादितत्वादितिदिक्
विस्तरस्तुभाष्यादिष्वनुसंधेयः अथमर्त्योमृतोभवत्यत्रब्रह्मसमश्नुतइतिश्रुतिर्जीवन्मुक्तिमभिदधातिइतिचेन्न ॥ अत्रोपास

देवहूतिरुवाच ॥ काचित्त्वय्युचिताभक्तिः कीदृशीममगोचरा ॥ ययापदंतेनिर्वाणमंजसान्वाश्नवा अहम् ॥२८॥

नदहरपायामपिब्रह्माश्नुते अनुभवतीतिश्रुत्यर्थनात् ॥ अमयादेहेयातावधिविलंवपरायास्तस्यतावदेवचिरंयावन्नविमोक्ष्ये
अथसंपत्स्यइतिश्रुतेर्विरोधापत्तेः तस्माद्यथोक्तएवार्थः ॥२७॥ एवंविवेकादिभिर्ज्ञानयोगेनचानुग्रहीतभगवद्भक्तियोग
स्यैवमुक्त्युपायत्वंसंग्रहेणश्रुत्वापुनः तद्विस्तरंवुभुत्सयापृच्छतित्रिभिः उचितांमुक्तिंसाधयितुंयोग्यात्वयिभक्तिः काचेतिभ
क्तिस्वरूपप्रश्नः काचित्काविहितापिपाक्षांतरंतदाप्ययमेवार्थः ॥ कीदृशीतिममममतेर्गोचरायोग्याऽतेनभाक्त्यधिकारानुसार
णसंभावितोवांतरभेदप्रश्नएषः ययामत्याऽहंतापत्रयातुरातेतवनिर्वाणंनिरतिशयसुखंपदमंजसासुखेनान्वश्नुवै ॥१९९॥

जातअसक्ताविरागोयस्यसपुमान्योगयुक्तःअनभिसंहितफलकर्मयोगज्ञानयोगाभ्यांयुक्तःसन्नृजुभिःचित्तैकरूपासंकारपादिकैः
योगस्यभक्तियोगस्यसमार्गैःसाधनैर्विवेकविमोकाभ्यासादिभिःचित्तस्यग्रहणंनियमेयतःप्रमादरहितःयतिष्यतेयत्नं
कुर्यात् ॥२६॥ योगमार्गेणैवावर्ण्यचनयैवभक्त्यापुमान्मांप्राप्नोतीत्याह ॥ प्रकृतेर्गुणानांसत्वादिगुणपरिणामविहिताप्र
तिषिद्धविषिद्धानांफलंजगज्जनंचंडालपतितादिसंबंधिकंशोकोद्विग्नाघुपहतरूपज्ञामाश्रयनिमित्तंदुष्टानामसेवयाअनेनवि
वेकउक्तःवैराग्येनविवेकउक्तःवैराग्येणविजृंभितंयज्ज्ञानंतेनवैराग्यंकामानभिष्वंगःशमदमादिशिक्षयावत्ज्ञानप्रादेन
प्रकृतिविलक्षणात्मज्ञानयोगःशुभाश्रयसंशीलनरूपज्ञानंचविवक्षितअनेनाभ्यासउक्तःयोगेनानभिसंहितफल

असेवयायंप्रकृतेर्गुणानांज्ञानेनवैराग्यविजृंभितेन योगेनमय्यर्पितयाचभक्त्यामांप्रत्यगात्मानमिहावरुंधे ॥२७

कर्मयोगेनानेनक्रियाउक्ता ॥ चकारेणकल्याणानवसादानुद्धर्षौविवक्षिताःतत्रसत्यार्जवदयादानाहिंसानभिध्याःकल्याणानि
अनभिध्यापरकृतदोषाचिंतनंपुत्रविपुत्र्यादिस्मरणजनितखेदाभावोनवसादः अनुद्धर्षःपुत्रजन्मादिनिमित्तानिसंतोषः
एतैःप्रकृतिगुणासेवादिभिर्मय्यर्पितयाऐश्वर्यकैवल्यादिप्रयोजनविधुरयाइत्यर्थः ॥ भक्त्याइहतदेहावसानेप्रतीचीजी
वस्याकारंमामवरुंधेप्राप्नोति ॥ यद्वाप्रत्यगात्मशरीरिणंमामित्यर्थःयद्वाप्रत्यग्जीवः ॥ आत्मानंमाचरुंधइत्यर्थः ॥ अत्रगुणा
सेवादिभिर्भक्तेतिनसहोपायसमुच्चयःकिंत्वसेवादिभिरनुगृहीतयाभक्त्येतिभक्तेरेवसाक्षात्साधनत्वंइतरेषांतदनुग्रा

भा॰ स्क॰ कथं सतां प्रसंगात्त्रिवृत्ति धर्मा भिन्नविरुद्धस्य द्यत इत्यत्राह ॥ सतामिति ॥ सतां साधूनां प्रसंगान्मम वीर्यसंविदः वीर्याणि संवेदयंती वीर्यसंविदः णि
जर्थं गर्भीसिरम् ॥ यद्वा मा वेत्ति पवीर्याणां संवित्संवेदनं यासु ताः कथाः यद्वा वीर्येण निम्मासंकुचितज्ञानगुणेन संवेत्ति सर्वं स्वरूपतः
॥१६५॥ स्वभावतश्च साक्षात्करोतीति तथा सर्वज्ञस्य मम मेत्यर्थः कथा हृत्कर्णयोः रसायना अमृतवद्बहुत्विकरा भवंति प्रवर्त्तंते ॥ तज्जोषणात्ता
सां कथानां जोषणात्सेवनादाशु अपवर्गवर्त्मनि अपवर्गस्य मोक्षस्य वर्त्मनि द्वारभूते गुरुरुपसत्तहरे श्रद्धा त्वरा भवति उत्पद्यते सत्त्व
निष्ठो भगवत्कथाश्रवणे सति ॥ तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते नास्त्यकृतः कृतेन

सतां प्रसंगान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः ॥ तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनु
क्रमिष्यति ॥२५॥ भक्त्या पुमान् जातविराग ऐंद्रियाद्दृष्टश्रुतान्मद्रचनानुचिंतया ॥ चित्तस्य यत्तो ग्रहणे योगयुक्तो
यतिष्यते ऋजुभिर्योगमार्गैः ॥२६॥ तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् ॥ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ॥ मामुपेत्य
तु कौंतेय पुनर्जन्म न विद्यते इति स्वर्गादीनां सुखानां सातिशयित्व क्षयित्व तु त्वं ब्रह्मोपासनस्यानंतस्थिरफलत्वं केवलकर्मणाम
नंतत्वादुष्करत्वात् सातिशयितफलत्वाच्च तुच्छत्वं निवृत्तिधर्माणां तद्विपरीतत्वं च श्रुतवतः जातविरागस्य पुंसस्तद्दर्शननिवृत्तिध
र्मो जायत इत्यर्थः प्रत्येकाभिप्रायेण तु क्रमिष्यतीत्येकवचननिर्देशः ॥२५॥ सत्संगादिप्रभृति प्रणाड्या भगवत्प्राप्तिरूपाप
वर्गमाह काचुत्सन्नायांत त्रैव चित्तसावधानेन यस्मात्तेनाह ॥ भक्त्येति ॥ मम रचनानां सृष्ट्यादिव्यापाराणां चिंतायसा तस्या भक्त्या अ ॥१६५॥
नेन त्रस्म स्वरूपवत्तनुगुणानामप्युपास्यत्वमुक्तम् ॥ दृष्टश्रुतादैहिकामुष्मिकदृष्ट्यन्नपशुपुत्रास्वर्गादिरूपात्वलाभस्मिन्निरस्यर्थः

किंच॥ मयीश्वरे कपिलस्यावेशावतारत्वेपि जीवशंकेति भगवत्त्वाद्भगवच्छक्तेरेवोद्भूतत्वाच्च मयीति व्यपदेशः अनन्येनाव्यभिचारेण
भावेनांतःकरणाभिप्रायविशेषेण वा॥ ये दृढामविचाल्यां भक्तिं कुर्वंति ते साधव इत्युत्तरत्रान्वयः तानेव विशिनष्टि मत्कृते मदर्थं॥
त्यक्तानि कर्माणि यैस्ते परित्यक्त मदाराधनविरोधिप्रवृत्तिधर्माः तथा त्यक्त मद्भक्तजनविरोधिस्वजनबांधवाः॥ २१॥ अहमेवाश्रयो
विषयो यासां ताभिः कथाभिर्हृष्टाः॥ कथाहृष्टत्वमेव प्रपंचयति॥ शृण्वंति कथयंति गायंति चेति मदाश्रयकथाश्रवणादिभिर्हृ
ष्टा इत्यर्थः यद्वा कथास्मरणेन मृष्टाः पुनस्ता एव शृण्वंति कथयंति च यद्वा हृष्टा इति व्यस्तपदं हृष्टाः संतुष्टाः संतो मदाश्रयक

मय्यनन्येन भावेन भक्तिं कुर्वंति ये दृढाम्॥ मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबांधवाः॥ २२॥ मदाश्रयक
था मृष्टाः शृण्वंति कथयंति च॥ तपंति विविधास्तापा नैतान्मद्गतचेतसः॥ २३॥ त एते साधवः साध्वि स
र्वसंगविवर्जिताः॥ संगस्तेष्वथ ते प्रार्थ्यः संगदोषहरा हि ते॥ २४॥

था शृण्वंति कथयंति चेत्यर्थः॥ मय्येव गतं न्यस्तं चे
तो यैस्ते॥ अत एतान् विविधा नानाविधास्तापाः आध्यात्मिकादयः न तपंति न क्लेशयंति॥ एकात्मगतचेतस इति पाठांतरं ए
कस्मिन्भगवत्यात्मा वात्मत्वं॥ अस्मेषां चेतनाचेतनाचेतनानांतःस्थितत्वा॥ एक एव परमपुरुषः आत्मेति तस्मिन् गतं चेतः तेषां तानित्य
र्थः॥ २३॥ हे साध्वि त एते सर्वैः संगैर्विषयसंगैर्विवर्जिता विरहिताः साधवः तेषु साधुषु अथेति अथ यात्मिस्त्वयमंते त्वया सं
गः प्रार्थ्यः प्रार्थनीयः हे यस्मात्ते साधवः संगदोषहराः इंद्रियार्थप्रसंगहेतुकानादिपुण्यपापरूपदोषहरा इत्यर्थः॥ २४॥

नोब्रह्मशब्दः द्व्येकयोरित्यादिवत् ब्रह्मत्वसिद्धयेइत्यर्थः ब्रह्मत्वंब्रह्मप्रकारमिद्धयेब्रह्मवदपहतपाप्मत्वादिगुणाएकाविर्भावसिद्
येइतियावत्॥योगिनांशिवः अन्यानपेक्षः पंथाउपायः अन्योनास्ति ब्रह्मात्मकप्रत्यगात्मानुपूर्वकप्रत्यगात्मशरीरकभगवद्भ(
क्तिसदृशोमुक्त्युपायः कश्चिदन्योनास्तीत्यर्थः १९ एवमनभिसंहितफलस्वधर्मनिरस्तकामादिदोषविशुद्धांतःकरणानुसं
हितब्रह्मात्मकप्रत्यगात्मयाथात्म्यज्ञानयोगपूर्वकभगवद्भक्तिर्मोक्षसाधनमित्युक्तम्॥अथास्यसर्वस्यनिवृत्तिधर्मस्यसहचिजन
नेसत्संगतिरेवप्रथमंकारणं॥अशास्त्रसंगतिः संसृतिहेतुरितिवदन्सत्संगंचाह प्रसंगमितिपंचभिः प्रसंगमस्त्वितिशेषः अ।

प्रसंगमजरंपाशमात्मनःकवयोविदुः॥सएवसाधुषुकृतोमोक्षद्वारमपावृतम्॥२०॥तितिक्ष
वःकारुणिकाःसुहृदःसर्वदेहिनां॥अजातशत्रवःशांताःसाधवःसाधुभूषणाः॥२१॥

शास्त्रइंद्रियार्थेषुतत्परायणेषुप्रसंगंप्रकृष्टासक्तिमात्मनोजीवस्याजरमशिथिलंपाशंबंधकंवयःसुधियोविदुः॥सएवप्रसंगए
सदसत्त्वेनासद्रूपविषयपरिहारेणप्रसंगमात्रस्यपरामर्शःसाधुषुकृतः॥अपावृतमविनोपहतंमोक्षद्वारंमोक्षोपायः २०
केतेसाधवइत्यत्राह॥तितिक्षवः॥सर्वेषामपितितिक्षासहनशीलाःकारुणिकाःस्वार्थनिरपेक्षपरदुःखनिराचिकीर्षवःअ
तएवसर्वदेहिनांसुहृदःमित्राणितएवाजाताःअविद्यमानाःशत्रवोयेषांतेशांताःइंद्रियमादीनांउपलक्षणम्॥शमदमादिसं
पन्नाःसाधवःपरकार्यसाधकाःसाधुशास्त्रंतरदेवमभूषणायेषांतेसाधवइतिशेषः यद्वासाधवइतिविधेयविशेषणः॥एतेर

प्रपञ्चे देहादीन्विवर्तयति॥ आत्मानमणुमिति परिमाणत्वेन सर्वान्तःप्रवेशयोग्यतया व्यापकत्वा व्याप्यपरम्परया धारिसाध्ये देहादिभिन्नीविना
शयते इत्यर्थः स्वयंज्योतिः स्वयंप्रकाशं दीपादिवदिति दृष्टांतो त्राभिप्रेतः तत्र यथा दीपादिस्तेजःस्वरूपः तेजोधर्मकश्च स्वयंप्रकाशस्त
थायमात्मापि ज्ञानस्वरूपो ज्ञानगुणकः स्वप्रकाशश्चेति भावः एवंविधमुदासीनं निर्व्यापारमात्मानं प्रत्यगात्मानं हतौजसं संसार
निवृत्त्वरूपबलहीनां प्रकृतिं च पश्यति॥१६॥१७॥१८॥ एवमात्मस्वरूपग्रहणयोग्यमनःस्वरूपशिक्षा आत्मयाथात्म्यशिक्षा च कृ
ता अत्र भगवद्भक्तियुक्तात्मना पश्यतीत्यनेन न केवलं प्रकृतिविलक्षणतयात्मस्वरूपचिंतनामात्रेण प्रत्यगात्मसाक्षात्कारः किंतु

तदा पुरुष आत्मानं केवलं प्रकृतेः परम्॥ निरंतरं स्वयंज्योतिरणिमानमखंडितम्॥१७॥ ज्ञानवैराग्ययुक्ते
न भक्तियुक्तेन चात्मना॥ परिपश्यत्युदासीनं प्रकृतिं च हतौजसम्॥१८॥ न युज्यमानया भक्त्या भगवत्य
खिलात्मनि॥ सदृशोस्ति शिवः पंथा योगिनां ब्रह्मसिद्धये॥१९॥ ब्रह्मात्मकप्रत्यगात्मानुसंधानेनैव प्रत्यगात्मसाक्षा

त्कारोपि भवतीति सूच्यते॥ ब्रह्मात्मकत्वमेव तस्य प्रत्यगात्मनः स्वाभाविकं स्वरूपं तच्च विशेष्यभूतब्रह्मणोनुसंधाने विशेषण
भूतप्रत्यगात्मानुसंधानासंभव एव न हि व्यक्तिगुणादीन् विजातिगुणादयः पृथगुपलभ्यंते॥ तस्मात्प्रकृतिविलक्षणप्रत्यगा
त्मचिंतनमपि ब्रह्मशरीरतयैव कार्यं एवंविधं च चिंतनमेव पश्चाद्विशेष्यभूतभगवद्भक्तिरूपापन्नं मुक्तिसाधनं न केवलं
इत्याह नेति॥ अखिलात्मन्यखिलानां जीवानामात्मभूते भगवति युज्यमानया भक्त्या सदृशस्तुल्यः ब्रह्मसिद्धये भावप्रधा

माह॥ चेत इति॥ अस्यात्मनो जीवस्य बंधाय मोक्षाय च चेत एव मतं खलु कारणमिति शेषः कीदृशं बंधाय मुक्तये च कीदृशमित्यत्राह गुणे
षु गुणकार्येषु शब्दादिविषयेषु सक्तमासक्तं चेतः बंधाय भवति पुंसि परमेश्वरे रक्तं वा आसक्तं तु मुक्तये भवतीति विवेकः॥१५॥ प्रकृतिविवि
क्तात्मस्वरूपग्रहणयोग्यमनःस्वरूपमाह॥ अहमिति त्रिभिः अहं ममाभिमानाभ्यां मनात्मनि देहे आत्माभिमानः अहमभिमा
नः अस्वीये स्वीयाभिमानं तथा चोच्यते॥ अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः अविद्यातरुसंभूतं बीजमेतद्द्विधा स्थि
तमिति॥ आभ्याममभिमानाभ्यां उत्थैः॥ कामलोभादिभिर्मलैः कामादिभिहेतुकैः पुण्यापुण्यरूपैर्मलैर्यदा वीतं रहितं अनभि
संहितं फले स्वाराधनं तद्वर्णाश्रमोचितैर्धर्मैः कामादिरहितमत एव शुद्धमत एवादुःखमसुखमैंद्रियकसुखदुःखैर

अहंममाभिमानोत्थैः कामक्रोधादिभिर्मलैः॥ वीतं यदा मनः शुद्धमदुःखमसुखं समम्॥१६॥

नभिभूतमत एव समं सदैकरूपं यया भवति तया पुरुष उक्तविधमनस्कः पुमान् ज्ञानवैराग्ययुतज्ञानमत्र प्रात्वजम्यमात्म
स्वरूपयाथात्म्यावगाहि ज्ञानं वैराग्यं विषयेष्वनासक्तिः ताभ्यां युक्तेन विशेष्यभूतभगवद्भक्तियुक्तेन चात्मानामन प्रकृतेः
प्रकृतिकार्यशरीरेंद्रियमनप्राणादिभ्यः परं स्वरूपतः स्वभावतश्चात्यंतविलक्षणमत एव केवलं सत्वादिगुणरहितं प्रकृ
तिपरिणामभेदेन देवमनुष्यत्वादिरहितमत एव निरंतरं प्रतिशरीरं भिन्नमपि सर्वत्र ज्ञानैकाकारतया वैषम्यरहितं निर्दो
षं हि समं ब्रह्मेति द्योतते॥ अणिमानमनुतरं स्वरूपकथनमिदं ज्ञानस्वरूपत्वस्याप्युपलक्षणमिदं अणिमत्वादेवाखंडि
तं खंडनानर्हं मराद्यत्वाल्लोके घटादीनामप्युपलक्षणं॥ खंडनदहनक्लेदनसाधनभूता हि परश्वग्निजलादयः छेद्यं दाह्यं ॥१६३॥

एवमुक्तः कपिलस्तां बभाष इत्याह मैत्रेयः पुंसामपवर्गवर्द्धनं मोक्षरुचिकरं निरवद्यं निरवद्यं निर्दुष्टं स्वमातुर्देवहूत्या ईप्सितमभिप्रेतमेवं
निशम्य श्रुत्वा धिया मनसाभिनंद्यात्मवतां निगृहीतमनसां सतां गतिः मुक्त्युपायः कपिलः ईषत्स्मितेन मंदहासेन शोभितमाननं मुख
खं यस्य स तां मातरं बभाषे ॥१२॥ तत्र ज्ञानकर्मयोगादिभिरनुगृहीतं भगवद्भक्तियोगमेव साक्षान्मुक्त्युपायत्वमुक्तरध्यायेषु
विस्तरेण प्रतिपादयिष्यमाणमत्र संग्रहेण प्रतिपादयंस्तावज्ज्ञानयोगमवतारयति ॥ योग इति द्वाभ्याम् ॥ आध्यात्मिकः प्रकृति
विविक्तात्मयाथात्म्यज्ञानरूपो योगः पुंसां मुमुक्षूणां निःश्रेयसाय मोक्षाय मे मया मतः ज्ञानयोगो मुमुक्षूणां मोक्षसाधनमि

मैत्रेय उवाच ॥ इति स्वमातुर्निरवद्यमीप्सितं निशम्य पुंसामपवर्गवर्द्धनम् ॥ धियाभिनंद्यात्मवतां सतां गतिर्बभाष ई
षत्स्मितशोभिताननः ॥१२॥ श्रीभगवानुवाच ॥ योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे ॥ अत्यंतोपरतिर्य
त्र दुःखस्य च सुखस्य च ॥१३॥ तमिमं ते प्रवक्ष्यामि यमवोचं पुरानघे ॥ ऋषीणां श्रोतुकामानां योगं सर्वांगनै
पुणम् ॥१४॥ चेतः खल्वस्य बंधाय मुक्तये चात्मनो मतम् ॥ गुणेषु सक्तं बंधाय रतं वा पुंसि मुक्तये ॥१५॥

तिमन्वत्र इत्यर्थः आत्मज्ञानयोगं प्रशंसन्नाह ॥ अत्यंतेति ॥ यत्र यस्मिन्नाध्यात्मिके योगे निष्पन्ने सति दुःखस्य सुखस्य च वैषयि
कसुखदुःखयोरत्यंतमुपरतिर्विनाशः भवति ॥१३॥ यम् आत्मयोगं श्रोतुकामानां ऋषीणां पूर्वकालेहमवाचमुक्तवानस्मि
तमिममात्मयोगं उक्तभिर्बहुभिरंगैः शमदमादिभिर्नैपुण्यं यथा भवति तथा ते तुभ्यं प्रवक्ष्यामि ॥१४॥ एवमध्यात्मयोगम
वतार्यात्र प्रकृतिविविक्तात्मस्वरूपग्रहयग्रहणयोग्यमनसः ॥ स्वरूपं कथयिष्यंस्तावन्मनसः एव बंधमोक्षकारणत्व

श्री·म·

॥१६२॥

रूपत्वात्किंद्रियाणांतर्पणांतर्पणात्मिनितरांभ्रंशात्निर्विण्णाःविना इंद्रियतर्पणात्मोहे नैवैभवेतिवक्तव्यं निर्वेदइत्युक्तं इत्यत आह ॥ हेप्रभोसंभाव्यमा
नेनसंपाद्यमानेनयेनेंद्रियतर्पणेनांधमंधयतीत्यंधंतमः अज्ञानंप्रविष्टास्मि ॥ ६ ॥ दुःपारस्यापारस्यांधस्यतमसः पारंगमयतीति
पारगः त्वमेव श्रेष्ठं चक्षुः मेमयाजन्मनामंतत्वम्मामाराल्लब्धम् ॥ ८ ॥ तद्देवप्रपंचयति ॥ यइति ॥ पुंसांजीवानमीश्वरोनियंता आद्यो
जगत्कारणमात्मनोयोभगवान्सभवान्नममास्यांधस्यलोकस्यचक्षुः चक्षुरधिष्ठानात्सूर्य इवोदितः यद्वा सूर्य इवेत्येतेस्यउत्तर

देवहूति च ॥ निर्विण्णानितरांभ्रमन्नस्मिरिंद्रियतर्पणात् ॥ येनसंभाव्यमानेनप्रपन्नांधंतमः प्रभो ॥ ७ ॥ तस्यत्वंतमसो
ध्यस्य दुःपारस्याद्यपारगः सचक्षुर्जन्मनामंतेलब्धं मेत्वदनुग्रहात् ॥ ८ ॥ य आद्योभगवान्पुंसामीश्वरोवैभवा
न्किल ॥ लोकस्यतमसांधस्यचक्षुःसूर्य इवोदितः ॥ ९ ॥ अपिमेदेवसंमोहमपाकृष्टुंत्वमर्हसि ॥ योऽवग्रहोऽहं
ममेतीत्येतस्मिन्योजितस्त्वया ॥ १० ॥ तंत्वागताहं शरणंशरण्यंस्वभृत्यसंसारतरोः कुठारं ॥ जिज्ञासयाहंप्रकृतेःपरस्यनमा
मिसद्धर्मविदांवरिष्ठं ॥ ११ ॥ नान्वयःतदाचक्षुरूपउदितः ॥ ९ ॥ उदितस्सूर्य इवमेममसंमोहमपाकृष्टुमपनेतुं हेदेवत्वमर्हसि कोसौ
संमोहः योपाकृष्टव्यइत्यत्राह अ स्मिन्देहेऽहंममेतिसंवेरूपोवग्रहोभिमानःत्वयैवयोजितःसत्वेसमर्थः त्वत्संकल्पादेवस्यामो
हस्त्वयैवचापिनवस्त्वर्थः योवंधकः सत्वंमोचकइतिन्यायादितिभावः ॥ १० ॥ तमुक्तविधंस्वभक्तानांसंसारएवतरुस्तस्यकुठा
रं कर्तुरेवसाधकत्वंविवक्षितं ॥ सद्धर्मविदांनिवृत्तिधर्मविदांवरिष्ठंश्रेष्ठंशरण्यंशरणार्हंत्वांमहत्प्रकृतेःपुरुषस्यजीवस्येदंपरमा ॥१६२॥

पुंसांवर्षीयसःश्रेष्ठस्यसर्वयोगिनांचरिष्णुःवरिष्ठस्यास्यकपिलस्यविश्रुतोकार्त्स्न्येश्रवणादतर्पः॥श्रुतोदेवःकपिलोयेनतस्यममासव
इंद्रियाणिभिरपिभृशंनतृप्यंति॥१॥स्वछंदात्मास्वेछोपात्तशरीरोभगवान्कपिलःआत्ममाययास्वसंकल्पेनयद्यच्चरितंविधत्तेकरोतस्य
र्षःतानिकीर्त्तनीयानीचरितानिश्रद्दधानस्यशुश्रूषावरान्वितस्यमेमह्यंकीर्त्तय॥२॥एवमापृष्टःसूतोविदुरेणैवमेवपृष्टोमैत्रेयउ
क्तवानित्याह॥द्वैपायनसखःद्वैपायनस्यसखाभगवान्मैत्रेयएवमान्वीक्षिक्यांतत्वनिरूपणेप्रचोदितःप्रवर्त्तितःविदुरंप्राह

नह्यस्यवर्ष्मणःपुंसांवरिम्णःसर्वयोगिनाम्॥विश्रुतौश्रुतदेवस्यभूरितृप्यंतिमेसवः॥१॥यद्यद्विधत्तेभग
वान्स्वछंदात्मात्ममायया॥तानिमेश्रद्दधानस्यकीर्त्तन्यान्यनुकीर्त्तय॥२॥सूतउवाच॥द्वैपायनसखस्त्वेवंमैत्रे
योभगवांस्तथा॥प्राहेदंविदुरंप्रीतआन्वीक्षिक्याप्रचोदितः॥३॥मैत्रेयउवाच॥पितरिप्रस्थितेरण्यंमातुःप्रि
यचिकीर्षया॥तस्मिन्बिंदुसरेवात्सीद्भगवान्कपिलःकिलः॥४॥तमासीनमकर्माणंतत्वमार्गाग्रदर्शनम्॥स्व
सुतंदेवहूत्याहधातुःसंस्मरतीवचः॥५॥ उवाच॥३॥उक्तिमेवाहपितरीत्यादिनापितरिकर्दमेरण्यंप्रतिप्रस्थितेसतिभगवान्
कपिलःमातुर्देवहूत्याःप्रियंकर्तुमिछयातस्मिन्नेवबिंदुसरस्तीरेऽवात्सीदुषितवान्॥४॥आसीनमुपविष्टंतत्वमार्गस्याग्रंपारंप
श्यतीतितंस्वसुतंकपिलंदेवहूतिःधातुर्वचःएषमानवितेगर्भंप्रविष्टःकैटभार्दनः॥अविद्यासंशयग्रंथिंछित्वागांविचरि
ष्यतीतिब्रह्मवाक्यं॥शांतोतेहृदयग्रंथिमोदर्योब्रह्मभावनइतिकर्दमवाक्यंवासंस्मरंत्याह॥हेभूमन्त्वमसतांप्रकृतिपरिणाम

संप्रतिपृष्टव्यंपृच्छति सवाऽइतिद्वाभ्यां। सउक्तविधोमहाभागवतोऽनल्पबुद्धिः। परीक्षिद्येनवैयासकिशब्दितेनशुकोपदिष्टपुराणजेनज्ञानेनग
रुडध्वजस्यभगवतःपादमूलंभेजेप्राप॥१६॥ तदाख्यानंपुराणंनोऽस्मभ्यमाख्याहि। कथय कथंभूतंवदतांश्रेष्ठएवंतच्चपरंपुण्यंनिरतिशयपु
ण्यावहं। यद्वापरमुत्कृष्टंस्वतुल्याधिकपुराणांतररहितम् संवृताअसंकुचिताः। स्पष्टावाअर्थामुमुक्षूणामुपादेयाः॥ शास्त्रार्थाःप्रतिपा
द्यायस्मिंस्तत्। अत्यद्भुताभगवद्भक्तियोगनिष्ठायस्मात्तत्॥ अनंतस्यापरिच्छिन्नस्वरूपस्वरूपस्यभगवतआचरितैश्चेष्टितैः। प्रतिपाद्यैरुपप
न्नंयुक्तं।एतभागवतानामभिरामंश्रीभागवतमितिभावः॥ भागवतशब्दस्यान्यगामित्वव्युदासायविशिनष्टि। पारीक्षितंपरीक्षिताश्रुतं

सवैमहाभागवतःपरीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिः॥ ज्ञानेनवैयासकिशब्दितेनभेजेखगेंद्रध्वजपादमूलं॥१६॥ त
न्नःपरंपुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठं॥ आख्याह्यनंताचरितोपपन्नंपारीक्षितंभागवताभिरामं॥१७॥
सूतउवाच। अहोवयंजन्मभृतोद्यहास्मवृद्धानुवृत्त्यापिविलोमजाताः॥ दौष्कुल्यमाधिंविधुनोतिशीघ्रंमहत्तमा
नामभिधानयोगः॥१८॥

१७॥ इत्थंमुगवद्गुणानुवर्णनेप्रवर्तितस्तस्मावरात्मानंकृतार्थंमन्यते॥ अहोइति॥ सभावंशिरःकंपेना
विःकरोति। किंतन्नामेत्यत्रतद्देवदर्शयति॥ वयंविलोमजाअपि। ब्राह्मण्यांक्षत्रियाज्जाताअपिवृद्धानांज्ञानेनवयसाजन्मनाचवृद्धानां
भागवतानामनुवृत्त्याहेतुभूतयाअधुनाजन्मभृताप्रशस्तदेहधृतः। अस्माभवामहेत्याश्चर्येहर्षेवा। विलोमजानामपिहेत्वंतरेणप्राश
स्त्यमूलकोहर्षः। आश्चर्यंच। युक्तमेवेत्यभिप्रायेणाह। दौष्कुल्यमिति महात्मनांत्वादृशानामभिधानयोगःश्रवणव्याख्यानसंबंधः॥

दौष्कुल्यंदुष्कुलप्रभवत्वप्रयुक्तंहीनत्वमाधिंमनःक्लेशंवा
विधुनोतिनिरस्यति॥१८॥

भा० प्र०
१३८

यतो महत्तमानामभिधानयोगएवाधिंरोढुकुल्यं चविकनोति ॥ कुतः पुनः साक्षान्महत्तमैकांतपरायणस्य भगवतो नाम गृणतः कीर्तयतः पुं
सो दौष्कुल्यमाधिश्च संभाव्येत ॥ ननु कोसौ महत्तमैकांतपरायणभूतः । के तस्य महिमानः ॥ तन्नामग्रहणमात्रस्यैव कथं दौष्कुल्यादिपरि
हारकत्वं कथंतरां तद्भक्ताभिधानयोगस्य तथात्वमित्यतः । तं विशिंषन्नाह । यो भवानहर्णपाड्गुण्यः पश्चानंतशक्तिरनंताः शक्तयो यस्य
तथाभूतः । पावकस्य दाहकत्वशक्तिवत्तन्नामाभिधानं तु दौष्कुल्याद्यपनोदकशक्तिरस्तीति भावः ॥ यश्च स्वरूपेणानंतः पंचमहद्गुणत्वा
दनंतगुणत्वादनंतमाहुः ॥ सत्यं ज्ञानमनंतं इत्याद्या वेदांतास्तस्य नाम गृणतस्त्वन्वयः । अथवा तोऽनंतगुणत्वाच्चैतन्येनेव तस्मिन्स्वरू

कुतः पुनर्गृणतो नाम तस्य महत्तमैकांतपरायणस्य ॥ योऽनंतशक्तिर्भगवाननंतो महद्गुणत्वाद्यमनंतमाहुः ॥ १९ ॥
एतावतालं ननु सूचितेन गुणैरसाम्यानतिशायनस्य ॥ हित्वेतरान्प्रार्थयतो विभूतिर्यस्यांघ्रिरेणुं जुषतेनभीप्सोः
॥ २० ॥

यतो गुणतश्चानंत्यमनंत परब्रह्मेति निमित्तमिति सूचितं ॥ अनेन स्वभक्ताभिधानयोगस्य दौष्कुल्याद्यपनोदनोपयुक्तानेकगुणाश्र
यत्वमुक्तं ॥ गुणेनामनंतत्वं नामानन्यमनितरसाधारणं चानितरसाधारणानवधिकगुणत्वादित्यर्थः ॥ १९ ॥ महद्गुणशब्दाभिप्रेतमेव
विशदयंस्तत्संगत्या दर्शयामीत्यभिप्रायेणाह । एतावतेति ॥ गुणैर्न विद्यते साम्यं यस्य तैर्न विद्यतेऽतिशायनमतिशयो यस्य साम्यश्च
सावनतिशायिनस्तस्य निःसमाभ्यधिकगुणस्येत्यर्थः । सूचितेन दिङ्मात्रदर्शितेनैतावता महिम्नालं । किंबहुना किं तद्दर्शनीयमित्यभि
प्रायः । कियता विभूतिर्लक्ष्मीः प्रार्थ्यमानानपि इतरान्ब्रह्मादीन्हित्वानभीप्सोरकामयमानस्यापि यस्य भगवतोऽंघ्रिरेणुं जुषते सेव

[illegible] ॥ १९ ॥ [illegible]

१३८

अन्यमपि तन्माहात्म्यदिशं दर्शयामीत्यभिप्रायेणाह॥ अथापीति। अथाप्यपि च पुनरपि चेत्यर्थः। यस्य भगवतः। वामपादांगुष्ठनखाक्
ग्रस्तुतं विरिंचेन ब्रह्मणोपहृतं समर्पितमर्हणमर्घ्यं जलं गंगात्मकं कर्तृ। सेशं इंद्रादिलोकपालैः। सहितं जगत्पुनातीत्येतावता।
सूचितेन महिम्नालमित्यर्थः॥ एवंविधमहागुणगणयुक्ताच्छ्रीनिवासात्तीर्थपदान्मुकुंदादन्यः को वा लोके भगवत्पदार्थः। भगवत्प
दाभिधेयः॥ ज्ञानशक्तिबलैश्वर्यवीर्यतेजः प्रभृत्यसंख्येयकल्याणगुणपौष्कल्यवदभिधायकेन भगवच्छब्देन प्रवृत्तिनिमित्तानामा।

अथापि यत्पादनखावसृष्टं जगद्विरिंचोपहृतार्हणांभः॥ सेशं पुनात्यन्यतमो मुकुंदात्को नाम लोके भगवत्पदार्थः
॥२१॥ यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु संगमूढं॥ व्रजंति यत्पारमहंस्यमंत्यं यस्मिन्नहिंसोपशमः स्वधर्मः॥२
॥२॥

अयः पुरुषोत्तमादन्यः। को वाभिधीयते न कोपीत्यर्थः॥ एतेन योनंतशक्तिर्भगवान्नित्याकांक्षाशामिता॥२१॥ यत्रेति। यत्र यस्मिन्
भगवति मुकुंदे अनुरागयुक्ताः संतो धीराः जितेंद्रियाः सहसाऽसहसाऽकस्मादेव देहे आदिशब्दात्तदनुबंध्यादिषु चोढं मूलं संगमपो
ह्य तत्पारमहंस्यमंत्यं तुरीयं परमहंसाश्रमं व्रजंति। यस्मिन्पारमहंस्याश्रमेऽहिंसा उपशम अस्य स्वानुरूपो धर्मः दयादिरस्ति॥२२॥

भा०प्र
१३७

एवंविधस्य महात्म्यशालिनो भगवतो महात्म्यवतो महात्म्यं वर्णयितुमहं न प्रभुस्तथापि यथामति वर्णयामीत्यभिप्रायेणाह। अहमिति
अर्यमणः हे ज्ञानाधिकाः। ऋ गतौ गतस्य धीवृद्धयाः। अत्र भगवन्माहात्म्ये भवद्भिः पृष्टोहं। यद्वा हे अर्यमणः सूर्याः। त्रयीमूर्तयः॥
यावानात्मनाबुद्धेरवगमः प्रसरः यावान्महिमा मद्बुद्धिविषयो भवति॥ तावंतं महिमानमाचक्षे वर्णयामि॥ तथाहि यथा पतत्रिणः।
पक्षिणो वाणा वा। आत्मसमं स्वबलानुरूपं एव नभः प्रतिपतंति उड्डंति॥ तथा विपश्चितोपि समं स्वबुद्धिबलानुरूपं विष्णुगतिं भग
वन्महिमानं पतंति विषयीकुर्वंति। न हि पतत्रिणो नभसि उड्डीना नभसोऽभावान्निवर्तंते स्वबलहीनान्निवर्तंते एवं विपश्चितो मतिह्र

अहं हि पृष्टोऽर्यमणो भवद्भिराचक्ष आत्मावगमोत्र यावान्। नभः पतंत्यात्मसमं पतत्रिणस्तथा समं विष्णुगतिं विप
श्चितः॥२३॥ एकदा धनुरुद्यम्य विचरन्मृगयां वने॥ मृगाननुगतः श्रांतः क्षुधितस्तृषितो भृशं॥२४॥ ॥ ॥ ॥॥

यादेव निवर्तंते न तु भगवन्महिम्नः इयत्तादित्यर्थः॥ तथा चोक्तमन्यत्रापि इषुक्षयान्निवर्तंते नांतरिक्षक्षितिक्षयान्मतिक्षयान्निवर्तंते
न गोविंदगुणक्षयादिति॥२३॥ अथ तत्पृष्टं भागवताख्यं पुराणं परीक्षिच्छुकसंवादरूपं शुश्रावयिषुस्तावत्संवादप्रभृतिं तदुपोद्घात
रूपं परीक्षिच्छुकयोः संगमं परीक्षितः प्रायोपवेशं तन्मूलं विप्रशापं च यन्निमित्तं चाह। एकदेत्यादिना यावत्स्कंधसमाप्तिः। तावच्छाप
निमित्तमाह षड्भिः॥ एकदेति कदाचित्परीक्षिद्धनुरुद्यम्य उद्धृत्य। वने मृगयां चरन्नयमानः। श्रांतः निगतरां तृषितः क्षुधा संजातास्य तृ १३९
डस्य संजातेति तया तारकत्वादितिच॥२४॥

क्वचिदपि जलाकरमपश्यमानस्तमाश्रमं प्रविवेश । आंगिरस्याश्रमं प्रविष्टवानित्यर्थः । तत्र मुनिमांगिरसं ददर्श कथंभूतमासीनमुप
विष्टं शांतं प्रसन्नं मीलिते लोचने येन तं ॥२५॥ प्रतिरुद्धानि निर्व्यापारीकृतानीन्द्रियादीनि येन तमत एवोपारतं बाह्यव्यापाराद्उपरतं स्था
नत्रयाज्जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयात्परं स्वात्मानं प्राप्तमनुसंदधंतं ब्रह्मभूतं ब्रह्मविषयकभावनयान्वितमविक्रियं षड्भयु
क्तविकाररहितं ॥२६॥ विप्रकीर्णाभिर्विक्षिप्ताभिर्जटाभिश्छन्नमावृतं । रौरवेण रुरोर्मृगस्य संबंधिना चर्मणाछन्नं । एवंभूतं मुनिं विशु

जलाशयमचक्षाणः प्रविवेश तदाश्रमं ॥ ददर्श मुनिमासीनं शांतं मीलितलोचनं ॥२५॥ प्रतिरुद्धेंद्रियप्राणमनोबु
द्धिमुपारतं ॥ स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियं ॥२६॥ विप्रकीर्णजटाछन्नं रौरवेणाजिनेन च । विशुष्यत्तालु
रुदकं तथाभूतमयाचत ॥२७॥ अलब्धतृणभूम्यादिरसंप्राप्तार्घसूनृतः ॥ अवज्ञातमिवात्मानं मन्यमानश्चुको
पह ॥२८॥ अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः ॥ ब्राह्मणं प्रत्यभूद्ब्रह्मन्मत्सरो मन्युरेव च ॥२९॥ ॥ ॥

ष्यंतौ तालुवदनं च यस्य तथाभूतो राजोदकं जलमयाचत ॥२७॥ न लब्धं तृणं भूमिरादिशब्दादन्यच्चोपवेशार्थं येन । न संप्राप्तमर्घं सूनृतं
च मधुरवाक्यं येन तथाभूतोऽत एवावज्ञातमवहेलितमिवात्मानं मन्यमानो राजा चुकोप ॥२८॥ क्षुत्तृड्भ्यामर्दितः पीडित आत्मा शरी
रं यस्य तस्य राज्ञोऽत एवाभूतपूर्वः । पूर्वं भूतो भूतपूर्वः । न भूतपूर्वोऽभूतपूर्वः । कदाचिदपि पूर्वं न जात इत्यर्थः ॥ मत्सरो मन्युश्च हे ब्रह्मन् ब्रा
ह्मणं मुनिं प्रत्यभूदभूव मन्युः क्रोधः अमर्ष इति यावत् । मत्सरो द्रोहोऽपचिकीर्षेति यावत् ॥२९॥ ॥ ॥ ॥

भा०प्र० ततः स तु राजा निर्गच्छन् निर्गन्तुमुद्यतो रुष्टो ब्रह्मर्षेरंसे धनुः कोट्या धनुषो ग्रभागेन गतप्राणं सर्पं निधाय पुरं ययौ ३०। किमर्थं निहि
१८० तवानित्यत्र राज्ञः स्वाभिप्रायमाविःकरोति। एष इति। किमेष मुनिर्निभृतानि नियमितान्यशेषाणि करणानीन्द्रियाणि येन। मीलिते ईक्ष
णे लोचने येन। तथाभूतः। यथार्थसमाधिनिष्ठः। आहोस्वित् क्षत्रबन्धुभिरस्माकं किं प्रयोजनं विद्यत इति बुद्ध्या मृषा मिथ्याभूतः स
माधिर्यस्य तथाभूत एवमास्ते इत्यभिप्रायेण निधाय गत इत्यर्थः। ३१। ततस्तस्य मुनेः पुत्रः। अतितेजस्वी ब्राह्मतेजः संपन्नः। बाला

स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा॥ विनिर्गच्छन् धनुःकोट्या निधाय पुरमागमत्॥३०॥ एषं किं निभृताशेषकरणो
मीलितेक्षणः॥ मृषा समाधिराहोस्वित् किं नु स्यात् क्षत्रबंधुभिः॥३१॥ तस्य पुत्रोऽतितेजस्वी विहरन् बालकोऽर्भकैः
राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत्॥३२॥ अहो अधर्मः पालानां पीनां बलिभुजामिव॥ स्वामिन्यघं यद्दा
सानां द्वारपानां शुनामिव॥३३॥ ब्राह्मणैः क्षत्रबंधुर्हि द्वारपालो निरूपितः। स कथं तद्गृहे द्वाःस्थः सभांडं भोक्तुमर्ह
ति॥३४॥

कोऽर्भकैः सह क्रीडंस्तातं पितरं राज्ञाऽघं प्रापितमपराधविषयीकृतं श्रुत्वा तत्रैवेदं वक्ष्यमाणमब्रवीत्॥३२॥ तदेवाह
अहो इति पंचभिः। बलिभुजां शुनां वायसानामिव वा। पीनां राधितानां पालानां राज्ञामहोऽधर्मः। पश्यंतां। कोऽसावधर्मः॥ द्वारपानां
शुनामिव दासभूतानां राज्ञां स्वामिनि ब्राह्मणेऽघमपराध इति यदेष एवाधर्मः॥३३॥ तदेवोपपादयति। क्षत्रबंधुर्हि ब्राह्मणैर्द्वा श्री १८०
रपालत्वेनैव नियोजितः। स द्वाःस्थः। क्षत्रबंधुस्तद्गृहे ब्राह्मणगृहे स्वैव कथं सभांडे एकपात्रे यथा तथा भोक्तुमर्हति। योग्यो भवेत्

उत्पथप्रतिपन्नानां शास्तरि दंडयितरि कृष्णे भगवति स्वलोकं प्रतिगते सति तान् भिन्नमर्यादानहमद्य शास्मि शिक्षये मम बलं प
श्यत ॥ ३४ ॥ वयस्यान् समानवयस्कान् बालकान् प्रतीत्युक्त्वा रोषेण ताम्रे ईक्षणे यस्य स ऋषिबालकः ॥ कौशिक्या नद्या आप
उपस्पृश्य आचम्य वाग्वज्रं शापात्मकं वाग्रूपं वज्रमिव ससर्ज प्रायुक्त ॥ ३५ ॥ वाग्वज्रमेव दर्शयति ॥ इतीत्यमुल्लंघितमर्यादायेन
तं मे ततस्तात पिता ॥ तस्यापकारिणं कुलनाशकं राजानं इतः सप्तमेऽहनि मया चोदितः प्रेरितस्तक्षकः सर्पो दंक्ष्यतीति ॥ ३६ ॥ ततो ॥

कृष्णे गते भगवति शास्तर्युत्पथगामिनां ॥ तद्भिन्नसेतूनद्याहं शास्मि पश्यत मे बलं ॥ ३४ ॥ सूत उवाच ॥ इत्युक्त्वा रो
षताम्राक्षो वयस्यानृषिबालकान् ॥ कौशिक्याप उपस्पृश्य वाग्वज्रं विससर्ज ह ॥ ३५ ॥ इति लंघितमर्य्यादं तक्ष
कः सप्तमेऽहनि ॥ धक्ष्यति स्म कुलांगारं चोदितो मे ततद्रुहं ॥ ३६ ॥ ततोऽभ्येत्याश्रमं बालो गले सर्पकलेवरं ॥ पितरं
वीक्ष्य दुःखार्तो मुक्तकंठो रुरोद ह ॥ ३७ ॥ स वा आंगिरसो ब्रह्मन् श्रुत्वा सुतविलापनं ॥ उन्मील्य शनकैर्नेत्रे दृष्ट्वा स्वां
से मृतोरगं ॥ ३८ ॥ विसृज्य पुत्रं पप्रच्छ वत्स कस्माद्धि रोदिषि ॥ केन वा ते प्रतिकृतमित्युक्तः स न्यवेदयत् ॥ ३९ ॥

बालः पितुराश्रममागत्य गले कंठे सर्पो यस्य तत्कलेवरं यस्य तं पितरमालोक्य दुःखपीडितो मुक्तः कंठो येन सः ॥ उच्चैः स्वरयुक्त इत्यर्थः
रुरोद रोदनं कृतवान् ॥ ३७ ॥ ततो हे ब्रह्मन् स वै आंगिरसः सुतस्य विलापनं श्रुत्वा शनैर्नेत्रे उन्मील्य अंसे मृतमुरगं दृष्ट्वा ॥ ३८ ॥ तं परि
हृत्य पुत्रं पप्रच्छ ॥ पुत्रमेवाह ॥ हे वत्स कस्माद्धेतोः त्वमिति शेषः ॥ किं रोदिषि रोदनं करोषि ॥ केन वा ते तवापकृतं ॥ भावे क्तः ॥ इतीत्यमु

क्तो बालकः ॥ सर्वं वृत्तं न्यवेदयत् कथयामास ॥ ३९ ॥

भा०४
१४१ ततोऽनर्हं ईशापानर्हं राजानं शप्तमाकर्ण्य ब्राह्मणः आंगिरसः पुत्रं नाभ्यनंदत् । तदेवदर्शयति ॥ अहो इति सार्द्धैः सप्तभिः । हे अंग त्वया
महदंहः पापमतो कृतं बत । किं तदल्पीयसि द्रोहे ऽल्पापराधे निमित्ते उरुर्दंडो धृतः कृतः इत्येतत् ॥ ४२ अपकृते नापि राज्ञा नाप
कार्य्य इत्याह । नवा इति ॥ हे अंग विपक्वबुद्धे नृभिरपकृतैर्नरदेवो नापकार्यः ॥ कुतस्तं नरदेवं पराख्यं परमगुरुं खंड इति सामर्थ्यलब्धार्थः
नरदेवनाम्नि रथांगपाणौ विनिवस्यमाणेनानुगुणात् । नरदेवस्वरूपा ह्यामात्रमेवषतुसाक्षादीश्वर एवेतिभावः । तं संमातुमेवार्हसि

निशम्य शप्तमतदर्हं नरेंद्रं स ब्राह्मणो नात्मजमभ्यनंदत् ॥ अहो बतांहो महदद्य ते कृतमल्पीयसि द्रोह उरुर्दमो
धृतः ॥ ४२ ॥ न वै नृभिर्नरदेवं पराख्यं संमातुमर्हस्यविपक्वबुद्धे । यत्तेजसा दुर्विषहेण गुप्ता विंदंति भद्राण्य-
कुतोभयाः प्रजाः ॥ ४३ ॥ अलक्ष्यमाणे नरदेवनाम्नि रथांगपाणावयमंग लोकः ॥ तदा हि चौरप्रचुरो विनंक्ष्य-
त्यरक्ष्यमाणोऽविवरूथवत् क्षणात् ॥ ४४ ॥

नत्वपकर्तुं । तत्र हेतुमाह । यद्यस्माद्यद्विषया नपकारात् तस्य दुर्विषहेण शत्रुभिरसोढव्येन तेजसा गुप्ताः प्रजाः । कुतश्चिदपिभ
यरहिताः भद्राणि मंगलानि सुखानीति यावत् विंदंति लभंते । तस्माल्लोकसुखावहो नरदेवो न हंतव्य इति भावः ॥ ४३ ॥ विपर्ययेऽ
नर्थमाह । अलक्ष्यमाण इति त्रिभिः ॥ नरदेवाख्ये चक्रपाणौ विष्णावलक्ष्यमाणेऽविद्यमाने सत्यं हे पुत्र तदा ह्ययं लोकः । अरक्ष्य-
माणः अतएव चौरभयिष्टः सन् वृकप्रचुरविसंघ इव क्षणोल्लंस्यति नष्टो भविष्यति ॥ ४४ ॥ ॥ ॥ ॥ ॥ १४१

वंस्यं तु कानो हानिरित्यत्राह॥ तदिति॥ तत्पापमनन्वयमस्मत्संताननाशकमघाघ्नानास्मानुपैति॥ किंयस्मात् पंचविलुंपकाद्धेतोर्वसोर्द्धन
स्य नष्टनाथस्य रक्षिकरहितस्य सतः पुरवो बहुलो दस्यवो येषां ते जनाः॥ परस्परं घ्नंति शपंति वाक्पारुष्यं कुर्वंति वृंजते छिंदंत्यर्थाद्वृंजते ह
रंतीत्येतत्॥४५॥ किंच॥ तदा नरदेवनाम्नि रथांगपाणे बलस्य माणे सति वर्णाश्रमाचारयुतः॥ त्रय्या आगतस्त्रयीमयः॥ ततः आगतस्य
धिकारे मयट् वेति मयट् वैदिके स्वर्थः नृणामार्यधर्मः॥ सत्तो धर्मश्च विलीयते नंक्ष्यति ततो धर्मलयादर्थकामयोर्निवेशितत्क्ष्माभिनिविष्टः

॥ तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य वसोर्विलुंपकात्॥ परस्परं घ्नंति शपंति वृंजते पशून् स्त्रियोर्थान्
पुरुदस्यवो जनाः॥४५॥ तदार्यधर्मश्च विलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः॥ ततोर्थकामाभिनिवे
शितात्मनां शुनां कपीनामिव वर्णसंकरः॥४६॥ धर्मपालो नरपतिः स तु सम्राड् बृहच्छ्रवाः॥ साक्षान्महा
भागवतो राजर्षिर्हयमेधयाट्॥४७॥

आत्मा मनो येषां नृणां शुनामिव कपीनामिव च संकरो भविष्यति॥४६॥ एवं सामान्येन नरदेवस्याभिग्रहोत्वमुक्त्वाथ प्रकृतं परी
क्षितं निर्दिश्याह॥ धर्मपाल इति॥ स तु नृपतिः परीक्षिद्धर्मपालः॥ वर्णाश्रमधर्ममर्यादापालकस्तत्पालत्वेन विश्रुतः॥ विपुलकीर्तिः
सार्वभौमश्च तत्रापि महाभागवतः॥ अनेन ब्रह्मविद्पकर्तृणां नो गतिरेव नास्तीति भावः॥ राजर्षिः॥ केवलराजऋषिरेव हयमेधेन
याट् यष्टवान्॥४७॥

भा० प्र० १४२ सुतेनऽल्पीयसः क्षमस्तेन सुतः ॥ अतएव दीनस्य तथाभूः । सर्वथाऽस्मच्छापं नार्हति । एवमात्मजममि मिनंद्य तत् ॥ कृतादघादात्मनोनर्थं माशंक्य भ
गवंतं संमापयति ॥ अपापेष्विति ॥ सर्वात्मा सर्वांतरात्मा शप्तृशप्ययोरप्यंतरात्मतयावस्थित इति भावः । भगवान् पापेषु स्वभक्तेष्वनेनाप
क्वबुद्धिना विवेकरहितेन बालेन कृतं पापं हंतुमर्हति ॥ ४७ ॥ मास्मान्मद्विषयाधः कथंचिन्मच्छरणवरणासहः स्यान्मद्भक्तविषयापराधस्तु न
कथंचिदपि किंतु तैरेव सह्यः । इत्येवंविधं भगवद्धर्ममायमालोच्य तानेव संमापयति ॥ तिरस्कृता इति ॥ तिरस्कृताः । अपिप्रलब्धाः अ

क्षंतुमर्हति ॥ ४७ ॥ तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि ॥ नास्य तत्प्रतिकुर्वंति तद्भक्ताः प्रभवोपि हि ॥
॥ ४८ ॥ इति पुत्रकृताघेन सोनुतप्तो महामुनिः ॥ स्वयं विप्रकृतो राज्ञा नैवाघं तदचिंतयत् ॥ ५० ॥ ॥ ॥ ॥ ॥

तारिता अपि क्षिप्ता निंदिता अपि हता ताडिता अपि तद्भक्ताः भगवद्भक्ताः । प्रभवोपि शापकर्तुं समर्था अप्यस्य तिरस्कारकर्तुः त
त्कृतं तिरस्कारादिकर्तृं प्रतिन प्रकुर्वंति किंतु केवलं सहंत्यति ॥ ४८ ॥ इतीत्थं स महामुनिः पुत्रकृतेनाघेनानुतप्तः । राज्ञा स्वयं वि १४२
प्रकृतोपि तद्राजकृतमघमपराधं नैवाचिंतयन्नचिंतितवान् ॥ ५० ॥ ॥ ॥ ॥ ॥ ॥

कुतो नाविंतयदित्यत्राह ॥ प्रायश इति । लोके परैरन्यैर्द्वंद्वेषु शीतोष्णसुखदुःखादिषु योजिताः संयोजिताः ॥ अपि साधवः प्रायेण न व्यथंा
तिनरूष्यंति ॥ तथा दुःखे योजिता न व्यथंतीत्यर्थः ॥ कुतः यतः आत्मा तेषामनः ॥ गुणाश्रयः शीलाश्रयः ॥ यद्वा ऽगुणाश्रय इति छेदः ।
गुणकार्यरागद्वेषाद्यनाश्रयः ॥ ५१ ॥ इति प्रथमे ऽष्टादशः ॥ १८ ॥ महीपतिरिति । अथ स्वपुरप्रवेशानंतरं महीपतिः । परीक्षिदात्मकृतं तद्गुरु
गनिधानरूपं गर्ह्यं कर्म चिंतयन्दुर्मनाः आत्मनिंदापरो बभूवेत्यर्थः । तदेव दर्शयति सार्द्धद्वयेन ॥ अहो मया नीचवन्निरागसि निरपरा

प्रायशः साधवो लोके परैर्द्वंद्वेषु योजिताः ॥ न व्यथंति न हृष्यंति यत आत्मा गुणाश्रयः ॥ ५१ ॥ इति श्रीभागवते महापुराणे प्र
थमस्कंधे ऽष्टादशोऽध्यायः ॥ १८ ॥ सूत उवाच ॥ महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिंतयन्नात्मकृतं सुदुर्मनाः ॥ अहो मया
नीचमनार्यवत्कृतं निरागसि ब्रह्मणि गूढतेजसि ॥ १ ॥ ध्रुवं ततो मे कृतदेवहेलनाद्दुरत्ययं व्यसनं नातिदीर्घात् ॥ त
दस्तु कामं त्वघनिःकृताय मे यथा न कुर्यां पुनरेवमद्धा ॥ २ ॥

धिनि गूढतेजसि अनभिव्यक्ततेजः सामर्थ्यं यस्मिन् ब्रह्मणि ब्राह्मणे विषये ऽमीवं निकृष्टं कर्म कृतममीवं पापं ॥ १ ॥ ततोऽनीचात्कृताद्देवहेलन
नरूपात्कर्मणो निमित्तात् न केवलं मया ब्राह्मणो वहेलितः । किंतु साक्षाद्देवो भगवानेवेत्यभिप्रायेण देवहेलनादित्युक्तं । मे मम नातिदीर्घात्
समनंतरकालमेव दुरत्ययमतिवर्तितुमशक्यं ॥ व्यसनं दुःखं ध्रुवं नूनं भविष्यति तत्स्वस्य हितमेव मन्यते तदिति ॥ तद्व्यसनं ममाघनिः
कृताय पापविशुद्धये कामं प्रकामं मम अस्तु किमनिष्टं प्रार्थयसे इत्यत्राह यथा पुनरेवंविधमघं न कुर्यां मद्धा न कुर्यां एव । अद्धेति स्फुरणं यो ।

भा०स्कं० १४३

अद्येति । प्रकोपितं कोपं प्रापितं यद्ब्रह्मकुलं ब्रह्मकुलं तत्कर्तृकनिग्रहात्मको नलोऽग्निरद्यैव मम राज्यं बलं सैन्यं प्रभूतधनकोशं च दहतु यथा ।
पुनरभद्रस्य मम द्विजेभ्यो देवेभ्यो गोभ्यश्चापचिकीर्षायुक्ता चैवंविधा पापीयसी बुद्धिर्माभूत्तथा शिक्षार्थं दहत्विति भावः ॥ ३ ॥ इत्थं सचिंतय
न्राजा यथा येन प्रकारेण तक्षकाख्यो निर्ऋतिर्मृत्युर्मुनेः सुतेनोक्तः शापात्मको ह्यापप्रचोदितस्तथैव सुश्राव ॥ ततः स राजा प्रसक्तस्य
विषये क्षितिशेषः ॥ विषयासक्तस्य तस्य विरक्तिकारणं ॥ हेतुगर्भमिदं विरणत्वादचिरेण तक्षकरूपमनलं साधु यथा तथा मेने । अ

अद्यैव राज्यं बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे ॥ दहत्वभद्रस्य पुनर्न मेऽभूत्पापीयसी धीर्द्विजदेवगोभ्यः
॥ ३ ॥ स चिंतयन्नित्थमथाशृणोद्यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः ॥ स साधु मेने न चिरेण तक्षकान-
लं प्रसक्तस्य विरक्तिकारणं ॥ ४ ॥ अथो विहायेममम् च लोकं विमर्षितौ हेयतया पुरस्तात् ॥ कृष्णांघ्रिसेवा
मधिमन्यमान उपाविशत्प्रायममर्त्यनद्यां ॥ ५ ॥

अथो ततः ॥ इमममुं च लोकं विहाय लोक्यत इति लोकः फलं सुखमिति यावत् ॥ ऐहिकामुष्मिकसुखस्पृहां विहायेत्यर्थः ॥ इदममुं च
लोकं विशिनष्टि । येन पुरस्तात्पूर्वमेव हेयतया विमर्षितौ विचारपूर्वकं हेयत्वेन निश्चितौ ॥ तममुं च लोकं विहायेत्यन्वयः ॥ ततः कृष्ण
स्य भगवतोऽङ्घ्रिसेवामधिमन्यमानः । निरवधिपुरुषार्थसाधनतया मन्यमानः । अमर्त्यनद्यां देवनद्यां गंगायां प्रायमनशनव्रतमु- १४३
पाविशदनशनव्रतेन दीक्षितो बभूवेत्यर्थः ॥ ५ ॥

स्वगृहेऽन्यत्र वा प्रायमुपविश्य किं विशेषेणामर्त्यनद्यामेव तदुपाविशदित्यत्र तां विशिंषन्नाह । या वा इति लसंत्याः श्रीतुलस्या मिश्रो यः
कृष्णस्यांघ्रिरेणुस्तेनाभ्यधिकस्य प्रशस्यां तु नोंऽभसो नेत्री प्रवहंती या अमर्त्यनदी उभयत्र इहामुत्र च सेशान् लोकपालैः सहितान् लोकान्
जनान् पुनाति तां नदीं मरिष्यमाणः को वा पुमान्न सेवेत । सर्वोपि सेवेतेत्यभिप्रायेण तस्यामेव प्रायमुपाविशदित्यर्थः लसच्छ्री तुलसि
श्री कृष्णांघ्रिरेणुना हेतुनाम्भोभ्यधिकस्याधिकरहितमेव तु तस्य नेत्री इति वार्थः ॥६॥ सपांडवेयपराहि दित्थं विष्णुपद्यां गंगायां प्रायो॥

या वै लसच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकांबुनेत्री ॥ पुनाति लोकानुभयत्र सेशान्कस्तां न सेवेत मरि
ष्यमाणः ॥६॥ इति व्यवच्छिद्य स पांडवेयः प्रायोपवेशं प्रति विष्णुपद्यां ॥ दध्यौ मुकुंदांघ्रिमनन्यभावो मुनिव्रतो
मुक्तसमस्तसंगः ॥७॥ तत्रोपजग्मुर्भुवनं पुनाना महानुभावा मुनयः सशिष्याः ॥ प्रायेण तीर्थाभिगमापदेशैः स्व
यं हि तीर्थानि पुनंति संतः ॥८॥

पवेशं प्रति व्यवच्छिद्य विनिश्चित्य । संकल्प्य मुक्तः ॥ समस्तेषु देहतदनुबंध्यादिषु संगो येन मुनीनां व्रतं यस्य । न विद्यतेऽन्यो भावना चिंता
यस्य सः ॥ मुकुंदांघ्रिं दध्यौ ॥ ध्यातवान् ॥७॥ तदा तत्र राज्ञः । संनिधौ महानुभावाः । सशिष्या मुनयो लोकं पुनानाः ॥ पवित्री कुर्वंतः । आ
जग्मुः भुवनं पुनानाः इत्येतदेवोपपादयति ॥ प्रायेण संतः साधवः । तीर्थयात्राव्याजैः स्वयमेव तीर्थानि पुनंति हि ॥ यथा च पुनंति तथो
पपादितं पुरस्तात्तीर्थी कुर्वंति तीर्थानीत्यर्थः ॥८॥

भा०मै०
१४४

॥ केचतेमुनयइत्यत्रतान्दर्शयति ॥ अत्रिरितिसार्द्धद्वयेन । गाधिसुतोविश्वामित्रः रामोभार्गवः । कुंभयोनिरगस्त्यः ॥ १० ॥ अन्येचदेव
र्षिश्रेष्ठाब्रह्मर्षिश्रेष्ठाराजर्षिवर्याअरुणादयश्चऋषयः । तानागतान्नानाविधार्षेयप्रवरान्समेतान्संघीभूतानभ्यर्च्यराजापरीक्षि
च्छिरसाववंदे ॥ ११ ॥ अथतेषुसुखंयथातथोपविष्टेषुसत्सुपुनरपिकृतःप्रणामोयेनसराजाउपस्थितस्तेषांसमीपेतिष्ठन्नभिगृहीतपा
णिः बद्धांजलिः । विवेकयुक्तंचेतोयस्यतथाभूतः स्वचिकीर्षितंकर्तुमिष्टंयत्तद्विज्ञापयामास ॥ १२ ॥ तदेवाह ॥ अहोइतिचतुर्भिः ॥ ना

अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरंगिराश्च ॥ पराशरोगाधिसुतोथरामउतथ्यइंद्रप्रमदेध्मवाहो
॥ ९ ॥ मेधातिथिर्देवलआर्ष्टिषेणोभारद्वाजोगौतमः पिप्पलादः ॥ मैत्रेयऔर्वः कवषः कुंभयोनिर्द्वैपाय
नोभगवान्नारदश्च ॥ १० ॥ अन्येचदेवर्षिब्रह्मर्षिवर्याराजर्षिवर्याअरुणादयश्च । नानार्षेयप्रवरांस्तान्समे
तानभ्यर्च्यराजाशिरसाववंदे ॥ ११ ॥ सुखोपविष्टेष्वथतेषुभूयः कृतप्रणामः स्वचिकीर्षितंयत् । विज्ञापयामास ।
विविक्तचेताउपस्थितोऽग्रेऽभिगृहीतपाणिः ॥ १२ ॥ परीक्षिदुवाच ॥ अहोवयंधन्यतमानृपाणांमहत्तमानुग्रह
णीयशीलाः

राज्ञांमध्येवयमहोधन्यतमाः उत्तमाः खलुः धन्यतमत्वेहेतुं वदन्नात्मनोविशिनष्टि ॥ महत्तमैर्भवद्भिरनु
ग्रहणीयमनुग्रहीतुंयोग्यंशीलंयेषां । यद्वा महत्तमानुग्रहणीयंमहत्तमानुग्रहलभ्यंशीलंयेषांतथाभूताः ॥ ॥ ॥ ॥ १४४

ऽनेवंभूतं राजकुलं निर्दहति ॥ राज्ञामिति ॥ ब्राह्मणानां भवतां पादशौचात्यादसेवामूलकविस्रुदेहूरादि सदृशं हूरात्ययं यद्राज्ञां कुलं।
तदृद्यैर्निंद्यं कर्म यस्य तथाभूतं भवति । ततः इति खिदे ॥१३॥ ननु महत्तमानुग्रहणीयशीलस्य तव कथमधना तन्निग्रहप्रवृत्तिरित्यत्र
तन्निग्रहोप्यनुग्रहरूप एवेत्याह ॥ तस्यैवाभीक्ष्णं पुनः पुनः गृहेषु व्यासक्तं चित्तं यस्य तस्य ममाघस्य प्रकृतब्रह्मविदपचाररूपस्य
परिहारक इति शेषः ॥ निर्वेदमूलः । देहतदनुबंध्यादिषु वैराग्यं च मूलो हेतुः । द्विजशापरूपः । परावरेशो भगवानेव प्रसक्तः प्रवृत्तः

राज्ञां कुलं ब्राह्मणपादशौचाद्दूराद्विसृष्टं बत कर्म गर्ह्यं ॥१३॥ तस्यैव मेघस्य परावरेशो व्यासक्तचित्तस्य गृहेष्वभी
क्ष्णं ॥ निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तो भयमाशु धत्ते ॥१४॥ तं मोपयातं प्रतियंतु विप्रा गंगा च देवी धृत
चित्तमीशे ॥ द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाम् ॥१५॥ ॥ ॥ ॥ ॥

मामनुग्रहीतुं भगवत्संकल्प एव द्विजशापव्याजेन प्रवृत्त इत्यर्थः ॥ कथं तस्यानुग्रहरूपत्वमित्यत आह । यत्र यस्मिन् मयि प्रसक्तो द्वि
जशापरूपः परावरेशः ॥ आशु भयं धत्ते आदधातीति ॥ ब्रह्मविदपचारपरिहारहेतुत्वान्निर्वेदमूलत्वात्सत्संगद्वारा मुक्त्याधायकत्वा
च्चानुग्रहरूप एवेत्यर्थः ॥१४॥ अतस्त्वेवं प्रकृतं किमित्याह ॥ तमिति । हे विप्रा भवंतः इयं देवी गंगा चैशे भगवति धृतं चित्तं येन तथाभू
तं तमुक्तविधं उपयांतमनुवर्तिनं प्रतियंतु हेयोपादेयमिश्रुषं जानंत्वित्यर्थः ॥ द्विजेनोपसृष्टः प्रचोदितः । तक्षकः । कुहकः । विस्मा
पकः ॥ मां वंचयन्नलं नितरां दशतु नाहं बिभेमीति भावः । किंतु यूयं विष्णोर्गाथाः कथा गायत कथयत अलं गायतेति वान्वयः ॥१५

भा॰ प्र॰ पुनः किंच मम भगवत्यनंते रतिर्भक्तिस्तदाश्रयेषु भगवद्भक्तेषु संगश्चास्त्वेवमनुगृह्णीतेति भावः । किंच । यां यां सृष्टिं यद्यज्जन्म प्राप्नो
१४५ मि तत्र सर्वत्र जन्मनि महत्सु भवादृशेषु मैत्री चानुकूल्यमस्तु द्विजेभ्यो वो नमः ॥१६॥ इतीत्थं निश्चययुक्तो राजा धीरः स्वसुते जनमेज
ये न्यस्तो निहितो राज्यभारो येन । तथाभूतः । समुद्रपत्न्या गंगाया दक्षिणकूले दक्षिणतीरे प्राचीनकूलेषु प्राचीनाग्रकुशेष्वास्ते स्म

पुनश्च भूयाद्भगवत्यनंते रतिः प्रसंगश्च तदाश्रयेषु ॥ महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः
॥१६॥ मू॰ त अ व इति स्म राजाध्यवसाययुक्तः प्राचीनमूलेषु कुशेषु धीरः ॥ उदङ्मुखो दक्षिणकूल आस्ते समु
द्रपत्न्याः स्वसुतन्यस्तभारः ॥१७॥ एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे दिवि देवसंघाः ॥ प्रशस्य भूमौ व्यकिरन्प्रसू
नैर्मुदा मुहुर्दुंदुभयश्च नेदुः ॥१८॥ महर्षयो वै समुपागता ये प्रशस्य साध्वित्यनुमोदमानाः ॥ ऊचुः प्रजानुग्रहशील
सारा यदुत्तमश्लोकगुणाभिरूपं ॥१९॥

उपविष्टवान् ॥१७॥ इत्थं तस्मिन्नरदेवानां देवे परीक्षिति प्रायोपविष्टे सति दिवि सर्वदेवसंघाः । तं प्रशस्य प्रसन्नमुदा प्रसूनैः । कुसुमैः
पुनः पुनर्भूमौ व्यकिरन् दुंदुभयश्च नेदुर्दध्वनुः ॥१८॥ ये समागता महर्षयस्ते सर्वे उत्तमैः श्लोक्याः । प्रशंसनीया गुणास्तैरभिरूपं रा
जानं प्रशस्य साधु साध्विति अनुमोदमानाः । ऊचुः कुतः । यद्यतस्ते प्रजास्वनुग्रहशीलं स्वभावः ॥ स एव सारो येषां ते तथाभूतत्वात्प्र १४५
शस्यानुमोदमाना ऊचुरित्यर्थः ॥१९॥

उक्तिमेवाह। त्वय्यद्भुतमिति। हे राजर्षिवर्य नितरां श्रीकृष्णमनुव्रतेष्वनुवर्तिषु भवत्सु इदं विचित्रं नैव न भवति किं तत् ये भवंतः भगवतः पार्श्वसामीप्यं कामयमानाः संतो राज्ञां किरीटैर्जुष्टं सेवितमध्यासनं सार्वभौमसिंहासनं सद्यो जहुस्त्यजुरित्येतत् ॥२०॥ एवं राजानमुक्त्वाऽऽत्मनिश्चयमाहुः सर्वे इति। यावद्भागवतानामेव प्रधानो नितरां सेव्यो यस्य सोऽसौ राजा कलेवरं विरजस्कं शुद्धसत्वमयं विशोकमिदमुप

नवाद्भुतं राजर्षिवर्य चित्रं भवत्सु कृत्स्नं समनुव्रतेषु॥ येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः ॥२०॥ सर्वे वयं तावदिहास्महेऽथ कलेवरं यावदसौ विहाय॥ लोकं परं विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः ॥२१॥ आश्रुत्य तदृषिगणवचः परीक्षित्समं मधुच्युद्गुरु चाव्यलीकं॥ आभाषतैतानभिनंद्य युक्तान् शुश्रूषमाणश्चरितानि विष्णोः ॥२२॥

लक्षणं। अपहतपाप्मत्वादिगुणाष्टकप्रादुर्भाववं देशं परलोकं नित्यविभूत्याख्यं यास्यति सर्वे वयमिहैव गंगातः ॥ संनिधावेवास्महे आसीमहि ॥२१॥ तत्समं वैषम्यरहितममृतस्रावि गुर्वाशयगंभीरमव्यलीकं निष्कपटं च मुनीनां वचनमाकर्ण्य एतान् युक्तान् हितान् आत्महिताचरणोद्युक्तान् अभिनंद्य विष्णोश्चरितानि श्रोतुकामः परीक्षिदभाषत ॥२२॥

भा०प्र० १४६ तदेवाह॥ समागता इति॥ त्रिपृष्ठे सत्यलोके यथा मूर्तिधराः वेदास्तद्वत् समानाः सर्वे यूयं सर्वतः सर्वेभ्यो दिग्भ्य इह समागताः मदनुग्र
हार्थं इह समागता इति भावः॥ तदेव व्यनक्ति॥ समागतानां वः परानुग्रहमात्मात्मशीलं विना इहामुत्र च लोके ऽर्थः प्रयोजनं कश्चिदपि
नास्ति॥ परेषु मादृशेष्वनुग्रहरूपमात्मशीलं स्वस्वभावं स्ववृत्तं वा विना ऽन्यथा गमनकारणं क्वापि नास्ति ही त्यर्थः॥२३॥ यत्ता भगव
दागमनमस्मदनुग्रहैकप्रयोजनं॥ ततो हे विप्राः वो युष्मान् विस्रम्भ्य विश्वस्येति कृत्वा तायामिति कर्तव्यतायां पृष्टव्यं इमं वक्ष्यमा

परीक्षिदुवाच॥ समागताः सर्वत एव सर्वे वेदा यथा मूर्तिधरास्त्रिपृष्ठे॥ नेहाथवामुत्र च कश्चनार्थः ऋते परानुग्रह
मात्मशीलम्॥२३॥ ततश्च वः पृच्छ्यमिमं विपृच्छे विश्रम्भ्य विप्रा इति कृत्यतायां॥ सर्वात्मना म्रियमाणैश्च कृत्यं।
शुद्धं च तत्रामृशताभियुक्ताः॥२४॥

णं वदामि॥ कर्तव्यव्यापारप्रकार इति कृत्यता तस्यां निमित्तभूतायामिति कर्तव्यताज्ञानार्थं पृष्टव्यं पृच्छामीत्यर्थः॥ पृच्छ्यमेव दर्शयन् स्त
त्सम्यक् निर्णीय कथयतेत्याह म्रियमाणैर्मुमुक्षुभिर्जनैः सर्वात्मना सर्वप्रकारेण करणत्रयेण कर्तव्यं शुद्धं संशयस्य निमित्तं च यत्तत्
कर्म तत्राभियुक्ता तद्विमर्शनाभिमुख्ययुक्ताः संतो यूयं मृशत विमृश्यत इत्यादिशतः॥ हेऽभियुक्ता इति संबोधनं वा॥२४॥॥॥॥ १४६